अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायाम् ॥ विभाषाधिकारेपि वाक्येन संज्ञानवगमादिह नित्यसमासः । उन्मत्तगङ्गं नाम देशः । लोहितगङ्गम् ॥

६७५–संज्ञा होनेपर अन्य पदार्थमें विद्यमान सुबन्तका नदीवाचक शब्दोंके साथ नित्य समास हो । विभाषाधिकार होनेपर भी वाक्यसे संज्ञाके अनवगमके कारण इस स्थलमें नित्य समास होगा, उन्मत्ता गङ्गा यस्मिन्–उन्मत्तगङ्गम्, अर्थात् इस नामका देश । लोहितगङ्गम् ॥

६७६ समासान्ताः । ५।४। ६८॥

इत्यधिकृत्य ॥

६७६–समासान्ताः इसका अधिकार करके कहतेहैं–

६७७ अव्ययीभावे शरत्प्रभृतिभ्यः । ५। ४। १०७॥

शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे । शरदः समीपमुपशरदम् । प्रतिविपाशम् । शरद् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । विश् । चेतस् । चतुर् । त्यद् । तद् । यद् । कियत् । जराया जरस् च । उपजरसम् । प्रतिपरसमनुभ्योऽक्ष्णः । यस्येति च । प्रत्यक्षम् । अक्ष्णः परमिति विग्रहे समासान्तविधानसामर्थ्यादव्ययीभावः । परोक्षे लिडिति निपातनात्परस्यौकारादेशः । परोक्षम् । परोक्षा क्रियेत्यादि तु अर्शआद्यचि । समक्षम् । अन्वक्षम् ॥

६७७–शरदादि शब्दोंके उत्तर समासान्त टच् प्रत्यय हो अव्ययीभावमें, जैसे–'शरदः समीपम्', इसवाक्यमें उप+शरद्+टच्(अ)=उपशरदम् । प्रतिविपाशम् । शरदादि यथा–शरद्, विपाश्, अनस्, मनस्, उपानह्, दिव्, हिमवत्, अनडुह्, दिश्, दृश्, विश्, चेतस्, चतुर्, त्यद्, तद्, यद्, कियत्, यह शब्द । जरा शब्दके स्थानमें जरस् आदेश और टच् प्रत्यय हो उप+जरस्+अ+अम्=उपजरसम् । प्रति, पर, सम, अनु, शब्दके परे स्थित अक्षि शब्दके उत्तर टच् प्रत्यय हो । "यस्येति च ३११" इस सूत्रसे अवर्णलोप होकर अक्ष्णः प्रति इस वाक्यमें प्रत्यक्षम् । अक्ष्णः परम् इस वाक्यमें समासान्त विधानकी सामर्थ्यके कारण अव्ययीभाव हुआ, "परोक्षे लिट् २१७१" इस सूत्रसे निपातनसे पर शब्दके अकारके स्थानमें ओकार आदेश हुआ, जैसे–परोक्षम् । 'परोक्षा क्रिया' इत्यादि स्थलमें "अर्शआदिभ्योच्" इस सूत्रसे अच् प्रत्यय करके सिद्ध हुईहै, अक्ष्णः समम्=समक्षम् अर्थात् अक्षिके योग्य । अक्ष्णः अनु=अन्वक्षम् अर्थात् आक्षिके पश्चात् ॥

६७८ अनश्च । ५ । ४ । १०८ ॥

अन्नन्तादव्ययीभावाट्टच् स्यात् ॥

६७८–अन्नन्त अव्ययीभाव समासके उत्तर टच् प्रत्यय हो ॥

६७९ नस्तद्धिते । ६ । ४ । १४४ ॥

नान्तस्य भस्य टेर्लोपः स्यात्तद्धिते । उपराजम् । अध्यात्मम् ॥

६७९–तद्धित परे रहते नान्त भसंज्ञककी टिका लोप हो, जैसे–राज्ञः समीपम् इस वाक्यमें उप+राजन्+अ+अम्=उपराजम्, आत्मनि अधि इस वाक्यमें अधि+आत्मन्+अ+अम्=अध्यात्मम्, यहां अन् भागका लोप टि होनेसे हुआहै ॥

६८० नपुंसकादन्यतरस्याम् ५।४।१०९॥

अन्नन्तं यत् क्लीवं तदन्तादव्ययीभावाट्टच् वा स्यात् । उपचर्मम् । उपचर्म ॥

६८०–अन् भागान्त जो नपुंसक तदन्त अव्ययीभाव समासमें विकल्प करके टच् हो, जैसे–चर्मणः उप=उपच-र्मन्+अ=उपचर्म+अम्=उपचर्मम्, पक्षे–उपचर्म ॥

६८१ नदीपौर्णमास्याग्रहायणीभ्यः । ५ । ४ । ११० ॥

वा टच् स्यात् । उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपाग्रहायणम् । उपाग्रहायणि ॥

६८१–नदी, पौर्णमासी, आग्रहायणी शब्दोंके उत्तर विकल्प करके टच् हो । नद्याः समीपम्–इस वाक्यमें उपनदम्, पक्षे–उपनदि । पौर्णमास्याः समीपम्=उपपौर्णमासम्, उपपौर्णमासि । आग्रहायण्याः समीपम्=उपाग्रहायणम्, उपाग्रहायणि ॥

६८२ झयः । ५ । ४ । ११२ ॥

झयन्तादव्ययीभावाट्टज्वा । उपसमिधम् । उपसमित् ॥

६८२–झयन्त अव्ययीभावके उत्तर विकल्प करके टच् हो । समिधः समीपम्=इस वाक्यमें उप+समिध्+अ+अम्= उपसमिधम्, पक्षमें–उपसमित् (२०६ सू.) ॥

६८३ गिरेश्च सेनकस्य । ५ । ४ । ११३ ॥

गिर्यन्तादव्ययीभावाट्टच् वा स्यात् । सेनकग्रहणं पूजार्थम् । उपगिरम् । उपगिरि ॥

॥ इत्यव्ययीभावः ॥

६८३–गिरिशब्दान्त अव्ययीभावके उत्तर विकल्प करके टच् हो । सेनकग्रहण पूजाके निमित्त है । गिरेः समीपम्= उपगिरम्, पक्षमें–उपगिरि ॥

॥ इत्यव्ययीभावः ॥

अथ तत्पुरुषसमासप्रकरणम् ।

६८४ तत्पुरुषः । २ । १ । २२ ॥

अधिकारोऽयं प्राग्बहुव्रीहेः ॥

६८४–"तत्पुरुषः" इसका बहुव्रीहि समासके पूर्वपर्यंत अधिकार है ॥

६८५ द्विगुश्च । २ । १ । २३ ॥

द्विगुरपि तत्पुरुषसंज्ञः स्यात् । इदं सूत्रं त्यक्तुं शक्यम् । संख्यापूर्वो द्विगुरिति पठित्वा चकारबलेन संज्ञाद्वयसमावेशस्य सुवचत्वात् । समासान्तः प्रयोजनम् । पञ्चराजम् ॥

६८५–द्विगु समास भी तत्पुरुषसंज्ञक हो । "संख्यापूर्वो द्विगुश्च" इस सूत्रमें पठित चकारसे दोनों संज्ञाओंके समावेशके सुवचत्वके कारण यह सूत्र त्याग कर सकते हैं । द्विगुकी तत्पुरुषसंज्ञा करनेका समासान्त अर्थात् टच् आदि प्रत्यय प्रयोजन होगा, जैसे–पञ्चानां राज्ञां समाहारः=इस वाक्यमें पञ्चराजम्– इत्यादि ॥

६८६ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । २ । १ । २४ ॥

द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स तत्पुरुषः । कृष्णं श्रितः कृष्णश्रितः । दुःखमतीतो दुःखातीतः ॥ गम्यादीनामुपसंख्यानम् ॥ * ॥ ग्रामं गमी ग्रामगमी । अन्नं बुभुक्षुः अन्नबुभुक्षुः ॥

६८६–श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त और आपन्नप्रकृतिक सुबन्तके साथ द्वितीयान्त पदका विकल्प करके तत्पुरुष समास हो । कृष्णं श्रितः=कृष्णश्रितः । दुःखम् अतीतः=दुःखातीतः ।

गम्यादिका भी द्वितीयान्तके साथ तत्पुरुष समास हो* जैसे–ग्रामं गमी=ग्रामगमी । अन्नं बुभुक्षुः=अन्नबुभुक्षुः । यह द्वितीयातत्पुरुष समास हुआ ॥

६८७ स्वयं क्तेन । २ । १ । २५ ॥

द्वितीयेति न सम्बध्यतेऽयोग्यत्वात् । स्वयंकृतस्याऽपत्यं स्वायंकृतिः ॥

६८७–क्तप्रत्ययान्तप्रकृतिक सुबन्तके साथ स्वयं शब्दका समास हो । अयोग्यत्वके कारण द्वितीया (६८६ सू०) के साथ इसका कोई सम्बन्ध नहीं है । स्वयंकृतस्य अपत्यम्= स्वायंकृतिः । समास न होनेपर स्वयं कातिः ऐसा होगा ॥

६८८ खट्वा क्षेपे । २ । १ । २६ ॥

खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायाम् । खट्वारूढो जाल्मः । नित्यसमासोऽयम् । न हि वाक्येन निन्दा गम्यते ॥

६८८–निन्दा अर्थ होनेपर खट्वाप्रकृतिक द्वितीयान्त पदका क्तान्तप्रकृतिक सुबन्तके साथ समास हो । खट्वा+आरूढः=खट्वारूढो जाल्मः । जाल्म नाम अविचारसे काम करनेवालेका है, वेद और व्रतको समाप्तकर खाटपर चढना चाहिये, भूमिपर शयन ब्रह्मचर्यावस्थामें नहीं कर, उस समय जो खाट पर चढता है, वह जाल्म है, वा सब ही निषिद्ध अनुष्ठानकारी खट्वारूढ कहे जायँगे । यह नित्य समास है, कारण जो वाक्यसे निन्दाकी प्रतीति नहीं होतीहै ॥

६८९ सामि । २ । १ । २७ ॥

सामिकृतम् ॥

६८९–सामि शब्द अर्द्धवाचक है । क्तप्रत्ययान्तप्रकृतिक सुबन्तके साथ सामि शब्दका समास हो । सामिकृतम् ॥

६९० कालाः । २ । १ । २८ ॥

क्तेनेत्येव अनत्यन्तसंयोगार्थं वचनम् । मासप्रमितः प्रतिपच्चन्द्रः । मासं परिच्छेत्तुमारब्धवानित्यर्थः ॥

६९०–कालवाचक शब्दका क्तप्रत्ययान्तप्रकृतिक सुबन्तके साथ समास हो । यह सूत्र अनत्यन्त संयोगके निमित्त है । मासं प्रमितः=मासप्रमितः प्रतिपच्चन्द्रः, अर्थात् मासके नियमके निमित्त प्रतिपद् (पड़वा) का आरब्धवान् चन्द्र होताहै । (माङ् माने “ आदिकर्मणि क्तः कर्त्तरि च” इससे कर्त्तामें क्त हुआ) ॥

६९१ अत्यन्तसंयोगे च । २।१।२९॥

काला इत्येव । अक्तान्तार्थं वचनम् । मुहूर्तं सुखं मुहूर्तसुखम् ॥

६९१–अत्यन्त संयोग होनेपर कालवाचक शब्दका क्तप्रत्ययान्तसे भिन्नके साथ समास हो । मुहूर्तं सुखम् (५५८)= इस विग्रहमें मुहूर्तसुखम् (मुहूर्तपर्यन्त सुख) ॥

६९२ तृतीया तत्कृतार्थेन गुणवचनेन । २ । १ । ३० ॥

तत्कृतेति लुप्ततृतीयाकम् । तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत् । शंकुलया खण्डः शंकुलाखण्डः । धान्येनार्थो धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः ॥

६९२–“तत्कृत” यह लुप्ततृतीयाक पद है । तृतीयान्तार्थकृत जो गुण तद्वाचक शब्द और अर्थ शब्द उसके साथ तृतीयान्त पदका समास हो । शंकुलया खंडः=शंकुलाखंडः । (खडि+भेदने इससे घञ् प्रत्यय करके खण्ड बना, करणमें तृतीया हुई) । धान्येन अर्थः=धान्यार्थः ।

तत्कृत यह कहनेसे ‘ अक्ष्णा काणः ’ इस स्थलमें समास नहीं हुआ, यहां तृतीयान्त ‘अक्ष्णा’ पद तो है, परन्तु आंखने काना नहीं किया, किन्तु कर्मने किया (‘कण–निमीलने’ कण्+घञ्=काणः) ॥

६९३ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः । २ । १ । ३१ ॥

तृतीयान्तमेतैः प्राग्वत् । मासपूर्वः । मातृसदृशः । पितृसमः । ऊनार्थे माषोनं कार्षापणम् । माषविकलम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः । मिश्रग्रहणे सोपसर्गस्याऽपि ग्रहणम् । मिश्रं चानुपसर्गमसन्धावित्यत्रानुपसर्गग्रहणात् । गुडसंमिश्रा धानाः ॥ अवरस्योपसंख्यानम् ॥ * ॥ मासेनावरः मासावरः ॥

६९३–पूर्व, सदृश, सम, ऊनार्थ, कलह, निपुण, मिश्र और श्लक्ष्ण शब्दके साथ तृतीयान्त पदका समास हो । मासेन पूर्वः इस वाक्यमें मासपूर्वः । मात्रा सदृशः=मातृसदृशः । पित्रा समः=पितृसमः । ऊनार्थमें यथा–माषोनम् कार्षापणम् । माषविकलम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः ।

सूत्रमें मिश्रग्रहण करनेसे सोपसर्ग मिश्र शब्दका भी ग्रहण होगा, कारण जो “ मिश्रञ्चानुपसर्गमसंधौ (३८८८) इस सूत्रमें अनुपसर्गका ग्रहण नहीं भी करनेपर सोपसर्ग मिश्र शब्दका ग्रहण नहीं होता, फिर अनुपसर्गग्रहण क्यों किया, इससे ज्ञापित होताहै कि, मिश्रग्रहण रहते सोपसर्गका भी ग्रहण होताहै, इसलिये गुडसंमिश्रा धानाः यहां भी समास हुआ ।

अवर शब्दके साथ तृतीयान्तका समास हो, * जैसे–मासेन अवरः=इस वाक्यमें मासावरः ॥

६९४ कर्तृकरणे कृता बहुलम् । २ । १ । ३२ ॥

कर्तरि करणे च तृतीया । कृदन्तेन बहुलं प्राग्वत् । हरिणा त्रातो हरित्रातः । नखैर्भिन्नो नखभिन्नः ॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ नखनिर्भिन्नः । कर्तृकरणे इति किम् । भिक्षाभिरुषितः । हेतावेषा तृतीया । बहुलग्रहणं सर्वोपाधिव्यभिचारार्थम् । तेन दात्रेण लूनवानित्यादौ न । कृता किम् । काष्ठैः पचतितराम् ॥

६९४–कर्ता और करणमें जो तृतीया, उसका कृदन्तके साथ विकल्प करके समास हो । हरिणा त्रातः=इस विग्रहमें हरित्रातः । नखैर्भिन्नः=नखभिन्नः । कृत्का ग्रहण रहनेसे गति और कारकपूर्वकका भी ग्रहण होताहै, इसलिये नखनिर्भिन्नः, यहां गतिपूर्वक कृदन्तके भी साथ समास हुआ । कर्तृकरणे ऐसा क्यों कहा ? तो कर्त्ता करणमें तृतीया न होनेपर भिक्षाभिरुषितः, अर्थात् भिक्षाके निमित्त वास करता है, इस स्थलमें हेतुमें तृतीया हुई है, कर्ता वा करणमें नहीं । इससे समास न हुआ ।

सूत्रमें बहुलग्रहण सर्वोपाधिव्यभिचारार्थ है अर्थात् जिस कारणसमूहके रहनेसे समास होताहै, उस कारणसमूहके रहनेपर भी कहीं न हो; इसी कारण ‘ दात्रेण लूनवान् ’ इत्यादिमें समास नहीं हुआ ।

“ कृता ” ग्रहण करनेसे काष्ठैः पचतितराम् इस स्थलमें समास नहीं हुआ ॥

६९५ कृत्यैरधिकार्थवचने । २ । १ । ३३ ॥

स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनं तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत् । काकपेया नदी ॥ वातच्छेद्यं तृणम् ।

६९५–स्तुति और निन्दात्मक अर्थवादवचनको अधिकार्थवचन कहतेहैं, उसमें कर्ता और करण कारकमें तृतीया का कृत्यप्रत्ययान्तके साथ पूर्ववत् समास हो, जैसे–वातेन+छेद्यम्=वातच्छेद्यम्, तृणम्, काकैः+पेया=काकपेया नदी, यहां

अत्यन्त तरङ्ग होनेके कारण काकहीसे पीने लायक इस अर्थसे स्तुति, और कम जलके कारण काकहीसे पीने योग्य न कि दूसरेसे इस अर्थसे निन्दा होती है, इसी प्रकार अत्यन्त कोमलत्वके कारण वातसे भी छेदन करने योग्य इस अर्थसे स्तुति और अत्यन्त निःसारत्वके कारण वातसे भी छेदन करने योग्य इस अर्थसे निन्दा होती है ॥

६९६ अन्नेन व्यञ्जनम् ।२ । १ ।३४॥

संस्कारकद्रव्यवाचकं तृतीयान्तमन्नेन प्राग्वत्। दध्ना ओदनो दध्योदनः । इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम् ॥

६९६-संस्कारक द्रव्यवाचक तृतीयान्तपदका अन्न शब्दके साथ पूर्ववत् समास हो, जैसे-दध्ना=ओदनः=दध्योदनः, इस स्थानमें अन्तर्भूत उपसेक क्रियाद्वारा सामर्थ्य है ॥

६९७ भक्ष्येण मिश्रीकरणम् २।१।३५॥

गुडेन धानाः गुडधानाः । मिश्रणक्रियाद्वारा सामर्थ्यम् ॥

६९७-भक्ष्यवाचक तृतीयान्तके साथ मिश्रीकरणवाचकका समास हो, जैसे-गुडेन धानाः=गुडधानाः, यहां भी मिश्रणक्रियाद्वारा सामर्थ्य जानना चाहिये ॥

६९८ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः । २ । १ । ३६ ॥

चतुर्थ्यन्तार्थाय यत्तद्वाचिनाऽर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत्। तदर्थेन प्रकृतिविकृतिभाव एव बलिरक्षितग्रहणाज्ज्ञापकात्। यूपाय दारु यूपदारु। नेह । रन्धनाय स्थाली । अश्वघासादयस्तु षष्ठीसमासाः ॥ अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् ॥*॥ द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् ॥

६९८-चतुर्थ्यन्तार्थके निमित्त जो अर्थ तद्वाचक शब्द और अर्थादि शब्दके साथ चतुर्थ्यन्तका विकल्प करके समास हो । सूत्रमें बलि और रक्षित शब्दका ग्रहण करनेसे तदर्थसे प्रकृतिविकृतिभावका ही ग्रहण होगा । यूपाय दारु=यूपदारु, परन्तु रंधनाय स्थाली इस स्थलमें प्रकृतिविकृतिभाव न होनेके कारण समास नहीं होगा । ' अश्वस्य घासः ' इत्यादि में क्योंकि तो षष्ठीतत्पुरुष समास होकर अश्वघासादि पद सिद्ध होते हैं ॥ अर्थके साथ नित्य समास और विशेष्यलिङ्गता हो ऐसा कहना चाहिये । द्विजाय अयम्=द्विजार्थः सूपः, इस स्थानमें विशेष्य पुँल्लिङ्ग है । द्विजाय इयम्=द्विजार्था यवागूः, इस स्थानमें विशेष्य स्त्रीलिङ्ग है। द्विजार्थं इदम्=द्विजार्थं पयः, इस स्थानमें विशेष्य नपुंसकलिंग है । भूताय बलिः=भूतबलिः । गवे हितम् गोहितम् । गवे सुखम्=गोसुखम् । गवे रक्षितम्=गोरक्षितम् ॥

६९९ पञ्चमी भयेन । २ । १ । ३७॥

चोराद्भयं चोरभयम् ॥ भयभीतभीतिभीभिरिति वाच्यम् ॥ * ॥ वृकभीतः ॥

६९९-भय शब्दके साथ पञ्चम्यन्त पदका समास हो । चोरात् भयम्=चोरभयम् । भय, भीत, भीति,भी,इन शब्दोंके साथ भी पञ्चम्यन्त पदका समास हो * वृकात्+भीतः=वृकभीतः ॥

७०० अपेतापोढमुक्तपतितापत्रस्तैरल्पशः । २ । १ ।३८ ॥

एतैः सहाल्पं पञ्चम्यन्तं समस्यते स तत्पुरुषः । सुखापेतः। कल्पनापोढः। चक्रमुक्तः।स्वर्गपतितः। तरङ्गापत्रस्तः । अल्पशः किम्। प्रासादात्पतितः ॥

७००-अपेत, अपोढ, मुक्त, पतित और अपत्रस्त शब्दोंके साथ अल्प पञ्चम्यन्त पदका पञ्चमीतत्पुरुष समास हो। सुखात् अपेतः=सुखापेतः । कल्पनायाः अपोढः=कल्पनापोढः । चक्रात् मुक्तः=चक्रमुक्तः । स्वर्गात् पतितः=स्वर्गपतितः। तरङ्गात् अपत्रस्तः=तरङ्गापत्रस्तः। 'अल्पशः' कहनेसे प्रासादात् पतितः, इस स्थलमें समास न हुआ ॥

७०१ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । २ ।१। ३९ ॥

स्तोकान्मुक्तः । अल्पान्मुक्तः । अन्तिकादागतः। अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रादागतः । पञ्चम्याः स्तोकादिभ्य इत्यलुक् ॥

७०१-स्तोक, अन्तिक, दूरार्थ और कृच्छ्र शब्दोंका क्तप्रत्ययान्त पदके साथ पञ्चमीतत्पुरुष समास हो । स्तोकात् मुक्तः=स्तोकान्मुक्तः । अल्पान्मुक्तः। अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रादागतः । (९५९) निषेधके कारण स्तोकादि शब्दोंके उत्तर पञ्चमीका लुक् नहीं हुआ ॥

७०२ षष्ठी । २ ।२ । ८ ॥

राज्ञः पुरुषो राजपुरुषः ॥

७०२-षष्ठ्यन्त पदका सुबन्तके साथ समास हो, जैसे-राज्ञः पुरुषः=राजपुरुषः ॥

७०३ याजकादिभिश्च ।२।२।९॥

एभिः षष्ठ्यन्तं समस्यते । तृजकाभ्यां कर्तरीत्यस्य प्रतिप्रसवोऽयम् । ब्राह्मणयाजकः । देवपूजकः ॥ गुणात्तरेण तरलोपश्चेति वक्तव्यम्॥*॥ तरबन्तं यद्गुणवाचि तेन सह समासस्तरलोपश्च। न निर्धारण इति पूरणगुणेति च निषेधस्य प्रतिप्रसवोऽयम्। सर्वेषां श्वेततरः।सर्वश्वेतः । सर्वेषां

महत्तरः। सर्वमहान्॥ कृद्योगा षष्ठी समस्यत इति वाच्यम् ॥ * ॥ इध्मस्य व्रश्चनः इध्मव्रश्चनः ॥

७०३–याजकादि शब्दोंके साथ षष्ठ्यन्त पदका समास हो । यह सूत्र "तृजकाभ्यां कर्त्तरि७०९" इस सूत्रका प्रतिप्रसव अर्थात् बाधक है । ब्राह्मणानां याजकः=ब्राह्मणयाजकः । देवानां पूजकः=देवपूजकः ।

तरप्प्रत्ययान्त गुणवाचक शब्दके साथ षष्ठ्यन्त पदका समास हो और तरका लोप हो । यह " न निर्धारणे ७०४" और " पूरणगुण० ७०५ " इन निषेधसूत्रोंका प्रतिप्रसव है । सर्वेषां श्वेततरः=सर्वश्वेतः । सर्वेषां महत्तरः=सर्वमहान् ।

कृद्योगमें षष्ठ्यन्तका सुबन्तके साथ समास हो, यह कहना चाहिये, जैसे–इध्मस्य व्रश्चनः=इध्मव्रश्चनः ॥

७०४ न निर्धारणे । २ । २ । १० ॥

निर्धारणे या षष्ठी सा न समस्यते । नृणां द्विजः श्रेष्ठः ॥ प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम् ॥ * ॥ सर्पिषो ज्ञानम् ॥

७०४–निर्द्धारणमें विहित जो षष्ठी तदन्तका समास न हो, जैसे–नृणां द्विजः श्रेष्ठः, यहां समास न हुआ ।

प्रतिपदविधाना षष्ठीका समास न हो, यह कहना चाहिये, जैसे–सर्पिषो ज्ञानम्, इस स्थानमें समास नहीं हुआ ॥

७०५ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । २ । २ । ११ ॥

पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते । पूरणे । सतां षष्ठः । गुणे काकस्य कार्ष्ण्यम् । ब्राह्मणस्य शुक्लाः । यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदेदमुदाहरणम् । अनित्योऽयं गुणेन निषेधः । तदशिष्यं संज्ञाप्रमाणत्वादित्यादिनिर्देशात् । तेनार्थगौरवं बुद्धिमान्द्यमित्यादि सिद्धम् । सुहितार्थास्तृप्त्यर्थाः । फलानां सुहितः। तृतीयासमासस्तु स्यादेव । स्वरे विशेषः । सत्। द्विजस्य कुर्वन् कुर्वाणो वा । किंकर इत्यर्थः । अव्ययम् । ब्राह्मणस्य कृत्वा । पूर्वोत्तरसाहचर्यात् कृदव्ययमेव गृह्यते । तेन तदुपरीत्यादि सिद्धमिति रक्षितः । तव्य । ब्राह्मणस्य कर्तव्यम् । तव्यता तु भवत्येव । स्वकर्तव्यम् । स्वरे भेदः। समानाधिकरणे । तक्षकस्य सर्पस्य । विशेषणसमासस्त्विह बहुलग्रहणान्न । गोर्धेनोरित्यादिषु पोटायुवतीत्यादीनां विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोऽप्यनेन वार्यते ॥

७०५–पूरणप्रत्ययान्त, गुणवाचक, सुहितार्थ, सत्, अव्यय, तव्यप्रत्ययान्त और समानाधिकरणके साथ षष्ठ्यन्तका समास न हो । पूरणमें यथा–सतां षष्ठः । गुणमें यथा–काकस्य कार्ष्ण्यम् । ब्राह्मणस्य शुक्लाः । जब प्रकरण आदिसे 'दन्ताः' यह पद विशेष्य जाना जाताहै, तब यह उदाहरण होताहै । गुणवाचकके साथ षष्ठ्यन्तके समासका निषेध अनित्य है, कारण कि, "तदशिष्यं संज्ञाप्रमाणत्वात् १२९५ " इसमें 'संज्ञाप्रमाणत्वात्' ऐसा निर्देश है । इसी कारण अर्थगौरवम्, बुद्धिमांद्यम् इत्यादि भी सिद्ध हुए । सुहितार्थ अर्थात् तृप्त्यर्थमें जैसे–फलानां सुहितः, इस स्थलमें तृतीयासमास तो हो ही गा, तब निषेधका क्या फल हुआ सो नहीं कहसकते, कारण जो स्वर विषयमें विशेष होगा । सत् यथा–द्विजस्य कुर्वन् कुर्वाणो वा अर्थात् किंकर । अव्यय जैसे–ब्राह्मणस्य कृत्वा । पूर्वोत्तरसाहचर्यके कारण कृत् अव्ययका ही ग्रहण है, ऐसा रक्षितने कहा है, इसी कारण तदुपरि इत्यादि पद सिद्ध हुए । तव्य यथा–ब्राह्मणस्य कर्तव्यम् । तव्यत्प्रत्ययके साथ तो समास होहीगा, यथा–स्वकर्तव्यम्, परन्तु स्वरमें भेद होगा । समानाधिकरणमें यथा–तक्षकस्य सर्पस्य, इस स्थानमें " विशेषणं विशेष्येण बहुलम् " इस सूत्रमें बहुलग्रहणके कारण विशेषणसमास भी नहीं हुआ ।

गोर्धेनोः इत्यादिमें "पोटायुवति० ७४४" इत्यादि सूत्रोंके विभक्त्यन्तरमें चरितार्थत्वके कारण अपवादकत्व न होनेसे परत्वात् बाधक षष्ठीसमासकी प्राप्ति होती है, परन्तु वह सूत्र भी इस सूत्रसे वारित होताहै ॥

७०६ क्तेन च पूजायाम् । २ । २ । १२ ॥

मतिबुद्धीति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते । राज्ञां मतो बुद्धः पूजितो वा । राजपूजित इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य समासः ॥

७०६–"मतिबुद्धि० ३०८९ " इस सूत्रसे विहित क्तप्रत्ययान्तके साथ षष्ठीसमास नहीं हो, जैसे–राज्ञां मतो, बुद्धः पूजितो वा । राजपूजितः–इत्यादिमें तो अतीत कालमें विहित क्तप्रत्ययान्तके साथ तृतीयासमास जानना ॥

७०७ अधिकरणवाचिना च ।२।२।१३॥

क्तेन षष्ठी न समस्यते । इदमेषामासितं गतं भुक्तं वा ॥

७०७–अधिकरणवाचकक्तप्रत्ययान्तके साथ षष्ठीसमास न हो, जैसे–इदमेषामासितम्, गतम्, भुक्तं वा ॥

७०८ कर्मणि च । २ । २ । १४ ॥

उभयप्राप्तौ कर्मणीति या षष्ठी सा न समस्यते । आश्चर्यो गवां दोहोऽगोपेन ॥

७०८–"उभयप्राप्तौ कर्मणि ६२४" इस सूत्रसे विहित जो षष्ठी तदन्तका समास न हो जैसे–आश्चर्यो गवां दोहोऽगोपेन, यहां षष्ठ्यन्तका समास न हुआ ॥

७०९ तृजकाभ्यां कर्तरि । २ । २ । १५ ॥

कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः । अपां स्रष्टा । व्रजस्य भर्ता । ओदनस्य पाचकः । क-

र्तरि किम् । इक्षूणां भक्षणमिक्षुभक्षिका । पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः । भूभर्ता । कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति । शेषषष्ठ्या समास इति कैयटः ॥

७०९-कर्तृवाच्यमें विहित जो तृच् और अक, तदन्तके साथ षष्ठ्यन्तका समास न हो । अपां स्रष्टा (तृच्), वज्रस्य भर्त्ता (तृच्), ओदनस्य पाचकः (अक) ।

कर्तृवाच्यमें प्रत्यय न होनेपर समास होगा, जैसे-इक्षूणां भक्षणम् इस विग्रहमें इक्षुभक्षिका । याजकादित्वके कारण पत्यर्थ भर्तृ शब्दका भी समास होगा, जैसे-भूभर्त्ता । इस सूत्रके रहते किस प्रकारसे "घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः" इस स्थलमें त्रिभुवन शब्दका समास हुआ ? इसपर कहतेहैं कि, कैयटने कहाहै कि, इस स्थलमें "शेषे षष्ठी" इस सूत्रसे षष्ठी हो समास हुआ है ॥

७१० कर्तरि च । २ । २ । १६ ॥

कर्तरि षष्ठ्या अकेन न समासः । भवतः शायिका । नेह तृजनुवर्तते । तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात् ॥

७१०-कर्त्तामें विहित जो षष्ठी तदन्तका, अकप्रत्ययान्तके साथ समास न हो, जैसे-भवतः शायिका । इस सूत्रमें तृच् की अनुवृत्ति नहीं आती है, कारण कि, तृच्से कर्त्ता उक्त होनेके कारण कर्तृकारकमें षष्ठी हो नहीं सकती है ॥

७११ नित्यं क्रीडाजीविकयोः । २ । २ । १७ ॥

एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते । उद्दालकपुष्पभञ्जिका । क्रीडाविशेषस्य संज्ञा । संज्ञायामिति भावे ण्वुल् । जीविकायां दन्तलेखकः । तत्र क्रीडायां विकल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनम् ॥

७११-अकप्रत्ययान्तके साथ क्रीडा और जीविका अर्थमें षष्ठ्यन्तका समास नित्य हो, जैसे-उद्दालकपुष्पभञ्जिका, यह क्रीडाविशेषकी संज्ञा है । (भञ्ज धातुके उत्तर "संज्ञायाम् ३२८९" इस सूत्रसे भावमें ण्वुल् प्रत्यय करके भञ्जिका उद्दालकः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्दालकपुष्पभञ्जिका) । जीविकार्थमें, जैसे-दन्तलेखकः, यहां क्रीडा अर्थमें, "षष्ठी"से विभाषाधिकारके कारण वैकल्पिक समास प्राप्त होनेपर और जीविकार्थमें "तृजकाभ्यां कर्तरि ७०९" इस सूत्रसे निषेधकी प्राप्ति होनेपर उन दोनोंके बाधनार्थ यह सूत्र हैं ॥

७१२ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । २ । २ । १८ ॥

अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी । षष्ठीसमासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः ॥ एकदेशिना किम् । पूर्वं नाभेः कायस्य । एकाधिकरणे किम् । पूर्वश्छात्राणाम् । सर्वोऽप्येकदेशोऽह्ना समस्यते संख्याविसायेति ज्ञापकात् । मध्याह्नः । सायाह्नः । केचित्तु सर्वं एकदेशः कालेन समस्यते न त्वह्नैव ज्ञापकस्य सामान्यापेक्षत्वात् । तेन मध्यरात्रः, उपारताः पश्चिमरात्रगोचरा इत्यादि सिद्धमित्याहुः ॥

७१२-एकत्वसंख्याविशिष्ट अवयवीके साथ पूर्वादि अर्थात् पूर्व, अपर, अधर और उत्तर शब्दका समास हो । यह सूत्र षष्ठीसमासका अपवाद है । पूर्वं कायस्य, इस वाक्यमें पूर्वकायः । अपरं कायस्य=अपरकायः-इत्यादि, एकदेशी कहनेसे पूर्वं नाभेः कायस्य, इस स्थलमें समास नहीं हुआ । एकाधिकरण कहनेसे पूर्वश्छात्राणाम्, इस स्थलमें समास नहीं हुआ ।

"संख्याविसाय० (२३८)" इससे सायपूर्वक अह्नको अहन् आदेश विधानके कारण अहन् शब्दके साथ सब एकदेशका समास हो, जैसे मध्याह्नः । अह्नः+सायः=सायाह्नः ।

कोई कहतेहैं कि, ज्ञापकके सामान्यापेक्षत्वके कारण सब एकदेशका कालवाचकके साथ समास हो, केवल अहन् शब्दके साथ ही नहीं, इसी कारण मध्यरात्रः, "उपारताः पश्चिमरात्रिगोचरात्" इत्यादि भी सिद्ध हुए ॥

७१३ अर्धं नपुंसकम् । २ । २ । २ ॥

समांशवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत् ॥ एकविभक्तावषष्ठ्यन्तवचनम् ॥ * ॥ एकदेशिसमासविषयकोयमुपसर्जनसंज्ञानिषेधः । तेन पञ्चखट्वी इत्यादि सिध्यति । अर्धं पिप्पल्याः अर्धपिप्पली । क्लीबे किम् । ग्रामार्धः । द्रव्यैक्य एव । अर्धं पिप्पलीनाम् ॥

७१३-नपुंसकलिंगमें वर्त्तमान समांशवाचक अर्द्ध शब्दका पूर्ववत् समास नित्य हो । (एकविभक्तावषष्ठ्यन्तवचनम् *) "एकविभक्ति० ६५५" से षष्ठ्यन्तसे भिन्नकी उपसर्जन संज्ञा हो, अर्थात् षष्ठ्यन्तकी उपसर्जन संज्ञा न हो । यह उपसर्जन संज्ञाका निषेध एकदेशी समासविषयक है, इसी कारण पञ्चानां खट्वानां समाहारः=पञ्चखट्वी, इत्यादि सिद्ध होतेहैं । अर्द्धं पिप्पल्याः=अर्द्धपिप्पली । नपुंसक कहनेसे ग्रामार्द्धः, इस स्थलमें अर्ध शब्द नपुंसकलिंग नहीं है । द्रव्यके न ऐक्य होनेसे अर्द्धं पिप्पलीनाम् ऐसा होगा ॥

---

१ अभिप्राय यह है कि, अर्द्धपिप्पली-इत्यादिके तरह पञ्चानां खट्वानां समाहारः=इस वाक्यमें पञ्चखट्वाघटक खट्वाकी भी उपसर्जन संज्ञाका निषेध होता तो "गोस्त्रि० ६५६" से ह्रस्वता नहीं होनेसे अदन्तत्वके अभावके कारण ङीप् "द्विगोः" से नहीं होता ॥

७१४ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । २ । २ । ३ ॥

एतान्येकदेशिना सह प्राग्वद्वा । द्वितीयं भिक्षायाः । द्वितीयभिक्षा । एकदेशिना किम् । द्वितीयं भिक्षाया भिक्षुकस्य । अन्यतरस्यांग्रहणसामर्थ्यात्पूरणगुणेतिनिषेधं बाधित्वा पक्षे षष्ठीसमासः । भिक्षाद्वितीयम् ॥

७१४–द्वितीय, तृतीय, चतुर्थ और तुर्य शब्दका एकदेशी (अवयवी) के साथ पूर्ववत् समास विकल्प करके हो, जैसे–द्वितीयं भिक्षायाः इस विग्रहमें द्वितीयभिक्षा । एकदेशी न होनेपर द्वितीयं भिक्षायाः भिक्षुकस्य, इस स्थलमें समास नहीं हुआ । " अन्यतरस्याम्" इसके ग्रहणसामर्थ्यके कारण " पूरणगुण० ७०५" सूत्रके निषेधको बाधकर पक्षमें–षष्ठीसमास होगा, जैसे–भिक्षाद्वितीयम् ॥

७१५ प्राप्तापन्ने च द्वितीयया ।२।२।४॥

पक्षे द्वितीयाश्रितेति समासः। प्राप्तो जीविकां प्राप्तजीविकः। जीविकाप्राप्तः। आपन्नजीविकः। जीविकापन्नः । इह सूत्रे द्वितीयया अ इति छित्त्वा अकारोऽपि विधीयते । तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका । आपन्नजीविका ॥

७१५–प्राप्त और आपन्न शब्दका द्वितीयान्त पदके साथ विकल्प करके समास हो । पक्षमें "द्वितीयाश्रित० ६८६" इस सूत्रसे समास होगा, जैसे–प्राप्तो जीविकाम्=प्राप्तजीविकः, जीविकाप्राप्तः । आपन्नजीविकः, जीविकापन्नः । इस सूत्रमें "द्वितीयया अ" इस प्रकार पदच्छेद करके अकार विधान भी होता है, इस कारण जीविकां प्राप्ता स्त्री=प्राप्तजीविका, आपन्न जीविका, ऐसा होगा ॥

७१६ कालाः परिमाणिना । २ ।२।५॥

परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यन्ते। मासो जातस्य यस्य स मासजातः। द्व्यहजातः । द्वयोरह्नोः समाहारो द्व्यहः । द्व्यहो जातस्येति विग्रहे ॥ उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम् ॥ * ॥ द्वे अहनी जातस्य यस्य स द्व्यह्नजातः । अह्नोऽह्न इति वक्ष्यमाणोऽह्नादेशः । पूर्वत्र तु न संख्यादेः समाहार इति निषेधः ॥

७१६–परिच्छेद्यवाचक सुबन्तके साथ कालवाचक शब्दका समास हो जैसे–मासो जातस्य यस्य सः मासजातः, द्व्यहजातः । द्वयोरह्नोः समाहारः द्व्यहः। द्व्यहो जातस्य इस विग्रहमें द्व्यहजातः ।* परिमाणवाचक उत्तरपदके साथ द्विगु समासकी सिद्धिके निमित्त बहुत पदका तत्पुरुष समास हो, जैसे–द्वे अहनी जातस्य यस्य सः द्व्यह्नजातः । "अह्नोऽह्न:० ७९०" इस सूत्रसे अह्नादेश होताहै, पहलेके प्रयोगमें तो "न संख्यादेः समाहारे ७९३" से समाहारमें अह्नादेशका निषेध हुआहै ॥

७१७ सप्तमी शौण्डैः । २ । १ । ४० ॥

सप्तम्यन्तं शौण्डादिभिः प्राग्वद्वा । अक्षेषु शौण्डः अक्षशौण्डः । अधि शब्दोत्र पठ्यते । अध्युत्तरपदादिति खः । ईश्वराधीनः ॥

७१७–शौंडादि शब्दके साथ सप्तम्यन्त पदका विकल्प करके समास हो, जैसे–अक्षेषु+शौण्डः=अक्षशौण्डः, यहां अधि शब्दको भी पढतेहैं । "–अध्युत्तरपदात्० २०७९"इस सूत्रसे खप्रत्यय हुआ, 'ख' को ईन हुआ, जैसे ईश्वराधीनः ॥

७१८ सिद्धशुष्कपक्वबन्धैश्च ।२।१।४१॥

एतैः सप्तम्यन्तं प्राग्वत् । सांकाश्यसिद्धः । आतपशुष्कः । स्थालीपक्वः । चक्रबन्धः ॥

७१८–सिद्ध, शुष्क, पक्व और बंध शब्दके साथ सप्तम्यन्तका पूर्ववत् समास हो, जैसे–साङ्काश्यसिद्धः, आतपशुष्कः, स्थालीपक्वः, चक्रबंधः ॥

७१९ ध्वाङ्क्षेण क्षेपे । २ । १ । ४२ ॥

ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायाम् । तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । तीर्थकाक इत्यर्थः ॥

७१९–निन्दा गम्यमान रहते ध्वाङ्क्षवाचक शब्दके साथ सप्तम्यन्तका पूर्ववत् समास हो, जैसे–तीर्थे ध्वाङ्क्ष इव=तीर्थध्वाङ्क्षः, अर्थात् तीर्थकाक ॥

७२० कृत्यैर्ऋणे । २ । १ । ४३ ॥

सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वदावश्यके । मासे देयमृणम् । ऋणग्रहणं नियोगोपलक्षणार्थम् । पूर्वाह्णे गेयं साम ॥

७२०–आवश्यक अर्थ गम्यमान रहते कृत्यप्रत्ययान्तके साथ सप्तम्यन्तका पूर्ववत् समास हो । मासे देयम्=ऋणम्। "तत्पुरुषे कृति०"इससे सप्तमीका अलुक्।सूत्रमें नियोगोपलक्षणार्थ अर्थात् आवश्यकोपलक्षणार्थ ऋण शब्दका ग्रहण किया है, इससे पूर्वाह्णेगेयम्–साम इत्यादिमें समास हुआ । अनावश्यकमें मासे देया भिक्षा, ऐसा होगा ॥

७२१ संज्ञायाम् । २ । १ । ४४ ॥

सप्तम्यन्तं सुपा प्राग्वत् संज्ञायाम्।वाक्येन संज्ञानवगमान्नित्यसमासोऽयम् । अरण्येतिलकाः । वनेकसेरुकाः । हलदन्तात्सप्तम्या इत्यलुक् ॥

७२१–संज्ञामें सुबन्तके साथ सप्तम्यन्तका पूर्ववत् समास हो, वाक्यसे संज्ञाका अवगम न होनेके कारण इससे नित्य समास होगा । अरण्येतिलकाः । वनेकसेरुकाः। "हलदन्तात् सप्तम्याः० ९६६" इस सूत्रसे सप्तमीका अलुक् हुआहै ॥

७२२ क्तेनाहोरात्रावयवाः। २। १। ४५॥

अह्नो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतम्। अपररात्रकृतम्। अवयवग्रहणं किम्। अह्नि दृष्टम्॥

७२२-अहन् और रात्रिके अवयववाचक सप्तम्यन्त पदका क्तान्त पदके साथ पूर्ववत् समास हो,जैसे-पूर्वाह्णकृतम्, अपररात्री कृतम्=अपररात्रकृतम्। अवयवग्रहण करनेसे अह्नि दृष्टम्, इस स्थलमें समास नहीं हुआ॥

७२३ तत्र। २। १। ४६॥

तत्रेत्येतत्सप्तम्यन्तं क्तान्तेन सह प्राग्वत्। तत्रभुक्तम्॥

७२३-"तत्र" इस सप्तम्यन्तका क्तान्तके साथ पूर्ववत् समास हो, जैसे-तत्रभुक्तम्॥

७२४ क्षेपे। २। १। ४७॥

सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायाम्। अवतप्तेनकुलस्थितं त एतत्॥

७२४-निन्दा अर्थ गम्यमान रहते क्तान्तके साथ सप्तम्यन्तका पूर्ववत् समास हो, यथा-अवतप्तेनकुलस्थितं त एतत् यहां "कृद्ग्रहणे गतिकारक०" इस परिभाषासे 'नकुलस्थित' शब्दको क्तान्तत्व हुआ और उसके साथ 'अवतप्ते' इस सप्तम्यन्तका समास होकर "तत्पुरुषे कृति बहुलम् ९७२" इससे अलुक् हुआहै॥

७२५ पात्रेसमितादयश्च। २। १। ४८॥

एते निपात्यन्ते क्षेपे। पात्रेसमिताः। भोजनसमये एव संगताः न तु कार्ये। गेहेशूरः। गेहेनर्दी। आकृतिगणोऽयम्। चकारोऽवधारणार्थः। तेनैषां समासान्तरे घटकतया प्रवेशो न। परमाः पात्रेसमिताः॥

७२५-निन्दा गम्यमान रहते 'पात्रेसमिताः' इत्यादि पदोंका निपातन करतेहैं, जैसे-पात्रेसमिताः, अर्थात् भोजनकालमें ही संगत हैं कार्यमें नहीं। जैसे-गेहेशूरः, गेहेनर्दी। यह आकृतिगण है, चकार अवधारणार्थ है, इस कारण इसका समासान्तरमें घटकतया अर्थात् अवयव होकर प्रवेश नहीं होगा, इससे परमाः पात्रेसमिताः ऐसे ही हुआ और "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ७४०" इससे समास नहीं हुआ॥

७२६ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन। २। १। ४९॥

विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रम्। एकशब्दस्य दिक्संख्ये संज्ञायामिति नियमबाधनार्थं च। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः॥

७२६-पूर्व काल, एक, सर्व, जरत्, पुराण, नव और केवल शब्दका समानाधिकरणके साथ समास हो। "विशेषणं विशेष्येण० ७३६" इस सूत्रसे समास सिद्ध होनेपर भी पूर्वनिपातके निमित्त यह सूत्र है, और एक शब्दका "दिक् संख्ये संज्ञायाम् ७२७" इस सूत्रसे जो संज्ञाविषयमें नियम कियाहै, उसके भी बाधके निमित्त है, जैसे-पूर्वं स्नातः पश्चात् अनुलिप्तः, इस विग्रहमें स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः॥

७२७ दिक्संख्ये संज्ञायाम्। २। १। ५०॥

समानाधिकरणेनेत्या पादपरिसमाप्तेरधिकारः। संज्ञायामेवेति नियमार्थं सूत्रम्। पूर्वेषु कामशमी। सप्तर्षयः। नेह। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः॥

७२७-संज्ञामें दिक् और संख्यावाचकका समानाधिकरणके साथ समास हो। पादसमाप्तिपर्यन्त 'समानाधिकरणेन' इस पदकी अनुवृत्ति चलेगी। "विशेषणं विशेष्येण०" इस सूत्रसे समास सिद्ध होनेपर भी यह सूत्र संज्ञाविषयमें ही दिक् और संख्यावाचकका समास हो, अन्यत्र नहीं, ऐसे नियमके निमित्त है, जैसे-पूर्वेषुकामशमी, सप्तर्षयः, उत्तरा वृक्षाः, पंच ब्राह्मणाः,इत्यादिमें तो संज्ञा न होनेके कारण समास नहीं हुआ॥

७२८ तद्धितार्थोत्तरपदसमाहारे च। २। १। ५१॥

तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वद्वा। पूर्वस्यां शालायां भवः पौर्वशालः। समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः॥ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः॥ * ॥ आपरशालः। पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः। तेन शालाशब्दे आकार उदात्तः। पूर्वशालाप्रियः। दिक्षु समाहारो नास्त्यनभिधानात्॥ संख्यायास्तद्धितार्थे। षण्णां मातॄणामपत्यं षाण्मातुरः। पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहाववान्तरतत्पुरुषस्य विकल्पे प्राप्ते॥ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्॥ * ॥

७२८-तद्धितार्थविषयमें उत्तरपद परे रहते और समाहारमें दिग्वाचक और संख्यावाचकका पूर्वकी समान विकल्प करके समास हो, जैसे-पूर्वस्यां शालायां भवः-इस विग्रहमें पौर्वशालः, यहां समास करनेपर "दिक्पूर्वपदादसंज्ञायां ञः १३२८" इस सूत्रसे ञप्रत्यय हुआ। सर्वनामको वृत्तिमात्रमें पुंवद्भाव हो,इससे पुंवद्भाव हुआ। वैसे आपरशालः। 'पूर्वा

शाला प्रिया यस्य–यह त्रिपद बहुव्रीहि समास करके प्रिया शब्द उत्तर पदमें रहनेसे पूर्व दो पदोंका तत्पुरुष समास हुआ, इसलिये शाला शब्दका आकार उदात्त हुआ, पूर्वशालाप्रियः। अनभिधानके कारण दिग्वाचक शब्दका समाहार नहीं होगा। संख्यावाचकका तद्धितार्थमें जैसे–षण्णां मातॄणाम् अपत्यम्–इस विग्रहमें षाण्मातुरः। पञ्च गावो धनं यस्य–ऐसे त्रिपद बहुव्रीहि समासमें अवान्तर तत्पुरुषकी विकल्प करके प्राप्ति होनेपर द्वन्द्व तथा तत्पुरुषका उत्तरपद परे रहते नित्य समास कहना चाहिये, इस वार्तिकसे अवान्तर तत्पुरुषको नित्य समास होकर–

७२९ गोरतद्धितलुकि ।५।४।९२॥

गोन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो न तद्धितलुकि। पञ्चगवधनः। पञ्चानां गवां समाहारः॥

७२९–गो शब्दान्त तत्पुरुषसे समासान्त टच् प्रत्यय हो, तद्धितलुक्में नहीं, जैसे पञ्चगवधनः। पंचानां गवां समाहारः–इस विग्रहमें "तद्धितार्थ० ७२८" इससे समास करके–

७३० संख्यापूर्वो द्विगुः ।२।१।५२॥

तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात्॥

७३०–तद्धितार्थ (७२८) से उक्त जो त्रिविध समास उसमें संख्यावाचक पदपूर्वककी द्विगु संज्ञा हो। इससे द्विगुसंज्ञा होनेपर–

७३१ द्विगुरेकवचनम् । २ । ४ । १ ॥

द्विग्वर्थः समाहार एकवत्स्यात्। स नपुंसकमिति नपुंसकत्वम्। पञ्चगवम्॥

७३१–द्विगुसंज्ञक समाहार एकवत् हो। इससे समासान्त पदको एकवद्भाव और "स नपुंसकम् (८२१)" इससे नपुंसकत्व होकर, 'पञ्चगवम्' यह सिद्ध हुआ॥

७३२ कुत्सितानि कुत्सनैः ।२।१।५३॥

कुत्स्यमानानि कुत्सनैः सह प्राग्वत्। वैयाकरणखसूचिः। मीमांसकदुर्दुरूढः॥

७३२–कुत्सनवाचक शब्दके साथ कुत्स्यमानवाचक शब्दका पूर्ववत् समास हो, जैसे–वैयाकरणखसूचिः, मीमांसकदुर्दुरूढः। (सूचयतेः "अच इः" पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयति, अभ्यासवैधुर्यात्)॥

७३३ पापाणके कुत्सितैः ।२।१।५४॥

पूर्वसूत्रापवादः। पापनापितः। अणककुलालः॥

७३३–कुत्सितवाचक शब्दके साथ पाप और अणक शब्दका समास हो यह पूर्वसूत्रका अपवाद है। पापनापितः। अणककुलालः॥

७३४ उपमानानि सामान्यवचनैः । २ । १ । ५५ ॥

घन इव श्यामो घनश्यामः। इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते। पूर्वनिपातनियमार्थं सूत्रम्॥

७३४–उपमानवाचक शब्दके साथ सामान्यवचनका समास हो, जैसे–घन इव श्यामः=घनश्यामः, इस स्थानमें पूर्वपद तत्सदृशमें लाक्षणिक है, इस सूचनाके निमित्त इव शब्द लौकिक विग्रहमें प्रयुक्त है। यह सूत्र पूर्वनिपातनियमके निमित्त है॥

७३५ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २ । १ । ५६ ॥

उपमेयं व्याघ्रादिभिः सह प्राग्वत्साधारणधर्मस्याप्रयोगे सति। विशेष्यस्य पूर्वनिपातार्थं सूत्रम्। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृतिगणः। सामान्याप्रयोगे किम्। पुरुषो व्याघ्र इव शूरः॥

७३५–साधारण धर्मका अप्रयोग हो तो व्याघ्रादि शब्दोंके साथ उपमेयवाचक शब्दका पूर्ववत् समास हो। विशेष्यके पूर्वनिपातके निमित्त यह सूत्र कियाहै, जैसे–पुरुषः व्याघ्र इव=पुरुषव्याघ्रः, ना सोम इव=नृसोमः। व्याघ्रादि आकृतिगण है।

सामान्यके प्रयोग होनेपर, यथा–पुरुषो व्याघ्र इव शूरः, इस स्थलमें समास नहीं हुआ॥

७३६ विशेषणं विशेष्येण बहुलम् । २ । १ । ५७ ॥

भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलम्। बहुलग्रहणात् क्वचिन्नित्यम्। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः॥

७३६–समानाधिकरण भेद्यके साथ भेदकका पूर्ववत् बहुलप्रकारसे समास हो, जैसे–नीलञ्च तत् उत्पलम्=नीलोत्पलम्। बहुलग्रहणके कारण कहीं नित्य समास होगा, जैसे–कृष्णसर्पः। कहीं कहीं समास नहीं होगा, जैसे–रामो जामदग्न्यः॥

७३७ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च । २ । १ । ५८ ॥

पूर्वनिपातनियमार्थमिदम्। पूर्ववैयाकरणः। अपराध्यापकः॥ अपरस्यार्धे पश्चभावो वक्तव्यः*। अपरश्चासावर्धश्च पश्चार्धः। कथमेकवीर इति। पूर्वकालैकेति बाधित्वा परत्वादनेन समासे वीरैक इति हि स्यात्। बहुलग्रहणाद्भविष्यति॥

७३७–पूर्व, अपर, प्रथम, चरम, जघन्य, समान, मध्य, मध्यम और वीर शब्दका समानाधिकरण भेद्यके साथ बहुलप्रकारसे समास हो। यह सूत्र पूर्वनिपातनियमके निमित्त है, जैसे–पूर्ववैयाकरणः, अपराध्यापकः। * अर्द्ध शब्द परे रहते अपर शब्दके स्थानमें पश्च आदेश हो। अपरश्चासौ अर्द्धश्चेति=पश्चार्द्धः।

"पूर्वकालैक० ७२६" इस सूत्रको बाध करके परत्वके कारण इस सूत्रसे समास होनेपर 'वीरैकः' ऐसा पद सिद्ध होगा, तब 'एकवीरः' यह शब्द कैसे हुआ? इस आशंकापर कहतेहैं कि, इस सूत्रमें अनुवृत्त बहुलग्रहणके कारण 'एकवीरः' पद सिद्ध होगा ॥

७३८ श्रेण्यादयः कृतादिभिः।२।१।५९॥

श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम् ॥ * ॥ अश्रेणयः श्रेणयः कृताः श्रेणीकृताः ॥

७३८-श्रेणी आदि शब्दोंका कृतादिके साथ समास हो। इस सूत्रमें प्रथम आदि शब्द व्यवस्थावाची, द्वितीय आदि शब्द प्रकारवाची हैं। एक शिल्प अथवा एक पण्यसे जो जीवन धारण करे,उसके समूहको श्रेणी कहतेहैं। च्व्यर्थ(अभूततद्भाव) गम्यमान रहते ही श्रेण्यादिका कृतादिके साथ समास हो, ऐसा कहना चाहिये,जैसे-अश्रेणयः श्रेणयः कृताः=श्रेणीकृताः-इत्यादि ॥

७३९ क्तेन नञ्विशिष्टेनानञ्।२।१।६०॥

नञ्विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते। कृतं च तदकृतं च कृताकृतम् ॥ शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्॥*॥ शाकप्रियः पार्थिवः शाकपार्थिवः। देवब्राह्मणः॥

७३९-नञ्युक्त क्तान्तके साथ नञ्विहीन क्तान्त पदका समास हो, जैसे-कृतञ्च तत् अकृतञ्च=कृताकृतम्। शाकपार्थिवादिसिद्धिके निमित्त उत्तरपदलोपका उपसंख्यान करना चाहिये, जैसे-शाकप्रियः पार्थिवः=शाकपार्थिवः, देवप्रियः ब्राह्मणः=देवब्राह्मणः ॥

७४० सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।२।१।६१॥

सद्वैद्यः। वक्ष्यमाणेन महत आकारः। महावैयाकरणः। पूज्यमानैः किम्। उत्कृष्टो गौः। पंकादुद्धृत इत्यर्थः॥

७४०-पूज्यमानवाचक शब्दके साथ सत्, महत्, परम और उत्कृष्ट शब्दका समास हो, जैसे-सद्वैद्यः। वक्ष्यमाण सूत्रसे महत् शब्दको आ होकर महावैयाकरणः।पूज्यमानवाचक न होनेपर यथा- उत्कृष्टो गौः (पंकमेंसे निकाली हुई गौ) इस स्थानमें गौको पूज्यमान न होनेके कारण समास नहीं हुआ ॥

७४१ वृन्दारकनागकुञ्जरैः पूज्यमानम्।२।१।६२॥

गोवृन्दारकः। व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनम्।

७४१-वृन्दारक, नाग और कुञ्जर शब्दके साथ पूज्यमानवाचक शब्दका समास हो, जैसे गोवृन्दारकः। वृन्दारक शब्दसे देवता, नाग शब्दसे अजगर सर्प और कुञ्जर शब्दसे हाथी जानना। व्याघ्रादिके आकृतिगण होनेसे ही यह बात सिद्ध थी, परन्तु सामान्य धर्मवाचकका जहां प्रयोग हो, वहां भी समासके निमित्त यह वचन कहा है ॥

७४२ कतरकतमौ जातिपरिप्रश्ने। २।१।६३॥

कतरकठः। कतरकलापः। गोत्रं च चरणैः सहेति जातित्वम्॥

७४२-जातिपरिप्रश्नार्थमें समानाधिकरणके साथ कतर और कतम शब्दका समास हो, जैसे-कतरकठः, कतमकलापः, इस स्थानमें "गोत्रञ्च चरणैः सह" इस पारिभाषिक लक्षणसे जातित्व हुआ है ॥

७४३ किं क्षेपे।२।१।६४॥

कुत्सितो राजा। किं राजा। यो न रक्षति॥

७४३-निन्दा गम्यमान रहते किम् शब्दका समानाधिकरणके साथ समास हो, जैसे-कुत्सितो राजा=किंराजा, अर्थात् जो राजा रक्षा न करै ॥

७४४ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः।२।१।६५॥

७४४-पोटा, युवति, स्तोक, कतिपय, गृष्टि, धेनु, वशा, वेहत्, वष्कयणी, प्रवक्तृ, श्रोत्रिय, अध्यापक और धूर्त शब्दोंके साथ जातिवाचक शब्दका समास हो ॥

७४५ तत्पुरुषः समानाधिकरणः कर्मधारयः।१।२।४२॥

७४५-समानाधिकरण तत्पुरुषकी कर्मधारय संज्ञा हो ॥

७४६ पुंवत्कर्मधारयजातीयदेशीयेषु।६।३।४२॥

कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्पर ऊङभावो यस्मिंस्तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया।तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री। दत्तभार्या। पञ्चमभार्या। स्रौघ्नभार्या। सुकेशभार्या। ब्राह्मणभार्या। एवं पाचकजातीया पाचकदेशीयेत्यादि। इभपोटा। पोटा स्त्रीपुंसलक्षणा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयम्। गृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवप्रसूतिका। गोधेनुः। वशा वन्ध्या। गोवशा। वेहद्गर्भघातिनी। गोवेहत्। वष्कयणी तरुणवत्सा। गोवष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्तः॥

७४६-कर्मधारयमें, जातीय और देशीय प्रत्ययके परे

भाषितपुंस्कके उत्तर ऊङ्का अभाव हो जिसमें ऐसे स्त्रीवाचक पूर्वपदको पुंवद्भाव हो । इस सूत्रसे पूरणी, प्रियादि परे रहते अप्राप्त जो पुंवद्भाव उसका विधान कियाहै, जैसे—महानवमी (नवानां पूरणी "तस्य पूरणे डट्" "नान्तादसंख्यादेर्मट्" टित्वान्ङीप्) महती चासौ नवमी ऐसे विग्रहमें समास होकर पूरणप्रत्ययान्त स्त्रीवाचक शब्द परे रहते भी स्त्रीवाचक पूर्वपद (महती) को पुंवद्भाव तदुत्तर, महत् शब्दको आकार हुआ,तब 'महानवमी' पद बना, वैसे कृष्णचतुर्दशी, महाप्रिया । "न कोपधायाः ८३८" इत्यादि सूत्रोंसे कोपधादिके प्रतिषिद्ध पुंवद्भावका भी कर्मधारयादिमें प्रतिप्रसव (विधान) इस सूत्रसे होताहै, जैसे—पाचकस्त्री, दत्तभार्या, पञ्चमभार्या, स्रौघ्नभार्या, सुकेशभार्या, ब्राह्मणभार्या । इसी प्रकार पाचकजातीया (पाचकप्रकारवती) पाचकदेशीया—इत्यादि। पाचकजातीयामें "प्रकारवचने जातीयर्" से जातीयर् और पाचकदेशीयामें "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इससे थोडी असमाप्तिमें देशीयर् प्रत्यय हुआ । पोटादि यथा—इभी चासौ पोटा=इभपोटा, पोटा अर्थात् स्त्रीपुरुषलक्षणवाली । इभयुवतिः । अग्निस्तोकः । उदश्वित् । कतिपयम् । गृष्टिः अर्थात् पहलौनब्याईहुई गौ, गोगृष्टिः । धेनुः अर्थात् नवप्रसूतिका—गोधेनुः । वशा अर्थात् वन्ध्या—गोवशा । वेहत् अर्थात् गर्भघातिनी—गोवेहत् । बष्कयणी अर्थात् तरुणवत्सा—गोबष्कयणी। कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः ॥

७४७ प्रशंसावचनैश्च । २ । १ । ६६ ॥

एतैः सह जातिः प्राग्वत् । गोमतल्लिका । गोमचर्चिका । गोप्रकाण्डम् । गवोद्धः । गोतल्लजः । प्रशस्ता गौरित्यर्थः । मतल्लिकादयो नियतलिङ्गा न तु विशेष्यनिघ्नाः । जातिः किम् । कुमारी मतल्लिका ॥

७४७—प्रशंसावाचक शब्दोंके साथ जातिवाचकका समास हो, यथा—गौः चासौ मतल्लिका=गोमतल्लिका, गोमचर्चिका, गोप्रकाण्डम्, गवोद्धः, गोतल्लजः अर्थात् प्रशस्त गौ । मतल्लिकादि शब्द नियतलिङ्ग हैं । विशेष्यनिघ्न नहीं हैं । जातिवाचक न होनेपर जैसे—कुमारी मतल्लिका-इत्यादिमें समास न हुआ, कारण कि, यहां कुमारी शब्द जातिवाचक नहीं है ॥

७४८ युवा खलतिपलितवलिनजरतीभिः । २ । १ । ६७ ॥

पूर्वनिपातनियमार्थं सूत्रम् । लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते । युवा खलतिः युवखलतिः । युवतिः खलती युवखलती । युवजरती । युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात्सामानाधिकरण्यम् ॥

७४८—खलति, पलित, वलिन और जरती शब्दके साथ युवन् शब्दका समास हो । यह सूत्र पूर्वनिपातनियमार्थ है । "प्रातिपदिकग्रहणे०" इस परिभाषासे लङ्गविशिष्ट युवति शब्दका भी पूर्ववत् समास होगा । 'युवा खलतिः' इस विग्रहमें युवखलतिः । युवतिः खलती=युवखलती । युवजरती, यहां युवतिमें ही जरतीधर्मकी उपलब्धिसे तद्रूप (जरतीस्वरूप) के आरोपके कारण युवति शब्दके साथ जरतीका सामानाधिकरण्य जानना ॥

७४९ कृत्यतुल्याख्या अजात्या।२।१।६८।

भोज्योष्णम् । तुल्यश्वेतः । सदृशश्वेतः । अजात्या किम् । भोज्य ओदनः । प्रतिषेधसामर्थ्याद्विशेषणसमासोऽपि न ॥

७४९—कृत्यप्रत्ययान्त शब्द और तुल्याख्य शब्दका जातिवाचकसे भिन्नके साथ समास हो, जैसे—भोज्योष्णम्,तुल्यश्वेतः, सदृशश्वेतः। जातिभिन्न न होनेपर, जैसे—भोज्य ओदनः, इस स्थलमें समास नहीं हुआ और प्रतिषेधकी सामर्थ्यसे विशेषणसमास भी नहीं होगा ॥

७५० वर्णो वर्णेन । २ । १ । ६९ ॥

समानाधिकरणेन सह प्राग्वत्।कृष्णसारङ्गः॥

७५०—समानाधिकरण वर्णवाचक शब्दके साथ वर्णवाचकका समास हो, जैसे—कृष्णश्चासौ सारंगः=कृष्णसारङ्गः ॥

७५१ कडाराः कर्मधारये ।२।२।३८॥

कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः । कडारजैमिनिः । जैमिनिकडारः ॥

७५१—कर्मधारय समासमें कडार आदि शब्द विकल्प करके पूर्वमें प्रयुक्त हों, जैसे—कडारश्चासौ जैमिनिः=कडारजैमिनिः, जैमिनिकडारः ॥

७५२ कुमारः श्रमणादिभिः ।२।१।७०॥

कुमारी श्रमणा कुमारश्रमणा । इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिंगाः पठ्यन्ते । लिंगविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यम् ॥

७५२—श्रमणादि शब्दके साथ कुमार शब्दका समास हो, जैसे—कुमारी चासौ श्रमणा=कुमारश्रमणा । श्रमणादि गणमें श्रमणा, प्रव्रजिता, गर्भिणी—इत्यादि स्त्रीलिङ्ग शब्द पढे गये हैं, लिंगविशिष्ट परिभाषाका यही ज्ञापक समझना[1] ॥

७५३ चतुष्पादो गर्भिण्या । २।१।७१॥

चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत् । गोगर्भिणी ॥

---

[1] मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनीत्यमरः । अर्थात् मतल्लिका, मचर्चिका, प्रकाण्ड, उद्ध, तल्लज इतने शब्द प्रशस्तवाचक हैं, यह अमरकोशसे जानाजाताहै ॥

[1] आशय यह है कि, श्रमणादि शब्दोंको स्त्रीलिङ्ग होनेके कारण 'कुमार' शब्दके साथ सामानाधिकरण्य होगा नहीं, कुमारी शब्दसे होगा पर उसका सूत्रमें उपादान है नहीं, फिर उन शब्दोंका गणमें जो पाठ किया उसके सामर्थ्यसे "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" यह परिभाषा ज्ञापित होतीहै ॥

७५३–चतुष्पाद् जातिवाचकका गर्भिणी शब्दके साथ समास हो, जैसे–गौः चासौ गर्भिणी=गोगर्भिणी । यहां "पोटायुवति०" इस सूत्रसे 'जातिः' इसकी मण्डूकप्लुति न्यायसे अनुवृत्ति होती है, इससे 'कालाक्षी गर्भिणी' यहां समास न हुआ ॥

७५४ मयूरव्यंसकादयश्च ।२।१।७२॥

एते निपात्यन्ते । मयूरो व्यंसकः मयूरव्यंसकः। व्यंसको धूर्तः। उदक्चावाक्च उच्चावचम्। निश्चितं च प्रचितं च निश्चप्रचम् । नास्ति किंचन यस्य सः अकिंचनः । नास्ति कुतो भयं यस्य सोऽकुतोभयः। अन्यो राजा राजान्तरम् । चिदेव चिन्मात्रम्। आख्यातमाख्यातेन क्रियासातत्ये॥ अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता । पचतभृज्जता । खादतमोदता॥ एहीडादयोऽन्यपदार्थे ॥ ॥ एहीड इति यस्मिन् कर्मणि तदेहीडम् । एहियवम् । उद्धर कोष्ठादुत्सृज देहीति यस्यां क्रियायां सा उद्धरोत्सृजा । उद्धमविधमा । असातत्यार्थमिह पाठः ॥ जहि-कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति॥ ॥ जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत्कर्ताऽभिधीयत इत्यर्थः । जहिजोडः। जहिस्तम्बः ॥ अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादौ द्रष्टव्यः॥

७५४–मयूरव्यंसकादि शब्द निपातनसे सिद्ध हों, जैसे–मयूरो व्यंसकः=मयूरव्यंसकः, व्यंसक यह धूर्तकी संज्ञा है । उदक् च अवाक् च=उच्चावचम् । निश्चितञ्च प्रचितञ्च= निश्चप्रचम् । नास्ति किंचन यस्य सः अकिंचनः । नास्ति कुतो भयं यस्य सः=अकुतोभयः । अन्यो राजा=राजान्तरम्, चिदेव=चिन्मात्रम् ।

क्रियासातत्यमें आख्यातके साथ आख्यातका समास हो, जैसे अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा=अश्नीतपिबता । पचतभृज्जता, खादतमोदता–इत्यादिभी इसी प्रकार जानने ।

अन्यपदार्थमें एहीडादि पदका समास हो । एहीड इति यस्मिन् कर्मणि तत्=एहीडम् । एहियवम् । उद्धर कोष्ठादुत्सृज देहीति यस्यां क्रियायां सा=उद्धरोत्सृजा । उद्धमविधमा । यहां असातत्यार्थ इस गणसूत्रका पाठ है ।

पौनःपुन्य गम्यमान रहते यदि समाससे कर्त्ताका कथन होता हो तो कर्मके साथ'जहि'का बहुल प्रकारसे समास हो। जहि जोडमिति आभीक्ष्ण्येन य आह सः=जहिजोडः । जहिस्तम्बः । जिसका तत्पुरुष समास किसीसे विहित नहीं है, उसका मयूरव्यंसकादिगणमें पाठ समझना ॥

७५५ ईषदकृता ।२।२।७॥

ईषत्पिङ्गलः॥ ईषद्गुणवचनेनेति वाच्यम्॥*॥ ईषद्रक्तम् ॥

७५५–कृत्प्रत्ययान्तसे भिन्न पदके साथ ईषत् शब्दका समास हो, जैसे–ईषत्पिङ्गलः ।

गुणवाचक शब्दके साथ ईषत् शब्दका समास हो, यह कहना चाहिये * ईषद्रक्तम् ॥

७५६ नञ् ।२।२।६॥

नञ् सुपा सह समस्यते ॥

७५६–सुबन्तके साथ नञ्का समास हो ॥

७५७ नलोपो नञः ।६।३।७३॥

नञो नस्य लोपः स्यादुत्तरपदे । न ब्राह्मणः अब्राह्मणः ॥

७५७–उत्तरपद परे रहते नञ्के नकारका लोप हो, जैसे–न ब्राह्मणः=अब्राह्मणः ॥

७५८ तस्मान्नुडचि ।६।३।७४॥

लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात् । अनश्वः । अर्थाभावेऽव्ययीभावेन सहायं विकल्पते । रक्षोहागमलध्वसंदेहाः प्रयोजनमिति अद्रुतायामसंहितमिति च भाष्यवार्तिकप्रयोगात् । तेनानुपलब्धिरविवादोऽविघ्नमित्यादि सिद्धम् ॥ नञो नलोपस्तिङि क्षेपे ॥ * ॥ अपचसि त्वं जाल्म । नैकधेत्यादौ तु नशब्देन सह सुपेति समासः ॥

७५८–लुप्तनकारक नञ्से परे अजादि उत्तरपदको नुडागम हो, जैसे–न अश्वः=अनश्वः ।

अर्थाभावमें अव्ययीभाव समासके साथ यह समास विकल्प करके होताहै अर्थात् पक्षमें अव्ययीभाव भी होताहै, कारण कि 'रक्षोहागमलध्वसन्देहाः प्रयोजनम्', 'अद्रुतायामसंहितम्' इन (भाष्य तथा वार्त्तिक) में तत्पुरुष करके–'असन्देहाः'और अव्ययीभाव करके'असंहितम्'यह प्रयोग कियेहैं,नहीं तो अर्थाभावमें 'निर्मक्षिकम्' इत्यादि स्थलमें अव्ययीभावको चरितार्थ होनेसे परत्वसे'असंहितम्'इत्यादि प्रयोगोंमें तत्पुरुष ही हो जाता, उपरोक्त ज्ञापन होनेपर असंहितम्, अविघ्नम्, अविवादः,अनुपलब्धिः, असन्देहः–इत्यादि सिद्ध हुए ।

निन्दामें तिङन्त पद परे रहते नञ्के नकारका लोप हो * जैसे–अपचसि त्वं जाल्म ।

'नैकधा' इत्यादिमें नके साथ "सह सुपा ६४९" इससे समास होगा ॥

७५९ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ।६।३।७५॥

पादिति शत्रन्तः । वेदा इत्यसुन्नन्तः । न सत्या असत्याः न असत्या नासत्याः । न मुञ्चतीति नमुचिः । न कुलमस्य । न खमस्य । न स्त्री पुमान्। स्त्रीपुंसयोः पुंसकभावो निपातनात्।

न क्षरतीति नक्षत्रम् । क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते । न क्रामतीति नक्रः । क्रमेर्डः । न अकमस्मिन्निति नाकः ॥

७५९–नभ्राट्,नपात्,नवेदाः,नासत्याः, नमुचि,नकुल,नख, नपुंसक,नक्षत्र,नक्र,नाक,इनके नकारका लोप न हो(यह स्वाभाविक नकारयुक्त हैं)। पात् यह शतृप्रत्ययान्त है । वेदाः यह असुन्नन्त है । न सत्याः=असत्याः,न असत्याः=नासत्याः। न मुञ्चतीति=नमुचिः । न कुलमस्य नकुलः । न खम् अस्य=नखः । न स्त्री पुमान्=नपुंसकम्, यहां स्त्रीपुंसको इस सूत्रसे निपातनसे पुंसक आदेश हुआ है । न क्षरतीति=नक्षत्रम् । क्षीयतेः क्षरतेर्वा क्षत्रम्, यह निपातनसे सिद्ध हुआहै । न क्रामतीति= नक्रः, यहां निपातनसे क्रम् धातुसे डप्रत्यय हुआहै । न अकमस्मिन्निति=नाकः ॥

७६० नगोऽप्राणिष्वन्यतरस्याम् । ६ । ३ । ७७ ॥

नग इत्यत्र नञ् प्रकृत्या वा । नगाः, अगाः, पर्वताः । अप्राणिष्विति किम् । अगो वृषलः शीतेन । नित्यं क्रीडेत्यतो नित्यमित्यनुवर्तमाने॥

७६०–अप्राणी होनेपर नग शब्दके नकारका विकल्प करके लोप न हो, जैसे–नगाः, अगाः, पर्वताः । प्राणी होनेपर जैसे–अगो वृषलः शीतेन, अर्थात् शूद्र शीतके कारण अचल होताहै ।

"नित्यं क्रीडा० ७११" इस सूत्रसे 'नित्यम्' पदकी अनुवृत्ति होनेपर– ॥

७६१ कुगतिप्रादयः ।२।२।१८॥

एते समर्थेन नित्यं समस्यन्ते । कुत्सितः पुरुषः कुपुरुषः । गतिश्चेत्यनुवर्तमाने ॥

७६१–कु, गतिसंज्ञक शब्द और प्रादिका सुबन्तके साथ नित्य समास हो, जैसे–कुत्सितः पुरुषः=कुपुरुषः ।

"गतिश्च" इस सूत्रसे गति शब्दकी अनुवृत्ति होनेपर–॥

७६२ ऊर्यादिच्विडाचश्च।१।४।६१॥

एते क्रियायोगे गतिसंज्ञाः स्युः । ऊरीकृत्य। शुक्लीकृत्य । पटपटाकृत्य ॥ कारिकाशब्दस्योपसंख्यानम्॥*॥कारिका क्रिया । कारिकाकृत्य॥

७६२–ऊरी आदि शब्द,च्विप्रत्ययान्त शब्द और डाच्प्रत्ययान्त शब्दोंकी क्रियायोगमें गतिसंज्ञा हो । च्वि, डाच् प्रत्यय कृ, भू, अस् धातुके योगमें होते हैं, उनके साहचर्यसे ऊर्यादि शब्द भी पूर्वोक्त धातुके योगहीमें गतिसंज्ञक होंगे, इसलिये 'ऊरी पक्त्वा' यहां गतिसंज्ञा नहीं होती है, माधवादिग्रन्थमें तो 'आविः, प्रादुः, शब्दको छोडकर और सब शब्दोंको 'कृ' धातुके योगहीमें गतिसंज्ञा है'ऐसा स्थित है, वैसेही उदाहरण देतेहैं।ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य।।* कारिका शब्दकी गतिसंज्ञा हो, कारिका अर्थात् क्रिया। कारिकाकृत्य ॥

७६३ अनुकरणं चानितिपरम्।१।४।६२॥

खाट्कृत्य । अनितिपरं किम् । खाडिति कृत्वा निरष्ठीवत् ॥

७६३–इति शब्दसे भिन्न शब्द परे रहते अनुकरण शब्दकी गतिसंज्ञा हो, जैसे–खाट्कृत्य ।

'अनितिपरम्' कहनेसे 'खाडिति कृत्वा निरष्ठीवत्' यहां गतिसंज्ञा न हुई, नहीं तो समास होकर क्त्वाको ल्यप् आदेश होजाता ॥

७६४ आदरानादरयोः सदसती । १ । ४ । ६३ ॥

सत्कृत्य । असत्कृत्य ॥

७६४–आदरार्थमें सत् शब्द और अनादारमें असत् शब्दकी गतिसंज्ञा हो, जैसे–सत्कृत्य । असत्कृत्य ॥

७६५ भूषणेऽलम् । १ । ४ । ६४ ॥

अलंकृत्य । भूषणे किम् । अलंकृत्वौदनं गतः। पर्याप्तमित्यर्थः । अनुकरणमित्यादित्रिसूत्री स्वभावात् कृञ्विषया ॥

७६५–भूषणार्थमें अलम् शब्दकी गतिसंज्ञा हो, जैसे– अलंकृत्य । भूषणार्थ न होनेपर जैसे–'अलंकृत्वा ओदनं गतः' इस स्थानमें पर्याप्त अर्थ होनेके कारण गतिसंज्ञा नहीं हुई।

"अनुकरणञ्चानितिपरम् ७६३"इस सूत्रसे "भूषणेऽलम्" इस सूत्रतक तीन सूत्र स्वभावसे कृ धातुके योगमें लगते हैं ॥

७६६ अन्तरपरिग्रहे । १ ।४। ६५ ॥

अन्तर्हत्य । मध्ये हत्वेत्यर्थः । अपरिग्रहे किम्। अन्तर्हत्वा गतः। हतं परिगृह्य गत इत्यर्थः॥

७६६–परिग्रहसे भिन्न अर्थमें अन्तर शब्दकी गति संज्ञा हो, जैसे–अन्तर्हत्य, अर्थात् मध्यमें हनन करके गया ।

'अपरिग्रह' क्यों कहा ? तो 'अन्तर्हत्वा गतः' (मारे हुएको लेकर गया) यहां गति संज्ञा न हो ॥

७६७ कणेमनसी श्रद्धाप्रतीघाते । १ । ४ । ६६ ॥

कणेहत्य पयः पिबति । मनोहत्य । कणे शब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्तते । मनःशब्दोऽप्यत्रैव ॥

७६७–श्रद्धाका प्रतिघात हो तो, कणे और मनस् शब्दकी गति संज्ञा हो, जैसे कणे हत्य पयः पिबति । मनोहत्य । कणे शब्द सप्तमीप्रतिरूपक निपात है, इसका अर्थ अत्यन्त अभिलाषा है, मनस् शब्दका भी यही अर्थ है। श्रद्धाप्रतीघात न होनेपर कणे हत्वा ॥

७६८ पुरोऽव्ययम् । १।४ । ६७ ॥

पुरस्कृत्य ॥

७६८ पुरस् इस अव्यय शब्दकी गति संज्ञा हो, जैसे–पुरस्कृत्य ॥

७६९ अस्तं च । १ । ४ । ६८ ॥

अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात् । अस्तंगत्य ॥

७६९—अस्तम् इस मकारान्त अव्यय शब्दकी गति संज्ञा हो, जैसे—अस्तंगत्य ॥

७७० अच्छ गत्यर्थवदेषु।१।४।६९॥

अव्ययमित्येव । अच्छगत्य । अच्छोद्य । अभिमुखं गत्वा उक्त्वा चेत्यर्थः । अव्ययं किम् । जलमच्छं गच्छति ॥

७७०—गत्यर्थ और वद् धातु परे रहते अच्छ इस अव्ययकी गति संज्ञा हो, जैसे-अच्छगत्य, अच्छोद्य, अर्थात् अभिमुखमें जाकर तथा कहकर ।

अव्यय न होनेपर, जैसे—जलमच्छं गच्छति, अर्थात् निर्मल जल जाताहै, इस स्थानमें गति संज्ञा नहीं हुई ॥

७७१ अदोनुपदेशे । १ । ४ । ७० ॥

अदःकृत्य अदःकृतम् । परं प्रत्युपदेशे प्रत्युदाहरणम् । अदः कृत्वा अदः कुरु ॥

७७१—उपदेश न हो तो अदस् शब्दकी गति संज्ञा हो, जैसे—अदःकृत्य अदः कृतम् ।

अन्यके प्रति उपदेश होनेपर यथा—अदः कृत्वा अदः कुरु॥

७७२ तिरोऽन्तर्धौ । १ । ४ । ७१ ॥

तिरोभूय ॥

७७२—अन्तर्द्धान अर्थमें तिरस् शब्दकी गति संज्ञा हो, जैसे—तिरोभूय ॥

७७३ विभाषा कृञि । १ । ४ । ७२ ॥

तिरस्कृत्य । तिरःकृत्य । तिरः कृत्वा ॥

७७३—कृ धातु परे रहते तिरस् शब्दकी विकल्प करके गति संज्ञा हो, गति संज्ञाके अभाव पक्षमें समास और "तिरसोऽन्यतरस्याम्" इससे सत्व नहीं होगा, जैसे तिरस्कृत्य,तिरःकृत्य, तिरः कृत्वा ॥

७७४ उपाजेऽन्वाजे । १ । ४ । ७३ ॥

एतौ कृञि वा गतिसंज्ञौ स्तः । उपाजेकृत्य । उपाजे कृत्वा । अन्वाजेकृत्य । अन्वाजे कृत्वा । दुर्बलस्य बलमाधायेत्यर्थः ॥

७७४—कृ धातु परे रहते उपाजे और अन्वाजे शब्दकी विकल्प करके गति संज्ञा हो । यह दो शब्द एकारान्त विभक्तिप्रतिरूपक निपात हैं, उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा (दुर्बलका बलाधान करके) ॥

७७५ साक्षात्प्रभृतीनि च । १ । ४ । ७४ ॥

कृञि वा गतिसंज्ञानि स्युः ॥ च्व्यर्थ इति वाच्यम् ॥ * ॥ साक्षात्कृत्य । साक्षात्कृत्वा । लवणंकृत्य । लवणं कृत्वा । मान्तत्वं निपातनात् ॥

७७५—कृ धातु परे रहते च्विप्रत्ययार्थमें साक्षात् प्रभृति शब्दकी विकल्प करके गति संज्ञा हो, जैसे—साक्षात्कृत्य, साक्षात् कृत्वा । लवणंकृत्य, लवणं कृत्वा । निपातनसे मकारान्तत्व हुआ है ॥

७७६ अनत्याधान उरसिमनसी । १ । ४ । ७५ ॥

उरसिकृत्य । उरसि कृत्वा । अभ्युपगम्येत्यर्थः । मनसिकृत्य । मनसि कृत्वा । निश्चित्येत्यर्थः । अत्याधानमुपश्लेषणं तत्र न । उरसि कृत्वा पाणिं शेते ॥

७७६—कृ धातु परे रहते अनत्याधान अर्थमें उरसि और मनसि शब्दकी विकल्प करके गति संज्ञा हो, जैसे—उरसिकृत्य, उरसि कृत्वा,अर्थात् अभ्युपगम करके।मनसिकृत्य,मनसि कृत्य, अर्थात् मनमें निश्चयकरके । अत्याधान अर्थात् उपश्लेष होनेपर न होगा, जैसे—'उरसि कृत्वा पाणि शेते'यहां न हुआ ॥

७७७ मध्ये पदे निवचने च । १ । ४ । ७६ ॥

एते कृञि वा गतिसंज्ञाः स्युरनत्याधाने । मध्येकृत्य।मध्ये कृत्वा। पदेकृत्य।पदे कृत्वा।निवचनेकृत्य । निवचने कृत्वा । वाचं नियम्येत्यर्थः ॥

७७७—कृ धातु परे रहते अनत्याधान अर्थमें मध्ये, पदे और निवचने शब्दोंकी विकल्प करके गति संज्ञा हो, जैसे—मध्येकृत्य, मध्ये कृत्वा । पदेकृत्य, पदे कृत्वा । निवचनेकृत्य, निवचने कृत्वा, अर्थात् वाक्यसंयम करके । अनत्याधान अर्थमें इन तीनों शब्दोंको एदन्तत्व निपातन है ॥

७७८ नित्यं हस्ते पाणावुपयमने । १ । ४ । ७७ ॥

कृञि । उपयमनं विवाहः । स्वीकारमात्रमित्यन्ये । हस्तेकृत्य । पाणौकृत्य ॥

७७८—कृ धातु परे रहते उपयम अर्थात् विवाह अर्थमें किसीके मतसे स्वीकार अर्थमें हस्ते और पाणौ शब्दकी गति संज्ञा हो, जैसे—हस्तेकृत्य पाणौकृत्य ॥

७७९ प्राध्वं बन्धने । १ । ४ । ७८ ॥

प्राध्वमित्यव्ययम् । प्राध्वंकृत्य । बन्धनेनानुकूल्यं कृत्वेत्यर्थः । प्रार्थनादिना त्वानुकूल्यकरणे। प्राध्वं कृत्वा ॥

७७९—कृ धातु परे रहते बन्धन अर्थमें प्राध्वम् शब्दकी गतिसंज्ञा हो, जैसे—प्राध्वंकृत्य अर्थात् बंधनसे आनुकूल्य करके ।

प्रार्थनादिसे आनुकूल्य करण हो तो न हो, जैसे—प्राध्वं कृत्वा ॥

७८० जीविकोपनिषदावौपम्ये । १ । ४ । ७९ ॥

जीविकामिव कृत्वा जीविकाकृत्य । उपनिषदमिव कृत्वा उपनिषत्कृत्य । औपम्ये किम् ।

जीविकां कृत्वा । प्रादिग्रहणमगत्यर्थम् । सुपुरुषः । अत्र वार्तिकानि ॥ प्रादयो गताद्यर्थे प्रथमया ॥*॥ प्रगत आचार्यः प्राचार्यः ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ * ॥ अतिक्रान्तो मालामतिमालः ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया ॥ * ॥ अवक्रुष्टः कोकिलया अवकोकिलः ॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ * ॥ परिग्लानोऽध्ययनाय पर्यध्ययनः ॥ निरादयः क्रान्ताद्यर्थे पञ्चम्या ॥ * ॥ निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः ॥ कर्मप्रवचनीयानां प्रतिषेधः ॥ * ॥ वृक्षं प्रति ॥

७८०–औपम्यार्थमें जीविका और उपनिषद् शब्दकी गति संज्ञा हो, जैसे–' जीविकामिव कृत्वा ' इस वाक्यमें जीविकाकृत्य । उपनिषदमिव कृत्वा=उपनिषत्कृत्य ।

औपम्यार्थ न होनेपर गति संज्ञा न होगी, जैसे–जीविकां कृत्वा । " कुगतिप्रादयः " इस सूत्रमें प्रादिग्रहण अगत्यर्थ है अर्थात् जहां गति संज्ञा नहीं हुई है वहां भी प्रादिके समासके निमित्त है, नहीं तो क्रियायोगहीमें गति संज्ञा होनेसे ' सुपुरुषः '–इत्यादिमें समास नहीं होता ।

इस स्थलमें वार्त्तिक हैं–

गतादि अर्थमें प्रथमान्तके साथ प्रादिका समास हो* जैसे–प्रगतः आचार्यः=प्राचार्यः ।

क्रान्तादि अर्थमें अत्यादि शब्दोंका द्वितीयान्तके साथ समास हो * जैसे–अतिक्रान्तो मालाम्=अतिमालः ।

क्रुष्टादि अर्थमें तृतीयान्त पदके साथ अवादि शब्दोंका समास हो * जैसे–अवक्रुष्टः कोकिलया=अवकोकिलः ।

ग्लानादि अर्थमें चतुर्थ्यन्तके साथ परि आदि शब्दोंका समास हो * जैसे–परिग्लानोऽध्ययनाय=पर्यध्ययनः ।

क्रान्तादि अर्थमें पञ्चम्यन्तके साथ निरादि अव्यय शब्दका समास हो * जैसे–निष्क्रान्तः कौशाम्ब्याः=निष्कौशाम्बिः ।

कर्मप्रवचनीयसंज्ञक शब्दका समास न हो * जैसे–वृक्षंप्रति–इत्यादि ॥

७८१ तत्रोपपदं सप्तमीस्थम् ।३।१।९२॥

सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात् ॥

७८१–सप्तम्यन्त जो 'कर्मणि' (२९१३) इत्यादि पद, उसमें वाच्यत्वरूपसे स्थित जो कुम्भादि, तद्वाचक जो पद, वह उपपदसंज्ञक हो, और उपपद संज्ञा होनेपर ही वक्ष्यमाण प्रत्यय हो ॥

७८२ उपपदमतिङ् । २ । २ । १९ ॥

उपपदं सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्चायं समासः । कुम्भं करोतीति कुम्भकारः । इह कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यम् । अतिङ् किम् । मा भवान् भूत् । माङि लुङिति सप्तमीनिर्देशान्माङुपपदम् । अतिङ्ग्रहणं ज्ञापयति सुपेत्येतन्नेहानुवर्तत इति । पूर्वसूत्रेपि गतिग्रहणं पृथक्कृत्यातिङ्ग्रहणं तत्रापकृष्यते सुपेति च निवृत्तम् । तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धम् ॥ व्याघ्री । अश्वक्रीती । कच्छपी ॥

७८२–उपपद सुबन्तका समर्थके साथ नित्य समास हो । यह अतिङन्त अर्थात् तिङन्तसे भिन्नका समास है, जैसे–' कुंभं करोति ' इस वाक्यमें कुंभकारः, यहां कुंभ+अस्+कार, यह अलौकिक प्रक्रियावाक्य है ।

अतिङ् कहनेसे–'मा भवान् भूत् ' इस स्थानमें समास नहीं हुआ । " माङि लुङ् २२१९ " इस सूत्रमें सप्तमीनिर्देशके कारण माङ् यह उपपद है ।

यहां अतिङ्ग्रहणके सामर्थ्यसे " सह सुपा " इससे 'सुपा' की अनुवृत्ति नहीं आती है, और पूर्व सूत्र (कुगतिप्रादयः) में भी गतिग्रहणको अलग करके अतिङ्का इस सूत्रसे अपकर्षण है, इससे वहां भी 'सुपा' इसकी निवृत्ति हुई, तब "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" अर्थात् गति, कारक और उपपदोंका सुबुत्पत्तिसे पहले ही कृदन्तके साथ समास हो, यह परिभाषा फलित हुई, इससे व्याघ्री, अश्वक्रीती, कच्छपी, यह सब सिद्ध हुए, नहीं तो ' व्याजिघ्रति ' इस विग्रहमें " आतश्चोपसर्गे " इससे क प्रत्यय और जातिवाचक न होनेसे टाप्, तब सुप् प्रत्यय और समास, तब अदन्त न होनेसे " जातेरस्त्रीविषयादयोपधात् " इससे ङीप् नहीं होता, वैसे ही 'अश्वेन क्रीता' इस विग्रहमें समास तब अदन्त न होनेसे " क्रीतात् करणपूर्वात् " से ङीप् नहीं होता, वैसे ही 'कच्छेन पिबति' इस विग्रहमें " सुपि " इस योगविभागसे कप्रत्यय हुआ, तदुत्तर समाससे पहले जातिवाचक न होनेसे वा समासोत्तर अदन्त न होनेसे ङीप् न होता, पूर्वोक्त ज्ञापन होनेपर सब सिद्ध होते हैं ॥

७८३ अमैवाव्ययेन । २ । २ । २० ॥

अमैव तुल्यविधानं यदुपपदं तदेवाऽव्ययेन सह समस्यते । स्वादुंकारम् । नेह । कालसमयवेलासु तुमुन् । कालः समयो वेला वा भोक्तुम् । अमैवेति किम् । अग्रे भोजम् । अग्रे भुक्त्वा । विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ । अमा चान्येन च तुल्यविधानमेतत् ॥

७८३–अम्से ही तुल्यविधान जो उपपद अर्थात् जिस उपपदमें जिस वाक्यसे अम् ही विहित हो ऐसे उपपदका अव्ययके साथ समास हो, जैसे–स्वादुंकारम् । जिस स्थानमें " कालसमयवेलासु तुमुन् ३१७९ " इस सूत्रसे तुमुन् प्रत्यय हुआ है, उस स्थानमें समास न होगा, जैसे–कालः

समयो वेला वा भोक्तुम्। 'अमैव' इस पदका ग्रहण करनेसे अग्रे भोजम्, अग्रे भुक्त्वा, इस स्थलमें "विभाषाग्रेप्रथमपूर्वे० ३३४५" इस सूत्रसे क्त्वा, और णमुल् इन दोनों प्रत्ययोंके विधानके कारण 'अग्रे' यह उपपद अम्से और दूसरेसे भी तुल्यविधान है, केवल अम्से ही तुल्यविधान नहीं है, इससे समास नहीं हुआ ॥

७८४ तृतीयाप्रभृतीन्यन्यतरस्याम्। २।२।२१॥

उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाऽव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं भुङ्क्ते। मूलकोपदंशम्॥

७८४-"उपदंशस्तृतीयायाम् ३३६८" इत्यादिसूत्रविषयक उपपदोंका अमन्त अव्ययके साथ विकल्प करके समास हो, जैसे-मूलकेनोपदंशं भुंक्ते=मूलकोपदंशम्॥

७८५ क्त्वा च। २।२।२२॥

तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य। उच्चैः कृत्वा। अव्यये यथाभिप्रेतेति क्त्वा। तृतीयाप्रभृतीनीति किम्। अलंकृत्वा। खलु कृत्वा॥

७८५-क्त्वाप्रत्ययान्तके साथ तृतीयान्त आदि उपपदोंका विकल्प करके समास हो, जैसे-उच्चैःकृत्य, उच्चैः कृत्वा, इस स्थानमें "अव्ययेऽयथाभिप्रेताख्याने ३३८१" इस सूत्रसे क्त्वा प्रत्यय हुआहै।

तृतीया आदि कहनेसे अलं कृत्वा, खलु कृत्वा-इत्यादिमें समास नहीं हुआ॥

७८६ तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः। ५।४।८६॥

संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलं दारु। निर्गतमङ्गुलिभ्यो निरंगुलम्॥

७८६-जिस तत्पुरुष समासके आदिमें संख्यावाचक शब्द हो अथवा अव्यय हो और अन्तमें अंगुलि शब्द हो उस (तत्पुरुष) से समासान्त अच् प्रत्यय हो, जैसे-द्वे अंगुली प्रमाणमस्य-द्वि+अंगुली+अ=द्व्यंगुलम् दारु (दो अंगुल प्रमाणकी लकडी)। निर्गतमंगुलिभ्यः-निर्+अंगुली+अ+अम्=निरंगुलम् (जो अंगुलीसे निकल गया)॥

७८७ अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः। ५।४।८७॥

एभ्यो रात्रेरच् स्याच्चात्संख्याव्ययादेः। अहर्ग्रहणं द्वन्द्वार्थम्। अहश्च रात्रिश्चाहोरात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वं रात्रेः पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारो द्विरात्रम्। अतिक्रान्तो रात्रिमतिरात्रः॥

७८७-अहन्, सर्व, एकदेश, संख्यात, पुण्य और अव्यय, इन शब्दोंके परे स्थित रात्रि शब्दसे अच् प्रत्यय हो। अहर्ग्रहण द्वन्द्वार्थ है, जैसे-अहश्च रात्रिश्च=अहोरात्रः। सर्वा चासौ रात्रिः=सर्वरात्रः। पूर्वं रात्रेः=पूर्वरात्रः। संख्याता चासौ रात्रिः=संख्यातरात्रः। पुण्या चासौ रात्रिः=पुण्यरात्रः। द्वयो रात्र्योः समाहारः=द्विरात्रम्। अतिक्रान्तो रात्रिम्=अतिरात्रः॥

७८८ राजाहस्सखिभ्यष्टच्। ५।४।९१॥

एतदन्तात्तत्पुरुषाट्टच् स्यात्। परमराजः। अतिराजी। कृष्णसखः।

७८८-राजन्, अहन् और सखि शब्दके उत्तर समासान्त टच् प्रत्यय हो, जैसे-परमश्चासौ राजा=परमराजः। अतिराजी। कृष्णसखः॥

७८९ अह्नष्टखोरेव। ६।४।१४५॥

टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः क्रतुः। तद्धितार्थे द्विगुः। तमधीष्ट भृतो इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ रात्र्यहःसंवत्सराच्चेति खः। लिंगविशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी मद्रराज्ञी॥

७८९-टच् और ख प्रत्यय परे रहते ही अहन् शब्दकी टिका लोप हो, अन्यत्र न हो, जैसे-उत्तममहः-उत्तमाहः। द्वे अहनी भृतः=द्व्यहीनः, क्रतुः। तद्धितार्थमें समास करके द्विगु संज्ञा, "तमधीष्ट० १७४४" इस सूत्रके अधिकारमें "द्विगोर्वा" इसकी अनुवृत्ति होनेपर "रात्र्यहःसंवत्सराच्च १७५१" इस सूत्रसे अहन् शब्दके उत्तर ख प्रत्यय करके 'द्व्यहीनः' पद सिद्ध हुआ॥

लिङ्गविशिष्ट परिभाषाके अनित्यत्वके कारण मद्राणां राज्ञी=मद्रराज्ञी, इस स्थलमें टच् और टिका लोप नहीं हुआ॥

७९० अह्नोऽह्न एतेभ्यः। ५।४।८८॥

सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात्समासान्ते परे॥

७९०-समासान्त परे रहते सर्वादिसे परे स्थित अहन् शब्दके स्थानमें अह्नादेश हो॥

७९१ अह्नोऽदन्तात्। ८।४।७॥

अदन्तपूर्वपदस्थाद्रेफात्परस्याह्नोऽह्नादेशस्य नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नोर्भवः। कालाट्ठञ्। द्विगोर्लुगनपत्ये इति ठञो लुक्। द्व्यह्नः। स्त्रियामदन्तत्वाट्टाप्। द्व्यह्ना। द्व्यह्नप्रियः। अत्यह्नः॥

७९१-अदन्तपूर्वपदस्थ रेफके परे स्थित अहन् शब्दके स्थानमें अह्न आदेशके न को ण हो, जैसे-सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। 'द्वयोरह्नोर्भवः' इस विग्रहमें "कालाट्ठञ् १३८१" इस सूत्रसे ठञ्, "द्विगोर्लुगनपत्ये १०८०" इस सूत्रसे ठञ्का लोप हुआ, जैसे-द्व्यह्नः। स्त्री लिङ्गमें अदन्तत्वके कारण टाप् होगा, जैसे-द्व्यह्ना। द्व्यह्नप्रियः। अत्यह्नः॥

७९२ क्षुभ्नादिषु च । ८ । ४ । ३९ ॥

एषु णत्वं न स्यात् । दीर्घाह्नी प्रावृट् । एवं चैतदर्थमह्न इत्यदन्तानुकरणे क्लेशो न कर्तव्यः । प्रातिपदिकान्तेतिणत्ववारणाय क्षुभ्नादिषु पाठस्यावश्यकत्वात् । अदन्तादितितपरकरणान्नेह । परागतमहः पराह्नः ॥

७९२ क्षुभ्नादिके नकारको णत्व न हो, जैसे—दीर्घाह्नी प्रावृट् । 'दीर्घाह्नी'यहां णत्व न हो इस कारण "अह्नोऽदन्तात्" इस सूत्रमें अह्न इस अदन्तानुकरणमें क्लेश करना नहीं चाहिये, कारण कि, "प्रातिपदिकान्त० १०५५" इस सूत्रसे प्राप्त णत्वनिषेधके निमित्त क्षुभ्नादिके मध्यमें पाठकी तो आवश्यकता ही है, इसीसे "७९१"से प्राप्त णत्वका भी निषेध हो जायगा। "अदन्तात्" इस तपरकरणके कारण आकारान्त पूर्वपद रहते णत्व नहीं होगा, जैसे—परागतमहः=पराह्नः ॥

७९३ न संख्यादेः समाहारे ।५।४।८९॥

समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात् । संख्यादेरिति स्पष्टार्थम् । द्वयोरह्नोः समाहारो द्व्यहः । त्र्यहः ॥

७९३—समाहारमें वर्तमान संख्यावाचकके परे स्थित अहन् शब्दके स्थानमें अह्नादेश न हो ।

'संख्यादेः' ऐसा कहना स्पष्टताके निमित्त है कारण कि, समाहारमें संख्यादिका ही सम्भव है, जैसे—द्वयोरह्नोः समाहारः द्व्यहः । त्र्यहः ॥

७९४ उत्तमैकाभ्यां च ।५। ४। ९० ॥

आभ्यामह्नादेशो न । उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह । पुण्यैकाभ्यामित्येव सूत्रयितुमुचितम् । पुण्याहम् । सुदिनाहम् । सुदिनशब्दः प्रशस्तवाची । एकाहः । उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थमित्येके । संख्याताहः ॥

७९४—उत्तम और एक शब्दके उत्तर अह्नादेश न हो । उत्तम शब्द अन्त्यवाचक है, इससे पुण्य शब्द लिया गया, तब "पुण्यैकाभ्याम्" इस प्रकार सूत्र करना उचित था । पुण्यं च तत् अहः=पुण्याहम् । सुदिनं च तत् अहः= सुदिनाहम् । सुदिन शब्द प्रशस्तवाची है । एकाहः । कोई कहतेहैं कि उपान्त्यके भी ग्रहणके निमित्त उत्तम शब्दका ग्रहण किया है, जैसे—संख्यातं च तत् अहः=संख्याताहः ॥

७९५ अग्राख्यायामुरसः । ५ ।४।९३॥

टच् स्यात् । अश्वानामुर इव अश्वोरसम् । मुख्योश्व इत्यर्थः ॥

७९५—अग्र अर्थात् प्रधानवाचक उरस् शब्दके उत्तर टच् हो, यथा—अश्वानामुर इव=अश्वोरसम्, अर्थात् मुख्य अश्व ॥

७९६ अनोश्मायस्सरसां जातिसंज्ञयोः । ५ । ४ । ९४ ॥

टच् स्याज्जातौ संज्ञायां च । उपानसम् । अमृताश्मः । कालायसम् । मण्डूकसरसमितिजातिः । महानसम् । पिण्डाश्मः । लोहितायसम् । जलसरसमिति संज्ञा ॥

७९६—जाति और संज्ञामें अनस्, अश्मन्, अयस् और सरस् शब्दके उत्तर टच् हो । जातिमें यथा—उपगतम् अनः=उपानसम् । अमृतस्य अश्मा=अमृताश्मः । कालं च तत् अयः=कालायसम् । मण्डूकस्य सरः=मण्डूकसरसम् । संज्ञा अर्थमें महत् च तत् अनः=महानसम् । पिण्डस्य अश्मा= पिण्डाश्मः । लोहितं च तदयः=लोहितायसम् । जलस्य सरः=जलसरसम् ॥

७९७ ग्रामकौटाभ्यां च तक्ष्णः ।५।४।९५॥

ग्रामस्य तक्षा ग्रामतक्षः । साधारण इत्यर्थः । कुट्यां भवः कौटः स्वतन्त्रः स चासौ तक्षा च कौटतक्षः ॥

७९७—ग्राम और कौट शब्दके परे स्थित तक्षन् शब्दके उत्तर टच् प्रत्यय हो, जैसे—ग्रामस्य तक्षा=ग्रामतक्षः—अर्थात् साधारण । कुट्यां भवः=कौटः, अर्थात् स्वतंत्र, स चासौ तक्षा च=कौटतक्षः ॥

७९८ अतेः शुनः । ५ । ४ । ९६ ॥

अतिश्वो वराहः । अतिश्वी सेवा ॥

७९८—अति शब्दके परे स्थित श्वन् शब्दके उत्तर टच् प्रत्यय हो, जैसे—श्वानमतिक्रान्तो जवेन=अतिश्वो वराहः । अतिश्वी सेवा, अर्थात् नीच ॥

७९९ उपमानादप्राणिषु ।५। ४। ९७॥

अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात् । आकर्षः श्वेव आकर्षश्वः । अप्राणिषु किम् । वानरः श्वेव वानरश्वा ॥

७९९—अप्राणिविषयक उपमानवाचक जो श्वन् शब्द, उसके उत्तर टच् हो, जैसे—आकर्षः श्वेव=आकर्षश्वः ।

प्राणि अर्थमें जैसे—वानरः श्वेव=वानरश्वा, इस स्थानमें टच् नहीं हुआ ॥

८०० उत्तरमृगपूर्वाच्च सक्थ्नः ।५।४।९८॥

चादुपमानात् । उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । फलकमिव सक्थि फलकसक्थम् ॥

८००—उत्तर, मृग और पूर्व शब्दके परे स्थित सक्थि शब्दके उत्तर टच् हो, चकारसे उपमानवाचकके उत्तर भी होगा, जैसे—उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । फलकमिव सक्थि=फलकसक्थम् ॥

---

१ आकृष्यतेऽनेन खलादिगतं धान्यमित्याकर्षः काष्ठविशेषः ॥

८०१ नावो द्विगोः । ५ । ४ । ९९ ॥

नौशब्दान्ताद्विगोष्टच् स्यान्न तु तद्धितलुकि । द्वाभ्यां नौभ्यामागतः द्विनावरूप्यः । द्विगोर्लुगनपत्य इत्यत्र अचीत्यस्यापकर्षणाद्धलादेर्न लुक् । पञ्चनावप्रियः । द्विनावम् । त्रिनावम् । अतद्धितलुकीति किम् । पञ्चभिर्नौभिः क्रीतः पञ्चनौः ॥

८०१-नौशब्दान्त द्विगु समासके उत्तर टच् हो, परन्तु तद्धितलुक् होनेपर न हो, जैसे-द्वाभ्यां नौभ्यामागतः=द्विनावरूप्यः, यहां "द्विगोर्लुगनपत्ये १०८०" इस सूत्रमें 'अचि' इस पदके आकर्षणके कारण हलादि 'रूप्य' प्रत्ययका लुक् न हुआ । पञ्चनावप्रियः । द्विनावम् । त्रिनावम् ।

'अतद्धितलुकि' कहनेसे पञ्चभिर्नौभिः क्रीतः=पञ्चनौः, यहां टच् न हुआ ॥

८०२ अर्धाच्च । ५ । ४ । १०० ॥

अर्धान्नावष्टच् स्यात् । नावोर्धम् । अर्धनावम् । क्लीबत्वं लोकात् ॥

८०२-अर्द्ध शब्दके परे स्थित नौ शब्दके उत्तर टच् प्रत्यय हो, जैसे-अर्द्ध नावः=अर्द्धनावम्, इस स्थलमें नपुंसकत्व लौकिकप्रसिद्ध है ॥

८०३ खार्याः प्राचाम् । ५ । ४ । १०१ ॥

द्विगोरर्धाच्च खार्याष्टज्वा स्यात् । द्विखारम् । द्विखारि । अर्धखारम् । अर्धखारि ॥

८०३-खारीशब्दान्त द्विगु और अर्द्ध शब्दके परे स्थित खारी शब्दके उत्तर विकल्प करके टच् हो, जैसे-द्विखारम्, द्विखारि । अर्द्धखारम्, अर्द्धखारि ॥

८०४ द्वित्रिभ्यामञ्जलेः । ५ । ४ । १०२ ॥

टज्वा स्याद् द्विगौ । द्व्यञ्जलम् । द्व्यञ्जलि । अतद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः ॥

८०४-द्विगु समासमें द्वि और त्रि शब्दके परे स्थित अञ्जलि शब्दके उत्तर विकल्प करके टच् हो, जैसे-द्व्यञ्जलम्, द्व्यञ्जलि । अतद्धितलुक्में ही यह सूत्र लगताहै, इससे द्वाभ्याम् अञ्जलिभ्यां क्रीतः=द्व्यञ्जलिः, यहां तद्धितलुक्के कारण टच् प्रत्यय न हुआ ॥

८०५ ब्रह्मणो जानपदाख्यायाम् । ५ । ४ । १०४ ॥

ब्रह्मान्तात्तत्पुरुषाट्टच् स्यात्समासेन जानपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः ॥

८०५-समाससे जानपदत्वका कथन हो तो, ब्रह्मशब्दान्त तत्पुरुषके उत्तर टच् हो, जैसे-सुराष्ट्रे ब्रह्मा=सुराष्ट्रब्रह्मः ॥

१ "हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ४।३।८१" इससे रूप्य प्रत्यय हुआ ॥

८०६ कुमहद्भ्यामन्यतरस्याम् ५।४।१०५

आभ्यां ब्रह्मणो वा टच् स्यात् तत्पुरुषे । कुत्सितो ब्रह्मा कुब्रह्मः । कुब्रह्मा ॥

८०६-कु और महत् शब्दके परे स्थित ब्रह्म शब्दके उत्तर विकल्प करके टच् हो, जैसे-कुत्सितो ब्रह्मा=कुब्रह्मः, कुब्रह्मा ॥

८०७ आन्महतः समानाधिकरणजातीययोः । ६ । ३ । ४६ ॥

महत आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे । महाब्रह्मः । महाब्रह्मा । महादेवः । महाजातीयः । समानाधिकरणे किम् । महतः सेवा महत्सेवा । लाक्षणिकं विहाय प्रतिपदोक्तः सन्महदितिसमासो ग्रहीष्यत इति चेत् महाबाहुर्न स्यात् । तस्माल्लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषा नेह प्रवर्तते समानाधिकरणग्रहणसामर्थ्यात् । आदिति योगविभागादात्वं प्रागेकादशभ्य इति निर्देशाद्वा । एकादश । महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वम् । महाजातीया ॥ महदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च ॥ * ॥ असामानाधिकरण्यार्थमिदम् । महतो महत्या वा घासो महाघासः । महाकरः । महाविशिष्टः ॥ अष्टनः कपाले हविषि ॥*॥ अष्टाकपालः ॥ गवि च युक्ते ॥*॥ गोशब्दे परे युक्त इत्यर्थे गम्येऽष्टन आत्वं स्यात् । अष्टागवं शकटम् । अच्प्रत्यन्ववेत्यत्राऽजिति योगविभागादड्बहुव्रीहावप्यच् । अष्टानां गवां समाहारः अष्टगवम् । तद्युक्तत्वाच्छकटमष्टागवमिति वा ॥

८०७-समानाधिकरण उत्तर पद और जातीय प्रत्यय परे रहते महत् शब्दको आकार अन्तादेश हो, जैसे-महाब्रह्मः, महाब्रह्मा । महादेवः । महाजातीयः ।

समानाधिकरण न होनेपर जैसे-महतः सेवा=महत्सेवा ।

यदि लाक्षणिकको त्याग करके प्रतिपदोक्त "सन्महत्० ७४०" इस सूत्रसे विहित समासका ग्रहण करेंगे तो 'महाबाहुः' ऐसा पद न होगा, इस कारण "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्" इस परिभाषाकी समानाधिकरणग्रहणकी सामर्थ्यके कारण इस स्थानमें प्रवृत्ति नहीं होती है ।

'आत्' इस योगविभागके कारण "प्रागेकादशभ्यः० १९९५" इस सूत्रनिर्देशके कारण आत्व करके 'एकादश' यह पद सिद्ध हुआ ।

महती शब्दको "पुंवत्कर्मधारय० ७४६" इस सूत्रसे पुंवद्भाव होनेपर आत्व होगा, जैसे-महाजातीया।

घास, कर और विशिष्ट शब्द परे रहते महती शब्दको आकार आदेश और पुंवद्भाव हो * यह वार्त्तिक असामानाधिकरण्यके निमित्त है। महतो महत्या वा घासः=महाघासः। महतो महत्या वा करः=महाकरः। महतो महत्या वा विशिष्टः=महाविशिष्टः।

हविष् वाच्य रहते तथा कपाल शब्द परे रहते अष्टन् शब्दको आकार हो, जैसे-अष्टाकपालः।

युक्त अर्थ हो तो गो शब्दके पूर्वमें स्थित अष्टन् शब्दको आकार हो, यथा-अष्टागवं शकटम्, यहां "अच् प्रत्यन्वव०" इस सूत्रमें 'अच्' इस योगविभाग अर्थात् भिन्न सूत्रकरनेके कारण बहुव्रीहि समासमें भी अच् हुआ। अष्टानां गवां समाहारः=अष्टगवम्। वा तद्युक्तत्वके कारण 'अष्टागवं शकटम्' ऐसा होगा।

८०८ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः। ६। ३। ४७॥

आत्स्यात्। द्वौ च दश च द्वादश। द्व्यधिका दशेति वा। द्वाविंशतिः। अष्टादश। अष्टाविंशतिः। अबहुव्रीह्यशीत्योः किम्। द्वित्राः। द्व्यशीतिः॥ प्राक् शताद्वक्तव्यम्॥ * ॥ नेह द्विसहस्रम्॥

८०८-संख्यावाचक पद परे रहते द्वि शब्द और अष्टन् शब्दको आकार हो और बहुव्रीहि समासमें और अशीति शब्द परे रहते न हो, जैसे-द्वौ च दश च=द्वादश, द्व्यधिका दश इति वा। द्वाविंशतिः। अष्टादश। अष्टाविंशतिः।

बहुव्रीहि समासमें और अशीति शब्द परे रहते यथा-द्वित्राः। द्व्यशीतिः। यहां आत्व न हुआ। शत संख्यासे न्यून संख्यावाचक शब्द परे रहते ही आत्व हो। इसी कारण द्विशतम्, द्विसहस्रम्, इस स्थलमें आत्व नहीं हुआ॥

८०९ त्रेस्त्रयः। ६। ३। ४८॥

त्रिशब्दस्य त्रयः स्यात्पूर्वविषये। त्रयोदश। त्रयोविंशतिः। बहुव्रीहौ तु। त्रिर्दश त्रिदशाः। प्राक् सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक् शतादित्येव। त्रिशतम्। त्रिसहस्रम्॥

८०९-पूर्व विषयमें त्रि शब्दके स्थानमें त्रयस् आदेश हो, जैसे-त्रयोदश। त्रयोविंशतिः। बहुव्रीहि समासमें तो त्रिर्दश=त्रिदशाः, इस स्थलमें सुच्के अर्थमें बहुव्रीहि हुआ है। अशीति शब्द परे रहते, जैसे-त्र्यशीतिः। शत शब्दके पूर्वमें न होनेपर, जैसे-त्रिशतम्, त्रिसहस्रम्, इस प्रकार होंगे॥

८१० विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्। ६। ३। ४९॥

द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत्। द्वाचत्वारिंशत्। अष्टचत्वारिंशत्। अष्टाचत्वारिंशत्। त्रिचत्वारिंशत्। त्रयश्चत्वारिंशत्। एवं पञ्चाशत्षष्टिसप्ततिनवतिषु॥

८१०-चत्वारिंशत् आदि शब्द परे रहते द्वि, अष्टन् और त्रि शब्दोंको पूर्वोक्त कार्य विकल्प करके हों, जैसे-द्वाचत्वारिंशत्, द्विचत्वारिंशत्। अष्टाचत्वारिंशत्, अष्टचत्वारिंशत्। त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत्। पञ्चाशत्, षष्टि, सप्तति और नवति शब्द परे रहते भी इसी प्रकार कार्य्य होंगे॥

८११ एकादिश्चैकस्य चादुक्। ६। ३। ७६॥

एकादिर्नञ् प्रकृत्या स्यादेकस्य चादुगागमश्च। नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः। अनुनासिकविकल्पः। एकेन न विंशतिः एकान्नविंशतिः। एकाद्नविंशतिः। एकोनविंशतिरित्यर्थः॥ षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च। धासु वेति वाच्यम्॥ * ॥ षोडन्। षोडश। षोढा। षड्धा॥

८११-एकादि नञ् शब्दका प्रकृतिभाव हो, और एक शब्दको अदुक्का आगम हो। विंशति शब्दके साथ नञ्का समास करनेपर फिर एक शब्दके साथ "तृतीया" इस योगविभागसे समास हुआ और अनुनासिक विकल्प करके हुआ, जैसे-एकेन न विंशतिः=एकान्नविंशतिः, एकाद्नविंशतिः। एकोनविंशतिरित्यर्थः।

दत्, दश और धा शब्द परे रहते षष् शब्दको उत्व हो और उत्तरपदादिको ष्टुत्व हो और धा शब्दमें षको विकल्प करके ष्टुत्व हो, जैसे-षट् दन्ता अस्येति=षोडन्, यहां "वयसि दन्तस्य दतृ" इससे दतृ आदेश होताहै, षोडश, षोढा, षड्धा, यहां "संख्याया विधार्थे धा" इस सूत्रसे धा प्रत्यय हुआ है॥

८१२ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। २। ४। २६॥

एतयोः परपदस्येव लिङ्गं स्यात्। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। अर्धपिप्पली॥ द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः॥ * ॥ पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नजीविकः। अलं कुमार्यै अलंकुमारिः। अत एव ज्ञापकात्समासः। निष्कौशाम्बिः॥

८१२-द्वन्द्व और तत्पुरुष समासमें परवर्त्ती पदके समान लिङ्ग हो, जैसे-कुक्कुटश्च मयूरी च=कुक्कुटमयूर्यौ इमे। मयूरीकुक्कुटौ इमौ। पिप्पल्या अर्द्धम्, इस विग्रहमें अर्द्धपिप्पली॥

द्विगु समास और प्राप्त, आपन्न, अलम्पूर्वक समास और गतिसमासमें पर पदके समान लिङ्ग न हो* जैसे-पञ्चसु कपालेषु संस्कृतः=पञ्चकपालः पुरोडाशः। प्राप्तो जीविकाम्=प्राप्तजीविकः। आपन्नो जीविकाम्=आपन्नजीविकः। अलं कुमार्यै=

अलंकुमारिः, इसी ज्ञापकके कारण इस स्थानमें समास हुआ, निष्कौशाम्बिः ॥

८१३ पूर्ववदश्ववडवौ । २ । ४ । २७ ॥

द्विवचनमतन्त्रम् । अश्ववडवौ । अश्ववडवान् । अश्ववडवैः ॥

८१३-अश्व और वडवा शब्दके समासमें पूर्व पदके समान लिङ्ग हो । इस सूत्रमें द्विवचन अतन्त्र (अविवक्षित) है इससे अश्ववडवौ, अश्ववडवान्, अश्ववडवैः, इत्यादि सब रूप बनेंगे ॥

८१४ रात्राह्नाहाः पुंसि । २ । ४ । २९ ॥

एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । अनन्तरत्वात्परवल्लिङ्गतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाधते । अहोरात्रः । रात्रेः पूर्वभागः पूर्वरात्रः । पूर्वाह्णः । द्व्यहः ॥ संख्यापूर्वं रात्रं क्लीबम् ॥ * ॥ द्विरात्रम् । त्रिरात्रम् । गणरात्रम् ॥

८१४-रात्र, अह्न व अहशब्दान्त द्वन्द्व और तत्पुरुष समास पुँल्लिङ्गही में हों । अनन्तरत्वके कारण परवल्लिङ्गताका अपवाद होनेपर भी यह सूत्र परत्वके कारण समाहारमें नपुंसक लिङ्गका बाधक होताहै, जैसे-अहश्च रात्रिश्च=अहोरात्रः, अथवा अह्ना सहिता रात्रिः=अहोरात्रः । रात्रेः पूर्वभागः=पूर्वरात्रः । पूर्वाह्णः । द्व्यहः ।

संख्यापूर्वक रात्र शब्द नपुंसकलिङ्ग हो * जैसे-द्विरात्रम् । त्रिरात्रम् । गणरात्रम् ॥

८१५ अपथं नपुंसकम् । २ । ४ । ३० ॥

तत्पुरुष इत्येव । अन्यत्र तु । अपथो देशः । कृतसमासान्तनिर्देशान्नेह । अपन्थाः ॥

८१५-समासान्त अपथ शब्द तत्पुरुषमें नपुंसक हो, जैसे-अपथम् । अन्यत्र तु-अर्थात् तत्पुरुषसे भिन्न समासमें तो जैसे अपथो देशः । कृतसमासान्त निर्देशके कारण अपन्थाः, इस स्थानमें नपुंसकत्व नहीं हुआ ॥

८१६ अर्धर्चाः पुंसि च । २ । ४ । ३१ ॥

अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः । अर्धर्चः । अर्धर्चम् । ध्वजः । ध्वजम् । एवं-तीर्थ, शरीर, मण्ड, पीयूष, देह, अंकुश, कलश, इत्यादि ॥

८१६-अर्धर्चादि शब्द पुँल्लिङ्गमें और नपुंसकलिङ्गमें प्रयुक्त हों । अर्धर्चः, अर्धर्चम् । ध्वजः, ध्वजम् । इसी प्रकार तीर्थ, शरीर, मंड, पीयूष, देह, अंकुश और शकल-इत्यादि शब्द पुँल्लिङ्ग नपुंसकलिङ्ग हैं ॥

८१७ जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् । १ । २ । ५८ ॥

एकोऽप्यर्थो वा बहुवद्भवति । ब्राह्मणाः पूज्याः । ब्राह्मणः पूज्यः ॥

८१७-जातिवाचक शब्दसे एकत्व अर्थमें भी विकल्प करके बहुवचन हो, जैसे ब्राह्मणाः पूज्याः, ब्राह्मणः पूज्यः ॥

८१८ अस्मदो द्वयोश्च । १ । २ । ५९ ॥

एकत्वे द्वित्वे च विवक्षितेऽस्मदो बहुवचनं वा स्यात् । वयं ब्रूमः । पक्षेऽहं ब्रवीमि । आवां ब्रुव इति वा ॥ सविशेषणस्य प्रतिषेधः ॥ * ॥ पटुरहं ब्रवीमि ॥

८१८-एकत्व और द्वित्व विवक्षित हो तो अस्मद् शब्दसे विकल्प करके बहुवचन हो, जैसे-वयं ब्रूमः । अहं ब्रवीमि । आवां ब्रुव इति वा । विशेषणयुक्त अस्मद् शब्दसे एकत्व और द्वित्व विवक्षित रहते बहुवचन नहीं हो, जैसे-पटुरहं ब्रवीमि ॥

८१९ फल्गुनीप्रोष्ठपदानां च नक्षत्रे । १ । २ । ६० ॥

द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् । पूर्वे फल्गुन्यौ । पूर्वाः फल्गुन्यः । पूर्वे प्रोष्ठपदे । पूर्वाः प्रोष्ठपदाः । नक्षत्रे किम् । पूर्वफल्गुन्यौ माणविके ॥

८१९-नक्षत्रवाचक फल्गुनी और प्रोष्ठपदा शब्दके द्वित्व अर्थमें विकल्प करके बहुत्वप्रयुक्त कार्य्य हो, जैसे-पूर्वे फल्गुन्यौ, पूर्वाः फल्गुन्यः । पूर्वे प्रोष्ठपदे, पूर्वाः प्रोष्ठपदाः । नक्षत्रसे भिन्न अर्थमें नहीं होगा, जैसे-पूर्वफल्गुन्यौ माणविके ॥

८२० तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । १।२।६३॥

बहुत्वं द्वित्ववद्भवति । तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू । तिष्येति किम् । विशाखानुराधाः । नक्षत्रेति किम् । तिष्यपुनर्वसवो माणवकाः ॥

८२०-तिष्य और पुनर्वसु शब्दका नक्षत्रार्थमें द्वन्द्व समास होनेपर बहुवचनको नित्य द्विवचन हो, जैसे-तिष्यश्च पुनर्वसू च=तिष्यपुनर्वसू । सूत्रमें तिष्य, पुनर्वसू शब्दका ग्रहण करनेसे 'विशाखानुराधाः' इत्यादि स्थलमें द्विवचन नहीं हुआ । नक्षत्रवाचक कहनेसे 'तिष्यपुनर्वसवो माणवकाः' इस स्थलमें द्विवचन नहीं हुआ ॥

८२१ स नपुंसकम् । २ । ४ । १७ ॥

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । परवल्लिङ्गापवादः । पञ्चगवम् । दन्तोष्ठम् ॥ अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः ॥ * ॥ पञ्चमूली ॥ आबन्तो वा ॥ * ॥ पञ्च खट्वी ॥ पञ्चखट्वम् ॥ अनो नलोपश्च वा च द्विगुः स्त्रियाम् ॥ * ॥ पञ्चतक्षी । पञ्चतक्षम् ॥ पात्राद्यन्तस्य न ॥ * ॥ पञ्चपात्रम् । त्रिभुवनम् ॥ चतुर्युगम् ॥ पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा ॥ * ॥ पुण्याहम् । सुदिनाहम् ॥ पथः संख्याव्ययादेः ॥ * ॥ संख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीब-

मित्यर्थः । त्रयाणां पन्थास्त्रिपथम् । विरूपः पन्था विपथम् । कृतसमासान्तनिर्देशान्नेह । सुपन्थाः । अतिपन्थाः ॥ सामान्ये नपुंसकम् ॥*॥ मृदु पचति । प्रातः कमनीयम् ॥

८२१–समाहारमें द्विगु और द्वन्द्व नपुंसकलिङ्ग हो, यह सूत्र परवल्लिङ्गका अपवाद है । पञ्चगवम् । दन्तोष्ठम् । अकारान्तोत्तरपदक जो द्विगु पद वह स्त्रीलिङ्गमें इष्ट हो अर्थात् उसको क्लीव हो * जैसे–पञ्चमूली । आबन्त हो तो विकल्पकरके स्त्रीलिङ्गमें इष्ट हो * जैसे–पञ्चखट्वी, पञ्चखट्वम् ।

द्विगु समासमें अन्के नकारका लोप हो और विकल्पकरके द्विगुसंज्ञक शब्द स्त्रिलिङ्ग हो,जैसे–पञ्चतक्षी,पञ्चतक्षम् । पात्रादिशब्दान्त द्विगुको क्लीव न हो * जैसे–पञ्चपात्रम् । त्रिभुवनम् । चतुर्युगम् ।

पुण्य और सुदिन शब्दके उत्तर अहन् शब्द नपुंसक लिङ्ग हो, जैसे–पुण्यं च तत् अहः=पुण्याहम् । सुदिनं च तत् अहः= सुदिनाहम् ।

संख्या और अव्यय आदिके परे स्थित कृतसमासान्त पथ शब्द नपुंसक लिङ्ग हो, जैसे–त्रयाणां पन्थाः=त्रिपथम् । विरूपः पन्थाः=विपथम् । कृतसमासान्तनिर्देशके कारण 'सुपन्थाः', 'अतिपन्थाः' इत्यादि पदोंको क्लीबत्व नहीं हुआ । सामान्यमें नपुंसक लिङ्ग हो * यह अनियत लिङ्गविषयक है, क्योंकि, नियतलिङ्गका नपुंसकत्व ही नहीं होताहै । 'मृदु पचति' इस स्थलमें क्रियाविशेषणत्वके कारण द्वितीया हुई है । प्रातः कमनीयम् ॥

८२२ तत्पुरुषोऽनञ्कर्मधारयः । २ । ४ । १९ ॥

अधिकारोऽयम् ॥

८२२–इसके आगे नञ्समास और कर्मधारयसे भिन्न तत्पुरुषाधिकार चलेगा अर्थात् नञ्समास और कर्मधारयसे भिन्न तत्पुरुषको वक्ष्यमाण कार्य्य होंगे ॥

८२३ संज्ञायां कन्थोशीनरेषु।२।४।२० ॥

कन्थान्तस्तत्पुरुषः क्लीबं स्यात्सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सुशमस्यापत्यानि सौशमयः, तेषां कन्था सौशमिकन्थम् । संज्ञायां किम् । वीरणकन्था।उशीनरेषु किम्।दाक्षिकन्था॥

८२३–उशीनरदेशोत्पन्न कंथा होनेपर कन्थाशब्दान्त तत्पुरुष नपुंसकलिङ्ग हो । सुशमस्यापत्यानि=सौशमयः, तेषां कंथा=सौशमिकन्थम् । संज्ञा न होनेपर, वीरणकन्था । और उशीनर देशसे भिन्न होनेपर 'दाक्षिकंथा'–इत्यादि स्थलमें नपुंसक नहीं हुआ ॥

८२४ उपज्ञोपक्रमं तदाद्याचिख्यासायाम् । २ । ४ । २१ ॥

उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते। पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । नन्दोपक्रमं द्रोणः ॥

८२४–उपज्ञायमान और उपक्रम्यमाणका आदि अर्थात् प्राथम्यके आख्यानकी इच्छा हो तो उपज्ञान्त और उपक्रमान्त तत्पुरुष नपुंसकलिंग हो, जैसे–पाणिनेरुपज्ञा=पाणिन्युपज्ञं ग्रंथः, अर्थात् पाणिनिसंबन्धी आद्यज्ञानविषयीभूत ग्रंथ । नन्दोपक्रमं द्रोणः, अर्थात् नंदसम्बन्धी आद्यज्ञानविषय द्रोण ॥

८२५ छाया बाहुल्ये । २ । ४ । २२ ॥

छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये । इक्षूणां छाया । इक्षुच्छायम् । विभाषा सेनेति विकल्पस्यायमपवादः।इक्षुच्छायानिषादिन्य इति तु आ समन्तान्निषादिन्य इत्याङ्प्रश्लेषो बोध्यः ॥

८२५–पूर्वपदार्थका बाहुल्य हो तो छायाशब्दान्त तत्पुरुष समास नपुंसकलिङ्ग हो, जैसे–'इक्षूणां छाया' इस वाक्यमें इक्षुच्छायम् । "विभाषा सेना० ८२८" इस सूत्रसे प्राप्त विकल्पका यह अपवाद है । " इक्षुछायानिषादिन्यः " इत्यादि स्थलमें ' आ समन्तात् निषादिन्यः ' ऐसा आङ्का प्रक्षेप जानना चाहिये ॥

८२६ सभा राजाऽमनुष्यपूर्वा ।२।४।२३॥

राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् । इनसभम् । ईश्वरसभम् ॥ नेह । राजपर्यायस्यैवेष्यते ॥ * ॥ सभा । चन्द्रगुप्तसभा । अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह। रक्षःसभम् । पिशाचसभम्॥

८२६–राजपर्याय पूर्वमें हो और अमनुष्यवाचक पद पूर्वमें हो ऐसा सभान्त तत्पुरुष नपुंसक लिङ्ग हो,जैसे–इनस्य सभा=इनसभम् । ईश्वरस्य सभा=ईश्वरसभम् । राजपर्यायपूर्व-कही तत्पुरुषको नपुंसक लिङ्ग हो, परन्तु राजशब्दपूर्वक तत्पुरुषको नहीं हो, जैसे–राजसभा । चंद्रगुप्तसभा । इस सूत्रमें अमनुष्य शब्द रूढि शक्तिसे राक्षस और पिशाचादिओंको कहताहै, जैसे–रक्षसां सभा=रक्षःसभम् । पिशाचानां सभा=पिशाचसभम् ॥

८२७ अशाला च । २ । ४ । २४ ॥

संघातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं स्यात् । स्त्रीसभम् । स्त्रीसंघात इत्यर्थः । अशाला किम् । धर्मसभा । धर्मशालेत्यर्थः ॥

८२७–संघातार्थ अर्थात् समूहार्थ जो सभा शब्द तदन्त तत्पुरुष नपुंसक लिङ्ग हो, जैसे–स्त्रीसभम् । शालार्थमें जैसे– ' धर्मसभा ' अर्थात् धर्मशाला, इस स्थलमें क्लीवत्व नहीं हुआ ॥

८२८ विभाषा सेनासुराच्छायाशालानिशानाम् । २ । ४ । २५ ॥

एतदन्तस्तत्पुरुषः क्लीबं वा स्यात् । ब्राह्मणसेनम् । ब्राह्मणसेना । यवसुरम् । यवसुरा । कुड्यच्छायम् । कुड्यच्छाया । गोशालम् । गोशाला । श्वनिशम् । श्वनिशा । तत्पुरुषोऽनञ्कर्मधारय इत्यनुवृत्तेर्नेह । दृढसेनो राजा । असेना । परमसेना ॥

॥ इति तत्पुरुषः ॥

८२८–सेना, सुरा, छाया, शाला और निशा शब्दान्त तत्पुरुष विकल्प करके नपुंसक लिङ्ग हो, जैसे–ब्राह्मणसेनम्, ब्राह्मणसेना । यवसुरम्, यवसुरा । कुड्यच्छायम्, कुड्यच्छाया। गोशालम्, गोशाला । श्वनिशम्, श्वनिशा । "तत्पुरुषोऽनञ्कर्मधारयः ८२२" इस सूत्रकी अनुवृत्ति होनेके कारण इन स्थलोंमें विकल्प करके नपुंसक लिङ्ग नहीं हुआ–दृढसेनो राजा । असेना । परमसेना ॥

॥ इति तत्पुरुषसमासः ॥

अथ बहुव्रीहिसमासप्रकरणम् ।

८२९ शेषो बहुव्रीहिः । २ । २ । २३ ॥

अधिकारोऽयम् । द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्यर्थः ॥

८२९–बहुव्रीहि समासका अधिकार है । "द्वितीयाश्रिता० ६८६" इस सूत्रसे विशेष करके जिस त्रिकका समास नहीं कहा हो, वह शेष अर्थात् प्रथमान्त है ॥

८३० अनेकमन्यपदार्थे । २ । २।२४ ॥

अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः । अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितम् । प्राप्तमुदकं यं प्राप्तोदको ग्रामः।ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । पीताम्बरो हरिः । वीरपुरुषको ग्रामः। प्रथमार्थे तु न । वृष्टे देवे गतः । व्यधिकरणानामपि न पञ्चभिर्भुक्तमस्य ॥ प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः ॥ * ॥ प्रपतितपर्णः प्रपर्णः ॥ नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः ॥*॥ अविद्यमानपुत्रः अपुत्रः । अस्तीति विभक्तिप्रतिरूपकमव्ययम् । अस्तिक्षीरा गौः ॥

८३०–अन्यपदार्थबोधक अनेक प्रथमान्त पदका विकल्प करके समास हो और उसकी बहुव्रीहि संज्ञा हो । अप्रथमाविभक्त्यर्थमें बहुव्रीहि और, समानाधिकरणोंका बहुव्रीहि यह बात फलित हुई । जैसे–' प्राप्तमुदकं यं ग्रामम् ' इस विग्रहमें प्राप्तोदको ग्रामः । ' ऊढो रथः येन ' इस विग्रहमें=ऊढरथोऽनड्वान् । उपहृतः पशुः यस्मै=उपहृतपशू रुद्रः । उद्धृतमोदनं यस्याः=उद्धृतौदना स्थाली । पीतम् अम्बरं यस्य=पीताम्बरो हरिः । वीरः पुरुषो यस्मिन्=वीरपुरुषो ग्रामः । प्रथमार्थमें बहुव्रीहि न होनेसे जैसे–वृष्टे देवे गतः । व्यधिकरण पदको भी बहुव्रीहि न होनेसे जैसे–पञ्चभिर्भुक्तमस्य ।

प्रादि उपसर्गोंसे परे स्थित धातुजका पदान्तरके साथ समास हो, और पूर्वपदान्तर्गत प्रादि उपसर्गोंके उत्तर भागस्थित धातुजको विकल्प करके लोप हो * जैसे–प्रपतितपर्णः=प्रपर्णः ।

नञ्के परे स्थित अस्त्यर्थवाचकका पदान्तरके साथ बहुव्रीहि समास और नञ्से परे अस्त्यर्थवाचकका विकल्प करके लोप हो* जैसे–अविद्यमानपुत्रः=अपुत्रः ।

'अस्ति' यह विभक्तिप्रतिरूपक अव्यय है, अस्तिक्षीरा गौः ॥

८३१ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । ६ । ३ । ३४ ॥

भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिर्निपातनात्पञ्चम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः । गोस्त्रियोरिति ह्रस्वः । चित्रा गावो यस्येति लौकिकविग्रहे । चित्रा अस् गो अस् इत्यलौकिकविग्रहे । चित्रगुः । रूपवद्भार्यः । चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनामपि बहुव्रीहिः । अत्र केचित् । चित्राजरतीगुः । जरतीचित्रागुर्वा । एवं दीर्घातन्वीजंघः । तन्वीदीर्घाजंघः । त्रिपदे बहुव्रीहौ प्रथमं न पुंवत्, उत्तरपदस्य मध्यमेन व्यवधानात् । द्वितीयमपि न पुंवत्, पूर्वपदत्वाभावात् । उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः पूर्वपदशब्दस्तु प्रथमावयव इति वदन्ति । वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते । आनङ् ऋत इत्यत्र यथा । तेनोपान्त्यस्य पुंवदेव । चित्राजरद्गुरित्यादि । अत एव चित्राजरत्यौ गावौ यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुरिति भाष्यम् । कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत् । जरच्चित्रगुः । कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः । स्त्रियाः किम् । ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः । भाषितपुंस्कात्किम् । गंगाभार्यः । अनूङ् किम् ।

वामोरूभार्यः । समानाधिकरणे किम् । कल्याण्या माता कल्याणीमाता । स्त्रियां किम् । कल्याणी प्रधानं यस्य सः कल्याणीप्रधानः । पूरण्यां तु ॥

८३१–'भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्याम्' ऐसा बहुव्रीहि है, निपातनसे पञ्चमीका अलुक् और षष्ठीका लुक् हुआ । तुल्य प्रवृत्तिनिमित्तमें उक्तपुंस्कके परे ऊङ्का अभाव हो जहां ऐसे स्त्रीवाचक शब्दोंको पुंवद्भाव हो, पूरणी प्रियादिसे भिन्न समानाधिकरण स्त्रीलिङ्ग उत्तर पद परे रहते । "गोस्त्रियोः० ६५६" इस सूत्रसे ह्रस्व हुआ, जैसे–'चित्रा गावो यस्य' इस लौकिक विग्रहमें और 'चित्रा+जस्–गो+ अस्' इस अलौकिक विग्रहमें 'चित्रगुः' पद होताहै । रूपवद्भार्यः । चित्रा जरती गौर्यस्य, इस विग्रहमें अनेक कहनेसे बहुत शब्दोंका भी बहुव्रीहि होताहै । इस विषयमें कोई २ 'चित्राजरतीगुः जरतीचित्रागुर्वा' ऐसे 'दीर्घातन्वी- जंघः, तन्वीदीर्घाजंघः' इस त्रिपद बहुव्रीहि समासमें उत्तर पदको मध्यम पदसे व्यवधान होनेसे पहिला पद पुंवत् न होगा और पूर्वपदत्वाभावके कारण दूसरा पद भी पुंवत् नहीं होगा, कारण कि, उत्तरपद शब्द समासके चरमावयवमें रूढ है और पूर्वपद शब्द समासके प्रथमावयवमें रूढ है, ऐसा कहतेहैं । वास्तवमें तो जैसे "आनङ् ऋतः० ९२१" इस सूत्रमें पूर्वपदका आक्षेप नहीं हुआहै, वैसे यहां भी पूर्वपदका आक्षेप नहीं है, इस कारण उपान्त्यका पुंवद्भाव होहीगा, जैसे– चित्राजरद्गुः–इत्यादि । इसी कारण 'चित्राजरत्यो गावो यस्य' इस द्वन्द्वगर्भमें भी चित्राजरद्गुः, यह पद भाष्याभिमत है । कर्म- धारयपूर्वपदमें तो दोनोंका भी पुंवद्भाव होगा, जैसे–जर- च्चित्रगुः । कर्मधारयोत्तरपदमें, चित्रजरद्गवीकः । स्त्रीलिङ्ग न होनेपर, ग्रामणि कुलं दृष्टिरस्य=ग्रामणिदृष्टिः । भाषितपुंस्क न होनेपर, जैसे–गङ्गाभार्यः । ऊङ्युक्त होनेपर, वामोरूभार्यः । समानाधिकरण न होनेपर, जैसे–कल्याण्या माता=कल्याणीमाता । स्त्रीलिङ्ग न होनेपर, जैसे–कल्याणी प्रधानं यस्य सः= कल्याणीप्रधानः । पूरणार्थप्रत्ययान्तकी बात अगले सूत्रमें कहते हैं–॥

८३२ अप्पूरणीप्रमाण्योः ।५।४।११६ ॥

पूरणार्थप्रत्ययान्तं यत् स्त्रीलिंगं तदन्तात्प्र- माण्यन्ताच्च बहुव्रीहेरप् स्यात् । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः । पुंवद्भावप्रतिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव । रात्रिः पूरणी वाच्या चेत्युक्तोदाहरणे मुख्या । अन्यत्र तु ॥

८३२–पूरणार्थप्रत्ययान्त जो स्त्रीलिङ्ग शब्द, तदन्त और प्रमाण्यन्तसे बहुव्रीहि समासमें अप् प्रत्यय हो, जैसे–कल्याणी पञ्चमी यासां रात्रीणां ताः=कल्याणीपञ्चमा रात्रयः । स्त्री प्रमाणी यस्य सः=स्त्रीप्रमाणः । पुंवद्भावप्रतिषेध और अप् प्रत्यय प्रधानपूरणीमें ही होगा । रात्रि शब्द उक्तोदाहरणमें पूरणी- वाच्य है, इससे पूरणप्रत्ययान्तका प्राधान्य जानना । अन्यत्र नहीं होगा यह बात ८३५ के व्याख्यामें ज्ञात होगी ॥

८३३ नद्यृतश्च । ५। ४। १५३ ॥

नद्युत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कप्स्यात् । पुंवद्भावः ॥

८३३–नदी और ऋदन्त शब्द उत्तर पद होनेपर बहु- व्रीहि समासमें कप् प्रत्यय और पुंवद्भाव हो ॥

८३४ केऽणः । ७ । ४ । १३ ॥

के परेऽणो ह्रस्वः स्यात् । इति प्राप्ते ॥

८३४–कप् प्रत्यय परे रहते अण्को ह्रस्व हो । ऐसी प्राप्ति होनेपर–॥

८३५ न कपि । ७ । ४ । १४ ॥

कपि परे ह्रस्वो न स्यात् । कल्याणपञ्चमीकः पक्षः । अत्र तिरोहितावयवभेदस्य पक्षस्यान्य- पदार्थतया रात्रिरप्रधानम् । बहुकर्तृकः । अप्रि- यादिषु किम् । कल्याणीप्रियः । प्रिया । मनोज्ञा । कल्याणी । सुभगा । दुर्भगा । भक्तिः । सचिवा । स्वसा । कान्ता । क्षान्ता । समा । चपला । दुहिता । वामा । अबला । तनया । प्रियादिः । सामान्ये नपुंसकम् । दृढं भक्तिर्यस्य स दृढभक्तिः । स्त्रीत्व- विवक्षायां तु दृढाभक्तिः ॥

८३५–कप् प्रत्यय परे रहते अण्को ह्रस्व न हो, जैसे कल्याणपञ्चमीकः पक्षः, इस स्थलमें तिरोहित अवयवभेद पक्षकी अन्यपदार्थताके कारण रात्रि शब्दका अप्राधान्य कहाहै, बहुकर्तृकः । प्रियादि परे रहते जैसे–कल्याणीप्रियः । प्रियादि जैसे–प्रिया, मनोज्ञा, कल्याणी, सुभगा, दुर्भगा, भक्ति, सचिवा, स्वसा, कान्ता, क्षान्ता, समा, चपला, दुहिता, वामा, अबला, तनया । सामान्यमें नपुंसक लिङ्ग हो, जैसे–दृढं भक्तिर्यस्य सः=दृढ- भक्तिः । स्त्रीत्वकी विवक्षामें 'दृढाभक्तिः' ऐसा पद होगा ॥

८३६ तसिलादिष्वाकृत्वसुचः ।६।३।३५।

तसिलादिषु आकृत्वसुजन्तेषु परेषु स्त्रियाः पुंवत्स्यात् । परिगणनं कर्तव्यम् । अव्याप्त्य- तिव्याप्तिपरिहाराय । त्रतसौ । तरप्तमपौ । चरड्जातीयरौ । कल्पब्देशीयरौ । रूपप्पाशपौ । थाल् । तिल्थ्यनौ । बह्वीषु बहुत्र । बहुतः । दर्शनीयतरा । दर्शनीयतमा घरूपेति वक्ष्यमाणो ह्रस्वः परत्वात्पुंवद्भावं बाधते । पटुतरा । पटु- तमा । पटुजातीया । दर्शनीयकल्पा । दर्शनीय- देशीया । दर्शनीयरूपा । दर्शनीयपाशा । बहुथा । प्रशस्ता वृकी वृकतिः । अजाभ्यो हिता अजथ्या ॥ शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः ॥ * ॥ बह्वीभ्यो देहि बहुशः । अल्पाभ्यो देहि अल्पशः ॥

त्वतलोर्गुणवचनस्य ॥ * ॥ शुक्लाया भावः शुक्लत्वम् । गुणवचनस्य किम् । कर्त्र्या भावः कर्त्रीत्वम् । शरदः कृतार्थतेत्यादौ तु सामान्ये नपुंसकम् ॥ भस्याढे तद्धिते ॥ * ॥ हस्तिनीनां समूहो हास्तिकम् । अढे किम् । रौहिणेयः । स्त्रीभ्यो ढगिति ढोऽत्र गृह्यते । अग्नेर्ढगिति ढकि तु पुंवदेव अग्नायी देवतास्य स्थालीपाकस्याग्नेयः ॥ सपत्नीशब्दस्त्रिधा । शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादित्वात् ङीन्येकः । समानः पतिर्यस्या इति विग्रहे विवाहनिबन्धनं पतिशब्दमाश्रित्य नित्यस्त्रीलिंगो द्वितीयः । स्वामिपर्यायपतिशब्देन भाषितपुंस्कस्तृतीयः।आद्ययोः शिवाद्यण् । सपत्न्या अपत्यं सापत्नः । तृतीयात्तु लिंगविशिष्टपरिभाषया पत्युत्तरपदलक्षणो ण्य एव न त्वण् । शिवादौ रूढयोरेव ग्रहणात्सापत्यः ॥ ठक्छसोश्च ॥ * ॥ भवत्याश्छात्रा भावत्काः । भवदीयाः । एतद्वार्तिकमेकतद्धिते चेति सूत्रं च न कर्तव्यम् । सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति भाष्यकारेष्ट्या गतार्थत्वात् । सर्वकाम्यति । सर्विका भार्या यस्य सर्वकभार्यः । सर्वप्रिय इत्यादि । पूर्वस्यैवेदम् । भस्त्रैषाजाज्ञाद्वेति लिंगात् । तेनाकचि एकशेषवृत्तौ च न । सर्विका । सर्वाः ॥कुक्कुटयादीनामण्डादिषु॥*॥ कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृग्याः पदं मृगपदम् । मृगक्षीरम् । काकशावः ॥

८३६–तसिलादि कृत्वसुच्पर्यन्त प्रत्यय परे रहते स्त्रीलिङ्ग-
को पुंवद्भाव हो । अव्याप्ति और अतिव्याप्तिके परिहारके नि-
मित्त इन संपूर्ण प्रत्ययोंका परिगणन करना चाहिये । प्रत्यय
यथा–त्रल्, त्रस्, तरप्, तमप्, चरट्, जातीयर्, कल्पप्, देशीयर्,
रूपप्, पाशप्, थाल्, तिल्, थ्यन्, इतने प्रत्यय तसिलादि हैं ।
'बह्वीषु' इस अर्थमें बहु+त्रल्=बहुत्र । 'बह्व्याः' इस अर्थमें बहु
+तस्=बहुतः । दर्शनीय+तरप्, तमप्=दर्शनीयतरा, दर्शनीय-
तमा, इस स्थलमें "घरूप० ९८५" इस वक्ष्यमाण सूत्रसे
ह्रस्व परत्वके कारण पुंवद्भावको बाधता है । पटुवितरा । पटु-
वितमा । पटु+जातीयर्=पटुजातीया । दर्शनीय+कल्पप्=
दर्शनीयकल्पा । दर्शनीय+देशीयर्=दर्शनीयदेशीया । दर्श-
नीय+रूपप्=दर्शनीयरूपा । दर्शनीय+पाशप्=दर्शनीयपाशा ।
बहु+थाल्=बहुथा । 'प्रशस्ता वृका' इस अर्थमें वृक+
तिल्=वृकतिः । 'अजाभ्यो हिता' इस अर्थमें अजा+
थ्यन्=अजथ्या ।

शस् प्रत्यय परे रहते बहु और अल्पार्थक शब्दको पुंवद्भाव
हो * जैसे–'बह्वीभ्यो देहि' इस वाक्यमें, बहुशः । 'अल्पा
भ्यो देहि' इस वाक्यमें, अल्पशः ।

त्व और तल् प्रत्यय परे रहते गुणवाचक शब्दको पुंवद्भाव
हो, जैसे–शुक्लायाः भावः=शुक्लत्वम् । गुणवाचकसे भिन्नको
पुंवद्भाव नहीं होगा, यथा–कर्त्र्या भावः=कर्त्रीत्वम् । "शरदः कृतार्थता" इत्यादिमें सामान्यमें नपुंसक लिङ्ग जानना ।

ढ प्रत्ययसे भिन्न तद्धित प्रत्यय परे रहते भसंज्ञकको पुंवद्भाव हो* जैसे–हस्तिनीनां समूहः=हास्तिकम् । ढ प्रत्यय परे रहते पुंवद्भाव न होगा, जैसे–रौहिणेयः । इस वार्तिकमें "स्त्रीभ्यो ढक् ११२३" इस सूत्रसे विहित ढ प्रत्यय ही गृहीत है, इसलिये "अग्नेर्ढक् १२३६" इस सूत्रसे विहित ढक् प्रत्यय परे रहते पुंवद्भाव होहीगा, जैसे–अग्नायी देवताऽस्य स्थालीपाकस्य, इस विग्रहमें आग्नेयः । सपत्नी शब्द तीन प्रकारका है, उसमें पहिला शत्रुपर्याय सपत्न शब्दके उत्तर शार्ङ्गरवादित्वके कारण ङीन् प्रत्ययवाला है, दूसरा 'समानः पतिर्यस्याः' इस विग्रहमें विवाहनिबंधन पति शब्दका आश्रयण करके निष्पन्न नित्यस्त्रीलिङ्ग है, तीसरा स्वामिपर्याय पति शब्दसे निष्पन्न सपत्नी शब्द भाषितपुंस्क है, इनमें प्रथम और द्वितीय सपत्नी शब्दके उत्तर शिवादित्वके कारण अण् प्रत्ययसे 'सपत्न्या अपत्यम्' इस विग्रहमें 'सापत्नः' यह पद सिद्ध हुआ है । तृतीय सपत्नी शब्दके उत्तर लिङ्गविशिष्ट परिभाषासे पत्युत्तरपदलक्षण ण्य प्रत्यय ही होगा, शिवादिमें प्रथम और द्वितीय रूढ सपत्नी ही शब्दके ग्रहणके कारण अण् नहीं होगा, तीसरेके उत्तर ण्य होनेपर 'सापत्यः' यह पद सिद्ध हुआ ।

ठक् और छस् प्रत्यय परे रहते पुंवद्भाव हो* जैसे–भवत्याः छात्राः=भावत्काः, भवदीयाः । इस वार्तिककी और "एकतद्धिते च १०००" इस सूत्रकी आवश्यकता नहीं है । क्यों कि, सर्वनामको वृत्तिमात्रमें पुंवद्भाव हो, इस प्रकार भाष्यकारके अभिप्रायसे दोनों गतार्थ हैं, जैसे–सर्वमयः । सर्वकाम्यति । सर्विका भार्या यस्य=सर्वकभार्यः । सर्वप्रियः–इत्यादि । "भस्त्रैषा० ४४६" ऐसे सूत्रनिर्देशके कारण पूर्वपदको ही पुंवद्भाव होगा, इसी कारण अकच् प्रत्यय और एकशेषवृत्तिविषयमें पुंवद्भाव नहीं होगा, जैसे–सर्विका । सर्वाः ।

अंडादि शब्द परे रहते कुक्कुट्यादि शब्दोंको पुंवद्भाव हो* जैसे–कुक्कुट्या अंडम्=कुक्कुटाण्डम् । मृग्याः पदम्=मृगपदम् । मृग्याः क्षीरम्=मृगक्षीरम् । काक्याः शावः=काकशावः ॥

८३७ क्यङ्मानिनोश्च । ६।३।३६॥

एतयोः परतः पुंवत् । एनीवाचरति एतायते । श्येनीवाचरति श्येतायते । स्वभिन्नां कांचिद्दर्शनीयां स्त्रियं मन्यते दर्शनीयमानिनी । दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः ॥

८३७–क्यङ् प्रत्यय और मानिन् शब्द परे रहते पुंवद्भाव हो, जैसे–एनीवाचरति=एतायते । श्येनीवाचरति=श्येतायते । स्वभिन्नां काञ्चित् दर्शनीयां स्त्रियं मन्यते=दर्शनीयमानिनी । दर्शनीयां स्त्रियं मन्यते=दर्शनीयमानी चैत्रः ॥

८३८ न कोपधायाः । ६ । ३ । ३७ ॥

कोपधायाः स्त्रिया न पुंवत् । पाचिकाभार्यः । रसिकाभार्यः । मद्रिकायते । मद्रिकामानिनी ॥ कोपधप्रतिषेधे तद्धितवुग्रहणम् ॥ * ॥ नेह । पाका भार्या यस्य स पाकभार्यः ॥

८३८–ककार उपधावाले स्त्रीलिङ्ग शब्दोंको पुंवद्भाव न हो, जैसे–पाचिका भार्या यस्य सः=पाचिकाभार्यः । रसिकाभार्यः । मद्रिकायते । मद्रिकामानिनी ।

ककारोपधके प्रतिषेधविषयमें वुक् इस तद्धित प्रत्ययका ग्रहण करना चाहिये * इस कारण पाका भार्या यस्य सः=पाकभार्यः, इस स्थलमें पुंवद्भाव हुआ ॥

८३९ संज्ञापूरण्योश्च । ६ । ३ । ३८ ॥

अनयोर्न पुंवत् । दत्ताभार्यः । दत्तामानिनी । दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतोयमिति भाषितपुंस्कत्वमस्ति । पञ्चमीभार्यः । पञ्चमीपाशा ॥

८३९–संज्ञावाचक और पूरणार्थप्रत्ययान्त शब्दको पुंवद्भाव न हो, जैसे–दत्ताभार्यः । दत्तामानिनी । स्त्रीलिङ्ग और पुँल्लिङ्गमें दानक्रियानिमित्त संज्ञाभूत दत्ता शब्दको भाषितपुंस्कत्व है, पञ्चमीभार्यः । पञ्चमीपाशा ॥

८४० वृद्धिनिमित्तस्य च तद्धितस्याऽरक्तविकारे । ६ । ३ । ३९ ॥

वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत् । स्रौघ्नीभार्यः । माथुरीयते । माथुरीमानिनी । वृद्धिनिमित्तस्य किम् । मध्यमभार्यः । तद्धितस्य किम् । काण्डलावभार्यः । वृद्धिशब्देन किम् । तावद्भार्यः । रक्ते तु काषायी कन्था यस्य स काषायकन्थः । विकारे तु हैमी मुद्रिका यस्येति हैममुद्रिकः । वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावादिह पुंवत् । वैयाकरणभार्यः । सौवश्वभार्यः ॥

८४०–वृद्धि शब्दसे विहित जो वृद्धि तद्धेतुभूत जो रक्त और विकारार्थसे भिन्न तद्धित प्रत्यय तदन्त स्त्रीलिङ्ग शब्दको पुंवद्भाव न हो, जैसे–स्रौघ्नीभार्यः । माथुरीयते । माथुरीमानिनी । वृद्धिनिमित्त न होनेपर, जैसे–मध्यमभार्यः । तद्धितप्रत्ययान्त न होनेपर, जैसे–कांडलावभार्यः । वृद्धि न होनेपर जैसे–तावद्भार्यः । रक्तार्थ होनेपर, जैसे–काषायी कन्था यस्य सः=काषायकन्थः । विकारार्थ होनेपर, जैसे–हैमी मुद्रिका यस्य सः=हैममुद्रिकः । वृद्धि शब्दसे विहित वृद्धिके प्रति फलोपधानरूप निमित्तके अभावके कारण इस स्थानमें पुंवद्भाव होगा, जैसे वैयाकरणभार्यः । सौवश्वभार्यः ॥

८४१ स्वाङ्गाच्चेतः । ६ । ३ । ४० ॥

स्वांगाद्य ईकारस्तदन्ता स्त्री न पुंवत् । सुकेशीभार्यः । स्वांगात्किम् । पटुभार्यः । ईतः किम् । अकेशभार्यः ॥ अमानिनीति वक्तव्यम् ॥ * ॥ सुकेशमानिनी ॥

८४१–स्वांगवाचकसे विहित जो ईकार तदन्त स्त्रीलिङ्ग शब्दको पुंवद्भाव न हो, जैसे–सुकेशीभार्यः । स्वाङ्गवाचकके उत्तर न होनेपर, जैसे–पटुभार्यः । ईकारान्त न होनेपर, जैसे–अकेशभार्यः ।

मानिनी शब्द परे रहते पुंवद्भावका निषेध न हो यह कहना चाहिये * जैसे–सुकेशमानिनी ॥

८४२ जातेश्च । ६ । ३ । ४१ ॥

जातेः परो यः स्त्रीप्रत्ययस्तदन्तं न पुंवत् । शूद्राभार्यः । ब्राह्मणीभार्यः । सौत्रस्यैवायं निषेधः । तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढ इति तु भवत्येव ॥

८४२–जातिवाचकके उत्तर जो स्त्रीप्रत्यय, तदन्त स्त्रीलिङ्ग शब्दको पुंवद्भाव न हो, जैसे–शूद्राभार्यः । ब्राह्मणीभार्यः । सूत्रसे कहे हुए पुंवद्भावको ही यह निषेध है, इसी कारण हस्तिनीनां समूहः=हास्तिकम्, इस स्थलमें "भस्याढे०" इस वार्त्तिकसे पुंवद्भाव होताही है ॥

८४३ संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये । २ । २ । २५ ॥

संख्येयार्थया संख्ययाऽव्ययादयः समस्यन्ते स बहुव्रीहिः । दशानां समीपे ये सन्ति ते उपदशाः । नव एकादश वेत्यर्थः । बहुव्रीहौ संख्येये इति वक्ष्यमाणो डच् ॥

८४३–संख्येयार्थक संख्यावाचक शब्दके साथ अव्ययादिको बहुव्रीहि समास हो, जैसे–दशानां समीपे ये सन्ति ते=उपदशाः, अर्थात् नौ अथवा ग्यारह । "बहुव्रीहौ संख्येये० ८५१" इस सूत्रसे वक्ष्यमाण डच् प्रत्यय हुआ है ॥

८४४ ति विंशतेर्डिति । ६ । ४ । १४२ ॥

विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति । आसन्नविंशाः । विंशतेरासन्ना इत्यर्थः । अदूरत्रिंशाः । अधिकचत्वारिंशाः । द्वौ वा त्रयो वा द्वित्राः । द्विरावृत्ता दश द्विदशाः । विंशतिरित्यर्थः ॥

८४४–डित् प्रत्यय परे रहते भसंज्ञक विंशति शब्दके तिभागका लोप हो, जैसे–आसन्ना विंशतिः=आसन्नविंशाः, अर्थात् बीसकी समीपवर्त्तिनी संख्या । अदूराः त्रिंशतः=अदूरत्रिंशाः । अधिकाः चत्वारिंशतः=अधिकचत्वारिंशाः । द्वौ वा त्रयो वा=द्वित्राः । द्विरावृत्ता दश=द्विदशाः (बीस) ॥

८४५ दिङ्नामान्यन्तराले । २ । २ । २६ ॥

दिशो नामान्यन्तराले वाच्ये प्राग्वत् । दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा । नामग्रहणाद्यौगिकानां न । ऐन्द्र्याश्च कौबेर्याश्चान्तरालं दिक् ॥

८४५–अन्तराल वाच्य होनेपर दिग्वाचक शब्दोंको पूर्ववत् समास हो, जैसे दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालम्, इस विग्रहमें दक्षिणपूर्वा । नामग्रहण करनेसे यौगिकको नहे

होताहै, जैसे-'ऐन्द्रयाश्च कौबेर्याश्चान्तरालं दिक्' इस स्थलमें समास नहीं हुआ ॥

८४६ तत्र तेनेदमिति सरूपे।२।२।२७॥

सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे द्योत्ये स बहुव्रीहिः । इतिशब्दादयं विषयविशेषो लभ्यते ॥

८४६-समान रूपवाले सप्तम्यन्तके ग्रहणविषयमें और समान रूपवाले तृतीयान्तके प्रहरणविषयमें 'इदं युद्धं प्रवृत्तम्' अर्थात् यह युद्ध प्रवृत्त हुआ, इस अर्थमें कर्मव्यतिहार द्योत्य हो तो बहुव्रीहि समास हो, इति शब्दसे यह विशेष विषय लब्ध होताहै ॥

अन्येषामपि दृश्यते ६।३।१३७॥

दीर्घ इत्यनुवर्तते । इचि कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दीर्घः । इच् समासान्तो वक्ष्यते । तिष्ठद्गुप्रभृतिष्विच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वं च । केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि । मुष्टीमुष्टि ॥

(३५३९ अन्येषामपि दृश्यते) यहां "ढूलोपे पूर्वस्य दीर्घोऽणः १७४" से दीर्घ पदकी अनुवृत्ति होतीहै । कर्मव्यतिहारमें बहुव्रीहि समासमें पूर्वपदान्तको दीर्घ हो । इच् यह समासान्त प्रत्यय आगे कहेंगे, तिष्ठद्गु आदिमें इच् प्रत्ययके पाठके कारण अव्ययीभावत्व और अव्ययत्व होगा, जैसे-केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम्=केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तम् = दण्डादण्डि । मुष्टीमुष्टि ॥

८४७ ओर्गुणः । ६ । ४ । १४६ ॥

उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते । अवादेशः । बाहूबाहवि । ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं तेन स्वायम्भुवमित्यादि सिद्धम् । सरूपे इति किम् । हलेन मुसलेन ॥

८४७-तद्धित प्रत्यय परे रहते उवर्णान्त भसंज्ञक शब्दोंको गुण हो । अव् आदेश होकर,-बाहोः बाहोः गृहीत्वा इदं युद्धं प्रवृत्तम्=बाहूबाहु+इ=बाहूबाहो+इ=बाहूबाहव्+इ=बाहूबाहवि । "ओरोत्" ऐसा कहनेसे ही काम हो जाताहै, परन्तु संज्ञापूर्वक विधिके अनित्यत्व ज्ञापनके निमित्त गुणका ग्रहण किया है, इससे ' स्वायम्भुवम् ' इत्यादि पद सिद्ध होतेहैं । पूर्व सूत्रमें 'सरूपे' इस पदका ग्रहण करनेसे 'हलेन मुसलेन' इस स्थानमें समास नहीं हुआ ॥

८४८ तेन सहेति तुल्ययोगे २।२।२८॥

तुल्ययोगे वर्तमानं सहेत्येतत्तृतीयान्तेन प्राग्वत् ॥

८४८-तुल्ययोगमें वर्त्तमान सह शब्दका तृतीयान्त पदके साथ पूर्ववत् समास हो ॥

८४९ वोपसर्जनस्य । ६ । ३ । ८२ ॥

बहुव्रीह्यवयवस्य सहस्य सः स्याद्वा । पुत्रेण सह सपुत्रः सहपुत्रो वा आगतः । तुल्ययोगवचनं प्रायिकम् । सकर्मकः । सलोमकः ॥

८४९-बहुव्रीहिके अवयवीभूत सह शब्दको विकल्प करके स आदेश हो, जैसे-पुत्रेण सह=सपुत्रः, सहपुत्रो वा आगतः । तुल्ययोगका कथन प्रायिक है, इससे सकर्मकः, सलोमकः, यहां भी समास हुआ ॥

८५० प्रकृत्याऽऽशिषि । ६ । ३ । ८३ ॥

सह शब्दः प्रकृत्या स्यादाशिषि । स्वस्ति राज्ञे सपुत्राय सहामात्याय ॥ अगोवत्सहलेष्विति वाच्यम् ॥ * ॥ सगवे । सवत्साय । सहलाय ॥

८५०-आशीर्वादार्थमें सह शब्द प्रकृतिमें ही हो, अर्थात् स आदेश न हो । स्वस्ति राज्ञे सहपुत्राय। सहामात्याय । गो, वत्स और हल शब्द परे रहते प्रकृतिभाव न हो । यह कहना चाहिये । जैसे-सगवे । सवत्साय । सहलाय ॥

८५१ बहुव्रीहौ संख्येये डजबहुगणात् । ५ । ४ । ७३ ॥

संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात् । उपदशाः । अबहुगणात्किम् । उपबहवः । उपगणाः । अत्र स्वरे विशेषः ॥ संख्यायास्तत्पुरुषस्य वाच्यः ॥ * ॥ निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य । निर्गतस्त्रिंशतोंगुलिभ्यो निस्त्रिंशः खड्गः ॥

८५१-संख्येयार्थमें बहुव्रीहि समासके उत्तर डच् प्रत्यय हो, जैसे-उप (समीपे) दशानां ये सन्ति ते=उपदशाः । सूत्रमें "अबहुगणात्" इस पदके ग्रहणके कारण, उपबहवः, उपगणाः, इन स्थलोंमें डच् न हुआ, रूपमें भेद न होनेसे स्वरविषयमें विशेष जानना ॥

संख्यावाचक शब्दके उत्तर तत्पुरुषमें डच् प्रत्यय हो * निर्गतानि त्रिंशतः=निस्त्रिंशानि वर्षाणि चैत्रस्य । निर्गतस्त्रिंशतोंगुलिभ्यः=निस्त्रिंशः (खड्ग) ।

८५२ बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच् । ५ । ४ । ११३ ॥

व्यत्ययेन षष्ठी । स्वांगवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच् स्यात् । दीर्घे सक्थिनी यस्य स दीर्घसक्थः । जलजाक्षी । स्वांगात्किम् ॥ दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः । अक्ष्णोऽदर्शनादित्यच् ॥

८५२–'सक्थ्यक्ष्णोः' इस स्थलमें षष्ठी व्यत्ययसे है, स्वाङ्ग-
वाचक सक्थि और अक्षिशब्दान्त बहुव्रीहिके उत्तर षच्
प्रत्यय हो, जैसे–दीर्घे सक्थिनी यस्य सः=दीर्घसक्थः ।
जलजाक्षी ।
स्वाङ्गवाचक न होनेपर दीर्घसक्थि शकटम्, स्थूलाक्षा वेणु-
यष्टिः, ऐसा होगा, यहां "अक्ष्णोऽदर्शनात् ५।४।७६" से
समासान्त अच् प्रत्यय हुआहै ॥

८५३ अंगुलेर्दारुणि । ५ । ४ । ११४॥

अंगुल्यन्ताद्बहुव्रीहेः षच् स्याद्दारुण्यर्थे ।
पञ्चांगुलयो यस्य तत्पञ्चांगुलं दारु । अंगुलि-
सदृशावयवं धान्यादिविक्षेपणकाष्ठमुच्यते । बहु-
व्रीहेः किम् । द्वे अंगुली प्रमाणमस्या द्व्यंगुला
यष्टिः । तद्धितार्थे तत्पुरुषे तत्पुरुषस्यांगुलेरि-
त्यच् । दारुणि किम् । पञ्चांगुलिर्हस्तः ॥

८५३–अंगुलि शब्दान्त बहुव्रीहिके उत्तर षच् प्रत्यय हो
दारु अर्थमें, जैसे–पञ्च अंगुलयो यस्य तत्=पञ्चांगुलं दारु, अर्थात्
अंगुलिसदृश अवयवसे युक्त धान्यादिविक्षेपणकाष्ठविशेष ।
बहुव्रीहि समास न होनेपर, जैसे–द्वे अंगुली प्रमाणमस्याः=
द्व्यंगुला यष्टिः, यहां तद्धितार्थमें तत्पुरुष होनेपर "तत्पुरुषस्यां-
गुलेः० ७८६" इस सूत्रसे अच् प्रत्यय हुआहै । दारु न होने-
पर जैसे–पञ्चांगुलिर्हस्तः ॥

८५४ द्वित्रिभ्यां ष मूर्ध्नः ।५।४।११५॥

आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ । द्विमूर्द्धः ।
त्रिमूर्द्धः ॥ नेतुर्नक्षत्रे अब्वक्तव्यः ॥ * ॥ मृगो
नेता यासां ताः मृगनेत्रा रात्रयः । पुष्यनेत्राः ॥

८५४–बहुव्रीहि समासमें द्वि और त्रि शब्दके परे स्थित
मूर्द्धन् शब्दके उत्तर ष प्रत्यय हो, जैसे–द्वौ मूर्द्धानौ यस्य सः=
द्विमूर्द्धः । त्रिमूर्द्धः ॥
नक्षत्रवाचक नेतृ शब्दके उत्तर अप् प्रत्यय हो * जैसे–
मृगो नेता यासां ताः=मृगनेत्राः–रात्रयः । पुष्यनेत्राः ॥

८५५ अन्तर्बहिर्भ्यां च लोम्नः ५।४।११७॥

आभ्यां लोम्नोऽप्स्याद् बहुव्रीहौ । अन्तर्लोमः ।
बहिर्लोमः ॥

८५५–अन्तर् और बहिस् शब्दसे परे स्थित लोमन्
शब्दके उत्तर अप् प्रत्यय हो बहुव्रीहिमें, जैसे–अन्तर्लोमः ।
बहिर्लोमः ॥

८५६ अञ् नासिकायाः संज्ञायां नसं चास्थूलात् । ५ । ४ । ११८ ॥

नासिकान्ताद्बहुव्रीहेरच् स्यात् नासिकाशब्दश्च
नसं प्राप्नोति न तु स्थूलपूर्वात् ॥

८५६–नासिकाशब्दान्त बहुव्रीहिके उत्तर अच् प्रत्यय हो
और नासिका शब्दके स्थानमें नस् आदेश हो, परन्तु स्थूल
शब्द पूर्वमें हो तो न हो ॥

८५७ पूर्वपदात्संज्ञायामगः ।८।४।३॥

पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्सं-
ज्ञायां न तु गकारव्यवधाने । द्रुरिव नासिका-
ऽस्य द्रुणसः । खरणसः । अगः किम् । ऋचा-
मयनम् ऋगयनम् । अणृगयनादिभ्य इति निपा-
तनात् णत्वाभावमाश्रित्य अग इति प्रत्याख्यातं
भाष्ये । अस्थूलात्किम् । स्थूलनासिकः ॥ खुर-
खराभ्यां वा नस् ॥ * ॥ खुरणाः । खरणाः ॥
पक्षे अजपीष्यते ॥ * ॥ खुरणसः । खरणसः ॥

८५७–संज्ञामें पूर्वपदस्थित निमित्तके उत्तर नकारको णत्व
हो, परन्तु गकारव्यवधान रहते न हो, द्रुरिव नासिका यस्य
सः=द्रुणसः । इसी प्रकार, खरणसः ।
गकारव्यवधान रहते, जैसे–ऋचामयनम्=ऋगयनम् ।
भाष्यमें " अणृगयनादिभ्यः १४५२" इस निपातनसे यहां
णत्वके अभावका आश्रयण करके 'अग' इस अंशका प्रत्या-
ख्यान किया है । स्थूल शब्द पूर्वमें रहते नस् आदेश न
होगा । जैसे–स्थूलनासिकः ।
खुर और खर शब्दसे परे स्थित नासिका शब्दको विकल्प
करके नस् आदेश हो * जैसे–खुरणाः, खरणाः । विकल्प
पक्षमें–अच् भी होगा, जैसे–खुरणसः, खरणसः ॥

८५८ उपसर्गाच्च । ५ । ४ । ११९॥

प्रादेर्या नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् ना-
सिकाया नसादेशश्च । असंज्ञार्थं वचनम् । उन्नता
नासिका यस्य स उन्नसः । उपसर्गादनोत्पर इति
सूत्रं तद्भङ्क्त्वा भाष्यकार आह ॥

८५८–प्रादि उपसर्गके परे स्थित जो नासिका शब्द तदन्त
बहुव्रीहिसे अच् प्रत्यय हो और नासिकाको नस् आदेश हो ।
संज्ञा जहां नहीं है वहांके लिये यह सूत्र है, जैसे–उन्नता
नासिका यस्य सः=उन्नसः ॥
भाष्यकार "उपसर्गादनोत्परः" इस सूत्रको भांगकर
अर्थात् 'अनोत्परः' इसके स्थानमें 'बहुलम्' इसको पढकर
कहतेहैं कि–

८५९ उपसर्गाद्बहुलम् । ८ ।४।२८॥

उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः
स्याद्बहुलम् । प्रणसः ॥ वेर्ग्रो वक्तव्यः ॥ * ॥
विगता नासिकास्य विग्रः ॥ ख्यश्च ॥ * ॥
विख्यः । कथं तर्हि विनसा हतबान्धवेति भट्टिः ।
विगतया नासिकयोपलक्षितेति व्याख्येयम् ॥

८५९–उपसर्गस्थ निमित्तके परे स्थित नस्के नकारके
स्थानमें बहुल प्रकारसे णकार हो, जैसे-प्रणसः ।
वि से परे नासिका शब्दको ग्र आदेश हो * जैसे–विगता
नासिकाऽस्य विग्रः ।
विसे परे नासिका शब्दको ख्य आदेश भी हो *
जैसे विख्यः ।

पूर्वोक्त ग्र वा ग्य आदेश होजानेसे भट्टिकाव्यमें "विनसा हतबांधवा" ऐसा प्रयोग कैसे हुआ ? तो कहतेहैं कि, 'विगतया नासिकया उपलक्षिता' इस प्रकार व्याख्या करनी चाहिये॥

८६० सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाऽजपदप्रोष्ठपदाः ।५।४।१२०॥

एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते। शोभनं प्रातरस्य सुप्रातः । शोभनं श्वोऽस्य सुश्वः । शोभनं दिवास्य सुदिवः । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयोऽस्य चतुरश्रः । एण्या इव पादावस्य एणीपदः । अजपदः । प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः ॥

८६०-सुप्रातः, सुश्वः, सुदिवः, शारिकुक्षः, चतुरश्वः, एणीपदः, अजपदः, प्रोष्ठपदः, इतने बहुव्रीहि अच्प्रत्ययान्त निपातन किये जातेहैं, जैसे-शोभनं प्रातः अस्य=सुप्रातः । शोभनं श्वोऽस्य=सुश्वः । शोभनं दिवास्य=सुदिवः शारेरिव कुक्षिः अस्य=शारिकुक्षः । चतस्रोऽश्रयोऽस्य=चतुरश्रः । एण्या-इव पादावस्य=एणीपदः । अजस्येव पादौ अस्य=अजपदः । प्रोष्ठो गौः तस्येव पादावस्य=प्रोष्ठपदः ॥

८६१ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् । ५ । ४ । १२१ ॥

अच् स्यात् । अहलः । अहलिः । असक्थः । असक्थिः । एवं दुःसुभ्याम् । शक्त्योरिति पाठान्तरम् । अशक्तः । अशक्तिः ॥

८६१-बहुव्रीहि समासमें नञ्, दुस् और सु शब्दके परे स्थित हलि और सक्थि शब्दके उत्तर विकल्प करके समासान्त अच् प्रत्यय हो, जैसे-अहलः, अच् न हुआ तो अहलिः । असक्थः, असक्थिः । सु और दुर् शब्दके उत्तर भी इसी प्रकार होगा ।

सक्थिके स्थानमें शक्ति ऐसा भी पाठान्तर है, तब-अशक्तः, अशक्तिः, ऐसे प्रयोग होंगे ॥

८६२ नित्यमसिच् प्रजामेधयोः । ५ । ४ । १२२ ॥

नञ्दुःसुभ्य इत्येव । अप्रजाः । दुष्प्रजाः । सुप्रजाः । अमेधाः । दुर्मेधाः । सुमेधाः ॥

८६२-नञ्, सु और दुर् शब्दके परे स्थित प्रजा और मेधा शब्दके उत्तर नित्य असिच् प्रत्यय हो, जैसे-अप्रजाः । दुष्प्रजाः । सुप्रजाः । अमेधाः । दुर्मेधाः । सुमेधाः ॥

८६३ धर्मादनिच् केवलात् ।५।४।१२४॥

केवलात्पूर्वपदात्परो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात् । कल्याणधर्मा । केवलात्किम् । परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् । स्वशब्दो हीह न केवलं पूर्वपदं किंतु मध्यमत्वादापेक्षिकम् । संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः । एवं तु परमस्वधर्मेत्यपि साध्वेव । निवृत्तिधर्मा अनुच्छित्तिधर्मेत्यादिवत् । पूर्वपदं तु बहुव्रीहिणाक्षिप्यते ॥

८६३-केवल पूर्वपदके परे स्थित जो धर्म शब्द, तदन्त बहुव्रीहिके उत्तर समासान्त अनिच् प्रत्यय हो, जैसे-कल्याणधर्मा । केवल पूर्वपद न रहनेसे अर्थात् पूर्वमें दो पद रहते, जैसे-'परमः स्वो धर्मो यस्य' इस त्रिपद बहुव्रीहिमें नहीं होताहै, कारण कि, इस स्थानमें स्व शब्द केवल पूर्वपद नहीं है किन्तु मध्यमपदत्वके कारण आपेक्षिक पूर्वपद है 'संदिग्धसाध्यधर्मा' इत्यादि स्थलमें तो कर्मधारयपूर्वक बहुव्रीहि हुआ है । इसी प्रकारसे 'निवृत्तिधर्मा, अनुच्छित्तिधर्मा' इत्यादिकी समान 'परमस्वधर्मा' पद भी साधु ही है । इस स्थलमें पूर्वपद बहुव्रीहिसे आक्षिप्त होताहै ॥

८६४ जम्भा सुहरिततृणसोमेभ्यः । ५ । ४ । १२५ ॥

जम्भेति कृतसमासान्तं निपात्यते । जम्भो भक्ष्ये दन्ते च । शोभनो जम्भोऽस्य सुजम्भा । हरितजम्भा । तृणं भक्ष्यं यस्य तृणमिव दन्ता अस्येति वा तृणजम्भा । सोमजम्भा । स्वादिभ्यः किम् । पतितजम्भः ॥

८६४-सु, हरित, तृण और सोम शब्दके उत्तर कृतसमासान्त जंभा शब्द निपातनसे सिद्ध हो, जंभा शब्दसे भक्ष्य और दन्त जानना, जैसे-सुशोभनो जम्भोऽस्य=सुजम्भा । हरितजम्भा । तृणं भक्ष्यं यस्य, तृणमिव दन्ता यस्येति वा=तृणजम्भा । सोमजम्भा । स्वादिके उत्तर न होनेपर 'पतितजम्भः' इस प्रकार रूप होगा ॥

८६५ दक्षिणेर्मा लुब्धयोगे ।५।४।१२६॥

दक्षिणे ईर्मं व्रणं यस्य दक्षिणेर्मा मृगः । व्याधेन कृतव्रण इत्यर्थः ॥

८६५-व्याधसम्बन्ध होनेपर 'दक्षिणेर्मा' पद निपातनसे सिद्ध हो, जैसे-दक्षिणे ईर्मं व्रणं यस्य=दक्षिणेर्मा (मृगविशेष अर्थात् व्याधकर्तृककृतव्रण मृग) ॥

८६६ इच् कर्मव्यतिहारे । ५ ।४।१२७॥

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् स्यात्समासान्तः । केशाकेशि । मुसलामुसलि ॥

८६६-कर्मव्यतिहारमें जो बहुव्रीहि, उसके उत्तर समासान्त इच् प्रत्यय हो, जैसे-केशाकेशि । मुसलामुसलि ॥

८६७ द्विदण्ड्यादिभ्यश्च । ५ ।४।१२८॥

तादर्थ्ये चतुर्थ्येषा । एषां सिद्ध्यर्थमिच् प्रत्ययः स्यात् । द्वौ दण्डौ यस्मिन्प्रहरणे तद् द्विदण्डि प्रहरणम् । द्विमुसलि । उभाहस्ति । उभयाहस्ति ॥

८६७-इस सूत्रमें तादर्थ्यमें चतुर्थी हुई है, द्विदण्डि-इत्यादि शब्दोंकी सिद्धिके लिये [illegible]

द्वौ दण्डौ यस्मिन् प्रहरणे तत्=द्विदण्डि प्रहरणम् । द्विमुसलि। उभाहस्ति, उभयाहस्ति ॥

८६८ प्रसंभ्यां जानुनोर्ज्ञुः ।५।४।१२९॥

आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ । प्रगते जानुनी यस्य प्रज्ञुः । संज्ञुः ॥

८६८–बहुव्रीहि समासमें प्र और सं पूर्वक जानु शब्दको ज्ञु आदेश हो, जैसे–प्रगते जानुनी अस्य=प्रज्ञुः । इसी प्रकार संज्ञुः ॥

८६९ ऊर्ध्वाद्विभाषा ।५।४।१३०॥

ऊर्ध्वज्ञुः । ऊर्ध्वजानुः ॥

८६९–ऊर्ध्व शब्दके परे स्थित जानु शब्दको विकल्प करके ज्ञु आदेश हो, जैसे–ऊर्ध्वे जानुनी यस्य=ऊर्ध्वज्ञुः, ऊर्ध्वजानुः ॥

८७० धनुषश्च ।५।४।१३२॥

धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात् । शार्ङ्गधन्वा ॥

८७०–धनुःशब्दान्त बहुव्रीहिको अनङ् आदेश हो, जैसे–शार्ङ्गं धनुर्यस्य सः=शार्ङ्गधन्वा ॥

८७१ वा संज्ञायाम् ।५।४।१३३॥

शतधन्वा । शतधनुः ॥

८७१–संज्ञा होनेपर विकल्प करके उक्त आदेश हो, जैसे-शतानि धनूंषि यस्य सः=शतधन्वा, शतधनुः ॥

८७२ जायाया निङ् ।५।४।१३४॥

जायान्तस्य बहुव्रीहेर्निङादेशः स्यात् ॥

८७२–जायाशब्दान्त बहुव्रीहिको निङ् आदेश हो ॥

८७३ लोपो व्योर्वलि ।६।१।६६॥

वकारयकारयोर्लोपः स्याद्वलि । पुंवद्भावः । युवतिर्जायाऽस्य युवजानिः ॥

८७३–वल् परे रहते वकार और यकारका लोप हो, पुंवद्भाव होनेपर जैसे–युवतिर्जाया अस्य=युवजानिः ॥

८७४ गन्धस्येदुत्पूतिसुसुरभिभ्यः । ५।४।१३५॥

एभ्यो गन्धस्य इकारोन्तादेशः स्यात् । उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः ॥ गन्धस्येत्त्वे तदेकान्तग्रहणम् ॥ * ॥ एकान्त एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः । सुगन्धि पुष्पं सलिलं च सुगन्धिर्वायुः । नेह । शोभना गन्धाः द्रव्याण्यस्य सुगन्ध आपणिकः ॥

८७४–उत्, पूति, सु और सुरभि शब्दके परे स्थित गंध शब्दको इकार अन्तादेश हो, जैसे उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः ।

गंध शब्दको इत्व करनेमें उसके एकान्तता ग्रहण करना चाहिये, एकान्त अर्थात् एकदेशकी समान अविभागसे लक्ष्यमाण* जैसे–सुगन्धि पुष्पं सलिलं वा । सुगन्धिर्वायुः । शोभना गन्धाः द्रव्याणि अस्य=सुगन्धः आपणिकः, इस स्थलमें इकार नहीं हुआ ॥

८७५ अल्पाख्यायाम् ।५।४।१३६॥

सूपस्य गन्धो लेशो यस्मिन् तत् सूपगन्धि भोजनम् । घृतगन्धि । गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः ॥

८७५–अल्पार्थ हो तो गंध शब्दको इकार अन्तादेश हो, जैसे–'सूपस्य गंधो लेशो यस्मिन् तत्' इस वाक्यमें 'सूपगन्धि' अर्थात् भोजन । घृतस्य गंधो लेशो यस्मिन् तत्=घृतगंधि । विश्वकोशमें गंध शब्दके गंध, गंधक, आमोद, लेश, संबंध और गर्व इतने अर्थ कहेहैं ॥

८७६ उपमानाच्च ।५।४।१३७॥

पद्मस्येव गन्धोस्य पद्मगन्धिः ॥

८७६–उपमानवाचक शब्दके परे स्थित गंध शब्दको इकार अन्तादेश हो, जैसे–पद्मस्येव गंधोऽस्य=पद्मगन्धिः ॥

८७७ पादस्य लोपोऽहस्त्यादिभ्यः । ५।४।१३८॥

हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्बहुव्रीहौ । स्थानिद्वारेणायं समासान्तः । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादिभ्यः किम् । हस्तिपादः । कुसूलपादः ॥

८७७–बहुव्रीहि समासमें हस्त्यादिसे भिन्न उपमानवाचकके परे स्थित पाद शब्दके अकारका लोप हो । स्थानिद्वारा यह अकारका लोप समासान्त है, जैसे–व्याघ्रस्येव पादावस्य=व्याघ्रपात् । हस्त्यादि शब्दके उत्तर होनेपर हस्तिपादः, कुसूलपादः, ऐसे प्रयोग होंगे ॥

८७८ कुम्भपदीषु च ।५।४।१३९॥

कुम्भपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियाम् । पादः पत् । कुम्भपदी । स्त्रियां किम् । कुम्भपादः ॥

८७८–स्त्रीलिङ्गमें कुम्भपदी इत्यादि स्थलमें पाद शब्दके अकारका लोप हो और ङीप्का निपातन हो, पाद शब्दके स्थानमें पद आदेश होनेपर, जैसे–कुंभपदी । स्त्रीलिंग न होनेपर अकारका लोप और ङीप् न होंगे, जैसे–कुंभपादः ॥

८७९ संख्यासुपूर्वस्य ।५।४।१४०॥

पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ । द्विपात् । सुपात् ॥

८७९–संख्यावाचक शब्द और सुशब्दपूर्वक पाद शब्दके समासान्त अकारका लोप हो, जैसे–द्विपात् । सुपात् ॥

८८० वयसि दन्तस्य दतृ ।५।४।१४१॥

संख्यासुपूर्वस्य दन्तस्य दतृ इत्यादेशः स्या-

वयसि । द्विदन् । चतुर्दन् । षट् दन्ता अस्य षोडन् । सुदन् । सुदती । वयसि किम् । द्विदन्तः करी । सुदन्तो नटः ॥

८८०-वयस् अर्थमें संख्यावाचक शब्द और सु शब्द पूर्वक दन्त शब्दके स्थानमें दतृ आदेश हो, जैसे-द्विदन् । चतुर्दन् । षट् दन्ता अस्य=षोडन् । सुदन् । सुदती । वयस् अर्थ न होनेपर न होगा, जैसे-द्विदन्तः करी, सुदन्तो नटः ॥

८८१ स्त्रियां संज्ञायाम् ।५।४।१४३॥

दन्तस्य दतृ स्यात्समासान्तो बहुव्रीहौ । अयोदती । फालदती । संज्ञायां किम् । समदन्ती ॥

८८१-संज्ञामें तथा स्त्रीलिङ्गमें बहुव्रीहि समास होनेपर दन्त शब्दको दतृ आदेश हो । अयोदती । फालदती । संज्ञा न होनेपर न होगा, जैसे-समदन्ती ॥

८८२ विभाषा श्यावारोकाभ्याम् । ५ । ४ । १४४ ॥

दन्तस्य दतृ बहुव्रीहौ । श्यावदन् । श्यावदन्तः । अरोकदन् । अरोकदन्तः ॥

८८२-बहुव्रीहि समासमें श्याव और अरोक शब्दके उत्तर दन्त शब्दके स्थानमें विकल्प करके दतृ आदेश हो, जैसे-श्यावदन्, श्यावदन्तः । अरोकदन्, अरोकदन्तः ॥

८८३ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च । ५ । ४ । १४५ ॥

एभ्यो दन्तस्य दतृ वा । कुड्मलाग्रदन् । कुड्मलाग्रदन्तः ॥

८८३-अग्रान्त, शुद्ध, शुभ्र, वृष और वराह शब्दके परे दन्त शब्दके स्थानमें विकल्प करके दतृ आदेश हो, कुड्मलाग्रदन्, कुड्मलाग्रदन्तः ॥

८८४ ककुदस्यावस्थायां लोपः । ५ । ४ । १४६ ॥

अजातककुत् । पूर्णककुत् ॥

८८४-अवस्था गम्यमान होनेपर ककुद शब्दके अन्त्य अकारका लोप हो, जैसे-अजातककुत् । पूर्णककुत् ॥

८८५ त्रिककुत्पर्वते । ५ । ४ । १४७ ॥

त्रीणि ककुदान्यस्य त्रिककुत् । संज्ञैषा पर्वतविशेषस्य । त्रिककुदोऽन्यः ॥

८८५-पर्वत वाच्य होनेपर त्रिककुद शब्दके अकारका लोप हो, जैसे त्रीणि ककुदान्यस्य=त्रिककुत्, अर्थात् पर्वत विशेष । अन्य होनेपर अकारका लोप न होगा, जैसे-त्रिककुदः ॥

८८६ उद्विभ्यां काकुदस्य ।५।४।१४८॥

लोपः स्यात् । उत्काकुत् । विकाकुत् । काकुदं तालु ॥

८८६-उत् और विपूर्वक काकुद शब्दके अकारका लोप हो, जैसे-उत्काकुत् । विकाकुत् । काकुद शब्दसे तालु जानना ॥

८८७ पूर्णाद्विभाषा । ५ । ४ । १४९ ॥

पूर्णकाकुत् । पूर्णकाकुदः ॥

८८७-पूर्ण शब्दके परे स्थित काकुद शब्दके अकारका लोप विकल्प करके हो, जैसे-पूर्णकाकुत्, पूर्णकाकुदः ॥

८८८ सुहृद्दुर्हृदौ मित्रामित्रयोः । ५ । ४ । १५० ॥

सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रम् । दुर्हृदमित्रः । अन्यत्र सुहृदयः । दुर्हृदयः ॥

८८८-मित्र अर्थ होनेपर सु शब्दके परे स्थित हृदय शब्दको और अमित्र अर्थ होनेपर दुर्से परे हृदय शब्दको हृद् आदेश निपातनसे हो, जैसे-सुहृत् मित्रम् । दुर्हृद् अमित्रः । अन्यार्थमें सुहृदयः । दुर्हृदयः ॥

८८९ उरःप्रभृतिभ्यः कप् ।५।४।१५१॥

व्यूढोरस्कः । प्रियसर्पिष्कः । इह पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीरिति एकवचनान्तानि पठ्यन्ते । द्विवचनबहुवचनान्तेभ्यस्तु शेषाद्विभाषेति विकल्पेन कप् । द्विपुमान् । द्विपुंस्कः ॥ अर्थान्नञः ॥ अनर्थकम् । नञः किम् । अपार्थम् । अपार्थकम् ॥

८८९-बहुव्रीहि समासमें उरस् आदि शब्दोंके उत्तर कप् प्रत्यय हो, जैसे-व्यूढोरस्कः । प्रियसर्पिष्कः । उरःप्रभृतिमें पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीः, इत्यादि एकवचनान्त ही पद पढे गये हैं, इसी कारण "शेषाद्विभाषा ८९१" इस सूत्रसे द्विवचनान्त और बहुवचनान्तके उत्तर विकल्प करके कप् होगा, जैसे-द्विपुमान्, द्विपुंस्कः ।

नञ्पूर्वक अर्थ शब्दके उत्तर कप् प्रत्यय हो, जैसे-अनर्थकम् । नञ्से परे न होनेपर, जैसे-अपार्थम्, अपार्थकम् ॥

८९० इनः स्त्रियाम् ।५।४।१५२ ॥

बहुदण्डिका नगरी । अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेनापि तदन्तविधिं प्रयोजयन्ति॥ बहुवाग्मिका । स्त्रियां किम् । बहुदण्डी । बहुदण्डिको ग्रामः ॥

८९०-इनप्रत्ययान्त शब्दके उत्तर स्त्रीलिंगमें कप् प्रत्यय हो, जैसे-बहुदण्डिका नगरी । अन्, इन्, अस्, मन्, यह

अर्थविशिष्ट हों अथवा अर्थशून्य भी हों, परन्तु तदन्तविधिका लाभ करतेहैं, जैसे—बहुवाग्मिका । स्त्रीलिंग न होनेपर, जैसे—बहुदंडी, बहुदंडिकः (ग्राम) ॥

८९१ शेषाद्विभाषा । ५ । ४ । १५४ ॥

अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुव्रीहेः कप् वा स्यात् । महायशस्कः। महायशाः । अनुक्तेत्यादि किम् । व्याघ्रपात् । सुगन्धिः । प्रियपथः । शेषाधिकारस्थात्किम् । उपबहवः । उत्तरपूर्वा । सपुत्रः । तन्त्रादिना शेषशब्दोऽर्थद्वयपरः ॥

८९१—अनुक्तसमासान्त शेषाधिकारस्थित बहुव्रीहिके उत्तर विकल्प करके कप् प्रत्यय हो, जैसे—महत् यशो यस्य=महायशस्कः, महायशाः । अनुक्तसमासान्त न होनेपर, जैसे—व्याघ्रपात् । सुगंधिः । प्रियपथः । शेषाधिकारस्थ कहनेसे उपबहवः, उत्तरपूर्वा, सपुत्रः, इत्यादिमें कप् न हुआ। तंत्रादिसे शेष शब्द दोनों (अनुक्तसमासान्त १, शेषाधिकारस्थ २) अर्थोंका बोधक है ॥

८९२ आपोऽन्यतरस्याम् । ७ ।४।१५॥

कप्यावन्तस्य ह्रस्वो वा स्यात् । बहुमालकः। बहुमालाकः । कबभावे बहुमालः ॥

८९२—कप् प्रत्यय परे रहते आबन्त शब्दको विकल्प करके ह्रस्व हो, जैसे—बहुमालकः, बहुमालाकः । कप्के अभावमें बहुमालः ॥

८९३ न संज्ञायाम् ।५।४। १५५॥

शेषादिति प्राप्तः कप् न स्यात्संज्ञायाम् । विश्वे देवा अस्य विश्वेदेवः ॥

८९३—संज्ञामें "शेषात्०" से प्राप्त कप् नहीं हो, जैसे—विश्वे देवा अस्य=विश्वेदेवः ॥

८९४ ईयसश्च । ५ । ४ । १५६ ॥

ईयसन्तोत्तरपदान्न कप् । बहवः श्रेयांसोस्य बहुश्रेयान् । गोस्त्रियोरिति ह्रस्वत्वे प्राप्ते ॥ ईयसो बहुव्रीहेर्नेति वाच्यम् ॥ * ॥ बह्वयः श्रेयस्योस्य बहुश्रेयसी । बहुव्रीहेः किम् । अतिश्रेयसिः ॥

८९४—ईयसन्त उत्तर पदके उत्तर कप् प्रत्यय न हो, जैसे—बहवः श्रेयांसोऽस्य=बहुश्रेयान् । "गोस्त्रियोः० ६५६" इस सूत्रसे ह्रस्व प्राप्त होनेपर—ईयसुप्रत्ययान्त बहुव्रीहिके उत्तर पदसे कप् प्रत्यय न हो यह कहना चाहिये * जैसे—बह्वयः श्रेयस्योऽस्य=बहुश्रेयसी बहुव्रीहि न होनेपर, जैसे—अतिश्रेयसिः ॥

८९५ वन्दिते भ्रातुः । ५ । ४ ।१५७॥

पूजितेर्थे यो भ्रातृशब्दस्तदन्तान्न कप् स्यात् । प्रशस्तो भ्राता यस्य प्रशस्तभ्राता । न पूजनादिति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते। वन्दिते किम् । मूर्खभ्रातृकः ॥

८९५—पूजित अर्थमें जो भ्रातृ शब्द तदन्तके उत्तर कप् न हो, जैसे—प्रशस्तो भ्राता अस्य=प्रशस्तभ्राता । "न पूजनात् ५।४।६९" इस सूत्रसे जो निषेध है, वह "बहुव्रीहौ सक्थ्यक्ष्णोः० ८५२" इस सूत्रके पूर्वहीमें होताहै यह कहेंगे। पूजितार्थ न होनेपर, जैसे—मूर्खभ्रातृकः ॥

८९६ नाडीतन्त्र्योः स्वाङ्गे ।५।४।१५९॥

स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कप् न स्यात् । बहुनाडिः कायः । बहुतन्त्रीर्ग्रीवा । तन्त्रीर्धमनी । स्त्रीप्रत्ययान्तत्वाभावाद्ध्रस्वो न । स्वाङ्गे किम् । बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ॥

८९६—स्वाङ्गवाचक नाडी और तन्त्री शब्दके उत्तर कप् न हो, बहुनाडिः कायः । बहुतंत्री ग्रीवा, तंत्री अर्थात् धमनी, इस स्थलमें स्त्रीप्रत्ययान्तत्वके अभावके कारण ह्रस्व नहीं हुआ ।

स्वाङ्गवाचक न होनेपर जैसे—बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ॥

८९७ निष्प्रवाणिश्च । २ । २ । १६० ॥

कबभावोऽत्र निपात्यते । प्रपूर्वाद्वयतेर्ल्युट् । प्रवाणी तन्तुवायशलाका । निर्गता प्रवाण्यस्य निष्प्रवाणिः पटः । समाप्तवानः नव इत्यर्थः ॥

८९७—' निष्प्रवाणिः ' यहां कप् प्रत्ययका अभाव निपातनसे सिद्ध हो, प्रपूर्वक 'वेञ्-तन्तुसन्ताने' से ल्युट् प्रत्यय हुआ 'प्रवाणी ' अर्थात् तन्तुबुननेकी सलाई । निर्गता प्रवाण्यस्य=निष्प्रवाणिः पटः । समाप्तवान अर्थात् नवीन ॥

८९८ सप्तमीविशेषणे बहुव्रीहौ।२।२।३५॥

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् । कण्ठेकालः । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । चित्रगुः ॥ सर्वनामसंख्ययोरुपसंख्यानम् ॥ * ॥ सर्वश्वेतः । द्विशुक्लः ॥ मिथोनयोः समासे संख्यापूर्वं शब्दपरविप्रतिषेधात् ॥ * ॥ द्व्यन्यः ॥ संख्याया अल्पीयस्याः ॥ * ॥ द्वित्राः । द्वन्द्वेऽपि । द्वादश ॥ वा प्रियस्य ॥ * ॥ प्रियगुडः । गुडप्रियः ॥ गड्वादेः परा सप्तमी ॥ * ॥ गड्कण्ठः । क्वचिन्न वहेगडुः ॥

८९८—बहुव्रीहि समासमें सप्तम्यन्त पद और विशेषण पद पूर्वमें प्रयुक्त हो, जैसे—कंठेकालः । इसी ज्ञापकसे व्यधिकरणपदमें भी बहुव्रीहि होताहै । चित्रा गावो यस्य=चित्रगुः ।

उक्त समासमें सर्वनाम शब्द और संख्यावाचक शब्द पूर्वमें प्रयुक्त हों * जैसे—सर्वश्वेतः । द्विशुक्लः ।

सर्वनाम और संख्यावाचकके परस्पर समासमें शब्दपरविप्रतिषेधके कारण संख्यावाचक शब्द पूर्वमें प्रयुक्त हो * जैसे-द्वयन्यः ।

संख्यावाचकके परस्पर समासमें अल्प संख्याबोधक शब्दका पूर्वनिपात हो * जैसे-द्वौ वा त्रयः=द्वित्राः ।

द्वन्द्व समासमें भी इसी प्रकार होगा * जैसे-द्वौ च दश च=द्वादश ।

प्रिय शब्दको विकल्प करके पूर्वनिपात हो * जैसे-प्रियगुडः=गुडप्रियः ।

गडु आदि शब्दके उत्तर सप्तम्यन्तका प्रयोग हो, * जैसे-कण्ठे गडुर्यस्य=गडुकण्ठः । किसी स्थलमें न हो, जैसे-वहेगडुः ॥

८९९ निष्ठा । २ । २ । ३६ ॥

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । कृतकृत्यः ॥ जातिकालसुखादिभ्यः परा निष्ठा वाच्या ॥ * ॥ सारङ्गजग्धी । मासजाता । सुखजाता । प्रायिकं चेदम् । कृतकटः । पीतोदकः ॥

८९९-बहुव्रीहि समासमें निष्ठाप्रत्ययान्त पदका पूर्वनिपात हो, जैसे-कृतकृत्यः ।

जाति, काल और सुखादि शब्दके उत्तर निष्ठाप्रत्ययान्तका प्रयोग हो * जैसे-सारङ्गजग्धी । मासजाता । सुखजाता । यह प्रायिक अर्थात् प्राय ही होगा, इससे कृतकटः, पीतोदकः, इनमें निष्ठान्तका पर निपात न हुआ ॥

९०० वाहिताग्न्यादिषु । २ । २ । ३७ ॥

आहिताग्निः । अग्न्याहितः । आकृतिगणोऽयम् ॥ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ ॥ * ॥ अस्युद्यतः । दण्डपाणिः । क्वचिन्न । विवृतासिः ॥

॥ इति बहुव्रीहिः ॥

९००-आहिताग्नि इत्यादि पदोंमें विकल्प करके पूर्वनिपात हो । आहिताग्निः, अग्न्याहितः । यह आकृतिगण है ।

प्रहरणार्थके उत्तर निष्ठान्त और सप्तम्यन्तका प्रयोग हो * जैसे-अस्युद्यतः । दंडपाणिः । किसी २ स्थलमें नहीं होगा, जैसे-विवृतासिः ॥

॥ इति बहुव्रीहिसमासः ॥

अथ द्वन्द्वसमासप्रकरणम् ।

९०१ चार्थे द्वन्द्वः । २ । २ । २९ ॥

अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः । अन्यतरस्यानुषंगिकत्वेऽन्वाचयः । मिलितानामन्वय इतरेतरयोगः । समूहः समाहारः । तत्रेश्वरं गुरुं च भजस्वेति समुच्चये भिक्षामट गां चानयेत्यन्वाचये च न समासोऽसामर्थ्यात् । धवखदिरौ । संज्ञापरिभाषम् । अनेकोक्तेर्होतृपोतृनेष्टोद्गातारः । द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः ॥

९०१-चकारार्थमें वर्तमान सुबन्त पदोंका विकल्प करके समास हो और उसका नाम द्वन्द्व हो । चकारका अर्थ समुच्चय, अन्वाचय, इतरेतरयोग और समाहार जानना । परस्पर निरपेक्ष अनेक पदोंका एकमें जो अन्वय (संबंध) है, उसको 'समुच्चय ' कहतेहैं । दो पदार्थोंमेंसे एक पदार्थके मुख्यत्व और अन्यके अमुख्यत्वको 'अन्वाचय' कहतेहैं । समुच्चय और अन्वाचयमें समास नहीं होताहै, कारण कि, शब्दका परस्पर सीधा सीधा संबंध न होनेसे असामर्थ्य है । मिलित शब्दोंका जो अन्वय उसको ' इतरेतरयोग ' कहतेहैं । अनेक पदार्थोंके समुदायको ' समाहार ' कहतेहैं । ' ईश्वरं च गुरुं च भजस्व', इस समुच्चयमें ईश्वर और गुरु परस्पर निरपेक्ष हैं और ' भजस्व ' इस एक ही क्रियामें अन्वय है, 'भिक्षामट गाञ्चानय' इसमें भिक्षा और गौको परस्पर निरपेक्षतासे क्रमशः अटन तथा आनयनमें अन्वय होनेसे असामर्थ्य है, इससे समास न हुआ । धवश्च खदिरश्च=धवखदिरौ छिन्धि, इसमें मिलितको क्रियासे संबन्ध है । समाहारमें संज्ञा च परिभाषा च=संज्ञापरिभाषम्, ऐसा होगा । सूत्रमें ' अनेक ' इस पदका ग्रहण करनेसे होता च पोता च नेष्टा च उद्गाता च=होतृपोतृनेष्टोद्गातारः । दो दो पदोंमें द्वन्द्व करके पुनः द्वन्द्व करनेपर 'होतापोतानेष्टोद्गातारः ' ऐसा प्रयोग होगा ॥

९०२ राजदन्तादिषु परम् । २।२।३१॥

एषु पूर्वप्रयोगार्हं परं स्यात् । दन्तानां राजा राजदन्तः ॥ धर्मादिष्वनियमः ॥ * ॥ अर्थधर्मौ । धर्मार्थौ । दम्पती, जम्पती, जायापती । जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते । आकृतिगणोऽयम् ॥

९०२-राजदन्तादि शब्दोंमें जो शब्द पूर्वप्रयोगके योग्य हो उसको परनिपात हो, जैसे-दन्तानां राजा= राजदन्तः ।

धर्मादि शब्दके विषयमें पूर्व पर निपातका कोई नियम नहीं हो * जैसे-अर्थश्च धर्मश्च=अर्थधर्मौ, धर्मार्थौ । दम्पती, जम्पती, जायापती, यहां जाया शब्दको जम्भाव और दम्भावका विकल्प करके निपातन है । यह आकृतिगण है ॥

९०३ द्वन्द्वे घि । २ । २ । ३२ ॥

द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्च हरिहरौ ॥ अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे ॥ * ॥ हरिगुरुहराः । हरिहरगुरवः ॥

९०३-द्वन्द्व समासमें घिसंज्ञकका पूर्वनिपात हो, जैसे-हरिश्च हरश्च=हरिहरौ ।

एक घिसंज्ञक होनेपर ऐसा नियम है, परन्तु अनेक घिसंज्ञकको पूर्वनिपात प्राप्त हो तो एकमें पूर्वनिपातका नियम हो और शेषमें पूर्वनिपातका नियम नहीं हो * जैसे—हरिगुरुहराः, हरिहरगुरवः ॥

९०४ अजाद्यदन्तम् । २ । २ । ३३ ॥

इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ ॥ बहुष्वनियमः । अश्वरथेन्द्राः। इन्द्राश्वरथाः॥ घ्यन्तादजाद्यदन्तं विप्रतिषेधेन ॥ * ॥ इन्द्राग्नी ॥

९०४—द्वन्द्व समासमें अजादिरूप अदन्त शब्दका पूर्वनिपात हो, ईशकृष्णौ ।

अनेक अजादिअदन्त शब्दके स्थलमें ऐसा नियम नहीं हो, जैसे—अश्वरथेन्द्राः, इन्द्राश्वरथाः ।

जिस स्थलमें घिसंज्ञक और अजाद्यदन्त दोनोंका समास हो, उस स्थलमें "विप्रतिषेधे परं कार्यम्" इस सूत्रसे अजाद्यदन्तका ही पूर्वनिपात हो * जैसे—इन्द्राग्नी ॥

९०५ अल्पाच्तरम् । २ । २ । ३४ ॥

शिवकेशवौ ॥ ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण ॥ * ॥ हेमन्तशिशिरवसन्ताः । कृत्तिकारोहिण्यौ । समाक्षराणां किम् । ग्रीष्मवसन्तौ ॥ लघ्वक्षरं पूर्वम् ॥ * ॥ कुशकाशम् ॥ अभ्यर्हितं च ॥ * ॥ तापसपर्वतौ ॥ वर्णानामानुपूर्व्येण ॥ * ॥ ब्राह्मणक्षत्रियविट्शूद्राः ॥ भ्रातुर्ज्यायसः ॥ * ॥ युधिष्ठिरार्जुनौ ॥

९०५—द्वन्द्व समासमें अल्पअच्युक्त पदका पूर्वनिपात हो, जैसे—शिवश्च केशवश्च=शिवकेशवौ ।

समाक्षरविशिष्ट जो ऋतु और नक्षत्रवाचक शब्द उनके आनुपूर्व्य अर्थात् ऋतुओंके प्रादुर्भावकृत और नक्षत्रोंके उदयकृत क्रमसे पूर्वनिपात हो * जैसे—हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ ।

समसंख्याक अक्षर न होनेपर, जैसे—ग्रीष्मवसन्तौ ।

द्वन्द्व समासमें लघुअक्षरयुक्त शब्दको पूर्वनिपात हो * जैसे—कुशकाशम् ।

द्वन्द्व समासमें अभ्यर्हित (पूजित) शब्दको पूर्वनिपात हो * जैसे—पर्वतश्च तापसश्च=तापसपर्वतौ ।

वर्ण अर्थात् ब्राह्मण क्षत्रियादि शब्दोंको क्रमसे पूर्वनिपात हो * जैसे—ब्राह्मणक्षत्रियविट्शूद्राः ।

भ्राताओंके मध्यमें ज्येष्ठको ही पूर्वनिपात हो* यथा—युधिष्ठिरार्जुनौ । भीमार्जुनौ ॥

९०६ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । २ । ४ । २ ॥

एषां द्वन्द्व एकवत्स्यात् । पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम् । प्राण्यङ्गादीनां समाहार एव यथा स्यात् ॥

९०६—द्वन्द्व समासमें प्राण्यंग, तूर्यांग और सेनांगवाचक शब्दोंको एकवद्भाव हो। पाणी च पादौ च=पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् ।

समाहारमें एकत्वके कारण एकवचन सिद्ध होनेपर भी यह एकवद्भावविधायक प्रकरण केवल नियमके निमित्त है, अर्थात् प्राण्यंगादिओंका समाहारद्वन्द्व ही हो, इतरेतरयोग द्वन्द्व न हो, यहां "तिष्यपुनर्वस्वो० १ । २ । ६३"में बहुवचनग्रहणसामर्थ्यसे विपरीत नियम अर्थात् प्राण्यंगादिओंका ही समाहारद्वन्द्व हो ऐसा नियम नहीं हुआ, नहीं तो तिष्यपुनर्वसू शब्दका समाहार द्वन्द्व न होनेसे एकवचन तो होता ही नहीं तब बहुवचनहीको द्विवचनविधान होता, फिर बहुवचनग्रहण व्यर्थ ही होजाता ॥

९०७ अनुवादे चरणानाम्।२।४।३॥

चरणानां द्वन्द्व एकवत्स्यात्सिद्धस्योपन्यासे॥ स्थेणोर्लुङीति वक्तव्यम्॥ * ॥ उदगात्कठकालापम् । प्रत्यष्ठात्कठकौथुमम् ॥

९०७—सिद्ध वस्तुका उपन्यास (कथन) होनेपर चरणवाचक शब्दोंका द्वन्द्व एकवत् हो ।

लुङन्त स्था धातु और इण् धातुके प्रयोगमें द्वन्द्व एकवत् हो, ऐसा कहना चाहिये * जैसे—उदगात् कठकालापम्, प्रत्यष्ठात् कठकौथुमम् ॥

९०८ अध्वर्युक्रतुरनपुंसकम् । २।४।४॥

यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात् । अर्काश्वमेधम् । अध्वर्युक्रतुः किम् । इषुवज्रौ सामवेदे विहितौ । अनपुंसकं किम् । राजसूयवाजपेये । अर्धर्चादी॥

९०८—यजुर्वेदमें विहित जो क्रतु तद्वाचक अनपुंसकलिङ्गका द्वन्द्व एकवत् हो, जैसे—अर्काश्वमेधम् । अध्वर्युक्रतु न होनेपर, जैसे—इषुवज्रौ । यह सामवेदमें विहित हैं । नपुंसक होनेपर, जैसे—राजसूयवाजपेये । यह संपूर्ण अर्द्धर्चादिके मध्यमें गृहीत हुए हैं ॥

९०९ अध्ययनतोऽविप्रकृष्टाख्यानाम् । २ । ४ । ५ ॥

अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वन्द्व एकवत् । पदकक्रमकम् ॥

९०९—जिसके अध्ययनसे प्रत्यासन्न संज्ञा हो उसका द्वन्द्व एकवत् हो, जैसे—पदकक्रमकम् ॥

९१० जातिरप्राणिनाम् । २ । ४ । ६ ॥

प्राणिवर्जजातिवाचिनां द्वन्द्व एकवत् । धानाशष्कुलि । प्राणिनां तु । विट्शूद्राः । द्रव्यजातीयानामेव । नेह। रूपरसौ। गमनाकुञ्चने।जातिप्राधान्य एवायमेकवद्भावः । द्रव्यविशेषविवक्षायां तु । बदरामलकानि ॥

९१०-प्राणिभिन्न जातिवाचक शब्दोंका द्वन्द्व एकवत् हो, जैसे-धानाश्च शष्कुल्यश्च=धानाशष्कुलि । प्राणी होनेपर एकवत् न होगा, जैसे-विट्शूद्राः । द्रव्यवाचक ही जातिवाची एकवत् हों, अन्य नहीं, यथा-रूपरसौ । गमनाकुंचने । जातिके प्राधान्यमें ही एकवद्भाव होताहै । इससे द्रव्यविशेषकी विवक्षा होनेपर जैसे-बदरामलकानि, इस स्थलमें एकवद्भाव नहीं हुआ ॥

९११ विशिष्टलिंगो नदीदेशोऽग्रामाः । २ । ४ । ७ ॥

ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्व एकवत् स्यात् । उद्ध्यश्च इरावती च उद्ध्येरावति । गङ्गा च शोणश्च गङ्गाशोणम् । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । भिन्नलिङ्गानां किम् । गङ्गायमुने । मद्रकेकयाः । अग्रामाः किम् । जाम्बवं नगरम् । शालूकिनी ग्रामः । जाम्बवशालूकिन्यौ ।

९११-ग्रामभिन्न और भिन्नलिंग नदी और देशवाचक शब्दका समाहारमें द्वन्द्व एकवत् हो, जैसे-उद्ध्यश्च इरावती च=उद्ध्येरावति । गंगा च शोणश्च=गंगाशोणम् । कुरवश्च कुरुक्षेत्रञ्च=कुरुकुरुक्षेत्रम् ।

भिन्नलिंग न होनेपर, जैसे-गंगा च यमुना च=गंगायमुने । मद्रकेकयाः ।

ग्राम होनेपर, जैसे-जाम्बवन्नगरम्, शालूकिनी ग्रामः= जाम्बवशालूकिन्यौ ॥

९१२ क्षुद्रजन्तवः । २ । ४ । ८ ॥

एषां समाहारे द्वन्द्व एकवत्स्यात् । यूकालिक्षम् । आ नकुलात् क्षुद्रजन्तवः ॥

९१२-क्षुद्रजन्तुवाचक शब्दका समाहारमें द्वन्द्व एकवत् हो, जैसे-यूकाश्च लिक्षाश्च =यूकलिक्षम् । जिसको अस्थि नहीं अथवा जो अतिक्षुद्राकृतिविशिष्ट हो और अर्द्धाञ्जलिपरिमित स्थलमें जिसकी शतसंख्या हो उसको क्षुद्रजन्तु कहतेहैं । कोई २ नकुलतकको क्षुद्रजन्तु कहतेहैं ॥

९१३ येषां च विरोधः शाश्वतिकः । २ । ४ । ९ ॥

एषां प्राग्वत् । अहिनकुलम् । गोव्याघ्रम् । काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षमृगेति प्राप्तं चकारेण बाध्यते ॥

९१३-जिन जन्तुओंका परस्पर विरोध स्वभावसिद्ध हो उनका द्वन्द्व एकवत् हो, जैसे-अहयश्च नकुलाश्च=अहिनकुलम् । गावश्च व्याघ्राश्च=गोव्याघ्रम् । काकोलूकम् । इस स्थलमें परत्वके कारण "विभाषा वृक्षमृग० ९१६" इस सूत्रसे प्राप्तविकल्प एकवद्भावका इस सूत्रस्थ चकारसे बाध होताहै ॥

९१४ शूद्राणामनिरवसितानाम् । २ । ४ । १० ॥

अबहिष्कृतानां शूद्राणां प्राग्वत् । तक्षायस्कारम् । पात्राद्बहिष्कृतानां तु चण्डालमृतपाः ॥

९१४-पात्रसे बहिष्कृत नहीं हो, ऐसे शूद्रजातिवाचक शब्दका द्वन्द्व एकवत् हो, जैसे-तक्षायस्कारम् । जिसके भोजन करनेपर कांस्यादि पात्र स्मृतिशास्त्रोक्त "भस्मना शुद्ध्यते कांस्यम्" इत्यादि वचनके अनुसार भस्मसे भी शुद्ध न हो अर्थात् ब्राह्मणादि चतुर्वर्णातिरिक्त पात्रसे बाहर चंडालादि जाति होनेपर एकवद्भाव नहीं होगा, जैसे-चंडालमृतपाः ॥

९१५ गवाश्वप्रभृतीनि च । २ । ४ । ११ ॥

यथोच्चारितानि साधूनि स्युः । गवाश्वम् । दासीदासमित्यादि ॥

९१५-गवाश्व-आदि कितने शब्द जिस प्रकारसे उच्चारित हों उसी प्रकार सिद्ध हों, जैसे-गवाश्वम्, दासीदासम्-इत्यादि । आदि शब्दसे और भी कितने शब्द जानने ॥

९१६ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् । २ । ४ । १२ ॥

वृक्षादीनां सप्तानां द्वन्द्वः अश्ववडवेत्यादिद्वन्द्वत्रयं च प्राग्वद्वा । वृक्षादौ विशेषाणामेव ग्रहणम् । प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । रुरुपृषतम् । रुरुपृषताः । कुशकाशम् । कुशकाशाः । व्रीहियवम् । व्रीहियवाः । दधिघृतम् । दधिघृते । गोमहिषम् । गोमहिषाः । शुकबकम् । शुकबकाः । अश्ववडवम् । अश्ववडवौ । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् । अधरोत्तरे ॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम् ॥*॥ बदराणि चामलकानि च बदरामलकम् । जातिरप्राणिनामित्येकवद्भावः । नेह । बदरामलके । रथिकाश्वारोहौ । प्लक्षन्यग्रोधौ इत्यादि । विभाषा वृक्षेतिसूत्रे येऽप्राणिनस्तेषां ग्रहणं जातिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थम् । पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वन्द्वः । अन्यैस्तु संहतेरतरयोग एवेति नियमार्थं मृगशकुनिग्रहणम् । एवं पूर्वापरमधरोत्तरमित्यपि । अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थम् । अन्यथा परत्वात्पूर्ववदश्ववडवाविति स्यात् ॥

९१६-वृक्ष, मृग, तृण, धान्य, व्यञ्जन, पशु और शकुनि, इन सात शब्दोंका द्वन्द्व और अश्ववडव, पूर्वापर, अधरोत्तर,

यह तीन द्वन्द्व विकल्प करके एकवत् हों । वृक्षादिसे विशेषोंका ही ग्रहण है, आशय यह है कि, " सरूपाणाम्० १।२।६४ " से एकशेषके कारण सरूप वृक्ष वृक्षका द्वन्द्व नहीं हो सकताहै, वैसे "विरूपाणामपि०" इससे एकशेषके कारण विरूप समानार्थकका भी द्वन्द्व नहीं होसकताहै, अनभिधानके कारण ' वृक्ष धव ' इस सामान्य विशेषका भी द्वन्द्व नहीं होसकताहै, इसलिये इस सूत्रमें वृक्ष पदसे वृक्षविशेषका ही ग्रहण होताहै, ऐसे ही सब जगह समझना । प्लक्षाश्च न्यग्रोधाश्च=प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । रुरुपृषतम्, रुरुपृषताः। कुशकाशम्, कुशकाशाः।व्रीहियवम्, व्रीहियवाः। दधि च घृतं च=दधिघृतम्, दधिघृते । गावश्च महिषाश्च=गोमहिषम्, गोमहिषाः । शुकबकम्, शुकबकाः । अश्ववडवम्, अश्ववडवौ । पूर्वापरम्, पूर्वापरे । अधरोत्तरम्, अधरोत्तरे ।

फल, सेना, वनस्पति, मृग, शकुनि, क्षुद्रजन्तु, धान्य और तृण शब्दोंके बहुवचनप्रकृतिक ही द्वन्द्व एकवत् हों ऐसा कहना चाहिये * जैसे–बदराणि च आमलकानि च=बदरामलकम्, यहां "जातिरप्राणिनाम् ९१० " इस सूत्रसे एकवद्भाव हुआहै । बदरामलके, रथिकाश्वारोहौ और प्लक्षन्यग्रोधौ–इत्यादिमें बहुवचनप्रकृतिक द्वन्द्व न होनेसे एकवचन नहीं हुआ ।

" विभाषा वृक्ष० ९१६"इस सूत्रमें जो अप्राणिवाचक हैं, उनका ग्रहण " जातिरप्राणिनाम् ९१० " इस सूत्रसे नित्य एकवद्भावकी प्राप्ति होनेपर भी विकल्प विधानके निमित्त है । हस्त्यश्वादिओंमें सेनाङ्गत्वके कारण नित्य एकवद्भाव प्राप्त होनेपर भी विकल्पार्थ पशु शब्दका ग्रहण है । मृगका मृगहीके साथ और शकुनिका शकुनिहीके साथ दोनों स्थलोंमें समाहार द्वन्द्व हो, अन्यके साथ इतरेतरयोग द्वन्द्व ही हो, इस नियमके निमित्त सूत्रमें मृग और शकुनि शब्दका ग्रहण कियाहै, इसी प्रकार पूर्वापरम्, अधरोत्तरम्, यहां भी समझना । विकल्प पक्षमें नपुंसकत्वके निमित्त अश्ववडव शब्दका ग्रहण कियाहै, अन्यथा परत्वके कारण " पूर्ववदश्ववडवौ ८१३ " सूत्रसे ' अश्ववडवौ ' ऐसा ही होजाता ॥

९१७ विप्रतिषिद्धं चानधिकरणवाचि । २ । ४ । १३ ॥

विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात् । शीतोष्णम् । शीतोष्णे । वैकल्पिकः समाहारद्वन्द्वश्चार्थे इति सूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम् । तेन द्रव्यवाचिनामितरेतरयोग एव । शीतोष्णे उदके स्तः । विप्रतिषिद्धं किम् । नन्दकपाञ्चजन्यौ । इह पाक्षिकः समाहारद्वन्द्वो भवत्येव ॥

९१७–परस्पर विरुद्धार्थ तथा अद्रव्यवाचक शब्दोंके द्वन्द्व विकल्प करके एकवत् हों, जैसे–शीतं च उष्णं च=शीतोष्णम्, शीतोष्णे । यद्यपि विकल्प करके समाहारद्वन्द्व "चार्थे द्वन्द्वः ९०१" इस सूत्रसे ही प्राप्त है तथापि यह सूत्र यदि विरुद्धार्थवाचक शब्दोंका हो तो अद्रव्यवाचकका ही हो, इस नियमके निमित्त यह सूत्र कियाहै, इससे यह फल हुआ कि, द्रव्यवाचकोंका इतरेतरयोगद्वन्द्व ही होगा, जैसे–शीतोष्णे उदके स्तः । विरुद्धार्थ न होनेपर, जैसे–नन्दकपाञ्चजन्यौ, इस स्थलमें पाक्षिक समाहारद्वन्द्व होताहीहै ॥

९१८ न दधिपयआदीनि । २ । ४ । १४ ॥

एतानि नैकवत्स्युः । दधिपयसी । इध्माबर्हिषी । निपातनाद्दीर्घः । ऋक्सामे । वाङ्मनसे ॥

९१८–दधिपयः आदि पदोंको एकवद्भाव न हो, जैसे–दधि च पयश्च=दधिपयसी । 'इध्माबर्हिषी' इस स्थलमें निपातनसे दीर्घ हुआहै । ऋक्सामे । वाक् च मनश्च=वाङ्मनसे ॥

९१९ अधिकरणैतावत्त्वे च । २ । ४ । १५ ॥

द्रव्यसंख्यावगमे एकवदेवेति नियमो न स्यात् । दश दन्तोष्ठाः ॥

९१९–द्रव्यकी संख्याका अवगम होनेपर 'एकवदेव' यह नियम न हो । यह सूत्र "द्वन्द्वश्च प्राणि० २।४।२" इस सूत्रसे प्राप्त एकवद्भावके निषेधार्थ है, जैसे–दश दन्तोष्ठाः ॥

९२० विभाषा समीपे । २ । ४ । १६ ॥

अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहर एवेत्येवंरूपो नियमो वा स्यात् । उपदशं दन्तोष्ठम् । उपदशाः दन्तोष्ठाः ॥

९२०–द्रव्यगत संख्याके अवगमका सामीप्यसे परिच्छेदन होनेपर समाहार द्वन्द्व ही हो, यह नियम विकल्प करके हो, जैसे–उपदशं दन्तोष्ठम्, पक्षे–उपदशा दन्तोष्ठाः ॥

९२१ आनङ् ऋतो द्वन्द्वे । ६ । ३ । २५ ॥

विद्यायोनिसंबन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे । होतापोतारौ । होतृपोतृनेष्टोद्गातारः । मातापितरौ । पुत्रेऽन्यतरस्यामित्यतो मण्डूकप्लुत्या पुत्र इत्यनुवृत्तेः पितापुत्रौ ॥

९२१–विद्या और योनिसंबन्धवाचक ऋकारान्त शब्दोंके द्वन्द्वमें उत्तरपद परे रहते आनङ् आदेश हो, जैसे–होतापोतारौ, होतृपोतृनेष्टोद्गातारः । मातापितरौ । यहां "पुत्रेऽन्यतरस्याम् ६।३।२२ " इस सूत्रसे मंडूकप्लुति अधिकारसे पुत्र शब्दकी अनुवृत्ति होतीहै, इस कारण 'पितापुत्रौ' यहां भी आनङ् आदेश हुआ ॥

९२२ देवताद्वन्द्वे च । ६ । ३ । २६ ॥

इहोत्तरपदे परे आनङ् । मित्रावरुणौ ॥ वायुशब्दप्रयोगे प्रतिषेधः ॥ * ॥ अग्निवायू । वायग्नी । पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थम् । तेन ब्रह्मप्रजापती इत्यादौ नानङ् । एतद्धि नैकहविर्भागित्वेन श्रुतं नापि लोके प्रसिद्धं साहचर्यम् ॥

९२२-देवतावाचक शब्दोंके द्वन्द्वमें उत्तरपद परे रहते आनङ् हो, जैसे-मित्रश्च वरुणश्च=मित्रावरुणौ । वायु शब्दके प्रयोगमें आनङ् नहीं हो * जैसे-अग्निवायू, वाय्वग्नी । सूत्रमें द्वन्द्वकी अनुवृत्ति होनेपर भी प्रसिद्ध साहचर्यके परिग्रहार्थ पुनः द्वन्द्वग्रहण किया है, इसी कारण 'ब्रह्मप्रजापती' इत्यादिमें आनङ् नहीं होताहै, यह साहचर्य एकहविर्भागित्वसे श्रुत नहीं है और लोकमें भी प्रसिद्ध नहीं है ॥

९२३ ईदग्नेः सोमवरुणयोः ।६।३।२७॥

देवताद्वन्द्वे इत्येव ॥

९२३-देवतावाचक शब्दके द्वन्द्वमें सोम और वरुण शब्द परे रहते अग्नि शब्दको ईकार आदेश हो ॥

९२४ अग्नेः स्तुत्स्तोमसोमाः।८।३।८२॥

अग्नेः परेषामेषां सस्य षः स्यात्समासे । अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । अग्नीवरुणौ ॥

९२४-अग्नि शब्दके परे स्थित स्तुत्, स्तोम और सोम शब्दके सकारको ष हो, जैसे-अग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । अग्नीवरुणौ ॥

९२५ इद् वृद्धौ । ६ । ३ । २८ ॥

वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वन्द्वे । अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म । अग्नीवरुणौ देवते अस्य आग्निवारुणम् । देवताद्वन्द्वे चेत्युभयपदवृद्धिः । अलौकिकवाक्ये आनङमीत्त्वं च बाधित्वा इः । वृद्धौ किम् । आग्नेन्द्रः । नेन्द्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधः ॥ विष्णौ न ॥ * ॥ आग्नावैष्णवम् ॥

९२५-देवतावाचक शब्दके द्वन्द्व समासमें वृद्धिमत् पद परे रहते अग्नि शब्दको इत् आदेश हो, जैसे-अग्नामरुतौ देवते अस्य=आग्निमारुतं कर्म । अग्नीवरुणौ देवते अस्य=आग्निवारुणम् । दोनों स्थलोंमें "देवताद्वन्द्वे च १२३९" इस वक्ष्यमाण सूत्रसे दोनों पदोंकी वृद्धि हुई है और अलौकिक वाक्यमें आनङ् और ईत्त्व दोनोंको बाधकर इकार होताहै । वृद्धिमत् शब्द परे हो ऐसा क्यों कहा ? तो ऐसा न होनेपर इत्त्व आदेश न हो,जैसे-आग्नेन्द्रः,यहां"नेन्द्रस्य परस्य१२४०" इस सूत्रसे उत्तरपदवृद्धिका निषेध हुआहै ।

विष्णु शब्द परे रहते इत्त्व न हो * यथा-आग्नावैष्णवम् ॥

९२६ दिवो द्यावा । ६ । ३ । २९ ॥

देवताद्वन्द्वे उत्तरपदे । द्यावाभूमी । द्यावाक्षमे ॥

९२६-देवतावाचक शब्दोंके द्वन्द्वमें उत्तरपद परे रहते दिव् शब्दके स्थानमें द्यावा आदेश हो, जैसे-द्यावाभूमी । द्यावाक्षमे ॥

९२७ दिवसश्च पृथिव्याम् । ६।३।३०॥

दिव इत्येव । चाद् द्यावा । आदेशे अकारोच्चारणं सकारस्य रुत्वं मा भूदित्येतदर्थम् । द्यौश्च पृथिवी च दिवस्पृथिव्यौ । द्यावापृथिव्यौ । छन्दसि दृष्टानुविधिः । द्यावा चिदस्मै पृथिवी । दिवस्पृथिव्योररतिमित्यत्र पदकारा विसर्गं पठन्ति ॥

९२७-पृथिवी शब्द परे रहते दिव् शब्दके स्थानमें दिवस आदेश हो, चकारसे द्यावा आदेश भी हो । दिवस आदेशमें अकारका उच्चारण इसलिये है कि, सकारके स्थानमें रुत्व नहीं हो । द्यौश्च पृथ्वी च=दिवस्पृथिव्यौ, द्यावापृथिव्यौ । वेदमें जिस प्रकार देखा जाय वैसा विधान हो, जैसे-द्यावा चिदस्मै पृथिवी । 'दिवस्पृथिव्योररतिम्' इस स्थलमें पदकार वि[र्ग]युक्त पाठ करतेहैं, इस कारण 'दिवः पृथिव्योररतिम्' ऐसा उनके मतसे पाठ है ॥

९२८ उषासोषसः । ६ । ३ । ३१ ॥

उषस्शब्दस्योषासादेशो देवताद्वन्द्वे । उषासासूर्यम् ॥

९२८-देवतावाचक शब्दके द्वन्द्वमें उषस् शब्दके स्थानमें उषासा आदेश हो, जैसे-उषाश्च सूर्यश्च तयोः समाहारः= उषासासूर्यम् ॥

९२९ मातरपितरावुदीचाम् ।६।३।३२ ॥

मातरपितरौ । उदीचां किम् । मातापितरौ ॥

९२९-उदीचोंके मतमें 'मातरपितरौ' इसमें मातृ शब्दको निपातनसे अरङ् आदेश हो । उदीचोंके मतमें हो ऐसा क्यों कहा ? तो औरोंके मतमें 'मातापितरौ' ऐसा भी प्रयोग हो ॥

९३० द्वन्द्वाच्चुदषहान्तात्समाहारे । ५ । ४ । १०६ ॥

चवर्गान्ताद्दषहान्ताच्च द्वन्द्वाट्टच् स्यात्समाहारे । वाक् च त्वक् च वाक्त्वचम् । त्वक्स्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । समाहारे किम् । प्रावृट्शरदौ ॥

॥ इति द्वन्द्वः ॥

९३०-समाहारद्वन्द्वमें, चवर्गान्त, दकारान्त, षकारान्त और हकारान्त शब्दोंके उत्तर टच् प्रत्यय हो, जैसे-वाक् च त्वक् च=वाक्त्वचम् । त्वक्स्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । समाहार न होनेपर टच् न होगा, जैसे-प्रावृट्शरदौ ॥

॥ इति द्वन्द्वसमासः ॥

अथैकशेषप्रकरणम् ।

सरूपाणाम् । रामौ । रामाः ॥ विरूपाणामपि समानार्थानाम् ॥ * ॥ वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ । कुटिलदण्डौ ॥

"सरूपाणामेक० १८८" अर्थात् संपूर्ण विभक्तियोंमें समान रूपवाले समानार्थक अनेकमेंसे एक ही शेष रहै,

अन्यका लोप हो, इससे राम+राम+औ=रामौ । राम+राम+राम+जस्=रामाः ।

समानार्थ विरूप (भिन्न रूप) का भी एकशेष हो *। जैसे–वक्रदंडश्च कुटिलदंडश्च=वक्रदंडौ, कुटिलदंडौ ॥

९३१ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । १ । २ । ६५ ॥

यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धः किम् । गर्गगार्ग्यायणौ । यूना किम् । गर्गगार्ग्यौ । तल्लक्षणः किम् । भागवित्तिभागवित्तिकौ । कृत्स्नं किम् । गार्ग्यवात्स्यायनौ ॥

९३१–युवप्रत्ययान्त पदके साथ वृद्ध अर्थात् गोत्रप्रत्ययान्तकी उक्ति होनेपर गोत्रप्रत्ययान्त पद ही अवशेष रहे, परन्तु गोत्र और युवप्रत्ययमात्रकृत यदि उन दोनोंका सम्पूर्ण वैरूप्य हो तो, जैसे–गार्ग्यश्च गार्ग्यायणश्च=गार्ग्यौ, इस स्थानमें गोत्रप्रत्ययान्त पद 'गार्ग्यः' और युवप्रत्ययान्त पद 'गार्ग्यायणः' इन दोनोंमेसे गोत्रप्रत्ययान्त (गार्ग्यः) शेष रहा । गोत्रप्रत्ययान्त न होनेपर, जैसे–गर्गश्च गार्ग्यायणश्च=गर्गगार्ग्यायणौ । युवप्रत्ययान्त न होनेपर,जैसे–गर्गगार्ग्यौ। सूत्रमें 'तल्लक्षणः' यह पद ग्रहण करनेसे 'भागवित्तिभागवित्तिकौ' इस स्थलमें एकशेष नहीं हुआ । कृत्स्न पद ग्रहण करनेसे 'गार्गी च वात्स्यायनौ च गार्ग्यवात्स्यायनौ' इस स्थानमें भी एकशेष नहीं हुआ ॥

९३२ स्त्रीपुंवच्च । १ । २ । ६६ ॥

यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्।गार्गी च गार्ग्यायणश्च गर्गाः।अस्त्रियामित्यनुवर्तमाने यञञोश्चेति लुक् । दाक्षी च दाक्षायणश्च दाक्षी ॥

९३२–युवप्रत्ययान्तके साथ उक्ति होनेपर गोत्रप्रत्ययान्त स्त्रीवाचक शब्द अवशेष रहे और उसका अर्थ पुंवत् हो, जैसे–गार्गी च गार्ग्यायणी च=गर्गाः । 'अस्त्रियाम्' इस अंशकी अनुवृत्ति होनेपर–" यञञोश्च ११०८ " इस सूत्रसे यञ् प्रत्ययका लुक् हुआ । दाक्षी च दाक्षायणश्च=दाक्षी ॥

९३३ पुमान् स्त्रिया । १ । २ । ६७ ॥

स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् । हंसी च हंसश्च हंसौ ॥

९३३–स्त्रीवाचक पदके साथ उक्ति होनेपर पुंवाचक पद शेष रहै, यदि तल्लक्षण ही कुछ विशेष हो तो, जैसे–हंसी च हंसश्च=हंसौ ॥

९३४ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् । १ । २ । ६८ ॥

भ्राता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ ॥

९३४–स्वसृ और दुहितृ शब्दके साथ उक्ति होनेपर भ्रातृ और पुत्र शब्द शेष रहता है, जैसे–भ्राता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च=पुत्रौ ॥

९३५ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् । १ । २ । ६९ ॥

अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत्स्यात्तल्लक्षण एव विशेषश्चेत् । शुक्लः पटः । शुक्ला शाटी । शुक्लं वस्त्रम् । तदिदं शुक्लं तानीमानि शुक्लानि ॥

९३५–अक्लीवके साथ अर्थात्, पुँल्लिङ्ग स्त्रीलिंगके साथ उक्ति होनेपर नपुंसकलिंग पद अविशिष्ट रहै और वह पद विकल्प करके एकवत् हो, यदि पुंस्त्रीनपुंसकलिंगकृत ही विशेष हो तो, जैसे–शुक्लः पटः । शुक्ला शाटी । शुक्लं वस्त्रम् । तदिदं शुक्लम्, तानीमानि शुक्लानि ॥

९३६ पिता मात्रा । १ । २ । ७० ॥

मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च पितरौ, मातापितरौ वा ॥

९३६–मातृ शब्दके साथ उक्ति होनेपर विकल्प करके पितृ शब्द शेष रहै, जैसे–माता च पिता च=पितरौ, मातापितरौ वा ॥

९३७ श्वशुरः श्वश्र्वा । १ । २ । ७१ ॥

श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते तल्लक्षण एव विशेषश्चेत् । श्वश्रूश्च श्वशुरश्च श्वशुरौ । श्वश्रूश्वशुरौ ॥

९३७–श्वश्रूके साथ उक्ति होनेपर विकल्प करके श्वशुर शब्द शेष रहताहै, यदि तल्लक्षण ही विशेष हो तो, जैसे–श्वश्रूश्च श्वशुरश्च=श्वशुरौ, श्वश्रूश्वशुरौ ॥

९३८ त्यदादीनि सर्वैर्नित्यम् १।२।७२॥

सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते । स च देवदत्तश्च तौ ॥ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते ॥ * ॥ स च यश्च यौ ॥ पूर्वशेषोपि दृश्यते इति भाष्यम् ॥ स च यश्च तौ ॥ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि ॥ * ॥ सा च देवदत्तश्च तौ । तच्च देवदत्तश्च यज्ञदत्ता च तानि । पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते । तच्च देवदत्तश्च ते ॥ अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम् ॥ * ॥ कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । तच्च सा च अर्द्धपिप्पल्यौ ते ॥

९३८–सब शब्दोंके साथ उक्ति होनेपर त्यदादि ही नित्य शेष रहैं, जैसे–स च देवदत्तश्च=तौ ।

त्यदादिकोंकी परस्पर उक्ति होनेपर जो पर हो वही शेष रहै * जैसे–स च यश्च=यौ । भाष्यकारने कहा है कि, किसी २ स्थलमें पूर्वपद भी शेष रहे, जैसे–स च यश्च=तौ ।

त्यदादिकोंका शेष होनेपर पुँल्लिंग, नपुंसकलिंगके अनुसार लिंगवचन होतेहैं अर्थात् 'स्त्रीलिंग पुँल्लिंग प्राप्त हो तो पुंल्लिंग हो और स्त्रीलिङ्ग नपुंसकलिङ्ग प्राप्त हो तो नपुंसकलिङ्ग हो और तीनोंकी प्राप्ति हो तो परत्वके कारण नपुंसकलिंग हो * जैसे–सा च देवदत्तश्च=तौ । तच्च देवदत्तश्च यज्ञदत्ता च तानि । पुँल्लिङ्ग और नपुंसकलिङ्गकी प्राप्ति होनेपर परत्वसे नपुंसकलिंग ही शेष हो, जैसे–तच्च देवदत्तश्च=ते ॥

द्वन्द्व और तत्पुरुषविशेषण पदका पूर्वोक्त न हो अर्थात् विशेष्यगत लिंग हो * जैसे–कुक्कुटमयूर्याविमे, मयूरीकुक्कुटाविमौ । तच्च सा च अर्द्धपिप्पल्यौ ते ॥

९३९ ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री । १ । २ । ७३ ॥

एषु सहविवक्षायां स्त्री शिष्यते । पुमान् स्त्रियेत्यस्यापवादः । गाव इमाः । ग्राम्येति किम् । रुरव इमे । पशुग्रहणं किम् । ब्राह्मणाः । संघेषु किम् । एतौ गावौ । अतरुणेषु किम् । वत्सा इमे ॥ अनेकशफेष्विति वाच्यम् ॥ * ॥ अश्वा इमे । इह सर्वत्र एकशेषे कृतेऽनेकसुबन्ताभावाद् द्वन्द्वो न । तेन शिरसी शिरांसीत्यादौ समासस्येत्यन्तोदात्तः प्राण्यङ्गत्वादेकवद्भावश्च न । पन्थानौ पन्थान इत्यादौ समासान्तो न ॥

॥ इत्येकशेषः ॥

९३९–अतरुण ग्राम्य पशुसमूहके 'सह' विवक्षामें स्त्रीवाचक शब्द शेष रहै । यह सूत्र "पुमान् स्त्रिया ९३३" इस सूत्रका अपवाद है, यथा–गाव इमाः । ग्राम्य न होनेपर, जैसे–रुरव इमे । पशु न होनेपर, जैसे–ब्राह्मणा इमे । समूह न होनेपर, जैसे–एतौ गावौ । अतरुण न होनेपर, जैसे–वत्सा इमे ॥

अनेक खुरविशिष्ट पशुसमूहमें 'सह' विवक्षा हो तो यह विधि हो और एकखुर पशुसमूहमें यह विधि न हो * जैसे–अश्वा इमे । इन सब स्थलोंमें अन्तरंगत्वके कारण पहले ही एकशेष होनेपर अनेक सुबन्तके अभावके कारण द्वन्द्व नहीं हुआ, इस कारण शिरसी, शिरांसि–इत्यादि स्थलोंमें "समासस्य०" इस सूत्रसे अन्तोदात्त और प्राण्यंगत्वके कारण एकवद्भाव भी नहीं हुआ, और पन्थानौ, पन्थानः–इत्यादि स्थलोंमें समासान्त नहीं हुआ ॥

॥ इत्येकशेषप्रकरणम् ॥

अथ सर्वसमासशेषप्रकरणम् ।

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स द्विधा । लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्होऽसाधुरलौकिकः । यथा । राज्ञः पुरुषः । राजन् अस् पुरुष सु इति । अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा । समासश्चतुर्विध इति प्रायोवादः । अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात् । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । इत्यपि प्राचां प्रवादः प्रायोभिप्रायः । सूपप्रति उन्मत्तगङ्गमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्वित्रा इत्यादिबहुव्रीहौ दन्तोष्ठमित्यादिद्वन्द्वे चाभावात् । तत्पुरुषविशेषः कर्मधारयः । तद्विशेषो द्विगुः। अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव। तत्पुरुषस्य क्वचिदेवेत्युक्तम् । किंच,

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥१॥

सुपां सुपा। राजपुरुषः । तिङा । पर्यभूषत् । नाम्ना । कुम्भकारः । धातुना । कटप्रूः । अजस्रम् । तिङां तिङा । पिबतखादता । खादतमोदता । तिङां सुपा । कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा । एहीडादयोऽन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः ॥

॥ इति सर्वसमासशेषः ॥

कृत्, तद्धित, समास, एकशेष और सनादिप्रत्ययान्त धातुरूप भेदसे वृत्ति पांच प्रकारकी है । जिससे दूसरा पदार्थ अभिहित हो उसका नाम वृत्ति है । वृत्त्यर्थज्ञापक वाक्यका नाम विग्रह है । वह विग्रह दो प्रकारका है, लौकिक और अलौकिक । परिनिष्ठितत्वके कारण साधु जो हो, उसको लौकिक विग्रह कहतेहैं और प्रयोगके अयोग्य अर्थात् असाधुको अलौकिक विग्रह कहतेहैं, जैसे–'राज्ञः पुरुषः' यह लौकिक और 'राजन्+ङस्=पुरुष+सु' यह अलौकिक विग्रह है । नित्यसमासमें विग्रह नहीं हो, यदि हो तो जिस पदके साथ समास हो उससे दूसरे पदके साथ हो । समास चार प्रकारका है, यह प्राचीनोंका मत है, परन्तु वह ठीक नहीं है क्योंकि, अव्ययीभाव, तत्पुरुष, बहुव्रीहि और द्वन्द्व इन चार प्रकारके समाससे अतिरिक्त भी "सह सुपा ६४९" इस सूत्रसे समास विधान किया है । जिस समासमें पूर्वपदार्थ प्रधान हो, उसका नाम अव्ययीभाव है । जिस समासमें उत्तरपदार्थ प्रधान हो, उसका नाम तत्पुरुष है । जिस समासमें अन्यपदार्थ प्रधान हो, उसका नाम बहुव्रीहि है । जिस समासमें दोनों पदार्थ प्रधान हो, उसका नाम द्वन्द्व है. यह जो प्राचीनोंका प्रवाद है सो भी अमूलक है, क्योंकि, 'सूपप्रति', 'उन्मत्त-

गंगम्' इत्यादि अव्ययीभाव समासमें पूर्वपदार्थके प्रधानत्वका अभाव है, 'अतिमाला' इत्यादि । तत्पुरुष समासमें उत्तर-पदार्थके प्रधानत्वका अभाव है, 'दंतोष्ठम्' इत्यादि । द्वन्द्व समासमें समूहके प्रधान होनेसे उभय पदार्थके प्रधानत्वका अभाव है । तत्पुरुषका विशेष कर्मधारय समास और कर्म-धारयका विशेष द्विगु समास है । अनेकपदत्व केवल द्वन्द्व और बहुव्रीहि समासको ही है । और तत्पुरुषका कहीं ही अनेकपदत्व है । और

"सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ॥"

अर्थात् सुबन्तके साथ सुबन्तका समास, जैसे–राजपुरुषः । तिङन्तके साथ सुबन्तका समास, जैसे–पर्यभूषत् । नामके साथ सुबन्तका समास, जैसे–कुंभकारः । धातुके साथ सुबन्तका समास, जैसे–कटप्रूः । अजस्रम् । तिङन्तके साथ तिङन्तका समास, जैसे–पिबतखादता । खादतमोदता । सुबन्तके साथ तिङन्तका समास, जैसे–कृन्त विचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा, यहां "एहीडादयोऽन्यपदार्थे" इस गणसूत्रसे मयूरव्यंसकादि गणके मध्यमें पाठ होनेके कारण समास हुआ ॥

॥ इति सर्वसमासशेषप्रकरणम् ॥

अथ समासान्तप्रकरणम् ।

९४० ऋक्पूरब्धूःपथामानक्षे ५।४।७४॥

अ अनक्षे इति च्छेदः । ऋगाद्यन्तस्य समासस्य अ प्रत्ययोऽन्तावयवः स्यात् । अक्षे या धूस्तदन्तस्य तु न । अर्द्धर्चः ॥ अनृचबह्वृचावध्येतर्येव । नेह । अनृक्साम । बह्वृक् सूक्तम् । विष्णोः पूः विष्णुपुरम् । क्लीबत्वं लोकात् । विमलापं सरः ॥

९४०–'आनक्षे' इस स्थलमें 'अ अनक्षे' ऐसा पदच्छेद है । ऋक्शब्दान्त, पूर्शब्दान्त, अप्शब्दान्त, धुर्शब्दान्त और पथिन्शब्दान्त जो समास उसका अन्तावयव अ प्रत्यय हो, परन्तु शकटका अक्षबोधक जो धुर् शब्द है तदन्त समाससे अ प्रत्यय नहीं हो, 'अर्द्धर्चः' यहां "अर्द्धर्चाः पुंसि च २।४।३१" इस सूत्रसे पुंस्त्व हुआहै । अनृच और बह्वृच यह दोनों पद अध्ययनकर्ता ही अर्थमें अप्रत्ययान्त होंगे, अन्यार्थमें अप्रत्ययान्त नहीं होंगे, यथा–अनृक् साम । बह्वृक् सूक्तम् । विष्णोः पूः=विष्णुपुरम्, इस स्थलमें लोकमें नपुंसकका ही प्रयोग होनेके कारण क्लीबत्व हुआ, इसी प्रकार 'विमलापं सरः' इत्यादि प्रयोग जानने ॥

९४१ द्व्यन्तरुपसर्गेभ्योऽप ईत् ६।३।९७।

अप इति कृतसमासान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्योऽपस्य ईत् स्यात् । द्विर्गता आपो यस्मिन्निति द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् । समापो देवयजनमिति तु समा आपो यस्मिन्निति बोध्यम् । कृतसमासान्तग्रहणान्नेह । स्वप्, स्वपी ॥ अवर्णान्ताद्वा ॥*॥ प्रेपम् । परेपम् । प्रापम् । परापम् ॥

९४१–अप यह कृतसमासान्तका अनुकरण है, इससे षष्ठ्यर्थमें प्रथमा है । द्वि, अन्तर् और उपसर्ग इनके परे स्थित अप शब्दके अकारके स्थानमें ईत् हो, जैसे–द्विर्गता आपो यस्मिन्=द्वीपम् । अन्तर्गता आपो यस्मिन्=अन्तरीपम् । इसी प्रकार प्रतीपम्, समीपम्, इत्यादि । 'समापो देवयजनम्' इस स्थलमें 'समा आपो यस्मिन्' इस विग्रहमें उपसर्गपूर्वक न होनेके कारण ईत् नहीं हुआ । कृतसमासान्तके ग्रहणके कारण 'स्वप्, स्वपी' इत्यादिमें ईत् आदेश नहीं हुआ ।

अवर्णान्त उपसर्गके उत्तर अप् शब्दके अकारके स्थानमें विकल्प करके ईत् हो * जैसे–प्रेपम्, विकल्प पक्षमें–प्रापम् । परेपम्, पक्षे–परापम् ॥

९४२ ऊदनोर्देशे । ६ । ३ । ९८ ॥

अनोः परस्यापस्य ऊत्स्याद्देशे । अनूपो देशः । राजधुरा । अक्षे तु अक्षधूः । दृढधूरक्षः । सखिपथो रम्यपथो देशः ॥

९४२–देश अर्थ होनेपर 'अनु' इस उपसर्गके परे स्थित जो कृतसमासान्त अप् शब्द उसके अकारके स्थानमें ऊत् हो, जैसे–अनूपो देशः । राज्ञो धुरा=राजधुरा । जिस स्थानमें धुर् शब्द अक्षवाचक है वहां अ प्रत्यय नहीं होगा, जैसे–अक्षधूः । दृढधूः अक्षः । सखिपथः । रम्यपथो देशः ॥

९४३ अच् प्रत्यन्ववपूर्वात्सामलोम्नः । ५ । ४ । ७५ ॥

एतत्पूर्वात्सामलोमान्तात्समासादच् स्यात् । प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अनुलोमम् ॥ कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते ॥ कृष्णभूमः । उदग्भूमः । पाण्डुभूमः । द्विभूमः प्रासादः ॥ संख्याया नदीगोदावरीभ्यां च ॥ पञ्चनदम् । सप्तगोदावरम् । अजिति योगविभागादन्यत्रापि । पद्मनाभः ॥

९४३–प्रति, अनु और अवपूर्वक सामन् और लोमन् शब्दान्त समासके उत्तर अच् प्रत्यय हो जैसे–प्रतिसामम् । अनुसामम् । अवसामम् । प्रतिलोमम् । अनुलोमम् । अवलोमम् ।

कृष्ण, उदक, पांडु और संख्यावाचकशब्दपूर्वक भूमि शब्दके उत्तर समासान्त अच् प्रत्यय हो, जैसे–कृष्णभूमः । उदग्भूमः । पांडुभूमः । द्विभूमः प्रासादः ।

संख्यावाचक शब्दके परे स्थित नदी और गोदावरी शब्दके उत्तर समासान्त अच् प्रत्यय हो, जैसे–पञ्चनदम् । सप्तगोदावरम् । 'अच्' ऐसा भिन्न सूत्र करनेके

कारण एतद्भिन्न स्थलमें भी अच् प्रत्यय होगा, जैसे–पद्मनाभः ॥

९४४ अक्ष्णोऽदर्शनात् । ५ । ४ । ७६ ॥

अचक्षुःपर्यायादक्ष्णोऽच् स्यात्समासान्तः । गवामक्षीव गवाक्षः ॥

९४४–चक्षुःपर्याय न हो ऐसे अक्षि शब्दके उत्तर समासान्त अच् प्रत्यय हो, गवामक्षीव=गवाक्षः ॥

९४५ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः । ५ । ४ । ७७ ॥

एते पञ्चविंशतिरजन्ता निपात्यन्ते । आद्यास्त्रयो बहुव्रीहयः । अविद्यमानानि चत्वार्यस्य अचतुरः । विचतुरः । सुचतुरः ॥ त्र्युपाभ्यां चतुरोऽजिष्यते ॥ त्रिचतुराः । चतुर्णां समीपे उपचतुराः । तत एकादश द्वन्द्वाः । स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । दाराश्च गावश्च दारगवम् । ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम् । निपातनाट्टिलोपः । पदष्ठीवम् । निपातनात्पादशब्दस्य पद्भावः । नक्तं च दिवा च नक्तन्दिवम् । रात्रौ च दिवा च रात्रिन्दिवम् । रात्रेर्मान्तत्वं निपात्यते । अहनि च दिवा च अहर्दिवम् । वीप्सायां द्वन्द्वो निपात्यते । अहन्यहनीत्यर्थः । सरजसमिति साकल्येऽव्ययीभावः । बहुव्रीहौ तु सरजः पंकजम् । निश्चितं श्रेयो निःश्रेयसम् । तत्पुरुष एव । नेह । निःश्रेयान् पुरुषः । पुरुषस्यायुः पुरुषायुषम् । ततो द्विगू । द्व्यायुषम् । त्र्यायुषम् । ततो द्वन्द्वः । ऋग्यजुषम् । ततस्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । शुनः समीपम् उपशुनम् । टिलोपाभावः सम्प्रसारणं च निपात्यते । गोष्ठे श्वा गोष्ठश्वः ॥

९४५–अचतुरादि पचीस शब्द अच्प्रत्ययान्त निपातन होतेहैं । उनमें पहिलेके तीन बहुव्रीहि हैं, जैसे–अविद्यमानानि चत्वारि अस्य=अचतुरः । विचतुरः । सुचतुरः । त्रि और उपपूर्वक चतुर् शब्दके उत्तर अच् प्रत्यय हो, जैसे–त्रिचतुराः । 'चतुर्णां समीपे' ऐसे विग्रहमें उपचतुराः ॥ इसके पश्चात् और ग्यारह शब्द द्वन्द्व हैं, जैसे–स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । 'अक्षिणी च भ्रुवौ च' इस विग्रहमें अक्षिभ्रुवम्, दाराश्च गावश्च=दारगवम् । ऊरू च अष्ठीवन्तौ च=ऊर्वष्ठीवम्, इस स्थलमें निपातनसे टिलोप हुआ और 'पदष्ठीवम्' यहां निपातनहीसे पाद शब्दके स्थानमें पद्भाव हुआहै । नक्तञ्च दिवा च=नक्तन्दिवम् । रात्रौ च दिवा च=रात्रिन्दिवम्, इस स्थानमें रात्रि शब्दका मान्तत्व निपातनसिद्ध है । अहनि च दिवा च=अहर्दिवम्, इस स्थानमें वीप्सा अर्थमें द्वन्द्व निपातनसिद्ध है अर्थात् 'अहन्यहनि' ऐसा जानना चाहिये । सरजसम्, यहां साकल्यार्थमें अव्ययीभाव समास है, परन्तु बहुव्रीहि समासमें 'सरजः पङ्कजम्' ऐसा होगा । निश्चितं श्रेयः=निःश्रेयसम्, यह तत्पुरुष समासहीमें हो, इससे तत्पुरुष समास नहीं होने-पर 'निःश्रेयान् पुरुषः' यहां नहीं हुआ, 'पुरुषस्यायुः' इस वाक्यमें पुरुषायुषम् । पश्चात् दो द्विगु हैं, जैसे–द्व्यायुषम् । त्र्यायुषम् । पश्चात् एक द्वन्द्व है, जैसे–ऋग्यजुषम् । पश्चात् तीन कर्मधारय हैं, जैसे–जातोक्षः । महोक्षः । वृद्धोक्षः । 'शुनः समीपम्' इस वाक्यमें 'उपशुनम्' इस स्थानमें टिके लोपका अभाव और संप्रसारण निपातनसिद्ध है । 'गोष्ठे श्वा' इस वाक्यमें गोष्ठश्वः ॥

९४६ ब्रह्महस्तिभ्यां वर्चसः । ५ । ४ । ७८ ॥

अच् स्यात् । ब्रह्मवर्चसम् । हस्तिवर्चसम् । पल्यराजभ्यां चेति वक्तव्यम् ॥ * ॥ पल्यवर्चसम् राजवर्चसम् ॥

९४६–ब्रह्मन् और हस्तिन् शब्दके परे स्थित वर्चस् शब्दके उत्तर अच् हो, जैसे–ब्रह्मवर्चसम् । हस्तिवर्चसम् ।

पल्य और राजन् शब्दके परे स्थित वर्चस् शब्दके उत्तर भी अच् प्रत्यय हो * जैसे–पल्यवर्चसम् । राजवर्चसम् । मांसको पल्य कहतेहैं ॥

९४७ अवसमन्धेभ्यस्तमसः । ५ । ४ । ७९ ॥

अवतमसम् । सन्तमसम् । अन्धयतीत्यन्धं पचाद्यच् । अन्धं तमः अन्धतमसम् ॥

९४७–अव, सम्, और अन्धपूर्वक तमस् शब्दके उत्तर अच् प्रत्यय हो, जैसे–अवतमसम् । अन्धयतीति=अंधः, पचादित्वके कारण अच्, अन्धं तमः=अन्धतमसम् ॥

९४८ श्वसो वसीयश्श्रेयसः । ५ । ४ । ८० ॥

वसुशब्दः प्रशस्तवाची तत ईयसुनि वसीयः । श्वस्शब्द उत्तरपदार्थप्रशंसामाशीर्विषयतामाह । मयूरव्यंसकादित्वात्समासः । श्वोवसीयसम् । श्वःश्रेयसं ते भूयात् ॥

९४८–वसु शब्द प्रशस्तवाचक है, उसके उत्तर ईयसुन् प्रत्यय करके वसीयः, यह पद हुआहै । श्वस् शब्दसे आशीर्वादविषय जो उत्तरपदार्थप्रशंसा सो जानना । श्वस् शब्दके परे स्थित वसीयस् और श्रेयस् शब्दके उत्तर अच् प्रत्यय हो । 'श्वोवसीयसम्, श्वःश्रेयसं ते भूयात्' इस स्थलमें मयूरव्यंसकादित्वके कारण समास हुआहै ॥

९४९ अन्ववतप्ताद्रहसः । ५ । ४ । ८१ ॥

अनुरहसम् । अवरहसम् । तप्तरहसम् ॥

९४९-अनु, अव और तप्तशब्दपूर्वक रहस् शब्दके उत्तर समासान्त अच् प्रत्यय हो, जैसे-अनुरहसम्। अवरहसम्। तप्तरहसम् ॥

९५०प्रतेरुरसः सप्तमीस्थात्।५।४।८२॥

उरसि प्रति प्रत्युरसम्। विभक्त्यर्थेऽव्ययीभावः॥

९५०-प्रतिपूर्वक सप्तम्यन्त उरस् शब्दके उत्तर अच् प्रत्यय हो, जैसे-उरसि प्रति=प्रत्युरसम्, इस स्थानमें विभक्त्यर्थमें अव्ययीभाव हुआहै ॥

९५१ अनुगवमायामे । ५ । ४ । ८३ ॥

एतन्निपात्यते दीर्घत्वे। अनुगवं यानम्।यस्य चायाम इति समासः॥

९५१-दीर्घ अर्थ होनेपर अनुपूर्वक गो शब्दके उत्तर अच् प्रत्ययका निपातन हो, जैसे-अनुगवं यानम्, इस स्थलमें "यस्य चायामः ६७०" इस सूत्रसे अनु शब्दके साथ गो शब्दका समास हुआहै ॥

९५२ द्विस्तावा त्रिस्तावा वेदिः । ५ । ४ । ८४ ॥

अच् प्रत्ययष्टिलोपः समासश्च निपात्यते । यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वाऽश्वमेधादौ तत्रेदं निपातनम्। वेदिरिति किम्। द्विस्तावती त्रिस्तावती रज्जुः॥

९५२-'द्विस्तावा' और 'त्रिस्तावा' इनमें अच् प्रत्यय, टिका लोप और समास निपातनसे हों। प्रकृतिमें जितनी बडी वेदि विहित है, उसकी अपेक्षा दुगनी अथवा तिगुनी अश्वमेधादिमें होतीहै, वहां यह पनिपातन है। वेदिसे भिन्न अर्थमें पूर्वोक्त रूप न होंगे, जैसे-द्विस्तावती, त्रिस्तावती रज्जुः ॥

९५३ उपसर्गादध्वनः। ५ । ४।८५ ॥

प्रगतोऽध्वानं प्राध्वो रथः ॥

९५३-उपसर्गके परे स्थित अध्वन् शब्दके उत्तर अच् प्रत्यय हो, जैसे-प्रगतोऽध्वानम्=प्राध्वः, अर्थात् रथ ॥

९५४ न पूजनात् । ५ । ४ । ६९ ॥

पूजनार्थात्परेभ्यः समासान्ता न स्युः। सुराजा। अतिराजा ॥ स्वतिभ्यामेव ॥ * ॥ नेह । परमराजः। पूजनात्किम् । गामतिक्रान्तोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः। नेह । सुसक्थः । स्वक्षः ॥

९५४-पूजनार्थ शब्दके परे स्थित शब्दोंसे समासान्त प्रत्यय न हों, जैसे-सुराजा । अतिराजा ।

पूजानार्थ सु और अति शब्दसे ही परे स्थित शब्दके उत्तर समासान्त प्रत्यय न हों * इसी कारण 'परमराजः' इस स्थलमें निषेध नहीं हुआ ।

पूजनार्थसे परे न होनेपर जैसे-गामतिक्रान्तः=अतिगवः, इस स्थलमें टच् प्रत्यय हुआ है। "बहुव्रीहौ सक्थ्यक्ष्णोः० ८५२" इस सूत्रके पूर्व सूत्रोंसे विहित समासान्त प्रत्ययोंका ही यह निषेधक सूत्र है, इस कारण सुसक्थः, स्वक्षः, इस स्थलमें निषेध नहीं हुआ ॥

९५५ किमः क्षेपे । ५ । ४ । ७० ॥

क्षेपे यः किंशब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः। कुत्सितो राजा किंराजा। किंसखा। किंगौः । क्षेपे किम् । किंराजः। किंसखः। किंगवः॥

९५५-निन्दाबोधक किम् शब्दके परे स्थित शब्दोंके उत्तर समासान्त प्रत्यय न हो, जैसे-'कुत्सितो राजा' इस वाक्यमें-किंराजा । किंसखा । किंगौः ।

निंदा न होनेपर समासान्त होगा, जैसे-किंराजः । किंसखः। किंगवः। यहां किम् शब्द प्रश्नमें है, षष्ठीसमास वा कर्मधारय जानना ॥

९५६ नञस्तत्पुरुषात् । ५ । ४ । ७१ ॥

समासान्तो न। अराजा। असखा । तत्पुरुषात्किम्। अधुरं शकटम्॥

९५६-नञ्तत्पुरुष समासके उत्तर समासान्त प्रत्यय न हो, जैसे-अराजा । असखा ।

तत्पुरुष कहनेसे 'अधुरं शकटम्' इस स्थलमें समासान्त हुआ है ॥

९५७ पथो विभाषा । ५ । ४ । ७२ ॥

नञ्पूर्वात्पथो वा समासान्तः । अपथम्। अपन्थाः । तत्पुरुषादित्येव । अपथो देशः। अपथं वर्तते ॥ ॥ इति समासान्ताः ॥

९५७-नञ्पूर्वक पथिन् शब्दके उत्तर विकल्प करके समासान्त प्रत्यय हो । 'अपथम्'यहां "नस्तद्धिते ६।४।१४४" इससे टिलोप और "अपथन्नपुंसकम् २ । ४ । ३०" इससे नपुंसकत्व हुआ है । अपंथाः ।

इस सूत्रमें भी'तत्पुरुषात्'इसकी अनुवृत्तिसे नञ्पूर्वक पथिन् शब्दान्त तत्पुरुषसे ही समासान्त विकल्प करके होगा, इस कारण 'अपथो देशः, अपथं वर्तते' इत्यादि स्थलोंमें बहुव्रीहि समास होनेके कारण नित्य समासान्त हुआहै ॥

॥ इति समासान्तप्रकरणम् ॥

अथालुक्समासप्रकरणम्।

९५८ अलुगुत्तरपदे । ६ । ३ । १ ॥

अलुगधिकारः प्रागानङ उत्तरपदाधिकारस्त्वा पादसमाप्तेः ॥

९५८-आनङ् (९२१) के पूर्वपर्यन्त अलुक्का अधिकार और पादसमाप्तिपर्यन्त उत्तरपदका अधिकार चलेगा ॥

९५९ पञ्चम्याः स्तोकादिभ्यः ।६।३।२॥

एभ्यः पञ्चम्या अलुक् स्यादुत्तरपदे। स्तोकान्मुक्तः। एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदे

किम्। निष्क्रान्तः स्तोकान्निःस्तोकः । ब्राह्मणाच्छंसिन उपसंख्यानम् ॥ * ॥ ब्राह्मणे विहितानि शस्त्राणि उपचाराद् ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषः । द्वितीयार्थे पञ्चम्युपसंख्यानादेव ॥

९५९–उत्तरपद परे रहते स्तोकादि शब्दके उत्तर पञ्चमीका अलुक् अर्थात् लुक् न हो, जैसे–स्तोकान्मुक्तः । ऐसे ही उत्तरपद परे रहते अन्तिकार्थ शब्द, दूरार्थ शब्द और कृच्छ्र शब्दके उत्तर पञ्चमीका लुक् नहीं होगा । जिस स्थानमें उत्तरपद परे न होगा, उस स्थानमें निष्क्रान्तः स्तोकात्=निःस्तोकः, ऐसा ही होगा ।

(ब्राह्मणाच्छंसिन उपसंख्यानम् *) शंसिन् शब्द परे रहते ब्राह्मण शब्दके उत्तर पञ्चमीका अलुक् हो, जैसे–'ब्राह्मणे विहितानि शस्त्राणि उपचारात् ब्राह्मणानि, तानि शंसति' इस विग्रहमें 'ब्राह्मणाच्छंसी' अर्थात् ऋत्विग्विशेष । उक्त स्थानमें उपसंख्यानके ही कारण द्वितीयाके अर्थमें पञ्चमी हुई है, यह जानना चाहिये ॥

९६० ओजःसहोऽम्भस्तमसस्तृतीयायाः । ६ । ३ । ३ ॥

ओजसा कृतमित्यादि ॥ अञ्जस उपसंख्यानम् ॥ * ॥ अञ्जसा कृतम् । आर्जवेन कृतमित्यर्थः ॥ पुंसानुजो जनुषान्ध इति च ॥ * ॥ यस्याग्रजः पुमान् स पुंसानुजः । जनुषान्धो जात्यन्धः ॥

९६०–उत्तरपद परे रहते ओजस्, सहस्, अम्भस् और तमस् शब्दसे परे तृतीया विभक्तिका अलुक् हो, जैसे–ओजसाकृतम्–इत्यादि ।

अञ्जस् शब्दके परे भी तृतीयाका अलुक् हो * जैसे–अञ्जसाकृतम्, अर्थात् ऋजुताद्वारा किया हुआ ।

अनुज शब्द परे रहते पुम्स् शब्दसे और अन्ध शब्द परे रहते जनुष् शब्दसे विहित तृतीया विभक्तिका अलुक् हो * जैसे–यस्याग्रजः पुमान् सः=पुंसानुजः । जनुषांधः, अर्थात् जातान्ध ॥

९६१ मनसः संज्ञायाम् । ६ । ३ । ४॥

मनसागुप्ता ॥

९६१–उत्तर पद परे रहते संज्ञा अर्थमें मनस् शब्दके उत्तर विभक्तिका अलुक् हो, जैसे–मनसागुप्ता ॥

९६२ आज्ञायिनि च । ६ । ३ । ५ ॥

मनस इत्येव । मनसा आज्ञातुं शीलमस्य मनसाज्ञायी ॥

९६२–आज्ञायिन शब्द परे रहते मनस् शब्दके उत्तर तृतीया विभक्तिका अलुक् हो, जैसे–मनसा आज्ञातुं शीलमस्य=मनसाज्ञायी ॥

९६३ आत्मनश्च । ६ । ३ । ६२ ॥

आत्मनस्तृतीयाया अलुक् स्यात् ॥ पूरण इति वक्तव्यम् ॥ * ॥ पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः । आत्मनापञ्चमः । जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्रीहिर्बोध्यः । पूरणे किम्। आत्मकृतम् ॥

९६३–पूरणप्रत्ययान्त* उत्तरपद परे रहते आत्मन् शब्दके परे तृतीया विभक्तिका अलुक् हो, जैसे–आत्मनापञ्चमः । 'जनार्दनस्त्वात्मचतुर्थः' इस स्थानमें 'आत्मा चतुर्थो यस्य' ऐसा बहुव्रीहि समझना । पूरणप्रत्ययान्त परे न रहते लुक् होगा, जैसे–आत्मकृतम् ॥

९६४ वैयाकरणाख्यायां चतुर्थ्याः । ६ । ३ । ७ ॥

आत्मन इत्येव । आत्मनेपदम् । आत्मनेभाषा । तादर्थ्ये चतुर्थी । चतुर्थीतियोगविभागात्समासः ॥

९६४–व्याकरणसंबंधी संज्ञा होनेपर आत्मन् शब्दके परे चतुर्थीका अलुक् हो, जैसे–आत्मनेपदम् । आत्मनेभाषा । उक्त स्थलमें तादर्थ्यमें चतुर्थी हुई है, और "चतुर्थी तदर्था०" इस सूत्रमें 'चतुर्थी' इस योगविभागसे समास हुआहै ॥

९६५ परस्य च । ६ । ३ । ८ ॥

परस्मैपदम् । परस्मैभाषा ॥

९६५–व्याकरणकी संज्ञा होनेपर पर शब्दके परे स्थित चतुर्थी विभक्तिका अलुक् हो, जैसे–परस्मैपदम् । परस्मैभाषा ॥

९६६ हलदन्तात्सप्तम्याः संज्ञायाम् । ६ । ३ । ९ ॥

हलन्तादन्ताच्च सप्तम्या अलुक् संज्ञायाम् । त्वचिसारः ॥

९६६–संज्ञा होनेपर हलन्त और अकारान्त शब्दके परे स्थित सप्तमी विभक्तिका अलुक् हो, जैसे–त्वचिसारः ॥

९६७ गवियुधिभ्यां स्थिरः।८।३।९५ ॥

आभ्यां स्थिरस्य सस्य षः स्यात् । गविष्ठिरः । अत्र गवीति वचनादेवाऽलुक् । युधिष्ठिरः । अरण्येतिलकः । अत्र संज्ञायामिति सप्तमीसमासः ॥ हृद्द्युभ्यां च ॥ * ॥ हृदिस्पृक् । दिविस्पृक् ॥

९६७–गवि और युधि इन दो पदोंके परे स्थित स्थिर शब्दके सकारको षत्व हो, जैसे–गविष्ठिरः । इस सूत्रमें 'गवि' ऐसा कहनेसे ही सप्तमी विभक्तिका अलुक् हुआ । युधिष्ठिरः । अरण्येतिलकः । इस स्थानमें "संज्ञायाम् ७२१" इस सूत्रसे सप्तमीतत्पुरुष समास हुआ ॥

---

१ "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" इस सूत्रमें पठित स्तोकादि हैं॥

१ "आत्मनश्च पूरणे" ऐसे विशिष्ट सूत्रका काशिकामें पाठ है॥

हृद् और दिव् शब्दके परे सप्तमीका अलुक् हो * जैसे-हृदिस्पृक् । दिविस्पृक् ॥

९६८ कारनाम्नि च प्राचां हलादौ । ६ । ३ । १० ॥

प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तात्सप्तम्या अलुक् । मुकुटेकार्षापणम् । दृषदिमाषकः । पूर्वेण सिद्धे नियमार्थम् । कारनाम्न्येव प्राचामेव हलादावेवेति । कारनाम्नि किम् । अभ्याहितपशुः । कारादन्यस्यैतद्देयस्य नाम । प्राचां किम् । यूथपशुः । हलादौ किम् । अविकटोरणः । हलदन्तात्किम् । नद्यां दोहः नदीदोहः ॥

९६८-वणिक्, पशुपालक और कृषकादिके निकटसे राजा जो धन ग्रहण करे उसका नाम कर है, उसको ही कार भी कहतेहैं, पूर्व देशमें जो कारनाम, वहां हलादि उत्तरपद परे रहते हलन्त और अदन्तसे परे सप्तमीका अलुक् हो, जैसे-मुकुटेकार्षापणम् । दृषदिमाषकः । यद्यपि "हलदन्तात् सप्तम्याः० ६।३।९" इस सूत्रसे अलुक् सिद्ध है, तथापि यह सूत्र नियमके निमित्त है, किस प्रकार नियम है सो दिखाते हैं, जैसे-हलन्त और अदन्त शब्दके परे सप्तमीका अलुक् हो, किन्तु यदि प्राचीन देशप्रसिद्ध कारनामक हलादि पद परे हो तो। कारनाम शब्दके ग्रहण करनेसे यह हुआ कि, 'अभ्याहितपशुः' इस स्थलमें अलुक् नहीं हुआ। प्राचीन देश कहनेसे 'यूथपशुः' इस स्थानमें अलुक् नहीं हुआ । हलादि कहनेसे 'अविकटोरणः' इस जगहमें अलुक् नहीं हुआ । हलन्त और अदन्त कहनेसे 'नद्यां दोहः' इस विग्रहमें नदीदोहः, इस स्थलमें भी अलुक् नहीं हुआ ॥

९६९ मध्याद्गुरौ । ६ । ३ । ११ ॥

मध्येगुरुः ॥ अन्ताच्च ॥ * ॥ अन्तेगुरुः ॥

९६९-गुरु शब्द परे रहते मध्य शब्दके परे सप्तमी विभक्तिका अलुक् हो, जैसे-मध्येगुरुः ।

(अन्ताच्च *) गुरु शब्द परे रहते अन्त शब्दके परे भी सप्तमीका अलुक् हो, जैसे-अन्तेगुरुः ॥

९७० अमूर्द्धमस्तकात्स्वाङ्गादकामे । ६ । ३ । १२ ॥

कण्ठेकालः । उरसिलोमा । अमूर्द्धमस्तकात्किम् । मूर्द्धशिखः । मस्तकशिखः । अकामे किम् । मुखे कामोऽस्य मुखकामः ॥

९७०-काम शब्दसे भिन्न शब्द परे रहते मूर्द्ध और मस्तक शब्दसे भिन्न स्वाङ्गवाचक शब्दके परे सप्तमीका अलुक् हो, जैसे कंठेकालः । उरसिलोमा । मूर्द्ध और मस्तक शब्दसे भिन्न कहनेसे 'मूर्द्धशिखः', 'मस्तकशिखः' इस स्थानमें अलुक् नहीं हुआ । 'अकामे' ऐसा कहनेके कारण 'मुखे कामोऽस्य' इस विग्रहमें 'मुखकामः' इस स्थानमें भी अलुक् नहीं हुआ है ॥

९७१ बन्धे च विभाषा ।६।३।१३ ॥

हलदन्तात्सप्तम्या अलुक् । हस्तेबन्धः । हस्तबन्धः । हलदन्तेति किम् । गुप्तिबन्धः ॥

९७१-बंध शब्द परे रहते हलन्त और अदन्त शब्दके परे सप्तमीका विकल्प करके अलुक् हो, जैसे-हस्तेबन्धः । पक्षमें-हस्तबंधः । हलन्त और अदन्त कहनेसे 'गुप्तिबंधः' इस स्थानमें अलुक् नहीं हुआ ॥

९७२ तत्पुरुषे कृति बहुलम् ।६।३।१४॥

स्तम्बेरमः । स्तम्बरमः । कर्णेजपः । कर्णजपः । क्वचिन्न । कुरुचरः ॥

९७२-तत्पुरुष समासमें कृत्प्रत्ययान्त शब्द परे रहते हलन्त और अदन्त शब्दके परे सप्तमीका बहुल करके अलुक् हो, जैसे-स्तम्बेरमः, स्तम्बरमः । कर्णेजपः, कर्णजपः । बहुलग्रहणसे कहीं नहीं भी होगा, जैसे-कुरुचरः ॥

९७३ प्रावृट्शरत्कालदिवां जे ६।३।१५॥

प्रावृषिजः । शरदिजः । कालेजः । दिविजः । पूर्वस्यायं प्रपञ्चः ॥

९७३-ज शब्द परे रहते प्रावृट्, शरद्, काल, दिव्, इन शब्दोंके परे सप्तमीका अलुक् हो, जैसे-प्रावृषिजः । शरदिजः । कालेजः । दिविजः । यह सूत्र पूर्व सूत्रका प्रपञ्च है॥

९७४ विभाषा वर्षक्षरशरवरात् ६।३।१६॥

एभ्यः सप्तम्या अलुक् जे । वर्षेजः । वर्षजः । क्षरेजः । क्षरजः । शरेजः । शरजः । वरेजः । वरजः ॥

९७४-ज परे रहते वर्ष, क्षर, शर, वर, इन शब्दोंके परे सप्तमीका विकल्प करके अलुक् हो, जैसे-वर्षेजः, वर्षजः । क्षरेजः, क्षरजः । शरेजः, शरजः । वरेजः, वरजः ॥

९७५ घकालतनेषु कालनाम्नः ।६।३।१७॥

सप्तम्या विभाषा लुक् स्यात् । घे । पूर्वाह्णेतरे । पूर्वाह्णतरे । पूर्वाह्णेतमे । पूर्वाह्णतमे । काले । पूर्वाह्णेकाले । पूर्वाह्णकाले । तने । पूर्वाह्णेतने । पूर्वाह्णतने ॥

९७५-घसंज्ञक, कालशब्द और तन शब्द परे रहते कालवाचक शब्दसे परे विकल्प करके सप्तमीका अलुक् हो । (तरप् और तमप् प्रत्ययकी घ संज्ञा है) घ-पूर्वाह्णेतरे, पूर्वाह्णतरे । पूर्वाह्णेतमे, पूर्वाह्णतमे । काल-पूर्वाह्णेकाले, पूर्वाह्णकाले । तन-पूर्वाह्णेतने, पूर्वाह्णतने ॥

९७६ शयवासवासिष्वकालात् ६।३।१८।

खेशयः । खशयः । ग्रामेवासः । ग्रामवासः । ग्रामेवासी । ग्रामवासी । हलदन्तादित्येव । भूमिशयः ॥ अपो योनियन्मतुषु ॥ * ॥ अप्सुयोनिः । अप्सुर्योनिरुत्पत्तिर्यस्य सोऽप्सुयोनिः । अप्सु भवोऽप्सव्यः । अप्सुमन्तावाज्यभागौ ॥

९७६–शय, वास और वासिन् शब्द परे रहते कालवाचक शब्दसे भिन्न शब्दके परे विकल्प करके सप्तमीका अलुक् हो, जैसे–खेशयः, खशयः। ग्रामेवासः, ग्रामवासः। ग्रामेवासी, ग्रामवासी। "हलदन्तात्० ६ । ३ । ९" इस सूत्रसे इस स्थानमें हलन्त और अदन्तकी अनुवृत्ति होनेसे हलन्त और अदन्त शब्दके उत्तर ही सप्तमीका अलुक् होगा, इससे 'भूमिशयः' यहां अलुक् न हुआ।

योनि शब्द, यत् प्रत्यय और मतुप् प्रत्यय परे रहते अप् शब्दके परे सप्तमीका अलुक् हो* जैसे–'अप्सु योनिरुत्पत्तिर्यस्य' इस विग्रहमें अप्सुयोनिः। 'अप्सु भवः' इस विग्रहमें अप्सव्यः। अप्सुमन्तावाज्यभागौ॥

९७७ नेन्सिद्धबध्नातिषु च ।६।३।१९॥

इन्नन्तादिषु सप्तम्या अलुम्न। स्थण्डिलशायी। सांकाश्यसिद्धः। चक्रबन्धः॥

९७७–इनप्रत्ययान्त सिद्ध शब्द और बन्धार्थक बन्ध धातु परे रहते सप्तमीका अलुक् न हो, जैसे–स्थंडिलशायी। सांकाश्यसिद्धः। चक्रबन्धः॥

९७८ स्थे च भाषायाम् । ६ । ३।२०॥

सप्तम्या अलुम्न। समस्थः। भाषायां किम्। कृष्णोऽस्याखरेष्ठः॥

९७८–स्थ शब्द परे रहते भाषामें सप्तमीका अलुक् नहीं हो, जैसे–समस्थः। भाषा न होनेपर अलुक् होगा, जैसे–कृष्णोऽस्याखरेष्ठः॥

९७९ षष्ठ्या आक्रोशे । ६ । ३ । २१॥

चौरस्यकुलम्। आक्रोशे किम्। ब्राह्मणकुलम्॥ वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु॥ * ॥ वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः॥ आमुष्यायणाऽऽमुष्यपुत्रिकाऽऽमुष्यकुलिकेति च॥ ॥ * ॥ अमुष्यापत्यम्। आमुष्यायणः। नडादित्वात् फक्। अमुष्य पुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका॥ देवानांप्रिय इति च मूर्खे॥ * ॥ अन्यत्र देवप्रियः॥ शेपपुच्छलांगूलेषु शुनः॥ * ॥ शुनःशेपः। शुनःपुच्छः। शुनोलांगूलः॥ दिवश्च दासे॥ * ॥ दिवोदासः॥

९७९–आक्रोश अर्थात् निन्दा गम्यमान होनेपर षष्ठीका अलुक् हो, जैसे–चौरस्यकुलम्। आक्रोश न होनेपर, जैसे–ब्राह्मणकुलम्, इस स्थानमें अलुक् नहीं हुआ।

युक्ति, दंड और हर शब्द परे रहते वाच्, दिश् और पश्यत् शब्दके परे षष्ठीका अलुक् हो * जैसे–वाचोयुक्तिः। दिशोदण्डः, पश्यतोहरः॥

आयन प्रत्यय, पुत्रिका शब्द और कुलिका शब्द परे रहते 'अमुष्य' इसमें षष्ठी विभक्तिका अलुक् हो * जैसे–'अमुष्यापत्यम्' इस विग्रहमें 'आमुष्यायणः' इस स्थानमें नडादित्वप्रयुक्त फक् प्रत्यय हुआ। 'अमुष्य पुत्रस्य भावः' इस विग्रहमें 'आमुष्यपुत्रिका' यहां मनोज्ञादित्वके कारण वुञ् प्रत्यय हुआहै। ऐसे ही 'आमुष्यकुलिका' में भी जानना॥

मूर्ख अर्थ होनेपर 'देवानांप्रियः' इस स्थलमें षष्ठी विभक्तिका अलुक् हो * जैसे–देवानांप्रियः अर्थात् पशुके समान मूर्ख[1]। जिस स्थानमें मूर्ख अर्थ न होगा उस स्थानमें देवप्रियः, ऐसा होगा।

शेप, पुच्छ और लांगूल शब्द परे रहते श्वन् शब्दके परे षष्ठीका अलुक् हो * जैसे–शुनःशेपः। शुनःपुच्छः। शुनोलाङ्गूलः।

दास शब्द परे रहते दिव शब्दके परे षष्ठी विभक्तिका अलुक् हो * जैसे–दिवोदासः॥

९८० पुत्रेऽन्यतरस्याम् । ६ । ३ । २२॥

षष्ठ्याः पुत्रे परेऽलुग्वा निन्दायाम्। दास्याः पुत्रः दासीपुत्रः। निन्दायां किम्। ब्राह्मणीपुत्रः॥

९८०–निन्दा अर्थ होनेपर पुत्र शब्द परे रहते षष्ठी विभक्तिका विकल्प करके अलुक् हो, जैसे–दास्याः पुत्रः= दासीपुत्रः। जिस स्थानमें निन्दा न होगी उस स्थानमें लुक होगा, जैसे–ब्राह्मणीपुत्रः॥

९८१ ऋतो विद्यायोनिसम्बन्धेभ्यः। ६ । ३ । २३॥

विद्यासंबन्धयोनिसंबंधवाचिन ऋदन्तात्षष्ठ्या अलुक्। होतुरन्तेवासी। होतुःपुत्रः। पितुरन्तेवासी। पितुःपुत्रः॥ विद्यायोनिसंबन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम्॥ * ॥ नेह। होतृधनम्॥

९८१–विद्यासम्बन्ध और योनिसंबन्धवाचक ऋदन्त शब्दके परे षष्ठीका अलुक् हो, जैसे–होतुरन्तेवासी। होतुःपुत्रः। पितुरन्तेवासी। पितुःपुत्रः। विद्या और योनिसंबंधवाचक ऋदन्त शब्दसे परे षष्ठीका विद्यायोनिसम्बन्धवाचक ही उत्तरपद परे रहते अलुक् हो, ऐसा कहना चाहिये* इससे होतृधनम्, पितृधनम्, इस स्थलमें अलुक् नहीं हुआ॥

९८२ विभाषा स्वसृपत्योः ।६।३।२४॥

ऋदन्तात्षष्ठ्या अलुग् वा स्वसृपत्योः परयोः॥

९८२–स्वसृ और पति शब्द परे रहते ऋदन्त शब्दके परे विकल्प करके षष्ठीका अलुक् हो–॥

९८३ मातुःपितुर्भ्यामन्यतरस्याम्। ८ । ३ । ८५॥

[1] जैसे–दुग्धादिप्रदानद्वारा गवादि पशु मनुष्यकी प्रीतिको उत्पन्न करतेहैं, वैसे ही संसारी मनुष्य भी यागादिक अनुष्ठानद्वारा देवताओंकी प्रीतिको उत्पन्न करतेहैं, इसलिये पशुसदृश होनेसे संसारी ही मूर्ख हैं, तत्त्वज्ञानी तो यागादिका अनुष्ठान नहीं करतेहैं, इसलिये वे पशुसदृश नहीं होनेसे मूर्ख नहीं हैं॥

आभ्यां परस्य स्वसुः सस्य षो वा स्यात् समासे । मातुःष्वसा । मातुःस्वसा । पितुःष्वसा । पितुःस्वसा । लुक्पक्षे तु ॥

९८३–समासमें मातृ शब्द और पितृ शब्दसे परे जो स्वसृ शब्द उसके सकारको विकल्प करके षत्व हो, जैसे–मातुःष्वसा, मातुःस्वसा । पितुःष्वसा, पितुःस्वसा । लुक् पक्षमें–किस प्रकार होगा वह आगे कहतेहैं–॥

९८४ मातृपितृभ्यां स्वसा ।८।३।८४॥

आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे । मातृष्वसा । पितृष्वसा । असमासे तु । मातुः स्वसा । पितुः स्वसा ॥

॥ इत्यलुक्समासः ॥

९८४–समासमें मातृ और पितृ शब्दके परे स्वसृ शब्दके सकारको षत्व हो, जैसे–मातृष्वसा । पितृष्वसा । जिस स्थानमें समास न होगा उस स्थानमें पितुः स्वसा । मातुः स्वसा ॥

॥ इत्यलुक्समासः ॥

अथ समासाश्रयविधिप्रकरणम् ।

९८५ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः । ६।३।४३॥

भाषितपुंस्काद्यो ङी तदन्तस्याऽनेकाचो ह्रस्वः स्याद्धरूपकल्पप्प्रत्ययेषु परेषु चेलडादिषु चोत्तरपदेषु । ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रेत्यादि । ब्रूञः पचाद्यचि वच्यादेशगुणयोरभावोपि निपात्यते । चेलडादीनि वृत्तिविषये कुत्सनवाचीनि तैः कुत्सितानि कुत्सनैरिति समासः । ङ्यः किम् । दत्तातरा । भाषितपुंस्कात्किम् । आमलकीतरा । कुवलीतरा ॥

९८५–घसंज्ञक, रूपप् और कल्पप् प्रत्यय तथा चेलड्, ब्रुव, गोत्र, मत, हत, इतने शब्द परे रहते उक्तपुंस्क शब्दके परे जो ङी तदन्त जो अनेकाच् उसको ह्रस्व हो, जैसे–ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा–इत्यादि । 'ब्रुव' इस स्थलमें ब्रूञ् धातुके उत्तर पचादित्वके कारण अच् प्रत्यय होनेपर ब्रू धातुके स्थानमें वच् आदेश और गुणका अभाव निपातनसे सिद्ध हुआहै । चेलड् आदि शब्द वृत्तिविषयमें निन्दावाची हैं, इन चेलडादिके साथ "कुत्सितानि कुत्सनैः ७३२" इस सूत्रसे समास हुआहै । ङी कहनेसे दत्तातरा, इस स्थानमें ह्रस्व नहीं हुआ। उक्तपुंस्क शब्दके उत्तर कहनेसे 'आमलकीतरा', 'कुवलीतरा' इस स्थानमें ह्रस्व नहीं हुआ ॥

९८६ नद्याः शेषस्याऽन्यतरस्याम् । ६ । ३ । ४४ ॥

अङ्ङ्यन्तनद्या ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा स्यात्॥ ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरा । स्त्रितरा । स्त्रीतरा ॥ कृन्नद्या न ॥ * ॥ लक्ष्मीतरा ॥

९८६–घसंज्ञक प्रत्यय, रूपप् प्रत्यय और कल्पप् प्रत्यय, चेलड्, ब्रुव, गोत्र, मत, हत, शब्द परे रहते अङ्यन्त नदीसंज्ञक शब्दको और ङ्यन्त एकाच्को विकल्प करके ह्रस्व हो, जैसे–ब्रह्मबंधुतरा, ब्रह्मबन्धूतरा । स्त्रितरा, स्त्रीतरा ।

(कृन्नद्या न *) कृत्प्रत्ययान्त नदीसंज्ञक शब्दको ह्रस्व न हो, जैसे–लक्ष्मीतरा ॥

९८७ उगितश्च । ६ । ३ । ४५ ॥

उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात् । विदुषितरा । ह्रस्वाभावपक्षे तु तसिलादिष्विति पुंवत् । विद्वत्तरा । वृत्त्यादिषु विदुषीतरेत्यप्युदाहृतं तन्निर्मूलम् ॥

९८७–घ आदि परे रहते उगित्के परे जो नदीसंज्ञक शब्द तदन्तको विकल्प करके ह्रस्व हो, जैसे-विदुषितरा। ह्रस्वाभाव पक्षमें तो "तसिलादिषु०–८३६" इस सूत्रसे पुंवद्भाव होगा, जैसे–विद्वत्तरा । वृत्त्यादि ग्रन्थमें 'विदुषीतरा' ऐसा भी उदाहरण है (अर्थात् कोई २ कहतेहैं पुंवद्भाव नहीं होगा), परन्तु वह अमूलक है ॥

९८८ हृदयस्य हृल्लेखयदण्लासेषु । ६ । ३ । ५० ॥

हृदयं लिखतीति हृल्लेखः । हृदयस्य प्रियं हृद्यम् । हृदयस्येदं हार्दम् । हृल्लासः । लेखेत्यणन्तस्य ग्रहणम् । घञि तु हृदयलेखः । लेखग्रहणमेव ज्ञापकम् उत्तरपदाधिकारे तदन्तविधिर्नास्तीति ॥

९८८–लेख शब्द, यत् प्रत्यय, अण् प्रत्यय और लास शब्द परे रहते हृदय शब्दके स्थानमें हृद् आदेश हो, जैसे–'हृदयं लिखति' इस वाक्यमें–हृल्लेखः । हृदयस्य प्रियम्=हृद्यम् । हृदयस्य इदम्=हार्दम् । हृल्लासः । लेख यह अणन्तका ग्रहण है । घञ् परे रहते तो 'हृदयलेखः' ऐसा होगा । लेखग्रहणसे ही उत्तरपदाधिकारमें तदन्तविधि नहीं है, यह विदित होताहै ॥

९८९ वा शोकष्यञ्रोगेषु ।६।३।५१॥

हृच्छोकः । हृदयशोकः । सौहार्द्यम् । सौहृदय्यम् । हृद्रोगः । हृदयरोगः । हृदयशब्दपर्यायो हृच्छब्दोऽप्यस्ति । तेन सिद्धे प्रपञ्चार्थमिदम् ॥

९८९–शोक शब्द, ष्यञ् प्रत्यय और रोग शब्द परे रहते हृदय शब्दके स्थानमें विकल्प करके हृद् आदेश हो, जैसे–हृच्छोकः, पक्षमें हृदयशोकः । सौहार्द्यम्, सौहृदय्यम् । हृद्रोगः, हृदयरोगः । हृदय शब्दका पर्याय हृद् शब्द भी है, इससे यह सम्पूर्ण पद सिद्ध होनेपर भी यह सूत्र शास्त्रविस्तरके निमित्त है ॥

९९० पादस्य पदाज्यातिगोपहतेषु । ६ । ३ । ५२ ॥

एषूत्तरपदेषु पादस्य पद इत्यदन्त आदेशः स्यात् । पादाभ्यामजतीति पदाजिः । पदातिः । अज्यतिभ्यां पादे चेतीण् प्रत्ययः । अजेर्व्यभावो निपातनात् । पदगः । पदोपहतः ॥

९९०-आजि, आति, ग और उपहत शब्द परे रहते पाद शब्दके स्थानमें पद ऐसा अदन्त आदेश हो, जैसे-'पादाभ्यामजति' इस विग्रहमें पदाजिः । पदातिः । उक्त स्थानमें "अज्यतिभ्यां पादे च" इस उणादिसूत्रसे इण् प्रत्यय हुआ है । और अज्को वि आदेशका अभाव निपातनसे हुआहै । पदगः । पदोपहतः ॥

९९१ पद्यत्यतदर्थे । ६ । ३ । ५३ ॥

पादस्य पत्स्यादतदर्थे यति परे [पादौ विध्यन्ति पद्याः शर्कराः । अतदर्थे किम् । पादार्थमुदकं पाद्यम् । पादार्घाभ्यां चेति यत् ॥ इके चरतावुपसंख्यानम् ॥ * ॥ पादाभ्यां चरति पदिकः । पर्पादित्वात् ष्ठन् ॥

९९१-अतदर्थमें विहित यत् प्रत्यय परे रहते पाद शब्दके स्थानमें पद् आदेश हो, जैसे-पादौ विध्यन्ति पद्याः, अर्थात् शर्करा । जिस स्थानमें अतदर्थक यत् न होगा उस स्थानमें 'पादार्थमुदकम्=पाद्यम्' ऐसा होगा, इस स्थानमें "पादार्घाभ्यां च २०॰॰" इस सूत्रसे यत् प्रत्यय हुआहै ।

'चरति' अर्थमें विहित इक् शब्द परे रहते पाद शब्दके स्थानमें पद् आदेश हो* जैसे='पादाभ्यां चरति' इस विग्रहमें 'पदिकः' इस स्थानमें पर्पादित्वके कारण ष्ठन् प्रत्यय हुआ है ॥

९९२ हिमकाषिहतिषु च । ६ । ३ । ५४ ॥

पद्धिमम् । पत्काषी । पद्धतिः ॥

९९२-हिम, काषि और हति शब्द परे रहते पाद शब्दके स्थानमें पद् आदेश हो, जैसे-पद्धिमम् । पत्काषी । पद्धतिः ॥

९९३ ऋचः शे । ६ । ३ । ५५ ॥

ऋचः पादस्य पत्स्याच्छे परे । गायत्रीं पच्छः शंसति । पादम्पादमित्यर्थः । ऋचः किम् । पादशः कार्षापणं ददाति ॥

९९३-श शब्द परे रहते मंत्रसम्बन्धी पाद शब्दके स्थानमें पद् आदेश हो, जैसे-गायत्रीं पच्छः शंसति, अर्थात् एक २ चरण करके पढता है । मंत्रसम्बन्धी पाद शब्दका ग्रहण करनेसे 'पादशः कार्षापणं ददाति' इस स्थानमें पद् आदेश नहीं हुआ ॥

९९४ वा घोषमिश्रशब्देषु । ६ । ३ । ५६ ॥

पादस्य पत् । पद्घोषः । पादघोषः । पन्मिश्रः । पादमिश्रः । पच्छब्दः । पादशब्दः ॥ निष्के चेति वाच्यम् ॥ * ॥ पन्निष्कः । पादनिष्कः ॥

९९४-घोष, मिश्र और शब्द शब्द परे रहते पाद शब्दके स्थानमें विकल्प करके पद् आदेश हो, जैसे-पद्घोषः, पक्षमें पादघोषः । पन्मिश्रः, पक्षमें-पादमिश्रः । पच्छब्दः, पादशब्दः ।

निष्क शब्द परे रहते भी पाद शब्दके स्थानमें विकल्प करके पद् आदेश हो * जैसे-पन्निष्कः, पादनिष्कः ॥

९९५ उदकस्योदः संज्ञायाम् । ६ । ३ । ५७ ॥

उदमेघः ॥ उत्तरपदस्य चेति वक्तव्यम् ॥ * ॥ क्षीरोदः ॥

९९५-संज्ञामें उदक शब्दके स्थानमें उद् आदेश हो, जैसे-उदमेघः ।

उदक शब्दके उत्तरपदस्थ होनेपर भी उसके स्थानमें उद आदेश हो * जैसे-क्षीरोदः ॥

९९६ पेषं वासवाहनधिषु च । ६ । ३ । ५८ ॥

उदपेषं पिनष्टि । उदवासः । उदवाहनः । उदधिर्घटः । समुद्रे तु पूर्वेण सिद्धम् ॥

९९६-पेषम्, वास, वाहन और धि शब्द परे रहते उदक शब्दके स्थानमें उद आदेश हो, जैसे-उदपेषम्पिनष्टि । उदवासः । उदवाहनः । उदधिर्घटः । जिस स्थानमें उदधि शब्दसे समुद्रका ग्रहण हो, उस स्थानमें पूर्व सूत्रसे ही संज्ञामें उक्त पद सिद्ध होगा ॥

९९७ एकहलादौ पूरयितव्येऽन्यतरस्याम् । ६ । ३ । ५९ ॥

उदकुम्भः । उदककुम्भः । एकेति किम् । उदकस्थाली । पूरयितव्येति किम् । उदकपर्वतः ॥

९९७-पूरयितव्य अर्थमें एकमात्र हल् आदिमें है जिसके ऐसे पद परे रहते उदक शब्दके स्थानमें विकल्प करके उद आदेश हो, जैसे-उदकुम्भः, उदककुम्भः । एकमात्र हल् आदिमें न होनेपर अर्थात् अनेक हल् आदिमें रहते 'उदकस्थाली' इस स्थलमें उद आदेश नहीं हुआ । पूरयितव्य अर्थ न होनेपर 'उदकपर्वतः' यहां उद आदेश न हुआ ॥

९९८ मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च । ६ । ३ । ६० ॥

उदमन्थः । उदकमन्थः । उदौदनः । उदकौदनः ॥

९९८-मन्थ, ओदन, सक्तु, बिन्दु, वज्र, भार, हार, वीवध और गाह शब्द परे रहते उदक शब्दके स्थानमें विकल्प करके उद आदेश हो, जैसे-उदमन्थः, उदकमन्थः । उदौदनः, उदकौदनः-इत्यादि ॥

९९९ इको ह्रस्वोऽङ्यो गालवस्य । ६ । ३ । ६१ ॥

इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे ।

ग्रामणिपुत्रः । ग्रामणीपुत्रः । इकः किम् । रमापतिः । अङ्य इति किम् । गौरीपतिः । गालवग्रहणं पूजार्थम् । अन्यतरस्यामित्यनुवृत्तेः ॥ इयङुवङ्भाविनामव्ययानां च नेति वाच्यम् ॥ * ॥ श्रीमदः । भ्रूभङ्गः । शुक्लीभावः ॥ अभ्रुकुंसादीनामिति वक्तव्यम् ॥ * ॥ भ्रुकुंसः । भ्रुकुटिः । भ्रूकुंसः । भ्रूकुटिः । अकारोऽनेन विधीयत इति व्याख्यान्तरम् ॥ भ्रकुंसः । भ्रकुटिः । भ्रुवा कुंसो भाषणं शोभा वा यस्य सः स्त्रीवेषधारी नर्तकः । भ्रुवः कुटिः कौटिल्यम् ॥

९९९–उत्तरपद परे रहते इगन्त जो अङ्यन्त शब्द उसको विकल्प करके ह्रस्व हो, जैसे–ग्रामणिपुत्रः, ग्रामणीपुत्रः । इगन्त शब्द न होनेपर जैसे–रमापतिः । अङ्यन्त न होनेपर ह्रस्व नहीं होगा, जैसे–गौरीपतिः। पूर्व सूत्र(६।३।५९) से 'अन्यतरस्याम्' इस पदकी अनुवृत्ति होनेसे विकल्प अर्थ हो ही जाता, फिर गालवग्रहण सूत्रमें पूजार्थ है ।

इयङ् और उवङ्स्थानी और अव्ययको ह्रस्व न हो* जैसे–श्रीमदः । भ्रूभङ्गः । शुक्लीभावः ।

(अभ्रुकुंसादीनाम्० *) भ्रुकुंसादि शब्दके ह्रस्वका निषेध न हो अर्थात् भ्रुकुंसादि शब्दको विकल्प करके ह्रस्व हो, जैसे–भ्रुकुंसः, भ्रूकुंसः । भ्रुकुटिः, भ्रूकुटिः । इस वार्त्तिकसे भ्रुकुंसादिके इक्को अकार आदेश विधान होताहै, यह व्याख्यान्तर है, इससे 'भ्रकुंसः, भ्रकुटिः' यह सिद्ध हुए । भ्रुवसे कुंस–सम्भाषण वा शोभा है जिसकी वह भ्रुकुंस कहाताहै अर्थात् स्त्रीवेषधारी पुरुष । 'भ्रुवः कुटिः कौटिल्यम्' अर्थात् भ्रूकी कुटिलता (टेढपनी) ॥

१००० एकतद्धिते च । ६ । ३ । ६२ ॥

एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे । एकस्या आगतम् एकरूप्यम् । एकक्षीरम् ॥

१०००–तद्धित प्रत्यय परे रहते एक शब्दको ह्रस्व हो जैसे–एकस्या आगतम्=एकरूप्यम् । 'एकस्याः क्षीरम्' इस विग्रहमें–एकक्षीरम् ॥

१००१ ङ्यापोः संज्ञाछन्दसोर्बहुलम् । ६ । ३ । ६३ ॥

रेवतिपुत्रः । अजक्षीरम् ॥

१००१–संज्ञा और वेदमें ङ्यन्त और आबन्त शब्दको ह्रस्व हो, बहुल करके अर्थात् कहीं हो, कहीं नहीं हो । रेवतिपुत्रः । अजक्षीरम् ॥

१००२ त्वे च । ६ । ३ । ६४ ॥

त्वप्रत्यये ङ्यापोर्वा ह्रस्वः । अजत्वम् । अजात्वम् । रोहिणित्वम् । रोहिणीत्वम् ॥

१००२–त्व प्रत्यय परे रहते ङ्यन्त और आबन्त शब्दको विकल्प करके ह्रस्व हो, जैसे–अजत्वम्, अजात्वम् । रोहिणित्वम्, रोहिणीत्वम् ॥

१००३ ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे । ६ । १ । १३ ॥

ष्यङन्तस्य पूर्वपदस्य संप्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे ॥

१००३–तत्पुरुष समासमें पुत्र और पति शब्द परे रहते ष्यङ्प्रत्ययान्त पूर्वपदको संप्रसारण हो ॥

१००४ संप्रसारणस्य । ६ । ३ । १३९ ॥

संप्रसारणस्य दीर्घः स्यादुत्तरपदे । कौमुदगन्ध्यायाः पुत्रः कौमुदगन्धीपुत्रः। कौमुदगन्धीपतिः । व्यवस्थितविभाषया ह्रस्वो न । स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषेधात् । परमकारीषगन्धीपुत्रः । उपसर्जने तु तदादिनियमान्नेह । अतिकारीषगन्ध्यापुत्रः ॥

१००४–उत्तरपद परे रहते संप्रसारणको दीर्घ हो, जैसे–'कौमुदगन्ध्यायाः पुत्रः' इस विग्रहमें कौमुदगन्धीपुत्रः (कुमुदगन्धेरपत्यं स्त्री=कौमुदगन्ध्या "तस्यापत्यम्" इत्यणि कृते "अणिञोः०" इति ष्यङादेशः "यङश्चाप्") । कौमुदगन्धीपतिः । इन दोनों स्थानोंमें व्यवस्थित विकल्पके कारण ह्रस्व नहीं हुआ । 'स्त्रीप्रत्यये चानुपसर्जने न' इस परिभाषासे तदादिनियमके प्रतिषेधके कारण 'परमकारीषगंधीपुत्रः' इस स्थानमें भी संप्रसारण हुआ और उपसर्जनमें तदादि नियमके कारण 'अतिकारीषगन्ध्यापुत्रः' इस स्थानमें संप्रसारण नहीं हुआ ॥

१००५ बन्धुनि बहुव्रीहौ । ६।१।१४ ॥

बन्धुशब्दे उत्तरपदे ष्यङः संप्रसारणं स्याद्बहुव्रीहौ । कारीषगन्ध्या बन्धुरस्येति कारीषगन्धीबन्धुः । बहुव्रीहाविति किम् । कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । क्लीबनिर्देशस्तु शब्दस्वरूपापेक्षया ॥ मातज्मातृकमातृषु वा ॥ * ॥ कारीषगन्धीमातः । कारीषगन्ध्यामातः । कारीषगन्धीमातृकः । कारीषगन्ध्यामातृकः । कारीषगन्धीमाता । कारीषगन्ध्यामाता । अस्मादेव निपातनान्मातृशब्दस्य मातजादेशः कब्विकल्पश्च । बहुव्रीहाविवेदम् । नेह । कारीषगन्ध्याया माता करीषगन्ध्यामाता । विस्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते ॥

१००५–बहुव्रीहि समासमें बन्धु शब्द उत्तरपद परे रहते ष्यङ्प्रत्ययान्तको संप्रसारण हो, जैसे–'कारीषगन्ध्या बन्धुरस्य' इस विग्रहमें कारीषगन्धीबन्धुः । जिस स्थानमें बहुव्रीहि न होगा उस स्थानमें 'कारीषगन्ध्यायाः बन्धुः' इस विग्रहमें 'कारीषगन्ध्याबन्धुः' ऐसा होगा । सूत्रमें 'बन्धुनि' ऐसा क्लीबनिर्देश शब्दस्वरूपकी अपेक्षासे जानना ।

मातज्, मातृक् और मातृ शब्द परे रहते विकल्प करके

ष्यङ्प्रत्ययान्तको संप्रसारण हो * जैसे–कारीषगन्धीमातः, कारीषगन्ध्यामातः । कारीषगंधीमातृकः, कारीषगन्ध्यामातृकः । कारीपगन्धीमाता, कारीषगन्ध्यामाता । इसी निपातनके कारण मातृ शब्दके स्थानमें मातच् आदेश और कप् प्रत्यय विकल्प करके होताहै । बहुव्रीहि समासमें ही यह सम्प्रसारण होगा अन्यत्र नहीं होगा, इस कारण 'कारीपगन्ध्याया माता' इस विग्रहमें 'कारीषगन्ध्यामाता' यहां नहीं हुआ । मातच् आदेशमें चित्त्वसामर्थ्यके कारण चित्स्वर बहुव्रीहिस्वरको बाध करताहै ॥

१००६ इष्टकेषीकामालानां चिततूलभारिषु । ६ । ३ । ६५ ॥

इष्टकादीनां तदन्तानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात् । इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी ॥

१००६–चित शब्द, तूल शब्द और भारिन् शब्द परे रहते इष्टका, इषीका और माला शब्दको ह्रस्व हो, जैसे–इष्टकचितम् । पक्वेष्टकचितम् । इषीकतूलम् । मुञ्जेषीकतूलम् । मालभारी । उत्पलमालभारी (मालां बिभर्ति "सुप्यजातौ०" इति णिनिः) ॥

१००७ कारे सत्याऽगदस्य । ६ । ३ । ७० ॥

मुम् स्यात् । सत्यङ्कारः । अगदङ्कारः ॥ अस्तोश्चेति वक्तव्यम् ॥ * ॥ अस्तुङ्कारः ॥ धेनोर्भव्यायाम् ॥ * ॥ धेनुम्भव्या ॥ लोकस्य पृणे ॥ * ॥ लोकम्पृणः । पृण इति मूलविभुजादित्वात्कः ॥ इत्येऽनभ्याशस्य ॥ * ॥ अनभ्याशमित्यः । दूरतः परिहर्तव्य इत्यर्थः ॥ भ्राष्ट्राग्न्योरिन्धे ॥ * ॥ भ्राष्ट्रमिन्धः । अग्निमिन्धः ॥ गिलेऽगिलस्य ॥ * ॥ तिमिङ्गिलः । अगिलस्य किम् । गिलगिलः ॥ गिलगिले च ॥ * ॥ तिमिङ्गिलगिलः ॥ उष्णभद्रयोः करणे ॥ * ॥ उष्णङ्करणम् । भद्रङ्करणम् ॥

१००७–कार शब्द परे रहते सत्य और अगद शब्दको मुम्का आगम हो, जैसे–सत्यंकारः । अगदंकारः ।

कार शब्द परे रहते अस्तु शब्दको मुम् हो * जैसे–अस्तुंकारः ।

भव्या शब्द परे रहते धेनु शब्दको मुम् हो * जैसे–धेनुम्भव्या ।

पृण शब्द परे रहते लोक शब्दको मुम् हो * जैसे–लोकम्पृणः । 'पृणः' इसमें मूलविभुजादित्वके कारण क प्रत्यय है ।

इत्य शब्द परे रहते अनभ्यास शब्दको मुम् हो * जैसे–अनभ्यासमित्यः (दूरसे त्याग करनेके योग्य) ।

इन्ध शब्द परे रहते भ्राष्ट्र और अग्नि शब्दको मुम् हो* जैसे–भ्राष्ट्रमिन्धः । अग्निमिन्धः ।

गिल शब्द परे रहते गिलभिन्न शब्दको मुम् हो * जैसे–तिमिङ्गिलः । जिस स्थानमें गिलभिन्न शब्द नहीं है वहां 'गिलगिलः' ऐसा होगा ।

गिलगिल शब्द परे रहते गिलभिन्न शब्दको मुम् हो* जैसे–तिमिङ्गिलगिलः ।

करण शब्द परे रहते उष्ण और भद्र शब्दको मुम् हो* जैसे–उष्णंकरणम् । भद्रंकरणम् ॥

१००८ रात्रेः कृति विभाषा । ६ । ३ । ७२ ॥

रात्रिञ्चरः । रात्रिचरः । रात्रिमटः । रात्र्यटः । अखिदर्थमिदं सूत्रम् । खिति तु अरुर्द्विषदिति नित्यमेव वक्ष्यते । रात्रिंमन्यः ॥

१००८–कृत्प्रत्ययान्त शब्द परे रहते रात्रि शब्दको विकल्प करके मुम् हो, जैसे–रात्रिञ्चरः, रात्रिचरः । रात्रिमटः, रात्र्यटः । यह सूत्र अखिदर्थ है । खित् परे रहते तो "अरुर्द्विषत्० ६ । ३ । ६७" इस सूत्रसे नित्य ही मुम् कथित होगा, जैसे–रात्रिम्मन्यः ॥

१००९ सहस्य सः संज्ञायाम् । ६ । ३ । ७८ ॥

उत्तरपदे । सपलाशम् । संज्ञायां किम् । सहयुध्वा ॥

१००९–संज्ञा होनेपर सह शब्दके स्थानमें स आदेश हो, जैसे–सपलाशम् । संज्ञा न होनेपर, जैसे–'सहयुध्वा' इस स्थानमें स आदेश नहीं हुआ ॥

१०१० ग्रन्थान्ताऽधिके च । ६ । ३ । ७९ ॥

अनयोरर्थयोः सहस्य सः स्यादुत्तरपदे । समुहूर्तं ज्योतिषमधीते । सद्रोणा खारी ॥

१०१०–ग्रन्थान्त और अधिक अर्थमें उत्तरपद परे रहते सह शब्दके स्थानमें स आदेश हो, जैसे–समुहूर्त्तं ज्योतिषमधीते । सद्रोणा खारी ॥

१०११ द्वितीये चानुपाख्ये । ६ । ३ । ८० ॥

अनुमेये द्वितीये सहस्य सः स्यात् । सराक्षसीका निशा । राक्षसी साक्षादनुपलभ्यमाना निशयानुमीयते ॥

१०११–अनुमेयार्थक द्वितीय पद परे रहते सह शब्दके स्थानमें स आदेश हो, जैसे–सराक्षसीका निशा । इस स्थानमें राक्षसी साक्षात् उपलभ्यमान नहीं होतीहै, परन्तु निशासे अनुमित होतीहै ॥

१०१२ समानस्य च्छन्दस्यमूर्द्धप्रभृत्युदर्केषु । ६ । ३ । ८४ ॥

समानस्य सः स्यादुत्तरपदे न तु मूर्द्धादिषु । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः । तत्र भव इत्यर्थे सगर्भसयूथसनुताद्यत् । अमूर्द्धादिषु किम् । समानमूर्द्धा । समानप्रभृतयः । समानोदर्काः । समानस्येति योगो विभज्यते । तेन सपक्षः साधर्म्यं सजातीयमित्यादि सिद्ध-

मिति काशिका। अथ वा सहशब्दः सदृशवचनोऽस्ति। सदृशः सख्या ससखीति यथा। तेनायमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षोऽस्येत्यादि॥

१०१२-वेदमें उत्तरपद परे रहते समान शब्दके स्थानमें स आदेश हो, परन्तु मूर्द्ध प्रभृति और उदर्क शब्द परे रहते नहीं हो, जैसे-अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्यः। इन सब स्थलोंमें 'तत्र भवः' इस अर्थमें सगर्भ, सयूथ और सनुत शब्दके उत्तर यत् प्रत्यय हुआ है।

मूर्धादि शब्द परे रहते समान शब्दके स्थानमें स आदेश न होगा, जैसे-समानमूर्द्धा। समानप्रभृतयः। समानोदर्काः।

इस सूत्रमें 'समानस्य' यह योगविभाग (भिन्न सूत्र) करनेसे 'सपक्षः, साधर्म्यम्, सजातीयम्' इत्यादि पद सिद्ध होतेहैं, यह काशिकाकारने कहाहै।

अथवा सह शब्द सदृशवाचक भी है, जैसे-सदृशः सख्या='ससखि' यहां, इस कारण 'सपक्ष' इत्यादिमें 'समानः पक्षोऽस्य' इत्यादि अस्वपद विग्रहमें बहुव्रीहि जानना॥

१०१३ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। ६। ३। ८५॥

एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्। सज्योतिः। सजनपद इत्यादि॥

१०१३-ज्योतिष्, जनपद, रात्रि, नाभि, नाम, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन और बंधु यह बारह शब्द परे रहते समान शब्दके स्थानमें स आदेश हो, जैसे-सज्योतिः सजनपदः-इत्यादि॥

१०१४ चरणे ब्रह्मचारिणि। ६। ३। ८६॥

ब्रह्मचारिण्युत्तरपदे समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने। चरणः शाखा, ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी। समानः सः सब्रह्मचारी॥

१०१४-ब्रह्मचारिन् शब्द परे रहते समान शब्दके स्थानमें स आदेश हो, समान रूपसे वेदका चरण गम्यमान हो तो। चरण शब्दसे शाखा जानना और ब्रह्म शब्दसे वेद जानना। वेदाध्ययनार्थ व्रतविशेषको भी ब्रह्म कहतेहैं। ब्रह्म चरति, इस वाक्यमें-ब्रह्मचारी, 'समानो ब्रह्मचारी' इस विग्रहमें समान शब्दके स्थानमें स आदेश होनेपर 'सब्रह्मचारी' यह सिद्ध हुआ॥

१०१५ तीर्थे ये। ६। ३। ८७॥

तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। सतीर्थ्याः एकगुरुकः। समानतीर्थेवासीति यत्प्रत्यय॥

१०१५ तीर्थ शब्द परे रहते यकारादि प्रत्यय विवक्षित होनेपर समान शब्दके स्थानमें स हो, जैसे-सतीर्थ्यः, अर्थात् एक गुरुका छात्र। इस स्थानमें समान तीर्थमें वसनेवाला इस अर्थमें यत् प्रत्यय हुआहै॥

१०१६ विभाषोदरे। ६। ३। ८८॥

यादौ प्रत्यये विवक्षिते इत्येव। सोदर्यः। समानोदर्यः॥

१०१६-यादि प्रत्यय विवक्षित होनेपर उदर शब्द परे रहते समान शब्दके स्थानमें विकल्प करके स हो, जैसे-समानोदर्यः, सोदर्यः ("समानोदरे शयित० ४।४।१०८/१६५५" इति यत् प्रत्ययः)॥

१०१७ दृग्दृशवतुषु। ६। ३। ८९॥

सदृक्। सदृशः॥ दृक्षे चेति वक्तव्यम्॥*॥ सदृक्षः। वतुरुत्तरार्थः॥

१०१७-दृक्, दृश शब्द परे रहते समान शब्दके स्थानमें स हो, जैसे-सदृक्। सदृशः।

दृक्ष शब्द परे रहते भी समान शब्दके स्थानमें स हो * जैसे-सदृक्षः।

इस सूत्रमें वतुग्रहण उत्तरार्थ है॥

१०१८ इदंकिमोरीश्की। ६। ३। ९०॥

दृग्दृशवतुषु इदम ईश् किमः की स्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतूदाहरणं वक्ष्यते॥ दृक्षे चेति वक्तव्यम्॥*॥ ईदृक्षः। कीदृक्षः। आ सर्वनाम्नः। दृक्षे च। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घः। मत्वोत्वे। अमूदृशः। अमूदृक्। अमूदृक्षः॥

१०१८-दृक्, दृश और वतु प्रत्यय परे रहते इदम् शब्दके स्थानमें ईश् और किम् शब्दके स्थानमें की हो, जैसे-ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतु प्रत्ययका उदाहरण पश्चात् कहेंगे।

दृक्ष शब्द परे रहते इदम् शब्दके स्थानमें ईश और किम् शब्दके स्थानमें की आदेश हो * जैसे-ईदृक्षः। कीदृक्षः।

दृक्, दृश, वतु और दृक्ष शब्द परे रहते सर्वनामके अकार आदेश होकर, जैसे-तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घ, मत्व और उत्व करक अमूदृक्। अमूदृशः। अमूदृक्षः। इतने पद सिद्ध हुए हैं॥

१०१९ समासेऽङ्गुलेः सङ्गः। ८। ३। ८०॥

अंगुलिशब्दात्सङ्गस्य सस्य मूर्द्धन्यः स्यात्समासे। अंगुलिषंगः। समासे किम्। अंगुलेः संगः॥

१०१९-समासमें अंगुलि शब्दके परे सङ्ग शब्दके सकारके स्थानमें ष हो, जैसे-अंगुलिषङ्गः। समास न होनेपर-'अंगुलेः सङ्गः' ऐसा होगा॥

१०२० भीरोः स्थानम्। ८। ३। ८१॥

भीरुशब्दात् स्थानस्य सस्य मूर्द्धन्यः स्यात्समासे। भीरुष्ठानम्। असमासे तु। भीरोः स्थानम्॥

१०२०-समासमें भीरु शब्दके परे स्थान शब्दके सकारको

षत्व हो, जैसे—भीरुष्ठानम् । समास न होनेपर, जैसे—'भीरोः स्थानम्' इस स्थानमें षत्व नहीं हुआ ॥

१०२१ ज्योतिरायुषः स्तोमः।८।३।८३॥

आभ्यां स्तोमस्य सस्य मूर्द्धन्यः समासे । ज्योतिष्टोमः । आयुष्टोमः । समासे किम् । ज्योतिषः स्तोमः ॥

१०२१—समासमें ज्योतिष् और आयुष् शब्दके परे स्तोम शब्दके सकारको षत्व हो, जैसे—ज्योतिष्टोमः । आयुष्टोमः । समास न होनेपर षत्व नहीं होगा, जैसे—ज्योतिषः स्तोमः । आयुषः स्तोमः ॥

१०२२ सुषामादिषु च । ८ । ३ । ९८॥

सस्य मूर्धन्यः । शोभनं साम यस्य सुषामा। सुषन्धिः ॥

१०२२—सुषामादि शब्दमें सकारको षत्व हो, जैसे—शोभनं साम यस्य=सुषामा । सुषंधिः—इत्यादि ॥

१०२३ एति संज्ञायामगात् ।८।३।९९॥

सस्य मूर्द्धन्यः । हरिषेणः । एति किम् । हरिसक्थम् । संज्ञायां किम् । पृथुसेनः । अगकारात्किम् । विष्वक्सेनः । इणकोरित्येव । सर्वसेनः ॥

१०२३—संज्ञामें एकार परे रहते गकारसे भिन्नके परे स्थित सकारको षत्व हो, जैसे—हरिषेणः ।

एकार परे न होनेसे, यथा—हरिसक्थम् ।

संज्ञा न होनेपर, पृथुसेनः ।

गकारसे परे होनेसे यथा—विष्वक्सेनः ।

इण्,कवर्गसे परे ही सकारको षत्व होताहै इससे 'सर्वसेनः' यहां षत्व न हुआ ॥

१०२४ नक्षत्राद्वा । ८ । ३ । १०० ॥

एति सस्य संज्ञायामगकारान्मूर्द्धन्यो वा । रोहिणीषेणः । रोहिणीसेनः । अगकारात्किम् । शतभिषक्सेनः । आकृतिगणोऽयम् ॥

१०२४—संज्ञामें नक्षत्रवाचक शब्दके उत्तर गकारके परे न हो ऐसे सकारको विकल्प करके षत्व हो एकार परे रहते, जैसे—रोहिणीषेणः, रोहिणीसेनः । गकारके परे होनेपर, जैसे—शतभिषक्सेनः, षत्व न हुआ । यह (सुषामादि) आकृतिगण है ॥

१०२५ अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारक-रागच्छेषु । ६ । ३ । ९९ ॥

अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु । अन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः । अन्यद्रागः । अन्यदीयः । अषष्ठीत्यादि किम् । अन्यस्याऽन्येन वाशीः।अन्याशीः॥ कारके छे च नायं निषेधः । अन्यस्य कारकः अन्यत्कारकः । अन्यस्यायमन्यदीयः । गहादेराकृतिगणत्वाच्छः ॥

१०२५—आशिष्, आशा, आस्था, आस्थित, उत्सुक, ऊति, कारक और राग शब्द और छ प्रत्यय परे रहते षष्ठ्यन्त और तृतीयान्तसे भिन्न जो अन्य शब्द उसको दुगागम हो, जैसे—अन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः । अन्यत्कारकः । अन्यद्रागः । अन्यदीयः ।

षष्ठ्यन्त और तृतीयान्तसे भिन्न कहनेसे 'अन्यस्यान्येन वाशीः' इस वाक्यमें 'अन्याशीः' ऐसा हुआहै ।

कारक और छ प्रत्यय परे रहते षष्ठ्यन्त और तृतीयान्त अन्य पदको दुगागमका निषेध नहीं होताहै । 'अन्यस्य कारकः' इस विग्रहमें अन्यत्कारकः । अन्यस्यायम्=अन्यदीयः । गहादिके आकृतिगणत्वके कारण छ प्रत्यय करके 'अन्यदीयः' पद सिद्ध हुआहै ॥

१०२६ अर्थे विभाषा । ६ । ३ । १०० ॥

अन्यदर्थः । अन्यार्थः ॥

१०२६—अर्थ शब्द परे रहते अन्य शब्दके उत्तर विकल्प करके दुगागम हो, जैसे—अन्यदर्थः, अन्यार्थः (अन्य—द्—अर्थः=अन्यदर्थः) ॥

१०२७ कोः कत्तत्पुरुषेऽचि।६।३।१०१॥

अजादावुत्तरपदे । कुत्सितोऽश्वः कदश्वः । कदन्नम् । तत्पुरुषे किम् । कूष्ट्रो राजा ॥ त्रौ च ॥ * ॥ कुत्सितास्त्रयः कत्त्रयः ॥

१०२७—तत्पुरुष समासमें अजादि उत्तरपद परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कुत्सितोऽश्वः=कदश्वः । कदन्नम् ।

तत्पुरुष समास न होनेपर, जैसे—कूष्ट्रो राजा ।

(त्रौ च *) त्रि शब्द परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कुत्सितास्त्रयः=कत्त्रयः ॥

१०२८ रथवदयोश्च । ६ । ३ । १०२॥

कद्रथः । कद्वदः ॥

१०२८—रथ और वद शब्द परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कद्रथः । कद्वदः ॥

१०२९ तृणे च जातौ । ६ । ३।१०३॥

कत्तृणम् ॥

१०२९—जाति होनेपर तृण शब्द परे रहते कु शब्दके स्थानमें कत् आदेश हो, जैसे—कत्तृणम् ॥

१०३० का पथ्यक्षयोः ।६।३।१०४॥

कापथम् । काक्षः । अक्षशब्देन तत्पुरुषः । अक्षशब्देन बहुव्रीहिर्वा ॥

---

१ "एति संज्ञायामगात्" और "नक्षत्राद्वा" यह दोनों गणसूत्रोंका पाणिनीय सूत्रपाठमें किसीने प्रक्षेप कियाहै ॥

१०३०–पथिन् और अक्षि शब्द परे रहते कु शब्दके स्थानमें का आदेश हो, जैसे–कापथम् । काक्षः । इस स्थानमें अक्ष शब्दके साथ तत्पुरुष समास अथवा अक्षि शब्दके साथ बहुव्रीहि समास जानना ॥

१०३१ ईषदर्थे । ६ । ३ । १०५ ॥

ईषज्जलं काजलम् । अजादावपि परत्वात्कादेशः । काम्लः ॥

१०३१–ईषत् अर्थ होनेपर कु शब्दके स्थानमें का आदेश हो, जैसे–'ईषज्जलम्' इस वाक्यमें–काजलम् । अजादि शब्द परे रहते भी परत्वके कारण कु शब्दके स्थानमें का आदेश होगा, जैसे–काम्लः ॥

१०३२ विभाषा पुरुषे । ६ । ३ । १०६ ॥

कापुरुषः । कुपुरुषः । अप्राप्तविभाषेयम् । ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव । ईषत्पुरुषः कापुरुषः ॥

१०३२–पुरुष शब्द परे रहते कु शब्दके स्थानमें विकल्प करके का आदेश हो, जैसे–कापुरुषः, कुपुरुषः । यह अप्राप्तविभाषा है । ईषदर्थमें तो पूर्वविप्रतिषेधके कारण नित्य ही का आदेश होगा, जैसे–ईषत्पुरुषः=कापुरुषः ॥

१०३३ कवं चोष्णे । ६ । ३ । १०७ ॥

उष्णशब्दे उत्तरपदे कवं का च वा स्यात् । कवोष्णम् । कोष्णम् । कदुष्णम् ॥

१०३३–उष्ण शब्द परे रहते किम् शब्दके स्थानमें विकल्प करके कव और का आदेश हो, जैसे–कवोष्णम्, कोष्णम्, कदुष्णम् ॥

१०३४ पृषोदरादीनि यथोपदिष्टम् । ६ । ३ । १०९ ॥

पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः । पृषद् उदरं पृषोदरम् । तलोपः । वारिवाहको बलाहकः । पूर्वपदस्य बः उत्तरपदादेश्च लत्वम् ॥

भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम् ॥ १ ॥

दिक्शब्देभ्यस्तीरस्य तारभावो वा ॥ * ॥ दक्षिणतारम् । दक्षिणतीरम् । उत्तरतारम् । उत्तरतीरम् ॥ दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च ॥ * ॥ दुःखेन दाश्यते दूडाशः । दुःखेन नाश्यते दूणाशः । दुःखेन दभ्यते दूडभः । खल् त्रिष्वपि । दम्भेर्नलोपो निपात्यते । दुःखेन ध्यायतीति दूढ्यः । आतश्चेति कः । ब्रुवन्तोऽस्यां सीदन्तीति बृसी । ब्रुवच्छब्दस्य बृ आदेशः । सदेरधिकरणे डट् । आकृतिगणोऽयम् ॥

१०३४–पृषोदरादि शब्द शिष्टगणकर्तृक जिस प्रकार उच्चारित हुएहैं उस प्रकार ही साधु हों, जैसे–पृषत्+उदरम्=इस विग्रहमें तकारका लोप करके 'पृषोदरम्' यह पद सिद्ध हुआ । 'वारिवाहकः' इसमें वारि इस पूर्वपदके स्थानमें ब और उत्तरपदके आदिको ल आदेश होकर'बलाहकः'पद सिद्ध हुआ।

वर्णागमके कारण अर्थात् हन् धातुके उत्तर पचादित्वके कारण अच् प्रत्यय और सगागम करके 'हंसः' पद सिद्ध हुआ। हिंसि धातुके उत्तर पचादित्वके कारण अच् प्रत्यय करके हकार और सकारके स्थानमें विपर्ययके कारण 'सिंहः' पद सिद्ध हुआ। वर्णकी विकृतिके कारण अर्थात् आत्मन् शब्दके आकारके स्थानमें उकार करके 'गूढोत्मा' पद सिद्ध हुआ। वर्णके विनाश अर्थात् 'पृषत्' इस पदके तकारके लोपके कारण 'पृषोदरम्' यह पद सिद्ध हुआ ।

दिग्वाचक शब्दके उत्तर तीरशब्दके स्थानमें विकल्प करके तार आदेश हो * जैसे–दक्षिणतारम्, दक्षिणतीरम् । उत्तरतारम्, उत्तरतीरम् ।

(दुरो दाशनाश० *) दाश, नाश, दभ और ध्य शब्द परे रहते दुर् शब्दको उत्व हो और उत्तर पदके आदि वर्णको ष्टुत्व हो, जैसे–'दुःखेन दाश्यते' इस विग्रहमें–दूडाशः । 'दुःखेन नाश्यते' इस वाक्यमें–दूणाशः । दुःखेन दभ्यते= दूडभः । दाश, नाश और दभ इन तीन शब्दोंके उत्तर खल् प्रत्यय हुआहै। दंभ् धातुके नकारका लोप निपातनसे सिद्ध हुआहै । 'दुःखेन ध्यायति'इस वाक्यमें दूढ्यः, यहां''आतश्च० २८९८'' इस सूत्रसे क प्रत्यय हुआहै ।

'ब्रुवन्तोऽस्यां सीदन्ति' इस वाक्यमें ब्रुवत् शब्दके स्थानमें बृ आदेश और सद् धातुके उत्तर अधिकरणमें डट् प्रत्यय करके 'बृसी' पद सिद्ध हुआहै । बृसी शब्दसे व्रतियोंका और मुनियोंका कुशादि निर्मित आसन जानना । यह (पृषोदरादि) आकृतिगण है ॥

१०३५ संहितायाम् । ६ । ३ । ११४ ॥

अधिकारोऽयम् ॥

१०३५–यह संहिताधिकार सूत्र है ॥

१०३६ कर्णे लक्षणस्याऽविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । ६ । ३ । ११५ ॥

कर्णशब्दे परे लक्षणवाचकस्य दीर्घः । द्विगुणाकर्णः । लक्षणस्य किम् । शोभनकर्णः । अविष्टादीनां किम् । विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ॥

१०३६–संहिताविषयमें कर्ण शब्द परे रहते लक्षणवाचक शब्दको दीर्घ हो, परन्तु विष्ट, अष्टन्, पञ्चन्, मणि, भिन्न, छिन्न, छिद्र, स्रुव और स्वस्तिक शब्दको दीर्घ न हो, जैसे–द्विगुणाकर्णः ॥

लक्षणवाचक न होनेपर दीर्घ नहीं होगा, जैसे-शोभनकर्णः । विष्टाद शब्दको भी दीर्घ नहीं होगा, जैसे-विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः ॥

१०३७ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । ६ । ३ । ११६ ॥

क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः । उपानत् । नीवृत् । प्रावृट् । मर्मावित् । नीरुक् । अभीरुक् । ऋतीषट् । परीतत् । क्वाविति किम् । परिणहनम् । विभाषा पुरुष इत्यतो मण्डूकप्लुत्या विभाषानुवर्तते सा च व्यवस्थिता । तेन गतिकारकयोरेव । नेह । पटुरुक् । तिग्मरुक् ॥

१०३७-क्विप्प्रत्ययान्त नह्, वृत्, वृष्, व्यध्, रुच्, सह् और तन् धातु परे रहते पूर्वपदको दीर्घ हो, जैसे-उप-नह्-क्विप्=उपानत् । निवर्तते इति=नीवृत् । प्रवर्षति इति=प्रावृट् । मर्माणि विध्यति इति=मर्मावित् । नीरुक् । अभीरुक् । ऋतिं सहते=ऋतीषट् । परितनोति=परीतत् ।

क्विप्रत्ययान्त न होनेपर दीर्घ नहीं होगा, जैसे-परिणहनम् । "विभाषा पुरुषे १०३२" इस सूत्रसे मंडूकप्लुतिद्वारा विभाषाकी अनुवृत्ति होतीहै, वह व्यवस्थित विभाषा है, इस कारण गति और कारक इन दोनोंको ही दीर्घ होगा, इससे पटुरुक् । तिग्मरुक्-इत्यादि स्थलमें दीर्घ नहीं हुआ ॥

१०३८ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् । ६ । ३ । ११७ ॥

कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात्संज्ञायाम् ॥

१०३८-संज्ञा होनेपर वन शब्द परे रहते कोटरादि शब्दोंको और गिरि शब्द परे रहते किंशुलुकादि शब्दोंको दीर्घ हो ॥

१०३९ वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः । ८ । ४ । ४ ॥

वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः । इह कोटरान्ताः पञ्च दीर्घविधौ कोटरादयो बाध्याः । तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः । अग्रेशब्दस्य तु विध्यर्थः । पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् । कोटरावणम् । एभ्य एवेति किम् । असिपत्त्रवनम् । वनस्याग्रे अग्रेवणम् । राजदन्तादिषु निपातनात्सप्तम्या अलुक् । प्रातिपदिकार्थमात्रे प्रथमा । किंशुलुकागिरिः ॥

१०३९-पुरगा, मिश्रका, सिध्रका, सारिका, कोटरा और अग्रे शब्दके परे ही उत्तरपदभूत वन शब्दके नकारको णत्व हो, अन्यके उत्तर होनेपर णत्व न हो । इस सूत्रमें कोटरापर्यन्त पांच शब्द दीर्घ विधि(१०३८) में कोटरादि जानने । कृतदीर्घ इन शब्दोंका णत्वविधिमें निर्देश नियमके निमित्त है, और अग्रे शब्दका विध्यर्थ है, जैसे-पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् । कोटरावणम् । एतद्भिन्न शब्दोंके उत्तर वन शब्दके नकारको णत्व न हो, जैसे-असिपत्त्रवनम् । वनस्याग्रे=अग्रेवणम्, यहां राजदन्तादि गणके मध्यमें निपातनसे सप्तमीका अलुक् हुआहै और प्रातिपदिकार्थ मात्रमें प्रथमा हुई है । किंशुलुकागिरिः । आदि शब्दसे 'अञ्जनागिरिः' इत्यादि पद सिद्ध हुएहैं । किंशुलुकादि न होनेपर, जैसे-कृष्णगिरिः । रामगिरिः ॥

१०४० वले । ६ । ३ । ११८ ॥

वलप्रत्यये परे दीर्घः स्यात्संज्ञायाम् । कृषीवलः ॥

१०४०-संज्ञामें वल प्रत्यय परे रहते प्रातिपदिकको दीर्घ हो, जैसे-कृषीवलः ॥

१०४१ मतौ बह्वचोऽनजिरादीनाम् । ६ । ३ । ११९ ॥

अमरावती । अनजिरादीनां किम् । अजिरवती । बह्वचः किम् । व्रीहिमती । संज्ञायामित्येव । नेह । वलयवती ॥

१०४१-मतुप् प्रत्यय परे होनेपर अजिरादि शब्दोंसे भिन्न अनेकाच् प्रातिपदिकको दीर्घ हो, यथा-अमरावती । अजिरादि शब्दोंको दीर्घ न होनेसे यथा-अजिरवती । बहुत अच् न होनेपर, यथा-व्रीहिमती । संज्ञामें ही दीर्घ होताहै, इससे वलयवती यहां दीर्घ न हुआ ॥

१०४२ शरादीनां च । ६ । ३ । १२० ॥

शरावती ॥

१०४२-मतुप् प्रत्यय परे रहते शर आदि प्रातिपदिकको दीर्घ हो, जैसे-शरावती ॥

१०४३ इको वहेऽपीलोः । ६ । ३ । १२१ ॥

इगन्तस्य दीर्घः स्याद्वहे । ऋषीवहम् । कपीवहम् । इकः किम् । पिण्डवहम् । अपीलोः किम् । पीलुवहम् ॥ अपील्वादीनामिति वाच्यम् ॥ * ॥ दारुवहम् ॥

१०४३-वह शब्द परे रहते पीलु शब्दसे भिन्न अन्य इगन्त शब्दको दीर्घ हो, जैसे-ऋषीवहम् । कपीवहम् । इगन्त न होनेपर दीर्घ नहीं होगा, जैसे-पिण्डवहम् । पीलु शब्दको दीर्घ नहीं होगा, जैसे-पीलुवहम् ।

पीलु आदि कितने एक शब्दोंको दीर्घ न हो ऐसा कहना चाहिये * जैसे-दारुवहम् ॥

१०४४ उपसर्गस्य घञ्यमनुष्ये बहुलम् । ६ । ३ । १२२ ॥

उपसर्गस्य बहुलं दीर्घः स्याद्घञन्ते परे न

तु मनुष्ये । परीपाकः । परिपाकः । अमनुष्ये किम् । निषादः ॥

१०४४—घञन्त शब्द परे रहते उपसर्गको बहुल करके दीर्घ हो मनुष्य वाच्य रहते नहीं हो, जैसे—परीपाकः, परिपाकः । मनुष्यवाचक होनेपर दीर्घ नहीं होता, जैसे—निषादः ॥

१०४५ इकः काशे । ६ । ३ । १२३ ॥

इगन्तस्योपसर्गस्य दीर्घः स्यात्काशे । वीकाशः । नीकाशः । इकः किम् । प्रकाशः ॥

१०४५—काश शब्द परे रहते इगन्त उपसर्गको दीर्घ हो, जैसे—वीकाशः । नीकाशः । इगन्त न होनेपर दीर्घ न होगा, जैसे—प्रकाशः ॥

१०४६ अष्टनः संज्ञायाम् ।६।३।१२५॥

उत्तरपदे दीर्घः । अष्टापदम् । संज्ञायां किम् । अष्टपुत्रः ॥

१०४६—संज्ञामें उत्तरपद परे रहते अष्टन् शब्दको दीर्घ हो, जैसे—अष्टापदम् । संज्ञा न होनेपर दीर्घ न होगा, जैसे—अष्टपुत्रः ॥

१०४७ चितेः कपि । ६ । ३ । १२७ ॥

एकचितीकः ॥

१०४७—कप् प्रत्यय परे रहते चिति शब्दके इकारको दीर्घ हो, जैसे—एकचितीकः ॥

१०४८ नरे संज्ञायाम् ।६ ।३ ।१२९ ॥

विश्वानरः ॥

१०४८—नर शब्द परे रहते संज्ञामें पूर्वपदको दीर्घ हो, जैसे—विश्वानरः ॥

१०४९ मित्रे चर्षौ । ६ । ३ । १३० ॥

विश्वामित्रः । ऋषौ किम् । विश्वमित्रो माणवकः ॥ शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः ॥ * ॥ श्वादन्तः इत्यादि ॥

१०४९—ऋषिवाच्य रहते, मित्र शब्द परे रहते पूर्वपदको दीर्घ हो, जैसे—विश्वामित्रः । ऋषि वाच्य न होनेपर दीर्घ न होगा, जैसे—विश्वमित्रो माणवकः ।

दन्त, दंष्ट्रा, कर्ण, कुन्द, वराह, पुच्छ और पद शब्द परे रहते श्वन् शब्दको दीर्घ हो * जैसे—श्वादन्तः—इत्यादि ॥

१०५० प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ।८।४।५॥

एभ्यो वनस्य णत्वं वा स्यात् । प्रवणम् । कार्ष्यवणम् । इह षात्परत्वात् णत्वम् ॥

१०५०—संज्ञा न होनेपर भी प्र, निर्, अन्तर्, शर, इक्षु, प्लक्ष, आम्र, कार्ष्य, खदिर और पीयूक्षा शब्दके परे स्थित वन शब्दके नकारको णत्व हो, जैसे—प्रवणम् । कार्ष्यवणम्, इस स्थानमें षकारके परे होनेके कारण णत्व हुआ है ॥

१०५१ विभाषौषधिवनस्पतिभ्यः । ८ । ४ । ६ ॥

एभ्यो वनस्य णत्वं वा स्यात् । दूर्वावणम् । दूर्वावनम् । शिरीषवणम् । शिरीषवनम् । द्व्यच्त्र्यज्भ्यामेव ॥ * ॥ नेह । देवदारुवनम् ॥ इरिकादिभ्यः प्रतिषेधो वक्तव्यः ॥ * ॥ इरिकावनम् । मिरिकावनम् ॥

१०५१—ओषधि और वनस्पतिवाचक शब्दके उत्तर वन शब्दके नकारको विकल्प करके णत्व हो, जैसे—दूर्वावणम्, दूर्वावनम् । शिरीषवणम्, शिरीषवनम् ।

दो और तीन अचोंसे युक्त शब्दके उत्तर ही वन शब्दके नकारको णत्व हो * इससे तदतिरिक्त अर्थात् चार आदि अचोंसे युक्त शब्दके उत्तर होनेपर णत्व नहीं होगा, जैसे—देवदारुवनम् ।

इरिकादि शब्दोंके उत्तर वन शब्दके नकारको णत्व नहीं हो * जैसे—इरिकावनम् । मिरिकावनम् ॥

१०५२ वाहनमाहितात् ।८ । ४ । ८॥

आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात् । इक्षुवाहणम् । आहितात्किम् । इन्द्रवाहनम् । इन्द्रस्वामिकं वाहनमित्यर्थः । वहतेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात् ॥

१०५२—जो उठाकर लेजायाजाय तद्वाचिस्थ निमित्तके परे वाहन शब्दके नकारको णत्व हो, जैसे—इक्षुवाहणम् । आहित न होनेपर णत्व न होगा, जैसे—इन्द्रवाहनम्, अर्थात् इन्द्रस्वामिक वाहन । 'वाहनम्' इसमें वह धातुके उत्तर ल्युट् प्रत्यय होनेपर इसी सूत्रमें निपातनसे वृद्धि हुईहै ॥

१०५३ पानं देशे । ८ । ४ । ९ ॥

पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्याद्देशे गम्ये । क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सुरापाणाः प्राच्याः । पीयते इति पानम् । कर्मणि ल्युट् ॥

१०५३—देश गम्य होनेपर पूर्वपदस्थ निमित्तके परे पान शब्दके नकारको णत्व हो, जैसे—क्षीरं पानं येषां ते=क्षीरपाणाः उशीनराः । सुरापाणाः प्राच्याः (पीयते इति पानम् । पा+कर्मणि ल्युट्) ॥

---

१ मनुष्यादि वाच्य रहते दीर्घ नहीं हो ऐसा कहना चाहिये * जैसे—प्रसेवः । प्रसारः । प्रहारः । कृत्रिम होनेपर साद और कार शब्द परे रहते उपसर्गको दीर्घ हो * यथा एषोऽस्य प्रासादः । एषोऽस्य प्राकारः । इस वार्तिमें कृत्रिम शब्द किमर्थ है, तो—एषोऽस्य प्रसादः, प्रकारः । प्रतिवेशादि शब्दोंको विकल्प करके दीर्घ हो * जैसे—प्रतीवेशः, प्रतिवेशः । प्रतीकारः, प्रतिकारः । यह सब बहुलग्रहणका ही फल है ॥

१०५४ वा भावकरणयोः ।८।४।१०॥

पानस्येत्येव । क्षीरपाणम् । क्षीरपानम् ॥ गिरिनद्यादीनां वा ॥ * ॥ गिरिणदी । गिरिनदी । चक्राणितम्बा । चक्रनितम्बा ॥

१०५४–पूर्वपदस्थ निमित्तके परे भाव और करणमें विहितल्युट्प्रत्ययान्त पान शब्दके नकारको विकल्प करके णत्व हो, जैसे–क्षीरपाणम्, क्षीरपानम् ।

गिरिनद्यादि शब्दोंको भी विकल्प करके णत्व हो* जैसे–गिरिणदी, गिरिनदी । चक्राणितम्बा, चक्रनितम्बा ॥

१०५५ प्रातिपदिकान्तनुम्विभक्तिषु च।८।४।११॥

पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात् । प्रातिपदिकान्ते । माषवापिणौ । नुमि । व्रीहिवापाणि । विभक्तौ । माषवापेण । पक्षे माषवापिनावित्यादि । उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वम् । नेह । गर्गाणां भगिनी गर्गभगिनी । अत एव नुम्ग्रहणं कृतम् । अङ्गस्य नुम्विधानात्तद्भक्तो हि नुम् न तूत्तरपदस्य । किंच । प्रहिण्वन्नित्यादौ हिवेर्नुमो णत्वार्थमपि नुम्ग्रहणम् । प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न ॥ युवादेर्न ॥ * ॥ रम्ययूना । परिपक्वानि । एकाजुत्तरपदे णः । नित्यमित्युक्तम् । वृत्रहणौ । हरिं मानयतीति हरिमाणी । नुमि । क्षीरपाणि । विभक्तौ क्षीरपेण । रम्यविणा ॥

१०५५–पूर्वपदस्थ निमित्तके परे प्रातिपदिकान्त, नुम् और विभक्तिमें स्थित नकारको विकल्प करके णत्व हो । प्रातिपदिकान्तमें जैसे–माषवापिणौ । नुम्में जैसे–व्रीहिवापाणि । विभक्तिमें जैसे–माषवापेण । विकल्प पक्षमें जैसे–माषवापिनौ, इत्यादि । उत्तरपद जो प्रातिपदिक तदन्त नकारको ही णत्व होताहै, इस कारण ' गर्गाणाम् भगिनी=गर्गभगिनी' इस स्थलमें णत्व नहीं हुआ, इस निमित्त ही नुम्का ग्रहण कियाहै । अङ्गको नुम्विधानके कारण अङ्गावयव नुम् होताहै, परन्तु उत्तरपदसंबन्धी. नुम् नहीं होताहै, अथवा प्रहिण्वन्–इत्यादि स्थलमें हिविधातुसंबन्धी जो नुम् उसको भी णत्वविधानके निमित्त इस स्थानमें नुम्ग्रहण है । प्रेन्वनम्–इत्यादिमें तो क्षुभ्नादित्वके कारण णत्व नहीं होताहै।

युवादिको, अर्थात् युवन, पक्व इत्यादिको णत्व नहीं हो* जैसे–रम्ययूना । परिपक्वानि ।

"एकाजुत्तरपदे णः १०१" इस सूत्रसे नित्य णत्व उक्त हुआ है, जैसे–वृत्रहणौ । ' हरिं मानयति' इस वाक्यमें हरिमाणी । नुम्में जैसे–क्षीरपाणि । विभक्तिमें जैसे–क्षीरपेण । रम्यविणा ॥

१०५६ कुमति च।८।४।१३॥

कवर्गवत्युत्तरपदे प्राग्वत् । हरिकामिणौ । हरिकामाणि । हरिकामेण ॥

१०५६–कवर्गयुक्त उत्तरपद परे रहते पूर्वके समान हो, अर्थात् पूर्वपदस्थ निमित्तके परे प्रातिपदिकान्त, नुम् और विभक्तिस्थ नकारको णत्व हो, जैसे–हरिकामिणौ । हरिकामाणि । हरिकामेण ॥

१०५७ पदव्यवायेऽपि ।८।४।३८॥

पदेन व्यवधानेऽपि णत्वं न स्यात् । माषकुम्भवापेन । चतुरङ्गयोगेन ॥ अतद्धित इति वाच्यम् ॥ * ॥ आर्द्रगोमयेण । शुष्कगोमयेण ॥

१०५७–मध्यमें किसी पदसे व्यवधान रहते भी पूर्वपदस्थ निमित्तसे परे प्रातिपदिकान्त, नुम् और विभक्तिमें स्थित नकारको णत्व न हो, जैसे–माषकुंभवापेन । चतुरङ्गयोगेन ।

तद्धितप्रत्ययान्त पदसे व्यवधान रहते निषेध नहीं हो * जैसे–आर्द्रगोमयेण । शुष्कगोमयेण ॥

१०५८ कुस्तुम्बुरूणि जातिः ६।१।१४३।

अत्र सुण्निपात्यते । कुस्तुम्बुरुर्धान्याकम् । क्लीबत्वमतन्त्रम् । जातिः किम् । कुतुम्बुरूणि । कुत्सितानि तिन्दुकीफलानीत्यर्थः ॥

१०५८–जातिवाचक होनेपर कुस्तुम्बुरु शब्दमें निपातनसे सुट् हो, जैसे–कुस्तुम्बुरुः धान्याकम् । सूत्रमें क्लीबनिर्देश अविवक्षित है । जातिवाचक न होनेपर सुट् नहीं होगा, जैसे–कुतुम्बुरूणि, अर्थात् कुत्सित तौंबीके फल ॥

१०५९ अपरस्पराः क्रियासातत्ये । ६।१।१४४॥

सुण्निपात्यते । अपरस्पराः सार्था गच्छन्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । क्रियेति किम् । अपरपरा गच्छन्ति । अपरे च परे च सकृदेव गच्छन्तीत्यर्थः ॥

१०५९–क्रियासातत्य होनेपर ' अपरस्पराः ' इस स्थलमें निपातनसे सुट्का आगम हो, जैसे–अपरस्पराः सार्था गच्छन्ति, अर्थात् निरंतर अविच्छेदसे गमन करतेहैं । क्रियाकी निरंतरता न होनेपर सुट् न होगा, जैसे–अपरपरा गच्छन्ति । (अपरे च, परे च सकृत् एव गच्छन्ति)॥

१०६० गोष्पदं सेवितासेवितप्रमाणेषु ।६।१।१४५॥

सुट् सस्य षत्वं च निपात्यते । गावः पद्यन्तेऽस्मिन्देशे स गोभिः सेवितो गोष्पदः । असेविते । अगोष्पदान्यरण्यानि । प्रमाणे । गोष्पदमात्रं क्षेत्रम् । सेवितेत्यादि किम् । गोः पदं गोपदम् ॥

१०६०–सेवित, असेवित और प्रमाण अर्थ होनेपर गोष्पद शब्दमें निपातनसे सुट् और सुट्के सकारको षत्व हो । सेवित अर्थमें जैसे गावः पद्यन्तेऽस्मिन् देशे सः–गोभिः सेवितः=गोष्पदः । असेवित अर्थमें जैसे–अगोष्पदान्यरण्यानि । प्रमा-

ण अर्थमें जैसे–गोष्पदमात्रं क्षेत्रम् । सेवितादि अर्थ न होनेपर सुट् और षत्व नहीं होंगे, जैसे–गोः पदम्=गोपदम् ॥

१०६१ आस्पदं प्रतिष्ठायाम्।६।१।१४६॥

आत्मयापनाय स्थाने सुट् निपात्यते । आस्पदम् । प्रति किम् । आपदापदम् ॥

१०६१–अपने शरीररक्षाके निमित्त जो स्थान सो वाच्य रहते 'आस्पदम्' इसमें निपातनसे सुट् हो, जैसे–आस्पदम् । प्रतिष्ठा अर्थ न होनेपर 'आपदापदम्' ऐसा होगा ॥

१२७३–उक्त अर्थमें वसन्तादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे–वासन्तिकः। अथर्वाणमधीते=आथर्वणिकः, यहां "दाण्डिनायन० ११४५" इस सूत्रमें निपातनके कारण टिका लोप नहीं हुआ॥

१२७४ प्रोक्ताल्लुक्। ४। २। ६४॥

प्रोक्तार्थप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात्। पणनं पणः। घञर्थे कविधानमिति कः। सोऽस्यास्तीति पणी। तस्य गोत्रापत्यं पाणिनः॥

१२७४–प्रोक्तार्थक प्रत्ययके परे स्थित अध्येतृ और वेदितृवाचक प्रत्ययका लुक् हो, जैसे–पणनं पणः "घञर्थे कविधानम्" इससे क प्रत्यय हुआ, पणोऽस्यास्तीति=पणी तस्य गोत्रापत्यम्=पाणिनः॥

१२७५ गाथिविदथिकेशिगणिपणिनश्च। ६। ४। १६५॥

एतेऽणि प्रकृत्या स्युः। इति टिलोपो न। ततो यूनि इञ्। पाणिनिः॥

१२७५–अण् प्रत्यय परे रहते गाथिन्, विदथिन्, केशिन्, गणिन् और पणिन् शब्दको प्रकृतिभाव हो, इस कारण टिका लोप नहीं हुआ, जैसे–पाणिनः। पश्चात् युवापत्य अर्थमें इञ् प्रत्यय होकर पाणिनिः॥

१२७६ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। २। ४। ५८॥

ण्यप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्तादृष्य-

भिधायिनो गोत्रप्रत्ययान्ताद् ञितश्च परयो-र्युवाभिधायिनोरणिञोर्लुक् स्यात् । कौरव्यः पिता, कौरव्यः पुत्रः । श्वाफल्कः पिता, श्वाफल्कः पुत्रः । वाशिष्ठः पिता, वाशिष्ठः पुत्रः। तैकायनिः पिता, तैकायनिः पुत्रः। एभ्यः किम् । शिवाद्यण् । कौहडः पिता तत इञ् । कौहडिः पुत्रः । यूनि किम् । वामरथ्य-स्य च्छात्राः वामरथाः। इति अणो लुक् तु न भवति । आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात् । पाणिनिना प्रोक्तं पाणिनीयम् । वृद्धाच्छः । इञश्चेत्यण् तु न । गोत्रे य इञ् तदन्तादिति वक्ष्यमाणत्वात् । ततोऽध्येतृवेदि-त्रणो लुक् । स्वरे स्त्रियां च विशेषः । पाणि-नीयः। पाणिनीया ॥

१२७६–ण्यप्रत्ययान्त और क्षत्रियवाची गोत्रप्रत्ययान्त और ऋषिवाचक गोत्रप्रत्ययान्त प्रातिपदिकके परे और ञित् प्रत्ययके परे युवापत्यार्थमें विहित अण् और इञ् प्रत्ययका लुक् हो, जैसे–कौरव्यः पिता। कौरव्यः पुत्रः । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । वाशिष्ठः पिता । वाशिष्ठः पुत्रः । तैकायनिः पिता । तैकायनिः पुत्रः ।

इनसे भिन्न शब्दके उत्तर उक्त प्रत्ययका लुक् नहीं होताहै, इसलिये शिवादित्वके कारण अण् प्रत्यय करके कौहडः पिता, पश्चात् युवापत्यार्थमें इञ् प्रत्यय करके कौहडिः पुत्रः ।

युवापत्यार्थसे दूसरे अर्थमें विहित जो अण् और इञ् प्रत्यय, उनका लुक् न होगा, जैसे–वामरथ्यस्य छात्राः= वामरथाः ॥

आर्षग्रहणसे इस स्थलमें प्रतिपदोक्त ऋषिवाचक शब्दसे विहित जो अण् अर्थात् अण्से परे स्थित इञ्, उसका ही ग्रहण है, इस कारण अण् (अण्से परे स्थित इञ्) का लुक् नहीं होगा, जैसे–'पाणिनिना प्रोक्तम्=पाणिनीयम्' यहां "वृद्धाच्छः१३३७"इस सूत्रसे छ प्रत्यय हुआ,इस स्था-नमें "इञश्च १३३३" इस सूत्रसे अण् प्रत्यय तो नहीं होताहै, कारण कि, गोत्रार्थमें विहित जो इञ् प्रत्यय तदन्त प्रातिपदिकके उत्तर अण् प्रत्यय हो यह वक्ष्यमाण है (कहेंगे) पश्चात् अध्येतृ, वेदितृ अर्थमें विहित प्रत्ययका लुक् हुआ, लुगन्तके स्वर और स्त्रीलिङ्गमें विशेष होगा, जैसे–पाणिनीयः । पाणिनीया ॥

१२७७ सूत्राच्च कोपधात् । ४ ।२।६५॥

सूत्रवाचिनः ककारोपधादध्येतृवेदितृप्रत्यय-स्य लुक् स्यात् । अप्रोक्तार्थ आरम्भः । अष्टा-वध्यायाः परिमाणमस्य अष्टकं पाणिनेः सूत्रम्। तदधीयते विदन्ति वा अष्टकाः ॥

१२७७–ककारोपध सूत्रवाचक शब्दके उत्तर अध्येतृ, वेदितृ प्रत्ययका लुक् हो, अप्रोक्तार्थ यह सूत्रारम्भ है, जैसे-अष्टावध्यायाः परिमाणमस्य=अष्टकं पाणिनेः सूत्रम्, तदधी-यते विदन्ति वा, इस विग्रहमें अष्टकाः ॥

१२७८ छन्दोब्राह्मणानि च तद्विष-याणि । ४ । २ । ६६ ॥

छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः । अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः । कठेन प्रोक्तमधीयते कठाः । वैशम्पायनान्तेवासित्वाण्णिनिः । तस्य कठचरकादिति लुक्, ततोऽण्, तस्य प्रोक्काल्लुक्॥ (इति रक्ताद्यर्थकाः)।

१२७८–प्रोक्तप्रत्ययान्त छन्दोवाचक और ब्राह्मणवाचक शब्द अध्येतृ और वेदितृविषयक हों अर्थात् अध्येतृ और वेदितृ प्रत्ययके विना प्रयुक्त न हों, जैसे–कठेन प्रोक्तम् अधीयते=कठाः । "कलापिवैशम्पायनान्तेवासिभ्यः ४ । ३ १०४" इस सूत्रसे वैशम्पायनान्तेवासित्वके कारण णिनि प्रत्यय हुआ, उसका "कठचरकात्० १४८७"इस सूत्रसे लुक् हुआ, पश्चात् अण् प्रत्यय होकर उसका "प्रोक्ताल्लुक्१२७४" इस सूत्रसे लुक् हुआ ॥

(इति रक्ताद्यर्थकाः)।

अथ चातुरर्थिकप्रकरणम्।

१२७९ तदस्मिन्नस्तीति देशे तन्ना-म्नि । ४ । २ । ६७ ॥

उदुम्बराः सन्त्यस्मिन् देशे, औदुम्बरः ॥

१२७९–तदस्मिन् अस्ति, अर्थात् वह इसमें है, इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर प्रत्ययान्तसे देशनाम गम्यमान होनेपर यथाविहित प्रत्यय हों, जैसे–उदुम्बराः सन्ति अस्मिन् देशे, इस विग्रहमें–औदुम्बरः ॥

१२८० तेन निर्वृत्तम् । ४ । २ । ६८ ॥

कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी ॥

१२८०–तेन निर्वृत्तम्, अर्थात् उससे यह निष्पादित हुआहै, इस अर्थमें तृतीयान्त प्रातिपदिकके उत्तर यथा-विहित प्रत्यय हो, जैसे–कुशाम्बेन निर्वृत्ता=कौशाम्बी नगरी ॥

१२८१ तस्य निवासः । ४ । २ । ६९॥

शिबीनां निवासो देशः शैबः ॥

१२८१–षष्ठ्यन्त प्रातिपदिकके उत्तर निवास अर्थमें यथा-विहित प्रत्यय हो, जैसे–शिबीनां निवासो देशः=शैबः ॥

१२८२ अदूरभवश्च । ४ । २ । ७० ॥

विदिशाया अदूरभवं नगरं वैदिशम् । च-कारेण प्रागुक्तास्त्रयोऽर्थाः संनिधाप्यन्ते तेन व-क्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति ॥

१२८२–अदूरभव अर्थमें षष्ठ्यन्त प्रातिपदिकके उत्तर यथाविहित प्रत्यय हो, जैसे–विदिशाया अदूरभवं नगरम्=

वैदिशम्, यहां अण् प्रत्यय हुआहै । चकारसे प्रागुक्त तीनों अर्थोंमें भी वक्ष्यमाण प्रत्यय होंगे, इसलिये वक्ष्यमाण प्रत्ययोंको चातुरर्थिकत्व सिद्ध होताहै ॥

१२८३ ओरञ् । ४ । २ । ७१ ॥

अणोऽपवादः । कक्षतु, काक्षतवम् । नद्यां तु परत्वान्मतुप् । इक्षुमती ॥

१२८३–उकारान्त प्रातिपदिकके उत्तर अञ् प्रत्यय हो, यह अञ् प्रत्यय अण् प्रत्ययका अपवाद (विशेषक) है, जैसे–कक्षतुरस्मिन्नस्ति=काक्षतवम् । नदी वाच्य रहते तो "नद्यां मतुप् १३०४" इस सूत्रसे परत्वके कारण मतुप् प्रत्यय होगा, जैसे–इक्षुमती ॥

१२८४ मतोश्च बह्वजङ्गात् ।४।२।७२॥

बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ् नाऽण् । सैध्रकावतम् । बह्वजिति किम् । आहिमतम् । अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा स्यान्मत्वन्तविशेषणं मा भूत् ॥

१२८४–जिसका अङ्ग बहुत अचोंसे युक्त हो ऐसा जो मतुप्, प्रातिपदिकके उत्तर अञ् प्रत्यय हो, अण् प्रत्यय न हो, जै कावतम् ।

बहुत अचोंसे युक्त अङ्ग न होनेपर अञ् त्यय नहीं होगा, जैसे–आहिमतम् । सूत्रमें बह्वच् यह अङ्गका विशेषण हो,मत्वन्तका विशेषण न हो, इसलिये अङ्गग्रहण कियाहै, नहीं तो 'आहिमतम्' यहां अञ् प्रत्यय होजाता ॥

१२८५ बह्वचः कूपेषु । ४ । २ । ७३ ॥

अणोऽपवादः।दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रःकूपः॥

१२८५–बहुत अचोंसे युक्त जो प्रातिपदिक, उसके उ र कूप वाच्य होनेपर अञ् प्रत्यय हो । यह अञ्, अण् प्रत्ययका विशेषक है,जैसे–दीर्घवरत्रेण निर्वृत्तः=दैर्घवरत्रः,अर्थात् कूप ॥

१२८६ उदक् च विपाशः । ४।२।७४॥

विपाश उत्तरे कूले ये कूपास्तेष्वञ् । अबह्वजर्थ आरम्भः । दत्तेन निर्वृत्तो दात्तः कूपः । उदक् किम् । दक्षिणतः कूपेष्वणेव ॥

१२८६–विपाशाके उत्तर कूलमें स्थित जो कूप, सो वाच्य होनेपर तृतीयान्त प्रातिपदिकसे अञ् प्रत्यय हो । बह्वच् प्रातिपदिकसे भिन्न स्थलमें अञ् प्रत्ययके निमित्त यह सूत्रारंभ कियाहै, जैसे–दत्तेन निर्वृत्तः, इस विग्रहमें दात्तः कूपः । विपाशाके उत्तर कूलमें स्थित न होनेपर अर्थात् दक्षिण कूलमें स्थित होनेपर अण् प्रत्यय ही होगा, अञ् नहीं होगा ॥

१२८७ संकलादिभ्यश्च । ४ । २ ।७५॥

कूपेष्विति निवृत्तम् । संकलेन निर्वृत्तं सांकलम् । पौष्कलम् ॥

१२८७–संकलादि शब्दोंके उत्तर अञ् प्रत्यय हो । यहां 'कूपेषु' यह निवृत्त हुआ । संकलेन निर्वृत्तम्=सांकलम् । पौष्कलम् ॥

१२८८ स्त्रीषु सौवीरसाल्वप्राक्षु । ४ । २ । ७६ ॥

स्त्रीलिङ्गेषु एषु देशेषु वाच्येष्वञ् । सौवीरे, दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी । साल्वे, वैधूमाग्नी । प्राचि माकन्दी ॥

१२८८–स्त्रीलिङ्गमें सौवीर, साल्व और प्राच्य देश वाच्य होनेपर अञ् प्रत्यय हो । सौवीरमें जैसे–दत्तामित्रेण निर्वृत्ता=दात्तामित्री नगरी । साल्वमें–वैधूमाग्नी । प्राच्यमें माकन्दी ॥

१२८९ सुवास्त्वादिभ्योऽण् ।४।२।७७॥

अञोऽपवादः । सुवास्तोरदूरभवं सौवास्तवम् । वर्णु, वार्णवम् । अण्ग्रहणं नद्यां मतुपो बाधनार्थम् । सौवास्तवी ॥

१२८९–सुवास्त्वादि शब्दोंके उत्तर अण् प्रत्यय हो,यह अण् अञ् प्रत्ययका अपवाद है । सुवास्तोरदूरभवम्, इस विग्रहमें सौवास्तवम् । वर्णोरदूरभवम्=वार्णवम् । इस सूत्रमें अण् ग्रहण "नद्यां मतुप् १३०४" इस सूत्रसे विहित मतुप् प्रत्ययके बाधके निमित्त है, जैसे–सौवास्तवी ॥

१२९० रोणी । ४ । २ । ७८ ॥

रोणीशब्दात्तदन्ताच्च अण् । कूपाञोऽपवादः। रौणः । आजकरोणः ॥

१२९०–रोणी और रोणीशब्दान्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, यह अण् कूपार्थक अञ् प्रत्ययका अपवाद है। रौणः । आजकरोणः ॥

१२९१ कोपधाच्च । ४ । २ । ७९ ॥

अण् । अञोऽपवादः कार्णच्छिद्रकः कूपः । कार्कवाकवम् । त्रैशंकवम् ॥

१२९१–ककारोपध प्रातिपदिकके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय अञ् प्रत्ययका अपवाद है, जैसे–कार्णच्छिद्रकः अर्थात् कूप । कार्कवाकवम् । त्रैशंकवम् ॥

१२९२ वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः । ४ । २ । ८० ॥

सप्तदशभ्यः सप्तदश क्रमात्स्युश्चतुरर्थ्याम् । अरीहणादिभ्यो वुञ् । अरीहणेन निर्वृत्तमारीहणकम् । कृशाश्वादिभ्यश्छण् । काशाश्वीयम् । ऋश्यादिभ्यः कः । ऋश्यकम् । कुमुदादिभ्यष्ठच् । कुमुदिकम् । काशादिभ्य इलः । काशिलः । तृणादिभ्यः सः । तृणसम् । प्रेक्षादिभ्य इनिः ।

प्रेक्षी । अश्मादिभ्यो रः । अश्मरः । सख्यादिभ्यो ढञ् । साखेयम् । संकाशादिभ्यो ण्यः । सांकाश्यम् । बलादिभ्यो यः । बल्यम् । पक्षादिभ्यः फक् । पाक्षायणः । पथः पन्थ च । पान्थायनः । कर्णादिभ्यः फिञ् । कार्णायनिः । सुतङ्गमादिभ्य इञ् । सौतङ्गमिः । प्रगद्यादिभ्यो ञ्यः। प्रागद्यः । वराहादिभ्यः कक् । वाराहकः । कुमुदादिभ्यष्ठक् । कौमुदिकः ॥

१२९२-चारों (तदस्मिन्नस्तीति देश तन्नाम्नि १, तेन निर्वृत्तम् २, तस्य निवासः ३, अदूरभवश्च ४) अर्थोंमें अरीहणादि सप्तदश शब्दोंके उत्तर क्रमसे वुञ् आदि सप्तदश प्रत्यय हों, अर्थात् अरीहणादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे-अरीहणेन निर्वृत्तम्-आरीहणकम् । कृशाश्वादि शब्दोंके उत्तर छण् प्रत्यय हो,-जैसे-कार्शाश्वीयम् । ऋश्यादि शब्दोंके उत्तर क प्रत्यय हो, जैसे-ऋश्यकम् । कुमुदादि शब्दोंके उत्तर ठच् प्रत्यय हो, जैसे-कुमुदिकम् । काशादि शब्दोंके उत्तर इल प्रत्यय हो, जैसे-काशिलः । तृणादि शब्दोंके उत्तर स प्रत्यय हो, जैसे-तृणसम् । प्रेक्षादि शब्दोंके उत्तर इनि प्रत्यय हो, जैसे-प्रेक्षी । अश्मादि शब्दोंके उत्तर र प्रत्यय हो, जैसे-अश्मरः । सख्यादि शब्दोंके उत्तर ढञ् प्रत्यय हो, जैसे-साखेयम् । सङ्काशादि शब्दोंके उत्तर ण्य प्रत्यय हो, जैसे-साङ्काश्यम् । बलादि शब्दोंके उत्तर य प्रत्यय हो, जैसे-बल्यम् । पक्षादि शब्दोंके उत्तर फक् प्रत्यय हो, जैसे-पाक्षायणः । पथिन् शब्दके स्थानमें पंथ आदेश और फक् प्रत्यय हो, जैसे-पान्थायनः । कर्णादि शब्दोंके उत्तर फिञ् प्रत्यय हो, जैसे-कार्णायनिः । सुतंगमादि शब्दोंके उत्तर इञ् प्रत्यय हो, जैसे-सौतङ्गमिः । प्रगद्यादि शब्दोंके उत्तर ञ्य प्रत्यय हो, जैसे-प्रागद्यः । वराहादि शब्दोंके उत्तर कक् प्रत्यय हो, जैसे-वाराहकः । कुमुदादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे-कौमुदिकः ॥

१२९३ जनपदे लुप् । ४ । २ । ८१ ॥

जनपदे वाच्ये चातुरर्थिकस्य लुप्स्यात् ॥

१२९३-जनपद अर्थ वाच्य होनेपर चातुरर्थिक प्रत्ययका लुप् हो-॥

१२९४ लुपि युक्तवद्व्यक्तिवचने ।१।२।५१॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ॥

१२९४-(साधारणतः विशेषणके, विशेष्यके लिङ्ग और वचनके समान लिङ्ग और वचन होतेहैं, परन्तु इस स्थानमें उस नियमका परिहार करतेहैं-) प्रत्ययका लुप् होनेपर प्रकृतिके समान लिङ्ग और वचन हों, अर्थात् विशेष्यानुरोधसे विशेषण अपने लिंग और वचनका परित्याग न करे, जैसे-पाञ्चालानां निवासो जनपदः=पञ्चालाः । कुरवः । अङ्गाः । वङ्गाः । कलिङ्गाः ॥

१२९५ तदशिष्यं संज्ञाप्रमाणत्वात् । १ । २ । ५३ ॥

युक्तवद्वचनं न कर्तव्यं संज्ञानां प्रमाणत्वात् ॥

१२९५-पूर्व आचार्योंके अनुरोधसे "लुपि युक्तवद्व्यक्तिवचने" इस प्रकार सूत्र कियाहै, परन्तु सम्प्रति इस सूत्रका प्रत्याख्यान करतेहैं, कारण कि, लोकमें व्यवहृत संज्ञाको प्रामाण्य होनेसे जैसी संज्ञा लोकमें व्यवहृत होगी वैसी ही साधु होगी अङ्गाः, वङ्गाः, कलिङ्गाः-इत्यादि बहुवचनान्त ही जनपदकी संज्ञा हैं, इसके लिये प्रकृतिवत् लिङ्गवचनविधान करना उचित नहीं है, इसलिये 'आपो दाराः' इत्यादि स्थलमें शास्त्रसे लिङ्ग, संख्याके विधान नहीं किये जातेहैं ॥

१२९६ लुब्योगाऽप्रख्यानात् ।१।२।५४॥

लुबपि न कर्तव्योऽवयवार्थस्येहाप्रतीतेः ॥

१२९६-उपजीवक युक्तवद्वचनका प्रत्याख्यान करके अब उपजीव्य लुब्विधानका प्रत्याख्यान करतेहैं कि, चातुरर्थिक प्रत्ययके लुप्का विधान नहीं करना चाहिये, कारण कि, इस स्थानमें अवयवार्थ, अर्थात् यौगिक अर्थकी प्रतीति नहीं होतीहै । आशय यह है कि, पाञ्चालादि शब्द जैसे क्षत्रियमें रूढ हैं, वैसे जनपदमें भी रूढ हैं, इसलिये "तस्य निवासः" "अदूरभवश्च" इनसे तद्धितोत्पत्ति हो ही नहीं सकती है, फिर उसका लुप्विधान करना व्यर्थ है ॥

१२९७ योगप्रमाणे च तदभावेऽदर्शनं स्यात् । १ । २ । ५५ ॥

यदि हि योगस्यावयवार्थस्येदं बोधकं स्यात्तदा तदभावे न दृश्येत ॥

१२९७-प्रत्ययके स्वीकार होनेपर उसके विषयमें भी कहतेहैं कि, यदि कहो कि, इस स्थानमें योगार्थका बोध होताहै अर्थात् पञ्चाल शब्दसे क्षत्रियका निवास जिस स्थानमें हो, उसको 'पञ्चालाः' कहतेहैं, ऐसे यौगिकार्थका बोध होताहै तो, जिस स्थानमें प्रत्ययका लुप् होगा, उस स्थानमें यौगिकार्थका बोध नहीं होगा अर्थात् पञ्चाल शब्दसे क्षत्रियका निवासस्थान इस अर्थका बोध नहीं होगा ॥

१२९८ प्रधानप्रत्ययार्थवचनमर्थस्याऽन्यप्रमाणत्वात् । १ । २ । ५६ ॥

प्रत्ययार्थः प्रधानमित्येवंरूपं वचनमप्यशिष्यम् । कुतः । अर्थस्य लोकत एव सिद्धेः ॥

१२९८-प्रकृत्यर्थ और प्रत्ययार्थके मध्यमें प्रत्ययार्थको प्राधान्य है, ऐसा वचन भी नहीं करना चाहिये, कारण कि, प्रत्ययार्थप्रधानविषयक बोधकी लोकहीसे सिद्धि है ॥

१२९९ कालोपसर्जने च तुल्यम् । १ । २ । ५७ ॥

अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः । विशेषणमुपस-

र्जनमित्यादि पूर्वाचार्यैः परिभाषितं तत्राप्यशिष्यत्वं समानं लोकप्रसिद्धेः ॥

१२९९—'बीती हुई रात्रिके शेषार्द्धसे और आगामिनी रात्रिके प्रथमार्द्धसे युक्त जो दिन, उसको अद्यतन कहतेहैं' 'विशेषण अप्रधान होताहै' इत्यादि पूर्वाचार्य्योंके कहे हुए वचन भी नहीं करने चाहियें, कारण कि, वह सब लोकमें प्रसिद्ध हैं ॥

१३०० विशेषणानां चाऽजातेः ।१।२।५२॥

लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा । पञ्चाला रमणीयाः । गोदौ रमणीयौ । अजातेः किम् । पञ्चाला जनपदः । गोदौ ग्रामः ॥ हरीतक्यादिषु व्यक्तिः ॥ * ॥ हरीतक्याः फलानि हरीतक्यः ॥ खलतिकादिषु वचनम् ॥ * ॥ खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि ॥ मनुष्यलुपि प्रतिषेधः ॥ * ॥ मनुष्यलक्षणे लुबर्थे विशेषणानां न । लुबन्तस्य तु भवतीत्यर्थः । चञ्चा अभिरूपः ॥

१३००—जिस प्रत्ययका लुप् हुआ है, तदर्थभूत जो विशेष्य पद, उसके जो विशेषण, उनके भी विशेष्यके समान ही लिङ्ग और वचन हों, अर्थात् विशेष्यके जैसे लिङ्गादि हों विशेषणके भी वैसे ही लिङ्गादि हों, परन्तु जातिवाचक शब्दके नहीं हों, जैसे पञ्चालाः रमणीयाः । गोदौ रमणीयौ । जातिवाचक होनेपर विशेषण, विशेष्यके लिङ्ग वचनके भागी नहीं होंगे, जैसे—पञ्चाला जनपदः । गोदौ ग्रामः ।

हरीतकी आदि शब्दोंमें प्रकृतिवत् लिङ्ग हो अर्थात् विशेषण, विशेष्यलिङ्गका भागी न हो * जैसे— हरीतक्याः फलानि=हरीतक्यः ।

खलतिकादि शब्दोंमें प्रकृतिवत् वचन हो, अर्थात् विशेष्यानुरूप वचन न हो * जैसे—खलतिकस्य पर्वतस्य अदूरभवानि=खलतिकं वनानि ।

लुबर्थ मनुष्य होनेपर विशेष्यके समान विशेषणका लिङ्ग और वचन न हो, परन्तु लुबन्तके प्रकृतिवत् लिङ्ग, वचन हों* जैसे—चञ्चा अभिरूपः ॥

१३०१ वरणादिभ्यश्च ।४।२।८२॥

अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणा ॥

१३०१—वरणादि शब्दोंके उत्तर चातुरर्थिक प्रत्ययका लुप् हो, अजनपदार्थ इस सूत्रका आरंभ है, अर्थात् जनपदवाचक शब्दके अतिरिक्त शब्दसे चातुरर्थिक प्रत्ययका लुप् हो इस लिये यह सूत्र है, जैसे—वरणानामदूरभवं नगरम्=वरणाः ॥

१३०२ शर्कराया वा ।४।२।८३॥

अस्माच्चातुरर्थिकस्य वा लुप्स्यात् ॥

१३०२—शर्करा शब्दके उत्तर चातुरर्थिक प्रत्ययका विकल्प करके लुप् हो ॥

१३०३ ठक्छौ च ।४।२।८४॥

शर्करायां एतौ स्तः । कुमुदादौ वराहादौ च पाठसामर्थ्यात्पक्षे ठच्ककौ । वाग्रहणसामर्थ्यात्पक्षे औत्सर्गिकोऽण्, तस्य लुब्विकल्पः । षड् रूपाणि । शर्करा । शार्करम् । शार्करिकम् । शर्करीयम् । शर्करिकम् । शार्करकम् ॥

१३०३—शर्करा शब्दके उत्तर ठक् और छ प्रत्यय हों । कुमुदादि गण (१२९२) और वराहादि (१२९२) गणमें शर्करा शब्दके पाठके सामर्थ्यसे ठच् और कक् प्रत्यय होंगे, पूर्व सूत्रसे विकल्पसे लुप्के विधानके कारण पक्षमें औत्सर्गिक अण् प्रत्यय होगा, उस अण् प्रत्ययका विकल्प करके लुप् होगा, इस प्रकार शर्करा शब्दके छः रूप होंगे, जैसे—शर्करा, शार्करम्, शार्करिकम्, शर्करीयम्, शर्करिकम्, शार्करकम् ॥

१३०४ नद्यां मतुप् ।४।२।८५॥

चातुरर्थिकः । इक्षुमती ॥

१३०४—नदी वाच्य होनेपर चातुरर्थिक मतुप् प्रत्यय हो, जैसे—इक्षुमती ॥

१३०५ मध्वादिभ्यश्च ।४।२।८६॥

मतुप् स्याच्चातुरर्थिकः । अनद्यर्थ आरम्भः । मधुमान् ॥

१३०५—मधु आदि शब्दोंके उत्तर चातुरर्थिक मतुप् प्रत्यय हो; नदीवाचकसे भिन्न स्थलमें भी मतुप् प्रत्यय होनेके लिये यह सूत्रारम्भ हुआ है, जैसे—मधुमान् ॥

१३०६ कुमुदनडवेतसेभ्यो ड्मतुप् ।४।२।८७॥

कुमुद्वान् । नड्वान् । वेतस्वान् । आद्ययोर्झय इति अन्त्ये मादुपधाया इति वक्ष्यमाणेन वः ॥ महिषाच्चेति वक्तव्यम् ॥ * ॥ महिष्मान्नाम देशः ॥

१३०६—कुमुद, नड और वेतस् शब्दके उत्तर ड्मतुप् प्रत्यय हो, जैसे—कुमुद्वान् । नड्वान् । वेतस्वान् । आद्य दोनों अर्थात् कुमुद और नड शब्दके उत्तर जो मतुप् प्रत्ययका मकार उसके स्थानमें "झयः १८९८"—इस वक्ष्यमाण सूत्रसे व आदेश और अन्त्यस्थित जो वेतस् शब्द उसके उत्तर मतुप्के मकारको "मादुपधायाः१८१७" इस वक्ष्यमाण सूत्रसे व हुआ ।

महिष शब्दसे भी ड्मतुप् हो* जैसे—महिष्मान् नाम देशः ॥

१३०७ नडशादाड्ड्वलच् ।४।२।८८॥

नड्वलः । शादो जम्बालघासयोः । शाद्वलः ॥

१३०७—नड और शाद शब्दके उत्तर ड्वलच् प्रत्यय हो, जैसे—नड्वलः । शाद शब्दसे जम्बाल और घास जानना । शाद्वलः ॥

१३०८ शिखाया वलच् ।४।२।८९॥

शिखावलम् ॥

१३०८-शिखा शब्दसे वलच् प्रत्यय हो, जैसे-शिखावलम् ॥

१३०९ उत्करादिभ्यश्छः । ४।२।९०॥

उत्करीयः ॥

१३०९-उत्करादि शब्दोंके उत्तर छ प्रत्यय हो, जैसे-उत्करीयः ॥

१३१० नडादीनां कुक् च ।४।२।९१॥

नडकीयम् ॥ कुञ्चाह्रस्वत्वं च ॥ * ॥ कुञ्चकीयः ॥ तक्षन्नलोपश्च ॥ तक्षकीयः ॥

१३१०-नडादि शब्दोंको कुक्का आगम और छ प्रत्यय हो, जैसे-नडकीयम् ।

कुञ्चा शब्दको कुक्का आगम और छ प्रत्यय और कुञ्चाको ह्रस्वत्व हो* जैसे-कुञ्चकीयः ।

तक्षन् शब्दको कुक्का आगम और छ प्रत्यय और नकारका लोप हो* जैसे-तक्षकीयः ॥

१३११ बिल्वकादिभ्यश्छस्य लुक् । ६ । ४ । १५३ ॥

नडाद्यन्तर्गता बिल्वकादयस्तेभ्यश्छस्य लुक् तद्धिते परे । बिल्वा यस्यां सन्ति सा बिल्वकीया तस्यां भवा बैल्वकाः । वेत्रकीयाः । वैत्रकाः । छस्य किम् । छमात्रस्य लुग्यथा स्यात्कुको निवृत्तिर्मा भूत् । अन्यथा सन्नियोगशिष्टानामिति कुगपि निवर्तेत । लुग्ग्रहणं सर्वलोपार्थं लोपोऽपि यमात्रस्य स्यात् ॥

॥ इति चातुरर्थिकाः ॥

१३११-नडादिके अन्तर्गत जो बिल्वकादि शब्द, उनके उत्तर तद्धित प्रत्यय परे रहते छ प्रत्ययका लुक् हो, जैसे-बिल्वा यस्यां सन्ति सा=बिल्वकीया, तस्यां भवाः=बैल्वकाः । इसी प्रकार-वेत्रकीयाः । वैत्रकाः ।

इस सूत्रमें छ प्रत्ययका ग्रहण क्यों किया ? तो बिल्वकादि शब्दोंके उत्तर जो प्रत्यय, केवल उसका ही लुक् हो और कुक्की निवृत्ति नहीं हो । यदि छ प्रत्ययका लुक् हो, ऐसा न कहकर प्रत्ययमात्रका लुक् कहते तो "सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः" इस न्यायसे प्रत्ययकी निवृत्ति होनेसे सन्नियोगशिष्ट कुक् भी निवृत्त हो जाता । लोपकी अनुवृत्ति न करके इस सूत्रमें लुक्का ग्रहण सर्वलोपके निमित्त है, नहीं तो लोपकी अनुवृत्ति करनेसे केवल यकारहीका लोप होता ॥

॥ इति चातुरर्थिकप्रकरणम् ॥

अथ शैषिकप्रकरणम् ।

१३१२ शेषे । ४ । २ । ९२ ॥

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राऽणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । उलूखले क्षुण्णः औलूखलो यावकः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । शेष इति लक्षणं चाधिकारश्च । तस्य विकार इत्यतः प्राक् शेषाधिकारः ॥

१३१२-तद्धितमें अपत्य आदि चतुरर्थ्यन्त जो २ अर्थ हैं उनसे जो अन्य (अर्थात् विशेष रूपसे भासमान) अर्थ उनका नाम शेष है, उस शेष अर्थमें अणादि प्रत्यय हों, यथा-चक्षुषा गृह्यते=चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टाः=दार्षदाः सक्तवः । उलूखले क्षुण्णः-औलूखलः यावकः । अश्वैरुह्यते=आश्वो रथः । चतुर्भिरुह्यते=चातुरं शकटम् । चतुर्दश्यां दृश्यते=चातुर्दशं रक्षः । "शेषे" यह लक्षण और अधिकार भी है । "तस्य विकारः" इस सूत्रके पूर्वपर्यन्त इस सूत्रका अधिकार अर्थात् शेषाधिकार चलेगा ॥

१३१३ राष्ट्रावारपाराद्घखौ ।४।२।९३॥

आभ्यां क्रमाद्घखौ स्तः शेषे । राष्ट्रियः । अवारपारीणः ॥ अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् ॥ * ॥ अवारीणः । पारीणः । पारावारीणः । इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ॥

१३१३-शेषार्थमें राष्ट्र और अवारपार शब्दके उत्तर यथाक्रम घ और ख प्रत्यय हो, जैसे-राष्ट्रियः । अवारपारीणः ।

विगृहीत अवारपार शब्द अर्थात् अवार और पार शब्दसे और विपरीत अवारपार शब्द अर्थात् पारावार शब्दसे भी ख प्रत्यय हो* जैसे-अवारीणः । पारीणः।पारावारीणः । इस गणमें प्रकृतिविशेषसे घआदि ट्युट्युलन्त प्रत्यय उक्त होतेहैं, उन प्रत्ययोंका जात आदि अर्थविशेष और समर्थ विभक्ति कही जायँगी ॥

१३१४ ग्रामाद्यखञौ । ४ । २।९४॥

ग्राम्यः । ग्रामीणः ॥

१३१४-शेषार्थमें ग्राम शब्दके उत्तर य और खञ् प्रत्यय हो, जैसे-ग्रामे जातो भवो वा=ग्राम्यः । ग्रामीणः ॥

१३१५ कत्त्र्यादिभ्यो ढकञ् ।४।२।९५॥

कुत्सितास्त्रयः कत्त्रयः तत्र जातादिः कात्त्रेयकः । नागरेयकः । ग्रामादित्यनुवृत्तेः-ग्रामेयकः॥

१३१५–कत्त्र्यादि शब्दोंके उत्तर ढकञ् प्रत्यय हो, जैसे–कुत्सितास्त्रयः=कत्त्रयः,तत्र जातादिः=कात्त्रेयकः। नागरेयकः। इस सूत्रमें ग्राम शब्दकी अनुवृत्तिके कारण'ग्रामेयकः' ऐसा पद सिद्ध हुआ ॥

१३१६ कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु । ४ । २ । ९६ ॥

कौलेयकः श्वा । कौलोऽन्यः । कौक्षेयकोऽसिः । कौक्षोऽन्यः । ग्रैवेयकोऽलंकारः । ग्रैवोऽन्यः ॥

१३१६–कुल, कुक्षि और ग्रीवा शब्दके उत्तर क्रमसे श्वा, असि और अलंकार अर्थ होनेपर ढकञ् प्रत्यय हो, जैसे–कौलेयकः श्वा। अन्यार्थमें कौलः। कौक्षेयकः असिः ।अन्यार्थमें कौक्षः। ग्रैवेयकः अलंकारः। अन्यार्थमें ग्रैवः ॥

१३१७ नद्यादिभ्यो ढक्।४।२।९७॥

नादेयम् । माहेयम् । वाराणसेयम् ॥

१३१७–जातादि अर्थमें नदी आदि शब्दोंके उत्तर ढक् प्रत्यय हो, जैसे–नादेयम्। माहेयम्। वाराणसेयम् ॥

१३१८ दक्षिणापश्चात्पुरसस्त्यक् । ४ । २ । ९८ ॥

दक्षिणेत्याजन्तमव्ययम । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः ॥

१३१८–दक्षिणा, पश्चात् और पुरस् शब्दके उत्तर त्यक् प्रत्यय हो, 'दक्षिणा' यद पद आच्प्रत्ययान्त अव्यय है, जैसे–दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः ॥

१३१९ कापिश्याः ष्फक् । ४ ।२।९९ ॥

कापिश्यां जातादि कापिशायनं मधु। कापिशायनी द्राक्षा ॥

१३१९–जातादि अर्थमें कापिशी शब्दके उत्तर ष्फक् प्रत्यय हो, जैसे–कापिश्यां जातादि=कापिशायनं मधु। कापिशायनी द्राक्षा ॥

१३२० रंकोरमनुष्येऽण् च।४।२।१००॥

चात् ष्फक्। रांकवो गौः । रांकवायणः। अमनुष्ये इति किम् । रांकवको मनुष्यः ॥

१३२०–मनुष्यसे भिन्न अर्थ होनेपर रंकु शब्दके उत्तर अण् प्रत्यय और चकारसे ष्फक् प्रत्यय हो, जैसे–राङ्कवो गौः। राङ्कवायणः। मनुष्यार्थ होनेपर रांकवको मनुष्यः ॥

१३२१ द्युप्रागपागुदक्प्रतीचो यत् । ४ । २ । १०१ ॥

दिव्यम् । प्राच्यम् । अपाच्यम् । उदीच्यम् । प्रतीच्यम ॥

१३२१–जातादि अर्थमें दिव्, प्राच्, अपाच्, उदच् और प्रतीच् शब्दके उत्तर यत् प्रत्यय हो,जैसे–दिवि भवम्=दिव्यम्। प्राचि भवम्=प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम् ॥

१३२२ कन्थायाष्ठक् ।४।२।१०२॥

कान्थिकः ॥

१३२२–जातादि अर्थमें कन्था शब्दके उत्तर ठक् प्रत्यय हो, जैसे–कान्थिकः ॥

१३२३ वर्णौ वुक् । ४ । २ । १०३ ॥

वर्णुर्नदस्तस्य समीपदेशो वर्णुः, तद्विषयार्थवाचिकन्थाशब्दाद्वुक् स्यात् । यथा हि जातं हिमवत्सु कान्थकम् ॥

१३२३–वर्णुनामक नद है,उसके समीपका देश भी वर्णु कहाता है, तद्विषयार्थवाची कन्था शब्दसे वुक् प्रत्यय हो, यथा–"यथा हि जातं हिमवत्सु कान्थकम् " ॥

१३२४ अव्ययात्त्यप् । ४ । २।१०४॥

अमेहक्वतसित्रेभ्य एव ॥ * ॥ अमान्तिकसहार्थयोः । अमात्यः । इहत्यः । क्वत्यः। ततस्त्यः । तत्रत्यः । परिगणनं किम् । उपरिष्टाद्भव औपरिष्टः ॥ अव्ययानां भमात्रे टिलोपः ॥ * ॥ अनित्योऽयं बहिषष्टिलोपविधानात् । तेनेह न । आरातीयः ॥ त्यब्नेर्ध्रुव इति वक्तव्यम् ॥ * ॥ नित्यः ॥निसो गते॥*॥

१३२४–अव्ययसंज्ञक शब्दके उत्तर त्यप् प्रत्यय हो। अमा, इह, क्व, तस् और त्रल्प्रत्ययान्त अव्यय शब्दोंके उत्तर ही त्यप् प्रत्यय हो * ।

'अमा' यह अव्यय शब्द अन्तिकार्थक और सहार्थक है, जैसे–अमात्यः। इहत्यः । क्वत्यः। ततस्त्यः। तत्रत्यः।

परिगणन क्यों किया ? तो उपरिष्टाद्भवः, इस विग्रहमें 'औपरिष्टः' यहां त्यप् न हो।

अव्ययकी भ–संज्ञामात्रमें टिका लोप हो * बहिष् शब्दके टिलोपविधानके कारण यह टिलोपविधि अनित्य है, इस कारण इस स्थानमें टिलोप नहीं हुआ, जैसे–आरातीयः।

निश्चयार्थमें नि उपसर्गके उत्तर त्यप् प्रत्यय हो*जैसे–नित्यः।

निस् उपसर्गके परे गत अर्थमें त्यप् प्रत्यय हो–* ।

१३२५ ह्रस्वात्तादौ तद्धिते।८।३।१०१॥

ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते । निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चाण्डालादिः ॥ अरण्याण्णः ॥ * ॥ आरण्याः सुमनसः ॥ दूरादेत्यः ॥ * ॥ दूरेत्यः ॥ उत्तरादाहञ् ॥ * ॥ औत्तराहः ॥

१३२५–तकारादि तद्धित प्रत्यय परे रहते ह्रस्व इणके परे स्थित सकारको षत्व हो, जैसे–निर्गतो वर्णाश्रमेभ्यः, इस विग्रहमें निष्ट्यः–चाण्डालादिः।

अरण्य शब्दके उत्तर ण प्रत्यय हो * जैसे. आरण्याः सुमनसः।

दूर शब्दके उत्तर एत्य प्रत्यय हो * जैसे–दूरेत्यः।

उत्तर शब्दके उत्तर आहञ् प्रत्यय हो * जैसे–औत्तराहः॥

१३२६ ऐषमोह्यःश्वसोऽन्यतरस्याम् । ४ । २ । १०५ ॥

एभ्यस्त्यब्वा । पक्षे वक्ष्यमाणौ ट्यु ऐषमस्त्यम् । ऐषमस्तनम् । ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । पक्षे । शौवस्तिकं वक्ष्यते॥

१३२६–ऐषमस्, ह्यस् और श्वस् शब्दके उत्तर विकल्प करके त्यप् प्रत्यय हो, पक्षमें वक्ष्यमाण ट्यु और ट्युल् प्रत्यय होगा, जैसे–ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । पक्षमें 'शौवस्तिकम्' ऐसा रूप कहेंगे ॥

१३२७ तीररूप्योत्तरपदादञ्ञौ । ४ । २ । १०६ ॥

यथासंख्येन । काकतीरम् । पाल्वलतीरम् । शैवरूप्यम् । तीररूप्यान्तादिति नोक्तम् । बहुच्पूर्वान्मा भूत् । बाहुरूप्यम् ॥

१३२७–तीर शब्द और रूप्य शब्द उत्तर पद हैं जिनके ऐसे शब्दोंके उत्तर यथाक्रम अञ् और ञ प्रत्यय हो, जैसे–काकतीरम् । पाल्वलतीरम् । शैवरूप्यम् ।

तीरशब्दान्त और रूप्यशब्दान्त प्रातिपदिकोंके उत्तर उक्त प्रत्यय हों, ऐसे न कहकर तीर शब्द और रूप्य शब्द उत्तरपद हैं जिनके ऐसे शब्दोंके उत्तर उक्त प्रत्यय हों, ऐसा क्यों कहा? तो जिस स्थानमें बहुच् प्रत्यय होगा उस स्थानमें तीर शब्द अथवा रूप्य शब्द अन्तस्थित होगा, क्योंकि, बहुच् प्रत्यय प्रकृतिके पूर्वमें ही होताहै, उस स्थानमें अञ् अथवा ञ प्रत्यय नहीं हो,जैसे–'बाहुरूप्यम्' इस स्थानमें ञ प्रत्यय नहीं हुआ ॥

१३२८ दिक्पूर्वपदादसंज्ञायां ञः । ४ । २ । १०७ ॥

अणोपवादः । पौर्वशालः । असंज्ञायां किम् । संज्ञाभूतायाः प्रकृतेर्मा भूत् । पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः । प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः ॥

१३२८–दिग्वाचक शब्द जिसका पूर्वपद है, ऐसे प्रातिपदिकके उत्तर संज्ञा न होनेपर ञ प्रत्यय हो,यह ञ प्रत्यय अण् प्रत्ययका विशेषक है, जैसे–पौर्वशालः ।

संज्ञा न होनेपर ऐसा क्यों कहा ? तो संज्ञाभूत प्रातिपदिकके उत्तर ञ प्रत्यय नहीं हो, जैसे–पूर्वेषुकामशम्यांभवः= पूर्वेषुकामशमः यहां " प्राचां ग्रामनगराणाम् १४४०" इस सूत्रसे उत्तरपदकी वृद्धि हुई है ॥

१३२९ मद्रेभ्योऽञ् । ४ । २ । १०८ ॥

दिक्पूर्वपदादित्येव । दिशोऽमद्राणामिति मद्रपर्युदासादादिवृद्धिः । पौर्वमद्रः ।आपरमद्रः ।

१३२९–जिसके पूर्वमें दिग्वाचक शब्द है, ऐसे मद्र शब्दके उत्तर अञ् प्रत्यय हो, "दिशोऽमद्राणाम् १३९९" इस सूत्रमें मद्र शब्दके पर्युदासके कारण आदि अच्की वृद्धि हुई,जैसे–पौर्वमद्रः । आपरमद्रः ॥

१३३० उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् । ४ । २ । १०९ ॥

अञ् स्यात् । शैवपुरम् ॥

१३३०–इस सूत्रमें 'दिक्पूर्वपदात्' यह निवृत्त हुआ । बहुत स्वरसे युक्त अन्तोदात्त उदीच्यग्रामवाचक शब्दके उत्तर अञ् प्रत्यय हो, जैसे–शैवपुरम् ॥

१३३१ प्रस्थोत्तरपदपलद्यादिकोपधादण् । ४ । २ । ११० ॥

माहिकिप्रस्थः । पालदः । नैलीनकः ॥

१३३१–प्रस्थ शब्द उत्तर पद है जिसके ऐसे प्रातिपदिक, पलदी आदि शब्द और ककारोपध प्रातिपदिकके उत्तर अण् प्रत्यय हो, जैसे–माहिकिप्रस्थः । पालदः । नैलीनकः ॥

१३३२ कण्वादिभ्यो गोत्रे ।४।२।१११॥

एभ्यो गोत्रप्रत्ययान्तेभ्योऽण् स्यात् । कण्वो गर्गादिः । काण्व्यस्य छात्राः काण्वाः ॥

१३३२–गोत्रप्रत्ययान्त कण्वादि शब्दोंके उत्तर अण् प्रत्यय हो, कण्व शब्द गर्गादि गणमें पठित है, जैसे–काण्व्यस्य च्छात्राः, इस विग्रहमें–काण्वाः ॥

१३३३ इञश्च । ४ । २ । ११२ ॥

गोत्रे य इञ् तदन्तादण् स्यात् । दाक्षाः । गोत्रे किम् । सौतङ्गमेरिदं सौतङ्गमीयम् । गोत्रमिह शास्त्रीयं न तु लौकिकम् । तेनेह न । पाणिनीयम् ॥

१३३३–गोत्रार्थमें जो इञ् प्रत्यय,तदन्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, जैसे–दाक्षाः ।

गोत्रार्थ न होनेपर इञ् नहीं होगा । जैसे–सौतङ्गमेरिदम्= सौतङ्गमीयम् ।

इस स्थलमें गोत्र शास्त्रीय है, लौकिक नहीं है अर्थात् शास्त्रमें पौत्रादि अपत्यको गोत्र कहतेहैं वही इस सूत्रमें गोत्र जानना, किन्तु लौकिक गोत्र नहीं, इसलिये यहां नहीं हुआ, जैसे–पाणिनीयम् ।

१३३४ न द्व्यचः प्राच्यभरतेषु । ४ । २ । ११३ ॥

इञश्चेत्यणोऽपवादः । प्राष्ठीयाः । काशीयाः । भरतानां प्राच्यत्वेऽपि पृथगुपादानमन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिंगम् ॥

१३३४–दो स्वरोंसे युक्त शब्दके उत्तर प्राच्य और भरत गोत्र रहते गोत्रार्थमें जो इञ् प्रत्यय, तदन्तके उत्तर अण् प्रत्यय न हो, यह सूत्र "इञश्च १३३३" इस सूत्रसे विहित अण् प्रत्ययका निषेधक है, जैसे–प्राष्ठीयाः । काशीयाः ।

भरतोंके प्राच्यत्व होनेपर भी इस स्थानमें पृथक् ग्रहणके कारण अन्य किसी स्थलमें प्राच्य शब्दका ग्रहण करनेपर भरतोंका ग्रहण नहीं होगा ॥

१३३५ वृद्धिर्यस्याचामादिस्तद्वृद्धम् । १।१।७३॥

यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद् वृद्धसंज्ञं स्यात् ॥

१३३५–जिस समुदायके अचोंके मध्यमें आद्यच् वृद्धि हो वह वृद्धसंज्ञक हो ॥

१३३६ त्यदादीनि च । १ । १ ।७४ ॥

वृद्धसंज्ञानि स्युः ॥

१३३६–त्यदादि भी वृद्धसंज्ञक हों ॥

१३३७ वृद्धाच्छः । ४ । २ । ११४ ॥

शालीयः । मालीयः । तदीयः ॥

१३३७–वृद्धसंज्ञक शब्दके उत्तर छ प्रत्यय हो, जैसे–शालीयः । मालीयः । तदीयः ॥

१३३८ एङ् प्राचां देशे । १।१।७५॥

एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने । एणीपचनीयः । गोनर्दीयः । भोजकटीयः । पक्षे अणि । ऐणीपचनः । गौनर्दः । भौजकटः । एङ् किम् । आहिच्छत्रः । कान्यकुब्जः ॥ वा नामधेयस्य वृद्धसंज्ञा वक्तव्या॥*॥ देवदत्तीयः । दैवदत्तः ॥

१३३८–देश अर्थमें अचोंके मध्यमें एङ् (ए ओ) जिसके आदिमें है, उसकी विकल्प करके वृद्धसंज्ञा हो, जैसे–एणीपचनीयः । गोनर्दीयः । भोजकटीयः । विकल्प पक्षमें अण् प्रत्यय होगा, जैसे–ऐणीपचनः । गौनर्दः । भौजकटः ।

एङ् आदिमें न होनेपर वृद्ध संज्ञा नहीं होगी, जैसे–आहिच्छत्रः । कान्यकुब्जः ।

नामधेयवाचक शब्दकी विकल्प करके वृद्ध संज्ञा हो * जैसे–देवदत्तीयः, दैवदत्तः ॥

१३३९ भवतष्ठक्छसौ ।४।२।११५॥

वृद्धाद्भवत एतौ स्तः । भावत्कः । जश्त्वम् । भवदीयः । वृद्धादित्यनुवृत्तेः शत्रन्तादणेव । भावतः ॥

१३३९–वृद्धसंज्ञक भवत् शब्दके उत्तर ठक् और छस् प्रत्यय हो, जैसे–भावत्कः । स् प्रत्ययमें सकारकी इत् संज्ञा होनेके कारण पूर्वपदकी "सिति च १ । ४ । १६ " इससे पदसंज्ञा होनेपर जश्त्व हुआ, जैसे–भवदीयः 'वृद्धात्' इस पदकी अनुवृत्ति होनेसे शतृप्रत्ययान्तके उत्तर अण् प्रत्यय ही होगा, जैसे–भावतः ॥

१३४० काश्यादिभ्यष्ठञ्ञिठौ । ४ । २ । ११६ ॥

इकार उच्चारणार्थः । काशिकी । काशिका । वैदिकी । वैदिका ॥ आपदादिपूर्वपदात्कालान्तात् ॥ * ॥ आपदादिराकृतिगणः । आपत्कालिकी । आपत्कालिका ॥

१३४०–काश्यादि शब्दके उत्तर ठञ् और ञिठ् प्रत्यय हो, ञिठ् प्रत्ययका इकार उच्चारणार्थ है, जैसे–काशिकी, काशिका । वैदिकी, वैदिका ।

आपदादि शब्द पूर्वमें है और काल शब्द अन्तमें है जिसके ऐसे प्रातिपदिकके उत्तर ठञ् और ञिठ् प्रत्यय हो * आपदादि आकृतिगण है । जैसे–आपत्कालिकी, आपत्कालिका ॥

१३४१ वाहीकग्रामेभ्यश्च ।४।२।११७॥

वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः । छस्यापवादः । कास्तीरं नाम वाहीकग्रामः । कास्तीरिकी । कास्तीरिका ॥

१३४१–वाहीकग्रामवाचक वृद्धसंज्ञक शब्दके उत्तर ठञ् और ञिठ् प्रत्यय हो । यह सूत्र छ प्रत्ययका अपवादक है । कास्तीरं नाम वाहीकग्रामः । कास्तीरिकी, कास्तीरिका ॥

१३४२ विभाषोशीनरेषु ।४।२।११८ ॥

एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः । सौदर्शनिकी । सौदर्शनिका । सौदर्शनीया ॥

१३४२–उशीनर देशमें जो ग्राम हैं, तद्वाचक वृद्धसंज्ञक शब्दके उत्तर विकल्प करके ठञ् और ञिठ् प्रत्यय हो, जैसे–सौदर्शनिकी, सौदर्शनिका, सौदर्शनीया ॥

१३४३ ओर्देशे ठञ् ।४।२।११९ ॥

उवर्णान्ताद्देशवाचिनष्ठञ् । निषादकर्षूः । नैषादकर्षुकः । केऽण इति ह्रस्वः । देशे किम् । पटोश्छात्राः पाटवाः । ञिठं व्यावर्तयितुं ठञ्ग्रहणम् । वृद्धाच्छं परत्वादयं बाधते । दाक्षिकर्षुकः ॥

१३४३–उवर्णान्त देशवाचक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–निषादकर्षू 'नैषादकर्षुकः' यहां "केऽणः ८३४" इस सूत्रसे ह्रस्व हुआहै । देशार्थ न होनेपर–पटोश्छात्राः= पाटवाः ऐसा पद होगा । ञिठ् प्रत्ययकी व्यावृत्तिके निमित्त सूत्रमें ठञ् प्रत्ययका ग्रहण कियाहै । यह सूत्र परत्वके कारण "वृद्धाच्छः" इस पूर्वोक्त सूत्रको बाधताहै, जैसे–दाक्षिकर्षुकः ॥

१३४४ वृद्धात्प्राचाम् ।४।२।१२० ॥

प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम् । आढकजम्बुकः । शाकजम्बुकः । नेह । मल्लवास्तु-माल्लवास्तवः ॥

१३४४–वृद्धसंज्ञक ही पूर्वदेशवाचक शब्दके उत्तर ठञ् प्रत्यय हो, ऐसे नियमके निमित्त यह सूत्र है, इससे पूर्वदेशवाचक वृद्धसंज्ञक ही शब्दके उत्तर ठञ् प्रत्यय होगा

अन्यत्र नहीं होगा, जैसे-आढकजम्बुकः । शाकजम्बुकः । मल्लवास्तुषे-माल्लवास्तवः इस स्थलमें नहीं हुआ ॥

१३४५ धन्वयोपधाद्वुञ् ।४।२।१२१॥

धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिना वृद्धाद्वुञ् स्यात् । ऐरावतं धन्व ऐरावतकः । सांकाश्यकाम्पिल्यशब्दौ वुञ्छणादिसूत्रेण ण्यान्तौ । सांकाश्यकः । काम्पिल्यकः ।

१३४५-धन्वविशेषवाचक शब्द और यकारोपध देशवाचक वृद्धसंज्ञक शब्दके उत्तर वुञ् प्रत्यय हों, जैसे-ऐरावतं धन्व=ऐरावतकम्।सांकाश्य और काम्पिल्य शब्द "वुञ्छण्० १२९२" इस सूत्रसे ण्यप्रत्ययान्त है, जैसे-सांकाश्यकः । काम्पिल्यकः ॥

१३४६ प्रस्थपुरवहान्ताच्च ।४।२।१२२॥

एतदन्ताद्वृद्धाद्देशवाचिनो वुञ् स्यात् । छस्यापवादः । मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । पुरान्तग्रहणमप्रागर्थम् । प्राग्देशे तूत्तरेण सिद्धम् ॥

१३४६-प्रस्थ,पुर और वह अन्तमें है जिनके ऐसे देशवाचक वृद्धसंज्ञक शब्दोंके उत्तर वुञ् प्रत्यय हो, यह वुञ् प्रत्यय छ प्रत्ययका विशेषक है, जैसे-मालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । पुरशब्दान्तका ग्रहण अप्रागर्थ अर्थात् पूर्वदेशवाचकसे भिन्नके अर्थ है, पूर्वदेशवाचक होनेपर तो वक्ष्यमाण "रोपधेतोः० १३४७" इस परवर्ती सूत्रसे वुञ् प्रत्यय सिद्ध है ॥

१३४७ रोपधेतोः प्राचाम् ।४।२।१२३॥

रोपधादीकारान्ताच्च प्राग्देशवाचिनश्च वृद्धाद्वुञ् स्यात् । पाटलिपुत्रकः । ऐतः । कान्दकः ॥

१३४७-रकारोपध और ईकारान्त पूर्वदेशवाचक वृद्धसंज्ञक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-पाटलिपुत्रकः । ईतः-कान्दकः ॥

१३४८ जनपदतदवध्योश्च ।४।२।१२४॥

जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ् स्यात् । आदर्शकः । त्रैगर्तकः ॥

१३४८-जनपदवाचक और उसकी अवधि अर्थात् 'सीमा' वाचक वृद्धसंज्ञक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-आदर्शकः । त्रैगर्तकः ॥

१३४९ अवृद्धादपि बहुवचनविषयात् । ४ । २ । १२५ ॥

अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ् स्यादवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्-आंगकः। अवृद्धाज्जनपदावधेः-आजमीढकः । वृद्धाज्जनपदात्-दार्वकः । वृद्धाज्जनपदावधेः-कालञ्जरकः । विषयग्रहणं किम् । एकशेषेण बहुत्वे मा भूत् । वर्तनी च वर्तनी च वर्तनी च वर्तन्यः, तासु भवो वार्तनः ॥

१३४९-अवृद्ध अथवा वृद्धसंज्ञक जनपदवाचक और उसकी अवधिवाचक बहुवचनविषयीभूत अर्थात् बहुवचनान्त प्रातिपदिकके उत्तर वुञ् प्रत्यय हो, अवृद्धसंज्ञकके उत्तर अण् प्रत्ययका और वृद्धसंज्ञकके उत्तर छ प्रत्ययका विशेषक यह सूत्र है ।

अवृद्धजनपदके उत्तर, जैसे-आङ्गकः । अवृद्धजनपदावधिके उत्तर, जैसे-आजमीढकः ।

वृद्धसंज्ञक जनपदवाचकके उत्तर, जैसे-दार्वकः। वृद्धसंज्ञक जनपदावधिकके उत्तर, जैसे-कालञ्जरकः ।

विषयग्रहण कहनेसे जिस स्थानमें एकशेषसे बहुत्व होगा उस स्थानमें नहीं होगा, जैसे-वर्तनी च वर्तनी च वर्तनी च वर्तन्यः, तासु भवः=वार्तनः ॥

१३५० कच्छाग्निवक्रवर्तोत्तरपदात् । ४ । २ । १२६ ॥

देशवाचिनो वृद्धादवृद्धाच्च वुञ् स्यात् । दारुकच्छकः । काण्डाग्नकः । सैन्धुवक्त्रकः । बाहुवर्तकः ॥

१३५०-कच्छ, अग्नि, वक्र और वर्त शब्द उत्तरपद हैं जिसके ऐसे देशवाचक वृद्धसंज्ञक वा अवृद्ध शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-दारुकच्छकः । काण्डाग्रकः । सैन्धुवक्रकः । बाहुवर्तकः ॥

१३५१ धूमादिभ्यश्च । ४ । २ । १२७॥

देशवाचिभ्यो वुञ् । धौमकः । तैर्थकः ॥

१३५१-देशवाचक धूमादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे-धौमकः । तैर्थकः ॥

१३५२ नगरात्कुत्सनप्रावीण्ययोः । ४ । २ । १२८ ॥

नगरशब्दाद्वुञ् स्यात्कुत्सने प्रावीण्ये च गम्ये। नागरकश्चौरः शिल्पी वा । कुत्सनेति किम् । नागरा ब्राह्मणाः ॥

१३५२-कुत्सन और प्रावीण्य अर्थ गम्यमान होनेपर नगर शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-नागरकः चौरः शिल्पी वा । कुत्सन अर्थ न होनेपर वुञ् प्रत्यय नहीं होगा, जैसे-नागरा ब्राह्मणाः ॥

१३५३ अरण्यान्मनुष्ये ।४।२।१२९॥

वुञ् । अरण्याण्ण इत्यस्यापवादः ॥ पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् ॥ ॥ * ॥ आरण्यकः पन्थाः अध्यायो न्यायो विहारो मनुष्यो हस्ती वा ॥ वा गोमयेषु ॥ * ॥ आरण्यकाः आरण्या वा गोमयाः ॥

१३५३-मनुष्यार्थ गम्यमान होनेपर अरण्य के उत्तर वुञ् प्रत्यय हो। यह सूत्र "अरण्याणः" इस वार्त्तिकका अपवाद है।

मार्ग, अध्याय, न्याय, विहार, मनुष्य और हस्ती इन अर्थोंमें अरण्य शब्दके उत्तर वुञ् प्रत्यय हो, ऐसा कहना चाहिये * जैसे-आरण्यकः,-पन्थाः अध्यायः न्यायः विहारः मनुष्यः हस्ती वा ।

गोमय अर्थ होनेपर अरण्य शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो * जैसे-आरण्यकाः, आरण्या वा गोमयाः ॥

१३५४ विभाषा कुरुयुगन्धराभ्याम्। ४ । २ । १३० ॥

वुञ् । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः ॥

१३५४-कुरु और युगन्धर शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो, जैसे-कौरवकः, कौरवः । यौगन्धरकः, यौगन्धरः ॥

१३५५ मद्रवृज्योः कन् । ४ । २।१३१॥

जनपदवुञोऽपवादः । मद्रेषु जातो मद्रकः । वृजिकः ॥

१३५५-मद्र और वृजि शब्दके उत्तर कन् प्रत्यय हो, यह कन् प्रत्यय जनपदवाचकसे विहित वुञ् प्रत्ययका विशेषक है, जैसे-मद्रेषु जातःमद्रकः । वृजिकः ॥

१३५६ कोपधादण् । ४ । २ । १३२॥

माहिषिकः ॥

१३५६-ककारोपध शब्दके उत्तर अण् प्रत्यय हो, जैसे-माहिषिकः ॥

१३५७ कच्छादिभ्यश्च । ४ । २ । १३३॥

देशवाचिभ्योऽण् । वुञादेरपवादः । काच्छः। सैन्धवः ॥

१३५७-देशवाचक कच्छादि शब्दोंके उत्तर अण् प्रत्यय हो। यह सूत्र देशवाचक शब्दके उत्तर विहित वुञ आदि प्रत्ययका अपवाद है, जैसे-काच्छः । सैन्धवः ॥

१३५८ मनुष्यतत्स्थयोर्वुञ्।४।२।१३४॥

कच्छाद्यणोऽपवादः । कच्छे जातादिः काच्छको मनुष्यः। काच्छकं हसितम् । मनुष्येति किम् । काच्छो गौः ॥

१३५८-मनुष्य और मनुष्यस्थित पदार्थ वाच्य रहते कच्छादि शब्दोंके उत्तर वुञ् प्रत्यय हो, यह सूत्र कच्छादि शब्दोंके उत्तर विहित अण् प्रत्ययका विशेषक है, जैसे-कच्छे जातादिः=काच्छकः अर्थात् मनुष्यः । काच्छकं हसितम् ।

मनुष्य अथवा उसमें रहनेवाले पदार्थ वाच्य न होनेपर वुञ् प्रत्यय नहीं होगा, जैसे-काच्छो गौः ॥

१३५९ अपदातौ साल्वात्।४।२।१३५॥

साल्वशब्दस्य कच्छादित्वाद्वुञि सिद्धे नियमार्थमिदम् । अपदातावेवेति । साल्वको ब्राह्मणः । अपदातौ किम् । साल्वः पदातिर्व्रजति ॥

१३५९-पदातिभिन्न अर्थ होनेपर साल्व शब्दके उत्तर वुञ् प्रत्यय हो। साल्व शब्दके उत्तर-कच्छादित्वके कारण वुञ् प्रत्यय सिद्ध ही है फिर यह सूत्र अपदातावेव, अर्थात् अपदाति अर्थ होनेपर ही साल्व शब्दसे वुञ् प्रत्यय हो अन्यार्थमें न हो, इस नियमके निमित्त है, जैसे-साल्वको ब्राह्मणः, इस स्थानमें पदाति अर्थ नहीं है, पदाति अर्थ होनेपर वुञ् प्रत्यय नहीं होगा, जैसे-साल्वः पदातिर्व्रजति ॥

१३६० गोयवाग्वोश्च । ४ । २ । १३६ ॥

साल्वाद्वुञ् । कच्छाद्यणोऽपवादः । साल्वको गौः । साल्विका यवागूः । साल्वमन्यत् ॥

१३६०-गो और यवागू अर्थ होनेपर साल्व शब्दके उत्तर वुञ् प्रत्यय हो, यह सूत्र कच्छादिके उत्तर विहित अण् प्रत्ययका अपवाद है, जैसे-साल्वको गौः । साल्विका यवागूः। साल्वमन्यत् ॥

१३६१ गर्तोत्तरपदाच्छः ।४।२।१३७॥

देशे । अणोऽपवादः । वृकगर्तीयम् । उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम् ॥

१३६१-गर्त शब्द जिसके परे है, ऐसे शब्दके उत्तर देश अर्थ होनेपर छ प्रत्यय हो, यह सूत्र अण् प्रत्ययका अपवादक है, जैसे-वृकगर्तीयम्, इस स्थानमें केवल बहुच्पूर्वके निषेधार्थ उत्तर पदका ग्रहण कियाहै ॥

१३६२ गहादिभ्यश्च । ४ । २ । १३८ ॥

छः स्यात् । गहीयः ॥ मुखपार्श्वतसोर्लोपश्च ॥ ॥मुखतीयम् । पार्श्वतीयम् । अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम् । कुग् जनस्य परस्य च ॥ ॥ जनकीयम् । परकीयम् ॥ देवस्य च ॥ देवकीयम् ॥ स्वस्य च ॥ स्वकीयम् । वेणुकादिभ्यश्छण्वाच्यः ॥ * ॥ वैणुकीयम् । वैत्रकीयम् । औत्तरपदकीयम् ॥

१३६२-गहादि शब्दोंके उत्तर छ प्रत्यय हो, जैसे-गहीयः ।

मुख और पार्श्व शब्दके उत्तर तस् प्रत्ययके अन्तका लोप हो और छ प्रत्यय हो, जैसे-मुखतीयम् । पार्श्वतीयम् । अव्ययोंकी भसंज्ञामात्रमें टिके लोपकी अनित्यता ज्ञापन करनेके निमित्त यह गणसूत्र है ।

जन और पर शब्दको कुक्का आगम और छ प्रत्यय हो, जैसे-जनकीयम् । परकीयम् ।

देव शब्दको कुक्का आगम और छ प्रत्यय हों, जैसे-देवकीयम् ।

स्व शब्दको कुक्का आगम और छ प्रत्यय हो, जैसे-स्वकीयम् ।

वेणुकादि शब्दोंके उत्तर छण् प्रत्यय हो* जैसे-वैणुकीयम् । वैत्रकीयम् । औत्तरपदकीयम् ॥

१३६३ प्राचां कटादेः । ४ । २ । १३९ ॥

प्राग्देशवाचिनः कटादेश्छः स्यात् । अणोऽपवादः । कटनगरीयम् । कटघोषीयम् । कटपल्वलीयम् ॥

१३६३-पूर्वदेशवाचक कटादि शब्दोंके उत्तर छ प्रत्यय हो, यह छ प्रत्यय अण् प्रत्ययका विशेषक है, जैसे-कटनगरीयम् । कटघोषीयम् । कटपल्वलीयम् ॥

१३६४ राज्ञः क च । ४ । २ । १४० ॥

वृद्धत्वाच्छे सिद्धे तत्सन्नियोगेन कादेशमात्रं विधीयते । राजकीयम् ॥

१३६४-राजन् शब्दको क आदेश और छ प्रत्यय हो, इस स्थलमें वृद्धत्वके कारण छ प्रत्यय सिद्ध होनेपर प्रत्ययसन्नियोगसे ककार आदेशमात्र विधान करतेहैं, जैसे-राजकीयम् ॥

१३६५ वृद्धादकेकान्तखोपधात् । ४ । २ । १४१ ॥

अक इक एतदन्तात् खोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात् । ब्राह्मणको नाम जनपदो यत्र ब्राह्मणा आयुधजीविनस्तत्र जातो ब्राह्मणकीयः । शाल्मलिकीयः । अयोमुखीयः ॥

१३६५-अक,इक, यह अन्तमें हैं जिसके ऐसे और खकारोपध देशवाचक वृद्धसंज्ञक शब्दोंके उत्तर छ प्रत्यय हो, जैसे-ब्राह्मणको नाम जनपदः यत्र ब्राह्मणाः आयुधजीविनस्तत्र जातः=ब्राह्मणकीयः । शाल्मलिकीयः । अयोमुखीयः ॥

१३६६ कन्थापलदनगरग्रामह्रदोत्तरपदात् । ४ । २ । १४२ ॥

कन्थादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात् । ठञ्ञिठादेरपवादः । दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिह्रदीयम् ॥

१३६६-कन्था, पलद, नगर, ग्राम और ह्रद, यह पांच शब्द उत्तरपद हैं जिसके ऐसे देशवाचक वृद्धसंज्ञक शब्दके उत्तर छ प्रत्यय हो, यह छ प्रत्यय ठञ् और ञिठ् आदि प्रत्ययोंका विशेषक है, जैसे-दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । दाक्षिग्रामीयम् । दाक्षिह्रदीयम् ॥

१३६७ पर्वताच्च । ४ । २ । १४३ ॥

पर्वतीयः ॥

१३६७-पर्वत शब्दके उत्तर छ प्रत्यय हो, जैसे-पर्वतीयः ॥

१३६८ विभाषाऽमनुष्ये । ४ । २ । १४४ ॥

मनुष्यभिन्नेऽर्थे पर्वताच्छो वा स्यात्पक्षेऽण् । पर्वतीयानि पार्वतानि वा फलानि । अमनुष्ये किम् । पर्वतीयो मनुष्यः ॥

१३६८-मनुष्यभिन्न अर्थ होनेपर पर्वत शब्दके उत्तर विकल्प करके छ प्रत्यय हो, विकल्प पक्षमें अण् प्रत्यय होगा, जैसे-पर्वतीयानि पार्वतानि वा फलानि । मनुष्य अर्थ होनेपर 'पर्वतीयः' अर्थात् मनुष्य, ऐसा होगा ॥

१३६९ कृकणपर्णाद्भारद्वाजे । ४ । २ । १४५ ॥

भारद्वाजदेशवाचिभ्यामाभ्यां छः । कृकणीयम् । पर्णीयम् । भारद्वाजे किम् । कार्कणम् । पार्णम् ॥

१३६९-भारद्वाजदेशवाचक जो कृकण और पर्ण शब्द उनके उत्तर छ प्रत्यय हो, जैसे-कृकणीयम् । पर्णीयम् । भरद्वाजदेशवाचक न होनेपर 'कार्कणम्' और 'पार्णम्' ऐसा होगा ॥

१३७० युष्मदस्मदोरन्यतरस्यां खञ्च । ४ । ३ । १ ॥

चाच्छः । पक्षेऽण् । युवयोर्युष्माकं वा अयं युष्मदीयः । अस्मदीयः ॥

१३७०-युष्मद् और अस्मद् शब्दके उत्तर विकल्प करके खञ् प्रत्यय हो, चकारनिर्देशके कारण छ प्रत्यय भी हो, विकल्प पक्षमें अण् प्रत्यय होगा, जैसे-युवयोर्युष्माकं वा अयम्=युष्मदीयः । अस्मदीयः ॥

१३७१ तस्मिन्नणि च युष्माकाऽस्माकौ । ४ । ३ । २ ॥

युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ॥

१३७१-खञ् और अण् प्रत्यय परे रहते युष्मद् और अस्मद् शब्दके स्थानमें यथाक्रम युष्माक और अस्माक आदेश हों, जैसे-यौष्माकीणः । यौष्माकः । आस्माकीनः । आस्माकः ॥

१३७२ तवकममकावेकवचने । ४ । ३ । ३ ॥

एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च । तावकीनः । तावकः । मामकीनः । मामकः । छे तु ॥

१३७२-खञ् और अण् प्रत्यय परे रहते एकार्थवाचक युष्मद् और अस्मद् शब्दके स्थानमें यथाक्रम तवक और ममक आदेश हों, जैसे-तावकीनः । तावकः । मामकीनः । मामकः । छ प्रत्यय परे रहते कैसा होगा ? सो कहतेहैं-॥

१३७३ प्रत्ययोत्तरपदयोश्च ।७।२।९८॥

मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च । त्वदीयः । मदीयः ॥

१३७३–प्रत्यय परे रहते और उत्तरपद परे रहते एकार्थवाचक युष्मद् और अस्मद् शब्दके मकारपर्यन्तको त्व और म आदेश हों, जैसे–त्वदीयः । मदीयः । उत्तरपद परे होनेपर, जैसे–त्वत्पुत्रः । मत्पुत्रः ॥

१३७४ अर्द्धाद्यत् । ४ । ३ । ४ ॥

अर्द्धचः ॥

१३७४–अर्द्ध शब्दके उत्तर यत् प्रत्यय हो, जैसे–अर्द्धयः ॥

१३७५ परावराधमोत्तमपूर्वाच्च।४।३।५॥

परार्द्ध्यम् । अवरार्द्ध्यम् । अधमार्द्ध्यम् । उत्तमार्द्ध्यम् ॥

१३७५–पर, अवर, अधम और उत्तम, यह शब्द पूर्वमें रहते अर्द्ध शब्दके उत्तर यत् प्रत्यय हो, जैसे–परार्द्ध्यम् । अवरार्द्ध्यम् । अधमार्द्ध्यम् । उत्तमार्द्ध्यम् ॥

१३७६ दिक्पूर्वपदाट्ठञ्च । ४ । ३ । ६ ॥

चाद्यत् । पौर्वार्द्धिकम् । पूर्वार्द्ध्यम् ॥

१३७६–दिग्वाचक शब्द पूर्वमें रहते अर्द्ध शब्दके उत्तर ठञ् प्रत्यय हो, चकारनिर्देशके कारण यत् प्रत्यय भी हो,जैसे–पौर्वार्द्धिकम् । पूर्वार्द्ध्यम् ॥

१३७७ ग्रामजनपदैकदेशादञ्ठञौ । ४ । ३ । ७ ॥

ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्द्धान्तादञ्ठञौ स्तः । इमेऽस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धाः । पौर्वार्द्धिकाः। ग्रामस्य पूर्वस्मिन्नर्द्धे भवा इति तद्धितार्थे समासः । ठञ्ग्रहणं स्पष्टार्थम् । अञ् चेत्युक्ते-यतोऽप्यनुकर्षः सम्भाव्येत ॥

१३७७–ग्रामैकदेश (ग्रामका एक अंश) वाचक और जनपदैक देश (देशका एक अंश) वाचक जो दिग्वाचक-शब्दपूर्वक अर्द्धशब्दान्त प्रातिपदिक उसके उत्तर अञ् और ठञ् प्रत्यय हो, जैसे–इमेऽस्माकं ग्रामस्य जनपदस्य वा= पौर्वार्द्धाः, पौर्वार्द्धिकाः । ग्रामस्य पूर्वस्मिन्नर्द्धे भवाः, इस विग्रहमें तद्धितार्थमें समास हुआ है । ठञ् ग्रहण स्पष्टीकरणके निमित्त है । इस सूत्रमें 'अञ् च' ऐसा कहनेसे यत् प्रत्ययका भी अनुकर्ष सम्भावित होता, उसकी निवृत्तिके निमित्त दोनोंका उल्लेख किया, यह जानना चाहिये ॥

१३७८ मध्यान्मः । ४ । ३ । ८ ॥

मध्यमः ॥

१३७८–मध्य शब्दके उत्तर म प्रत्यय हो, जैसे–मध्यमः ॥

१३७९अ साम्प्रतिके । ४ । ३ । ९ ॥

मध्यशब्दादकारप्रत्ययः स्यात्साम्प्रतिकेर्थे । उत्कर्षापकर्षहीनो मध्यो वैयाकरणः । मध्यं दारु। नातिह्रस्वं नातिदीर्घमित्यर्थः ॥

१३७९–साम्प्रतिक अर्थात् न्याय्य अर्थ होनेपर मध्य शब्दके उत्तर अ प्रत्यय हो । उत्कर्ष और अपकर्षसे हीन व्यक्ति और वस्तुको मध्य कहतेहैं, जैसे–मध्यो वैयाकरणः । मध्यं दारु अर्थात् न बहुत छोटा और न तो बहुत बडा दारु ॥

१३८० द्वीपादनुसमुद्रं यञ् । ४ । ३।१०॥

समुद्रस्य समीपे यो द्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ् स्यात् । द्वैप्यम् । द्वैप्या ॥

१३८०–समुद्रके समीपमें जो द्वीप, तद्विषयीभूत द्वीप शब्दके उत्तर यञ् प्रत्यय हो, जैसे–द्वैप्यम् । द्वैप्या ॥

१३८१ कालाट्ठञ् । ४ । ३ । ११ ॥

कालवाचिभ्यष्ठञ् स्यात् । मासिकम् । सांवत्सरिकम् । सायम्प्रातिकः । पौनःपुनिकः । कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः, अनुदितौषसरागेति भारविः, समानकालीनं प्राक्कालीनमित्यादि च । अपभ्रंशा एवैत इति प्रामाणिकाः । तत्र जात इति यावत्कालाधिकारः ।

१३८१–कालवाचक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–मासिकम् । सांवत्सरिकम् । सायम्प्रातिकः । पौनःपुनिकः ।

इस सूत्रके रहते कालिदासने "शार्वरस्य तमसो निषिद्धये" ऐसे स्थलमें किस प्रकार 'शार्वरस्य'पदका प्रयोग किया ? और भारविने "अनुदितौषसरागः" ऐसा प्रयोग कैसे किया ? और 'समानकालीनम्, प्राक्कालीनम्' इत्यादि पद कैसे सिद्ध हुए हैं ? इस विषयमें प्रामाणिक कहतेहैं कि, यह सब पद अपभ्रंश हैं ।

"तत्र जातः १३९३" इस सूत्रतक कालाधिकार है॥

१३८२ श्राद्धे शरदः । ४ । ३ । १२ ॥

ठञ् स्यात्।ऋत्वणोऽपवादः।शारदिकं श्राद्धम्॥

१३८२–श्राद्ध अर्थमें शरद् शब्दके उत्तर ठञ् प्रत्यय हो, यह सूत्र ऋतुवाचक शब्दके उत्तर अण् प्रत्यय (१३८७) का विशेषक है, जैसे–शारदि भवम्=शारदिकं श्राद्धम् ॥

१३८३ विभाषा रोगातपयोः।४।३।१३॥

शारदिकः शारदो वा रोग आतपो वा । एतयोः किम् । शारदं दधि ॥

१३८३–रोग और आतप अर्थमें शरद् शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो, जैसे–शारदिकः शारदो वा रोग आतपो वा । रोग और आतप अर्थ न होनेपर ठञ् प्रत्यय नहीं होगा, जैसे–शारदं दधि ॥

१३८४ निशाप्रदोषाभ्यां च ।४।३।१४॥

वा ठञ् स्यात् । नैशिकम् । नैशम् । प्रादोषिकम् । प्रादोषम् ॥

१३८४-निशा और प्रदोष शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो, जैसे-नैशिकम्, नैशम्। प्रादोषिकम्,प्रादोषम्। (प्रदोषमें होनेवाला) ॥

१३८५ श्वसस्तुट् च । ४ । ३ । १५ ॥

श्वसूशब्दाट्ठञ् वा स्यात्तस्य तुडागमश्च ॥

१३८५-श्वस् शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो और उसको तुट्का आगम हो ॥

१३८६ द्वारादीनां च । ७ । ३ । ४ ॥

द्वार, स्वर, व्यल्कश, स्वस्ति, स्वर, स्फ्यकृत, स्वादु, मृदु, श्वस्, श्वन्, स्व, एषां न वृद्धिरैजागमश्च । शौवस्तिकम् ॥

१३८६-द्वार, स्वर, स्वाध्याय, व्यल्कश, स्वस्ति, स्वर, स्फ्यकृत, स्वादु, मृदु, श्वस्, श्वन् और स्व शब्दके पूर्व स्वरको वृद्धि न हो और ऐच्का आगम हो,जैसे-शौवस्तिकम्।

१३८७ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् । ४ । ३ । १६ ॥

सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् स्यात् । सन्धिवेलायां भवं सान्धिवेलम् । ग्रैष्मम् । तैषम् ॥ सन्धिवेला, संध्या, अमावास्या, त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत् ॥ संवत्सरात् फलपर्वणोः ॥ * ॥ सांवत्सरं फलं पर्व वा । सांवत्सरिकमन्यत् ॥

१३८७-कालवृत्ति जो संधिवेलादि शब्द, ऋतुवाचक शब्द और नक्षत्रवाचक शब्द, उनके उत्तर अण् प्रत्यय हो, जैसे-'संधिवेलायां भवम्' इस वाक्यमें-सांधिवेलम् । ग्रैष्मम् । तैषम् । संधिवेलादि जैसे-संधिवेला,संध्या,अमावास्या,त्रयोदशी, चतुर्दशी, पौर्णमासी, प्रतिपत् ।

फल और पर्व वाच्य होनेपर संवत्सर शब्दके उत्तर अण् प्रत्यय हो, जैसे-सांवत्सरं फलं पर्व वा । अन्य अर्थमें-सांवत्सरिकम् (संवत्सरमें होनेवाला) ॥

१३८८ प्रावृष एण्यः । ४ । ३ । १७ ॥

प्रावृषेण्यः ॥

१३८८-प्रावृष् शब्दके उत्तर एण्य प्रत्यय हो, जैसे-प्रावृषेण्यः (वर्षाऋतुमें होनेवाला) ॥

१३८९ वर्षाभ्यष्ठक् । ४ । ३ । १८ ॥

वर्षासु साधु वार्षिकं वासः । कालात्साधुपुष्प्यत्पच्यमानेष्विति साध्वर्थे ॥

१३८९-वर्षा शब्दके उत्तर साधु अर्थमें ठक् प्रत्यय हो, जैसे-'वर्षासु साधु' इस वाक्यमें-वार्षिकम् वासः, यहां "कालात्साधुपुष्प्यत्पच्यमानेषु १४१८" इस सूत्रसे साधु अर्थमें ही ठक् होगा ॥

१३९० सर्वत्राण् च तलोपश्च ।४।३।२२॥

हेमन्तादण् स्यात्तलोपश्च वेदलोकयोः । चकारात्पक्षे ऋत्वण् । हैमनम् । हैमन्तम् ॥

१३९०-वेद और लोकमें हेमन्त शब्दके उत्तर अण् प्रत्यय हो और हेमन्त शब्दके तकारका लोप हो । चकारसे पक्षमें ऋतुवाचक शब्दके उत्तर अण् (१३८७)प्रत्यय होगा, जैसे-हैमनम् । हैमन्तम् ॥

१३९१ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । ४ । ३ । २३ ॥

सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च । तुटः प्रागनादेशः । अनद्यतन इत्यादि निर्देशात् । सायन्तनम् । चिरन्तनम् । प्राह्णप्रगयोरेदन्तत्वं निपात्यते । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् । दिवातनम् ॥ चिरपरुत्परारिभ्यस्त्नो वक्तव्यः॥*॥ चिरत्नम् । परुत्नम् । परारित्नम् ॥ अग्रादिपश्चाड्डिमच् ॥ * ॥ अग्रिमम् । आदिमम् । पश्चिमम् ॥ अन्ताच्च ॥ * ॥ अन्तिमम् ॥

१३९१-सायम्, चिरम्, प्राह्णे और प्रगे यह चार अव्यय और अन्य कालवाचक अव्यय शब्दोंके उत्तर ट्यु, ट्युल् प्रत्यय हों और इन दोनों प्रत्ययोंको तुट्का आगम भी हो, "अनद्यतने० २१८५" ऐसे सूत्रके निर्देशके कारण तुट्से पहले अनादेश होगा, जैसे-सायं भवम्=सायन्तनम् । चिरन्तनम् । प्राह्णे और प्रगे शब्दका एकारान्तत्व निपातनसे सिद्ध है, जैसे-प्राह्णेतनम् । प्रगेतनम् । दोषातनम् । दिवातनम् ॥

चिर, परुत् और परारि शब्दके उत्तर त्न प्रत्यय हो * जैसे-चिरत्नम् । परुत्नम् । परारित्नम् ॥

अग्र, आदि और पश्चात् शब्दके उत्तर डिमच् प्रत्यय हो * जैसे-अग्रिमम् । आदिमम् । पश्चिमम् ।

अन्त शब्दके उत्तर भी डिमच् प्रत्यय हो* जैसे-अन्ते भवम्=अन्तिमम् ॥

१३९२ विभाषा पूर्वाह्णापराह्णाभ्याम् । ४ । ३ । २४ ॥

आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च । पक्षे ठञ् । पूर्वाह्णेतनम् । अपराह्णेतनम् । घकालतनेष्विवत्यलुक् । पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनम् । अपराह्णतनम् । पौर्वाह्णिकम् । आपराह्णिकम् ॥

१३९२-पूर्वाह्ण और अपराह्ण शब्दके उत्तर विकल्प करके ट्यु और ट्युल् प्रत्यय हो और इन ट्यु, ट्युल् प्रत्ययोंको तुट्का आगम हो, पक्षमें ठञ् प्रत्यय होगा, जैसे-पूर्वाह्णेत-

नम्। अपराह्णेतनम्। इस स्थानमें "घकालतनेषु० ९७५" इस सूत्रसे सप्तमीका अलुक् हुआ। पूर्वाह्णः सोढोऽस्य, इस विग्रहमें तो पूर्वाह्णतनम्। अपराह्णतनम्। पौर्वाह्णिकम्। आपराह्णिकम्॥

१३९३ तत्र जातः। ४। ३। २५॥

सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण इत्यादि॥

१३९३–तत्र जातः, अर्थात् सप्तमीविभक्त्यन्त प्रातिपदिकके उत्तर जात अर्थ होनेपर अण् आदि और घ आदि प्रत्यय हों, जैसे–स्रुघ्ने जातः, इस वाक्यमें–स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीणः–इत्यादि॥

१३९४ प्रावृषष्ठप्। ४। ३। २६॥

एण्यस्यापवादः। प्रावृषि जातः प्रावृषिकः॥

१३९४–जात अर्थमें प्रावृष् शब्दके उत्तर ठप् प्रत्यय हो, जैसे–प्रावृषि जातः, इस विग्रहमें प्रावृषिकः। यह ठप् प्रत्यय एण्य प्रत्ययका अपवाद है॥

१३९५ संज्ञायां शरदो वुञ्।४।३।२७॥

ऋत्वणोऽपवादः। शारदका दर्भविशेषा मुद्गविशेषाश्च॥

१३९५–संज्ञा अर्थ होनेपर शरद् शब्दके उत्तर वुञ् प्रत्यय हो, यह वुञ् प्रत्यय ऋतुवाचक शब्दके उत्तर विहित अण् प्रत्ययका अपवादक है, जैसे–शारदकाः, अर्थात् दर्भविशेष और मुद्गविशेष॥

१३९६ उत्तरपदस्य। ७। ३। १०॥

अधिकारोऽयम्। हनस्त इत्यस्मात्प्राक्॥

१३९६–"उत्तरपदस्य" यह अधिकार सूत्र है, "हनस्तः०"इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त इस सूत्रका अधिकार चलैगा॥

१३९७ अवयवादृतोः। ७। ३। ११॥

अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्यात् ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः। अपरहैमनः। अवयवात्किम्। पूर्वासु वर्षासु भवः पौर्ववर्षिकः। ऋतोर्वृद्धिमद्विधाववयवानामिति तदन्तविधिः पूर्वत्र, इह तु नावयवत्वाभावात्॥

१३९७–ञित्, णित्, कित् तद्धित प्रत्यय परे रहते अवयववाचक जो पूर्वपद उसके उत्तर ऋतुवाचक शब्दके अचोंके मध्यमें आद्यच्को वृद्धि हो, जैसे–पूर्ववार्षिकः। अपरहैमनः।

अवयववाचक न होनेपर वृद्धि नहीं होगी, जैसे–पूर्वासु वर्षासु भवः=पौर्ववर्षिकः।

"ऋतोर्वृद्धिमद्विधाववयवानाम्" (ऋतुवाचक शब्दके उत्तर वृद्धिनिमित्तक प्रत्ययविधिमें तदन्तविधि हो, वह ऋतुवाचक शब्द यदि अवयववाचकसे परे रहे तो) इस वार्तिकसे 'पूर्ववार्षिकः, अपरहैमनः' इत्यादिकी सिद्धिके लिये "१३८९–१३९०" इन सूत्रोंमें तदन्तविधि होतीहै और 'पौर्ववर्षिकः' यहां अवयववाचक पूर्वपद न होनेके कारण "१३८९" इस सूत्रमें तदन्तविधि न होनेसे ठक् प्रत्यय नहीं हुआ, किन्तु औत्सर्गिक "कालाट्ठञ् ३।३।११" इससे ठञ् प्रत्यय हुआ और "अवयवादृतोः" इससे उत्तरपदकी वृद्धि नहीं हुई॥

१३९८ सुसर्वार्द्धाज्जनपदस्य।७।३।१२॥

उत्तरपदस्य वृद्धिः। सुपाञ्चालकः। सर्वपाञ्चालकः। अर्द्धपाञ्चालकः। जनपदतदवध्योरिति वुञ्॥ सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः॥

१३९८–सुसर्व और अर्द्ध शब्दके उत्तर जनपदवाचक उत्तर पदके अचोंके मध्यमें आद्यच्को वृद्धि हो, जैसे–सुपाञ्चालकः।सर्वपाञ्चालकः। अर्द्धपाञ्चालकः"जनपदतदवध्योः० १३४८" इस सूत्रमें "सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य" इस वार्तिकसे तदन्तविधि होतीहै, इसलिये पूर्वोक्त प्रयोगमें वुञ् प्रत्यय हुआ॥

१३९९ दिशोऽमद्राणाम्। ७। ३।१३॥

दिग्वाचकाज्जनपदवाचिनो वृद्धिः। पूर्वपाञ्चालकः। दिशः किम्। पूर्वपञ्चालानामयं पौर्वपञ्चालः। अमद्राणां किम्। पौर्वमद्रः। योगविभाग उत्तरार्थः॥

१३९९–दिग्वाचक शब्दके उत्तर मद्रभिन्न जनपदवाचक शब्दके आद्यच्को वृद्धि हो, जैसे–पूर्वपाञ्चालकः।

दिग्वाचक शब्द पूर्वमें न होनेपर–पूर्वपञ्चालानामयम्=पौर्वपञ्चालः।

मद्र शब्द होनेपर पौर्वमद्रः, ऐसा होगा।

उत्तर सूत्रमें दिग्वाचक शब्दकी अनुवृत्तिके निमित्त भिन्न सूत्र कियाहै॥

१४००प्राचां ग्रामनगराणाम्।७।३।१४॥

दिशः परेषां ग्रामवाचिनां नगरवाचिनां चांगानामवयवस्य च वृद्धिः। पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः। नगरे, पूर्वपाटलिपुत्रकः॥

१४००–दिग्वाचक शब्दके परे स्थित पश्चिमदेशस्थ ग्रामवाचक और नगरवाचक शब्दोंके अवयवको वृद्धि हो, जैसे–पूर्वेषुकामशम्यां भवः=पूर्वैषुकामशमः। नगरे–पूर्वपाटलिपुत्रकः॥

१४०१ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्। ४। ३। २८॥

पूर्वाह्णकः। अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः। अवस्करकः॥

१४०१–पूर्वाह्ण, अपराह्ण, आर्द्रा, मूल, प्रदोष और अवस्कर शब्दके उत्तर वुन् प्रत्यय हो, जैसे–पूर्वा-

ह्नकः । अपराह्नकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः ॥

१४०२ पथः पन्थ च । ४ । ३ । २९ ॥

पथि जातः पन्थकः ॥

१४०२-पथिन् शब्दके स्थानमें पन्थ आदेश हो और वुन् प्रत्यय हो, जैसे-पथि जातः=पन्थकः ॥

१४०३ अमावास्याया वा ।४।३।३० ॥

अमावास्यकः । आमावास्यः ॥

१४०३-अमावास्या शब्दके उत्तर विकल्प करके वुन् प्रत्यय हो, जैसे-अमावास्यकः । आमावास्यः ॥

१४०४ अ च । ४ । ३ । ३१ ॥

अमावास्यः ॥

१४०४-अमावास्या शब्दके उत्तर अ प्रत्यय भी हो,जैसे-अमावास्यः ॥

१४०५ सिन्ध्वपकराभ्यां कन्।४।३।३२॥

सिन्धुकः । कच्छाद्यणि मनुष्यवुञि च प्राप्ते । अपकरकः । औत्सर्गिकेऽणि प्राप्ते ॥

१४०५-सिन्धु और अपकर शब्दके उत्तर कन् प्रत्यय हो, जैसे-'सिन्धुकः' यहां कच्छादित्वके कारण अण् प्रत्यय और "मनुष्यतत्स्थयोर्वुञ्" इस सूत्रसे मनुष्यार्थक वुञ् प्रत्यय प्राप्त होनेपर "सिन्ध्वपकराभ्यां कन्" इस सूत्रसे कन् प्रत्यय होताहै । 'अपकरकः' इस स्थलमें औत्सर्गिक अण् प्रत्ययकी प्राप्ति होनेपर कन् प्रत्यय होताहै ॥

१४०६ अणञौ च । ४ । ३ । ३३ ॥

क्रमात् स्तः । सैन्धवः । आपकरः ॥

१४०६-सिन्धु और अपकर शब्दके उत्तर यथाक्रम अण् और अञ् प्रत्यय हो, जैसे-सैन्धवः । आपकरः ॥

१४०७ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । ४ । ३ । ३४ ॥

एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात् ॥

१४०७-श्रविष्ठा, फल्गुनी, अनुराधा, स्वाति, तिष्य, पुनर्वसु, हस्त, विशाखा, आषाढा, बहुला, इन नक्षत्रवाचक शब्दोंके परे जातार्थक प्रत्ययका लुक् हो ॥

१४०८ लुक् तद्धितलुकि ।१।२।४९॥

तद्धितलुकि सत्युपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात् । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः इत्यादि ॥ चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् ॥ * ॥ चित्रायां जाता चित्रा । रेवती रोहिणी आभ्यां लुक् तद्धितलुकीति लुकि कृते पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीष् ॥ फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ ॥ * ॥ स्त्रियामित्येव । फल्गुनी । अषाढा ॥ श्रविष्ठाषाढाभ्यां छण्वक्तव्यः ॥ * ॥ अस्त्रियामपि । श्राविष्ठीयः । आषाढीयः ॥

१४०८-तद्धित प्रत्ययका लुक् होनेपर उपसर्जनीभूत स्त्रीप्रत्ययका लुक् हो, जैसे-श्रविष्ठासु जातः=श्रविष्ठः । फल्गुनः-इत्यादि ।

चित्रा, रेवती और रोहिणी शब्दके उत्तर स्त्रीलिङ्गमें विहित नानार्थक प्रत्ययका लुक् हो, जैसे-चित्रायां जाता=चित्रा । रेवती और रोहिणी शब्दके उत्तर "लुक् तद्धितलुकि" इससे उपसर्जन स्त्रीप्रत्ययका लुक् करनेपर पिप्पल्यादिके आकृतिगणत्वके कारण पुनर्वार ङीप् प्रत्यय हुआ ।

स्त्रीलिङ्गमें फल्गुनी और अषाढा शब्दके उत्तर ट और अन् प्रत्यय हो * जैसे-फल्गुनी[1] । अषाढा ।

श्रविष्ठा और अषाढा शब्दके उत्तर छण् प्रत्यय हो * यह छण् प्रत्यय स्त्रीलिंगभिन्न स्थलमें भी होगा, जैसे-श्राविष्ठीयः । आषाढीयः ।

१४०९ जे प्रोष्ठपदानाम्। ७ । ३ । १८॥

प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्याज्जातार्थे ञिति णिति किति च । प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः । जे इति किम् । प्रोष्ठपदासु भवः प्रौष्ठपदः । बहुवचननिर्देशात्पर्यायोऽपि गृह्यते । भद्रपादः ॥

१४०९-जातार्थमें विहित ञित्, णित् और कित् तद्धित प्रत्यय परे रहते प्रोष्ठपद शब्दके परवर्ती पदके आद्यच्को वृद्धि हो, जैसे-प्रोष्ठपदासु जातः=प्रोष्ठपादो माणवकः । जातार्थ न होनेपर पूर्वपदस्थ आद्यच्को वृद्धि होगी,जैसे-प्रोष्ठपदासु भवः=प्रौष्ठपदः । बहुवचननिर्देशके कारण पर्यायका भी ग्रहण होगा, जैसे-भद्रपादः ॥

१४१० स्थानान्तगोशालखरशालाच्च । ४ । ३ । ३५ ॥

एभ्यो जातार्थप्रत्ययस्य लुक् स्यात् । गोस्थानः । गोशालः । खरशालः । विभाषा सेनेति नपुंसकत्वे ह्रस्वत्वम् ॥

१४१०-स्थानान्त शब्द, गोशाल शब्द और खरशाल शब्दके उत्तर जातार्थमें विहित प्रत्ययका लुक् हो, जैसे-गोस्थाने जातः, इस विग्रहमें-गोस्थानः । गोशालः । खरशालः । सूत्रस्थ गोशाल और खरशाल शब्दोंको " विभाषा सेना० ८२८ " इस सूत्रसे नपुंसकत्व होनेपर ह्रस्व हुआहै ॥

१४११ वत्सशालाभिजिदश्वयुक्छतभिषजो वा । ४ । ३ । ३६ ॥

एभ्यो जातार्थस्य लुग्वा स्यात् । वत्सशाले जातो वत्सशालः । वात्सशालः इत्यादि ॥

१ फल्गुनीमें ङीप् और अषाढामें टाप् प्रत्यय हुआहै ॥

जातार्थे प्रतिप्रसूतोऽण्वा डिद्वक्तव्यः ॥*॥ शातभिषः । शातभिषजः । शतभिषक् ॥

१४११–वत्सशाल, अभिजित्, अश्वयुक् और शतभिषज् शब्दके उत्तर जातार्थमें विहित प्रत्ययका विकल्प करके लुक् हो, जैसे–वत्सशाले जातः=वत्सशालः, वात्सशालः–इत्यादि ।

जातार्थमें प्रतिप्रसूत अण् प्रत्यय विकल्प करके डित् हो * जैसे–शातभिषः, शातभिषजः, शतभिषक् ॥

१४१२ नक्षत्रेभ्यो बहुलम् ।४।३।३७॥

जातार्थप्रत्ययस्य बहुलं लुक् स्यात् । रोहिणः । रौहिणः ॥

१४१२–नक्षत्रवाचक शब्दके उत्तर जातार्थक प्रत्ययका विकल्प करके लुक् हो, जैसे–रोहिणः, रौहिणः ॥

१४१३ कृतलब्धक्रीतकुशलाः।४।३।३८।

तत्रेत्येव । स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः ॥

१४१३–सप्तम्यन्त प्रातिपदिकके उत्तर कृत, लब्ध, क्रीत और कुशल अर्थमें अण् आदि और घ आदि प्रत्यय हों ।

कृतार्थको जातार्थका व्याप्य और क्रीतार्थको लब्धार्थका व्याप्य होनेपर दो पदोंके पृथक् ग्रहणका फल क्या है? इसपर कहतेहैं कि, कृतत्व और क्रीतत्वप्रकारक बोधमें भी प्रत्ययविधानके निमित्त उसका ग्रहण है, इसी कारण जातार्थमें प्रत्ययका लुक् होनेपर भी कृतार्थमें लुक् नहीं होताहै, जैसे–स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा=स्रौघ्नः ॥

१४१४ प्रायभवः ।४।३।३९॥

तत्रेत्येव।स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः॥

१४१४–सप्तम्यन्त प्रातिपदिकके उत्तर 'प्रायेण भवति' ऐसे अर्थमें अण्आदि और घ आदि प्रत्यय हों,जैसे–स्रुघ्ने प्रायेण (बाहुल्येन) भवति=स्रौघ्नः ॥

१४१५ उपजानूपकर्णोपनीवेष्ठक् । ४।३।४०॥

औपजानुकः।औपकर्णिकः । औपनीविकः ॥

१४१५–उपजानु, उपकर्ण और उपनीवि शब्दके उत्तर ठक् प्रत्यय हो, जैसे–औपजानुकः । औपकर्णिकः । औपनीविकः ॥

१४१६ संभूते ।४।३।४१॥

स्रुघ्ने संभवति स्रौघ्नः ॥

१४१६–सम्भवार्थमें सप्तम्यन्त प्रातिपदिकके उत्तर अण् आदि और घ आदि प्रत्यय हों, जैसे–स्रुघ्ने संभवति, इस विग्रहमें–स्रौघ्नः ॥

१४१७ कोशाड्ढञ् ।४।३।४२॥

कौशेयं वस्त्रम् ॥

१४१७–कोश शब्दके उत्तर ढञ् प्रत्यय हो, जैसे–कौशेयं वस्त्रम् ॥

१४१८ कालात्साधुपुष्प्यत्पच्यमानेषु ।४।३।४३॥

हेमन्ते साधुर्हैमन्तः प्राकारः। वसन्ते पुष्पन्ति वासन्त्यः कुन्दलताः । शरदि पच्यन्ते शारदाः शालयः ॥

१४१८–कालवाचक शब्दके उत्तर साधु, पुष्प्यत् (प्रस्फुटन) और पच्यमान अर्थमें अण् आदि और घ आदि प्रत्यय हों, जैसे–हेमन्ते साधुः=हैमन्तः प्राकारः । वसन्ते पुष्प्यन्ति=वासन्त्यः कुन्दलताः । शरदि पच्यन्ते=शारदाः शालयः ॥

१४१९ उप्ते च ।४।३।४४॥

हेमन्ते उप्यन्ते हैमन्ता यवाः ॥

१४१९–कालवाचक शब्दके उत्तर उप्त अर्थात् वपन अर्थमें अण् आदि और घ आदि प्रत्यय हों, जैसे–हेमन्ते उप्यन्ते=हैमन्ता यवाः ॥

१४२० आश्वयुज्या वुञ् ।४।३।४५॥

ठञोपवादः । आश्वयुज्यामुप्ता आश्वयुजका माषाः ॥

१४२०–आश्वयुजी शब्दके उत्तर वुञ् प्रत्यय हो, यह सूत्र ठञ् प्रत्ययका विशेषक है, जैसे–आश्वयुज्यामुप्ताः=आश्वयुजका माषाः ॥

१४२१ ग्रीष्मवसन्तादन्यतरस्याम् । ४।३।४६॥

पक्षे ऋत्वण् । ग्रैष्मकम् । ग्रैष्मम् । वासन्तकम् । वासन्तम् ॥

१४२१–ग्रीष्म और वसन्त शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो, पक्षमें ऋतुवाचक शब्दके उत्तर अण् (१३८७) प्रत्यय होगा, जैसे–ग्रैष्मकम्, ग्रैष्मम् । वासन्तकम्, वासन्तम् ॥

१४२२ देयमृणे ।४।३।४७॥

कालादित्येव । मासे देयमृणं मासिकम् ॥

१४२२–देय ऋण अर्थमें कालवाचक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे–मासे देयमृणम्, इस विग्रहमें–मासिकम् ॥

१४२३ कलाप्यश्वत्थयवबुसाद्वुन् । ४।३।४८॥

यस्मिन् काले मयूराः कलापिनो भवन्ति स उपचारात्कलापी तत्र देयमृणं कालापकम् । अश्वत्थस्य फलमश्वत्थस्तद्युक्तः कालोऽप्यश्वत्थः । यस्मिन् कालेऽश्वत्थाः फलन्ति तत्र देयमश्वत्थकम् । यस्मिन् यवबुसमुत्पद्यते तत्र देयं यवबुसकम् ॥

१४२३-कलापिन्, अश्वत्थ, और यवबुस, इन कालवाचक शब्दोंके उत्तर देय ऋण अर्थमें वुन् प्रत्यय हो। जिस समयमें मोर कलापयुक्त हों वह समय उपचारके कारण कलापी कहकर प्रसिद्ध होताहै उस समयमें 'देय ऋण' अर्थमें-कालापकम्। अश्वत्थके फल अश्वत्थ, तद्युक्त काल भी अश्वत्थ, जिस समयमें सम्पूर्ण अश्वत्थ फलित हो उस समयमें 'देय ऋण' इस अर्थमें-अश्वत्थकम्। जिस समयमें यवका भूसा उत्पन्न हो उस समयमें 'देय ऋण' इस अर्थमें-यवबुसकम्॥

१४२४ ग्रीष्मावरसमाद्वुञ् ।४।३। ४९॥

ग्रीष्मे देयमृणं ग्रैष्मकम् । आवरसमकम् ॥

१४२४-ग्रीष्म और अवरसम शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-ग्रीष्मे देयमृणम्=ग्रैष्मकम्। आवरसमकम्॥

१४२५ संवत्सराग्रहायणीभ्यां ठञ्च । ४ । ३ । ५० ॥

चाद्वुञ् । सांवत्सरिकम् । सांवत्सरकम् । आग्रहायणिकम् । आग्रहायणकम् ॥

१४२५-संवत्सर और आग्रहायणी शब्दके उत्तर ठञ् और वुञ् प्रत्यय हों, जैसे-सांवत्सरिकम्, सांवत्सरकम्। आग्रहायणिकम्, आग्रहायणकम्॥

१४२६ व्याहरति मृगः । ४ । ३ ।५१॥

कालवाचिनः सप्तम्यन्ताच्छब्दायत इत्यर्थे अणादयः स्युः यो व्याहरति स मृगश्चेत् । निशायां व्याहरति नैशो मृगः । नैशिकः ॥

१४२६-जो शब्द करे वह मृग हो तो कालवाचक सप्तम्यन्त प्रातिपदिकके उत्तर 'शब्दायते' इस अर्थमें अण् आदि प्रत्यय हों, जैसे-निशायां व्याहरति=नैशः मृगः। नैशिकः॥

१४२७ तदस्य सोढम् । ४ ।३।५२॥

कालादित्येव । निशासहचरितमध्ययनं निशा तत्सोढमस्य नैशः । नैशिकः ॥

१४२७-प्रथमान्त शब्दके उत्तर 'तदस्य सोढम्' इस अर्थमें अण् आदि प्रत्यय हों, इस सूत्रसे भी कालवाचक शब्दके उत्तर ही प्रत्यय होगा, निशासहचरितमध्ययनं निशा, तत्सोढमस्य=नैशः। नैशिकः॥

१४२८ तत्र भवः । ४ । ३ ।५३॥

स्रुघ्ने भवः स्रौघ्नः । राष्ट्रियः ॥

१४२८-'भवः' इस अर्थमें सप्तम्यन्त प्रातिपदिकके उत्तर अण् आदि प्रत्यय हों, जैसे-स्रुघ्ने भवः=स्रौघ्नः। राष्ट्रियः॥

१४२९ दिगादिभ्यो यत् । ४।३।५४ ॥

दिश्यम् । वर्ग्यम् ॥

१४२९-दिक् आदि शब्दोंके उत्तर भवार्थमें यत् प्रत्यय हो, जैसे-दिशि भवम्=दिश्यम्। वर्ग्यम्॥

१४३० शरीरावयवाच्च ।४। ३ । ५५ ॥

दन्त्यम् । कर्ण्यम् ॥

१४३०-शरीरावयववाचक शब्दोंके उत्तर यत् प्रत्यय हो, जैसे-दन्ते भवम्=दन्त्यम्। कर्ण्यम्॥

१४३१ प्राचां नगरान्ते। ७ । ३ ।२४॥

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्य चाऽचामादेरचो वृद्धिर्ञिति णिति किति च । सुह्मनगरे भवः सौह्मनागरः । पौर्वनागरः । प्राचां किम्।मद्रनगरमुदक्षु तत्र भवो माद्रनगरः॥

१४३१-ञित्, णित् और कित् तद्धित प्रत्यय परे रहते प्राचीनदेशीय नगरान्त अंगमें पूर्व और उत्तरपदके अचोंके मध्यमें आद्यच्को वृद्धि हो जैसे-सुह्मनगरे भवः=सौह्मनागरः। पौर्वनागरः।

प्राचीनदेशीय नगरान्त अंग न होनेपर, जैसे-मद्रनगरमुदक्षु तत्र भवः=माद्रनगरः॥

१४३२ जंगलधेनुवलजान्तस्य विभाषितमुत्तरम् । ७ । ३ । २५ ॥

जंगलाद्यन्तस्यांगस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य वा ञिति णिति किति च। कुरुजंगले भवं कौरुजांगलम् । कौरुजंगलम् ॥ वैश्वधैनवम् । वैश्वधेनवम् । सौवर्णवालजम् । सौवर्णवलजम् ॥

१४३२-ञित्, णित् और कित् तद्धित प्रत्यय परे रहते जंगलाद्यन्त अंगके पूर्व पदके आद्यच्को नित्य और उत्तर पदके आद्यच्को विकल्प करके वृद्धि हो, जैसे-कुरुजंगले भवम्=कौरुजांगलम्, कौरुजंगलम्। वैश्वधैनवम्, वैश्वधेनवम्। सौवर्णवालजम्, सौवर्णवलजम्॥

१४३३ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् । ४ । ३ । ५६ ॥

दार्तेयम् । कौक्षेयम् । कलशिर्घटः तत्र भवं कालशेयम् ॥

१४३३-दृति, कुक्षि, कलशि, वस्ति, अस्ति और अहि शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-दार्तेयम्। कौक्षेयम्। कलशिः, अर्थात् घट, उसमें उत्पन्न-कालशेयम्॥

१४३४ ग्रीवाभ्योऽण् च । ४ । ३।५७॥

चात् ढञ् । ग्रैवम् । ग्रैवेयम् ॥

१४३४-ग्रीवादि शब्दोंके उत्तर अण् और ढञ् प्रत्यय हो, जैसे-ग्रैवम्, ग्रैवेयम्॥

१४३५ गम्भीराञ्ञ्यः । ४ । ३।५८॥

गम्भीरे भवं गाम्भीर्यम् ॥

१४३५-गंभीर शब्दके उत्तर ञ्य प्रत्यय हो, जैसे-गंभीरे भवम्=गाम्भीर्यम् ।

(पञ्चजन शब्दके उत्तर ञ्य प्रत्यय हो * जैसे-पाञ्चजन्यः) ॥

१४३६ अव्ययीभावाच्च । ४ । ३।५९॥

परिमुखं भवं पारिमुख्यम् । परिमुखादिभ्य एवेष्यते ॥ * ॥ नेह । औपकूलः ॥

१४३६-अव्ययीभावसंज्ञक पदके उत्तर ञ्य प्रत्यय हो, जैसे-परिमुखं भवम्=पारिमुख्यम् ।

परिमुखादि ही शब्दोंके उत्तर ञ्य प्रत्यय हो * इस कारण ' औपकूलः ' इस स्थलमें ञ्य प्रत्यय नहीं हुआ ॥

१४३७ अन्तःपूर्वपदाट्ठञ् । ४ ।३।६०॥

अव्ययीभावादित्येव । वेश्मनि इति अन्तर्वेश्मम् । तत्र भवमान्तर्वेश्मिकम् । आन्तर्गणिकम् ॥ अध्यात्मादिभ्यष्ठञिष्यते ॥ * ॥ अध्यात्मं भवमाध्यात्मिकम् ॥

१४३७-अन्तर् शब्द पूर्वमें है जिसके, ऐसे अव्ययीभावसंज्ञक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-वेश्मनि इस विग्रहमें अन्तर्वेश्मम्=तत्र भवम्=आन्तर्वेश्मिकम् । आन्तर्गणिकम् ।

आध्यात्मादि शब्दोंके उत्तर ठञ् प्रत्यय हो * जैसे-अध्यात्मं भवम्=आध्यात्मिकम् ॥

१४३८ अनुशतिकादीनां च।७।३।२०॥

एषामुभयपदवृद्धिः स्यात् ञिति णिति किति च । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम्।पारलौकिकम्। अध्यात्मादिराकृतिगणः॥

१४३८-ञित्, णित् और कित् तद्धित प्रत्यय परे रहते अनुशतिकादि शब्दोंके दोनों पदोंके आद्यच्को वृद्धि हो, जैसे-आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पारलौकिकम् । अध्यात्मादि आकृतिगण है ॥

१४३९ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । ७ । ३ । १ ॥

एषां पञ्चानां वृद्धिप्राप्तावादेरच आत् ञिति णिति किति च । दाविकम् । देविकाकूले भवा दाविकाकूलाः शालयः । शिंशपाया विकारः शांशपश्चमसः । पलाशादिभ्यो वेत्यञ् । दित्यौह इदं दात्यौहम् । दीर्घसत्रे भवं दार्घसत्रम् । श्रेयसि भवं श्रायसम ॥

१४३९-ञित्, णित्, और कित् तद्धित प्रत्यय परे रहते देविका, शिंशपा, दित्यवाट्, दीर्घसत्र और श्रेयस्, इन पांच शब्दोंके वृद्धिकी प्राप्ति होनेपर आद्यच्के स्थानमें आत् आदेश हो, जैसे-दाविकम् । देविकाकूले भवाः=दाविकाकूलाः शालयः । शिंशपाया विकारः=शांशपश्चमसः, यहां "पलाशादिभ्यो वा ४ । ३ । १४१" इससे अञ् प्रत्यय होताहै । दित्यौहि इदम्, इस विग्रहमें-दात्यौहम् । दीर्घसत्रे भवम्=दार्घसत्रम् । श्रेयसि भवम्=श्रायसम् ॥

१४४० ग्रामात्पर्यनुपूर्वात् ।४।३।६१॥

ठञ् स्यात् । अव्ययीभावादित्येव । पारिग्रामिकः । आनुग्रामिकः ॥

१४४०-परि और अनुपूर्वक ग्राम शब्दके उत्तर ठञ् प्रत्यय हो, यह विधि अव्ययीभावसंज्ञक शब्दके उत्तर ही होगी, जैसे-पारिग्रामिकः । आनुग्रामिकः ॥

१४४१ जिह्वामूलाऽङ्गुलेश्छः।४।३।६२॥

जिह्वामूलीयम् । अंगुलीयम ॥

१४४१-जिह्वामूल और अङ्गुलि शब्दके उत्तर छ प्रत्यय हो, जैसे-जिह्वामूले भवम्-जिह्वामूलीयम् । अङ्गुलीयम् । यह सूत्र "शरीरावयवाच्च १४३०" इसका बाधक है ।

१४४२ वर्गान्ताच्च । ४ । ३ । ६३ ॥

कवर्गीयम् ॥

१४४२-वर्गान्त शब्दके उत्तर छ प्रत्यय हो, जैसे-कवर्गे भवम्=कवर्गीयम् ॥

१४४३ अशब्दे यत्खावन्यतरस्याम् । ४ । ३ । ६४ ॥

पक्षे पूर्वेण छः । मद्वर्ग्यः । मद्वर्गीणः । मद्वर्गीयः । अशब्दे किम् । कवर्गीयो वर्णः ॥

१४४३-अशब्द अर्थ होनेपर वर्गान्त शब्दके उत्तर विकल्प करके यत् और ख प्रत्यय हो, विकल्प पक्षमें पूर्व सूत्रसे छ प्रत्यय होगा, जैसे-मद्वर्ग्यः, मद्वर्गीणः, मद्वर्गीयः ।

शब्द अर्थ होनेपर अर्थात् वर्णमात्र होनेपर केवल छ प्रत्यय ही होगा, जैसे-कवर्गीयो वर्णः ॥

१४४४ कर्णललाटात्कनलंकारे । ४ । ३ । ६५ ॥

कर्णिका । ललाटिका ॥

१४४४-कर्ण और ललाट शब्दके उत्तर अलङ्कारार्थमें कन् प्रत्यय हो, जैसे-कर्णिका । ललाटिका ॥

१४४५ तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः । ४ । ३ । ६६ ॥

सुपां व्याख्यानः सौपो ग्रन्थः । तैङः । कार्तः । सुप्सु भवं सौपम ॥

१४४५-व्याख्यातव्य ग्रन्थके प्रतिपादक षष्ठ्यन्त पदके उत्तर व्याख्यान अर्थमें और तादृश सप्तम्यन्त पदके उत्तर भवार्थमें अण् आदि प्रत्यय हों, जैसे-सुपां व्याख्यानः=सौपो ग्रन्थः । तिङां व्याख्यानो ग्रंथः=तैङः । कार्तः । सुप्सु भवम्=सौपम् ॥

१४४६ बह्वचोऽन्तोदात्ताट्ठञ्।४।३।६७॥

षत्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वम् । तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः ॥

१४४६-पूर्वोक्त अर्थमें बहुत अचोंसे युक्त अन्तोदात्त शब्दके उत्तर ठञ् प्रत्यय हो । षत्व और णत्वविधायक जो शास्त्र है उसको 'षत्वणत्वम्' कहतेहैं, तस्य व्याख्यानः, तत्र भवो वा, इस विग्रहमें-षात्वणत्विकः ॥

१४४७ क्रतुयज्ञेभ्यश्च । ४ । ३ । ६८ ॥

सोमसाध्येषु यागेष्वेतौ प्रसिद्धौ, तत्रान्यतरोपादानेन सिद्धे उभयोरुपादानसामर्थ्यादसोमका अपीह गृह्यन्ते । अग्निष्टोमस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः । वाजपेयिकः । पाकयज्ञिकः । नावयज्ञिकः । बहुवचनं स्वरूपविधिनिरासार्थम् । अनन्तोदात्तार्थ आरम्भः ॥

१४४७-पूर्वोक्त अर्थमें क्रतु और यज्ञवाचक शब्दके उत्तर ठञ् प्रत्यय हो, सोमसाध्य यागमें यह दोनों प्रसिद्ध हैं, उसमें अन्यतरके उपादानसे सिद्ध होनेपर दोनोंके उपादानके सामर्थ्यसे इस स्थानमें असोमकका भी ग्रहण है, जैसे-अग्निष्टोमस्य व्याख्यानः, तत्र भवो वा, इस विग्रहमें-आग्निष्टोमिकः । वाजपेयिकः । पाकयज्ञिकः । नावयज्ञिकः । स्वरूपविधिके निरासके निमित्त बहुवचनान्त प्रयोग है । अनन्तोदात्तार्थ इस सूत्रका आरंभ है ॥

१४४८ अध्यायेष्वेवर्षेः । ४ । ३ । ६९ ॥

ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रन्थवृत्तिभ्यो भवे व्याख्याने चाध्याये ठञ् स्यात् । वशिष्ठेन दृष्टो मन्त्रो वशिष्ठस्तस्य व्याख्यानस्तत्र भवो वा वाशिष्ठिकोऽध्यायः। अध्यायेषु किम्।वाशिष्ठी ऋक् ॥

१४४८-लक्षणाद्वारा व्याख्येयग्रंथवृत्ति ऋषिवाचक शब्दके उत्तर भवार्थमें और व्याख्यानार्थमें अध्यायवाच्य रहते ठञ् प्रत्यय हो, जैसे-वशिष्ठेन दृष्टो मंत्रो वाशिष्ठस्तस्य व्याख्यानस्तत्र भवो वा, इस विग्रहमें वाशिष्ठिकः अध्यायः ।

अध्यायार्थ न होनेपर 'वाशिष्ठी ऋक्' ऐसा होगा ॥

१४४९ पौरोडाशपुरोडाशात्ष्ठन् । ४ । ३ । ७० ॥

पुरोडाशसहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः ततः ष्ठन् पौरोडाशिकः।पुरोडाशिकः॥

१४४९-पुरोडाशसहचरित मंत्रविशेषको पुरोडाश कहतेहैं, उसका ही नाम पौरोडाश है, उस पौरोडाश शब्दके उत्तर ष्ठन् प्रत्यय हो, जैसे-पौरोडाशिकः । पुरोडाशिकः ॥

१४५० छन्दसो यदणौ ।४।३।७१॥

छन्दस्यः । छान्दसः ॥

१४५०-छन्दस् शब्दके उत्तर यत् और अण् प्रत्यय हो, जैसे-छन्दस्यः । छान्दसः ॥

१४५१ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्यानाट्ठक् । ४ । ३ । ७२ ॥

द्व्यचः । ऐष्टिकः । पाशुकः । ऋत् । चातुर्होतृकः । ब्राह्मणिकः । आर्चिकः । इत्यादि ॥

१४५१-दो अचोंसे युक्त शब्द, ऋकारान्त शब्द और ब्राह्मण, ऋच्, प्रथम, अध्वर, पुरश्चरण, नामन्, आख्यात, इन शब्दोंके उत्तर ठक् प्रत्यय हो । दोअच् जैसे-ऐष्टिकः । पाशुकः । ऋकारान्त जैसे-चातुर्होतृकः । ब्राह्मणिकः। आर्चिकः-इत्यादि ॥

१४५२ अणृगयनादिभ्यः ।४।३।७३ ॥

ठञादेरपवादः । आर्गयनः । औपनिषदः । वैयाकरणः ॥

१४५२-ऋगयनआदि शब्दोंके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय ठञादि प्रत्ययोंका विशेषक है, जैसे-आर्गयनः। औपनिषदः । वैयाकरणः-इत्यादि ॥

१४५३ तत आगतः । ४ । ३ । ७४॥

स्रुघ्नादागतः स्रौघ्नः ॥

१४५३-तत आगतः, अर्थात् उससे आया, इस अर्थमें अणादि प्रत्यय हो, जैसे-स्रुघ्नादागतः=स्रौघ्नः ॥

१४५४ ठगायस्थानेभ्यः ।४।३। ७५ ॥

शुल्कशालाया आगतः । शौल्कशालिकः ॥

१४५४-आयस्थानवाचक शब्दसे आगत अर्थमें ठक् प्रत्यय हो, जैसे-शुल्कशालाया आगतः, इस वाक्यमें-शौल्कशालिकः ॥

१४५५ शुण्डिकादिभ्योऽण् ।४।३।७६॥

आयस्थानठक्छादीनां चापवादः । शुण्डिकादागतः शौण्डिकः । कार्कणः । तैर्थः ॥

१४५५-शुण्डिकादि शब्दोंके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय आयस्थानवाचकसे विहित ठक् और छआदि प्रत्ययोंका विशेषक है, जैसे शुण्डिकादागतः=शौण्डिकः । कार्कणः । तैर्थः ॥

१४५६ विद्यायोनिसम्बन्धेभ्यो वुञ् । ४ । ३ । ७७ ॥

औपाध्यायकः । पैतामहकः ॥

१४५६-विद्या और योनिसंबन्धवाचक शब्दके उत्तर वुञ् प्रत्यय हो, जैसे-उपाध्यायादागतः=औपाध्यायकः । पैतामहकः । (१२४७) ॥

१४५७ ऋतष्ठञ् । ४ । ३ । ७८ ॥

वुञोपवादः । हौतृकम् । भ्रातृकम् ॥

१४५७-ऋकारान्त शब्दोंके उत्तर ठञ् प्रत्यय हो, यह ठञ् प्रत्यय वुञ् प्रत्ययका विशेषक है, जैसे-होतुरागतम्=हौतृकम् । भ्रातृकम् ॥

१४५८ पितुर्यच्च । ४ । ३ । ७९ ॥

चाद्ठञ्। रीङ् ऋतः। यस्येति लोपः। पित्र्यम्। पैतृकम् ॥

१४५८–पितृ शब्दके उत्तर यत् प्रत्यय हो, चकारसे ठञ् प्रत्यय हो, "रीङ् ऋतः १२३४", "यस्येति०३११" इन दो सूत्रोंमें एकसे रीङ् आदेश होगा, दूसरेसे ईकारका लोप होगा, जैसे–पितुरागतम्=पित्र्यम्, पैतृकम् ॥

१४५९ गोत्रादङ्कवत् । ४ । ३ । ८० ॥

बिदेभ्यः आगतं बैदम् । गार्गम् । दाक्षम् । औपगवकम् ॥

१४५९–आगत अर्थमें गोत्रप्रत्ययान्त शब्दोंके उत्तर अंकवत् प्रत्यय हो, अर्थात् अंक अर्थमें जो प्रत्यय गोत्रप्रत्ययान्तसे होताहै वह हो,जैसे–बिदेभ्य आगतम्=बैदम्। गार्गम्। दाक्षम् । औपगवकम् ॥

१४६० नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । ७ । ३ । ३० ॥

नञः परेषां शुच्यादिपञ्चानामादेरचो वृद्धिः पूर्वपदस्य तु वा ञिदादौ परे । आशौचम् । अशौचम् । आनैश्वर्यम् । अनैश्वर्यम् । आक्षैत्रज्ञम् । अक्षैत्रज्ञम् । आकौशलम् । अकौशलम् । आनैपुणम् । अनैपुणम् ॥

१४६०–ञित्आदि प्रत्यय परे रहते नञ्के परे स्थित शुचि, ईश्वर, क्षेत्रज्ञ, कुशल और निपुण शब्दके आद्यच्को नित्य और पूर्वपदके आद्यच्को विकल्प करके वृद्धि हो, जैसे–आशौचम्, अशौचम् । आनैश्वर्य्यम्, अनैश्वर्य्यम् । आक्षैत्रज्ञम्, अक्षैत्रज्ञम् । आकौशलम्, अकौशलम् । आनैपुणम्, अनैपुणम् ॥

१४६१ हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । ४ । ३ । ८१ ॥

समादागतं समरूप्यम् । विषमरूप्यम् । पक्षे गहादित्वाच्छः । समीयम् । विषमीयम् । देवदत्तरूप्यम् । दैवदत्तम् ॥

१४६१–हेतु और मनुष्यवाचक शब्दसे आगत अर्थमें विकल्प करके रूप्य प्रत्यय हो, जैसे–समादागतम्=समरूप्यम् । विषमरूप्यम् । पक्षमें गहादिगणके मध्यमें पठित होनेके कारण छ प्रत्यय होगा, जैसे–समीयम् । विषमीयम् । देवदत्तरूप्यम् । दैवदत्तम् ॥

१४६२ मयट् च । ४ । ३ । ८२ ॥

सममयम् । विषममयम् । देवदत्तमयम् ॥

१४६२–उक्त अर्थमें हेतु और मनुष्यावाचक शब्दसे मयट् प्रत्यय हो, जैसे–सममयम् । विषममयम् । देवदत्तमयम् ॥

१४६३ प्रभवति । ४ । ३ । ८३ ॥

तत इत्येव।हिमवतः प्रभवति हैमवती गंगा ॥

१४६३–उससे उत्पन्न होताहै, इस अर्थमें ठञ् प्रत्यय हो, जैसे–हिमवतः प्रभवति=हैमवती गङ्गा ॥

१४६४ विदूराञ्ञ्यः । ४ । ३ । ८४ ॥

विदूरात्प्रभवति वैदूर्यो मणिः ॥

१४६४–'प्रभवति' इस अर्थमें पञ्चम्यन्त विदूर शब्दसे ञ्य प्रत्यय हो, जैसे–विदूरात्प्रभवति=वैदूर्यो मणिः ॥

१४६५ तद्गच्छति पथिदूतयोः ४।३।८५॥

स्रुघ्नं गच्छति स्रौघ्नः पन्था दूतो वा ॥

१४६५–'गच्छति' इस अर्थमें द्वितीयान्त समर्थ प्रातिपदिकोंसे मार्ग और दूत वाच्य रहते अणआदि प्रत्यय हों, जैसे–स्रुघ्नं गच्छति, इस विग्रहमें स्रौघ्नः, अर्थात् पन्था (मार्ग) अथवा दूत ॥

१४६६ अभिनिष्क्रामति द्वारम् । ४ । ३ । ८६ ॥

तदित्येव । स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम् ॥

१४६६–'अभिनिष्क्रामति' इस अर्थमें द्वितीयान्त प्रातिपदिकके उत्तर अणआदि प्रत्यय हों, अभिनिष्क्रमणकर्त्ता द्वार हो तो, जैसे–स्रुघ्नम् अभिनिष्क्रामति, इस विग्रहमें–स्रौघ्नम् कान्यकुब्जद्वारम् ॥

१४६७ अधिकृत्य कृते ग्रन्थे।४।३।८७॥

तदित्येव । शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः । शारीरकं भाष्यमिति त्वभेदोपचारात् ॥

१४६७–तदधिकृत्य कृते ग्रन्थे,अर्थात् उसका अधिकार करके कृत ग्रन्थ, ऐसा अर्थ होनेपर द्वितीयान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे–शारीरकमधिकृत्य कृतो ग्रन्थः, इस विग्रहमें शारीरकीयः । 'शारीरकं भाष्यम्' यह प्रयोग तो अभेदोपचारके वशसे होताहै ॥

१४६८ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः । ४ । ३ । ८८ ॥

शिशूनां क्रन्दनं शिशुक्रन्दः तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः । यमस्य सभा यमसभम्। क्लीबत्वं निपातनात् । यमसभीयः । किरातार्जुनीयम् । इन्द्रजननादिराकृतिगणः । इन्द्रजननीयम् । विरुद्धभोजनीयम् ॥

१४६८–शिशुक्रन्द,यमसभ,द्वन्द्वसमासनिष्पन्न शब्द और इन्द्रजननादि शब्दोंके उत्तर'उसका अधिकार करके कृत ग्रन्थ' इस अर्थमें छ प्रत्यय हो,जैसे–शिशूनां क्रन्दनम्=शिशुक्रन्दः=तमधिकृत्य कृतो ग्रन्थः=शिशुक्रन्दीयः । यमस्य सभा=यमसभम्, इस स्थलमें क्लीबलिङ्गत्व निपातनसिद्ध है, यमसभीयः। किरातार्जुनीयम्। इन्द्रजननादि आकृतिगण है । इन्द्रजननीयम्। विरुद्धभोजनीयम् ॥

१४६९ सोऽस्य निवासः । ४ । ३ । ८९॥

स्रुघ्नो निवासोऽस्य स्रौघ्नः ॥

१४६९-सोऽस्य निवासः, अर्थात् वह इसका निवास है, इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-स्रुघ्नो निवासोऽस्य=स्रौघ्नः ॥

१४७० अभिजनश्च । ४ । ३ । ९० ॥

स्रुघ्नोऽभिजनोस्य स्रौघ्नः । यत्र स्वयं वसति स निवासः। यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः ॥

१४७०-सोऽस्याभिजनः, अर्थात् वह इसका अभिजन है, इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-स्रुघ्नोऽभिजनोस्य, इस विग्रहमें स्रौघ्नः । जिस स्थलमें स्वयं वास करताहै, उसका नाम निवास और जिस स्थलमें पूर्व पुरुषोंने वास कियाहै, उस स्थलको अभिजन कहतेहैं, यह पार्थक्य है ॥

१४७१ आयुधजीविभ्यश्छः पर्वते । ४ । ३ । ९१ ॥

पर्वतवाचिनः प्रथमान्तादभिजनशब्दादस्येत्यर्थे छः स्यात् । हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते हृद्गोलीयाः । आयुधेति किम्। ऋक्षोदः पर्वतोऽभिजनो येषां ते आर्क्षोदा द्विजाः॥

१४७१-पर्वतवाचक प्रथमान्त अभिजन शब्दके उत्तर अस्य, अर्थात् इसका, इस अर्थमें छ प्रत्यय हो, जैसे-हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनान्ते=हृद्गोलीयाः ।

आयुधजीवी क्यों कहा ? तो आयुधजीवीसे भिन्नार्थमें छ प्रत्यय नहीं हो, जैसे-ऋक्षोदः पर्वतोऽभिजनो येषां ते= आर्क्षोदाः द्विजाः ॥

१४७२शण्डिकादिभ्यो ञ्यः।४।३।९२॥

शण्डिकोऽभिजनोस्य शाण्डिक्यः ॥

१४७२-'सोऽस्याभिजनः' इस अर्थमें शण्डिकादि शब्दोंके उत्तर ञ्य प्रत्यय हो, जैसे-शण्डिकोऽभिजनोऽस्य,इस विग्रहमें शाण्डिक्यः ॥

१४७३ सिन्धुतक्षशिलादिभ्योऽणञौ । ४ । ३ । ९३ ॥

सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेर्थे । सैन्धवः । तक्षशिला नगरी अभिजनोऽस्य ताक्षशिलः ॥

१४७३-प्रागुक्त अर्थमें सिन्धु आदि शब्दोंके उत्तर अण् प्रत्यय और तक्षशिलादि शब्दोंके उत्तर अञ् प्रत्यय हो, जैसे-सैन्धवः । तक्षशिला नगरी अभिजनोऽस्य=ताक्षशिलः ॥

१४७४ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः । ४ । ३ । ९४ ॥

तूदी अभिजनोऽस्य तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ॥

१४७४-तूदी, शलातुर, वर्म्मती और कूचवार शब्दोंके उत्तर यथाक्रम ढक्, छण्, ढञ् और यक् प्रत्यय हों, जैसे-तूदी अभिजनोऽस्य=तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ॥

१४७५ भक्तिः । ४ । ३ । ९५ ॥

सोस्येत्यनुवर्तते। भज्यते सेव्यते इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः ॥

१४७५-'भक्तिः अस्य' अर्थात् इसकी भक्ति, इस अर्थमें प्रथमान्त समर्थ प्रातिपदिकसे अणादि प्रत्यय हों, जैसे-भज्यते सेव्यते इति भक्तिः,-स्रुघ्नो भक्तिरस्य=स्रौघ्नः ॥

१४७६ अचित्तादेशकालाट्ठक् । ४ । ३ । ९६ ॥

अपूपा भक्तिरस्य आपूपिकः । पायसिकः । अचित्तात्किम् । दैवदत्तः । अदेशात्किम । स्रौघ्नः। अकालात्किम् । ग्रैष्मः ॥

१४७६- चेतन न हो और देश कालवाचक न हो, ऐसा जो शब्द उसके उत्तर ठक् प्रत्यय हो, जैसे-अपूपा भक्तिरस्य आपूपिकः । पायसिकः ।

चेतन होनेपर ठक् प्रत्यय न होगा,जैसे-दैवदत्तः ।

देश होनेपर जैसे-स्रौघ्नः ।

होनेपर जैसे-ग्रैष्मः ॥

१४७७ महाराजाट्ठञ् । ४ । ३ । ९७ ॥

माहाराजिकः ॥

१४७७-महाराज शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-माहाराजिकः ॥

१४७८वासुदेवार्जुनाभ्यां वुन्।४।३।९८॥

वासुदेवकः । अर्जुनकः ॥

१४७८-वासुदेव और अर्जुन शब्दके उत्तर वुन् प्रत्यय हो, यह छ अणका अपवाद है, जैसे-वासुदेवकः । अर्जुनकः

१४७९ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । ४ । ३ । ९९ ॥

अणोपवादः । परत्वाद्वृद्धाच्छं बाधते । ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः । नाकुलकः। बहुलग्रहणान्नेह । पाणिनो भक्तिरस्य पाणिनीयः॥

१४७९-गोत्रप्रत्ययान्त और क्षत्रियवाचक शब्दोंके उत्तर बहुल करके वुञ् प्रत्यय हो, यह वुञ् प्रत्यय अण् प्रत्ययका अपवादक है, परत्वके कारण "वृद्धाच्छः" इस सूत्रसे विहित छ प्रत्ययको भी बाधताहै, जैसे-ग्लुचुकायनिर्भक्तिरस्य= ग्लौचुकायनकः । नाकुलकः ।

बहुल शब्दका ग्रहण करनेसे सर्वत्र वुञ् प्रत्यय नहीं होगा, अत एव पाणिनो भक्तिरस्य=पाणिनीयः, इस स्थलमें वुञ् प्रत्यय नहीं हुआ ॥

१४८० जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने।४।३।१००।

जनपदस्वामिवाचिनां बहुवचने जनपदवाचिनां समानश्रुतीनां जनपदवत्सर्वं स्यात्प्रत्ययः प्रकृतिश्च । जनपदतदवध्योश्चेति प्रकरणे ये प्रत्यया उक्तास्तेऽत्रातिदिश्यन्ते । अङ्गा जनपदो भक्तिरस्याङ्गकः । अङ्गाः क्षत्रिया भक्तिरस्याङ्गकः । जनपदिनां किम् । पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालाः । जनपदेनेति किम् । पौरवो राजा भक्तिरस्य पौरवीयः ॥

१४८०–बहुवचनमें जनपदवाचक शब्दके समान जो जनपदस्वामिवाचक शब्द उसको जनपदवाचक शब्दके समान प्रकृति और प्रत्यय हो । "जनपदतदवध्योश्च१३४८" इस सूत्रप्रकरणमें जो जो प्रत्यय उक्त हुए हैं, उन सबका इस स्थलमें अतिदेश होताहै, अर्थात् जनपद स्वामिवाचक बहुवचनान्त अङ्ग शब्दके उत्तर इस सूत्रसे अण् प्रत्ययकी प्राप्तिमें वुञ् प्रत्ययका अतिदेश होताहै, जैसे–अङ्गा जनपदो भक्तिरस्य=आङ्गकः । अङ्गाः क्षत्रिया भक्तिरस्य=आङ्गकः ।

जनपदस्वामी न होनेपर, जैसे–पञ्चाला ब्राह्मणा भक्तिरस्य=पाञ्चालः । जनपदके समान शब्द न होनेपर, जैसे–पौरवो राजा भक्तिरस्य=पौरवीयः ॥

१४८१ तेन प्रोक्तम् । ४ । ३ । १०१ ॥

पाणिनिना प्रोक्तं पाणिनीयम् ॥

१४८१–'प्रोक्तम्' इस अर्थमें तृतीयान्त प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे–पाणिनिना प्रोक्तम्=पाणिनीयम् ॥

१४८२ तित्तिरिवरतन्तुखण्डिकोखाच्छण् । ४ । ३ । १०२ ॥

छन्दोब्राह्मणानीति तद्विषयता । तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः ॥

१४८२–"छन्दोब्राह्मणानि १३७८" इस सूत्रसे प्रोक्तप्रत्ययान्त छन्दोवाचक, ब्राह्मणवाचक शब्दको अध्येतृ, वेदितृ प्रत्ययविषयत्व है, तित्तिरि, वरतन्तु, खण्डिक और उख शब्दके उत्तर प्रोक्तार्थमें छण् प्रत्यय हो, जैसे–तित्तिरिणा प्रोक्तमधीयते, इस विग्रहमें–तैत्तिरीयाः ॥

१४८३ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः । ४ । ३ । १०३ ॥

काश्यपेन प्रोक्तमधीयते काश्यपिनः ॥

१४८३–काश्यप, कौशिक इन दो ऋषिवाचक शब्दोंके उत्तर प्रोक्त अर्थमें णिनि प्रत्यय हो, जैसे–काश्यपेन प्रोक्तमधीयते=काश्यपिनः ॥

१४८४ कलापिवैशम्पायनान्तेवासिभ्यश्च । ४ । ३ । १०४ ॥

कलाप्यन्तेवासिभ्यः–हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः । वैशम्पायनान्तेवासिभ्यः–आलम्बिनः ॥

१४८४–कलापी और वैशम्पायन ऋषिके अन्तेवासी, अर्थात् छात्रवाचक शब्दके उत्तर प्रोक्त अर्थमें णिनि प्रत्यय हो, कलाप्यन्तेवासीके उत्तर, जैसे=हरिद्रुणा प्रोक्तमधीयते=हारिद्रविणः । वैशम्पायनान्तेवासीके उत्तर, जैसे–आलम्बेन प्रोक्तमधीयते=आलम्बिनः ॥

१४८५ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु। ४ । ३ । १०५ ॥

तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात् । यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवन्ति । पुराणेन चिरन्तनेन मुनिना प्रोक्ताः।भल्लु,भाल्लविनः। शाट्यायन,‌शाट्यायनिनः। कल्पे–पिंगेन प्रोक्तः पैंगी कल्पः। पुराणेति किम् । याज्ञवल्कानि ब्राह्मणानि । आश्मरथः कल्पः । अणि आपत्यस्येति यलोपः ॥

१४८५–जो प्रोक्त हो वह यदि पुराणप्रोक्त ब्राह्मण और कल्प हो, तो तृतीयान्त पदके उत्तर प्रोक्तार्थमें णिनि प्रत्यय हो, ब्राह्मणमें यथा–पुराणेन चिरन्तनेन मुनिना प्रोक्ताः, भल्लु–भाल्लविनः । शाट्यायन–शाट्यायनिनः । कल्पमें–पिङ्गेन प्रोक्तः=पैङ्गी कल्पः ।

पुराण क्यों कहा ? तो याज्ञवल्कानि ब्राह्मणानि । आश्मरथः कल्पः, यहां नहीं हो, यहां अण् प्रत्यय परे रहते "आपत्यस्य० १०८२" इस सूत्रसे यकारका लोप हुआहै ॥

१४८६ शौनकादिभ्यश्छन्दसि । ४ । ३ । १०६ ॥

छन्दस्यभिधेये एभ्यो णिनिः । शौनकेन प्रोक्तमधीयते शौनकिनः ॥

१४८६–वेद अभिधेय (वाच्य) होनेपर शौनकादि शब्दोंके उत्तर प्रोक्त अर्थमें णिनि प्रत्यय हो, जैसे–शौनकेन प्रोक्तमधीयते, इस विग्रहमें–शौनकिनः ॥

१४८७ कठचरकाल्लुक्। ४ । ३।१०७॥

आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात् । कठेन प्रोक्तमधीयते कठाः । चरकाः ॥

१४८७–कठ और चरक शब्दके उत्तर प्रोक्त अर्थमें विहित प्रत्ययका लुक् हो, जैसे–कठेन प्रोक्तमधीयते, इस विग्रहमें–कठाः । चरकाः ॥

१४८८ कलापिनोऽण् । ४।३ । १०८ ॥

कलापिना प्रोक्तमधीयते कालापाः ॥ नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापि-

कौथुमितैतिलिजाजलिलांगलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानाट्टिलोपः ॥

१४८८-' प्रोक्तमधीयते ' इस अर्थमें तृतीयान्त कलापिन् शब्दके उत्तर अण् प्रत्यय हो, जैसे-कलापिना प्रोक्तमधीयते, इस विग्रहमें-कालापाः ।

नकारान्त शब्दकी टिके लोपके विषयमें सब्रह्मचारिन्, पीठसर्पिन्, कलापिन्, कौथुमिन्, तैतिलिन्, जाजलिन्, लाङ्गलिन्, शिलालिन्, शिखंडिन्, सूकरसद्मन्, सुपर्वन्, इन शब्दोंके उपसंख्यानके कारण यहां अण् प्रत्यय परे रहते टिका लोप हुआ ॥

१४८९ छगलिनो ढिनुक् ।४।३।१०९॥

छगलिना प्रोक्तमधीयते छागलेयिनः ॥

१४८९-तृतीयान्त छगलिन् शब्दके उत्तर 'प्रोक्तमधीयते' इस अर्थमें ढिनुक् प्रत्यय हो, जैसे-छगलिना प्रोक्तमधीयते= छागलेयिनः ॥

१४९० पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । ४ । ३ । ११० ॥

पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः ॥

१४९०-पूर्वोक्त अर्थमें भिक्षु वाच्य होनेपर पराशर्य शब्दके उत्तर और नटसूत्र अर्थमें शिलालिन् शब्दके उत्तर णिनि प्रत्यय हो, जैसे-पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते=पाराशरिणो भिक्षवः । शैललिना प्रोक्तं नटसूत्रमधीयते=शैलालिनो नटाः ॥

१४९१ कर्मन्दकृशाश्वादिनिः । ४ । ३ । १११ ॥

भिक्षुनटसूत्रयोरित्येव । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः ॥

१४९१-भिक्षु अर्थमें तृतीयान्त कर्मन्द शब्दके उत्तर और नटसूत्र अर्थमें तृतीयान्त कृशाश्व शब्दके उत्तर 'प्रोक्तमधीयते' इस अर्थमें इनि प्रत्यय हो, जैसे-कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते= कर्मन्दिनो भिक्षवः । कृशाश्वेन प्रोक्तं नटसूत्रमधीयते=कृशाश्विनो नटाः ॥

१४९२ तेनैकदिक् । ४ । ३ । ११२ ॥

सुदाम्ना अद्रिणा एकदिक् सौदामनी ॥

१४९२-एकदिक् अर्थात् तुल्यदिक् अर्थमें तृतीयान्त समर्थ प्रातिपदिकके उत्तर अणादि प्रत्यय हों, जैसे-सुदाम्ना अद्रिणा एकदिक्=सौदामनी ॥

१४९३ तसिश्च । ४ । ३ । ११३ ॥

स्वरादिपाठादव्ययत्वम् । पीलुमूलेन एकदिक् पीलुमूलतः ॥

१४९३-एकदिक् अर्थमें तृतीयान्त पदके उत्तर तसि प्रत्यय भी हो । स्वरादिगण (४४७) में तसि प्रत्ययका पाठ है, इससे तसि प्रत्ययान्त शब्दको अव्ययत्व होताहै, यथा- पीलुमूलेन एकदिक्=पीलुमूलतः ॥

१४९४ उरसो यच्च । ४ । ३ । ११४ ॥

चात्तसिः । अणोऽपवादः । उरसा एकदिक् उरस्यः । उरस्तः ॥

१४९४-तृतीयान्त उरस् शब्दके उत्तर एकदिक् अर्थमें यत् प्रत्यय और चकारसे तसि प्रत्यय हो, यह प्रत्यय अण् प्रत्ययके अपवाद हैं । यथा-उरसा एकदिक्=उरस्यः, उरस्तः ॥

१४९५ उपज्ञाते । ४ । ३ । ११५ ॥

तेनेत्येव । पाणिनिना उपज्ञातं पाणिनीयम्॥

१४९५-उपज्ञात अर्थमें तृतीयान्त समर्थ प्रातिपदिकके उत्तर यत् प्रत्यय हो, यथा-पाणिनिना उपज्ञातम्= पाणिनीयम् ॥

१४९६ कृते ग्रन्थे । ४ । ३ । ११६ ॥

वररुचिना कृतो वाररुचो ग्रन्थः ॥

१४९६-कृत (कियागया) अर्थमें परन्तु जो कियाजाय सो ग्रन्थ हो तो तृतीयान्त समर्थ प्रातिपदिकके उत्तर अण् प्रत्यय हो, यथा-वररुचिना कृतः=वाररुचः ग्रन्थः ॥

१४९७ संज्ञायाम् । ४ । ३ । ११७ ॥

तेनेत्येव । अग्रन्थार्थमिदम् । मक्षिकाभिः कृतं माक्षिकं मधु ॥

१४९७-कृत अर्थमें संज्ञा होनेपर तृतीयान्त प्रातिपदिकके उत्तर अण् प्रत्यय हो, यह सूत्र ग्रन्थभिन्नार्थ है, अर्थात् संज्ञामें ग्रन्थ अर्थ होनेपर अण् प्रत्यय न हो, किन्तु तद्भिन्न अर्थमें अण् प्रत्यय हो, यथा-मक्षिकाभिः कृतम्=माक्षिकम्, अर्थात् मधु ॥

१४९८ कुलालादिभ्यो वुञ् ।४।३।११८॥

तेन कृते संज्ञायाम् । कुलालेन कृतं कौलालकम् । वारुडकम् ॥

१४९८-कृत अर्थ होनेपर संज्ञामें तृतीयान्त कुलालादि-शब्दोंके उत्तर वुञ् प्रत्यय हो, यथा-कुलालेन कृतम्=कौलालकम् । वारुडकम् ।

१४९९ क्षुद्राभ्रमरवटरपादपादञ् । ४ । ३ । ११९ ॥

तेन कृते संज्ञायाम् । क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ॥

१४९९-कृत अर्थमें संज्ञा होनेपर तृतीयान्त क्षुद्रा, भ्रमर, वटर और पादप शब्दके उत्तर अञ् प्रत्यय हो, यथा-क्षुद्राभिः कृतम्=क्षौद्रम् । भ्रमरेण कृतम्=भ्रामरम् । वटरेण (कुक्कुटेन) कृतम्=वाटरम् । पादपैः कृतम्=पादपम्॥

१५०० तस्येदम् । ४ । ३ । १२० ॥

उपगोरिदमौपगवम् ॥ वहेस्तुरणिट् च ॥ * ॥ संवोढुः स्वं सांवहित्रम् ॥ अग्नीधः शरणे रण्

भं च ॥ * ॥ अग्निमिन्धे अग्नीत्, तस्य स्थानमाग्नीध्रम्, तात्स्थ्यात्सोप्याग्नीध्रः ॥ समिधामाधाने षेण्यण् ॥ * ॥ सामिधेन्यो मन्त्रः । सामिधेनी । ऋक् ॥

१५००–उसका यह है, इस अर्थमें षष्ठ्यन्त समर्थ प्रातिपदिकोंसे शैषिक प्रकरणमें कहे हुए प्रत्यय हों, यथा–उपगोरिदम्=औपगवम् ।

तृन्, तृच्–प्रत्ययान्त वह धातुके उत्तर अण् प्रत्यय और वह धातुको इट्का आगम हो * यथा–संवोढुः स्वम्=सांवहित्रम् ।

अग्नीध् शब्दके उत्तर शरण (घर) अर्थमें रण् प्रत्यय हो और अग्नीध् शब्दको भसंज्ञा हो * यथा–अग्निमिन्धे–अग्नीत्, तस्य स्थानम्=आग्नीध्रम् । तात्स्थ्यहेतु (उस स्थानमें रहनेके हेतु) से वह (अग्निको दीप्त करनेवाला) भी आग्नीध्र कहाजाताहै ।

आधान अर्थमें समिध् शब्दके उत्तर षेण्यण् प्रत्यय हो * यथा–सामिधेन्यः मन्त्रः । सामिधेनी ऋक् ॥

१५०१ रथाद्यत् । ४ । ३ । १२१ ॥

रथ्यं चक्रम् ॥

१५०१–रथ शब्दके उत्तर यत् प्रत्यय हो, यथा–रथ्यं चक्रम् ॥

१५०२ पत्रपूर्वादञ् । ४ । ३ । १२२ ॥

पत्रं वाहनम् । अश्वरथस्येदमाश्वरथम् ॥

१५०२–पत्र, अर्थात् वाहनवाचकशब्दपूर्वक रथ शब्दके उत्तर अञ् प्रत्यय हो, यथा–अश्वरथस्य इदम्=आश्वरथम् ॥

१५०३ पत्राध्वर्युपरिषदश्च।४।३।१२३॥

अञ् ॥ पत्राद्वाह्ये ॥ * ॥ अश्वस्येदं वहनीयमाश्वम् । आध्वर्यवम् । पारिषदम् ॥

१५०३–पत्रवाचक, अध्वर्यु और परिषद् शब्दके उत्तर अञ् प्रत्यय हो ।

पत्रवाचकसे वाह्य अर्थमें हो * यथा–अश्वस्येदं वहनीयम्=आश्वम् । आध्वर्यवम् । पारिषदम् ॥

१५०४ हलसीराट्ठक् । ४ । ३ । १२४॥

हालिकम् । सैरिकम् ॥

१५०४–हल और सीर शब्दके उत्तर ठक् प्रत्यय हो, यथा–हालिकम् । सैरिकम् ॥

१५०५ द्वन्द्वाद्वुन्वैरमैथुनिकयोः । ४ । ३ । १२५ ॥

काकोलूकिका । कुत्सकुशिकिका ॥ वैरे देवासुरादिभ्यः प्रतिषेधः ॥ * ॥ दैवासुरम् ॥

१५०५–वैर और मैथुनिका (स्त्रीपुरुषका कर्म) अर्थमें द्वन्द्वसमासनिष्पन्न शब्दके उत्तर वुन् प्रत्यय हो, यथा–काकोलूकिका । कुत्सकुशिकिका ।

वैर अर्थमें द्वन्द्वसमासनिष्पन्न देवासुर शब्दके उत्तर वुन् प्रत्यय न हो * यथा–दैवासुरम् ॥

१५०६ गोत्रचरणाद्वुञ् । ४ । ३ । १२६॥

औपगवकम् ॥ चरणाद्धर्माम्नाययोरिति वक्तव्यम् ॥ * ॥ काठकम् ॥

१५०६–गोत्रप्रत्ययान्त और चरणवाचक शब्दके उत्तर वुञ् प्रत्यय हो, यथा–औपगवकम् ।

चरणवाचक शब्दके उत्तर धर्म, और आम्नाय अर्थात् वेद अर्थमें उक्त प्रत्यय हो * यथा–काठकम् ॥

१५०७ सङ्घाङ्कलक्षणेष्वञ्यञिञामण् । ४ । ३ । १२७ ॥

घोषग्रहणमपि कर्तव्यम् ॥ * ॥ अञ्, बैदः सङ्घोऽङ्को घोषो वा।बैदं लक्षणम् । यञ्, गार्गः । गार्गम्। इञ्, दाक्षः। दाक्षम्। परम्परासम्बन्धोऽङ्कः। साक्षात्तु लक्षणम् ॥

१५०७ संघ, अंक और लक्षण अर्थमें अञ्, यञ् और इञ्प्रत्ययान्त षष्ठ्यन्त समर्थ शब्दोंके उत्तर अण् प्रत्यय हो ।

इस सूत्रमें घोष शब्दका भी ग्रहण करना चाहिये* अञ् जैसे–बैदः संघोंको घोषो वा । बैदं लक्षणम् । यञ् यथा–गार्गः । गार्गम्। इञ् जैसे–दाक्षः । दाक्षम् । परम्परासम्बन्धको 'अंक' कहतेहैं और साक्षात् सम्बन्धको ' लक्षण ' कहतेहैं ॥

१५०८ शाकलाद्वा । ४ । ३ । १२८ ॥

अण् वोक्तेर्थे । पक्षे चरणत्वाद्वुञ् । शाकलेन प्रोक्तमधीयते शाकलास्तेषां सङ्घोऽङ्को घोषो वा शाकलः । शाकलकः । लक्षणे क्लीबता ॥

१५०८–पूर्वोक्त अर्थमें शाकल शब्दके उत्तर विकल्पसे अण् प्रत्यय हो, पक्षमें चरणवाचक शब्दके उत्तर वुञ् प्रत्यय होगा, यथा–शाकलेन प्रोक्तमधीयते शाकलाः, तेषां संघोंको घोषो वा, इस विग्रहमें-शाकलः । पक्षमें शाकलकः । लक्षण अर्थमें नपुंसकलिङ्ग होताहै ॥

१५०९ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ् ञ्यः । ४ । ३ । १२९ ॥

छन्दोगानां धर्म आम्नायो वा छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम्।नाट्यम्॥ चरणाद्धर्माम्नाययोरित्युक्तं तत्साहचर्यान्नटशब्दादपि तयोरेव ॥

१५०९–छन्दोग, औक्थिक, याज्ञिक, बह्वृच और नट शब्दके उत्तर ञ्य प्रत्यय हो, यथा–छन्दोगानां धर्म आम्नायो वा=छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् ।

चरणवाचक शब्दके उत्तर धर्म और आम्नाय अर्थमें ञ्य प्रत्यय हो, यह पहले कह आये हैं, उसके साहचर्यसे नट शब्दके उत्तर भी धर्म और आम्नाय अर्थमें ही ञ्य प्रत्यय होताहै ॥

१५१० न दण्डमाणवान्तेवासिषु । ४ । ३ । १३० ॥

दण्डप्रधाना माणवा दण्डमाणवास्तेषु शिष्येषु च वुञ् न स्यात्। दाक्षा दण्डमाणवाः शिष्या वा॥

१५१०--दण्डप्रधान जो माणव उसको दंडमाणव कहतेहैं, दंडमाणव और शिष्य अर्थमें वुञ् प्रत्यय न हो, यथा--दाक्षा दण्डमाणवाः शिष्या वा ॥

१५११ रैवतिकादिभ्यश्छः ।४।३।१३१।

तस्येदमित्यर्थे । वुञोपवादः । रैवतिकीयः । बैजवापीयः ॥

१५११--'यह उसका है' इस अर्थमें रैवतिकादि शब्दोंके उत्तर छ प्रत्यय हो, यह छ प्रत्यय वुञ्का अपवाद है, यथा--रैवतिकीयः । बैजवापीयः ॥

१५१२ कौपिञ्जलहास्तिपदादण् । ४ । ३ । १३२ ॥ (वा १९१८) ॥

कुपिञ्जलस्यापत्यम् । इहैव, निपातनादण् तदन्तात्पुनरण् । कौपिञ्जलः । गोत्रवुञोऽपवादः । हस्तिपादस्यापत्यं हास्तिपदस्तस्यायं हास्तिपदः।

१५१२--कौपिञ्जल और हास्तिपद शब्दके उत्तर अण् प्रत्यय हो । कुपिञ्जलस्यापत्यम्, इस विग्रहमें इसी सूत्रमें निपातनसे अण् प्रत्यय होकर तदन्तके उत्तर फिर अण् प्रत्यय हुआ, यथा--कौपिञ्जलः । यह अण् प्रत्यय, गोत्रवाचक शब्दके उत्तर वुञ् प्रत्ययका अपवाद है । हस्तिपादस्यापत्यम्--हास्तिपदः, तस्यायम्=हास्तिपदः । (यह प्रक्षिप्त सूत्र है, ऐसा कैयटका मत है) ॥

१५१३ आथर्वणिकस्येकलोपश्च । ४ । ३ । १३३ ॥

चादण् । आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा । चरणाद्वुञोपवादः ॥

॥ समाप्ताः शैषिकाः ॥

१५१३--आथर्वणिक शब्दके उत्तर अण् प्रत्यय हो और इकका लोप हो । यह सूत्र चरणवाचक शब्दके उत्तर विहित वुञ् प्रत्ययका अपवाद है, यथा--आथर्वणिकस्यायम्=आथर्वणो धर्म आम्नायो वा ॥

॥ इति शैषिकप्रकरणम् ॥

अथ प्राग्दीव्यतीयप्रकरणम् ।

१५१४ तस्य विकारः । ४ । ३।१३४॥

अश्मनो विकारे टिलोपो वक्तव्यः ॥ * ॥ अश्मनो विकार आश्मः । भास्मनः । मार्तिकः ॥

१५१४--षष्ठ्यन्त प्रातिपदिकके उत्तर विकार अर्थमें अण् आदि प्रत्यय हों । विकारार्थक प्रत्यय परे रहते अश्मन् शब्दकी टिका लोप हो* (जहांतक विशेष कथन न हो वहांतक विकार अर्थ जानना) अश्मनो विकारः=आश्मः । भास्मनः । मार्तिकः ॥

१५१५ अवयवे च प्राण्योषधिवृक्षेभ्यः । ४ । ३ । १३५ ॥

चाद्विकारे । मयूरस्यावयवो विकारो वा मायूरः । मौर्वं काण्डं भस्म वा । पैप्पलम् ॥

१५१५--प्राणी, ओषधि और वृक्षवाचक शब्दके उत्तर अवयव अर्थमें और विकार अर्थमें अण् आदि प्रत्यय हों, जैसे--मयूरस्यावयवो विकारो वा, इस विग्रहमें--मायूरः । मौर्वं कांडं भस्म वा । पैप्पलम् ॥

१५१६ बिल्वादिभ्योऽण् । ४।३।१३६॥

बैल्वम् ॥

१५१६--बिल्वादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे--बैल्वम्, अर्थात् बिल्वका विकार वा अवयव ॥

१५१७ कोपधाच्च । ४ । ३ । १३७ ॥

अण् । अञोपवादः । तर्कु, तार्कवम् । तैत्तिडीकम् ॥

१५१७--ककारोपध शब्दके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय अञ् प्रत्ययका अपवाद है, जैसे--तार्कवम् । तैत्तिडीकम् ॥

१५१८ त्रपुजतुनोः षुक् । ४।३।१३८॥

आभ्यामण् स्याद्विकारे एतयोः षुगागमश्च । त्रापुषम् । जातुषम् ॥

१५१८--त्रपु और जतु शब्दके उत्तर विकार अर्थमें अण् प्रत्यय हो और षुक्का आगम हो, जैसे--त्रापुषम् । जातुषम् ॥

१५१९ ओरञ् । ४ । ३ । १३९ ॥

दैवदारवम् । भाद्रदारवम् ॥

१५१९--उकारान्त प्रातिपदिकके उत्तर विकार अर्थमें अञ् प्रत्यय हो, जैसे--दैवदारवम् । भाद्रदारवम् ।

१५२० अनुदात्तादेश्च । ४। ३ । १४०॥

दाधित्थम् । कापित्थम् ॥

१५२०--अनुदात्तादि प्रातिपदिकके उत्तर भी अञ् प्रत्यय हो, जैसे--दाधित्थम् । कापित्थम् ॥

१५२१ पलाशादिभ्यो वा ।४।३।१४१॥

पालाशम् । कारीरम् ॥

१५२१--अवयव और विकार अर्थमें पलाशादि शब्दोंके उत्तर अञ् प्रत्यय हो, जैसे--पालाशम् । खादिरम् । कारीरम् ॥

१५२२ शम्याः ष्लञ् । ४ । ३ । १४२॥

शामीलं भस्म । षित्त्वान्ङीष् । शामीली स्रुक् ॥

१५२२–शमी शब्दके उत्तर ष्लञ् प्रत्यय हो, जैसे–शामीलं भस्म, षित्वके कारण स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे–शामीली स्रुक् ॥

१५२३ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । ४ । ३ । १४३ ॥

प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः । अश्ममयम् । आश्मनम् । अभक्ष्येत्यादि किम् । मौद्गः सूपः । कार्पासमाच्छादनम् ॥

१५२३–भाषा (लोक) में विकार और अवयव अर्थ होनेपर प्रकृतिमात्रके उत्तर विकल्प करके मयट् प्रत्यय हो, भक्ष्य और आच्छादन अर्थ छोडकर, जैसे–अश्मनो विकारः अवयवो वा=अश्ममयम्।आश्मनम्।भक्ष्य और आच्छादन अर्थ होनेपर, जैसे–मौद्गः सूपः । कार्पासम् आच्छादनम् ॥

१५२४ नित्यं वृद्धशरादिभ्यः । ४ । ३ । १४४ ॥

आम्रमयम् । शरमयम् ॥ एकाचो नित्यम्॥*॥ त्वङ्मयम् । वाङ्मयम् । कथं तर्हि आप्यमम्मयमिति । तस्येदमित्यण्णन्तात्स्वार्थे ष्यञ् ॥

१५२४–वृद्धसंज्ञक और शरादि शब्दोंके उत्तर नित्य मयट् प्रत्यय हो, जैसे–आम्रस्य विकारोऽवयवो =आम्रमयम् । शरमयम् ।

एक अच्से युक्त शब्दके उत्तर नित्य मयट् हो * जैसे–त्वङ्मयम् । वाङ्मयम् । शरमयम् । इस सूत्रके रहते'आप्यम्, अम्मयम्' ऐसे पद किस प्रकार हुए ? इसपर कहतेहैं कि, इस स्थानमें "तस्येदम् १५००" इस सूत्रसे विहित अण्प्रत्ययान्तके उत्तर स्वार्थमें ष्यञ् प्रत्यय हुआहै ॥

१५२५ गोश्च पुरीषे । ४ । ३ । १४५ ॥

गोः पुरीषं गोमयम् ॥

१५२५–पुरीष (विष्ठा) अर्थमें गो शब्दके उत्तर मयट् प्रत्यय हो, जैसे–गोः पुरीषम्=गोमयम् ॥

१५२६ पिष्टाच्च । ४ । ३ । १४६ ॥

मयट् स्याद्विकारे । पिष्टमयं भस्म । कथं पैष्टी सुरेति । सामान्यविवक्षायां तस्येदमित्यण्॥

१५२६–विकार अर्थमें पिष्ट शब्दके उत्तर मयट् प्रत्यय हो, जैसे–पिष्टमयं भस्म, तो फिर 'पैष्टी सुरा' यहां पैष्टी पद किस प्रकारसे सिद्ध हुआहै ? इसपर कहतेहैं कि, इस स्थलमें सामान्यविवक्षामें "तस्येदम् १५००" इस सूत्रसे अण् प्रत्यय हुआहै ॥

१५२७ संज्ञायां कन् । ४ । ३ । १४७॥

पिष्टादित्येव । पिष्टस्य विकारविशेषः पिष्टकः । पूपोऽपूपः पिष्टकः स्यात् ॥

१५२७–संज्ञामें पिष्ट शब्दके उत्तर कन् प्रत्यय हो, जैसे–पिष्टस्य विकारविशेषः=पिष्टकः। 'पूपोऽपूपः पिष्टकः स्यात्' इत्यमरः ॥

१५२८ व्रीहेः पुरोडाशे । ४ । ३।१४८॥

मयट् स्यात् । बिल्वाद्यणोपवादः । व्रीहिमयः पुरोडाशः । व्रैहमन्यत् ॥

१५२८–पुरोडाश अर्थमें व्रीहि शब्दके उत्तर मयट् प्रत्यय हो, यह बिल्वादि (१५१६) शब्दके उत्तर विहित अणका अपवाद है, जैसे–व्रीहिमयः पुरोडाशः, अन्य अर्थमें व्रैहम् ॥

१५२९ असंज्ञायां तिलयवाभ्याम् । ४ । ३ । १४९ ॥

तिलमयम् । यवमयम् । संज्ञायां तु तैलम् । यावकः ॥

१५२९–असंज्ञामें तिल और यव शब्दके उत्तर मयट् प्रत्यय हो, जैसे–तिलमयम् । यवमयम् । संज्ञा होनेपर नहीं होगा, जैसे–तैलम् । यावकः ॥

१५३० तालादिभ्योण् । ४ । ३ ।१५२॥

अञ्मयटोरपवादः ॥ तालाद्धनुषि ॥*॥ तालं धनुः । अन्यत्तालमयम् । ऐन्द्रायुधम् ॥

१५३०–तालादि शब्दके उत्तर अण् प्रत्यय हो । यह अञ् और मयट् प्रत्ययका अपवाद है ।

ताल शब्दके उत्तर धनुष् अर्थमें मयट् प्रत्यय हो * जैसे–तालं धनुः । अन्य अर्थमें–तालमयम् । ऐन्द्रायुधम् ॥

१५३१ जातरूपेभ्यः परिमाणे । ४ । ३ । १५३ ॥

अण् । बहुवचनात्पर्यायग्रहणम् । हाटकः । तापनीयः । सौवर्णो वा निष्कः । परिमाणे किम् । हाटकमयी यष्टिः ॥

१५३१–परिमाण अर्थमें जातरूप (सुवर्ण) वाचक शब्दके उत्तर अण् प्रत्यय हो । इस स्थलमें बहुवचनसे जातरूपके पर्यायका ग्रहण होताहै, जैसे–हाटकः, तापनीयः, सौवर्णो वा निष्कः । परिमाण अर्थ न होनेपर 'हाटकमयी यष्टिः' ऐसा रूप होगा ॥

१५३२ प्राणिरजतादिभ्योऽञ् । ४ । ३ । १५४ ॥

शौकम् । बाकम् । राजतम् ॥

१५३२–प्राणिन् और रजतादि शब्दोंके उत्तर विकार अर्थ और अवयव अर्थमें अञ् प्रत्यय हो, जैसे–शौकम् । बाकम् । राजतम् ।

१५३३ ञितश्च तत्प्रत्ययात्।४।३।१५५।

ञिद्यो विकारावयवप्रत्ययस्तदन्तादञ् स्यात्तयोरेवार्थयोः । मयटोपवादः । शामीलस्य शामीलम् । दाधित्थस्य दाधित्थम् । कापित्थम्। ञितः किम् । बैल्वमयम् ॥

१५३३-विकार और अवयव अर्थमें ञित् जो विकारावयवार्थ प्रत्यय,तदन्तके उत्तर अञ् प्रत्यय हो । यह अञ् प्रत्यय मयट् प्रत्ययका अपवाद है, जैसे-शामीलस्य-शामीलम् । दाधित्थस्य-दाधित्थम् । कापित्थम् । ञित् न होनेपर अञ् न होकर मयट् प्रत्यय ही होगा, जैसे-बैल्वमयम् ॥

१५३४ क्रीतवत्परिमाणात्।४।३।१५६॥

प्राग्वहतेष्ठगित्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहितास्ते तथैव विकारेऽतिदिश्यन्ते । अणादीनामपवादः । निष्केण क्रीतं नैष्किकम्, एवं निष्कस्य विकारोपि नैष्किकः । शतस्य विकारः शत्यः । शतिकः ॥

१५३४-"प्राग्वहतेष्ठक् १५४८" इस सूत्रसे आरंभ करके क्रीतार्थमें जो २ प्रत्यय जिस उपाधिसे परिमाणवाचकसे कहे गये हैं वह सब प्रत्यय परिमाणवाचकसे विकार अर्थमें हों । यह सूत्र अणादि प्रत्ययका विशेषक है, जैसे-निष्केण क्रीतम्=नैष्किकम् । इसी प्रकार निष्कस्य विकारः=नैष्किकः । शतस्य विकारः=शत्यः । शतिकः ॥

१५३५ उष्ट्राद्वुञ् । ४ । ३ । १५७ ॥

प्राण्यञोपवादः । औष्ट्रकः ॥

१५३५-उष्ट्र शब्दके उत्तर वुञ् प्रत्यय हो । यह वुञ् प्रत्यय प्राणिवाचकके उत्तर विहित अण् प्रत्ययका अपवाद है, जैसे-औष्ट्रकः ॥

१५३६ उमोर्णयोर्वा । ४ । ३ । १५८ ॥

औमम् । औमकम् । और्णम् । और्णकम् । वुञभावे यथाक्रममणञौ ॥

१५३६-उमा और ऊर्णा शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो, जैसे-औमकम्, औमम् । और्णकम्, और्णम् । वुञ्के अभावपक्षमें क्रमसे अर्थात् उमा शब्दके उत्तर अण् और ऊर्णा शब्दके उत्तर अञ् प्रत्यय होताहै ॥

१५३७ एण्या ढञ् । ४ । ३ । १५९ ॥

ऐणेयम् । एणस्य तु ऐणम् ॥

१५३७-एणी शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-ऐणेयम् । एण शब्दका तो 'ऐणम्' ऐसा रूप होगा ॥

१५३८ गोपयसोर्यत् । ४ । ३ । १६० ॥

गव्यम् । पयस्यम् ॥

१५३८-गो और पयस् शब्दके उत्तर यत् प्रत्यय हो, जैसे-गव्यम् । पयस्यम् ॥

१५३९ द्रोश्च । ४ । ३ । १६१ ॥

द्रुर्वृक्षस्तस्य विकारोऽवयवो वा द्रव्यम् ॥

१५३९-द्रु शब्दके उत्तर यत् प्रत्यय हो, द्रु शब्दसे वृक्ष जानना, उसका विकार वा अवयव होनेपर 'द्रव्यम्' इस प्रकार रूप होगा ॥

१५४० माने वयः । ४ । ३ । १६२ ॥

द्रोरित्येव । द्रुवयम् । यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ॥

१५४०-मान अर्थमें द्रु शब्दके उत्तर वय प्रत्यय हो, जैसे-द्रुवयम् ।"यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्"अर्थात् यह तीन पद परिमाणवाचक हैं ॥

१५४१ फले लुक् । ४ । ३ । १६३ ॥

विकारावयवप्रत्ययस्य लुक् स्यात् फले । आमलक्याः फलमामलकम् ॥

१५४१-फल वाच्य होनेपर विकार और अवयव अर्थमें विहित प्रत्ययका लुक् हो, जैसे-आमलक्याः फलम्, इस वाक्यमें आमलकम् ॥

१५४२ प्लक्षादिभ्योऽण् । ४ । ३ । १६४ ॥

विधानसामर्थ्यान्न लुक् । प्लाक्षम् ॥

१५४२-प्लक्षादि शब्दोंके उत्तर अण् प्रत्यय हो । इस स्थानमें फलवाचक होनेपर भी विधानसामर्थ्यके कारण प्लक्ष आदि शब्दोंके उत्तर प्रत्ययका लुक् नहीं हुआ, जैसे-प्लाक्षम् ॥

१५४३ न्यग्रोधस्य च केवलस्य।७।३।५।

अस्य न वृद्धिरैजागमश्च । नैयग्रोधम् ॥

१५४३-अण् प्रत्यय परे रहते केवल न्यग्रोध शब्दके पूर्व स्वरकी वृद्धि न हो, परन्तु ऐच्का आगम हो, जैसे-नैयग्रोधम् ॥

१५४४ जम्ब्वा वा । ४ । ३ । १६५ ॥

जम्बूशब्दात् फलेऽण् वा स्यात् । जाम्बवम् । पक्षे ओरञ्, तस्य लुक्, जम्बु ॥

१५४४-फल वाच्य होनेपर जम्बू शब्दके उत्तर विकल्प करके अण् प्रत्यय हो, जैसे-जाम्बवम् । विकल्प पक्षमें "ओरञ्" इस सूत्रसे उकारान्त शब्दके उत्तर अञ् प्रत्यय होकर उसके लुक् होनेपर 'जम्बु' ऐसा पद होगा ॥

१५४५ लुप् च । ४ । ३ । १६६ ॥

जम्ब्वाः फलप्रत्ययस्य लुप् वा स्यात् । लुपि युक्तवत् । जम्ब्वाः फलं जम्बूः ॥ फलपाकशुषामुपसंख्यानम् ॥ * ॥ व्रीहयः । मुद्गाः ॥ पुष्पमूलेषु बहुलम् ॥ * ॥ मल्लिकायाः पुष्पं मल्लिका । जात्याः पुष्पं जाती । विदार्या मूलं विदारी । बहुलग्रहणान्नेह । पाटलानि पुष्पाणि । साल्वानि मूलानि । बाहुलकात् क्वचिल्लुक् । अशोकम् । करवीरम् ॥

१५४५-जम्बू शब्दके उत्तर फल अर्थमें विहित प्रत्ययका विकल्प करके लुप् हो । लुप् होनेपर प्रकृतिकी समान लिङ्ग और वचन होगा (१२९४) जैसे-जम्ब्वाः फलम्-जम्बूः । फल परिपक्व होनेपर जो सूखजायँ, तद्वाचक शब्दोंके उत्तर

फल अर्थमें विहित प्रत्ययका लुप् हो * जैसे-व्रीहीणां फलानि=व्रीहयः। मुद्गाः।

पुष्प और मूल वाच्य रहते बहुल करके विकारावयव-प्रत्ययका लुप् हो* जैसे-मल्लिकायाः पुष्पम्=मल्लिका। जात्याः पुष्पम्=जाती। विदार्याः मूलम्-विदारी। बहुलग्रहणके कारण 'पाटलानि पुष्पाणि' और 'साल्वानि मूलानि' इन दो स्थलोंमें प्रत्ययका लुप् न हुआ। बहुलग्रहणके कारण किसी किसी स्थलमें लुक् होगा, जैसे-अशोकम्। करवीरम्।

१५४६ हरीतक्यादिभ्यश्च।४।३।१६७॥

एभ्यः फलप्रत्ययस्य लुप्स्यात्। हरीतक्यादीनां लिङ्गमेव प्रकृतिवत्। हरीतक्याः फलानि हरीतक्यः॥

१५४६-हरीतकी आदि शब्दोंके उत्तर फलार्थक प्रत्ययका लुक् हो, हरीतक्यादि शब्दोंका लिङ्ग ही प्रकृतिकी समान होगा वचन तो, विशेष्यानुरोधसे ही होगा, जैसे-हरीतक्याः फलानि, इस विग्रहमें हरीतक्यः॥

१५४७ कंसीयपरशव्ययोर्यञञौ लुक् च।४।३।१६८॥

कंसीयपरशव्यशब्दाभ्यां यञञौ स्तश्छयतोश्च लुक्। कंसाय हितं कंसीयम्। तस्य विकारः कांस्यम्। परशवे हितं परशव्यम्, तस्य विकारः पारशवः॥

॥ इति प्राग्दीव्यतीयाः॥

१५४७-कंसीय और परशव्य शब्दके उत्तर यञ् और अञ् प्रत्यय हों और प्रकृतिके अवयव जो छ और यत् प्रत्यय उनका लुक् हो, जैसे-कंसाय हितम्-कंसीयम्, तस्य विकारः=कांस्यम्। परशवे हितम्-परशव्यम्, तस्य विकारः=पारशवः॥

॥ इति प्राग्दीव्यतीयप्रकरणं समाप्तम्॥

अथ ठगधिकारप्रकरणम्।

१५४८ प्राग्वहतेष्ठक्।४।४।१॥

तद्वहतीत्यतः प्राक् ठगधिक्रियते॥ तदाहेति माशब्दादिभ्य उपसंख्यानम्॥ * ॥ मा शब्दः कारि इति य आह स माशब्दिकः॥

१५४८-"तद्वहति० १६२७" इस सूत्रके पूर्वतक ठक्का अधिकार है।

'तदाह' वह कहताहै, इस अर्थमें मा शब्द (स्वागत) आदि शब्दोंके उत्तर ठक् प्रत्यय हो* जैसे-मा शब्दः कारि इति य आह सः=माशब्दिकः॥

१५४९ स्वागतादीनां च।७।३।७॥

ऐच् न स्यात्। स्वागतमित्याह स्वागतिकः। स्वाध्वरिकः। स्वङ्गस्याऽपत्यं स्वाङ्गिः। व्यङ्गस्याऽपत्यं व्याङ्गिः। व्यडस्यापत्यं व्याडिः। व्यवहारेण चरति व्यावहारिकः। स्वपतौ साधु स्वापतेयम्॥ * ॥ आहौ प्रभूतादिभ्यः। प्रभूतमाह प्राभूतिकः। पार्याप्तिकः॥ पृच्छतौ सुस्नातादिभ्यः॥ * ॥ सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। अनुशातिकादिः॥ गच्छतौ परदारादिभ्यः॥ * ॥ पारदारिकः। गौरुतल्पिकः॥

१५४९-स्वागतादि शब्दोंको ऐच्का आगम न हो, जैसे-स्वागतमित्याह=स्वागतिकः। स्वाध्वरिकः। स्वङ्गस्यापत्यम्=स्वांगिः। व्यंगस्यापत्यम्=व्यांगिः। व्यडस्यापत्यम्=व्याडिः। व्यवहारेण चरति=व्यावहारिकः। स्वपतौ साधु=स्वापतेयम्।

'आह' इस अर्थमें प्रभूतादि शब्दोंके उत्तर ठक् प्रत्यय हो * जैसे-प्रभूतमाह=प्राभूतिकः। पार्याप्तिकः।

'पृच्छति' इस अर्थमें सुस्नातादि शब्दोंके उत्तर ठक् प्रत्यय हो * जैसे-सुस्नातं पृच्छति=सौस्नातिकः। सौखशायनिकः, यह अनुशातिकादि १४३८ है।

'गच्छति' इस अर्थमें परदारादि शब्दोंके उत्तर ठक् प्रत्यय हो* जैसे-पारदारिकः। गौरुतल्पिकः॥

१५५० तेन दीव्यति खनति जयति जितम्।४।४।२॥

अक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति आक्षिकः। अक्षैर्जितमाक्षिकम्॥

१५५०-दीव्यति, खनति, जयति, जितम्, अर्थात् क्रीडा करताहै, खनन करताहै, जय करताहै और जीतागया है, इन अर्थोंमें तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-अक्षैर्दीव्यति=आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति=आक्षिकः। अक्षैर्जितम्=आक्षिकम्॥

१५५१ संस्कृतम्।४।४।३॥

दध्ना संस्कृतं दाधिकम्। मारिचिकम्॥

१५५१-संस्कृत अर्थमें तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-दध्ना संस्कृतम्, इस विग्रहमें दाधिकम्। मारिचिकम्॥

१५५२ कुलत्थकोपधादण्।४।४।४॥

ठकोपवादः। कुलत्थैः संस्कृतं कौलत्थम्। तैत्तिडीकम्॥

१५५२-तृतीयान्त कुलत्थ और ककारोपध शब्दके उत्तर संस्कृत अर्थमें अण् प्रत्यय हो, यह अण् प्रत्यय ठक् प्रत्ययका विशेषक है, जैसे-कुलत्थैः संस्कृतम्, इस विग्रहमें कौलत्थम्। तैत्तिडीकम्॥

१५५३ तरति।४।४।५॥

उडुपेन तरति औडुपिकः॥

१५५३-'तरति' अर्थात् तरताहै, ऐसे अर्थमें तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-उडुपेन तरति, इस वाक्यमें औडुपिकः॥

१५५४ गोपुच्छाट्ठञ् । ४ । ४ । ६ ॥

गौपुच्छिकः ॥

१५५४-उक्त अर्थमें तृतीयान्त गोपुच्छ शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-गौपुच्छिकः ॥

१५५५ नौद्व्यचष्ठन् । ४ । ४ । ७ ॥

नाविकः । घटिकः । बाहुभ्यां तरति बाहुका स्त्री ॥

१५५५-उक्त अर्थमें नौ शब्द और द्विस्वरयुक्त शब्दके उत्तर ठन् प्रत्यय हो, जैसे-नाविकः । घटिकः । बाहुभ्यां तरति (दोनों भुजाओंसे तरतीहै) इस वाक्यमें बाहुका स्त्री ॥

१५५६ चरति । ४ । ४ । ८ ॥

तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति हास्तिकः । शाकटिकः । दध्ना भक्षयति दाधिकः ॥

१५५६-तृतीयान्त प्रातिपदिकके उत्तर 'चरति' अर्थात् 'गच्छति' और 'भक्षयति' इन दो अर्थोंमें ठक् प्रत्यय हो, जैसे-हस्तिना चरति=हास्तिकः । शकटेन चरति=शाकटिकः । दध्ना भक्षयति=दाधिकः ॥

१५५७ आकर्षात् ष्ठल् । ४ । ४ । ९ ॥

आकर्षो निकषोपलः । आकषादिति पाठान्तरम् । तेन चरति आकर्षिकः । षित्त्वान्ङीष् । आकर्षिकी ॥

१५५७-आकर्ष शब्दसे निकष पत्थर जानना, तृतीयान्त आकर्ष शब्दके उत्तर 'चरति' (चलता है) इस अर्थमें ष्ठल् प्रत्यय हो, यहां'आकषात्' ऐसा पाठान्तर भी है। आकर्षेण चरति=आकर्षिकः । षित् प्रत्यय होनेके कारण उसके उत्तर स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे-आकर्षिकी ॥

१५५८ पर्पादिभ्यः ष्ठन् । ४ । ४ । १० ॥

पर्पेण चरति पर्पिकः । पर्पिकी । येन पीठेन पङ्गवश्चरन्ति स पर्पः । अश्विकः । रथिकः ॥

१५५८-'चरति' इस अर्थमें तृतीयान्त पर्पादि शब्दोंके उत्तर ष्ठन् प्रत्यय हो, जैसे-पर्पेण चरति=पर्पिकः । स्त्रीलिङ्गमें पर्पिकी । जिस पीठ (वा यान) से लँगडे चलें उसको 'पर्प' कहतेहैं । अश्विकः। रथिकः ॥

१५५९ श्वगणाट्ठञ्च । ४ । ४ । ११ ॥

चात् ष्ठन् ॥

१५५९-उक्त अर्थमें तृतीयान्त श्वगण शब्दके उत्तर ठञ् और चकारसे ष्ठन् प्रत्यय हो ॥

१५६० श्वादेरिञि । ७ । ३ । ८ ॥

ऐच् न । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । श्वादंष्ट्रिः । तदादिविधौ चेदमेव ज्ञापकम् ॥ इकारादाविति वाच्यम् ॥ * ॥ श्वगणेन चरति श्वागणिकः । श्वागणिकी । श्वगणिकः । श्वगणिकी ॥

१५६०-श्वादि (श्वन्शब्दपूर्वक) शब्दके इञ् प्रत्यय परे रहते ऐच् न हो, जैसे--श्वभस्त्रस्यापत्यम्=श्वाभस्त्रिः । श्वादंष्ट्रिः ।

तदादिविधिविषयमें यही ज्ञापन है, आशय यह है कि, द्वारादि गणमें स्वन् शब्द पठित है, स्वभस्त्रादि शब्द पठित नहीं हैं, इससे उनको "द्वारादीनाञ्च ७।३।४" इस सूत्रसे ऐजागमकी प्राप्ति ही नहीं थी फिर यह निषेधसूत्र करनेका क्या प्रयोजन ? इसपर कहतेहैं कि, यही निषेधक सूत्र व्यर्थ होकर ज्ञापन करताहै कि, द्वारादिमें तदादिविधि है, इस ज्ञापनसे द्वारादिशब्दपूर्वक शब्दमें भी ऐजागमकी प्राप्ति होनेपर यह निषेधक सूत्र चारितार्थ हुआ ।

इकारादि तद्धित प्रत्यय परे रहते ऐच् न हो, ऐसा कहना चाहिये * जैसे--श्वगणेन चरति, इस विग्रहमें श्वागणिकः । श्वागणिकी । श्वगणिकः । श्वगणिकी ॥

१५६१ पदान्तस्याऽन्यतरस्याम् । ७ । ३ । ९ ॥

श्वादेरङ्गस्य पदशब्दान्तस्यैज्वा । श्वापदस्येदं शौवापदम् । श्वापदम् ॥

१५६१--पद शब्द अन्तमें है जिसके ऐसे श्वन्शब्दपूर्वक अंगको विकल्प करके ऐच्का आगम हो, जैसे--श्वापदस्येदम्=शौवापदम् । श्वापदम् ॥

१५६२ वेतनादिभ्यो जीवति । ४ । ४ । १२ ॥

वेतनेन जीवति वैतनिकः । धानुष्कः ॥

१५६२--जीवति (जीवनको धारण करताहै) इस अर्थमें तृतीयान्त वेतनादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे--वेतनेन जीवति, इस विग्रहमें वैतनिकः । धनुषा जीवति=धानुष्कः ॥

१५६३ वस्नक्रयविक्रयाट्ठन् । ४ । ४ । १३ ॥

वस्नेन मूल्येन जीवति वस्निकः । क्रयविक्रयग्रहणं संघातविगृहीतार्थम् । क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥

१५६३-'जीवति' इस अर्थमें तृतीयान्त वस्न और क्रय विक्रय शब्दके उत्तर ठन् प्रत्यय हो, वस्न शब्दसे मूल्य जानना, जैसे-वस्नेन जीवति=वस्निकः । संघात और विगृहीत निमित्त क्रय विक्रय शब्दका ग्रहण सूत्रमें किया है, जैसे- क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥

१५६४ आयुधाच्छ च । ४ । ४ । १४ ॥

चाट्ठन् । आयुधेन जीवति आयुधीयः । आयुधिकः ॥

१५६४--तृतीयान्त आयुध शब्दके उत्तर 'जीवति' इस अर्थमें छ और चकारसे ठन् प्रत्यय हो, जैसे--आयुधेन जीवति=आयुधीयः, आयुधिकः ॥

१५६५ हरत्युत्सङ्गादिभ्यः । ४ । ४ । १५ ॥

उत्सङ्गेन हरत्यौत्सङ्गिकः ॥

१५६५--'हरति' इस अर्थमें तृतीयान्त उत्सङ्गादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे--उत्संगेन हरति=औत्संगिकः ॥

१५६६ भस्त्रादिभ्यः ष्ठन् ।४।४।१६॥

भस्त्रया हरति भस्त्रिकः । षित्त्वान्ङीष् भस्त्रिकी ॥

१५६६--'हरति' इस अर्थमें तृतीयान्त भस्त्रादि शब्दोंके उत्तर ष्ठन् प्रत्यय हो,जैसे--भस्त्रया हरति=भस्त्रिकः षकार इत् होनेके कारण स्त्रीलिंगमें ङीष् होगा, जैसे--भस्त्रिकी ॥

१५६७ विभाषा विवधात् ।४।४।१७॥

विवधेन हरति विवधिकः । पक्षे ठक् । वैवधिकः । एकदेशविकृतस्याऽनन्यत्वाद्वीवधादपि ष्ठन् । वीवधिकः । वीवधिकी । विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तेते॥

१५६७--'हरति' इस अर्थमें तृतीयान्त विवध शब्दके उत्तर विकल्प करके ष्ठन् प्रत्यय हो, विकल्प पक्षमें ठक् प्रत्यय होगा, जैसे--विवधेन हरति--विवधिकः । वैवधिकः ।

"एकदेशविकृतमनन्यवत्" (एक देशके विकारसे वह दूसरा नहीं होताहै) इस न्यायसे वीवध शब्दका विवध शब्दसे अन्य रूप नहीं हुआ,इस कारण वीवध शब्दके उत्तर भी ष्ठन् प्रत्यय होगा, जैसे--वीवधिकः । वीवधिकी । विवध और वीवध दोनों शब्दोंसे दोनों पार्श्वोंमें बद्धशिक्य स्कंधवाह्य काष्ठ (वाँक) जानना ॥

१५६८ अण् कुटिलिकायाः ।४।४।१८॥

कुटिलिका व्याधानां गतिविशेषः कर्मारोपकरणभूतं लोहं च । कुटिलिकया हरति मृगानङ्गारान्वा कौटिलिको व्याधः कर्मारश्च ॥

१५६८--' हरति ' इस अर्थमें तृतीयान्त कुटिलिका शब्दके उत्तर अण् प्रत्यय हो, व्याधोंके गतिविशेष और कर्मारके उपकरणभूत लौहको कुटिलिका कहतेहैं, जैसे--कुटिलकया हरति मृगान् अङ्गारान् वा, इस विग्रहमें कौटिलिकः, अर्थात् व्याध और कर्मार । (कर्मार शब्दसे कर्मकार जानना) ॥

१५६९ निर्वृत्तेऽक्षद्यूतादिभ्यः ।४।४।१९॥

अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् ॥

१५६९--निर्वृत्तम्, इस अर्थमें तृतीयान्त अक्षद्यूतादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे--अक्षद्यूतेन निर्वृत्तम्=आक्षद्यूतिकम्, अर्थात् वैर ॥

१५७० क्त्रेर्मम्नित्यम् ।४।४।२०॥

क्त्रिप्रत्ययान्तप्रकृतिकात्तृतीयान्तान्निर्वृत्तेर्थे मप्स्यान्नित्यम् । कृत्या निर्वृत्तं कृत्रिमम् । पक्त्रिमम् ॥ भावप्रत्ययान्तादिमब्वक्तव्यः ॥ * ॥ पाकेन निर्वृत्तं पाकिमम् । त्यागिमम् ॥

१५७०--क्त्रिप्रत्ययान्त प्रकृतिके तृतीयाविभक्त्यन्त प्रातिपदिकके उत्तर 'निर्वृत्तम्' इस अर्थमें नित्य मप् प्रत्यय हो, जैसे--कृत्या निर्वृत्तम्=कृत्रिमम् । पक्त्रिमम् ।

भाववाच्यमें विहित प्रत्ययान्त शब्दके उत्तर इमप् प्रत्यय हो * जैसे--पाकेन निर्वृत्तम्=पाकिमम् । त्यागिमम् ॥

१५७१ अपमित्ययाचिताभ्यां कक्कनौ ।४।४।२१॥

अपमित्येति ल्यबन्तम् । अपमित्य निर्वृत्तम् आपमित्यकम् । याचितेन निर्वृत्तं याचितकम् ॥

१५७१--अपमित्य और याचित शब्दके उत्तर क्रमसे कक् और कन् प्रत्यय हो, अपमित्य शब्द ल्यप्प्रत्ययान्त है, इस कारण इस स्थानमें तृतीयान्तके उत्तर उक्त प्रत्यय न होकर प्रथमान्तके उत्तर होगा, जैसे--अपमित्य निर्वृत्तम्=आपमित्यकम् । याचितेन निर्वृत्तम्=याचितकम् ॥

१५७२ संसृष्टे ।४।४।२२॥

दध्ना संसृष्टं दाधिकम् ॥

१५७२--' संसृष्टम् ' इस अर्थमें तृतीयान्त शब्दके उत्तर ठक् प्रत्यय हो, जैसे--दध्ना संसृष्टम्=दाधिकम् ॥

१५७३ चूर्णादिनिः ।४।४।२३॥

चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः ॥

१५७३--'संसृष्टम्' इस अर्थमें तृतीयान्त चूर्ण शब्दके उत्तर इनि प्रत्यय हो, जैसे--चूर्णैः संसृष्टाः=चूर्णिनः अपूपाः ॥

१५७४ लवणाल्लुक् ।४।४।२४॥

लवणेन संसृष्टो लवणः सूपः । लवणं शाकम्॥

१५७४--' संसृष्टम् ' इस अर्थमें तृतीयान्त लवण शब्दके उत्तर उक्त प्रत्ययका लुक् हो, जैसे--लवणेन संसृष्टः=लवणः, अर्थात् सूपः । लवणं शाकम् ॥

१५७५ मुद्गादण् ।४।४।२५॥

मौद्ग ओदनः ॥

१५७५--' संसृष्टम् ' इस अर्थमें तृतीयान्त मुद्ग शब्दके उत्तर अण् प्रत्यय हो, जैसे--मुद्गेन संसृष्टः=मौद्गः, अर्थात् ओदन ॥

१५७६ व्यञ्जनैरुपसिक्ते ।४।४।२६॥

ठक् । दध्ना उपसिक्तं दाधिकम् ॥

१५७६--उपसिक्त अर्थ होनेपर व्यञ्जनवाचक तृतीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे--दध्ना उपसिक्तम्=दाधिकम् ॥

१५७७ ओजःसहोऽम्भसा वर्तते ।४।४।२७॥

ओजसा वर्तते औजसिकः शूरः । साहसिकश्चौरः । आम्भसिको मत्स्यः ॥

१५७७--' वर्तते ' इस अर्थमें तृतीयान्त ओजस्, सहस् और अम्भस् शब्दके उत्तर ठक् प्रत्यय हो, जैसे--ओजसा वर्तते=औजसिकः, अर्थात् शूर । साहसिकः, अर्थात् चौर । आम्भसिकः, अर्थात् मत्स्य ॥

१५७८ तत्प्रत्यनुपूर्वमीपलोमकूलम् । ४ । ४ । २८ ॥

द्वितीयान्तादस्माद्वर्तत इत्यस्मिन्नर्थे ठक् स्यात् । क्रियाविशेषणत्वाद्द्वितीया । प्रतीपं वर्तते प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः ॥

१५७८-द्वितीयान्त प्रति, अनुपूर्वक ईप, लोम और कूल शब्दके उत्तर 'वर्त्तते' इस अर्थमें ठक् प्रत्यय हो, इस स्थलमें क्रियाविशेषणमें द्वितीया हुईहै, जैसे-प्रतीपं वर्त्तते=प्रातीपिकः । आन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः ॥

१५७९ परिमुखं च । ४ । ४ । २९ ॥

परिमुखं वर्तते पारिमुखिकः । चात्पारिपार्श्विकः ॥

१५७९-द्वितीयान्त परिमुख शब्दके उत्तर ' वर्त्तते ' इस अर्थमें ठक् प्रत्यय हो, जैसे-परिमुखं वर्त्तते=पारिमुखिकः । चकारसे ' पारिपार्श्विकः ' यह पद भी सिद्ध हुआ ॥

१५८० प्रयच्छति गर्ह्यम् । ४ । ४ । ३० ॥

द्विगुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः । त्रैगुणिकः ॥ वृद्धेर्वृधुषिभावो वक्तव्यः ॥ * ॥ वार्धुषिकः ॥

१५८०-'प्रयच्छति ' इस अर्थमें गर्ह्यवाचक द्वितीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-द्विगुणार्थम्-द्विगुणम्, तत्प्रयच्छति=द्वैगुणिकः । त्रैगुणिकः ।

वृद्धि शब्दके स्थानमें वृधुषिभाव (वृधुषि आदेश) हो * जैसे-वार्धुषिकः ॥

१५८१ कुसीददशैकादशात् ष्ठन्ष्ठचौ । ४ । ४ । ३१ ॥

गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छतीत्यर्थे । कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छतीति कुसीदिकः।कुसीदिकी।एकादशार्थत्वादेकादश ते च ते वस्तुतो दश चेति विग्रहेऽकारः समासान्त इहैव सूत्रे निपात्यते । दशैकादशिकः । दशैकादशिकी । दशैकादशान्प्रयच्छतीत्युत्तमर्ण एवेहापि तद्धितार्थः ॥

१५८१-गर्ह्यार्थक कुसीद और दशैकादश शब्दके उत्तर ' प्रयच्छति ' इस अर्थमें क्रमसे ष्ठन् और ष्ठच् प्रत्यय हो, कुसीद शब्दसे वृद्धि जानना, तदर्थ द्रव्यको भी कुसीद कहतेहैं, तत्प्रयच्छति, अर्थात् वह जो दान करे उसको ' कुसीदिकः ' कहतेहैं । कुसीदिकी । एकादशार्थत्वके कारण एकादश ते च ते दश च, इस विग्रहमें समासान्त अकार इस सूत्रमें ही निपातनसे सिद्ध हुआहै, जैसे-दशैकादशिकः । दशैकादशिकी । ' दशैकादशान् प्रयच्छति ' इस अर्थमें तद्धितार्थ उत्तमर्ण ही है, अधमर्ण नहीं ॥

१५८२ उञ्छति । ४ । ४ । ३२ ॥

बदराण्युञ्छति बादरिकः ॥

१५८२-उञ्छति अर्थात् भूमिमें गिरे हुए शस्यादिको एक एक करके इकट्ठा करताहै, इस अर्थमें द्वितीयान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-बदराण्युञ्छति, इस वाक्यमें बादरिकः ॥

१५८३ रक्षति । ४ । ४ । ३३ ॥

समाजं रक्षति सामाजिकः ॥

१५८३-'रक्षति ' इस अर्थमें द्वितीयासमर्थ प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-समाजं रक्षति, इस विग्रहमें सामाजिकः ॥

१५८४ शब्ददर्दुरं करोति । ४ । ४ । ३४ ॥

शब्दं करोति शाब्दिकः । दार्दुरिकः ॥

१५८४-द्वितीयान्त शब्द और दर्दुर शब्दके उत्तर 'करोति' इस अर्थमें ठक् प्रत्यय हो, जैसे-शब्दं करोति=शाब्दिकः। दार्दुरिकः । दर्दुर शब्दसे भाण्ड जानना " दर्दुरस्तोयदे भेके वाद्ये भाण्डादिभेदयोः " ॥

१५८५ पक्षिमत्स्यमृगान्हन्ति ४ । ४ । ३५ ॥

स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्यायेषु मीनस्यैव।पक्षिणो हन्ति पाक्षिकः। शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाकुलिकः । मार्गिकः । हारिणिकः।सारङ्गिकः॥

१५८५-'हन्ति ' इस अर्थमें द्वितीयान्त पक्षिवाचक, मत्स्यवाचक और मृगवाचक शब्दोंके उत्तर ठक् प्रत्यय हो, पक्ष्यादि शब्दसे स्वरूप और उनके पर्याय और विशेषका ग्रहण है, परन्तु मत्स्यपर्यायके मध्यमें मीन शब्दका ही ग्रहण है, जैसे-पक्षिणो हन्ति=पाक्षिकः । शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाकुलिकः । मार्गिकः । हारिणिकः । सारङ्गिकः ॥

१५८६ परिपन्थं च तिष्ठति । ४ । ४ । ३६ ॥

अस्माद्द्वितीयान्तात्तिष्ठति हन्ति चेत्यर्थे ठक् स्यात् । पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः । परिपन्थं हन्ति पारिपन्थिकः ॥

१५८६-द्वितीयान्त परिपन्थ शब्दके उत्तर ' तिष्ठति ' और ' हन्ति ' इस अर्थमें ठक् प्रत्यय हो, जैसे-पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति, इस वाक्यमें पारिपन्थिकः चौरः । परिपन्थं हन्ति=पारिपन्थिकः ॥

१५८७ माथोत्तरपदपदव्यनुपदं धावति । ४ । ४ । ३७ ॥

दण्डाकारो माथः पन्था दण्डमाथः । दण्ड-

माथं धावति दाण्डमाथिकः । पादविकः । आनुपदिकः ॥

१५८७–माथोत्तरपद, अर्थात् माथ शब्द उत्तर पद है जिसका ऐसा जो शब्द और पदवी शब्द और अनुपद शब्दके उत्तर 'धावति' इस अर्थमें ठक् प्रत्यय हो, माथ शब्दसे पन्था जानना, जैसे–दण्डाकारो माथः पन्थाः, इस विग्रहमें दण्डमाथः, दण्डमाथं धावति, इस विग्रहमें दाण्डमाथिकः । पादविकः । आनुपदिकः ॥

१५८८ आक्रन्दाट्ठञ्च । ४ । ४ । ३८ ॥

अस्माट्ठञ् स्यात् चाट्ठक् धावतीत्यर्थे । आक्रन्दं दुःखिनां रोदनस्थानं धावति आक्रन्दिकः ॥

१५८८–द्वितीयान्त आक्रन्द शब्दके उत्तर 'धावति' इस अर्थमें ठञ् और चकारसे ठक् प्रत्यय हो, जैसे–आक्रन्दं–दुःखिनां रोदनस्थानं धावति, इस विग्रहमें आक्रन्दिकः, अर्थात् आर्त्तत्राता ॥

१५८९ पदोत्तरपदं गृह्णाति ।४।४।३९॥

पूर्वपदं गृह्णाति पौर्वपदिकः । औत्तरपदिकः॥

१५८९–द्वितीयान्त पदोत्तर पद, अर्थात् पद शब्द अन्तमें है जिसके ऐसे शब्दके उत्तर 'गृह्णाति' इस अर्थमें ठक् प्रत्यय हो, जैसे–पूर्वपदं गृह्णाति=पौर्वपदिकः । औत्तरपदिकः ॥

१५९० प्रतिकण्ठार्थललामं च।४।४।४०।

एभ्यो गृह्णात्यर्थे ठक् स्यात् । प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः । आर्थिकः । लालामिकः॥

१५९०–'गृह्णाति' इस अर्थमें प्रतिकण्ठ, अर्थ, ललाम शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे–प्रतिकण्ठं गृह्णाति, इस विग्रहमें प्रातिकण्ठिकः । आर्थिकः । लालामिकः ॥

१५९१ धर्मं चरति । ४ । ४ । ४१ ॥

धार्मिकः ॥ अधर्माच्चेति वक्तव्यम् ॥ * ॥ आधर्मिकः ॥

१५९१–द्वितीयान्त धर्म शब्दके उत्तर 'चरति' इस अर्थमें ठक् प्रत्यय हो, जैसे–धर्मं चरति=धार्मिकः ।

अधर्म शब्दके उत्तर भी ठक् प्रत्यय हो*जैसे–आधार्मिकः। इस स्थलमें चरति शब्दसे अनुष्ठानमात्र अर्थ नहीं किन्तु स्वारसिकी प्रवृत्तिरूप अर्थ जानना, इसलिये अतिदुराचारी व्यक्ति कदाचित् दैववशसे धर्मानुष्ठानमें प्रवृत्त होनेपर भी वह धार्मिक नहीं कहेजातेहैं, और दैवात् अधर्ममें प्रवृत्त धार्मिक व्यक्ति भी अधार्मिक नहीं कहेजातेहैं ॥

१५९२ प्रतिपथमेति ठंश्च । ४ ।४।४२॥

प्रतिपथमेति प्रातिपथिकः ॥

१५९२–'एति' इस अर्थमें द्वितीयान्त प्रतिपथ शब्दके उत्तर ठन् प्रत्यय हो, जैसे–प्रतिपथमेति, इस विग्रहमें प्रातिपथिकः ॥

१५९३ समवायान्समवैति ।४।४।४३॥

सामवायिकः । सामूहिकः ॥

१५९३–द्वितीयान्त समवाय अर्थात् समूहवाचक शब्दके उत्तर 'समवैति' इस अर्थमें ठक् प्रत्यय हो, जैसे–समवायान् समवैति=सामवायिकः । सामूहिकः ॥

१५९४ परिषदो ण्यः । ४ । ४ । ४४ ॥

परिषदं समवैति पारिषद्यः ॥

१५९४–'समवैति' इस अर्थमें द्वितीयान्त परिषद् शब्दके उत्तर ण्य प्रत्यय हो, जैसे–परिषदं समवैति, इस विग्रहमें पारिषद्यः ॥

१५९५ सेनाया वा । ४ । ४ । ४५ ॥

ण्यः स्यात्पक्षे ठक् । सैन्याः । सैनिकाः ॥

१५९५–उक्त अर्थमें द्वितीयान्त सेना शब्दके उत्तर विकल्प करके ण्य प्रत्यय हो,विकल्प पक्षमें ठक् प्रत्यय होगा,जैसे–सेनाः समवयन्ति=सैन्याः, सैनिकाः ।

१५९६ संज्ञायां ललाटकुक्कुट्यौ पश्यति । ४ । ४ । ४६ ॥

ललाटं पश्यति लालाटिकः सेवकः । कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते । कौक्कुटिको भिक्षुः ॥

१५९६–'पश्यति' इस अर्थमें संज्ञा होनेपर द्वितीयान्त ललाट और कुक्कुटी शब्दके उत्तर ठक् प्रत्यय हो,जैसे–ललाटं पश्यति=लालाटिकः,अर्थात् सेवक । कुक्कुटी शब्दसे कुक्कुटीके पतनयोग्य स्वल्प स्थान जानना, कौक्कुटिकः,अर्थात् भिक्षुक । कौक्कुटिक शब्दसे संन्यासी जानना, क्योंकि, संन्यासी कुक्कुटीपतनयोग्य अर्थात् पदन्यासपरिमितमात्र देशको देखता देखता चलताहै, और स्थानमें दृष्टि नहीं करताहै ॥

१५९७ तस्य धर्म्यम् । ४ । ४ । ४७ ॥

आपणस्य धर्म्यमापणिकम् ॥

१५९७–'धर्म्यम्' इस अर्थमें षष्ठ्यन्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–आपणस्य धर्म्यम्, इस वाक्यमें आपणिकम् ॥

१५९८ अण् महिष्यादिभ्यः।४।४।४८॥

महिष्या धर्म्यं माहिषम् । याजमानम् ॥

१५९८–'धर्म्यम्' इस अर्थमें षष्ठ्यन्त महिष्यादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे–महिष्या धर्म्यम्=माहिषम् । याजमानम् ॥

१५९९ ऋतोऽञ् । ४ । ४ । ४९ ॥

यातुर्धर्म्यं यात्रम् ॥ नराच्चेति वक्तव्यम्॥*॥ नरस्य धर्म्या नारी ॥ विशसितुरिड्लोपश्चाञ्च वक्तव्यः ॥ * ॥ विशसितुर्धर्म्यं वैशस्त्रम् ॥ विभाजयितुर्णिलोपश्चाञ्च वाच्यः ॥ * ॥ विभाजयितुर्धर्म्यं वैभाजित्रम् ॥

१५९९-'धर्म्यम्' इस अर्थमें षष्ठ्यन्त ऋकारान्त शब्दके उत्तर अञ् प्रत्यय हो, जैसे-यातुर्धर्म्यम्=यात्रम् ।

नर शब्दके उत्तर अञ् प्रत्यय हो * जैसे--नरस्य धर्म्या=नारी ।

विशसितृ शब्दावयव इट्का लोप और उसके उत्तर अञ् प्रत्यय भी हो * जैसे-विशसितुर्धर्म्यम्=वैशस्त्रम् ।

विभाजयितृशब्दावयव णिका लोप और अञ् प्रत्यय हो * जैसे-विभाजयितुर्धर्म्यम्=वैभाजित्रम् ॥

१६०० अवक्रयः । ४ । ४ । ५० ॥

षष्ठ्यंताट्ठक् स्यादवक्रयेऽर्थे । आपणस्यावक्रय आपणिकः । राजग्राह्यं द्रव्यमवक्रयः ॥

१६००-अवक्रय अर्थमें षष्ठीविभक्त्यन्त शब्दके उत्तर ठक् प्रत्यय हो, जैसे-आपणस्य अवक्रयः=आपणिकः । राजग्राह्य द्रव्यका नाम अवक्रय है ॥

१६०१ तदस्य पण्यम् । ४ । ४ । ५१ ॥

अपूपाः पण्यमस्य आपूपिकः ॥

१६०१-'अस्य पण्यम्' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-अपूपाः पण्यम् अस्य= आपूपिकः ॥

१६०२ लवणाट्ठञ् । ४ । ४ । ५२ ॥

लावणिकः ॥

१६०२-'अस्य पण्यम्' इस अर्थमें प्रथमान्त लवण शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-लावणिकः ॥

१६०३ किसरादिभ्यः ष्ठन् ।४।४।५३॥

किसरं पण्यमस्य किसरिकः । षित्वान्ङीष् । किसरिकी । किसर, उशीर, नलद,-इत्यादि-किसरादयः सर्वे सुगन्धिद्रव्यविशेषवाचिनः ॥

१६०३-'अस्य पण्यम्' इस अर्थमें प्रथमान्त किसरादि शब्दोंके उत्तर ष्ठन् प्रत्यय हो, जैसे-किसरं पण्यमस्य=किसरिकः । षकार इत् होनेके कारण स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे-किसरिकी । किसर, उशीर, नलद इत्यादि किसरादि सब शब्द सुगन्धिद्रव्यविशेषवाचक हैं ॥

१६०४ शलालुनोऽन्यतरस्याम् । ४ । ४ । ५४ ॥

ष्ठन् स्यात् पक्षे ठक् । शलालुकः । शलालुकी । शालालुकः । शालालुकी । शलालुः सुगन्धिद्रव्यविशेषः ॥

१६०४-उक्त अर्थमें शलालु शब्दके उत्तर विकल्प करके ठन् प्रत्यय हो, विकल्प पक्षमें ठक् प्रत्यय होगा, जैसे-शलालुकः, शलालुकी । शालालुकः, शालालुकी । शालालु-शब्दसे सुगन्धिद्रव्याविशेष जानना ॥

१६०५ शिल्पम् । ४ । ४ । ५५ ॥

मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ॥

१६०५-'शिल्पमस्य' इस अर्थमें प्रथमान्त समर्थ प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-मृदङ्गवादनं शिल्पमस्य= मार्दङ्गिकः, यहां उत्तर पदका लोप इसलिये माना है कि, मृदङ्ग बजानेवालेका ही बोध हो, बनानेवालेका नहीं ॥

१६०६ मड्डुकझर्झरादणन्यतरस्याम् । ४ । ४ । ५६ ॥

मड्डुकवादनं शिल्पमस्य माड्डुकः । माड्डुकिकः । झार्झरः । झार्झरिकः ॥

१६०६-मड्डुक और झर्झर शब्दके उत्तर 'शिल्पमस्य' इस अर्थमें विकल्प करके अण् प्रत्यय हो, पक्षमें ठक् होगा, जैसे-मड्डुकवादनं शिल्पमस्य=माड्डुकः, माड्डुकिकः । झार्झरः, झार्झरिकः ॥

१६०७ प्रहरणम् । ४ । ४ । ५७ ॥

तदस्येत्येव । असिः प्रहरणमस्य आसिकः । धानुष्कः ॥

१६०७-'अस्य प्रहरणम्' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-असिः प्रहरणमस्य=आसिकः । धानुष्कः ॥

१६०८ परश्वधाट्ठञ्च । ४ । ४ । ५८ ॥

पारश्वधिकः ॥

१६०८-'अस्य प्रहरणम्' इस अर्थमें प्रथमान्त परश्वधादि शब्दके उत्तर ठञ् और चकारसे ठक् प्रत्यय हो, जैसे-पारश्वधिकः ॥

१६०९ शक्तियष्ट्योरीकक् ।४ ।४।५९ ॥

शाक्तीकः । याष्टीकः ॥

१६०९-उक्त अर्थमें शक्ति और यष्टि शब्दके उत्तर ईकक् प्रत्यय हो, जैसे-शक्तिः प्रहरणमस्य=शाक्तीकः । याष्टीकः ॥

१६१० अस्ति नास्ति दिष्टं मतिः । ४ । ४ । ६० ॥

तदस्येत्येव । अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः । नास्तीति मतिर्यस्य स नास्तिकः । दिष्टमिति मतिर्यस्य स दैष्टिकः ॥

१६१०-अस्ति मतिरस्य, नास्ति मतिरस्य, दिष्टं मतिरस्य, इन अर्थोंमें क्रमसे प्रथमान्त अस्ति, नास्ति और दिष्ट शब्दके उत्तर ठक् प्रत्यय हो, जैसे-अस्ति परलोक इत्येवं मतिर्यस्य सः=आस्तिकः । नास्तीति मतिर्यस्य सः=नास्तिकः । दिष्टमिति मतिर्यस्य सः=दैष्टिकः ॥

१६११ शीलम् । ४ । ४ । ६१ ॥

अपूपभक्षणं शीलमस्य आपूपिकः ॥

१६११-'शीलमस्य' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे-अपूपभक्षणं शीलमस्य= आपूपिकः ॥

१६१२ छत्रादिभ्यो णः । ४ ।४।६२ ॥

गुरोर्दोषाणामावरणं छत्रं तच्छीलमस्य छात्रः ॥

१६१२–प्रथमान्त छत्रादि शब्दोंके उत्तर 'शीलमस्य' इस अर्थमें ण प्रत्यय हो, जैसे–गुरोर्दोषाणामावरणं छत्रं तत् शीलमस्य=छात्रः ॥

१६१३ कार्मस्ताच्छील्ये ।६।४।१७२ ॥

कार्म इति ताच्छील्ये णे टिलोपो निपात्यते। कर्मशीलः कार्मः । नस्तद्धित इत्येव सिद्धे अण्कार्यं ताच्छीलिके णेपि। तेन चौरी तापसीत्यादि सिद्धम् । ताच्छील्ये किम् । कार्मणः ॥

१६१३–तच्छील अर्थमें ण प्रत्यय परे रहते कर्मन् शब्दके निपातनसे टिका लोप हो, जैसे–कर्मशीलः कार्मः, अर्थात् कर्मशीलः ।

'कार्मः' यहां "नस्तद्धिते ६७९" इस सूत्रसे टिलोप सिद्ध होनेपर प्रकृत सूत्रसे टिलोपविधानका क्या प्रयोजन ? इसपर कहतेहैं कि, यही टिलोपविधान व्यर्थ होकर ज्ञापन करताहै कि, ताच्छीलिक ण प्रत्यय परे रहते भी अण्प्रत्ययप्रयुक्त कार्य्य हो, इस ज्ञापनसे "अन्" इस सूत्रसे प्रकृतिभाव होजाता, इसलिये सूत्र है । फल यह हुआ कि, 'चौरी, तापसी'इत्यादि पद सिद्ध हुए,नहीं तो "टिड्ढाण०" इससे ङीप् नहीं होता । ताच्छील्यार्थ न होनेपर टिका लोप न होगा, जैसे–कार्मणः ॥

१६१४ कर्माऽध्ययने वृत्तम् ।४।४।६३॥

प्रथमान्तात्षष्ठ्यर्थे ठक् स्यादध्ययने वृत्ता या क्रिया सा चेत्प्रथमान्तस्यार्थः। ऐकान्यिकः। यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः ॥

१६१४–अध्ययनमें जो कर्म निष्पन्न हो वह यदि प्रथमान्तका अर्थ हो तो षष्ठ्यर्थमें प्रथमान्त पदके उत्तर ठक् प्रत्यय हो, जैसे–एकमन्यत् कर्म वृत्तम् अध्ययने अस्य सः=ऐकान्यिकः । अध्ययनमें प्रवृत्त जिसको परीक्षाकालमें विपरीत-उच्चारणरूप एक स्खलित हुआहै, उसको ऐकान्यिक कहतेहैं ॥

१६१५ बह्वच्पूर्वपदाट्ठच् ।४।४। ६४ ॥

प्राग्विषये । द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः । द्वादशाऽपपाठा अस्य जाता इत्यर्थः ॥

१६१५–पूर्वसूत्रोक्त अर्थमें बहुत स्वरोंसे युक्त पूर्वपद रहते प्रथमान्त पदके उत्तर ठच् प्रत्यय हो, जैसे–द्वादशान्यानि कर्माणि अध्ययने प्रवृत्तानि अस्य=द्वादशान्यिकः, अर्थात् अध्ययनसमयमें जिसके बारह दूसरे कर्म उत्पन्न हों उसको द्वादशान्यिक कहतेहैं ॥

१६१६ हितं भक्षाः । ४ । ४ । ६५ ॥

अपूपभक्षणं हितमस्मै आपूपिकः ॥

१६१६–'अस्मै हितम्' इस अर्थमें प्रथमान्त समर्थ भक्ष्यवाचक शब्दके उत्तर ठक् प्रत्यय हो, जैसे–अपूपभक्षणं हितमस्मै=आपूपिकः ॥

१६१७ तदस्मै दीयते नियुक्तम् । ४ । ४ । ६६ ॥

अग्रभोजनं नियतं दीयते अस्मै आग्रभोजनिकः ॥

१६१७–'अस्मै दीयते नियुक्तम्' इस अर्थमें प्रथमान्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–अग्रभोजनं नियतं दीयतेऽस्मै, इस विग्रहमें आग्रभोजनिकः ॥

१६१८श्राणामांसौदनाट्टिठन्।४।४।६७॥

श्राणा नियुक्तं दीयतेऽस्मै श्राणिकः । श्राणिकी । मांसौदनग्रहणं सङ्घातविगृहीतार्थम् । मांसौदनिकः । मांसिकः । औदनिकः ॥

१६१८–'नियुक्तं दीयतेऽस्मै' इस अर्थमें प्रथमान्त श्राणा, मांस और ओदन शब्दके उत्तर टिठन् प्रत्यय हो, जैसे–श्राणा (यवागू) नियुक्तं दीयतेऽस्मै, इस विग्रहमें श्राणिकः । श्राणिकी । मांसौदन शब्दका ग्रहण संघातार्थ और विगृहीतार्थ, अर्थात् मांसौदन शब्द और मांस और ओदन शब्दके उत्तर प्रत्ययविधानके निमित्त है, जैसे–मांसौदनिकः । मांसिकः । औदनिकः ॥

१६१९ भक्तादणन्यतरस्याम्।४।४।६८॥

पक्षे ठक् । भक्तमस्मै नियुक्तं दीयते भाक्तः। भाक्तिकः ॥

१६१९–प्रथमान्त भक्त शब्दके उत्तर 'अस्मै नियुक्तं दीयते' इस अर्थमें विकल्प करके अण् प्रत्यय हो, विकल्प पक्षमें ठक् प्रत्यय होगा, जैसे–भक्तमस्मै नियुक्तं दीयते, इस विग्रहमें भाक्तः, भाक्तिकः ॥

१६२० तत्र नियुक्तः । ४ । ४ । ६९ ॥

आकरे नियुक्त आकरिकः ॥

१६२०–'नियुक्तः' इस अर्थमें सप्तम्यन्त प्रातिपदिकके उत्तर ठक् प्रत्यय हो, जैसे–आकरे नियुक्तः=आकारिकः ॥

१६२१ अगारान्ताट्ठन् । ४।४ । ७० ॥

देवागारे नियुक्तो देवागारिकः ॥

१६२१–अगार शब्द अन्तमें रहते 'नियुक्तः' इस अर्थमें सप्तम्यन्त प्रातिपदिकके उत्तर ठन् प्रत्यय हो, जैसे–देवागारे नियुक्तः–देवागारिकः ॥

१६२२ अध्यायिन्यदेशकालात् ।४। ४ । ७१ ॥

निषिद्धदेशकालवाचकाट्ठक् स्यादध्येतरि ।

श्मशानेऽधीते श्माशानिकः । चतुर्दश्यामधीते चातुर्दशिकः ॥

१६२२-अध्यायिनि, अर्थात् अध्ययनकर्ता अर्थमें सप्तम्यन्त निषिद्ध देश और कालवाचक शब्दके उत्तर ठक् प्रत्यय हो, जैसे-श्मशाने अधीते=श्माशानिकः । चतुर्दश्यामधीते=चातुर्दशिकः ॥

१६२३ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति । ४ । ४ । ७२ ॥

तत्रेत्येव । वंशकठिने व्यवहरति वांशकठिनिकः । वंशा वेणवः कठिना यस्मिन्देशे स वंशकठिनस्तस्मिन्देशे या क्रिया यथानुष्ठेया तां तथैवानुतिष्ठतीत्यर्थः । प्रास्तारिकः । सांस्थानिकः ॥

१६२३-सप्तम्यन्त-कठिन शब्द अन्तमें है जिसके ऐसे शब्द, प्रस्तार शब्द और संस्थान शब्दके उत्तर 'व्यवहरति' इस अर्थमें ठक् प्रत्यय हो, जैसे-वंशकठिने व्यवहरति, इस विग्रहमें वांशकठिनिकः । वंशा वेणवः कठिना यस्मिन्देशे स बंशकठिनस्तस्मिन् देशे या क्रिया यथानुष्ठेया तां तथैव अनुतिष्ठतीत्यर्थः (जिस देशमें वंश अर्थात् वेणु कठिन हों उसको वंशकठिन कहतेहैं, उस देशमें जो क्रिया जिस प्रकार अनुष्ठित होनी उचित है, उसको जो उसी प्रकार अनुष्ठान करै उसको 'वांशकठिनिक' कहतेहैं) । प्रस्तारे व्यवहरति=प्रास्तारिकः । सांस्थानिकः ॥

१६२४ निकटे वसति । ४ । ४।७३ ॥

नैकटिको भिक्षुः ॥

१६२४-'वसति' इस अर्थमें सप्तम्यन्त निकट शब्दसे ठक् प्रत्यय हो,जैसे-निकटे वसति=नैकटिकः,अर्थात् भिक्षुक॥

१६२५ आवसथात् ष्ठल् । ४ ।४।७४ ॥

आवसथे वसति आवसथिकः।षित्त्वान्ङीष् । आवसथिकी ॥

आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च । आवसथात्किसरादेः षितः षडेते ठगधिकारे॥ षडिति सूत्रषट्केन विहिता इत्यर्थः।प्रत्ययास्तु सप्त ॥

॥ इति ठकोवधिः समाप्तः ॥

१६२५-'वसति' इस अर्थमें सप्तम्यन्त आवसथ शब्दके उत्तर ष्ठल् प्रत्यय हो, जैसे-आवसथे वसति=आवसथिकः । ष इत् होनेके कारण स्त्रीलिङ्गमें ङीष् होगा, जैसे-आवसथिकी । ठगधिकारके मध्यमें "आकर्षात् ष्ठल् १५५७", "पर्पादिभ्यः ष्ठन् १५५८", "भस्त्रादिभ्यः ष्ठन् १५६६", "कुसीददशैकादशात्ष्ठन्ष्ठचौ १५८१", "किसरादेः ष्ठन् १६०३", "आवसथात् ष्ठल् १६२५" इन छै सूत्रोंसे सात षित् प्रत्यय विहित हुएहैं ॥

॥ इति ठगधिकारः समाप्तः ॥

अथ प्राग्घितीयप्रकरणम् ।

१६२६ प्राग्घिताद्यत् । ४ । ४ । ७५ ॥

तस्मै हितमित्यतः प्राक् यदधिक्रियते ॥

१६२६-"तस्मै हितम् १६६५" इस सूत्रके पूर्वपर्यंत यत् प्रत्ययका अधिकार है ॥

१६२७ तद्वहति रथयुगप्रासङ्गम् । ४ । ४ । ७६ ॥

रथं वहति रथ्यः । युग्यः । वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः, तं वहति प्रासंग्यः ॥

१६२७-'वहति' इस अर्थमें द्वितीयान्त रथ, युग और प्रासङ्ग शब्दके उत्तर यत् प्रत्यय हो, जैसे-रथं वहति=रथ्यः । युग्यः । प्रासङ्गं वहति=प्रासङ्ग्यः । वत्सोंके दमन कालमें उनके स्कंधदेशमें जो काष्ठ आरोपित होताहै, उसको प्रासङ्ग कहतेहैं ॥

१६२८ धुरो यड्ढकौ । ४ । ४ । ७७ ॥

हलि चेति दीर्घे प्राप्ते ॥

१६२८-द्वितीयान्त धुर् शब्दके उत्तर यत् और ढक् प्रत्यय हो । "हलि च ३५४" इस सूत्रसे दीर्घकी प्राप्ति होनेपर-॥

१६२९ न भकुर्छुराम् । ८ । २ । ७९ ॥

भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात् । धुर्यः। धौरेयः ॥

१६२९-भसंज्ञक, कुर् और छुर् शब्दोंकी उपधाको दीर्घ न हो, जैसे-धुर्यः । धौरेयः ॥

१६३० खः सर्वधुरात् । ४ । ४ ।७८ ॥

सर्वधुरां वहतीति सर्वधुरीणः ॥

१६३०-'वहति' इस अर्थमें द्वितीयान्त सर्वधुरा शब्दके उत्तर ख प्रत्यय हो, जैसे-सर्वधुरां वहति=सर्वधुरीणः ॥

१६३१ एकधुराल्लुक् च । ४ ।४।७९॥

एकधुरां वहति एकधुरीणः । एकधुरः ॥

१६३१-द्वितीयान्त एकधुरा शब्दके उत्तर 'वहति' इस अर्थमें ख प्रत्यय हो और उसका पक्षमें लुक् हो, जैसे-एकधुरां वहति, इस विग्रहमें एकधुरीणः, एकधुरः ॥

१६३२ शकटादण् । ४ । ४ । ८० ॥

शकटं वहति शाकटो गौः ॥

१६३२-द्वितीयान्त शकट शब्दके उत्तर उक्त अर्थमें अण् प्रत्यय हो, जैसे-शकटं वहति=शाकटः, अर्थात् गौः ॥

१६३३ हलसीराट्ठक् । ४ । ४ । ८१ ॥

हलं वहति हालिकः । सैरिकः ॥

१६३३–'वहति' इस अर्थमें द्वितीयान्त हल और सीर शब्दके उत्तर ठक् प्रत्यय हो, जैसे–हलं वहति= हालिकः । सैरिकः ॥

१६३४ संज्ञायां जन्या । ४ । ४ । ८२ ॥

जनी वधूः, तां वहति प्रापयति जन्या ॥

१६३४–संज्ञा होनेपर द्वितीयान्त जनी शब्दके उत्तर उक्त अर्थमें यत् प्रत्यय हो, जैसे–जनी वधूः, तां वहति प्रापयति, इस विग्रहमें जन्या, अर्थात् मातृवयस्या ॥

१६३५ विध्यत्यधनुषा । ४ । ४ । ८३ ॥

द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्यान्न चेत्तत्र धनुः करणम् । पादौ विध्यन्ति पद्याः शर्कराः ॥

१६३५–धनुष करण न होनेपर द्वितीयान्त पदके उत्तर 'विध्यति' इस अर्थमें यत् प्रत्यय हो, जैसे–पादौ विध्यन्ति= पद्याः शर्कराः ॥

१६३६ धनगणं लब्धा । ४ । ४ । ८४ ॥

तृन्नन्तमेतत् । धनं लब्धा धन्यः । गणं लब्धा गण्यः ॥

१६३६–लब्धा (लाभ करनेवाला) इस अर्थमें द्विती- यान्त धन और गण शब्दके उत्तर यत् प्रत्यय हो, लब्धा यह पद तृन्नन्त है, जैसे–धनं लब्धा=धन्यः । गणं लब्धा=गण्यः ॥

१६३७ अन्नाण्णः । ४ । ४ । ८५ ॥

अन्नं लब्धा आन्नः ॥

१६३७–द्वितीयान्त अन्न शब्दके उत्तर उक्त अर्थमें ण प्रत्यय हो, जैसे–अन्नं लब्धा=आन्नः ॥

१६३८ वशं गतः । ४ । ४ । ८६ ॥

वश्यः परेच्छानुचारी ॥

१३३८–गत अर्थमें द्वितीयान्त वश शब्दके उत्तर यत् प्रत्यय हो, जैसे–वशं गतः=वश्यः, अर्थात् दूसरेकी इच्छानु- सार करनेवाला ॥

१३३९ पदमस्मिन्दृश्यम् । ४ । ४ । ८७ ॥

पद्यः कर्दमः । नातिशुष्क इत्यर्थः ॥

१६३९–'अस्मिन् दृश्यम्' इस अर्थमें प्रथमान्त पद शब्दके उत्तर यत् प्रत्यय हो, जैसे–पदमस्मिन् दृश्यम्=पद्यः, अर्थात् अनतिशुष्क कर्दम ॥

१६४० मूलमस्याऽऽबर्हि । ४ । ४ । ८८ ॥

आबर्हणमाबर्हः उत्पाटनं तदस्यास्तीत्या- बर्हि मूलमाबर्हि येषां ते मूल्या मुद्गाः ॥

१६४०–प्रथमान्त आबर्हिउपाधिक मूल शब्दके उत्तर 'अस्य' ऐसे षष्ठ्यर्थमें यत् प्रत्यय हो, आबर्हणमाबर्हः अर्थात् उत्पाटन, उत्पाटन इसका है इस अर्थमें आबर्हि पद सिद्ध हुआ, पश्चात् मूलमाबर्हि येषाम्, इस विग्रहमें मूल्या मुद्गाः ॥

१६४१ संज्ञायां धेनुष्या । ४ । ४ । ८९ ॥

धेनुशब्दस्य षुगागमो यप्रत्ययश्च स्वार्थे निपात्यते संज्ञायाम् । धेनुष्या बन्धके स्थिता ॥

१६४१–संज्ञा होनेपर धेनु शब्दके उत्तर स्वार्थमें निपात- नसे षुगागम और य प्रत्यय हो, जैसे–धेनुष्या बन्धके स्थिता॥

१६४२ गृहपतिना संयुक्ते ञ्यः । ४ । ४ । ९० ॥

गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योऽग्निः॥

१६४२–तृतीयान्त गृहपति शब्दके उत्तर संयुक्त अर्थमें ञ्य प्रत्यय हो, गृहपति शब्दसे यजमान जानना, जैसे–गृहप- तिना संयुक्तः=गार्हपत्योऽग्निः ॥

१६४३ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्याऽऽनाम्यसमसमितसम्मितेषु । ४ । ४ । ९१ ॥

नावा तार्यं नाव्यम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यो विष्यः । मूलेन आनाम्यं मूल्यम् । मूलेन समो मूल्यः । सीतया समितं सीत्यं क्षेत्रम् । तुलया संमितं तुल्यम् ॥

१६४३–तृतीयान्त नौ आदि शब्दोंके उत्तर तार्यादि अर्थोंमें यत् प्रत्यय हो, अर्थात् तार्य अर्थमें नौ शब्दके उत्तर, तुल्य अर्थमें वयस् शब्दके उत्तर, प्राप्य अर्थमें धर्म शब्दके उत्तर, वध्य अर्थमें विष शब्दके उत्तर, आनाम्य अर्थमें मूल शब्दके उत्तर, सम अर्थमें मूल शब्दके उत्तर, और समित अर्थमें सीता शब्दके उत्तर, और सम्मित अर्थमें तुला शब्दके उत्तर यत् प्रत्यय हो, जैसे–नावा तार्यम्=नाव्यम् । वयसा तुल्यः=वयस्यः । धर्मेण प्राप्यम्=धर्म्यम्। विषेण वध्यः=विष्यः। मूलेन आनाम्यम्=मूल्यम् । मूलेन समः=मूल्यः । सीतया समितम्=सीत्यम्, अर्थात् क्षेत्र । तुलया सम्मितम्=तुल्यम् ॥

१६४४ धर्मपथ्यर्थन्यायादनपेते । ४ । ४ । ९२ ॥

धर्मादनपेतं धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् ॥

१६४४–अनपेत अर्थमें पंचम्यन्त समर्थ धर्म, पथिन्, अर्थ और न्याय शब्दके उत्तर यत् प्रत्यय हो, जैसे–धर्मादनपेतम्= धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् ॥

१६४५ छन्दसो निर्मिते । ४ । ४ । ९३ ॥

छन्दसा निर्मितं छन्दस्यम् । इच्छया कृत- मित्यर्थः ॥

१६४५–निर्मित अर्थमें तृतीयान्त समर्थ छन्दस् शब्दके उत्तर यत् प्रत्यय हो, जैसे–छन्दसा निर्मितम्=छन्दस्यम्, अर्थात् इच्छासे किया हुआ ॥

१६४६ उरसोऽण् च ।४।४।९४॥

चाद्यत् । उरसा निर्मितः पुत्र औरसः । उरस्यः ॥

१६४६-निर्मित अर्थमें तृतीयान्त समर्थ उरस् शब्दके उत्तर अण् और चकारसे यत् प्रत्यय हो, जैसे-उरसा निर्मितः=औरसः पुत्रः, उरस्यः ॥

१६४७ हृदयस्य प्रियः ।४।४।९५ ॥

हृद्यो देशः । हृदयस्य हृल्लेखेति हृदादेशः ॥

१६४७-प्रिय अर्थमें षष्ठ्यन्त समर्थ हृदय शब्दके उत्तर यत् प्रत्यय हो, जैसे-हृदयस्य प्रियः=हृद्यः, अर्थात् देशः, यहां हृदय शब्दके स्थानमें "हृदयस्य हृल्लेखयदण० ९८८" इस सूत्रसे हृद् आदेश हुआहै ॥

१६४८ बन्धने चर्षौ ।४।४।९६ ॥

हृदयशब्दात् षष्ठ्यन्ताद्बन्धने यत्स्याद्वेदेऽभिधेये । हृदयस्य बन्धनं हृद्यो वशीकरणमन्त्रः ॥

१६४८-बंधनार्थमें वेद वाच्य होनेपर षष्ठ्यन्त हृदय शब्दके उत्तर यत् प्रत्यय हो,जैसे-हृदयस्य बन्धनम्=हृद्यः, अर्थात् वशीकरण मंत्र ॥

१६४९ मतजनहलात्करणजल्पकर्षेषु ।४।४।९७॥

मतं ज्ञानं तस्य करणं भावः साधनं वा मत्यम् । जनस्य जल्पो जन्यः । हलस्य कर्षो हल्यः ॥

१६४९-करण, जल्प और कर्ष अर्थमें क्रमसे मत, जन और हल शब्दके उत्तर यत् प्रत्यय हो, जैसे-मतं ज्ञानं तस्य करणं भावः साधनं वा=मत्यम् । जनस्य जल्पः=जन्यः । हलस्य कर्षः=हल्यः ॥

१६५० तत्र साधुः ।४।४।९८॥

अग्रे साधुः अग्र्यः । सामसु साधुः सामन्यः। ये चाभावकर्मणोरिति प्रकृतिभावः । कर्मण्यः । शरण्यः ॥

१६५०-'साधुः' इस अर्थमें सप्तम्यन्त समर्थ प्रातिपदिकके उत्तर यत् प्रत्यय हो, जैसे-अग्रे साधुः अग्र्यः"ये चाभावकर्मणोः ११५४" इस सूत्रसे प्रकृतिभाव होगा, जैसे-सामसु साधुः=सामन्यः । कर्मण्यः । शरण्यः ॥

१६५१ प्रतिजनादिभ्यः खञ् । ४।४।९९ ॥

प्रतिजनं साधुः प्रातिजनीनः । सांयुगीनः । सार्वजनीनः ॥ वैश्वजनीनः ॥

१६५१-साधु अर्थमें सप्तम्यन्त प्रतिजनादि शब्दोंके उत्तर खञ् प्रत्यय हो,जैसे-प्रतिजने साधुः=प्रातिजनीनः । सांयुगीनः। सार्वजनीनः । वैश्वजनीनः ॥

१६५२ भक्ताण्णः ।४। ४ । १००॥

भक्ते साधवो भाक्ताः शालयः ॥

१६५२-साधु अर्थमें सप्तम्यन्त भक्त शब्दके उत्तर ण प्रत्यय हो, जैसे-भक्ते साधवः=भाक्ताः शालयः ॥

१६५३ परिषदो ण्यः ।४।४।१०१॥

पारिषद्यः । परिषद इति योगविभागाण्णोऽपि । पारिषदः ॥

१६५३-सप्तम्यन्त परिषद् शब्दके उत्तर साधु अर्थमें ण्य प्रत्यय हो, जैसे-पारिषद्यः । "परिषदः" इस प्रकार भिन्न सूत्र करनेके कारण उसके उत्तर ण प्रत्यय होगा, जैसे-पारिषदः ॥

१६५४ कथादिभ्यष्ठक्।४।४।१०२॥

कथायां साधुः काथिकः ॥

१६५४-सप्तम्यन्त कथादि शब्दोंके उत्तर साधु अर्थमें ठक् प्रत्यय हो, जैसे-कथायां साधुः=काथिकः ॥

१६५५ गुडादिभ्यष्ठञ् । ४ । ४।१०३॥

गुडे साधुर्गौडिक इक्षुः । साक्तुको यवः ॥

१६५५-सप्तम्यन्त गुडादि शब्दोंके उत्तर साधु अर्थमें ठञ् प्रत्यय हो, जैसे-गुडे, अर्थात् गुडविषये साधुः=गौडिकः, अर्थात् इक्षु (ईख) । साक्तुको यवः ॥

१६५६ पथ्यतिथिवसतिस्वपतेर्ढञ् । ४ । ४ । १०४ ॥

पथि साधु पाथेयम् । आतिथेयम् । वसनं वसतिस्तत्र साधुर्वासतेयी रात्रिः । स्वापतेयं धनम् ॥

१६५६-सप्तम्यन्त पथिन्, अतिथि, वसति और स्वपति शब्दके उत्तर साधु अर्थमें ढञ् प्रत्यय हो, जैसे-पथि साधु=पाथेयम् । आतिथेयम् । वसनं वसतिस्तत्र साधुः=वासतेयी रात्रिः । स्वापतेयं धनम् ॥

१६५७ सभाया यः ।४। ४ ।१०५॥

सभ्यः ॥

१६५७-साध्वर्थमें सप्तम्यन्त समर्थ सभा शब्दके उत्तर य प्रत्यय हो, जैसे-सभायां साधुः=सभ्यः ॥

१६५८ समानतीर्थे वासी।४।४।१०७॥

साधुरिति निवृत्तम् ॥ वसतीति वासी, समाने तीर्थे गुरौ वसतीति सतीर्थ्यः ॥

१६५८-वासी इस अर्थमें सप्तम्यन्त समर्थ समानतीर्थ शब्दके उत्तर यत् प्रत्यय हो, इस सूत्रसे साध्वर्थकी निवृत्ति हुई, वसतीति वासी,समाने तीर्थे गुरौ वसतीतिसतीर्थ्यः (एक तीर्थ अर्थात् एक गुरुके निकट वास करनेवाले व्यक्तिको परस्पर सतीर्थ्य कहतेहैं) । तीर्थ शब्द शास्त्र, यज्ञ, क्षेत्र, उपाय, गुरु, मंत्री, योनि और जलावतार (घाट) का वाचक है ॥

१६५९ समानोदरे शयित ओ चोदात्तः। ४। ४। १०८॥

समाने उदरे शयितः स्थितः समानोदर्यो भ्राता ॥

१६५९–'शयितः' इस अर्थमें सप्तम्यन्त समर्थ समानोदर शब्दके उत्तर यत् प्रत्यय हो और ओकार उदात्त हो, जैसे–समाने उदरे शयितः स्थितः=समानोदर्यः, अर्थात् भ्राता ॥

१६६० सोदराद्यः। ४। ४। १०९॥

सोदर्यः। अर्थः प्राग्वत् ॥

॥ इति प्राग्घितीयाः ॥

१६६०--सप्तम्यन्त समर्थ सोदर शब्दके उत्तर उक्त अर्थमें य प्रत्यय हो, जैसे--सोदर्यः। इसका अर्थ पूर्ववत् अर्थात् भ्राता जानना ॥

॥ इति प्राग्घितीयप्रकरणं समाप्तम् ॥

अथ छयदधिकारप्रकरणम्।

१६६१ प्राक् क्रीताच्छः। ५। १। १॥

तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ॥

१६६१--"तेन क्रीतम् १७०२" इस सूत्रके पूर्वपर्यन्त जिस २ सूत्रमें प्रत्यय निर्दिष्ट नहीं है,केवल अर्थका ही निर्देश है, उस २ सूत्रमें छ प्रत्ययकी उपस्थिति हो, इसलिये समान अर्थमें प्रकृतिविशेषसे विहित यत् आदि प्रत्यय प्रकृत्यन्तरमें सावकाश छ प्रत्ययको तक्रकौण्डिन्य न्यायसे बाधतेहैं, नहीं तो छ प्रत्यय और यत् आदि प्रत्ययोंके सामीप्यका अविशेष होनेके कारण तव्यत्, तव्य और अनीयर् प्रत्ययके समान दोनों प्रत्यय पर्यायसे होजाते ॥

१६६२ उगवादिभ्यो यत्। ५। १। २॥

प्राक् क्रीतादित्येव। उवर्णान्ताद्गवादिभ्यश्च यत्स्यात् छस्यापवादः॥ नाभि नभं च॥ ॥ नभ्योऽक्षः। नभ्यमञ्जनम्। रथनाभावेवेदम् ॥ शुनः सम्प्रसारणं वा च दीर्घत्वम् ॥ ॥ शून्यम्। शुन्यम् ॥ ऊधसोऽनङ् च ॥ ऊधन्यः ॥

१६६२--"तेन क्रीतम् १७०२" इसके पूर्व अर्थोंमें चतुर्थ्यन्त उवर्णान्त और गवादि शब्दोंके उत्तर यत् प्रत्यय हो, यह सूत्र छ प्रत्ययका अपवादक है, जैसे--शङ्कवे हितम्=शंकव्यम्।

नाभि शब्दके उत्तर यत् प्रत्यय हो और नाभि शब्दके स्थानमें नभ आदेश हो, जैसे--नभ्योऽक्षः। सच्छिद्र चक्रको नाभि कहतेहैं, और उसमें अनुप्रविष्ट काष्ठविशेषको अक्ष कहतेहैं, अक्ष तदनुगत होनेके कारण नाभिको हितकर है। नभ्यमञ्जनम्। अञ्जन शब्दसे तैलाभ्यङ्ग जानना, वह भी स्नेहन होनेके कारण नाभिको हितकर है,रथके नाभिमें ही यह विधि लगतीहै।

श्वन् शब्दके उत्तर यत् प्रत्यय और श्वन् शब्दको सम्प्रसारण और विकल्प करके संप्रसारणको दीर्घ हो, जैसे--शून्यम्, शुन्यम्।

ऊधस् शब्दके उत्तर यत् प्रत्यय हो और अनङ् आदेश हो, जैसे--ऊधन्यः ॥

१६६३ कम्बलाच्च संज्ञायाम्। ५। १। ३॥

यत्स्यात्। कम्बल्यमूर्णापलशतम्। संज्ञायां किम्। कम्बलीया ऊर्णा ॥

१६६३--संज्ञा होनेपर चतुर्थ्यन्त कम्बल शब्दके उत्तर यत् प्रत्यय हो, जैसे–कम्बल्यम्, अर्थात् ऊर्णापलशत। संज्ञा न होनेपर यत् प्रत्यय नहीं होगा, जैसे--कम्बलीया ऊर्णा ॥

१६६४ विभाषा हविरपूपादिभ्यः। ५। १। ४॥

आमिक्ष्यं दधि। आमिक्षीयम्। पुरोडाश्यास्तण्डुलाः। पुरोडाशीयाः। अपूप्यम्। अपूपीयम् ॥

१६६४--चतुर्थ्यन्त हविर्वाचक शब्द और अपूपादि शब्दोंके उत्तर हितार्थमें विकल्प करके यत् प्रत्यय हो, विकल्प पक्षमें छ प्रत्यय होगा, जैसे–आमिक्ष्यं दधि, आमिक्षीयम्। पुरोडाश्यास्तण्डुलाः, पुरोडाशीयाः। अपूप्यम्, अपूपीयम् ॥

१६६५ तस्मै हितम्। ५। १। ५॥

वत्सेभ्यो हितो वत्सीयो गोधुक्। शंकवे हितं शंकव्यं दारु। गव्यम्। हविष्यम् ॥

१६६५–'हितम्' इस अर्थमें चतुर्थ्यन्त समर्थ प्रातिपदिकसे छ प्रत्यय हो, जैसे–वत्सेभ्यो हितः=वत्सीयः गोधुक्, अर्थात् गायदुहनेवाला। शंकवे हितम्=शंकव्यम्, अर्थात् दारु। गव्यम्। हविष्यम् ॥

१६६६ शरीरावयवाद्यत्। ५। १। ६॥

दन्त्यम्। कण्ठ्यम्। नस्नासिकायाः। नस्यम्। नाभ्यम् ॥

१६६६–'हितम्' इस अर्थमें चतुर्थ्यन्त शरीरावयववाचक शब्दके उत्तर यत् प्रत्यय हो, जैसे–दन्तेभ्यो हितम्=दन्त्यम्। कण्ठ्यम्।

यत् और तस् प्रत्यय और क्षुद्र शब्द परे रहते नासिका शब्दके स्थानमें नस् आदेश हो, जैसे–नस्यम्। नाभ्यम् ॥

१६६७ ये च तद्धिते। ६। १। ६१॥

यादौ तद्धिते परे शिरश्शब्दस्य शीर्षन्नादेशः स्यात्। शीर्षण्यः। तद्धिते किम्। शिर इच्छति शिरस्यति॥ वा केशेषु ॥*॥ शीर्षण्याः शिरस्या वा केशाः ॥ अचि शीर्ष इति वाच्यम् ॥ * ॥ अजादौ तद्धिते शिरसः शीर्षादेशः। स्थूलशिरस इदं स्थौलशीर्षम् ॥

१६६७--यकारादि तद्धित प्रत्यय परे रहते शिरस् शब्दके स्थानमें शीर्षन् आदेश हो, जैसे--शीर्षण्यः । तद्धित प्रत्यय परे न रहते 'शिरः इच्छति=शिरस्यति' ऐसा होगा ।

केश वाच्य होनेपर शिरस् शब्दके स्थानमें विकल्प करके शीर्षन् आदेश हो* जैसे--शीर्षण्याः, शिरस्याः केशाः ।

अजादि तद्धित प्रत्यय परे रहते शिरस् शब्दके स्थानमें शीर्ष आदेश हो * जैसे--स्थूलशिरः इदम्=स्थौलशीर्षम् ॥

१६६८ खलयवमाषतिलवृषब्रह्मणश्च ।५।१।७॥

खलाय हितं खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् । चाद्रथ्या ॥

१६६८--चतुर्थ्यन्त खल, यव, माष, तिल, वृष और ब्रह्मन् शब्दके उत्तर हितार्थमें यत् प्रत्यय हो, जैसे--खलाय हितम्=खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् । चकारसे रथ शब्दके उत्तर भी यत् प्रत्यय होगा, जैसे--रथ्या ॥

१६६९ अजाविभ्यां थ्यन्।५।१।८॥

अजथ्या यूथिः । अविथ्या ॥

१६६९--चतुर्थ्यन्त अज और अवि शब्दके उत्तर थ्यन् प्रत्यय हो, जैसे--अजथ्या यूथिः । अविथ्या ॥

१६७० आत्मन्विश्वजनभोगोत्तरपदात्खः ।५।१।९।

१६७०--हितार्थमें चतुर्थ्यन्त समर्थ आत्मन्, विश्वजन और भोगोत्तर प्रातिपदिकोंके उत्तर ख प्रत्यय हो ॥

१६७१ आत्माध्वानौ खे।६।४।१६९॥

एतौ खे प्रकृत्या स्तः । आत्मने हितमात्मनीनम् । विश्वजनीनम्॥ कर्मधारयादेवेष्यते॥ * ॥ षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव । विश्वजनीयम्॥ पञ्चजनादुपसंख्यानम् ॥ * ॥ पञ्चजनीनम् ॥ सर्वजनाट्ठञ् खश्च॥*॥ सार्वजनिकः । सर्वजनीनः ॥ महाजनाट्ठञ् ॥ * ॥ माहाजनिकः । मातृभोगीणः । पितृभोगीणः । राजभोगीनः ॥ आचार्यादणत्वं च ॥ * ॥ आचार्यभोगीनः ॥

१६७१--आत्मन् और अध्वन् यह दो शब्द ख प्रत्यय परे रहते प्रकृतिमें ही रहैं अर्थात् विकृत न हों, जैसे--आत्मने हितम्=आत्मनीनम् । विश्वजनीनम् ।

यह ख प्रत्यय कर्मधारयसंज्ञक शब्दके उत्तर ही इष्ट है* षष्ठीतत्पुरुष और बहुव्रीहिसंज्ञकके उत्तर ख प्रत्यय न होकर छ प्रत्यय ही होगा, जैसे--विश्वजनीयम् ।

पंचजन शब्दके उत्तर भी ख प्रत्यय हो * जैसे--पञ्चजनीनम् ॥

सर्वजन शब्दके उत्तर ठञ् और ख प्रत्यय हो* जैसे--सार्वजनिकः, सर्वजनीनः ॥

महाजन शब्दके उत्तर ठञ् प्रत्यय हो * जैसे--माहाजनिकः॥ मातृभोगीणः । पितृभोगीणः । राजभोगीनः ।

आचार्य शब्दके उत्तर नकारको णत्व न हो * जैसे--आचार्यभोगीनः ॥

१६७२ सर्वपुरुषाभ्यां णढञौ।५।१।१०

सर्वाण्णो वेति वक्तव्यम् ॥ * ॥ सर्वस्मै हितं सार्वम् । सर्वीयम् ॥ पुरुषाद्वधविकारसमूहतेनकृतेषु ॥ * ॥ भाष्यकारप्रयोगात्तेनेत्यस्य द्वन्द्वमध्ये निवेशः । पुरुषस्य वधः पौरुषेयः । तस्येदमित्याणि प्राप्ते । पुरुषस्य विकारः पौरुषेयः । प्राणिरजतादिभ्योऽञ् इत्यञि प्राप्ते । समूहेऽप्याणि प्राप्ते । एकाकिनोपि परितः पौरुषेयवृता इवेति माघः । तेन कृते ग्रन्थेऽणि प्राप्ते अग्रन्थे तु प्रासादादावप्राप्त एवेति विवेकः ॥

१६७२--सर्व और पुरुष शब्दके उत्तर ण और ढञ् प्रत्यय हो ।

सर्व शब्दके उत्तर विकल्प करके ण हो * जैसे--सर्वस्मै हितं=सार्वम्, सर्वीयम् ॥

पुरुष शब्दके उत्तर वध, विकार, समूह और तेन कृतम् इत्यादि अर्थमें उक्त प्रत्यय हो * भाष्यकारके प्रयोगके कारण 'तेन' इसका द्वन्द्वमध्यमें निवेश हुआहै, जैसे--पुरुषस्य वधः=पौरुषेयः ।

"तस्येदम् २५००" इस सूत्रसे अण् प्रत्ययकी प्राप्ति होनेपर, प्राणि और रजतादि शब्दके उत्तर अञ् प्रत्यय हो (१५३२) इस सूत्रसे अञ् प्रत्ययकी प्राप्ति होनेपर और समूहार्थमें अण् प्रत्ययकी प्राप्ति होनेपर भी माघमें--"एकाकिनोऽपि परितः पौरुषेयवृताविव" इस प्रकार प्रयोग हुआहै ।

तत्कर्तृक कृतग्रन्थ विषयमें अण् प्रत्ययकी प्राप्ति होनेपर और अग्रन्थ विषयमें प्रासादादि अर्थमें अण्की अप्राप्ति होनेपर बाध करके यह प्रत्यय होताहै, यह विवेक है ॥

१६७३ माणवचरकाभ्यां खञ् ५।१।११।

माणवाय हितं माणवीनम् । चारकीणम् ॥

१६७३--माणव और चरक शब्दके उत्तर हितार्थमें खञ् प्रत्यय हो, जैसे--माणवाय हितम्=माणवीनम् । चारकीणम् ॥

१६७४ तदर्थं विकृतेः प्रकृतौ । ५।१।१२॥

विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां छप्रत्ययः स्यात् । अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि । प्राकारीया इष्टकाः । शंकव्यं दारु ॥

१६७४-विकृतिवाचक चतुर्थ्यन्त पदके उत्तर तदर्थ (उसके निमित्त) प्रकृति वाच्य होनेपर छ प्रत्यय हो, जैसे-अङ्गारेभ्यः एतानि=अङ्गारीयाणि काष्ठानि । प्राकारीया इष्टकाः । शंकव्यं दारु ॥

१६७५ छदिरुपधिबलेर्ढञ् ।५।१।१३॥

छादिषेयाणि तृणानि । बालेयास्तण्डुलाः ॥ उपधिशब्दात्स्वार्थे इष्यते ॥ * ॥ उपधीयत इत्युपधिः रथाङ्गं तदेव औपधेयम्॥

१६७५-छदिस् उपधि और बलि शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-छादिषेयाणि तृणानि । बालेयास्तण्डुलाः ।

उपधि शब्दके उत्तर स्वार्थमें ही ढञ् प्रत्यय हो * जैसे-उपधीयते, इस वाक्यमें उपधि रथाङ्ग-तदेव औपधेयम् ॥

१६७६ ऋषभोपानहोर्ञ्यः ।५।१।१४॥

छस्यापवादः आर्षभ्यो वत्सः । औपानह्यो मुञ्जः । चर्म्मण्यप्ययमेव पूर्वविप्रतिषेधेन । औपानह्यं चर्म्म ॥

१६७६-ऋषभ और उपानह् शब्दके उत्तर ञ्य प्रत्यय हो, यह ञ्य प्रत्यय छ प्रत्ययका अपवाद है, जैसे-आर्षभ्यो वत्सः । औपानह्यो मुञ्जः । पूर्वविप्रतिषेधके कारण चर्म्म अर्थमें यह प्रत्यय ही होगा, जैसे-औपानह्यम् चर्म्म ॥

१६७७ चर्मणोऽञ् । ५ । १ । १५ ॥

चर्मणो या विकृतिस्तद्वाचकादञ् स्यात् । वर्ध्र्यै इदं वार्ध्रं चर्म । वारत्रं चर्म ॥

१६७७-चर्मके विकृतिवाचक शब्दके उत्तर अञ् प्रत्यय हो, जैसे-वर्ध्र्यै इदं=वार्ध्रं चर्म । वारत्रं चर्म ॥

१६७८ तदस्य तदस्मिन् स्यादिति । ५ । १ । १६ ॥

प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः । इति शब्दो लौकिकीं विवक्षामनुसारयति । तेनेह न । प्रासादो देवदत्तस्य स्यादिति ॥

१६७८-'तदस्य स्यात्' इसका वह होगा, 'तदस्मिन् स्यात्' वह इसमें होगा, इन दो अर्थोंमें अञ् प्रत्यय हो, जैसे-प्राकारः आसाम् इष्टकानां स्यात्, इस वाक्यमें प्राकारीया इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन्, इस विग्रहमें प्राकारीयः देशः ।

इस सूत्रमें इति शब्द लौकिक विवक्षाका अनुसरण कराता है, इस कारण 'प्रासादो देवदत्तस्य स्यादिति' इस स्थलमें अञ् प्रत्यय नहीं हुआ ॥

१६७९ परिखाया ढञ् ।५।१।१७॥

पारिखेयी भूमिः ॥

॥ इति छयतोः पूर्णोवधिः ॥

१६७९-परिखा शब्दके उत्तर ढञ् प्रत्यय हो, जैसे-पारिखेयी भूमिः ॥

॥ इति छयदधिकारः समाप्तः ॥

अथाऽऽर्हीयप्रकरणम् ।

१६८० प्राग्वतेष्ठञ् । ५ । १ । १८॥

तेन तुल्यमिति वतिं वक्ष्यति ततः प्राक् ठञधिक्रियते ॥

१६८०-"तेन तुल्यम्० १७७८" इस सूत्रसे पश्चात् वति प्रत्यय करेंगे, उसके पूर्वतक ठञ्का अधिकार चलेगा ॥

१६८१ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् । ५ । १ । १९ ॥

तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा ॥

१६८१-" तदर्हति १७२८ " इस सूत्रपर्यन्त ठञ्-अधिकारके मध्यमें गोपुच्छादि शब्दोंको त्याग कर ठञ्के अपवाद ठक् प्रत्ययका अधिकार चलेगा ॥

१६८२ असमासे निष्कादिभ्यः । ५ । १ । २० ॥

आर्हादित्येतत्तेन क्रीतमिति यावत्सप्तदशसूत्र्यामनुवर्तते । निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थेषु । नैष्किकम् । समासे तु ठञ् ॥

१६८२-'आर्हात्' इसकी "तेन क्रीतम्१७०२"इस सूत्रपर्यन्त १७ सूत्रोंमें अनुवृत्ति होगी । समास न होनेपर आर्हीय अर्थमें निष्कादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे-नैष्किकम् । समास होनेपर ठञ् प्रत्यय होगा ॥

१६८३ परिमाणान्तस्यासंज्ञाशाणयोः । ७ । ३ । १७ ॥

उत्तरपदवृद्धिः स्यात् ञिदादौ । परमनैष्किकः । असमासग्रहणं ज्ञापकं भवतीत्यतः प्राक् तदन्तविधिरिति । तेन सुगव्यम् । यवापूप्यमित्यादि । इत ऊर्ध्वं तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तच्चालुकि।पारायणिकः। द्वैपारायणिकः । अलुकीति किम् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । द्विशूर्पेण क्रीते शूर्पादञ् मा भूत, किंतु ठञ् । द्विशौर्पिकम् ॥

१६८३-संज्ञा न होनेपर ञित् आदि प्रत्यय परे रहते शाण शब्दसे भिन्न परिमाणवाचकशब्दअन्तवाले शब्दके उत्तरपदको वृद्धि हो, जैसे-परमनैष्किकः ।

संज्ञा होनेपर पञ्च कलायाः परिमाणमस्य ' पाञ्चकलापिकम् ' इस स्थानमें "तदस्य परिमाणम् १७२३" इस सूत्रसे ठञ् प्रत्यय हुआहै ।

असमासग्रहण ज्ञापक होताहै कि, इसके पूर्वपर्यन्त तदन्त विधि हो, इस कारण सुगव्यम्, यवापूप्यम्—इत्यादि पद सिद्ध होतेहैं ।

इसके परे संख्यावाचकशब्दपूर्वक पदका तदन्तग्रहण वतिके पूर्वमें ही होगा, वह अलुक्‌विषयमें ही होगा, जैसे—पारायणिकः । द्वैपारायणिकः ।

अलुक् न होनेपर द्वाभ्यां शूर्पाभ्यां क्रीतं=द्विशूर्पम्, द्विशूर्पेण क्रीतम्, इस विग्रहमें शूर्प शब्दके उत्तर अञ् प्रत्यय न होकर ठञ् प्रत्यय होगा, जैसे—द्विशौर्पिकम् ॥

१६८४ अर्द्धात्परिमाणस्य पूर्वस्य तु वा । ७ । ३ । २६ ॥

अर्द्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा ञिति णिति किति च । अर्द्धद्रोणेन क्रीतम् आर्द्धद्रौणिकम् । अर्द्धद्रौणिकम् ।

१६८४—ञ्इत्, णइत् और कइत् प्रत्यय परे रहते अर्द्ध शब्दके परे स्थित परिमाणवाचक उत्तरपदको नित्य वृद्धि हो और पूर्वपदको विकल्प करके वृद्धि हो, जैसे—अर्द्धद्रोणेन क्रीतम्, इस विग्रहमें आर्द्धद्रौणिकम् । अर्द्धद्रौणिकम् ॥

१६८५ नातः परस्य । ७ । ३ । २७ ॥

अर्द्धात्परस्य परिमाणाऽकारस्य वृद्धिर्न पूर्वपदस्य तु वा ञिदादौ । अर्द्धप्रस्थिकम् । आर्द्धप्रस्थिकम् । अतः किम् । अर्द्धकौडविकम् । तपरः किम् । अर्द्धखार्यां भवा अर्द्धखारी । अर्द्धखारीभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात् ॥

१६८५—ञित् आदि प्रत्यय परे रहते अर्द्ध शब्दसे परे स्थित परिमाणवाचक शब्दके अकारको वृद्धि न हो, किन्तु पूर्वपदको विकल्प करके वृद्धि हो, जैसे—अर्द्धप्रस्थिकम्, आर्द्धप्रस्थिकम् ।

अकार न होनेपर अर्द्धकौडविकम् । तपर करण होनेके कारण अर्द्धखार्यां भवा=अर्द्धखारी, यहां निषेध न हुआ, नहीं तो 'अर्द्धखारीभार्यः' इस स्थलमें "वृद्धिनिमित्तस्य० ८४०" इस सूत्रसे पुंवद्भावका निषेध नहीं होता ॥

१६८६ शताच्च ठन्यतावशते । ५ । १ । २१ ॥

शतेन क्रीतं शतिकम् । शत्यम् । अशते किम् । शतं परिमाणमस्य शतकः संघः । इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्न भिद्यते तेन ठन्यतौ न, किंतु कनेव । असमास इत्येव । द्विशतेन क्रीतं द्विशतकम् ॥

१६८६—शतभिन्नार्थमें 'तेन क्रीतम्' इस अर्थमें शत शब्दके उत्तर ठन् और यत् प्रत्यय हो, जैसे—शतेन क्रीतम्, इस विग्रहमें शतिकम्, शत्यम् ।

शत अर्थ होनेपर यथा—शतं परिमाणमस्य=शतकः, अर्थात् संघ । इस स्थलमें प्रत्ययार्थ वस्तुतः प्रकृतिके अर्थसे भिन्न नहीं होताहै, इस कारण ठन् और यत् प्रत्यय न होकर केवल कन् प्रत्यय ही हुआ ।

समास होनेपर यथा—द्विशतेन क्रीतं=द्विशतकम् ॥

१६८७ संख्याया अतिशदन्तायाः कन् । ५ । १ । २२ ॥

संख्यायाः कन् स्यादार्हीयेऽर्थे न तु त्यन्तशदन्तायाः । पञ्चभिः क्रीतः पञ्चकः । बहुकः । त्यन्तायास्तु साप्ततिकः । शदन्तायाः । चात्वारिंशत्कः ॥

१६८७—आर्हीय अर्थमें संख्यावाचक शब्दके उत्तर कन् प्रत्यय हो, तिप्रत्ययान्त और शदन्त शब्दके उत्तर नहीं होगा, जैसे—पञ्चभिः क्रीतः=पञ्चकः । बहुकः ।

तिप्रत्ययान्त होनेपर यथा—साप्ततिकः ।

शत्‌अन्तमें जैसे—चात्वारिंशत्कः ॥

१६८८ वतोरिड्वा । ५ । १ । २३ ॥

वत्वन्तात्कन इड्वा स्यात् । तावतिकः । तावत्कः ॥

१६८८—वतुप्रत्ययान्त शब्दके उत्तर कन् प्रत्ययको विकल्प करके इट् हो, जैसे—तावतिकः । तावत्कः ॥

१६८९ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् । ५ । १ । २४ ॥

योगविभागः कर्तव्यः । आभ्यां कन् स्यात् । असंज्ञायां ड्वुन् स्यात्कनोपवादः । विंशकः । त्रिंशकः । संज्ञायां तु, विंशतिकः । त्रिंशत्कः ॥

१६८९—यहां योगविभाग करना चाहिये, विंशति और त्रिंशत् शब्दके उत्तर कन् प्रत्यय हो और संज्ञा न होनेपर उक्त दोनों शब्दोंके उत्तर ड्वुन् प्रत्यय हो, उक्त प्रत्यय कन् प्रत्ययका अपवादक है, जैसे—विंशकः । त्रिंशकः । संज्ञा होनेपर जैसे—विंशतिकः । त्रिंशत्कः ॥

१६९० कंसाट्टिठन् । ५ । १ । २५ ॥

टो ङीबर्थः । इकार उच्चारणार्थः । कंसिकः । कंसिकी ॥ अर्द्धाच्चेति वक्तव्यम् ॥ * ॥ अर्द्धिकः । अर्द्धिकी ॥ कार्षापणाट्टिठन्वक्तव्यः ॥ प्रतिरादेशश्च वा ॥ * ॥ कार्षापणिकः । कार्षापणिकी । प्रतिकः । प्रतिकी ॥

१६९०—कंस शब्दके उत्तर टिठन् प्रत्यय हो, ट ङीबर्थ है, इकार उच्चारणार्थ है, जैसे—कंसिकः । कंसिकी ।

अर्द्ध शब्दके उत्तर टिठन् प्रत्यय हो * जैसे—आर्द्धिकः । आर्द्धिकी ।

कार्षापण शब्दके उत्तर टिठन् प्रत्यय हो और विकल्प करके कार्षापणको प्रति आदेश हो * जैसे—कार्षापणिकी कार्षापणिकः । प्रतिकः । प्रतिकी ॥

१६९१ शूर्पादञन्यतरस्याम्।५।१।२६॥

शौर्पम् । शौर्पिकम् ॥

१६९१–शूर्प शब्दके उत्तर विकल्प करके अञ् प्रत्यय हो, जैसे–शौर्पम्, शौर्पिकम् ॥

१६९२ शतमानविंशतिकसहस्रवसनादण् । ५ । १ । २७ ॥

एभ्योऽण् स्याट्ठञ्ठक्कनामपवादः । शतमानेन क्रीतं शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ॥

१६९२–शतमान, विंशतिक, सहस्र और वसन शब्दके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय ठञ्, ठक् और कन् प्रत्ययका अपवाद है, जैसे–शतमानेन क्रीतम्=शातमानम् । वैंशतिकम् । साहस्रम् । वासनम् ॥

१६९३ अध्यर्द्धपूर्वाद्विगोर्लुगसंज्ञायाम् । ५ । १ । २८ ॥

अध्यर्द्धपूर्वाद्विगोश्च परस्यार्हीयस्य लुक् स्यात् । अध्यर्द्धकंसम् । द्विकंसम् । संज्ञायां तु पाञ्चकलायिकम् ॥

१६९३–संज्ञा न होनेपर अध्यर्द्धशब्दपूर्वक द्विगु समासके उत्तर आर्हीय प्रत्ययका लुक् हो, जैसे–अध्यर्द्धकंसम् ।

संज्ञा होनेपर ' पाञ्चकलायिकम् ' ऐसा पद होगा ॥

१६९४ विभाषा कार्षापणसहस्राभ्याम् । ५ । १ । २९

लुग्वा स्यात् । अध्यर्द्धकार्षापणम् । अध्यर्द्धकार्षापणिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् । औपसंख्यानिकस्य टिठनो लुक् । पक्षे अध्यर्द्धप्रतिकम् । द्विप्रतिकम् । अध्यर्द्धसहस्रम् । अध्यर्द्धसाहस्रम् । द्विसहस्रम् । द्विसाहस्रम् ॥

१६९४–कार्षापण और सहस्र शब्दके उत्तर विकल्प करके आर्हीय प्रत्ययका लुक् हो, जैसे–अध्यर्द्धकार्षापणम्, अध्यर्द्धकार्षापणिकम् । द्विकार्षापणम्, द्विकार्षापणिकम् । यहां औपसंख्यानिक टिठन् प्रत्ययका लुक् हुआ । पक्षमें अध्यर्द्धप्रतिकम् । द्विप्रतिकम् । अध्यर्द्धसहस्रम्, अध्यर्द्धसाहस्रम् । द्विसहस्रम्, द्विसाहस्रम् ॥

१६९५ द्वित्रिपूर्वान्निष्कात् । ५।१।३०॥

लुग्वा स्यात् । द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् ॥ बहुपूर्वाच्चेति वक्तव्यम् ॥ * ॥ बहुनिष्कम् । बहुनैष्किकम् ॥

१६९५–द्वि और त्रिशब्दपूर्वक निष्क शब्दके उत्तर आर्हीय प्रत्ययका विकल्प करके लुक् हो, जैसे–द्विनिष्कम्, द्विनैष्किकम् । त्रिनिष्कम्, त्रिनैष्किकम् ।

बहुपूर्वक निष्क शब्दके उत्तर आर्हीय प्रत्ययका विकल्प करके लुक् हो * जैसे–बहुनिष्कम्, बहुनैष्किकम् ॥

१६९६ बिस्ताच्च । ५ । १ । ३१ ॥

द्वित्रिबहुपूर्वाद्बिस्तादार्हीयस्य लुग्वा स्यात् । द्विबिस्तम् । द्विबैस्तिकमित्यादि ॥

१६९६–द्वि, त्रि और बहुशब्दपूर्वक बिस्त शब्दके उत्तर आर्हीय प्रत्ययका विकल्प करके लुक् हो, जैसे–द्विबिस्तम्, द्विबैस्तिकम्–इत्यादि ॥

१६९७ विंशतिकात्खः । ५ । १।३२॥

अध्यर्द्धपूर्वाद्विगोरित्येव । अध्यर्द्धविंशतिकीनम् । द्विविंशतिकीनम् ॥

१६९७–अध्यर्द्धपूर्वक और द्विगु समासके परे स्थित विंशतिक शब्दके उत्तर ख प्रत्यय हो, जैसे–अध्यर्द्धविंशतिकीनम् । द्विविंशतिकीनम् ॥

१६९८ खार्या ईकन् । ५ । १ । ३३ ॥

अध्यर्द्धखारीकम् । द्विखारीकम् ॥ केवलायाश्चेति वक्तव्यम् ॥ * ॥ खारीकम् ॥

१६९८–अध्यर्द्धशब्दपूर्वक और द्विगुसमासके परे स्थित खारी शब्दके उत्तर ईकन् प्रत्यय हो, जैसे–अध्यर्द्धखारीकम् । द्विखारीकम् ।

केवलखारी शब्दके उत्तर भी ईकन् प्रत्यय हो * जैसे–खारीकम् ॥

१६९९ पणपादमाषशताद्यत्।५।१।३४॥

अध्यर्द्धपण्यम् । द्विपण्यम् । अध्यर्द्धपाद्यम् । द्विपाद्यम् । इह पादः पदिति न, यस्येतिलोपस्य स्थानिवद्भावात् । पद्यत्यतदर्थे इत्यपि न प्राण्यङ्गार्थस्यैव तत्र ग्रहणात् ॥

१६९९–अध्यर्द्धपूर्वक और द्विगुसमासके परे स्थित पण, पाद, माष और शत शब्दके उत्तर यत् प्रत्यय हो, जैसे–अध्यर्द्धपण्यम् । द्विपण्यम् । 'अध्यर्द्धपाद्यम् । द्विपाद्यम् ' इस स्थलमें " यस्येति च ३२१" इस सूत्रसे लोपके स्थानिवद्भावके कारण "पादः पत् ४१४" इस सूत्रसे पद् आदेश नहीं होता और "पद्यतदर्थे० ९९१" इस सूत्रमें प्राणिवाचक अङ्गार्थके ग्रहणके कारण इस सूत्रसे भी पद् आदेश नहीं होगा, प्राणिअङ्गार्थका ही उसमें ग्रहण है ।

१७०० शाणाद्वा । ५ । १ । ३५ ॥

यत्स्यात्पक्षे ठञ् । तस्य लुक् । अध्यर्द्धशाण्यम् । अध्यर्द्धशाणम् ॥

१७००–अध्यर्द्धपूर्वक शाण शब्दके उत्तर विकल्प करके यत् प्रत्यय हो, विकल्प पक्षमें ठञ् प्रत्यय होगा, इसका (१६९३) लुक् होगा, जैसे–अध्यर्द्धशाण्यम्, अध्यर्द्धशाणम् ॥

१७०१ द्वित्रिपूर्वादण् च।५।१।३६॥

शाणादित्येव । चाद्यत् । तेन त्रैरूप्यम् परिमाणान्तस्यासंज्ञाशाणयोरितिपर्युदासादा-

दिवृद्धिरेव। द्वैशाणम्। द्विशाण्यम्। द्विशाणम्। इह ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोर्थाऽश्चाकाङ्क्षितास्त इदानीमुच्यन्ते॥

१७०१-द्वि और त्रि शब्द पूर्वमें रहते उसके परवर्ती शाण शब्दके उत्तर विकल्प करके अण् और यत् प्रत्यय हो, इससे 'त्रैरूप्यम्' अर्थात् तीन रूप होंगे, "परिमाणान्तस्यासंज्ञाशाणयोः १६८३" इस सूत्रमें पर्युदासके कारण आदि पदको ही वृद्धि होगी, जैसे-द्वैशाणम्। द्विशाण्यम्। इस सूत्रमें ठञ्आदि तेरह प्रत्यय कहेहैं, उनकी समर्थविभक्ति और संपूर्ण अर्थ आकांक्षित हैं, इस समय उनका ही विषय कहा जायगा॥

१७०२ तेन क्रीतम्। ५। १।३७॥

ठञ्। गोपुच्छेन क्रीतं गौपुच्छिकम्। साप्ततिकम्। प्रास्थिकम्। ठक्, नैष्किकम्॥

१७०२-'तेन क्रीतम्' (उससे खरीदा हुआ) इस अर्थमें ठञ् प्रत्यय हो, जैसे-गोपुच्छेन क्रीतम्=गौपुच्छिकम्। साप्ततिकम्। प्रास्थिकम्। ठक् जैसे-नैष्किकम्॥

१७०३ इद्गोण्याः।१।२।५०॥

गोण्या इत्स्यात्तद्धितलुकि, लुकोपवादः। पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः॥

१७०३-तद्धित प्रत्ययका लुक् होनेपर गोणी शब्दको इत् आदेश हो, अर्थात् ईकारके स्थानमें इकार हो, यह सूत्र "लुक् तद्धितलुकि" इस सूत्रसे विहित लुक्का विशेषक है, जैसे-पञ्चभिः गोणाभिः क्रीतः पटः=पञ्चगोणिः॥

१७०४ तस्य निमित्तंसंयोगोत्पातौ।५।१।३८॥

संयोगः सम्बन्धः। उत्पातः शुभाशुभसूचकः। शतिकः शत्यो वा धनपतिसंयोगः। शतिकं शत्यं वा दक्षिणाक्षिस्पन्दनम्, शतस्य निमित्तमित्यर्थः। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्॥ * ॥ वातस्य शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्॥ सन्निपाताच्चेति वक्तव्यम्॥ * ॥ सान्निपातिकम्॥

१७०४-संयोग (संबन्ध) और उत्पात (शुभाशुभसूचक) अर्थमें उनके निमित्त होनेपर शत शब्दके उत्तर ठञ् और यत् प्रत्यय हो, जैसे-शतिकः शत्यो वा धनपतिसंयोगः। शतिकम्, शत्यं वा दक्षिणाक्षिस्पन्दनम्।

वात, पित्त और श्लेष्मन् शब्दके उत्तर शमन और कोपन अर्थमें ठञ् प्रत्यय हो* जैसे-वातस्य शमनं कोपनं वा=वातिकम्। पैत्तिकम्। श्लैष्मिकम्।

सन्निपात शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-सान्निपातिकम्॥

१७०५ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्। ५। १। ३९॥

गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः-धन्यः। यशस्यः। स्वर्ग्यः। गोद्व्यचः किम्। विजयस्य वैजयिकः। असंख्येत्यादि किम्। पञ्चानां पञ्चकम्। साप्तकम्। प्रास्थिकम्। खारीकम्। अश्वादि, आश्विकम्। आश्मिकम्॥ ब्रह्मवर्चसादुपसंख्यानम्॥ * ॥ ब्रह्मवर्चस्यम्॥

१७०५-गो शब्द और संख्यावाचक, परिमाणवाचक, तथा अश्वादि अर्थात् अश्व, अश्मन्, गण, ऊर्णा, उमा, गङ्गा, क्षण, वर्षा और वसु शब्दसे भिन्न दोस्वरयुक्त शब्दके उत्तर 'तस्य निमित्तम्' इस अर्थमें विकल्प करके यत् प्रत्यय हो, जैसे-गोर्निमित्तं संयोग उत्पातो वा=गव्यः। द्व्यचः। धन्यः। यशस्यः। स्वर्ग्यः।

गोद्व्यच्से भिन्न स्थलमें जैसे-विजयस्य=वैजयिकः।

असंख्या इत्यादि न होनेपर जैसे-पञ्चानां=पञ्चकम्। साप्तकम्। प्रास्थिकम्। खारीकम्।

अश्वादि जैसे-आश्विकम्। आश्मिकम्।

ब्रह्मवर्चस शब्दके उत्तर यत् प्रत्यय हो * जैसे-ब्रह्मवर्चस्यम्॥

१७०६ पुत्राच्छ च। ५। १। ४०॥

चाद्यत्। पुत्रीयः। पुत्र्यः॥

१७०६-पुत्र शब्दके उत्तर छ और यत् प्रत्यय हों, जैसे-पुत्रीयः, पुत्र्यः॥

१७०७ सर्वभूमिपृथिवीभ्यामणञौ। ५। १। ४१॥

सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिवः। सर्वभूमिशब्दोनुशतिकादिषु पठ्यते॥

१७०७-षष्ठ्यन्त समर्थ सर्वभूमि और पृथिवी शब्दके उत्तर निमित्तार्थमें अण् और अञ् प्रत्यय हो, जैसे-सर्वभूमेर्निमित्तं संयोगः उत्पातो वा=सार्वभौमः। पार्थिवः। सर्वभूमि शब्दका अनुशतिकादि गणमें पाठ है॥

१७०८ तस्येश्वरः। ५। १। ४२॥

१७०८-'तस्य ईश्वरः' (उसका ईश्वर) और-

१७०९ तत्रविदित इति च।५।१।४३॥

सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः। पार्थिवः॥

१७०९-'तत्र विदितः" (इस स्थलमें वा विषयमें विदित) इन दो अर्थोंमें अण् और अञ् प्रत्यय हो, जैसे-सर्वभूमेरीश्वरः=सर्वभूमौ विदितो वा=सार्वभौमः। पार्थिवः॥

१७१० लोकसर्वलोकाट्ठञ्।५।१।४४॥

तत्र विदित इत्यर्थे। लौकिकः। अनुशतिकादित्वादुभयपदवृद्धिः सार्वलौकिकः॥

१७१०—लोक और सर्वलोक शब्दके उत्तर 'तत्र विदितः' इस अर्थमें ठञ् प्रत्यय हो, जैसे—लौकिकः । अनुशतिकादित्वके कारण दोनों पदोंको वृद्धि होगी, जैसे—सार्वलौकिकः ॥

१७११ तस्य वापः । ५ । १ । ४५ ॥

उप्यते अस्मिन्निति वापः क्षेत्रम् । प्रस्थस्य वापः प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

१७११—उसका 'वाप' अर्थात् क्षेत्र होनेपर प्रस्थादि शब्दोंके उत्तर अण् प्रत्यय हो, जिसमें जौआदि बोये जायँ उसको वाप अर्थात् क्षेत्र कहतेहैं, जैसे—प्रस्थस्य वापः=प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

१७१२ पात्रात् ष्ठन् ।५।१। ४६ ॥

पात्रस्य वापः क्षेत्रं पात्रिकम् । पात्रिकी क्षेत्रभक्तिः ॥

१७१२—पात्र शब्दके उत्तर उक्त अर्थमें ष्ठन् प्रत्यय हो, जैसे—पात्रस्य वापः क्षेत्रम्=पात्रिकम् । पात्रिकी क्षेत्रभक्तिः ॥

१७१३ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते । ५ । १ । ४७ ॥

वृद्धिर्दीयत इत्यादिक्रमेण प्रत्येकं सम्बन्धादेकवचनम् । पंचास्मिन् वृद्धिः आयः लाभः शुल्कमुपदा वा दीयते पंचकः।शतिकः।शत्यः। साहस्रः । उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । विक्रेत्रा मूल्यादधिकग्राह्यं लाभः । रक्षानिर्वेशो राजभागः शुल्कः । उत्कोच उपदा ॥ चतुर्थ्यर्थ उपसंख्यानम् ॥ * ॥ पञ्चास्मै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः । सममब्राह्मणे दानमितिवदधिकरणत्वविवक्षा वा ॥

१७१३—'तदस्मिन् दीयते' इस अर्थमें वृद्धि, आय, लाभ, शुल्क और उपदा इनको'दीयते' इसका कर्म होनेपर यथाविहित प्रत्यय हों, 'वृद्धिर्दीयते' इत्यादि क्रमानुसार प्रत्येकके संबन्धमें एकवचन हुआहै, जैसे—पञ्चास्मिन् वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते,इस वाक्यमें पञ्चकः। शतिकः। शत्यः । साहस्रः ।

उत्तमर्ण अर्थात् ऋणदातृकर्तृक मूल धनकी अपेक्षाके अतिरिक्त ग्राह्य धन (व्याज)को वृद्धि कहतेहैं ।

ग्रामादिमें स्वामीके ग्राह्य भागका नाम आय है ।

विक्रयकर्ता (बेचनेवाला) से मूल धनकी अपेक्षाके अतिरिक्त ग्राह्य धनादिको लाभ कहतेहैं ।

रक्षाके निमित्त राजोंके भागनिमित्त गृहीत धनादिको शुल्क (कर) कहतेहैं ।

उत्कोचको उपदा (घूस) कहतेहैं ।

चतुर्थीके अर्थमें भी प्रथमान्त समर्थसे उक्त प्रत्यय हों * जैसे—पञ्च अस्मै वृद्ध्यादिः दीयते=पञ्चको देवदत्तः । अथवा 'सममब्राह्मणे दानम्' इसके समान अधिकरणत्व विवक्षा जाननी ॥

१७१४ पूरणार्धाट्ठन् । ५ । १ । ४८ ॥

यथाक्रमं ठक्टिठनोरपवादः । द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः। तृतीयिकः। आर्द्धिकः । अर्द्धशब्दो रूपकस्यार्द्धे रूढः ॥

१७१४—पूरणप्रत्ययान्त और अर्द्ध शब्दके उत्तर पूर्वोक्त अर्थमें ठन् प्रत्यय हो, यह सूत्र यथाक्रम ठक् और टिठन् प्रत्ययका अपवादक है, जैसे—द्वितीयो वृद्ध्यादिः अस्मिन् दीयते, इस विग्रहमें द्वितीयिकः । तृतीयिकः । अर्द्धिकः । अर्द्ध शब्द रूपकके अर्द्धमें रूढ है ॥

१७१५ भागाद्यच्च । ५ । १ । ४९ ॥

चाट्ठन् । भागशब्दोपि रूपकस्यार्द्धे रूढः । भागो वृद्ध्यादिरस्मिन् दीयते भाग्यं, भागिकं शतम् । भाग्या, भागिका विंशतिः ॥

१७१५—भाग शब्दके उत्तर यत् और ठन् प्रत्यय हो,भाग शब्द भी रूपकके अर्द्धमें रूढ है, जैसे—भागो वृद्ध्यादिरस्मिन् दीयते=भाग्यम्, भागिकं शतम् । भाग्या,भागिका विंशतिः ॥ भाग शब्दसे वृद्ध्यादि जानना ॥

१७१६ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः । ५ । १ । ५० ॥

वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तत्प्रकृतिकाद्वितीयान्तादित्यर्थः । वंशभारं हरति वहत्यावहति वा वांशभारिकः । ऐक्षुभारिकः । भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरं भारभूतेभ्यो वंशादिभ्य इति। भारभूतान्वंशान् हरति वांशिकः । ऐक्षुकः ॥

१७१६—'तत् हरति वहति आवहति' इन अर्थोंमें वंशादि शब्दोंके परे स्थित जो भारशब्दान्त प्रातिपदिक, तत्प्रकृतिक द्वितीयान्त पदके उत्तर यथाविहित प्रत्यय हों, जैसे—वंशभारं हरति वहति आवहति वा=वांशभारिकः । ऐक्षुभारिकः । "भाराद्वंशादिभ्यः" इसका भारभूत वंशादि शब्दोंके उत्तर यथाविहित प्रत्यय हों, ऐसा व्याख्यान्तर है, इससे भारभूतान् वंशान् हरति=वांशिकः, ऐक्षुकः, ऐसे पद सिद्ध होतेहैं ॥

१७१७ वस्नद्रव्याभ्यां ठन्कनौ । ५ । १ । ५१ ॥

यथासंख्यं स्तः । वस्नं हरति वहत्यावहति वा वस्निकः । द्रव्यकः ॥

१७१७—पूर्वोक्तार्थमें वस्न और द्रव्य शब्दके उत्तर यथाक्रम ठन् और कन् प्रत्यय हो, जैसे—वस्नं हरति वहति आवहति वा=वस्निकः । द्रव्यकः ॥

१७१८ सम्भवत्यवहरति पचति । ५ । १ । ५२ ॥

प्रस्थं सम्भवति प्रास्थिकः कटाहः । प्रस्थं

स्वस्मिन्समावेशयतीत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमवहरति पचति वेत्यर्थः ॥ तत्पचतीति द्रोणादण् च ॥ * ॥ चाट्ठञ् । द्रोणं पचतीति द्रौणी। द्रौणिकी ॥

१७१८-'सम्भवति', 'अवहरति' और 'पचति' अर्थमें प्रस्थ शब्दके उत्तर यथाविहित प्रत्यय हों, जैसे-प्रस्थं सम्भवति=प्रास्थिकः कटाहः, अर्थात् प्रस्थको अपनेमें समावेशित करताहै, इससे उसको प्रास्थिक कहतेहैं। प्रास्थिकी ब्राह्मणी, अर्थात् जो प्रस्थका अवहरण और पाक करतीहै।

वह पाक करताहै, इस अर्थमें द्रोण शब्दके उत्तर अण् और ठञ् प्रत्यय हो * जैसे-द्रोणं पचति, इस वाक्यमें द्रौणी, द्रौणिकी ॥

१७१९ आढकाचितपात्रात्खोऽन्यतरस्याम् । ५ । १ । ५३ ॥

पक्षे ठञ् । आढकं सम्भवति अवहरति पचति वा आढकीना।आढकिकी। आचितीना। आचितिकी । पात्रीणा । पात्रिकी ॥

१७१९-आढक, आचित और पात्र शब्दके उत्तर संभवति इत्यादि अर्थमें ख प्रत्यय हो, और विकल्प पक्षमें ठञ् प्रत्यय हो, जैसे-आढकं संभवति अवहरति पचति वा=आढकीना, आढकी। आचितीना, आचितिकी। पात्रीणा, पात्रिकी ॥

१७२० द्विगोः ष्ठंश्च । ५ । १ । ५४ ॥

आढकाचितपात्रादित्येव।आढकाद्यन्ताद्द्विगोः सम्भवत्यादिष्वर्थेषु ष्ठन्खौ वा स्तः पक्षे ठञ् । तस्याध्यर्द्धेति लुक् । षित्वान्ङीष् द्व्याढकिकी । द्व्याढकीना । द्विगोरिति ङीप् । द्व्याढकी । द्व्याचितिकी । द्व्याचितीना । अपरिमाणेति ङीब्निषेधात्, द्व्याचिता । द्विपात्रिकी । द्विपात्रीणा । द्विपात्री ॥

१७२०-द्विगुसमासान्त, आढक, आचित और पात्र शब्दके उत्तर सम्भावनादि अर्थमें विकल्प करके ष्ठन् और ख प्रत्यय हो, विकल्प पक्षमें ठञ् प्रत्यय होगा, "अध्यर्द्ध० १६९३" इस सूत्रसे उस ठञ् प्रत्ययका लुक् और षित्संज्ञक होनेके कारण स्त्रीलिङ्गमें ङीष् प्रत्यय होगा, जैसे-द्व्याढकिकी, द्व्याढकीना। द्विगुसमासान्तके उत्तर स्त्रीलिङ्गमें ङीप् प्रत्यय होगा (४७९), जैसे-द्व्याढकी। द्व्याचितिकी, द्व्याचितीना। "अपरिमाण० ४८०" इस सूत्रसे ङीप् प्रत्ययका निषेध भी होगा, जैसे-द्व्याचिता । द्विपात्रिकी, द्विपात्रीणा, द्विपात्री ॥

१७२१ कुलिजाल्लुक्खौ च ।५।१।५५॥

कुलिजान्ताद्द्विगोः सम्भवत्यादिष्वर्थेषु लुक्खौ वा स्तः। चात् ष्ठंश्च । लुगभावे ठञः श्रवणम् । द्विकुलिजी । द्वैकुलिजिकी । द्विकुलिजीना । द्विकुलिजिकी ॥

१७२१-कुलिजान्त द्विगु समासके उत्तर संभवत्यादि अर्थमें विकल्प करके ठञ् प्रत्ययका लुक् और ख प्रत्यय हो, सूत्रमें चकार होनेके कारण ठन् प्रत्यय भी हो,जैसे-द्विकुलिजी, द्वैकुलिजिकी। द्विकुलिजीना, द्विकुलिजिकी ॥

१७२२ सोऽस्यांशवस्नभृतयः ।५।१।५६॥

अंशो भागः। वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च अंशो वस्नो भृतिर्वाऽस्य पञ्चकः ॥

१७२२-वह इसका है, इस अर्थमें तथा अंश अर्थात् भाग, वस्न अर्थात् मूल्य और भृति अर्थात् वेतन, ऐसे अर्थोंमें यथाविहित प्रत्यय हों, जैसे-पञ्च अंशो वस्नो भृतिर्वा अस्य, इस विग्रहमें पञ्चकः ॥

१७२३ तदस्य परिमाणम् ।५।१।५७ ॥

प्रस्थं परिमाणमस्य प्रास्थिको राशिः ॥

१७२३-वह इसका परिमाण है, इस षष्ठ्यर्थमें संख्यावाचक प्रस्थ शब्दके उत्तर उक्त प्रत्यय हो, जैसे-प्रस्थं परिमाणमस्य, इस विग्रहमें प्रास्थिको राशिः ॥

१७२४ संख्यायाः संज्ञासंघसूत्राध्ययनेषु । ५ । १ । ५८ ॥

पूर्वसूत्रमनुवर्तते ॥ तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः ॥ * ॥ यद्वा द्व्येकयोरितिवत्संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः । पञ्चैव पञ्चकाः शकुनयः। पञ्च परिमाणमेषामिति वा। संघे-पञ्चकः। सूत्रे-अष्टकं पाणिनीयम् । संघशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तम्। पञ्चकमध्ययनम् ॥ स्तोमे डविधिः ॥ * ॥ पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः । सप्तदशः । एकविंशः । सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः ॥

१७२४-संज्ञा, संघ, सूत्र और अध्ययन अर्थ होनेपर 'तदस्य परिमाणम्' इस अर्थमें संख्यावाचक शब्दके उत्तर उक्त प्रत्यय हो।

संघादिके मध्यमें संज्ञा अर्थमें स्वार्थमें ही उक्त प्रत्यय हों* जैसे-पञ्चैव=पञ्चकाः शकुनयः, पञ्चपरिमाणमेषाम् इति वा। संघार्थमें-पञ्चकः। सूत्रमें जैसे-अष्टकं पाणिनीयम् ॥

संघ शब्दके प्राणिसमूहमें रूढत्वके कारण यह सूत्र पृथक् कहागयाहै, जैसे-पञ्चकमध्ययनम् ॥

स्तोमार्थमें ड प्रत्यय हो*जैसे-पञ्चदशपरिमाणमस्य=पञ्चदशः स्तोमः। सप्तदशः। एकविंशः। सोम यागमें सामगानेवालोंके द्वारा क्रियमाण पृष्ठ्यादि संज्ञिका स्तुतिको स्तोम कहतेहैं॥

१७२५ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् । ५ । १ । ५९ ॥

एते रूढिशब्दा निपात्यन्ते ॥

१७२५–पंक्ति, विंशति, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति, अशीति, नवति और शत,यह रूढिशब्द निपातनसे सिद्ध हों ॥

१७२६ पञ्चद्दशतौ वर्गे वा । ५।१।६० ॥

पञ्च परिमाणमस्य पञ्चद्वर्गः । दशत् । पक्षे । पञ्चकः । दशकः ॥

१७२६–वर्ग अर्थ होनेपर पञ्चत् और दशत् यह दो पद विकल्प करके निपातनसे सिद्ध हों, जैसे–पञ्च परिमाणमस्य= पञ्चद्वर्गः । दशत् । विकल्प पक्षमें पञ्चकः । दशकः ॥

१७२७ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् । ५ । १ । ६२ ॥

त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि । चात्वारिंशानि ब्राह्मणानि ॥

१७२७–ब्राह्मणविषयमें संज्ञा होनेपर त्रिंशत् और चत्वारिंशत् शब्दके उत्तर डण् प्रत्यय हो, जैसे–त्रिंशदध्यायाः परिमाणं येषां ब्राह्मणानां=त्रैंशानि । चात्वारिंशानि ॥

१७२८ तदर्हति । ५ । १ । ६३ ॥

लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्ताट्ठञादयः स्युः । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः ॥

१७२८–इसके योग्य है, इस अर्थमें द्वितीयान्त शब्दके उत्तर ठञ् आदि प्रत्यय हों, जैसे–श्वेतच्छत्रमर्हति= श्वैतच्छात्रिकः ॥

१७२९ छेदादिभ्यो नित्यम् ।५।१।६४॥

नित्यमाभीक्ष्ण्यम् । छेदं नित्यमर्हति छैदिको वेतसः । छिन्नप्ररूढत्वात् ॥ विरागविरङ्गं च॥*॥विरागं नित्यमर्हति वैरागिकः।वैरङ्गिकः॥

१७२९–'नित्यम् अर्हति' इस अर्थमें छेदादि शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–छेदं नित्यमर्हति= छैदिको वेतसः । छेदनमात्रमें ही प्ररूढ होनेके कारण इसको छैदिक कहते हैं ॥

विराग और विरंग शब्दके उत्तर विकल्प करके ठञ् प्रत्यय हो * जैसे–विरागं नित्यमर्हति, इस विग्रहमें वैरागिकः । वैरङ्गिकः ॥

१७३० शीर्षच्छेदाद्यच्च । ५ । १ ।६५॥

शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः । शैर्षच्छेदिकः । यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते ॥

१७३०–'नित्यमर्हति' इस अर्थमें शीर्षच्छेद शब्दके उत्तर यत् और ठक् प्रत्यय हो, जैसे–शीर्षच्छेद्यः, शैर्षच्छेदिकः । यत् और ठक् प्रत्ययके सन्नियोगसे शिरस् शब्दके स्थानमें शीर्ष आदेश निपातनसिद्ध हुआ है ॥

१७३१ दण्डादिभ्यो यत् । ५।१।६६॥

एभ्यो यत् स्यात् । दण्डमर्हति दण्ड्यः।अर्घ्यः। वध्यः ॥

१७३१–दण्डादि शब्दके उत्तर यत् प्रत्यय हो, जैसे=दण्ड॰ मर्हति=दण्ड्यः । अर्घ्यः । वध्यः ॥

१७३२ पात्राद् घंश्च । ५ । १ । ६८ ॥

चाद्यत् तदर्हतीत्यर्थे पात्रियः । पात्र्यः ॥

१७३२–पात्र शब्दसे घन् और यत् प्रत्यय हो, जैसे– पात्रियः, पात्र्यः ॥

१७३३कडङ्करदक्षिणाच्छ च।५।१।६९॥

चाद्यत् । कडं करोतीति विग्रहे अत एव निपातनात् खच् । कडंकरं माषमुद्गादिकाष्ठमर्हतीति कडंकरीयो गौः । कडंकर्यः । दक्षिणामर्हतीति दक्षिणीयः । दक्षिण्यः ॥

१७३३–'अर्हति' इस अर्थमें कडङ्कर और दक्षिणा शब्दके उत्तर छ और चकारद्वारा यत् प्रत्यय हो, कडं करोति, इस विग्रहमें इसी निपातनसे खच् प्रत्यय भी हुआ, कडङ्करं माषमुद्गादिकाष्ठम् अर्हति, इस विग्रहमें कडङ्करीयो गौः, कडङ्कर्यः । दक्षिणामर्हति, इस वाक्यमें दक्षिणीयः, दक्षिण्यः ॥

१७३४ स्थालीबिलात् । ५ । १ ।७०॥

स्थालीबिलमर्हति स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः । पाकयोग्या इत्यर्थः ॥

१७३४–स्थालीबिल शब्दके उत्तर 'अर्हति' अर्थमें छ और यत् प्रत्यय हो,जैसे–स्थालीबिलमर्हन्ति,इस वाक्यमें स्थालीबिलीयाः तण्डुलाः, स्थालीबिल्याः, अर्थात् पाकयोग्य ॥

१७३५यज्ञर्त्विग्भ्यां घखञौ।५।१।७१॥

यथासंख्यं स्तः।यज्ञमृत्विजं वार्हति यज्ञियः । आर्त्विजीनो यजमानः॥ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्॥ *॥ यज्ञियो देशः । आर्त्विजीन ऋत्विक् ॥

॥ इत्यार्हीयाणां ठगादीनां द्वादशानां पूर्णोवधिः ॥

१७३५–यज्ञ और ऋत्विज् शब्दके उत्तर यथाक्रम घ और खञ् प्रत्यय हो, अर्थात् यज्ञ शब्दके उत्तर घ और ऋत्विज् शब्दके उत्तर खञ् प्रत्यय हो,जैसे–यज्ञम् ऋत्विजं वाऽर्हति इस वाक्यमें यज्ञियः । आर्त्विजीनो यजमानः ॥

यज्ञ और ऋत्विज् शब्दके उत्तर यह उस कर्म करनेके योग्य है, इस अर्थमें यथाक्रम घ और खञ् प्रत्यय हो * जैसे– यज्ञियो देशः । आर्त्विजीन ऋत्विक् ॥

इस सूत्रतक आर्हीय ठगादि अर्थात् ठक्, यत्, छ, अण्, अन्, इन्, ठन, कन्, ख, डण्, छ, खञ्, घ, इन बारह तद्धित प्रत्ययोंकी विधि वर्णित हुई ॥

॥ इत्यार्हीयप्रकरणम् ॥

अथ ठञधिकारे कालाधिकारप्रकरणम् ।

अतः परं ठञेव ॥

इसके परे ठञ्का ही अधिकार चलैगा ।

१७३६ पारायणतुरायणचान्द्रायणं वर्तयति । ५ । १ । ७२ ॥

पारायणं वर्तयति पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः । तं वर्तयति तौरायणिको यजमानः । चान्द्रायणिकः ॥

१७३६-पारायण, तुरायण, और चान्द्रायण शब्दके उत्तर 'वर्त्तयति' इस अर्थमें ठञ् प्रत्यय हो, जैसे-पारायणं वर्त्तयति=पारायणिकश्छात्रः । तुरायणं यज्ञविशेषः, तं वर्त्तयति=तौरायणिकः यजमानः । चान्द्रायणिकः ॥

१७३७ संशयमापन्नः । ५ । १ । ७३ ॥

संशयविषयीभूतोर्थः सांशयिकः ॥

१७३७-संशय शब्दके उत्तर तदापन्न अर्थमें ठञ् प्रत्यय हो, जैसे-संशयविषयीभूतोऽर्थः=सांशयिकः । संशय शब्द संशयविषयमें लाक्षणिकहै अर्थात् लक्षणा वृत्तिसे संशय शब्दसे सन्देहयुक्त वस्तु जानना । सन्दिहान व्यक्ति अर्थ नहीं है । संशयम् आपन्नो यस्मिन् सः=सांशयिकः ॥

१७३८ योजनं गच्छति । ५ । १।७४॥

यौजनिकः ॥ क्रोशशतयोजनशतयोरुपसंख्यानम् ॥ * ॥ क्रोशशतं गच्छति क्रौशशतिकः । यौजनशतिकः ॥ ततोऽभिगमनमर्हतीति च वक्तव्यम् ॥ * ॥ क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ॥

१७३८-'गच्छति' इस अर्थमें द्वितियान्त समर्थ योजन शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-यौजनिकः ।

क्रोशशत और योजनशत शब्दके उत्तर ठञ् प्रत्यय हो * जैसे क्रोशशतं गच्छति=क्रौशशतिकः । यौजनशतिकः ।

'अभिगमन करताहै' इस अर्थमें क्रोशशतादि शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-क्रोशशतादभिगमनर्हति=क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ॥

१७३९ पथः ष्कन् । ५ । १ । ७५ ॥

षो ङीषर्थः॥पन्थानं गच्छति पथिकः।पथिकी॥

१७३९-पथिन् शब्दके उत्तर 'गच्छति' अर्थमें ष्कन् प्रत्यय हो, षकार इत् ङीष् प्रत्ययार्थ है, जैसे-पन्थानं गच्छति पथिकः । स्त्रीलिङ्गमें पथिकी ॥

१७४० पन्थो ण नित्यम्।५।१।७६॥

पन्थानं नित्यं गच्छति । पान्थः । पान्था ॥

१७४०-' नित्यं गच्छति' इस अर्थमें पथिन् शब्दके उत्तर ण प्रत्यय हो, "पथः पन्थ च" इस पूर्वोक्त सूत्रसे पथिन् शब्दके स्थानमें पन्थ आदेश होनेपर उसके उत्तर ण प्रत्यय होगा, जैसे-पान्थः । पान्था ॥

१७४१ उत्तरपथेनाहृतं च।५।१।७७॥

उत्तरपथेनाहृतम् औत्तरपथिकम् । उत्तरपथेन गच्छति औत्तरपथिकः ॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानम् ॥ * ॥ वारिपथिकम् ॥

१७४१-'आहृतम्' इस अर्थमें और चकारसे 'गच्छति' अर्थमें तृतीयान्त उत्तरपथ शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-उत्तरपथेनाहृतम्, इस विग्रहमें औत्तरपथिकम् । उत्तरपथेन गच्छति=औत्तरपथिकः ॥

आहृत प्रकरणमें वारि, जंगल और कान्तार शब्द पूर्वमें रहते परवर्ती पथिन् शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-वारिपथिकम् ॥

१७४२ कालात् । ५ । १ । ७८ ॥

व्युष्टादिभ्योणित्यतः प्रागधिकारोऽयम् ॥

१७४२-"व्युष्टादिभ्योऽण् १७६१" इस सूत्रके पूर्वपर्यन्त "कालात्" इस सूत्रका अधिकार चलैगा ॥

१७४३ तेन निर्वृत्तम्। ५। १।७९ ॥

अह्ना निर्वृत्तमाह्निकम् ॥

१७४३-' निर्वृत्तम् ' इस अर्थमें ठञ् प्रत्यय हो, जैसे-अह्ना निर्वृत्तम्, इस वाक्यमें आह्निकम् ॥

१७४४ तमधीष्टो भृतो भूतो भावी। ५ । १ । ८० ॥

अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः । स्वसत्तया व्याप्तकालः । भावी तादृश एवानागतकालः । मासमधीष्टो मासिकोऽध्यापकः । मासं भृतो मासिकः कर्मकरः । मासं भूतो मासिको व्याधिः । मासं भावी मासिक उत्सवः ॥

१७४४-'अधीष्टः, भृतः, भूतः भावी' ऐसे अर्थमें ठञ् प्रत्यय हो, अधीष्ट अर्थात् सत्कारपूर्वक कार्यमें नियोजित वा सत्कारपूर्वक ठहरना, भृत अर्थात् वेतनद्वारा खरीदा हुआ, भूत शब्दसे सत्ताद्वारा व्याप्य काल, भावी अनागत कालको कहतेहैं, जैसे-मासम् अधीष्टः=मासिकः अध्यापकः । मासं भृतो=मासिकः कर्मकरः । मासं भूतः=मासिको व्याधिः । मासं भावी=मासिकः उत्सवः ॥

१७४५ मासाद्वयसि यत्खञौ। ५।१।८१॥

मासं भूतो मास्यः। मासीनः॥

१७४५–वयस् अर्थमें द्वितीयान्त समर्थ मास शब्दके उत्तर यत् और खञ् प्रत्यय हो, जैसे–मासं भूतो=मास्यः, मासीनः॥

१७४६ द्विगोर्यप्। ५।१।८२॥

मासाद्वयसीत्यनुवर्तते। द्वौ मासौ भूतो द्विमास्यः॥

१७४६–द्विगुसमास मासान्त शब्दके उत्तर वयस् अर्थमें यप् प्रत्यय हो, जैसे–द्वौ मासौ भूतः–द्विमास्यः॥

१७४७ षण्मासाण्ण्यच्च।५।१।८३॥

वयसीत्येव। यबप्यनुवर्तते। चाट्ठञ्। षाण्मास्यः। षण्मास्यः। षाण्मासिकः॥

१७४७–षण्मास शब्दके उत्तर वयस् अर्थमें ण्यत् और यप् प्रत्यय हो, सूत्रमें चकार होनेसे ठञ् प्रत्ययका भी समागम होगा, जैसे–षाण्मास्यः, षण्मास्यः, षाण्मासिकः॥

१७४८ अवयसि ठंश्च।५।१।८४॥

चाण्ण्यत्। षण्मासिको व्याधिः। षाण्मास्यः।

१७४८–वयस्भिन्न अर्थमें षण्मास शब्दके उत्तर ठन् और ण्यत् प्रत्यय हो, जैसे–षण्मासिको व्याधिः, षाण्मास्यः॥

१७४९ समायाः खः।५।१।८५॥

समामधीष्टो भृतो भूतो भावी वा समीनः॥

१७४९–अधीष्ट, भृत, भूत और भावी अर्थमें समा शब्दके उत्तर ख प्रत्यय हो, जैसे–समामधीष्टो भृतो भूतो भावी वा=समीनः॥

१७५० द्विगोर्वा। ५। १। ८६॥

समायाः ख इत्येव। तेन परिजय्येत्यतः प्राङ् निर्वृत्तादिषु पंचस्वर्थेषु प्रत्ययाः। द्विसमीनः। द्वैसमिकः॥

१७५०–द्विगुसमासनिष्पन्न समान्त शब्दके उत्तर विकल्प करके ख प्रत्यय हो, "तेन परिजय्य० १७५७" इस सूत्रके पूर्वपर्यन्त निर्वृत्तादि पांच अर्थोंमें समस्त प्रत्यय हों, जैसे–द्विसमीनः, द्वैसमिकः॥

१७५१ रात्र्यहःसंवत्सराच्च।५।१।८७॥

द्विगोरित्येव। द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। समासान्तविधेरनित्यत्वान्न टच्। द्विसंवत्सरीणः॥

१७५१–द्विगुसमासनिष्पन्न रात्रि, अहन् और संवत्सर शब्दके उत्तर उक्त प्रत्यय हों, जैसे–द्विरात्रीणः, द्वैरात्रिकः। द्व्यहीनः, द्वैयह्निकः, यहां समासान्त विधिके अनित्यत्वके कारण टच् प्रत्यय नहीं हुआ। द्विसंवत्सरीणः॥

१७५२ संख्यायाः संवत्सरसंख्यस्य च। ७। ३। १५॥

संख्याया उत्तरपदस्य वृद्धिः स्याद् ञिदादौ। द्विसांवत्सरिकः। द्वे षष्टी भृतो द्विषाष्टिकः। (संख्यायाः) परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याऽग्रहणार्थम्। तेन द्वैसमिक इत्युत्तरपदवृद्धिर्न॥

१७५२–ञित्आदि तद्धित प्रत्यय परे रहते संख्यावाचक शब्दके परवर्ती द्विगुसमासमें संवत्सर और संख्यावाचक शब्दको वृद्धि हो, जैसे–द्विसांवत्सरिकः। द्वे षष्टी भृतो द्विषाष्टिकः। "परिमाणान्तस्य०" इस सूत्रसे संवत्सर शब्दको वृद्धि सिद्ध थी, तथापि संवत्सर शब्दका ग्रहण केवल परिमाणवाचकके ग्रहणविषयमें कालपरिमाणके अग्रहणके निमित्त है, इस कारण 'द्वैसमिकः' इस स्थलमें उत्तरपदको वृद्धि नहीं हुई॥

१७५३ वर्षाल्लुक् च।५।१।८८॥

वर्षशब्दान्ताद् द्विगोर्वा खः। पक्षे ठञ् वा च लुक्। त्रीणि रूपाणि। द्विवर्षीणो व्याधिः। द्विवार्षिकः। द्विवर्षः॥

१७५३–द्विगुसमासनिष्पन्न वर्षशब्दान्त प्रातिपदिकके उत्तर विकल्प करके ख प्रत्यय हो, पक्षमें ठञ् और विकल्प करके लुक् होगा, इस कारण तीन रूप होंगे, जैसे–द्विवर्षीणो व्याधिः, द्विवार्षिकः, द्विवर्षः॥

१७५४ वर्षस्याऽभविष्यति।७।३।१६॥

उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षिकः। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न। गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः॥

१७५४–भविष्यद्भिन्न अर्थमें उत्तरपदस्थित वर्ष शब्दके अकारको वृद्धि हो, जैसे–द्विवार्षिकः।

भविष्यदर्थमें द्वैवर्षिकः, इस प्रकार होगा। अधीष्ट और भृत अर्थमें 'अभविष्यति' यह प्रतिषेध नहीं होगा, कारण कि, उस स्थलमें भविष्यत्ता गम्यमान होनेपर भी तद्धितार्थ वह नहीं है, जैसे–द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति, इस विग्रहमें द्विवार्षिकः मनुष्यः।

(परिमाणान्तस्याऽसंज्ञाशाणयोः। ७। ३। १७॥

द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। द्विनैष्किकम्। असंज्ञेति किम्। पञ्च कलायाः परिमाणमस्य पाञ्चकलायिकम्। तद्धितान्तः संज्ञा। द्वैशाणम्। कुलिजशब्दमपि केचित्पठन्ति। द्वैकुलिजिकः॥ सू० १६८३)

असंज्ञामें तथा शाण शब्द उत्तरपदमें न होनेपर,परिमाणान्त शब्दके उत्तर पदको वृद्धि हो, (१६८३) जैसे-द्वौ कुडवौ प्रयोजनमस्य=द्विकौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतम्=द्विसौवर्णिकम् । द्विनैष्किकम् ।

असंज्ञा कहनेसे पञ्च कपलायाः परिमाणमस्य=पाञ्चकलापिकम्, ऐसा होगा ।

तद्धितान्त शब्द ही संज्ञाभूत हो, इस कारण उत्तरपदको वृद्धि नहीं हुई, द्वैशाणम् ।

कोई २ इस स्थलमें कुलिज शब्दका भी पाठ करतेहैं, जैसे-द्वैकुलिजिकः ॥

१७५५ चित्तवति नित्यम् । ५ । १ । ८९ ॥

वर्षशब्दान्ताद् द्विगोः प्रत्ययस्य नित्यं लुक् स्यात् चेतने प्रत्ययार्थे । द्विवर्षो दारकः ॥

१७५५-यदि प्रत्ययार्थ चेतन पदार्थ हो तो द्विगुसमासनिष्पन्न वर्षशब्दान्त प्रातिपदिकके उत्तर तद्धित प्रत्ययका लुक् हो, जैसे-द्विवर्षो दारकः ॥

१७५६ षष्टिकाः षष्टिरात्रेण पच्यन्ते । ५ । १ । ९० ॥

बहुवचनमतन्त्रम् । षष्टिको धान्यविशेषः । तृतीयान्तात्कन् रात्रशब्दलोपश्च निपात्यते ॥

१७५६-' षष्टिकाः षष्टिरात्रेणपच्यन्ते ' इस अर्थमें ' षष्टिकः ' पद निपातनसे सिद्ध हुआहै, बहुवचन अतंत्र अर्थात् अविवक्षित जानना, षष्टिक शब्दसे धान्यविशेष जानना, तृतीयान्त षष्टिरात्र शब्दके उत्तर कन् प्रत्यय हो, और रात्रि शब्दका निपातनसे लोप हो ॥

१७५७ तेन परिजय्यलभ्यकार्यसुकरम् । ५ । १ । ९३ ॥

मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा मासिकम् ॥

१७५७-तृतीयान्त पदके उत्तर परिजय्य, लभ्य, कार्य और सुकर अर्थमें ठञ् प्रत्यय हो, जैसे-मासेन परिजय्यो (जेतुं शक्यः)=मासिको व्याधिः । मासेन लभ्यं कार्यं सुकरं वा=मासिकम् ॥

१७५८ तदस्य ब्रह्मचर्यम् । ५।१।९४ ॥

द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात् । अत्यन्तसंयोगे द्वितीया । मासं ब्रह्मचर्यमस्य स मासिको ब्रह्मचारी । आर्द्धमासिकः। यद्वा । प्रथमान्तादस्येत्यर्थे प्रत्ययः । मासोऽस्येति मासिकं ब्रह्मचर्यम् ॥ महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम् ॥ * ॥ महानाम्न्यो नाम विदा मघवन्नित्याद्या ऋचः । तासां ब्रह्मचर्यमस्य महानाम्निकः । हरदत्तस्तु भस्याढ इति पुंवद्भावान्माहानामिक इत्याह ॥ चतुर्मास्याण्ण्यो यज्ञे तत्र भव इत्यर्थे ॥ * ॥ चतुर्षु मासेषु भवन्ति चातुर्मास्यानि यज्ञकर्माणि ॥ संज्ञायामण् ॥ * ॥ चतुर्षु मासेषु भवति चातुर्मासी । पौर्णमासी । अणन्तत्वान्ङीप् ॥

१७५८-ब्रह्मचर्य होनेपर द्वितीयान्त कालवाचक प्रातिपदिकके उत्तर ' अस्य ' इस अर्थमें ठञ् प्रत्यय हो, इस स्थलमें अत्यंतसंयोगमें द्वितीया हुई, जैसे-मासं ब्रह्मचर्यमस्य=मासिको ब्रह्मचारी । आर्द्धमासिकः ।

अथवा प्रथमान्त कालवाचक प्रातिपदिकके उत्तर ' अस्य ' इस अर्थमें ठञ् प्रत्यय हो, जैसे-मासोऽस्येति=मासिकं ब्रह्मचर्यम् ।

षष्ठ्यन्त महानाम्न्यादि शब्दके उत्तर ठञ् प्रत्यय हो * जैसे-महानाम्न्यो नाम "विदा मघवन्" इत्याद्या ऋचः, तासां ब्रह्मचर्यमस्य=माहानाम्निकः, इस स्थलमें महानाम्नी शब्दके संज्ञात्व और अभाषितपुंस्कत्वके कारण पुंवद्भाव नहीं होगा, किन्तु हरदत्तके मतमें "भस्याढे०" इससे पुंवद्भावके कारण 'माहानामिकः' ऐसा होगा ।

'तत्र भवः ' इस अर्थमें यज्ञ होनेपर चतुर्मास शब्दके आगे ण्य प्रत्यय हो * जैसे-चतुर्षु मासेषु भवन्ति=चातुर्मास्यानि यज्ञकर्माणि ।

संज्ञा होनेपर अण् प्रत्यय हो * चतुर्षु मासेषु भवति= चातुर्मासी । पौर्णमासी । अणन्त होनेके कारण स्त्रीलिङ्गमें ङीप् प्रत्यय हुआ ॥

१७५९ तस्य च दक्षिणा यज्ञाख्येभ्यः । ५ । १ । ९५ ॥

द्वादशाहस्य दक्षिणा द्वादशाहिकी । आख्याग्रहणादकालादपि । आग्निष्टोमिकी । वाजपेयिकी ॥

१७५९-' तस्य दक्षिणा ' इस अर्थमें यज्ञसंज्ञक शब्दके उत्तर ठञ् प्रत्यय हो, जैसे-द्वादशाहस्य दक्षिणा=द्वादशाहिकी । आख्या शब्दका ग्रहण करनेसे कालवाचकके उत्तर न होनेपर भी होगा, जैसे-आग्निष्टोमिकी । वाजपेयिकी ॥

१७६० तत्र च दीयते कार्यं भववत् । ५ । १ । ९६ ॥

प्रावृषि दीयते कार्यं वा प्रावृषेण्यम् । शारदम् ॥

॥ इति कालाधिकारस्य पूर्णोऽवधिः ॥

१७६०-' तत्र च दीयते कार्यम् ' ऐसे अर्थमें भववत् प्रत्यय हो, जैसे-प्रावृषि दीयते कार्यं वा=प्रावृषेण्यम् । शारदम् ॥

॥ इति ठञधिकारे कालाधिकारप्रकरणम् ॥

अथ ठञधिकारप्रकरणम् ।

१७६१ व्युष्टादिभ्योऽण् । ५। १। ९७ ॥

व्युष्टे दीयते कार्यं वा वैयुष्टम् । व्युष्ट, तीर्थ, संग्राम, प्रवास इत्यादि ॥

१७६१–व्युष्टादि शब्दके उत्तर अण् प्रत्यय हो, जैसे–व्युष्टे दीयते कार्यं वा=वैयुष्टम् । व्युष्टादि शब्द जैसे–व्युष्ट,तीर्थ, संग्राम, प्रवास–इत्यादि ॥

१७६२ तेन यथाकथाचहस्ताभ्यां णयतौ । ५ । १ । ९८ ॥

यथाकथाचेत्यव्ययसंघातात्तृतीयान्ताद्धस्तशब्दाच्च यथासंख्यं णयतौ स्तः ॥ अर्थाभ्यां तु यथासंख्यं नेष्यते ॥ * ॥ यथाकथाच दीयते कार्यं वा याथाकथाचम् । अनादरेण देयं कार्यं वेत्यर्थः । हस्तेन दीयते कार्यं वा हस्त्यम् ॥

१७६२–'यथाकथाच' इस अव्ययशब्दके संघातके उत्तर और तृतीयान्त 'हस्त' शब्दके उत्तर यथाक्रम ण और यत् प्रत्यय हो, किन्तु–

दोनों अर्थोंके उत्तर यथासंख्य अर्थात् क्रमकी इच्छा नहीं करनी * जैसे–यथाकथाच दीयते कार्यं वा,इस विग्रहमें 'याथाकथाचम्' इसका अर्थ अनादरपूर्वक देना अथवा करना जानना । हस्तेन दीयते कार्यं वा=हस्त्यम् ॥

१७६३ सम्पादिनि । ५ । १ । ९९ ॥

तेनेत्येव । कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखम् । कर्णालंकाराभ्यामवश्यं शोभत इत्यर्थः ॥

१७६३–उसके द्वारा संपादित, यह अर्थ होनेपर ठञ् प्रत्यय हो, जैसे–कर्णवेष्टकाभ्यां सम्पादि=कार्णवेष्टकिकम्, अर्थात् मुख,दोनों कानोंके अलंकारसे अत्यन्त शोभित होताहै ॥

१७६४ कर्मवेषाद्यत् । ५ । १ ।१०० ॥

कर्मणा सम्पादि कर्मण्यं शौर्यम् । वेषेण सम्पादि वेष्यो नटः । वेषः कृत्रिम आकारः ॥

१७६४–तत्कर्तृकसंपादितार्थमें कर्म और वेष शब्दके उत्तर यत् प्रत्यय हो, जैसे–कर्मणा सम्पादि=कर्मण्यं शौर्यम् । वेषेण सम्पादि=वेष्यो नटः । कृत्रिम आकारको वेष कहतेहैं ॥

१७६५ तस्मै प्रभवति सन्तापादिभ्यः । ५ । १ । १०१ ॥

सन्तापाय प्रभवति सान्तापिकः॥सांग्रामिकः॥

१७६५–'तस्मै प्रभवति' इस अर्थमें सन्तापादि शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–संतापाय प्रभवति, इस विग्रहमें सान्तापिकः । सांग्रामिकः ॥

१७६६ योगाद्यच्च । ५ । १ । १०२॥

चाट्ठञ् । योगाय प्रभवति योग्यः। यौगिकः॥

१७६६–'तस्मै प्रभवति' इस अर्थमें चतुर्थ्यन्त समर्थ योग शब्दके उत्तर यत् और ठञ् प्रत्यय हो, जैसे–योगाय प्रभवति=योग्यः, यौगिकः ॥

१७६७ कर्मण उकञ्।५।१।१०३॥

कर्मणे प्रभवति कार्मुकम् ॥

१७६७–'तस्मै प्रभवति' इस अर्थमें कर्मन् शब्दके उत्तर उकञ् प्रत्यय हो, जैसे–कर्मणे प्रभवति कार्मुकम् ॥

१७६८ समयस्तदस्य प्राप्तम् । ५। १ । १०४ ॥

समयः प्राप्तोऽस्य सामयिकम् ॥

१७६८–'तदस्य प्राप्तम्' इस अर्थमें समय शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–समयः प्राप्तोऽस्य=सामयिकम् ॥

१७६९ ऋतोरण् । ५ १ । १०५ ॥

ऋतुः प्राप्तोस्य आर्तवम् ॥

१७६९–'तदस्य प्राप्तम्' इस अर्थमें ऋतु शब्दके उत्त अण् प्रत्यय हो, जैसे–ऋतुः प्राप्तोऽस्य=आर्तवम् ॥

१७७० कालाद्यत्। ५ ।१।१०७ ॥

कालः प्राप्तोस्य काल्यं शीतम् ॥

१७७०–उक्त अर्थमें काल शब्दके उत्तर यत् प्रत्यय हो, जैसे–काल्यं शीतम् ॥

१७७१ प्रकृष्टे ठञ् । ५।१।१०८ ॥

कालादित्येव । तदस्येति च । प्रकृष्टो दीर्घः कालोऽस्येति कालिकं वैरम् ॥

१७७१–'तदस्य' इस अर्थमें प्रकृष्ट अर्थात् दीर्घकालवाचक काल शब्दके उत्तर ठञ् प्रत्यय हो, जैसे–प्रकृष्टो दीर्घः कालोऽस्येति=कालिकं वैरम् ॥

१७७२ प्रयोजनम् । ५ । १।१०९ ॥

तदस्येत्येव । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । प्रयोजनं फलं कारणं च ॥

१७७२–'तदस्य प्रयोजनम्' इस अर्थमें ठञ् प्रत्यय हो, जैसे–इन्द्रमहः प्रयोजनमस्य=ऐन्द्रमहिकम् । प्रयोजन शब्दसे फल और कारण जानना ॥

१७७३ विशाखाषाढादण्मन्थदण्डयोः । ५ । १ । ११० ॥

आभ्यामण् स्यात्प्रयोजनमित्यर्थे क्रमान्मन्थदण्डयोरर्थयोः। विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः ॥ चूडादिभ्य उपसंख्यानम् ॥ * ॥ चूडा–चौडम् । श्रद्धा–श्राद्धम् ॥

१७७३–'प्रयोजनमस्य' इस अर्थमें क्रमसे मन्थ और दण्ड अर्थ होनेपर विशाखा और आषाढा शब्दके उत्तर अण्

प्रत्यय हो, जैसे-विशाखा प्रयोजनमस्य=वैशाखो मन्थः । आषाढो दण्डः ।

चूडादि शब्दके उत्तर अण् प्रत्यय हो * जैसे-चूडा-चौडम् । श्रद्धा-श्राद्धम् ॥

१७७४ अनुप्रवचनादिभ्यश्छः । ५ । १ । १११ ॥

अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम् ॥

१७७४-'प्रयोजनमस्य' इस अर्थमें अनुप्रवचनादिके उत्तर छ प्रत्यय हो, जैसे-अनुप्रवचनं प्रयोजनमस्य=अनुप्रवचनीयम् ॥

१७७५ समापनात्सपूर्वपदात् । ५ । १ । ११२ ॥

व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयम् ॥

१७७५-'प्रयोजनमस्य' इस अर्थमें पूर्वमें किसी एक शब्दके रहते समापन शब्दके उत्तर छ प्रत्यय हो, जैसे-व्याकरणसमापनं प्रयोजनम् अस्य=व्याकरणसमापनीयम् ॥

१७७६ ऐकागारिकट् चौरे।५।१।११३॥

एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः ॥

१७७६-'प्रयोजनमस्य' इस अर्थमें एकागार शब्दके उत्तर चौर अर्थ होनेपर ठञ् प्रत्यय तथा टकार अनुबन्ध हो, जैसे-एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः सः=ऐकागारिकः चौरः ॥

१७७७ आकालिकडाद्यन्तवचने । ५ । १ । ११४ ॥

समानकालावाद्यन्तौ यस्येत्याकालिकः।समानकालस्याऽऽकाल आदेशः। आशुविनाशीत्यर्थः। पूर्वदिने मध्याह्नादावुत्पद्य दिनान्तरे तत्रैव नश्वर इति वा ॥ आकालाट्ठंश्च ॥ * ॥ आकालिका विद्युत् ॥

॥ इति ठञः पूर्णोवधिः ॥

१७७७-आदि और अन्त होनेपर समानकाल शब्दके उत्तर ठञ् प्रत्यय हो और समानकाल शब्दको आकाल आदेश हो और टकार अन्त्यमें अनुबन्ध हो, समानकालौ आद्यन्तौ यस्य=आकालिकः, इस स्थलमें समानकाल शब्दके स्थानमें आकाल आदेश हुआहै, इसका अर्थ शीघ्रविनाशशील । पूर्व दिवसमें मध्याह्नादि कालमें उत्पन्न होकर दूसरे दिन उसी समयमें ही जिसकी मृत्यु हो, उसको भी आकालिक कहतेहैं ।

आकाल शब्दके उत्तर ठन् प्रत्यय भी हो * जैसे-आकालिका विद्युत् ॥

॥ इति ठञधिकारप्रकरम् ॥

१ टकार अनुबन्ध 'ऐकागारिकी' यहां ङीप् हो, इसलिये है॥

अथ भावकर्मार्थकप्रकरणम् ।

१७७८ तेन तुल्यं क्रिया चेद्वतिः । ५ । १ । ११५ ॥

ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । क्रिया चेदिति किम् । गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ॥

१७७८-'तेन तुल्यम्' इस अर्थमें यदि क्रिया हो तो प्रातिपदिकके उत्तर वति प्रत्यय हो,जैसे-ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते ।

क्रिया तुल्य रहे ऐसा क्यों कहा ? तो गुणसे तुल्य होनेपर न हो, जैसे-पुत्रेण तुल्यः स्थूलः ॥

१७७९ तत्र तस्येव । ५ । १ । ११६ ॥

मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य गावः ॥

१७७९-सप्तम्यन्त और षष्ठ्यन्त प्रातिपदिकके उत्तर इव अर्थमें वति प्रत्यय हो, जैसे-मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः, अर्थात् स्रुघ्नदेशमें मथुराकी समान प्राकार है । चैत्रस्येव=चैत्रवत् मैत्रस्य गावः, अर्थात् चैत्रकी समान मैत्रकी गाय हैं ॥

१७८० तदर्हम् । ५ । १ । ११७ ॥

विधिमर्हति विधिवत्पूज्यते । क्रियाग्रहणं मण्डूकप्लुत्यानुवर्तते । तेनेह न । राजानमर्हति छत्रम् ॥

१७८०-द्वितीयान्त प्रातिपदिकसे 'अर्हम्' इस अर्थमें वति प्रत्यय हो, जैसे-विधिमर्हति=विधिवत् पूज्यते । इस सूत्रमें मण्डूकप्लुति न्यायसे क्रिया पदकी अनुवृत्ति होतीहै, इस कारण राजानमर्हति छत्रम्, इस स्थलमें राजवत् ऐसा पद नहीं हुआ ॥

१७८१ तस्य भावस्त्वतलौ ५।१।११९॥

प्रकृतिजन्यबोधे प्रकारो भावः । गोर्भावो गोत्वम् । गोता । त्वान्तं क्लीबम् । तलन्तं स्त्रियाम् ॥

१७८१-षष्ठ्यन्त प्रातिपदिकसे 'भावः' इस अर्थमें त्व और तल् प्रत्यय हों, प्रकृतिजन्य बोधमें प्रकार (विशेषण) का नाम भाव है, जैसे-गोर्भावः=गोत्वम् । गोता । त्वप्रत्ययान्त शब्द नपुंसकलिंग और तल्प्रत्ययान्त पद स्त्रीलिङ्ग होताहै ॥

१७८२ आ च त्वात् । ५ । १ । १२० ॥

ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते । अपवादैः सह समावेशार्थं गुणवचनादिभ्यः कर्मणि विधानार्थं चेदम् । चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । स्त्रिया भावः स्त्रैणम् । स्त्रीत्वम् । स्त्रीता पौंस्नम् । पुंस्त्वम् । पुंस्ता ॥

१७८२–"ब्रह्मणस्त्वः ५ । १ । १३६" इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त त्व और तल् प्रत्ययका अधिकार है, अपवाद अर्थात् विशेषविधिके साथ समावेशके निमित्त और गुणवाचक शब्दके उत्तर कर्म वाच्यमें विधानके निमित्त यह सूत्र कियाहै। चकारसे नञ् और स्नञ् इन दो प्रत्ययोंके भी साथ समावेशार्थ है जैसे–स्त्रिया भावः=स्त्रैणम्, स्त्रीत्वम्, स्त्रीता। पौंस्नम्, पुंस्त्वम्, पुंस्ता ॥

१७८३ न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटयुधकतरसलसेभ्यः । ५ । १ । १२१ ॥

इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युश्चतुरादीन्वर्जयित्वा । अपतित्वम् । अपटुत्वम् । नञ्पूर्वात्किम् । बार्हस्पत्यम् । तत्पुरुषात्किम् । नास्य पटवः सन्तीत्यपटुस्तस्य भाव आपटवम् । अचतुरेति किम् । आचतुर्यम् । आसङ्गत्यम् । आलवण्यम् । आवटयम् । आयुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् ॥

१७८३–इस सूत्रके आगे जो भाव प्रत्यय हैं वह चतुर, संगत, लवण, वट, युध, कत, रस और लस एतदन्त तत्पुरुषसे भिन्न नञ्तत्पुरुषके उत्तर नहीं हों, जैसे–अपतित्वम् । अपटुत्वम् । नञ्पूर्वक तत्पुरुष न होनेपर, जैसे–बार्हस्पत्यम्। तत्पुरुष न होनेपर जैसे–नास्य पटवः सन्तीत्यपटुस्तस्य भावः=आपटवम् ॥

चतुर आदि शब्दको छोडनेका भाव यह कि, आचतुर्यम् । आसङ्गत्यम्। आलवण्यम्। आवटयम् । आयुध्यम्। आकत्यम् । आरस्यम् । आलस्यम्, इनमें वक्ष्यमाण भावप्रत्यय हों ॥

१७८४ पृथ्वादिभ्य इमनिज्वा । ५ । १ । १२२ ॥

वावचनमणादिसमावेशार्थम् ॥

१७८४–पृथ्वादि शब्दोंके उत्तर विकल्प करके इमनिच् प्रत्यय हो, इस सूत्रमें वाशब्दके ग्रहण करनेसे अण् आदि प्रत्ययोंका समावेश होगा ॥

१७८५ र ऋतो हलादेर्लघोः।६।४।१६१॥

हलादेर्लघोर्ऋकारस्य रः स्यात् इष्ठेमेयस्सु ॥

१७८५–इष्ठन्, इमन् और ईयस् प्रत्यय परे रहते व्यंजनवर्ण आदिमें है जिसके ऐसे लघुसंज्ञक ऋकारके स्थानमें र आदेश हो ॥

१७८६ टेः । ६ । ४ । १५५ ॥

भस्य टेर्लोपः स्यादिष्ठेमेयस्सु । पृथोर्भावः प्रथिमा । पार्थवम् । म्रदिमा । मार्दवम् ॥

१७८६–इष्ठन्, इमन् और ईयस् प्रत्यय परे रहते भसंज्ञक शब्दकी टिका लोप हो, यथा–पृथोर्भावः=प्रथिमा, पार्थवम् । म्रदिमा, मार्दवम् ॥

१७८७ वर्णदृढादिभ्यः ष्यञ्च । ५ । १ । १२३ ॥

चादिमनिच् । शौक्ल्यम् । शुक्लिमा । दार्ढ्यम् ॥ पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम् ॥*॥ द्रढिमा । षो ङीषर्थः । औचिती । याथाकामी ॥

१७८७–वर्णवाचक शब्द और दृढादि शब्दोंके उत्तर ष्यञ् प्रत्यय हो, और चकारसे इमनिच् प्रत्यय हो, जैसे–शुक्लस्य भावः=शौक्ल्यम्, शुक्लिमा । दार्ढ्यम् ।

पृथु, मृदु, भृश, कृश, दृढ और परिवृढ शब्दोंके ऋकारके स्थानमें ही र आदेश हो * जैसे–द्रढिमा। ष्यञ् प्रत्ययका षकार इत्संज्ञक होनेके कारण स्त्रीलिङ्गमें ङीष् होगा, जैसे–औचिती । याथाकामी ॥

१७८८ गुणवचनब्राह्मणादिभ्यः कर्मणि च । ५ । १ । १२४ ॥

चाद्भावे । जडस्य कर्म भावो वा जाड्यम् । मूढस्य भावः कर्म वा मौढ्यम् । ब्राह्मण्यम् । अर्हतो नुम् च ॥ * ॥ अर्हतो भावः कर्म वा आर्हन्त्यम् । आर्हन्ती । ब्राह्मणादिराकृतिगणः॥

१७८८–गुणवाचक[1] शब्द और ब्राह्मणादि शब्दोंके उत्तर कर्म और चकारसे भाव वाच्यमें ष्यञ् प्रत्यय हो, जैसे–जडस्य भावः कर्म वा=जाड्यम्। मूढस्य भावः कर्म वा=मौढ्यम् । ब्राह्मण्यम् ।

अर्हत् शब्दके उत्तर ष्यञ् प्रत्यय और नुम् आगम हो * जैसे–अर्हतो भावः कर्म वा=आर्हन्त्यम् । आर्हन्ती । ब्राह्मणादि आकृतिगण है ॥

१७८९ यथातथयथापुरयोः पर्यायेण । ७ । ३ । ३१ ॥

नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्ञिदादौ । अयथातथाभावः आयथातथ्यम् । अयाथातथ्यम् । आयथापुर्यम् । अयाथापुर्यम्।आ पादसमाप्तेर्भावकर्माधिकारः॥ चतुर्वर्णादीनां स्वार्थ उपसंख्यानम् ॥ * ॥ चत्वारो वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैस्वर्यम् । षाड्गुण्यम् । सैन्यम् । सान्निध्यम् । सामीप्यम् । औपम्यम् । त्रैलोक्यमित्यादि ॥ (सर्ववेदादिभ्यः स्वार्थे ॥) सर्वे वेदाः सर्ववेदास्तानधीते सर्ववेदः । सर्वादेरिति लुक् । स एव सार्ववैद्यः॥ चतुर्वेदस्योभयपदवृद्धिश्च ॥ * ॥ चतुरो वेदानधीते चतुर्वेदः । स एव चातुर्वैद्यः। चतुर्विद्यस्येति पाठान्तरम् । चतुर्विद्य एव चातुर्वैद्यः ॥

[1] शीत उष्ण आदि गुणोंका जिससे बोध हो उसको गुणवचन कहतेहैं॥

१७८९-जित् आदि तद्धित प्रत्यय परे रहते नञ्के परे स्थित यथातथ और यथापुर इन दो शब्दोंके पूर्व और उत्तर पदके आद्यच्को पर्याय (क्रम) से वृद्धि हो, जैसे-अयथातथाभावः=आयथातथ्यम्, अयाथातथ्यम् । आयथापुर्य्यम्, अयाथापुर्य्यम् । इस पादकी समाप्तिपर्यन्त भाव और कर्मका अधिकार है ।

चतुर्वर्णादि शब्दोंके उत्तर स्वार्थमें ष्यञ् प्रत्यय हो* जैसे-चत्वारो वर्णाः=चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैस्वर्यम् । षाड्गुण्यम् । सैन्यम् । सान्निध्यम् । सामीप्यम् । औपम्यम् । त्रैलोक्यम्, इत्यादि । सर्वे वेदाः सर्ववेदाः, तानधीते सर्ववेदः । "सर्वादेः०" इससे लुक् हुआ । स एव=सार्ववेद्यः ।

चतुर्वेद शब्दके दोनों पदोंको वृद्धि हो* जैसे-चतुरो वेदानधीते=चतुर्वेदः, स एव=चातुर्वैद्यः "चतुर्विद्यस्य" ऐसा पाठान्तर है, इससे चतुर्विद्य एव=चातुर्वैद्यः ॥

१७९० स्तेनाद्यन्नलोपश्च ।५।१।१२५॥

नेति सङ्घातग्रहणम् । स्तेन चौर्ये पचाद्यच् । स्तेनस्य भावः कर्म वा स्तेयम् । स्तेनादिति योगं विभज्य स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति ॥

१७९०-स्तेन शब्दके उत्तर यत् प्रत्यय हो, और स्तेन शब्दके नकारका लोप हो, न शब्दसे संघातका ग्रहण जानना । चौर्यार्थक स्तेन धातुसे पचादित्वके कारण अच् प्रत्यय करके 'स्तेनः' यह सिद्ध हुआहै, स्तेनस्य भावः कर्म वा=स्तेयम् । कोई कोई आचार्य "स्तेनात्" ऐसा भिन्न सूत्र करके 'स्तैन्यम्' ऐसे ष्यञ्प्रत्ययान्त पदकी इच्छा करतेहैं ॥

१७९१ सख्युर्यः । ५ । १ । १२६ ॥

सख्युर्भावः कर्म वा सख्यम् ॥ दूतवणिग्भ्यां च ॥ * ॥ दूतस्य भावः कर्म वा दूत्यम् । वणिज्यमिति काशिका । माधवस्तु वणिज्याशब्दः स्वभावात् स्त्रीलिङ्गः । भाव एव चात्र प्रत्ययो न तु कर्मणीत्याह । भाष्ये तु दूतवणिग्भ्यां चेति नास्त्येव । ब्राह्मणादित्वाद्वाणिज्यमपि ॥

१७९१-सखि शब्दके उत्तर यत् प्रत्यय हो, जैसे-सख्युर्भावः कर्म वा=सख्यम् ।

दूत और वणिक् शब्दके उत्तर भी यत् प्रत्यय हो * जैसे-दूतस्य भावः कर्म वा=दूत्यम् । वणिज्यम्, यह पद काशिकाकारके मतमें है, माधव तो वणिज्या शब्द स्वभावसे ही स्त्रीलिङ्ग है, इस स्थलमें भावार्थमें ही प्रत्यय है, कर्मार्थमें नहीं यह कहतेहैं । भाष्यमें तो "दूतवणिग्भ्याञ्च" इस प्रकारका पाठ नहीं है । ब्राह्मणादित्वके कारण 'वाणिज्यम्' ऐसा पद भी होताहै ॥

१७९२ कपिज्ञात्योर्ढक् । ५ ।१।१२७॥

कापेयम् । ज्ञातेयम् ॥

१७९२-कपि और ज्ञाति शब्दके उत्तर ढक् प्रत्यय हो, जैसे-कापेयम् । ज्ञातेयम् ॥

१७९३ पत्यन्तपुरोहितादिभ्यो यक् । ५ । १ । १२८ ॥

सैनापत्यम् । पौरोहित्यम् ॥ राजाऽसे ॥*॥ राजशब्दोऽसमासे यकं लभत इत्यर्थः । राज्ञो भावः कर्म वा राज्यम् । समासे तु ब्राह्मणादित्वात् ष्यञ् । आधिराज्यम् ॥

१७९३-पति शब्द अन्तमें है जिसके ऐसे शब्द और पुरोहितादि शब्दोंके उत्तर यक् प्रत्यय हो, जैसे-सैनापत्यम् । पौरोहित्यम् ॥

असमासमें राजन् शब्दके उत्तर यक् प्रत्यय हो * जैसे-राज्ञो भावः कर्म वा=राज्यम् । समास होनेपर तो ब्राह्मणादिके मध्यमें पठित होनेके कारण ष्यञ् प्रत्यय होगा, जैसे-आधिराज्यम् ॥

१७९४ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । ५ । १ । १२९ ॥

प्राणभृज्जाति-आश्वम् । औष्ट्रम् । वयोवचन-कौमारम्, कैशोरम् । औद्गात्रम् । औन्नेत्रम् । सौष्ठवम् । दौष्ठवम् ॥

१७९४-प्राणयुक्त जातिवाचक शब्द, वयोवाचक शब्द और उद्गातृ आदि शब्दोंके उत्तर अञ् प्रत्यय हो, प्राणभृज्जाति, जैसे-आश्वम् । औष्ट्रम् । वयोवाचक, जैसे-कौमारम् । कैशोरम् । उद्गात्रादि, जैसे-औद्गात्रम् । औन्नेत्रम् । सौष्ठवम् । दौष्ठवम् ॥

१७९५ हायनान्तयुवादिभ्योऽण् । ५ । १ । १३० ॥

द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् ॥ श्रोत्रियस्य यलोपश्च ॥ * ॥ श्रौत्रम् । कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञा युवादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशलम् । कौशल्यमित्यादि ॥

१७९५-हायन शब्द अन्तमें है जिसके ऐसे शब्द और युवादि शब्दोंके उत्तर अण् प्रत्यय हो, जैसे-द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् ॥

श्रोत्रिय शब्दके यकारका लोप और अण् प्रत्यय हो* जैसे-श्रौत्रम् । कुशल, चपल, निपुण, पिशुन, कुतूहल, क्षेत्रज्ञ, यह शब्द युवादि गण और ब्राह्मणादि गणके मध्यमें पठित हैं, इससे 'कौशलम्, कौशल्यम्' इस प्रकार रूप होंगे ॥

१७९६ इगन्ताच्च लघुपूर्वात् ।५।१।१३१॥

शुचेर्भावः कर्म वा शौचम् । मौनम् । कथं काव्यम्, कविशब्दस्य ब्राह्मणादित्वात् ष्यञ् ॥

१७९६-लघु वर्ण पूर्वमें है जिनके ऐसे इकारान्त, उकारान्त, ऋकारान्त, और ऌकारान्त शब्दोंके उत्तर कर्म और भाव अर्थमें अण् प्रत्यय हो, जैसे-शुचेर्भावः कर्म वा=शौचम्

मौनम् । इस सूत्रके रहते 'काव्यम्' यह पद कैसे हुआ ? इस पर कहतेहैं कि, कवि शब्दको ब्राह्मणादिगणके मध्यमें पठित होनेके कारण उसके उत्तर ष्यञ् प्रत्यय हुआहै ॥

१७९७ योपधाद्गुरूपोत्तमाद्वुञ् ।५।१।१३२।

रामणीयकम् । आभिधानीयकम् ॥ सहायाद्वा ॥ * ॥ साहाय्यम् ॥ साहायकम् ॥

१७९७–यकारोपध जो गुरूपोत्तम (जिसके अन्तवर्णका पूर्ववर्ण गुरुसंज्ञक हो ऐसा) प्रातिपदिक उसके उत्तर वुञ् प्रत्यय हो, जैसे–रामणीयकम् । आभिधानीयकम् ।

सहाय शब्दके उत्तर विकल्प करके वुञ् प्रत्यय हो * विकल्प पक्षमें ष्यञ् प्रत्यय होगा, जैसे–साहायकम्, साहाय्यम् ॥

१७९८ द्वन्द्वमनोज्ञादिभ्यश्च ।५।१।१३३।

शैष्योपाध्यायिका । मानोज्ञकम् ॥

१७९८–द्वन्द्वसमास, निष्पन्न शब्द और मनोज्ञादि शब्दोंके उत्तर वुञ् प्रत्यय हो, जैसे–शैष्योपाध्यायिका । मानोज्ञकम् ॥

१७९९ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । ५ । १ । १३४ ॥

अत्याकारोऽधिक्षेपः तदवेतस्ते गोत्रचरणयोर्भावकर्मणी प्राप्तः । अवगतवान्वा । गार्गिकया श्लाघते । गार्ग्यत्वेन विकत्थत इत्यर्थः । गार्गिकयाऽत्याकुरुते । गार्गिकामवेतः ॥

१७९९–श्लाघा (प्रशंसा), अत्याकार (अवमान), और तदवेत (तदवगत), विषयमें गोत्रवाचक और चरणवाचक प्रातिपदिकके उत्तर भाव और कर्मार्थमें वुञ् प्रत्यय हो, तदवेतस्ते गोत्रचरणयोः भावकर्मणी प्राप्तः अवगतवान् (गोत्र और चरणके भाव तथा कर्मको प्राप्त हुआ अथवा उनके ज्ञानको प्राप्त हुआ) गार्गिकया श्लाघते, अर्थात् गार्ग्यगोत्रसम्भूत होनेके कारण प्रशंसित होताहै । गार्गिकया अत्याकुरुते । गार्गिकामवेतः ॥

१८०० होत्राभ्यश्छः । ५ ।१। १३५ ॥

होत्राशब्दः ऋत्विग्वाची स्त्रीलिंगः । बहुवचनाद्विशेषग्रहणम् । अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् । मैत्रावरुणीयम् ॥

१८००–उक्त अर्थमें होत्रा शब्दके उत्तर छ प्रत्यय हो, होत्रा शब्द ऋत्विग्वाचक स्त्रीलिङ्ग है । बहुवचनके कारण विशेषका ग्रहण होताहै, जैसे–अच्छावाकस्य भावः कर्म वा= अच्छावाकीयम् । मैत्रावरुणीयम् ॥

१८०१ ब्रह्मणस्त्वः । ५ । १ । १३६ ॥

होत्रावाचिनो ब्रह्मन्शब्दात्त्वः स्यात् । छस्यापवादः । ब्रह्मत्वम् । नेति वाच्ये त्ववचनं तलो बाधनार्थम् । ब्राह्मणपर्यायाद्ब्रह्मन्शब्दात्तु त्वतलौ । ब्रह्मत्वम् । ब्रह्मता ॥

॥ इति नञ्स्नञोरधिकारः समाप्तः ॥

१८०१–होत्रावाचक ब्रह्मन् शब्दके उत्तर त्व प्रत्यय हो, यह छ प्रत्ययका अपवाद है, जैसे–ब्रह्मत्वम् । "ब्रह्मणो न" इसी प्रकार सूत्र करनेसे इष्ट सिद्ध होनेपर त्वग्रहण तल् प्रत्ययके बाधके निमित्त है, ब्राह्मणपर्याय ब्रह्मन् शब्दके उत्तर तो त्व और तल् प्रत्यय होगा, जैसे–ब्रह्मत्वम्, ब्रह्मता ॥ ॥ इति नञ्स्नञोरधिकारः समाप्तः ॥

(इति भावकर्मार्थकप्रकरणम्)

अथ पाञ्चमिकप्रकरणम् ।

१८०२ धान्यानां भवने क्षेत्रे खञ् । ५ । २ । १ ॥

भवन्त्यस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् ॥

१८०२–उत्पत्तिका स्थान (खेत) वाच्य हो तो षष्ठयन्त समर्थ धान्यविशेषवाची शब्दोंके उत्तर खञ् प्रत्यय हो, जैसे–भवन्ति अस्मिन्, इस विग्रहमें भवनम्, मुद्गानां भवनं क्षेत्रं=मौद्गीनम् ॥

१८०३ व्रीहिशाल्योर्ढक् । ५ । २।२ ॥

व्रैहेयम् । शालेयम् ॥

१८०३–षष्ठयन्त व्रीहि और शालि शब्दके उत्तर उक्त अर्थमें ढक् प्रत्यय हो, जैसे–व्रैहेयम् । शालेयम् ॥

१८०४ यवयवकषष्टिकाद्यत् ।५।२।३ ॥

यवानां भवनं क्षेत्रं यव्यम् । यवक्यम् । षष्टिक्यम् ॥

१८०४–षष्ठयन्त यव, यवक और षष्टिक शब्दके उत्तर उक्त अर्थमें यत् प्रत्यय हो, जैसे–यवानां भवनं क्षेत्रम्=यव्यम् । यवक्यम् । षष्टिक्यम् ॥

१८०५ विभाषा तिलमाषोमाभङ्गाणुभ्यः । ५ । २ । ४ ॥

यद्वा स्यात्पक्षे खञ् । तिल्यम् । तैलीनम् । माष्यम् । माषीणम् । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । अणव्यम् । आणवीनम् ॥

१८०५–तिल, माष, उमा, भङ्ग और अणु शब्दके उत्तर उक्त अर्थमें विकल्प करके यत् प्रत्यय हो, पक्षमें खञ् प्रत्यय हो, जैसे–तिल्यम्, तैलीनम् । माष्यम्, माषीणम् । उम्यम्, औमीनम् । भङ्ग्यम्, भाङ्गीनम् । अणव्यम्, आणवीनम् ॥

१८०६ सर्वचर्मणः कृतः खखञौ । ५ । २ । ५ ॥

असामर्थ्येऽपि निपातनात्समासः । सर्वश्चर्मणा कृतः सर्वचर्मीणः । सार्वचर्मीणः ॥

१८०६–'कृत' अर्थमें सर्वचर्मन् शब्दके उत्तर ख और खञ् प्रत्यय हो, इस स्थलमें सर्व इस पदका कृतके साथ अन्वय है, चर्मन्‌के साथ नहीं है, इस कारण 'सर्वेण चर्मणा कृतः' ऐसा समास न होकर इसी सूत्रमें निपातनसे सर्वचर्मन्‌में समास होताहै, जैसे–सर्वः चर्मणा कृतः=सर्वचर्मीणः ॥ सार्वचर्मीणः ॥

१८०७ यथामुखसंमुखस्य दर्शनः खः । ५ । २ । ६ ॥

मुखस्य सदृशं यथामुखं प्रतिबिम्बम् । निपातनात्साद‍ृश्येऽव्ययीभावः । समं सर्वं मुखं संमुखम् । समशब्दस्यान्तलोपो निपात्यते यथामुखं दर्शनो यथामुखीनः । सर्वस्य दर्शनः संमुखीनः ॥

१८०७–दर्शन अर्थमें यथामुख और सम्मुख शब्दके उत्तर ख प्रत्यय हो । मुखस्य सदृशं यथामुखं प्रतिबिम्बम्, यहां निपातसे सादृश्यार्थमें अव्ययीभाव हुआ । समं सर्वं मुखं सम्मुखम्, यहां सम शब्दके अन्तका लोप निपातनसिद्ध है । यथामुखं दर्शनः=यथामुखीनः । सर्वस्य मुखस्य दर्शनः=सम्मुखीनः ॥

१८०८ तत्सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति । ५ । २ । ७ ॥

सर्वादेः पथ्याद्यन्ताद् द्वितीयान्तात्खः स्यात् । सर्वपथान् व्याप्नोति सर्वपथीनः । सर्वांगीणः । सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः ॥

१८०८–सर्व शब्द आदिमें रहते द्वितीयान्त पथिन्, अङ्ग, कर्म, पत्र और पात्रशब्दके उत्तर 'व्याप्नोति (व्याप्त होताहै)' इस अर्थमें ख प्रत्यय हो, जैसे–सर्वपथान् व्याप्नोति=सर्वपथीनः । सर्वाङ्गीणः । सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः ॥

१८०९ आप्रपदं प्राप्नोति । ५।२ । ८ ॥

पादस्याग्रं प्रपदं तन्मर्यादीकृत्य आप्रपदम् । आप्रपदीनः पटः ॥

१८०९–'प्राप्नोति (प्राप्त होताहै)' इस अर्थमें आप्रपद शब्दके उत्तर ख प्रत्यय हो । पादके अग्रभागको प्रपद कहतेहैं और तदवधिकको आप्रपद कहतेहैं । आप्रपदं प्राप्नोति, इस वाक्यमें आप्रपदीनः, अर्थात् पटः ॥

१८१० अनुपदसर्वान्नायानयं बद्धा-भक्षयतिनेयेषु । ५ । २ । ९ ॥

अनुरायामे सादृश्ये च । अनुपदं बद्धा अनुपदीना उपानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयानयः स्थलविशेषः । तन्नेय अयानयीनः शारः ॥

१८१०–बद्धा अर्थमें अनुपद शब्दके उत्तर, भक्षयति अर्थमें सर्वान्न शब्दके उत्तर, और नेय अर्थमें अयानय शब्दके उत्तर ख प्रत्यय हो । अनु शब्दसे आयाम और सादृश्य जानना । अनुपदं बद्धा, इस विग्रहमें अनुपदीना अर्थात् उपानत् । सर्वान्नानि भक्षयति, इस विग्रहमें सर्वान्नीनः अर्थात् भिक्षुः । अयानय शब्दसे स्थलविशेष जानना । अयानयं नेयः, इस विग्रहमें अयानयीनः अर्थात् शारः ॥

१८११ परोवरपरम्परपुत्रपौत्रमनुभवति । ५ । २ । १० ॥

परांश्चावरांश्चानुभवतीति परोवरीणः । अवरस्योत्वं निपात्यते । परांश्च परतरांश्चाऽनुभवति परम्परीणः । प्रकृतेः परम्परभावो निपात्यते । पुत्रपौत्राननुभवति पुत्रपौत्रीणः । परम्पराशब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिंगं तस्मादेव स्वार्थे ष्यञि पारपर्म्यम् । कथं पारोवर्यवदिति । असाधुरेव । खप्रत्ययसन्नियोगेनैव परोवरेतिनिपातनात् ॥

१८११–'अनुभवति (अनुभव करताहै)' इस अर्थमें द्वितीयान्त परोवर, परम्पर और पुत्रपौत्र शब्दके उत्तर ख प्रत्यय हो, जैसे–परांश्चावरांश्चानुभवति, इस विग्रहमें परोवरीणः । अवर शब्दके अकारके स्थानमें निपातनसे उकार होताहै । परांश्च परतरांश्चानुभवति=परम्परीणः । प्रकृतिको परम्परभाव निपातनसिद्ध अर्थात् पर इस प्रकृतिके स्थानमें परम्पर आदेश हो । पुत्रपौत्राननुभवति, इस विग्रहमें पुत्रपौत्रीणः । परम्परा शब्द तो अव्युत्पन्न शब्दान्तर स्त्रीलिङ्ग है, उसीके उत्तर स्वार्थमें ष्यञ् प्रत्यय करके पारम्पर्यम्, यह पद सिद्ध हुआहै । ख प्रत्ययके सन्नियोगमें परोवर यह शब्द निपातनसिद्ध है, इस कारण 'पारोवर्यवत्' यह पद असाधु है ॥

१८१२ अवारपाराऽत्यन्ताऽनुकामं गामी । ५ । २ । ११ ॥

अवारपारं गामी अवारपारीणः । अवारीणः । पारीणः । पारावारीणः । अत्यन्तं गामी अत्यन्तीनः । भृशं गन्तेत्यर्थः । अनुकामं गामी अनुकामीनः यथेष्टं गन्ता ॥

१८१२–'गामी' अर्थ होनेपर अवारपार, अत्यन्त, अनुकाम, इन सम्पूर्ण शब्दोंके उत्तर ख प्रत्यय हो, जैसे–अवार-

१ द्यूतके पाशोंके दहिने तरफ घूमनेको 'अय' कहतेहैं, नहीं जो अय उसको 'अनय' कहतेहैं, अयसहित अनयको 'अयानय' कहते-हैं । दक्षिण तथा वाम भागसे चलनेवाले युग्मादि स्थानोंमें स्थित पाशे जिस स्थानमें औरके पाशोंसे न आक्रान्त हों उसे लक्षणासे 'अयानय' कहतेहैं ॥

पारं गामी=अवारपारीणः । अवारीणः । पारीणः । पारावारीणः । अत्यन्तं गामी=अत्यन्तीनः अर्थात् शीघ्रगमनशीलः। अनुकामं गामी=अनुकामीनः अर्थात् यथेष्टगमनकारी ॥

१८१३ समांसमां विजायते ।५।२।१२॥

यलोपोऽवशिष्टविभक्तेरलुक् च पूर्वपदे निपात्यते । समांसमीना गौः । समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः ॥*॥ समांसमां विजायते । समायांसमायां वा ॥

१८१३–विपूर्वक 'जनी–प्रादुर्भावे' धातुका अर्थ गर्भविमोचन अर्थात् प्रसव है, तो प्रसवको सम्पूर्णवत्सरव्यापकत्वके अभावके कारण इस स्थलमें अत्यन्त संयोगमें होनेवाली (५५८) द्वितीया विभक्तिकी प्राप्तिका अभाव है, इस कारण इस स्थलमें सप्तमी ही विभक्ति होतीहै, इस आशयसे कहाहै कि, 'विजायते (गर्भमोचन करतीहै)' इस अर्थमें ख प्रत्यय और प्रकृतिभागमें समायांसमायाम्, इस प्रकार रहते निपातनसे पूर्व पदके यकारमात्रका लोप और अवशिष्ट विभक्त्यंशका अलुक् करके 'समाम्' ऐसा हुआ और उत्तर पदकी विभक्तिका "सुपो धातुप्रातिपदिकयोः" इस सूत्रसे लुक् करके,समांसमा+ईन=समांसमीना अर्थात् गौः। जो गाय प्रतिवर्ष प्रसूता हो ।

ख प्रत्ययकी अनुत्पत्तिमें दोनों पदोंके यकारका लोप विकल्पसे हो*जैसे–समांसमां विजायते, समायां समायां वा ॥

१८१४ अद्यश्वीनावष्टब्धे । ५ । २।१३॥

अद्य श्वो वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः । केचित्तु विजायत इति नानुवर्तयन्ति।अद्यश्वीनं मरणम् । आसन्नमित्यर्थः॥

१८१४–अवष्टब्ध अर्थात् आसन्न अर्थमें 'अद्यश्वीना' पद निपातनसे सिद्ध हो, जैसे–अद्य श्वो वा विजायते, इस विग्रहमें अद्यश्वीना वडवा, अर्थात् आसन्नप्रसवा । कोई २ पंडित 'विजायते' इस पदकी अनुवृत्ति नहीं करते, उनके मतमें अद्यश्वीनं मरणम् (आसन्न मरण) ऐसा होगा ॥

१८१५ आगवीनः ।५।२। १४॥

आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः।

१८१५–कर्मकर अर्थमें आङ्पूर्वक गो शब्दके उत्तर निपातनसे ख प्रत्यय हो, जैसे–आगवीनः, अर्थात् जो प्राणी गायके प्रत्यर्पणपर्यन्त कार्य करे, उसको आगवीन कहतेहैं ॥

१८१६ अनुग्वलंगामी । ५। २। १५ ॥

अनुगु, गोः पश्चात्पर्याप्तं गच्छति अनुगवीनो गोपालः ॥

१८१६–अनुगु शब्दके उत्तर 'अलंगामी' अर्थात् पर्याप्त जाताहै, इस अर्थमें निपातनसे ख प्रत्यय हो, जैसे–अनुगवीनः। अनुगु अर्थात् गायके पीछे २ जो प्राणी पर्याप्तभावसे गमन करै, उसको अनुगवीनः (ग्वाला) कहतेहैं ॥

१८१७ अध्वनो यत्खौ । ५ । २।१६॥

अध्वानमलं गच्छति अध्वन्यः । अध्वनीनः। ये चाभावकर्मणोः, आत्माध्वानौ खे इति सूत्राभ्यां प्रकृतिभावः ॥

१८१७–अध्वन् शब्दके उत्तर यत् और ख प्रत्यय हो, जैसे–अध्वानमलं गच्छति=अध्वन्यः । अध्वनीनः । 'ये चाभावकर्मणोः ११५४", "आत्माध्वानौ खे १६७१" इन दो सूत्रोंसे प्रकृतिभाव भी होगा ॥

१८१८ अभ्यमित्राच्छ च । ५।२।१७॥

चाद्यत्खौ । अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अमित्राऽभिमुखं सुष्ठु गच्छतीत्यर्थः ॥

१८१८–अभ्यमित्र शब्दके उत्तर छ प्रत्यय हो और सूत्रमें चकार पढनेसे यत् और ख प्रत्यय हो, जैसे–अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अर्थात् शत्रुके सम्मुख भलीभांति गमनकरनेवाला ॥

१८१९ गोष्ठात्खञ् भूतपूर्वे।५।२।१८॥

गोष्ठो भूतपूर्वः गौष्ठीनो देशः ॥

१८१९–भूतपूर्व अर्थमें गोष्ठ शब्दके उत्तर खञ् प्रत्यय हो, जैसे–गोष्ठो भूतपूर्वः=गौष्ठीनः अर्थात् देशः ॥

१८२० अश्वस्यैकाहगमः । ५ ।२।१९॥

एकाहेन गम्यते इत्येकाहगमः,आश्वीनोऽध्वा॥

१८२०–'एकाहगम (एक दिनमें जानेयोग्य)' इस अर्थमें षष्ठ्यन्त अश्व शब्दसे खञ् प्रत्यय हो, जैसे–अश्वस्य एकाहगमःआश्वीनः, अर्थात् अश्वके एकदिनमें गमन योग्य मार्ग ॥

१८२१ शालीनकौपीने अधृष्टाकार्ययोः । ५ । २ । २० ॥

शालाप्रवेशमर्हति शालीनः, अधृष्टः । कूपपतनमर्हति कौपीनं पापम्, तत्साधनत्वात्तद्वद्गोप्यत्वात्पुरुषलिङ्गमपि।तत्सम्बन्धात्तदाच्छादनमपि।

१८२१–अधृष्ट अर्थमें शालीन और अकार्य अर्थमें कौपीन यह ख प्रत्ययान्त शब्द निपातनसे सिद्ध होतेहैं, जैसे–शालाप्रवेशमर्हति=शालीनः अर्थात् अधृष्टः । कूपपतनमर्हति=कौपीनम्, अर्थात् पाप, तत्साधनत्व और तद्वत् गोप्यत्वके कारण पुरुषलिंग, और उसके सम्बन्धवशसे उसके आच्छादन वस्त्रको भी कौपीन कहतेहैं ॥

१८२२ व्रातेन जीवति । ५ । २ ।२१॥

व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स व्रातीनः ॥

१८२२-'जीवति (जीताहै)' इस अर्थमें तृतीयान्त व्रात शब्दके उत्तर ख प्रत्यय हो, जैसे-व्रातेन शरीरायासेन जीवति (न तु बुद्धिवैभवेन) सः=व्रातीनः । जो प्राणी शारीरिक श्रमसे जीविका करै बुद्धिसे नहीं उसको 'व्रातीन' कहतेहैं ॥

१८२३ सातपदीनं सख्यम् ।५।२।२२॥

सप्तभिः पदैरवाप्यते साप्तपदीनम् ॥

१८२३-सख्य (मैत्री) अर्थमें 'साप्तपदीनम्' यह पद निपातनसे सिद्ध हो, अर्थात् अवाप्य सख्य रहते तृतीयान्त सप्तपद शब्दसे खञ् प्रत्यय हो, जैसे-सप्तभिः पदैरवाप्यते= साप्तपदीनम् ॥

१८२४ हैयङ्गवीनं संज्ञायाम्।५।२।२३॥

ह्योगोदोहस्य हियङ्गुरादेशः विकारार्थे खञ् च निपात्यते । दुह्यत इति दोहः क्षीरम् । ह्योगोदोहस्य विकारो हैयङ्गवीनं नवनीतम् ॥

१८२४-संज्ञा होनेपर ह्योगोदोह शब्दके स्थानमें विकारार्थमें हियंगु आदेश और उसके उत्तर खञ् प्रत्यय निपातनसे हों, दुह्यते, इस विग्रहमें दोहः, अर्थात् दूध, ह्योगोदोहस्य विकारः=हैयंगवीनम्=अर्थात् नवीन मक्खन ॥

१८२५ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ । ५ । २ ।२४॥

पीलूनां पाकः पीलुकुणः । कर्णस्य मूलं कर्णजाहम् ॥

१८२५-पाक और मूल अर्थमें क्रमसे षष्ठ्यन्त समर्थ पीलु आदि शब्दोंके उत्तर कुणप् और कर्णादि शब्दोंके उत्तर जाहच् प्रत्यय हो, जैसे-पीलूनां पाकः=पीलुकुणः । कर्णस्य मूलम्=कर्णजाहम् ॥

१८२६ पक्षात्तिः । ५ । २ ।२५ ॥

मूलग्रहणमात्रमनुवर्तते।पक्षस्य मूलं पक्षतिः॥

१८२६ मूल अर्थमें षष्ठ्यन्त पक्ष शब्दके उत्तर ति प्रत्यय हो, जैसे-पक्षस्य मूलम्, इस विग्रहमें पक्षतिः । इस सूत्रमें केवल मूलार्थकी अनुवृत्ति होतीहै ॥

१८२७ तेन वित्तश्चुञ्चुप्चणपौ । ५ । २ । २६ ॥

चकारः प्रत्यययोरादौ लुप्तनिर्दिष्टस्तेन चस्य नेत्संज्ञा।विद्यया वित्तो विद्याचुञ्चुः।विद्याचणः॥

१८२७-वित्त (जानागयाहै) इस अर्थमें तृतीयान्त पदके उत्तर चुञ्चुप् और चणप् प्रत्यय हो, चुञ्चुप् और चणप् इन दोनों प्रत्ययोंके आदिमें चकार लुप्तनिर्दिष्ट है, इस कारण चकारकी इत्संज्ञा नहीं हुई, जैसे-विद्यया वित्तः, इस विग्रहमें विद्याचुञ्चुः । विद्याचणः ॥

१८२८ विनञ्भ्यां नानाञौ न सह। ५ । २ । २७ ॥

असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ । विना । नाना ॥

१८२८-असहार्थ अर्थात् पृथग्भावमें वर्तमान वि और नञ् शब्दके उत्तर स्वार्थमें ना और नाञ् प्रत्यय हो, जैसे-विना । नाना ॥

१८२९ वेः शालच्छङ्कटचौ ।५।२।२८॥

क्रियाविशिष्टसाधनवाचकात्स्वार्थे । विस्तृतम्-विशालम् । विशङ्कटम् ॥

१८२९-क्रियाविशिष्ट साधनवाचक वि शब्दके उत्तर स्वार्थमें शालच् और शंकटच् प्रत्यय हों, जैसे-विस्तृतम्=विशालम् । विशंकटम् ॥

१८३० संप्रोदश्च कटच् । ५।२ । २९ ॥

सङ्कटम् । प्रकटम् । उत्कटम् । चाद्विकटम् । अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानम्॥*॥ अलाबूनां रजः अलाबूकटम् ॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः ॥ * ॥ गवां स्थानं गोगोष्ठम् ॥ संघाते कटच् ॥*॥ अवीनां संघातोऽविकटः ॥ विस्तारे पटच्॥ *॥ अविपटः ॥ द्वित्वे गोयुगच् ॥ * ॥ द्वावुष्ट्रौ उष्ट्रगोयुगम् ॥ षड्त्वे षड्गवच् ॥ * ॥ अश्वषड्गवम् । स्नेहे तैलच् ॥ * ॥ तिलतैलम् । सर्षपतैलम् । भवने क्षेत्रे शाकटशाकिनौ ॥ * ॥ इक्षुशाकटम् । इक्षुशाकिनम् ॥

१८३०-सम्, प्र, उत् और चकारसे वि शब्दके उत्तर कटच् प्रत्यय हो, जैसे-संकटम् । प्रकटम् । उत्कटम् । विकटम् ।

अलाबू, तिल, उमा और भङ्गा शब्दके उत्तर रजस् अर्थमें कटच् प्रत्यय हो * जैसे-अलाबूनाम् रजः-अलाबूकटम्, इत्यादि ।

स्थानादि अर्थमें पशुनामवाचक शब्दके उत्तर गोष्ठच् आदि प्रत्यय हों, * जैसे-गवां स्थानम्=गोगोष्ठम् ।

संघातार्थमें पशुवाचक शब्दके उत्तर कटच् प्रत्यय हो * जैसे-अवीनां संघातः=अविकटः ।

विस्तार अर्थमें पटच् प्रत्यय हो * यथा-अविपटः ॥

द्वित्वार्थमें गोयुगच् प्रत्यय हो * जैसे-द्वावुष्ट्रौ= उष्ट्रगोयुगम् ।

षड्त्व अर्थमें षड्गवच् प्रत्यय हो * जैसे-अश्वषड्गवम् ।

स्नेहार्थमें तैलच् प्रत्यय हो * जैसे-तिलतैलम् । सर्षपतैलम् ।

भवन और क्षेत्र अर्थमें शाकट् और शाकिन् प्रत्यय हो* जैसे-इक्षुशाकटम् । इक्षुशाकिनम् ॥

१८३१ अवात्कुटारच्च । ५ । २ ।३०॥

चात्कटच् । अवाचीनोवकुटारः । अवकटः ॥

१८३१-अव शब्दके उत्तर कुटारच् और चकारसे कटच् प्रत्यय हो, जैसे-अवाचीनः=अवकुटारः, अवकटः ॥

१८३२ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः । ५ । २ । ३१ ॥

अवादित्येव । नतं नमनम् । नासिकाया नतम् अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिका अवटीटा । पुरुषोऽप्यवटीटः ॥

१८३२--नासिकाके नत अर्थमें संज्ञा होनेपर अव शब्दके उत्तर टीटच्, नाटच् और भ्रटच् प्रत्यय हों, जैसे--नासिकाया नतम्=अवटीटम् । अवनाटम् । अवभ्रटम् । उस (नासिकानत) के योगके कारण नासिका 'अवटीटा' कहलातीहै और नतयुक्तनासिकायोगके कारण पुरुष ' अवटीट ' कहलाताहै ॥

१८३३ नेर्बिडज्बिरीसचौ। ५।२।३२ ॥

निबिडम् । निबिरीसम् ॥

१८३३--नि शब्दके उत्तर बिडच् और बिरीसच् प्रत्यय हों, जैसे--निबिडम् । निबिरीसम् ॥

१८३४ इनच् पिटच्चिकचि च।५।२।३३॥

नेरित्येव नासिकाया नतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिक चि इत्यादेशौ च ॥ कप्रत्ययचिकादेशौ च वक्तव्यौ ॥ * ॥ चिकिनम् । चिपिटम् । चिक्कम्॥ क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी ॥ * ॥ क्लिन्ने चक्षुषी अस्य चिल्लः । पिल्लः ॥ चुल् च ॥ * ॥ चुल्लः ॥

१८३४--नि शब्दके उत्तर नासिकाके नमन अर्थमें इनच् और पिटच् प्रत्यय हो, और प्रकृति (नि) को चिक् और चि आदेश हों ।

क प्रत्यय और चिक् आदेश हो, यह भी कहना चाहिये* जैसे--चिकिनम् । चिपिटम् । चिक्कम् ।

' अस्य चक्षुषी ' इस अर्थमें क्लिन्न शब्दके स्थानमें चिल् और पिल् आदेश हों और उसके उत्तर ल प्रत्यय भी हो * जैसे=क्लिन्ने चक्षुषी अस्य=चिल्लः । पिल्लः ।

उक्त अर्थमें चुल् आदेश भी हो * जैसे--क्लिन्ने चक्षुषी अस्य=चुल्लः ॥

१८३५ उपाधिभ्यां त्यकन्नासन्नारूढयोः । ५ । २ । ३४ ॥

संज्ञायामित्यनुवर्तते पर्वतस्यासन्नं स्थलमुपत्यका । आरूढं स्थलमधित्यका ॥

१८३५--संज्ञा होनेपर आसन्न और आरूढ अर्थमें वर्त्तमान उप और अधि शब्दके उत्तर स्वार्थमें त्यकन् प्रत्यय हो, जैसे--पर्वतस्यासन्नं स्थलम्=उपत्यका । पर्वतस्यारूढं, स्थलम्=अधित्यका । (इनमें " प्रत्ययस्थात्० ४६३७ " से इत्व तो नहीं होता, क्योंकि, ४६४ में " त्यकनश्च निषेधः " ऐसा वार्त्तिक है) ॥

१८३६ कर्मणि घटोऽठच् । ५।२।३५॥

घटत इति घटः । पचाद्यच् । कर्मणि घटते कर्मठः पुरुषः ॥

१८३६--' घटते ' इस अर्थमें पचादित्व (२८९६) के कारण अच् प्रत्यय होनेसे ' घटः ' सिद्ध होताहै । घट अर्थात् पटु, इस अर्थमें सप्तम्यन्त कर्मन् शब्दके उत्तर अठच् प्रत्यय हो, जैसे--कर्मणि घटते=कर्मठः, अर्थात् कर्मपटुः पुरुषः ॥

१८३७ तदस्य संजातं तारकादिभ्य इतच् । ५ । २ । ३६ ॥

तारकाः संजाता अस्य तारकितं नभः । आकृतिगणोऽयम् ॥

१८३७--'अस्य सञ्जातम्' इस अर्थमें प्रथमान्त तारकादि शब्दोंके उत्तर इतच् प्रत्यय हो, जैसे--तारकाः सञ्जाता अस्य=तारकितम्, अर्थात् नभः । तारकादि आकृतिगण है ॥

१८३८ प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ५ । २ । ३७ ॥

तदस्येत्यनुवर्तते । ऊरू प्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ॥ प्रमाणे लः ॥ * ॥ शमः । दिष्टिः वितस्तिः ॥ द्विगोर्नित्यम् ॥ * ॥ द्वौ शमौ प्रमाणमस्य द्विशमम्॥ प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः ॥ * ॥ शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् ॥ वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् ॥ * ॥ तावदेव तावद्द्वयसम् । तावन्मात्रम् ॥

१८३८--प्रमाणार्थमें वर्त्तमान प्रथमान्त शब्दके उत्तर षष्ठ्यर्थमें द्वयसज्, दघ्नच् और मात्रच् प्रत्यय हों, जैसे--ऊरू प्रमाणमस्य=ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् ।

प्रमाण अर्थमें ल अर्थात् द्वयसच् आदि प्रत्ययोंका लुक् हो * जैसे--शमः प्रमाणमस्य=शमः । दिष्टिः । वितस्तिः ॥

प्रमाणान्त द्विगु समासके उत्तर नित्य ही द्वयसच् आदि प्रत्ययोंका लुक् हो * जैसे--द्वौ शमौ परिमाणमस्य=द्विशमम् ।

प्रमाण, परिमाण और संख्यावाचक शब्दके उत्तर संशय अर्थमें मात्रच् प्रत्यय हो * जैसे--शममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् ।

वतुप्रत्ययान्तके उत्तर स्वार्थमें द्वयसच् और मात्रच् प्रत्यय बहुल करके हों, जैसे--तावदेव=तावद्द्वयसम् । तावन्मात्रम् ॥

१८३९ पुरुषहस्तिभ्यामण् च । ५ । २ । ३८ ॥

पुरुषः प्रमाणमस्य पौरुषम् । पुरुषद्वयसम् । हास्तिनम् । हस्तिद्वयसम् ॥

१८३९--पुरुष और हस्तिन् शब्दके उत्तर प्रमाण अर्थमें अण् और द्वयसच् आदि प्रत्यय हों, जैसे--पुरुषः प्रमाणमस्य=पौरुषम् । पुरुषद्वयसम् । हास्तिनम् । हस्तिद्वयसम् ॥

१८४० यत्तदेतेभ्यः परिमाणे वतुप्। ५।२।३९॥

यत्परिमाणमस्य यावान्।तावान्।एतावान्॥

१८४०-यद्, तद् और एतद् शब्दके उत्तर परिमाण अर्थमें वतुप् प्रत्यय हो, जैसे-यत् परिमाणमस्य=यावान्। तावान्। एतावान्॥

१८४१ किमिदंभ्यां वो घः। ५।२।४०॥

आभ्यां वतुप्स्याद्वस्य च घः। कियान्।इयान्॥

१८४१-किम् और इदम् शब्दके उत्तर वतुप् प्रत्यय हो और वतुप् प्रत्ययके वकारके स्थानमें घ हो, जैसे-कियान्। इयान्॥

१८४२ किमः संख्यापरिमाणे डति च।५।२।४१॥

चाद्वतुप्। तस्य च वस्य घः स्यात्। का संख्या येषां ते कति। कियन्तः॥

१८४२-किम् शब्दके उत्तर संख्याके परिमाण अर्थमें डति प्रत्यय हो और चकारसे वतुप् प्रत्यय हो और वतुप प्रत्ययके वकारके स्थानमें घ आदेश हो, जैसे-का संख्या येषां ते=कति। कियन्तः॥

१८४३ संख्याया अवयवे तयप्। ५।२।४२॥

पञ्चावयवा अस्य पञ्चतयं दारु॥

१८४३-अवयवार्थमें संख्यावाचक शब्दके उत्तर षष्ठ्यर्थमें तयप् प्रत्यय हो, जैसे-पञ्च अवयवा अस्य=पञ्चतयं दारु॥

१८४४ द्वित्रिभ्यां तयस्यायज्वा। ५।२।४३॥

द्वयम्। द्वितयम्। त्रयम्। त्रितयम्॥

१८४४-द्वि और त्रि शब्दके उत्तर तयप् प्रत्ययके स्थानमें विकल्प करके अयच् आदेश हो, जैसे-द्वयम्, द्वितयम्। त्रयम्, त्रितयम्॥

१८४५ उभादुदात्तो नित्यम् ।५।२।४४॥

उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः। उभयम्॥

॥ इति पाञ्चमिकप्रकरणम्॥

१८४५-उभ शब्दके उत्तर तयप् प्रत्ययके स्थानमें नित्य अयच् आदेश हो और वह अयच् आद्युदात्त हो, जैसे-उभयम्॥

॥ इति पाञ्चमिकप्रकरणम्॥

अथ मत्वर्थीयप्रकरणम्।

१८४६ तदस्मिन्नधिकमिति दशान्ताड्डः।५।२।४५॥

एकादश अधिका अस्मिन्नेकादशम्॥ शतसहस्रयोरेवेष्यते॥ * ॥ नेह। एकादश अधिका अस्यां विंशतौ॥ प्रकृतिप्रत्ययार्थयोः समानजातीयत्व एवेष्यते॥ * ॥ नेह। एकादश माषा अधिका अस्मिन् सुवर्णशते॥

१८४६-'तदस्मिन् अधिकम्' इस अर्थमें दशशब्दान्त शब्दके उत्तर ड प्रत्यय हो, जैसे-एकादश अधिका अस्मिन्=एकादशम्।

शत और सहस्र शब्द वाच्य होनेपर ही यह विधि इष्ट है* इससे यहां न हुआ, एकादश अधिका अस्यां विंशतौ।

प्रकृति और प्रत्ययार्थका समान जातीयत्व होनेपर ही यह विधि इष्ट है * इससे यहां नहीं हुआ, एकादश माषा अधिका अस्मिन् सुवर्णशते॥

१८४७ शदन्तविंशतेश्च।५।२।४६॥

डः स्यादुक्तेऽर्थे। त्रिंशदधिका अस्मिन् त्रिंशं शतम्। विंशम्॥

१८४७-उक्त अर्थमें शदन्त और विंशति शब्दके उत्तर ड प्रत्यय हो, जैसे-त्रिंशदधिका अस्मिन्=त्रिंशं शतम्। विंशम्॥

१८४८ संख्याया गुणस्य निमाने मयट्।५।२।४७॥

भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम्। गुणस्येति किम्। द्वौ व्रीहियवौ निमानमस्योदश्वितः। निमाने किम्। द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन॥

१८४८-गुणका निमान, अर्थात् भागका मूल्य अर्थमें वर्तमान प्रथमान्त संख्यावाचक शब्दके उत्तर षष्ठ्यर्थमें मयट् प्रत्यय हो, जैसे-यवानां द्वौ भागौ निमानमस्य उदश्विद्भागस्य=द्विमयमुदश्विद् यवानाम्। 'गुणस्य' ऐसा कहनेसे व्रीहियवौ निमानमस्य उदश्वितः, यहां न हुआ। निमाने ऐसा क्यों कहा? तो द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन, यहां न हो॥

१८४९ तस्य पूरणे डट्।५।२।४८॥

एकादशानां पूरण एकादशः॥

१८४९-पूरणार्थमें षष्ठ्यन्त संख्यावाचकसे डट् प्रत्यय हो, जैसे-एकादशानां पूरणः=एकादशः॥

१८५० नान्तादसंख्यादेर्मट् ।५।२।४९॥

डटो मडागमः स्यात् । पञ्चानां पूरणः पञ्चमः । नान्तात्किम् । विंशः । असंख्यादेः किम् । एकादशः ॥

१८५०–संख्यावाचक शब्द आदिमें न हो ऐसे नकारान्त संख्यावाचक शब्दके उत्तर डट् प्रत्ययको मट्का आगम हो, जैसे–पञ्चानां पूरणः=पञ्चमः।नकारान्त न होनेपर मट्का आगम नहीं होगा, जैसे–विंशः । संख्यावाचक शब्द पूर्वमें होनेपर मडागम नहीं होगा, जैसे–एकादशः ॥

१८५१ षट्कतिकतिपयचतुरां थुक् । ५ । २ । ५१ ॥

एषां थुगागमः स्याड्डटि।षण्णां पूरणः षष्ठः। कतिथः । कतिपयशब्दस्यासंख्यात्वेप्यत एव ज्ञापकाड्डट् । कतिपयथः । चतुर्थः ॥ चतुरश्छयतावाद्यक्षरलोपश्च ॥ * ॥ तुरीयः । तुर्यः ॥

१८५१–डट् प्रत्यय परे रहते षट्, कति, कतिपय और चतुर् शब्दको थुक्का आगम हो, जैसे–षण्णां पूरणः=षष्ठः । कतिथः । इसी ज्ञापकके कारण कतिपय शब्दके असंख्यात्व होनेपर भी डट् प्रत्यय हुआ, जैसे–कतिपयथः । चतुर्थः ॥

चतुर् शब्दके उत्तर छ और यत् प्रत्यय और आद्य अक्षरका लोप हो * जैसे–तुरीयः । तुर्यः ॥

१८५२ बहुपूगगणसङ्घस्य तिथुक् । ५ । २ । ५२ ॥

डटीत्येव । पूगसङ्घयोरसंख्यात्वेप्यत एव डट् । बहुतिथः इत्यादि ॥

१८५२–डट् प्रत्यय परे रहते बहु, पूग, गण और संघ शब्दको तिथुक्का आगम हो, पूग और संघ शब्दको असंख्यात्व होनेपर भी इसी ज्ञापकके कारण डट् प्रत्यय हुआ, जैसे-बहुतिथः, इत्यादि ॥

१८५३ वतोरिथुक् । ५ । २ । ५३ ॥

डटीत्येव । यावतिथः ॥

१८५३–डट् प्रत्यय परे रहते वतुप्रत्ययान्त शब्दके उत्तर इथुक्का आगम हो, जैसे–यावतिथः ॥

१८५४ द्वेस्तीयः । ५ । २ । ५४ ॥

डटोपवादः । द्वयोः पूरणो द्वितीयः ॥

१८५४–द्वि शब्दके उत्तर उक्त अर्थमें तीय प्रत्यय हो, यह डट् प्रत्ययका विशेषक है, जैसे–द्वयोः पूरणः=द्वितीयः ॥

१८५५ त्रेः सम्प्रसारणं च ।५।२।५५॥

तृतीयः ॥

१८५५–त्रि शब्दके उत्तर तीय प्रत्यय हो और त्रि शब्दको सम्प्रसारण हो, जैसे–तृतीयः ॥

१८५६ विंशत्यादिभ्यस्तमडन्यतरस्याम् । ५ । २ । ५६ ॥

एभ्यो डटस्तमडागमो वा स्यात् । विंशतितमः । विंशः । एकविंशतितमः । एकविंशः ॥

१८५६–विंशत्यादि शब्दके उत्तर डट् प्रत्ययको विकल्प करके तमट्का आगम हो, जैसे–विंशतितमः, विंशः । एकविंशतितमः, एकविंशः ॥

१८५७ नित्यं शतादिमासार्धमाससंवत्सराच्च । ५ । २ । ५७ ॥

शतस्य पूरणः शततमः । एकशततमः । मासादेरत एव डट् । मासतमः ॥

१८५७–शतादि शब्द, मास, अर्द्धमास और संवत्सर शब्दके उत्तर डट्को नित्य तमडागम हो, जैसे–शतस्य पूरणः=शततमः । एकशततमः । मासादि शब्दके उत्तर इसी ज्ञापनसे डट् प्रत्यय हुआ, जैसे–मासतमः ।

१८५८ षष्ट्यादेश्चाऽसंख्यादेः।५।२।५८॥

षष्टितमः । संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव । एकषष्टितमः । एकषष्टः ॥

१८५८–संख्यावाचक शब्द पूर्वमें न हो ऐसे षष्ट्यादि शब्दोंके उत्तर डट्को तमट्का आगम हो, जैसे–षष्टितमः । संख्यावाचक पूर्वमें होनेपर तो " विंशत्यादिभ्यः० १८५६ " इस सूत्रसे विकल्प करके डट् प्रत्ययको तमट्का आगम होगा, जैसे–एकषष्टितमः, एकषष्टः ॥

१८५९ मतौ छः सूक्तसाम्नोः।५।२।५९॥

मत्वर्थे छः स्यात् । अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम् । वारवन्तीयं साम॥

१८५९–सूक्त और साम होनेपर मत्वर्थमें प्रथमान्त प्रातिपदिकसे छ प्रत्यय हो,जैसे–अच्छावाक शब्दोऽस्मिन्नस्ति= अच्छावाकीयं सूक्तम् । वारवन्तीयं साम ॥

१८६० अध्यायानुवाकयोर्लुक्।५।२।६०॥

मत्वर्थस्य छस्य । अत एव ज्ञापकात्तत्र छः । विधानसामर्थ्याच्च विकल्पेन लुक् । गर्दभाण्डः । गर्दभाण्डीयः ॥

१८६०–अध्याय और अनुवाक वाच्य होनेपर मत्वर्थमें विहित छ प्रत्ययका लुक् हो, इसी ज्ञापकके कारण इस स्थलमें छ प्रत्यय हुआ, उसका विधानसामर्थ्यके कारण विकल्प करके लुक् हुआ, जैसे–गर्दभाण्डः, गर्दभाण्डीयः ॥

१८६१ विमुक्तादिभ्योऽण् । ५ ।२।६१॥

मत्वर्थेऽण् स्यादध्यायानुवाकयोः । विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः । दैवासुरः ॥

१८६१–अध्याय और अनुवाक वाच्य होनेपर विमुक्तादि शब्दोंके उत्तर मत्वर्थमें अण् प्रत्यय हो, जैसे–विमुक्तशब्दः अस्मिन्नस्ति=वैमुक्तः । दैवासुरः ॥

१८६२ गोषदादिभ्यो वुन् ।५।२।६२ ॥

मत्वर्थेऽध्यायानुवाकयोः । गोषदकः । इषेत्वकः ॥

१८६२-अध्याय और अनुवाक वाच्य होनेपर गोषदादि शब्दोंके उत्तर मत्वर्थमें वुन् प्रत्यय हो, जैसे-गोषदकः । इषेत्वकः ॥

१८६३ तत्र कुशलः पथः ।५।२।६३ ॥

वुन् स्यात् । पथि कुशलः पथिकः ॥

१८६३-'कुशल' इस अर्थमें सप्तम्यन्त पथिन् शब्दके उत्तर वुन् प्रत्यय हो, जैसे-पथि कुशलः=पथिकः ॥

१८६४ आकर्षादिभ्यः कन्।५।२।६४॥

आकर्षे कुशलः आकर्षकः । आकषादिभ्य इति रेफरहितो मुख्यः पाठः।आकषो निकषः ॥

१८६४-कुशलार्थमें आकर्षादि शब्दके उत्तर कन् प्रत्यय हो, जैसे-आकर्षे कुशलः=आकर्षकः । "आकषादिभ्यः" ऐसा रेफरहित पाठ मुख्य है । आकषो निकषः (आकष निकष पत्थरको कहतेहैं) ॥

१८६५ धनहिरण्यात्कामे ।५।२।६५ ॥

काम इच्छा । धने कामो धनको देवदत्तस्य । हिरण्यकः ॥

१८६५-कामार्थमें धन और हिरण्य शब्दके उत्तर कन् प्रत्यय हो, काम शब्दसे इच्छा जानना, जैसे-धने कामः= धनकः देवदत्तस्य । हिरण्यकः ॥

१८६६ स्वाङ्गेभ्यः प्रसिते ।५।२।६६ ॥

केशेषु प्रसितः केशकः तद्रचनायां तत्पर इत्यर्थः ॥

१६६६-प्रसितार्थमें स्वाङ्गवाचक शब्दके उत्तर कन् प्रत्यय हो, जैसे-केशेषु प्रसितः=केशकः । केशरचनामें तत्पर व्यक्तिको 'केशकः' कहतेहैं ॥

१८६७ उदराट्ठगाद्यूने ।५। २। ६७ ॥

अविजिगीषौ ठक् स्यात्कनोऽपवादः । बुभुक्षयाऽत्यन्तपीडित उदरे प्रसित औदरिकः । आद्यूने किम् । उदरकः । उदरपरिमार्जनादौ प्रसक्त इत्यर्थः ॥

१८६७-आद्यून अर्थात् अविजिगीषा अर्थ होनेपर प्रसितार्थमें उदर शब्दके उत्तर ठक् प्रत्यय हो, यह ठक्, कन् प्रत्ययका विशेषक है, जैसे-उदरे प्रसितः=औदरिकः, अर्थात् क्षुधासे अत्यन्त कातर । आद्यून अर्थ न होनेपर, उदरकः, अर्थात् उदर परिमार्जनादिमें प्रसक्त ॥

१८६८ सस्येन परिजातः ।५।२।६८ ॥

कन् स्मर्यते न तु ठक् । सस्यशब्दो गुणवाची न तु धान्यवाची। शस्येनेति पाठान्तरम्। सस्येन गुणेन परिजातः सम्बद्धः सस्यकः साधुः॥

१८६८-'सस्येन परिजातः' अर्थात् गुणसे युक्त, इस अर्थमें सस्य शब्दके उत्तर कन् प्रत्यय हो, ठक् प्रत्यय न हो, सस्य शब्द गुणवाची है, धान्यवाचक नहीं है, 'शस्येन' ऐसा पाठान्तर भी है । जैसे-सस्येन गुणेन परिजातः सम्बद्धः= सस्यकः, अर्थात् साधु ॥

१८६९ अंशं हारी । ५ । २ । ६९ ॥

हारीत्यावश्यके णिनिः । अत एव तद्योगे षष्ठी न । अंशको दायादः ॥

१८६९-'हारी' इस अर्थमें द्वितीयान्त अंश शब्दके उत्तर कन् प्रत्यय हो, 'हारी' इसमें हृ धातुके उत्तर आवश्यकमें णिनि प्रत्यय है, इस कारण तद्योग (णिनियोग) में षष्ठी नहीं हुई, जैसे-अंशको दायादः ॥

१८७० तन्त्रादचिरापहृते । ५।२।७० ॥

तन्त्रकः पटः । प्रत्यग्र इत्यर्थः ॥

१८७०-अचिरापहृत अर्थमें तंत्र शब्दके उत्तर कन् प्रत्यय हो, जैसे-तंत्रकः पटः, प्रत्यग्र अर्थात् नवीन वस्त्र ॥

१८७१ ब्राह्मणकोष्णिके संज्ञायाम् । ५ । २ । ७१ ॥

आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः । अल्पमन्नं यस्यां सा उष्णिका यवागूः । अन्नशब्दस्य उष्णादेशो निपात्यते ॥

१८७१-संज्ञा होनेपर 'ब्राह्मणकः' और 'उष्णिका' यह दो पद निपातनसे सिद्ध हों, आयुधजीवी ब्राह्मण जिस देशमें रहें उसको 'ब्राह्मणक' कहतेहैं । जिसमें अल्प अन्न है, उसको उष्णिका, अर्थात् यवागू (लप्सी) कहतेहैं, अन्न शब्दके स्थानमें निपातनसे उष्ण आदेश हुआहै ॥

१८७२ शीतोष्णाभ्यां कारिणि । ५ । २ । ७२ ॥

शीतं करोतीति शीतकोऽलसः । उष्णं करोतीति उष्णकः शीघ्रकारी ॥

१८७२-'कारी' अर्थमें शीत और उष्ण शब्दके उत्तर कन् प्रत्यय हो, जैसे-शीतं करोतीति=शीतिकः अर्थात् अलस । उष्णं करोतीति उष्णकः, अर्थात् शीघ्रकारी ॥

१८७३ अधिकम् । ५ । २ । ७३ ॥

अध्यारूढशब्दात्कन् उत्तरपदलोपश्च ॥

१८७३-अध्यारूढ शब्दके उत्तर कन् प्रत्यय और उत्तर पदका लोप हो, जैसे-अधिकम् ॥

१८७४ अनुकाभिकाभीकः कमिता । ५ । २ । ७४ ॥

अन्वभिभ्यां कन् अभेः पाक्षिको दीर्घश्च । अनुकामयते अनुकः । अभिकामयते अभिकः । अभीकः ॥

१८७४–कमितार्थमें अनु और अभि शब्दके उत्तर कन् प्रत्यय और अभि शब्दके इकारको पाक्षिक दीर्घ भी हो, जैसे–अनुकामयते=अनुकः । अभिकामयते=अभीकः, अभिकः, अर्थात् कामुक ॥

१८७५ पार्श्वेनान्विच्छति ।५।२।७५॥

अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः॥

१८७५–'अन्विच्छति' इस अर्थमें तृतीयान्त पार्श्व शब्दके उत्तर कन् प्रत्यय हो, जैसे–अनृजुरुपायः पार्श्वं तेन अन्विच्छति=पार्श्वकः ॥

१८७६अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । ५ । २ । ७६ ॥

तीक्ष्ण उपायोऽयःशूलं तेनान्विच्छति आयःशूलिकः साहसिकः । दण्डाजिनं दम्भः तेनान्विच्छति दाण्डाजिनिकः ॥

१८७६–'अन्विच्छति' इस अर्थमें तृतीयान्त अयःशूल और दण्डाजिन शब्दके उत्तर क्रमसे ठक् और ठञ् प्रत्यय हों, जैसे–तीक्ष्ण उपायोऽयःशूलम्, तेन अन्विच्छति=आयःशूलिकः, अर्थात् साहसिक । दण्डाजिनं दंभः तेन अन्विच्छति=दांडाजिनिकः ॥

१८७७ तावतिथं ग्रहणमिति लुग्वा । ५ । २ । ७७ ॥

कन् स्यात्पूरणप्रत्ययस्य च लुग्वा । द्वितीयकं द्विकं वा ग्रहणं देवदत्तस्य । द्वितीयेन रूपेण ग्रहणमित्यर्थः ॥ तावतिथेन गृह्णातीति कन्वक्तव्यो नित्यं च लुक् ॥*॥ षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः । पञ्चकः ॥

१८७७–'ग्रहणम्' इस अर्थमें तृतीयान्त पूरणप्रत्ययान्तसे कन् प्रत्यय और पूरणप्रत्ययका विकल्प करके लुक् हो, जैसे–द्वितीयकं, द्विकं वा ग्रहणं देवदत्तस्य, अर्थात् द्वितीय रूपसे ग्रहण ।

तृतीयान्त पूरण प्रत्ययान्तसे 'गृह्णाति' इस अर्थमें कन् प्रत्यय और नित्य पूरण प्रत्ययका लुक् हो * जैसे–षष्ठेन रूपेण गृह्णाति=षट्को देवदत्तः । पञ्चकः ॥

१८७८ स एषां ग्रामणीः । ५ ।२।७८॥

देवदत्तो मुख्योऽस्य देवदत्तकः । त्वत्कः । मत्कः ॥

१८७८–'वह इसका ग्रामणी अर्थात् श्रेष्ठ है' इस अर्थमें कन् प्रत्यय हो, जैसे–देवदत्तो मुख्योऽस्य=देवदत्तकः । त्वत्कः । मत्कः ॥

१८७९ शृङ्खलमस्य बन्धनं करभे । ५ । २ । ७९ ॥

शृङ्खलकः करभः ॥

१८७९–'शृंखल इसका बंधन है' इस अर्थमें करभ वाच्य होनेपर शृंखल शब्दके उत्तर कन् प्रत्यय हो, जैसे–शृंखलकः करभः ॥

१८८० उत्क उन्मनाः । ५ । २ । ८० ॥

उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन् । उत्क उत्कण्ठितः ॥

१८८०–उद्गतमनस्कवृत्ति उत् शब्दके उत्तर स्वार्थमें कन् प्रत्यय हो, जैसे–उत्कः, अर्थात् उत्कंठित ॥

१८८१ कालप्रयोजनाद्रोगे ।५।२।८१॥

कालवचनात्प्रयोजनवचनाच्च कन् स्याद्रोगे द्वितीयेऽहनि भवो द्वितीयको ज्वरः । प्रयोजनं कारणं रोगस्य फलं वा । विषपुष्पैर्जनितो विषपुष्पकः । उष्णं कार्यमस्य उष्णकः । रोगे किम् । द्वितीयो दिवसोऽस्य ॥

१८८१–रोगार्थमें कालवाचक और प्रयोजनवाचक शब्दके उत्तर कन् प्रत्यय हो, जैसे–द्वितीयेऽहनि भवः=द्वितीयकः ज्वरः । प्रयोजन शब्दसे कारण अथवा रोगका फल जानना, जैसे–विषपुष्पैर्जनितः=विषपुष्पकः । उष्णं कार्यमस्य=उष्णकः । रोग न होनेपर, जैसे–द्वितीयो दिवसोऽस्य ॥

१८८२ तदस्मिन्नन्नं प्राये संज्ञायाम् । ५ । २ । ८२ ॥

प्रथमान्तात्सप्तम्यर्थे कन् स्यात् यत्प्रथमान्तमन्नं चेत्प्रायविषयं तत् । गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी ॥ वटकेभ्य इनिर्वाच्यः ॥ * ॥ वटकिनी ॥

१८८२–संज्ञा होनेपर प्रायविषयीभूत अन्नवाचक हो तो प्रथमान्त शब्दके उत्तर सप्तम्यर्थमें कन् प्रत्यय हो, जैसे–गुडापूपाः प्रायेणान्नमस्याम्=गुडापूपिका, अर्थात् पौर्णमासी।

वटक शब्दके उत्तर इनि प्रत्यय हो * जैसे–वटकिनी (फुलौरी वा बड़ा) ॥

१८८३ कुल्माषादञ् । ५ । २ । ८३ ॥

कुल्माषाः प्रायेणान्नमस्यां कौल्माषी ॥

१८८३–उक्त अर्थमें कुल्माष शब्दके उत्तर अञ् प्रत्यय हो, जैसे–कुल्माषा प्रायेणान्नमस्याम्=कौल्माषी । कुल्माष शब्दसे अर्द्धस्विन्न गोधूमादि जानना ॥

१८८४ श्रोत्रियंश्छन्दोऽधीते ।५।२।८४॥

श्रोत्रियः । वेत्यनुवृत्तेश्छान्दसः ॥

१८८४–'अध्ययन करता है' इस अर्थमें द्वितीयान्त छन्दस् शब्दके उत्तर निपातनसे घन् प्रत्यय और छन्दस्को श्रोत्र आदेश हो, जैसे–श्रोत्रियः । इस सूत्रमें वा शब्दकी अनुवृत्ति आनेसे 'छान्दसः' यह पद सिद्ध हुआ ॥

१८८५ श्राद्धमनेन भुक्तमिनिठनौ। ५।२।८५॥

श्राद्धी। श्राद्धिकः ॥

१८८५-' अनेन भुक्तम् ' इस अर्थमें श्राद्ध शब्दके उत्तर इनि और ठन् प्रत्यय हो, जैसे-श्राद्धं भुक्तमनेन=श्राद्धी,=श्राद्धिकः । इस स्थलमें श्राद्ध शब्दसे श्राद्धसाधन द्रव्य जानना, पितृलोकके उद्देश्यसे कर्म नहीं जानना क्योंकि, उनका साक्षात् भोजन असम्भव है ॥

१८८६ पूर्वादिनिः ।५।२।८६॥

पूर्वं कृतमनेन पूर्वी ॥

१८८६-' कृतम् ' इस अर्थमें पूर्व शब्दके उत्तर इनि प्रत्यय हो, जैसे-पूर्वी ॥

१८८७ सपूर्वाच्च ।५।२।८७॥

कृतपूर्वी ॥

१८८७-'कृतम्' इस अर्थमें तृतीयान्त सपूर्वक पूर्व शब्दके उत्तर इनि प्रत्यय हो, जैसे-कृतपूर्वी ॥

१८८८ इष्टादिभ्यश्च ।५।२।८८॥

इष्टमनेन इष्टी । अधीती ॥

१८८८-'इष्टम्' इस अर्थमें तृतीयान्त इष्टादि शब्दोंके उत्तर इनि प्रत्यय हो, जैसे-इष्टी । अधीती ॥

१८८९ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ।५।२।८९॥

लोके तु परिपन्थिशब्दो न न्याय्यः ॥

१८८९-वेदमें शत्रुपर्याय पर्यवस्थातृ शब्दके उत्तर स्वार्थमें इनि प्रत्यय हो, और अवस्थातृ शब्दके स्थानमें निपातनसे पंथ और पर आदेश हो, जैसे-परिपंथी । परिपरी । लोकमें परिपन्थि शब्द उचित नहीं है ॥

१८९० अनुपद्यन्वेष्टा ।५।२।९०॥

अनुपदमन्वेष्टा । अनुपदी गवाम् ॥

१८९०-अन्वेष्टाअर्थमें अनुपद शब्दके उत्तर इनि प्रत्यय हो, जैसे-अनुपदमन्वेष्टा=अनुपदी गवाम् ॥

१८९१ साक्षाद्द्रष्टरि संज्ञायाम् ।५।२।९१॥

साक्षाद्द्रष्टा साक्षी ॥

१८९१-संज्ञा होनेपर द्रष्टा अर्थमें साक्षात् शब्दके उत्तर इनि प्रत्यय हो, जैसे-साक्षात् द्रष्टा=साक्षी, यहां "अव्ययानां भमात्रे टिलोपः" इससे टिलोप हुआ ॥

१८९२ क्षेत्रियच् परक्षेत्रे चिकित्स्यः। ५।२।९२॥

क्षेत्रियो व्याधिः । शरीरान्तरे चिकित्स्यः । अप्रतीकार्य इत्यर्थः ॥

१८९२-'पर क्षेत्रमें अर्थात् शरीरान्तरमें चिकित्स्य' इस अर्थमें 'क्षेत्रियच्' यह निपातनसे सिद्ध हो, अर्थात् सप्तम्यन्त परक्षेत्र शब्दके उत्तर चिकित्स्यार्थमें घच् प्रत्यय हो, और निपातनसे पर शब्दका लोप हो, जैसे-क्षेत्रियो व्याधिः, जो परक्षेत्रमें अर्थात् शरीरान्तरमें चिकित्स्य हो उसको क्षेत्रिय कहतेहैं अर्थात् अप्रतीकार्य्य व्याधि ॥

१८९३ इन्द्रियमिन्द्रलिंगमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा । ५।२।९३॥

इन्द्र आत्मा तस्य लिङ्गं करणेन कर्तुरनुमानात् । इति शब्दः प्रकारार्थः । इन्द्रेण दुर्जयमिन्द्रियम् ॥

१८९३-इन्द्र लिङ्ग (चिह्न), इन्द्रदृष्ट, इन्द्रसृष्ट, इन्द्रजुष्ट, इन्द्रदत्त, इन अर्थोंमें इन्द्र शब्दके उत्तर निपातनसे घच् प्रत्यय हो, जैसे-इन्द्रियम् । इन्द्र शब्दसे आत्मा समझना, उसके अनुमापकको इन्द्रिय कहतेहैं, इस स्थलमें करणके कर्त्ताका अनुमान किया जाताहै। इति शब्द प्रकारार्थ है, इससे इन्द्रेण दुर्जयम्=इन्द्रियम्, ऐसा हुआ ॥

१८९४ तदस्यास्त्यस्मिन्निति मतुप् । ५।२।९४॥

गावोऽस्यास्मिन्वा सन्ति गोमान् ॥

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ॥ सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥१॥

१८९४-'अस्य अस्मिन् वा अस्ति' इस अर्थमें प्रथमान्त पदसे मतुप् प्रत्यय हो, जैसे-गावोऽस्य अस्मिन् वा सन्ति=गोमान् । भूमि, अर्थात् बाहुल्यार्थमें और निन्दार्थमें, प्रशंसार्थमें, नित्ययोगमें, अतिशयार्थमें, संसर्गार्थमें और अस्तिविवक्षामें मतुप् आदि प्रत्यय होतेहैं ॥

१८९५ रसादिभ्यश्च ।५।२।९५॥

मतुप् । रसवान् । रूपवान् । अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम् । रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव ॥ गुणात्, एकाचः ॥ स्ववान् । गुणग्रहणं रसादीनां विशेषणम् ॥

१८९५-रसादि शब्दोंके उत्तर उक्त अर्थमें मतुप् प्रत्यय हो, जैसे-रसवान् । रूपवान् । यह सूत्र अन्य मत्वर्थीय प्रत्ययकी निवृत्तिके निमित्त है । रसादि-रस, रूप, वर्ण, गन्ध, स्पर्श, शब्द, स्नेह, भाव, इतनेहैं ।

(गुणात्) गुणग्रहण रसादिकोंका विशेषण है इससे गुणवाचक ही रसादिसे मतुप् प्रत्यय होगा।

एकस्वरयुक्त शब्दके उत्तर मतुप् प्रत्यय हो, जैसे-स्ववान् ॥

१८९६ तसौ मत्वर्थे ।१।४।१९॥

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । वसोः संप्रसारणम् । विदुष्मान् ॥ गुणवचनेभ्यो मतुपो लुगिष्टः ॥ * ॥ शुक्लो गुणोऽस्यास्तीति शुक्लः पटः । कृष्णः ॥

१८९६–मत्वर्थ प्रत्यय परे रहते तकारान्त और सकारान्त शब्द भसंज्ञक हों। "वसोः सम्प्रसारणम्" इससे वस्वन्त अङ्गको संप्रसारण हुआ, जैसे–विदुष्मान्।

गुणवाचक शुक्लादि शब्दोंके उत्तर मतुप् प्रत्ययका लुक् हो * जैसे–शुक्लो गुणोऽस्यास्ति=शुक्लः पटः। कृष्णः, इत्यादि ॥

१८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः। ८। २। ९॥

मवर्णाऽवर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जात्परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान्॥

१८९७–मवर्णान्त और अवर्णान्त और मवर्ण और अवर्णोपध यवादिभिन्न शब्दके उत्तर मतुप्के मकारके स्थानमें वकार हो, जैसे–किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादि होनेपर जैसे–यवमान्। भूमिमान्॥

१८९८ झयः। ८। २। १०॥

झयन्तान्मतोर्मस्य वः स्यात्। अपदान्तत्वान्न जश्त्वम्। विद्युत्वान्॥

१८९८–झयन्तसे परे स्थित मतुप् प्रत्ययके मकारके स्थानमें वकार हो, जैसे–विद्युत्वान्, यहां अपदान्तत्वके कारण (१८९६) जश्त्व नहीं हुआ॥

१८९९ संज्ञायाम्। ८। २। ११॥

मतोर्मस्य वः स्यात्। अहीवती। मुनीवती। शरादीनां चेति दीर्घः॥

१८९९–संज्ञार्थमें मतुप् प्रत्ययके मकारके स्थानमें वकार हो, जैसे–अहीवती, मुनीवती। यहां "शरादीनाञ्च १०४२" इस सूत्रसे दीर्घ होताहै॥

१९०० आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। ८। २। १२॥

एते षट् संज्ञायां निपात्यन्ते। आसनशब्दस्यासन्दीभावः। आसन्दीवान् ग्रामः। अन्यत्रासनवान्। अस्थिशब्दस्याष्ठीभावः। अष्ठीवान्नाम ऋषिः। अस्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र। कक्ष्यायाः सम्प्रसारणम्। कक्षीवान्नाम ऋषिः। कक्ष्यावानन्यत्र। लवणशब्दस्य रुमण्भावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो नलोपाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र॥

१९००–आसन्दीवत्, अष्ठीवत्, चक्रीवत्, कक्षीवत्, रुमण्वत्, चर्मण्वत्, यह छै मतुप्प्रत्ययान्त शब्द संज्ञामें

निपातनसे सिद्ध हों, आसन शब्दके स्थानमें आसन्दी आदेश हुआ, जैसे–आसन्दीवान् ग्रामः। अन्यत्र 'आसनवान्' ऐसा होगा। अस्थि शब्दके स्थानमें अष्ठी आदेश हुआ, जैसे–अष्ठीवान्। अन्यत्र अस्थिमान्। चक्र शब्दके स्थानमें चक्री आदेश हुआ, जैसे–चक्रीवान् नाम राजा। अन्यत्र चक्रवान्। कक्ष्या शब्दको सम्प्रसारण (य–के स्थानमें ई) होकर कक्षीवान् नाम ऋषिः। अन्यत्र कक्ष्यावान्। लवण शब्दके स्थानमें रुमण् आदेश होकर रुमण्वान् नाम पर्वतः। अन्यत्र लवणवान्। चर्मन् शब्दके नकारके लोपका अभाव और णत्व होकर चर्मण्वती नाम नदी। अन्यत्र चर्मवती॥

१९०१ उदन्वानुदधौ च। ८। २। १३॥

उदकस्य उदन्भावो मतौ उदधौ संज्ञायां च। उदन्वान् समुद्रः ऋषिश्च॥

१९०१--मतुप् प्रत्यय परे रहते उदधि अर्थात् समुद्र अर्थ और संज्ञामें उदक शब्दके स्थानमें उदन् आदेश हो, जैसे--उदन्वान् समुद्रः, ऋषिश्च॥

१९०२ राजन्वान् सौराज्ये। ८। २। १४॥

राजन्वती भूः। राजवानन्यत्र॥

१९०२--सौराज्य होनेपर मतुप् प्रत्यय परे रहते राजन् शब्दके नकारका लोप न हो, जैसे--राजन्वती भूः। अन्यत्र राजवान्॥

१९०३ प्राणिस्थादातो लजन्यतरस्याम्। ५। २। ९६॥

चूडालः। चूडावान्। प्राणिस्थात्किम्। शिखावान्दीपः। आतः किम्। हस्तवान्। प्राण्यङ्गादेव। नेह। मेधावान्। प्रत्ययस्वरेणैव सिद्धे अन्तोदात्तत्वे चूडालोसीत्यादौ स्वरितो वाऽनुदात्ते पदादाविति स्वरितबाधनार्थश्चकारः॥

१९०३--प्राणिस्थ आकारान्त शब्दके उत्तर विकल्प करके लच् प्रत्यय हो, जैसे- चूडालः। चूडावान्। प्राणिस्थ न होनेपर जैसे- शिखावान् दीपः। आकारान्त न होनेपर, हस्तवान्। प्राणीका अङ्ग होनेसे ही लच् प्रत्यय होगा, इससे 'मेधावान्' यहां न हुआ।

प्रत्यय स्वरसे अन्तोदात्तत्व सिद्ध होनेसे 'चूडालोऽसि' इत्यादि स्थलमें "स्वरितो वानुदात्ते पदादौ ३६५९" इस सूत्रसे स्वरितके बाधके निमित्त प्रत्ययमें चकार है॥

१९०४ सिध्मादिभ्यश्च। ५। २। ९७॥

लज्वा स्यात्। सिध्मलः। सिध्मवान्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं न तु प्रत्ययविकल्पार्थम्। तेनाकारान्तेभ्य इनिठनौ न॥ वातदन्तबलललाटानामूङ् च॥॥ वातूलः॥

१९०४--सिध्मादि शब्दोंके उत्तर विकल्प करके लच् प्रत्यय हो, विकल्प पक्षमें मतुप् होगा, जैसे--सिध्मलः, सिध्मवान्।

'अन्यतरस्याम्' पदका ग्रहण मतुप् समुच्चयार्थ है, प्रत्ययके विकल्पार्थ नहीं है, इस कारण अकारान्त शब्दके उत्तर इनि और ठन् प्रत्यय न हुआ।

वात, दन्त, बल और ललाट शब्दके उत्तर लच् प्रत्यय और ऊङ् आदेश हो * जैसे--वातूलः॥

१९०५ वत्सांसाभ्यां कामबले५।२।९८॥

आभ्यां लच् स्याद्यथासंख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः॥

१९०५-कामवान् और बलवान् अर्थमें यथाक्रम वत्स और अंश शब्दके उत्तर विकल्प करके लच् प्रत्यय हो, जैसे-वत्सलः। अंसलः॥

१९०६ फेनादिलच्च।५।२।९९॥

चाल्लच्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः। फेनलः। फेनवान्॥

१९०६--फेन शब्दके उत्तर इलच् प्रत्यय हो और चकारसे लच् प्रत्यय हो, यहां 'अन्यतरस्याम्' यह पद मतुप् प्रत्ययके समुच्चयार्थ अनुवृत्त है, जैसे-फेनिलः, फेनलः, फेनवान्॥

१९०७ लोमादिपामादिपिच्छादिभ्यः शनेलचः।५।२।१००॥

लोमादिभ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवान्॥ पामादिभ्यो नः। पामनः॥ अङ्गात्कल्याणे॥ ॥ अङ्गना॥ लक्ष्म्या अच्च॥ ॥ लक्ष्मणः॥ विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः॥ ॥ विषुणः॥ पिच्छादिभ्य इलच्॥ पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्॥

१९०७--लोमादि शब्दोंके उत्तर श प्रत्यय हो,जैसे-लोमशः, लोमवान्। रोमशः, रोमवान्। पामादि शब्दोंके उत्तर न प्रत्यय हो, जैसे--पामनः।

अङ्ग शब्दके उत्तर कल्याण अर्थमें न प्रत्यय हो,जैसे-अङ्गना।

न प्रत्यय परे रहते लक्ष्मी शब्दके ईकारके स्थानमें अकार हो, जैसे--लक्ष्मणः।

अकृतसंधिक विष्वक् शब्दके उत्तर न प्रत्यय हो और उत्तरपदका लोप हो, जैसे--विषुणः। पिच्छादि शब्दोंके उत्तर इलच् प्रत्यय हो, जैसे--पिच्छिलः, पिच्छावान्। उरसिलः,उरस्वान्, इत्यादि॥

१९०८ प्रज्ञाश्रद्धार्चाभ्यो णः।५।२।१०१॥

प्राज्ञो व्याकरणम्। प्राज्ञा। श्राद्धः। आर्चः॥ वृत्तेश्च॥ * ॥ वार्तः॥

१९०८--प्रज्ञा, श्रद्धा और अर्चा शब्दोंके उत्तर ण प्रत्यय हो, जैसे--प्रज्ञा अस्यास्ति=प्राज्ञो व्याकरणम्। प्राज्ञा। श्राद्धः। आर्चः।

वृत्ति शब्दके उत्तर भी ण प्रत्यय हो * जैसे--वार्तः॥

१९०९ तपस्सहस्राभ्यां विनीनी।५।२।१०२॥

विनीन्योरिकारो नकारपरित्राणार्थः। तपस्वी। सहस्री। असन्तत्वाददन्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा मा भूदिति सहस्रात्तु ठनोपि बाधनार्थम्॥

१९०९--तपस् और सहस्र शब्दके उत्तर यथाक्रम विनि और इनि प्रत्यय हों, विनि और इनि प्रत्ययका इकार नकारके परित्राणार्थ है, जैसे--तपोऽस्मिन् अस्तीति=तपस्वी। सहस्री।

असन्तत्व और अकारान्तत्वके कारण उक्त दोनों शब्दोंके उत्तर उक्त दोनों प्रत्ययोंकी सिद्धि होजाती फिर सूत्र करनेकी क्या आवश्यकता है? इसपर कहतेहैं कि, अण् प्रत्ययसे इसका बाध न हो इस कारण यह सूत्र है और सहस्र शब्दके उत्तर ठन् प्रत्ययके भी बाधनार्थ है॥

१९१० अण् च।५।२।१०३॥

योगविभाग उत्तरार्थः। तापसः। साहस्रः॥ ज्योत्स्नादिभ्य उपसंख्यानम्॥ * ॥ ज्यौत्स्नः। तामिस्रः॥

१९१०--तपस् और सहस्र शब्दके उत्तर अण् प्रत्यय हो, "अण् च" ऐसा भिन्न सूत्रकरण उत्तरार्थ है। तापसः। साहस्रः।

ज्योत्स्नादि शब्दोंके उत्तर भी अण् प्रत्यय हो * जैसे--ज्यौत्स्नः। तामिस्रः॥

१९११ सिकताशर्कराभ्यां च।५।२।१०४॥

सैकतो घटः। शार्करः॥

१९११--सिकता और शर्करा शब्दके उत्तर अण् प्रत्यय हो, जैसे--सैकतः, अर्थात् घट। शार्करः॥

१९१२ देशे लुबिलचौ च।५।२।१०५॥

चादण् मतुप् च। सिकताः सन्त्यस्मिन्देशे सिकताः। सिकतिलः। सैकतः। सिकतावान्। एवं शर्करेत्यादि॥

१९१२--देश होनेपर सिकता और शर्करा शब्दके उत्तर अण् प्रत्ययका लुप् हो, और इलच् प्रत्यय हो, चकारसे अण् और मतुप् प्रत्यय भी हो, जैसे--सिकताः सन्ति अस्मिन् देशे=सिकताः, सिकतिलः, सैकतः, सिकतावान्। इसी प्रकार शर्कराः, शर्करिलः, शार्करः, शर्करावान्॥

१९१३ दन्त उन्नत उरच्।५।२।१०६॥

उन्नता दन्ताः सन्त्यस्य दन्तुरः॥

१९१३--ऊंचे अर्थमें प्रथमान्त दन्त शब्दके उत्तर उरच् प्रत्यय हो, जैसे--उन्नताः दन्ताः सन्ति अस्य=दन्तुरः।

१९१४ ऊषसुषिमुष्कमधोरः ५।२।१०७।

ऊषरः । सुषिरः । मुष्कोण्डः । मुष्करः । मधु माधुर्यम्, मधुरः ॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् ॥ * ॥ खरः । मुखरः ॥ कुञ्जो हस्तिहनुः,कुञ्जरः॥नगपांसुपाण्डुभ्यश्च॥*॥ नगरम् । पांसुरः । पाण्डुरः । पाण्डरशब्दस्तु अव्युत्पन्न एव॥कच्छ्वा ह्रस्वत्वं च॥*॥कच्छुरः॥

१९१४–ऊष, सुषि, मुष्क और मधु शब्दके उत्तर र प्रत्यय हो, जैसे–ऊषरः । सुषिरः । मुष्करः । मुष्क शब्दसे अण्डकोष जानना । मधुरः । मधु शब्दसे माधुर्य जानना । ख, मुख और कुञ्ज शब्दके उत्तर र प्रत्यय हो*जैसे–खरः । मुखरः । कुञ्जरः । कुञ्ज शब्दसे हाथीकी हनु जानना ।

नग, पांसु और पाण्डु शब्दके उत्तर र प्रत्यय हो, जैसे–नगरम् । पांसुरः । पाण्डुरः । पाण्डर शब्द तो अव्युत्पन्न, अर्थात् व्युत्पत्तिसिद्ध नहीं है ।

कच्छू शब्दके उत्तर र प्रत्यय और ऊकारको ह्रस्व हो, जैसे–कच्छुरः ॥

१९१५ द्युद्रुभ्यां मः । ५।२।१०८ ॥

द्युमः । द्रुमः ॥

१९१५–द्यु और द्रु शब्दके उत्तर म प्रत्यय हो, जैसे–द्युमः । द्रुमः ॥

१९१६ केशाद्वोऽन्यतरस्याम् । ५। २।१०९ ॥

प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थम् । केशवः। केशी । केशिकः । केशवान् ॥ अन्येभ्योऽपि दृश्यते॥*॥ मणिवो नागविशेषः । हिरण्यवो निधिविशेषः ॥ अर्णसो लोपश्च ॥ * ॥ अर्णवः ॥

१९१६–केश शब्दके उत्तर विकल्प करके व प्रत्यय हो, प्रकृत 'अन्यतरस्याम्' ग्रहणसे मतुप् प्रत्ययकी सिद्धि होनेपर भी पुनर्ग्रहण इनि और ठन् प्रत्ययके समावेशार्थ है, इससे केश शब्दके उत्तर व प्रत्यय और इनि, ठन् और मतुप् प्रत्यय भी होगा, जैसे–केशवः, केशी, केशिकः, केशवान् ॥

अन्य शब्दोंके उत्तर भी उक्त प्रत्यय हो * जैसे–मणिवः नागविशेषः । हिरण्यवः निधिविशेषः ॥

अर्णस् शब्दके उत्तर व प्रत्यय हो,और सकारका लोप हो* जैसे–अर्णवः समुद्रः ॥

१९१७ गाण्ड्यजगात्संज्ञायाम् । ५।२।११० ॥

ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः । गाण्डिवम् । गाण्डीवम् । अर्जुनस्य धनुः ॥ अजगवं पिनाकः ॥

१९१७–संज्ञा होनेपर गांडी और अजग शब्दके उत्तर व प्रत्यय हो । ह्रस्व और दीर्घको यण् करके तंत्रसे निर्देश हैं, जैसे–गाण्डिवम्, गाण्डीवम्, अर्जुनका धनुष । अजगवं पिनाकः ॥

१९१८ काण्डाण्डादीरन्नीरचौ । ५।२।१११ ॥

काण्डीरः । आण्डीरः ॥

१९१८–काण्ड और आण्ड शब्दके उत्तर ईरन् और ईरच् प्रत्यय हो, जैसे–काण्डीरः । आण्डीरः ॥

१९१९ रजःकृष्यासुतिपरिषदो वलच् । ५।२।११२ ॥

रजस्वला स्त्री । कृषीवलः । वल इति दीर्घः। आसुतीवलः शौण्डिकः॥ परिषद्वलः । पर्षदिति पाठान्तरम् । पर्षद्वलम् ॥ अन्येभ्योपि दृश्यते॥ ॥ * ॥ भ्रातृवलः । पुत्रवलः । शत्रुवलः । वल इत्यत्र संज्ञायामित्युनुवृत्तेर्नेह दीर्घः ॥

१९१९–रजस्, कृषि, आसुति और परिषद् शब्दके उत्तर वलच् प्रत्यय हो, जैसे–रजस्वला स्त्री । कृषीवलः, यहां वलच् प्रत्यय परे रहते "वले" इससे दीर्घ हुआ । आसुतीवलः शौंडिकः । परिषद्वलः । 'पर्षत्' ऐसा पाठान्तर भी है, इस कारण पर्षद् शब्दके उत्तर भी वलच् प्रत्यय होगा, जैसे–पर्षद्वलः ।

अन्य शब्दोंके उत्तर भी वलच् प्रत्ययका प्रयोग देखा जाता है * जैसे–भ्रातृवलः । पुत्रवलः । शत्रुवलः, "वले १०४०" इस सूत्रमें "संज्ञायाम्" इस पदकी अनुवृत्तिके कारण यहां दीर्घ नहीं हुआ ॥

१९२० दन्तशिखात्संज्ञायाम्५।२।११३।

दन्तावलो हस्ती । शिखावलः केकी ॥

१९२०–संज्ञा होनेपर दंत और शिखा शब्दके उत्तर वलच् प्रत्यय हो, जैसे–दन्तावलः, अर्थात् हस्ती । शिखावलः, अर्थात् मयूर (मोर) ॥

१९२१ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः । ५।२।११४ ॥

मत्वर्थे निपात्यन्ते । ज्योतिष उपधालोपो नश्च प्रत्ययः । ज्योत्स्ना । तमस उपधाया इत्वं रश्च, तमिस्रा । स्त्रीत्वमतन्त्रम् । तमिस्रम् । शृङ्गादिनच्, शृङ्गिणः । ऊर्जसो वलच् । तेन बाधा मा भूदिति विनिरपि । ऊर्जस्वलः । ऊर्जस्वी। ऊर्जोऽसुगागम इति वृत्तिस्तु चिन्त्या। ऊर्जस्वतीतिवदसुन्नन्तेनैवोपपत्तेः । गोशब्दान्मि-

निः, गोमी । मलशब्दादिनच्, मलिनः । ईमसच्च, मलीमसः ॥

१९२१-ज्योत्स्ना, तमिस्रा, शृङ्गिण, ऊर्जस्विन्, ऊर्जस्वल, गोमिन, मलिन और मलीमस यह शब्द मत्वर्थमें निपातनसे सिद्ध हों । ज्योतिष् शब्दकी उपधाका लोप और उसके उत्तर न प्रत्यय हो, जैसे-ज्योत्स्ना । तमस् शब्दकी उपधाके स्थानमें इकार और र प्रत्यय हो, जैसे-तमिस्रा । इस सूत्रमें स्त्रीत्व अतंत्र अर्थात् अविवक्षित है, इस कारण 'तमिस्रम्' ऐसा भी होगा ।

शृङ्ग शब्दके उत्तर इनच् प्रत्यय हो, जैसे-शृङ्गिणः ।

ऊर्ज्जस् शब्दके उत्तर वलच् प्रत्यय हो, इस(वलच्)से बाधा न हो, इसलिये विनि प्रत्ययका भी विधान कियाहै, जैसे-ऊर्ज्जस्वलः, ऊर्जस्वी । ऊर्ज्जस्वती शब्दके समान असुन्नन्तसे ही उत्पत्ति होनेके कारण ऊर्ज्ज शब्दको असुक् आगम हो, ऐसी वृत्ति चिन्त्य है ।

गो शब्दके उत्तर मिनि प्रत्यय हो, जैसे-गोमी ।

मल शब्दसे इनच् प्रत्यय हो, जैसे-मलिनः ।

मल शब्दके उत्तर ईमसच् प्रत्यय भी हो, जैसे-मलीमसः ॥

१९२२ अत इनिठनौ । ५ । २ । ११५ ॥

दण्डी । दण्डिकः ॥

१९२२-अकारान्त शब्दके उत्तर इनि और ठन् प्रत्यय हो, जैसे-दण्डी, दंडिकः ॥

१९२३ व्रीह्यादिभ्यश्च । ५ । २ । ११६ ॥

व्रीही । व्रीहिकः । न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते किं तर्हि ॥ शिखामालासंज्ञादिभ्य इनिः ॥ * ॥ यवखदादिभ्य इकः ॥*॥ अन्येभ्य उभयम् ॥

१९२३-व्रीह्यादि शब्दोंके उत्तर इनि और ठन् प्रत्यय हो, जैसे-व्रीही, व्रीहिकः । व्रीह्यादि गणके मध्यमें सबके उत्तर इनि और ठन् प्रत्यय नहीं होगा, किन्तु-

शिखा, माला और संज्ञादि (संज्ञा, वडवा, कुमारी, नौ, वीणा, बलाका,) शब्दोंके उत्तर इनि प्रत्यय हो *

यवखदादि शब्दोंके उत्तर इक प्रत्यय हो *

और इससे भिन्न और शब्दोंके उत्तर दोनों प्रत्यय हों ॥

१९२४ तुन्दादिभ्य इलच्च । ५ । २ । ११७ ॥

चादिनिठनौ मतुप् च । तुन्दिलः । तुन्दी । तुन्दिकः । तुन्दवान् । उदर, पिचण्ड, यव, व्रीहि ॥ स्वाङ्गाद्विवृद्धौ ॥ ॥ " विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः " । विवृद्धौ कर्णौ यस्य स कर्णिलः । कर्णी । कर्णिकः । कर्णवान् ॥

१९२४-तुन्दादि शब्दोंके उत्तर इलच् प्रत्यय हो और चकारसे इनि, ठन और मतुप् प्रत्यय हों, जैसे-तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान् । उदर, पिचंड, यव, व्रीहि, इतने तुन्दादि हैं ।

विवृद्धिउपाधिक स्वाङ्गवाचक शब्दोंके उत्तर इलच् आदि प्रत्यय हों, जैसे-विवृद्धौ कर्णौ यस्य सः=कर्णिलः, कर्णी, कर्णिकः, कर्णवान् ॥

१९२५ एकगोपूर्वाट्ठञ् नित्यम् । ५ । २ । ११८ ॥

एकशतमस्यास्तीति ऐकशतिकः । ऐकसहस्रिकः । गौशतिकः । गौसहस्रिकः ॥

१९२५-एक शब्द और गो शब्द पूर्वमें रहते शतादि शब्दके उत्तर नित्य ठञ् प्रत्यय हो, जैसे-एकशतमस्य अस्ति, इस विग्रहमें ऐकशतिकः । ऐकसहस्रिकः । गौशतिकः । गौसहस्रिकः ।

१९२६ शतसहस्रान्ताच्च निष्कात् । ५ । २ । ११९ ॥

निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे । नैष्कशतिकः । नैष्कसहस्रिकः ॥

१९२६-निष्क शब्दके परे स्थित शत और सहस्र शब्दान्त प्रातिपदिकके उत्तर मत्वर्थमें ठञ् प्रत्यय हो, जैसे-नैष्कशतिकः । नैष्कसहस्रिकः ॥

१९२७ रूपादाहतप्रशंसयोर्यप् । ५ । २ । १२० ॥

आहतं रूपमस्यास्तीति रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्तीति रूप्यो गौः । आहतेति किम् । रूपवान् ॥ अन्येभ्योऽपि दृश्यते ॥ * ॥ हिम्याः पर्वताः । गुण्या ब्राह्मणाः ॥

१९२७-आहत और प्रशस्त अर्थमें रूप शब्दके उत्तर यप् प्रत्यय हो, जैसे-आहतं रूपमस्यास्ति, इस वाक्यमें रूप्यः कार्षापणः । प्रशस्तं रूपमस्यास्ति, इस विग्रहमें रूप्यो गौः ।

आहत अर्थ न होनेपर 'रूपवान्' ऐसा होगा ।

और शब्दोंके उत्तर भी देखा जाताहै * जैसे-हिम्याः पर्वताः । गुण्याः ब्राह्मणाः ॥

१९२८ अस्मायामेधास्रजो विनिः । ५ । २ । १२१ ॥

यशस्वी । यशस्वान् । मायावी । व्रीह्यादिपाठादिनिठनौ । मायी । मायिकः । किन्नन्तत्वात्कुः । स्रग्वी ॥ आमयस्योपसंख्यानं दीर्घश्च ॥ * ॥ आमयावी ॥ शृङ्गवृन्दाभ्यामारकन् ॥ शृङ्गारकः । वृन्दारकः । फलबर्हाभ्यामिनच् ॥ * ॥ फलिनः । बर्हिणः ॥

हृदयाच्चालुरन्यतरस्याम् ॥ * ॥ इनठनौ मतुप् च । हृदयालुः । हृदयी । हृदयिकः । हृदयवान् । शीतोष्णतृप्रेभ्यस्तदसहने ॥ * ॥ शीतं न सहते शीतालुः । उष्णालुः । स्फायितंचीति रक्,तृप्रः पुरोडाशः, तं न सहते तृप्रालुः । तृप्रं दुःखमिति माधवः ॥ हिमाच्चेलुः ॥ * ॥ हिमं न सहते हिमेलुः ॥ बलादूलः ॥ * ॥ बलं न सहते बलूलः । वातात्समूहे च ॥ * ॥ वातं न सहते वातस्य समूहो वा वातूलः ॥ तप्पर्वमरुद्भ्याम् ॥ * ॥ पर्वतः । मरुत्तः ॥

१९२८–असभागान्त शब्द और माया, मेधा और स्रज् शब्दके उत्तर विनि प्रत्यय हो, जैसे–यशस्वी, यशस्वान् । मायावी । व्रीह्यादिगणमें पाठके कारण इनि और ठन् प्रत्यय भी होगा, जैसे–मायी, मायिकः । किन्नन्तत्वके कारण चवर्गके स्थानमें कवर्ग हुआ, जैसे–स्रग्वी ।

आमय शब्दके उत्तर उक्त प्रत्ययका उपसंख्यान और दीर्घ हो * जैसे–आमयावी ।

शृङ्ग और वृन्द शब्दके उत्तर आरकन् प्रत्यय हो * जैसे–शृङ्गारकः । वृन्दारकः ।

फल और बर्ह शब्दके उत्तर इनच् प्रत्यय हो * जैसे–फलिनः । बर्हिणः ।

हृदय शब्दके उत्तर विकल्प करके आलु और चकारसे मतुप् प्रत्यय हो * विकल्प पक्षमें इनि और ठन् होगा, जैसे–हृदयालुः, हृदयी, हृदयिकः, हृदयवान् ।

असहन अर्थमें शीत,उष्ण और तृप्र शब्दके उत्तर आलु प्रत्यय हो * जैसे–शीतं न सहते=शीतालुः। उष्णालुः। "स्फायीतञ्चि०"इस सूत्रसे तृप्र शब्द सिद्ध हुआ। तृप्र शब्दसे पुरोडाश जानना, तृप्रं न सहते, इस वाक्यमें तृप्रालुः । माधवके मतमें तृप्र शब्दसे दुःख जानना ।

हिम शब्दके उत्तर एलु प्रत्यय हो * जैसे–हिमं न सहते हिमेलुः ।

बल शब्दके उत्तर समूहार्थमें भी ऊल प्रत्यय हो * जैसे–बलं न सहते=बलूलः ।

वात शब्दके उत्तर समूहार्थमें तथा चकारसे असहन अर्थमें ऊल प्रत्यय हो * जैसे–वातं न सहते,=वातस्य समूहो वा=वातूलः ।

पर्व और मरुत् शब्दके उत्तर तप् प्रत्यय हो * जैसे–पर्वतः । मरुत्तः ॥

१९२९ ऊर्णाया युस् । ५ ।२।१२३ ॥

सित्वात्पदत्वम् । ऊर्णायुः । अत्र छन्दसीति केचिदनुवर्तयन्ति । युक्तं चैतत् । अन्यथा हि, अहंशुभमोरित्यत्रैवोर्णाग्रहणं कुर्यात् ॥

१९२९–ऊर्णा शब्दके उत्तर युस् प्रत्यय हो, जिसके उत्तर सकारइत् प्रत्यय हो, उसकी पद संज्ञा होतीहै । ऊर्णायुः इस स्थलमें कोई कोई " बहुलं छन्दसि " इस सूत्रसे ' छन्दसि ' इस पदकी अनुवृत्ति करतेहैं यह ठीक है, कारण कि,यह न होनेपर पृथक् सूत्र नहीं करनेसे तथा युस्ग्रहण नहीं करनेसे महालाघवके कारण १९४६ (' अहम् ' और 'शुभ' शब्दके उत्तर युस् प्रत्यय हो) इस वक्ष्यमाण सूत्रमें ही ऊर्णा शब्दका ग्रहण करते ॥

१९३० वाचो ग्मिनिः । ५।२ । १२४॥

वाग्मी ॥

१९३०–वाच् शब्दके उत्तर ग्मिनि प्रत्यय हो, जैसे–वाग्मी ॥

१९३१ आलजाटचौ बहुभाषिणि । ५ । २ । १२५ ॥

कुत्सित इति वक्तव्यम् ॥ * ॥ कुत्सितं बहु भाषते वाचालः । वाचाटः। यस्तु सम्यग्बहु भाषते स वाग्मीत्येव ॥

१९३१–बहुभाषी अर्थ होनेपर वाच् शब्दके उत्तर आलच् और आटच् प्रत्यय हो ।

कुत्सित अर्थ होनेपर उक्त प्रत्यय हों,ऐसा कहना चाहिये* जैसे–कुत्सितं बहु भाषते, इस अर्थमें वाचालः । वाचाटः । अच्छी तरह बहुत बोलनेवाले मनुष्यको ' वाग्मी ' कहतेहैं ॥

१९३२ स्वामिन्नैश्वर्ये । ५ । २ ।१२६॥

ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच् । स्वामी ॥

१९३२–ऐश्वर्यवाचक स्व शब्दके उत्तर मत्वर्थमें आमिनच् प्रत्यय हो, जैसे–स्वामी ॥

१९३३ अर्शआदिभ्योऽच् ।५।२।१२७॥

अर्शांस्यस्य विद्यन्ते अर्शसः।आकृतिगणोऽयम्॥

१९३३–अर्शआदि शब्दके उत्तर मत्वर्थमें अच् प्रत्यय हो, जैसे–अर्शांस्यस्य विद्यन्ते,इस वाक्यमें अर्शसः । अर्शआदि आकृतिगण है ॥

१९३४ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । ५ । २ । १२८ ॥

द्वन्द्वः–कटकवलयिनी । शङ्खनूपुरिणी । उपतापो रोगः–कुष्ठी । किलासी।गर्ह्यं निन्द्यम्–ककुदावर्ती । काकतालुकी । प्राणिस्थात्किम् । पुष्पफलवान् घटः ॥ प्राण्यङ्गान्न ॥ * ॥ पाणिपादवती । अत इत्येव । चित्रकललाटिकावती । सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ॥

१९३४–प्राणिस्थ अर्थात् प्राणीमें है, ऐसे अर्थमें द्वन्द्व समासनिष्पन्न शब्द, उपतापवाचक शब्द और गर्ह्य अर्थात् निन्द्यवाचक शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो ।

द्वन्द्व जैसे–कटकवलयिनी । शंखनूपुरिणी ।

उपताप शब्दसे रोग जानना, जैसे–कुष्ठी । किलासी ।

गर्ह्य शब्दसे निन्द्य जानना, जैसे—ककुदावर्ती । काकु-तालुकी ।

प्राणिस्थ न होनेपर जैसे--पुष्पफलवान् घटः ।

प्राण्यङ्गवाचकके उत्तर नहीं हो * जैसे--पाणिपादवती ।

आकारके उत्तर नहीं होगा, जैसे--चित्रकललाटिकावती ।

प्रत्ययके सिद्ध होनेपर पुनः कथन ठनादि प्रत्ययके बाधनार्थ है ॥

१९३५ वातातीसाराभ्यां कुक् च । ५ । २ । १२९ ॥

चादिनिः । वातकी । अतीसारकी ॥ रोगे चायमिष्यते ॥ * ॥ नेह । वातवती गुहा । पिशाचाच्च ॥ * ॥ पिशाचकी ॥

१९३५-वात और अतीसार शब्दके उत्तर कुक् और इनि प्रत्यय हो, जैसे--वातकी । अतीसारकी ।

रोगार्थमें ही उक्त कार्य्य हो * इससे रोग न होनेपर वातवती, अर्थात् 'गुफा' इस स्थलमें कुक् आदि प्रत्यय नहीं हुआ ।

पिशाच शब्दके उत्तर कुक् आदि प्रत्यय हो, जैसे--पिशाचकी ॥

१९३६ वयसि पूरणात् ।५।२। १३० ॥

पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्याद्वयसि द्योत्ये । मासः संवत्सरो वा पञ्चमोऽस्यास्तीति पञ्चमी उष्ट्रः । ठन्बाधनार्थमिदम् । वयसि किम् । पञ्चमवान् ग्रामः ॥

१९३६-वयःक्रम होनेपर पूरणप्रत्ययान्त शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो, जैसे—मासः, संवत्सरो वा, पञ्चमोऽस्यास्तीति=पञ्चमी उष्ट्रः । यह सूत्र ठन् प्रत्ययके बाधनार्थ है ।

वयस् न होनेपर जैसे—पञ्चमवान् ग्रामः ॥

१९३७ सुखादिभ्यश्च ।५। २ । १३१ ॥

इनिर्मत्वर्थे । सुखी । दुःखी॥ माला क्षेपे ॥ ॥ माली ॥

१९३७-सुखादि शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो, जैसे—सुखी । दुःखी ।

माला शब्दके उत्तर क्षेप अर्थमें इनि प्रत्यय हो, जैसे--माली ॥

१९३८ धर्मशीलवर्णान्ताच्च।५।२।१३२॥

धर्माद्यन्तादिनिर्मत्वर्थे । ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी ॥

१९३८-धर्म, शील और वर्णान्त शब्दके उत्तर इनि प्रत्यय हो,जैसे—ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी॥

१९३९ हस्ताज्जातौ । ५ । २ । १३३ ॥

हस्ती । जातौ किम् । हस्तवान्पुरुषः ॥

१९३९-जाति अर्थमें हस्त शब्दके उत्तर इनि प्रत्यय हो, जैसे—हस्ती । जाति न होनेपर हस्तवान् पुरुषः ॥

१९४० वर्णाद्ब्रह्मचारिणि ।५।२।१३४॥

वर्णी ॥

१९४०-ब्रह्मचारी अर्थ होनेपर वर्ण शब्दके उत्तर इनि प्रत्यय हो, जैसे—वर्णी ॥

१९४१ पुष्करादिभ्यो देशे।५।२।१३५॥

पुष्करिणी । पद्मिनी । देशे किम् । पुष्करवान् करी ॥ बाहूरुपूर्वपदाद्बलात् ॥ ॥ बाहुबली । ऊरुबली ॥ सर्वादेश्च ॥ ॥ सर्वधनी । सर्वबीजी ॥ अर्थाच्चासन्निहिते ॥ ॥ अर्थी । सन्निहिते तु अर्थवान् ॥ तदन्ताच्च ॥ ॥ धान्यार्थी । हिरण्यार्थी ॥

१९४१-देश होनेपर पुष्करादिके उत्तर इनि प्रत्यय हो, जैसे—पुष्करिणी । पद्मिनी । देश न होनेपर पुष्करवान् करी ।

बाहु और ऊरु शब्द पूर्वमें रहते उसके परवर्ती बल शब्दके उत्तर इनि प्रत्यय हो * जैसे—बाहुबली । ऊरुबली ।

सर्व शब्द पूर्वमें रहते इनि प्रत्यय हो * जैसे—सर्वधनी । सर्वबीजी ।

असन्निहितार्थमें अर्थ शब्दके उत्तर इनि प्रत्यय हो, जैसे—अर्थी । सन्निहितार्थमें 'अर्थवान्' ऐसा पद होगा ।

अर्थ शब्द अन्तमें रहते उसके उत्तर इनि प्रत्यय हो, जैसे—धान्यार्थी । हिरण्यार्थी ॥

१९४२ बलादिभ्यो मतुबन्यतरस्याम् । ५ । २ । १३६ ॥

बलवान् । बली । उत्साहवान् । उत्साही ॥

१९४२-बलादि शब्दके उत्तर विकल्प करके मतुप प्रत्यय हो, जैसे—बलवान्, बली । उत्साहवान्, उत्साही ॥

१९४३ संज्ञायां मन्माभ्याम्।५।२।१३७॥

मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञायां किम् । सोमवान् ॥

१९४३-मन्भागान्त शब्द और मान्त शब्दके उत्तर मत्वर्थमें इनि प्रत्यय हो, जैसे—प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञा न होनेपर 'सोमवान्' होगा ॥

१९४४ कंशंभ्यां बभयुस्तितुतयसः । ५ । २ । १३८ ॥

कं शमिति मान्तौ, कमित्युदकसुखयोः, शमिति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युस्यसोः सकारः पदत्वार्थः । कंवः । कंभः।कंयुः । कंतिः । कंतुः । कंतः । कंयः । शंवः । शंभः ।

शंयुः । शंतिः । शंतुः । शंतः । शंयः । अनुस्वारस्य वैकल्पिकः परसवर्णः । वकारयकारपरस्यानुनासिकौ वयौ ॥

१९४४-कम् और शंम् शब्दके उत्तर ब, भ, युस्, ति, तु, त, यस्,यह सात प्रत्यय हों। कम् और शम्,यह दो पद मकारान्त हैं। कम् शब्दसे जल और शम् शब्दसे सुख जानना। युस् और यस् प्रत्ययके सकार पदत्वके कारण हैं। कँवः, कम्भः, कँयुः, कन्तिः, कन्तुः, कन्तः, कँयः। शंवः, शम्भः, शंयुः, शन्तिः, शन्तुः, शन्तः, शंयः। अनुस्वारको वैकल्पिक परसवर्ण होगा, वकार और यकार परे रहते व और य अनुनासिक होगा ॥

१९४५ तुन्दिबलिवटेर्भः । ५।२।१३९॥

वृद्धा नाभिस्तुन्दिः। मूर्धन्योपधोयमिति माधवः । तुन्दिभः । बलिभः । वटिभः । पामादित्वाद् बलिनोपि ॥

१९४५-तुन्दि, बलि और वटि शब्दके उत्तर भ प्रत्यय हो, वृद्ध नाभिको तुन्दि कहतेहैं, माधवके मतमें यह पद मूर्द्धन्योपध है, जैसे-तुन्दिभः । बलिभः । वटिभः । पामादित्वके कारण 'बलिनः' ऐसा पद भी होगा ॥

१९४६ अहंशुभमोर्युस् । ५ । २।१४०॥

अहमिति मान्तमव्ययमहंकारे । शुभमिति शुभे । अहंयुः अहंकारवान्। शुभंयुः शुभान्वितः॥

॥ इति मत्वर्थीयाः ॥

१९४६-'अहम्' और 'शुभम्' के उत्तर युस् प्रत्यय हो, 'अहम्' शब्द मकारान्त अहङ्कारबोधक अव्यय है, 'शुभम्' शब्दसे शुभ जानना, जैसे-अहंयुः अहंकारवान्। शुभंयुः शुभान्वितः ॥

॥ इति मत्वर्थीयप्रकरणम् ॥

अथ प्राग्दिशीयप्रकरणम् ।

१९४७ प्राग्दिशो विभक्तिः । ५ । ३।१॥

दिक्छब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः । अथ स्वार्थिकाः प्रत्ययाः । समर्थानामिति प्रथमादिति च निवृत्तम् । वेति त्वनुवर्तत एव ॥

१९४७-"दिक्छब्देभ्यः० १९७४"इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त वक्ष्यमाणप्रत्ययसमूहोंकी विभक्ति संज्ञा हो। अब स्वार्थिक प्रत्यय कहतेहैं ॥

"समर्थानां प्रथमाद्वा" इस पूर्वोक्त सूत्रका अधिकार निवृत्त हुआ, परन्तु वा शब्दकी अनुवृत्ति तो चलेगी ॥

१९४८ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । ५ । ३ । २ ॥

किमः सर्वनाम्नो बहुशब्दाच्चेति: प्राग्दिशोऽधिक्रियते ॥

१९४८-'द्विआदि भिन्न किम् शब्द,सर्वनाम शब्द और बहु शब्दके उत्तर "प्राग्दिशः०" इस सूत्रतक अधिकार चलेगा ॥

१९४९ इदम इश् । ५ । ३ । ३ ॥

प्राग्दिशीये परे ॥

१९४९-प्राग्दिशीय प्रत्यय परे रहते इदम् शब्दके स्थानमें इश् आदेश हो ॥

१९५० एतेतौ रथोः । ५ । ३ । ४ ॥

इदम्शब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । इशोपवादः ॥

१९५०-रेफादि और थकारादि प्राग्दिशीय प्रत्यय परे रहते इदम् शब्दके स्थानमें स्वार्थमें एत और इत आदेश हो। इस सूत्रमें एत और इत आदेश ईश् आदेशके विशेषक हैं ॥

१९५१ एतदोऽन् । ५ । ३ । ५ ॥

योगविभागः कर्तव्यः । एतदः एतेतौ स्तो रथोः । अन् एतद इत्येव । अनेकाल्त्वात्सर्वादेशः । न लोपः प्रातिपदिकान्तस्य ॥

१९५१-इस स्थलमें योगविभाग कर्तव्य हैं अर्थात् रेफादि और थकारादि प्राग्दिशीय प्रत्यय परे रहते एतद् शब्दके स्थानमें एत् और इत आदेश हो, यह "एतदः"इसका अर्थ करना। एतद् शब्दको अन् आदेश हो यह द्वितीय योग (अन्) का अर्थ करना। अनेकाल्त्वके कारण सर्वादेश होगा। प्रातिपदिकके अन्तस्थित (२३६) नकारका लोप होगा ॥

१९५२ सर्वस्य सोऽन्यतरस्यां दि । ५ । ३ । ६ ॥

प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात् ॥

१९५२-दकारादि प्राग्दिशीय प्रत्यय परे रहते सर्व शब्दके स्थानमें विकल्प करके स आदेश हो ॥

१९५३ पञ्चम्यास्तसिल् । ५ । ३ । ७॥

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् स्याद्वा ॥

१९५३-पञ्चमीविभक्त्यन्त किमादि शब्दोंके उत्तर स्वार्थमें विकल्पसे तसिल् प्रत्यय हो ॥

१९५४ कु तिहोः । ७ । २ । १०४ ॥

किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः । कस्मात् । यतः । ततः । अतः । इतः । अमुतः । बहुतः । द्व्यादेस्तु द्वाभ्याम् ॥

१९५४-तकारादि और हकारादि प्राग्दिशीय तद्धित प्रत्यय परे रहते किम् शब्दके स्थानमें कु आदेश हो, जैसे-कुतः । कस्मात् । यतः । ततः । अतः । इतः । अमुतः । बहुतः । द्विआदि होनेपर द्वाभ्याम् ॥

१९५५ तसेश्च । ५ । ३ । ८ ॥

किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात् । स्वरार्थं विभक्त्यर्थं च वचनम् ॥

१९५५-किम् शब्द, सर्वनाम शब्द और बहु शब्दके उत्तर तसिके स्थानमें तसिल् आदेश हो । यह सूत्र स्वरार्थ और विभक्त्यर्थ है ॥

१९५६ पर्यभिभ्यां च । ५ । ३ । ९ ॥

आभ्यां तसिल् स्यात्।सर्वोभयार्थाभ्यामेव॥*॥ परितः । सर्वत इत्यर्थः।अभितः उभयत इत्यर्थः॥

१९५६-परि और अभि शब्दके उत्तर स्वार्थमें तसिल् प्रत्यय हो ।

सर्वार्थ तथा उभयार्थमें ही यथाक्रम उक्त दोनों शब्दोंसे प्रत्यय हो*जैसे-परितः, सर्वत इत्यर्थः।अभितः, उभयत इत्यर्थः ॥

१९५७ सप्तम्यास्त्रल् । ५ । ३ । १० ॥

कुत्र । यत्र । तत्र । बहुत्र ॥

१९५७-सप्तमीविभक्त्यन्त किमादि शब्दोंके उत्तर स्वार्थमें त्रल् प्रत्यय हो, जैसे-कस्मिन्निति=कुत्र । यत्र । तत्र । बहुत्र ॥

१९५८ इदमो हः । ५ । ३ । ११ ॥

त्रलोपवादः । इशादेशः । इह ॥

१९५८-इदम् शब्दके उत्तर स्वार्थमें ह प्रत्यय हो, यह ह प्रत्यय त्रल् प्रत्ययका अपवाद है, १९४९ सूत्रसे इदम् शब्दके स्थानमें इश् आदेश हुआ, जैसे-अस्मिन्निति=इह ॥

१९५९ किमोऽत् । ५ । ३ । १२ ॥

वाग्रहणमपकृष्यते । सप्तम्यन्तात्किमोऽद्वा स्यात्पक्षे त्रल् ॥

१९५९-इस सूत्रमें वा शब्दकी अनुवृत्ति होतीहै, सप्तम्यन्त किम् शब्दके उत्तर विकल्प करके स्वार्थमें अत् प्रत्यय हो । विकल्प पक्षमें त्रल् प्रत्यय होगा ॥

१९६० क्वाति । ७ । २ । १०५ ॥

किमः क्वादेशः स्यादति । क्व । कुत्र ॥

१९६०-अत् प्रत्यय परे रहते किम् शब्दके स्थानमें क्व आदेश हो, जैसे-कस्मिन्निति=क्व, कुत्र ॥

१९६१ वाह च च्छन्दसि ।५।३।१३ ॥

कुहस्थः । कुह जग्मथुः ॥

१९६१-वेदमें किम् शब्दके उत्तर विकल्प करके स्वार्थमें ह प्रत्यय हो, जैसे-कुहस्थः । कुह जग्मथुः ॥

१९६२ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ । २ । ४ । ३३ ॥

अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतः, तौ चानुदात्तौ स्तः । एतस्मिन् ग्रामे सुखं वसामः, अथात्राधीमहे, अतो न गन्तास्मः ॥

१९६२-त्रल् और तस् प्रत्यय परे रहते अन्वादेशविषयमें एतद् शब्दके स्थानमें अश् आदेश हो, यह अश्, त्र और तस् परे अनुदात्त हो, जैसे-एतस्मिन् ग्रामे सुखं वसामः, अथात्राधीमहे, अतो न गन्तास्मः ॥

१९६३ इतराभ्योऽपि दृश्यन्ते । ५ । ३ । १४ ॥

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणाद्भवदादियोग एव । स भवान् । ततो भवान् । तत्र भवान् । तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । एवं दीर्घायुः । देवानां प्रियः । आयुष्मान् ॥

१९६३-पञ्चमी और सप्तमीविभक्त्यन्तसे अन्यविभक्त्यन्तके उत्तर भी तसिलादि प्रत्यय हों ।

दृशिका ग्रहण करनेके कारण भवत् आदिके योगमें ही उक्त प्रत्यय होगा ,

जैसे-स भवान्=ततो भवान्, तत्र भवान् । तं भवन्तम्= ततो भवन्तम्, तत्र भवन्तम् । भवदादि जैसे-भवत्, दीर्घायुः, देवानांप्रियः, आयुष्मान् ॥

१९६४ सर्वैकान्यकिंयत्तदः काले दा । ५ । ३ । १५ ॥

सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् । सर्वस्मिन् काले सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले किम् । सर्वत्र देशे ॥

१९६४-सप्तम्यन्त कालवाचक सर्व, एक, अन्य, किम्, यत् और तत् शब्दके उत्तर स्वार्थमें दा प्रत्यय हो, जैसे-सर्वस्मिन् काले सदा, सर्वदा । एकदा । अन्यदा । कदा । तदा ।

कालवाचक न होनेपर अर्थात् देशवाचक होनेपर दा प्रत्यय न होकर त्रल् प्रत्यय होगा, जैसे-सर्वस्मिन् देशे= सर्वत्र-इत्यादि ॥

१९६५ इदमो र्हिल् । ५ । ३ । १६ ॥

सप्तम्यन्तात्काले इत्येव । हस्यापवादः । अस्मिन् काले एतर्हि । काले किम् । इह देशे ॥

१९६५-सप्तम्यन्त कालवाचक इदम् शब्दके उत्तर र्हिल् प्रत्यय हो, यह र्हिल् प्रत्यय, ह प्रत्ययका विशेषक है, जैसे-एतस्मिन् काले=एतर्हि ।

कालवाचक न होकर देशवाचक होनेपर ह प्रत्यय होगा, जैसे-अस्मिन् देशे=इह ॥

१९६६ अधुना । ५ । ३ । १७ ॥

इदमः सप्तम्यन्तात्कालवाचिनः । स्वार्थेऽधुना प्रत्ययः स्यात् । इश् । यस्येति लोपः । अधुना॥

१९६६-सप्तम्यन्त कालवाचक इदम् शब्दके उत्तर स्वार्थमें अधुना प्रत्यय हो, जैसे-अस्मिन् काले=अधुना । इश् आदेश होनेपर यस्येति (३११) से इकारका लोप हुआ ॥

१९६७ दानीं च। ५। ३। १८॥

इदानीम्॥

१९६७–सप्तम्यन्त कालवाचक इदम् शब्दके उत्तर स्वार्थमें दानीम् प्रत्यय हो, जैसे–अस्मिन्काले=इदानीम्॥

१९६८ तदो दा च। ५। ३। १९॥

तदा। तदानीम्। तदो दावचनमनर्थकं विहितत्वात्॥

१९६८–सप्तम्यन्त कालवाचक तद् शब्दके उत्तर स्वार्थमें दा और दानीम् प्रत्यय हो, यथा–तस्मिन्काले=तदा, तदानीम्। इस सूत्रसे दा प्रत्ययका विधान करना निरर्थक है, क्योंकि पहले सूत्र (१९६४) से ही दा प्रत्यय सिद्ध है॥

१९६९ अनद्यतने र्हिलन्यतरस्याम्। ५। ३। २१॥

कर्हि। कदा। यर्हि। यदा। तर्हि। तदा। एतस्मिन् काले एतर्हि॥

१९६९–अनद्यतनमें सप्तम्यन्त किमादि शब्दों (किम्, यत्, तत्) के उत्तर विकल्प करके स्वार्थमें र्हिल् प्रत्यय हो, जैसे–कस्मिन्काले कर्हि, कदा। यर्हि, यदा। तर्हि, तदा। एतस्मिन् काले=एतर्हि॥

१९७० सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। ५।३।२२॥

एते निपात्यन्ते॥ समानस्य सभावो द्यस् चाहनि॥ *॥ समानेऽहनि सद्यः॥ पूर्वपूर्वतरयोः पर उदारी च संवत्सरे॥ *॥ पूर्वस्मिन्वत्सरे परुत्। पूर्वतरे वत्सरे परारि॥ इदम इश् समसण् प्रत्ययश्च संवत्सरे॥*॥ अस्मिन्संवत्सरे ऐषमः॥ परस्मादेद्यव्यहनि॥*॥ परस्मिन्नहनि परेद्यवि॥ इदमोऽश् द्यश्च॥*॥ अस्मिन्नहनि अद्य॥ पूर्वादिभ्योऽष्टभ्योऽहन्येद्युस्॥ पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः॥ द्युश्चोभयाद्वक्तव्यः॥ *॥ उभयद्युः॥

१९७०–कालार्थमें सद्यः आदि पद निपातनसे सिद्ध हो।

'समानेऽहनि' इस अर्थमें समान शब्दके स्थानमें स आदेश और द्यस् प्रत्यय हो * जैसे समाने अहनि=सद्यः।

संवत्सरार्थमें पूर्व और पूर्वतर शब्दको पर आदेश और उनके उत्तर उत् और आरि प्रत्यय हो * जैसे–पूर्वस्मिन् संवत्सरे=परुत्। पूर्वतरे वत्सरे=परारि।

संवत्सरार्थमें सप्तम्यन्त इदम् शब्दके स्थानमें इश् आदेश और समसण् प्रत्यय हो * जैसे–अस्मिन् संवत्सरे=ऐषमः।

सप्तम्यन्त पर शब्दके उत्तर अहन् अर्थमें एद्यवि प्रत्यय हो * जैसे–परस्मिन् अहनि=परेद्यवि।

दिन होनेपर सप्तम्यन्त इदम् शब्दके स्थानमें अश् और द्य प्रत्यय हो * जैसे–अस्मिन् अहनि=अद्य।

'अहनि' अर्थमें पूर्वादि शब्दोंके उत्तर एद्युस् प्रत्यय हो * जैसे–पूर्वस्मिन् अहनि=पूर्वेद्युः। अन्यस्मिन् अहनि=अन्येद्युः। उभयोरह्नोः=उभयेद्युः। उभय शब्दके उत्तर द्युस् प्रत्यय भी हो, जैसे–उभयद्युः॥

१९७१ प्रकारवचने थाल्। ५।३।२३॥

प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात्स्वार्थे। तेन प्रकारेण तथा। यथा॥

१९७१–प्रकारवृत्तिवाचक किम् आदि शब्दोंके उत्तर स्वार्थमें थाल् प्रत्यय हो, जैसे–तेन प्रकारेण=तथा। येन प्रकारेण=यथा॥

१९७२ इदमस्थमुः। ५। ३। २४॥

थालोऽपवादः॥ एतदो वाच्यः॥*॥ अनेन एतेन वा प्रकारेण इत्थम्॥

॥ इति प्राग्दिशीयानां विभक्तिसंज्ञानां पूर्णोवधिः॥

१९७२–इदम् शब्दके उत्तर प्रकारार्थमें थमु प्रत्यय हो, यह थमु प्रत्यय थाल् प्रत्ययका अपवाद है।

एतद् शब्दके उत्तर भी थमु प्रत्यय हो * जैसे–अनेन, एतेन वा प्रकारेण=इत्थम्॥

१९७३ किमश्च। ५। ३। २५॥

केन प्रकारेण कथम्॥

१९७३–किम् शब्दके उत्तर प्रकारार्थमें थमु प्रत्यय हो, जैसे–केन प्रकारेण=कथम्॥

॥ इति प्राग्दिशीयप्रकरणम्॥

अथ प्रागिवीयप्रकरणम्।

१९७४ दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। ५। ३। २७॥

सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्ययः स्यात्॥

१९७४–सप्तमी, पञ्चमी और प्रथमा विभक्त्यन्त दिक् अर्थमें रूढ़ इसी प्रकार दिक्, देश और कालवाचक शब्दके उत्तर स्वार्थमें अस्ताति प्रत्यय हो॥

१९७५ पूर्वाधरावराणामसि पुरधवश्चैषाम्। ५। ३। ३९॥

एभ्योऽस्तात्यर्थेऽसिप्रत्ययः स्यात्तद्योगे चैषां क्रमात्पुर्, अध्, अव्, इत्यादेशाः स्युः॥

१९७५–पूर्व, अधर और अवर शब्दके उत्तर अस्तातिके अर्थमें असि प्रत्यय हो और उसके योगमें यथाक्रम पूर्व

शब्दके स्थानमें पुर्, अधर शब्दके स्थानमें अध् और अवर शब्दके स्थानमें अव् आदेश हो ॥

१९७६ अस्ताति च । ५ । ३ । ४० ॥

अस्तातौ परे पूर्वादीनां पुरादयः स्युः । पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्, पुरः । पुरस्तात् । अधः । अधस्तात् । अवः । अवस्तात् ॥

१९७६-अस्ताति प्रत्यय परे रहते पूर्वादि शब्दके स्थानमें पुर्, अध् और अव् आदेश हो, जैसे-पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्, इस विग्रहमें पुरः, पुरस्तात् । अधः, अधस्तात् । अवः, अवस्तात् ॥

१९७७ विभाषाऽवरस्य । ५ । ३ । ४१ ॥

अवरस्यास्तातौ परेऽव् स्याद्वा । अवस्तात् । अवरस्तात् । एवं देशे काले च । दिशि रूढेभ्यः किम् । ऐन्द्र्यां वसति । सप्तम्याद्यन्तेभ्यः किम् । पूर्वं ग्रामं गतः । दिगादिवृत्तिभ्यः किम् । पूर्वस्मिन् गुरौ वसति । अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते ॥

१९७७-अस्ताति प्रत्यय परे रहते अवर शब्दके स्थानमें विकल्प करके अव् आदेश हो, जैसे-अवस्तात्, अवरस्तात् । देश और कालविषयमें भी ऐसा होगा ।

दिक् अर्थमें रूढ न होनेपर जैसे-ऐन्द्र्यां वसति ।

सप्तमी, पंचमी और प्रथमान्त न होनेपर जैसे-पूर्वं ग्रामं गतः ।

दिक् आदि वाचक न होनेपर जैसे-पूर्वस्मिन् गुरौ वसति । "अस्ताति च" इस ज्ञापकके कारण असि प्रत्यय अस्ताति प्रत्ययको बाधा नहीं देता ॥

१९७८ दक्षिणोत्तराभ्यामतसुच् । ५ । ३ । २८ ॥

अस्तातेरपवादः । दक्षिणतः । उत्तरतः ॥

१९७८-दक्षिण और उत्तर शब्दके उत्तर अतसुच् प्रत्यय हो, यह अतसुच् प्रत्यय अस्ताति प्रत्ययका अपवाद है, जैसे-दक्षिणतः । उत्तरतः ॥

१९७९ विभाषा पराऽवराभ्याम् । ५ । ३ । २९ ॥

परतः । अवरतः । परस्तात् । अवरस्तात् ॥

१९७९-पर और अवर शब्दके उत्तर विकल्प करके अतसुच् प्रत्यय हो, जैसे-परतः । अवरतः । परस्तात् । अवरस्तात् । इस प्रकार पद होंगे ॥

१९८० अञ्चेर्लुक् । ५ । ३ । ३० ॥

अञ्चत्यन्ताद्दिक्शब्दादस्तातेर्लुक् स्यात् । लुक् तद्धितलुकि । प्राच्यां प्राच्याः प्राची वा दिक् प्राक् । उदक् । एवं देशे काले च ॥

१९८०-अञ्च् धातु अन्तमें है जिसके ऐसे दिग्वाचक शब्दके उत्तर अस्ताति प्रत्ययका लुक् हो, "लुक् तद्धित०" इस सूत्रसे स्त्रीप्रत्ययका लुक् होगा, जैसे-प्राच्यां प्राच्याः प्राची वा दिक्, इस विग्रहमें प्राक्, उदक् । देश और कालवाचकका भी इसी प्रकार जानना ॥

१९८१ उपर्युपरिष्टात् । ५ । ३ । ३१ ॥

अस्तातेर्विषये ऊर्ध्वशब्दस्योपादेशः स्याद्रिलरिष्टातिलौ च प्रत्ययौ ॥ उपरि उपरिष्टाद्वा वसति आगतो रमणीयं वा ॥

१९८१-अस्ताति विषयमें ऊर्ध्व शब्दके स्थानमें उप आदेश हो और उसके उत्तर रिल् और रिष्टातिल् प्रत्यय भी हों, जैसे-उपरि, उपरिष्टात् वा वसति आगतो रमणीयं वा ॥

१९८२ पश्चात् । ५ । ३ । ३२ ॥

अपरस्य पश्चभावः आतिश्च प्रत्ययोस्तातेर्विषये॥

१९८२-अस्तातिविषयमें अपर शब्दके स्थानमें पश्च आदेश हो और उसके उत्तर आति प्रत्यय हो, यथा-अपरस्यां दिशि वसति=पश्चाद्वसति ॥

१९८३ उत्तराधरदक्षिणादातिः ५।३।३४॥

उत्तरात् । अधरात् । दक्षिणात् ॥

१९८३-अस्तातिविषयमें उत्तर, अधर और दक्षिण शब्दके उत्तर आति प्रत्यय हो, जैसे-उत्तरस्यां दिशि वसति= उत्तरात् । अधरात् । दक्षिणात् ॥

१९८४ एनबन्यतरस्यामदूरेऽपञ्चम्याः । ५ । ३ । ३५ ॥

उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये पञ्चम्यन्तं विना । उत्तरेण । अधरेण । दक्षिणेन । पक्षे यथास्वं प्रत्ययाः । इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनपमाहुः । पूर्वेण ग्रामम् । अपरेण ग्रामम् ॥

१९८४-अवधि और अवधियुक्त वस्तुके सामीप्यमें उत्तरादि शब्दोंके उत्तर विकल्प करके एनप् प्रत्यय हो, परंतु पञ्चम्यन्तके उत्तर न हो, जैसे-उत्तरस्यां दिशि वसति=उत्तरेण वसति । दक्षिणेन । विकल्पपक्षमें यथायोग्य प्रत्यय होंगे । यहां कोई उत्तरादिकी अनुवृत्ति न करके दिक्शब्दमात्रसे एनप् प्रत्ययका विधान करतेहैं, यथा-पूर्वेण ग्रामम् । अपरेण ग्रामम् ॥

१९८५ दक्षिणादाच् । ५ । ३ । ३६ ॥

अस्तातेर्विषये । दक्षिणा वसति । अपञ्चम्या इत्येव । दक्षिणादागतः ॥

१९८५-अस्तातिविषयमें दक्षिण शब्दके उत्तर आच् प्रत्यय हो, जैसे-दक्षिणा वसति । पञ्चम्यन्तके उत्तर न हो, जैसे-दक्षिणात् आगतः, इस स्थलमें नहीं हुआ ॥

१९८६ आहि च दूरे । ५ । ३ । ३७ ॥

दक्षिणाद् दूरे आहिः स्यात् चादाच् । दक्षिणाहि । दक्षिणा ॥

१९८६–दूरार्थमें दक्षिण शब्दके उत्तर आहि और आच् प्रत्यय हो, जैसे–दक्षिणाहि वसति, दक्षिणा वसति ॥

१९८७ उत्तराच्च । ५ । ३ । ३८ ॥

उत्तराहि । उत्तरा ॥

१९८७–दूरार्थमें उत्तर शब्दके उत्तर आहि और आच् प्रत्यय हो, जैसे–उत्तराहि, उत्तरा ॥

१९८८संख्याया विधार्थे धा।५।३।४२॥

क्रियाप्रकारार्थे वर्तमानात्संख्याशब्दात्स्वार्थे धा स्यात् । चतुर्धा । पञ्चधा ॥

१९८८–क्रियाप्रकारार्थमें वर्तमान संख्यावाचक शब्दके उत्तर स्वार्थमें धा प्रत्यय हो, जैसे–पञ्चधा, चतुर्धा ॥

१९८९अधिकरणविचाले च।५।३।४३॥

द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात् । एकं राशिं पञ्चधा कुरु ॥

१९८९–द्रव्यके संख्यान्तरापादन अर्थमें संख्यावाचक शब्दके उत्तर धा प्रत्यय हो, जैसे–एकं राशिं पंचधा कुरु ॥

१९९०एकाद्धो ध्यमुञन्यतरस्याम् । ५ । ३ । ४४ ॥

ऐकध्यम् । एकधा ॥

१९९०–क्रियाप्रकारार्थमें वर्तमान एक शब्दके उत्तर विहित धा प्रत्ययको विकल्प करके ध्यमुञ् आदेश हो, जैसे–ऐकध्यम्, एकधा ॥

१९९१ द्वित्र्योश्च धमुञ् । ५ । ३ ।४५॥

आभ्यां धा इत्यस्य धमुञ् स्याद्वा द्वैधम् । द्विधा । त्रैधम् । त्रिधा ॥ धमुञन्तात्स्वार्थे ड-दर्शनम् ॥ * ॥ पथि द्वैधानि ॥

१९९१–द्वि और त्रि शब्दके उत्तर धा प्रत्ययके स्थानमें विकल्प करके धमुञ् प्रत्यय हो, जैसे–द्वैधम्, द्विधा । त्रैधम्, त्रिधा ।

धमुञ्प्रत्ययान्तके उत्तर स्वार्थमें ड प्रत्यय हो * जैसे–पथि द्वैधानि । त्रैधानि ॥

१९९२ एधाच्च । ५ । ३ । ४६ ॥

द्वेधा । त्रेधा ॥

१९९२–द्वि और त्रि शब्दके उत्तर एधाच् प्रत्यय हो, जैसे–द्वेधा । त्रेधा ॥

१९९३ याप्ये पाशप् । ५ । ३ । ४७ ॥

कुत्सितो भिषक् भिषक्पाशः ॥

१९९३–याप्य अर्थात् कुत्सितार्थमें पाशप् प्रत्यय हो,जैसे–कुत्सितो भिषक्=भिषक्पाशः ॥

१९९४ पूरणाद्भागे तीयादन्।५।३।४८॥

द्वितीयो भागो द्वितीयः।तृतीयः । स्वरे विशेषः ॥ तीयादीकक् स्वार्थे वा वाच्यः ॥ * ॥ द्वैतीयीकः । द्वितीयः । तार्तीयीकः । तृतीयः॥ न विद्यायाः॥*॥ द्वितीया, तृतीया, विद्येत्येव ॥

१९९४–पूरणार्थक तीयप्रत्ययान्त भागवाचक शब्दके उत्तर अन् प्रत्यय हो, जैसे–द्वितीयो भागः=द्वितीयः । तृतीयः । स्वरविषयमें विशेष होगा ।

तीयप्रत्ययान्तके उत्तर विकल्प करके स्वार्थमें ईकक् प्रत्यय हो * जैसे–द्वैतीयीकः, द्वितीयः । तार्तीयीकः, तृतीयः ।

विद्या अर्थमें तीयप्रत्ययान्त शब्दके उत्तर ईकक् प्रत्यय न हो * जैसे–द्वितीया, तृतीया वा विद्या ॥

१९९५ प्रागेकादशभ्योऽछन्दसि । ५ । ३ । ४९ ॥

पूरणप्रत्ययान्ताद्भागेऽन् । चतुर्थः । पञ्चमः ॥

१९९५–वेदसे भिन्न स्थलमें एकादश शब्दके पूर्वपर्यन्त पूरण प्रत्ययान्त संख्यावाचक शब्दके उत्तर अन् प्रत्यय हो, जैसे–चतुर्थः । पंचमः–इत्यादि ॥

१९९६ षष्ठाष्टमाभ्यां ञ च ।५।३।५०॥

चादन् । षष्ठो भागः षाष्ठः । षष्ठः । आष्टमः । अष्टमः ॥

१९९६–षष्ठ और अष्टम शब्दके उत्तर भागार्थमें ञ और अन् प्रत्यय हो, जैसे–षष्ठो भागः=षाष्ठः, षष्ठः । आष्टमः, अष्टमः ॥

१९९७ मानपश्वङ्गयोः कन्लुकौ च । ५ । ३ । ५१ ॥

षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वङ्गे च वाच्ये । षष्ठको भागः मानं चेत् । अष्टमो भागः पश्वङ्गं चेत् । ञस्य अनो वा लुक्। चकाराद्यथाप्राप्तम्। षाष्ठः । षष्ठः। आष्टमः । अष्टमः। महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञापयति ॥

१९९७–परिमाण और पशुका अङ्ग होनेपर षष्ठ और अष्टम शब्दके उत्तर यथाक्रम कन् और लुक् हों । परिमाण होनेपर जैसे–षष्ठको भागः। पश्वङ्ग होनेपर जैसे–अष्टमो भागः। ञ और अन् प्रत्ययका विकल्प करके लुक् हुआहै, चकारसे यथाप्राप्त (ञ और अन्का श्रवण) होगा, जैसे–षाष्ठः, षष्ठः। आष्टमः, अष्टमः ॥

महाविभाषासे सिद्ध होनेपर भी पुनर्लुक्का ग्रहण पूर्व सूत्रमें ञ और अन् प्रत्ययकी नित्यता जताताहै ॥

१९९८एकादाकिनिच्चासहाये।५।३।५२।

चात्कन्लुकौ । एकः । एकाकी । एककः ॥

१९९८-एक शब्दके उत्तर असहायार्थमें आकिनिच् प्रत्यय हो, और चकारसे कन् तथा लुक् हो, जैसे-एकः, एकाकी, एककः ॥

१९९९ भूतपूर्वे चरट् । ५ । ३ । ५३ ॥

आढ्यो भूतपूर्वः आढ्यचरः ॥

१९९९-भूतपूर्वार्थमें चरट् प्रत्यय हो, जैसे-आढ्यो भूतपूर्वः=आढ्यचरः ॥

२००० षष्ठ्या रूप्य च । ५ ।३।५४॥

षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च । कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः । कृष्णचरः । तसिलादिषु रूप्यस्यापरिगणितत्वान्न पुंवत् । शुभ्राया भूतपूर्वः शुभ्रारूप्यः ॥

२०००-षष्ठीविभक्त्यन्त पदके उत्तर भूतपूर्वार्थमें रूप्य और चरट् प्रत्यय हो, जैसे-कृष्णस्य भूतपूर्वो गौः=कृष्णरूप्यः, कृष्णचरः । तसिलादि प्रत्ययके बीचमें रूप्य प्रत्ययके अपरिगणितत्वके कारण पुंवद्भाव नहीं होगा, जैसे-शुभ्राया भूतपूर्वः शुभ्रारूप्यः ॥

२००१ अतिशायने तमबिष्ठनौ । ५ । ३ । ५५ ॥

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः । अयमेषामतिशयेनाढ्यः । आढ्यतमः । लघुतमः । लघिष्ठः ॥

२००१-अतिशयविशिष्टार्थवृत्तिके उत्तर स्वार्थमें तमप् और इष्ठन् प्रत्यय हो,जैसे-अयमेषामतिशयेन आढ्यः=आढ्यतमः। लघुतमः, लघिष्ठः ॥

२००२ तिङश्च । ५ । ३ । ५६ ॥

तिङन्तादतिशये द्योत्ये तमप् स्यात् ॥

२००२-तिङन्त शब्दके उत्तर अतिशयार्थमें तमप् प्रत्यय हो ॥

२००३ तरतमपौ घः । १ । १ । २२ ॥

एतौ घसंज्ञौ स्तः ॥

२००३-तरप् और तमप् प्रत्यय घसंज्ञक हों ॥

२००४ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । ५ । ४ । ११ ॥

किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु, उच्चैस्तमस्तरुः ॥

२००४-द्रव्यप्रकर्ष न होनेपर किम् शब्द, एदन्त शब्द, तिङन्त पद और अव्यय शब्दके उत्तर जो घ,तदन्त प्रातिपदिकके उत्तर आमु प्रत्यय हो, जैसे-किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्ष होनेपर जैसे-उच्चैस्तमः तरुः ॥

२००५ द्विवचनविभज्योपपदे तरबीयसुनौ । ५ । ३ । ५७ ॥

द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुर्लघुतरः । लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः । पटीयांसः ॥

२००५-दोके मध्यमें एकके अतिशय होनेपर विभजनीय उपपदमें वर्तमान सुबन्त और तिङन्त पदके उत्तर तरप् और ईयसुन् प्रत्यय हो, यह पूर्वसूत्रोक्त तमप् और इष्ठन्के विशेषक हैं, जैसे-अयमनयोरतिशयेन लघुः=लघुतरः, लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः । पटीयांसः ॥

२००६ अजादी गुणवचनादेव । ५ । ३ । ५८ ॥

इष्ठन्नीयसुनौ गुणवचनादेव स्तः । नेह । पाचकतरः । पाचकतमः ॥

२००६-गुणवाचक शब्दके ही उत्तर इष्ठन् और ईयसुन् प्रत्यय हो, इससे पाचकतरः, पाचकतमः, यहां नहीं हुआ ॥

२००७ तुश्छन्दसि । ५ । ३ । ५९ ॥

तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः ॥

२००७-वेदमें तृन् और तृच्प्रत्ययान्तके उत्तर इष्ठन् और ईयसुन् प्रत्यय हो ॥

२००८ तुरिष्ठेमेयःसु । ६ । ४ । १५४ ॥

तृशब्दस्य लोपः स्यादिष्ठेमेयस्सु परेषु । अतिशयेन कर्ता करिष्ठः । दोहीयसी धेनुः ॥

२००८-इष्ठन्, इमन्, ईयसुन्, प्रत्यय परे रहते तृ प्रत्ययका लोप हो, जैसे-अतिशयेन कर्ता=करिष्ठः । दोहीयसी धेनुः ॥

२००९ प्रशस्यस्य श्रः । ५ । ३ । ६० ॥

अस्य श्रादेशः स्यादजाद्योः ॥

२००९-अजादि प्रत्यय परे रहते प्रशस्य शब्दके स्थानमें श्र आदेश हो ॥

२०१० प्रकृत्यैकाच् । ३ । ४ । ६३ ॥

इष्ठादिष्वेकाच् प्रकृत्या स्यात् । श्रेष्ठः । श्रेयान् ॥

२०१०-इष्ठादि प्रत्यय परे रहते एकाच् शब्द प्रकृतिमें ही रहै, जैसे-अयमतिशयेन प्रशस्यः=श्रेष्ठः, श्रेयान् ॥

२०११ ज्य च । ५ । ३ । ६१ ॥

प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः । ज्येष्ठः ॥

२०११-इष्ठन् और ईयसुन् प्रत्यय परे रहते प्रशस्य शब्दके स्थानमें ज्य आदेश हो, जैसे-अयमनयोरतिशयेन प्रशस्यः=ज्येष्ठः ॥

२०१२ ज्यादादीयसः । ६ । ४ । १६० ॥

आदेः परस्य । ज्यायान् ॥

२०१२–ज्य शब्दके उत्तर ईयसुन् प्रत्ययके स्थानमें आत् हो, जैसे–(आदेः परस्य ४४) ज्यायान् ॥

२०१३ वृद्धस्य च । ५ । ३ । ६२ ॥

ज्यादेशः स्यादजाद्योः । ज्येष्ठः । ज्यायान् ॥

२०१३–इष्ठन् और ईयसुन् प्रत्यय परे रहते वृद्ध शब्दके स्थानमें ज्य आदेश हो, जैसे–अयमेषामतिशयेन वृद्धः=ज्येष्ठः। अयमनयोरतिशयेन वृद्धः=ज्यायान् ॥

२०१४ अन्तिकबाढयोर्नेदसाधौ । ५ । ३ । ६३ ॥

अजाद्योः । नेदिष्ठः । नेदीयान् । साधिष्ठः । साधीयान् ॥

२०१४–अन्तिक और बाढ शब्दको इष्ठन् और ईयसुन् प्रत्यय परे रहते यथाक्रम नेद और साध आदेश हों, जैसे–अतिशयेनान्तिकः=नेदिष्ठः, नेदीयान् । साधिष्ठः, साधीयान् ॥

२०१५ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ।६।४।१५६॥

एषां यणादिपरं लुप्यते पूर्वस्य च गुण इष्ठादिषु । स्थविष्ठः । दविष्ठः । यविष्ठः । ह्रसिष्ठः। क्षेपिष्ठः । क्षोदिष्ठः । एवमीयस् । ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वाद् ह्रसिमा। क्षेपिमा। क्षोदिमा॥

२०१५–इष्ठादि प्रत्यय परे रहते स्थूल, दूर, युव, ह्रस्व, क्षिप्र और क्षुद्र शब्दके यणयुक्त अन्तस्थित अर्थात् य, व, र, ल, भागका लोप हो और पूर्व स्वरको गुण हो, जैसे–स्थविष्ठः । दविष्ठः । यविष्ठः । ह्रसिष्ठः । क्षेपिष्ठः । क्षोदिष्ठः । ईयसुन्, इमन् परे भी ऐसे कार्य्य होंगे । ह्रस्व, क्षिप्र और क्षुद्र शब्दके पृथ्वादि गणमें पाठके कारण ह्रसिमा, क्षेपिमा, क्षोदिमा ऐसा भी होगा ॥

२०१६ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः । ६ । ४ । १५७ ॥

प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु । प्रेष्ठः। स्थेष्ठः । स्फेष्ठः । वरिष्ठः । बंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृन्दिष्ठः । एवमीयसुन् । प्रेयान् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्प्रेमेत्यादि ॥

२०१६–इष्ठादि प्रत्यय परे रहते प्रिय, स्थिर, स्फिर, ऊरु, बहुल, गुरु, वृद्ध, तृप्र, दीर्घ और वृन्दारक शब्दोंके स्थानमें यथाक्रम प्रस्थ, स्फ, वर्, बंहि, गर्, वर्षि, त्रप्, द्राघि और वृन्द आदेश हों, जैसे–अतिशयेन प्रियः=प्रेष्ठः । स्थेष्ठः । स्फेष्ठः । वरिष्ठः । बंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृन्दिष्ठः । ईयसुन्, इमन् प्रत्यय परे रहते भी ऐसा आदेश होगा, जैसे–प्रेयान् । प्रिय, ऊरु, बहुल, गुरु और दीर्घ शब्दके उत्तर पृथ्वादित्वके कारण इमनिच् प्रत्यय होकर प्रेमा–इत्यादि पद होंगे ॥

२०१७ बहोर्लोपो भू च बहोः ।६।४।१५८॥

बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः । भूमा । भूयान् ॥

२०१७–बहु शब्दके परे स्थित इमनिच् और ईयसुन् प्रत्ययका लोप हो और बहु शब्दके स्थानमें भू आदेश हो, जैसे–अतिशयेन बहुः=भूमा, भूयान् (आदेः परस्य.४४) ॥

२०१८ इष्ठस्य यिट् च । ६ । ४ । १५९॥

बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च। भूयिष्ठः ॥

२०१८–बहु शब्दके परे स्थित इष्ठन् प्रत्ययका लोप हो और बहु शब्दके उत्तरको यिट्का आगम हो, जैसे–भूयिष्ठः । (यिट्में टका लोप होगा) ॥

२०१९ युवाल्पयोः कनन्यतरस्याम् । ५ । ३ । ६४ ॥

एतयोः कनादेशो वा स्यादिष्ठेयसोः । कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठ इत्यादि ॥

२०१९–युवन् और अल्प शब्दके स्थानमें इष्ठन्, ईयसुन् प्रत्यय परे रहते विकल्प करके कन् आदेश हो, जैसे–अयमेषामतिशयेन युवा=कनिष्ठः, कनीयान् । पक्षे यविष्ठः । अल्पिष्ठः–इत्यादि ॥

२०२० विन्मतोर्लुक् ।५।३।६५ ॥

विनो मतुपश्च लुक् स्यादिष्ठेयसोः । अतिशयेन स्रग्वी । स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् । त्वचिष्ठः । त्वचीयान् ॥

२०२०–इष्ठन् और ईयसुन् प्रत्यय परे रहते विन् और मतुप्का लुक् हो, जैसे–अतिशयेन स्रग्वी=स्रजिष्ठः, स्रजीयान्। अतिशयेन त्वग्वान्=त्वचिष्ठः, त्वचीयान् ॥

२०२१ प्रशंसायां रूपप् ।५।३।६६॥

सुबन्तात्तिङन्ताच्च । प्रशस्तः पटुः पटुरूपः । प्रशस्तं पचति पचतिरूपम् ॥

२०२१–प्रशंसार्थमें सुबन्त और तिङन्त पदके उत्तर रूपप् प्रत्यय हो, जैसे–प्रशस्तः पटुः=पटुरूपः । प्रशस्तं पचति=पचतिरूपम् ॥

२०२२ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः । ५ । ३ । ६७ ॥

ईषदूनो विद्वान् विद्वत्कल्पः । यशस्कल्पम् । यजुष्कल्पम् । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ॥

२०२२-ईषत् असमाप्ति (ईषदून) अर्थमें कल्पप्, देश्य, देशीयर् प्रत्यय हों, जैसे-ईषदूनो विद्वान्=विद्वत्कल्पः। यशस्कल्पम् । यजुष्कल्पम् । विद्वद्देश्यः । विद्वद्देशीयः। पचतिकल्पम् ॥

२०२३ विभाषा सुपो बहुच् पुरस्तात्तु । ५ । ३ । ६८ ॥

ईषदसमाप्तिविशिष्टेर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परतः । ईषदूनः पटुर्बहुपटुः। पटुकल्पः । सुपः किम् । यजतिकल्पम् ॥

२०२३-ईषत् ऊनार्थमें सुबन्तसे विकल्प करके बहुच् प्रत्यय हो, यह बहुच् प्रत्यय पूर्वमें ही हो परमें न हो, जैसे-ईषदूनः पटुः=बहुपटुः। पक्षमें कल्पप् प्रत्यय होगा, जैसे-पटुकल्पः। सुबन्त न होनेपर जैसे-यजतिकल्पम् ॥

२०२४ प्रकारवचने जातीयर्।५।३।६९॥

प्रकारवति चायम्। थाल् तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः ॥

२०२४--प्रकार (सादृश्य और भेद) विशिष्ट अर्थमें जातीयर् प्रत्यय हो, यह सूत्र प्रकारविशिष्टविषयक है क्योंकि, केवल प्रकारमें थाल् प्रत्यय पूर्वसूत्रसे होगा, जैसे--पटुप्रकारः= पटुजातीयः ॥

२०२५ प्रागिवात्कः ।५।३।७०॥

इवे प्रतिकृताविव्यतः प्राक् काऽधिकारः ॥

२०२५-" इवे प्रतिकृतौ २०५१ " इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त क प्रत्ययका अधिकार चलेगा ॥

२०२६ अव्ययसर्वनाम्नामकच् प्राक् टेः।५।३।७१॥

तिङश्चेत्यनुवर्तते ॥

२०२६-अव्यय और सर्वनाम शब्दोंकी और तिङन्तकी टिके पूर्वमें अकच् प्रत्यय हो ॥

२०२७ कस्य च दः । ५ । ३ । ७२॥

कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच्च ॥

२०२७-ककारान्त अव्यय शब्दको दकार अन्तादेश हो और टिके पूर्वमें अकच् प्रत्यय हो, " तिङश्च २००२" की अनुवृत्ति होतीहै ॥

२०२८ अज्ञाते । ५ । ३ । ७३ ॥

कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वके । विश्वके ॥ ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् ॥ * ॥ युवकयोः। आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिः । अस्मकाभिः । ओकारेत्यादि किम् । त्वयका । मयका । अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः ॥ * ॥ मित्त्वादन्त्यादचः परः । तूष्णीकामास्ते ॥ शीले को मलोपश्च ॥ * ॥ तूष्णीं शीलस्तूष्णीकः । पचतकि । जल्पतकि । धकित् । हिरकुत् ॥

२०२८-अज्ञातार्थमें अकच् प्रत्यय हो, जैसे-कस्यायम् अश्वः=अश्वकः । उच्चकैः । नीचकैः । सर्वके । विश्वके ।

ओकार, सकार और भकारादि सुप् प्रत्यय परे रहते सर्वनाम शब्दकी टिके पूर्वमें अकच् प्रत्यय हो * जैसे-युवकयोः । आवकयोः । युष्मकासु । अस्मकासु । युष्मकाभिः । अस्मकाभिः । ओकारादि सुप् परे न होनेपर त्वयका । मयका ।

अकच्प्रकरणमें ' तूष्णीम् ' शब्दके उत्तर काम् प्रत्यय हो * प्रत्ययका मकार इत्संज्ञक होनेके कारण अन्त्य अच्के परे होगा, तूष्णीकामास्ते ।

शीलार्थमें ' तूष्णीम् ' शब्दके उत्तर क प्रत्यय हो और मकारका लोप हो * जैसे-तूष्णींशीलः=तूष्णीकः ।

पचतकि । जल्पतकि । धकित् । हिरकुत् ॥

२०२९ कुत्सिते । ५ । ३ । ७४ ॥

कुत्सितोऽश्वोऽश्वकः ॥

२०२९-कुत्सितार्थमें क प्रत्यय हो, जैसे-कुत्सितोऽश्वः= अश्वकः ॥

२०३० संज्ञायां कन् ।५।३।७५॥

कुत्सिते कन् स्यात्तदन्तेन चेत्संज्ञा गम्यते । शूद्रकः । राधकः । स्वरार्थं वचनम् ॥

२०३०-यदि तदन्त पदसे संज्ञा गम्यमान हो तो कुत्सितार्थमें शब्दके उत्तर कन् प्रत्यय हो, जैसे-शूद्रकः । राधकः । यह सूत्र स्वरार्थ है ॥

२०३१ अनुकम्पायाम् ।५।३।७६ ॥

पुत्रकः । अनुकम्पितः पुत्र इत्यर्थः ॥

२०३१-अनुकम्पार्थमें कन् प्रत्यय हो, जैसे-पुत्रकः, अर्थात् अनुकंपित पुत्र ॥

२०३२ नीतौ च तद्युक्तात्।५।३।७७॥

सामदानादिरूपा नीतिस्तस्यां गम्यमानायामनुकम्पायुक्तात्कप्रत्ययः स्यात् । हन्त ते धानकाः । गुडकाः । एहकि । अद्धकि । पूर्वेणानुकम्प्यमानात् प्रत्ययः, अनेन तु परम्परासम्बन्धेपीति विशेषः ॥

२०३२-साम दानादि उपायको नीति कहतेहैं,नीति अर्थ होनेपर अनुकम्पायुक्त शब्दके उत्तर कन् प्रत्यय हो, जैसे-हन्त ते धानकाः गुडकाः । एहकि । अद्धकि । पूर्व सूत्रसे अनुकम्प्यमानके उत्तर कन् प्रत्यय हुआ परंतु इससे परम्परा संबंधमें भी होगा, यही विशेष है ॥

२०३३ बह्वचो मनुष्यनाम्नष्ठज्वा । ५ । ३ । ७८ ॥

पूर्वसूत्रद्वयविषये ॥

२०३३–पहले दोनों सूत्रोंके विषयमें बहुस्वरयुक्त मनुष्यनामवाचक शब्दके उत्तर विकल्प करके ठच् प्रत्यय हो ॥

२०३४ घनिलचौ च । ५।३।७९ ॥

तत्रैव ॥

२०३४–पूर्वसूत्रोक्त विषयमें घन् और इलच् प्रत्यय हो ॥

२०३५ ठाजादावूर्ध्वं द्वितीयादचः । ५ । ३ । ८३ ॥

अस्मिन्प्रकरणे यष्ठोऽजादिप्रत्ययश्च तस्मिन्प्रत्यये परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तो देविकः। देवियः। देविलः। देवदत्तकः । अनुकम्पितो वायुदत्तो वायुकः । ठग्रहणमुको द्वितीयत्वे कविधानार्थम्॥वायुदत्तः। वायुकः। पितृकः ॥ चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः ॥ * अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः ॥ अनजादौ च विभाषा लोपो वक्तव्यः ॥ * ॥ देवकः । देवदत्तकः ॥ लोपः पूर्वपदस्य च ॥ * ॥ दत्तिकः। दत्तियः। दत्तिलः। दत्तकः ॥ विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः ॥ * ॥ दत्तः । देवः । देवदत्तः ॥ भामा । सत्या । सत्यभामा ॥ उवर्णाल्ल इलस्य च ॥*॥भानुलः। भानुदत्तः ॥ ऋवर्णादपि॥*॥ सवितृलः । सवित्रियः ॥

चतुर्थादनजादौ च लोपः पूर्वपदस्य च ।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च ॥ १ ॥

२०३५–इस प्रकरणमें जो ठ और अजादि प्रत्यय कहेहैं, वह प्रत्यय परे रहते प्रकृतिके दूसरे अच्के परवर्ती सम्पूर्ण अंशका लोप हो, जैसे–अनुकम्पितो देवदत्तः=देविकः,देवियः। देविलः, देवदत्तकः । अनुकम्पितो वायुदत्तः=वायुकः "इसुसुक्तान्तात् कः" इस सूत्रसे विहित उक्के द्वितीयत्वमें क विधानके निमित्त ठ ग्रहण हुआहै, जैसे–वायुदत्तः–वायुकः । पितृकः ।

चतुर्थ अच्के परे स्थित अंशका लोप हो * यथा–अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः ।

अजादि न होनेपर विकल्प करके लोप हो * यथा–देवकः, देवदत्तकः ।

पूर्वपदका भी लोप हो * यथा–दत्तिकः, दत्तियः, दत्तिलः, दत्तकः ।

प्रत्ययके विना भी पूर्व और उत्तर पदका लोप विकल्प करके हो * जैसे–दत्तः, देवः, देवदत्तः । भामा, सत्या, सत्यभामा ।

उवर्णके उत्तर इलच् प्रत्ययका भी ल हो * जैसे–भानुदत्तः–भानुलः ।

ऋवर्णके उत्तर पूर्वपदका लोप हो * जैसे–सवितृलः । सवित्रियः ।

अनजादि विषयमें चतुर्थ अच्के उत्तरपदका लोप हो, इसी प्रकार प्रत्यय परे न रहते भी लोप हो, उवर्णान्तके उत्तर इलको ल आदेश हो, यह कारिकाका अर्थ है ॥

२०३६ प्राचामुपादेरडज्वुचौ च । ५ । ३ । ८० ॥

उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये अडच् वुच् एतौ स्तः । चाद्यथा प्राप्तम् । प्राचांग्रहणं पूजार्थम् । अनुकम्पितः उपेन्द्रदत्तः उपडः । उपकः । उपिकः । उपियः । उपिलः । उपेन्द्रदत्तकः । षड्रूपाणि ॥

२०३६–उपशब्दपूर्वक प्रातिपदिकके उत्तर पूर्व विषयमें अडच् और वुच् प्रत्यय हों, चकारसे यथाप्राप्त होगा। 'प्राचाम्' पदका ग्रहण पूजाके निमित्त है, जैसे–अनुकम्पितः उपेन्द्रदत्तः=उपडः, उपकः, उपिकः, उपियः, उपिलः, उपेन्द्रदत्तकः, यह छै रूप होंगे ॥

२०३७ जातिनाम्नः कन् ।५।३ । ८१ ॥

मनुष्यनाम्न इत्येव । जातिशब्दो यो मनुष्यनामधेयस्तस्मात्कन् स्यादनुकम्पायां नीतौ च । सिंहकः । शरभकः । रासभकः ॥ द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः ॥*॥ कहोडः । कहिकः ॥ एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः ॥ * ॥ वागाशीर्दत्तः वाचिकः। कथं षडंगुलिदत्तः षडिक इति ॥ षषष्ठाजादिवचनात्सिद्धम् ॥ * ॥

२०३७–जातिवाचक शब्द जो मनुष्य नामवाचक हो, उस शब्दके उत्तर अनुकम्पा और नीति अर्थमें कन् प्रत्यय हो, जैसे–सिंहकः । शरभकः । रासभकः ।

यदि दूसरी संधिका अक्षर हो तो तदादिका लोप हो* कहोडः । कहिकः ।

एकाक्षरयुक्त पूर्वपदविशिष्ट शब्दके उत्तरपदका लोप हो* वागाशीर्दत्तः–वाचिकः ।

षडंगुलिदत्तः=षडिकः यह पद कैसे सिद्ध हुआ, कारण कि, उत्तरपदके लोप होनेपर अजादि प्रत्यय परे रहते " यचि भम् १।४।१८ " से भ संज्ञा होनेके कारण जश्त्वकी प्राप्ति नहीं है ? इसलिये वार्तिक कहतेहैं–

षषष्ठाजादिवचनात्सिद्धम् * अर्थात् षडंगुलिदत्त शब्दमें " एकाक्षर० " यह वार्तिक न होकर " ठाजादा० " इस सूत्रसे ही द्वितीय अच्से पर भागका लोप हो, इसलिये अकारसे व्यवधान होनेके कारण षान्तकी भ संज्ञा न होनेसे जश्त्व हुआ ॥

२०३८ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् । ५ । ३ । ८४ ॥

एषां मनुष्यनाम्नां ठाजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात् । पूर्वस्यापवादः। अनुकम्पितः शेवलदत्तः। शेवलिकः । शेवलियः । शेवलिलः । सुपरिकः । विशालिकः । वरुणिकः।अर्यमिकः ॥

२०३८-नीति और अनुकंपार्थमें अजादि प्रत्यय परे रहते शेवल, सुपरि, विशाल, वरुण, अर्यमन्-इत्यादि मनुष्य नामवाचक शब्दके तीसरे अच्के परभागका लोप हो, यह सूत्र पूर्व सूत्रका विशेषक है, जैसे-अनुकम्पितः शेवलदत्तः- शेवलिकः, शेवलियः, शेवलिलः । सुपरिकः । विशालिकः । वरुणिकः । अर्यमिकः ॥

२०३९ अजिनान्तस्योत्तरपदलोपश्च । ५ । ३ । ८२ ॥

अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन् तस्य चोत्तरपदलोपः । अनुकम्पितो व्याघ्राजिनो व्याघ्रकः । सिंहकः ॥

२०३९-अजिन्शब्दान्त मनुष्यनामवाचक शब्दके उत्तर अनुकम्पार्थमें कन् प्रत्यय हो और उत्तरपदका लोप हो, जैसे- अनुकम्पितः व्याघ्राजिनः=व्याघ्रकः । सिंहकः ॥

२०४० अल्पे । ५ । ३ । ८५ ॥

अल्पं तैलं तैलिकम् ॥

२०४०-अल्पार्थमें कन् प्रत्यय हो, जैसे-अल्पं तैलं= तैलिकम् ॥

२०४१ ह्रस्वे । ५ । ३ । ८६ ॥

ह्रस्वो वृक्षो वृक्षकः ॥

२०४१-ह्रस्वार्थमें कन् प्रत्यय हो, जैसे-ह्रस्वो वृक्षः= ह्रस्वकः ॥

२०४२ संज्ञायां कन् । ५ । ३ । ८७ ॥

ह्रस्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् । पूर्वस्यापवादः । वंशकः । वेणुकः ॥

२०४२-ह्रस्वहेतुक जो संज्ञा वह होनेपर कन् प्रत्यय हो, यह पूर्व सूत्रका अपवाद है, जैसे-वंशकः वेणुकः ॥

२०४३ कुटीशमीशुण्डाभ्यो रः ५।३।८८

ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डारः ॥

२०४३-ह्रस्वार्थमें कुटी, शमी और शुण्डा शब्दके उत्तर र प्रत्यय हो, जैसे-ह्रस्वा कुटी=कुटीरः । शमीरः । शुण्डारः ॥

२०४४ कुत्वा डुपच् । ५ । ३ । ८९ ॥

ह्रस्वा कुतूः कुतुपः । कुतूः कृत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमान् ॥

२०४४-ह्रस्वार्थमें कुतू शब्दके उत्तर डुपच् प्रत्यय हो, जैसे-ह्रस्वा कतूः=कुतुपः । कुतू शब्दसे चमडेका बनाहुआ स्नेहपात्र अर्थात् तेलका वर्तन जानना । वह छोटा होनेसे कुतुप, (कुप्पी) कही जातीहै । कुतुप शब्द पुँल्लिङ्ग है ॥

२०४५ कासूगोणीभ्यां ष्टरच् ।५।३।९०॥

आयुधविशेषः कासूः । ह्रस्वा सा कासूतरी। गोणीतरी ॥

२०४५-ह्रस्वार्थमें कासू और गोणी शब्दके उत्तर ष्टरच् प्रत्यय हो, जैसे-ह्रस्वा कासूः=कासूतरी । कासू शब्दसे अस्त्रविशेष जानना । गोणीतरी । गोणी शब्दसे धान्यादि पात्र (कुठिया वा खलिहान) जानना ॥

२०४६ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । ५ । ३ । ९१ ॥

वत्सतरः द्वितीयं वयः प्राप्तः । उक्षतरः । अश्वतरः । ऋषभतरः । प्रवृत्तिनिमित्ततनुत्वे एवायम् ॥

२०४६-तनुत्व अर्थात् वयोन्तर प्राप्ति होनेपर वत्स और उक्ष शब्दके उत्तर और अपकर्ष होनेपर अश्व और ऋषभ शब्दके उत्तर ष्टरप् प्रत्यय हो, जैसे-वत्सतरः, अर्थात् दूसरी उमरको प्राप्त हुआ बछड़ा । उक्षतरः । द्वितीयवयःप्राप्तको उक्षा कहतेहैं, उसको तनुत्व अर्थात् तीसरी उमरकी प्राप्ति । अश्वतरः । अश्वजातिका तनुत्व अर्थात् अन्यपितृकतारूप अपकर्ष । बोझ उठानेवाले बैलको ऋषभ कहतेहैं, उसके वहनमें अपकर्ष अर्थात् मंद शक्ति होनेपर उसको ' ऋषभतर ' कहतेहैं ॥

२०४७ किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् । ५ । ३ । ९२ ॥

अनयोः कतरो वैष्णवः । यतरः । ततरः । महाविभाषया कः । यः । सः ॥

२०४७-किम्,यद् और तद् शब्दके उत्तर दोनोंके मध्यमें एकका निर्द्धारण होनेपर डतरच् प्रत्यय हो, जैसे-अनयोः कतरो वैष्णवः । यतरः । ततरः । महाविभाषासे पक्षमें, किम् शब्दसे 'कः', यद् शब्दसे 'यः' और तद् शब्दसे 'सः' हुआ ॥

२०४८ वा बहूनां जातिपरिप्रश्ने डतमच् । ५ । ३ । ९३॥

बहूनां मध्ये एकस्य निर्द्धारणे डतमच् वा स्यात् । जातिपरिप्रश्न इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् । यकः । सकः। महाविभाषया यः। सः । किमोऽस्मिन्विषये डतरजपि । कतरः ॥

२०४८-बहुतोंके मध्यमें एकके जातिनिर्द्धारण होनेपर किम्, यद् और तद् शब्दके उत्तर विकल्प करके डतमच् प्रत्यय हो।

'जातिपरिप्रश्ने' यह पद भाष्यमें प्रत्याख्यात हुआहै, इस कारण 'कतमो भवताम् अध्यापकः। शूरः देवदत्तो वा' ऐसा प्रयोग संगत होताहै । कतमो भवतां कठः । यतमः। ततमः। वा शब्दका ग्रहण अकजर्थ है। यकः। सकः। महाविभाषासे 'यः, सः' ऐसा भी होगा।

इस विषयमें किम् शब्दके उत्तर डतरच् प्रत्यय भी हो,जैसे-कतरः ॥

२०४९ एकाच्च प्राचाम् ।५।३।९४॥

डतरच्च डतमच्च स्यात्। अनयोरेकतरो मैत्रः। एषामेकतमः ॥

२०४९–प्राचीन पंडितोंके मतमें एक शब्दके उत्तर डतरच् और डतमच् प्रत्यय हो, जैसे–अनयोरेकतरो मैत्रः। एषामेकतमः ॥

२०५० अवक्षेपणे कन् ।५।३।९५॥

व्याकरणेन गर्वितो व्याकरणकः । येनेतरः कुत्स्यते तदिहोदाहरणम्। स्वतः कुत्सितं तु कुत्सित इत्यस्य ॥

॥ इति प्रागिवीयानां पूर्णोवधिः ॥

२०५०–अवक्षेप अर्थात् गर्वित अर्थमें कन् प्रत्यय हो, जैसे–व्याकरणेन गर्वितः=व्याकरणकः। इस स्थलमें 'व्याकरणक' शब्दसे व्याकरणज्ञानवर्जितकी जो निन्दा करै उसको ही जानना, परन्तु स्वयम् कुत्सित होनेपर (२०२९) कन् प्रत्यय होगा।

॥ इति प्रागिवीयप्रकरणम् ॥

अथ स्वार्थिकप्रकरणम्।

२०५१ इवे प्रतिकृतौ। ५।३।९६॥

कन् स्यात्। अश्व इव प्रतिकृतिः अश्वकः। प्रतिकृतौ किम्। गौरिव गवयः ॥

२०५१–इवार्थोपमानत्वविशिष्ट अर्थमें वर्तमान प्रातिपदिकके उत्तर कन् प्रत्यय हो, यदि उपमेय ही प्रतिकृति हो, मृत्तिकादिनिर्मित प्रतिमाको प्रतिकृति कहतेहैं, जैसे–अश्व इव प्रतिकृतिः=अश्वकः । प्रतिकृति न होनेपर गौरिव=गवयः यहां कन् न हुआ ॥

२०५२ संज्ञायां च। ५। ३।९७॥

इवार्थे कन् स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थमारम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः ॥

२०५२–संज्ञा होनेपर इवार्थमें कन् प्रत्यय हो, इस सूत्रका आरम्भ अप्रतिकृत्यर्थ है, जैसे–अश्वसदृशस्य संज्ञा=अश्वकः। उष्ट्रकः ॥

२०५३ लुम्मनुष्ये। ५। ३। ९८ ॥

संज्ञायां च विहितस्य कनो लुप्स्यान्मनुष्ये वाच्ये। चञ्चा तृणमयः पुमान्। चञ्चेव मनुष्यश्चञ्चा। वर्ध्रिका ॥

२०५३–मनुष्य होनेपर संज्ञार्थमें विहित कन् प्रत्ययका लुप् हो, जैसे–चञ्चा तृणमयः पुमान् (तृणमय पुरुषको चञ्चा कहतेहैं)। चञ्चा इव मनुष्यः=चञ्चा। वर्ध्रिका ॥

२०५४ जीविकार्थे चापण्ये।५।३।९९॥

जीविकार्थं यद्विक्रीयमाणं तस्मिन्वाच्ये कनो लुप्स्यात्। वासुदेवः। शिवः। स्कन्दः। देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम्। अपण्ये किम्। हस्तिकान्विक्रीणीते ॥

२०५४–जीविकार्थ जो विक्रीयमाण, तद्भिन्न अर्थ (विक्रयसे भिन्न जीविका) होनेपर कन् प्रत्ययका लुप् हो, जैसे–वासुदेवः। शिवः। स्कंदः। यह कार्य्य देवलादिके जीविकार्थमें देवताओंकी प्रतिकृति होनेपर होताहै, क्योंकि, देवल देवमूर्ति सेवासे ही निर्वाह करतेहैं, उसमें जो वासुदेवसे जीविका निर्वाह करै उसको 'वासुदेव ' कहतेहैं।

पण्यार्थ होनेपर जैसे–हस्तिकान् विक्रीणीते, यहां कन् प्रत्ययका लोप न हुआ।

(इस सूत्रसे तथा भाष्यके उदाहरणोंसे मूर्तिपूजन सिद्ध होताहै, इससे वैदिक होना सिद्ध है, दयानंदने सैकडों सूत्र छोड दिये, इसका अर्थ भी उलटा कियाहै)॥

२०५५देवपथादिभ्यश्च।५।३।१००॥

कनो लुप्स्यात्। देवपथः। हंसपथः। आकृतिगणोऽयम् ॥

२०५५–देवपथादि शब्दके उत्तर कन् प्रत्ययका लुप् हो, जैसे–देवपथः। हंसपथः। देवपथादि आकृतिगण है ॥

२०५६ वस्तेर्ढञ्। ५। ३। १०१॥

इवेत्यनुवर्तत एव। प्रतिकृताविति निवृत्तम्। वस्तिरिव वास्तेयम्। वास्तेयी ॥

२०५६–वस्ति शब्दके उत्तर इवार्थमें ढञ् प्रत्यय हो, इस स्थलमें इव शब्दकी अनुवृत्ति हुई,प्रतिकृतिकी निवृत्ति भी हुई, जैसे–वस्तिरिव=वास्तेयम्। वास्तेयी ॥

२०५७ शिलाया ढः ।५।३।१०२॥

शिलाया इति योगविभागाड्ढञपीत्येके। शिलेव शिलेयम्। शैलेयम् ॥

२०५७–शिला शब्दके उत्तर इवार्थमें ढ प्रत्यय हो,जैसे–शिलेव=शिलेयम्। कोई २ कहतेहैं "शिलायाः" ऐसे योगविभाग (भिन्नसूत्रकरण) के कारण शिला शब्दके उत्तर ढञ् प्रत्यय भी होगा, जैसे–शैलेयम् ॥

२०५८ शाखादिभ्यो यः।५।३।१०३॥

शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः ॥

२०५८–शाखादि शब्दके उत्तर इवार्थमें य प्रत्यय हो, जैसे–शाखेव=शाख्यः। मुख्यः। जघनमिव=जघन्यः। अग्र्यः। शरण्यः ॥

२०५९ द्रव्यं च भव्ये।५।३।१०४॥

द्रव्यम् अयं ब्राह्मणः ॥

२०५९-भव्यार्थमें (अभिप्रेतार्थपात्रभूत विषयमें) वर्तमान द्रु शब्दके उत्तर इवार्थमें य प्रत्यय हो, अथवा भव्यार्थमें 'द्रव्य' शब्द निपातनसे सिद्ध हो, जैसे-द्रव्यमयं ब्राह्मणः, अर्थात् अभिप्रेतार्थ पात्रभूत ब्राह्मण ।

२०६० कुशाग्राच्छः । ५।३।१०५॥

कुशाग्रमिव कुशाग्रीया बुद्धिः ॥

२०६०-कुशाग्र शब्दके उत्तर इवार्थमें छ प्रत्यय हो, जैसे-कुशाग्रम् इव=कुशाग्रीया बुद्धिः ॥

२०६१ समासाच्च तद्विषयात् । ५ । ३ । १०६ ॥

इवार्थविषयात् समासाच्छः स्यात् । काकतालीयो देवदत्तस्य वधः । इह काकतालसमागमसदृशश्चोरसमागम इति समासार्थः । तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः । अजाकृपाणीयः । अतर्कितोपनत इति फलितोऽर्थः ॥

२०६१-इवार्थविषयीभूत समासके उत्तर छ प्रत्यय हो, जैसे-काकतालीयः देवदत्तस्य वधः । इस स्थलमें काकतालसमागमसदृश चौरसमागम यह समासार्थ है, परन्तु तत्प्रयुक्त काकमरणसदृश प्रत्ययार्थ है। अजाकृपाणीयः, अर्थात् अतर्कित भावमें उपनत ॥

२०६२ शर्करादिभ्योऽण् ।५।३।१०७॥

शर्करेव शार्करम् ॥

२०६२-शर्करादि शब्दके उत्तर इवार्थमें अण् प्रत्यय हो, जैसे-शर्करेव=शार्करम् ॥

२०६३ अंगुल्यादिभ्यष्ठक्।५।३।१०८॥

अंगुलीव आंगुलिकः । भरुजेव भारुजिकः ॥

२०६३-अंगुल्यादि शब्दके उत्तर इवार्थमें ठक् प्रत्यय हो, जैसे-अंगुलीव=आंगुलिकः । भरुजेव=भारुजिकः ॥

२०६४ एकशालायाष्ठजन्यतरस्याम्। ५ । ३ । १०९ ॥

एकशालाशब्दादिवार्थे ठज्वा पक्षे ठक् । एकशालेव एकशालिकः । ऐकशालिकः ॥

२०६४-एकशाला शब्दके उत्तर स्वार्थमें ठञ् और पक्षमें ठक् प्रत्यय हो, जैसे-एकशालेव=एकशालिकः, ऐकशालिकः॥

२०६५ कर्कलोहितादीकक्।५।३।११०॥

कर्कः शुक्लोऽश्वः स इव कार्कीकः । लौहितीकः स्फटिकः ॥

२०६५-कर्क और लोहित शब्दके उत्तर इवार्थमें ईकक् प्रत्यय हो, जैसे-कर्क इव=कार्कीकः । कर्क शब्दसे सफेद घोड़ा जानना । लौहितीकः, अर्थात् स्फटिक ॥

२०६६ पूगाञ्ञ्योऽग्रामणीपूर्वात्। ५ । ३ । ११२ ॥

इवार्थो निवृत्तः । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगास्तद्वाचकात्स्वार्थे ञ्यः स्यात् । लौहितध्वज्यः ॥

२०६६-ग्रामणी शब्द पूर्वमें न रहते पूगवाचक शब्दके उत्तर स्वार्थमें ञ्य प्रत्यय हो, इस सूत्रसे इवार्थकी निवृत्ति हुई, नानाजातीय अनियतवृत्ति अर्थ कामप्रधान जो संघ उसको 'पूग' कहतेहैं, उससे स्वार्थमें ञ्य प्रत्यय हो, जैसे-लौहितध्वज्यः ॥

(व्रातच्फञोरस्त्रियाम् । ५ । ३ । ११३ ॥ ११००)

व्रातः, कापोतपाक्यः । च्फञ्, कौञ्जायन्यः । ब्राध्नायन्यः ॥

स्त्रीलिङ्गभिन्नमें व्रातवाचक और च्फञ् प्रत्ययान्तसे ञ्य प्रत्यय हो (सू० ११००) व्रात यथा-कापोतपाक्यः । चफञ् जैसे-कौञ्जायन्यः । ब्राध्नायन्यः ॥

२०६७ आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्। ५ । ३ । ११४ ॥

वाहीकेषु य आयुधजीविसङ्घस्तद्वाचिनः स्वार्थे ञ्यट् । क्षौद्रक्यः । मालव्यः।टित्वान्ङीप्। क्षौद्रकी । आयुधेति किम् । मल्लाः।संघेति किम्। सम्राट् । वाहीकेषु किम् । शबराः ।अब्राह्मणेति किम् । गोपालवाः । शालंकायनाः। ब्राह्मणे तद्विशेषग्रहणम् । राजन्ये स्वरूपग्रहणम् ।

२०६७-वाहीक अर्थमें जो आयुधजीविसमूह, तद्वाचक शब्दके उत्तर स्वार्थमें ञ्यट् प्रत्यय हो, ब्राह्मण और राजन्य शब्दके उत्तर न हो, जैसे-क्षौद्रक्यः । मालव्यः ।

टकार इत्संज्ञक होनेके कारण स्त्रीलिङ्गमें ङीप् होगा, जैसे-क्षौद्रकी ।

आयुधजीवी अर्थ न होनेपर मल्लाः ।

संघ न होनेपर सम्राट् ।

वाहीक अर्थ न होनेपर शबराः ।

अब्राह्मण न होनेपर गोपालवाः । शालङ्कायनाः ।

इस स्थलमें ब्राह्मणसे तद्विशेषग्रहण और राजन्यसे स्वरूपग्रहण होगा ॥

२०६८ वृकाट्टेण्यण् ।५।३।११५॥

आयुधजीविसंघवाचकात्स्वार्थे । वार्केण्यः । आयुधेति किम् । जातिशब्दान्मा भूत् ॥

२०६८-आयुधजीविसमूहवाचक वृक शब्दके उत्तर स्वार्थमें टेण्यण् प्रत्यय हो, जैसे-वार्केण्यः ।

आयुध कहनेसे जातिवाचकके उत्तर नहीं होगा ।

२०६९ दामन्यादित्रिगर्तषष्ठाच्छः । ५ । ३ । ११६ ॥

दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः स्यात् । त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः ॥

आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
क्रोष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः१॥

दामनीयः । दामनीयौ । दामनयः । औलपि-औलपीयः । त्रिगर्त-त्रिगर्तीयः । कौण्डोपरथीयः । दाण्डकीयः ॥

२०६९-आयुधजीविसंघवाचक दामान्यादि, त्रिगर्तषष्ठ शब्दोंके उत्तर स्वार्थमें छ प्रत्यय हो, त्रिगर्तः षष्ठो वर्गो येषां ते= त्रिगर्त्तषष्ठाः ।

कौंडोपरथ, दाण्डकी, क्रोष्टुकि, जालमानि, ब्रह्मगुप्त और जालकि शब्द भी त्रिगर्त्त कहे जातेहैं ।

दामनीयः । दामनीयौ । दामनयः । औलपि, औलपीयः । त्रिगर्त्त, त्रिगर्तीयः । कौंडोपरथीयः । दाण्डकीयः ॥

२०७०पश्वादियौधेयादिभ्योऽणञौ। ५ । ३ । ११७ ॥

आयुधजीविसंघवाचिभ्य एभ्यः क्रमादणञौ स्तः स्वार्थे । पार्शवः । पार्शवौ । पर्शवः। यौधेयः। यौधेयौ । यौधेयाः ॥

२०७०-आयुधजीविसंघवाचक पर्श्वादि और यौधेयादि शब्दोंके उत्तर स्वार्थमें क्रमसे अण् और अञ् प्रत्यय हों, जैसे-पार्शवः । पार्शवौ । पर्शवः । यौधेयः । यौधेयौ । यौधेयाः ॥

२०७१ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् । ५ । ३ । ११८ ॥

अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ् स्यात् । अभिजितोऽपत्यमाभिजित्यः।वैदभृत्यः । शालावत्यः । शैखावत्यः । शामीवत्यः।और्णावत्यः । श्रौमत्यः ॥

२०७१-अभिजित्, विदभृत्, शालावत्, शिखावत्, शमीवत्, ऊर्णावत् और श्रुमत्, इन अण्प्रत्ययान्त शब्दोंके उत्तर स्वार्थमें यञ् प्रत्यय हो, जैसे-अभिजितोऽपत्यम्= आभिजित्यः । वैदभृत्यः । शालावत्यः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः ॥

२०७२ ञ्यादयस्तद्राजाः । ५ । ३ । ११९ ॥

पूगाञ्ञ्य इत्यारभ्य उक्ता एतत्संज्ञाः स्युः । तेनास्त्रियां बहुषु लुक् । लोहितध्वजाः । कपोतपाकाः । कौञ्जायनाः । ब्राध्नायना इत्यादि ॥

२०७२-"पूगात् ञ्यः २०६६" इस सूत्रसे लेकर इस प्रकरणमें उक्त सम्पूर्ण प्रत्ययोंकी तद्राज संज्ञा हो, तद्द्वारा स्त्रीलिङ्गभिन्न स्थलमें बहुत अर्थमें प्रत्ययका लुक् होगा, जैसे-लोहितध्वजाः । कपोतपाकाः । कौञ्जायनाः । ब्राध्नायनाः-इत्यादि ॥

२०७३ पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च । ५ । ४ । १ ॥

लोपवचनमनैमित्तिकत्वार्थम् । अतो न स्थानिवत् । पादः पत् । तद्धितार्थ इति समासे कृते प्रत्ययः । वुन्नन्तं स्त्रियामेव । द्वौ द्वौ पादौ ददाति द्विपदिकाम् । द्विशतिकाम् । पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात् ॥ द्विमोदिकिकाम् ॥

२०७३-संख्यावाचक शब्द पूर्वमें रहते पाद और शत शब्दके उत्तर वीप्सार्थमें वुन् प्रत्यय और पाद,शतके अन्त्यवर्ण का लोप हो,इस सूत्रसे लोपविधान अनैमित्तिकत्वार्थ है, इस कारण स्थानिवद्भाव नहीं होगा । पाद शब्दके स्थानमें पद् आदेश हो (४१४) । तद्धितार्थमें (७२८) समास करनेपर प्रत्यय होगा । वुन्नन्त पद स्त्रीलिङ्ग हो, जैसे-द्वौ द्वौ पादौ ददाति=द्विपदिकाम् । द्विशतिकाम् । पाद और शत शब्दका ग्रहण अनर्थक है क्योंकि, यह कार्य्य अन्यत्र भी देखा जाताहै, द्विमोदिकिकाम् ॥

२०७४ दण्डव्यवसर्गयोश्च ।५।४ ।२ ॥

वुन् स्यात् । अवीप्सार्थमिदम् । द्वौ पादौ दण्डितः द्विपदिकां द्विशतिकां व्यवसृजति ददातीत्यर्थः ॥

२०७४-दंड और व्यवसर्ग अर्थमें वुन् प्रत्यय हो । यह सूत्र अवीप्सार्थ है । द्वौ पादौ दंडितः=द्विपदिकां व्यवसृजति, ददातीत्यर्थः ॥

२०७५ स्थूलादिभ्यः प्रकारवचने कन् । ५ । ४ । ३ ॥

जातीयरोपवादः । स्थूलकः । अणुकः ॥ चञ्चद्बृहतोरुपसंख्यानम् ॥ * ॥ चञ्चत्कः । बृहत्कः॥सुराया अहौ ॥॥ सुरावर्णोऽहिः सुरकः ॥

२०७५-स्थूलादि शब्दोंके उत्तर प्रकारार्थमें कन् प्रत्यय हो, यह सूत्र जातीयर् प्रत्ययका विशेषक है, जैसे-स्थूलकः । अणुकः ॥

चञ्चत् और बृहत् शब्दके उत्तर भी अण् प्रत्यय हो * जैसे-चञ्चत्कः । बृहत्कः ।

सुरा शब्दके उत्तर अहि अर्थात् सर्पार्थमें कन् प्रत्यय हो, जैसे-सुरावर्णोऽहिः=सुरकः ॥

२०७६ अनत्यन्तगतौ क्तात् ।५।४।४ ॥

छिन्नकम् । भिन्नकम् । अभिन्नकम् ॥

२०७६-अनत्यन्त गति अर्थमें क्तप्रत्ययान्त शब्दके उत्तर कन् प्रत्यय हो, जैसे-छिन्नकम् । भिन्नकम्। अभिन्नकम्।

२०७७ न सामिवचने । ५ । ४ । ५ ॥

सामिपर्याये उपपदे क्तान्तान्न कन् । सामिकृतम् । अर्धकृतम् । अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्न प्राप्तः । इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति । बहुतरकम् ॥

२०७७-सामिपर्य्यायवाचक उपपद रहते क्त प्रत्ययान्त शब्दके उत्तर कन् प्रत्यय न हो,जैसे-सामिकृतम् । अर्द्धकृतम्। इस स्थलमें प्रकृतिसे ही अनत्यन्त गति (सर्वावयवसे सम्बन्धाभावके) अभिधानके कारण पूर्वसूत्रसे कन् प्रत्ययकी प्राप्ति नहीं थी, इसलिये यह निषेध सूत्र ही अत्यन्त स्वार्थिक जो कन् प्रत्यय उसको ज्ञापन करताहै, जैसे-बहुतरकम् ॥

२०७८ बृहत्या आच्छादने ।५।४।६ ॥

कन् स्यात् । द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा । आच्छादने किम् । बृहती छन्दः ॥

२०७८-आच्छादनार्थमें बृहती शब्दके उत्तर कन् प्रत्यय हो, जैसे-द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा। आच्छादन न होनेपर कन् प्रत्यय नहीं होगा, जैसे-बृहती छन्दः ॥

२०७९ अषडक्षाशितङ्ग्वलङ्कर्मालंपुरुषाध्युत्तरपदात्खः । ५ । ४ । ७ ॥

स्वार्थे । अषडक्षीणो मन्त्रः । द्वाभ्यामेव कृत इत्यर्थः। आशिता गावोऽस्मिन्निति आशितङ्गवीनमरण्यम् । निपातनात्पूर्वस्य मुम् । अलंकर्मीणः । अलंपुरुषीणः । ईश्वराधीनः । नित्योऽयं खः । उत्तरसूत्रे विभाषाग्रहणात् ॥ अन्येऽपि केचित्स्वार्थिकाः प्रत्यया नित्यमिष्यन्ते तमबादयः प्राक्कनः, ञ्यादयः प्राग्वुनः, आमादयः प्राङ् मयटः, बृहतीजात्यन्ताः समासान्ताश्चेति ॥

२०७९-अषडक्ष,आशितंगु,अलङ्कर्मन्, अलंपुरुष शब्द और अधि शब्द उत्तर पदमें हैं जिनके ऐसे शब्दोंके उत्तर स्वार्थमें ख प्रत्यय हो, जैसे-अषडक्षीणो मंत्रः,द्वाभ्यामेव कृत इत्यर्थः। आशिता गावोऽस्मिन्=आशितङ्गवीनं शरण्यम्, यहां निपातनसे पूर्वपदको मुम्का आगम हुआ । अलङ्कर्मणे=अलङ्कर्मीणः । अलंपुरुषीणः । ईश्वराधीनः । पर सूत्रमें विभाषा ग्रहणके कारण यह ख प्रत्यय नित्य है । ख भिन्न और भी कतिपय स्वार्थिक प्रत्यय नित्य इष्ट हैं । जैसे-"अतिशायने तमप्० ५।३।५५" इससे लेकर "अवक्षेपणे कन् ५।३।९५" इसके पूर्वपर्य्यन्त विहित प्रत्यय, "पूगाञ्ञ्योऽग्रामणीपूर्वात् ५।३।११२" इससे लेकर "पादशतस्य संख्यादेर्वीप्सायां वुन् ५।४।१" इसके पूर्वपर्य्यन्त विहित । , "किमेत्तिङव्ययघादाम्० ५ । ४ । ११ " इससे लेकर " तत्प्रकृतवचने मयट् ५।४।२१" इसके पूर्वपर्य्यन्त विहित प्रत्यय और "बृहत्या आच्छादने ५।४।६" "अषडक्षा० ५।४।७" "जात्यन्ताच्छ बन्धुनि ५।४।९" इनसे विहित प्रत्यय और समासान्त प्रत्यय ऐसा भाष्य है ॥

२०८० विभाषाञ्चेरदिक् स्त्रियाम् । ५ । ४ । ८ ॥

अदिक्स्त्रीवृत्तेरञ्चत्यन्तात् प्रातिपदिकात्खः स्याद्वा स्वार्थे । प्राक्-प्राचीनम् । प्रत्यक्-प्रतीचीनम् । अवाक्-अवाचीनम् । निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः । अर्वन्तमञ्चतीति अर्वाक्, अर्वाचीनम् । अदिक्स्त्रियां किम् । प्राची दिक् । उदीची दिक् । दिग्ग्रहणं किम् । प्राचीना ब्राह्मणी । स्त्रीग्रहणं किम् । प्राचीनं ग्रामादाम्राः ॥

२०८०-दिक्रूप स्त्रीवृत्ति न हो ऐसे अञ्चु धात्वन्त प्रातिपदिकके उत्तर स्वार्थमें विकल्प करके ख प्रत्यय हो, जैसे-प्राक्, प्राचीनम् । प्रत्यक्, प्रतीचीनम् । अवाक्, अवाचीनम् । "निकृष्टप्रतिकष्टार्वरेफयाप्यावमाधमाः" ऐसे अभिधानके अनुसार अर्वत् शब्दसे निकृष्ट अर्थ जानना । अर्वन्तमञ्चति=अर्वाक्, अर्वाचीनम् । दिक्रूपस्त्रीवृत्ति होनेपर जैसे-प्राची दिक्, उदीची दिक् । दिक् शब्दका ग्रहण क्यों किया ? तो 'प्राचीना ब्राह्मणी' यहां उक्त प्रत्यय हो, नहीं तो अस्त्रीवृत्ति न होनेसे प्रत्यय नहीं होता । स्त्रीग्रहण क्यों किया ? तो 'प्राचीनं ग्रामादाम्राः' यहां हो ॥

२०८१ जात्यन्ताच्छ बन्धुनि । ५ । ४ । ९ ॥

ब्राह्मणजातीयः । बन्धुनि किम् । ब्राह्मणजातिः शोभना । जातिर्व्यञ्जकं द्रव्यं बन्धु ॥

२०८१-बंधु अर्थमें जात्यन्त शब्दके उत्तर छ प्रत्यय हो, जैसे-ब्राह्मणजातीयः । बंधु न होनेपर छ प्रत्यय न होगा, जैसे-ब्राह्मणजातिः शोभना । जातिव्यञ्जक द्रव्यको बंधु कहतेहैं ॥

२०८२ स्थानान्ताद्विभाषा सस्थानेनेति चेत् । ५ । ४ । १० ॥

सस्थानेन तुल्येन चेत् स्थानान्तमर्थवदित्यर्थः। पितृस्थानीयः पितृस्थानः । सस्थानेन किम् । गोः स्थानम् ॥

२०८२-यदि सस्थान अर्थात् तुल्यरूप अर्थसे स्थानान्त शब्द अर्थविशिष्ट हो तो उसके उत्तर विकल्प करके छ प्रत्यय हो, जैसे-पितृस्थानीयः, पितृस्थानः । तुल्यार्थमें वर्त्तमान न होनेपर छ प्रत्यय नहीं होगा, जैसे-गोः स्थानम् ॥

२०८३ अनुगादिनष्ठक् । ५ । ४ । १३ ॥

अनुगदतीत्यनुगादी, स एवानुगादिकः ॥

२०८३–अनुगादिन् शब्दके उत्तर ठक् प्रत्यय हो, जैसे–अनुगदति इति=अनुगादी, स एव=आनुगादिकः ॥

२०८४ विसारिणो मत्स्ये ।५।४।१६॥

अण् स्यात् । वैसारिणः । मत्स्ये इति किम् । विसारी देवदत्तः ॥

२०८४–मत्स्यार्थमें विसारिन् शब्दके उत्तर अण् प्रत्यय हो, जैसे–वैसारिणः । मत्स्यभिन्नार्थमें अण् प्रत्यय न होगा, जैसे–विसारी देवदत्तः ॥

२०८५ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् । ५ । ४ । १७ ॥

अभ्यावृत्तिर्जन्म । क्रियाजन्मगणनवृत्तेः संख्याशब्दात्स्वार्थे कृत्वसुच् स्यात् । पञ्चकृत्वो भुङ्क्ते । संख्यायाः किम् । भूरिवारान् भुङ्क्ते॥

२०८५–क्रियाकी उत्पत्ति गणनवृत्ति संख्यावाचक शब्दके उत्तर स्वार्थमें कृत्वसुच् प्रत्यय हो, जैसे–पञ्चकृत्वो भुंक्ते । संख्यावाचक न होनेपर, भूरिवारान् भुंक्ते ॥

२०८६ द्वित्रिचतुर्भ्यः सुच् ।५।४।१८॥

कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिः । रात्सस्य । चतुः ॥

२०८६–द्वि, त्रि और चतुर् शब्दके उत्तर सुच् प्रत्यय हो, यह सूत्र कृत्वसुच् प्रत्ययका विशेषक है, जैसे–द्विर्भुंक्ते । त्रिः । "रात्सस्य २८०" इस सूत्रसे सुच्सम्बन्धी सकारका लोप होनेपर 'चतुः' पद सिद्ध हुआ ॥

२०८७ एकस्य सकृच्च । ५ । ४ ।१९॥

सकृदित्यादेशः स्याच्चात्सुच् । सकृद्भुङ्क्ते । संयोगान्तस्येति सुचो लोपः । न तु हल्ङ्याबिति । अभैत्सीदित्यत्र सिच इव सुचोऽपि तदयोगात् ॥

२०८७–एक शब्दके स्थानमें सकृत् आदेश हो और चकारसे सुच् प्रत्यय भी हो, जैसे–सकृद्भुंक्ते, यहां "संयोगान्तस्य० ५४" इस सूत्रसे सुच् प्रत्यका लोप हुआ "हल्ङ्याप्० २५२" इस सूत्रसे तो 'अभैत्सीत्' इस स्थलमें सिच्की समान सुच्का भी लोप नहीं होसकताहै ॥

२०८८ विभाषा बहोर्धाऽविप्रकृष्टकाले । ५ । ४ । २० ॥

अविप्रकृष्ट आसन्नः । बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते । आसन्नकाले किम् । बहुकृत्वो मासस्य भुङ्क्ते ॥

२०८८–अविप्रकृष्ट अर्थात् आसन्नकाल होनेपर बहु शब्दके उत्तर विकल्प करके धा प्रत्यय हो, जैसे–बहुधा, बहुकृत्वा वा दिवसस्य भुंक्ते । आसन्नकालार्थ न होनेपर, जैसे–बहुकृत्वो मासस्य भुंक्ते ॥

२०८९ तत्प्रकृतवचने मयट् ।५।४।२१॥

प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनम् । भावेऽधिकरणे वा ल्युट् । आद्ये, प्रकृतमन्नमन्नमयम् । अपूपमयम् । यवागूमयी । द्वितीये, अन्नमयो यज्ञः । अपूपमयं पर्व ॥

२०८९–तत्प्रकृतवचने अर्थात् प्राचुर्यसे जो प्रस्तुत उसको प्रकृत कहतेहैं, उसका वचन, अर्थात् प्रतिपादनअर्थमें मयट् प्रत्यय हो, 'वचनम्' इसमें भाव वा अधिकरण वाच्यमें ल्युट् प्रत्यय हुआहै । आद्य अर्थात् भाव ल्युडन्त पक्षमें, जैसे–प्रकृतमन्नम्=अन्नमयम् । अपूपमयम् । यवागूमयम् । अधिकरणल्युडन्त पक्षमें, जैसे–अन्नमयो यज्ञः । अपूपमयं पर्व ॥

२०९० समूहवच्च बहुषु । ५ । ४ ।२२॥

सामूहिकाः प्रत्यया अतिदिश्यन्ते चान्मयट् । मोदकाः प्रकृताः । मौदकिकम् । मोदकमयम् । शाष्कुलिकम् । शाष्कुलीमयम् । द्वितीयेऽर्थे । मौदकिको यज्ञः । मोदकमयः ॥

२०९०–बहुत्व अर्थमें समूहवत् प्रत्यय और चकारसे मयट् प्रत्यय हो, जैसे–मोदकाः प्रकृताः=मौदकिकम्, मोदकमयम् । शाष्कुलिकम्, शाष्कुलीमयम् । द्वितीय पक्षमें, जैसे–मौदकिको यज्ञः, मोदकमयः ॥

२०९१ अनन्तावसथेतिहभेषजाञ्ञ्यः । ५ । ४ । २३ ॥

अनन्त एवानन्त्यम् । आवसथ एवावसथ्यम् । इतिहेति निपातसमुदायः । ऐतिह्यम् । भेषजमेव भैषज्यम् ॥

२०९१–अनन्त, आवसथ, इतिह और भेषज शब्दके उत्तर ञ्य प्रत्यय हो, जैसे–अनन्त एव=आनन्त्यम् । आवसथ एव=आवसथ्यम् । 'इतिह' यह निपातसमुदाय है,इतिह एव=ऐतिह्यम् । भेषजमेव=भैषज्यम् ।

२०९२ देवतान्तात्तादर्थ्ये यत्।५।४।२४॥

तदर्थ एव तादर्थ्यम् । स्वार्थे ष्यञ् । अग्निदेवतायै इदमग्निदेवत्यम् । पितृदेवत्यम् ॥

२०९२–देवतान्त शब्दके उत्तर तादर्थ्यमें यत् प्रत्यय हो, तदर्थ एव=तादर्थ्यम्, यहां स्वार्थमें ष्यञ् है, जैसे–अग्निदेवतायै इदम्=आग्निदेवत्यम् । पितृदेवत्यम् ॥

२०९३ पादार्घाभ्यां च । ५ । ४ ।२५॥

पादार्थमुदकं पाद्यम् । अर्घ्यम् ॥ नवस्य नू आदेशः, त्नप्तनप्खाश्च प्रत्यया वक्तव्याः ॥ * ॥ नूत्नम् । नूतनम् । नवीनम् ॥ नश्च पुराणे प्रात् ॥ * ॥ पुराणार्थे वर्तमानात्प्रशब्दान्नो वक्तव्यः। चात्पूर्वोक्ताः । प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ॥ भागरूपनामभ्यो धेयः ॥ * ॥ भाग-

धेयम् । रूपधेयम् । नामधेयम् ॥ आग्नीध्रसाधारणादञ् ॥ * ॥ आग्नीध्रम् । साधारणम् । स्त्रियां ङीप् । आग्नीध्री । साधारणी ॥

२०९३-पाद और अर्घ शब्दके उत्तर यत् प्रत्यय हो, जैसे-पादार्थमुदकम्=पाद्यम् । अर्घ्यम् ।

नव शब्दके स्थानमें नू आदेश और उसके उत्तर त्नप्, तनप् और ख प्रत्यय हो * नूत्नम् । नूतनम् । नवीनम् ।

पुराणार्थमें वर्त्तमान प्र शब्दके उत्तर न प्रत्यय और चकारसे पूर्वोक्त प्रत्यय भी हों * जैसे-प्रणम् । प्रत्नम् । प्रतनम् । प्रीणम् ।

भाग, रूप और नाम शब्दके उत्तर धेय प्रत्यय हो* जैसे-भागधेयम् । रूपधेयम् । नामधेयम् ।

आग्नीध्र और साधारण शब्दके उत्तर अञ् प्रत्यय हो * जैसे-आग्नीध्रम् । साधारणम् । स्त्रीलिङ्गमें ङीप् प्रत्यय होगा, जैसे-आग्नीध्री । साधारणी ॥

२०९४ अतिथेर्ञ्यः । ५ । ४ । २६ ॥

तादर्थ्य इत्येव । अतिथये इदमातिथ्यम् ॥

२०९४-अतिथि शब्दके उत्तर तादर्थ्यमें ञ्य प्रत्यय हो, जैसे-अतिथये इदम्=आतिथ्यम् ॥

२०९५ देवात्तल् । ५ । ४ । २७ ॥

देव एव देवता ॥

२०९५-देव शब्दके उत्तर स्वार्थमें तल् प्रत्यय हो, जैसे-देव एव=देवता ॥

२०९६ अवेः कः । ५ । ४ । २८ ॥

अविरेवाविकः ॥

२०९६-अवि शब्दके उत्तर स्वार्थमें क प्रत्यय हो, जैसे-अविरेव=अविकः ॥

२०९७ यावादिभ्यः कन् । ५ ।४।२९॥

याव एव यावकः । मणिकः ॥

२०९७-यावादि शब्दोंके उत्तर स्वार्थमें कन् प्रत्यय हो, जैसे-याव एव=यावकः । मणिकः ॥

२०९८ लोहितान्मणौ । ५ । ४। ३०॥

लोहित एव मणिर्लोहितकः ॥

२०९८-मणि होनेपर लोहित शब्दके उत्तर स्वार्थमें कन् प्रत्यय हो, लोहित एव=लोहितको मणिः ॥

२०९९ वर्णे चानित्ये । ५ । ४ । ३१॥

लोहितकः कोपेन ॥ लोहिताल्लिङ्गबाधनं वा ॥ * ॥ लोहितिका, लोहिनिका कोपेन ॥

२०९९-अनित्य वर्ण होनेपर लोहित शब्दके उत्तर कन् प्रत्यय हो, जैसे-लोहितकः कोपेन ।

लोहित शब्दके उत्तर विकल्प करके लिङ्गबाध न हो * जैसे-लोहितिका, लोहिनिका कोपेन ॥

२१०० रक्ते । ५ । ४ । ३२ ॥

लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन् स्यात् । लिङ्गबाधनं वेत्येव । लोहितिका, लोहिनिका, शाटी ॥

२१००-लाक्षादिसे रक्तमें वर्त्तमान जो लोहित शब्द उसके उत्तर कन् प्रत्यय हों, विकल्प करके लिङ्गबाधन भी होगा, जैसे-लोहितिका, लोहिनिका शाटी ॥

२१०१ कालाच्च । ५ । ४ । ३३ ॥

वर्णे चानित्ये रक्ते इति द्वयमनुवर्तते । कालकं मुखं वैलक्ष्येण । कालकः पटः । कालिका शाटी ॥

२१०१-अनित्य वर्ण होनेपर और लाक्षादिसे रक्त होनेपर काल शब्दके उत्तर कन् प्रत्यय हो, जैसे-कालकं मुखं वैलक्ष्येण । कालकः पटः । कालिका शाटी ॥

२१०२ विनयादिभ्यष्ठक् । ५।४। ३४ ॥

विनय एव वैनयिकः । सामयिकः ॥ उपायो ह्रस्वत्वं च ॥ औपयिकः ॥

२१०२-विनयादि शब्दोंके उत्तर ठक् प्रत्यय हो, जैसे-विनय एव-वैनयिकः । सामयिकः ।

उपाय शब्दको ह्रस्व भी हो * जैसे-औपयिकः ॥

२१०३वाचो व्याहृतार्थायाम्।५।४।३५॥

सन्दिष्टार्थायां वाचि विद्यमानाद्वाक्शब्दात्स्वार्थे ठक् स्यात् । संदेशवाग्वाचिकं स्यात् ॥

२१०३-व्याहृतार्थ अर्थात् सन्दिष्टार्थ वचनमें विद्यमान वाच् शब्दके उत्तर स्वार्थमें ठक् प्रत्यय हो, जैसे-संदेशवाक् वाचिकं स्यात् ॥

२१०४ तद्युक्तात्कर्मणोऽण् । ५।४।३६॥

कर्मैव कार्मणम् । वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः ॥

२१०४-तद्युक्त कर्मन् शब्दके उत्तर स्वार्थमें अण् प्रत्यय हो, जैसे-कर्म एव=कार्मणम् अर्थात् सन्दिष्ट वाणीको सुनकर क्रियमाण कर्म ॥

२१०५ ओषधेरजातौ । ५ । ४ । ३७ ॥

स्वार्थेऽण् । औषधं पिबति । अजातौ किम् । ओषधयः क्षेत्रे रूढाः ॥

२१०५-जातिभिन्न होनेपर ओषधि शब्दके उत्तर स्वार्थमें अण् प्रत्यय हो, जैसे-औषधं पिबति । जाति होनेपर, ओषधयः क्षेत्रे रूढाः ॥

२१०६ प्रज्ञादिभ्यश्च । ५ । ४ । ३८ ॥

प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री। दैवतः। बान्धवः॥

२१०६-प्रज्ञादि शब्दोंके उत्तर स्वार्थमें अण् प्रत्यय हो, जैसे-प्रज्ञ एव=प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः ॥

२१०७ मृदस्तिकन् । ५ । ४ । ३९ ॥

मृदेव मृत्तिका ॥

२१०७–मृद् शब्दके उत्तर स्वार्थमें तिकन् प्रत्यय हो, जैसे–मृदेव=मृत्तिका ॥

२१०८ सस्नौ प्रशंसायाम् ।५।४।४० ॥

रूपपोऽपवादः । प्रशस्ता मृत्, मृत्सा । मृत्स्ना। उत्तरसूत्रेऽन्यतरस्यांग्रहणान्नित्योऽयम् ॥

२१०८–प्रशंसार्थमें मृद् शब्दके उत्तर स और स्न प्रत्यय हो, यह प्रत्यय रूपप् प्रत्ययका विशेषक है, जैसे–प्रशस्ता मृत्= मृत्सा । मृत्स्ना । इस सूत्रके परवर्ती सूत्रमें ' अन्यतरस्याम् ' पदका ग्रहण करनेसे यह विधि नित्य है ॥

२१०९ बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् । ५ । ४ । ४२ ॥

बहूनि ददाति बहुशः । अल्पानि अल्पशः॥ बह्वल्पार्थान्मंगलाऽमंगलवचनम् ॥ * ॥ नेह । बहूनि ददात्यनिष्टेषु । अल्पं ददात्याभ्युदयिकेषु॥

२१०९–बहु और अल्पार्थक कारकके उत्तर विकल्प करके शस् प्रत्यय हो, जैसे–बहूनि ददाति=बहुशः । अल्पानि=अल्पशः ।

बहु और अल्पार्थक शब्दसे क्रमसे मंगल और अमंगल गम्यमान होनेपर ही उक्त प्रत्यय हो * इस कारण बहूनि ददाति अनिष्टेषु अल्पं ददाति अभ्युदयेषु, इस स्थलमें विपरीत होनेसे शस् प्रत्यय नहीं हुआ ॥

२११० संख्यैकवचनाच्च वीप्सायाम्। ५ । ४ । ४३ ॥

द्वौ द्वौ ददाति द्विशः । माषंमाषं माषशः । प्रस्थशः परिमाणशब्दावृत्तावेकार्था एव । संख्यैकवचनात्किम् । घटंघटं ददाति । वीप्सायां किम् । द्वौ ददाति । कारकादित्येव । द्वयोर्द्वयोः स्वामी ॥

२११०–वीप्सार्थमें संख्यावाचक शब्द और एकार्थप्रतिपादक शब्दके उत्तर शस् प्रत्यय हो, जैसे–द्वौद्वौ ददाति= द्विशः । माषंमाषम्=माषशः । प्रस्थशः । परिमाणवाचक शब्द वृत्तिमें एकार्थ ही है, संख्यैकवचन न होनेपर घटंघटं ददाति । वीप्सार्थ न होनेपर द्वौ ददाति । कारक न होनेपर, जैसे–द्वयोर्द्वयोः स्वामी, इस स्थलमें शस् प्रत्यय नहीं हुआ ॥

२१११ प्रतियोगे पञ्चम्यास्तसिः । ५ । ४ । ४४ ॥

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात् । प्रद्युम्नः कृष्णतः प्रति ॥ आद्यादिभ्य उपसंख्यानम् ॥ * ॥ आदौ आदितः । मध्यतः । अन्ततः । पृष्ठतः॥पार्श्वतः॥ आकृतिगणोऽयम् । स्वरेण स्वरतः । वर्णतः ॥

२१११–कर्मप्रवचनीय प्रति शब्दके योगमें जो पञ्चमी विहित हो, तदन्तके उत्तर तसि प्रत्यय हो, जैसे–प्रद्युम्नः कृष्णतः प्रति ।

आद्यादि शब्दोंके उत्तर भी तसि प्रत्यय हो, जैसे–आदौ= आदितः । मध्यतः । अन्ततः । पृष्ठतः । पार्श्वतः । यह आकृतिगण है, इससे स्वरेण=स्वरतः । वर्णतः, यह सब सिद्ध हुए ॥

२११२ अपादाने चाऽहीयरुहोः । ५ । ४ । ४५ ॥

अपादाने या पञ्चमी तदन्तात्तसिः स्यात् । ग्रामादागच्छति । ग्रामतः । अहीयरुहोः किम् । स्वर्गाद्धीयते । पर्वतादवरोहति ॥

२११२–अपादानमें जो पञ्चमी, तदन्तके उत्तर तसि प्रत्यय हो, हीय और रुहके योगमें न हो, जैसे–ग्रामात् आगच्छति=ग्रामतः । हीय और रुहके योग होनेपर, जैसे–स्वर्गाद्धीयते । पर्वतादवरोहति ॥

२११३ अतिग्रहाऽव्यथनक्षेपेष्वकर्तरि तृतीयायाः । ५ । ४ ।४६ ॥

अकर्तरि तृतीयान्ताद्वा तसिः स्यात् । अतिक्रम्य ग्रहोऽतिग्रहः।चारित्रेणातिगृह्यते।चारित्रतोऽतिगृह्यते।चारित्रेणान्यानतिक्रम्य वर्तत इत्यर्थः। अव्यथनमचलनम् । वृत्तेन न व्यथते वृत्ततो न व्यथते । वृत्तेन न चलतीत्यर्थः। क्षेपे, वृत्तेन क्षिप्तः । वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः । अकर्तरीति किम् । देवदत्तेन क्षिप्तः ॥

२११३–अतिग्रह, अव्यथन और क्षेप (निन्दा) अर्थमें कर्तृकारकभिन्न तृतीयान्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, अतिक्रम्य ग्रहः अतिग्रहः, अतिक्रमपूर्वक ग्रहणको 'अतिग्रह' कहतेहैं, जैसे–चारित्रेणातिगृह्यते=चारित्रतोऽतिगृह्यते, चारित्रेणान्यानतिक्रम्य वर्त्तते इत्यर्थः । अव्यथन शब्दसे अचलन जानना, जैसे–वृत्तेन न व्यथते=वृत्ततो न व्यथते, वृत्तेन न चलति इत्यर्थः । क्षेपार्थ,जैसे–वृत्तेन क्षिप्तः। वृत्ततः क्षिप्तः। वृत्तेन निन्दितः इत्यर्थः। तृतीयान्त कर्तृकारक होनेपर, जैसे– देवदत्तेन क्षिप्तः ॥

२११४ हीयमानपापयोगाच्च।५।४।४७॥

हीयमानपापयुक्तादकर्तरि तृतीयान्ताद्वा तसिः । वृत्तेन हीयते । वृत्तेन पापः । वृत्ततः । क्षेपस्याऽविवक्षायामिदम् । क्षेपे तु पूर्वेण सिद्धम्। अकर्तरि किम् । देवदत्तेन हीयते ॥

२११४–हीयमान और पापयुक्त कर्तृकारक भिन्न तृतीयान्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, जैसे–वृत्तेन हीयते

वृत्तो ह्रीयते । वृत्तेन पापः—वृत्ततः पापः । क्षेपकी अविवक्षामें यह सूत्र लगेगा, क्षेपार्थमें तो पूर्व सूत्रसे ही सिद्ध है । कर्तृकारक तृतीयान्त होनेपर देवदत्तेन ह्रीयते ॥

२११५ षष्ठ्या व्याश्रये । ५ । ४ ।४८॥

षष्ठ्यन्ताद्वा तसिः स्यान्नानापक्षसमाश्रये । देवा अर्जुनतोऽभवन् । आदित्याः कर्णतोऽभवन् । अर्जुनस्य कर्णस्य पक्षे इत्यर्थः । व्याश्रये किम् । वृक्षस्य शाखा ॥

२११५—नानापक्षसमाश्रय अर्थ होनेपर षष्ठी विभक्त्यन्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, जैसे—देवा अर्जुनतोऽभवन् । आदित्याः कर्णतोऽभवन्, अर्जुनस्य कर्णस्य पक्षे इत्यर्थः । व्याश्रय न होनेपर, जैसे—वृक्षस्य शाखा ॥

२११६ रोगाच्चापनयने । ५ । ४ ।४९॥

रोगवाचिनः षष्ठ्यन्ताद्वा तसिश्चिकित्सायाम् । प्रवाहिकातः कुरु । प्रतीकारमस्याः कुर्वित्यर्थः । अपनयने किम् । प्रवाहिकायाः प्रकोपनं करोति ॥

२११६—चिकित्सार्थमें रोगवाचक षष्ठ्यन्त पदके उत्तर विकल्प करके तसि प्रत्यय हो, जैसे—प्रवाहिकातः कुरु, प्रतीकारमस्याः कुरु इत्यर्थः । चिकित्सार्थ न होनेपर प्रवाहिकायाः प्रकोपनं करोति ॥

२११७ कृभ्वस्तियोगे संपद्यकर्तरि च्विः । ५ । ४ । ५० ॥

अभूततद्भाव इति वक्तव्यम् ॥ * ॥ विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे ॥

२११७—कृ, भू और अस्धातुनिष्पन्न पदके योगमें विकारात्मताको प्राप्त किये प्रकृतिमें वर्त्तमान विकारवाचक शब्दके उत्तर स्वार्थमें विकल्प करके च्वि प्रत्यय हो ।

अभूततद्भावमें हो, ऐसा कहना चाहिये * ॥

२११८ अस्य च्वौ । ७ । ४ ।३२ ॥

अवर्णस्य ईत्स्यात् च्वौ । वेर्लोपः । च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः संपद्यते, तं करोति कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ॥ अव्ययस्य च्वावीत्वं नेति वाच्यम् ॥*॥ दोषाभूतमहः । दिवाभूता रात्रिः । एतच्चाव्ययीभावश्चेतिसूत्रे भाष्ये उक्तम् ॥

२११८—च्वि प्रत्यय परे रहते अकार और आकारके स्थानमें ईकार हो । च्वि प्रत्ययसम्बन्धी वि–का लोप हुआ, और च्विप्रत्ययान्तत्वके कारण अव्ययत्व हुआ, जैसे—अकृष्णः कृष्णः सम्पद्यते तं करोति=कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ।

च्वि प्रत्यय परे रहते अव्ययसंज्ञक शब्दके अवर्णके स्थानमें ई नहीं हो* जैसे—दोषाभूतमहः । दिवाभूतारात्रिः । यह विषय "अव्ययीभावश्च २ । ४ । १८" इस सूत्रके भाष्यमें कहाहै ॥

२११९ क्यच्च्व्योश्च । ६ । ४ । १५२ ॥

हलः परस्यापत्ययकारस्य लोपः स्यात् क्ये च्वौ च परतः । गार्गीभवति ॥

२११९—क्यच् और च्वि प्रत्यय परे रहते हल् वर्णके परे स्थित अपत्य यकारका लोप हो, जैसे—गार्गीभवति ॥

२१२० च्वौ च । ७ । ४ । २६ ॥

च्वौ परे पूर्वस्य दीर्घः स्यात् । शुचीभवति । पटूस्यात् । अव्ययस्य दीर्घत्वं नेति केचित्, तन्निर्मूलम् । स्वस्ति स्यादिति तु महाविभाषया च्वेरभावात्सिद्धम् । स्वस्तीस्यादित्यपि पक्षे स्यादिति चेदस्तु । यदि नेष्यते तर्ह्यनभिधानात् च्विरेव नोत्पद्यते इत्यस्तु । रीङ् ऋतः । मात्रीकरोति ॥

२१२०—च्वि प्रत्यय परे रहते पूर्वपदको दीर्घ हो, जैसे—शुचीभवति । पटूस्यात् ।

कोई २ कहतेहैं कि, अव्ययसंज्ञक शब्दको दीर्घ न हो, उसका प्रमाण कुछ भी नहीं है, 'स्वस्ति स्यात्' ऐसा पद तो महाविभाषासे च्वि प्रत्ययके अभाव पक्षमें सिद्ध है 'स्वस्तीस्यात्' ऐसा प्रयोग भी विकल्प पक्षमें होगा, ऐसा कहो तो हो, यदि न होता हो तो अनभिधानके कारण च्वि प्रत्ययकी भी उत्पत्ति न हो "रीङृतः १२३४" इससे ऋदन्त अङ्गको रीङ् आदेश होकर मात्रीकरोति ॥

२१२१ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च । ५ । ४ । ५१ ॥

एषां लोपः स्यात् च्विश्च । अरूकरोति । उन्मनीस्यात् । उच्चक्षूकरोति । विचेतीकरोति । विरहीकरोति । विरजीकरोति ॥

२१२१—अरुष्, मनस्, चक्षुस्, चेतस्, रहस् और रजस् शब्दके उत्तर च्वि प्रत्यय और सकारका लोप हो, जैसे—अरूकरोति । उन्मनीस्यात् । उच्चक्षूकरोति। विचेतीकरोति । विरहीकरोति । विरजीकरोति ॥

२१२२ विभाषा साति कार्त्स्न्ये । ५ । ४ । ५२ ॥

च्विविषये सातिर्वा स्यात्साकल्ये ॥

२१२२—च्वि प्रत्ययके विषयमें साकल्यार्थमें विकल्प करके साति प्रत्यय हो ॥

२१२३ सात्पदाद्योः । ८ । ३ । १११॥

सस्य षत्वं न स्यात् । दधि सिञ्चति । कृत्स्नं शस्त्रमग्निः सम्पद्यतेऽग्निसाद्भवति । अग्नीभवति ।

महाविभाषया वाक्यमपि। कार्त्स्न्ये किम्। एकदेशेन शुक्लीभवति पटः ॥

२१२३–साति प्रत्ययके सकार और पदादि सकारको षत्व न हो, जैसे–दधि सिञ्चति। कृत्स्नं शस्त्रम् अग्निः सम्पद्यते अग्निसाद्भवति, अग्नीभवति। महाविभाषासे वाक्य भी होगा। कार्त्स्न्यार्थ न होनेपर, जैसे–शुक्लीभवति पटः, अर्थात् एक देशसे शुक्ल होताहै ॥

२१२४ अभिविधौ सम्पदा च।५।४।५३॥

सम्पदा कृभ्वस्तिभिश्च योगे सातिर्वा स्याद्व्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। सम्पदा तु वाक्यमेव। अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रम्। अग्नीभवति। जलसात्सम्पद्यते जलीभवति लवणम्। एकस्या व्यक्तेः सर्वावयवावच्छेदेनाऽन्यथाभावः कार्त्स्न्यम्। बहूनां व्यक्तीनां किंचिदवयवाऽवच्छेदेनान्यथात्वं त्वभिविधिः॥

२१२४–अभिविधि अर्थात् व्याप्ति होनेपर संपूर्वक पद् धातु और कृ, भू, अस् धातुके योगमें विकल्प करके साति प्रत्यय हो, पक्षमें कृ, भू, अस् धातुके योगमें च्वि प्रत्यय होगा, संपूर्वक पद् धातुके योगमें तो वाक्य ही होगा, जैसे–अग्निसात् सम्पद्यते, अग्निसाद्भवति शस्त्रम्, अग्नीभवति शस्त्रम्। जलसात् सम्पद्यते, जलसाद्भवति, जलीभवति लवणम्। एक व्यक्तिका सर्वावयवावच्छेदसे जो अन्यथाभाव उसको कार्त्स्न्य कहतेहैं, और बहुतसी व्यक्तियोंका किंचित् अवयवावच्छेदसे जो अन्यथात्व उसको अभिविधि कहतेहैं ॥

२१२५ तदधीनवचने। ५ ।४। ५४ ॥

सातिः स्यात्कृभ्वस्तिभिः सम्पदा च योगे। राजसात्करोति। राजसात्संपद्यते। राजाधीनमित्यर्थः ॥

२१२५–तदधीनार्थमें कृ, भू, अस् और संपूर्वक पद् धातुके योगमें साति प्रत्यय हो, जैसे–राजसात् करोति। राजसात् सम्पद्यते, अर्थात् राजाधीन करताहै ॥

२१२६ देये त्रा च। ५। ४। ५५ ॥

तदधीने देये त्रा स्यात्सातिश्च कृभ्वादियोगे। विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रासंपद्यते। पक्षे विप्रसात्करोति। देये किम्। राजसाद्भवति राष्ट्रम् ॥

२१२६–तदधीनार्थमें और देयार्थमें कृ, भू, अस् और संपूर्वक पद् धातुके योगमें त्रा और साति प्रत्यय हो, जैसे–विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रासम्पद्यते। पक्षमें विप्रसात् करोति। देयार्थ न होनेपर, जैसे–राजसात् भवति राष्ट्रम् ॥

२१२७ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्। ५ ।४। ५६ ॥

एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वन्दे रमे वा। बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः ॥

२१२७–द्वितीयान्त और सप्तम्यन्त देव, मनुष्य, पुरुष, पुरु और मर्त्य शब्दके उत्तर त्रा प्रत्यय हो, जैसे–देवत्रा वन्दे रमे वा। बहुल दके ग्रहणसे अन्य स्थलमें भी त्रा प्रत्यय होगा, जैसे–बहुत्रा जीवतो मनः ॥

२१२८ अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्। ५।४। ५७॥

द्व्यच् अवरं न्यूनं न तु ततो न्यूनमनेकाजिति यावत्तादृशमर्द्धं यस्य तस्माड्डाच् स्यात्कृभ्वस्तिभिर्योगे ॥ डाचि विवक्षिते द्वे बहुलम् ॥ * ॥ नित्यमाम्रेडिते डाचीति वक्तव्यम् ॥ * ॥ डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटाकरोति। अव्यक्तानुकरणात्किम्। दृषत्करोति। द्व्यजवरार्धात्किम्। श्रत्करोति। अवरेति किम्। खरटखरटाकरोति। त्रपटत्रपटाकरोति। अनेकाच इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परसप्तम्येव द्वित्वे सुवचेत्यवधेयम्। अनितौ किम्। पटिति करोति ॥

२१२८–कृ, भू और अस् धातुके योगमें अनेकाच् आधा भाग है जिसके ऐसे अव्यक्तानुकरण प्रातिपदिक शब्दके उत्तर डाच् प्रत्यय हो इति शब्द परे रहते नहीं हो।

डाच् प्रत्यय विवक्षित होनेपर बहुल करके द्वित्व हो * डाच् प्रत्यय परे रहते जो आम्रेडित हो, वह परे रहते पूर्व और पर वर्णको पर रूप हो * इससे तकार और पकारके स्थानमें पकार हुआ, जैसे–पटपटाकरोति। अव्यक्तानुकरण न होनेपर दृषत् करोति। द्व्यजवरार्द्ध न होनेपर, श्रत्करोति। अवर न होनेपर, खरटखरटाकरोति। त्रपटत्रपटाकरोति। "अनेकाचः" ऐसाही सूत्र करना ठीक था, इससे 'डाचि' यह पर सप्तमी ही द्वित्वविधायक वार्त्तिकमें सुवच होतीहै ऐसा जानना। इति शब्द परे होनेपर, पटिति करोति ॥

२१२९ कृञो द्वितीयतृतीयशम्बबीजात्कृषौ । ५ । ४ । ५८ ॥

द्वितीयादिभ्यो डाच् स्यात्कृञ एव योगे कर्षणेऽर्थे । बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वम् । द्वितीयं तृतीयं कर्षणं करोति, द्वितीयाकरोति, तृतीयाकरोति । शम्बशब्दः प्रतिलोमे । अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति शम्बाकरोति । बीजेन सह कर्षति बीजाकरोति ॥

२१२९–कर्षणार्थमें कृ धातुके ही योगमें द्वितीय, तृतीय, शम्ब और बीज शब्दके उत्तर डाच् प्रत्यय हो । बहुलोक्तिके कारण अव्यक्तानुकरणसे भिन्नको डाच् प्रत्यय परे (द्वित्व) नहीं होगा, जैसे–द्वितीयं तृतीयं कर्षणं करोति=द्वितीयाकरोति, तृतीयाकरोति। शम्ब शब्द प्रतिलोमवाचक है, अनुलोम क्षेत्रको पुनर्वार प्रतिलोम कर्षण करताहै, इस अर्थमें शम्बाकरोति । बीजेन सह कर्षति=बीजाकरोति ॥

२१३० संख्यायाश्च गुणान्तायाः । ५ । ४ । ५९ ॥

कृञो योगे कृषौ डाच् स्यात् । द्विगुणा करोति क्षेत्रम् । क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः ॥

२१३०–गुण शब्द अन्तमें है जिसके ऐसे संख्यावाचक शब्दके उत्तर कृ धातुके योगमें कृषि अर्थमें डाच् प्रत्यय हो, जैसे–द्विगुणाकरोति क्षेत्रम्, अर्थात् क्षेत्रको दूना कर्षण करताहै ॥

२१३१ समयाच्च यापनायाम् । ५ । ४ । ६० ॥

कृषाविति निवृत्तम् । कृञो योगे डाच् स्यात् । समयाकरोति । कालं यापयतीत्यर्थः ॥

२१३१–कृ धातुके योगमें यापनार्थमें समय शब्दके उत्तर डाच् प्रत्यय हो, यहां कर्षण अर्थ निवृत्त हुआ, जैसे–समयाकरोति, अर्थात् समयको बिताताहै ॥

२१३२ सपत्रनिष्पत्रादतिव्यथने । ५ । ४ । ६१ ॥

सपत्राकरोति मृगम् । सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः। निष्पत्राकरोति। सपुङ्खस्य शरस्याऽपरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः। अतिव्यथने किम् । सपत्रं निष्पत्रं वा करोति भूतलम् ॥

२१३२–अतिव्यथनार्थमें कृ धातुके योगमें सपत्र और निष्पत्र शब्दके उत्तर डाच् प्रत्यय हो, जैसे–सपत्राकरोति, अर्थात् पुंखसहित बाणका प्रवेश कराकर मृगको सपत्र करताहै। निष्पत्राकरोति, अर्थात् सपुंख बाणको दूसरे पार्श्वमें प्रवेश कराके मृगको निष्पत्र करताहै । अतिशय व्यथा न होनेपर जैसे–सपत्रं निष्पत्रं वा करोति भूतलम् ॥

२१३३ निष्कुलान्निष्कोषणे ।५।४।६२॥

निष्कुलाकरोति दाडिमम् । निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच् ॥

२१३३–निष्कोषणार्थमें निष्कुल शब्दके उत्तर डाच् प्रत्यय हो, जैसे–निष्कुलाकरोति दाडिमम्, यहां निर्गतं कुलमन्तरवयवानां समूहो यस्मात्, ऐसा बहुव्रीहि समास करके डाच् प्रत्यय हुआहै ॥

२१३४ सुखप्रियादानुलोम्ये ।५।४।६३॥

सुखाकरोति । प्रियाकरोति गुरुम्। अनुकूलाचरणेनानन्दयतीत्यर्थः ॥

२१३४–आनुलोम्यार्थमें सुख और प्रिय शब्दोंके उत्तर डाच् प्रत्यय हो, जैसे–सुखाकरोति प्रियाकरोति गुरुम्, अर्थात् अनुकूलाचरणसे गुरुको आनन्दित करताहै ॥

२१३५ दुःखात्प्रातिलोम्ये । ५।४।६४॥

दुःखाकरोति स्वामिनं पीडयतीत्यर्थः ॥

२१३५–प्रातिलोम्यार्थमें दुःख शब्दके उत्तर डाच् प्रत्यय हो, जैसे–दुःखाकरोति, अर्थात् स्वामीको पीडित करताहै ॥

२१३६ शूलात्पाके । ५ । ४ । ६५ ॥

शूलाकरोति मांसम् । शूलेन पचतीत्यर्थः ॥

२१३६–पाकार्थमें शूल शब्दके उत्तर डाच् प्रत्यय हो, जैसे–शूलाकरोति मांसम्, अर्थात् शूलसे मांसका पाक करताहै ॥

२१३७ सत्यादशपथे । ५ । ४ । ६६ ॥

सत्याकरोति भाण्डं वणिक् क्रेतव्यमिति तथ्यं करोतीत्यर्थः । शपथे तु सत्यं करोति विप्रः ॥

२१३७–शपथ अर्थ न होनेपर सत्य शब्दके उत्तर डाच् प्रत्यय हो, जैसे–सत्याकरोति भाण्डं वणिक्, क्रेतव्यं तथ्यं करोतीत्यर्थः। शपथार्थमें 'सत्यं करोति विप्रः' ऐसा होगा ॥

२१३८ मद्रात्परिवापणे । ५ । ४ ।६७॥

मद्रशब्दो मंगलार्थः । परिवापणं मुण्डनम् । मद्राकरोति । मांगल्यमुण्डनेन संस्करोतीर्थः ॥ भद्राच्चेति वक्तव्यम् ॥ * ॥ भद्राकरोति । अर्थः प्राग्वत् । परिवापणे किम् । मद्रं करोति ॥ इति स्वार्थिकप्रकरणम् ॥

॥ इति तद्धितप्रकरणं समाप्तम् ॥

२१३८–परिवापण अर्थमें मद्र शब्दके उत्तर डाच् प्रत्यय हो, मद्र शब्दसे मंगल जानना,परिवापण शब्दसे मुंडन जानना,जैसे–मद्राकरोति,माङ्गल्य मुण्डनसे संस्कार करताहै । भद्र शब्दके उत्तर भी डाच् प्रत्यय हो * जैसे–भद्राकरोति, इसका भी अर्थ पूर्ववत् है । परिवापणार्थ न होनेपर जैसे–भद्रं करोति ॥ इति स्वार्थिकप्रकरणम् ॥

॥ इति तद्धितप्रकरणं समाप्तम् ॥

अथ द्विरुक्तप्रकरणम् ।

२१३९ सर्वस्य द्वे । ८ । १ । १ ॥

इत्यधिकृत्य ॥

२१३९–सर्वपदको द्वित्व हो, इसको अधिकार करके ॥

२१४० नित्यवीप्सयोः । ८ । १ । ४ ॥

आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्।आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च। पचतिपचति । भुक्त्वाभुक्त्वा । वीप्सायाम् । वृक्षंवृक्षं सिञ्चति । ग्रामोग्रामो रमणीयः ॥

२१४०–आभीक्ष्ण्य और वीप्सा द्योत्य होनेपर पदको द्वित्व हो । तिङन्त और अव्ययसंज्ञक कृदन्तमें आभीक्ष्ण्य रहताहै, जैसे–पचतिपचति । भुक्त्वाभुक्त्वा । वीप्सार्थमें जैसे–वृक्षंवृक्षं सिञ्चति । ग्रामोग्रामो रमणीयः ॥

२१४१ परेर्वर्जने । ८ । १ । ५ ॥

परिपरि वंगेभ्यो वृष्टो देवः । वंगान्परिहृत्येत्यर्थः ॥ परेर्वर्जने वा वचनम् ॥ * ॥ परिवंगेभ्यः ॥

२१४१–वर्जनार्थमें परि शब्दको द्वित्व हो,जैसे–परिपरि वङ्गेभ्यो वृष्टो देवः, अर्थात् वङ्ग देशको परित्याग करके मेघ वर्षण करताहै । 'परेर्वर्जने' इसमें वा वचन करना चाहिये अर्थात् परि शब्दको वर्जनार्थमें विकल्प करके द्वित्व हो, ऐसा कहना चाहिये * जैसे– परिवङ्गेभ्यः ॥

२१४२ उपर्यध्यधसः सामीप्ये । ८ । १ । ७ ॥

उपर्युपरि ग्रामम् । ग्रामस्योपरिष्टात्समीपे देशे इत्यर्थः । अध्यधि सुखम् । सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः । अधोऽधो लोकम्। लोकस्याधस्तात्समीपे देशे इत्यर्थः ॥

२१४२–सामीप्यार्थमें उपरि, अधि और अधस् शब्दको द्वित्व हो, जैसे–उपर्युपरि ग्रामम्, ग्रामस्य उपरिष्टात् समीपे देशे इत्यर्थः । अर्थात् ग्रामके ऊपर समीपदेशमें । अध्यधि सुखम्, सुखस्योपरिष्टात् समीपकाले दुःखम् इत्यर्थः, अर्थात् सुखके अनन्तर समीपकालमें दुःख । अधोऽधो लोकम् । लोकस्याधस्तात् समीपे देशे इत्यर्थः, लोकके अधस्तलके समीप देशमें ॥

२१४३ वाक्यादेरामन्त्रितस्याऽसूयासम्मतिकोपकुत्सनभर्त्सनेषु । ८ । १ । ८ ॥

असूयायाम् । सुन्दरसुन्दर वृथा ते सौन्दर्यम् । सम्मतौ । देवदेव वन्द्योऽसि । कोपे । दुर्विनीतदुर्विनीत इदानीं ज्ञास्यसि । कुत्सने । धानुष्कधानुष्क वृथा ते धनुः । भर्त्सने । चोरचोर घातयिष्यामि त्वाम् ॥

२१४३–असूया, सम्मति, कोप, कुत्सा और भर्त्सन अर्थमें वाक्यके आदिमें स्थित आमंत्रितसंज्ञक पदको द्वित्व हो, असूयार्थमें जैसे–सुन्दरसुन्दर ! वृथा ते सौन्दर्यम् । सम्मति–देवदेव ! वंद्योसि । कोप–दुर्विनीतदुर्विनीत ! इदानीं ज्ञास्यसि । कुत्सा-धानुष्कधानुष्क ! वृथा ते धनुः । भर्त्सन–चौरचौर ! घातयिष्यामि त्वाम् ॥

२१४४ एकं बहुव्रीहिवत् । ८ । १ । ९॥

द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात् । तेन सुब्लोपपुंवद्भावौ । एकैकमक्षरम् । इह द्वयोरपि सुपोर्लुकि कृते बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप् । एकैकयाऽऽहुत्या । इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः । न बहुव्रीहावित्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम् । तेनातिदिष्टबहुव्रीहौ सर्वनामताऽस्त्येवेति प्राञ्चः । वस्तुतस्तु भाष्यमते प्रत्याख्यातमेतत् । सूत्रमतेऽपि बहुव्रीह्यर्थेऽलौकिके विग्रहे निषेधकं न तु बहुव्रीहावितीहातिदेशशंकैव नास्ति ।एकैकस्मै देहि ॥

२१४४-द्विरुक्त एक शब्द बहुव्रीहिसंज्ञककी समान हो, इस कारण सुप्का लोप और पुंवद्भाव होगा, जैसे-एकैकमक्षरम्, इस स्थलमें दोनों सुपोंका लोप करनेपर बहुव्रीहिवद्भावके कारण ही प्रातिपदिकत्व होनेसे समुदायके उत्तर सुप् प्रत्यय हुआ। एकैकया आहुत्या, इस स्थलमें पूर्वभागमें पुंवद्भावके कारण अवग्रहमें विशेष होगा।

"न बहुव्रीहौ २२२" इस सूत्रमें पुनर्बहुव्रीहिग्रहण मुख्य बहुव्रीहिके लाभार्थ है, इस कारण अतिदिष्ट बहुव्रीहिस्थलमें सर्वनामता है ही, यह प्राचीनोंका मत है. वास्तविक तो भाष्यकारके मतमें यह सूत्र प्रत्यख्यात है, सूत्रकारके मतमें भी बहुव्रीहिके निमित्त अलौकिक विग्रहमें निषेध होताहै बहुव्रीहि समासमें नहीं, इस कारण इस स्थलमें निषेधके अतिदेशकी शंका ही नहीं है, जैसे-एकैकस्मै देहि ॥

२१४५ आबाधे च। ८। १। १०॥

पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च। गतगतः। विरहात्पीडयमानस्येयमुक्तिः। बहुव्रीहिवद्भावात्सुब्लुक्। गतगता। इह पुंवद्भावः॥

२१४५-पीडा द्योत्य होनेपर पदको द्वित्व हो, और वह बहुव्रीहिसंज्ञककी समान हो, जैसे-गतगतः, विरहसे पीडित व्यक्तिकी यह उक्ति है, यहां बहुव्रीहिवद्भावके कारण सुप्का लुक् हुआ। गतगता, इस स्थलमें पुंवद्भाव हुआ है ॥

२१४६ कर्मधारयवदुत्तरेषु। ८।१।११॥

इत उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यम् ॥ प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि ॥ * ॥

२१४६-इसके परवर्ती द्विरुक्त स्थलमें कर्मधारयकी समान कार्य हो।

कर्मधारयातिदेशका प्रयोजन सुप्का लोप पुंवद्भाव और अन्तोदात्तत्व है * ॥

२१४७ प्रकारे गुणवचनस्य।८।१।१२॥

सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत्। कर्मधारयवदुत्तरेष्वित्यधिकारात्। तेन पूर्वभागस्य पुंवद्भावः, समासस्येत्यन्तोदात्तत्वं च। पटुपट्वी। पटुपटुः। पटुसदृशः। ईषत्पटुरिति यावत्। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह गृह्यन्ते। शुक्लशुक्लं रूपम्। शुक्लशुक्लः पटः॥ आनुपूर्व्ये द्वे वाच्ये ॥ * ॥ मूलेमूले स्थूलः ॥ संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः ॥ * ॥ सर्पसर्प बुध्यस्व बुध्यस्व। सर्पसर्पसर्प बुध्यस्व बुध्यस्व बुध्यस्व ॥ क्रियासमभिहारे च ॥ * ॥ लुनीहिलुनीहीत्येवायं लुनाति। नित्यवीप्सयोरिति सिद्धे भृशार्थे द्वित्वार्थमिदम्। पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकतां लब्धुं वा॥ कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये ॥ *॥ समासवच्च बहुलम्॥*॥बहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः ॥ * ॥ अन्योऽन्यं विप्रा नमन्ति। अन्योऽन्यौ। अन्योऽन्यान्। अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। अन्योऽन्येषां पुष्करैरामृशन्त इति माघः। एवं परस्परम्। अत्र कस्कादित्वाद्विसर्गस्य सः। इतरेतरम्। इतरेतरेणेत्यादि ॥ स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः॥*॥ अन्योऽन्याम्। अन्योऽन्यम्। परस्पराम्। परस्परम्। इतरेतराम्। इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो द्वितीयाया एव। भाष्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः। अन्ये तूदाहरणस्य दिङ्मात्रत्वात्सर्वविभक्तीनामामादेशमाहुः ॥

दलद्वये टाबभावः क्लीबे चाड्विरहः स्वमोः।
समासे सोरलुक्चेति सिद्धं बाहुलकात्रयम्१॥

तथाह। अन्योऽन्यं परस्परमित्यत्र दलद्वयेपि टाप् प्राप्तः। न च सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। यासां प्रियः प्रैक्षत कातराक्षीं सासेत्यादावतिप्रसङ्गात्। अन्योऽन्यमितरेतरमित्यत्र चाडुत्तरादिभ्य इत्यदड् प्राप्तः। अन्योऽन्यसंसक्तमहस्त्रियामम्। अन्योऽन्याश्रयः। परस्पराक्षिसादृश्यमदष्टपरस्परैरित्यादौ सालुक्च प्राप्तः। सर्वं बाहुलकबलेन समाधेयम्। प्रकृतवार्तिकभाष्योदाहरणं स्त्रियामितिसूत्रेऽन्योऽन्यसंश्रयं त्वेतदिति भाष्यं चात्र प्रमाणमिति ॥

२१४७—सादृश्यार्थमें गुणवाचक शब्दको द्वित्व हो और "कर्मधारयवदुत्तरेषु २१४६" इस सूत्राधिकारसे वह कर्मधारयकी समान हो, इस कारण पूर्वभागको पुंवद्भाव और "समासस्य ३७३४" इस सूत्रसे अन्तोदात्तत्व भी होगा, जैसे—पटुपट्वी । पटुपटुः, पटुसदृशः, अर्थात् ईषत्पटुः । इस सूत्रमें गुणवचन पदसे गुणोपसर्जनीभूत द्रव्यवाचक और केवल गुणवाचक शब्दका ग्रहण है, जैसे—शुक्लशुक्लं रूपम् । शुक्लशुक्लः पटः । आनुपूर्व्य होनेपर द्वित्व हो * जैसे—मूलेमूले स्थूलः ।

सम्भ्रमसहित प्रवृत्ति होनेपर इच्छानुसार अनेकवार प्रयोग न्यायसिद्ध हो, जैसे—सर्पसर्प बुध्यस्व २ । सर्प ३ । बुध्यस्व ३ ।

क्रियासमभिहारमें द्वित्व हो * लुनीहिलुनीहीत्येवायं लुनाति, यहां "नित्यवीप्सयोः २१४२" इस सूत्रसे द्वित्व सिद्ध होनेपर भी भृशार्थमें द्वित्व करनेके निमित्त और पौनःपुन्यमें भी लोट्के साथ समुच्चय करके द्योतकता लाभ करनेके निमित्त यह वचन है ।

कर्मव्यतीहार अर्थमें सर्वनामसंज्ञक शब्दको द्वित्व हो * ।

वह समासकी समान बहुल करके हो * बहुल शब्दके ग्रहणके कारण अन्य और पर शब्द समासवत् नहीं होगा, इतर शब्दको तो नित्य समासवद्भाव होगा ।

असमासवद्भावमें पूर्वपदस्थ सुप्के स्थानमें सु हो * जैसे अन्योन्यं विप्रा नमन्ति । अन्योन्यौ । अन्योन्यान् । अन्योन्येन कृतम् । अन्योन्यस्मै दत्तम् इत्यादि । "अन्योन्येषां पुष्करैरामृशन्ते" इति माघः । इसी प्रकार 'परस्परम्' इत्यादि जानना । इस स्थलमें कस्कादित्वके कारण विसर्गको सकार हुआ है । इतरेतरम्, इतरेतरेण, इत्यादि ।

स्त्रीलिङ्ग और नपुंसकलिङ्ग शब्दके उत्तर विभक्तिको विकल्प करके आम्भाव हो * अन्योन्याम् । अन्योन्यम् । परस्पराम् । परस्परम् । इतरेतराम् । इतरेतरम् वा इमे ब्राह्मण्यौ कुले वा भोजयतः ।

इस स्थलमें कोईकोई कहतेहैं कि, द्वितीयाको ही आमादेश होताहै, क्योंकि, भाष्यादिमें वैसा ही उदाहरण है, इस कारण स्त्रीलिङ्ग और क्लीबलिंग शब्दके तृतीयादि विभक्तिमें पुँल्लिंगके समान ही रूप होंगे, दूसरे पंडित तो उदाहरणके दिङ्मात्रत्वके कारण सर्वविभक्तिको आमादेश कहतेहैं ।

कारिकाका अर्थ—दोनों दलमें टाप् प्रत्ययका अभाव, नपुंसकलिंगमें सु और अम्के स्थानमें अद्ड्का विरह और समासमें सु प्रत्ययका अलुक्, यह तीन प्रकारका कार्य बाहुलकसे सिद्ध है, जैसे—अन्योन्यम्, परस्परम् इस स्थलमें दोनों दलमें टाप् प्राप्त हुआ, अन्य और पर शब्दके असमासवद्भावके कारण "सर्वनाम्नो वृत्तिमात्रे०" इससे पुंवद्भाव नहीं होसकता, कारण कि, द्विर्वचन ही वृत्ति है, तो "यांयां प्रियः प्रैक्षत कातराक्षी सासा" इत्यादि स्थलमें अतिप्रसंग होजायगा 'अन्योन्यमितरेतरम्' इस स्थलमें "अद्ड्डतरादिभ्यः० ३१५" इस सूत्रसे अद्ड् प्राप्त हुआ और 'अन्योन्यसंसक्तमहस्त्रियामम्' 'अन्योन्याश्रयः' 'परस्पराक्षिसादृश्यम्' 'अदृष्टपरस्परैः' इत्यादि स्थलोंमें सुका लुक् प्राप्त हुआ, परन्तु सब बाहुलकबलसे समाधेय है । प्रकृतवार्त्तिक, भाष्योदाहरण और "स्त्रियाम्" इस सूत्रमें "अन्योन्यसंश्रयम्" ऐसा भाष्य इसमें प्रमाण है ॥

२१४८ अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् । ८ । १ । १३ ॥

प्रियप्रियेण ददाति । प्रियेण वा । सुखसुखेन ददाति । सुखेन वा । द्विर्वचने कर्मधारयवद्भावात्सुपि लुकि तदेव वचनम् । अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थः ॥

२१४८—अकृच्छ्रार्थमें प्रिय और सुख शब्दको विकल्प करके द्वित्व हो, जैसे—प्रियप्रियेण ददाति, प्रियेण वा । सुखसुखेन ददाति, सुखेन वा, अर्थात् अतिप्रिय वस्तु भी अनायाससे देताहै । द्विवचनस्थलमें कर्मधारयद्भावके कारण सुप्का लोप होगा ॥

२१४९ यथास्वे यथायथम् । ८ । १ । १४ ॥

यथास्वमिति वीप्सायामव्ययीभावः । योयमात्मा यच्चात्मीयं तद्यथास्वम् । तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते । यथायथं ज्ञाता यथास्वभावमित्यर्थः । यथाऽऽत्मीयमिति वा ॥

२१४९—आत्मा और आत्मीयको यथास्व कहतेहैं, यथास्व अर्थ होनेपर यथा शब्दको द्वित्व और नपुंसकलिंगत्व निपातनसे सिद्ध हो । सूत्रमें वीप्सार्थमें अव्ययीभाव समास करके 'यथास्वम्' पद सिद्ध है, यथायथं ज्ञाता, अर्थात् यथास्वभाव अथवा यथात्मीय जाननेवाला ॥

२१५० द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु । ८ । १ । १५ ॥

द्विशब्दस्य द्विर्वचनं पूर्वपदस्याऽम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एभ्य-

र्थेषु । तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् । इतरे विषयभूताः । द्वन्द्वं मन्त्रयते । रहस्यमित्यर्थः । मर्यादा स्थित्यनतिक्रमः । आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति । माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेणापीति मर्यादार्थः । व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः । द्विवर्गसंबन्धेन पृथगवस्थिताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं संकर्षणवासुदेवौ । अभिव्यक्तौ साहचर्येणेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्व इष्यते ॥

॥ इति द्विरुक्तप्रकरणम् ॥

२१५०-रहस्य, मर्यादा, वचन, व्युत्क्रमण, यज्ञपात्रप्रयोग और अभिव्यक्ति अर्थमें द्वि शब्दको द्वित्व, पूर्वपदको अम्भाव और उत्तरपदको नपुंसकत्व निपातनसे सिद्ध हो, उक्त अर्थमें रहस्य द्वन्द्व शब्दका वाच्य और सब विषयभूत रहेंगे, जैसे-द्वन्द्वं मंत्रयते, अर्थात् एकान्तमें सलाह करताहै । मर्यादा शब्दसे स्थितिका अनतिक्रम जानना, जैसे-आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति । माता पुत्रेण मिथुनं गच्छति, पौत्रेण प्रपौत्रेणापि, इस स्थानमें मर्यादा अर्थ जानना । व्युत्क्रमण शब्दसे पृथक् अवस्थान जानना, जैसे-द्वन्द्वं व्युत्क्रान्ताः, अर्थात् द्विवर्गसम्बन्धसे पृथक् अवस्थित । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । द्वन्द्वं संकर्षणवासुदेवौ, अर्थात् साहचर्यसे अभिव्यक्त । योगविभागके कारण अन्यत्र भी द्वन्द्व ऐसा पद इष्ट है ॥

॥ इति द्विरुक्तप्रकरणं समाप्तम् ॥

॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्धं समाप्तम् ॥

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

अथ वैयाकरणसिद्धान्तकौमुदी ।

भाषाटीकासहिता

तदुत्तरार्द्धम् ।

अथ तिङन्ते भ्वादयः १.

श्रौत्रार्हन्तीचणैर्गुण्यैर्महर्षिभिरहर्दिवम् ।
तोष्टूय्यमानोप्यगुणो विभुर्विजयतेतराम्॥१॥

जो निर्गुण होकर भी श्रोत्रियत्व (वेदपठनकर्तृत्व) और योग्यतासे प्रसिद्ध तथा प्रशस्त गुणोंसे युक्त महर्षियोंसे निरन्तर संस्तूयमान है, वह निग्रहानुग्रहसमर्थ सर्वव्यापी जगदीश्वर सर्वोत्कृष्ट रूपसे वर्तमान रहताहै ॥ १ ॥

पूर्वार्धे कथितास्तुर्यपञ्चमाध्यायवर्तिनः ।
प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः २

चौथे और पांचवें अध्यायमें स्थित सम्पूर्ण प्रत्यय पूर्वार्धमें कहेहैं, अब तीसरे अध्यायमें वर्तमान प्रत्यय कहे जातेहैं ॥ २ ॥

तत्रादौ दश लकाराः प्रदर्श्यन्ते । लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः ॥

उसमें पहले दश लकार दिखातेहैं, यथा–लट् १, लिट्२, लुट्३, लृट्४, लेट्५, लोट्६, लङ्७, लिङ्८, लुङ् ९, लृङ् १०, इनमें पाचवें लकार (लेट्) का प्रयोग केवल वैदिक प्रकरणमें ही देखाजाताहै ॥

२१५१ वर्तमाने लट् । ३ । २ ।१२३॥

वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् । अटावितौ॥

२१५१–वर्तमान कालमें विद्यमान जो क्रिया, तद्वृत्ति धातुके उत्तर लट् प्रत्यय हो । लट्के अ और टकी इत्संज्ञा हुई (ल शेष बचा) ॥

२१५२ लः कर्मणि च भावे चाऽकर्मकेभ्यः । ३ । ४ । ६९ ॥

लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च ॥

२१५२–सकर्मक धातुके उत्तर, कर्म और कर्ता वाच्य रहते और अकर्मक धातुके उत्तर, कर्ता और भाव वाच्य रहते लकार प्रयुक्त हों ॥

२१५३ लस्य । ३ । ४ । ७७ ॥

अधिकारोऽयम् ॥

२१५३–यह अधिकार सूत्र है, अर्थात् यहांसे 'लस्य' इस षष्ठ्यन्त पदका अधिकार आरम्भ हुआ ॥

२१५४ तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथांध्वमिड्वहिमहिङ्।३।४।७८॥

एतेऽष्टादश लादेशाः स्युः ॥

२१५४–तिप्, तस्, झि । सिप्, थस्, थ । मिप्, वस्, मस् । त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् । यह अठारह आदेश लकारके स्थानमें प्रयुक्त हों ॥

२१५५ लः परस्मैपदम् ।१।४।९९॥

लादेशाः परस्मैपदसंज्ञाः स्युः ॥

२१५५–लकारके स्थानमें विहित जो आदेश, उनकी परस्मैपद संज्ञा हो ॥

२१५६तङानावात्मनेपदम्।१।४।१००॥

तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः । पूर्वसंज्ञापवादः ॥

२१५६–उन (लादेशों)में तङ् प्रत्याहार अर्थात् त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् और आन अर्थात् शानच्, कानच् प्रत्ययोंकी भी आत्मनेपद संज्ञा हो । यह पूर्व संज्ञा (परस्मैपद) का अपवाद सूत्र है ॥

२१५७ अनुदात्तङित आत्मनेपदम्। १ । ३ । १२ ॥

अनुदात्तेत उपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात् ॥

२१५७–जिस धातुका अनुदात्त अक्षर इत्संज्ञक हो, और उपदेश विषयमें जो ङकारइत्संज्ञक हो, तदन्त धातुके उत्तर विहित लकारोंके स्थानमें आत्मनेपदसंज्ञक आदेश हों ।

२१५८ स्वरितञितः कर्त्रभिप्राये क्रियाफले । १ । ३ । ७२ ॥

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ॥

२१५८-क्रियाके फलको कर्तामें जानेपर स्वरित वर्ण जिसका इत् हो और ञ जिसका इत् हो ऐसे धातुके उत्तर आत्मनेपद हो ॥

२१५९ शेषात्कर्तरि परस्मैपदम् । १ । ३ । ७८ ॥

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मै पदं स्यात् ॥

२१५९-आत्मनेपदके निमित्त (अनुदात्तेत्त्व १, उपदेशमें ङित्त्व २, कर्तृगामी क्रियाफलमें स्वरितेत्त्व ३ और ञित्त्व ४) से हीन जो धातु, उसके उत्तर कर्तृवाच्यमें परस्मैपद हो ॥

२१६० तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः । १ । ४ । १०१ ॥

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥

२१६०-तिङ् प्रत्याहारके मध्यमें स्थित परस्मैपद तथा आत्मनेपदकी सम्पूर्ण विभक्तियोंकी तीन तीन करके क्रमसे प्रथम, मध्यम और उत्तम (पुरुष) संज्ञा हो ॥

२१६१ तान्येकवचनद्विवचनबहुवचनान्येकशः । १ । ४ । १०२ ॥

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणित्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥

२१६१-परस्मैपद और आत्मनेपदके प्रथम, मध्यम और उत्तम, इन तीनों पुरुषोंमें प्रत्येक पुरुषकी एकवचन, द्विवचन और बहुवचन संज्ञा हो ॥

२१६२ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः । १ । ४ । १०५ ॥

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात् ॥

२१६२-तिङ्का वाच्य जो कारक तद्वाचक युष्मद् शब्दके प्रयुज्यमान वा अप्रयुज्यमान होनेपर अर्थात् युष्मद् शब्दका योग रहते वा न रहते केवल युष्मदर्थ गम्यमान रहते धातुके उत्तर मध्यम पुरुष हो ॥

२१६३ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च । १ । ४ । १०६ ॥

मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात्परिहासे गम्यमाने मन्यतेरुत्तमः स्यात्स चैकार्थस्य वाचकः स्यात् ॥

२१६३-मन्य धातु जिस धातुका उपपद हो, उस धातुको प्रकृतिभूत होनेपर मध्यम पुरुष हो, परिहास अर्थमें और मन धातुसे उत्तम पुरुष हो, वह उत्तम पुरुष एकार्थवाचक अर्थात् एकवचनान्त ही हो ॥

२१६४ अस्मद्युत्तमः । १ । ४ । १०७ ॥

तथाभूतेऽस्मद्युत्तमः स्यात् ॥

२१६४-तिङ्वाच्य कारकवाचक अस्मद् शब्दको प्रयुज्यमान होनेपर भी धातुसे उत्तम पुरुष हो ॥

२१६५ शेषे प्रथमः । १ । ४ । १०८ ॥

मध्यमोत्तमयोरविषये प्रथमः स्यात् । भू सत्तायाम् ॥ कर्तृविवक्षायां भू-ति इति स्थिते ॥

२१६५-मध्यम और उत्तम पुरुषके अविषयमें प्रथम पुरुष हो । भू धातु सत्ता (आत्मधारणानुकूल व्यापार) में है । इसके उत्तर कर्तृवाच्यमें लट्, तिप् 'भू+तिप्' ऐसी स्थिति होनेपर-॥

२१६६ तिङ्शित्सार्वधातुकम् । ३ । ४ । ११३ ॥

तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः ॥

२१६६-तिङ् प्रत्याहार और धात्वधिकारोक्त शित् प्रत्यकी सार्वधातुक संज्ञा हो ॥

२१६७ कर्तरि शप् । ३ । १ । ६८ ॥

कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात् । शपावितौ ॥

२१६७-कर्ता अर्थमें विहित सार्वधातुकसंज्ञक प्रत्यय परे रहते धातुके उत्तर शप् प्रत्यय हो । शप्के शकार और पकारकी इत्संज्ञा होकर अकार रहा ॥

२१६८ सार्वधातुकार्धधातुकयोः । ७ । ३ । ८४ ॥

अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात् । अवादेशः । भवति । भवतः ॥

२१६८-सार्वधातुक और आर्धधातुक परे रहते इगन्त (इकारान्त, उकारान्त, ऋकारान्त, ऌकारान्त) धातुको गुण हो । ओकारके स्थानमें अवादेश, भू+तिप्=भवति ॥ भू+तस्=भवतः ॥

२१६९ झोऽन्तः । ७ । १ । ३ ॥

प्रत्ययावयवस्य झस्यान्तादेशः स्यात् । अतो गुणे । भवन्ति । भवसि । भवथः । भवथ ॥

२१६९-प्रत्ययका अवयव जो झ उसके स्थानमें अन्त आदेश हो । "अतो गुणे १९१" इस सूत्रसे पररूप । भू+झि=भवन्ति । भू+सिप्=भवसि । भू+थस्=भवथः । भू+थ=भवथ ॥

२१७० अतो दीर्घो यञि । ७।३।१०१॥

अतोऽङ्गस्य दीर्घः स्याद् यञादौ सार्वधातुके परे । भवामि । भवावः । भवामः । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः । वयं भवामः । एहि मन्ये ओदनं भोक्ष्यसे इति भुक्तः सोऽतिथिभिः । एतमेत वा मन्ये ओदनं भोक्ष्येथे, भोक्ष्यध्वे । भोक्ष्ये, भोक्ष्यावहे, भोक्ष्यामहे । मन्यसे, मन्येथे, मन्यध्वे । इत्यादिरर्थः । युष्मद्युपपदे इत्याद्यनुवर्तते, तेनेह न । एतु भवान्मन्यते ओदनं भोक्ष्ये इति भुक्तः सोतिथिभिः । प्रहासे किम् । यथार्थकथने मा भूत् । एहि मन्यसे ओदनं भोक्ष्ये इति भुक्तः सोतिथिभिरित्यादि ॥

२१७०-यञादि सार्वधातुक परे रहते अदन्त अङ्गको दीर्घ हो, जैसे-भव+मिप्=भवामि । भव+वस्=भवावः । भव+मस्=भवामः । प्रथम पुरुषका उदाहरण, जैसे-स भवति । तौ भवतः । ते भवन्ति । मध्यम पुरुषका जैसे-त्वं भवसि-इत्यादि । उत्तम पुरुषका जैसे-अहं भवामि-इत्यादि । एहि मन्ये ओदनं भोक्ष्यसे, भुक्तः सोऽतिथिभिः । इस स्थानमें परिहासार्थमें 'भुज्' धातुका उपपद 'मन्' धातु है, अत एव भुज् धातुसे मध्यम पुरुष हुआ । और मन् धातुसे उत्तम पुरुष और एकवचन हुआ । एतम् एत वा मन्ये, ओदनं भोक्ष्येथे, भोक्ष्यध्वे, भोक्ष्ये, भोक्ष्यावहे, भोक्ष्यामहे इत्यादि । मन्यसे, मन्येथे, मन्यध्वे, इत्यर्थः । इस स्थलमें "युष्मद्युपपदे० २१६२" इस सूत्रकी अनुवृत्ति होतीहै, इस कारण यहां नहीं हुआ, जैसे-एतु भवान् मन्यते ओदनं भोक्ष्य इति, भुक्तः सोऽतिथिभिः । परिहासभिन्न अर्थात् यथार्थकथनस्थलमें ऐसा नहीं होगा, जैसे-एहि मन्यसे ओदनं भोक्ष्ये इति, भुक्तः सोऽतिथिभिः-इत्यादि ॥

२१७१ परोक्षे लिट् । ३ । २ । ११५ ॥

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । लस्य तिबादयः ॥

२१७१-भूताऽनद्यतनपरोक्षार्थ वृत्ति जो धातु, उसके उत्तर लिट् हो । लके स्थानमें तिबादि आदेश होतेहैं ॥

२१७२ लिट् च । ३ । ४ । ११५ ॥

लिडादेशस्तिङार्धधातुकसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः । तेन शबादयो न ॥

२१७२-लिट्के स्थानमें आदिष्ट तिङ् आर्धधातुक संज्ञक ही हों, सार्वधातुकसंज्ञक नहीं, इस कारण लिट्के उत्तर शप् आदि नहीं होंगे ॥

२१७३ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः । ३ । ४ । ८२ ॥

लिटस्तिबादीनां नवानां णलादयो नव स्युः । भू अ इति स्थिते ॥

२१७३-लिट्के स्थानमें आदिष्ट तिबादि नवके स्थानमें यथाक्रम णल्, अतुस्, उस् । थल्, अथुस्, अ । णल्, व, म, यह नव आदेश हों, जैसे-भू+तिप्=भू+अ (णल्) ॥

२१७४ भुवो वुग्लुङ्लिटोः ।६।४।८८॥

भुवो वुगागमः स्यात् लुङ्लिटोरचि । नित्यत्वाद्वुग्गुणवृद्धी बाधते ॥

२१७४-लुङ् और लिट्सम्बन्धी अच् परे रहते भू धातुको वुक्का आगम हो । नित्यत्वके कारण वुक्का आगम गुण और वृद्धिको बाधताहै * ॥

२१७५ एकाचो द्वे प्रथमस्य । ६।१।१॥

२१७५-यह अधिकार सूत्र है । धातुके प्रथम एकाच्को द्वित्व हो ॥

२१७६ अजादेर्द्वितीयस्य । ६ । १ ।२॥

इत्यधिकृत्य ॥

२१७६-यह भी अधिकार सूत्र है । अजादि धातुके द्वितीय एकाच्को द्वित्व हो ॥

२१७७ लिटि धातोरनभ्यासस्य ६।१।८॥

लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः । आदिभूतादचः परस्य तु द्वितीयस्य । भूव् भूव् अ इति स्थिते ॥

२१७७-लिट् परे रहते अनभ्यास, धातुके अवयव प्रथम एकाच्को द्वित्व हो और आदि अच्के परे स्थित दूसरे एकाच्को द्वित्व हो भूव् भूव्=अ, ऐसा होनेपर-

२१७८ पूर्वोऽभ्यासः । ६ । १ । ४ ॥

अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् ॥

२१७८-द्विरुक्त धातुके पूर्व भागको अभ्यास संज्ञा हो ॥

२१७९ हलादिः शेषः । ७ । ४ । ६० ॥

अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते । इति वलोपः ॥

२१७९-अभ्यासके आदिमें स्थित हल् अक्षर शेष रहे, और उससे भिन्न अन्य हल् वर्णोंका लोप हो, इस सूत्रसे अभ्यासके वकारका लोप हुआ भूभूव्=अ-॥

२१८० ह्रस्वः । ७ । ४ । ५९ ॥

अभ्यासस्याचो ह्रस्वः स्यात् ॥

* " कृताऽकृतप्रसङ्गी विधिर्नित्यः " अर्थात् जिसके होने और न होनेपर जिसकी प्रवृत्ति होती है, वह उसके प्रति नित्य होताहै, यहां वृद्धि होनेपर भी एकदेशविकृत-न्यायसे वुक्की प्रवृत्ति होती है, और वुक् करनेपर अजन्ताङ्ग न रहनेसे वृद्धिकी (२५४) प्रवृत्ति नहीं होतीहै । यहां गुणको बाधके वृद्धिकी प्रवृत्ति होतीहै, इस लिये नित्यत्वसे गुणको बाधके वुक् होनेका उदाहरण बभूविथ जानना ॥

२१८०-अभ्यासके अच्को ह्रस्व हो । बुभूव्=अ ॥

२१८१ भवतेरः । ७ । ४ । ७३ ॥

भवतेरभ्यासोकारस्य अः स्यात् लिटि ॥

२१८१-लिट् परे रहते भू धातुके अभ्यासका जो उकार, उसके स्थानमें अकार हो । बभूव्=अ ॥

२१८२ अभ्यासे चर्च । ८ । ४ । ५४॥

अभ्यासे झलां चरः स्युर्जशश्च । झशां जशः खरां चरः । तत्रापि प्रकृतिजशां प्रकृतिजशः । प्रकृतिचरां प्रकृतिचर इति विवेकः आन्तरतम्यात् ॥

२१८२-अभ्यासके झल्के स्थानमें चर् और जश् भी हों । झलोंके स्थानमें जश् और खर्के स्थानमें चर् हों । वहां भी सादृश्यके कारण प्रकृतिभूत जश्के स्थानमें जश् और प्रकृतिभूत चर्के स्थानमें चर् ही होंगे ॥

२१८३ असिद्धवदत्राभात् । ६।४।२२॥

इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् । समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यात् । इति वुकोऽसिद्धत्वादुवङि प्राप्ते ॥ वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ ॥ * ॥ बभूव । बभूवतुः । बभूवुः ॥

२१८३-इस सूत्रसे पादसमाप्तिपर्यंत जो सूत्र हैं उनकी 'आभीय' संज्ञा है, और समानाश्रय आभीय कर्तव्य होनेपर वह आभीय असिद्ध हो अर्थात् जिस समय एक आभीयका कार्य किसी निमित्तको मानकर प्रयोगमें होचुका हो, उसी निमित्तको मानकर उसी प्रयोगमें दूसरे आभीयका कार्य होने लगे तो पहले आभीयका कार्य असिद्ध माना जाय, इस कारण वुक्के असिद्धत्वसे उवङ्०(२७१) की प्राप्ति होने पर ।

उवङ् और यण् कर्तव्य रहते वुक् और युट् सिद्धही रहतेहैं *जैसे-बभूव । बभूवतुः । बभूवुः ॥

२१८४आर्धधातुकस्येड्वलादेः।७।२।३५।

वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम॥

२१८४-वलादि आर्धधातुकको इट्का आगम हो, जैसे-बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ॥

२१८५ अनद्यतने लुट् । ३ । ३ ।१५॥

भविष्यत्यनद्यतनेर्थे धातोर्लुट् स्यात् ॥

२१८५-भविष्यत् अनद्यतन कालमें धातुके उत्तर लुट् हो ॥

२१८६ स्यतासी लृलुटोः। ३ । १।३३॥

लृ इति लृङ्लृटोर्ग्रहणम् । धातोः स्यतासी एतौ स्तो लृलुटोः परतः । शबाद्यपवादः ॥

२१८६-लृङ् और लृट् परे रहते धातुके उत्तर स्य और लुट् परे रहते धातुके उत्तर तासि प्रत्यय हो, यह सूत्र शप् आदिका अपवाद है ॥

२१८७ आर्धधातुकं शेषः ।३।४।११४॥

तिङ्शिद्भ्योऽन्यो धात्वधिकारोक्तः प्रत्यय एतत्संज्ञः स्यात् । इट् ॥

२१८७-"धातोः३।१।९१"इसके अधिकारमें विहित तिङ् और शित्से भिन्न प्रत्ययकी आर्धधातुक संज्ञा हो । इस सूत्रसे आर्धधातुक संज्ञा करनेपर पूर्व सूत्रसे इट् होताहै ॥

२१८८लुटःप्रथमस्य डारौरसः।२।४।८५।

डा रौ रस् एते क्रमात्स्युः । डित्वसामर्थ्यादभस्यापि टेर्लोपः ॥

२१८८-लुट्के स्थानमें आदिष्ट जो प्रथम पुरुष (तिप्, तस्, झि) उसके स्थानमें क्रमसे डा, रौ, रस् आदेश हों । यहां डित् करनेके सामर्थ्यसे भ संज्ञा न होनेपर भी टि (आस्) का लोप होगा ॥

२१८९ पुगन्तलघूपधस्य च ७ ।३।८६।

पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् । तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः । भवित् आ अत्रेटो गुणे प्राप्ते ॥

२१८९-सार्वधातुक और आर्धधातुक परे रहते पुगन्त और लघूपध अङ्गका जो इक्, उसको गुण हो । यत्कर्तृक अवश्य व्यवधान हो, तत्कर्तृक व्यवधान होनेपर भी वचन प्रमाणानुसार कार्य होताहै, परन्तु तद्भिन्न द्वारा व्यवहित होने पर नहीं होता, यही फलितार्थ है, इस कारण 'भिनत्ति' इत्यादि स्थलमें अनेकसे व्यवहित इक्को गुण नहीं होता । भवित्+आ, इस स्थलमें इक्को गुण प्राप्त हुआ है ॥

२१९० दीधीवेवीटाम् । १ । १ । ६ ।

दीधीवेव्योरिटश्च गुणवृद्धी न स्तः । भविता ॥

२१९०-दीधीङ् और वेवीङ् धातुके और इट्के इक्को गुण और वृद्धि न हों । भविता ॥

२१९१ तासस्त्योर्लोपः । ७ । ४ ।५० ॥

तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे ॥

२१९१ सकारादि प्रत्यय परे रहते तासि प्रत्ययके और अस् धातुके सकारका लोप हो ॥

२१९२ रि च । ७ । ४ । ५१ ॥

रादौ प्रत्यये प्राग्वत् । भवितारौ । भवितारः। भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥

२१९२-रकारादि प्रत्यय परे रहते तासि प्रत्यय और अस् धातुके सकारका लोप हो । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥

२१९३ लृट् शेषे च । ३ । ३ । १३ ॥

भविष्यदर्थाद्धातोर्लृट् स्यात्क्रियायामसत्यां सत्यां च । स्यः । इट् । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ॥

२१९३-क्रियार्थ क्रिया हो अथवा न हो भविष्यत् कालमें धातुके उत्तर लृट् हो । भू+स्य+ति=भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ॥

२१९४ लोट् च । ३ । ३ । १६२ ॥

विध्यादिष्वर्थेषु धातोर्लोट् स्यात् ॥

२१९४-विध्यादि अर्थोंमें धातुके उत्तर लोट् हो ॥

२१९५ आशिषि लिङ्लोटौ ।३।३।१७३॥

२१९५-आशीर्वाद अर्थमें धातुके उत्तर लिङ् और लोट् हों ॥

२१९६ एरुः ३ । ४ । ८६ ॥

लोट इकारस्य उः स्यात् । भवतु ॥

२१९६-लोट्के स्थानमें आदिष्ट तिबादिकोंके इकारके स्थानमें उकार हो, जैसे-भवतु ॥

२१९७ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् । ७ । १ । ३५ ॥

आशिषि तुह्योस्तातङ् वा स्यात् । अनेकाल्त्वात्सर्वादेशः । यद्यपि ङिच्चेत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते । इहोत्सर्गापवादयोरपि समबलत्वात् । भवतात् ॥

२१९७-आशीर्वाद अर्थमें तु और हि के स्थानमें विकल्प करके तातङ् हो । अनेकाल्त्वके कारण (४५) 'तु' और 'हि' सम्पूर्णके स्थानमें ही होगा, "ङिच्च४३" इस सूत्रसे अन्तादेश नहीं होगा । यद्यपि "ङिच्च ४३" यह सूत्र उसका(४५)अपवाद है, तथापि जहां ङित्का अन्य कोई प्रयोजन नहीं है, उन अनङ् आदि स्थलोंमें "ङिच्च" इस सूत्रकी चरितार्थता होतीहै, इसलिये गुण और वृद्धिका प्रतिषेध और संप्रसारण आदि जिसके ङित्त्वके फल हैं, ऐसे तातङ्में "ङिच्च" यह मंथर गतिसे प्रवृत्त होताहै, इससे उत्सर्ग और अपवादके तुल्यबलत्वके कारण पर होनेसे "अनेकाल्शित्सर्वस्य" इस सूत्रसे "ङिच्च" यह सूत्र बाधित होताहै जैसे-भवतात् ॥

२१९८ लोटो लङ्वत् । ३ । ४ । ८५॥

लोटो लङ इव कार्यं स्यात् । तेन तामादयः सलोपश्च । तथाहि ॥

२१९८-लोट्को लङ्के समान कार्य हों । तिससे यह सिद्ध हुआ कि, ताम्-आदि और सकारका लोप लङ्के समान लोट्को भी होंगे । ताम्-आदि और सलोपके सूत्र आगे दिखातेहैं ॥

२१९९ तस्थस्थमिपां तान्तन्तामः । ३ । ४ । १०१ ॥

ङितश्चतुर्णां तामादयः क्रमात्स्युः ॥

२१९९-ङित् लकारके स्थानमें आदिष्ट जो तस् १, थस् २, थ ३ और मिप् ४ इन चार प्रत्ययोंके स्थानमें क्रमसे ताम् १, तम् २, त ३ और अम् यह चार आदेश हों ॥

२२०० नित्यं ङितः । ३ । ४ । ९९ ॥

सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात् । अलोन्त्यस्येति सस्य लोपः । भवताम् । भवन्तु ॥

२२००-सकारान्त ङित् लकारके उत्तम पुरुषका नित्य लोप हो । "अलोन्त्यस्य ४२" इस सूत्रसे सकारका लोप हो । जैसे-भवताम् । भवन्तु ॥

२२०१ सेर्ह्यपिच्च । ३ । ४ । ८७ ॥

लोटः सेर्हिः स्यात्सोऽपिच्च ॥

२२०१-लोट्के सिके स्थानमें हि आदेश हो और वह अपित् भी हो ॥

२२०२ अतो हेः । ६ । ४ । १०५ ॥

अतः परस्य हेर्लुक् स्यात् । भव । भवतात् । भवतम् । भवत ॥

२२०२-अकारके परे स्थित हिका लुक् हो । भव । भवतात् । भवतम् । भवत ।

२२०३ मेर्निः । ३ । ४ । ८९ ॥

लोटो मेर्निः स्यात् ॥

२२०३-लोट्की मिके स्थानमें नि हो ॥

२२०४ आडुत्तमस्य पिच्च ।३।४।९२॥

लोडुत्तमस्याडागमः स्यात्स पिच्च । हिन्योरुत्वं न इकारोच्चारणसामर्थ्यात् । भवानि । भवाव । भवाम ॥

२२०४-लोट्के उत्तम पुरुषको आट्का आगम हो और वह पित् हो । इकारोच्चारणसामर्थ्यसे हि और निके इकारके स्थानमें उकार न हो, जैसे-भवानि । भवाव । भवाम ॥

२२०५ अनद्यतने लङ् ।३।२। १११ ॥

अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् ॥

२२०५-अनद्यतन भूतार्थवृत्ति धातुके उत्तर लङ् हो ॥

२२०६ लुङ्लङ्लृङ्क्ष्वडुदात्तः । ६ । ४ । ७१ ॥

एषु परेष्वङ्गस्याऽडागमः स्यात्स चोदात्तः ॥

२२०६-लुङ्, लङ् और लृङ् परे रहते धातुको अट्का आगम हो और वह अडागम उदात्त हो ॥

२२०७ इतश्च । ३ । ४ । १०० ॥

ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः स्यात् । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ॥

२२०७-ङित् लकारका जो परस्मैपद इकारान्त, उसका लोप हो । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ॥

२२०८ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । ३ । ३ । १६१ ॥

एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात् । विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम् । निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । आमन्त्रणं कामचारानुज्ञा । अधीष्टं सत्कारपूर्वको व्यापारः । प्रवर्तनायां लिङ् इत्येव सुवचम् । चतुर्णां पृथगुपादानं प्रपञ्चार्थम् ॥

२२०८-विधि, निमंत्रण, आमंत्रण, अधीष्ट, संप्रश्न और प्रार्थना अर्थमें धातुके उत्तर लिङ् हो । विधि-प्रेरण अर्थात् भृत्यादि निकृष्ट व्यक्तिके प्रवर्त्तनको कहतेहैं । निमंत्रण-नियोग करण जानना, अर्थात् आवश्यक श्राद्ध भोजनादि विषयोंमें दौहित्रादिकोंका प्रवर्त्तन--आमंत्रण--कामचारकी अनुज्ञा । अधीष्ट-सत्कारपूर्वक व्यापारको कहतेहैं । ' प्रवर्त्तना अर्थमें लिङ् हो ' ऐसा कहनेसे काम चलजाता परन्तु विधि आदि चारोंका पृथक् २ उपादान प्रपञ्चार्थ स्पष्टताके लिये है ॥

२२०९ यासुट् परस्मैपदेषूदात्तो ङिच्च । ३ । ४ । १०३ ॥

लिङः परस्मैपदानां यासुडागमः स्यात्स चोदात्तो ङिच्च । ङित्त्वोक्तेर्ज्ञायते क्वचिदनुबन्धकार्येप्यनल्विधाविति प्रतिषेध इति । आदेशस्य शानचः शित्वमपीह लिङ्गम् ॥

२२०९-लिङ्के परस्मैपदोंको यासुट्का आगम हो और वह उदात्त और ङित् भी हो, इस ङित्वकी उक्तिसे जाना जाता है कि, कभीकभी अनुबन्ध कार्यमें भी ''अनल्विधौ'' यह स्थानिवद्भावका प्रतिषेध होताहै । श्नाके स्थानमें विहित जो शानच् उसका शित्व प्रमाण भी इस विषयका ज्ञापक है । इसका विशेष विवरण पहले (४७०) कर चुकेहैं ॥

२२१० सुट् तिथोः । ३ । ४ । १०७ ॥

लिङस्तकारथकारयोः सुट् स्यात् सुटा यासुट् न बाध्यते, लिङो यासुट् तकारथकारयोः सुडिति विषयभेदात् ॥

२२१०-लिङ्के तकार और थकारको सुट्का आगम हो । इस सुट्से यासुट् बाधित नहीं होताहै, क्योंकि, लिङ्को यासुट् होताहै और तकार और थकारको सुट् होताहै, इस कारण विषयभेद है, और भिन्नविषयमें बाध्यबाधकभाव नहीं होता ॥

२२११ लिङः सलोपोऽनन्त्यस्य । ७ । २ । ७९ ॥

सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात् । इति सकारद्वयस्यापि निवृत्तिः । सुटः श्रवणं त्वाशीर्लिङि । स्फुटतरं तु तत्रात्मनेपदे ॥

२२११-सार्वधातुक जो लिङ्, उसके अनन्त्य (अन्तमें न हो ऐसे) सकारका लोप हो । इस सूत्रके अनुसार दोनों सकारोंकी निवृत्ति हुई, सुट्का श्रवण तो आशिषिलिङ्में होगा और स्फुटतर तो वहां भी आत्मनेपदमें होगा ॥

२२१२ अतो येयः । ७ । २ । ८० ॥

अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इय् स्यात् । गुणः । यलोपः । भवेत् । सार्वधातुके किम् । चिकीर्ष्यात् । मध्येऽपवादन्यायेन हि अतो लोप एव बाध्येत । भवेदित्यादौ तु परत्वाद्दीर्घः स्यात् । भवेताम् ॥

२२१२-अकारके परे स्थित सार्वधातुकके अवयव 'या' के स्थानमें इय् आदेश हो । (गुण (६९) और यलोप ८७३) भवेत् । इस सूत्रमें 'सार्वधातुके' की अनुवृत्ति न करेंगे तो 'चिकीर्ष्यात्' यहां इय् होजायगा, और ''मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्'' इस परिभाषासे प्रकृतसूत्र ''अतो लोपः६।४।४८''कोही बाधेगा,''अतो दीर्घो यञि७।३।१०१'' को नहीं, तब तो'भवेत्'इत्यादिकमें परत्वात् दीर्घही हो जायगा इय् नहीं । भवेताम् ॥

२२१३ झेर्जुस् । ३ । ४ । १०८ ॥

लिङो झेर्जुस् स्यात् ज इत् ॥

२२१३-लिङ्के झि प्रत्ययके स्थानमें जुस् आदेश हो । जुस्के जकारकी इत्संज्ञा हुई (१८९) उस् रहा ॥

२२१४ उस्यपदान्तात् । ६ । १ । ९६ ॥

अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात् । इति प्राप्ते । परत्वान्नित्यत्वाच्चातो येय इति प्राञ्चः । यद्यप्यन्तरङ्गत्वात्पररूपं न्याय्यं तथापि यास् इत्येतस्य इय् इति व्याख्येयम् । एवं च सलोपस्यापवाद इय् । अतो येय

इत्यत्र तु सन्धिरार्षः । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ॥

२२१४–अपदान्त अवर्णके उत्तर उस् परे रहते पूर्व परके स्थानमें पररूप एकादेश हो । इसकी प्राप्ति होने पर, परत्व और नित्यत्वके कारण आदेश हो, "अतो येयः २२१२" से 'या' को इय् यह प्राचीन लोगोंका मत है । यद्यपि अन्तरङ्गत्वके कारण पररूप न्याय्य है तथापि 'यास्' भागके स्थानमें इय् आदेश हो, इस प्रकार ही उस (२२१२) की व्याख्या करनी उचित है, इस प्रकार 'इय्' आदेश सलोपका अपवाद होताहै, इस व्याख्यामें "अतो येयः" इस सूत्रमें जो संधि है, वह आर्ष है । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ॥

२२१५ लिङाशिषि । ३ । ४ । ११६ ॥

आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात् ॥

२२१५–आशीर्वादार्थक लिङ्के स्थानमें विहित जो तिङ्, वह आर्धधातुक संज्ञक हो ॥

२२१६ किदाशिषि । ३ । ४ । १०४ ॥

आशिषि लिङो यासुट् कित्स्यात् । स्कोरिति सलोपः ॥

२२१६–आशीर्वादार्थक लिङ्का यासुट् कित् हो । "स्कोः ३८०" इस सूत्रसे यासुट् और सुट् (२२१०) के सकारका लोप हुआ ॥

२२१७ क्ङिति च । १ । १ । ५ ॥

गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ॥

२२१७–गित्, कित्, और ङित् निमित्तवाले इग्लक्षण गुण और वृद्धि न हों, जैसे–भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ॥

२२१८ लुङ् । ३ । २ । ११० ॥

भूतार्थवृत्तेर्धातोर्लुङ् स्यात् ॥

२२१८–भूत अर्थमें वर्त्तमान धातुसे लुङ् हो ॥

२२१९ माङि लुङ् । ३ । ३ । १७५ ॥

सर्वलकारापवादः ॥

२२१९–माङ् शब्दके योगमें धातुके उत्तर लुङ् हो यह सर्वलकारका अपवाद है ॥

२२२० स्मोत्तरे लङ् च । ३ । ३ । १७६ ॥

स्मोत्तरे माङि लङ् स्याल्लुङ् च ॥

२२२०–स्म शब्द पर है जिससे ऐसे माङ् शब्दके योगमें धातुके उत्तर लङ् और लुङ् दोनों हों ॥

२२२१ च्लि लुङि । ३ । १ । ४३ ॥

शबाद्यपवादः ॥

२२२१–लुङ् परे रहते धातुके उत्तर च्लि प्रत्यय हो । यह च्लि शबादिकोंका अपवाद है ॥

२२२२ च्लेः सिच् । ३ । १ । ४४ ॥

इचावितौ ॥

२२२२–च्लिके स्थानमें सिच् आदेश हो । सिच्के इ और च की इत्संज्ञा हुई, सकार शेष रहा ॥

२२२३ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु । २ । ४ । ७७ ॥

एभ्यः सिचो लुक् स्यात् । गापाविहेणादेशपिबती गृह्येते ॥

२२२३–गा धातु, स्था धातु, घुसंज्ञक (दा, धा) धातु, पा धातु और भू धातुके उत्तर सिच्का लुक् हो । परस्मैपदसंज्ञक प्रत्यय परे रहते । गा धातु और पा धातु, दो दो हैं । एक इण् धातुके स्थानमें आदिष्ट गा धातु, अन्य गीतार्थमें एवम् 'पा पाने' और 'पा–रक्षणे' यह दो पा हैं, परन्तु इस स्थानमें इण् धातुके स्थानमें आदिष्ट गा धातु और पानार्थक पा धातुके उत्तर ही सिच्का लुक् होगा अन्यत्र नहीं ॥

२२२४ भूसुवोस्तिङि । ७ । ३ । ८८ ॥

भू सु एतयोः सार्वधातुके तिङि परे गुणो न स्यात् ॥

२२२४–सार्वधातुक तिङ् परे रहते भू और सु, इन दोनों धातुओंके उकारको गुण न हो ॥

२२२५ अस्तिसिचोऽपृक्ते । ७ । ३ । ९६ ॥

सिच् अस् चेति समाहारद्वन्द्वः । सिच्छब्दस्य सौत्रं भत्वम् । अस्तीत्यव्ययेन कर्मधारयः । ततः पञ्चम्याः सौत्रो लुक् । विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तहल ईडागमः स्यात् । इतीट् नेह । सिचो लुप्तत्वात् । अभूत् । हलः किम् । ऐधिषि । अपृक्तस्येति किम् । ऐधिष्ट । अभूताम् ॥

२२२५–इस स्थलमें 'सिच्' और 'अस्'का परस्पर समाहारद्वन्द्व समास है । सूत्रके अनुसार सिच्की भ संज्ञा हुई, पश्चात् 'अस्ति' इस अव्ययके साथ कर्मधारय समास हुआ, पश्चात् सौत्रत्वके कारण पंचमी विभक्तिका लुक् हुआहै ।

विद्यमान सिच् और अस् धातुके परे स्थित अपृक्त हल्को ईट्का आगम हो, इस सूत्रसे यहां ईट् नहीं होता क्योंकि, सिच्का लुक् हुआ है । अभूत् ।

हल्को ईडागमका विधान करनेसे 'ऐधिषि' इस स्थानमें ईडागम नहीं हुआ ।

और अपृक्त कहनेके कारण 'ऐधिष्ट' इस स्थानमें भी ईडागम नहीं हुआ । अभूताम् ॥

२२२६ सिजभ्यस्तविदिभ्यश्च । ३ । ४ । १०९

सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबन्धिनो झेर्जुस् स्यात् । इति प्राप्ते ॥

२२२६–सिच्, अभ्यस्त और विद् धातुके उत्तर ङित् सम्बन्धी झि के स्थानमें जुस् आदेश हो । इस प्रकार उसकी प्राप्ति होनेपर–॥

२२२७ आतः । ३ । ४ । ११० ॥

सिज्लुक्यादन्तादेव झेर्जुस् स्यात् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥

२२२७–सिच्का लुक् होनेपर आकारान्त ही धातुके झि के स्थानमें जुस् आदेश हो, जैसे–अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥

२२२८ न माङ्योगे । ६ । ४ । ७४ ॥

अडाटौ न स्तः । मा भवान् भूत् । मा स्म भवत् भूद्वा ॥

२२२८–माङ् शब्दके योगमें धातुको अट् और आट्का आगम न हो, जैसे–मा भवान् भूत् । मा स्म भवत् भूद्वा ॥

२२२९ लिङ्निमित्ते लृङ् क्रियातिपत्तौ । ३ । ३ । १३९ ॥

हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ॥

२२२९–हेतु हेतुमद्भाव आदि लिङ्के निमित्त हैं, इन (हेतु हेतुमद्भावादि) के विषयमें क्रियाकी अनिष्पत्ति गम्यमान होनेपर भविष्यत् अर्थमें लृङ् हो, जैसे–अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ॥

२२३० ते प्राग्धातोः । १ । ४ । ८० ॥

ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः॥

२२३०–गति और उपसर्गसंज्ञक शब्द धातुओंके पूर्वमें ही प्रयुक्त हों ॥

२२३१ आनि लोट् । ८ । ४ । १६॥

उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात् । प्रभवाणि ॥ दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः ॥ * ॥ दुःस्थितिः । दुर्भवानि ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् ॥ * ॥ अन्तर्धा । अन्तर्धिः । अन्तर्भवाणि ॥

२२३१–उपसर्गस्थ निमित्तके परे स्थित लोट्स्थानिक आनि आदेशके नकारको णत्व हो, जैसे–प्र–भवाणि । षत्व और णत्व कर्त्तव्य रहते दुर् शब्दके उपसर्गत्वका निषेध कहना चाहिये * जैसे–दुःस्थितिः । दुर्भवानि । अन्तर शब्दको अङ् तथा कि प्रत्ययके विधान और णत्वविषयमें ही उपसर्गत्व कहना चाहिये*जैसे–अन्तर्धा।अन्तर्धिः । अन्तर्भवाणि ॥

२२३२ शेषे विभाषाऽकखादावषान्त उपदेशे । ८ । ४ । १८ ॥

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात् । प्रणिभवति । प्रनिभवति । इहोपसर्गाणामसमस्तत्वेपि संहिता नित्या। तदुक्तम्–

संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते॥ इति ॥

सत्ताद्यर्थनिर्देशश्चोपलक्षणम् । यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थात् । उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति । पराभवति । संभवति । अनुभवति । अभिभवति । उद्भवति । परिभवतीत्यादौ विलक्षणार्थावगतेः । उक्तं च–

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ॥

एध वृद्धौ । कत्थन्ताः षट्त्रिंशदनुदात्तेतः ॥

२२३२–उपदेशमें ककारादि, खकारादि, षकारान्त और गद, नदादि भिन्न धातु परे रहते उपसर्गस्थ निमित्तके परे स्थित निके नकारको विकल्प करके णत्व हो,जैसे–प्रणिभवति । प्रनिभवति । इस स्थलमें उपसर्गके साथ धातुका समास न होनेपर भी संधि नित्य ही सिद्ध होगा, जैसा–कहागया है कि,

एक पदमें धातु और उपसर्गमें और समासमें सन्धि नित्य हो, किन्तु वह सन्धि वाक्यविषयमें विवक्षाकी अपेक्षा करताहै ।

सत्ता आदि अर्थके निर्देश उपलक्षण हैं क्योंकि "यागात् स्वर्गो भवति" इस स्थलमें 'भवति' पदका 'उत्पद्यते'–इत्यादि अर्थ होताहै ।

उपसर्ग तो अर्थ विशेषका द्योतक है, जैसे–'प्रभवति । पराभवति । सम्भवति । अभिभवति । उद्भवति । परिभवति । इत्यादि स्थलमें विलक्षण अर्थकी अवगति होतीहै । कहा है–

उपसर्गके बलसे धातुके प्रकृत अर्थसे अन्यार्थकी प्रतीति होती है, जैसे–प्रहार, आहार, संहार, विहार, परिहार–इत्यादि ।

एध धातु वृद्धि अर्थमें जानना । एध धातुसे कत्थ धातु पर्यंत ३६ धातुओंके अनुदात्त अक्षर इत्संज्ञक हैं, अर्थात् यह आत्मनेपदी होंगे ॥

२२३३ टित आत्मनेपदानां टेरे । ३ । ४ । ७९ ॥

टितो लस्यात्मनेपदानां टेरेत्वं स्यात्।एधते॥

२२३३–टकार इत् हो ऐसा जो लकार उसके स्थानमें विहित आत्मनेपदसंज्ञककी टिके स्थानमें एकार हो, जैसे–एधते ॥

२२३४ सार्वधातुकमपित् । १ । २ ।४॥

अपित्सार्वधातुकं ङिद्वत्स्यात् ॥

२२३४–अपित् सार्वधातुकको ङिद्वत् कार्य हो ॥

२२३५ आतो ङितः । ७ ।२ । ८१ ॥

अतः परस्य ङितामाकारस्य इय् स्यात् । एधेते । एधन्ते ॥

२२३५–अकारके परे स्थित ङित्के आकारके स्थानमें इय् आदेश हो, जैसे–एधेते । एधन्ते ॥

२२३६ थासः से । ३ । ४ । ८० ॥

टितो लस्य थासः से स्यात् । एधसे । एधेथे। एधध्वे । अतो गुणे । एधे । एधावहे । एधामहे॥

२२३६–टकार इत् है ऐसे लकारके स्थानमें विहित थास् प्रत्ययके स्थानमें से आदेश हो, जैसे–एधसे । एधेथे । एधध्वे । अकारके उत्तर गुण (अ, ए) परे रहते पूर्व परके स्थानमें गुण होताहै (१९१) जैसे–एधे । एधावहे । एधामहे ॥

२२३७ इजादेश्च गुरुमतोऽनृच्छः । ३ । १ । ३६ ॥

इजादिर्योधातुर्गुरुमानृच्छत्यन्यस्तत आम् स्यात् लिटि । आमो मकारस्य नेत्त्वम्, आस्कासोराम्विधानाज्ज्ञापकात् ॥

२२३७–लिट् प्रत्यय परे रहते ऋच्छ धातुभिन्न अन्य गुरुसंज्ञकयुक्त अजादि धातुओंके उत्तर आम् प्रत्यय हो । आस् और कास् धातुके उत्तर आम् विधानके कारण आम्के मकारकी इत्संज्ञा न हो ॥

२२३८ आमः । २ । ४ । ८१ ॥

आमः परस्य लुक् स्यात् ॥

२२३८–आम् परे लिट्के लकारका लोप हो ॥

२२३९कृञ्चानुप्रयुज्यते लिटि।३।१।४०॥

आमन्ताल्लिट्परा: कृभ्वस्तयोऽनुप्रयुज्यन्ते । आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येतिसूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते । तेन कृभ्वस्तियोग इत्यतः कृञो द्वितीयेति ञकारेण प्रत्याहाराश्रयणात् कृभ्वस्तिलाभः । तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः । सम्पदिस्तु प्रत्याहारेऽन्तर्भूतोप्यनन्वितार्थत्वान्न प्रयुज्यते । कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते ॥

२२३९–अतीत (बीतेहुए) कालमें आमन्त धातुके उत्तर लिट्परक कृ, भू, अस् धातु अनुप्रयुक्त हों ।

"आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य २२४०" इस सूत्रमें कृ धातुके ग्रहणकी सामर्थ्यके कारण तद्भिन्न धातुका भी अनुप्रयोग होसकताहै, इस कारण "कृभ्वस्तियोगे० २११७" इस सूत्रके 'कृ' तथा "कृञो द्वितीय० २१२९" इस सूत्रोक्त ञकारसे प्रत्याहाराश्रयके कारण कृ, भू और अस् धातुका लाभ होताहै, उनके सामान्यक्रियावाचित्व और आम् प्रकृतिके विशेषवाचित्वके कारण उन दोनों अर्थोंका अभेदान्वय होता है । संपूर्वक पद् धातु प्रत्याहारमध्यमें अन्तर्भूत होनेपर भी अनन्वितार्थके कारण प्रयुक्त नहीं होगा ।

कृञ् धातुका क्रियाफल परगामी होनेपर परस्मैपदकी प्राप्ति होनेपर– ॥

२२४०आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । १ । ३ । ६३ ॥

आम् प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः । आमप्रकृत्यां तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात् । इह पूर्ववदित्यनुवर्त्य वाक्यभेदेन संबध्यते । पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति । तेन कर्तृगेपि फले इन्द्रांचकारेत्यादौ न तङ् ॥

२२४०–जिन धातुओंके उत्तर आम्प्रत्यय हो, उनके साथ तुल्य अनुप्रयुक्त कृञ् धातुके उत्तर भी आत्मनेपद हो । इस स्थलमें "पूर्ववत्" इस पदकी अनुवृत्ति होकर वाक्यभेदानुसार संबन्ध होताहै इस कारण पूर्ववत् ही आत्मनेपद हो, उसके विपरीत अर्थात् आम् प्रकृतिके परस्मैपदी होनेपर अनुप्रयुक्तसे आत्मनेपद न हो, इस कारण फल कर्तृगत होनेपर भी 'इन्द्रांचकार'–इत्यादि स्थलमें तङ् न होगा ॥

२२४१ लिटस्तझयोरेशिरेच्।३।४।८१॥

लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः । एकारोच्चारणं ज्ञापकं तङादेशानां टेरेत्वं नेति । तेन डारौरसां न । कृ ए इति स्थिते ॥

२२४१–लिट्के स्थानमें आदिष्ट जो 'त' और 'झ' उनके स्थानमें एश् और इरेच् आदेश हों, एकारका उच्चारण ज्ञापक मात्र अर्थात् इस स्थानमें एकार उच्चारण करनेसे यह जाना जाताहै कि, तङ्के स्थानमें आदिष्ट की टिके स्थानमें एकार नहीं हो इससे डा, रौ, रसकी टिके स्थानमें एत्व नहीं हुआ। 'कृ+ए' ऐसा होनेपर ॥

२२४२ असंयोगाल्लिट्कित् । १। २ ।५ ॥

असंयोगात्परोऽपिल्लिट्कित्स्यात् क्ङिति चेति निषेधात्सार्वधातुकार्धधातुकयोरिति गुणो न । द्वित्वात्परत्वाद्याणि प्राप्ते ॥

२२४२–असंयोगके अर्थात् असंयुक्त धातुके परे स्थित जो अपित् लिट् उसकी कित्संज्ञा हो । "क्ङिति च २२१७" इस

सूत्रसे गुणनिषेधके कारण "सार्वधातुकार्धधातुकयोः २१६८" इस सूत्रसे गुण नहीं होगा द्वित्वसे परत्वके कारण यण्की प्राप्ति होनेपर ॥

२२४३ द्विर्वचनेऽचि । १ । १ । ५९ ॥

द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये ॥

२२४३–द्वित्वनिमित्तीभूत अच् परे रहते यदि द्वित्व कर्तव्य हो तो धातुसम्बन्धी अच्के स्थानमें आदेश न हो, अर्थात् द्वित्व करनेपर आदेश हो, द्वित्व न होनेपर आदेश नहीं हो ॥

२२४४ उरत् । ७ । ४ । ६६ ॥

अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे । रपरत्वम् ॥ हलादिः शेषः । प्रत्यये किम् । वव्रश्च ॥

२२४४–प्रत्यय परे रहते अभ्याससंबंधी ऋवर्णके स्थानमें अत् अर्थात् अकार हो "उरण्रपरः" इससे रपरत्व (अर्) होगा "हलादिः शेषः २१७९" इस सूत्रसे अन्तस्थित हल् अर्थात् रकारका लोप होगा ।

प्रत्यय परे न रहते वव्रश्च इस स्थलमें लिट् परे संप्रसारण करनेपर "अचः परस्मिन्" इस सूत्रसे स्थानिवद्भावके कारण "न सम्प्रसा०" इस सूत्रसे सम्प्रसारणका निषेध होताहै, 'प्रत्यये' न कहनेपर परनिमित्तक आदेश न होनेसे "अचः पर०" से स्थानिवद्भावकी प्राप्ति न होनेके कारण "न संप्रसा०" इसकी प्राप्ति न होनेपर संप्रसारण करके 'उव्रश्च' ऐसा होजाता ॥

२२४५ कुहोश्चुः । ७ । ४ । ६२ ॥

अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात् । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ॥

२२४५–अभ्याससंबंधी कवर्ग और हकारके स्थानमें चवर्ग आदेश हो, जैसे–एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ॥

२२४६ एकाच उपदेशेऽनुदात्तात् । ७ । २ । १० ॥

उपदेशे यो धातुरेकाच् अनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येट् न स्यात् । उपदेशे इत्युभयान्वयि । एकाच इति किम् । यङ्-लुग्व्यावृत्तिर्यथा स्यात् । स्मरन्ति हि–

श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ १ ॥ इति ।

एतच्चेहैवैकाज्ग्रहणेन ज्ञाप्यते । अच इत्येवै-कत्वविवक्षया तद्वतोग्रहणेन च सिद्धे एकग्रहण-सामर्थ्यादनेकाचकोपदेशो व्यावर्त्यते । तेन वधेर्हन्त्युपदेशे एकाचोऽपि न निषेधः । आदे-शोपदेशेऽनेकाच्त्वात् । अनुदात्ताश्चानुपदमेव संग्रहीष्यन्ते । एधाञ्चकृषे । एधाञ्चकाथे ॥

२२४६–उपदेश अवस्थामें जो धातु एकअच् युक्त और अनुदात्त उसके परे स्थित वलादि आर्द्धधातुकको इट् आगम न हो । 'उपदेश' यह पद उभयान्वयी अर्थात् एकाच् धातु और अनुदात्त धातु इन दोनोंके साथ ही उसका अन्वय होताहै ।

एकाच् ग्रहण करनेसे यङ्लुक्में इस सूत्रकी प्रवृत्ति न होगी क्योंकि, आचार्य ऐसा कहतेहैं कि, श्तिप्से निर्दिष्ट जो कार्य, शप्से निर्दिष्ट जो कार्य, अनुबंधसे निर्दिष्ट जो कार्य, गण-से निर्दिष्ट जो कार्य्य और जिस सूत्रमें एकाच् ग्रहण कियाहै उस एकाच्से निर्दिष्ट जो कार्य यह पांच प्रकारके कार्य यङ्लुक्विषयमें नहीं होंगे । इस सूत्रमें एकाच् ग्रहणसे कारिकासे जो अभिहित हुआ है सो जाना जाता है यद्यपि 'अचः' ऐसी एकत्व विवक्षाके कारण और अच्विशिष्टके ग्रहणके कारण एकाच् विशिष्ट धातुका लाभ होता तथापि एक पदका ग्रहण क्यों किया ? इस आशङ्काका निराकरण करतेहैं कि, जहां हन् धातुके स्थानमें 'वध' आदेश होगा, उस स्थानमें आदेश उपदेशमें अनेकाच्त्वके कारण अनादेश अवस्थामें हन् धातु एकाच् होनेपर भी उसके उत्तर इट् निषेध नहीं होगा, एधा-ञ्चकृषे । एधाञ्चकाथे । अनुदात्त धातु आगे कहे जायंगे ॥

२२४७ इणः षीध्वंलुङ्लिटां धोऽङ्गात् । ८ । ३ । ७८ ।

इण्णन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्ध-न्यः स्यात् । एधांचकृढ्वे । एधांचकृवहे । एधांचकृमहे । एधांबभूव । अनुप्रयोगसामर्थ्या-दस्तेर्भूभावो न । अन्यथा हि कस चानुप्रयुज्यत इति कृभ्विति वा ब्रूयात् ॥

२२४७–इण् भागान्त अङ्गके परे जो षीध्वम् प्रत्ययका धकार और लुट् लिट् संबन्धी जो धकार उसके स्थानमें मूर्द्धन्य वर्ण अर्थात् ढकार हो, जैसे–एधाञ्चकृढ्वे । एधाञ्चक्रे। एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव ।

अनुप्रयोग होनेके कारण अस् धातुके स्थानमें भू आदेश नहीं होगा नहीं तो "कस् चानुप्रयुज्यते" ऐसे सूत्र करनेसे ही निर्वाह होनेसे भू धातुका ग्रहण व्यर्थ होजाता, अथवा "कृभू चानुप्रयुज्यत" ऐसा करनेपर भी निर्वाह होनेसे अस् धातुका पृथक् ग्रहण व्यर्थ होजाता ॥

२२४८ अत आदेः । ७ । ४ । ७० ॥

अभ्यासस्यादेरतो दीर्घः स्यात् । पररूपा-पवादः । एधामास । एधामासतुरित्यादि ॥ एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ॥

२२४८–अभ्यासके आदिमें स्थित अकारको दीर्घ हो, यह सूत्र पररूपका विशेषक है, जैसे–एधामास । एधामासतुः–इत्यादि । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ॥

२२४९ धि च। ८। २। २५॥

धादौ प्रत्यये परे सलोपः स्यात्। एधिताध्वे॥

२२४९–धकारादि प्रत्यय परे रहते सकारका लोप हो, जैसे–एधिताध्वे॥

२२५० ह एति। ७। ४। ५२॥

तासस्त्योः सस्य हः स्यादेति परे। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यन्ते। एधिष्यसे। एधिष्येथे। एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे॥

२२५०–विभक्तिका एकार परे रहते तास् प्रत्ययके सकार और अस् धातुके सकारके स्थानमें हकार हो, जैसे–एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यन्ते। एधिष्यसे। एधिष्येथे। एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे॥

२२५१ आमेतः। ३। ४। ९०॥

लोट एकारस्याम् स्याम्। एधताम्। एधेताम्। एधन्ताम्॥

२२५१–लोट्के एकारके स्थानमें आम् आदेश हो, जैसे–एधताम्। एधेताम्। एधन्ताम्॥

२२५२ सवाभ्यां वामौ। ३। ४। ९१॥

सवाभ्यां परस्य लोडेतः क्रमाद् अम् एतौ स्तः। एधस्व। एधेथाम्। एधध्वम्॥

२२५२–सकारके परे स्थित लोट्के एकारके स्थानमें व और वकारके परे स्थित लोट्के एकारके स्थानमें अम् आदेश हो, जैसे–एधस्व। एधेथाम्। एधध्वम्॥

२२५३ एत ऐ। ३। ४। ९३॥

लोडुत्तमस्य एत ऐ स्यात्। आमोऽपवादः। एधै। एधावहै। एधामहै॥

२२५३–लोट्के उत्तम पुरुषके एकारके स्थानमें ऐकार आदेश हो, यह ऐ आदेश आम् आदेशका अपवाद है, जैसे–एधै। एधावहै। एधामहै॥

२२५४ आडजादीनाम्। ६। ४। ७२॥

अजादीनामाट् स्यात् लुङादिषु। अटोऽपवादः। आटश्च। ऐधत। ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐधध्वम्। ऐधे। ऐधावहि। ऐधामहि॥

२२५४–लङ्, लुङ् और लृङ् यह तीन लकार परे रहते अच् आदिमें है जिनके ऐसे जो धातु उनको आट् आगम हो, यह आट् अट् आगमका निषेधक है, "आटश्च २६९" इस सूत्रसे आकार तथा एकारके स्थानमें वृद्धि होगी, जैसे–ऐधत। ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐधध्वम्। ऐधे। ऐधावहि। ऐधामहि॥

२२५५ लिङः सीयुट्। ३। ४। १०२॥

लिङात्मनेपदस्य सीयुडागमः स्यात्। सलोपः। एधेत। एधेयाताम्॥

२२५५–आत्मनेपदसंज्ञक लिङ्को सीयुट् आगम हो, सीयुट्के सकारका लोप होकर ईयुट् रहा, जैसे–एधेत। एधेयाताम्॥

२२५६ झस्य रन्। ३। ४। १०५॥

लिङो झस्य रन् स्यात्। एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्॥

२२५६–लिङ्के झके स्थानमें रन् आदेश हो, जैसे–एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्॥

२२५७ इटोऽत्। ३। ४। १०६॥

लिङादेशस्येटोऽत्स्यात्। एधेय। एधेवहि। एधेमहि। आशीर्लिङि आर्धधातुकत्वात् लिङः सलोपो न। सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वम्। एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि॥ ऐधिष्ट। ऐधिषाताम्॥

२२५७–लिङ्के स्थानमें आदिष्ट जो इट् उसके स्थानमें अत् हो, जैसे–एधेय। एधेवहि। एधेमहि। आशीर्लिङ्में आर्धधातुकके कारण धातुके उत्तर सकारका लोप नहीं होगा, सीयुट् और सुट्के प्रत्ययावयवत्वके कारण सकारको षत्व होगा, जैसे–एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि॥ ऐधिष्ट। ऐधिषाताम्॥

२२५८ आत्मनेपदेष्वनतः। ७। १। ५॥

अनकारात्परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। ऐधिढ्वम्। इङ्भिन्न एव इणिह गृह्यते इति मते तु। ऐधिध्वम्। ढधयोर्वस्य मस्य च द्वित्वविकल्पात्षोडशरूपाणि। ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐधिष्यत। ऐधिष्येताम्। ऐधिष्यन्त। ऐधिष्यथाः। ऐधिष्येथाम्। ऐधिष्यध्वम्। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। उदात्तत्वादइलादेरेद प्रसङ्गादनुदात्ताः संगृह्यन्ते॥

२२५८–आत्मनेपदमें अकारभिन्न स्वर वर्णके परे स्थित 'झ' के स्थानमें अत् आदेश हो। जैसे–ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। "इणः षीध्वंलुङ्लिटां धोऽङ्गात् २२४७" इस सूत्रसे धकारके स्थानमें ढकार होगा, जैसे–ऐधिढ्वम्। इस सूत्रसे धकारके स्थानमें ढकार होगा, इस स्थल (२२४७) में इङ्भिन्नही इण्का ग्रहण है, ऐसा जिनका मत है, उनके मतमें इस स्थानमें ढत्व नहीं होगा, जैसे–एधिध्वम्। ढ, ध, व और मकारके द्वित्व विषयमें

विकल्पके कारण सोलह(१६)रूप होंगे । ऐधिषि । ऐधिष्वहि । ऐधिष्महि ।

ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । उदात्तत्वके कारण वलादि आर्द्धधातुकको इट्का आगम हुआ ॥

ऊदृदन्तैर्यौति-रु-क्ष्णु-
शी-स्नु-नु-क्षु-श्वि-डीङ्-श्रिभिः ।
वृङ्-वृञ्भ्यां च विनैकाचो-
ऽजन्तेषु निहताः स्मृताः ॥ १ ॥
शक्ल-पच्-मुच्-रिच्-वच्-विच्-
सिच्-प्रच्छि-त्यज्-निजिर्-भजः ।
भंज्-भुज्-भ्रस्ज्-मस्जि-यज्-युज्-
रुज्-रञ्ज्-विजिर्-स्वञ्जि-सञ्ज्-सृजः॥२॥
अद्-क्षुद्-खिद्-छिद्-तुदि-नुदः
पद्य-भिद्-विद्यति-विनद् ।
शद्-सदी स्विद्यतिः स्कन्दि-
हदी क्रुध् क्षुधि-बुध्यती ॥ ३ ॥
बन्धि-र्युधि-रुधी राधि-
व्यध्-शुधः साधि-सिध्यती ।
मन्य-ह-न्नाप्-क्षिप्-छुपि-तप्-
तिप-स्तृप्यति-दृप्यती ॥ ४ ॥
लिप्-लुप्-वप्-शप्-स्वप्-सृपि यभ्-
रभ्-लभ्-गम्-नम्-यमो रमिः ।
क्रुशि-र्दंशि-दिशी दृश्-मृश्-
रिश्-रुश्-लिश्-विश-स्पृशः कृषिः ॥ ५ ॥
त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-
शिष्-शुष्-श्लिष्यतयो घसिः ।
वसति-र्दह्-दिहि-दुहो
नह्-मिह्-रुह्-लिह् वहिस्तथा ॥ ६ ॥
अनुदात्ता हलन्तेषु
धातवो ह्यधिकं शतम् ॥
तुदादौ मतभेदेन
स्थितौ यौ च चुरादिषु ॥ ७ ॥
तृप्-दृपी तौ वारयितुं
श्यना निर्देश आदृतः ॥

किंच ।

स्विद्य-पद्यौ सिध्य-बुध्यौ
मन्य-पुष्य-श्लिषः श्यना ॥ ८ ॥
वसिः शपा लुका यौति-
र्निर्दिष्टोऽन्यनिवृत्तये ।
निजिर् विजिर् शक्लृ इति
सानुबन्धा अमी तथा ॥ ९ ॥
विन्दतिश्चान्द्रदौर्गादे-
रिष्टो भाष्येपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं
नेह पेठुरिति स्थितम् ॥ १० ॥
रञ्जि-मस्जी अदि-पदी
तुद् क्षुध् शुषि-पुषी शिषिः ।
भाष्यानुक्ता नवेहोक्ता
व्याघ्रभूत्यादिसंमतेः ॥ ११ ॥ २ ॥

प्रसङ्गसे अनुदात्त धातु संगृहीत होतेहैं, जैसे-ऊकारान्त और ऋकारान्त भिन्न जो धातु, यु,रु,क्ष्णु,शी, स्नु, नु,क्षु, श्वि, डीङ् और श्रि भिन्न जो धातु तथा वृङ् और वृञ् धातु भिन्न अजन्तके मध्यमें स्वरयुक्त सम्पूर्ण धातु अनुदात्त हैं । हलन्त धातुके मध्यमें निम्न लिखित शक्लृआदिसे लेकर वह् धातु तक एकसौ दो (१०२) धातु अनुदात्त हैं जैसे-

ककारान्त-१ । शक्लृ (शक्) समर्थ होना ।

चकारन्त-६ । पच्-रांधना । मुच्-छोडना । रिच्-रेच्-दस्त कराना । वच्-बोलना । विच्-अलग करना । सिच्-छिडकना वा सींचना ।

छकारान्त-१ । प्रच्छ्-पूंछना ।

जकारान्त-१५ । त्यज्-त्यागना । निज्-शुद्ध करना । भज्-सेवा करना । भञ्ज्-तोडना । भुज्-भोगकरना। भ्रस्ज्-भूनना । मस्ज्-डूबना । यज्-यज्ञकरना । युज्-जोडना । रुज्-रोगी होना । रञ्ज्-रंगना । विजिर्-अलग करना। स्वञ्ज्-गले लगना । सञ्ज्-मिलना । सृज्-त्याग करना ।

दकारान्त-१६ । अद्-खाना । क्षुद्-कूटना । खिद्-दुःखी होना । छिद्-काटना । तुद्-दुःख देना । नुद्-प्रेरणा करना । पद्य (दिवादि गणका) पद्-जानना । भिद्-तोडना । विद्य (दिवादि) विद्होना । विनद्-(रुधादि गण) विद्-विचारना । शद्-मुरझाना-व नष्ट होना । सद्-जाना । स्विद्य (दिवादि गणका) स्विद्-पसीजना । स्कन्द्-जाना, सूखना, सुखाना । हद्-मल त्यागना ।

धकारान्त-११। क्रुध्-क्रोध करना । क्षुध्-भुखाना । बुध्य (दिवादिगणका) बुध्-जानना । बन्ध-बांधना । युध्-लडना । रुध्-रूंधना घेरना । राध्-सिद्ध करना । व्यध्-ताडन करना वा वेधना । शुध्-स्वच्छ होना । साध्-सिद्ध करना । सिध्य (दिवादि गणका) सिध्-पूरा होना ।

नकारान्त-२ । मन्य (दिवादिका) मन्-मानना । हन्-मारना ।

पकारान्त-१३। आप्-प्राप्त करना वा व्याप्त होना। क्षिप्-फेंकना, छिप्-छूना। तप्-तपना, तिप्-चूना। तृप्य (दिवादि) तृप्-परितुष्ट होना वा तुष्ट करना । दृप्य (दिवादि) दृप्-अभिमानी होना । लिप्-लीपना । लुप्-काटना । वप्-बोना। शप्-शाप देना, शपथकरना । स्वप्-सोना । सृप्-रंगना ।

भकारान्त-३। यभ्-मैथुन करना । रभ्-शीघ्रता करना । लभ्-प्राप्त करना ।

मकारान्त–४। गम्–जाना। नम्–नमस्कार करना। यम्–निवृत्त होना। रम्–क्रीडा करना।

शकारान्त–१०। क्रुश्–ऊँचे स्वरसे रोना। दंश्–डसना वा काटना। दिश्–दान करना। दृश्–देखना। मृश्–स्पर्श करना वा बोध करना। रिश्–रुश्–हिंसा करना। लिश्–घटना। विश्–प्रवेश करना। स्पृश्–छूना।

षकारान्त–११। कृष्–आकर्षण करना। त्विष्–चमकना। तुष्–तृप्त होना। द्विष्–द्वेष करना। दुष्–बिगडना। पुष्य (दिवादि) पुष्–पुष्ट करना। पिष्–पीसना। विष्–व्याप्त होना। शिष्–अवशिष्ट करना। शुष्–सुखाना। श्लिष्–आलिंगन करना।

सकारान्त–२। घस्–खाना। वस्–वास करना।

हकारन्त–८। दह्–जलाना। दिह्–लीपना। दुह्–दुहना। नह्–बांधना। मिह्–सींचना। रुह्–जमना। लिह्–चाटना। वह्–लेजाना।

मतभेदसे तुदादि गणके तथा चुरादि गणके मध्यमें पठित जो तृप् और दृप् इन दो धातुओंके अनुदात्तत्व वारणके निमित्त उनके उत्तर श्यन् निर्देश किया, जैसे–तृप्यति। दृप्यति। इस कारण दिवादिगणीय तृप् और दृप् धातु ही अनुदात्त होंगे, उनसे भिन्न गणके नहीं होंगे।

और भी दिखातेहैं, जैसे–स्विद्–पद्–सिध्, बुध्, मन्, पुष्, श्लिष्–धातुओंके अन्यगणीय निवारणके निमित्त इनके उत्तर श्यन् निर्देश कियाहै, अर्थात् दिवादि गणके जो धातु वही अनुदात्त होंगे, उनसे भिन्न धातु अनुदात्त नहीं होंगे।

वस् धातु और यु धातुके अन्यगण निवृत्तिके निमित्त शप्लुक्के द्वारा निर्देश कियाहै अर्थात् अदादि गणीय वस् और यु धातु ही अनुदात्त और इससे भिन्न गणके उदात्त होंगे।

सानुबंध निजिर्, विजिर् और शक्लृ यह तीन धातु अनुदात्त और विद् धातु भी अनुदात्त यह चान्द्र है, दौर्गादिके इष्ट है, भाष्यमें भी देखा जाताहै, किन्तु व्याघ्रभूतिआदि आचार्योंके मतमें विद् धातु अनुदात्त नहीं है।

रञ्ज्, मस्ज्, अद्, पद्, तुद्, क्षुध्, शुष्, पुष्, शिष् यह नौ धातु व्याघ्रभूत्यादि आचार्योंके मतमें अनुदात्त कहे गए हैं, परन्तु भाष्यमें अनुदात्तत्वेन परिगणित नहीं हैं।

स्पर्ध संघर्षे। संघर्षः पराभिभवेच्छा। धात्वर्थेनोपसंग्रहादकर्मकः। स्पर्धते॥

स्पर्द्ध धातु संघर्ष अर्थात् पराभिभवकी इच्छामें जानना, धात्वर्थद्वारा उपसंग्रहके कारण स्पर्द्ध धातु अकर्मक है। स्पर्धते॥

२२५९ शर्पूर्वाः खयः। ७। ४। ६१॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते। हलादिः शेषः इत्यस्यापवादः। पस्पर्धे। स्पर्धिता। स्पर्धिष्यते। स्पर्धताम्। अस्पर्धत। स्पर्धेत। स्पर्धिषीष्ट। अस्पर्धिष्ट। अस्पर्धिष्यत॥ ३॥ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। गाधते। जगाधे॥ ४॥ बाधृ लोडने। लोडनं प्रतिघातः। बाधते॥५॥ नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु॥ आशिषि नाथ इति वाच्यम्॥ *॥ अस्याशिष्येवात्मनेपदं स्यात्। नाथते। अन्यत्र नाथति॥ ६॥ नाधते॥ ७॥ दध धारणे। दधते॥

२२५९–अभ्याससंबन्धी शर्पूर्वक 'खर्' प्रत्याहार ही शेष रहैं, अन्यका लोप हो। यह सूत्र 'हलादिः शेषः२१७९" इस सूत्रका अपवाद है। पस्पर्द्धे। स्पर्द्धिता। स्पर्द्धिष्यते। स्पर्द्धताम्। अस्पर्द्धत। स्पर्द्धेत। स्पर्द्धिषीष्ट। अस्पर्द्धिष्ट। अस्पर्द्धिष्यत॥ गाधृ–प्रतिष्ठा, लाभेच्छा और ग्रंथनमें जानना, जैसे–गाधते। जगाधे। बाधृ धातु आलोडन अर्थात् प्रतीघातमें जानना, जैसे–बाधते। नाथृ और नाधृ धातु याचना, उपताप, ऐश्वर्य, और आशीर्वादमें जानना। इन दो धातुओंके ऋकारकी इत्संज्ञा हुई।

आशीरर्थमें ही नाथ धातु आत्मनेपदी हो * जैसे–नाथते। अन्यार्थमें नाथति। नाधते॥

दध् धातु धारणमें जानना, जैसे–दधते॥

२२६० अत एकहल्मध्येऽनादेशादेर्लिटि। ६। ४। १२०॥

लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्य एकारः स्यादभ्यासलोपश्च किति लिटि॥

२२६०–कित् लिट् परे रहते लिट् निमित्तक आदेशादि न हो, ऐसा जो अङ्ग तदवयव असंयुक्त एक हल्के मध्यमें स्थित अकारके स्थानमें एकार हो और अभ्यासका लोप हो॥

२२६१ थलि च सेटि। ६। ४। १२१॥

प्रागुक्तं स्यात्। आदेशश्चेह वैरूप्यसंपादक एवाश्रीयते। शसिदद्योः प्रतिषेधवचनाज्ज्ञापकात्। तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव। देधे। देधाते। देधिरे। अतः किम्। दिदिवतुः। तपरः किम्। ररासे। एकेत्यादि किम्। तत्सरतुः। अनादेशादेः किम्। चकणतुः। लिट आदेशविशेषणादिह स्यादेव। नेमिथ। सेहे॥ ८॥ स्कुदि आप्रवणे। आप्रवणमुत्प्लवनमुद्धरणं च॥

२२६१–इट्के साथ वर्तमान थल् परे रहते तन्निमित्तक (सेट् थल्निमित्तक) आदेशादि न हो ऐसा जो अङ्ग तदवयव असंयुक्त एक हल्के मध्यमें स्थित अकारके स्थानमें एकार हो और अभ्यासका लोप हो। इस स्थलमें आदेश पदसे वैरूप्यसंपादक आदेशका ग्रहण है इस कारण "न शसददवादिगुणानाम्" यह प्रतिषेध भी सार्थक हुआ, उससे यह फल हुआ

कि, प्रकृति जस् और प्रकृति चर्का आदेश होनेपर भी एत्व और अभ्यासका लोप होगा । देचे । देधाते । देधिरे ।

अकारके स्थानमें एकार हो, यह बात कहनेसे 'दिदिवतुः' इस स्थानमें एकार नहीं हुआ ।

'अत्' इसमें तपरकरणके कारण 'ररासे' इस स्थानमें एत्व नहीं हुआ ।

'एकहल्मध्यस्य' कहनेसे 'तत्सरतुः' इस स्थानमें एत्व नहीं हुआ ।

लिट्निमित्त आदेशादि होनेपर 'चकणतुः' इस स्थानमें एत्व नहीं हुआ ।

लिट्के आदेश विशेषण होनेके कारण इस स्थानमें एत्व हुआ, जैसे-'नेमिथ,' 'सेहे' इस स्थानमें लिट्निमित्त आदेश नहीं है, इस कारण एत्व हुआ ॥

स्कुदि धातुके एकारकी इत्संज्ञा हुई, स्कुदि धातुका आप्रवण अर्थात् उत्प्लवन और उद्धरण अर्थ जानना ॥

२२६२ इदितो नुम् धातोः ।७।१।५८॥

स्कुन्दते । चुस्कुन्दे ॥ ९ ॥ श्विदि श्वैत्ये । अकर्मकः । श्विन्दते । शिश्विन्दे ॥ १० ॥ वदि अभिवादनस्तुत्योः । वन्दते । ववन्दे ॥ ११ ॥ भदि कल्याणे सुखेच । भन्दते । बभन्दे ॥ १२॥ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । मन्दते । ममन्दे ॥ १३ ॥ स्पदि किंचिच्चलने । स्पन्दते । पस्पन्दे ॥ १४ ॥ क्लिदि परिदेवने । शोके इत्यर्थः । सकर्मकः । क्लिन्दते चैत्रम् ॥ चिक्लिन्दे॥१५॥ मुद हर्षे । मोदते ॥ १६ ॥ दद दाने । ददते ॥

२२६२-इकारइत्संज्ञक धातुको नुम् हो । स्कुदि-स्कुन्दते । चुस्कुन्दे ॥ श्विदि धातुसे श्वैत्य जानना, यह अकर्मक है, जैसे-श्विन्दते । शिश्विन्दे ॥ वदि धातु अभिवादन और स्तुतिमें जानना, जैसे-वन्दते । ववन्दे ॥ भदि धातु कल्याण और सुखमें जानना, जैसे-भन्दते । बभन्दे ॥ मदि धातु स्तुति, मोद, मद, स्वप्न, कान्ति और गतिमें जानना, जैसे-मन्दते । ममन्दे ॥ स्पदि धातु ईषत् चलनमें जानना, जैसे-स्पन्दते । पस्पन्दे । क्लिदि धातु परिदेवन अर्थात् शोकमें जानना, यह सकर्मक है, जैसे-क्लिन्दते चैत्रम् । चिक्लिन्दे ॥ मुद धातु हर्षमें जानना, जैसे-मोदते ॥ दद धातु दानार्थक है, जैसे-ददते ॥

२२६३ न शसददवादिगुणानाम् ।६।४।१२६॥

शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्य एत्वाभ्यासलोपौ न । ददते । ददाते । ददिरे ॥ १७ ॥ ष्वद स्वर्द आस्वादने । अयमनुभवे सकर्मकः । रुचावकर्मकः ॥

२२६३-शस् धातु, दद् धातु और वकारादि धातुओंके गुण शब्दसे भावित जो अकार उसके स्थानमें एकार और अभ्यासका लोप न हो, जैसे-ददे । ददाते। ददिरे । ष्वद और स्वर्द धातु आस्वादन करनेमें जानना, यह अनुभवार्थमें सकर्मक और रुचि अर्थमें अकर्मक हैं ॥

२२६४ धात्वादेः षः सः । ६ ।१।६४ ॥

धातोरादेः षस्य सः स्यात् । सात्पदाद्योरितिषत्वनिषेधः । अनुस्वदते । सस्वदे ॥ १८ ॥ स्वर्दते । सस्वर्दे ॥१९॥ उर्द माने क्रीडायां च॥

२२६४-धातुके आदिमें स्थित षकारके स्थानमें स हो । "सात् पदाद्योः २१२३" इस सूत्रसे षत्वका निषेध हुआ, जैसे-अनुस्वदते । सस्वदे । स्वर्दते । सस्वर्दे ॥ उर्द धातु मानार्थक और क्रीडावाचक है ॥

२२६५ उपधायां च । ८ । २ । ७८ ॥

धातोरुपधाभूतयोरेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात् । ऊर्दते । ऊर्दाञ्चक्रे ॥ २० ॥ कुर्द खुर्द गुर्द गुद क्रीडायामेव।कूर्दते।चुकूर्दे॥२१॥ खूर्दते ॥ २२ ॥ गूर्दते ॥ २३ ॥ गोदते । जुगुदे ॥ २४ ॥ षूद क्षरणे । सूदते । सुषूदे ॥

सेक्-सृप्-सृ-स्तृ-सृज्-स्तृ-स्त्या
न्ये दन्त्याजन्तसादयः ।
एकाचः षोपदेशाः ष्वष्क्-
स्विद्-स्वद्-स्वञ्ज-स्वप-स्मिङः ॥

दन्त्यः केवलदन्त्यो न तु दन्तोष्ठजोपि । ष्वष्कादीनां पृथग्ग्रहणाज्ज्ञापकात् ॥ २५ ॥ ह्राद अव्यक्ते शब्दे । ह्रादते । जह्रादे ॥ २६ ॥ ह्लादी सुखे च । चादव्यक्ते शब्दे । ह्लादते॥२७॥ स्वाद आस्वादने । स्वादते ॥ २८ ॥ पर्द कुत्सिते शब्दे । गुदरवे इत्यर्थः । पर्दते ॥२९ ॥ यती प्रयत्ने । यतते । येते ॥ ३० ॥ युतृ जुतृ भासने । योतते । युयुते ॥ ३१ ॥ जोतते। जुजुते ॥३२॥ विथृ वेथृ याचने । विविथे॥३३॥ विवेथे ॥ ३४ ॥ श्रथि शैथिल्ये । श्रन्थते॥३५॥ ग्रथि कौटिल्ये। ग्रन्थते॥३६॥कत्थ श्लाघायाम् । कत्थते ॥ ३७ ॥ एधादयोऽनुदात्तेतो गताः ॥

अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः ॥ अत सातत्यगमने । अतति॥अत आदेः । आत। आततुः । आतुः। लुङि आतिस् ई इति स्थिते॥

२२६५-हल् परे रहते धातुके उपधाभूत रेफ और वकार परे इक्को दीर्घ हो, जैसे-ऊर्दते । ऊर्दाञ्चक्रे। कुर्द, खुर्द,गुर्द, और गुद धातु क्रीडा अर्थमें जानना, जैसे-कूर्दते । चुकूर्दे । खूर्दते । गूर्दते । गोदते । जुगुदे ॥ षूद धातु क्षरण अर्थमें जानना, जैसे-सूदते । सुषूदे ॥

सेक्, सृप्, सृ, स्तृ,सृज्, स्तृ और स्त्यै धातुसे अन्य दन्त्य अजन्त सकारादि एकाच् धातु, ष्वष्क्, स्विद्, स्वद्, स्वञ्ज, स्वप, और स्मिङ् धातु यह षोपदेश हैं । दन्त्य धातुसे केवल

न्त्य धातु ही जानना, स्वष्कादि धातुके पृथक् ग्रहणके कारण दन्त्योष्ठजका ग्रहण नहीं है ॥

ह्राद धातु अव्यक्त शब्दमें जानना, जैसे–ह्रादते। जह्रादे ॥ ह्लादी धातु सुख और अव्यक्त शब्द करनेमें जानना, जैसे–ह्लादते ॥ स्वाद धातु आस्वादनमें। पर्द धातु कुत्सित शब्द अर्थात् गुदरवकरनेमें जानना, पर्दते ॥ यति धातु प्रयत्नमें जानना, जैसे–यतते। येते ॥ युतृ और जुतृ धातु भासनार्थमें जानना, जैसे–योतते। युयुते। जोतते। जुजुते ॥ विथृ और वेथृ धातुको याचनार्थमें जानना, जैसे–विथे। विवेथे ॥ श्रथि धातु शैथिल्यमें जानना, जैसे–श्रन्थते ॥ ग्रथि धातु कौटिल्यमें जानना, जैसे–ग्रन्थते ॥ कत्थ धातु श्लाघामें जानना, जैसे–कत्थते ॥ एवआदि अनुदात्तेत् ३६ धातु कहे गये।

अब तवर्गान्त ३८ परस्मैपदी धातु कहतेहैं। अत धातु निरन्तर गमनमें जानना, जैसे–अतति।"अत आदेः २२४८" इस सूत्रसे अकारको दीर्घ हुआ, जैसे–आत। आततुः। लुङ्में आत+ई+स+ई+त् ऐसा होनेपर–॥

२२६६ इट ईटि । ८ । २ । २८ ॥

इटः परस्य सस्य लोपः स्यादीटि परे ॥ सिज्लोप एकादेशे सिद्धो वाच्यः ॥ * ॥ आतीत्। आतिष्टाम्। आतिषुः ॥

२२६६–ईट् परे रहते इट्के परे जो सकार उसका लोप हो।

सिच् प्रत्ययका लोप एकादेशमें सिद्ध हो ऐसा कहना चाहिये, * जैसे–आतीत्। आतिष्टाम्। आतिषुः ॥

२२६७ वदव्रजहलन्तस्याचः ।७।२।३॥

वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु। इति प्राप्ते ॥

२२६७–सिच् परे रहते वद् धातु, व्रज धातु और हलन्त धातुके अच्को परस्मैपदमें वृद्धि हो। ऐसी प्राप्ति होनेपर–॥

२२६८ नेटि । ७ । २ । ४ ॥

इडादौ सिचि प्रागुक्तं न स्यात्। मा भवानतीत्। अतिष्टाम्। अतिषुः ॥ १ ॥ चिती संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टाम्। अचेतिषुः ॥ २ ॥ च्युतिर् आसेचने। सेचनमार्द्रीकरणम्। आङीषदर्थेऽभिव्याप्तौ च ॥ इर इत्संज्ञा वाच्या ॥ * ॥ च्योतति। चुच्योत ॥

२२६८–इट् आदिमें है जिसके ऐसे सिच् प्रत्यय परे रहते वृद्धि न हो, जैसे–मा भवानतीत्। अतिष्टाम्। अतिषुः। चिती धातु सम्यक् ज्ञानमें है। चेतति। चिचेत। अचेतीत्। अचेतिष्टाम्। अचेतिषुः। च्युतिर् धातुका अर्थ आसेचन अर्थात् आर्द्रीकरण है, आङ् शब्दसे ईषदर्थ और अभिव्यक्ति जानना।

इर्की इत्संज्ञा हो ऐसा कहना चाहिये * च्योतति। चुच्योत ॥

२२६९ इरितो वा । ३ । १ । ५७ ॥

इरितो धातोश्च्लेरङ् वा स्यात्परस्मैपदे परे। अच्युतत्–अच्योतीत् ॥ ३ ॥ श्च्युतिर् क्षरणे। श्च्योतति। चुश्च्योत। अश्च्युतत्–अश्च्योतीत्। यकाररहितोऽप्ययम्। श्चोतति ॥ ४ ॥ मन्थ विलोडने। विलोडनं प्रतीघातः। मन्थति। ममन्थ। यासुटः किदाशिषीति कित्वादनिदितामिति नलोपः। मथ्यात् ॥ ५ ॥ कुथि पुथि लुथि मथि हिंसासंक्लेशनयोः। इदित्वान्नलोपो न। कुन्थ्यात्। मन्थ्यात् ॥ ९ ॥ षिध गत्याम्। सेधति। सिषेध। सेधिता। असेधीत्। सात्पदाद्योरिति निषेधे प्राप्ते ॥

२२६९–इर् इत्संज्ञक धातुके परे स्थित च्लिके स्थानमें विकल्प करके अङ् आदेश हो, जैसे–अच्युतत्, अच्योतीत् ॥ श्च्युतिर् धातु क्षरण अर्थमें है। श्च्योतति। चुश्च्योत। अश्च्युतत्, अश्च्योतीत्। यकार रहित यही श्चु धातु है। श्चोतति ॥ मन्थ धातु विलोडन, अर्थात् प्रतीघातार्थमें है। मन्थति। ममन्थ। यासुट् प्रत्ययके "किदाशिषि २२१६" इस सूत्रसे कित्वके कारण "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप होकर–मथ्यात् ॥ कुथि, पुथि, लुथि, और मथि धातु हिंसा और सम्यक् क्लेशमें है। इदित्वके कारण नकारका लोप न होगा, जैसे–कुन्थ्यात्। मन्थ्यात् ॥ षिधु धातु गति अर्थमें है। सेधति। सिषेध। सेधिता। असेधीत्। "सात् पदाद्योः २१२३" इस सूत्रसे षत्व निषेध प्राप्त होनेपर–॥

२२७० उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् । ८ । ३ । ६५ ॥

उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात् ॥

२२७०–उपसर्गस्थ निमित्तके परे स्थित सुनोति, अर्थात् सु धातु, सू धातु, सो धातु, स्तु धातु, स्तुभ्, स्था, सेनय, सेध, सिच, सञ्ज और स्वञ्ज धातुके सकारके स्थानमें षकार हो ॥

२२७१ सदिरप्रतेः । ८ । ३ । ६६ ॥

प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात् ॥

२२७१–प्रतिभिन्न और उपसर्गके उत्तर सद् धातुके सकारके स्थानमें षकार हो ॥

२२७२ स्तम्भेः । ८ । ३ । ६७ ॥

स्तम्भेः सौत्रस्य सस्य षः स्यात्। योगविभाग उत्तरार्थः। किञ्च, अप्रतेरिति नानुवर्तते। बाहुप्रतिष्टम्भविवृद्धमन्युः।

२२७२–स्तम्भ धातुके सकारके स्थानमें षकार हो, भिन्न सूत्रकरण उत्तरार्थ है यहां 'अप्रतेः' इस पदकी अनुवृत्ति नहीं होतीहै इसलिये 'बाहुप्रतिष्टम्भविवृद्धमन्युः' इत्यादि स्थलमें प्रतिपूर्वक होनेसे भी षत्व हुआ ॥

२२७३ अवाच्चालम्बनाविदूर्ययोः । ८ । ३ । ६८ ॥

अवात्स्तम्भेरेतयोरर्थयोः षत्वं स्यात् ॥

२२७३–आलम्बन, अर्थात् आश्रय और आविदूर्य्य अर्थात् सामीप्यार्थमें अवपूर्वक स्तम्भ धातुके सकारको षत्व हो॥

२२७४ वेश्च स्वनो भोजने।८।३।६९॥

व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने ॥

२२७४–भोजनार्थमें विपूर्वक और अवपूर्वक स्वन् धातुके सकारको षत्व हो ॥

२२७५ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्।८।३।७०॥

परिनिविभ्यः परेषामेषां सस्य षः स्यात् । निषेधति ॥

२२७५–परिपूर्वक, निपूर्वक और विपूर्वक, सेव, सित, सय, सिव, सह, सुट्, स्तु और स्वञ्ज धातुके सकारको षत्व हो, जैसे–निषेधति ॥

२२७६ प्राक्सितादड्व्यवायेपि। ८। ३ । ६३ ॥

सेवसितेत्यत्र सितशब्दात्प्राक् ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात् । न्यषेधत्। न्यषेधीत् । न्यषेधिष्यत् ॥

२२७६–"सेवसित २२७५" इस स्थलमें सित शब्दके पूर्वमें जो सुनोति,अर्थात् सु इत्यादि धातुहैं उनके अड् व्यवधान रहनेपर भी सकारको षत्व हो, जैसे–न्यषेधत् । न्यषेधीत् । न्यषेधिष्यत् ॥

२२७७ स्थादिष्वभ्यासेन चाभ्यासस्य । ८ । ३ । ६४ ॥

प्राक् सितात् स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात्। एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम् । निषिषेध । निषिषिधतुः ॥ १० ॥

२२७७–सित शब्दके पूर्ववर्त्ती स्था आदि धातुओंके सकारको अभ्याससे व्यवहित होनेपर भी षत्व हो, इनका ही अभ्यासके व्यवधानमें षत्व होगा सुनोत्यादि धातुओंको तो नहीं, जैसे–निषिषेध । निषिषिधतुः ॥

२२७८ सेधतेर्गतौ ।८।३।११३ ॥

गत्यर्थस्य सेधतेः षत्वं न स्यात् । गङ्गां विसेधति ॥ ११ ॥ षिधू शास्त्रे माङ्गल्ये च । शास्त्रं शासनम् ॥

२२७८–गत्यर्थक सिध् धातुके सकारको षत्व न हो,जैसे–गंगां विसेधति । षिधू धातु शास्त्र (शासन) और माङ्गल्य अर्थमें है ॥

२२७९ स्वरतिसूतिसूयतिधूञूदितो वा । ७ । २ । ४४ ॥

स्वरत्यादेरूदितश्च परस्य वलादेरार्धातुकस्येड्वा स्यात् ॥

२२७९–स्वरति, अर्थात् स्वृ धातु, सू, सूञ्, धूञ् और ऊकार इत्संज्ञक धातुओंके परे स्थित वलादि आर्धधातुक को विकल्प करके इट् हो ॥

२२८० झषस्तथोर्धोऽधः।८।२।४०॥

झषः परयोस्तथयोर्धः स्यान्न तु दधातेः । जश्त्वम् । सिषेद्ध–सिषेधिथ । सेद्धा–सेधिता । सेत्स्यति–सेधिष्यति । असैत्सीत् ॥

२२८०–झष्के परे स्थित तकार और थकारके स्थानमें ध आदेश हो, परन्तु धाञ् धातुके न हो, जश्त्व होकर सिषेद्ध । सिषेधिथ । सेद्धा, सेधिता । सेत्स्यति, सेधिष्यति । असैत्सीत् ॥

२२८१ झलो झलि । ८ । २ । २६ ॥

झलः परस्य सस्य लोपः स्यात् झलि। असैद्धाम् । असैत्सुः । असैत्सीः । असैद्धम् । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । पक्षे असेधीत् । असेधिष्टामित्यादि ॥ १२ ॥ खाद्द भक्षणे । ऋकार इत् । खादति । चखाद ॥ १३ ॥ खद स्थैर्ये हिंसायां च । चाद्भक्षणे । स्थैर्ये अकर्मकः । खदति ॥

२२८१–झल् परे रहते झल्के परे स्थित सकारका लोप हो, जैसे–असैद्धाम् । असैत्सुः । असैत्सीः । असैद्धम् । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । पक्षमें–असेधीत् । असेधिष्टाम्, इत्यादि ॥ खाद्द, धातु भक्षणार्थमें है । ऋकारकी इत्संज्ञा हुई, जैसे–खादति । चखाद ॥ खद् धातु हिंसा, ऐश्वर्य और चकारसे भक्षणार्थमें जानना । स्थैर्य्यार्थमें अकर्मक है, खदति ॥

२२८२ अत उपधायाः।७।२।११६॥

उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । चखाद ॥

२२८२–ञित् और णित् प्रत्यय परे रहते धातुके उपधाभूत अकारको वृद्धि हो, जैसे–चखाद ॥

२२८३ णलुत्तमो वा । ७ । १ ।९१॥

उत्तमो णल्वा णित्स्यात् । चखाद–चखद ॥

२२८३–उत्तमसंज्ञक णल् विकल्प करके णित् हो, जैसे–चखाद, चखद ॥

२२८४ अतो हलादेर्लघोः।७।२।७॥

हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात्।अखादीत्–अखदीत् १४॥

बद स्थैर्ये। पवर्गीयादिः। बदति। बबाद। बेदतुः। बेदिथ। बबाद-बबद। अबादीत्-अबदीत् ॥१९॥ गद व्यक्तायां वाचि। गदति ॥

२२८४-इडादि सिच् परे रहते परस्मैपदमें इलादि धातुके लघुसंज्ञक अकारको विकल्प करके वृद्धि हो,जैसे-अखादीत्,अखदीत्॥बद् धातु स्थैर्य्य अर्थमें है यह धातु पवर्गीयादि है। बदति। बबाद। बेदतुः। बेदिथ। बबाद, बबद। अबादीत्, अबदीत्। गद् धातु व्यक्तवचन अर्थमें जानना। गदति ॥

२२८५ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च।८।४।१७॥

उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद् गदादिषु। प्रणिगदति। जगाद ॥ १६ ॥ रद विलेखने। विलेखनं भेदनम्। रराद। रेदतुः ॥१७॥ णद अव्यक्ते शब्दे ॥

२२८५-उपसर्गस्थ निमित्तके परे स्थित नि उपसर्गके नकारको णत्व हो गद, नद, पत, पद्, घु, संज्ञक मा,सो, हन, या, वा, द्रा, प्सा, वप, वह, शम्, चि और दिह धातु परे रहते, जैसे-प्रणिगदति। जगाद ॥ रद् धातु विलेखन, अर्थात् भेद करनेमें है। रराद। रेदतुः ॥ णद् धातु अव्यक्त शब्द करनेमें है ॥

२२८६ णो नः।६।१।६५॥

धातोरादेर्णस्य नः स्यात्।

णोपदेशास्त्वनर्द्द-नाटि-नाथ-नाध्-नन्द-नक्क-नॄ-नृतः।

नाटेर्दीर्घोऽहस्य पर्युदासाद्‌दृटादिर्णोपदेश एव तवर्गचतुर्थान्तनाधतेर्नॄनन्द्योश्च केचिण्णोपदेशतामाहुः ॥

२२८६-धातुके आदिमें स्थित णकारके स्थानमें नकार हो। नर्द्, नाटि, नाथ, नाध्,नन्द्,नक्क, नॄ और नृत् धातु भिन्न धातु णोपदेश हैं। दीर्घाई नाटि धातुके पर्युदासके कारण षटादि का धातु णोपदेश ही है। कोई २ कहतेहैं कि, तवर्गके चतुर्थ वर्णान्त, अर्थात् धकारान्त नाध् धातु और नॄ धातु और नन्द धातु णोपदेश है ॥

२२८७ उपसर्गादसमासेपि णोपदेशस्य।८।४।१४॥

उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेपि। प्रणदति। प्रणिनदति ॥ १८ ॥ अर्द गतौ याचने च। अत आदेः ॥

२२८७-समास होनेपर अथवा न होनेपर भी उपसर्गस्थ निमित्तके परे स्थित णोपदेश धातुके नकारको णत्व हो, जैसे-प्रणदति। प्राणिनदति। अर्द धातु गति और याचन अर्थमें है। "अत आदेः २२४८" यह सूत्र लगकर- ॥

२२८८ तस्मान्नुड् द्विहलः।७।४।७१॥

द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनर्द। आर्दीत् ॥ १९ ॥ नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः प्रनर्दति ॥२०॥ गर्दति। जगर्द ॥ २१ ॥ तर्द हिंसायाम्। तर्दति ॥ २२ ॥ कर्द कुत्सिते शब्दे। कुत्सिते कौक्षे। कर्दति ॥ २३ ॥ खर्द दन्दशूके। दंशहिंसादिरूपायां दन्दशूकक्रियायामित्यर्थः। खर्दति। चखर्द ॥ २४ ॥ अति अदि बन्धने। अन्तति। आनन्त ॥ २५ ॥ अन्दति। आनन्द ॥ २६ ॥ इदि परमैश्वर्ये। इन्दति। इन्दाञ्चकार ॥ २७ ॥ बिदि अवयवे। पवर्गतृतीयादिः। बिन्दति अवयवं करोतीत्यर्थः। भिदीति पाठान्तरम् ॥२८॥ गडि वदनैकदेशे। गण्डति। अन्तत्यादयः पञ्चैते न तिङ्विषया इति काश्यपः। अन्ये तु तिङमपीच्छन्ति ॥ २९॥ णिदि कुत्सायाम्। निन्दति। प्रणिन्दति ॥३०॥ टुनदि समृद्धौ ॥

२२८८-दो हल्युक्त धातुके दीर्घीभूत अकारके उत्तर नुट्का आगम हो, जैसे-आनर्द। आर्दीत्। नर्द् और गर्द धातु शब्द करनेमें हैं। इस स्थलमें णोपदेशत्वाभावके कारण णत्व नहीं होगा, जैसे-प्रनर्दति। गर्दति। जगर्द ॥ तर्द् धातु हिंसा अर्थमें है। तर्दति। कर्द् धातु कुत्सित कौक्ष शब्दमें है। कर्दति ॥ खर्द् धातु दन्दशूक, अर्थात् दंशहिंसादिरूप दंदशूकक्रियामें है। खर्दति। चखर्द ॥ अति और अदि धातु बंधनमें है। अन्तति। आनन्त। अन्दति। आनन्द ॥ इदि धातु परमैश्वर्यमें हैं। इन्दति। इन्दाञ्चकार ॥ बिदि धातु अवयवमें है, यह पवर्गीय बकारादि है। बिन्दति, अर्थात् अवयव करताहै। कोई २ बिदि धातुके स्थानमें 'भिदि' ऐसा पाठान्तर कहतेहैं ॥ गडि धातु वदनका एकदेश अर्थमें है। गण्डति ॥ अन्तति आदि पांच धातु तिङ्विषयक नहीं हैं, यह काश्यपका मत है, दूसरे तो तिङ् भी इच्छा करतेहैं ॥ णिदि धातु कुत्सामें है। निन्दति। प्रणिन्दति ॥ टुनदि धातु समृद्धि अर्थमें है ॥

२२८९ आदिर्ञिटुडवः।१।३।५॥

उपदेशे धातोराद्या एते इतः स्युः। नन्दति। इदित्वान्नलोपो न। नन्द्यात् ॥ ३१ ॥ चदि आह्लादे। चचन्द ॥ ३२ ॥ त्रदि चेष्टायाम्। तत्रन्द ॥ ३३ ॥ कदि क्रदि क्लदि आह्वाने रोदने च। चकन्द ॥ ३४ ॥ चक्रन्द ॥ ३५ ॥ चक्लन्द ॥ ३६ ॥ क्लिदि परिदेवने। चिक्लिन्द ॥ ३७ ॥ शुन्ध शुद्धौ। शुशुन्ध। नलोपः। शुध्यात् ॥३८॥

२२८९-उपदेशावस्थामें धातुके आदिमें स्थित ञि, टु, डु की इत्संज्ञा हो, इससे टुकी इत्संज्ञा होनेपर नन्दति। इदित् होनेके कारण नकारका लोप नहीं हुआ, जैसे-नन्द्यात्॥

चदि धातु आह्लाद अर्थमें है । चचन्द ॥ त्रदि धातु चेष्टा अर्थमें है । तत्रन्द ॥ कदि क्रदि और क्लदि धातु आह्वान और रोदन अर्थमें है । चकन्द । चक्रन्द । चक्लन्द ॥ क्लिदि धातु परिवेदन अर्थमें है । चिक्लिन्द ॥ शुन्ध धातु शुद्धि अर्थमें है । शुशुन्ध । नकारका लोप होकर—शुध्यात् ।

अथ कवर्गीयान्ता अनुदात्तेतो द्विचत्वारिंशत्। शीकृ सेचने । तालव्यादिः । दन्त्यादिरित्येके । शीकते । शिशीके ॥ १ ॥ लोकृ दर्शने । लोकते । लुलोके ॥ २ ॥ श्लोकृ संघाते । संघातो ग्रन्थः । स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा। आद्ये अकर्मको द्वितीये सकर्मकः । श्लोकते ॥ ३ ॥ द्रेकृ ध्रेकृ शब्दोत्साहयोः । उत्साहो वृद्धिरौद्धत्यं च । दिद्रेके ॥ ४ ॥ दिध्रेके ॥५॥ रेकृ शंकायाम् रेकते ॥ ६ ॥ सेकृ स्रेकृ स्रकि श्रकि श्लकि गतौ । त्रयो दन्त्यादयः द्वौ तालव्यादी । अषोपदेशत्वान्न षः । सिसेके ॥ ११ ॥ शकि शंकायाम् । शंकते । शशंके ॥ १२ ॥ अकि लक्षणे । अंकते । आनंके ॥ १३ ॥ वकि कौटिल्ये । वंकते ॥ १४ ॥ मकि मण्डने । मंकते ॥ १५ ॥ कक लौल्ये । लौल्यं गर्वश्चापल्यं च । ककते । चकके ॥ १६ ॥ कुक वृक आदाने । कोकते । चुकुके ॥ १७ ॥ वर्कते ॥ ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन ॥ * ॥ ववृके ॥ १८ ॥ चक तृप्तौ प्रतिघाते च । चकते । चेके ॥ १९ ॥ ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः ॥ कंकते । डुढौके । तुत्रौके ॥ सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः ॥ * ॥ ष्वष्कते । षष्वष्के । अत्र तृतीयो दन्त्यादिरित्येके ॥ लघि भोजननिवृत्तावपि ॥ ३५ ॥ अघि वघि मघि गत्याक्षेपे । आक्षेपो निन्दा । गतौ गत्यारम्भे चेत्यन्ये । अंघते । आनंघे । वंघते । मंघते । मघि कैतवे च ॥ ३८ ॥ राघृ लाघृ द्राघृ सामर्थ्ये । राघते ॥ ३९ ॥ लाघते ॥ ४० ॥ ध्राघृ इत्यपि केचित् । द्राघृ आयामे च । आयामो दैर्घ्यम् ॥ द्राघते ॥ ४१ ॥ श्लाघृ कत्थने । श्लाघते ॥ ४२ ॥

अब कवर्गान्त आत्मनेपदी ४२ धातु कहतेहैं । शीकृ धातु सेचनमें है, वह तालव्यादि है, कोई २ कहतेहैं कि, यह दन्त्यादि है । शीकते । शिशीके। लोकृ धातु अवलोकन अर्थमें है । लोकते । लुलोके ॥ श्लोकृ धातु संघात अर्थमें है, अर्थात् ग्रन्थमें वह इस स्थलमें ग्रथ्यमानका व्यापार अथवा ग्रन्थकर्त्ताका व्यापार है । प्रथमार्थमें अकर्मक और दूसरे अर्थमें सकर्मक है । श्लोकते ॥ द्रेकृ और ध्रेकृ धातु शब्द और उत्साह अर्थमें है, उत्साह शब्दसे वृद्धि और औद्धत्य जानना। दिद्रेके । दिध्रेके ॥ रेकृ धातु शंकामें है । रेकते ॥ सेकृ, स्रेकृ, स्रकि और श्लकि धातु गति अर्थमें है, इनके मध्यमें तीन धातु दन्त्यादि और दो धातु तालव्यादि हैं । अषोपदेशत्वके कारण षत्व नहीं होगा, जैसे—सिसेके ॥ शकि धातु शंकामें है। शंकते । शशंके ॥ अकि धातु लक्षण अर्थमें है । अंकते । आनङ्के ॥ वकि धातु कुटिलतामें है । वंकते ॥ मकि धातु मण्डनमें है । मंकते ॥ कक धातु लौल्य, अर्थात् गर्व और चपलतामें है । ककते । चकके । कुक और वृक् धातु आदान अर्थात् ग्रहणार्थमें है । कोकते । चुकुके । वर्कते ।

ऋकारोपध धातुके उत्तर लिट्को गुण और पूर्वविप्रतिषेधसे कित्व हो * इससे गुणके पहले कित्व होनेके कारण गुण न होकर ववृके ।

चक् धातु तृप्ति और प्रतिघातमें है । चकते । चेके ॥ ककि, वकि, श्वकि, त्रकि, ढौकृ, त्रौकृ, ष्वष्क, वस्क, मस्क, टिकृ, टीकृ, तिकृ, तीकृ, रघि और लघि यह सब धातु गत्यर्थक हैं। कंकते । डुढौके । तुत्रौके ।

सुब्धातु (नामधातु) ष्ठिवु और ष्वष्क धातुके षकारको सत्व न हो * ष्वष्कते । षष्वष्के । यहां किसी २ ने तीसरी धातुको अर्थात् ष्वष्क धातुको दन्त्य सकारादि कहाहै । लघि धातु भोजननिवृत्ति अर्थमें भी जानना ॥ अघि, मघि और वघि धातु गतिके आक्षेपमें है आक्षेप शब्दसे निन्दा जानना । कोई २ कहतेहैं कि, यह गति और गतिका आरम्भ इन दो अर्थोंमें है । अंघते । आनंघे । वंघते । मंघते ॥ मघि धातु कैतव अर्थात् कपटमें है ॥ राघृ, लाघृ और द्राघृ धातु सामर्थ्यमें है। राघते । लाघते । कोई २ कहतेहैं कि, ध्राघृ धातु भी उक्तार्थक है ॥ द्राघृ, धातु आयाम अर्थात् दैर्घ्य अर्थमें है । द्राघते ॥ श्लाघृ धातु कत्थन अर्थात् आत्मगुणाविष्करण अर्थमें है । श्लाघते ॥

अथ परस्मैपदिनः पञ्चाशत् । फक्क नीचैर्गतौ। नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च । फक्कति । पफक्क ॥ १ ॥ तक हसने । तकति ॥ २ ॥ तकि कृच्छ्रजीवने । तंकति ॥ ३ ॥ बुक्क भषणे । भषणं श्वरवः । बुक्कति ॥ ४ ॥ कख हसने । प्रनिकखति ॥ ५ ॥ ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः । ओखति । ओखांचकार ॥ १० ॥ शाखृ श्लाखृ व्याप्तौ । शाखति ॥ १२ ॥ उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः । द्वितीयान्ताः पञ्चदश। यान्तास्त्रयोदश । इह खान्तेषु रिख त्रख त्रिखि शिखि इत्यपि चतुरः केचित्पठन्ति ॥

अब परस्मैपदी ५० धातु कहते हैं—फक्क धातु नीच गति अर्थात् मंद २ गमन और असद्व्यवहारमें है । फक्कति । पफक्क ॥ तक धातु हसनमें है । तकति ॥ तकि धातु कष्टसे जीवनधारण करनेमें है । तंकति ॥ बुक्क धातु भषण, अर्थात्

कुत्तेकी ध्वनिमें है। बुक्कति ॥ कख धातु हसनमें है। प्रनिकखति। ओखृ, राखृ, लाखृ, दाखृ और ध्राखृ, धातु शोषण और अलमर्थमें है। ओखति। ओखाञ्चकार ॥ शाखृ और श्लाखृ धातु व्याप्ति अर्थमें है। शाखति ॥ उख, उखि, वख, वखि, मख, मखि, णख, णखि, रख, रखि, लख, लखि, इख, इखि, ईखि, वल्ग, रगि, लगि, अगि, वगि, मगि, तगि, त्वगि, श्रगि, श्लगि, इगि, रिगि और लिगि धातु गत्यर्थमें हैं, इनमें कवर्ग द्वितीयान्त, अर्थात् खकारान्त १५ धातु और गकारान्त १३ धातु हैं। इनके अतिरिक्त खकारान्तमें रिख, त्रख, त्रिखि, शिखि यह चार धातु भी कोई २ पढतेहैं ॥

२२९० अभ्यासस्याऽसवर्णे।६।४।७८॥

अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि। उवोख। संनिपातपरिभाषया इजादेरित्याम्न। ऊखतुः। ऊखुः। इह सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद्ध्रस्वः प्राप्तो न भवति सकृत्प्रवृत्तत्वात्। आङ्गत्वाद्धि पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः। वार्णादाङ्गं बलीय इति न्यायात्परत्वाच्च। उङ्खति। ववखतुः। वङ्खति। मंखतुः॥त्वगि कम्पने च॥४४॥ युगि जुगि बुगि वर्जने। युङ्गति ॥ ४७ ॥ घघ हसने। घघति। जघाघ ॥ ४८॥ मघि मण्डने। मंघति ॥ ४९ ॥ शिघि आघ्राणे। शिंघति॥५०॥

२२९०—असवर्ण अच् वर्ण परे रहते अभ्याससम्बन्धी इवर्णके स्थानमें इयङ् और उवर्णके स्थानमें उवङ् आदेश हो, जैसे—उवोख। सन्निपातपरिभाषासे "इजादेः० २२३७" इस सूत्रसे आम् प्रत्यय नहीं हुआ। ऊखतुः। ऊखुः, इस स्थलमें अभ्यासके ग्रहणसे सवर्णदीर्घके ग्रहणके कारण ह्रस्वकी प्राप्ति हुई, परन्तु सकृत् प्रवृत्तत्वके कारण वह नहीं हुई, जो कहो कि, पूर्वोपस्थित निमित्तके कारण दीर्घको अन्तरङ्ग होनेसे पहले दीर्घ ही होगा वह नहीं कह सकते हो कारण कि, आङ्गत्वके कारण "वार्णादाङ्गं बलीयः" इस न्यायसे और परत्वके कारण पर्जन्यवत् लक्षण प्रवृत्तिसे ह्रस्व होनेपर पश्चात् दीर्घ होगा। उंखति। ववखतुः। वंखति। मेखतुः॥ त्वगि धातु कम्पन अर्थमें है। युगि, जुगि और बुगि धातु वर्जनमें है। युङ्गति। घघ धातु हसनमें है। घघति। जघाघ ॥ मघि धातु मंडन अर्थात् भूषणमें है। मंघति ॥ शिघि धातु आघ्राणमें है। शिंघति ॥

अथ चवर्गीयान्ताः। तत्रानुदात्तेत एकविंशतिः। वर्च दीप्तौ। वर्चते ॥ १ ॥ षच सेचने सेवने च। सचते। सेचे। सचिता ॥२॥ लोचृ दर्शने। लोचते। लुलोचे ॥ ३ ॥ शच व्यक्तायां वाचि। शेचे ॥ ४ ॥ श्वच श्वचि गतौ। श्वचते। श्वञ्चते ॥ ६ ॥ कच बन्धने। कचते ॥ ७ ॥ कचि काचि दीप्तिबन्धनयोः। चकञ्चे। चकाञ्चे ॥ ९ ॥ मच मुचि कल्कने। कल्कनं दम्भः शाठ्यं च। कथनमित्यन्ये। मेचे। मुमुञ्चे॥११॥ मचि धारणोच्छ्रायपूजनेषु। ममञ्चे॥१२॥पचि व्यक्तीकरणे पञ्चते ॥ १३ ॥ ष्टुच प्रसादे। स्तोचते। तुष्टुचे॥१४॥ ऋज गतिस्थानार्जनोपार्जनेषु॥ अर्जते। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वान्नुट्। आनृजे ॥ १५ ॥ ऋजि भृजी भर्जने। ऋञ्जते। उपसर्गादृतीति वृद्धिः। प्रार्ञ्जते। ऋञ्जाञ्चक्रे। आर्ञ्जिष्ट॥१६॥ भर्जते। बभृजे।अभर्जिष्ट ॥१७॥ एजृ भ्रेजृ भ्राजृ दीप्तौ। एजांचक्रे ॥ २० ॥ ईज गतिकुत्सनयोः। ईजांचक्रे ॥ २१ ॥

अब चवर्गीयान्त धातु कहतेहैं, उनमें अनुदात्तेत् २१ धातु हैं। वर्च धातु दीप्तिमें है। वर्चते ॥ षच धातु सेवन और सेचन अर्थमें है। सेचते। सेचे। सचिता। लोचृ धातु दर्शन करनेमें है। लोचते। लुलोचे ॥ शच धातु स्पष्ट वचनमें है। शेचे। श्वच और श्वचि धातु गति अर्थमें है। श्वचते। श्वञ्चते ॥ कच धातु बंधन अर्थमें है। कचते ॥ कचि और काचि धातु दीप्ति और बंधन अर्थमें है। चकञ्चे। चकाञ्चे ॥ मच धातु और मुचि धातु कल्कन, अर्थात् दम्भ, शाठ्य और किसी २ के मतमें कथनमें भी है। मेचे। मुमुञ्चे ॥ मचि धातु धारण उच्छ्राय और पूजा करनेमें है। ममञ्चे ॥ पचि धातु व्यक्तीकरण अर्थमें है। पंचते ॥ ष्टुच धातु प्रसादमें है। स्तोचते। तुष्टुचे ॥ ऋज धातु गति, स्थानार्जन और उपार्जन अर्थमें है। अर्जते।

नुड्विधिमें ऋकारैकदेश रेफ हल्त्वसे गृहीत होताहै। इस कारण द्विहल्त्व होनेसे उसके उत्तर नुट् आगम होकर आनृजे॥ ऋजि और भृजी धातु भर्जन अर्थमें है। ऋञ्जते। "उपसर्गादृति० ७४" इस सूत्रसे वृद्धि होकर, प्रार्ञ्जते। ऋञ्जाञ्चक्रे। आर्ञ्जिष्ट। भर्जते। बभृजे। अभर्जिष्ट ॥ एजृ, भ्रेजृ और भ्राजृ धातु दीप्ति अर्थमें है। एजाञ्चक्रे। ईज धातु गति और कुत्सन अर्थमें है। ईजाञ्चक्रे ॥

अथ द्विसप्ततिर्व्रज्यन्ताः परस्मैपदिनः ॥ शुच शोके। शोचति ॥ १ ॥ कुच शब्दे तारे। कोचति ॥ २॥ कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः। अनिदितामिति नलोपः। कुच्यात् ॥ ३ ॥ क्रुच्यात् ॥४॥ लुञ्च अपनयने। लुच्यात् ॥ ५ ॥ अञ्चु गतिपूजनयोः। अच्यात्। गतौ नलोपः। पूजायां तु। अञ्च्यात् ॥ ६ ॥ वञ्चु चञ्चु तञ्चु त्वञ्चु म्रुञ्चु म्लुञ्चु म्रुचु म्लुचु गत्यर्थाः। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुञ्चीत्। अम्लुञ्चीत् ॥

अब व्रज धातु पर्यन्त ७२ धातु परस्मैपदी हैं। शुच धातु शोक करनेमें है। शोचति ॥ कुच धातु ऊंचे स्वरसे शब्द करनेमें है। कोचति। कुञ्च क्रुञ्च धातु कौटिल्य और अल्पी-

भावमें है। "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप होकर कुच्यात्। क्रुच्यात्। लुञ्च धातु अपनयन अर्थमें है। लुच्यात्॥ अञ्चु धातु गति और पूजा अर्थमें है। गत्यर्थमें नकारका लोप होकर, अच्यात्। पूजार्थमें नकारका लोप न होनेसे, अञ्च्यात्। वञ्चु, चञ्चु, तञ्चु, त्वञ्चु, म्रुञ्चु, म्लुञ्चु, म्रुचु और म्लुचु धातु गत्यर्थक हैं। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुञ्चीत्। अम्लुञ्चीत्॥

२२९१ जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च। ३।१।५८॥

एभ्यश्च्लेरङ् वा स्यात्। अम्रुचत्–अम्रोचीत्। अम्लुचत्–अम्लोचीत्॥ १४॥ ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे। जुग्रोच। अग्रुचत्–अग्रोचीत्। जुग्लोच। अग्लुचत्–अग्लोचीत्। अकोजीत्। अखोजीत्॥ १८॥ ग्लुञ्चु षस्ज गतौ। अङ्। अग्लुचत्–अग्लुञ्चीत्॥ १९॥ सस्य श्चुत्वेन शः। जश्त्वेन जः। सज्जति। अयमात्मनेपद्यपि। सज्जते॥ २०॥ गुजि अव्यक्ते शब्दे। गुञ्जति। गुञ्ज्यात्॥ २१॥ अर्च पूजायाम्। आनर्च॥ २२॥ म्लेछ अव्यक्ते शब्दे। अस्फुटेऽपशब्दे चेत्यर्थः। म्लेच्छति। मिम्लेच्छ॥ २३॥ लछ लाछि लक्षणे। ललच्छ॥ २४॥ ललाञ्छ॥ २५॥ वाछि इच्छायाम्। वाञ्छति॥ २६॥ आछि आयामे। आञ्छति। अत आदेरित्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थम्। तेन दीर्घाभावान्न नुट्। आञ्छ। तपरकरणं मुखसुखार्थमिति मते तु नुट्। आनाञ्छ॥ २७॥ ह्रीछ लज्जायाम्। जिह्रीच्छ॥ २८॥ हुर्छा कौटिल्ये। कौटिल्यमपसरणमिति मैत्रेयः। उपधायां चेति दीर्घः। हूर्छति॥ २९॥ मुर्छा मोहसमुच्छ्राययोः। मूर्छति॥ ३०॥ स्फुर्छा विस्तृतौ। स्फूर्छति॥ ३१॥ युच्छ प्रमादे। युच्छति॥ ३२॥ उछि उञ्छे। उञ्छः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः। उञ्छति। उञ्छांचकार॥ ३३॥ उछी विवासे। विवासः समाप्तिः। प्रायेणायं विपूर्वः। व्युच्छति॥ ३४॥ ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ। ध्रजति। ध्रञ्जति। धर्जति। धृञ्जति। ध्वजति। ध्वञ्जति॥ ४०॥ कूज अव्यक्ते शब्दे। चुकूज॥ ४१॥ अर्ज षर्ज अर्जने। अर्जति। आनर्ज॥ ४२॥ सर्जति। ससर्ज॥ ४३॥ गर्ज शब्दे। गर्जति॥ ४४॥ तर्ज भर्त्सने। तर्जति॥ ४५॥ कर्ज व्यथने। चकर्ज॥ ४६॥ खर्ज पूजने च। चखर्ज॥ ४७॥ अज गतिक्षेपणयोः। अजति॥

२२९१–जॄ, स्तम्भु, म्रुचु, म्लुचु, ग्रुचु, ग्लुचु, ग्लुञ्चु और श्वि धातुके उत्तर च्लिके स्थानमें विकल्प करके अङ् हो, जैसे–अम्रुचत्, अम्रोचीत्। अम्लुचत्, अम्लोचीत्। ग्रुचु, ग्लुचु, कुजु और खुजु धातु चौर्य करनेमें हैं। जुग्रोच। अग्रुचत्, अग्रोचीत्। जुग्लोच। अग्लुचत्, अग्लोचीत्। अकोजीत्। अखोजीत्॥ ग्लुञ्चु और षस्ज धातु गतिमें हैं। विकल्प करके अङ् होकर अग्लुचत्, अग्लुञ्चीत्। श्चुत्वके कारण सस्ज धातुके सके स्थानमें श और जश्त्वके कारण शके स्थानमें ज होकर–सज्जति। यह षस्ज धातु आत्मनेपद भी है। सज्जते॥ गुजि धातु अव्यक्त शब्द करनेमें है। गुञ्जति। गुञ्ज्यात्॥ अर्च धातु पूजा करनेमें है। आनर्च॥ म्लेछ धातु अव्यक्त (अस्फुट) और शब्द (अपशब्द) अर्थमें है। म्लेच्छति। मिम्लेच्छ॥ लछ और लाछि धातु लक्षणमें हैं। ललच्छ। ललाञ्छ। वाछि धातु इच्छा अर्थमें है। वाञ्छति॥ आछि धातु आयाम अर्थमें है। आञ्छति।

"अत आदेः २२४८" इस सूत्रमें तपरकरण स्वाभाविक ह्रस्व परिग्रहार्थ है, अत एव दीर्घाभावके कारण नुट् न होकर आञ्छ। तपरकरण मुखसुखार्थ है, इस मतमें तो नुट् होगा, आनाञ्छ॥ ह्रीछ धातु लज्जा अर्थमें है। जिह्रीच्छ॥ हुर्छा धातु कौटिल्य अर्थमें है। मैत्रेय मुनिके मतमें कौटिल्य शब्दसे अपसरण समझना। "उपधायाञ्च २२६५" इस सूत्रसे उपधाको दीर्घ होकर–हूर्छति॥ मूर्च्छा धातु मोह और समुच्छ्राय अर्थमें है॥ मूर्छति॥ स्फुर्छा धातु विस्तृत अर्थमें है। स्फूर्छति युच्छ धातु प्रमादमें है। युच्छति॥ उछि धातु उञ्छ अर्थात् शस्यादिको (कण २) ग्रहण करनेमें, यह यादवका मत है। उञ्छति। उञ्छाञ्चकार॥ उछी धातु विवास अर्थात् समाप्ति अर्थमें है। यह धातु प्रायःसे विपूर्वक है, जैसे–व्युच्छति॥ ध्रज, ध्रजि, धृज, धृजि, ध्वज और ध्वजि धातु गमन करनेमें हैं। ध्रजति। ध्रञ्जति। धर्जति। धृञ्जति। ध्वजति। ध्वञ्जति॥ कूज धातु अव्यक्त शब्द करनेमें है। चुकूज॥ अर्ज और षर्ज धातु अर्जन करनेमें हैं। अर्जति। सर्जति। ससर्ज॥ गर्ज धातु शब्द करनेमें है। गर्जति॥ तर्ज धातु भर्त्सन करनेमें है॥ कर्ज धातु व्यथन अर्थमें है। चकर्ज। खर्ज धातु पूजन अर्थमें है। चखर्ज॥ अज धातु गति और क्षेपण करनेमें है। अजति॥

२२९२ अजेर्व्यघञपोः।२।४।५६॥

अजेर्वी इत्ययमादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा॥ वलादावार्धधातुके वेष्यते॥ ॥ विवाय। विव्यतुः। विव्युः। अत्र वकारस्य हल्परत्वादुपधायां चेति दीर्घे प्राप्तेऽचः परस्मिन्निति स्थानिवद्भावेनाच्परत्वम्। न च न पदान्तेति निषेधः॥ स्वरदीर्घयलोपेषु लोपा-

जादेश एव न स्थानिवदित्युक्तेः ॥ थलि एकाच इतीण्निषेधे प्राप्ते ॥

२२९२–अज धातुके स्थानमें आर्धधातुकविषयमें वि आदेश हो, घञ् और अप् परे रहते न हो।

वलादि आर्धधातुक परे रहते विकल्प करके आदेश इष्ट है॥ विवाय। विव्यतुः। विव्युः।

इस स्थलमें वकारके हल्परत्वके कारण "उपधायाञ्च २२६५" इस सूत्रसे दीर्घ प्राप्त हुआ, परन्तु "अचः परस्मिन् ५०" इस सूत्रसे स्थानिवद्भावके कारण अच्परत्व होनेसे नहीं हुआ "न पदान्त० ५१" इस सूत्रसे स्थानिवद्भावका निषेध तो नहीं हो सकताहै क्योंकि, स्वर, दीर्घ और यलोपविधि कर्त्तव्य रहते लोपरूप अजादेश ही स्थानिवत् नहीं हो, ऐसा कहा है। थल् परे "एकाचः २२४६" इस सूत्रसे इण्निषेधकी प्राप्ति होनेपर ॥

२२९३ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि। ७।२।१३॥

एभ्यो लिट इण्न स्यात्। क्रादीनां चतुर्णां ग्रहणं नियमार्थम्। प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिण्निषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति। ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य चेटो निषेधार्थम् ॥

२२९३–कृ, सृ, भृ, वृ, स्तु, द्रु, स्रु, श्रु, धातुओंके उत्तर लिट्को इट् न हो, कृ आदि चार धातुओंका ग्रहण नियमार्थ है कि, यदि प्रकृत्याश्रय अथवा प्रत्ययाश्रय जितने इण्निषेध हैं वह लिट् लकारमें हों तो कृ आदि धातुओंके उत्तर ही हों, अन्यके उत्तर नहीं। अनन्तर स्तु आदि चार धातुओंका ग्रहण थल् परे रहते भारद्वाजनियमप्रापित और व, म आदिमें क्रादिनियमप्राप्ति इट्के निषेधार्थ है ॥

२२९४ अचस्तास्वत्थल्य निटो नित्यम्। ७।२।६१॥

उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण् न स्यात् ॥

२२९४–उपदेशावस्थामें अजन्त और तासि प्रत्यय परे रहते नित्य अनिट् हो ऐसे जो धातु उनके परे स्थित थल्को इट् न हो ॥

२२९५ उपदेशेऽत्वतः। ७।२।६२॥

उपदेशे अकारवतस्तासौ नित्यानिटः परस्य थल इण्न स्यात् ॥

२२९५–उपदेशमें अकारयुक्त और तासि प्रत्यय परे रहते नित्य अनिट् धातुके उत्तर थल्को इट् न हो॥

२२९६ ऋतो भारद्वाजस्य।७।२।६३॥

तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मतेन। तेनान्यस्य स्यादेव। अयमत्र संग्रहः–

अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयम्।
ऋदन्त ईदृङ्नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्॥

न च स्तुद्रुद्रादीनामपि थलि विकल्पः शङ्क्यः। अचस्तास्वदिति उपदेशेऽत्वत इति च योगद्वयप्रापितस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्तकः। अनन्तरस्येति न्यायात्। विवयिथ–विवेथ। आजिथ। विव्यथुः। विव्य। विवाय–विवय। विव्यिव। विव्यिम। वेता। अजिता। वेष्यति। अजिष्यति। अजतु। आजत्। अजेत्। वीयात् ॥

२२९६–भारद्वाज मुनिके मतसे तासि प्रत्यय परे रहते नित्य अनिट् ऐसे ऋकारान्त धातुके ही उत्तर थल्को इट् न हो इस कारण अन्य धातुको होगा। इस स्थलमें यह संग्रह है।

अजन्त अथवा अकारयुक्त तासि प्रत्यय परे नित्य अनिट् जो धातु वह थल् प्रत्यय परे विकल्प करके सेट् हो, और तासि प्रत्यय परे नित्य अनिट् हो और क्रादिभिन्न हो ऐसे धातु लिट् परे सेट् हो।

स्तु, द्रु, स्रु और श्रु इन धातुओंको भी थल् प्रत्यय परे विकल्प करके इट् नहीं कहसकते कारण कि, "अनन्तरस्य विधिर्वा प्रतिषेधो वा" इस न्यायसे "अचस्तास्व० २२९४" और "उपदेशेऽत्वतः २२९५" इस सूत्रसे प्रापित प्रतिषेधका ही भारद्वाजनियम निवर्त्तक है। विवयिथ, विवेथ, आजिथ। विव्यथुः। विव्य। विवाय, विवय। विव्यिव। विव्यिम। वेता, अजिता। वेष्यति, अजिष्यति। अजतु। आजत्। अजेत्। वीयात् ॥

२२९७ सिचि वृद्धिः परस्मैपदेषु। ७।२।१॥

इगन्ताङ्गस्य वृद्धिः स्यात्परस्मैपदपरे सिचि। अवैषीत्। आजीत्। अवेष्यत्। आजिष्यत्॥४८॥ तेज पालने। तेजति॥४९॥ खज मन्थे। खजति॥ ॥ ५०॥ खजि गतिवैकल्ये। खञ्जति॥ ५१॥ एजृ कम्पने। एजांचकार॥ ५२॥ टुओस्फूर्जा वज्रनिर्घोषे। स्फूर्जति। पुस्फूर्ज॥ ५३॥ क्षि क्षये। अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः। क्षयति। चिक्षाय। चिक्षियतुः। चिक्षियुः। चिक्षयिथ–चिक्षेथ। चिक्षियिव। चिक्षियिम॥ क्षेता॥

२२९७–सिच् प्रत्यय परे रहते परस्मैपदमें इगन्त अङ्गको वृद्धि हो, जैसे–अवैषीत्, आजीत्। अवेष्यत्, आजिष्यत्॥ तेज धातु पालन करनेमें है। तेजति॥ खज धातु मन्थन करनेमें है खजति॥ खजि धातु गतिवैकल्यमें है। खञ्जति॥ एजृ

धातु कम्पनमें है । एजाञ्चकार ॥ टुओस्फूर्जा धातु वज्रनिर्घोषमें है । स्फूर्जति । पुस्फूर्जे ॥ क्षि धातु क्षय अर्थमें है, यह अकर्मक है । अन्तर्भावित णिजर्थ होनेपर सकर्मक है । क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । चिक्षयिथ, चिक्षेथ । चिक्षियिव । चिक्षियिम । क्षेता ॥

२२९८ अकृत्सार्वधातुकयोर्दीर्घः । ७ । ४ । २५ ॥

अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः । क्षीयात् । अक्षैषीत्॥५४॥ क्षीज अव्यक्ते शब्दे । कूजिना सहायं पठितुं युक्तः । चिक्षीज ॥ ५५ ॥ लज लजि भर्जने ॥ ॥ ५७ ॥ लाज लाजि भर्त्सने च ॥ ५९ ॥ जज जजि युद्धे ॥ ६१ ॥ तुज हिंसायाम् । तोजति । तुतोज ॥ ६२ ॥ तुजि पालने ॥ ६३ ॥ गज गजि गृज गृजि मुज मुजि शब्दार्थाः ॥ ६९ ॥ गज मदने च ॥ ७१ ॥ वज व्रज गतौ । वदव्रजेति वृद्धिः । अव्राजीत् ॥ ७२ ॥

२२९८–यकारादि प्रत्यय परे रहते अजन्त अङ्गको दीर्घ हो, कृत् प्रत्यय और सार्वधातुक प्रत्यय परे रहते नहीं हो, क्षीयात् । अक्षैषीत् ॥ क्षीज धातु अव्यक्त शब्द करनेमें है, कूज और क्षीज, यह दोनों धातु एकार्थक हैं, इस कारण कूज धातुके साथ क्षीज धातुका पाठ करना युक्तियुक्त (ठीक) है। चिक्षीज ॥ लज और लजि धातु भर्जन अर्थमें हैं ॥ लाज और लाजि धातु भर्त्सन अर्थमें हैं ॥ जज और जजि धातु युद्ध अर्थमें है ॥ तुज धातु हिंसा करनेमें है । तोजति । तुतोज ॥ तुजि धातु पालन करनेमें है ॥ गज, गजि, गृज, गृजि, मुज और मुजि धातु शब्दार्थक हैं । गज धातु मदन, अर्थात् चित्तविकारमें भी है ॥ वज धातु और व्रज धातु गति अर्थमें है "वदव्रज० २२६७" इस सूत्रसे वृद्धि होकर अव्राजीत् ॥

अथ टवर्गीयान्ताः शाडचन्ता अनुदात्तेतः षट्त्रिंशत् । अट्ट अतिक्रमहिंसयोः।दोपधोयम् । तोपध इत्येके । अट्टते । आनट्टे ॥ १ ॥ वेष्ट वेष्टने । विवेष्टे ॥ २ ॥ चेष्ट चेष्टायाम् । अचेष्टिष्ट ॥ ३ ॥ गोष्ट लोष्ट संघाते । जुगोष्टे ॥४॥ लुलोष्टे ॥ ५ ॥ घट्ट चलने । जघट्टे ॥ ६ ॥ स्फुट विकसने । स्फोटते । पुस्फुटे ॥ ७ ॥ अठि गतौ । अण्ठते । आनण्ठे ॥ ८ ॥ वठि एकचर्यायाम् । ववण्ठे ॥ ९ ॥ मठि कठि शोके । शोक इह आध्यानम् । मण्ठते ॥ १० ॥ कण्ठते ॥ ११ ॥ मुठि पालने । मुण्ठते ॥१२॥ हेठ विबाधायाम् । जिहेठे ॥ १३ ॥ एठ च । एठाञ्चक्रे ॥ १४ ॥ हिडि गत्यनादरयोः । हिण्डते । जिहिण्डे ॥ १५ ॥ हुडि संघाते । जुहुण्डे ॥ १६ ॥ कुडि दाहे । चुकुण्डे ॥ १७ ॥ वडि विभाजने । मडि च । ववण्डे ॥ १९ ॥ भडि परिभाषणे । परिहासः सनिन्दोपालम्भश्च परिभाषणम् । बभण्डे ॥ २० ॥ पिडि संघाते । पिपिण्डे ॥ २१ ॥ मुडि मार्जने । मार्जनं शुद्धिर्न्यग्भावश्च । मुण्डते ॥ २२ ॥ तुडि तोडने । तोडनं दारणं हिंसनं च । तुण्डते॥२३॥ हुडि वरणे । वरणं स्वीकारः । हरण इत्येके । हुण्डते ॥ २४ ॥ चडि कोपे । चण्डते ॥ २५ ॥ शडि रुजायां संघाते च । शण्डते ॥ २६ ॥ तडि ताडने । तण्डते ॥ २७ ॥ पडि गतौ । पण्डते ॥ २८ ॥ कडि मदे । कण्डते ॥ २९ ॥ खडि मन्थे ॥ ३० ॥ हेडृ होडृ अनादरे । जिहेडे ॥ ३१ ॥ जुहोडे ॥ ३२ ॥ बाडृ आप्लाव्ये । बशादिः । आप्लाव्यमाप्लवः । बाडते॥ ३३ ॥द्राडृ ध्राडृ विशरणे।द्राडते॥३४॥ ध्राडते ॥३५॥शाडृ श्लाघायाम् । शाडते ॥ ३६ ॥

अब टवर्गीयान्त शाडचन्त ३६ धातु अनुदात्तेत्, अर्थात् आत्मनेपदी कहतेहैं ॥

अट्ट धातु अतिक्रम और हिंसामें है,यह धातु दकारोपध है। कोई २ कहतेहैं यह तकारोपध है । अट्टते । आनट्टे ॥ वेष्ट धातु वेष्टन करनेमें है । विवेष्टे । चेष्ट धातु चेष्टार्थक है । अचेष्टिष्ट । गोष्ट धातु और लोष्ट धातु समूहार्थमें जानना । जुगोष्टे । लुलोष्टे ॥ घट्ट धातु चलनार्थक है । जघट्टे ॥ स्फुट खिलनामें है । स्फोटते । पुस्फुटे ॥ अठि धातु गतिमें है । अण्ठते । आनण्ठे ॥ वठि धातु एकचर्य्यामें है । ववण्ठे ॥ मठि और कठि धातु शोक, अर्थात् आध्यानमें हैं । मण्ठते । कण्ठते ॥ मुठि धातु पालन करनेमें है । मुण्ठते ॥ हेठ धातु विबाधा अर्थमें है । जिहेठे ॥ एठ धातु भी उसी अर्थमें है । एठाञ्चक्रे ।

हिडि धातु गति और अनादरार्थमें है । हिण्डते । जिहिण्डे ॥ हुडि धातु संघातार्थमें है । जुहुण्डे ॥ कुडि धातु दाहार्थमें है । चुकुण्डे ॥ वडि और मडि धातु विभाजनार्थमें है । ववण्डे ॥ भडि धातु परिभाषण, अर्थात् परिहास और सनिन्द उपालम्भमें है । बभण्डे ॥ पिडि धातु संघातार्थमें है । पिपिण्डे ॥ मुडि धातु मार्जन करनेमें है । मार्जन शब्दसे शुद्धि और न्यग्भाव जानना । मुण्डते ॥ तुडि धातु तोडन, अर्थात् विदारण और हिंसा (अर्थ) है । तुण्डते ॥ हुडि धातु वरण अर्थात्, स्वीकार करनेमें है । किसी २ के मतसे हरण करनेमें भी जानना । हुण्डते ॥ चडि धातु कोप अर्थमें है । चण्डते॥ शडि धातु रुजा और संघातार्थमें है । शण्डते ॥ तडि धातु ताडना करनेमें है । तण्डते ॥ पडि धातु गमन करनेमें है । पण्डते ॥ कडि धातु मदमें है । कण्डते ॥ खडि धातु मंथन करनेमें है ॥ हेडृ और होडृ धातु अनादर करनेमें है । जिहेडे । जुहोडे ॥ बाडृ धातु आप्लावन करनेमें है। यह बशादि

है । बाडते ॥ द्राडृ और ध्राडृ धातु विशरणमें है । द्राडते । ध्राडते ॥ शाडृ धातु श्लाघामें है । शाडते ॥

अथ आटवर्गीयान्तसमाप्तेः परस्मैपदिनः । शौटृ गर्वे । शौटति । शुशौट ॥१॥ यौटृ बन्धे । यौटति ॥ २ ॥ म्लेटृ म्रेडृ उन्मादे ॥ द्वितीयो डान्तः । टान्तमध्ये पाठस्त्वर्थसाम्यान्नाथतिवत् । म्लेटति ॥ ३ ॥ म्रेडति ॥ ४ ॥ कटे वर्षावरणयोः । चटे इत्येके । चकाट । सिचि अतो हलादेर्लघोरितिवृद्धौ प्राप्तायाम् ॥

अब टवर्गीयान्त समाप्तिपर्य्यन्त परस्मैपदी धातु हैं ॥

शौटृ धातु गर्व्व अर्थमें है । शौटति । शुशौट॥ यौटृ धातु बंधनमें है । यौटति॥ म्लेटृ और म्रेडृ धातु उन्मादमें है दूसरी धातु डकारान्त है, अर्थकी समानताके कारण जैसे–नाथृ धातु धकारान्तमध्यमें पठित है वैसे यह भी टकारान्तमध्यमें पठित है । म्लेटति । म्रेडति॥ कटे धातु वर्षा और आवरणमें है । कोई२ चटे धातु पढते हैं । चकाट । सिच् परे "अतो हलादेर्लघोः २२४८" इस सूत्रसे वृद्धि प्राप्त होनेपर– ॥

२२९९ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् । ७ । २ । ५ ॥

हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि । अकटीत् ॥ ६ ॥ अट पट गतौ । आट । आटतुः । आटुः ॥७॥ पपाट । पेटतुः । पेटुः ॥ ८ ॥ रट परिभाषणे । रराट ॥ ९ ॥ लट बाल्ये ललाट ॥ १० ॥ शट रुजाविशरणगत्यवसादनेषु । शशाट ॥११॥ वट वेष्टने । ववाट । ववटतुः । ववटुः । ववटिथ ॥ १२॥ किट खिट त्रासे । केटति ॥१३॥ खेटति ॥ १४ ॥ शिट षिट अनादरे । शेटति । शिशेट ॥ १५॥ सेटति । सिषेट ॥ १६ ॥ जट झट संघाते ॥ १८॥ भट भृतौ ॥ १९ ॥ तट उच्छ्राये ॥ २० ॥ खट काङ्क्षायाम्॥२१॥ णट भृतौ ॥ २२ ॥ पिट शब्दसंघातयोः ॥२३॥ हट दीप्तौ ॥ २४ ॥ षट अवयवे ॥ २५ ॥ लुट विलोडने । डान्तोयमित्येके ॥ २७ ॥ चिट परप्रेष्ये ॥ २८ ॥ विट शब्दे ॥ २९ ॥ बिट आक्रोशे । वशादिः । हिटेत्येके ॥ ३१ ॥ इट किट कटी गतौ । एटति ॥३२॥ केटति ॥३३॥ कटति । ईकारः श्वीदितो निष्ठायामितीण्निषेधार्थः ॥ ३४ ॥ केचित्तु इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति । अन्ये च इ ई इति प्रश्लिष्य । अयति । इयाय । ईयतुः । ईयुः । इययिथ–इयेथ । इयाय–इयय । दीर्घस्य त्विजादेरित्यामि अयांचकारेत्यादि उदाहरन्ति ॥ ३५ ॥ मडि भूषायाम् ॥ ३६ ॥ कुडि वैकल्ये । कुण्डति । कुण्डत इति तु दाहे गतम्॥३७॥ मुड प्रुड मर्दने ॥ ३९ ॥ चुडि अल्पीभावे ॥ मुडि खण्डने । मुण्डति ॥ ४० ॥ पुडि चेत्येके । पुण्डति ॥ ४१ ॥ रुटि लुटि स्तेये । रुण्टति४२॥ लुण्टति ॥ ४३ ॥ रुठि लुठि इत्येके ॥ ४५ ॥ रुडि लुडीत्यपरे ॥ ४७ ॥ स्फुटिर् विशरणे । इरित्त्वादङ्वा । अस्फुटत्–अस्फोटीत् ॥ ४८ ॥ स्फुडीत्यपि केचित् । इदित्वान्नुम् । स्फुण्टति ॥ ४९ ॥ पठ व्यक्तायां वाचि । पेठतुः । पेठिथ । अपाठीत्–अपठीत् ॥५०॥ वठ स्थौल्ये । ववठतुः । ववठिथ ॥५१॥ मठ मदनिवासयोः॥५२॥ कठ कृच्छ्रजीवने ॥५३॥ रठ परिभाषणे ॥ ५४ ॥ रठेत्येके ॥ ५५ ॥ हठ प्लुतिशठत्वयोः । बलात्कारे इत्येके । हठति । जहाठ ॥ ५६ ॥ रुठ लुठ उठ उपघाते । ओठति॥५९॥ ऊठेत्येके । ऊठति । ऊठांचकार ॥ ६० ॥ पिठ हिंसासंक्लेशनयोः ॥ ६१ ॥ शठ कैतवे च॥६२॥ शुठ प्रतिघाते । शोठति ॥६३॥ शुठीति स्वामी । शुण्ठति ॥ ६४ ॥ कुठि च । कुण्ठति ॥ ६५ ॥ लुठि आलस्ये प्रतिघाते च ॥६६॥ शुठि शोषणे ॥ ६७ ॥ रुठि लुठि गतौ ॥ ६९ ॥ चुड्ड भावकरणे । भावकरणमभिप्रायसूचनम् । चुड्डति । चुचुड्ड ॥७०॥ अड्ड अभियोगे । अड्डति । आनड्ड ॥ ७१ ॥ कड्ड कार्कश्ये । कड्डति ॥७२॥ चुड्डादयस्त्रयो दोपधाः । तेन क्विपि । चुत् । अत् । कत् इत्यादि । क्रीडृ विहारे । चिक्रीड ॥ ७३ ॥ तुडृ तोडने । तोडति । तुतोड ॥ ७४ ॥ तूडृ इत्येके ॥ ७५ ॥ हुडृ हूडृ होडृ गतौ । हुड्यात् । हूड्यात् । होड्यात् ॥७८॥ रौडृ अनादरे॥७९॥ रोडृ लोडृ उन्मादे ॥८१॥ अड उद्यमे । अडति । आड । आडतुः । आडुः ॥ ८२ ॥ लड विलासे । लडति ॥ ८३ ॥ डलयोर्लरयोश्चैकत्वस्मरणाल्लतीति स्वाम्यादयः ॥ कड मदे । कडति॥८४॥ कडि इत्येके । कण्डति ॥ ८५ ॥ गडि वदनैकदेशे । गण्डति ८६ ॥ इति टवर्गीयान्ताः ॥

२२९९–इट् आदिमें है ऐसे सिच् परे रहते हकारान्त, मकारान्त और यकारान्त धातु और क्षण, श्वस, जागृ और णिजन्त और श्वि धातु और एकारेत्संज्ञक धातुको वृद्धि न हो, जैसे–अकटीत् ॥ अट और पट धातु गतिमें है । आट । आटतुः । आटुः । पपाट । पेटतुः । पेटुः ॥ रट धातु परिभाषणमें है । रराट ॥ लट बाल्यमें है । ललाट ॥ शट धातु रुजा, विशरण, गति और अवसादनार्थमें है । शशाट ॥ वट

धातु वेष्टन करनेमें है । ववाट । ववटतुः । ववटुः । ववटिथ ॥ किट और खिट धातु त्रासमें है । केटति । खेटति ॥ शिट और षिट धातु अनादरमें है । शेटति । शिशेट । सेटति । सिषेट ॥ जट और झट धातु संघातमें है ॥ भट धातु भरण करनेमें है ॥ तट धातु उच्छ्रायमें है ॥ खट धातु कांक्षामें है ॥ णट धातु नृत्यमें है ॥ पिट धातु शब्द और संघातमें है ॥ हट धातु दीप्तिमें है ॥ षट धातु अवयवमें है ॥ लुट धातु विलोडन-में है । कोई २ कहतेहैं यह धातु डकारान्त हैं ॥ चिट धातु परप्रेष्यमें है ॥ विट धातु शब्द करनेमें है ॥ विट धातु आक्रोश करनेमें है । यह बशादि है । कोई २ हिट धातु पढते हैं ॥ इट, किट और कटी धातु गति अर्थमें जानना । एटति । केटति । कटति । ईकार " श्वीदितो निष्ठायाम् ३०३९" इस सूत्रसे इण् निषेधार्थ है ।

कोई २ इदित् मानकर नुम् करके 'कण्टति' ऐसा पद कहतेहैं और कटी धातुमें इ ई ऐसा प्रश्लेष करके, अयति । इयाय । ईयतुः । ईयुः । इययिथ, इयेथ । इयाय, इयय । दीर्घ ई धातुके तो "इजादेः २२३७" इस सूत्रसे आम् । प्रत्यय करके 'अयाञ्चकार' इत्यादि प्रयोग करतेहैं ॥

मंडि धातु भूषणमें है ॥ कुडि धातु वैकल्यमें है । कुण्डति । कुण्डते, यह पद तो दाहार्थमें कहचुके हैं ॥ मुड प्रुड धातु मर्दनमें है ॥ चुडि धातु अल्पीभावमें है ॥ मुडि धातु खंडनमें है मुण्डति ॥ पुडि धातु भी उस अर्थमें कोई २ कहतेहैं । पुण्डति ॥ रुटि और लुटि धातु स्तेय, अर्थात् चोरी करनेमें है । रुण्टति । लुण्टति ॥ रुठि और लुठि स्तेयार्थक है यह किसीका मत है । कोई २ कहतेहैं रुडि और लुडि धातु स्तेयार्थक हैं ।

स्फुटिर् धातु विशरणमें है । इरित्त्वके कारण विकल्प करके अङ् होगा, जैसे—अस्फुटत्, अस्फोटीत् । कोई २ स्फुटि ऐसा भी पाठ करतेहैं, उसको इदित्त्वके कारण नुम् होकर स्फुण्टति ॥ पठ धातु व्यक्त वाक्यमें है पेठतुः । पेठिथ । अपाठीत्, अपठीत् ॥ वठ धातु स्थौल्यमें है । ववठतुः । ववठिथ ॥ मठ धातु मद और निवासमें है । कठ धातु कष्टसे जीवनधारणमें है । रट धातु परिभाषणमें है । कोई २ रठ ऐसा धातु कहतेहैं । हठ धातु प्लुति और शठत्वमें है । कोई २ कहते है कि, हठ धातु बलात्कार अर्थमें है । हठति । जहाठ । रुठ, लुट और उठ धातु उपघातमें है । ओठति । कोई २ ऊठ ऐसा धातु कहतेहैं ऊठति । ऊठाञ्चकार ॥ पिठ धातु हिंसा और संक्लेशनमें है । शठ धातु कैतव अर्थमें है ॥ शुठ धातु प्रतिघातमें है । शोठति । शुठि ऐसा धातु स्वामी कहतेहैं । शुण्ठति ॥ कुठि धातुका भी प्रतिघात अर्थ है । कुण्ठति ॥ लुठि धातु आलस्य और प्रतिघातमें है । शुठि धातु शोषणार्थमें है । रुठि और लुठि धातु गमन करनेमें है ॥

चुड्ड धातु भावकरण, अर्थात् अभिप्रायसूचनमें है । चुड्डति । चुचुड्ड ॥ अड्ड धातु अभियोगमें है । अड्डति । आनड्ड ॥ कड्ड धातु कर्कशतार्थमें है । कड्डति । चुड्डादि तीन धातु दकारान्त हैं, इस कारण क्विप् प्रत्यय करके चुत्, अत्, कत्, इत्यादि रूप होंगे । क्रीड धातु विहार करनेमें है । चिक्रीड ॥ तोड धातु तोडनार्थमें है । तोडति । तुतोड । तूड धातुको भी तोडनार्थमें जानना ॥ हुडृ, हूडृ और होडृ धातु गमन करनेमें है । हुड्यात् । हूड्यात् । होड्यात् ॥ रौडृ धातु अनादरमें है । रोडृ और लोडृ धातु उन्मादमें है । अड धातु उद्यम करनेमें है । अडति । आड । आडतुः । आडुः ॥ लड धातु विलासमें है । लडति । डकार, लकार और रकार लकारके एकत्वस्मरणके कारण 'ललति' पद सिद्ध हुआ, यह स्वामी आदि आचार्योंका मत है ॥ कड धातु गर्व करनेमें है । कडति । किसीके मतसे कडि ऐसा धातु है । कण्डति ॥ गडि धातु वदनका एक अंश जानना । गण्डति ।

टवर्गान्त धातु सम्पूर्ण कहे गए ॥

अथ पवर्गीयान्ताः । तत्रानुदात्तेतः स्तोभत्यन्ताश्चतुस्त्रिंशत् । तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः। आद्योनुदात्तः । क्षीरस्वामी त्वयं सेडिति बभ्राम। तेपते । तितिपे । क्रादिनियमादिट् । तितिपिषे। तेप्ता । तेप्स्यते ॥

अब पवर्गीयान्त धातु कहतेहैं, उसमें स्तुभ धातु पर्य्यन्त ३४ धातु अनुदात्तेत्, अर्थात् आत्मनेपदी हैं ।

तिपृ, तेपृ, ष्टिपृ और ष्टेपृ धातु क्षरणार्थक हैं, पहिला अनुदात्त है । क्षीर स्वामी कहतेहैं कि, यह सेट् है, परन्तु यह भ्रममात्र है । तेपते । तितिपे । क्रादिनियमके कारण इट् होकर—तितिपिषे । तेप्ता । तेप्स्यते ॥

२३०० लिङ्सिचावात्मनेपदेषु । १ । २ । ११ ॥

इक्समीपाद्धलः परौ झलादी लिङ् आत्मनेपदपरः सिच्चेत्येतौ कितौ स्तः । कित्त्वान्न गुणः। तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् । लुङि, झलो झलीति सलोपः। अतिप्त । अतिप्साताम्। अतिप्सत। तेपते। तितिपे। तिष्टिपे। तिष्टिपाते। तिष्टिपिरे । तिष्टेपे । तिष्टेपाते तिष्टेपिरे ॥ तेपृ कम्पने च ॥ ४ ॥ ग्लेपृ दैन्ये । ग्लेपते ॥ ५ ॥ टुवेपृ कम्पने । वेपते ॥ ६ ॥ केपृ गेपृ ग्लेपृ च । चात्कम्पने गतौ च । सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पने इत्यपेक्षत इत्याह । ग्लेपेरर्थभेदात्पुनः पाठः ॥९॥ मेपृ रेपृ लेपृ गतौ ॥१२॥ त्रपूष् लज्जायाम् । त्रपते ॥

२३००—इक्के समीपस्थ हल्के परे स्थित झलादि लिङ् और सिच् आत्मनेपदमें कित्संज्ञक हो । कित्त्वके कारण गुण नहीं होगा, तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् । लुङ् परे रहते " झलो झलि० २२८१ " इस सूत्रसे सकारका लोप होकर, अतिप्त । अतिप्साताम् । अतिप्सत । तेपते । तितेपे । तिष्टिपे । तिष्टिपाते । तिष्टिपिरे । तिष्टेपे । तिष्टेपाते । तिष्टेपिरे ॥ तेपृ धातु काँपनेमें भी जानना ॥ ग्लेपृ धातु दैन्यार्थमें है । ग्लेपते ॥ टुवेपृ धातु कंपनमें है । वेपते ॥ केपृ, गेपृ और ग्लेपृ धातु कंपन और सूत्रविभागके कारण गत्यर्थमें भी जानना, यह

स्वामीका मत है, परन्तु मैत्रेय तो चकारको छोडके पटकर 'कम्पने' इसको अपेक्षा करतेहैं आचार्य्य, यह कहतेहैं । ग्लेपृ धातुका अर्थ भिन्न है इस कारण पुनः पाठ हुआ ॥ मेपृ, रेपृ और लेपृ धातु गति अर्थमें है । त्रपूष् धातु लज्जामें है । त्रपते ॥

२३०१ तृफलभजत्रपश्च।६।४।१२२॥

एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च । त्रेपे । त्रेपाते । त्रेपिरे । ऊदित्वादिड्वा । त्रपिता । त्रप्ता । त्रपिषीष्ट । त्रप्सीष्ट ॥ १३ ॥ कपि चलने । कम्पते । चकम्पे॥१४॥ रबि लबि अबि शब्दे । ररम्बे । ललम्बे । आनम्बे ॥ लबि अवस्रंसने च ॥ १७ ॥ कबृ वर्णे । चकबे ॥१८॥ क्लीबृ अधाष्टर्ये । चिक्लीबे ॥१९॥ क्षीबृ मदे । क्षीबते ॥ २० ॥ शीभृ कत्थने । शीभते ॥ २१ ॥ चीभृ च ॥ २२ ॥ रेभृ शब्दे । रिरेभे ॥ २३॥ अभिरभी क्वचित्पठ्येते । अम्भते ॥ २४ ॥ रम्भते ॥ २५ ॥ ष्टभि स्कभि प्रतिबन्धे । स्तम्भते । उत्तम्भते । उदः स्थास्तम्भोरिति पूर्वसवर्णः । विस्तम्भते । स्तन्भेरिति षत्वं तु न भवति । श्नुविधौ निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात् । तद्बीजं तूदस्थास्तम्भोरिति पवर्गीयोपधपाठः, स्तन्भेरिति तवर्गीयोपधपाठश्चेति माधवः। केचिदस्य टकार औपदेशिक इत्याहुः । तन्मते ष्टम्भते । टष्टम्भे ॥ २७ ॥ जभी जृभि गात्रविनामे ॥

२३०१ कित् लिट् और सेट थल् परे रहते तृ, फल, भज और त्रप इन धातुओंके अकारके स्थानमें एकार हो, और अभ्यासका लोप हो, त्रेपे । त्रेपाते । त्रेपिरे। ऊकार इत् होनेके कारण विकल्प करके इट् होगा, त्रपिता, त्रप्ता । त्रपिषीष्ट, त्रप्सीष्ट ॥ कपि धातु चलनमें है । कम्पते । चकम्पे ॥ रबि, लबि और अबि धातु शब्द करनेमें हैं । ररम्बे । ललम्बे। आनम्बे । लबि धातुका अवस्रंसन भी अर्थ जानना ॥ कबृ धातु वर्ण अर्थमें है । चकबे ॥ क्लीबृ धातु धाष्टर्यमें है । चिक्लीबे ॥ क्षीबृ धातु मद अर्थमें है । क्षीबते ॥ शीभृ धातु कत्थनमें है । शीभते ॥ चीभृ धातुका भी कत्थनार्थ जानना ॥ रेभृ धातु शब्द करनेमें हैं । रिरेभे । किसी स्थलमें अभि और रभि धातु पढे हैं । अम्भते । रम्भते ॥ ष्टभि और स्कभि धातु प्रतिबंधमें हैं । स्तम्भते । "उदः स्थास्तम्भोः० ११८" इससे पूर्वसवर्ण (त्) होकर–उत्तम्भते ।

विस्तम्भते, यहां " स्तन्भेः २२७२ " इस सूत्रसे श्नुविधिमें निर्दिष्ट सौत्र धातुका ग्रहण होनेसे षत्व नहीं हुआ उसका प्रमाण तो " उदः स्थास्तम्भोः० ११८" इस सूत्रमें पवर्गीयोपध पाठ और " स्तन्भेः २२७२ " इस सूत्रमें तवर्गीयोपध पाठ है, यह माधवाचार्यका मत है । कोई २ कहतेहैं कि, इसका टकार औपदेशिक है, उनके मतसे–ष्टम्भते । टष्टम्भे ॥ जभी और जृभि धातु गात्रविनाम अर्थमें है ॥

२३०२ रधिजभोरचि ।७।१।६१॥

एतयोर्नुमागमः स्यादचि । जम्भते । जजम्भे । जम्भिता । अजम्भिष्ट । जृम्भते । जजृम्भे ॥२९॥ शल्भ कत्थने । शशल्भे ॥ ३० ॥ वल्भ भोजने । दन्त्योष्ठ्यादिः । ववल्भे ॥ ३१ ॥ गल्भ धाष्टर्ये । गल्भते ॥ ३२ ॥ श्रम्भु प्रमादे । तालव्यादिर्दन्त्यादिश्च । श्रम्भते । स्रम्भते ॥ ३३ ॥ ष्टुभु स्तम्भे । स्तोभते । विष्टोभते । तुष्टुभे । व्यष्टोभिष्ट ॥ ३४ ॥

२३०२–अच् परे रहते रधि और जभ धातुको नुमागम हो, जम्भते। जजम्भे जम्भिता । अजम्भिष्ट। जृम्भते। जजृम्भे॥ शल्भ धातु कत्थन अर्थमें है। शशल्भे॥ वल्भ धातु भोजन करनेमें है, यह धातु दन्त्योष्ठादि है। ववल्भे॥ गल्भ धातु धाष्टर्यार्थमें है । गल्भते ॥ श्रम्भु धातु प्रमादार्थमें है, यह धातु तालव्यादि और दन्त्यादि है । श्रम्भते। स्रम्भते ॥ ष्टुभु धातु स्तम्भ करनेमें है । स्तोभते । विष्टोभते । तुष्टुभे । व्यष्टोभिष्ट ॥

अथ परस्मैपदिनः ॥ गुपू रक्षणे ॥

अब परस्मैपदी धातु कहते हैं ।

गुपू धातु रक्षा करनेमें है ॥

२३०३ गुपूधूपविच्छिपणिपनिभ्य आयः ।३।१।२८॥

एभ्य आयप्रत्ययः स्यात्स्वार्थे। पुगन्तेति गुणः॥

२३०३–गुपू, धूप, विच्छि, पणि और पनि धातुके उत्तर स्वार्थमें आय प्रत्यय हो । "पुगन्त० २१८९ " इस सूत्रसे गुण होकर–॥

२३०४ सनाद्यन्ता धातवः ।३।१।३२॥

सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः । धातुत्वाल्लडादयः । गोपायति॥

२३०४–सनादि कमेर्णिङ् पर्य्यन्त प्रत्यय अन्तमें है जिसके उसको धातु संज्ञा हो, इससे धातुत्वके कारण उसके उत्तर लडादि प्रत्यय होंगे, जैसे–गोपायति ॥

२३०५ आयादय आर्धधातुके वा । ३ । १ । ३१ ॥

आर्धधातुकविवक्षायामायादयो वा स्युः ॥

२३०५–आर्धधातुक विवक्षामें विकल्प करके आयादि प्रत्यय हों–॥

२३०६ कास्प्रत्ययादाममन्त्रे लिटि । ३ । १ । ३५ ॥

कासधातोः प्रत्ययान्तेभ्यश्चाम् स्याल्लिटि न तु मन्त्रे ॥ कास्यनेकाज् ग्रहणं कर्तव्यम् ॥ * ॥

सूत्रे प्रत्ययग्रहणमपनीय तत्स्थानेऽनेकाच इति वाच्यमित्यर्थः ॥

२३०६-लिट् परे रहते कास धातु और प्रत्ययान्तके उत्तर आम् प्रत्यय हो, मंत्रमें नहीं हो ॥

सूत्रमें अनेकाच्ग्रहण करना उचित है, अर्थात् सूत्रमें प्रत्यय ग्रहण छोडकर उसके स्थानमें " अनेकाचः " ऐसा कहना चाहिये * ॥

२३०७ आर्धधातुके । ६ । ४ । ४६ ॥

इत्यधिकृत्य ॥

२३०७-"आर्धधातुके" यह अधिकार करके-॥

२३०८ अतो लोपः । ६ । ४ । ४८ ॥

आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्धधातुके परे। गोपायाञ्चकार । गोपायाम्बभूव । गोपायामास । जुगोप। जुगुपतुः । ऊदित्त्वादिट्। जुगोपिथ-जुगोप्थ । गोपायिता-गोपिता-गोप्ता । गोपाय्यात्-गुप्यात् । अगोपायीत् । अगोपीत् । अगौप्सीत् ॥ १ ॥ धूप सन्तापे । धूपायति । धूपायाञ्चकार । दुधूप । धूपायितासि । धूपितासि ॥ २ ॥ जप जल्प व्यक्तायां वाचि । जप मानसे च ॥ ४ ॥ चप सांत्वने ॥ ५ ॥ षप समवाये । समवायः सम्बन्धः सम्यगवबोधो वा । सपति ॥ ६ ॥ रप लप व्यक्तायां वाचि ॥ ८ ॥ चुप मन्दायां गतौ । चोपति । चुचोप । चोपिता ॥ ९ ॥ तुप तुम्प त्रुप त्रुम्प तुफ तुम्फ त्रुफ त्रुम्फ हिंसार्थाः। तोपति । तुतोप । तुम्पति । तुतुम्प । तुतुम्पतुः । संयोगात्परस्य लिटः कित्त्वाभावान्नलोपो न। किदाशिषीति कित्त्वान्नलोपः। तुप्यात्। प्रात्तुम्पतौ गवि कर्तरीति पारस्करादिगणे पाठात्सुट्। प्रस्तुम्पति गौः।श्तिपा निर्देशाद्यङ्लुकि न। प्रतोतुम्पीति। त्रोपति।त्रुम्पति।तोफति।तुम्फति।त्रोफति।त्रुम्फति इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः। अन्ये सरेफाः। आद्याश्चत्वारः प्रथमान्ताः। ततो द्वितीयान्ताः। अष्टावप्युकारवन्तः ॥ १७ ॥ पर्प रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ । आद्यः प्रथमान्तः। ततो द्वौ द्वितीयान्तौ। तत एकादश तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा रेफोपधाः । पर्पति । पपर्प । रफति । रम्फति। अर्बति । आनर्ब । पर्बति । लर्बति । बर्बति । पवर्गीयादिरयम् । मर्बति । कर्बति । खर्बति । गर्बति । शर्बति । सर्बति । चर्बति ॥ ३१ ॥ कुबि आच्छादने । कुम्बति ॥ ३२ ॥ लुबि तुबि अर्दने । लुम्बति । तुम्बति ॥ ३४ ॥ चुबि वक्त्रसंयोगे । चुम्बति ॥ ३५ ॥ षृभु षृम्भु हिंसार्थौ । सर्भति । ससर्भ । सर्भिता । सृम्भति । ससृम्भ । सृम्भ्यात् ॥ ३७ ॥ षिभु षिम्भु इत्येके । सेभति सिम्भति ॥ ३९ ॥ शुभ शुम्भ भाषणे । भासने इत्येके । हिंसायामित्यन्ये ॥

२३०८-आर्धधातुक उपदेशकालमें अकारान्त धातुके अकारका लोप हो, गोपायाञ्चकार । गोपायाम्बभूव । गोपायामास । जुगोप । जुगुपतुः । ऊकार इत्संज्ञक होनेके कारण विकल्पसे इट् होगा, जुगोपिथ, जुगोप्थ । गोपायिता, गोपिता, गोप्ता । गोपाय्यात्, गुप्यात् । अगोपायीत्, अगोपीत्, अगौप्सीत् ॥ धूप धातु संतापमें है । धूपायति । धूपायाञ्चकार । दुधूप । धूपायितासि, धूपितासि ॥ जप और जल्प धातु व्यक्त वाक्यमें हैं । जप धातु मानसवचनमें भी है ॥ चप धातु शान्त करनेमें है । षप धातु समवायार्थमें है समवायसे सम्बन्ध और सम्यक् अवबोध अर्थ जानना । सपति ॥ रप और लप धातु व्यक्त वाक्यमें है ॥ चुप धातु मन्दगतिमें है । चोपति। चुचोप । चोपिता ॥ तुप, तुम्प, त्रुप, त्रुम्प, तुफ, तुम्फ, त्रुफ और त्रुम्फ धातु हिंसार्थमें हैं । तोपति । तुतोप । तुम्पति । तुतुम्प । तुतुम्पतुः, यहां संयोगके परे लिट्के कित्त्वाभावके कारण नकारका लोप नहीं हुआ ।

" किदाशिषि २२१६" इस सूत्रसे कित्त्वके कारण नकारका लोप होकर तुप्यात् ।

प्रात्तुम्पतौ गवि कर्त्तरि।(प्रशब्दके परे तुम्प धातुके गो कर्ता होनेपर सुट् हो) ऐसा पारस्करादि गणमें पाठके कारण सुट् होकर प्रस्तुम्पति गौः। श्तिप्से निर्देशके कारण यङ्लुगन्तमें नहीं होगा, प्रतोतुम्पीति । त्रोपति । त्रुम्पति । तोफति । तुम्फति । त्रोफति । त्रुम्फति । इस स्थलमें पहली, दूसरी और पांचवीं और छठी धातु रेफरहित और अन्य रेफसहित हैं । आद्य ४ प्रथमान्त, पश्चात् द्वितीयान्त हैं । आठों उकारवान् हैं । पर्प, रफ, रफि, अर्ब, पर्ब, लर्ब, बर्ब, मर्ब, कर्ब, खर्ब, गर्ब, शर्ब, षर्ब और चर्ब धातु गत्यर्थक हैं, आदिस्थित धातु प्रथमान्त है, पश्चात् दो द्वितीयान्त हैं, पश्चात् ११ तृतीयान्त हैं । दूसरी और तीसरी छोडकर और सम्पूर्ण धातु रकारोपध हैं। पर्पति । पपर्प । रफति । रम्फति । अर्बति । आनर्ब । पर्बति । लर्बति । बर्बति, यह धातु पवर्गादि है । मर्बति । कर्बति खर्बति । गर्बति । शर्बति । सर्बति ॥ चर्बति ॥ कुबि धातु आच्छादनमें है, । कुम्बति ॥ लुबि और तुबि धातु अर्दन करनेमें है । लुम्बति। तुम्बति ॥ चुबि धातु मुखसंयोग करनेमें है । चुम्बति ॥ षृभु और षृम्भु धातु हिंसार्थमें है । सर्भति । ससर्भ । सर्भिता । सृम्भति । ससृम्भ । सृम्भ्यात् ॥ षिभु षिम्भु धातु हिंसार्थक है। सेभति । सिम्भति ॥ शुभ धातु और शुम्भ धातु भाषणमें है । कोई २ कहतेहैं कि, भासनेमें और हिंसा करनेमें है ॥

अथानुनासिकान्ताः । तत्र कम्यन्ता अनुदात्तेतो दश । घिणि घुणि घृणि ग्रहणे । नुम् । ष्टुत्वम् । घिण्णते । जिघिण्णे । घुण्णते । जुघुण्णे। घृण्णते। जघृण्णे ॥ ३ ॥ घुण घूर्ण भ्रमणे । घोणते । घूर्णते । इमौ तुदादौ परस्मैपदिनौ ॥ ९ ॥ पण

व्यवहारे स्तुतौ च । पन च । स्तुतावित्येव सम्बध्यते पृथङ्निर्देशात् । पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः। व्यवहारे तु पणते । पेणे । पणितेत्यादि । स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम्। पणायति । पणायाञ्चकार । पेणे । पणायितासि । पणितासे । पणाय्यात् । पनायति । पनायाञ्चकार । पेने ॥ ७ ॥ भाम क्रोधे । भामते । बभामे ॥ ८ ॥ क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे–चक्षंसे । चक्षमिध्वे । चक्षन्ध्वे चक्षमिवहे ॥

इसके उपरान्त अनुनासिक वर्णान्त धातु कहे जातेहैं, उसमें कमि धातु पर्यन्त १० धातु अनुदात्तेत् (आत्मनेपदी) हैं।

घिणि, घुणि, घृणि, धातु ग्रहण करनेमें हैं । नुम् और ष्टुत्व होकर–घिण्णते । जिघिण्णे । घुण्णते । जुघुण्णे । घृण्णते । जघृण्णे ॥ घुण और घूर्ण धातु भ्रमण करनेमें हैं । घोणते । घूर्णते । यह दो धातु तुदादिमें परस्मैपदी हैं ।

पण धातु व्यवहार और स्तुतिमें है। पन धातु भी इसी अर्थमें है, परन्तु पन धातुके पृथक् निर्देशके कारण स्तुति अर्थका ही सम्बन्ध होताहै। पनि धातुके साहचर्यके कारण पणि धातुके उत्तर भी स्तुति अर्थमें ही आय प्रत्यय होगा, व्यवहारार्थमें तो–पणते । पेणे । पणिता, इत्यादि । स्तुति अर्थमें अनुबंधको केवलमें चरितार्थत्वके कारण आयप्रत्ययान्तके उत्तर आत्मनेपद नहीं होगा–पणायति । पणायाञ्चकार । पेणे । पणायितासि । पणितासे । पणाय्यात् । पणिषीष्ट । पनायति । पनायाञ्चकार। पेने ॥ भाम धातु क्रोध करनेमें है । भामते । बभामे ॥ क्षमूष् धातु सहनमें है । क्षमते । चक्षमे । चक्षमिषे, चक्षंसे । चक्षमिध्वे, चक्षन्ध्वे । चक्षमिवहे ॥

२३०९ म्वोश्च । ८ । २ । ६५ ॥

मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे। णत्वम् । चक्षण्वहे । चक्षमिमहे-चक्षण्महे। क्षमिष्यते–क्षंस्यते । क्षमेत । आशिषि, क्षमिषीष्ट–क्षंसीष्ट । अक्षमिष्ट–अक्षंस्त ॥ ९ ॥ कमु कान्तौ । कान्तिरिच्छा ॥

२३०९–मकार और वकार परे रहते मकारान्त धातुके मकारके स्थानमें नकारादेश हो । णत्व होकर–चक्षण्वहे । चक्षमिमहे, चक्षण्महे । क्षमिष्यते, क्षंस्यते । क्षमेत । आशीर्लिङ्में, क्षमिषीष्ट, क्षंसीष्ट । अक्षमिष्ट, अक्षंस्त ॥ कमु धातु कान्ति अर्थात् इच्छामें है ॥

२३१० कमेर्णिङ् । ३ । १ । ३० ॥

स्वार्थे ङित्वात्तङ् । कामयते ॥

२३१०–कम् धातुके उत्तर णिङ् हो । ङ इत् होनेके कारण उसके उत्तर तङ् प्रत्यय होकर–कामयते ॥

२३११ अयामन्ताल्वाय्येत्न्विष्णुषु । ६ । ४ । ५५ ॥

आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात् । वक्ष्यमाणलोपापवादः । कामयाञ्चक्रे ॥ आयादय आर्द्धधातुके वा । चकमे । कामयिता–कमिता । कामयिष्यते–कमिष्यते ॥

२३११–आम्, अन्त, आलु, आय्य, इत्नु और इष्णु प्रत्यय परे रहते णिके स्थानमें अयादेश हो, यह अयादेश वक्ष्यमाण लोपका अपवाद है–कामयाञ्चक्रे । "आयादय आर्धधातुके वा २३०५" इससे आय प्रत्यय आर्धधातुकपरे विकल्प करके होकर–चकमे । कामयिता, कमिता । कामयिष्यते, कमिष्यते ॥

२३१२ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । ३ । १ । ४८ ॥

ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे । अकाम् इ अतेति स्थिते ॥

२३१२–ण्यन्त धातु और श्रि, द्रु और स्रु धातुके उत्तर कर्त्रर्थक लुङ् परे रहते च्लिके स्थानमें चङ् आदेश हो। अकाम् इ अत, ऐसा होनेपर–॥

२३१३ णेरनिटि । ६ । ४ । ५१ ॥

अनिडादावार्धधातुके परे णेर्लोपः स्यात् । परत्वादेरनेकाच इति यणि प्राप्ते ॥ ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन ॥*॥ इति वार्तिकम्॥ णिलोपस्य तु पाचयतेः पाक्तिरित्यादि क्तिजन्तमवकाश इति भावः । वस्तुतस्त्वनिटीतिवचनसामर्थ्यादार्धधातुकमात्रमस्य विषयः। तथा चेयङादेरपवाद एवायम्। इयङ्, अततक्षत् । यण्, आटिटत् । गुणः, कारणा । वृद्धिः, कारकः। दीर्घः, कार्यते ॥

२३१३–अनिडादि आर्धधातुक परे रहते णिका लोप हो । परत्वके कारण "एरनेकाचः २७२" इस सूत्रसे यण्की प्राप्ति होनेपर–॥

इयङ्, यण्, गुण, वृद्धि और दीर्घसे पूर्वविप्रतिषेधसे णि और अकारका लोप हो * णिलोपका–पाचयतेः=पाक्तिः, इत्यादि क्तिजन्त अवकाश है इससे तुल्यबलविरोध दिखाया है वास्तविक तो 'अनिटि' इस वचनके असामर्थ्यके कारण आर्धधातुकमात्र इसका विषय है, तब तो यह इयङादिका अपवाद ही है जैसे–इयङ्–अततक्षत् । यण्–आटिटत् । गुण–कारणा । वृद्धि–कारकः । दीर्घ–कार्य्यते ॥

२३१४ णौ चङ्युपधाया ह्रस्वः । ७ । ४ । १ ॥

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् ॥

२३१४-चङ्परक णि परे रहते धातुकी उपधाको ह्रस्व हो-॥

२३१५ चङि । ७ । १ । ११ ॥

चङि परे अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य ॥

२३१५-चङ् परे रहते अनभ्यास धातुके अवयव प्रथम एकाच्को द्वित्व हो, और अजादि धातुके द्वितीय एकाच्को द्वित्व हो-॥

२३१६ सन्वल्लघुनि चङ्परेऽनग्लोपे । ७ । ४ । ९३ ॥

चङ्परे इति बहुव्रीहिः । स चाङ्गस्येति च द्वयमप्यावर्तते । अंगसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत्, तत्परं यल्लघु तत्परो योऽङ्गस्याऽभ्यासस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति । अथ वांगस्येति नावर्तते । चङ्परे णौ यदंगं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत् ॥

२३१६-चङ्परे यह बहुव्रीहि है 'चङ्परे' अङ्गस्य, इन दोनों पदोंकी आवृत्ति होती है, इससे अङ्गसंज्ञानिमित्तक जो चङ्परक णि तत्परक जो लघु तत्परक जो अङ्गका अभ्यास उसको सन् परे जैसा कार्य होताहै वैसा कार्य हो, णि परे अक्का लोप न हुआ हो तो,अथवा 'अङ्गस्य' इस पदकी आवृत्ति नहीं हो, तो ऐसा अर्थ हुआ कि, चङ्परक णि परे जो अङ्ग उसका जो लघुपरक अभ्यास उसको सन् परे जैसा कार्य्य होताहै वैसा कार्य्य हो, णि परे अक्का लोप नहीं हुआ हो तो-॥

२३१७ सन्यतः । ७ । ४ । ७९ ॥

अभ्यासस्यात इकारः स्यात्सनि ॥

२३१७-सन् परे रहते अभ्यासके अकारके स्थानमें इकार हो-॥

२३१८ दीर्घो लघोः । ७ । ४ । ९४ ॥

लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये । अचीकमत । णिङभावपक्षे।कमेश्च्लेश्चङ्वक्तव्यः ॥*॥ णेरभावान्न दीर्घसन्वद्भावौ । अचकमत ॥ संज्ञायाः कार्यकालत्वादंगं यत्र द्विरुच्यते। तत्रैव दीर्घः सन्वच्च नानेकाच्स्विति माधवः॥ चकास्त्यर्थाप्यत्यूर्णोत्यादौ नांगं द्विरुच्यते । किं त्वस्यावयवः कश्चित्तस्मादेकाच्स्विदं द्वयम्। वस्तुतोंगस्याऽवयवो योऽभ्यास इति वर्णनात्। ऊर्णौ दीर्घोर्थापयतौ द्वयं स्यादिति मन्महे ॥ चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया। णेर्विशेष्यं सान्निहितं लघुनीत्यंगमेव वा ॥ इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् । णेरग्लोपेपि सम्बन्धस्त्वगितामपि सिद्धये ।९॥ १०

अथ कम्यन्तास्त्रिंशत्परस्मैपदिनः ॥ अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः । अणति । रणति । वणति । वकारादित्वादेत्वाभ्यासलोपौ न । ववणतुः । ववणिथ ॥ १० ॥ धणिरपि कैश्चित्पठ्यते । धणति ॥ ओणृ अपनयने । ओणति । ओणांचकार ॥ ११ ॥ शोणृ वर्णगत्योः । शोणति । शुशोण ॥ १२ ॥ श्रोणृ संघाते । श्रोणति ॥ १३ ॥ श्लोणृ च । शोणादयस्त्रयोऽमी तालव्योष्मादयः॥ १४॥ पैणृ गतिप्रेरणश्लेषणेषु । प्रैणृ इति कचित्पठ्यते । पिपैण ॥ १५ ॥ ध्रण शब्दे । उपदेशे नान्तोयम् । रषाभ्यामिति णत्वम् । ध्रणति । नोपदेशफलं यङ्लुकि । दन्ध्रन्ति ॥ १६ ॥ बणेत्यपि केचित् । बेणतुः । बेणिथ ॥ १७ ॥ कनी दीप्तिकान्तिगतिषु । चकान ॥ १८ ॥ ष्टन वन शब्दे । स्तनति वनति ॥ २० ॥ वन षण सम्भक्तौ । वनेरर्थभेदात्पुनः पाठः । सनति । ससान । सेनतुः ॥

२३१८--सन्वद्भावविषयमें लघुसंज्ञक अभ्यासको दीर्घ हो- अचीकमत । णिङ्के अभाव पक्षमें-

कमि धातुके उत्तर च्लिके स्थानमें चङ् आदेश हो * णिके अभावके कारण दीर्घ और सन्वद्भाव न होकर- अचकमत ।

संज्ञा शास्त्रको कार्य्यकालपक्षमें विधिशास्त्रके साथ एकवाक्यता होनेसे'अङ्गस्य' इससे सम्बद्ध "पूर्वोऽभ्यासः" इसका "सन्वल्लघुनि०" "दीर्घो लघोः" इत्यादि शास्त्रमें सम्बन्ध हुआ और 'द्वे' इसका विशेष्यसमर्पक उच्चारण क्रियानिरूपित 'अङ्गस्य' इसमें कर्म्ममें षष्ठी हुई तब ऐसा अर्थ हुआ कि, अङ्गकर्मक जहां द्विरुच्चारण हो वहां पूर्वकी अभ्यास संज्ञा हो और उसको दीर्घ, सन्वद्भाव हो, इससे अङ्गका जहां द्विरुच्चारण है वहां ही दीर्घ, सन्वद्भाव होगा अनेकाच्में नहीं होगा यह माधवका मत है ।

चकास्, अर्थापि, ऊर्णु, इत्यादि धातुमें अङ्गको द्वित्व नहीं होताहै, किन्तु अङ्गके किसी अवयवको द्वित्व होताहै, इस कारण उन स्थलोंमें दीर्घ, सन्वद्भाव नहीं होगा, किन्तु एकाच् धातुमें ही दीर्घ और सन्वद्भाव होगा ।

अर्थाधिकार पक्षके श्रेष्ठत्वके कारण और वृत्त्यादिमें ऐसा ही स्वीकार होनेके कारण माधवके मतको कोई आचार्य्य दूषित कहते हैं कि, वास्तविक तो अंगावयव जो अभ्यास ऐसा वर्णनसे ऊर्णु धातुमें दीर्घ और अर्थापि धातुमें दीर्घ और सन्वद्भाव होगा ।

'चकास्' धातुमें तो व्यवस्थासे दोनों (दीर्घ,सन्वद्भाव)नहीं होंगे और होंगे भी, तो व्यवस्था यह है कि,णिका विशेष्य संनिहित होनेसे 'लघुनि' यह अथवा अंग होगा जब 'लघुनि'

होगा, तब णिसे पूर्व लघु न होनेसे दोनों नहीं होंगे और अंग विशेष्य होगा तो णिसे पूर्व अंग है, इस लिये दोनों कार्य होंगे।

कैयटसे ही इस प्रकार वैकल्पिक व्याख्या वर्णित है अगित् धातुको दीर्घ और सन्वद्भाव सिद्धके निमित्त णिके अग्लोपमें भी सम्बन्ध कियाहै।

अनन्तर क्रमु धातुपर्यन्त ३० परस्मैपदी धातु कहतेहैं।

अण, रण, वण, भण, मण, कण, क्वण, व्रण, भ्रण और ध्वण धातु शब्दार्थक हैं। अणति। रणति। वणति।

वकारादित्वके कारण एत्व और अभ्यासका लोप नहीं होकर—ववणतुः। ववणिथ॥ कोई २ धणि धातु भी पढतेहैं। धणति॥ ओणृ धातु अपनयन करनेमें है। ओणति। ओणाञ्चकार॥ शोणृ धातु वर्ण और गतिमें है। शोणति। शुशोण॥ श्रोणृ धातु और श्लोणृ धातु संघातमें है। श्रोणति। शोणादि ३ धातु तालव्योष्मादि हैं॥ पैणृ धातु गति, प्रेरण और श्लेषणमें है। किसी ग्रन्थमें प्रैणृ धातु पठित है। पिप्रैण॥ ध्रण धातु शब्द करनेमें है। उपदेशावस्थामें यह धातु नकारान्त है। "रषाभ्यां २३५" इस सूत्रसे णत्व होकर—ध्रणति। यङ्लुक्विषयमें नोपदेशका फल जानना जैसे—दन्ध्रन्ति,यहां नुक् हुआ। कोई २ बण धातु भी इस अर्थमें पढतेहैं। बेणतुः। बेणिथ॥ कनी धातु दीप्ति, कान्ति और गतिमें है। चकान॥ ष्टन धातु और वन धातु शब्द करनेमें हैं। स्तनति। वनति॥ वन षण धातु सम्भक्तिमें है। वन धातुका अर्थ भिन्न होनेसे पुनः पाठ कियाहै। सनति। ससान। सेनतुः॥

२३१९ ये विभाषा।६।४।४३॥

जनसनखनामात्वं वा स्याद्यादौ क्ङिति। सायात्-सन्यात्॥२१॥ अमगत्यादिषु। कनीदीप्तिकान्तिगतीत्यत्र गतेः परयोः शब्दसम्भक्त्योरादिशब्देन ग्रहः। अमति। आम॥२२॥ द्रम हम्म मीमृ गतौ। द्रमति। दद्राम। ह्म्यन्तेति न वृद्धिः। अद्रमीत्। हम्मति। जहम्म। मीमति। मिमीम। अयं शब्दे च॥२९॥ चमु छमु जमु झमु अदने॥

२३१९—यादि कित् और ङित् प्रत्यय परे रहे तो जन, सन और खन धातुके विकल्प करके आत्व हो, जैसे—सायात्, सन्यात्।

अम् धातु गत्यादि अर्थमें है "कनी दीप्ति कान्ति गति" इस स्थलमें गतिके परे जो शब्द और सम्भक्ति अर्थ कहा है, वह आदि शब्दसे गृहीत है। अमति। आम॥ द्रम, हम्म, मीमृ धातु गतिमें हैं। द्रमति। दद्राम। "ह्म्यन्तक्षण० २२९९" इस सूत्रसे वृद्धि न होकर—अद्रमीत्। हम्मति। जहम्म। मीमति। मिमीम, यह धातु शब्दार्थक भी है॥ चमु, छमु, जमु और झमु धातु भक्षण करनेमें हैं॥

२३२० ष्ठिवुक्लमुचमां शिति।७।३।७५॥

एषामचो दीर्घः स्याच्छिति॥ आङि चम इति वक्तव्यम्॥ *॥ आचामति। आङि किम्। चमति। विचमति। अचमीत्॥२९॥ जिमिं केचित्पठन्ति। जेमति॥ क्रमु पादविक्षेपे॥

२३२०—शित् प्रत्यय परे रहते ष्ठिवु, क्लमु, और चमु धातुके अच्को वृद्धि हो।

आङ् पूर्वमें रहते चमु धातुके अच्को वृद्धि हो ऐसा कहना चाहिये * आचामति। आङ्पूर्वक न होनेपर, जैसे—चमति। विचमति। अचमीत्॥ कोई २ जिमि धातु पढतेहैं। जेमति॥ क्रमु धातु पादविक्षेप करनेमें है॥

२३२१ वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः।३।१।७०॥

एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे।

२३२१—कर्तृवाचक सार्वधातुक परे रहते भ्राश, भ्लाश, भ्रमु,क्रमु,क्लमु, त्रसि, त्रुटि और लष धातुके उत्तर विकल्प करके श्यन् प्रत्यय हो॥

२३२२ क्रमः परस्मैपदेषु।७।३।७६॥

क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति। क्राम्यति-क्रामति। चक्राम। क्राम्यतु-क्रामतु॥

२३२२—शित् प्रत्यय परे रहते परस्मैपदमें क्रमु धातुके अकारको विकल्प करके दीर्घ हो,जैसे—क्राम्यति,क्रामति। चक्राम। क्राम्यतु, क्रामतु॥

२३२३ स्नुक्रमोरनात्मनेपदनिमित्ते।७।२।३६॥

अत्रेवेट्। अक्रमीत्॥ ३०॥

अथ रेवत्यन्ता अनुदात्तेतः॥ अय वय मय पय चय तय णय गतौ। अयते॥

२३२३—आत्मनेपदनिमित्त न रहते स्नु और क्रमु धातुके उत्तर वलादि आर्धधातुकको इट् हो—अक्रमीत्।

अनन्तर रेवत्यन्त अनुदात्तेत् (आत्मनेपदी) धातु कहे जातेहैं।

अय, वय, पय, मय, चय, तय और णय धातु गतिमें हैं। अयते॥

२३२४ दयायासश्च।३।१।३७॥

दय अय आस् एभ्य आम् स्याल्लिटि। अयाञ्चक्रे। अयिता। अयिषीष्ट॥

२३२४—लिट् परे रहते दय, अय और आस् धातुके उत्तर आम् हो, अयाञ्चक्रे। अयिता। अयिषीष्ट॥

२३२५ विभाषेटः।८।३।७९॥

इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वम्-अयिषीध्वम्। आयिष्ट। आयिढ्वम्। आयिध्वम्॥

२३२५—इण्के परे स्थित इट्के उत्तर षीध्वं,लुङ् और लिट् सम्बन्धी धकारके स्थानमें विकल्प करके मूर्द्धन्यादेश (ढ) हो।

अयिषीढ्वम्, अयिषीध्वम् । आयिष्ट । आयिढ्वम्, आयिध्वम् ॥

२३२६ उपसर्गस्यायतौ ।८।२।१९॥

अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात् । प्लायते । पलायते । निस्दुसोरुत्वस्यासिद्धत्वान्न लत्वम् । निरयते । दुरयते । निर्दुरोस्तु निलयते । दुलयते । प्रत्यय इति त्विणो रूपम् । अथ कथमुदयति विततोर्ध्वरश्मिरज्जाविति माघः । इट किट कटी इत्यत्र प्रश्लिष्टस्य भविष्यति । यद्वा । अनुदात्तत्त्वलक्षणमात्मनेपदमनित्यम् । चक्षिङो ङित्करणाज्ज्ञापकात् । वादित्वात् ववये । पेये । मेये । चेये । तेये । प्रणयते । नेये ॥ ७ ॥ दय दानगतिरक्षणहिंसादानेषु । आदानं ग्रहणम् । दयांचक्रे ॥ ८ ॥ रय गतौ ॥ ९ ॥ ऊयी तन्तुसन्ताने । ऊयांचक्रे ॥ १० ॥ पूयी विशरणे दुर्गन्धे च । पूयते । पुपूये ॥ ११ ॥ क्नूयी शब्दे उन्दे च । चुक्नूये ॥ १२ ॥ क्ष्मायी विधूनने । चक्ष्माये ॥ १३ ॥ स्फायी ओप्यायी वृद्धौ । स्फायते । पस्फाये । प्यायते ॥

२३२६-अय धातु परे रहते उपसर्गसम्बन्धी रेफके स्थानमें लकार हो, प्लायते । पलायते । निस् और दुस् सम्बन्धी रुत्वके असिद्धत्वके कारण लत्व नहीं होकर-निरयते । दुरयते । निर् और दुर् सम्बन्धी रके स्थानमें ल होकर-निलयते । दुलयते । 'प्रत्ययः' यह पद तो इण्धातुनिष्पन्न है ।

यदि 'अय' धातु आत्मनेपदी हो तो माघमें " उदयति विततोर्ध्वरश्मिरज्जौ" इस स्थलमें 'उदयति' ऐसा परस्मैपद प्रयोग कैसे हुआ ? इसपर कहते हैं कि, इट, किट, कटी इस स्थलमें प्रश्लिष्ट इ धातुका 'उदयति' ऐसा पद हो, अथवा चक्षिङ् धातुमें ङित्करणके कारण अनुदात्तत्व प्रयुक्त आत्मनेपद अनित्य है, इससे उक्त रूप सिद्ध हुआ । वकारादित्वके कारण 'ववये' पद सिद्ध हुआ, इस स्थानमें एत्व नहीं हुआ । पेये । मेये । चेये । तेये । प्रणयते । नेये ॥ दय धातु दान, गति, रक्षण, हिंसा और आदान अर्थात् ग्रहण करनेमें है । दयाञ्चक्रे ॥ रय धातु गति अर्थमें है । ऊयी धातु-तन्तु सन्तानमें है । ऊयाञ्चक्रे ॥ पूयी धातु विसरण, दुर्गन्ध अर्थमें है । पूयते । पुपूये ॥ क्नूयी धातु शब्द करने और उन्द अर्थात् क्लेदनमें है । चुक्नूये ॥ क्ष्मायी धातु विधूननार्थमें है । चक्ष्माये ॥ स्फायी और ओप्यायी धातु वृद्धि अर्थमें है । स्फायते । पस्फाये । प्यायते ॥

२३२७ लिड्यङोश्च ।६।१।२९॥

लिटि यङि च प्यायः पीभावः स्यात् । पुनः प्रसंगविज्ञानात्पीशब्दस्य द्वित्वम् । एरनेकाच इति यण् । पिप्ये । पिप्याते । पिप्यिरे ॥

२३२७-लिट् और यङ् प्रत्यय परे रहते प्याय् धातुके स्थानमें पी आदेश हो, दूसरी वार भी प्रसंग (प्राप्ति) के कारण पी शब्दको द्वित्व हुआ, "एरनेकाचः० २७२" इस सूत्रसे यण् हुआ जैसे-पिप्ये । पिप्याते । पिप्यिरे ॥

२३२८ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् । ३ । १ । ६१ ॥

एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे ॥

२३२८-एकवचन त शब्द परे रहते दीप, जन, बुध, पूरि, तायि और प्यायि धातुके उत्तर विहित च्लिके स्थानमें विकल्प करके चिण् आदेश हो ॥

२३२९ चिणो लुक् । ६ । ४ । १०४ ॥

चिणः परस्य लुक् स्यात् । अप्यायि-अप्यायिष्ट ॥ १९ ॥ तायृ सन्तानपालनयोः । सन्तानः प्रबन्धः । तायते । तताये । अतायि-अतायिष्ट ॥ ॥ १६ ॥ शल चलनसंवरणयोः ॥ १७ ॥ वल वल्ल संवरणे संचरणे च । ववले । ववल्ले ॥ १९ ॥ मल मल्ल धारणे । मेले । ममल्ले ॥ २१ ॥ भल भल्ल परिभाषणहिंसादानेषु । बभले । बभल्ले ॥ २३ ॥ कल शब्दसंख्यानयोः । कलते । चकले ॥ २४ ॥ कल्ल अव्यक्ते शब्दे । कल्लते । अशब्द इति स्वामी । अशब्दस्तूष्णींभाव इति च ॥२५॥ तेवृ देवृ देवने । तितेवे । दिदेवे ॥२७॥ षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेवने । परिनिविभ्य इति षत्वम् । परिषेवते । सिषेवे । अयं सोपदेशोपीति न्यासकारादयः । तद्भाष्यविरुद्धम् । गेवते । जिगेवे । जिग्लेवे । पिपेवे । मेवते । म्लेवते ॥ ३३ ॥ शेवृ खेवृ केवृ इत्यप्येके ॥ ३६ ॥ रेवृ प्लवगतौ । प्लवगतिः प्लुतगतिः । रेवते ॥ ३७ ॥

अथावत्यन्ताः परस्मैपदिनः । मव्य बन्धने । ममव्य ॥ १ ॥ सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः ॥ ४ ॥ हय गतौ । अहयीत् । यान्तत्वान्न वृद्धिः ॥ ५ ॥ शुच्य अभिषवे । अवयवानां शिथिलीकरणं सुरायाः सन्धानं वाऽभिषवः स्नानं च । शुशुच्य ॥ ६ ॥ चुच्य इत्येके ॥ ७ ॥ हर्य गतिकान्त्योः । जहर्य ॥ ८ ॥ अल भूषणपर्याप्तिवारणेषु । अलति । आल ॥

२३२९-चिण्के परे स्थित त शब्दका लोप हो । अप्यायि, अप्यायिष्ट । तायृ धातु सन्तान और पालनार्थमें है । तायते । तताये । अतायि, अतायिष्ट ।

शल धातु चलन और संवरण अर्थमें है । वल और वल्ल धातु संवरण और संचलन अर्थमें हैं । ववले । ववल्ले ॥ मल

और मल्ल धातु धारणार्थमें हैं। मेले। ममल्ले॥ भल और भल्ल धातु परिभाषण, हिंसा और दानार्थमें। बभले। बभल्ले॥ कल धातु शब्द और संख्यामें है। कलते। चकले॥ कल्ल धातु अव्यक्त शब्द करनेमें है। कल्लते। अशब्दमें है ऐसा स्वामीका मत है, अशब्द अर्थात् तूष्णींभाव।

तेवृ और देवृ धातु देवनार्थमें है. तितेवे। दिदेवे॥ षेवृ, गेवृ, ग्लेवृ, पेवृ, मेवृ, म्लेवृ, धातु सेवनार्थमें हैं। "परिनिविभ्यः० २२७५" इस सूत्रसे षत्व हुआ, परिषेवते। सिषेवे। यह धातु सोपदेश भी है, यह न्यासकारादि कहतेहैं, परन्तु वह भाष्यके विरुद्ध है। गेवते। जिगेवे। जिग्लेवे। पिपेवे। मेवते। म्लेवते॥ शेवृ, खेवृ और केवृ धातुका भी कोई कोई पाठ करतेहैं॥ रेवृ धातु प्लुतगतिमें है। रेवते।

अनन्तर अव धातुपर्यन्त परस्मैपदी धातु कहतेहैं।

मव्य धातु बंधनमें है। ममव्य॥

सूर्क्ष्य, ईर्क्ष्य, ईर्ष्य धातु ईर्ष्यार्थमें हैं॥ हय धातु गत्यर्थमें है। अहयीत्। यान्तत्वके कारण वृद्धि नहीं हुई॥ शुच्य धातु अभिषवमें है। अवयवका शिथिलीकरण और सुराका संधान तथा स्नानको अभिषव कहतेहैं। शुशुच्य। यहां कोई कोई कहतेहैं कि शुच्य धातुके स्थानमें 'चुच्य' ऐसा धातुपाठ करतेहैं। हर्य धातु गति और कान्तिमें है। जहर्य॥ अल धातु भूषण, पर्याप्ति और वारणमें है। अलति। आल॥

२३३० अतो ल्रान्तस्य। ७। २। २॥

ल्रेति लुप्तषष्ठीकम्। अतः समीपौ यौ ल्रौ तदन्तस्याऽङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि। नेटीति निषेधस्यातो हलादेरिति विकल्पस्य चापवादः। मा भवानालीत्। अयं स्वरितेदित्येके। तन्मते अलते इत्याद्यपि॥९॥ ञिफला विशरणे। तॄफलेत्येत्त्वम्। फेलतुः। फेलुः। अफालीत्॥ १०॥ मील श्मील स्मील क्ष्मील निमेषणे। निमेषणं संकोचः। द्वितीयस्तालव्यादिः। तृतीयो दन्त्यादिः॥ १४॥ पील प्रतिष्टम्भे। प्रतिष्टम्भो रोधनम्॥ १५॥ नील वर्णे। निनील॥ १६॥ शील समाधौ। शीलति॥ १७॥ कील बन्धने॥ १८॥ कूल आवरणे॥ १९॥ शूल रुजायां संघोषे च॥ २०॥ तूल निष्कर्षे। निष्कर्षो निष्कोषणम्। तच्चान्तर्गतस्य बहिर्निःसारणम्। तुतूल॥ २१॥ पूल संघाते॥ २२॥ मूल प्रतिष्ठायाम्॥ २३॥ फल निष्पत्तौ। फेलतुः। फेलुः॥ २४॥ चुल्ल भावकरणे। भावकरणमभिप्रायाविष्कारः॥ २५॥ फुल्ल विकसने॥ २६॥ चिल्ल शैथिल्ये भावकरणे च॥ २७॥ तिल गतौ। तेलति॥ २८॥ तिल्लेत्येके॥ तिल्लति॥ २९॥ वेल चेल केल खेल क्ष्वेल वेल्ल चलने। पञ्च ऋदितः षष्ठो लोपधः॥ ३५॥ पेल फेल शेल गतौ॥ ३८॥ षेल इत्येके॥ ३९॥ स्खल सञ्चलने। चस्खाल। अस्खालीत्॥ ४०॥ खल सञ्चये॥ ४१॥ गल अदने। गलति। अगालीत्॥ ४२॥ षल गतौ। सलति॥ ४३॥ दल विशरणे॥ ४४॥ श्वल श्वल्ल आशुगमने। शश्वाल। अश्वालीत्। शश्वल्ल। अश्वल्लीत्॥ ४६॥ खोलृ खोर्ऋ गतिप्रतिघाते। खोलति। खोरति॥ ॥ ४८॥ धोर्ऋ गतिचातुर्ये। धोरति॥ ४९॥ त्सर छद्मगतौ। तत्सार। अत्सारीत्॥ ५०॥ क्मर हूर्छने। चक्मार॥ ५१॥ अभ्र वभ्र मभ्र चर गत्यर्थाः। चरतिर्भक्षणेऽपि। अभ्रति। आनभ्र। मा भवानभ्रीत्। अङ्गान्त्यरेफस्यातः समीपत्वाभावान्न वृद्धिः॥ ५५॥ ष्ठिवु निरसने। ष्ठिवुक्लम्विति दीर्घः। ष्ठीवति। अस्य द्वितीयस्थकारष्ठकारो वेति वृत्तिः। तिष्ठेव। तिष्ठिवतुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। टिष्ठिवुः। हलि चेति दीर्घः। ष्ठीव्यात्॥ ५६॥ जि जये। अयमजन्तेषु पठितुं युक्तः। जय उत्कर्षप्राप्तिः। अकर्मकोयम्। जयति॥

२३३०–परस्मैपदमें सिच् प्रत्यय परे रहते अकारके समीपवर्त्ती जो लकार और रकार तदन्त अंगावयव अकारको वृद्धि हो। यह सूत्र "नेटि २२६८" इस निषेधका और "अतो हलादेः० २२८४" इस सूत्रसे विकल्प वृद्धिका अपवाद है। मा भवानालीत्। कोई २ कहते हैं यह धातु स्वरितेत् अर्थात् उभयपदी है, उनके मतमें अलते इत्यादि पद भी होगा॥ फल धातु विशरणमें है "तॄफल० २३०१" इस सूत्रसे एत्व होगा। फेलतुः। फेलुः। अफालीत्॥ मील, श्मील, स्मील और क्ष्मील धातु निमेषण अर्थात् संकोचार्थमें हैं। दूसरी धातु तालव्य शकारादि है॥ तीसरी धातु दन्त्यादि है। पील धातु प्रतिष्टम्भ अर्थात् रोधनार्थमें है॥ नील धातु वर्ण अर्थमें है। निनील॥ शील धातु समाधि अर्थमें है। शीलति॥ कील धातु बंधन अर्थमें है॥ कूल धातु आवरण अर्थमें है॥ शूल धातु रुजा और संघोषार्थमें है॥ तूल धातु निष्कोषणार्थमें अर्थात् भीतरसे बाहर निकालनेमें है। तुतूल॥ पूल धातु संघात अर्थमें है॥ मूल धातु प्रतिष्ठार्थमें है॥ फल धातु निष्पत्ति अर्थमें है। फेलतुः। फेलुः॥

चुल्ल धातु भाव करनेमें अर्थात् अभिप्रायज्ञापनार्थमें है॥ फुल्ल धातु विकसनार्थमें है॥ चिल्ल धातु शैथिल्यार्थमें और भावकरणार्थमें है।

तिल धातु गति अर्थमें है। तेलति। कोई २ कहतेहैं। तिल्ल धातु है। तिल्लति॥ वेलृ, चेलृ, केलृ, खेलृ, क्ष्वेलृ और वेल्ल धातु चलनार्थमें हैं। पांच ऋकार इत्संज्ञक और छठा लकारोपध है॥ पेलृ, फेलृ, शेलृ धातु गति अर्थमें हैं। कोई २ षेलृ धातु भी कहते हैं॥ स्खल धातु सञ्चलनार्थमें है।

चस्खाल । अस्खालीत् ॥ खल धातु सञ्चयार्थमें है ॥ गल धातु अदनार्थमें है । अगालीत् ॥ षल धातु गति अर्थमें है । सलति ॥ दल धातु विशरणार्थमें है ॥ श्वल, श्वल्ल धातु शीघ्र गमन अर्थमें हैं । शश्वाल । अश्वालीत् । शश्वल्ल । अश्वल्लीत् ॥ खोल, खोऋ धातु गतिप्रतिरोधमें है । खोलति । खोरति ।

धोऋ धातु गतिचातुर्यार्थमें हैं धोरति ॥ त्सर धातु छद्मगति में है । तत्सार । अत्सारीत् ॥ क्मर धातु हूर्च्छन अर्थात् कौटिल्यमें है । चक्मार ॥

अभ्र, वभ्र, मभ्र, चर धातु गत्यर्थमें हैं । चर धातु भक्षणार्थमें है । अभ्रति । आनभ्र । मा भवानभ्रीत् । अञ्जान्तरकारक अकारके समीपभावके कारण वृद्धि नहीं होगी ।

ष्ठिवु धातु निरसनार्थमें है । "ष्ठिवु क्लमु० २३२०" इस सूत्रसे दीर्घ होगा । ष्ठीवति । इस धातुके द्वितीय थकारके स्थानमें विकल्प करके टकार हो, यह वृत्तिकारका मत है । तिष्ठेव । तिष्ठिवतुः । तिष्ठिवुः । टिष्ठेव । टिष्ठिवतुः । टिष्ठिवुः । "हलि च ३५४" इस सूत्रसे दीर्घ होगा । ष्ठीव्यात् ।

जि धातु जय करनेमें है । इस धातुका अजन्तमें ही पाठ करना उचित है । जय शब्दसे उत्कर्षप्राप्ति जानना । यह अकर्मक है । जयति ॥

२३३१ सन्लिटोर्जेः । ७ । ३ । ५७ ॥

जयतेः सन्लिण्निमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात् । जिगाय। जिग्यतुः।जिग्युः। जिगयिथ–जिगेथ । जिगाय–जिगय । जिग्यिव । जिग्यिम । जेता । जीयात् । अजैषीत्॥ ॥ ५७ ॥ जीव प्राणधारणे । जिजीव ॥ ५८ ॥ पीव मीव तीव णीव स्थौल्ये । पिपीव । मिमीव । तितीव । निनीव ॥ ६२ ॥ क्षीवु क्षेवु निरसने॥ ॥ ६४ ॥ उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः । ऊर्वांचकार । उपधायां चेति दीर्घः । तुतूर्व ॥ ॥ ६९ गुर्वी उद्यमने । गूर्वति । जुगूर्व ॥ ७० ॥ मुर्वी बन्धने ॥ ७१ ॥ पुर्व पर्व मर्व पूरणे॥७४॥ चर्व अदने ॥ ७५ ॥ भर्व हिंसायाम् ॥ ७६ ॥ कर्व खर्व गर्व दर्पे ॥ ७९ ॥ अर्व शर्व षर्व हिंसायाम् । आनर्व । शर्वति । सर्वति ॥ ८२ ॥ इवि व्याप्तौ । इन्वति । इन्वांचकार ॥ ८३ ॥ पिवि मिवि णिवि सेचने । तृतीयो मूर्द्धन्योष्मादिरित्येके । सेवन इति तरङ्गिण्याम् । पिन्वति । पिपिन्व ॥ ८६ ॥ हिवि दिवि धिवि जिवि प्रीणनार्थाः । हिन्वति । दिन्वति ॥

२३३१–सन् और लिट् निमित्तक जो अभ्यास उसके परे स्थित जि धातुके स्थानमें कुत्व हो, अर्थात् सन् और लिट् परे रहते जि धातुके स्थानमें गि आदेश हो । जिगाय । जिग्यतुः । जिग्युः । जिगयिथ, जिगेथ । जिगाय, जिगय । जिग्यिव । जिग्यिम । जेता । जीयात् । अजैषीत् ।

जीव धातु प्राणधारण करनेमें है । जिजीव ॥ पीव, मीव, तीव, णिव धातु स्थौल्य अर्थमें हैं । पिपीव । मिमीव । तितीव । निनीव ॥ क्षीवु और क्षेवु धातु निरसन अर्थमें हैं ॥ उर्वी, तुर्वी, थुर्वी, दुर्वी और धुर्वी धातु हिंसार्थमें हैं । ऊर्वाञ्चकार । "उपधायां च २२६५" इस सूत्रसे दीर्घ होगा । तुतूर्व ॥ गुर्वी धातु उद्यमनार्थमें है । गुर्वति । जुगूर्व ॥ मुर्वी धातु बंधनार्थमें है । पुर्व, पर्व और मर्व धातु पूरणार्थमें हैं ॥ चर्व धातु भक्षणमें है ॥ तर्व धातु हिंसार्थमें है ॥ कर्व, खर्व, गर्व धातु दर्पार्थमें हैं ॥ अर्व, शर्व, षर्व धातु हिंसार्थमें हैं । आनर्व । शर्वति । सर्वति ॥ इवि धातु व्याप्ति अर्थमें हैं । इन्वति । इन्वाञ्चकार ॥ पिवि, मिवि और णिवि धातु सेचनार्थमें हैं । कोई २ कहते हैं कि, तीसरी णिवि मूर्द्धन्योष्मादि है, तरंगिणीके मतमें सेवनार्थमें है । पिन्वति । पिपिन्व ॥ हिवि, दिवि, धिवि और जिवि धातु प्रीणनार्थमें हैं । हिन्वति । दिन्वति ॥

२३३२ धिन्विकृण्व्योर च ।३।१।८०॥

अनयोरकारोन्तादेशः स्यादुप्रत्ययश्च शब्विषये । अतो लोपः । तस्य स्थानिवद्भावाल्लघूपधगुणो न । उप्रत्ययस्य पित्सु गुणः । धिनोति । धिनुतः । धिन्वन्ति ॥

२३३२–शप् विषयमें धिन्व और कृण्व धातुको अकार अन्तादेश और उ प्रत्यय हो, अकारका लोप होगा, उसके स्थानिवद्भावके कारण लघूपध गुण न होगा । पित् परे रहते उ प्रत्ययके उकारको गुण होगा । धिनोति । धिनुतः । धिन्वन्ति ॥

२३३३लोपश्चास्याऽन्यतरस्यां म्वोः। ६ । ४ । १०७ ॥

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यात् म्वोः परयोः । धिन्वः–धिनुवः । धिन्मः–धिनुमः।मिपि तु परत्वाद्गुणः,धिनोमि ॥

२३३३–व और म परे रहते असंयोगपूर्वक जो प्रत्ययका उकार तदन्त अङ्गका विकल्प करके लोप हो । धिन्वः, धिनुवः । धिन्मः, धिनुमः । मिप् परे रहते परत्वके कारण गुण होगा । धिनोमि ॥

२३३४ उतश्च प्रत्ययादसंयोगपूर्वात् । ६ । ४ । १०६ ॥

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात्परस्य हेर्लुक् स्यात् । धिनु । नित्यत्वादकारलोपात्पूर्वमाट् । धिनवाव । धिनवाम । जिन्वति । इत्यादि ॥ ९० ॥ रिवि रवि धवि गत्यर्थाः । रिण्वति । रण्वति । धन्वति ॥ ९३ ॥ कृवि हिंसाकरणयोश्च । चकाराद्गतौ । कृणोतीत्यादि धिनोतिवत् । अयं स्वादौ च ॥९४॥ मव बन्धने ।

मवति। मेवतुः। मेवुः। अमवीत्–अमावीत् ॥ ॥९५॥ अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। अवति। आव। मा भवानवीत् ॥ ९६ ॥ धावु गतिशुद्ध्योः। स्वरितेत्। धावति। धावते ॥ ९७ ॥ दधाव। दधावे ॥

अथोष्मान्ता आत्मनेपदिनः ॥ धुक्ष धिक्ष सन्दीपनक्लेशनजीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे ॥२॥ वृक्ष वरणे। वृक्षते। ववृक्षे ॥ ३ ॥ शिक्ष विद्योपादाने। शिक्षते ॥४॥ भिक्ष भिक्षायामलाभे लाभे च। भिक्षते ॥५॥ क्लेश अव्यक्तायां वाचि। बाधन इति दुर्गः। क्लेशते। चिक्लेशे ॥६॥ दक्ष वृद्धौ शीघ्रार्थे च। दक्षते। ददक्षे॥७॥ दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु। दीक्षते। दिदीक्षे ॥ ८ ॥ ईक्ष दर्शने। ईक्षांचक्र। ॥ ९ ॥ ईष गतिहिंसादर्शनेषु। ईषांचक्र ॥१०॥ भाष व्यक्तायां वाचि। भाषते ॥ ११ ॥ वर्ष स्नेहने। दन्त्योष्ठ्यादिः। ववर्षे ॥ १२ ॥ गेषृ अन्विच्छायाम्। ग्लेषृ इत्येके। अन्विच्छा अन्वेषणम्। जिगेषे ॥१३॥ पेषृ प्रयत्ने। पेषते ॥१४॥ जेषृ णेषृ एषृ प्रेषृ गतौ। जेषते। नेषते। एषांचक्रे। पिप्रेषे ॥ १८ ॥ रेषृ हेषृ हेषृ अव्यक्ते शब्दे। आद्यो वृकशब्दे। ततो द्वौ अश्वशब्दे। रेषते। हेषते। हेषते ॥ २१ ॥ कासृ शब्दकुत्सायाम्। कासांचक्रे ॥ २२ ॥ भासृ दीप्तौ। बभासे ॥ २३ ॥ णासृ रासृ शब्दे। नासते। प्रणासते ॥ २५ ॥ णस कौटिल्ये। नसते॥२६॥ भ्यस भये। भ्यसते। बभ्यसे ॥ २७ ॥ आङः शासि इच्छायाम्। आशंसते। आशशंसे ॥२८॥ ग्रसु ग्लसु अदने। जग्रसे। जग्लसे ॥ ३०॥ ईह चेष्टायाम्। ईहांचक्रे ॥३१॥ बहि महि वृद्धौ। बंहते। बबंहे। मंहते ॥ ३३ ॥ अहि गतौ। अंहते। आनंहे ॥ ३४ ॥ गर्ह गल्ह कुत्सायाम्। जगर्हे। जगल्हे॥३६॥बर्ह बल्ह प्राधान्ये। ओष्ठ्यादी। ॥ ३८ ॥ वर्ह वल्ह परिभाषणहिंसाच्छादनेषु। दन्त्योष्ठ्यादी। केचित्तु पूर्वयोर्दन्त्योष्ठ्यादितामनयोरोष्ठ्यादितां चाहुः ॥ ४० ॥ प्लिह गतौ। पिप्लिहे ॥ ४१ ॥ वेहृ जेहृ बाहृ प्रयत्ने। आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावप्योष्ठ्यादी इत्येके। दन्त्योष्ठ्यादी इत्यपरे। जेहतिर्गत्यर्थोपि बवाहे ॥४४॥ द्राहृ निद्राक्षये। निक्षेपे इत्येके ॥ ४५ ॥ काशृ दीप्तौ। चकाशे ॥४६॥ ऊह वितर्के। ऊहांचक्रे ॥ ४७ ॥ गाहू विलोडने। गाहते–जगाहे। जगाहिषे–जघाक्षे। जगाहिढ्वे–जगाहिध्वे–जघाढ्वे ॥

२३३४–असंयोगपूर्वक जो प्रत्ययका उकार तदन्त अङ्गके परे स्थित हिका लोप हो। धिनु। नित्यत्वके कारण उकार लोपसे पूर्वमें आट् आगम होगा। धिनवाव। धिनवाम। जिन्वति–इत्यादि ॥ रिवि, रवि और धवि धातु गत्यर्थमें हैं। रिण्वति। रण्वति। धन्वति ॥ कृवि धातु हिंसा और करणार्थ और गत्यर्थमें हैं। कृणोति–इत्यादि धिन्व धातुके तरह रूप होंगे। यह स्वादिगणी भी है ॥ मव धातु बंधनार्थमें है। मवति। मेवतुः। मेवुः। अमवीत्, अमावीत् ॥ अव धातु रक्षण, गति, कान्ति, प्रीति, तृप्ति, अवगम, प्रवेश, श्रवण, स्वाम्यर्थ, याचन, क्रिया, इच्छा, दीप्ति, अवाप्ति, आलिङ्गन, हिंसा, आदान, भाग और वृद्धि अर्थमें है। अवति। आव। मा भवानवीत् ॥ धावु धातु गति और शुद्धिमें है। धावति। धावते। दधाव। दधावे।

अब ऊष्मवर्णान्त आत्मनेपदी धातु कहे जातेहैं।

धुक्ष और धिक्ष धातु सन्दीपन, क्लेशन और जीवन अर्थमें हैं। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे ॥ वृक्ष धातु वरणमें है। वृक्षते। ववृक्षे ॥ शिक्ष धातु विद्योपार्जनमें है। शिक्षते॥ भिक्ष धातु भिक्षाके लाभ और अलाभमें है। भिक्षते। क्लेश धातु अव्यक्त वाक्यमें है। क्लेशते। चिक्लेशे। दक्ष धातु वृद्धि और शीघ्रार्थमें है। दक्षते। ददक्षे॥ दीक्ष धातु मौंड्य, इज्या, उपनयन, नियम और व्रतादेशमें है। दीक्षते। दिदीक्षे। ईक्ष धातु दर्शनमें है। ईक्षाञ्चक्रे ॥

ईष धातु गति, हिंसा और दर्शनमें है। ईषाञ्चक्रे ॥ भाष धातु व्यक्त वाक्यमें है। भाषते ॥ वर्ष धातु स्नेहनार्थमें है। यह दन्त्योष्ठ्यादि है। ववर्षे ॥ गेषृ धातु अन्वेषण अर्थमें है। कोई २ ग्लेषृ धातु का इस अर्थमें पाठ करतेहैं। जिगेषे ॥ पेषृ धातु प्रयत्नार्थमें है।पेषते ॥ जेषृ,णेषृ, एषृ और प्रेषृ धातु गति अर्थमेंहैं। जेषते। नेषते। एषाञ्चक्रे। पिप्रेषे। रेषृ, हेषृ, और हेषृ धातु अव्यक्त शब्द करनेमें हैं॥ रेषृ धातु वृकशब्द और हेषृ और हेषृ धातु अश्व शब्द करनेमें हैं। रेषते। हेषते। हेषते।

कासृ धातु कुत्सित शब्दमें है। कासाञ्चक्रे॥ भासृ धातु दीप्तिमें है। बभासे॥ णासृ और रासृ धातु शब्द करनेमें हैं। नासते। प्रणासते ॥ णस धातु कौटिल्यार्थमें है। नसते ॥ भ्यस धातु भयमें है। भ्यसते। बभ्यसे ॥ आङ्पूर्वक शंस् धातु इच्छार्थमें है। आशंसते। आशशंसे ॥ ग्रसु और ग्लसु धातु भक्षण करनेमें हैं। जग्रसे। जग्लसे ॥

ईह धातु चेष्टामें है। ईहाञ्चक्रे ॥ बहि और महि धातु वृद्धिमें है। बंहते।बबंहे।मंहते॥अहि धातु गतिमें है। अंहते। आनंहे॥ गर्ह, गल्ह धातु कुत्सामें हैं। जगर्हे।जगल्हे॥ बर्ह और बल्ह धातु प्राधान्यमें है। यह दो धातु ओष्ठ्यादि हैं॥ वर्ह, वल्ह धातु परिभाषण, हिंसा और आच्छादन अर्थमें हैं। यह

दो धातु दन्त्योष्ठ्यादि हैं । कोई २ इसके विपरीत कहतेहैं, अर्थात् पूर्वकी दन्त्योष्ठादि और परकी दो पवर्गादि हैं ॥ प्लिह धातु गतिमें है । पिप्लिहे ॥ वेह्, जेह् और बाह्ह धातु प्रयत्नमें हैं । पहली दन्त्योष्ठ्यादि और शेष केवल ओष्ठ्यादि हैं । कोई २ कहतेहैं दोनों ही ओष्ठ्यादि और दन्त्योष्ठ्यादि हैं, ॥ जेह धातु गत्यर्थमें भी है । ववाहे । द्राह्ह धातु निद्रा-भङ्गमें है । अन्य मतसे निक्षेपमें है ।

काशृ धातु दीप्तिमें है । चकाशे ।

ऊह धातु वितर्कमें है । ऊहाञ्चक्रे । गाहू धातु विलोडनमें है । गाहते । जगाहे । जगाहिषे, जघाक्षे । जगाहिढ्वे, जगाहिध्वे, जघाढ्वे ॥

२३३५ ढो ढे लोपः । ८ । ३ । १३॥

ढस्य लोपः स्याड्ढे परे । गाहिता-गाढा । गाहिष्यते-घाक्ष्यते । गाहिषीष्ट-घाक्षीष्ट । अगाहिष्ट-अगाढ । अघाक्षाताम् । अघाक्षत । अगाढाः । अघाढ्वम् । अघाक्षि ॥४८॥ गृहू गर्हणे । गर्हते । जगृहे ॥ ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन ॥*॥ जगृहिषे । जघृक्षे । जघृढ्वे गर्हिता-गर्ढा । गर्हिष्यते-घर्क्ष्यते । गर्हिषीष्ट-घृक्षीष्ट । लुङि । अगर्हिष्ट । इडभावे ॥

२३३५-ढ परे रहते पूर्ववर्ती ढकारका लोप हो । गाहिता, गाढा । गाहिष्यते, घाक्ष्यते । गाहिषीष्ट, घाक्षीष्ट । अगाहिष्ट, अगाढ । अघाक्षाताम् । अघाक्षत । अगाढाः । अघाढ्वम् । अघाक्षि ॥ गृहू धातु गर्हण अर्थात् निन्दामें है । गर्हते । जगृहे ।

पूर्वविप्रतिषेधके कारण गुणको बाधकर ऋकारोपध धातुके उत्तर लिट्की कित्संज्ञा हो * जगृहिषे, जघृक्षे । जघृढ्वे । गर्हिता, गर्ढा । गर्हिष्यते, घर्क्ष्यते । गर्हिषीष्ट, घृक्षीष्ट । लुङ् परे जैसे-अगर्हिष्ट । इट्अभाव पक्षमें-॥

२३३६ शल इगुपधादनिटः क्सः । ३ । १ । ४५ ॥

इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात् । अघृक्षत ॥

२३३६-इक्उपधावाले शलन्त धातुके उत्तर अनिट् च्लिके स्थानमें 'क्स' आदेश हो । जैसे-अघृक्षत ॥

२३३७ क्सस्याचि । ७ । ३ । ७२॥

अजादौ तङि क्सस्य लोपः स्यात् । अलोन्त्यस्य । अघृक्षाताम् । अघृक्षन्त ॥४९॥ ग्लह च । ग्लहते ॥ ५० ॥ घुषि कान्तिकरणे । घुंषते । जुघुंषे । केचिद्घषेत्यदुपधं पठन्ति ॥ ५१ ॥

अथार्हत्यन्ताः परस्मैपदिनः । घुषिर् अविशब्दने । विशब्दनं प्रतिज्ञानं ततोऽन्यस्मिन्नर्थे इत्येके । शब्द इत्यन्ये पेठुः । घोषति । जुघोष । घोषिता । इरित्वादङ् वा । अघुषत्अघोषीत् ॥ १ ॥ अक्षू व्याप्तौ ॥

२३३७-अजादि तङ् परे रहते क्स आदेशका लोप हो । "अलोन्त्यस्य ४२" इस सूत्रसे अन्त्यका लोप होगा, अघृक्षाताम् । अघृक्षन्त ॥ ग्लह धातु निन्दामें है । ग्लहते ।

घुषि धातु कान्तिकरणमें है । घुंषते । जुघुंषे । कोई २'घष' ऐसा अकारोपध पाठ कहतेहैं ।

अब घुषिर् धातुसे अर्ह धातुपर्यन्त परस्मैपदी धातु कहे जाते हैं, जैसे-घुषिर् धातु अविशब्दन अर्थात् प्रतिज्ञासे भिन्न अर्थमें है। यह मुख्य मत है । अन्य मतमें शब्द करनेमें है । घोषति । जुघोष । घोषिता । इर् इत् होनेके कारण विकल्प करके च्लिको अङ् होगा । अघुषत्, अघोषीत् ॥ अक्षु धातु व्याप्ति अर्थमें है ॥

२३३८ अक्षोऽन्यतरस्याम् । ३ । १ । ७५॥

अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे । पक्षे शप् । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति । अक्षति । अक्षतः । अक्षन्ति । आनक्ष । आनक्षिथ-आनष्ठ । अक्षिता-अष्टा । अक्षिष्यति-स्कोरिति कलोपः । षढोः कः सि । अक्ष्यति । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि । आक्ष्णोत् । आक्ष्णवम् । अक्ष्णुयात् । अक्ष्यात् । ऊदित्त्वाद्वेट् । नेटि । मा भवानक्षीत् । अक्षिष्टाम् । अक्षिषुः । इडभावे तु मा भवानाक्षीत् । आष्टाम् । आक्षुः ॥ २ ॥ तक्षू त्वक्षू तनूकरणे ॥

२३३८-कर्त्ता अर्थमें वर्त्तमान सार्वधातुक परे रहते अक्ष धातुके उत्तर विकल्प करके श्नु प्रत्यय हो । विकल्प पक्षमें शप् होगा । अक्ष्णोति । अक्ष्णुतः । अक्ष्णुवन्ति । अक्षतिः । अक्षतः । अक्षन्ति । आनक्ष । आनक्षिथ, आनष्ठ । अक्षिता, अष्टा । अक्षिष्यति । "स्कोः० ३८०" इस सूत्रसे ककारका लोप हुआ, "षढोः कः सि २९५" अर्थात् सकार परे रहते ष और ढके स्थानमें क हो, इससे षको क हुआ, अक्ष्यति । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णवानि । आक्ष्णोत् । आक्ष्णवम् । अक्ष्णुयात् । अक्ष्यात् । ऊदित्त्वके कारण विकल्प करके इट् होगा । "नेटि २३६८" इस सूत्रसे वृद्धिका निषेध होताहै, इस कारण मा भवानक्षीत् । अक्षिष्टाम् । अक्षिषुः । इट्के अभावमें मा भवानक्षीत् । आष्टाम् । आक्षुः ॥ तक्षू और त्वक्षू धातु तनूकरणमें अर्थात् सूक्ष्म करनेमें हैं ॥

२३३९ तनूकरणे तक्षः । ३ । १ । ७६॥

श्नुः स्याद्वा शब्विषये ॥ तक्ष्णोति । तक्षति-काष्ठम् । ततक्षिथ । ततष्ठ । अतक्षीत् । अतक्षिष्टाम् । अताक्षीत् । अताष्टाम् । तनूकरणे किम् । वाग्भिः संतक्षति । भर्त्सयतीत्यर्थः ॥ ४ ॥ उक्ष सेचने । उक्षांचकार ॥ ५ ॥ रक्ष पालने ॥ ६ ॥ णिक्ष चुंबने । प्रणिक्षति ॥ ७ ॥ तृक्ष स्तृक्ष णक्ष

गतौ । तृक्षति । स्तृक्षति।नक्षति॥१०॥वक्ष रोषे। संघाते इत्येके ॥ ११ ॥ मृक्ष संघाते । म्रक्ष इत्येके ॥ १२ ॥ तक्ष त्वचने । त्वचनं संवरणं त्वचो ग्रहणं च । पक्ष परिग्रह इत्येके ॥ १४ ॥ सूर्क्ष आदरे । सुसूर्क्ष । अनादर इति तु काचित्कोऽपपाठः।अवज्ञावहेलनमसूर्क्षणमित्यमर १९॥ काक्षि वाक्षि माक्षि काङ्क्षायाम् ॥ १८ ॥ द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च ॥ २१ ॥ चूष पाने । चुचूष ॥ २२ ॥ तूष तुष्टौ ॥ २३ ॥ पूष वृद्धौ ॥ २४ ॥ मूष स्तेये ॥ २९ ॥ लूष रूष भूषायाम् ॥ २७ ॥ शूष प्रसवे । प्रसवोऽभ्यनुज्ञानम् । तालव्योष्मादिः ॥ २८ ॥ यूष हिंसायाम् । जूष च ॥ ३० ॥ भूष अलंकारे । भूषति ॥३१॥ ऊष रुजायाम्।ऊषांचकार॥३२॥ ईष उञ्छे ॥ ३३ ॥ कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः । तृतीयषष्ठौ तालव्योष्मादी । सप्तमो दन्त्योष्ठ्यादिः । चकाष । चखाष । शिशेष । शिशेषिथ । शेष्टा। क्सः । अशिक्षत् । अशेक्ष्यत् । जेषतुः । जझषतुः । शेषतुः । ववषतुः । मेषतुः ॥

२३३९–तनूकरण अर्थात् क्षीणकरण अर्थ होनेपर तक्ष धातुके उत्तर शप्के विषयमें विकल्प करके श्नु प्रत्यय हो, जैसे–तक्ष्णोति, तक्षति वा काष्ठम् । ततक्षिथ,ततष्ठ । अतक्षीत्। अताक्षिष्टाम् । अताक्षीत् । अताष्टाम् ।

तनूकरणार्थ न होनेपर 'वाग्भिः सन्तक्षति' इस स्थलमें भर्त्सनार्थ होनेके कारण श्नु प्रत्यय नहीं हुआ ।

उक्ष धातु सेचन करनेमें है । उक्षाञ्चकार॥रक्ष धातु पालन करनेमें है ॥ णिक्ष धातु चुम्बन करनेमें है । प्रणिक्षति ॥ तृक्ष, स्तृक्ष और णक्ष धातु गमन करनेमें हैं । तृक्षति । स्तृक्षति । नक्षति ॥ वक्ष धातु क्रोध करनेमें है । किसी २ मतमें संघात अर्थमें है॥मृक्ष धातु संघातार्थमें है । कोई२म्रक्ष धातु उक्तार्थमें पढतेहैं ॥ तक्ष धातु त्वचनमें है अर्थात् संवरण और त्वक्के ग्रहणमें है ॥ पक्ष धातु परिग्रहमें है ॥ सूर्क्ष धातु आदरमें है । सुसूर्क्ष । कोई २ कहतेहैं कि यह धातु 'अनादरे' ऐसे कहीं२ पाठके कारण अनादर अर्थमें है, परन्तु 'अनादरे' यह अपपाठ है कारण कि, अवज्ञा, अवहेलन और असूर्क्षण यह पर्य्यायशब्द हैं ऐसा अमरकोशमें है ॥

काक्षि, वाक्षि और माक्षि धातु कांक्षार्थमें हैं ॥ द्राक्षि,ध्राक्षि और ध्वाक्षि धातु घोर ध्वनिमें हैं॥ चूष धातु पान करनेमें है॥ तूष धातु तुष्टिमें है ॥ पूष धातु वृद्धिमें है ॥ मूष धातु चोरी करनेमें है ॥ लूष और रूष धातु भूषा करनेमें है ॥ शूष धातु प्रसव अर्थात् अभ्यनुज्ञामें है । यह धातु तालव्य और ऊष्मादि है ॥ यूष और जूष धातु हिंसा करनेमें हैं । जूषति ॥ भूष धातु अलङ्कार अर्थमें है ॥ ऊष धातु पीडित करनेमें है । ऊषाञ्चकार ॥ ईष धातु उञ्छार्थमें है ॥ कष, खष, शिष, जष, झष, शष, वष, मष, रुष और रिष धातु हिंसार्थमें हैं । इनमेंसे तीसरा और छठवां धातु तालव्य और ऊष्मादि है और सातमां दन्त्योष्ठ्यादि है । चकाष । चखाष । शिशेष । शिशेषिथ । शेष्टा । क्स प्रत्यय होकर–अशिक्षत् । अशेक्ष्यत् । जेषतुः । जझषतुः । शेषतुः । ववषतुः । मेषतुः ॥

२३४० तीषसहलुभरुषरिषः।७।२।४८॥

इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात् । रोषिता–रोष्टा । रोषिष्यति । रेषिता–रेष्टा । रेषिष्यति ॥ ४३ ॥ भष भर्त्सने । इह भर्त्सनं श्वरवः । भषति । बभाष ॥ ४४ ॥ उष दाहे । ओषति ॥

२३४०–ईष,सह,लुभ,रुष और रिष इन धातुओंके परे जो तकारादि आर्धधातुक प्रत्यय उनको विकल्प करके इट् आगम हो।रोषिता,रोष्टा।रोषिष्यति।रेषिता,रेष्टा।रेषिष्यति॥ भष धातु भर्त्सनार्थमें है। इस स्थलमें भर्त्सन शब्दसे कुक्कुरका शब्द जानना। भषति । बभाष ॥ उष धातु दाहमें है । ओषति ॥

२३४१ उषविदजागृभ्योऽन्यतरस्याम् । ३ । १ । ३८ ॥

एभ्यो लिट्याम्वा स्यात् । ओषांचकार । उवोष । ऊषतुः । उवोषिथ ॥ ४९ ॥ जिषु विषु मिषु सेचने । जिजेष । क्रादिनियमादिट् । विवेषिथ । विवेषिव । वेष्टा । वेक्ष्यति । अविक्षत् ॥ ४८ ॥ पुष पुष्टौ । पोषति । पोषिता । पोषिष्यति । अपोषीत् । अनिट्सु पुष्यति श्यना निर्देशादयं सेट् अतो न क्सः । अङ्विधौ दैवादिकस्य ग्रहणान्नाङ्॥४९॥ श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। शिश्रेष ।श्रेषिता। श्लेषति । शिश्लेष। श्लेषिता । अयमपि सेट् । अनिट्सु दैवादिकस्यैव ग्रहणमिति कैयटादयः। यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तम्, तत्त्वोक्तिविरोधाद्ग्रन्थान्तरविरोधाच्चोपेक्ष्यम् । प्रोषति । पुप्रोष ॥ ९३ ॥ पृषु वृषु मृषु सेचने । मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च । पर्षति । पपर्ष । पृष्यात् ॥ ९६ ॥ घृषु संघर्षे ॥ ९७ ॥ हृषु अलीके ॥ ९८ ॥ तुस ह्रस ह्लस रस शब्दे । तुतोस । जह्रास । जह्लास । ररास ॥ ६२ ॥ लस श्लेषणक्रीडनयोः ॥ ६३ ॥ घस्लृ अदने । अयं न सार्वत्रिकः । लिट्यन्यतरस्यामित्यदेर्घस्लादेशविधानात् । ततश्च यत्र लिंगं वचनं वास्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिंगम् । लृदित्करणमङि । अनि-

इट्कारिकासु पाठो वलाद्यार्धधातुके । क्मरचि तु विशिष्योपादानम् । घसति । घस्ता ॥

२३४१–लिट् लकार परे रहते उष, विद और जागृ धातुके उत्तर विकल्प करके आम् प्रत्यय हो । ओषाञ्चकार । उवोष । ऊषतुः । उवोषिथ ॥ जिषु, विषु और मिषु धातु सेचन करनेमें हैं । जिजेष । क्रादिनियमके कारण इट् होगा । विवेषिथ । विवेषिव । वेष्टा । वेक्ष्यति । अविक्षत् ॥ पुष धातु पुष्टिमें है । पोषति । पोषिता । पोषिष्यति । अपोषीत् ।

अनिट्कारिकामें 'पुष्य' ऐसे श्यन्युक्त धातुके निर्देशके कारण यह धातु सेट् है, इस कारण इसके उत्तर 'क्स' आदेश नहीं होगा, और टाङ् विधिमें दिवादिके ग्रहणके कारण इस स्थलमें अङ् भी नहीं होगा ।

श्रिषु, श्लिषु, प्रुषु, और प्लुषु धातु दाहमें हैं । श्रेषति । शिश्रेष । श्रेषिता । श्लेषति । शिश्लेष । श्लेषिता । यह धातु भी सेट् है, अनिट्कारिकामें दिवादिगणीय श्लिष धातुका ही ग्रहण होताहै यह कैयटादिका मत है । अनिट्कारिकाके न्यास-ग्रन्थमें दोनोंका ही ग्रहण होताहै ऐसा जो कहतेहैं वह स्वोक्त ग्रन्थान्तरोंके विरुद्ध होनेसे उपेक्षणीय है । पुप्रोष । पुप्लोष ॥

पृषु, वृषु और मृषु धातु सेचनार्थमें हैं । मृषु धातु सह-नार्थमें भी है । अन्य दो हिंसा और संक्लेशनार्थक भी हैं । पर्षति । पपर्ष । पृष्यात् ॥ घृषु धातु संघर्षमें है ॥ हृषु धातु अलीकार्थमें है ।

तुस, ह्रस ह्लस और रस धातु शब्द करनेमें हैं । तुतोस । जह्रास । जह्लास । ररास ॥ लस धातु श्लेषण और क्रीडामें है ॥

घस्लृ धातु भक्षणार्थमें है । लिट् परे अद् धातुके स्थानमें विकल्प करके घस् आदेश होने (२४२४) के कारण यह धातु सार्वत्रिक नहीं है, इस कारण जिस स्थानमें लिङ्ग वा वचन है, उस स्थानमें ही इसका प्रयोग होगा, इस स्थल (भ्वादि) में पाठके कारण परस्मैपदमें च्लिविषय रहते लृकार इत्संज्ञक होनेके कारण और अङ्विषयमें, अनिट्कारिकाके मध्यमें पाठके कारण वलादि आर्धधातुक विषयमें इसके प्रयोग होंगे । क्मरच् प्रत्यय परे रहते इसका विशेष रूपसे उपादान होगा । घसति । घस्ता ॥

२३४२ सः स्यार्धधातुके । ७ ।४।४९॥

सस्य तः स्यात्सादावार्धधातुके । घत्स्यति । घसतु।अघसत् । घसेत् । लिंगाद्यभावादाशिष्यप्रयोगः ॥

२३४२–सकारादि आर्धधातुक प्रत्यय परे रहते धातुके सकारके स्थानमें तकार हो, जैसे–घत्स्यति । घसतु । अघसत् । घसेत् । लिङ्गादिके अभावके कारण आशीर्वादार्थमें इसका प्रयोग नहीं होगा ॥

२३४३ पुषादिद्युताद्युदितः परस्मैपदेषु । ३ । १ । ५५ ॥

श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् ॥ ६४ ॥ जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु ॥ ६७ ॥ पिसृ पेसृ गतौ । पिपिसतुः । पिपेसतुः ॥६९ ॥ हसे हसने । एदित्त्वान्न वृद्धिः । अहसीत् ॥७०॥ णिश समाधौ । तालव्योष्मान्तः । प्रणेशति ॥ ॥ ७१ ॥ मिश मश शब्दे रोषकृते च । तालव्योष्मान्तौ ॥ ७३ ॥ शव गतौ ॥ दन्त्योष्ठ्यान्तस्तालव्योष्मादिः । शवति ॥ अशावीत्–अशवीत् ॥७४॥ शश प्लुतगतौ । तालव्योष्माद्यन्तः । शशाश । शेशतुः । शेशुः । शेशिथ । ॥ ७५ ॥ शसु हिंसायाम् । दन्त्योष्मान्तः । न शसददेत्येत्त्वं न । शशसतुः । शशसुः । शशसिथ ॥ ७६ ॥ शंसु स्तुतौ । अयं दुर्गतावपीति दुर्गः। नृशंसो घातुकः क्रूर इत्यमरः । शशंस । आशिषि नलोपः । शस्यात् ॥७७॥ चह परिकल्कने । परिकल्कनं शाठ्यम् । अचहीत् ॥ ७८ ॥ मह पूजायाम् । अमहीत् ॥ ७९ ॥ रह त्यागे॥८०॥ रहि गतौ । रंहति । रंह्यात् ॥८१॥दृह दृहि बृह बृहि वृद्धौ । दर्हति ।ददर्ह।ददृहतुः । दृंहति।बर्हति । बृंहति।बृहि शब्दे च।बृंहितं करिगर्जितम्। ॥८५॥ बृहिर् इत्येके । अबृहत्–अबर्हीत् ॥८६॥ तुहिर् दुहिर् उहिर् अर्दने । तोहति । तुतोह । अतुहत्–अतोहीत् । दोहति । अदुहत्–अदोहीत् । अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति । ओहति । उवोह । ऊहतुः । ओहिता । मा भवानुहत् । औहीत् ॥८९॥ अर्ह पूजायाम् । आनर्ह ॥ ९० ॥ अथ कृपूपर्यन्ता अनुदात्तेतः ॥ द्युत दीप्तौ । द्योतते ॥

२३४३–परस्मैपदमें श्यन् विकरण हो जिनसे ऐसे जो पुषादि धातु, द्युतादि धातु और लृकारइत् धातु उनके उत्तर च्लिके स्थानमें अङ् आदेश हो । अघसत् ॥ जर्ज, चर्च और झर्झ धातु परिभाषण, हिंसा और तर्जनार्थमें हैं॥पिस और पेस धातु गतिमें हैं । पिपिसतुः । पिपेसतुः ॥ हसे धातु हास्य करनेमें है । एकारइत्के कारण वृद्धि न होगी–अहसीत् ॥ णिश धातु समाधि अर्थमें है । यह तालव्य ऊष्मवर्णान्त है । प्रणेशति ॥ मिश और मश धातु शब्द और रोष करनेमें हैं । यह दो धातु तालव्य ऊष्मवर्णान्त हैं ॥ शव धातु गति अर्थमें है । यह धातु दन्त्योष्ठ्यान्त और तालव्य ऊष्मादि हैं । शवति। अशावीत–अशवीत् ॥ शश धातु प्लुतगतिमें है । यह तालव्य ऊष्माद्यन्त है । शशाश । शेशतुः । शेशुः । शेशिथ ।

शसु धातु हिंसार्थमें है । यह धातु दन्त्योष्मान्त है, " न शसदद० २२६३ " इस सूत्रसे एत्वका निषेध होगा–शश-

सतुः । शशसुः । शशंसिथ ॥ शंसु धातु स्तुतिमें है । यह धातु दुर्गतार्थमें भी जानना । नृशंस, घातुक, क्रूर–इत्यादि शब्द अमरकोशमें एकपर्यायमें लिखेहैं । शशंस । आशीर्थमें नकारका लोप होगा । शस्यात्॥ चह धातु परिकल्कन अर्थात् शठतामें है । अचहीत् ॥ मह धातु पूजार्थमें है । अमहीत् ॥रह धातु त्याग करनेमें है ॥ रहि धातु गति अर्थमें है । रंहति । रंह्यात् ॥ दृह, दृहि, बृह और बृहि धातु वृद्धिमें हैं । दर्हति । ददर्ह । ददृहतुः । दृंहति । बर्हति । बृंहति । बृहि धातु शब्द करनेमें भी है । बृंहित शब्दसे हाथीकी गर्जना जाननी । कोई उसको बृहिर् धातु कहतेहैं । अबृहत्, अबर्हीत् ।

तुहिर्, दुहिर् और उहिर् धातु अर्दन करनेमें हैं । तोहति । तुतोह । अतुहत्, अतोहीत् । दोहति । अदुहत्, अदोहीत् । अनिट्कारिकामें इस दुह धातुका ग्रहण नहीं है । ओहति । उवोह । ऊहतुः । ओहिता । मा भवानूहत् । औहीत् ॥ अर्ह धातु पूजार्थमें है । आनर्ह ।

अब कृप् धातु पर्य्यन्त अनुदात्तेत् कहतेहैं–।

द्युत धातु दीप्तिमें है । द्योतते ॥

२३४४ द्युतिस्वाप्योः संप्रसारणम् । ७ । ४ । ६७ ॥

अनयोरभ्यासस्य संप्रसारणं स्यात् । दिद्युते । दिद्युताते । द्योतिता ॥

२३४४–द्युति और स्वप धातुके अभ्यासको संप्रसारण हो। दिद्युते । दिद्युताते । द्योतिता ॥

२३४५ द्युद्भ्यो लुङि । १ । ३ । ९१ ॥

द्युतादिभ्यो लुङः परस्मैपदं वा स्यात् । पुषादिसूत्रेण परस्मैपदेऽङ् । अद्युतत्–अद्योतिष्ट ॥ १ ॥ श्विता वर्णे । श्वेतते । शिश्विते । अश्वितत् । अश्वेतिष्ट ॥२॥ ञिमिदा स्नेहने । मेदते ॥

२३४५–द्युतादि धातुके उत्तर लुङ्का परस्मैपद विकल्प करके हो "पुषादि०" इस सूत्रसे परस्मैपदमें अङ् होगा– अद्युतत् । अद्योतिष्ट ॥ श्विता धातु वर्णमें है । श्वेतते । शिश्विते । अश्वितत् । अश्वेतिष्ट ॥ ञिमिदा धातु स्नेह करनेमें है । मेदते ॥

२३४६ मिदेर्गुणः । ७ । ३ । ८२ ॥

मिदेरिको गुणः स्यादित्संज्ञकशकारादौ । एश आदिशित्त्वाभावान्नानेन गुणः । मिमिदे । अमिदत् । अमेदिष्ट ॥ ३ ॥ ञिष्विदा स्नेहनमोचनयोः । मोहनयोरित्येके । स्वेदते । सिष्विदे । अस्विदत् । अस्वेदिष्ट ॥४॥ ञिक्ष्विदा चेत्येके । अक्ष्विदत् । अक्ष्वेदिष्ट ॥ ५ ॥ रुच दीप्तावभिप्रीतौ च । रोचते सूर्यः । हरये रोचते भक्तिः । अरुचत् । अरोचिष्ट ॥ ६ ॥ घुट परिवर्तने । घोटते । जुघुटे । अघुटत् । अघोटिष्ट ॥ ७ ॥ रुट लुट लुठ प्रतिघाते । अरुटत् । अरोटिष्ट ॥१०॥ शुभ दीप्तौ ॥ ११ ॥ क्षुभ सञ्चलने ॥ १२ ॥ णभ तुभ हिंसायाम् । आद्योऽभावेऽपि । नभन्तामन्यके समे । मा भूवन्नन्यके सर्वे इति निरुक्तम् । अनभत् । अनभिष्ट । अतुभत् । अतोभिष्ट । इमौ दिवादौ क्र्यादौ च ॥ १४ ॥ स्रंसु ध्वंसु भ्रंसु अवस्रंसने । ध्वंसु गतौ च । अङि नलोपः । अस्रसत् । अस्रंसिष्ट । नास्रसत्करिणां ग्रैवमिति रघुकाव्ये । भ्रशु इत्यपि केचित्पेठुः । अत्र तृतीय एव तालव्यान्त इत्यन्ये । भ्रशु भ्रंशु अधःपतन इति दिवादौ ॥१९॥ स्रम्भु विश्वासे । अस्रभत् । अस्रम्भिष्ट । दन्त्यादिरयम् । तालव्यादिस्तु प्रमादे गतः ॥२०॥ वृतु वर्तने । वर्तते । ववृते॥

२३४६–इत्संज्ञक सकारादि प्रत्यय परे रहते मिद् धातुके इकारको गुण हो । जिस स्थानमें नकारके तक स्थानमें एश् आदेश होगा, उस स्थानमें आदिशित्त्वाभावके कारण इस सूत्रसे गुण नहीं होगा । मिमिदे । अमिदत् । अमेदिष्ट ॥ ञिष्विदा धातु स्नेह और मोचनार्थमें है । किसीके मतमें मोहनार्थमें भी है । स्वेदते । सिष्विदे । अस्विदत् । अस्वेदिष्ट ॥ किसीके मतमें ञिक्ष्विदा धातु भी उक्तार्थक है । अक्ष्विदत् । अक्ष्वेदिष्ट ॥ रुच धातु दीप्ति और अभिप्रीतिमें है । रोचते सूर्यः । हरये रोचते भक्तिः । अरुचत् । अरोचिष्ट ।

घुट धातु परिवर्तनमें है । घोटते । जुघुटे । अघुटत् । अघोटिष्ट । रुट, लुट और लुठ धातु प्रतिघातार्थमें है । अरुटत् । अरोटिष्ट ॥

शुभ धातु दीप्तिमें है ॥ क्षुभ धातु संचलनार्थमें है । णभ और तुभ हिंसार्थमें हैं । "नभन्तामन्यके समे" "मा भूवन्नन्यके सर्वे" इस निरुक्तके अनुसार पहलेका अभावार्थ भी है । अनभत् । अनभिष्ट । अतुभत् । अतोभिष्ट । यह दो धातु दिवादि और क्र्यादिगणी हैं ॥

स्रंसु, ध्वंसु और भ्रंसु धातु अवस्रंसनार्थमें हैं ॥ ध्वंस धातुका गति अर्थ भी जानना । अङ् परे रहते धातुके नकारका लोप होगा–अस्रसत् । अस्रंसिष्ट "नास्रसत् करिणां ग्रैवम्" ऐसा रघुवंशमें प्रयोग है । अस्रंसिष्ट । कोई २ भ्रंशु धातुका भी यही अर्थ कहतेहैं, इनमेंसे तीसरा धातु ही तालव्यशकारान्त है, यह किसी पंडितका मत है । दिवादि गणमें अधः पतनार्थमें भ्रशु और भ्रंशु धातु लिखी हैं॥स्रम्भु धातु विश्वास करनेमें है । अस्रभत् । अस्रम्भिष्ट । यह धातु दन्त्यादि हैं, कोई २ तालव्यादि भी कहते हैं, परन्तु यह उनका प्रमाद है ।

वृतु धातु वर्त्तनार्थमें है । वर्त्तते । ववृते ॥

२३४७ वृद्भ्यः स्यसनोः । १ । ३ । ९२ ॥

वृतादिभ्यः परस्मैपदं वा स्यात्स्ये सनि च ॥

२३४७–स्य और सन् प्रत्यय परे रहते वृतादि धातुओंके उत्तर विकल्प करके परस्मैपद हो ।

२३४८ न वृद्भ्यश्चतुर्भ्यः । ७ । २।५९॥

एभ्यः सकारादेरार्धधातुकस्येण्न स्यात्तङानयोरभावे । वर्त्स्यति–वर्तिष्यते । अवृतत् । अवर्तिष्ट । अवर्त्स्यत्–अवर्तिष्यत् ॥ २१ ॥ वृधु वृद्धौ । शृधु शब्दकुत्सायाम् । इमौ वृतिवत्॥२३॥ स्यन्दू प्रस्रवणे । स्यन्दते । सस्यन्दे । सस्यन्दिषे–सस्यन्त्से । सस्यन्दिध्वे–सस्यन्ध्वे । स्यन्दिता–स्यन्ता । वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदिल्लक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्न वृद्भ्य इति निषेधः। स्यन्त्स्यति–स्यन्दिष्यते–स्यन्त्स्यते । स्यन्दिषीष्ट–स्यन्त्सीष्ट । द्युद्भ्यो लुङीति परस्मैपदपक्षे अङ् । नलोपः । अस्यदत् । अस्यन्दिष्ट–अस्यन्त । अस्यन्त्साताम् । अस्यन्त्सत । अस्यन्त्स्यत् । अस्यन्दिष्यत–अस्यन्त्स्यत ॥

२३४८–तङ् और आन(शानच्, कानच्)के अभाव होनेपर वृतादि चार धातुओंके उत्तर सकारादि आर्धधातुक प्रत्ययको इट् न हो, जैसे–वर्त्स्यति । वर्तिष्यते । अवृतत् । अवर्तिष्ट । अवर्त्स्यत्, अवर्तिष्यत् ॥ वृधु धातु वृद्धि अर्थमें है । शृधु धातु शब्द और कुत्सार्थमें है । इन दोनों धातुओंके वृतु धातुके समान रूप होंगे । स्यन्दू धातु प्रस्रवणमें है । स्यन्दते। सस्यन्दे । सस्यन्दिषे, सस्यन्त्से । सस्यन्दिध्वे, सस्यन्ध्वे । स्यन्दिता, स्यन्ता ।

"वृद्भ्यः स्यसनोः २३४७ " इस सूत्रसे परस्मैपद करनेपर ऊदिल्लक्षण अन्तरङ्ग भी विकल्पको बाधकर चतुर्ग्रहण सामर्थ्यके कारण " न वृद्भ्यः २३४८ " इस सूत्रसे इट् निषेध होगा–स्यन्त्स्यति , स्यन्दिष्यते, स्यन्त्स्यते । स्यन्दिषीष्ट, स्यन्त्सीष्ट । " द्युद्भ्यो लुङि२३४५" इस सूत्रसे परस्मैपद पक्षमें अङ् और नकारका लोप होकर–अस्यदत् । अस्यन्दिष्ट, अस्यन्त । अस्यन्त्साताम् । अस्यन्त्सत । अस्यन्त्स्यत् । अस्यन्दिष्यत, अस्यन्त्स्यत ॥

२३४९ अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु । ८ । ३ । ७२ ॥

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्।अनुष्यन्दते–अनुस्यन्दते वा जलम्। अप्राणिषु किम्।अनुस्यन्दते हस्ती। अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यन्दते इत्यत्रापि पक्षे षत्वं भवत्येव प्राणिषु नेत्युक्तौ तु न स्यात्॥ ॥ २४ ॥ कृपू सामर्थ्ये ॥

२३४९–अनु, वि, परि, अभि और निपूर्वक अप्राणि कर्तृक स्यन्द धातुके सकारके स्थानमें विकल्प करके षकार हो, अनुष्यन्दते, अनुस्यन्दते वा जलम् । प्राणिकर्तृकमें अनुस्यन्दते हस्ती ।

'अप्राणिषु' इस पर्युदासके कारण 'मत्स्योदके अनुष्यन्दते' इस स्थलमें भी विकल्प करके षत्व होताही है, प्राणिकर्तृकमें नहीं हो, ऐसा कहते तो इस स्थानमें षत्व नहीं होता ॥ कृपू धातु सामर्थ्यार्थमें है ॥

२३५० कृपो रो लः । ८ । २ । १८॥

कृप उः इति च्छेदः । कृपेति लुप्तषष्ठीकम् । तच्चावर्तते । कृपो यो रेफस्तस्य लः स्यात् । कृपेर्ऋकारस्यावयवो यो रः रेफसदृशस्तस्य च लकारसदृशः स्यात् । कल्पते । चक्लृपे । चक्लृपिषे–चक्लृप्से इत्यादि स्यन्दिवत् ॥

२३५०–'कृप–उः' ऐसा पदच्छेद है 'कृप' यह लुप्तषष्ठ्यन्त है, उसकी आवृत्ति है, तब कृप धातुके रकारके स्थानमें लकार हो और कृप धातुके ऋकारका अवयव जो रेफ सदृश रकार उसको लकारसदृश आदेश हो, जैसे–कल्पते । चक्लृपे । चक्लृपिषे, चक्लृप्से, इत्यादि स्यन्दि धातुकी समान होंगे ॥

२३५१ लुटि च क्लृपः । १ । ३।९३॥

लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात्॥

२३५१–लुट् लकार और स्य तथा सन् परे रहते कृप धातुके उत्तर विकल्प करके परस्मैपद हो ॥

२३५२ तासि च क्लृपः । ७ ।२।६०॥

क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्तङानयोरभावे । कल्प्तासि । कल्प्तास्थः । कल्पितासे–कल्प्तासे । कल्प्स्यति । कल्पिष्यते–कल्प्स्यते । कल्पिषीष्ट–क्लृप्सीष्ट । अक्लृपत् । अकल्पिष्ट–अक्लृप्त । अकल्प्स्यत् । अकल्पिष्यत–अकल्प्स्यत ॥ वृत् ॥ वृत्तः सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः ॥ २५ ॥

अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः षितश्च । घट चेष्टायाम् । घटते । जघटे । घटादयो मित इति वक्ष्यमाणेन मित्संज्ञा । तत्फलं तु णौ मितां ह्रस्व इति चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति च वक्ष्यते । घटयति । विघटयति । कथं तर्हि कमलवनोद्घाटनं कुर्वते ये, प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिवेत्यादि । शृणु । घट सङ्घात इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्।नान्ये मितोऽहेताविति निषेधात् । अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः। ॥ १ ॥ व्यथ भयसञ्चलनयोः । व्यथते ॥

२३५२–तङ् और आन (शानच्, कानच्) इन दोके अभाव रहते कृप धातुके परे स्थित तासि और सकारादि आर्धधातुक प्रत्ययको इट् न हो– कल्प्तासि । कल्प्तास्थः । कल्पितासे, कल्प्तासे । कल्प्स्यति । कल्पिष्यते, कल्प्स्यते । कल्पिषीष्ट, क्लृप्सीष्ट । अक्लृपत् । अकल्पिष्ट । अकल्प्स्यत् । अकल्पिष्यत, अकल्प्स्यत । वृतादि और द्युतादि धातु सम्पूर्ण हुए ॥

अब त्वर धातु पर्यन्त १३ अनुदात्तेत् और षित् धातु कहे जातेहैं । घट धातु चेष्टामें है । घटते । जघटे ।

"घटादयो मितः" इस वक्ष्यमाण सूत्रसे मित् संज्ञा हुई, मित् संज्ञाका फल तो "मितां ह्रस्वः" इससे ह्रस्व और "चिण्णमुलोर्दीर्घोऽन्यतरस्याम् २३६२" इस वक्ष्यमाण सूत्रसे चिण् और णमुल् प्रत्यय परे रहते धातुको विकल्प करके दीर्घ कहेंगे–घटयति । विघटयति ।

मितां ह्रस्वः इसको जागरूक रहते जो कहो "कमलवनोद्घाटनं कुर्वते ये" "प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव" इत्यादि स्थलमें दीर्घप्रयोग कैसे हुआ ? तो सुनो "घट संघाते" यह चुरादिगणीय घट धातुका प्रयोग है, यदि कहो कि, संघातार्थक चुरादिगणीय घट धातुके ही अर्थ विशेषमें, अर्थात् चेष्टार्थमें मित् संज्ञा होनेके निमित्त ऐसा अनुवाद है, सो भी "नान्ये मितोऽहेतौ" इस सूत्रसे मित् संज्ञाके निषेधके कारण नहीं कहसकते हो । अहेतु अर्थात् स्वार्थमें विहित णिच् परे रहते ज्ञपादि पांच धातु भिन्न चुरादि गणीय धातुकी मित्संज्ञा न हो ॥ व्यथ धातु भय और संचलनार्थमें है । व्यथते ॥

२३५३ व्यथो लिटि । ७ । ४ । ६८ ॥

व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि । हलादिःशेषापवादः । थस्य हलादिःशेषेण निवृत्तिः । विव्यथे ॥ २ ॥ प्रथ प्रख्याने । पप्रथे ॥ ३ ॥ प्रस विस्तारे । पप्रसे ॥ ४ ॥ म्रद मर्दने ॥ ५ ॥ स्खद स्खदने । स्खदनं विद्रावणम् ॥ ६ ॥ क्षजि गतिदानयोः । मित्त्वसामर्थ्यादनुपधात्वेपि चिण्णमुलोरिति दीर्घविकल्पः । अक्षाञ्जि-अक्षञ्जि । क्षाञ्जंक्षाञ्जम्–क्षञ्जंक्षञ्जम् ॥ ७ ॥ दक्ष गतिहिंसनयोः। योऽयं वृद्धिशैघ्ययोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषे मित्त्वार्थोनुवादः ॥ ८ ॥ क्रप कृपायां गतौ ॥ ९ ॥ कदि क्रदि क्लदि वैक्लव्ये । वैकल्य इत्येके । त्रयोप्यनिदित इति नन्दी । इदित इति स्वामी । कदिक्रदी इदितौ, क्लदेति चानिदिताविति मैत्रेयः । कदिक्रदिक्लदी नामाह्वानरोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च ॥ १२ ॥ ञित्वरा संभ्रमे ॥ १३ ॥ घटादयः षितः । षित्त्वादङ् कृत्सु वक्ष्यते ॥

२३५३–लिट् परे रहते व्यथ धातुके अभ्यासको संप्रसारण हो, यह सूत्र हलादिःशेषका अपवाद है । "हलादिःशेषः" इस सूत्रसे थकारकी निवृत्ति हुई–विव्यथे ॥ प्रथ धातु प्रख्यानार्थमें है । पप्रथे ॥ प्रस धातु विस्तारमें है । पप्रसे ॥ म्रद धातु मर्दनार्थमें है ॥ स्खद धातु स्खदन, अर्थात् विद्रावणार्थमें है ॥ क्षजि धातु गति और दानार्थमें है ।

मित्त्वसामर्थ्यके कारण अनुपधाभूत अच् होनेपर भी "चिण्णमुलोः २७६२" इस सूत्रसे विकल्प करके दीर्घ होकर–अक्षाञ्जि, अक्षञ्जि । क्षाञ्जंक्षाञ्जम्, क्षञ्जंक्षञ्जम् ॥

दक्ष धातु गति और हिंसार्थमें है । जो दक्ष धातु वृद्धि और शैघ्र्यार्थमें आत्मनेपदीमें पढा है, उसका ही अर्थविशेषमें, अर्थात् गति और हिंसार्थमें मित्संज्ञाके निमित्त इस स्थलमें अनुवाद कियाहै ॥

क्रप धातु कृपा और गति अर्थमें है ॥ कदि, क्रदि और क्लदि धातु वैक्लव्य और किसी२के मतसे वैकल्य अर्थमें है । नन्दीके मतसे यह तीनों धातु अनिदित् हैं । स्वामीके मतसे इदित् हैं ॥ मैत्रेयके मतसे कदि और क्रदि धातु इदित्, और "क्रद, क्लद" दो धातु अनिदित् हैं । आह्वान और रोदनार्थमें परस्मैपदी धातुके मध्यमें उक्त कदि, क्रदि और क्लदि धातुका इस स्थलमें पाठ मित्त्वार्थ और आत्मनेपदार्थ जानना ॥ ञित्वरा धातु सम्भ्रमार्थमें है ॥

घटादि धातु षित् हैं । षित्त्वके कारण अङ् प्रत्यय कृदन्तमें कहेंगे ॥

अथ फणान्ताः परस्मैपदिनः ॥ ज्वर रोगे । ज्वरति । जज्वार ॥ १ ॥ गड सेचने । गडति । जगाड ॥ २ ॥ हेड वेष्टने । हेडृ अनादर इत्यात्मनेपदिषु गतः स एवोत्सृष्टानुबन्धोनूद्यते अर्थविशेषे मित्त्वार्थम् । परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येऽनुवादसामर्थ्यात्परस्मैपदम् । हेडति । जिहेड । हिडयति । अहीडि–अहिडि । अनादरे तु हेडयति ॥ ३ ॥ वट भट परिभाषणे । वट वेष्टने भट भृताविति पठितयोः परिभाषणे मित्त्वार्थोनुवादः ॥ ५ ॥ नट नृत्तौ । इत्थमेव पूर्वमपि पठितं तत्रायं विवेकः । पूर्वं पठितस्य नाट्यमर्थः । यत्कारिषु नटव्यपदेशः । वाक्यार्थाभिनयो नाट्यम् । घटादौ तु नृत्तं नृत्यं चार्थः । यत्कारिषु नर्तकव्यपदेशः । पदार्थाभिनयो नृत्यम् । गात्रविक्षेपमात्रं नृत्तम् । केचित्तु घटादौ नट नताविति पठन्ति । गतावित्यन्ये । णोपदेशपर्युदासवाक्ये भाष्यकृता नाटीतिदीर्घपाठाद् घटादिर्णोपदेश एव ॥ ६ ॥ ष्टक प्रतिघाते । स्तकति ॥ ७ ॥ चक तृप्तौ । तृप्तिप्रतिघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थो-

नुवादः । आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम् ॥ ८ ॥ कखे हसने । एदित्वान्न वृद्धिः । अकखीत् ॥ ९ ॥ रगे शंकायाम् ॥ १० ॥ लगे सङ्गे ॥ ११ ॥ हगे ह्लगे षगे ष्टगे संवरणे॥१५॥ कगे नोच्यते । अस्यायमर्थ इति विशिष्य नोच्यते क्रियासामान्यार्थत्वात् । अनेकार्थत्वादित्यन्ये ॥ १६ ॥ अक अग कुटिलायां गतौ ॥ १८ ॥ कण रण गतौ । चकाण । रराण ॥ २० ॥ चण शण श्रण दाने च । शण गतावित्यन्ये ॥ २३ ॥

अत्र फण धातु पर्यन्त परस्मैपदी धातु कहतेहैं ।

ज्वर धातु रोगार्थमें है, ज्वरति । जज्वार॥ गड धातु सेचनार्थमें है । गडति । जगाड ॥

हेड धातु वेष्टनार्थमें है ॥ हेडृ धातु अनादरार्थमें आत्मनेपदी पूर्वमें कह आयेहैं, वही अनुबंधवर्जित अर्थविशेषमें मित्संज्ञार्थ अनूदित हुआहै । परस्मैपदी ज्वरादि धातुओंके पूर्वमें ही अनुवाद कर्तव्य होनेपर उसके मध्यमें अनुवादसामर्थ्यके कारण परस्मैपद होगा, हेडति । जिहेड । हिडयति । अहीडि, अहिडि । अनादरार्थमें तो ' हेडयति ' ऐसा होगा ॥

वट और भट धातु परिभाषणार्थमें हैं । वट धातु वेष्टनार्थमें और भट धातु भरणार्थमें पहले पठित हैं उनका परिभाषणार्थमें मित्त्वार्थ यहां अनुवाद है ॥

नट धातु नृत्यमें है । ऐसा ही पूर्वमें पढा है, वहां यह जानना चाहिये कि, पूर्व पठित धातुका अर्थ नाट्य है, जिसके करनेवालेको ' नट ' कहतेहैं । वाक्यार्थके अभिनयको नाट्य कहतेहैं । घटादिमें तो नट धातुका नृत्त और नृत्य अर्थ है, जिसको करनेवालेमें नर्त्तकव्यवहार होताहै । पदार्थाभिनयको नृत्य कहतेहैं । गात्रविक्षेपमात्रको नृत्त कहतेहैं । कोई तो घटादिमें नट धातुका नति अर्थ करतेहैं । कोई उसका गत्यर्थ कहतेहैं । णोपदेशपर्युदास वाक्यमें भाष्यकृतसे ' नाटि ' ऐसा दीर्घ पाठ करनेके कारण घटादि गणीय नट धातु णोपदेश ही है ॥

ष्टक धातु प्रतिघातमें है । स्तकति ॥

चक धातु तृप्तिमें है । तृप्ति और प्रतिघातार्थमें पूर्वमें पठित इस धातुका तृप्तिमात्रमें जो अनुवाद,वह मित्संज्ञार्थ जानना। आत्मनेपदी धातुके मध्यमें पठित धातुके परस्मैपदमें अनुवादके कारण परस्मैपद होगा ॥ कखे धातु हसन अर्थमें है । एकार इत् होनेके कारण वृद्धि न होकर--अकखीत् ॥ रगे धातु शंकार्थमें है ॥ लगे धातु सङ्ग अर्थमें है ॥

हगे, ह्लगे, षगे और ष्टगे धातु संवरणार्थमें हैं ॥ क्रियासामान्यार्थत्व और किसीके मतसे अनेकार्थत्वके कारण कगे धातु विशेष करके नहीं कहाजाताहै ॥ अक और अग धातु कुटिल गतिमें हैं ॥ कण और रण धातु गातम हैं । चकाण । रराण ॥ चण, शण और श्रण धातु दानार्थमें हैं । कोई २ कहतेहैं कि, शण धातु गतिमें है ॥

श्रथ श्लथ क्नथ क्रथ हिंसार्थाः । जासिनिप्रहणेतिसूत्रे क्राथेति मित्त्वेपि वृद्धिर्निपात्यते । क्राथयति । मित्त्वं तु निपातनात्परत्वाच्चिण्णमुलोरिति दीर्घे चरितार्थम् । अक्राथि-अक्रथि । क्राथंक्राथम्, क्रथंक्रथम् ॥ २७ ॥ वन च । हिंसायामिति शेषः ॥ २८ ॥ वनु च नोच्यते । वनु इत्यपूर्व एवायं धातुर्न तु तानादिकस्यानुवादः । उदित्करणसामर्थ्यात् । तेन क्रियासामान्ये वनतीत्यादि । प्रवनयति । अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते ॥ २९ ॥ ज्वल दीप्तौ । णप्रत्ययार्थं पठिष्यमाण एवायं मित्त्वार्थमनूद्यत । प्रज्वलयति ॥ ३० ॥ ह्वल ह्मल चलने । प्रह्वलयति । प्रह्मलयति ॥ ३२ ॥ स्मृ आध्याने । चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवादः । आध्यानमुत्कण्ठापूर्वकं स्मरणम् ॥ ३३ ॥ दॄ भये, दॄ विदारणे इति क्र्यादेरयं मित्त्वार्थोऽनुवादः । दृणन्तं प्रेरयति दरयति । भयादन्यत्र दारयति । धात्वन्तरमेवेदमिति मते तु दरतीत्यादि । केचिद्घटादौ अस्मृदॄत्वरेति सूत्रे च दृ इति दीर्घस्थाने ह्रस्वं पठन्ति, तन्नेति माधवः ॥ ३४ ॥ नॄ नये । क्र्यादिषु पठिष्यमाणस्यानुवादः । नयादन्यत्र नारयति ॥ ३५ ॥ श्रा पाके, श्रै इति कृतात्वस्य श्रा इत्यदादिकस्य च सामान्येनानुकरणम्, लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषाभ्याम् । श्रपयति विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति । स्वेदयतीत्यर्थः ॥ ३६॥

श्रथ, श्लथ, क्नथ और क्रथ धातु हिंसार्थमें हैं । "जासिनिप्रहण० ६१७" इस सूत्रमें 'क्राथ' ऐसे निपातनके कारण मित्संज्ञा होनेपर भी वृद्धि होकर क्राथयति। मित्त्व तो निपातनसे परत्वके कारण "चिण्णमुलोः" इस सूत्रसे दीर्घविषयमें चरितार्थ होगा । अक्राथि, अक्रथि । क्राथम् क्राथंक्रथंक्रथम् ॥

वन धातु हिंसामें है । वनु ऐसा धातु नहीं कहतेहैं, कारण कि, वनु धातु अपूर्व है, उदित्करणसामर्थ्यके कारण तनादि धातुका अनुवाद नहीं है । इसलिये क्रियासामान्यमें 'वनति' इत्यादि पद होंगे । प्रवनयति । अनुपसृष्ट वनु धातुको तो मित्त्व विकल्प करके कहेंगे ॥

ज्वल धातु दीप्तिमें है । णप्रत्ययार्थ पठिष्यमाण यह धातु मित्त्वार्थ अनूदित है, प्रज्वलयति॥ ह्वल, ह्मल चलनार्थमें हैं । प्रह्वलयति । प्रह्मलयति ॥

स्मृ धातु आध्यानार्थमें है । चिन्तार्थमें पठिष्यमाण इस धातुका आध्यानार्थमें अनुवाद मित्संज्ञार्थ है । आध्यान शब्दसे

उत्कंठापूर्वक स्मरण जानना ॥ दॄ धातु भय अर्थमें है, 'दॄ विदारणे' इस क्र्यादिगणीय धातुका यहां मित्संज्ञार्थ अनुवाद है । दृणन्तं प्रेरयति=दरयति । भयभिन्नार्थमें दारयति । यह धात्वन्तर ही है इस मतमें 'दराति' इत्यादि पद होंगे । किसी २ ने घटादिमें और "अत्स्मृ दॄ त्वर २५६६" इस सूत्रमें दॄ ऐसे दीर्घके स्थानमें ह्रस्व पाठ कियाहै, परन्तु माधवके मतसे वह ठीक नहीं है ॥

नॄ-धातु नयार्थमें है, यह क्र्यादिके मध्यमें पठिष्यमाणका अनुवाद है । नयभिन्नार्थमें नारयति ॥

श्रा धातु पाक करनेमें है, "लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य" १, "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्" २, अर्थात् लुग्विकरण और अलुग्विकरणके ग्रहणमें जहां संदेह हो वहां अलुग्विकरणका ही ग्रहण हो, जो सूत्रसे कार्य होकर बना हो वह लाक्षणिक और जो स्वाभाविक है, वह प्रतिपदोक्त होताहै, उन लाक्षणिक और प्रतिपदोक्तके बीचमें जहां संदेह पडे वहां प्रतिपदोक्तकाही ग्रहण हो लाक्षणिकका नहीं। इन दो परिभाषाबलसे श्रै धातुके ऐकारके स्थानमें आकार करके जो श्रा धातु हुआ है, उसका और अदादिगणीय श्रा धातुका इस स्थानमें सामान्यसे अनुकरण कियाहै । श्रपयति, अर्थात् विक्लेदन करताहै । पाकभिन्नार्थमें श्रापयति, अर्थात् घर्म (पसीना) करताहै ॥

मारणतोषणनिशामनेषु ज्ञा । निशामनं चाक्षुषज्ञानमिति माधवः । ज्ञापनमात्रमित्यन्ये । निशानेष्विति पाठान्तरम् । निशानं तीक्ष्णीकरणम् । एष्वेवार्थेषु जानातिर्मित् । ज्ञप मिच्चेति चुरादौ ज्ञापनं मारणादिकं च तस्यार्थः । कथं विज्ञापना भर्तृषु सिद्धिमेतीति तज्ज्ञापयत्याचार्य इति च । शृणु । माधवमतेऽचाक्षुषज्ञाने मित्त्वाभावात् । ज्ञापनमात्रे मित्त्वमिति मते तु ज्ञा नियोग इति चौरादिकस्य। धातूनामनेकार्थत्वात्। निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः ॥ ३७ ॥ कम्पने चलिः । चल कम्पने इति ज्वलादिः । चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति अन्यथा करोतीत्यर्थः । हरतीत्यर्थ इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः ॥ ३८ ॥ छदिरूर्जने । छद अपवारण इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वार्थोयमनुवादः । अनेकार्थत्वादूर्जेऽर्थे वृत्तिः । छदन्तं प्रयुंक्ते छदयति । बलवन्तं प्राणवन्तं वा करोतीत्यर्थः । अन्यत्र छादयति । अपवारयन्तं प्रयुंक्ते इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति । प्राणीभवति । अपवारयति वेत्यर्थः ॥ ३९॥ जिह्वोन्मथने लडिः । लड विलास इति पठितस्य मित्त्वार्थोनुवादः । उन्मथनं ज्ञापनम् । जिह्वाशब्देन षष्ठीतत्पुरुषः । लडयति जिह्वाम्।तृतीयातत्पुरुषो वा। लडयति जिह्वया । अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते । समाहारद्वन्द्वोयम् । लडयति शत्रुम् । लडयति दधि । अन्यत्र लाडयति पुत्रम् ॥४०॥ मदी हर्षग्लेपनयोः । ग्लेपनं दैन्यम् । दैवादिकस्य मित्त्वार्थोयमनुवादः । मदयति । हर्षयति। ग्लेपयति वेत्यर्थः । अन्यत्र मादयति । चित्तविकारमुत्पादयतीत्यर्थः ॥ ४१ ॥ ध्वन शब्दे । भाव्ययं मित्त्वार्थमनूद्यते । ध्वनयति घण्टाम् । अन्यत्र ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः ॥ ४२ ॥ अत्र भोजः; दलि-वलि-स्खलि-रणि-ध्वनि-त्रपि-क्षपयश्चेति पपाठ । तत्र ध्वनिरणी उदाहृतौ । दल विशरणे । वल संवरणे।स्खल सञ्चलने।त्रपूष् लज्जायामिति। गताः। तेषां णौ दलयति। वलयति । स्खलयति त्रपयति । क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः । क्षपयति ॥ ४९ ॥ स्वन अवतंसने । शब्दे इति पठिष्यमाणस्यानुवादः । स्वनयति । अन्यत्र स्वानयति ॥ ९० ॥

मारण, तोषण और निशामनार्थमें ज्ञा धातु मित्संज्ञक हो । माधवके मतसे निशामन शब्दसे चाक्षुष ज्ञान और अन्य मतसे ज्ञानार्थ जानना । 'निशानेषु' ऐसा पाठान्तर है, निशान शब्दसे तीक्ष्णीकरण जानना । इन सम्पूर्ण अर्थोंमें ही ज्ञा धातु मित्संज्ञक हो ॥

"ज्ञप मिच्च" ज्ञप धातु भी मित्संज्ञक हो, यह चुरादिमें पठित है उसका ज्ञापन और मारण अर्थ है ।

ज्ञा वा ज्ञप धातुको मित्त्व होनेपर 'विज्ञापना भर्तृषु सिद्धिमेति' इस स्थलमें 'विज्ञापना' यह पद और 'तज्ज्ञापयत्याचार्यः' इस स्थलमें 'ज्ञापयति' यह पद किस प्रकारसे सिद्ध हुआ ? इस पर कहतेहैं कि, माधवके मतसे अचाक्षुषज्ञानमें मित्त्वाभाव है, इससे 'विज्ञापना' आदि प्रयोग होसकतेहैं ज्ञापनमात्रमें मित्त्व हो इस मतसे तो 'ज्ञा नियोगे' इस चौरादिक धातुका होगा, अर्थभेद नहीं कहसकते हो कारण कि, धातुको अनेकार्थत्व है । जो 'निशानेषु' ऐसे पढतेहैं, उन हरदत्तादिके मतमें तो कुछ भी अनुपपत्ति नहीं है ॥

कम्पनार्थमें चल धातु मित्संज्ञक हो । चल धातु कंपनार्थमें है, यह धातु ज्वलादि है । चलयति शाखाम् । कम्पभिन्नार्थमें (शीलञ्चालयति) ऐसा प्रयोग होगा । चालन शब्दसे अन्यथाकरण और स्वामीके मतसे हरणार्थ जानना, 'सूत्रं' चालयति, अर्थात् निक्षेप करताहै ॥

ऊर्ज, अर्थात् बल और प्राणनार्थमें छदि धातु मित्संज्ञक हो । अपवारणार्थक चुरादिगणीय छद धातुके उत्तर स्वार्थिक

णिच्के अभाव पक्षमें मित् संज्ञाके निमित्त यहां अनुवाद जानना। अनेकार्थत्वके कारण ऊर्जार्थमें वृत्ति है। 'छदन्तं प्रयुङ्क्ते' इस वाक्यमें छदयति, अर्थात् बलवन्त और प्राणवन्त करताहै । अन्यार्थमें छादयति, अर्थात् अपवारण करनेवालेको प्रयुक्त करताहै, स्वार्थ णिच्में तो छादयति, अर्थात् बली होताहै, प्राणी होताहै अथवा अपवारण करताहै ऐसे अर्थ होंगे ॥

लड धातु जिह्वाके उन्मथनार्थमें मित्संज्ञक हो। यहां विलासार्थक लड धातुका मित्संज्ञार्थ अनुवाद है । उन्मथन शब्दसे ज्ञापनार्थ जानना । जिह्वा शब्दके साथ उन्मथन शब्दका षष्ठीतत्पुरुष अथवा तृतीयातत्पुरुष समास है । लडयति जिह्वाम् । लडयति जिह्वया । कोई तो कहतेहैं कि, जिह्वा शब्दसे तद्व्यापार लक्षित होताहै, 'जिह्वोन्मथने' यह समाहार द्वन्द्व है । लडयति शत्रुम् । लडयति दधि । अन्यार्थमें पुत्रं लाडयति ॥

मदी धातु हर्ष और ग्लेपन,अर्थात् दैन्यार्थमें है । दिवादिगणीय धातुकी मित्संज्ञार्थ यहां अनुवाद है । मदयति, हर्षयति, ग्लेपयति वेत्यर्थः। अन्यार्थमें मादयति,अर्थात् चित्तविकारको उत्पादन करताहै । ध्वन धातु शब्द करनेमें है । फणादि गणके मध्यमें पठिष्यमाण इस धातुका मित्त्वार्थ यहां अनुवाद है ध्वनयति घंटाम् । अन्यार्थमें ध्वानयति, अर्थात् अस्पष्टाक्षरको उच्चारण करताहै । यहां भोजराज दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि और क्षपि धातु मित् हों, ऐसा पढतेहैं, उनमें ध्वनि और रणि धातु उदाहृत हैं ॥

दल धातु विशरणार्थमें, वल धातु संवरणमें, स्खल धातु संचलनमें, त्रपूष् धातु लज्जा करनेमें कह गये हैं उनको णिच् परे दलयति, वलयति, स्खलयति, त्रपयति । क्षयार्थमें वक्ष्यमाण कृतात्व क्षै धातुके पुक् करके निर्देश यहां है, क्षपयति ॥ स्वन धातु अवस्रंसनमें है । शब्दार्थमें पठिष्यमाण स्वन धातुका यहां अनुवाद है । स्वनयति । अन्यार्थमें स्वानयति ॥

घटादयो मितः ॥ मित्संज्ञा इत्यर्थः ॥ जनी-जृष्-क्नसु-रञ्जोऽमन्ताश्च ॥ मित इत्यनुवर्तते । जृषिति षित्वनिर्देशाज्जीर्यतेर्ग्रहणम् । जृणातेस्तु जारयति । केचित्तु जनी जॄ ष्णसु इति पठित्वा ष्णसु निरसने इति दैवादिकमुदाहरन्ति ॥९४॥ ज्वल-ह्वल-ह्मल-नमामनुपसर्गाद्वा ॥ एषां मित्त्वं वा । प्राप्तविभाषेयम् । ज्वलयति-ज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कथं तर्हि प्रज्वालयति, उन्नामयतीति । घञन्तात्तत्करोतीति णौ । कथं संक्रामयतीति । मितां ह्रस्व इति सूत्रे वा चित्तविराग इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत् । एतेन रजो विश्रामयन् राज्ञाम्, धुर्यान्विश्रामयति स इत्यादि व्याख्यातम् ॥ ९८ ॥ ग्ला-स्ना-वनु-वमां च अनुपसर्गादेषां मित्त्वं वा स्यात् । आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा ॥ ६२ ॥

घटादि धातु मित्संज्ञक हों ।

जनी, जृष्, क्नसु, रञ्ज और अमन्त धातु मित्संज्ञक हों । जृष्धातुमें षित्व निर्देशके कारण दैवादिक जृष्धातुका ग्रहण है । क्र्यादिक जॄ धातुका तो 'जारयति' ऐसा होगा । कोई २ 'जनी, जॄ ष्णसु' ऐसा पाठ करके "ष्णसु निरसने" इस दैवादिक धातुका उदाहरण करतेहैं ॥

ज्वल, ह्वल, ह्मल और नम धातुको विकल्प करके मित्त्व हो । ज्वलयति, ज्वालयति । उपसृष्टार्थमें तो नित्य मित्त्व होगा, प्रज्वलयति, प्रज्वालयति । उन्नामयति, यह पद तो घञन्त ज्वाल और नाम शब्दके उत्तर "तत्करोति तदाचष्टे" इससे णिच् करके सिद्ध हुआहै ।

अमन्तको मित्त्व होनेसे'संक्रामयति' यह पद किस प्रकारसे सिद्ध हुआ ? इस विषयमें कहतेहैं कि, "मितां ह्रस्वः २५६८" इस सूत्रमें "वा चित्तविरागे २६०५" इस सूत्रसे 'वा' इस पदकी अनुवृत्ति करके व्यवस्थित विभाषा श्रवणके कारण कहीं मित्त्व नहीं भी होगा,यह वृत्तिकारका मत है इसीसे'रजो विश्रामयन् राज्ञाम्' 'धुर्यान् विश्रामयेति सः' इत्यादि भी सिद्ध हुए ॥

उपसर्गके परे स्थित ग्ला, स्ना, वनु और वम धातुको विकल्प करके मित्त्व हो । आद्य दो धातुको प्राप्त होनेपर औरको अप्राप्त होनेपर यह विकल्प करके मित्त्व विधान है ॥

न कम्यमिचमाम् ॥ अमन्तत्वात्प्राप्तं मित्त्वमेषां न स्यात् । कामयते । आमयति । चामयति ॥ ६५ ॥ शमो दर्शने ॥ शाम्यतिर्दर्शने मिन्न स्यात् । निशामयति रूपम् । अन्यत्र तु प्रणयिनो निशमय्य वधूः कथाः । कथं तर्हि निशामय तदुत्पत्तिं विस्तराद्गदतो ममेति । शम आलोचन इति चौरादिकस्य । धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः, शाम्यतिवत् ॥६६॥ यमोऽपरिवेषणे ॥ यच्छतिर्भोजनतोऽन्यत्र मिन्न स्यात् । आयामयति । द्राघयति । व्यापारयति वेत्यर्थः । परिवेषणे तु । यमयति ब्राह्मणान् भोजयतीत्यर्थः । पर्यवसितं नियमयन्नित्यादि तु नियमवच्छब्दात्तत्करोतीति णौ बोध्यम्६७॥ स्खदिरवपरिभ्यां च ॥ मिन्नेत्येव । अवस्खादयति । परिस्खादयति । अपावपरिभ्य इति न्यासकारः । स्वामी तु न कमीति नञमुत्तरत्रिसूत्र्यामननुवर्त्य शम अदर्शने इति चिच्छेद । यमस्त्वपरिवेषणे मित्त्वमाह । तन्मते पर्यवसितं नियमयन्नित्यादि सम्यगेव । उपसृष्टस्य स्खदेश्चेदेवादिपूर्वस्येति नियमात्प्रस्खादयतीत्याह । तस्माद् सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः

फलितः । इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम् ॥ ६९ ॥ फण गतौ ॥ नेति निवृत्तमसम्भवात् । निषेधात्पूर्वमसौ न पठितः। फणादिकार्यानुरोधात् ॥

कम्, अम्, चम् धातुको अमन्तत्वके कारण प्राप्त मित्व नहीं हो, कामयते । आमयति । चामयति ॥

शम् धातु दर्शन अर्थमें मित् न हो । निशामयति । अन्यार्थमें तो (प्रणयिनो निशमय्य वधूः कथाः) दर्शन ही अर्थमें मित्वका निषेध होनेसे ' निशामय तदुत्पत्तिं विस्तराद्गदतो मम ' इस स्थलमें किस प्रकारसे वृद्धि हुई ? इसपर कहतेहैं कि, इस स्थलमें आलोचनार्थक चुरादिगणीय शम धातुका प्रयोग है, धातुओंके अनेकार्थत्वके कारण शम धातुकी समान श्रवणार्थमें वृत्ति है ॥

यम धातु भोजनभिन्न अर्थमें मित् न हो, आयामयति, अर्थात् द्राघयति, अथवा व्यापारयति । परिवेषणार्थमें यमयति ब्राह्मणान्, अर्थात् भोजन कराताहै ।

'पर्य्यवसितं नियमयन्' इत्यादि तो नियमवत् शब्दसे "तत्करोति" इससे णिच् करके सिद्ध हुआ है, ऐसा जानना।

अव और परिपूर्वक स्खद् धातु मित् न हो, अवस्खादयति। परिस्खादयति । न्यासकारके मतसे अप, अव, और परिपूर्वक स्खद धातु मित् नहीं होगा। स्वामीने तो "नकामि०" इस सूत्रसे उत्तर तीन सूत्रोंमें 'नञ्' की अनुवृत्ति न करके "शमः अदर्शने" ऐसा छेद किया है । और 'अपरिवेषण' अर्थमें यम धातुको मित् कहाहै । उनके मतमें 'पर्य्यवसितं नियमयन्' इत्यादि पद समीचीन ही है । सोपसर्ग स्खद धातुको मित्व हो तो अवादि पूर्वक ही को हो इस नियमसे 'प्रस्खादयति' ऐसा कहतेहैं, इस कारण दोनों सूत्रोंके उदाहरण, प्रत्युदाहरणोंमें व्यत्यास फलित हुआ । वृत्तिकार और न्यासकारको असम्मत होनेके कारण यह मत त्याग करने योग्य है ।*

फण धातु गतिमें है । 'न' यह पद निवृत्त हुआ, क्योंकि, असम्भव है, अर्थात् जब मित्वकी प्राप्ति कहीं नहीं तो निषेध किसका ? फणादि कार्यके अनुरोधसे निषेधके पूर्व यह नहीं पठित हुआहै ॥

२३५४ फणां च सप्तानाम्।६।४।१२५॥

एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । फेणतुः । फेणुः । फेणिथ । पफणतुः । पफणुः । फणयति ॥ वृत् ॥ घटादिः समाप्तः ॥ फणेः प्रागेव वृदित्येके । तन्मते फाणयतीत्येव ॥ ७० ॥ राजृ दीप्तौ । स्वरितेत् । राजति । राजते । रेजतुः-रराजतुः । रेजे-रराजे । अत इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्वम् ॥ ७१ ॥ टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ । अनुदात्तेतः । भ्राजतेरिह पाठः फणादिकार्यार्थः । पूर्वं पाठस्तु व्रश्चादिषत्वाभावार्थः । तत्र हि राजिसाहचर्यात् फणादेरेव ग्रहणम् । भ्रेजे-बभ्राजे । वा भ्राशेति श्यन्वा । भ्राश्यते-भ्राशते । भ्रेशे-बभ्राशे । भ्लाश्यते-भ्लाशते । भ्लेशे-बभ्लाशे । द्वाव-

*(यमोऽपरिवेषणे) यम् धातु भोजना अर्थसे अन्यत्र मित् न हो, यहां 'यम्-उपरमे' यह धातु समझना चाहिये । भोजना शब्द "रायासश्रन्थो युच् ३२८४" इस सूत्रसे युच् प्रत्ययान्त स्त्रीलिङ्ग है, और 'परिवेषण' यहां भोजनानुकूलव्यापार है, (यहांपर परोसना अर्थ लियाहै) इससे अन्य अर्थमें मित्का निषेध है और इस सूत्रमें "न कम्यमिचमाम्" इस सूत्रसे 'न' इस पदकी अनुवृत्ति होती है, इस कारण यह अर्थ हुआ कि, यम धातु भोजनार्थमें तो मित् है जैसे-यमयति ब्राह्मणान्, यहां मित् होनेका फल णि प्रत्यय परे रहते यमके आकारको ह्रस्व होना है (२५६८) भोजनासे अन्यत्र यम धातु मित् नहीं होता,जैसे-आयामयति-द्राघयति, व्यापारयति वेत्यर्थः।यहां यम धातुको ह्रस्व न हुआ।यदि कोई कहै कि, 'पर्य्यवसितं नियमयन्' इत्यादि प्रयोगोंमें भोजना अर्थके न होनेपर भी मित्संज्ञाका फल ह्रस्व दीखताहै, सो कैसे हुआ ? इसका उत्तर यह है कि, उक्त प्रयोगमें नियमवत् शब्दसे 'करोति' इस अर्थमें णिच् प्रत्यय करनेसे होताहै, ऐसा जानना । इसी प्रकार "शमो दर्शने" "स्खदिरवपरिभ्यां च" इन दोनों सूत्रोंमें भी पूर्वोक्त सूत्रसे ही 'न' इस पदकी अनुवृत्ति होतीहै, इससे यह अर्थ हुआ कि, 'शम धातु दर्शन अर्थमें मित् न हो' इसका उदाहरण यह है-निशामयति रूपम् । दर्शनसे अन्यत्र मित् होताहै,इसका उदाहरण-'प्रणयिनो निशमय्य वधूः कथाः' है,यहां मित् होनेसे शम धातुको ह्रस्व होगया । यदि कोई कहै कि, "निशामय तदुत्पत्तिं विस्तराद्गदतो मम" इस दुर्गासप्तशतीके श्लोकमें शम धातुका श्रवण अर्थ है,तो मित् होकर ह्रस्व क्यों न हुआ ? तो इसका उत्तर यह है कि, यहां 'शम-आलोचने' यह चुरादि गणका धातु है और आलोचनका अर्थ यहां श्रवण है, क्योंकि, धातुओंका अनेक अर्थ होताहै और चुरादि गण ज्ञपादि पांच धातुओंके सिवाय और धातु स्वार्थणिच्में मित् नहीं होते इस कारण मित् न होनेसे ह्रस्व नहीं हुआ । इसी प्रकार तीसरे सूत्रका अर्थ यह है कि, अव और परि इन दो उपसर्गोंसे आगे स्खद धातु मित् नहीं होता इसके उदाहरण यह हैं-'अवस्खादयति, परिस्खादयति' इन दोनों प्रयोगोंमें मित् न होनेसे ह्रस्व न हुआ । न्यासकार तो कहतेहैं कि, 'अव, परि, अप' इन तीन उपसर्गोंसे आगे स्खद धातु मित् नहीं होता । अब स्वामीने तो "न कम्यमिचमाम्" इस गण सूत्रसे 'न' इस पदकी 'अनुवृत्ति' अगले तीनों सूत्रोंमें न करके "शमोदर्शने" इस गण सूत्रमें "शमः अदर्शने" ऐसा पदच्छेद करके 'शम धातु अदर्शनमें' मित् हो ऐसा अर्थ कियाहै । यद्यपि इस अर्थमें किसी प्रकारका पूर्वोक्त उदाहरणोंमें दोष नहीं आता, तो भी ' यमोपरिवेषणे ' इसके उदाहरण तथा प्रत्युदाहरणमें वैपरीत्य दोष आवेगा, क्योंकि पूर्व अर्थमें यम धातु परिवेषण अर्थमें मित् होताथा, अब नहीं होगा । इस प्रकार इनके मतमें 'पर्य्यवसितं नियमयन्' इत्यादि प्रयोग ठीक रहेंगे, और सोपसर्ग स्खद मित्व होते अव परि उपसर्गसे ही परको हो अन्यको नहीं, ऐसा नियम मानकर प्र उपसर्गसे परे स्खद धातुको मित् मानकर 'प्रस्खादयति' ऐसा रूप (स्वामीने) माना है, इस कारण इस सूत्रके भी उदाहरण, प्रत्युदाहरणोंमें व्यत्यास अर्थात् वैपरीत्य होगा, परन्तु यह स्वामीका मत वृत्तिकार और न्यासकारके मतसे विरुद्ध होनेसे त्याज्य है ॥

पीमौ तालव्यान्तौ ॥ ७४ ॥ स्यमु स्वन ध्वन शब्दे । स्यमादयः क्षरत्यन्ताः परस्मैपदिनः । स्येमतुः-सस्यमतुः । अस्यमीत् । स्वेनतुः-सस्वनतुः । सस्वनुः । अस्वानीत्-अस्वनीत् । विष्वणाति । अवष्वणति । सशब्दं भुंक्ते इत्यर्थः । वेश्च स्वन इति षत्वम् । फणादयो गताः ॥ दध्वनतुः ॥ ३ ॥ षम ष्टम अवैकल्ये । ससाम । तस्ताम॥५॥ज्वल दीप्तौ । अतो ल्रांतस्य।अज्वालीत् ॥६॥चल कम्पने॥७॥ जल घातने । घातनं तैक्ष्ण्यम् ॥ ८ ॥ टल ट्वल वैक्लव्ये ॥ १० ॥ ष्ठल स्थाने ॥ ११ ॥ हल विलेखने ॥१२॥ णल गन्धे । बन्धन इत्येके ॥ १३ ॥ पल गतौ । पलति ॥ १४ ॥ बल प्राणने धान्यावरोधने च। बलति । बेलतुः । बेलुः ॥ १५ ॥ पुल महत्त्वे ॥ पोलति ॥ १६ ॥ कुल संस्त्याने बन्धुषु च । संस्त्यानं सङ्घातः । बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल ॥ १७ ॥ शल हुल पत्लृ गतौ । शशाल । जुहोल । पपात । पेततुः। पतिता ॥

२३५४-कित् लिट् और सेट् थल् परे रहते फणादि सात धातुओंको विकल्प करके एत्व और अभ्यासका लोप हो । फेणतुः । फेणुः । फेणिथ । पफणथुः । पफणुः । फणयति । (वृत्) घटादि धातु समाप्त हुए । कोई कहते हैं कि फणादि धातुके पूर्वमें ही 'वृत्' है, उनके मतमें 'फाणयति' पद सिद्ध होताहै ॥

राजृ धातु दीप्तिमें है । यह उभयपदी है । राजति। राजते। रेजतुः,रराजतुः।रेजे, रराजे"अतः एक०२२६०"से'अतः' इस पदकी अनुवृत्ति (२३५४ में) होनेपर भी विधान (फणादिमें 'राज' के पाठ) सामर्थ्यसे आकारके स्थानमें एकार होताहै ॥

भ्राजृ, भ्राशृ और भ्लाशृ धातु दीप्तिमें हैं, यह आत्मनेपदी इस स्थलमें भ्राज धातुका पाठ फणादिकार्यार्थ है और पूर्वमें पाठ "व्रश्च० २९४" से षत्वके अभावार्थ है, क्योंकि, उस (२९४) में राज धातुके साहचर्य्यसे फणादिका ही ग्रहण होता है । भ्रेजे, बभ्राजे ॥

"वा भ्राश० २३२१" इस सूत्रसे विकल्प करके श्यन् हो । भ्राश्यते, भ्राशते । भ्रेशे, बभ्राशे । भ्लाश्यते, भ्लाशते । भ्लेशे, बभ्लाशे । यह दोनों धातु तालव्यान्त हैं ।

स्यमु,स्वन और ध्वन धातु शब्दमें हैं । स्यमादि क्षरत्यन्त धातु परस्मैपदी हैं । स्येमतुः, सस्यमतुः । अस्यमीत्॥ स्वेनतुः, सस्वनतुः । सस्वनुः । अस्वानीत्, अस्वनीत् । विष्वणति। अवष्वणाति । अर्थात् शब्दसहित भोजन करताहै । "वेश्च स्वनः २२७४" इस सूत्रसे षत्व होताहै । फणादि धातुसमाप्त हुए । दध्वनतुः ॥

षम और ष्टम धातु अवैकल्पमें हैं । ससाम । तस्ताम । ज्वल धातु दीप्तिमें है । "अतो ल्रान्तस्य २२३०" इस सूत्रसे 'अज्वालीत्' पद होताहै । चल धातु कंपनमें, जल धातु घातन अर्थात् तीक्ष्णतामें है । टल और ट्वल धातु वैक्लव्यमें हैं । ष्ठल धातु स्थानमें है । हल धातु विलेखनमें है । णल धातु गंधमें है । किसीके मतमें बंधनार्थमें भी है । पल धातु गतिमें है । पलति । बल धातु प्राणन और धान्यावरोधनमें है। बलति । बेलतुः । बेलुः ॥ पुल धातु महत्त्वमें है । पोलति ॥ कुल धातु संस्त्यान और बन्धुमें है । संस्त्यान शब्दसे समूह और बन्धु शब्दसे तद्व्यापारका ग्रहण है । कोलति । चुकोल ॥ शल, हुल और पत्लृ धातु गतिमें हैं । शशाल । जुहोल । पपात । पेततुः । पतिता ॥

२३५५ पतः पुम् । ७ । ४ । १९ ॥

अङि परे । अपप्तत्।नेर्गदेति णत्वम् । प्रण्यपप्तत् ॥२०॥ कथे निष्पाके । कथति । चकाथ । अकथीत् ॥ २१ ॥ पथे गतौ । अपथीत् ॥२२॥ मथे विलोडने । मेथतुः।अमथीत् ॥ २३ ॥ टुवम उद्गिरणे । इहैव निपातनादृत इत्त्वमिति सुधाकरः । ववाम।ववमतुः। वादित्वादेत्त्वाभ्यासलोपौ न । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृतं तद्भाष्यादौ न दृष्टम् ॥ २४ ॥ भ्रमु चलने । वा भ्राशेति श्यन्वा । भ्रम्यति-भ्रमति । भ्राम्यतीति तु दिवादेर्वक्ष्यते ॥

२३५५-अङ् परे रहते पत धातुको पुम्का आगम हो, अपप्तत् । "नेर्गद० २२८५" इस सूत्रसे णत्व होकर-प्रण्यपप्तत् ॥ कथे धातु निष्पाकमें है । कथति । चकाथ । अकथीत् ॥ पथे धातु गतिमें है । अपथीत् । मथे धातु विलोडनमें है । मेथतुः । अमथीत् । टुवम धातु उद्गिरणमें है । इसी स्थलमें निपातनसे ऋकारान्त गृ धातुको इत्व हुआ, यह सुधाकरका मत है । ववाम । ववमतुः, यहां वकारादित्वके कारण एत्व और अभ्यासका लोप न हुआ । भ्रमु धातु चलनमें है "वा भ्राश०२३२१" इस सूत्रसे विकल्प करके श्यन् होकर-भ्रम्यति, भ्रमति । भ्राम्यति, यह तो दिवादि धातुका रूप कहेंगे ॥

२३५६ वा जृभ्रमुत्रसाम् ।६।४।१२४॥

एषामेत्त्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च । भ्रेमतुः-बभ्रमतुः । अभ्रमीत् ॥ ॥ २५ ॥ क्षर सञ्चलने । अक्षारीत् ॥ २६ ॥

अथ द्वावनुदात्तेतौ ॥ षह मर्षणे । परिनिविभ्य इति षत्वम् । परिषहते । सेहे । सहिता । तीषसहेति वा इट् । इडभावे ढत्वधत्वष्टुत्वढलोपाः ॥

२३५६-कित् लिट् और सेट् थल् परे रहते जृ, भ्रम और त्रस धातुको विकल्प करके एत्व और अभ्यासका लोप हो, भ्रेमतुः, बभ्रमतुः । अभ्रमीत् ॥ क्षर धातु संचलनमें है । अक्षारीत् ॥

अब दो अनुदात्तेत् धातु कहतेहैं।

षह धातु मर्षणमें है। "परिनिविभ्यः० २२७५" इस सूत्रसे षत्व होकर–परिषहते। सेहे। सहिता। "तीषसह० २३४०" इस सूत्रसे विकल्प करके इट् होगा, इडभावपक्षमें ढत्व, धत्व, ष्टुत्व और ढलोप होगा॥

२३५७ सहिवहोरोदवर्णस्य।६।३।११२॥

अनयोरवर्णस्य ओत्स्यात् ढलोपे सति॥

२३५७–ढकारका लोप होनेपर सह और वह धातुके वर्णके स्थानमें ओकार हो–॥

२३५८ सोढः।८।३।११५॥

सोढ्रूपस्य संहः सस्य षत्वं न स्यात्।परिसोढा॥

२३५८–सोढ् रूपको प्राप्त हुए सह धातुके सकारको षत्व न हो, परिसोढा॥

२३५९ सिवादीनां वाऽड्व्यवायेऽपि। ८।३।७१॥

परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेपि। पर्यषहत–पर्यसहत॥१॥ रमु क्रीडायाम्। रेमे। रेमिषे। रन्ता। रंस्यते। रंसीष्ट। अरंस्त॥२॥

अथ कसन्ताः परस्मैपदिनः॥ षद्लृ विशरणगत्यवसादनेषु॥

२३५९–अड्व्यवाय रहते भी परि, नि और वि के परे स्थित सिवादि धातुके सकारको विकल्प करके षत्व हो, पर्य्यषहत, पर्यसहत॥ रमु धातु क्रीडामें है। रेमे। रेमिषे। रन्ता। रंस्यते। रंसीष्ट। अरंस्त॥

अब कसन्त परस्मैपदी धातु कहतेहैं।

षद्लृ धातु विसरण, गति और अवसादनार्थमें हैं॥

२३६० पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः।७।३।७८॥

पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे। सीदति। ससाद। सेदतुः। सेदिथ–ससत्थ। सत्ता। सत्स्यति। लृदित्वादङ्। असदत्॥ सदिरप्रतेः॥ निषीदति। न्यषीदत्॥

२३६०–इत्संज्ञक शकारादि प्रत्यय परे रहते पा धातुके स्थानमें पिब, घ्रा–जिघ्र, ध्मा–धम, स्था–तिष्ठ, म्ना–मन्, दाण–यच्छ, दृश्–पश्य, ऋ–ऋच्छ, सृ–धौ, शद, शीय और सद धातुके स्थानमें सीद आदेश हो। सीदति। ससाद। सेदतुः। सेदिथ, ससत्थ। सत्ता। सत्स्यति। लृकार इत् होनेके कारण इसके उत्तर अङ् होगा–। असदत्। प्रतिभिन्न उपसर्ग पूर्वक सद धातुसम्बन्धी सको षत्व हो (२२७१) निषीदति। न्यषीदत्॥

२३६१ सदेः परस्य लिटि।८।३।११८॥

सदेरभ्यासात्परस्य षत्वं न स्यात् लिटि।निषसाद। निषेदतुः॥१॥ शद्लृ शातने। विशीर्णतायामयम्। शातनं तु विषयतया निर्दिश्यते॥

२३६१–लिट् परे रहते सद धातुके अभ्यासके परे स्थित सके स्थानमें षत्व न हो। निषसाद। निषेदतुः। शद्लृ धातु शातनमें है, शातनसे विशीर्णता जानना, यदि यह कहो कि, शातनसे विशीर्णताका ग्रहण हो तो हेतुमत् णिच् करके 'शातन' यह पद कैसे निर्दिष्ट हुआ? तो सो ठीक नहीं कारण कि, विना प्रयोजकव्यापारके विशीर्णताका असम्भव होनेके कारण 'विषयतया' अर्थात् धात्वर्थ (विशीर्णता) जनकताद्वारा 'शातन' यह पद निर्दिष्ट हुआहै॥

२३६२ शदेः शितः।१।३।६०॥

शिद्भाविनोऽस्मादात्मनेपदं स्यात्। शीयते। शशाद। शेदतुः। शेदिथ–शशत्थ। शत्ता। अशदत्॥२॥ क्रुश आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्लेः क्सः। अक्रुक्षत्॥३॥ कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कोचति। चुकोच॥४॥ बुध अवगमने। बोधति। बोधिता। बोधिष्यति॥५॥ रुह बीजजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्॥६॥ कस गतौ। अकासीत्–अकसीत्॥७॥ वृत्। ज्वलादिगणः समाप्तः॥

**अथ गूहत्यन्ताः स्वरितेतः॥ हिक्क अव्यक्ते शब्दे। हिक्कति। हिक्कते॥१॥ अञ्चु गतौ याचने च। अञ्चति। अञ्चते॥२॥ अचु इत्येके॥३॥ अचि इत्यपरे॥४॥ टुयाचृ याच्ञायाम्। याचति। याचते॥५॥ रेटृ परिभाषणे। रेटति। रेटते॥६॥ चते चदे याचने। चचात। चेते। अचतीत्। चचाद। चेदे। अचदीत्॥८॥ प्रोथृ पर्याप्तौ। पुप्रोथ। पुप्रोथे॥९॥ मिदृ मेदृ मेधाहिंसनयोः। मिमेद। मिमिदे। थान्ताविमाविति स्वामी। मिमेथ। धान्ताविति न्यासः॥११॥ मेधृ सङ्गमे च। मेधति। मिमेधे॥१२॥ णिदृ णेदृ कुत्सासन्निकर्षयोः। निनेद। निनिदतुः। निनिदे॥१४॥ शृधु मृधु उन्दने। उन्दनं क्लेदनम्। शर्धति। शर्धते। शर्धिता। मर्धति। मर्धते॥१६॥ बुधिर् बोधने। बोधति। बोधते। इरित्वादङ् वा। अबुधत्–अबोधीत्। अबोधिष्ट। दीपजनेति चिण् तु न भवति

पूर्वोत्तरसाहचर्येण दैवादिकस्यैव तत्र ग्रहणात् ॥ ॥१७॥ उबुन्दिर् निशामने । निशामनं ज्ञानम् । बुबुन्दे । अबुदत् अबुन्दीत् ॥ १८ ॥ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेणति। वेणते । नान्तोऽप्ययम् ॥ १९ ॥ खनु अवदारणे। खनति । खनते ॥

२३६२-शित्संज्ञक प्रत्यय होगा । जिससे ऐसा जो शद धातु उसके उत्तर आत्मनेपद हो । शीयते । शशाद । शेदतुः । शेदिथ, शशत्थ । शत्ता । अशदत् ॥ क्रुश धातु आह्वान और रोदनमें है । क्रोशति । क्रोष्टा । च्लिके स्थानमें क्स आदेश होगा-अक्रुक्षत् ॥ कुच धातु सम्पर्चन, कौटिल्य, प्रतिष्टम्भ और विलेखनमें है । कोचति । चुकोच ॥ बुध धातु अवगमनमें है । बोधति । बोधिता । बोधिष्यति॥रुह धातु बीजोत्पत्ति तथा प्रादुर्भावमें है । रोहति। रुरोह । रुरोहिथ । रोढा । रोक्ष्यति । अरुक्षत् ॥ कस धातु गतिमें है । अकासीत् , अकसीत् ॥

ज्वलादि गण समाप्त हुआ ॥

अब गुह धातु तक उभयपदी धातु कहे जातेहैं-

हिक्क धातु अव्यक्त शब्दमें है। हिक्कति । हिक्कते ॥ अञ्चु धातु गति और याचनार्थमें है । अञ्चति । अञ्चते । किसीके मतमें अचु धातु है । अन्य मतमें अचि धातु है॥ टुयाचृ धातु याचनामें है । याचति । याचते ॥ रेटृ धातु परिभाषणमें है । रटति । रेटते ॥ चते और चदे धातु याचनार्थमें हैं । चचात । चेते । अचतीत् । चचाद । चेदे । अचदीत् ॥ प्रोथृ धातु पर्य्याप्तिमें है । पुप्रोथ । पुप्रोथे॥मिदृ और मेदृ धातु मेधा और हिंसामें हैं । मिमेद । मिमिदे । स्वामीके मतमें यह थकारान्त है । मिमेथ । न्यासकारके मतमें यह धातु धकारान्त है ॥ मेधृ धातु संगममें है । मेधति । मिमेधे ॥ णिदृ और णेदृ धातु कुत्सा और सन्निकर्षमें हैं। निनेद । निनिदतुः । निनेदे ॥ शृधु और मृधु धातु उन्दन अर्थात् क्लेदनमें हैं । शर्द्धति । शर्द्धते । शर्द्धिता । मर्द्धति । मर्द्धते ॥

बुधिर् धातु बोधनमें है । बोधति । बोधते । इरित्वके कारण विकल्प करके अङ् होगा-अबुधत् , अबोधीत् । अबोधिष्ट । " दीपजन० २३२८ " इस सूत्रके अनुसार चिण् नहीं होगा, क्योंकि पूर्वोत्तर साहचर्य्यके कारण दिवादि गणीय धातुका ही उस स्थलमें ग्रहण हुआ है ॥ उबुन्दिर् धातु निशामन (ज्ञान) में है । बुबुन्दे । अबुदत् । अबुन्दीत् ॥ वेणृ धातु गति, ज्ञान, चिन्ता, निशामन और वादित्रग्रहणमें है । वेणति । वेणते । यह धातु नकारान्त भी है ॥ खनु धातु अवदारणमें है । खनति । खनते ॥

२३६३ गमहनजनखनघसां लोपः क्ङित्यनङि । ६ । ४ । ९८ ॥

एषामुपधाया लोपः स्यादजादौ क्ङिति न त्वङि । चख्नतुः ॥

२३६३-अजादि कित् ङित् प्रत्यय परे रहते गम, हन, जन, खन और घस धातुको उपधाका लोप हो, अङ् परे न हो । चख्नतुः । कित् और ङित्संज्ञक यकारादि कित्, ङित् प्रत्यय परे रहते जन, सन और खन धातुके स्थानमें विकल्प करके आकार हो ॥

(२३१९ ये विभाषा । ६ । ४।४३॥)

खायात्-खन्यात् ॥ २० ॥ चीवृ आदानसंवरणयोः । चिचीव । चिचीवे ॥ २१ ॥ चायृ पूजानिशामनयोः ॥ २२ ॥ व्यय गतौ । अव्ययीत्॥२३॥दाशृ दाने । ददाश । ददाशे ॥२४॥ भेषृ भये। गतावित्येके । भेषति। भेषते ॥ २५॥ भ्रेषृ भ्लेषृ गतौ ॥ २६ ॥ अस गतिदीप्त्यादानेषु । असति । असते । आस । आसे । अयं षान्तोऽपि ॥२७॥ स्पश बाधनस्पर्शनयोः। स्पर्शनं ग्रथनम् । स्पशति । स्पशते ॥ २८ ॥ लष कान्तौ । वा भ्राशेति श्यन्वा । लष्यति । लषति । लेषे ॥ २९ ॥ चष भक्षणे ॥ ३० ॥ छष हिंसायाम् । चच्छषतुः । चच्छषे ॥ ३१ ॥ झष आदानसंवरणयोः ॥ ३२ ॥ भ्रक्ष भ्लक्ष अदने ॥ ३४ ॥ भक्ष इति मैत्रेयः ॥ ३५ ॥ दासृ दाने॥३६॥माहृ माने ॥३७॥ गुहू संवरणे॥

(२३१९) खायात्, खन्यात् । चीवृ धातु आदान और संवरणमें है । चिचीव । चिचीवे ॥ चायृ धातु पूजा और निशामनार्थमें है ॥ व्यय धातु गतिमें है । अव्ययीत् ॥ दाशृ धातु दानमें है । ददाश । ददाशे ॥ भेषृ धातु भय और किसीके मतसे गतिमें है । भेषति । भेषते॥भ्रेषृ और भ्लेषृ धातु गतिमें हैं ॥ अस धातु गति, दीप्ति और आदानमें है । असति । असते । आस । आसे । यह धातु षकारान्त भी है ॥ स्पश धातु बाधन और स्पर्शन अर्थात् ग्रथनमें है । स्पशति स्पशते ॥ लष धातु कान्तिमें है । "वा भ्राश० २३२१" सूत्रसे इसके उत्तर विकल्प करके श्यन् प्रत्यय होगा । लष्यति । लषति । लेषे ॥ चष धातु भक्षणमें है ॥ छष धातु हिंसामें है चच्छषतुः । चच्छषे ॥ झष धातु आदान और संवरणमें है ॥ भ्रक्ष और भ्लक्ष धातु भक्षणमें हैं । मैत्रेय मुनिके मतमें भक्ष धातु उक्तार्थमें है ॥ दासृ धातु दानमें है ॥ माहृ धातु मानमें है ॥ गुहू धातु संवरणमें है ॥

२३६४ ऊदुपधाया गोहः । ६।४।८९॥

गुह उपधाया ऊत्स्याद् गुणहेतावजादौ प्रत्यये । गूहति । गूहते । ऊदित्त्वादिड्वा । गूहिता-गोढा । गूहिष्यति-घोक्ष्यति । गूहेत् । गुह्यात् । अगूहीत् । इडभावे क्सः । अघुक्षत् ॥

२३६४-गुणके हेतुभूत अजादि प्रत्ययके परे रहते गुह धातुकी उपधाके स्थानमें ऊकार हो । गूहति । गूहते । ऊकार इत् होनेके कारण इसके उत्तर विकल्प करके इट् होगा ।

गूहिता, गोढा । गूहिष्यति, घोक्ष्यति । गूहेत । गुह्यात् । अगूहीत् । इट्के अभावमें क्स होगा । अघुक्षत् ॥

२३६५ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । ७ । ३ । ७३ ॥

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि । ढत्वधत्वष्टुत्वढलोपदीर्घाः । अगूढ-अघुक्षत । क्सस्याचीत्यन्तलोपः । अघुक्षाताम् । अघुक्षन्त । अगुह्वहि-अघुक्षावहि । अघुक्षामहि ॥ ३८ ॥

अथाजन्ता उभयपदिनः । श्रिञ् सेवायाम् । श्रयति । श्रयते । शिश्रियतुः । श्रयिता । णिश्रीति चङ् । अशिश्रियत् ॥ १ ॥ भृञ् भरणे । भरति । बभार । बभ्रतुः । बभर्थ । बभृव । बभृषे । भर्ता ॥

२३६५-दन्त्य तङ् प्रत्यय परे रहते दुह, दिह और लिह और गुह धातुके उत्तर स्थित क्स प्रत्ययका आत्मनेपदमें विकल्प करके लुक् हो । क्रमसे ढत्व, धत्व, ष्टुत्व, ढलोप और दीर्घ होगा-अगूढ । अघुक्षत । "क्सस्याचि २३३७" इस सूत्रसे अन्तवर्णका लोप होगा-अघुक्षाताम् । अघुक्षन्त । अगुह्वहि, अघुक्षावहि । अगुह्महि, अघुक्षामहि ॥

अब अजन्त उभयपदी धातु कहे जाते हैं ।

श्रिञ् धातु सेवामें है । श्रयति । श्रयते । शिश्रियतुः । श्रयिता "णिश्रि० २३१२" इस सूत्रसे चङ् आदेश होगा । अशिश्रियत् ॥ भृञ् धातु भरणमें है । भरति । बभार। बभ्रतुः। बभर्थ । बभृव । बभृषे । भर्ता ॥

२३६६ ऋद्धनोः स्ये । ७ । २ । ७० ॥

ऋतो हन्तेश्च स्यस्य इट् स्यात् । भरिष्यति ॥

२३६६-ऋकारान्त धातु और हन धातुके स्यके इट्का आगम हो । भरिष्यति ॥

२३६७ रिङ् शयग्लिङ्क्षु ।७।४।२८ ॥

शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात् । रीङि प्रकृते रिङ्विधिसामर्थ्याद्दीर्घो न । भ्रियात् ॥

२३६७-श, यक्, यकारादि आर्धधातुक और लिङ् प्रत्यय परे रहते ऋकारान्त धातुके ऋकारके स्थानमें रिङ् आदेश हो । रीङ् करनेसे ही इष्ट सिद्ध होता था, फिर ह्रस्व विधानके कारण दीर्घ न हुआ-भ्रियात् ॥

२३६८ उश्च । १ । २ । १२ ॥

ऋवर्णात्परौ झलादी लिङ्सिचौ तङ्परौ कितौ स्तः । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् । अभार्ष्टाम् । अभार्षुः ॥

२३६८-ऋवर्णके परवर्त्ती झलादि लिङ् तथा तङ् परक सिच् इनकी कित्संज्ञा हो । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् । अभार्ष्टाम् । अभार्षुः ॥

२३६९ ह्रस्वादङ्गात् । ८ । २ । २७ ॥

सिचो लोपः स्यात् झलि । अभृत । अभृषाताम् । अभरिष्यत् ॥ २ ॥ हृञ् हरणे । हरणं प्रापणं स्वीकारस्तेयं नाशनं च । जहर्थ । जह्रिव । जह्रिषे । हर्ता । हरिष्यति ॥ ३ ॥ धृञ् धारणे । धरति । अधार्षीत् । अधृत ॥४॥ णीञ् प्रापणे । निनयिथ-निनेथ । निन्यिषे ॥ ५ ॥

अथाजन्ताः परस्मैपदिनः ॥ धेट् पाने । धयति॥

२३६९-झल् परे रहते ह्रस्वान्त अङ्गके उत्तर सिच्का लोप हो । अभृत । अभृषाताम् । अभरिष्यत् ॥ हृञ् धातु हरणमें है । हरण शब्द प्राप्ति चोरी और नाश करनेमें है । जहर्थ । जह्रिव । जह्रिषे । हर्त्ता । हरिष्यति ॥ धृञ् धातु धारण करनेमें है । धरति । अधार्षीत् । अधृत ॥ णीञ् धातु प्रापणमें है निनयिथ, निनेथ । निन्यिषे ॥

अब अजन्त परस्मैपदी धातु कहे जातेहैं ।

धेट् धातु पान करनेमें है । धयति ॥

२३७० आदेच उपदेशेऽशिति ।६।१।४५॥

उपदेशे एजन्तस्य धातोरात्वं स्यान्न तु शिति॥

२३७०-शित् भिन्न प्रत्यय परे रहते उपदेश अवस्थामें ए, ऐ, ओ और औकारान्त धातुके स्थानमें आकार हो ॥

२३७१ आत औ णलः । ७ । १।३४॥

आदन्ताद्धातोर्णल औकारादेशः स्यात् । दधौ॥

२३७१-आकारान्त धातुके उत्तर णल् विभक्तिके स्थानमें औकार आदेश हो । दधौ ॥

२३७२ आतो लोप इटि च ।६।४।६४॥

अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात् । द्वित्वात्परत्वाल्लोपे प्राप्ते द्विर्वचनेऽचीति निषेधः । द्वित्वे कृते आलोपः। दधतुः। दधुः । दधिथ-दधाथ । दधिव। दधिम । धाता॥

२३७२-अजादि जो कित् ङित् आर्धधातुक और इट्के परे आकारान्त धातुके आकारका लोप हो । द्वित्वके परे लोपकी प्राप्ति होनेपर "द्विर्वचनेऽचि २२४३" इस सूत्रसे निषेध होगा, द्वित्व होनेपर आकारका लोप होगा-दधतुः । दधुः । दधिथ, दधाथ । दधिव । दधिम । धाता ॥

२३७३ दा धा घ्वदाप् । १ । १ । २०॥

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना ॥

२३७३-दा और धा धातुकी घु संज्ञा हो,परन्तु दाप् और दैप् धातुकी न हो ॥

२३७४ एर्लिङि । ६ । ४ । ६७ ॥

घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातुके किति लिङि।धेयात्। धेयास्ताम्। धेयासुः॥

२३७४-आर्धधातुक कित् लिङ् परे रहते घुसंज्ञक, मा और स्थादि धातुको एत्व हो। धेयात्। धेयास्ताम्। धेयासुः॥

२३७५ विभाषा धेट्श्व्योः ।३।१।४९॥

आभ्यां च्लेश्चङ् स्यात्कर्तृवाचिनि लुङि परे। चङीति द्वित्वम्। अदधत्। अदधताम्॥

२३७५-कर्तृ वाच्यमें लुङ् परे रहते धेट् और श्वि धातुके उत्तर स्थित च्लिके स्थानमें विकल्प करके चङ् हो चङ् परे रहते द्वित्व होगा (२३१५) अदधत्। अदधताम्॥

२३७६ विभाषा घ्राधेट्शाच्छासः । २ । ४ । ७८ ॥

एभ्यः सिचो लुग्वा स्यात्परस्मैपदे परे। अधात्। अधाताम्। अधुः॥

२३७६-परस्मैपद परे रहते घ्रा, धेट्, शो, छो और सो धातुके उत्तर विकल्प करके सिच्का लोप हो। अधात्। अधाताम्। अधुः॥

२३७७ यमरमनमाऽऽतां सक् च । ७ । २ । ७३ ॥

एषां सक् स्यादेभ्यः सिच इट् स्यात्परस्मैपदेषु। अधासीत्। अधासिष्टाम्। अधासिषुः॥ ॥ १ ॥ ग्लै म्लै हर्षक्षये। हर्षक्षयो धातुक्षयः। ग्लायति। जग्लौ। जग्लिथ-जग्लाथ॥

२३७७-परस्मैपदमें यम, रम, नम और आकारान्त धातुको सक्का आगम हो और सिच्के उत्तर इट् भी हो। अधासीत्। अधासिष्टाम्। अधासिषुः॥ ग्लै और म्लै धातु हर्षक्षयमें हैं। हर्षक्षय शब्दसे धातुक्षय जानना। ग्लायति। जग्लौ। जग्लिथ, जग्लाथ॥

२३७८ वाऽन्यस्य संयोगादेः ।६।४।६८॥

घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। ग्लेयात्-ग्लायात्। अग्लासीत्। म्लायति ॥ ३ ॥ द्यै न्यक्करणे। न्यक्करणं तिरस्कारः ॥ ४ ॥ द्रै स्वप्ने ॥ ५ ॥ ध्रै तृप्तौ ॥ ६॥ ध्यै चिन्तायाम् ॥७॥ रै शब्दे ॥ ॥ ८ ॥ स्त्यै ष्ट्यै शब्दसङ्घातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यम्। षोपदेशफलं तु तिष्ट्यासति। अतिष्ट्यपदित्यत्र षत्वम्॥ ॥ १० ॥ खै खदने ॥ ११ ॥ क्षै जै षै क्षये। क्षायति। जजौ। ससौ। साता। घुमास्थेत्यत्र विभाषा घ्राधेडित्यत्र च स्यतेरेव ग्रहणं न त्वस्य। तेन एत्वसिज्लुकौ न। सायात्। असासीत्॥ १४॥ कै गै शब्दे। गेयात्। अगासीत् ॥ १६ ॥ शै श्रै पाके ॥ १८ ॥ पै ओवै शोषणे। पायात्। अपासीत्। घुमास्थेतीत्वं तदपवाद एर्लिङीत्येत्वं गातिस्थेति सिज्लुक् च न। पारूपस्य लाक्षणिकत्वात् ॥ २० ॥ ष्टै वेष्टने। स्तायति॥ २१॥ ष्णै वेष्टने शोभायां चेत्येके। स्नायति ॥ २२ ॥ दैप् शोधने। दायति। अघुत्वादेत्त्वसिज्लुकौ न। दायात्। अदासीत् ॥ २३ ॥ पा पाने। पाघ्राध्मेति पिबादेशः तस्यादन्तत्वान्नोपधागुणः। पिबति। पेयात्। अपात् ॥ २४॥ घ्रा गन्धोपादाने। जिघ्रति। घ्रायात्-घ्रेयात्। अघ्रासीत्-अघ्रात्॥२५॥ ध्मा शब्दाग्निसंयोगयोः। धमति॥ ॥ २६ ॥ ष्ठा गतिनिवृत्तौ। तिष्ठति। स्थादिष्वभ्यासेनेति षत्वम्। अधितष्ठौ। उपसर्गादिति षत्वम्। अधिष्ठाता। स्थेयात् ॥ २७ ॥ म्ना अभ्यासे। मनति॥२८॥दाण् दाने। प्रणियच्छति। देयात्। अदात्॥२९॥ ह्वृ कौटिल्ये। ह्वरति॥

२३७८-आर्धधातुक कित् लिङ् विभक्ति परे रहते घुसंज्ञक धातु, मा धातु और स्थादि धातु भिन्न संयोगादि धातुके आकारके स्थानमें विकल्प करके एकार हो। ग्लेयात्, ग्लायात्। अग्लासीत्। म्लायति॥ द्यै धातु न्यक्कार अर्थात् तिरस्कारमें है॥ द्रै धातु स्वप्नमें है॥ ध्रै धातु तृप्तिमें है॥ ध्यै धातु चिन्तामें है॥ रै धातु शब्दमें है। स्त्यै ष्ट्यै धातु शब्दसमूहमें हैं। षोपदेश धातुका भी सकार करने पर रूप तुल्य ही होगा, किन्तु षोपदेशका फल कुछ विशेष होगा, जैसे-'तिष्ट्यासति, अतिष्ट्यपत्'-इत्यादि स्थलमें षत्व हुआ है॥ खै धातु खदनमें है॥ क्षै, जै और षै धातु क्षयमें हैं। क्षायति। जजौ। ससौ। साता।

"घुमास्था० २४६२" और "विभाषा घ्राधेट्० २३७६" इन दोनों सूत्रोंमें स्यतिके ग्रहण ही होनेसे इसका ग्रहण नहीं होताहै। इस कारण एत्व और सिच्का लुक् नहीं होगा-सायात्। असासीत्॥

कै, गै, धातु शब्द करनेमें हैं। गेयात्। अगासीत्॥ शै और श्रै धातु पाक करनेमें हैं॥ पै और वै धातु शोषण करनेमें हैं। पायात्। अपासीत्। इस स्थलमें "पा" इसके लाक्षणिकत्वके कारण "घुमास्था० २४६२" इस सूत्रसे विहित इत्व, तथा उसका अपवाद "एर्लिङि २३७४" इससे एत्व और "गातिस्था० २२२३" इस सूत्रसे विहित सिच्का लुक् नहीं होगा॥ ष्टै धातु वेष्टनमें है। स्तायति॥ ष्णै धातु वेष्टन और किसीके मतसे शोभामें भी है। स्नायति॥ दैप् धातु शोधनमें है। दायति। घुसंज्ञक न होनेके कारण एत्व और सिच्का लुक् नहीं होगा। दायात्। अदासीत्। पा धातु पानमें है। "पा घ्राध्मा० २३६०" इस सूत्रसे पा धातुके स्थानमें पिब आदेश होगा-अकारान्त होनेके कारण उपधा गुण नहीं होगा। पिबति। पेयात्। अपात्॥ घ्रा धातु गन्धोपादानमें है। जिघ्रति। घ्रायात्, घ्रेयात्। अघ्रासीत्, अघ्रात्॥ ध्मा धातु शब्द और अग्निसंयोगमें है। धमति॥ ष्ठा धातु गतिनिवृत्तिमें है। तिष्ठति। "स्थादिष्वभ्यासेन० २२७७" इस सूत्रसे षत्व होगा-अधितष्ठौ। उपसर्गके उत्तर (२२७०)

पत्व हो—अधिष्ठाता। स्थेयात्॥ म्ना धातु अभ्यास करनेमें है। मनाति। दाण धातु दानमें है। प्रणियच्छति। देयात्। अदात्॥ ह्वृ धातु कौटिल्यमें है। ह्वरति॥

२३७९ ऋतश्च संयोगादेर्गुणः।७।४।१०॥

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि। किदर्थमपीदं परत्वाण्णल्यपि भवति। रपरत्वम्। उपधावृद्धिः। जह्वार। जह्वरतुः। जह्वरुः। जह्वर्थ। ह्वर्ता॥ ऋद्धनोः स्ये, ह्वरिष्यति॥

२३७९–लिट् परे रहते ऋकारान्त और संयोगादि अङ्गसंज्ञक धातुके ऋकारको गुण हो। यद्यपि यह गुण कित् परे रहते भी होनेके कारण अपवाद न हुआ, तथापि परत्वके कारण णल् परे रहते भी होगा, रपरत्वके कारण उपधाको वृद्धि होगी—जह्वार। जह्वरतुः। जह्वरुः। जह्वर्थ। ह्वर्ता। "ऋद्धनोः स्ये २३६६" इस सूत्रसे स्य प्रत्ययके इट्का आगम होगा—ह्वरिष्यति॥

२३८० गुणोर्तिसंयोगाद्योः।७।४।२९॥

अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। ह्वर्यात्। अह्वार्षीत्। अह्वार्ष्टाम्॥ ३०॥ स्वृ शब्दोपतापयोः। स्वरतिसूतीति वेट्। सस्वरिथ–सस्वर्थ। वमयोस्तु॥

२३८०–यक् और यकारादि आर्धधातुक लिङ् प्रत्यय परे रहते ऋ धातु और संयोगादि ऋकारान्त धातुके ऋकारको गुण हो। ह्वर्यात्। अह्वार्षीत्। अह्वार्ष्टाम्॥ स्वृ धातु शब्द और उपतापमें है। "स्वरतिसूति० २२७९" इस सूत्रसे विकल्प करके इट् होगा—सस्वरिथ, सस्वर्थ। व और म परे रहते किस प्रकारसे होगा सो आगे कहतेहैं॥

२३८१ श्र्युकः किति। ७। २। ११॥

श्रिञ एकाच उगन्ताच्च परयोर्गित्कितोरिण्न स्यात्। परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वादृद्धनोरिति नित्यमिट्। स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टाम्। अस्वार्षीत्। अस्वार्ष्टाम्॥ ३१॥ स्मृ चिन्तायाम्॥ ३२॥ ह्वृ संवरणे॥ ३३॥ सृ गतौ। क्रादित्वान्नेट्। ससर्थ। सस्रिव। रिङ्, स्रियात्। असार्षीत्। असार्ष्टाम्॥

२३८१–श्रि धातु और एकाच् उक् (उ, ऋ, लृ) अन्तवाले धातुके परे स्थित गित् और कित् प्रत्ययको इट् न हो। "स्वरति०" इससे प्राप्त विकल्पको बाधा देकर पूर्वमें प्रतिषेधकांडारम्भसामर्थ्यके कारण इस सूत्रसे निषेध प्राप्ति होनेपर क्र्यादि नियमके अनुसार नित्य इट् होगा–सस्वरिव। सस्वरिम। परत्वके कारण ऋकारान्त धातु और हन् धातुके उत्तर स्थित स्यको नित्य इट् होगा–स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टाम्। अस्वार्षीत्। अस्वार्ष्टाम्॥ स्मृ धातु चिन्ता करनेमें है॥ ह्वृ धातु संवरणमें है॥ सृ धातु गतिमें है। क्रादित्वके कारण इट् न होगा–ससर्थ। सस्रिव। ऋकारके स्थानमें रिङ् हुआ–। स्रियात्। असार्षीत्। असार्ष्टाम्॥

२३८२ सर्तिशास्त्यर्तिभ्यश्च।३।१।५६॥

एभ्यश्च्लेरङ् स्यात्कर्तरि लुङि। इह लुग्विकरणशासिना साहचर्यात्सर्त्यर्ती जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योर्नाङ्। शीघ्रगतौ तु पाघ्राध्मेति शिति धौरादेशः। धावति॥ ३४॥ ऋ गतिप्रापणयोः। ऋच्छति॥

२३८२–कर्तृ वाच्यमें लुङ् परे रहते सृ, शास् और ऋ धातुके उत्तर च्लिके स्थानमें अङ् हो। इस स्थलमें लुग्विकरण शास धातुके साहचर्यके कारण 'सर्त्ति' और 'अर्त्ति' धातु भी जुहोत्यादिगणीय गृहीत हुए हैं, इस कारण भ्वादि गणीय उक्त धातुके उत्तर अङ् नहीं होगा। शीघ्र गतिके अर्थमें "पाघ्राध्मा०" इस सूत्रसे शित् परे धौ आदेश होगा—धावति॥ ऋ धातु गति और प्रापणार्थमें है—ऋच्छति॥

२३८३ ऋच्छत्यृताम्। ७। ४। ११॥

तौदादिकऋच्छेर्ऋधातोर्ॠतां च गुणः स्याल्लिटि। णलि प्राग्वदुपधावृद्धिः। आर। आरतुः। आरुः॥

२३८३–लिट् परे रहते तुदादिगणीय ऋच्छ धातु और ऋ धातु और ॠकारान्त धातुके ऋकारको गुण हो। णल् परे रहते पूर्ववत् उपधाको वृद्धि होगी–आर। आरतुः। आरुः॥

२३८४ इडत्त्यर्तिव्ययतीनाम्।७।२।६६॥

अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टाम्॥ ३५॥ गृ घृ सेचने। गरति। जगार। जगर्थ। जग्रिव। रिङ्। ग्रियात्। अगार्षीत्॥ ३७॥ ध्वृ हूर्छने॥ ३८॥ स्रु गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। णिश्रीति चङ्। लघूपधगुणादन्तरङ्गत्वादुवङ्। असुस्रुवत्॥ ३९॥ षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सुषोथ–सुषविथ। सुषुविव। सोता॥

२३८४–अद, ऋ और व्येञ् धातुके उत्तर थल् प्रत्ययको नित्य इट्का आगम हो। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टाम्॥ गृ और घृ धातु सेचन करनेमें है। गरति। जगार। जगर्थ। जग्रिव। ऋके स्थानमें रिङ् आदेश होगा। ग्रियात्। अगार्षीत्॥ ध्वृ धातु हूर्छनमें है॥ स्रु धातु गतिमें है। सुस्रोथ। सुस्रुव। स्रूयात्।

"णिश्रि० २३१२" इस सूत्रसे चङ् हुआ, लघूपध गुणको बाधकर अन्तरङ्गत्वके कारण उवङ् हुआ–असुसुवत् ॥ सु धातु प्रसव और ऐश्वर्यमें है । प्रसव शब्दसे अभ्यनुज्ञा जानना। सुषोथ, सुषुविथ । सुषुविव । सोता ॥

२३८५ स्तुसुधूञ्भ्यः परस्मैपदेषु।७।२।७२॥

एभ्यः सिच इट् स्यात्परस्मैपदेषु । असावीत् । पूर्वोत्तराभ्यां ञिद्भ्यां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे । असौषीत् ॥ ४० ॥ श्रु श्रवणे ॥

२३८५–स्तु, सु और धूञ् धातुके उत्तर परस्मैपदमें सिच्को इट्का आगम हो–असावीत् । पूर्वोत्तर ञित्के (ञ्इत् धातुके) साहचर्य्यके कारण ' सुनोति ' इस सु धातुका ही ग्रहण है–असौषीत् ॥ श्रु धातु श्रवणमें है ॥

२३८६ श्रुवः शृ च । ३ । १।७४॥

श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च । शपोपवादः । श्नोर्ङित्वाद्धातोर्गुणो न । शृणोति। शृणुतः ॥

२३८६–श्रु धातुके स्थानमें शृ आदेश और श्नु प्रत्यय हो। यह आदेश शप्का विशेषक है । श्नु प्रत्ययके ङित्वके कारण धातुके उकारको गुण नहीं होगा । शृणोति । शृणुतः ॥

२३८७हुश्नुवोः सार्वधातुके ।६।४।८७॥

जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चासंयोगपूर्वोवर्णस्य यण् स्यादजादौ सार्वधातुके । उवङोऽपवादः । शृण्वन्ति । शृणोमि । शृण्वः–शृणुवः । शृण्मः–शृणुमः। शुश्रोथ। शुश्रुव। शृणु। शृणवानि । शृणुयात् । श्रूयात्।अश्रौषीत् ॥४१॥ ध्रु स्थैर्ये। ध्रुवति।अयं कुटादौ गत्यर्थोऽपि ॥४२॥ दु द्रु गतौ । दुदोथ–दुदविथ । दुदुविव । दुद्रोथ । दुद्रुव । णिश्रीति चङ्। अदुद्रुवत्॥४३॥ जि ज्रि अभिभवे । अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्य सकर्मकः । शत्रून् जयति । द्वितीये त्वकर्मकः । अध्ययनात्पराजयते । अध्येतुं ग्लायतीत्यर्थः। विपराभ्यां जेरिति तङ्। पराजेरसोढ इत्यपादानत्वम् ॥ ४९ ॥

अथ डीङन्ता ङितः ॥ ष्मिङ् ईषद्धसने । स्मयते । सिष्मिये । सिष्मियिढ्वे–सिष्मियिध्वे ॥ १ ॥ गुङ् अव्यक्ते शब्दे । गवते । जुगुवे ॥ २ ॥ गाङ् गतौ । गाते । गाते । गाते । इट एत्वे कृते वृद्धिः । गै । लङ इटि । अगे । गेत । गेयाताम् । गेरन् । गासीष्ट । गाङ्कुटादिसूत्रे इङादेशस्यैव गाङो ग्रहणं न त्वस्य । तेनाङित्वाद् घुमास्थेतीत्वं न । अगास्त । अदादिकोऽयमिति हरदत्तादयः । फले तु न भेदः ॥ ॥ ३ ॥ कुङ् घुङ् उङ् ङुङ् शब्दे । अन्ये तु उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्याहुः । कवते । चुकुवे । घवते । अवते । ऊवे । वार्णादाङ्गं बलीय इत्युवङ् । ततः सवर्णदीर्घः । ओता । ओष्यते । ओषीष्ट । औष्ट । ङवते । ञुङुवे । ङोता ॥७॥ च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ ॥११॥ क्लुङ् इत्येके ॥ १२ ॥ रुङ् गतिरेषणयोः । रेषणं हिंसा । रुरुवे । रवितासे ॥ १३ ॥ धृङ् अवध्वंसने । धरते । दध्रे ॥ १४ ॥ मेङ् प्रणिदाने । प्रणिदानं विनिमयः प्रत्यर्पणं च । प्रणिमयते । नेर्गदेति णत्वम् । तत्र घुप्रकृतिमाङिति पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात् ॥ ॥ १९ ॥ देङ् रक्षणे । दयते ॥

२३८७–अजादि सार्वधातुक प्रत्यय परे रहते हु धातु तथा श्नुप्रत्ययान्त अनेकाच् अङ्गसंज्ञक धातुके असंयोग पूर्वक उवर्णके स्थानमें यण् आदेश हो । यह उवङ्का अपवाद है । शृण्वन्ति । शृणोमि । शृण्वः, शृणुवः । शृण्मः, शृणुमः । शुश्रोथ । शुश्रुव । शृणु। शृणवानि। शृणुयात् । श्रूयात् । अश्रौषीत् ॥ ध्रु धातु स्थैर्य्यमें है । ध्रवति । ध्रु धातु कुटादि होनेपर गत्यर्थक हो ॥ दु और द्रु धातु गतिमें है। दुदोथ, दुदविथ। दुदुविव । दुद्रोथ । दुद्रुव । "णिश्रि० २३१२" इस सूत्रसे चङ् हुआ–अदुद्रुवत् ॥ जि और ज्रि धातु अभिभवमें हैं। अभिभव शब्दसे न्यूनीकरण और न्यूनीभवन जानना । प्रथम अर्थमें सकर्मक है–शत्रून् जयति । द्वितीय अर्थमें अकर्मक है–अध्ययनात् पराजयते, अर्थात् अध्ययनके निमित्त ग्लानिको प्राप्त होताहै "विपराभ्यां जेः २६२५" (वि और परापूर्वक जि धातुके उत्तर आत्मनेपदसंज्ञक प्रत्यय हों) इससे तङ् हुआ, "पराजेरसोढः ५८९" इस सूत्रसे अपादानत्व हुआ ॥

अब डीङ् धातु तक ङकारइत् धातु कहतेहैं ।

ष्मिङ् धातु ईषद्धसनमें है । स्मयते । सिष्मिये । सिष्मियिढ्वे, सिष्मियिध्वे॥गुङ् धातु अव्यक्त शब्दमें है। गवते ।जुगुवे॥

गाङ् धातु गतिमें है । गाते । इट्के स्थानमें एत्व होनेपर वृद्धि होगी–गै । लङ्के स्थानमें इट् करनेपर–अगे । गेत। गेयाताम् । गेरन् । गासीष्ट । "गाङ् कुटादिभ्यः० २४६१" इस सूत्रमें इङ् धातुके स्थानमें आदिष्ट गाङ्का ही ग्रहण है गाङ् धातुका नहीं, इसी कारण ङित्ववशसे "घुमास्था० २४६२" इस सूत्रसे प्राप्त इत्व न हुआ । अगास्त । हरदत्तादिके मतमें यह अदादिगणीय है, दोनों गणमें इसके रूप एक ही तरह होंगे ॥

कुङ्, घुङ्, उङ् और ङुङ् धातु शब्द करनेमें हैं। अन्य मतमें 'उङ्,कुङ्, खुङ्,गुङ्,घुङ्, ङुङ्' धातु पठित हैं। कवते। चुकुवे। घवते। अवते। ऊवे, यहां "वार्णादाङ्गं बलीयः" (वर्णके कार्यसे अंगका कार्य बलवान् होताहै) इस परिभाषासे पहले उवङ् आदेश हुआ और पीछे सवर्णदीर्घ हुआ, कारण कि, उवङ् अंगकार्य है और सवर्णदीर्घ वर्णकार्य है। ओता। ओष्यते। ओषीष्ट। औष्ट। ङवते। जुङुवे। ङोता॥ च्युङ्, ज्युङ्, प्रुङ् और प्लुङ् धातु गतिमें हैं। किसीके मतमें क्लुङ् धातु भी उक्तार्थमें है॥ रुङ् धातु गति और रेषणमें है, रेषण शब्दसे हिंसा जानना। रुरुवे। रवितासे॥ धृङ् धातु अवध्वंसनमें है। धरते। दध्रे॥ मेङ् धातु प्रणिदान अर्थात् विनिमय और प्रत्यर्पणमें है।

प्रणिमयते। "नेर्गद० २२८५" इस सूत्रसे णत्व हुआ, कारण कि, इस सूत्रमें घु प्रकृतिक माङ् ऐसा पाठ करके ङ्इत् प्रकृतिमेंके भी ग्रहणका इष्टत्व होताहै॥ देङ् धातु रक्षणमें है, दयते॥

२३८८ दयतेर्दिगि लिटि। ७। ४।९॥

दिग्यादेशेन द्वित्वबाधनमिष्यत इति वृत्तिः। दिग्ये॥

२३८८-लिट् परे रहते देङ् धातुके स्थानमें 'दिगि' आदेश हो। दिगि आदेशसे द्वित्वका बाध इष्ट है, अर्थात् दिगि आदेश होनेपर द्वित्व न हो, ऐसी वृत्ति है-दिग्ये॥

२३८९ स्थाघ्वोरिच्च। १। २। १७॥

अनयोरिदादेशः स्यात् सिच्च कित्स्यात्। अदित। अदिथाः। अदिषि॥ १६॥ श्यैङ् गतौ। श्यायते। शश्ये॥ १७॥ प्यैङ् वृद्धौ। प्यायते। पप्ये। प्याता॥ १८॥ त्रैङ् पालने। त्रायते। तत्रे॥ १९॥ पूङ् पवने। पवते। पुपुवे। पविता॥ २०॥ मूङ् बन्धने। मवते॥ २१॥ डीङ् विहायसा गतौ। डयते। डिड्ये। डयिता॥ २२॥ तॄ प्लवनतरणयोः॥

२३८९-स्था और घुसंज्ञक धातुओंको इदादेश हो और सिच् की कित्संज्ञा हो। अदित। अदिथाः। अदिषि॥ श्यैङ् धातु गतिमें है। श्यायते। शश्ये॥ प्यैङ् धातु वृद्धिमें है। प्यायते। पप्ये। प्याता॥ त्रैङ् धातु पालन करनेमें है। त्रायते। तत्रे॥ पूङ् धातु पवनमें है। पवते। पुपुवे। पविता॥ मूङ् धातु बन्धनार्थमें है। मवते॥ डीङ् धातु आकाशगमनमें है। डयते। डिड्ये। डयिता॥ तॄ धातु प्लवन और तरणमें है॥

२३९० ॠत इद्धातोः। ७। १। १००॥

ॠदन्तस्य धातोरङ्गस्य इत्स्यात्॥ इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन॥ *॥ तरति। ॠच्छत्यॄतामिति गुणः। तॄफलेत्येत्वम्। तेरतुः। तेरुः॥

२३९०-ॠदन्त अङ्गसंज्ञक धातुको इत् हो। पूर्वविप्रतिषेधसे इत्व और उत्वको बाधकर गुण और वृद्धि हो * तरति "ॠच्छत्यॄताम् २३८३" इस सूत्रसे गुण हुआ। "तॄफल० २३०१" इस सूत्रसे एत्व होगा-तेरतुः। तेरुः॥

२३९१ वॄतो वा। ७। २। ३८॥

वृङ्वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। तरीता-तरिता। अलिटीति किम्। तेरिथ। हलि चेति दीर्घः। तीर्यात्॥

२३९१-वृङ्, वृञ् और ॠदन्त धातुके उत्तर इट्को विकल्प करके दीर्घ हो लिट् परे न हो-तरीता, तरिता। लिट् परे रहते-तेरिथ। "हलि च २५४" इस सूत्रसे दीर्घ होगा-तीर्यात्॥

२३९२ सिचि च परस्मैपदेषु। ७।२।४०॥

अत्र वॄत इटो दीर्घो न। अतारिष्टाम्॥२३॥ अथाष्टावनुदात्तेतः। गुप गोपने॥ १॥ तिज निशाने॥ २॥ मान पूजायाम्॥ ३॥ बध बन्धने॥

२३९२-परस्मैपद संज्ञक प्रत्ययपरक सिच् परे रहते वृङ्, वृञ् और ॠदन्त धातुके उत्तर इट्को दीर्घ न हो। अतारिष्टाम्॥

अब आठ अनुदात्तेत् धातु कहे जातेहैं॥

गुप धातु छिपानेमें है॥ तिज धातु निशानमें है॥ मान धातु पूजा करनेमें है॥ बध धातु बन्धनमें है॥

२३९३ गुप्तिज्किद्भ्यः सन्। ३।१।५॥

२३९४ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। ३। १। ६॥

सूत्रद्वयोक्तेभ्यः सन् स्यान्मानादीनामभ्यासस्येकारस्य दीर्घश्च॥ गुपेर्निन्दायाम्॥ *॥ तिजेः क्षमायाम्॥ *॥ कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च॥ *॥ मानेर्जिज्ञासायाम्॥ *॥ बधेश्चित्तविकारे॥ *॥ दानेरार्जवे॥ *॥ शानेर्निशाने॥ *॥ सनाद्यन्ता इति धातुत्वम्॥

२३९३-२३९४-इन दोनों सूत्रोंमें जो गुप तिज और ककारइत् धातु और मान, बध, दान और शान धातु इन धातुओंके उत्तर सन् प्रत्यय हो, उनमें मानादि धातुओंके अभ्याससम्बन्धी इकारको दीर्घ हो। किस धातुके उत्तर किस अर्थमें सन् होगा सो दिखाते हैं-गुप धातुके उत्तर निन्दार्थमें, तिज धातुके उत्तर क्षमार्थमें, कित् धातुके उत्तर व्याधिप्रतीकार, निग्रह और अपनयन, नाश और संशयार्थमें, मान धातुके उत्तर जिज्ञासार्थमें, बध धातुके उत्तर चित्तविकारार्थमें, दान धातुके उत्तर आर्जवार्थमें, और शान धातुके उत्तर निशानार्थमें ही सन् हो। "सनाद्यन्ताः० २३०४" इस सूत्रसे धातुत्व होगा॥

२३९५ सन्यङोः । ६ । १ । ९ ॥

सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य । अभ्यासकार्यम् । गुपिप्रभृतयः किद्भिन्ना निन्दाद्यर्थका एवानुदात्तेतः । दानशानौ च स्वरितेतौ । एते नित्यं सन्नन्ताः । अर्थान्तरे त्वननुबन्धकाश्चुरादयः । अनुबन्धस्य केवलेऽचरितार्थत्वात्सन्नन्तात्तङ् । धातोरित्यविहितत्वात्सनोत्र नार्धधातुकत्वम् । तेनेड्गुणौ न। जुगुप्सते । जुगुप्सांचक्रे । तितिक्षते । मीमांसते । भष्भावः । चर्त्वम् । बीभत्सते ॥ ४ ॥ रभ राभस्ये । आरभते । आरेभे । रब्धा । रप्स्यते ॥ ५ ॥ डुलभष् प्राप्तौ । लभते ॥ ६ ॥ ष्वञ्ज परिष्वङ्गे ॥

२३९५–सन्नन्त और यङन्त धातुके प्रथम एकाच्को द्वित्व हो। अजादि धातुके द्वितीय एकाच्को द्वित्व हो। द्वित्व होनेपर अभ्यासकार्य्य होगा। किद्भिन्न निन्दाद्यर्थक ही गुपिआदि धातु अनुदात्तेत् अर्थात् आत्मनेपदी हैं, दान और शान धातु उभयपदी हैं, यह सब धातु नित्य सन्नन्त हैं, किन्तु अर्थान्तरमें अनुबन्धशून्य चुरादिगणीय हैं, केवल धातुमें अनुबन्धके अचरितार्थत्वके कारण सन्नन्तसे आत्मनेपद होगा । धातुका अधिकार करके विहित न होनेके कारण इस स्थलमें सन्को आर्धधातुकत्व नहीं हुआ, इस कारण इट् और गुण भी न हुआ–जुगुप्सते । जुगुप्सांचक्रे । तितिक्षते । मीमांसते । भष्भाव और चर्त्व हुआ–बीभत्सते ॥ रभ धातु राभस्य अर्थात् आरंभ करना अर्थमें है । आरभते । आरेभे । रब्धा । रप्स्यते ॥ डुलभष् धातु प्राप्तिमें है । लभते ॥ ष्वञ्ज धातु परिष्वङ्गमें है ॥

२३९६ दंशसञ्जस्वञ्जां शपि।६।४।२५॥

२३९६–शप् परे रहते दंश, सञ्ज, स्वञ्ज इन धातुओंके नकारका लोप हो ॥

२३९७ रञ्जेश्च । ६ । ४ । २६ ॥

एषां शपि न लोपः । स्वजते । परिष्वजते ॥ श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः किर्त्वं वेति व्याकरणान्तरम्॥ देभतुः । सस्वज इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते । सदेः परस्य लिटीतिसूत्रे, स्वञ्जेरुपसंख्यानम् ॥ * ॥ अतोऽभ्यासात्परस्य षत्वं न । परिषस्वजे–परिषस्वञ्जे । सस्वजिषे–सस्वञ्जिषे । स्वंक्ता । स्वङ्क्ष्यते । स्वजेत । स्वङ्क्षीष्ट । अस्वंक्त । प्रत्यष्वंक्त । प्राक्सितादिति षत्वम् । परिनिविभ्यस्तु सिवादीनां वेति विकल्पः । एतदर्थमेवोपसर्गात्सुनोतीत्येव सिद्धे स्तुस्वञ्ज्योः परिनिवीत्यत्र पुनरुपादानम् । पर्यष्वंक्त–पर्यस्वंक्त ॥ ७॥

हद पुरीषोत्सर्गे । हदते । जहदे । हत्ता । हत्स्यते। हदेत । हत्सीष्ट । अहत्त ॥

अथ परस्मैपदिनः ॥ ञिष्विदा अव्यक्ते शब्दे ॥ १ ॥ स्कन्दिर् गतिशोषणयोः । चस्कन्दिथ–चस्कन्थ । स्कन्ता । स्कन्त्स्यति । नलोपः । स्कद्यात् । इरित्वादङ् वा । अस्कदत्–अस्कान्त्सीत् । अस्कान्ताम् । अस्कान्त्सुः ॥

२३९७–शप् परे रहते रञ्ज धातुके भी नकारका लोप हो। स्वजते । परिष्वजते ॥ श्रन्थि, ग्रन्थि, दंभि और स्वञ्जि धातुके उत्तर स्थित लिट्को विकल्प करके कित्त्व हो, यह दूसरे व्याकरणका मत है, भाष्यमें " देभतुः, सस्वजे " ऐसे उदाहरण देखेजानेके कारण इस स्थानमें भी उस व्याकरणका आश्रयण हुआहै । " सदेः परस्य लिटि २३३१ " इस सूत्रमें वृत्तिकारने स्वञ्ज धातुका उपसंख्यान (स्वञ्ज धातुसम्बन्धी अभ्याससे परे स्थित सकारको षत्वनिषेध) कियाहै, इस कारण अभ्याससे पर भागको षत्व नहीं होगा–परिषस्वजे, परिषस्वञ्जे । सस्वजिषे। सस्वञ्जिषे। स्वङ्क्ता। स्वङ्क्ष्यते। स्वजेत। स्वङ्क्षीष्ट । अस्वङ्क्त । प्रत्यष्वङ्क्त, यहां " प्राक्सितात्० २२७६" इस सूत्रसे षत्व हुआ ।

परि, नि और विपूर्वक स्वञ्ज धातुके " सिवादीनां वा २३५९ " इस सूत्रसे सकारको विकल्प करके षत्व होगा, इस कारण ही " उपसर्गात् सुनोति० २२७० " इस सूत्रसे षत्व सिद्ध होनेपर भी " परिनिविभ्यः० २२७५ " इस सूत्रमें दुबारा ग्रहण कियाहै । पर्यष्वंक्त, पर्यस्वंक्त ॥

हद धातु मलत्यागनेमें है । हदते । जहदे । हत्ता । हत्स्यते। हदेत । हत्सीष्ट । अहत्त ॥

अब परस्मैपदी धातु कहे जातेहैं ।

ञिष्विदा धातु अव्यक्त शब्द करनेमें है ॥ स्कन्दिर् धातु गति और शोषणमें है । चस्कन्दिथ, चस्कन्थ । स्कन्ता । स्कन्त्स्यति । नकारका लोप हुआ–स्कद्यात् । इरित् धातुके उत्तर विकल्प करके अङ् होताहै–अस्कदत्, अस्कान्त्सीत् । अस्कान्ताम् । अस्कान्त्सुः ॥

२३९८ वेस्कन्देरनिष्ठायाम् ।८।३।७३॥

षत्वं वा स्यात् । कृत्यमेवेदम् । अनिष्ठायामितिपर्युदासात् । विष्कन्ता–विस्कन्ता । निष्ठायां तु विस्कन्नः ॥

२३९८–निष्ठाभिन्न प्रत्यय परे रहते विपूर्वक स्कन्द धातुके सकारको विकल्प करके षत्व हो । 'अनिष्ठायाम्' इस सूत्रोक्त पर्युदासके कारण कृत्य प्रत्यय परे रहते ही विकल्प करके षत्व हो, अन्य प्रत्यय परे रहते न हो । विष्कन्ता, विस्कन्ता । निष्ठा प्रत्यय परे षत्व नहीं होगा–विस्कन्नः ॥

२३९९ परेश्च । ८ । ३ । ७४ ॥

अस्मात्परस्य स्कन्देः सस्य षो वा । योगविभागादनिष्ठायामिति न संबध्यते । परिष्कन्दति–परिस्कन्दति।परिष्कण्णः–परिस्कन्नः।षत्वपक्षे

णत्वम् । न च पदद्वयाश्रयतया बहिरङ्गत्वात्षत्वस्यासिद्धत्वम् । धातूपसर्गयोः कार्यमन्तरङ्गमित्यभ्युपगमात् । पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यम् । पूर्वं साधनेनेति मतान्तरे तु न णत्वम् ॥ २ ॥ यभ मैथुने । येभिथ-ययब्ध । यब्धा । यप्स्यति । अयाप्सीत् ॥ ३ ॥ णम प्रह्वत्वे शब्दे च । नेमिथ-ननन्थ । नन्ता । अनंसीत् । अनंसिष्टाम् ॥४ ॥ गम्लृ सृप्लृ गतौ ॥

२३९९-परिपूर्वक स्कन्द धातुके सकारको विकल्प करके षत्व हो । भिन्न सूत्र करणके कारण इस स्थलमें 'अनिष्ठायाम्' इस सूत्रोक्त पर्य्युदासका संबन्ध नहीं होगा । परिष्कन्दति, परिस्कन्दति । परिष्कण्णः, परिस्कन्नः । षत्व होनेपर णत्व होगा । पद द्वयके आश्रयके कारण षत्वविधायक सूत्रके बहिरङ्गत्वके कारण असिद्धि होगी ऐसा कहना चाहिये, क्योंकि धातु और उपसर्गका जो कार्य्य है वह अन्तरङ्ग है, बहिरंग नहीं है, इस कारण भाष्यकारने कहाहै कि, प्रथम धातु और उपसर्गके साथ युक्त होताहै, पश्चात् कार्य होताहै । पूर्वमें ही कार्य हो, ऐसा मतान्तर है, तब णत्व नहीं होगा ॥

यभ धातु मैथुनमें है । येभिथ, ययब्ध । यब्धा । यप्स्यति । अयाप्सीत् ॥ णम धातु प्रह्वत्व और शब्दमें है । नेमिथ, ननन्थ । नन्ता । अनंसीत् । अनंसिष्टाम् ॥ गम्लृ और सृप्लृ धातु गतिमें हैं ॥

२४०० इषुगमियमां छः । ७।३। ७७ ॥

एषां छः स्याच्छिति परे । गच्छति।जगाम। जग्मतुः । जग्मुः । जगमिथ-जगन्थ । गन्ता॥

२४००-शित् प्रत्यय परे रहते इषु, गम् और यम् इन धातुओंके अन्त्य वर्णके स्थानमें छ आदेश हो । गच्छति । जगाम । जग्मतुः । जग्मुः । जगमिथ, जगन्थ । गन्ता ॥

२४०१ गमेरिट् परस्मैपदेषु ।७।२।५८॥

गमेः परस्य सकारादेरिट् स्यात्।गमिष्यति। लृदित्त्वादङ् । अनङीतिपर्युदासान्नोपधालोपः । अगमत् । सर्पति । ससर्प ॥

२४०१-परस्मैपदमें गम धातुके उत्तर स्थित सकारादि प्रत्ययको इट्का आगम हो । गमिष्यति । लृदित् होनेके कारण गम धातुके उत्तर अङ् होगा " गमहन० " इस सूत्रमें ' अनङि ' इस पर्य्युदास विधानके कारण धातुकी उपधाका लोप न होगा-अगमत् ॥ सर्पति । ससर्प ॥

२४०२ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् । ६ । १ । ५९ ॥

उपदेशेनुदात्तो य ऋदुपधस्तस्याम्वा स्याज्झलादावकिति परे । स्रप्ता-सर्प्ता । स्रप्स्यति-सर्प्स्यति । असृपत् ॥ ६ ॥ यम उपरमे । यच्छति । येमिथ-ययन्थ । यन्ता । अयंसीत् । अयंसिष्टाम् ॥ ७ ॥ तप सन्तापे । तप्ता । अताप्सीत् ॥

२४०२-झलादि अकित् प्रत्यय परे रहते उपदेशावस्थामें अनुदात्त जो ऋकारोपध धातु उसको विकल्प करके अम्का आगम हो । स्रप्ता, सर्प्ता । स्रप्स्यति, सर्प्स्यति । असृपत् ॥ यम धातु उपरममें है । यच्छति । येमिथ, ययन्थ । यन्ता । अयंसीत् । अयंसिष्टाम् ॥ तप धातु संतापमें है। तप्ता । अताप्सीत् ॥

२४०३ निसस्तपतावनासेवने८।३।१०२।

षः स्यात् । आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्विषये । निष्टपति ॥ ८ ॥ त्यज हानौ । तत्यजिथ-तत्यक्थ । त्यक्ता । अत्याक्षीत् ॥९॥ षञ्ज सङ्गे । दंशसञ्जस्वञ्जां शपीति नलोपः । सजति । सङ्क्ता ॥ १० ॥ दृशिर् प्रेक्षणे । पश्यति ॥

२४०३-आसेवन शब्द पौनःपुन्यमें है, अनासेवनमें अर्थात् अपौनःपुन्यार्थमें तप धातुके पूर्ववर्ती निस् उपसर्गके सकारको षत्व हो । निष्टपति ॥ त्यज धातु हानिमें है । तत्यजिथ, तत्यक्थ। त्यक्ता । अत्याक्षीत् ॥ षञ्ज धातु संगमें है । " दंशसञ्जस्वञ्जां शपि २३९६ " इस सूत्रसे नकारका लोप हुआ-सजति । सङ्क्ता ॥ दृशिर् धातु प्रेक्षणमें है । पश्यति ॥

२४०४ विभाषा सृजिदृशोः ।७।२।६५॥

आभ्यां थल इड्वा ॥

२४०४-सृज और दृश् धातुके उत्तर थल् प्रत्ययके स्थानमें विकल्प करके इट् हो ॥

२४०५ सृजिदृशोर्झल्यमकिति६।१।५८॥

अनयोरमागमः स्याज्झलादावकिति । दद्रष्ठ-ददर्शिथ । द्रष्टा । द्रक्ष्यति । दृश्यात् । इरित्त्वादङ् वा ॥

२४०५-कित्भिन्न झलादि प्रत्यय परे रहते सृज और दृश् धातुको अमागम हो । दद्रष्ठ, ददर्शिथ । द्रष्टा । द्रक्ष्यति । दृश्यात् । इरित्त्वके कारण विकल्पसे अङ् होगा-॥

२४०६ ऋदृशोऽङि गुणः । ७।४।१६॥

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि । अदर्शत् । अङभावे ॥

२४०६-अङ् प्रत्यय परे रहते ऋवर्णान्त धातु और दृश् धातुको गुण हो । अदर्शत् । अङ्के अभाव पक्षमें कैसा होगा सो आगेके सूत्रसे कहतेहैं-॥

२४०७ न दृशः । ३ । १ । ४७ ॥

दृशेः क्सो न । अद्राक्षीत् ॥ ११ ॥ दंश दशने । दशनं दंष्ट्राव्यापारः । पृषोदरादित्वाद-

नुनासिकलोपः । अत एव निपातनादित्येके । तेषामप्यत्रैव तात्पर्यम् । अर्थनिर्देशस्याधुनिकत्वात् । दंशसञ्जेति नलोपः । दशति। ददंशिथ-ददंष्ठ । दंष्टा । दङ्क्ष्यति । दश्यात् । अदाङ्क्षीत् ॥ १२ ॥ कृष विलेखने । विलेखनमाकर्षणम् । क्रष्टा-कर्ष्टा । क्रक्ष्यति-कर्क्ष्यति ॥ स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः ॥ * ॥ अक्राक्षीत् । अक्राष्टाम् । अकार्क्षीत् । अकार्ष्टाम्। अकार्क्षुः । पक्षे क्सः । अकृक्षत् । अकृक्षताम् । अकृक्षन् ॥ १३ ॥ दह भस्मीकरणे । देहिथ-ददग्ध । दग्धा । धक्ष्यति । अधाक्षीत् । अदाग्धाम् । अधाक्षुः ॥ १४ ॥ मिह सेचने । मिमेह। मिमेहिथ । मेढा । मेक्ष्यति । अमिक्षत् ॥ १५ ॥ कित निवासे रोगापनयने च । चिकित्सति । संशये प्रायेण विपूर्वः । विचिकित्सा तु संशय इत्यमरः । अस्यानुदात्तेत्त्वमाश्रित्य चिकित्सते इत्यादि कश्चिदुदाजहार।निवासे तु केतयति१६॥ दान खण्डने । शान तेजने ॥ इतो वहत्यन्ताः स्वरितेतः । दीदांसति-दीदांसते । शीशांसति-शीशांसते । अर्थविशेषे सन् । अन्यत्र दानयति । शानयति ॥ २ ॥ डुपचष् पाके । पचति । पचते । पेचिथ-पपक्थ । पेचे । पक्ता। पक्षीष्ट ॥ ३ ॥ षच समवाये । सचति। सचते॥ ॥ ४ ॥ भज सेवायाम् । बभाज । भेजतुः । भेजुः । भेजिथ-बभक्थ । भक्ता । भक्ष्यति । भक्ष्यते । अभाक्षीत् । अभक्त ॥ ५ ॥ रञ्ज रागे। नलोपः । रजति । रजते । रज्यात् । रङ्क्षीष्ट । अराङ्क्षीत् । अरङ्क्त ॥ ६ ॥ शप आक्रोशे । आक्रोशो विरुद्धानुध्यानम् । शशाप । शेपे । अशाप्सीत् । अशप्त ॥७॥ त्विष दीप्तौ । त्वेषति । त्वेषते । तित्विषे । त्वेष्टा । त्वेक्ष्यति । त्वेक्ष्यते । त्विष्यात् । त्विक्षीष्ट । अत्विक्षत् । अत्विक्षत । अत्विक्षाताम् । अत्विक्षन्त ॥ ८ ॥ यज देवपूजासङ्गतिकरणदानेषु । यजति । यजते ॥

२४०७-दृश् धातुके उत्तर च्लिके स्थानमें क्स आदेश नहीं हो । अद्राक्षीत् ॥ दंश धातु काटनेमें है।यहां (दंशनमें) पृषोदरादित्वके कारण अनुनासिक (नकार)का लोप हुआ,इसी निपातनके कारण लोप हुआ, यह कोई २ कहतेहैं, उनका भी इसीमें तात्पर्य्य है कारण कि, अर्थका निर्देश आधुनिक है । "दंशसञ्ज०२३९६" इस सूत्रसे नकारका लोप हुआ-दशति। ददंशिथ, ददंष्ठ । दंष्टा । दङ्क्ष्यति । दश्यात् । अदाङ्क्षीत् ॥ कृष धातु विलेखन अर्थात् आकर्षणमें है । क्रष्टा, कर्ष्टा । क्रक्ष्यति, कर्क्ष्यति ॥

स्पृश, मृश, कृष, तृप और दृप धातुके उत्तर च्लिके स्थानमें विकल्प करके सिच् हो * अक्राक्षीत् । अक्राष्टाम् । अकार्क्षीत् । अकार्ष्टाम् । अकार्क्षुः । विकल्प पक्षमें क्स होकर-अकृक्षत् । अकृक्षाताम् । अकृक्षन् ॥

दह धातु जलानेमें है । देहिथ, ददग्ध । दग्धा । धक्ष्यति । अधाक्षीत् । अदाग्धाम् । अधाक्षुः ॥ मिह धातु सेचनमें है । मिमेह । मिमेहिथ । मेढा । मेक्ष्यति । अमिक्षत्॥कित् धातु निवास और रोगापनयनमें है । चिकित्सति । संशयार्थमें कित् धातु प्रायः विपूर्वक होताहै, क्योंकि अमरकोषमें " विचिकित्सा तु संशयः " ऐसा कहाहै, इस कित् धातुके अनुदात्तेत्त्व आश्रय करके ' चिकित्सते ' इत्यादि कोई २ उदाहरण देते हैं, परन्तु निवासार्थमें ' केतयति ' ऐसा होगा ॥ दान धातु खण्डनमें है ॥ शान धातु तेजनमें है ॥

यहांसे लेकर वह धातु पर्यन्त स्वरितेत् हैं ॥

दीदांसति । दीदांसते । शीशांसति । शीशांसते । अर्थविशेषमें ही सन् होताहै अन्यत्र नहीं, जैसे-दानयति । शानयति ॥ डुपचष् धातु पाकमें है । पचति । पचते । पेचिथ, पपक्थ । पेचे । पक्ता । पक्षीष्ट ॥ षच धातु समवायमें है । सचति । सचते ॥ भज धातु सेवामें है । बभाज । भेजतुः । भेजुः । भेजिथ, बभक्थ । भक्ता । भक्ष्यति । भक्ष्यते । अभाक्षीत् । अभक्त ॥ रञ्ज धातु रंगनेमें है । इस धातुके नकारका लोप होगा-रजति । रजते । रज्यात् । रङ्क्षीष्ट । अराङ्क्षीत् । अरङ्क्त॥शप धातु आक्रोश अर्थात् विरुद्ध चिन्तामें जानना । शशाप । शेपे । अशाप्सीत् । अशप्त॥ त्विष धातु दीप्तिमें है । त्वेषति । त्वेषते । तित्विषे । त्वेष्टा । त्वेक्ष्यति । त्वेक्ष्यते । त्विष्यात् । त्विक्षीष्ट । अत्विक्षत् । अत्विक्षत । अत्विक्षाताम्॥ अत्विक्षन्त यज धातु देवपूजा, संगतिकरण और दानमें है । यजति । यजते ॥

२४०८ लिट्यभ्यासस्योभयेषाम् । ६ । १ । १७ ॥

वच्यादीनां ग्रहादीनां चाभ्यासस्य सम्प्रसारणं स्याल्लिटि ॥ इयाज ॥

२४०८-लिट् परे रहते वच्यादि और ग्रहादि धातुओंके अभ्यासको संप्रसारण हो-इयाज ॥

२४०९ वचिस्वपियजादीनां किति। ६ । १ । १५ ॥

वचिस्वप्योर्यजादीनां च सम्प्रसारणं स्यात्किति । पुनःप्रसङ्गविज्ञानाद्द्वित्वम् । ईजतुः । ईजुः । इयजिथ-इयष्ठ । ईजे । यष्टा । यक्ष्यति । यक्ष्यते । इज्यात् । यक्षीष्ट । अयाक्षीत् । अयष्ट ॥ ९ ॥ डुवप् बीजसन्ताने । बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं च । अयं छेदनेपि । केशान्वपति । उवाप । ऊपे । वप्ता । उप्यात् । वप्सीष्ट । प्रण्यवाप्सीत् । अवप्त ॥ १० ॥ वह प्रापणे । उवाह । उवहिथ ॥ सहिवहोरोदवर्णस्य ॥ उवोढ । ऊहे । वोढा । वक्ष्य-

ति । वक्ष्यते । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवोढ्म् ॥ ११ ॥ वस निवासे परस्मैपदी । वसति । उवास ॥

२४०९–कित् प्रत्यय परे रहते वच और स्वप और यजादि धातुओंको संप्रसारण हो । पुनर्वार प्रसङ्ग विज्ञानके कारण द्वित्व होगा–ईजतुः । ईजुः । इयजिथ, इयष्ठ । ईजे । यष्टा । यक्ष्यति।यक्ष्यते। इज्यात् । यक्षीष्ट । अयाक्षीत् । अयष्ट॥ डुवप् धातु क्षेत्रमें बीज बोना और गर्भाधानमें है । यह डुवप धातु छेदनार्थमें भी है । केशान्–वपति । उवाप । ऊपे । वप्ता । उप्यात् । वप्सीष्ट । प्रण्यवाप्सीत् । अवप्त ॥ वह धातु प्राप्ति करनेमें है । उवाह । उवहिथ । "सहिव हो रोदवर्णस्य २३५७" इस सूत्रसे अवर्णके स्थानमें ओकार हुआ । वोढा। वक्ष्यति।वक्ष्यते। अवाक्षीत्। अवोढाम् । अवाक्षुः। अवोढ। अवक्षाताम् । अवक्षत । अवोढाः । अवोढ्म् ॥ वस धातु निवासमें है, यह धातु परस्मैपदी है । वसति । उवास ॥

२४१० शासिवसिघसीनां च।८।३।६०॥

इण्कुभ्यां परस्यैषां सस्य षः स्यात् । ऊषतुः । ऊषुः । उवसिथ–उवस्थ । वस्ता ॥ (सः स्यार्धधातुके २३४२) वत्स्यति । उष्यात् । अवात्सीत् । अवात्ताम् ॥ १२ ॥ वेञ् तन्तुसन्ताने । वयति । वयते ॥

२४१०–इण् और कवर्गके उत्तर शास्, वस् और घस् धातुके सकारको षत्व हो । ऊषतुः । ऊषुः । उवसिथ, उवस्थ । वस्ता । आर्धधातुक परे सकारके स्थानमें तकार हो (२३४२) वत्स्यति । उष्यात् । अवात्सीत्। अवात्ताम्। वेञ् धातु तंतुविस्तार अर्थात् वस्त्रादि बुननेमें है। वयति । वयते ॥

२४११ वेञो वयिः । २ । ४ । ४१ ॥

वा स्याल्लिटि । इकार उच्चारणार्थः । उवाय ॥

२४११–लिट् परे रहते वेञ् धातुके स्थानमें विकल्प करके वयि आदेश हो । वयिका इकार उच्चारणार्थ है । उवाय ॥

२४१२ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । ६ । १ । १६ ॥

एषां किति ङिति च सम्प्रसारणं स्यात् । यकारस्य प्राप्ते ॥

२४१२–कित्, और ङित् प्रत्यय परे रहते ग्रह, ज्या, वय, व्यध, वश, विच् वृश्च, प्रच्छ और भ्रस्ज धातुको संप्रसारण हो । इससे यकारके स्थानमें संप्रसारण प्राप्त होनेपर आगे कहतेहैं ॥

२४१३ लिटि वयो यः । ६ । १ । ३८॥

वयो यस्य सम्प्रसारणं न स्याल्लिटि।ऊयतुः।ऊयुः॥

२४१३–लिट् परे रहते वय धातुके यकारको संप्रसारण न हो । ऊयतुः । ऊयुः ॥

२४१४ वश्चास्यान्यतरस्यां किति । ६ । १ । ३९ ॥

वयो यस्य वो वा स्यात्किति लिटि । ऊवतुः । ऊवुः । वयस्तासावभावात्थलि नित्यमिट् । उवयिथ । स्थानिवद्भावेन ञित्त्वात्तङ् । ऊये । ऊवे । वयादेशाभावे ॥

२४१४–कित् लिट् परे रहते वय धातुके यकारके स्थानमें विकल्प करके व हो । ऊवतुः। ऊवुः॥वय धातुके उत्तर तासि प्रत्ययके अभावके कारण उसके उत्तर थल्को नित्य इट् होगा–उवयिथ। स्थानिवद्भावके कारण ञित्त्व होनेसे तङ् हुआ–ऊये । ऊवे । वयादेशके अभावमें कैसा होगा सो अगले सूत्रमें कहतेहैं–॥

२४१५ वेञः । ६ । १ । ४० ॥

वेञो न सम्प्रसारणं स्याल्लिटि । ववौ। ववतुः। ववुः । वविथ–ववाथ । ववे । वाता । ऊयात्–वासीष्ट । अवासीत् ॥ १३ ॥ व्येञ् संवरणे । व्ययति । व्ययते ॥

२४१५–लिट् परे रहते वेञ् धातुको संप्रसारण न हो। ववौ । ववतुः । ववुः । वविथ,ववाथ । ववे । वाता । ऊयात्, वासीष्ट। अवासीत्॥ व्येञ् धातु संवरणमें है । व्ययति। व्ययते॥

२४१६ न व्यो लिटि । ६ । १ । ४६॥

व्येञ आत्वं न स्याल्लिटि । वृद्धिः। परमपि हलादिःशेषं बाधित्वा यस्य सम्प्रसारणम् । उभयेषां ग्रहणसामर्थ्यात् । अन्यथा वच्यादीनां ग्रह्यादीनां चानुवृत्त्यैव सिद्धे किं तेन । विव्याय । विव्यतुः । विव्युः । इडत्त्यर्तीति नित्यमिट् । विव्ययिथ । विव्याय–विव्यय । विव्ये । व्याता । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त ॥ १४ ॥ ह्वेञ् स्पर्धायां शब्दे च॥

२४१६–लिट् परे रहते व्येञ् धातुके एकारके स्थानमें आकार न हो । वृद्धि हुई । "हलादिः शेषः" इस सूत्रके परवर्त्ती होनेपर भी इसको बाध करके "लिट्यभ्यासस्योभयेषाम् २४०८" इस सूत्रसे दोनोंके ग्रहणके कारण यकारको संप्रसारण होगा, अन्यथा वच्यादि और ग्रह्यादि धातुको अनुवृत्तिद्वारा ही संप्रसारण सिद्ध होजाता तो 'उभयेषाम्' पद के ग्रहणका क्या प्रयोजन होता अर्थात् व्यर्थ होजाता । विव्याय । विव्यतुः। विव्युः । "इडत्त्यर्ति० २३८४" इस सूत्रसे नित्य इट् हुआ। विव्ययिथ । विव्याय, विव्यय । विव्ये । व्याता । वीयात् । व्यासीष्ट । अव्यासीत् । अव्यास्त ॥ ह्वेञ् धातु स्पर्द्धा और शब्दमें है ॥

२४१७ अभ्यस्तस्य च । ६।१। ३३ ॥

अभ्यस्तीभविष्यतो ह्वञः संप्रसारणं स्यात् । ततो द्वित्वम् । जुहाव । जुहुवतुः । जुहुवुः । जुहविथ-जुहोथ।जुहुवे। ह्वाता। हूयात्। ह्वासीष्ट॥

२४१७-जिसकी अभ्यस्त संज्ञा होगी ऐसा जो ह्वञ् धातु उसको संप्रसारण हो । पश्चात् द्वित्व होगा । जुहाव । जुहुवतुः । जुहुवुः । जुहविथ, जुहोथ । जुहुवे । ह्वाता । हूयात् । ह्वासीष्ट॥

२४१८ लिपिसिचिह्वश्च । ३ । १।५३॥

एभ्यश्च्लेरङ् स्यात् ॥

२४१८-लिप्, सिच् और ह्वञ् धातुके उत्तर च्लिके स्थानमें अङ् हो ॥

२४१९ आत्मनेपदेष्वन्यतरस्याम् । ३ । १ । ५४ ॥

आतो लोपः । अह्वत । अह्वताम् । अह्वन्त । अह्वत । अह्वास्त ॥ १५ ॥

अथ द्वौ परस्मैपदिनौ ॥ वद व्यक्तायां वाचि । अच्छं वदति । उवाद । ऊदतुः । उवदिथ । वदिता । उद्यात् । वदव्रजेति वृद्धिः । अवादीत् ॥१॥ टुओश्वि गतिवृद्ध्योः । श्वयति ॥

२४१९-आत्मनेपदमें उक्त धातुओंके उत्तर च्लिके स्थानमें विकल्प करके अङ् हो । अङ् परे रहते आकारका लोप हुआ (२३७२) अह्वत् । अह्वताम् । अह्वन् । अह्वत । अह्वास्त ॥

अब दो परस्मैपदी धातु कहे जातेहैं ।

वद धातु स्पष्ट कथनमें है । अच्छं वदति । उवाद । ऊदतुः । ऊदुः । उवदिथ । वदिता । उद्यात् । "वदव्रज० २२६७" इस सूत्रसे वृद्धि हुई-अवादीत् ॥ टुओश्वि धातु गति और वृद्धिमें है । श्वयति ॥

२४२० विभाषा श्वेः । ६ । १ । ३० ॥

श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च । शुशाव । शुशुवतुः॥ श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः । तेन लिट्यभ्यासस्येति संप्रसारणं न । शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात् । जॄस्तम्भ्वित्यङ् वा ॥

२४२०-लिट् और यङ् प्रत्यय परे रहते श्वि धातुको विकल्प करके संप्रसारण हो । शुशाव । शुशुवतुः ।

लिट् परे रहते श्वि धातुको अभ्यास लक्षण कार्य्यका प्रतिषेध हो इससे "लिट्यभ्यासस्य० २४०८" इस सूत्रसे लिट् परे रहते अभ्यासको संप्रसारण नहीं होगा-शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात् । "जॄस्तम्भु० २२९१" इस सूत्रसे विकल्प करके अङ् हुआ ॥

२४२१ श्वयतेरः । ७ । ४ । १८ ॥

श्वयतेरिकारस्य अकारः स्यादङि । पररूपम् । अश्वत् । अश्वताम् । अश्वन् । विभाषा धेट्श्व्योरिति चङ् । इयङ् । अशिश्वियत् । ह्म्यन्तेति न वृद्धिः । अश्वयीत् ॥ २ ॥ वृत् ॥ यजादयो वृत्ताः । भ्वादिस्त्वाकृतिगणः । तेन चुलुम्पतीत्यादिसंग्रहः ॥

॥ इति भ्वादयः ॥

२४२१-अङ् परे रहते श्वि धातुके इकारके स्थानमें अकार हो । अकार होनेपर पररूप होगा-अश्वत् । अश्वताम् । अश्वन् । "विभाषा धेट्श्व्योः २३७५" इस सूत्रसे चङ् होगा, पश्चात् इयङ् होगा-अशिश्वियत् । "ह्म्यन्त० २२९९" इस सूत्रसे निषेधके कारण वृद्धि न होगी-अश्वयीत् ॥

यजादि धातु समाप्त हुई ॥

भ्वादि धातु आकृतिगणीय हैं, इस कारण 'चुलुम्पति' इत्यादि पद सिद्ध होंगे ॥

॥ इति तिङन्ते भ्वादयः ॥

२४२२ ऋतेरीयङ् । ३ । १ । २९ ॥

ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे । जुगुप्सायामयं धातुरिति बहवः । कृपायां चेत्येके । सनाद्यन्ता इति धातुत्वम् । ऋतीयते । ऋतीयांचक्रे । आर्धधातुकविवक्षायां तु आयादय आर्धधातुके वेतीयङभावे शेषात्कर्तरीति परस्मैपदम् । आनर्त । अर्तिष्यति।आर्तीत्॥ १॥

॥ इति भ्वादिप्रकरणम् ॥

२४२२-'ऋति' यह सूत्रपठित धातु है, उसके उत्तर स्वार्थमें इयङ् प्रत्यय हो, अनेकोंके मतसे यह धातु जुगुप्सा वाचक है । कृपामें है, ऐसा एकका मत है । "सनाद्यन्ता० २३०४" इस सूत्रसे धातुत्व होकर ऋतीयते । ऋतीयाञ्चक्रे । आर्धधातुकविवक्षामें तो "आयादय आर्धधातुके वा २३०५" इस सूत्रसे इयङ्का अभाव होनेपर "शेषात्कर्तरि० २१५९" इस सूत्रसे परस्मैपद होगा । आनर्त । अर्तिष्यति । आर्तीत् ॥

॥ इति तिङन्तेभ्वादिप्रकरणम् ॥

अथादादयः २.

अद भक्षणे । द्वौ परस्मै पदिनौ ॥

अद धातु भक्षणमें है, यह दोनों धातु परस्मैपदी हैं ॥

२४२३ अदिप्रभृतिभ्यः शपः।२।४।७२॥

लुक् स्यात् । अत्ति । अत्तः । अदन्ति ॥

२४२३-अदादिगणीय धातुओंके उत्तर शप्का लुक् हो, अत्ति । अत्तः । अदन्ति ॥

२४२४ लिट्यन्यतरस्याम् ।२।४।४०॥

अदो घस्लृ वा स्याल्लिटि । जघास । गमहनेत्युपधालोपः । तस्य चर्विधिं प्रति स्थानिवद्भावनिषेधाद्घस्य चर्त्वम् । शासिवसीति षत्वम् ।

जक्षतुः । जक्षुः । घसेस्तासावभावात्थलि नित्यमिट् । जघसिथ । आद । आदतुः । इडत्त्यर्तीति नित्यमिट् । आदिथ । अत्ता । अत्स्यति ॥

२४२४–लिट् परे रहते अद् धातुके स्थानमें विकल्प करके घस्लृ आदेश हो । जघास । "गमहन० २३६३" इस सूत्रसे उपधाका लोप हुआ, उसको चर्त्व विधिमें स्थानिवद्भावके निषेधके कारण घको चर्त्व हुआ। "शासिवसि० २४१०" इस सूत्रसे षत्व हुआ । जक्षतुः । जक्षुः । घस्को तासि प्रत्यय परे अभावके कारण थल्में नित्य इट् होकर–जघसिथ । आद। आदतुः । "इडत्त्यर्ति० २३४४" इस सूत्रसे नित्य इट् होकर-आदिथ । अत्ता । अत्स्यति ॥

२४२५ हुझल्भ्यो हेर्धिः । ६ ।४।१०१॥

होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि-अत्तात् । अदानि ॥

२४२५–हु धातु और झलन्त धातुके उत्तर हिके स्थानमें धि आदेश हो, अद्धि । अत्तात् । अदानि ॥

२४२६ अदः सर्वेषाम् । ७ । ३।१००॥

अदः परस्यापृक्तसार्वधातुकस्याडागमः स्यात्सर्वमतेन । आदत् । आत्ताम्।आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् । अद्युः। अद्यात्।अद्यास्ताम् । अद्यासुः ॥

२४२६–सब वैयाकरणोंके मतसे अद धातुके उत्तर अपृक्त सार्वधातुकको अडागम हो । आदत् । आत्ताम् । आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् । अद्युः । अद्यात् । अद्यास्ताम् । अद्यासुः ॥

२४२७ लुङ्सनोर्घस्लृ । २ । ४ । ३७॥

अदो घस्लृ स्यात् लुङि सनि च । लृदित्वादङ् । अघसत्॥२॥हन हिंसागत्योः॥प्रणिहन्ति ॥

२४२७–लुङ् और सन् परे रहते अद् धातुके स्थानमें घस्लृ आदेश हो, लृकार इत् होनेके कारण च्लिके स्थानमें अङ् होकर–अघसत् । हन धातु हिंसा और गतिमें है । प्रणिहन्ति ॥

२४२८ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति । ६ । ४ । ३७ ॥

अनुनासिकेति लुप्तषष्ठीकं वनतीतरेषां विशेषणम् । अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। यमि–रमि–नमि-गमि-हनि-मन्यतयोऽनुदात्तोपदेशाः । तनु-क्षणु-क्षिणु-ऋणु–तृणु–घृणु–वनु–मनु–तनोत्यादयः। हतः । घ्नन्ति ॥

२४२८–झलादि कित् ङित् प्रत्यय परे रहते अनुनासिकान्त तनु आदि धातुओंके और वन धातुके अन्तका लोप हो, इस सूत्रमें अनुनासिक, यह पद लुप्तषष्ठीक है, वन धातुसे भिन्न धातुका अर्थात् अनुदात्तोपदेश और तनोत्यादिका विशेषण है । यम्, रम्, नम्, गम्, हन् और मन् इतने धातु अनुदात्तोपदेश हैं । तनु, क्षणु, क्षिणु, ऋणु, तृणु, घृणु, वनु और मनु इतने तनोत्यादि धातु हैं । हतः । घ्नन्ति ॥

२४२९ वमोर्वा । ८ । ४ । २३ ॥

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः । प्रहण्मि–प्रहन्मि। प्रहण्वः–प्रहन्वः । होहन्तेरिति कुत्वम् । जघान । जघ्नतुः । जघ्नुः ॥

२४२९–व और म परे रहते उपसर्गस्थनिमित्तके उत्तर हन धातुके नकारको विकल्प करके णत्व हो । प्रहण्मि,प्रहन्मि। प्रहण्वः, प्रहन्वः । "हो हन्तेः० ३५८" इस सूत्रसे हन् धातुके हकारको कुत्व, अर्थात् घ होकर–जघान । जघ्नतुः । जघ्नुः ॥

२४३० अभ्यासाच्च । ७ । ३ । ५५ ॥

अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ–जघन्थ । हन्ता । ऋद्धनोरितीट् । हनिष्यति । हन्तु । हतात् । घ्नन्तु ॥

२४३०–अभ्यासके परे स्थित हन् धातुके हके स्थानमें घ हो । जघनिथ, जघन्थ । हन्ता । "ऋद्धनोः० २३६६" इस सूत्रसे इट् होकर–हनिष्यति । हन्तु । हतात् । घ्नन्तु ॥

२४३१ हन्तेर्जः । ६ । ४ । ३६ ॥

हौ परे । आभीयतया जस्यासिद्धत्वाद्धेर्न लुक् । जहि । हनानि । हनाव । हनाम । अहन्। अहताम् । अघ्नन् । अहनम् ॥

२४३१–हि विभक्ति परे रहते हन् धातुके स्थानमें ज आदेश हो । "असिद्धवदत्राभात्" इससे समानाश्रय आभीय कार्य्य (हिका लुक्) कर्त्तव्य रहते समानाश्रय आभीय कार्य्य (जादेश) को असिद्धत्वके कारण हिका लुक् न होकर–जहि । हनानि । हनाव । हनाम । अहन् । अहताम् । अघ्नन् । अहनम् ॥

२४३२ आर्धधातुके । २ । ४ । ३५ ॥

इत्यधिकृत्य ॥

२४३२–आर्धधातुके इसका अधिकार करके–॥

२४३३ हनो वधलिङि । २ । ४ । ४२॥

२४३३–लिङ् परे रहते हन् धातुके स्थानमें वध आदेश हो–॥

२४३४ लुङि च । २ । ४ । ४३ ॥

वधादेशोऽदन्तः । आर्धधातुक इति विषयसप्तमी । तेनार्धधातुकोपदेशे अकारान्तत्वादतो-

लोपः । वध्यात् । वध्यास्ताम् । आर्धधातुके किम् । विध्यादौ हन्यात् । हन्तेरिति णत्वम् । प्रहण्यात् । अल्लोपस्य स्थानिवत्त्वादतो हलादेरिति न वृद्धिः । अवधीत्॥३॥ अथ चत्वारः स्वरितेतः । द्विष अप्रीतौ । द्वेष्टि । द्विष्टे । द्वेष्टा । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु । द्विष्यात् । द्विड्ढि । द्वेषाणि । द्वेषै । द्वेषावहै । अद्वेट् ॥

२४३४–लुङ् परे रहते भी हन् धातुके स्थानमें वध आदेश हो । वधादेश अकारान्त है 'आर्धधातुके' यह विषय सप्तमी है । (२३०७) इसलिये आर्धधातुक उपदेशकालमें अकारान्तत्वके कारण अकारका लोप होकर–(२३०८) वध्यात् । वध्यास्ताम् । आर्धधातुक न होनेपर विध्यादिमें 'हन्यात्' ऐसा होगा "हन्तेः ३५९" इस सूत्रसे णत्व होकर प्रहण्यात् । "अतो लोपः" इस सूत्रसे जो अकारका लोप हुआहै उसके स्थानिवद्भाव होनेसे "अतो हलादेः" इस सूत्रसे वैकल्पिक वृद्धि न होगी–अवधीत् ॥

अब चार उभयपदी धातु कहतेहैं ।

द्विष धातु अप्रीतिमें है । द्वेष्टि । द्विष्टे । द्वेष्टा । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु । द्विष्यात् । द्विड्ढि । द्वेषाणि । द्वेषै । द्वेषावहै । द्वेषामहै । अद्वेट् ॥

२४३५ द्विषश्च । ३ । ४ । ११२ ॥

लङो झेर्जुस्वा स्यात् । अद्विषुः–अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विक्षीष्ट । अद्विक्षत् ॥ १ ॥ दुह प्रपूरणे । दोग्धि । दुग्धः । धोक्षि । दुग्धे । धुक्षे । धुग्ध्वे । दोग्धु । दुग्धि । दोहानि । धुक्ष्व । धुग्ध्वम् । दोहै । अधोक् । अदोहम् । अदुग्ध । अधुग्ध्वम् । अधुक्षत् । अधुक्षत । लुग्वा दुहेतिलुक्पक्षे तथास्ध्वम्वहिषु लङ्वदपि ॥ २॥ दिह उपचये । प्रणिदेग्धि ॥ ३॥ लिह आस्वादने । लेढि । लीढः । लिहन्ति । लेक्षि । लीढे । लिक्षे । लीढ्वे । लेढु । लीढि । लेहानि । अलेट् । अलीढ । अलिक्षत् । अलिक्षताम् । अलिक्षत । अलीढ । अलिक्षावहि । अलिह्वहि ॥ ४ ॥ चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेपि । इकारोऽनुदात्तो युजर्थः । विचक्षणः प्रथयन । नुम् तु न । अन्तेदित इति व्याख्यानात् । ङकारस्तु अनुदात्तत्त्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः । तेन स्फायन्निर्मोकसन्धीत्यादि सिध्यति । चष्टे । चक्षाते ॥ आर्धधातुके इत्यधिकृत्य ॥

२४३५–द्विष धातुके उत्तर लङ्लकार सम्बन्धी झिके स्थानमें विकल्प करके जुस् हो, अद्विषुः, अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विक्षीष्ट । अद्विक्षत्॥दुह धातु प्रपूरणमें है। दोग्धि । दुग्धः । धोक्षि । दुग्धे । धुक्षे, इत्यादि । "लुग्वा दुह २३६८" इस सूत्रसे लुक् पक्षमें तथास्, ध्वम् और वहि प्रत्यय परे लङ्की समानभी रूप होंगे । दिह धातु उपचयमें है । उपचय, अर्थात् वृद्धि । प्रणिदेग्धि॥लिह धातु आस्वादनमें है। लेढि, इत्यादि ॥ चक्षिङ् धातु व्यक्त वचनमें है । यह धातु दर्शनार्थमें भी है । इकार अनुदात्त युजर्थ है, जैसे–'विचक्षणः प्रथयन्' इकार इत् होनेसे नुम् तो नहीं कहसकतेहो, कारण कि, अन्त्य इकार इत् है जिसमें ऐसे धातुको नुम् हो, ऐसा व्याख्यान है ।

अनुदात्तेत चक्षिङ् धातु होनेसे आत्मनेपद सिद्ध होनेपर भी ङकार अनुबन्ध क्यों किया ? इसपर कहतेहैं कि, अनुदात्तेत्त्वलक्षण आत्मनेपदके अनित्यत्वज्ञापनार्थ चक्षिङ् धातुमें ङकार अनुबन्ध है, अत एव 'स्फायन्निर्मोकसंधि' इत्यादि पद सिद्ध हुए ॥ चष्टे । चक्षाते । "आर्धधातुके २३७७" इसका अधिकार करके कहते हैं कि–॥

२४३६ चक्षिङः ख्याञ् । २ ।४।५४ ॥

२४३६–आर्धधातुकविषयमें चक्ष धातुके स्थानमें ख्याञ् आदेश हो–॥

२४३७ वा लिटि । २ । ४ । ५५ ॥

अत्र भाष्ये ख्शादिरयमादेशः । असिद्धकाण्डे शस्य यो वेति स्थितम्। ञित्त्वात्पदद्वयम्। चख्यौ–चख्ये । चख्शौ–चख्शे । चयो द्वितीया इति तु न चर्त्वस्यासिद्धत्वात् । चचक्षे । ख्याता–क्शाता । ख्यास्यति । ख्यास्यते । क्शास्यति । क्शास्यते । अचष्ट । चक्षीत । ख्यायात्–ख्येयात् । क्शायात्–क्शेयात् ॥

२४३७–लिट् परे रहते चक्ष धातुके स्थानमें विकल्प करके ख्याञ् आदेश हो, इस स्थलमें भाष्यमें यह आदेश ख्शादि है । असिद्धकाण्डमें स्थित "शस्य यो वा" इस वार्तिकसे विकल्प करके शकारके स्थानमें यकार होगा । ञ् इत् होनेके कारण उभयपद होकर–चख्यौ, चख्ये । चख्शौ, चख्शे । यहां "चयो द्वितीयाः" इस वार्तिकसे चय, अर्थात् ककारके स्थानमें चर्त्वके असिद्धत्वके कारण द्वितीय वर्ग (खकार) नहीं हुआ । चचक्षे, इत्यादि ॥

२४३८ अस्यतिवक्तिख्यातिभ्योऽङ् । ३ । १ । ५२ ॥

एभ्यश्च्लेरङ् । अख्यत् । अख्यत । अक्शासीत् । अक्शास्त ॥ वर्जने ख्शाञ् नेष्टः ॥ * ॥ समचक्षिष्टेत्यादि ॥ ५ ॥

अथ पृच्यन्ता अनुदात्तेतः॥ईर गतौ कम्पने च ईर्ते । ईराञ्चक्रे । ईर्ताम् । ईर्ष्व । ईर्ध्वम् । ऐरिष्ट ॥ १ ॥ ईड स्तुतौ । ईट्टे ।

२४३८–अस्यति (अस्) धातु वच् धातु और ख्या धातुके उत्तर च्लिके स्थानमें अङ् आदेश हो । अख्यत् । अख्यत इत्यादि ।

वर्जन अर्थमें ख्शाञ् आदेश इष्ट नहीं हो, जैसे–समचक्षिष्ट, इत्यादि ।

अब पच धातुपर्यन्त अनुदात्तेत् धातु कहतेहैं ॥

ईर् धातु गमन और कम्पनार्थमें है। ईर्ते। ईराञ्चक्रे। ईरिता। ईरिष्यते। ईर्ताम्। ईर्ष्व। ईर्ध्वम्। ऐरिष्ट॥ ईड धातु स्तुतिमें है। ईट्टे॥

२४३९ ईशः से। ७। २। ७७॥
२४४० ईडजनोर्ध्वे च। ७।२।७८॥

ईशीड्जनां सेध्वेशब्दयोः सार्वधातुकयोरिट् स्यात्। योगविभागो वैचित्र्यार्थः। ईडिषे। इडिध्वे। एकदेशविकृतस्यानन्यत्वात्। ईडिष्व। ईडिध्वम्। विकृतिग्रहणेन प्रकृतेरग्रहणात्। ऐड्ढ्म्॥ २॥ ईश ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे॥ ३॥ आस उपवेशने। आस्ते॥ दयायासश्च॥ आसांचक्रे। आस्स्व। आध्वम्। आसिष्ट॥ ४॥ आङः शासु इच्छायाम्। आशास्ते। आशासाते। आङ्पूर्वत्वं प्रायिकम्। तेन नमोवाकं प्रशास्महे इति सिद्धम्॥ ५॥ वस आच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता॥ ६॥ कसि गतिशासनयोः। कंस्ते। कंसाते। कंसते। अयमनिदिदित्येके। कस्ते। तालव्यान्तोप्यनिदित्। कष्टे। कशाते। कक्षे। कड्ढ्वे॥ ७॥ णिसि चुम्बने। निंस्ते। दन्त्यान्तोयम्। आभरणकारस्तु तालव्यान्त इति बभ्राम॥ ८॥ णिजि शुद्धौ। निंक्ते। निंक्षे। निञ्जिता॥९॥शिजि अव्यक्ते शब्दे। शिंक्ते॥१०॥ पिजि वर्णे। सम्पर्चने इत्येके। उभयत्रेत्यन्ये। अवयवे इत्यपरे। अव्यक्ते शब्दे इतीतरे। पिंक्ते॥ ११॥ पृजीत्येके। पृंक्ते॥ १२॥ वृजी वर्जने। दन्त्योष्ठ्यादिः। ईदित्। वृक्ते। वृजाते। वृक्षे। इदिदित्यन्ये। वृंक्ते॥ १३॥ पृची सम्पर्चने। पृक्ते॥ १४॥ षूङ् प्राणिगर्भविमोचने। सूते। सुषुवे। सविता-सोता। भूसुवोरिति गुणनिषेधः। सुवै। सविषीष्ट-सोषीष्ट। असविष्ट-असोष्ट॥१५॥ शीङ् स्वप्ने॥

२४३९-२४४०-ईश,ईड और जन धातुके उत्तर सार्वधातुक से और ध्वे प्रत्ययको इट् हो। योगविभाग,अर्थात् भिन्न सूत्रकरण वैचित्र्यार्थ,अर्थात् उत्तर सूत्रमें पूर्व सूत्रसे से शब्दकी अनुवृत्ति और पूर्व सूत्रमें उत्तर सूत्रसे ध्वे शब्दके अपकर्षणरूप वैचित्र्य बोधनार्थ है। ईडिषे। ईडिध्वे। "एकदेशविकृतमनन्यवत्" इस परिभाषासे स्व और ध्वम् प्रत्ययको भी इट् होकर-ईडिष्व। ईडिध्वम्। प्रकृतिके ग्रहणसे विकृतिका ग्रहण होताहै परन्तु विकृतिके ग्रहणसे प्रकृतिका ग्रहण न होनेसे ऐड्ढ्म् इस स्थानमें इट् नहीं हुआ॥ ईश धातु ऐश्वर्यमें है। ईष्टे। ईशिषे। ईशिध्वे॥ आस धातु उपवेशनमें हैं। "दयायासश्च २३२४" इस सूत्रसे आस् धातुके उत्तर आम् होकर-आसाञ्चक्रे। आस्स्व। आध्वम्। आसिष्ट॥ आङ्पूर्वक शासु धातु इच्छामें है। आशास्ते। आशासाते। यह धातु प्रायः आङ्पूर्वक देखा जाताहै, किन्तु सर्वत्र आङ्पूर्वक नहीं है,अत एव 'नमोवाकं प्रशास्महे' ऐसा प्रयोग हुआ है॥ वस धातु आच्छादनमें है। वस्ते। वस्से। वध्वे। ववसे। वसिता॥ कसि धातु गति और शासनमें है। कंस्ते। कंसाते। कंसते। कोई २ कहतेहैं कि, यह अनिदित् है, उनके मतसे-कस्ते। कश् धातु तालव्यान्त और अनिदित् भी है जैसे-कष्टे। कशाते। कक्षे। कड्ढ्वे॥ णिसि धातु चुम्बनमें है। निंस्ते। यह धातु दन्त्य सकारान्त है। आभरणकार तो इसको तालव्यान्त कहतेहैं परन्तु यह भ्रम है॥ णिजि धातु शोधनमें है। निङ्क्ते। निङ्क्षे। निञ्जिता॥ शिजि धातु अव्यक्त शब्दमें है। शिङ्क्ते॥ पिजि धातु वर्णमें है। किसी २ के मतसे सम्पर्चनमें है। किसीके मतसे पूर्वोक्त दोनों अर्थमें है। किसीके मतसे अवयवार्थमें है और किसी २ के मतसे अव्यक्त शब्दार्थमें है। पिङ्क्ते। कोई २ पृजि धातु कहतेहैं। पृङ्क्ते॥ वृजी धातु वर्जनमें है, यह दन्त्योष्ठ्यादि और ईदित् है। वृक्ते। वृजाते। वृक्षे। कोई २ कहतेहैं,यह इदित् है। वृङ्क्ते॥ पृची धातु सम्पर्चनमें है। पृक्ते॥ षूङ् धातु प्रसव करनेमें है। सूते। सुषुवे। सविता, सोता। "भूसुवोः० २२२४" इस सूत्रसे गुणनिषेध होकर-सुवै। सविषीष्ट, सोषीष्ट। असविष्ट, असोष्ट॥ शीङ् धातु स्वप्नमें है॥

२४४१ शीङः सार्वधातुके गुणः। ७। ४। २१॥

क्ङिति चेत्यस्यापवादः। शेते। शयाते॥

२४४१-सार्वधातुक प्रत्यय परे रहते शीङ् धातुके इकारको गुण हो। "क्ङिति च२२१३" इस सूत्रका विशेषक है। शेते। शयाते॥

२४४२ शीङो रुट्। ७। १। ६॥

शीङः परस्य झादेशस्यातो रुडागमः स्यात्। शेरते। शेषे। शेध्वे। शये। शेवहे। शिश्ये। शयिता। अशयिष्ट॥ १६॥

अथ स्तौत्यन्ताः परस्मैदिनः। ऊर्णुस्तूभयपदी॥ यु मिश्रणेऽमिश्रणे च॥

२४४२-शीङ् धातुके परे स्थित झ के स्थानमें आदिष्ट अत् को रुट्का आगम हो, शेरते। शेषे। शेध्वे। शये। शेवहे। शेमहे। शिश्ये। शयिता। अशयिष्ट॥

अब स्तु धातु पर्यन्त परस्मैपदी धातु कहते हैं।

यु धातु मिश्रण और अमिश्रण (मिलाने और अलग करने) में है।

२४४३ उतो वृद्धिर्लुकि हलि। ७।३।८९॥

लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। युयाव। यविता। युयात्। इह उतो वृद्धिर्न। भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति व्या॰

ख्यानात् । विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात् । यूयात् । अयावीत् ॥ १ ॥ रु शब्दे ॥

२४४३-पित् हलादि सार्वधातुक विभक्ति परे रहते लुग्विषयमें उकारान्त धातुको वृद्धि हो, अभ्यस्तसंज्ञक धातुको न हो, यौति । युतः । युवन्ति । युयाव । यविता । युयात् । यहां तिप्के आगम यासुट्के "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" अर्थात् जो जिसका आगम होताहै, उसका उसके ग्रहणसे ग्रहण होताहै, इस परिभाषासे तिप्ग्रहणसे ग्रहण होने पर पित् हलादि सार्वधातुक यास् परे उकारको वृद्धिकी प्राप्ति हुई, परन्तु पिच्च ङिन्न ङिच्च पिन्न (पित् ङित् न हो और ङित् पित् न हो) ऐसे भाष्यमें व्याख्यानके कारण नहीं हुई, यदि कहो कि, पित्त्वप्रयुक्तही कार्य्य हो सो नहीं कहसकते हो, कारण कि, विशेषविहित ङित्त्वसे पित्त्वका बाध होजाताहै-यूयात् । अयावीत् ॥ रु धातु शब्द करनेमें है ॥

२४४४ तुरुस्तुशम्यमः सार्वधातुके । ७ । ३ । ९५ ॥

एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात् । नाभ्यस्तस्येत्यतोऽनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणमपिदर्थम् । रवीति-रौति । रुवीतः-रुतः । हलादेः किम् । रुवन्ति । तिङः किम् । शाम्यति । सार्वधातुके किम् । आशिषि रूयात् । विध्यादौ तु रुवीयात्-रुयात् । अरावीत् । अरविष्यत् ॥ २ ॥ तु इति सौत्रो धातुर्गतिवृद्धिहिंसासु । अयं च लुग्विकरण इति स्मरन्ति । तवीति-तौति । तुवीतः-तुतः । तोता । तोष्यति ॥ ३ ॥ णु स्तुतौ । नौति । नविता ॥ ४ ॥ टुक्षु शब्दे । क्षौति । क्षविता ॥ ५ ॥ क्ष्णु तेजने । क्ष्णौति । क्ष्णविता ॥ ६ ॥ ष्णु प्रस्रवणे । स्नौति । सुष्णाव । स्नविता । स्नूयात् ॥ ७ ॥ ऊर्णुञ् आच्छादने ॥

२४४४-तु, रु, स्तु, शम्, यम् इन धातुओंके परे सार्वधातुक हलादि तिङ्को विकल्प करके ईट् हो । "नाभ्यस्तस्य० २५०३" इस सूत्रसे सार्वधातुक पदकी अनुवृत्ति सम्भव होने पर भी फिर जो सार्वधातुकका ग्रहण है, वह केवल अपिदर्थ, अर्थात् 'पिति' इसकी अनुवृत्ति न हो इसके निमित्त है, रवीति, रौति । रवीतः, रुतः । हलादि न होनेपर, रुवन्ति । तिङ् भिन्न होनेपर-शाम्यति । सार्वधातुक न होनेपर, आशिषमें-रूयात् । विधि आदिमें तो रुवीयात्, रुयात् । अरावीत् । अरविष्यत् ॥ तु यह सौत्र धातु गति, वृद्धि और हिंसार्थमें है, यह लुक्विकरण, अर्थात् इसके उत्तर शप्का लुक् हो, यह पूर्वाचार्य्योंका मत है । तवीति, तौति । तुवीतः, तुतः । तोता । तोष्यति ॥ णु धातु स्तुतिमें है । नौति । नविता ॥ टुक्षु धातु शब्दमें है । क्षौति । क्षविता ॥ क्ष्णु धातु तेजनमें है । क्ष्णौति । क्ष्णविता ॥ ष्णु धातु प्रस्रवणमें है । स्नौति । सुष्णाव । स्नविता । स्नूयात् ॥ ऊर्णुञ् धातु आच्छादनमें है ॥

२४४५ ऊर्णोतेर्विभाषा । ७ । ३ । ९० ॥

वा वृद्धिः स्याद्धलादौ पिति सार्वधातुके । ऊर्णौति-ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते ॥ ऊर्णोतेराम् नेति वाच्यम् ॥ * ॥

२४४५-हलादि पित् सार्वधातुक परे रहते ऊर्णु धातुको विकल्प करके वृद्धि हो, ऊर्णौति, ऊर्णोति । ऊर्णुतः । ऊर्णुवन्ति । ऊर्णुते । ऊर्णुवाते । ऊर्णुवते ।

ऊर्णु धातुके उत्तर आम् न हो ऐसा कहना चाहिये * ॥

२४४६ नन्द्राः संयोगादयः । ६ । १ । ३ ॥

अचः पराः संयोगादयो नदरा द्विर्न भवन्ति । नुशब्दस्य द्वित्वम्, णत्वस्यासिद्धत्वात् । पूर्वत्रासिद्धीयमद्विर्वचन इति त्वनित्यम्, उभौ साभ्यासस्येति लिङ्गात् । ऊर्णुनाव । ऊर्णुनुवतुः । ऊर्णुनुवुः ॥

२४४६-अच्के परे संयोगकी आदिमें स्थित न द और र को द्वित्व न हो । "पूर्वत्रासिद्धम्" इससे णत्वके असिद्धत्वके कारण नु शब्दको द्वित्व होगा "पूर्वत्रासिद्धीयमद्विर्वचने" (द्वित्वभिन्न कार्य कर्त्तव्यमें "पूर्वत्रासिद्धम्" इसकी प्रवृत्ति हो) यह तो "उभौ साभ्यासस्य २६०६" इस सूत्रारम्भसामर्थ्यसे अनित्य है, नहीं तो 'प्राणिणत्' यहां भी "अनितेः" इससे द्वित्वके पहले णत्वको उक्त परिभाषाके बलसे असिद्धता न होनेसे द्वित्वोत्तर खण्डद्वयमें णकारका श्रवण हो ही जाता फिर यह सूत्र व्यर्थ ही हो जाता ।

ऊर्णुनाव । ऊर्णुनुवतुः । ऊर्णुनुवुः ॥

२४४७ विभाषोर्णोः । १ । २ । ३ ॥

इडादिप्रत्ययो वा ङित् स्यात् । ऊर्णुनुविथ-ऊर्णुनविथ । ऊर्णुविता-ऊर्णविता । ऊर्णौतु-ऊर्णोतु । ऊर्णवानि । ऊर्णवै ॥

२४४७-ऊर्णु धातुके परे स्थित इडादि प्रत्यय विकल्प करके ङित् हो, ऊर्णुनुविथ,ऊर्णुनविथ । ऊर्णुविता,ऊर्णविता । ऊर्णौतु, ऊर्णोतु । ऊर्णवानि । ऊर्णवै ॥

२४४८ गुणोऽपृक्ते । ७ । ३ । ९१ ॥

ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके । वृद्ध्यपवादः । और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः । इह वृद्धिर्न । ङिच्च पिन्नेति भाष्यात् । ऊर्णूयात् । ऊर्णुविषीष्ट-ऊर्णविषीष्ट । और्णुवीत् । और्णुविष्टाम् ॥

२४४८-अपृक्त हलादि पित् सार्वधातुक प्रत्यय परे रहते ऊर्णु धातुको गुण हो, यह सूत्र वृद्धि सूत्रका अपवाद है, और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः इस स्थलमें "ङिच्च

पिन्न'' इस भाष्यके कारण वृद्धि न होगी । ऊर्णुयात् । ऊर्णुविषीष्ट, ऊर्णविषीष्ट । और्णुवीत् । और्णुविष्टाम् ॥

२४४९ ऊर्णोतेर्विभाषा । ७ । २ । ६ ॥

इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात् । पक्षे गुणः । और्णावीत् । और्णाविष्टाम् । और्णाविषुः । और्णवीत् ॥ ८ ॥ द्यु अभिगमने। द्यौति। द्योता ॥ ९ ॥ षु प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञानम् । सोता । असौषीत् ॥ १० ॥ कु शब्दे । कोता ॥ ११ ॥ ष्टुञ् स्तुतौ । स्तवीति–स्तौति। स्तुवीतः–स्तुतः । स्तुवीते–स्तुते । स्तुसुधूञ्भ्य इतीट् । अस्तावीत् । प्राक्सितादिति षत्वम् । अभ्यष्टौत् । सिवादीनां वा । पर्यष्टौत् । पर्यस्तौत् ॥ १२ ॥ ब्रूञ् व्यक्तायां वाचि ॥

२४४९–परस्मपद परक इडादि सिच् परे रहते ऊर्णु धातुके उकारको विकल्प करके वृद्धि हो, विकल्प पक्षमें गुण होगा । और्णावीत्। और्णाविष्टाम्। और्णाविषुः। और्णवीत् ॥ द्यु धातु अभिगमनमें है । द्यौति । द्योता ॥ षु धातु प्रसव और ऐश्वर्यमें है । प्रसव शब्दसे अभ्यनुज्ञान जानना । सोता । असौषीत् ॥ कु धातु शब्दमें है । कोता ॥ ष्टुञ् धातु स्तुतिमें है । स्तवीति, स्तौति । स्तुवीतः, स्तुतः । स्तुवीते, स्तुते । "स्तुसुधूञ्भ्यः० २३८५" इस सूत्रसे इट् होकर–अस्तावीत्। "प्राक् सितात्० २२७६" इस सूत्रसे षत्व होकर–अभ्यष्टौत्। "सिवादीनां वा" इससे विकल्प करके षत्व करके–पर्यष्टौत्, पर्यस्तौत् ॥ ब्रूञ् धातु व्यक्तवचनमें है ॥

२४५० ब्रुवः पञ्चानामादित आहो ब्रुवः । ३ । ४ । ८४ ॥

ब्रुवो लटः परस्मैपदानामादितः पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः । अकार उच्चारणार्थः । आह । आहतुः । आहुः ॥

२४५०–ब्रू धातुके उत्तर लट् सम्बन्धी परस्मैपद आदिसे पांच अर्थात् तिप्, तस्, झि, सिप्, थस् के स्थानमें विकल्प करके णल् आदि पांच, अर्थात् णल्, अतुस्, उस्, थल्, अथुस् आदेश हों और ब्रू धातुके स्थानमें आह आदेश हो । आह आदेशमें अकार उच्चारणार्थ है, आह । आहतुः । आहुः ॥

२४५१ आहस्थः । ८ । २ । ३५ ॥

झलि परे । चर्त्वम् । आत्थ । आहथुः ॥

२४५१–झलादि प्रत्यय परे रहते आह आदेशके हके स्थानमें थ हो । चर्त्व होकर–आत्थ । आहथुः ॥

२४५२ ब्रुव ईट् । ७ । ३ । ९३ ॥

ब्रुवः परस्य हलादेः पित ईट् स्यात्। आत्थेत्यत्र स्थानिवद्भावात्प्राप्तोयं झलीति थत्वविधानान्न भवति । ब्रवीति । ब्रूतः। ब्रुवन्ति । ब्रूते । आर्धधातुकाधिकारे ॥

२४५२–ब्रू धातुके उत्तर हलादि पित् प्रत्ययको ईट् हो–आत्थ, इस स्थलमें स्थानिवद्भावके कारण ईट् प्राप्त हुआ, परन्तु "आहस्थः" इस सूत्रसे झल् परे थत्व विधानके कारण नहीं हुआ । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते। आर्धधातुकाधिकारमें किस प्रकार होगा, सो कहतेहैं ॥

२४५३ ब्रुवो वचिः । २ । ४ । ५३ ॥

उवाच । ऊचतुः । ऊचुः । उवचिथ–उवक्थ । ऊचे । वक्ता । ब्रवीतु । ब्रूतात् । ङिच्च पिन्नेत्यपित्त्वादीन्न । ब्रवाणि । ब्रवै । ब्रूयात् । उच्यात् । अस्यतिवक्तीत्यङ् ॥

२४५३–आर्धधातुकविषयमें ब्रू धातुके स्थानमें वचि आदेश हो, उवाच । ऊचतुः । ऊचुः । उवचिथ, उवक्थ । ऊचे । वक्ता । ब्रवीतु । ब्रूतात्, यहां 'ङिच्च पिन्न' इस भाष्यसे अपित्त्वके कारण ईट् नहीं हुआ । ब्रवाणि । ब्रवै । ब्रूयात् । उच्यात् । "अस्यतिवक्तिख्याति० २४३८" इस सूत्रसे ब्रू धातुके उत्तर च्लिके स्थानमें अङ् होकर–॥

२४५४ वच उम् । ७ । ४ । २० ॥

अङि परे । अवोचत् । अवोचत ॥ १३ ॥ अथ शास्यन्ताः परस्मैपदिनः । इङ् त्वात्मनेपदी । इण् गतौ । एति । इतः ॥

२४५४–अङ् परे रहते वच् धातुको उम्का आगम हो, अवोचत् । अवोचत।

अब शासि धातु पर्यन्त परस्मैपदी धातु कहतेहैं, परन्तु उसमें इङ् धातु आत्मनेपदी है । इण् धातु गतिमें है। एति । इतः ॥

२४५५ इणो यण् । ६ । ४ । ८१ ॥

अजादौ प्रत्यये परे । इयङोऽपवादः । यन्ति । इयाय ॥

२४५५–अजादि प्रत्यय परे रहते इण् धातुके स्थानमें यण् आदेश हो, यह इयङ्का अपवाद है, यन्ति । इयाय ॥

२४५६ दीर्घ इणः किति । ७ । ४ । ६९ ॥

इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि । ईयतुः । ईयुः । इययिथ–इयेथ । एता । इतात् । इहि । अयानि । ऐत् । ऐताम् । आयन् । इयात् । ईयात् ॥

२४५६–कित् लिट् परे रहते इण् धातुके अभ्यासको दीर्घ हो । ईयतुः । ईयुः । इययिथ, इयेथ । ऐत् । ऐताम् । आयन् । इयात् । ईयात् ॥

२४५७ एतेर्लिङि । ७ । ४ । २४ ॥

उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्धधातुके किति लिङि । निरियात् । उभयत आश्रयणे नान्तादिवत् । अभीयात् । अणः किम् । समेयात्। समीयादिति प्रयोगस्तु भौवादिकस्य ॥

२४५७-आर्धधातुक कित् लिङ् परे रहते उपसर्गसे परे स्थित इण् धातुसंबंधी अण्को ह्रस्व हो, निरियात् । उभयतः आश्रयणमें अन्तादिवद्भाव नहीं होनेसे अभीयात् । अण्भिन्न होनेपर-समेयात् । 'समीयात्' ऐसा प्रयोग तो भ्वादिगणीयधातुका होगा ॥

२४५८ इणो गा लुङि । २ । ४ । ४५ ॥

गातिस्थेति सिचो लुक् । अगात् । अगाताम् । अगुः ॥ १ ॥ इङ् अध्ययने । नित्यमधिपूर्वः । अधीते । अधीयाते । अधीयते ॥

२४५८-लुङ् परे रहते इण् धातुके स्थानमें गा आदेश हो। "गातिस्था० २२२३" इस सूत्रसे सिच्का लुक् होकर-अगात्। अगाताम् । अगुः॥ इङ् धातु अध्ययनमें है । यह धातु नित्य अधिपूर्वक है । अधीते । अधीयाते । अधीयते ॥

२४५९ गाङ् लिटि । २ । ४ । ४९ ॥

इङो गाङ् स्याल्लिटि लावस्थायां विवक्षिते वा । अधिजगे । अधिजगाते । अधिजगिरे । अध्येता । अध्येष्यते । अध्ययै । गुणायादेशयोः कृतयोरुपसर्गस्य यण् । पूर्वं धातुरुपसर्गेणेति दर्शनन्तरङ्गत्वाद् गुणात्पूर्वं सवर्णदीर्घः प्राप्तः । णेरध्ययने वृत्तमिति निर्देशान्न भवति । अध्यैत । परत्वादियङ् । तत आट् । वृद्धिः । अध्यैयाताम् । अध्यैयि । अध्यैवहि । अधीयीत । अधीयीयाताम् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट ॥

२४५९-लिट् परे रहते अथवा लकारावस्था विवक्षित होनेपर इङ् धातुके स्थानमें गाङ् आदेश हो, अधिजगे । अधिजगाते । अधिजगिरे । अध्येता । अध्येष्यते । अध्ययै । यहां गुण और आय् आदेश करनेपर उपसर्गको यण् हुआ, यद्यपि "पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन" इस मतसे पूर्वोपस्थितनिमित्तकत्वरूप अन्तरङ्गत्वके कारण गुणके पूर्वमें ही सवर्ण दीर्घ प्राप्त हुआ परन्तु "णेरध्ययने वृत्तम् ३०३६" इस सूत्रनिर्देशसे नहीं हुआ । अध्यैत । परत्वके कारण इयङ् पश्चात् आट् और वृद्धि होकर-अध्यैयाताम् । अध्यैयि । अध्यैवहि । अधीयीत । अधीयीयाताम् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट ॥

२४६० विभाषा लुङ्लृङोः ।२।४।५०॥

इङो गाङ् वा स्यात् ॥

२४६०-लुङ् और लृङ् परे रहते इङ् धातुके स्थानमें विकल्प करके गाङ् आदेश हो ॥

२४६१ गाङ्कुटादिभ्योऽञ्णिन्ङित् । १ । २ । १ ॥

गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः ॥

२४६१-गाङ् आदेश और कुटादि धातुके उत्तर ञित् और णित्से भिन्न प्रत्यय ङित् हो ॥

२४६२ घुमास्थागापाजहातिसां हलि । ६ । ४ । ६६ ॥

एषामात ईत्स्यात् हलादौ क्ङित्यार्धधातुके । अध्यगीष्ट-अध्यैष्ट । अध्यगीष्यत-अध्यैष्यत ॥ २ ॥ इक् स्मरणे । अयमप्यधिपूर्वः । अधीगर्थदयेशामिति लिङ्गात् अन्यथा हीगर्थेत्येव ब्रूयात् ॥ इण्वदिक इति वक्तव्यम् ॥ * ॥ अधियन्ति । अध्यगात् । केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः । तन्मते यण्न । तथाच भट्टिः।समीतयोराघवयोरधीयन्निति ॥ ३ ॥ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । प्रजनं गर्भग्रहणम् । असनं क्षेपणम् । वेति । वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् । अवीताम् । अवियन् । अडागमे सत्यनेकाच्त्वाद्यणितिकेचित् । अव्यन् ॥ ४ ॥ अत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते । एति । ईतः । इयन्ति । ईयात् । ऐषीत् ॥ ५ ॥ या प्रापणे । प्रापणमिह गतिः । प्रणियाति । यातः । यान्ति ॥

२४६२-हलादि कित् ङित् आर्धधातुक परे रहते घु, मा, स्था, गा, पा, हा और सा (षो) धातुके आकारके स्थानमें ईकार हो, अध्यगीष्ट, अध्यैष्ट । अध्यगीष्यत, अध्यैष्यत ॥ इक् धातु स्मरणमें है । " अधीगर्थदयेशाम् ६१३ " इस निर्देशके अनुसार यह धातु भी अधिपूर्वक है, नहीं तो 'ईगर्थ' ऐसा ही कहते ।

इण् धातुकी समान इक् धातुके रूप हों ऐसा कहना चाहिये * अधियन्ति । अध्यगात् । कोई २ तो आर्धधातुकाधिकारमें कहे हुए कार्य्यका ही अतिदेश होगा ऐसा कहतेहैं, उनके मतसे यण् न होगा, इसलिये भट्टिमें ' समीतयो राघवयोरधीयन् ' ऐसे प्रयोग कियेहैं ॥ वी धातु गति, व्याप्ति, प्रजन, कान्ति, असन और खादनमें है । प्रजन शब्दसे गर्भग्रहण है । असन शब्दसे क्षेपण जानना । वेति । वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् । अवीताम् । अवियन् । यहां कोई २ कहतेहैं कि, अडागम होनेपर अनेकाच् होनेसे यण् होकर-' अव्यन् ' ऐसा प्रयोग होगा । इस स्थलमें ईकार भी धात्वन्तर प्रश्लिष्ट है, एति । ईतः । इयन्ति । ईयात् । ऐषीत्॥या धातु प्रापणमें है । प्रापणशब्दसे यहां गति जानना । प्रणियाति । यातः । यान्ति ॥

२४६३ लङः शाकटायनस्यैव । ३ । ४ । १११ ॥

आदन्तात्परस्य लङो झेर्जुस् वा स्यात् । अयुः । अयान् । यायात् । यायाताम् । यायास्ताम् ॥ ६ ॥ वा गतिगन्धनयोः । गन्धनं सूचनम् ॥ ७ ॥ भा दीप्तौ ॥ ८ ॥ ष्णा शौचे ॥ ९ ॥

श्रा पाके ॥ १० ॥ द्रा कुत्सायां गतौ ॥ ११ ॥ प्सा भक्षणे ॥ १२ ॥ पा रक्षणे । पायास्ताम् । अपासीत् ॥ १३ ॥ रा दाने ॥ १४ ॥ ला आदाने । द्वावपि दाने इति चन्द्रः ॥ १५ ॥ दाप् लवने । प्रणिदाति-प्रनिदाति । दायास्ताम् । अदासीत् ॥ १६ ॥ ख्या प्रकथने । अयं सार्वधातुकमात्रविषयः । सस्थानत्वं नमः ख्यात्रे इति वार्तिकं तद्भाष्यं चेह लिङ्गम् । सस्थानो जिह्वामूलीयः स नेतिख्याआदेशस्य ख्शादित्वे प्रयोजनमित्यर्थः । सम्पूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः ॥ १७ ॥ प्रा पूरणे ॥ १८ ॥ मा माने । अकर्मकः । तनौ ममुस्तत्र न कैटभद्विष इति माघः। उपसर्गवशेनार्थान्तरे सकर्मकः। उदरं परिमाति मुष्टिना । नेर्गदेत्यत्र नास्य ग्रहणम् । प्रणिमाति-प्रनिमाति ॥ १९ ॥ वच परिभाषणे । वक्ति । वक्तः । अयमन्तिपरो न प्रयुज्यते । बहुवचनपर इत्यन्ये। झि पर इत्यपरे। वग्धि। वच्यात्। उच्यात्। अवोचत् ॥ २० ॥ विद ज्ञाने ॥

२४६३-आकारान्त धातुके उत्तर लङ्सम्बन्धी झिके स्थानमें विकल्प करके जुस् हो, अयुः, अयान् । यायात् । यायाताम् । यायास्ताम् ॥ वा धातु गति और गन्धन, अर्थात् सूचनार्थमें है ॥ भा धातु दीप्तिमें है ॥ ष्णा धातु शौचमें है ॥ श्रा धातु पाकमें है ॥ द्रा धातु कुत्सित गतिमें है ॥ प्सा धातु भक्षणमें है ॥ पा धातु रक्षा करनेमें है । पायास्ताम् । अपासीत् ॥ रा धातु दानमें है ॥ ला धातु आदानमें है॥ चन्द्रके मतसे रा और ला यह दोनों धातु दानार्थक हैं ॥ दाप् धातु लवन (काटने) में है । प्रणिदाति, प्रनिदाति । दायास्ताम् । अदासीत् ॥

ख्या धातु प्रकथनमें है इसका सार्वधातुकमात्र विषय है, इसमें " सस्थानत्वं नमः ख्यात्रे " यह वार्तिक और इसका भाष्य प्रमाण है । सस्थान जिह्वामूलीयको कहतेहैं, वह य ' नमःख्यात्रे ' यहां नहीं हुआ, यह ख्याआदेशको ख्शादित्वमें प्रयोजन भाष्यमें कहाहै, वहां असिद्धकाण्डस्थित ' शस्य यो वा ' इससे यत्वको असिद्ध होनेके कारण " कुप्वोः ${\asymp}$क${\asymp}$पौ च " इससे जिह्वामूलीयको बाधकर. " शर्परे विसर्जनीयः " इससे विसर्ग ही होताहै, सो कहो, यदि ख्या धातुके आर्धधातुकविषयमें भी प्रयोग हों तो इसी धातुसे तृच् प्रत्यय करके 'ख्यात्रे' बनेगा, उसको आगे रहते 'नमःख्यात्रे' यहां 'शर्परे वि०' इसकी प्राप्ति ही नहीं थी,फिर वार्त्तिक और उसका भाष्य सब विरुद्ध होजाता, इसलिये इस धातुका सार्वधातुकमात्र विषय है ॥ संपूर्वक ख्या धातुका प्रयोग नहीं होताहै, यह न्यासकारने कहाहै ॥ प्रा धातु पूरणमें है ॥ मा धातु मानमें है, यह अकर्मक है, अत एव " तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः "यह माघमें कहाहै।

उपसर्गवशसे अर्थभिन्न होनेपर सकर्मक है, जैसे-' उदरं परिमाति मुष्टिना ' । " नेर्गद० २२८५ " इस सूत्रमें इस धातुका ग्रहण नहीं है, इससे ' प्रणिमाति, प्रनिमाति ' यहां विकल्पसे णत्व हुआ ॥ वच धातु परिभाषणमें है । वक्ति । वक्तः । इस धातुको अन्तिविभक्त्यन्त पदका प्रयोग नहीं होताहै । कोई २ कहतेहैं कि, बहुवचन परे नहीं होताहै । कोई कहतेहैं कि, झि प्रत्यय परे प्रयोग नहीं होताहै । वग्धि । वच्यात् । उच्यात् । अवोचत् ॥ विद् धातु ज्ञानमें है ॥

२४६४ विदो लटो वा । ३ । ४ । ८३ ॥

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे । वेत्ति । वित्तः । इत्यादि । विवेद । विविदतुः । उषविदेत्याम्पक्षे विदत्यकारान्तनिपातनान्न लघूपधगुणः । विदांचकार । वेदिता ॥

२४६४-विद् धातुके उत्तर लट्सम्बन्धी परस्मैपदको णलादि आदेश हों, वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षमें वेत्ति । वित्तः । विदन्ति, इत्यादि । विवेद । विविदतुः । " उषविद० २३४९ " इस सूत्रसे आम्पक्षमें ' विद ' ऐसे अकारान्त निपातनके कारण लघूपधाको गुण नहीं होगा, विदाञ्चकार । वेदिता ॥

२४६५ विदांकुर्वन्त्वित्यन्यतरस्याम्। ३ । १ । ४१ ॥

वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोतीत्यनुप्रयोगश्च वा निपात्यते। पुरुषवचने न विवक्षिते इति शब्दात् ॥

२४६५-लोट् परे रहते विद् धातुके उत्तर आम् हो, और गुणाभाव, लोट्का लुक् और लोडन्त कृ धातुका अनुप्रयोग विकल्प करके निपातनसे हो । इति शब्दसे पुरुष और वचन विवक्षित नहीं हैं ॥

२४६६ तनादिकृञ्भ्य उः ।३।१।७९॥

तनादेः कृञश्च उप्रत्ययः स्यात्।शपोपवादः । तनादित्वादेव सिद्धे कृञ्ग्रहणं गणकार्यस्याऽनित्यत्वे लिङ्गं तेन न विश्वसेदविश्वस्तमित्यादि सिद्धम्। विदांकरोतु ॥

२४६६-तनादि धातु और कृञ् धातुके उत्तर उ प्रत्यय हो, यह शप्का अपवाद है । तनादित्वके कारण सिद्ध होनेपर भी कृञ्का ग्रहण केवल गणकार्यके अनित्यत्वमें प्रमाण है, इसी कारण ' न विश्वसेदविश्वस्तम् ' इत्यादि सिद्ध हुए । विदांकरोतु ॥

२४६७ अत उत्सार्वधातुके।६।४।११०॥

उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति।उदिति तपरकरणसामर्थ्यान्न गुणः।

विदांकुरुतात् । विदांकुरुताम् । उतश्चेति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्त्वम् । विदांकुरु । विदांकरवाणि । अवेत् । अवित्ताम् । सिजभ्यस्तेति झेर्जुस् । अविदुः ॥

२४६७-उ प्रत्ययान्त कृञ् धातुके अकारके स्थानमें उकार हो, कित् ङित् सार्वधातुक परे रहते । 'उत्' ऐसे तपरकरणके कारण गुण नहीं होगा । विदांकुरुतात् । विदांकुरुताम् । " उतश्च " इस सूत्रसे हिका लुक्, उसका आभीयत्वके कारण असिद्धत्व होनेसे उत्त्व होकर-विदांकुरु । विदांकरवाणि । अवेत् । अवित्ताम् । "सिजभ्यस्त० २२२६" इस सूत्रसे झिके स्थानमें जुस् होकर-अविदुः ॥

२४६८ दश्च । ८ । २ । ७५ ॥

धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा । अवेः-अवेत् ॥ २१ ॥ अस् भुवि । अस्ति ॥

२४६८-सिप् परे रहते धातुसम्बन्धी पदान्तस्थित दकारके स्थानमें विकल्प करके रुत्व हो, अवेः, अवेत् ॥ अस् धातु सत्तामें है । अस्ति ॥

२४६९ श्नसोरल्लोपः । ६ । ४ । १११॥

श्नस्याऽस्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति । स्तः । सन्ति । तासस्त्योरिति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः ॥

आर्धधातुके इत्यधिकृत्य ॥

२४६९-श्नम् प्रत्ययके और अस् धातुके अकारका लोप हो, कित्, ङित् सार्वधातुक परे रहते-स्तः । सन्ति । " तासस्त्योः० २१९१ " इस सूत्रसे सकारका लोप होकर-असि । स्थः।स्थ।अस्मि । स्वः । स्मः । आर्धधातुकका अधिकार करके-॥

२४७० अस्तेर्भूः । २ । ४ । ५२ ॥

बभूव । भविता । अस्तु । स्तात् । स्ताम् । सन्तु॥

२४७०-आर्धधातुकविषयमें अस् धातुके स्थानमें भू आदेश हो, बभूव । भविता । अस्तु । स्तात् । स्ताम् । सन्तु॥

२४७१ घ्वसोरेद्धावभ्यासलोपश्च।६। ४ । ११९ ॥

घोरस्तेश्च एत्त्वं स्याद्धौ परे अभ्यासलोपश्च । आभीयत्वेन एत्त्वस्यासिद्धत्वाद्धेर्धिः । श्नसोरित्यल्लोपः । एधि । तातङ्पक्षे एत्त्वं न।परेण तातङा बाधात् सकृद्गतावितिन्यायात् । स्तात् । स्तम् । स्त । असानि । असाव । असाम । अस्तिसिच इतीट् । आसीत् । श्नसोरित्यल्लोपस्याभीयत्वेनासिद्धत्वादाट् । आस्ताम् । आसन्। स्यात्।भूयात्। अभूत्। सिचोस्तेश्च विद्यमानत्वेन विशेषणाद्नेण ॥

२४७१-घुसंज्ञक धातु और अस् धातुको हि परे रहते एकार हो और अभ्यासका लोप हो । आभीयत्व प्रयुक्त एत्वके असिद्ध होनेसे हिके स्थानमें धि और " श्नसोः० २४६९ " इस सूत्रसे अकारका लोप होकर-एधि ।

परवर्ती तातङ्से एत्वका बाध होनेसे तातङ् पक्षमें एत्व नहीं होगा, तातङ् होनेपर भी 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (एकवार दो शास्त्रकी प्राप्ति होनेपर जो बाधा जाताहै, वह बाधित ही रहताहै, फिर वह नहीं लगताहै) इस परिभाषासे नहीं होगा-स्तात् । स्तम् । स्त । असानि । असाव । असाम । " अस्तिसिचः०२२२५ " इस सूत्रसे ईट् होकर-आसीत् । "श्नसोः०२४६९ " इस सूत्रसे अकार लोपके आभीयत्वके कारण असिद्ध हो, इसे आट् होगा-आस्ताम् । आसन् । स्यात् । भूयात् । अभूत्, यहां " अस्तिसिचोऽपृक्ते " इस सूत्रमें सिच् असके विद्यमान विशेषणके कारण विद्यमान सिच्के परे स्थित अपृक्तसंज्ञक हल् न होनेसे ईट् नहीं हुआ ॥

२४७२ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८ । ३ । ८७ ॥

उपसर्गेभ्यः प्रादुसश्च परस्यास्तेः सस्य षः स्याद् यकारेऽचि च परे । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । यच्परः किम् । अभिस्तः ॥ २२ ॥ मृजू शुद्धौ ॥

२४७२-यकार और अच् परे रहते उपसर्ग और प्रादुस् शब्दके परवर्ती अस् धातुके सकारको षत्व हो, निष्यात्, प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । यकार और अच् परे रहते अभिस्तः ॥ मृजू धातु शुद्धिमें है ॥

२४७३ मृजेर्वृद्धिः । ७ । २ । ११४ ॥

मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे॥ क्ङित्यजादौ वेष्यते ॥ * ॥ व्रश्चेति षः । मार्ष्टि । मृष्टः। मृजन्ति-मार्जन्ति।ममार्ज।ममार्जतुः-ममृजतुः। ममार्जिथ-ममार्ष्ठ।मार्जिता-मार्ष्टा। मृड्ढि। अमार्ट् ।अमार्जम्। अमार्जीत् । अमार्क्षीत्॥२३॥ रुदिर् अश्रुविमोचने ॥

२४७३-धातुसंबन्धी प्रत्यय परे रहते मृज् धातुके इक्को अर्थात् ऋकारको वृद्धि हो ।

अजादि प्रत्यय परे रहते उक्त कार्य विकल्प करके हो * " व्रश्च० २९४ " इस सूत्रसे ज्के स्थानमें ष होकर-मार्ष्टि । मृष्टः । मृजन्ति, मार्जन्ति । ममार्ज । ममार्जतुः, ममृजतुः । ममार्जिथ, ममार्ष्ठ । मार्जिता, मार्ष्टा । मृड्ढि । अमार्ट् । अमार्जम् । अमार्जीत्, अमार्क्षीत् ॥ रुदिर् धातु रोदन करनेमें है ॥

२४७४ रुदादिभ्यःसार्वधातुके।७।२।७६॥

रुद्, स्वप्, श्वस्, अन्, जक्ष्, एभ्यो वलादेः सार्वधातुकस्येट् स्यात् । रोदिति । रुदितः । हौ परत्वादिटि धित्वं न । रुदिहि ॥

२४७४–रुदादि, अर्थात् रुद्, स्वप्, श्वस्, अन् और जक्ष् धातुके उत्तर वलादि सार्वधातुकको इट् हो, रोदिति। रुदितः। हिमें परत्वके कारण इट् होनेसे हिके स्थानमें धि नहीं होकर–रुदिहि॥

२४७५ रुदश्च पञ्चभ्यः।७।३।९८॥

हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्॥

२४७६–रुदादि पांच धातुओंके उत्तर अपृक्त हलादि पित् सार्वधातुकको ईट्का आगम हो॥

२४७६ अड्गार्ग्यगालवयोः।७।३।९९॥

अरोदत्–अरोदीत्। अरुदिताम्। अरुदन्। अरोदः–अरोदीः। प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट्। रुद्यात्। अरुदत्–अरोदीत्॥ १॥ ञिष्वप् शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः सुष्वपिथ–सुष्वप्थ॥

२४७६–गार्ग्य और गालव मुनिके मतसे रुदादि धातुके उत्तर अपृक्त हलादि पित् सार्वधातुकके अट् आगम हो, अरोदत्, अरोदीत्। अरुदिताम्। अरुदन्। अरोदः, अरोदीः। प्रकृति और प्रत्यय विशेषकी अपेक्षासे अट्, ईट् यह बहिरङ्ग हैं, और या ट् इनकी अपेक्षा अन्तरङ्ग है, इस कारण यासुट् ही होगा, रुद्यात्। अरुदत्, अरोदीत्॥ ञिस्वप् धातु शयन करनेमें है। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वपिथ, सुष्वप्थ॥

२४७७ सुविनिर्दुर्भ्यः सुपिसूतिसमाः। ८।३।८८॥

एभ्यः सुप्यादेः सस्य षः स्यात्। पूर्वं धातुरुपसर्गेण युज्यते। किति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वम्। पूर्वत्रासिद्धीयमद्विर्वचने॥ सुषुषुपतुः। सुषुषुपुः। अकिति तु द्वित्वेऽभ्यासस्य सम्प्रसारणम्। षत्वस्यासिद्धत्वात्ततः पूर्वं हलादिःशेषः। नित्यत्वाच्च। ततः सुपिरूपाभावान्न षः। सुसुष्वाप। सुस्वप्ता। अस्वपीत्–अस्वपत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्॥ २॥ श्वस प्राणने। श्वसिति। श्वसिता। अश्वसीत्–अश्वसत्। श्वस्याताम्। श्वस्यास्ताम्। ह्म्यन्तक्षणेति न वृद्धिः। अश्वसीत्॥ ३॥ अन च। अनिति। आन। अनिता। आनत्–आनीत्॥

२४७७–सु, वि, निर्, और दुर् इन उपसर्गोंके परे स्थित सुपि, सु और सम धातुके सकारको षत्व हो। पहले धातु उपसर्गके साथ युक्त होताहै पश्चात् साधनसे, इस मतसे "पूर्वत्रासिद्धीयमद्विर्वचने" इस परिभाषाके अनुसार कित् लिट् परे रहते परत्वके कारण सम्प्रसारण और षत्व करनेपर द्वित्व होगा, जैसे–सुषुषुपतुः। सुषुषुपुः। कित्भिन्न लिट् परे रहते तो द्वित्व होनेपर अभ्यासको सम्प्रसारण होगा, तब षत्वके असिद्धत्व और नित्यत्वके कारण उसके पूर्वमें "हलादिः शेषः २१७९" इससे लोप, पश्चात् सुप् रूपके अभावके कारण षत्व नहीं होगा, जैसे–सुसुष्वाप। सुस्वप्ता। अस्वपत्, अस्वपीत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्॥ श्वस धातु प्राणनार्थमें है। श्वसिति। श्वसिता। अश्वसीत्, अश्वसत्। श्वस्यानाम्। श्वस्यास्ताम्"ह्म्यन्तक्षण० २२९९"इस सूत्रसे वृद्धि नहीं होकर–अश्वसीत्॥ अन धातु प्राणनार्थक है। अनिति। आन। अनिता। आनत्, आनीत्॥

२४७८ अनितेः।८।४।१९॥

उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति॥ ४॥ जक्ष भक्षहसनयोः। जक्षिति। जक्षितः॥

२४७८–उपसर्गस्थ निमित्तके परे अन् धातुके नकारको णत्व हो, प्राणिति॥ जक्ष धातु भक्षण और हसनमें है। जक्षिति। जक्षितः॥

२४७९ अदभ्यस्तात्।७।१।४॥

झस्य अत्स्यादन्तापवादः। जक्षति। सिजभ्यस्तेति जुस्। अजक्षुः। अयमन्तःस्थादिरित्युज्ज्वलदत्तो बभ्राम॥ ५॥ रुदादयः पञ्च गताः॥

जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। उषविदेत्याम् वा। जागरांचकार–जजागार॥

२४७९–अभ्यस्तसंज्ञक धातुके परे झके स्थानमें अत् हो, यह अन्तादेशका अपवाद है, जक्षति। "सिजभ्यस्त० २२२६" इस सूत्रसे झिके स्थानमें जुस् होकर–अजक्षुः। यह धातु अन्तस्थवर्णादि है, यह उज्ज्वलदत्तने कहाहै, परन्तु यह उसका भ्रम है। रुदादि पांच धातु कहे गए॥ जागृ धातु निद्राक्षय, अर्थात् जागरणमें है। जागर्ति। जागृतः। जाग्रति। "उषविद० २३४१" इस सूत्रसे जागृ धातुके उत्तर विकल्प करके आम् होकर–जागराञ्चकार, जजागार॥

२४८० जाग्रोऽविचिण्णल्ङित्सु। ७।३।८५॥

जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च। जजागरतुः। अजागः। अजागृताम्। अभ्यस्तत्वाज्जुस्॥

२४८०–विच्, चिण्, णल्, और ङित्भिन्न वृद्धिविषयमें और प्रतिषेधविषयमें जागृ धातुके ऋकारको गुण हो, जजागरतुः। अजागः। अजागृताम्। अभ्यस्तत्वके कारण जुस् होनेपर–॥

२४८१ जुसि च । ७ । ३ । ८३ ॥

अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् । अजागरुः । अजादौ किम् । जागृयुः । आशिषि तु । जागर्यात् । जागर्यास्ताम् । जागर्यासुः । लुङि । अजागरीत्।जागृ इस् इत्यत्र यण् प्राप्तः,तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः,तां जागर्तिगुणः । तत्र कृते हलन्तलक्षणा प्राप्ता नेटीति निषिद्धा ततोऽतोहलादेरिति बाधित्वाऽतो ल्रान्तस्येति प्राप्ता ह्यन्तेति निषिध्यते ॥ तदाहुः ॥

गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम्॥
पुनर्वृद्धिर्निषेधोतो यण्पूर्वाः प्राप्तयो नवेति १

दरिद्रा दुर्गतौ । दरिद्राति ॥

२४८१–अजादि जुस् परे रहते इगन्त अङ्गको गुण हो, अजागरुः । अजादि जुस् न होनेपर जागृयुः । आशिर्लिङ्में तो जागर्यात्।जागर्यास्ताम् । जागर्यासुः । लुङ्में अजागरीत्, यहां "जागृ इस्" इस अवस्थामें यण् प्राप्त हुआ, वह सार्वधातुक गुणसे बाधित हुआ, उसको फिर सिचि वृद्धिने बाधा दी, उसको बाधकर "जाग्रोऽवि०" इससे जागृको गुण हुआ, तब हलन्तलक्षण वृद्धि प्राप्त हुई, उसको "नेटि २२६८" इस सूत्रसे निषेध हुआ, पश्चात् "अतो हलादे०२२८४" इस सूत्रको बाधकर "अतो ल्रान्तस्य" इस सूत्रकी प्राप्ति हुई, उसका "ह्यन्त० २२९९" इस सूत्रसे निषेध हुआ । यही कारिकामें प्रकाश करतेहैं कि, पहिले यण्की प्राप्ति तब गुणकी प्राप्ति हुई, उसको बाध करके वृद्धि प्राप्त हुई, उसको गुणने बाध किया, तब फिर वृद्धि प्राप्त हुई, उसका भी निषेध हुआ, फिर विकल्प करके प्राप्ति हुई, उसको बाधकर नित्य वृद्धि प्राप्त हुई उसका भी निषेध हुआ,इस प्रकार नौकी प्राप्ति हुई॥ दरिद्रा धातु दुर्गतिमें है । दरिद्राति ॥

२४८२ इद्दरिद्रस्य । ६ । ४ । ११४ ॥

दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके । दरिद्रितः ॥

२४८२–दरिद्रा धातुके आकारके स्थानमें इकार हो हलादि सार्वधातुक कित् ङित् प्रत्यय परे रहते, दरिद्रितः ॥

२४८३ श्नाभ्यस्तयोरातः ।६।४।११२॥

अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम् । दरिद्रांचकार । आत औ णल इत्यत्र ओं इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम् । अत एव ज्ञापकादाम्नेत्येके । ददरिद्रौ । ददरिद्रतुरित्यादि । यत्तु णलि ददरिद्रेति तन्निर्मूलमेव ॥ दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः*॥ लुङि वा सनि ण्वुलि ल्युटि च न ॥ * ॥ दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात् । दरिद्र्यात् । अदरिद्रीत् । इट्सकौ । अदरिद्रासीत् ॥ २ ॥ चकासृ दीप्तौ । झस्य अत् । चकासति । चकासांचकार । धि चेति सलोपः । सिच एवेत्येके । चकाद्धि । चकाधीत्येव भाष्यम् ॥

२४८३–कित् ङित् सार्वधातुक परे रहते श्ना और अभ्यस्तसंज्ञक धातुके आकारका लोप हो । दरिद्रति । अनेकाच् होनेसे आम् होकर–दरिद्राञ्चकार । "आत औणलः २३७१" इस सूत्रमें ओ ऐसा ही कहनेसे सिद्ध होनेपर औकार विधानकी आवश्यकता क्या है ? तो दरिद्रा धातुके आकारका लोप करनेपर भी औकारका श्रवण होनेके निमित्त है, इसी ज्ञापकके कारण आम् नहीं होगा, यह कोई २ कहतेहैं, उनके मतसे ददरिद्रौ । ददरिद्रतुः–इत्यादि । जो णल् परे 'ददरिद्र' ऐसा रूप कहतेहैं वह निर्मूल है ॥

आर्धधातुक विवक्षित होनेपर दरिद्रा धातुके आकारका लोप हो * ॥

लुङ् परे विकल्प करके आकारका लोप हो * और सन् ण्वुल् और ल्युट् परे रहते आकारका लोप नहीं हो * दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दारिद्रियात् । दारिद्र्यात् । ('दारिद्रियात्' यह विधि लिङ्में । 'दरिद्र्यात्' यह आशिष्में) । अदरिद्रीत् । इट् और सक् होकर–अदरिद्रासीत् ॥ चकासृ धातु दीप्तिमें है । झके स्थानमें अत् होकर चकासति । चकासाञ्चकार । "धि च २२४९" इस सूत्रसे सिच्के ही सकारका लोप होताहै, यह कोई २ कहतेहैं, उनके मतसे ' चकाद्धि ' ऐसा होगा, परन्तु 'चकाधि' ऐसाही भाष्य है ॥

२४८४ तिप्यनस्तेः । ८ । २ । ७३ ॥

पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः । अचकात्–अचकाद् । अचकासुः ॥

२४८४–तिप् परे रहते पदान्तमें स्थित सकारके स्थानमें दकार हो और अस् धातुको न हो, अचकात्, अचकाद् । अचकासुः ॥

२४८५ सिपि धातोरुर्वा । ८ ।२।७४॥

पदान्तस्य धातोः सस्य रुः स्याद्वा । पक्षे दः । अचकाः । अचकात् ॥ ३ ॥ शासु अनुशिष्टौ । शास्ति ॥

२४८५–सिप् परे रहते धातुसंबंधी पदान्तमें स्थित सकारके स्थानमें विकल्प करके रु हो, पक्षमें द होगा–अचकाः, अचकात् ॥ शासु धातु अनुशिष्टि, अर्थात् शासनमें है । शास्ति ॥

२४८६ शास इदङ्हलोः । ६ । ४ ।३४॥

शास उपधाया इत्स्यादङि हलादौ क्ङिति च । शासिवसीति षः । शिष्टः । शासति । शशास । शशासतुः । शास्तु–शिष्टात् । शिष्टाम्।शासतुः॥

२४८६-अङ् और हलादि कित्, ङित् प्रत्यय परे रहते शास् धातुकी उपधाके स्थानमें इकार हो, "शासिवसि० २४१०" इस सूत्रसे षत्व होकर-शिष्टः। शास्ति। शशास। शशासतुः। शास्तु, शिष्टात्। शिष्टाम्। शासतु॥

२४८७ शा हौ। ६। ४। ३५॥

शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। अशिष्टाम्। अशासुः। अशात्-अशाः। शिष्यात्। सर्तिशास्तीत्यङ्। अशिषत्। अशाशिष्यत्॥ ४॥ दीधीङ् दीप्तिदेवनयोः। एतदादयः पञ्च धातवश्छान्दसाः। दीधीते। एरनेकाच इति यण्। दीध्याते॥

२४८७-हि परे रहते शास् धातुके स्थानमें शा आदेश हो। आभीयत्वके कारण वह असिद्ध होनेसे हिके स्थानमें धि आदेश होकर-शाधि। अशात्। अशिष्टाम्। अशासुः। अशात्, अशाः। शिष्यात्। "सर्तिशास्ति०२ ३८२" इस सूत्रसे अङ् होकर-अशिषत्। अशाशिष्यत्॥ दीधीङ् धातु दीप्ति और देवनार्थमें है। इस धातुसे लेकर पांच धातु छान्दस हैं॥ दीधीते। "एरनेकाचः२७२" इस सूत्रसे यण् होकर-दीध्याते॥

२४८८ यीवर्णयोर्दीधीवेव्योः।७।४।५३॥

एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वम्। दीध्ये। दीधीवेवीटामिति गुणनिषेधः। दीध्यांचक्रे। दीधिता। दीधिष्यते॥ १॥ वेवीङ् वेतिना तुल्ये। वीगतीत्यनेन तुल्येऽर्थे वर्तते इत्यर्थः॥२॥ अथ त्रयः परस्मैपदिनः॥ षस सस्ति स्वप्ने। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि। पूर्वत्रासिद्धमिति सलोपस्यासिद्धत्वादतोहेरिति न लुक्। असत्। असस्ताम्। असः-असत्। सस्यात्। असासीत्-अससीत्॥ १॥ सन्ति। सन्तः। संस्तन्ति॥ २॥ बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य स्कोरिति लोपाभावात्। संस्ति। संस्तः। संस्तन्ति इत्येके। वश कान्तौ। कान्तिरिच्छा। वष्टि। उष्टः। उशन्ति। वक्षि। उष्ठः। उवाश। ऊशतुः। वशिता। वष्टु। उष्टात्। उड्ढि। अवट्। औष्टाम्। औशन्। अवशम्। उश्याताम्। उश्यास्ताम्॥ ३॥ चर्करीतं च॥ यङ्लुगन्तमदादौ बोध्यम्॥ ह्नुङ् अपनयने। ह्नुते। जुह्नुवे। ह्नुवीत। ह्नोषीष्ट। अह्नोष्ट॥ ४॥

॥ इत्यदादयः॥

२४८८-यकार और इवर्ण परे रहते दीधी और वेवी धातुके अन्त्य भागका लोप हो, इस सूत्रसे प्राप्त लोपको बाधकर नित्यत्वके कारण टिको एकार होगा-दीध्ये। "दीधीवेवीटाम्२१९०" इस सूत्रसे गुणका निषेध हुआ। दीध्यांचक्रे। दीधिता। दीधिष्यते॥ वेवीङ् धातु वी धातुके तुल्य अर्थमें है।

अब तीन परस्मैपदी धातु कहतेहैं।

षस और सस्ति धातु स्वप्नमें है। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि, यहां "पूर्वत्रासिद्धम्१२" इस सूत्रसे सकार लोपके असिद्धत्वके कारण "अतो हेः२२०२" इस सूत्रसे हिका लुक् नहीं हुआ। असत्। असस्ताम्। असः, असत्। सस्यात्। असासीत्, अससीत्। सन्ति। सन्तः। संस्तन्ति। यहां इदित्वके कारण नुम् और "स्कोः० ३८०" इस सूत्रसे सकारका लोप और "झरो झरि सवर्णे ७१" इस सूत्रसे तकारका विकल्प करके लोप हुआ। बहुतका समवाय होनेपर दोकी संयोगसंज्ञा न हो इसका आश्रयण करके "स्कोः० ३८०" इस सूत्रसे लोपका अभाव होनेसे संस्ति। संस्तः। संस्तन्ति, ऐसा कोई २ कहतेहैं॥ वश धातु कान्तिमें है, कान्ति शब्दसे इच्छा जाननी। वष्टि। उष्टः। उशन्ति। वक्षि। उष्ठः। उवाश। ऊशतुः। वशिता। वष्टु। उष्टात्। उड्ढि। अवट्। औष्टाम्। औशन्। अवशम्। उश्याताम्। उश्यास्ताम्॥

"चर्करीतञ्च" यङ्लुगन्त अदादिमध्यमें जानना चाहिये। ह्नुङ् धातु अपनयनमें है। ह्नुते। जुह्नुवे। ह्नुवीत। ह्नोषीष्ट। अह्नोष्ट॥

॥ इति तिङन्ते अदादिप्रकरणम्॥

अथ जुहोत्यादयः ३.

हु दानादनयोः॥ आदाने चेत्येके। प्रीणनेपीति भाष्यम्। दानं चेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते। इतश्चत्वारः परस्मैपदिनः॥

हु धातु दान और आदानमें है। किसी २ के मतसे यह केवल आदानार्थक है। भाष्यकारके मतसे यह प्रीणनार्थमें भी है। इस स्थानमें दान शब्दसे प्रक्षेप जानना, वह वैध आधारमें हविष्का यह स्वभावसे लब्ध होताहै। अब चार परस्मैपदी धातु कहतेहैं॥

२४८९ जुहोत्यादिभ्यः श्लुः।२।४।७५॥

शपः श्लुः स्यात्॥

२४८९-जुहोत्यादिगणीय धातुओंके उत्तर शप्के स्थानमें श्लु आदेश हो॥

२४९० श्लौ। ६। १। १०॥

धातोर्द्वे स्तः। जुहोति। जुहुतः। अदभ्यस्तादित्यत्। हुश्नुवोरिति यण्। जुह्वति॥

२४९०-श्लु परे होते धातुको द्वित्व हो। जुहोति। जुहुतः। "अदभ्यस्तात् २४७९" इससे झिके स्थानमें अत् आदेश,

" हुश्नुवोः० २३८७ " इस सूत्रसे यण् आदेश हुआ। जुह्वति॥

२४९१ भीह्रीभृहुवां श्लुवच्च ।३।१।३९॥

एभ्यो लिट्याम्वा स्यादामि श्लाविव कार्यं च। जुहवांचकार-जुहाव।होता।होष्यति।जुहोतु।जुहुतात्। हुर्धिः जुहुधि। आटि परत्वाद् गुणः। जुहवानि। परत्वाज्जुसि चेति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत् ॥१॥ ञिभी भये। बिभेति॥

२४९१-भी, ह्री, भृ और हु धातुके उत्तर लिट् परे रहते विकल्प करके आम् हो और आम् परे होनेपर श्लु परे रहते जो कार्य होताहै वही कार्य्य हो । जुहवाञ्चकार, जुहाव । होता । होष्यति । जुहोतु । जुहुतात् । हु धातुके उत्तर हिके स्थानमें धि हो-जुहुधि । आट् परे रहते परत्वके कारण हु धातुके उकारको गुण होगा-जुहवानि । परत्वके कारण जुस् परे भी गुण होगा-अजुहवुः । जुहुयात् । हूयात् । अहौषीत्॥ ञिभी धातु भयमें है । बिभेति ॥

२४९२ भियोन्यतरस्याम् ।६।४।११५॥

इकारः स्याद्धलादौ क्ङिति सार्वधातुके। बिभितः-बिभीतः। बिभ्यति। बिभयांचकार। बिभाय। भेता ॥ २ ॥ ह्री लज्जायाम्। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयांचकार। जिह्राय ॥ ३ ॥ पॄ पालनपूरणयोः ॥

२४९२-कित्, ङित् हलादि सार्वधातुक परे रहते भी धातुके ईकारके स्थानमें विकल्प करके ह्रस्व इकार हो। बिभितः, बिभीतः । बिभ्यति । बिभयाञ्चकार। बिभाय। भेता ॥ ह्री धातु लज्जामें है । जिह्रेति । जिह्रीतः । जिह्रियति। जिह्रयाञ्चकार । जिह्राय ॥ पॄ धातु पालन और पूरणार्थमें है ॥

२४९३ अर्तिपिपर्त्योश्च ।७।४।७७॥

अभ्यासस्य इकारोन्तादेशः स्यात् श्लौ ॥

२४९३-श्लु प्रत्यय परे रहते ऋ धातु और पॄ धातुके अभ्यासके अन्तको इकार आदेश हो ॥

२४९४ उदोष्ठ्यपूर्वस्य।७।१।१०२॥

अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उत्स्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्त्वम्। रपरत्वम्। हलि चेति दीर्घः। पिपूर्तः। पिपुरति। पपार। किति लिटि ऋच्छत्यॄता-मिति गुणे प्राप्ते ॥

२४९४-अङ्गावयव ओष्ठ्यवर्णपूर्वक जो ॠकार तदन्ताङ्गसम्बन्धी ऌकारके स्थानमें उत् हो । गुण और वृद्धि परत्वके कारण इसको बाधा देतेहैं । पिपर्ति । उत्व और रपरत्व होगा-"हलि च ३५४" इस सूत्रसे दीर्घ होगा। पिपूर्तः । पिपुरति । पपार । कित् लिट् परे "ऋच्छत्यॄताम् २३८३" इस सूत्रसे गुणकी प्राप्ति होनेसे- ॥

२४९५ शॄदॄप्रां ह्रस्वो वा।७।४।१२॥

एषां किति लिटि ह्रस्वो वा स्यात्। पक्षे गुणः। पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता-परीता। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अपारिष्टाम्। ह्रस्वान्तोयमिति केचित्। पिपर्ति। पिपृतः। पिप्रति। पिपृयात्। आशिषि। प्रियात्। अपार्षीत्। पाणिनीयमते तु, तं रोदसी पिपृतमित्यादौ छान्दसत्वं शरणम् ॥४॥ डुभृञ् धारण-पोषणयोः ॥

२४९५-शॄ, दॄ और पॄ धातुके ॠकारको विकल्प करके ह्रस्व हो, कित् लिट् परे रहते। विकल्प पक्षमें गुण होगा-पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता, परीता। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्य्यात्। पूर्य्यात् अपारीत्। अपारिष्टाम्। यह ह्रस्वान्त है, ऐसा कोई २ कहतेहैं। पिपर्ति पिपृतः। पिप्रति। पिपृयात्। आशीर्वाद अर्थमें प्रियात्। अपार्षीत्। किन्तु पाणिनीय मतमें "तं रोदसी पिपृतम्" इत्यादि स्थलमें वैदिकत्व ही शरण अर्थात् आश्रय करने योग्य है॥ डुभृञ् धातु धारण और पोषणार्थमें है ॥

२४९६ भृञामित्। ७। ४। ७६॥

भृञ् माङ् ओहाङ्, एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ। बिभर्ति। बिभृतः। बिभ्रति। बिभृध्वे। श्लुवद्भावाद्द्वित्वेत्त्वे। बिभरामास-बभार। बभर्थ। बभृव। बिभृहि। बिभराणि। अबिभः। अबिभृताम्। अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत ॥५॥ माङ् माने शब्दे च ॥

२४९६-श्लु परे होते भृञ्, माङ्, ओहाङ् इन तीन धातुओंके अभ्यासके स्थानमें इकार आदेश हो । बिभर्ति । बिभृतः । बिभ्रति । बिभृध्वे । श्लुवद्भावके कारण द्वित्व और इत्व हुआ-बिभरामास, बभार । बभर्थ । बभृव । बिभृहि । बिभराणि । अबिभः । अबिभृताम् । अबिभरुः । बिभृयात् । भ्रियात् । भृषीष्ट । अभार्षीत् । अभृत॥ माङ् धातु मान और शब्दमें है ॥

२४९७ ई हल्यघोः। ६। ४। ११३॥

श्नाभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि न तु घुसंज्ञकस्य। मिमीते। श्नाभ्यस्तयोरित्यालोपः। मिमाते। मिमते। मम्यमास्त ॥ ६ ॥ ओहाङ् गतौ ॥ जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते ॥ ७ ॥ ओहाक् त्यागे ॥ परस्मैपदी। जहाति ॥

२४९७-सार्वधातुक हलादि कित् अथवा ङित् प्रत्यय परे रहते श्ना प्रत्ययके आकारके और अभ्यस्तसंज्ञक धातुके आकारके स्थानमें ईकार हो, घुसंज्ञक धातुको न हो । मिमीते ।

"श्नाभ्यस्तयोः० २४८३" इससे आकारका लोप हुआ–मिमाते । मिमते । प्रण्यमास्त ॥ ओहाङ् धातु गतिमें है । जिहीते । जिहाते । जिहते । जहे । हाता । हास्यते ॥ ओहाक् धातु त्यागमें है, यह धातु परस्मैपदी है । जहाति ॥ -

२४९८ जहातेश्च । ६ । ४ । ११६ ॥

इत्त्याद्वा हलादौ क्ङिति सार्वधातुके । पक्षे ईत्त्वम् । जहितः–जहीतः । जहति ॥

२४९८–हलादि कित्, ङित् सार्वधातुक परे रहते हा धातुके आकारके स्थानमें इकार हो विकल्प करके । पक्षमें ईत्त्व होगा–जहितः, जहीतः । जहति ॥

२४९९ आ च हौ । ६ । ४ । ११७ ॥

जहातेर्हौ परे आ स्यात् चादिदीतौ । जहाहि–जहिहि–जहीहि । अजहात् । अजहुः ॥

२४९९–हि परे रहते हा धातुके स्थानमें आकार हो, चकार निर्देशके कारण इत्त्व और ईत्त्व हो–जहाहि, जहिहि, जहीहि । अजहात् । अजहुः ॥

२५०० लोपो यि । ६ । ४ । ११८ ॥

जहातेरालोपः स्याद्यादौ सार्वधातुके । जह्यात् । एर्लिङि । हेयात् । अहासीत् ॥ ८ ॥ डुदाञ् दाने ॥ प्रणिददाति । दत्तः । ददति । दत्ते । ददौ । घ्वसोरिति एत्त्वाभ्यासलोपौ । देहि । अददात् । अदत्ताम् । अददुः । दद्यात् । देयात् । अदात् । अदाताम् । अदुः । अदित ॥ ९ ॥ डुधाञ् धारणपोषणयोः । दानेप्येके । प्रणिदधाति ॥

२५००–यकारादि सार्वधातुक परे रहते हा धातुके आकारका लोप हो । जह्यात् "एर्लिङि २३७४" इस सूत्रसे लिङ् परे एत्त्व होगा–हेयात् । अहासीत् ॥ डुदाञ् धातु दानमें है । प्रणिददाति । दत्तः । ददति । दत्ते । ददौ । "घ्वसोः० २४७१" इस सूत्रसे एत्त्व और अभ्यासका लोप होगा । देहि । अददात् । अदत्ताम् । अददुः । दद्यात् । देयात् । अदात् । अदाताम् । अदुः । अदित ॥ डुधाञ् धातु धारण और पोषणार्थमें है । किसी २ के मतमें दानार्थमें भी है । प्रणिदधाति ॥

२५०१ दधस्तथोश्च । ८ । २ । ३८ ॥

द्विरुक्तस्य झषन्तस्य धाञो बशो भष् स्यात्तथयोः स्ध्वोश्च परतः । वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमाधवौ । वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत् । धत्तः । दधति । धत्थः । धत्थ । दध्वः । दध्मः । धत्ते । धत्से । धध्वे । धेहि । अधित ॥ १० ॥

अथ त्रयः स्वरितेतः ॥ णिजिर् शौचपोषणयोः ॥

२५०१–जिसको द्वित्व किया गया हो ऐसा झषन्त जो धाञ् धातु उसके अवयवीभूत बश्के स्थानमें भष् हो, त् और थ,स् तथा ध्व परे रहते वामन और माधवके मतमें वचनसामर्थ्यके कारण आकारका लोप स्थानिवत् नहीं होगा,पर यथार्थमें तो "पूर्वत्रासिद्धे न स्थानिवत्" इस परिभाषासे स्थानिवत् नहीं होगा–धत्तः । दधति । धत्थः । धत्थ । दध्वः । दध्मः । धत्ते । धत्से । धध्वे । धेहि । अधित ॥

अब तीन स्वरितेत् अर्थात् उभयपदी धातु कहे जातेहैं । णिजिर् धातु शौच और पोषणार्थमें है ॥

२५०२ निजां त्रयाणां गुणः श्लौ । ७ । ४ । ७५ ॥

निज्–विज्–विषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । नेनिक्तः । नेनिजति । नेक्ता । नेक्ष्यति । नेनेक्तु । नेनिग्धि ॥

२५०२–श्लु प्रत्यय परे रहते निज्, विज्, विष् इन तीन धातुओंके अभ्यासको गुण हो । नेनेक्ति । नेनिक्तः । नेनिजति । नेक्ता । नेक्ष्यति । नेनेक्तु । नेनिग्धि ॥

२५०३ नाभ्यस्तस्याऽचि पिति सार्वधातुके । ७ । ३ । ८७ ॥

लघूपधगुणो न स्यात् । नेनिजानि । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । नेनिज्यात् । निज्यात् । अनिजत्–अनैक्षीत् । अनिक्त ॥ १ ॥ विजिर् पृथग्भावे । वेवेक्ति । वेविक्ते । विवेजिथ । अत्र विज इडिति ङित्त्वं न । ओविजी इत्यस्यैव तत्र ग्रहणात् । णिजिविजी रुधादावपि ॥२॥ विष्लृ व्याप्तौ । वेवेष्टि । वेविष्टे । लृदित्त्वादङ् । अविषत् । तङि क्सः । अजादौ क्सस्याचीति अल्लोपः । अविक्षत । अविक्षाताम् । अविक्षन्त ॥ ३ ॥

अथ आगणान्तात्परस्मैपदिनश्छान्दसाश्च ॥ घृ क्षरणदीप्त्योः । जिघर्म्यग्निं हविषा घृतेन ॥ भृञामित् । बहुलं छन्दसीति इत्त्वम् ॥ १ ॥ हृ प्रसह्यकरणे । अयं स्रुवो अभिजिहर्ति होमान ॥ ॥ २ ॥ ऋ सृ गतौ । बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेतीत्त्वविधानादयं भाषायामपि । अभ्यासस्यासवर्ण इतीयङ् । इयर्ति । इयृतः । इय्रति । आर । आरतुः । इडत्यर्तीति नित्यमिट् । आरिथ । अर्ता । अरिष्यति । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । ईयृयात् । अर्यात् । आरत् । ससर्ति ॥४॥ भस भर्त्सनदीप्त्योः । बभस्ति । घसिभसोर्हलीत्युपधालोपः । झलोझलीति सलोपः । बब्धः । बप्सति ॥५॥ कि ज्ञाने । चिकेति

॥ ६ ॥ तुर त्वरणे ॥ तुतोर्ति । तुतूर्तः । तुतुरति ॥७॥ धिष शब्दे । दिधेष्टि । दिधिष्टः ॥८॥ धन धान्ये । दधन्ति । दधन्तः । दधनति ॥ ९॥ जन जनने । जजन्ति ॥

२५०३-अजादि पित् सार्वधातुक परे रहते अभ्यस्तसंज्ञक धातुके लघु पदको गुण न हो । नेनिजानि । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । नेनिज्यात् । निज्यात् । अनिजत्, अनैक्षीत् । अनिक्त ॥ विजिर् धातु पृथक्भावमें है । वेवेक्ति । वेविक्ते । विवेजिथ । इस स्थलमें " विज इट् २५३६ " इस सूत्रसे ङित्त्व न होगा कारण कि, वहां ओविजी धातुका ही ग्रहण है ॥ निजि और विजि धातु रुधादिमें भी पठित होंगे ॥ विष्लृ धातु व्याप्तिमें है । वेवेष्टि । वेविष्टे । लृदित्त्वके कारण अङ् होगा । अविषत् । तङ् परे क्स होगा- । "क्सस्याऽचि २३३७" इस सूत्रसे अजादि प्रत्यय परे रहते अकारका लोप होगा-अविक्षत । अविक्षाताम् । अविक्षन्त ॥

इसके पश्चात् गणसमाप्ति पर्य्यन्त परस्मैपदी तथा छान्दस धातु हैं ।

घृ धातु क्षरण और दीप्तिमें है, जैसे-"जिघर्म्यग्निं हविषा घृतेन" । " भृञामित् २४९६ " इससे 'इत्' की अनुवृत्ति होनेपर "बहुलं छन्दसि ३५९८" इस सूत्रसे इत्व हुआ॥ हृ धातु बलपूर्वक हरणमें है, यथा-"अयं स्रुवो अभिजिहर्त्ति होमान्" ऋ और सृ धातु गतिमें हैं । इस स्थलमें "बहुलं छन्दसि ३५९८" इस सूत्रसे इत्त्व सिद्ध होनेपर भी " अर्त्तिपिपर्त्योश्च २४९३" इस सूत्रसे इत्वविधानके कारण भाषामें भी इस धातुका व्यवहार प्रयोग होगा । " अभ्यासस्यासवर्णे २३९०" इस सूत्रसे इयङ् होगा-इयर्त्ति । इयृतः । इय्रति । आर । आरतुः । "इडत्यर्त्ति० २३८४" इस सूत्रसे नित्य इट् हुआ-आरिथ । अर्त्ता । अरिष्यति । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । इयृयात् । अर्यात् । आरत् । ससर्त्ति ॥ भस धातु भर्त्सन और दीप्तिमें है । बभस्ति । "घसिभसोर्हलि ३५५०" इस सूत्रसे उपधाका लोप हुआ " झलो झलि २२८१" इस सूत्रसे सकारका लोप हुआ-बब्धः । यहां तसके तकारको "झषस्तथो० २२८० " से धत्व हुआ । बप्सति ॥ कि धातु ज्ञानमें है । चिकेति ॥ तुर धातु त्वरणमें है । तुतोर्त्ति । तुतूर्त्तः । तुतुरति ॥ धिष धातु शब्द करनेमें है । दिधेष्टि । दिधिष्टः ॥ धन धातु धान्यमें है । दधन्ति । दधन्तः । दधनति॥ जन धातु जननमें है। जजन्ति॥

२५०४ जनसनखनां सञ्झलोः । ६ । ४ । ४२ ॥

एषामाकारोन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च । जजातः । जज्ञति । जजंसि । जजान । जजायात्-जजन्यात् । जायात् । जन्यात्॥१०॥ गा स्तुतौ । देवाञ् जिगाति सुम्नयुः । जिगीतः । जिगति ॥ ११ ॥ * ॥

॥ इति जुहोत्यादयः ॥

२५०४-झलादि सन् और झलादि कित्, ङित् परे रहते जन, सन और खन् धातुको आकार अन्तादेश हो । जजातः । जज्ञति । जजंसि । जजान । जजायात्, जजन्यात् । जायात्, जन्यात्।। गा धातु स्तुतिमें है,यथा-"देवाञ् जिगाति सुम्नयुः" जिगीतः । जिगति ॥

॥ इति तिङन्ते जुहोत्यादिप्रकरणम् ॥

अथ दिवादयः ४.

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । ञूषन्ताः परस्मैपदिनः॥

दिवु धातु अर्थात् दिव् धातु क्रीडा, विजिगीषा, व्यवहार, द्युति, स्तुति, मोद, मद, स्वप्न, कान्ति और गतिमें है । यहांसे झष धातु तक परस्मैपदी धातु कहे जातेहैं ।

२५०५ दिवादिभ्यः श्यन् । ३।१।६९॥

शपोपवादः। हलि चेति दीर्घः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत्।दीव्यात् । अदेवीत् । अदेविष्यत् ॥१॥ षिवु तन्तुसन्ताने । परिषीव्यति । परिषिषेव । न्यषेवीत्-न्यसेवीत् ॥२॥ स्रिवु गतिशोषणयोः॥३॥ष्ठिवु निरसने । केचिदिहेमं न पठन्ति ॥४॥ष्णुसु अदने आदान इत्येके।अदर्शन इत्यपरे। स्नुस्यति । सुष्णोस ॥ ५ ॥ ष्णसु निरसने । स्नस्यति । सस्नास ॥ ६ ॥ क्नसु ह्वरणदीप्त्योः । ह्वरणं कौटिल्यम् । चक्नास ॥ ७ ॥ व्युष दाहे। वुव्योष ॥ ८ ॥ प्लुष च ॥ ९ ॥ नृती गात्रविक्षेपे । नृत्यति ॥ ननर्त ॥

२५०५-दिवादिगणीयधातुओंके उत्तर श्यन् प्रत्यय हो, श्यन् प्रत्यय शप् प्रत्ययका विशेषक है । "हलि च ३५४" इस सूत्रसे दीर्घ होगा । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् ॥ षिवु धातु तन्तुविस्तार अर्थात् सिलाई करनेमें है । परिषीव्यति । परिषिषेव । न्यषेवीत्, न्यसेवीत् ॥ स्रिवु धातु गति और शोषणमें है॥ ष्ठिवु धातु निरसनमें है । कोई२ इस धातुका दिवादिगणके मध्यमें पाठ नहीं करतेहैं ॥ ष्णुसु धातु अदनमें है, किसी २ के मतमें आदान और किसी २ के मतमें अदर्शनमें है । स्नुस्यति। सुष्णोस॥ ष्णसु धातु निरसनमें है । स्नस्यति । सस्नास ॥क्नसु धातु ह्वरण अर्थात् कौटिल्य और दीप्तिमें है । चक्नास ॥ व्युष धातु दाहमें है । वुव्योष ॥ प्लुष धातु दाहमें है ॥ नृती धातु गात्रविक्षेपमें है । नृत्यति । ननर्त ॥

२५०६ सेऽसिचि कृतचृतच्छृदतृदनृतः । ७ । २ । ५७ ॥

एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्य

इड्वा स्यात् । नर्तिष्यति–नर्त्स्यति । नृत्येत् । नृत्यात् । अनर्तीत् ॥ १० ॥ त्रसी । उद्वेगे । वा भ्राशेति श्यन्वा । त्रस्यति–त्रसति । त्रेसतुः-तत्रसतुः ॥ ११ ॥ कुथ पूतीभावे । पूतीभावो दौर्गन्ध्यम् ॥ १२ ॥ पुथ हिंसायाम् ॥ १३ ॥ गुध परिवेष्टने ॥ १४ ॥ क्षिप प्रेरणे । क्षिप्यति । क्षेप्ता ॥ १५ ॥ पुष्प विकसने । पुष्प्यति । पुपुष्प ॥ १६ ॥ तिम ष्टिम ष्टीम आर्द्रीभावे । तिम्यति । स्तिम्यति । स्तीम्यति ॥ १९ ॥ व्रीड चोदने लज्जायां च । व्रीड्यति ॥ २० ॥ इष गतौ । इष्यति ॥ २१॥ षह षुह चक्यर्थे । चक्यर्थस्तृप्तिः । सह्यति । सुह्यति ॥ २३ ॥ जॄष् झॄष् वयोहानौ। जीर्यति । जजरतुः–जेरतुः । जरीता–जरिता । जीर्येत् । जीर्यात्–जॄस्तम्भ्वित्यङ्वा । ऋदृशोऽङि गुणः । अजरत्-अजारीत् । अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् ॥ २५ ॥ षूङ् प्राणिप्रसवे । सूयते । सुषुवे । स्वरतिसूतीति विकल्पं बाधित्वा श्र्युकः कितीति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् । सुषुविषे । सुषुविवहे । सोता–सविता ॥ २६ ॥ दूङ् परितापे दूयते ॥ २७ ॥ दीङ् क्षये । दीयते ॥

२५०६–कृत, चृत, छृद, तृद और नृत धातुके परे स्थित सिज्भिन्न सकारादि आर्धधातुक प्रत्ययको विकल्प करके इट्–का आगम हो । नर्तिष्यति, नर्त्स्यति । नृत्येत् । नृत्यात् । अनर्तीत् ॥ त्रसी धातु उद्वेगमें है "वा भ्राश० २३२१" इस सूत्रसे विकल्प करके इसके उत्तर श्यन् होगा–त्रस्यति, त्रसति । त्रेसतुः, तत्रसतुः ॥ कुथ धातु पूतीभावमें है । पूती–भाव शब्दसे दौर्गन्ध्य जानना॥पुथ धातु हिंसामें है॥ गुध धातु परिवेष्टनमें है ॥ क्षिप धातु प्रेरणमें है । क्षिप्यति । क्षेप्ता॥ पुष्प धातु विकसनमें है । पुष्प्यति । पुपुष्प ॥ तिम, ष्टिम और ष्टीम धातु आर्द्रीभावमें हैं । तिम्यति । स्तिम्यति । स्तीम्यति ॥ व्रीड धातु प्रेरण और लजामें है । व्रीड्यति ॥ इष धातु गतिमें है । इष्यति ॥ षह और षुह धातु चक्यर्थ अर्थात् तृप्तिमें हैं। सह्यति । सुह्यति ॥ जॄष् और झॄष् धातु वयोहानिमें हैं । जजरतुः, जेरतुः । जरीता, जरिता । जीर्येत् । जीर्यात् । "जॄस्तम्भु० २२९१" इस सूत्रसे विकल्प करके अङ् होगा, "ऋदृशोऽङि गुणः २४०६" इस सूत्रसे गुण होगा–अजरत्, अजारीत् । अजारिष्टाम् । झीर्यति । जझरतुः । अझारीत् ॥

षूङ् धातु प्राणिप्रसवमें है । सूयते । सुषुवे । "स्वरतिसूति० २२७९" इस सूत्रसे विकल्पको बाध करके "श्र्युकः किति २३८१" इस सूत्रसे निषेध प्राप्ति होनेपर क्रयादिनियमानुसार नित्य इट् होगा । सुषुविषे । सुषुविवहे । सोता, सविता । दूङ् धातु परितापमें है । दूयते ॥ दीङ् धातु क्षयमें है । दीयते ॥

२५०७ दीङो युडचि क्ङिति ।६।४।६३॥

दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्॥वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ ॥ *॥ दिदीये ॥

२५०७–दीङ् धातुके उत्तर अजादि कित् ङित् आर्धधातुकको युट्का आगम हो ।

वुक् और युट्, उवङ् और यण् कर्त्तव्य रहते सिद्ध हो यह कहना चाहिये * दिदीये ॥

२५०८ मीनातिमिनोतिदीङां ल्यपि च । ६ । १ । ५० ॥

एषामात्त्वं स्यात् ल्यपि चकारादशित्येज्निमित्ते । दाता । दास्यते । अदास्त । अदास्थाः ॥ २८ ॥ डीङ् विहायसा गतौ । डीयते । डिड्ये ॥ २९ ॥ धीङ् आधारे । धीयते । दिध्ये । धेता ॥ ३० ॥ मीङ् हिंसायाम् । हिंसात्र प्राणवियोगः । मीयते ॥ ३१ ॥ रीङ् श्रवणे । रीयते ॥ ३२ ॥ लीङ् श्लेषणे ।

२५०८–ल्यप् प्रत्यय परे रहते क्र्यादिगणीय मी धातु स्वादिगणीय मि धातु और दीङ् धातुके ईकार तथा इकारके स्थानमें आकार आदेश हो और सूत्रमें चकारके कारण शित् भिन्न एच् निमित्त प्रत्यय परे रहते भी हो । दाता । दास्यते । अदास्त । अदास्थाः ॥ डीङ् धातु आकाशगमनमें है । डीयते ॥ धीङ् धातु आधारमें है । धीयते । दिध्ये । धेता ॥ मीङ् धातु हिंसामें है । इस स्थलमें हिंसा शब्द प्राणवियोगमें है । मीयते ॥ रीङ् धातु श्रवणमें है । रीयते ॥ लीङ् धातु श्लेषणमें है ॥

२५०९ विभाषा लीयतेः । ६।१।५१ ॥

लीयतेरिति यका निर्देशो न तु श्यना । लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च । लेता–लाता । लेष्यते–लास्यते । एज्विषये किम् । लीयते । लिल्ये ॥ ३३ ॥ व्रीङ् वृणोत्यर्थे । व्रीयते । विव्रिये ॥ स्वादय ओदितः॥ तत्फलं तु निष्ठानत्वम् ॥ ३४ ॥ पीङ् पाने । पीयते ॥३५॥ माङ् माने । मायते । ममे॥३६॥ ईङ् गतौ । ईयते । अयांचक्रे ॥ ३७ ॥ प्रीङ् प्रीतौ सकर्मकः । प्रीयते । पिप्रिये ॥ ३८ ॥

अथ परस्मैपदिनश्चत्वारः ॥ शो तनूकरणे ॥

२५०९–लीयते पद यक्से सिद्ध हुआहै, श्यन्से नहीं, एच्विषयमें और ल्यप् परे रहते ली और लीङ् धातुके ईकार-स्थानमें विकल्प करके आकार हो । लेता, लाता । लेष्यते, लास्यते । एच्विषय न होनेपर लीयते । लिल्ये ॥

व्रीङ् धातु वरणमें है । व्रीयते । विव्रिये । स्वादिगणीय धातु ओकारइत् हैं, उसका फल निष्ठानत्व है ॥ पीङ् धातु

पानमें है । पीयते ॥ माङ् धातु मानमें है । मायते । ममे । ईङ् धातु गतिमें है । ईयते । अयाञ्चक्रे ॥ प्रीङ् धातु प्रीतिमें है । यह सकर्मक है । प्रीयते । पिप्रिये ॥

अब चार परस्मैपदी धातु कहतेहैं ।

शो धातु क्षीण करनेमें है ॥

२५१० ओतः श्यनि । ७ । ३ । ७१ ॥

लोपः स्यात् श्यनि । श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति । विभाषा घ्राधेडिति सिचो वा लुक् । लुगभावे यमरमनमातां सक्च इति इट्सकौ । अशात् । अशाताम् । अशुः । अशासीत् । अशासिष्टाम् ॥ १ ॥ छो छेदने । छ्यति ॥ २ ॥ षोऽन्तकर्मणि । स्यति । ससौ । अभिष्यति । अभ्यष्यत् । अभिससौ ॥ ३ ॥ दो अवखण्डने । द्यति । ददौ । प्रणिदाता । देयात् । अदात् ॥ ४ ॥

अथात्मनेपदिनः पञ्चदश । जनी प्रादुर्भावे ॥

२५१०-श्यन् प्रत्यय परे रहते ओकारका लोप हो । श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति। "विभाषा घ्राधेट्० २३७६" इस सूत्रसे विकल्प करके सिच्का लुक् होगा, लुक्के अभाव पक्षमें "यमरम० २३७७" इस सूत्रसे इट् और सक् होगा । अशात् । अशाताम् । अशुः । अशासीत् । अशासिष्टाम् ॥ छो धातु छेदनमें है । छ्यति ॥ षो धातु विनाशमें है । स्यति । ससौ । अभिष्यति । अभ्यष्यत् । अभिससौ ॥ दो धातु अवखंडनमें है । द्यति । ददौ । प्रणिदाता । देयात् । अदात् ॥

अब पञ्चदश १५ आत्मनेपदी धातु कहतेहैं ।

जनी धातु प्रादुर्भावमें है ॥

२५११ ज्ञाजनोर्जा । ७ । ३ । ७९ ॥

अनयोर्जादेशः स्याच्छिति । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । दीपजनेति वा चिण् ॥

२५११-शित् प्रत्यय परे रहते ज्ञा और जन् धातुके स्थानमें 'जा' आदेश हो । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । "दीपजन० २३२८ इस सूत्रसे विकल्प करके चिण् होगा ॥

२५१२ जनिवध्योश्च । ७ । ३ । ३५ ॥

अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अजनि-अजनिष्ट ॥ १ ॥ दीपी दीप्तौ । दीप्यते । दिदीपे । अदीपि-अदीपिष्ट ॥ २ ॥ पूरी आप्यायने । पूर्यते । अपूरि-अपूरिष्ट ॥ ३ ॥ तूरी गतित्वरणहिंसनयोः । तूर्यते । तुतूरे ॥ ४ ॥ धूरी गूरी हिंसागत्योः । धूर्यते । दुधूरे । गूर्यते । जुगूरे ॥ ६ ॥ घूरी जूरी हिंसावयोहान्योः ॥ ८ ॥ शूरी हिंसास्तम्भनयोः ॥ ९ ॥ चूरी दाहे ॥ १० ॥ तप ऐश्वर्ये वा । अयं धातुरैश्वर्ये वा तङ्श्यनौ लभते । अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः । केचित्तु वाग्रहणं वृतुधातोराद्यवयवमिच्छन्ति । तप्यते । तप्ता । तप्स्यते । पतेति व्यत्यासेन पाठान्तरम् । द्युतद्यामानियुतः पत्यमानः ॥ ११ ॥ वृतु वरणे । वृत्यते । पक्षान्तरे वावृत्यते । ततो वावृत्यमाना सा रामशालां न्यविक्षतेति भट्टिः ॥ १२ ॥ क्लिश उपतापे । क्लिश्यते । क्लेशिता ॥ १३ ॥ काशृ दीप्तौ । काश्यते ॥ १४ ॥ वाशृ शब्दे । वाश्यते । ववाशे ॥ १५ ॥

अथ पञ्च स्वरितेतः । मृष तितिक्षायाम् । मृष्यति । मृष्यते । ममर्ष । ममृषे ॥ १ ॥ शुचिर् पूतीभावे । पूतीभावः क्लेदः । शुच्यति । शुच्यते । शुशोच । शुशुचे । अशुचत्-अशोचीत् । अशोचिष्ट ॥ २ ॥ णह बन्धने । नह्यति । नह्यते । ननाह । नेहिथ-ननद्ध । नेहे । नद्धा । नत्स्यति । अनात्सीत् ॥ ३ ॥ रञ्ज रागे । रज्यति । रज्यते ॥ ४ ॥ शप आक्रोशे । शप्यति । शप्यते ॥ ५ ॥

अथैकादशानुदात्तेतः । पद गतौ । पद्यते । पेदे । पत्ता । पद्येत । पत्सीष्ट ॥

२५१२-चिण् और ञित्, णित्, कृत् प्रत्यय परे रहते जन और वध धातुकी उपधाको वृद्धि न हो । अजनि, अजनिष्ट । दीपी धातु दीप्तिमें है । दीप्यते । दिदीपे । अदीपि, अदीपिष्ट । पूरी धातु आप्यायनमें । पूर्यते । अपूरि, अपूरिष्ट ॥ तूरी धातु सत्वर गमन और हिंसामें है । तूर्यते । तुतूरे ॥ धूरी और गूरी धातु हिंसा और गतिमें है । धूर्यते । दुधूरे । गूर्यते । जुगूरे ॥ घूरी और जूरी धातु हिंसा और वयोहानिमें हैं ॥ शूरी धातु हिंसा और स्तम्भनार्थमें है ॥ चूरी धातु दाहमें है ॥

तप धातु ऐश्वर्य्यमें है । इस धातुके उत्तर ऐश्वर्य्यार्थमें तङ् और श्यन् विकल्प करके होताहै । किन्तु अन्यत्र शप् विकरण अर्थात् परस्मैपदी है । कोई २ वाशब्दको वृतु धातुका आद्यावयव इच्छा करतेहैं । तप्यते । तप्ता । तप्स्यते । 'पत' ऐसा व्यत्याससे पाठान्तर भी है, इसीसे " द्युतद्यामानियुतः पत्यमानः " यह भी सङ्गत हुआ । वृतु धातु वरणमें है । वृत्यते । पक्षान्तरमें वावृत्यते । " ततो वावृत्यमाना सा रामशालां न्यविक्षत " ऐसा भट्टिमें प्रयोग है ॥

क्लिश धातु उपतापमें है । क्लिश्यते । क्लेशिता ॥ काशृ धातु दीप्तिमें है । काश्यते ॥ वाशृ धातु शब्दमें है । वाश्यते । ववाशे ॥

अब पांच उभयपदी धातु कहतेहैं ।

मृष धातु तितिक्षामें है । मृष्यति । मृष्यते । ममर्ष । ममृषे ॥ शुचिर् धातु पूतीभावमें है, पूतीभाव शब्दसे क्लेद जानना । शुच्यति । शुच्यते । शुशोच । शुशुचे । अशुचत्,

अशोचीत् । अशोचिष्ट ॥ णह धातु बन्धनमें है । नह्यति । नह्यते । ननाह । नेहिथ, ननद्ध, । नेहे । नद्धा । नत्स्यति । अनात्सीत् ॥ रञ्ज धातु रागमें है । रज्यति । रज्यते ॥ शप धातु आक्रोशमें है । शप्यति । शप्यते ॥

अब ११ आत्मनेपदी धातु कहतेहैं ।

पद धातु गतिमें है । पद्यते । पेदे । पत्ता । पद्येत । पत्सीष्ट ॥

२५१३ चिण् ते पदः । ३ । १ । ६० ॥

पदश्च्लेश्चिण् स्यात्तशब्दे परे । प्रण्यपादि । अपत्साताम् । अपत्सत ॥१॥ खिद दैन्ये । खिद्यते । चिखिदे । खेत्ता । अखित्त ॥२॥ विद सत्तायाम् । विद्यते । वेत्ता ॥ ३ ॥ बुध अवगमने । बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि–अबुद्ध । अभुत्साताम् ॥ ४ ॥ युध सम्प्रहारे । युध्यते । युयुधे । योद्धा । अयुद्ध । कथं युध्यतीति युधमिच्छतीति क्यच् । अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति वा ॥ ५ ॥ अनोरुध कामे । अनुरुध्यते ॥६॥ अण प्राणने । अण्यते । आणे । अणिता ॥७॥ अनेति दन्त्यान्तोयमित्येके ॥८॥ मन ज्ञाने । मन्यते । मेने । मन्ता ॥ ९ ॥ युज समाधौ । समाधिश्चित्तवृत्तिनिरोधः । अकर्मकः युज्यते । योक्ता ॥ १० ॥ सृज विसर्गे । अकर्मकः । संसृज्यते सरसिजैररुणांशुभिन्नैः । ससृजिषे । स्रष्टा । स्रक्ष्यते । लिङ्सिचाविति कित्त्वान्न गुणो नाप्यम् । सृक्षीष्ट । असृष्ट । असृक्षाताम् । ॥ ११ ॥ लिश अल्पीभावे । लिश्यते । लेष्टा । लेक्ष्यसे । लिक्षीष्ट । अलिक्षत । अलिक्षाताम् । ॥ १२ ॥ अथागणान्तात्परस्मैपदिनः । राधोऽकर्मकाद्वृद्धावेव । एवकारो भिन्नक्रमः । राधोऽकर्मकादेव श्यन् । उदाहरणमाह वृद्धाविति । यन्मह्यमपराध्यति । द्रुह्यतीत्यर्थः । विराध्यन्तं क्षमेत कः । द्रुह्यन्तमित्यर्थः । राध्यत्योदनः । सिध्यतीत्यर्थः । कृष्णाय राध्यति । दैवं पर्यालोचयतीत्यर्थः । दैवस्य धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम् । रराध । रराधतुः । रराधिथ । राधो हिंसायामित्येत्त्वाभ्यासलोपाविह न हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात् । राद्धा । रात्स्यति । अयं स्वादिश्चुरादिश्च ॥ १॥ व्यध ताडने । ग्रहिज्येति संप्रसारणम् । विध्यति । विव्याध । विविधतुः । विव्यधिथ–विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् ॥२॥ पुष पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । पुषादीत्यङ् । अपुषत् ॥ ३ ॥ शुष शोषणे । अशुषत् ॥ ४ ॥ तुष प्रीतौ ॥ ५ ॥ दुष वैकृत्ये ॥ ६ ॥ श्लिष आलिङ्गने । श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति ॥

२५१३–त शब्द परे रहते पद धातुके उत्तर स्थित च्लिके स्थानमें चिण् हो । प्रण्यपादि । अपत्साताम् । अपत्सत ॥ खिद धातु दैन्यम है । खिद्यते । चिखिदे । खेत्ता । अखित्त ॥ विद धातु सत्तामें है । विद्यते । वेत्ता ॥ बुध धातु जाननेमें है । बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि, अबुद्ध । अभुत्साताम् ॥ युध धातु संप्रहारमें है । युध्यते । युयुधे । योद्धा । अयुद्ध ।

'युध्यति' पद किस प्रकारसे सिद्ध हुआ ? कारण कि,युध धातु आत्मनेपदी है, इस कारण इसके उत्तर परस्मैपदसंज्ञक प्रत्यय नहीं हो सकता, तो कहतेहैं कि, युधमिच्छति इस विग्रहमें युध धातुके उत्तर क्यच् प्रत्यय होकर उक्त रूप सिद्ध हुआहै, किन्तु श्यन् करके नहीं हुआहै, 'अनुदात्तेत्त्व लक्षण आत्मनेपद अनित्य है' इस परिभाषासे विकल्प करके आत्मनेपद होनेके कारण उक्त रूप सिद्ध हुआ, ऐसा भी कह सकतेहैं ॥

अनुपूर्वक रुध धातु कामार्थमें है । अनुरुध्यते ॥ अण धातु प्राणनमें है । अण्यते । आणे । अणिता । कोई २ कहतेहैं, यह धातु दन्त्यान्त (नकारान्त) है ॥ मन धातु ज्ञानमें है । मन्यते । मेने । मन्ता ॥ युज धातु समाधिमें अर्थात् चित्तवृत्तिनिरोधमें है, यह अकर्मक है । युज्यते । योक्ता ॥ सृज धातु विसर्गमें है, यह अकर्मक है । "संसृज्यते सरसिजैररुणांशुभिन्नैः" ससृजिषे । स्रष्टा । स्रक्ष्यते । "लिङ्सिचौ० २३००" इस सूत्रके अनुसार कित्त्वके कारण गुण और अम् नहीं होगा–सृक्षीष्ट । असृष्ट । असृक्षाताम् ॥ लिश धातु अल्पीभावमें है । लिश्यते । लेष्टा । लेक्ष्यसे । लिक्षीष्ट । अलिक्षत । अलिक्षाताम् ॥

अब दिवादि गणकी समाप्तिपर्यन्त परस्मैपदी धातु चलेंगे ।

राध धातु अकर्मक वृद्धि अर्थमें है, एव शब्द भिन्नक्रम जानना, अर्थात् अकर्मक राध धातुके उत्तर ही श्यन् हो, जैसे–वृद्धिमें 'यन्मह्यमपराध्यति' अर्थात् द्रोह करताहै, 'विराध्यन्तं क्षमेत कः' अर्थात् द्रोह करतेहुए, इन प्रयोगोंमें यह उदाहरण जानना । 'राध्यति ओदनः' अर्थात् सिद्ध होताहै, 'कृष्णाय राध्यति' अर्थात् दैवपर्य्यालोचना करताहै । दैव शब्दके धात्वर्थमें अन्तर्भाव होनेके कारण 'जीवति' इत्यादिके समान अकर्मक है । रराध । रराधतुः । रराधिथ । "राधो हिंसायाम्" इस सूत्रसे एत्त्व और अभ्यासका लोप नहीं होगा कारण कि, हिंसार्थमें सकर्मक होनेके कारण दिवादि गणके अयोग्य है । राद्धा । रात्स्यति । यह धातु स्वादि और चुरादि दोनों गणीय है ॥

व्यध धातु ताडनमें है । "ग्रहिज्या० २४१२" इससे संप्रसारण होगा–विध्यति । विव्याध । विविधतुः । विव्यधिथ, विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् ॥ पुष धातु पुष्टिमें है । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । "पुषादि० २३४३" इस सूत्रसे अङ् आदेश

हुआ-अपुषत् ॥ शुष धातु शोषणमें है । अशुषत् ॥ तुष धातु प्रीतिमें है ॥ दुष धातु वैकृत्यमें है ॥ श्लिष धातु आलिङ्गनमें है । श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति ॥

२५१४ श्लिषः-३ । १ । ४६ ॥

अस्मात्परस्यानिटश्च्लेः क्सः स्यात् । पुषाद्यङोपवादो न तु चिणः । पुरस्तादपवादन्यायात् ॥

२५१४ आलिङ्गने । ३ । १ ।४६॥

श्लिषश्च्लेरालिङ्गन एव क्सो नान्यत्र । योगविभागसामर्थ्याच्छल इगुपधादित्यस्याप्ययं नियमः । अश्लिक्षत्कन्यां देवदत्तः । आलिङ्गन एवेति किम् । समश्लिषज्जतु काष्ठम् । अङ् । प्रत्यासत्ताविह श्लिषिः । कर्मणि अनालिङ्गने सिजेव न तु क्सः । एकवचने चिण् । अश्लेषि । अश्लिक्षाताम् । अश्लिक्षन्त । अश्लिष्ठाः । अश्लिड्ढ्वम् ॥७॥ शक विभाषितोऽमर्षणे । विभाषित इत्युभयपदीत्यर्थः । शक्यति-शक्यते हरिं द्रष्टुं भक्तः । शशाक । शेकिथ-शशक्थ । शेके । शक्ता । शक्ष्यति । शक्ष्यते । अशकत् । अशक्त । सेडयमित्येके । तन्मतेनानिट्कारिकासु लदित्पठितः । शकिता । शकिष्यति ॥ ८ ॥ ष्विदा गात्रप्रक्षरणे । घर्मस्रुतावित्यर्थः । अयं ञीदिति न्यासकारादयः । नेति हरदत्तादयः । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् ॥९॥ क्रुध क्रोधे । क्रोद्धा । क्रोत्स्यति ॥ १० ॥ क्षुध बुभुक्षायाम् । क्षोद्धा । कथं क्षुधित इति । सम्पदादिकिबन्तात्तारकादित्वादितच् इति माधवः वस्तुतस्तु वसतिक्षुधोरितीट् ॥ ११ ॥ शुध शौचे । शुध्यति । शुशोध । शोद्धा ॥ १२ ॥ षिधु संराद्धौ । ऊदित्पाठः प्रामादिकः । सिध्यति । सेद्धा । सेत्स्यति । असिधत् ॥ १३ ॥ रध हिंसासंराध्योः । संराद्धिर्निष्पत्तिः । रध्यति । रधिजभोरचीति नुम् । ररन्ध । ररन्धतुः ॥

२५१४-श्लिष धातुके उत्तर स्थित अनिट् च्लिके स्थानमें क्स हो । यह सूत्र "पुरस्तादपवादा अनन्तरान् विधीन्बाधन्ते नोत्तरान्" अर्थात् पूर्वदेशस्थित अपवाद शास्त्र समीप विधिको बाधा देताहै, उत्तर विधिको नहीं, इस परिभाषाके बलसे "पुषादि०" सूत्रसे विहित अङ्का अपवादक है, चिण्का नहीं ॥

श्लिष धातुके उत्तर आलिङ्गनार्थमें ही च्लिके स्थानमें क्स हो अन्यार्थमें नहीं हो । योगविभाग सामर्थ्यके कारण "शल इगुपधात्० २३३६" इस सूत्रसे च्लिके स्थानमें विहित क्स आदेशका भी वर्त्तमान नियम जानना चाहिये । "अश्लिक्षत् कन्यां देवदत्तः" ।

आलिङ्गनार्थमें न होनेपर 'समश्लिषत् जतु काष्ठम्' इस स्थानमें अङ् हुआ, इस स्थलमें श्लिष धातुका अर्थ प्रत्यासत्ति जानना चाहिये ।

कर्म वाच्यमें अनालिङ्गनार्थमें सिच् ही हो, क्स न हो, एकवचनमें चिण् होगा-अश्लेषि । अश्लिक्षाताम् । अश्लिक्षन्त । अश्लिष्ठाः । अश्लिड्ढ्वम् ॥

शक् धातु अमर्षणार्थमें उभयपदी हो । शक्यति, शक्यते हरिं द्रष्टुं भक्तः । शशाक । शेकिथ, शशक्थ । शेके । शक्ता । शक्ष्यति । शक्ष्यते । अशकत् । अशक्त । कोई २ कहतेहैं यह धातु सेट् है, क्योंकि उनके मतके अनुसार अनिट् कारिकामें ऌकारइत् शक् धातु पठित है । शकिता । शकिष्यति ॥ ष्विदा धातु गात्रप्रक्षरण अर्थात् पसीना निकलनेमें है, न्यासकारादिके मतमें यह धातु ञीत् है, किन्तु हरदत्तादिके मतमें ऐसा नहीं है । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् ॥

क्रुध धातु क्रोधमें है । क्रोद्धा । क्रोत्स्यति ॥ क्षुध धातु बुभुक्षामें है । क्षोद्धा । किन्तु क्षुधित पद कैसे सिद्ध हुआ? कारण कि, यह धातु अनिट्कारिकामें पठित होनेसे अनिट् है? इस विषयमें माधवने कहाहै कि, सम्पदादि किबन्तके उत्तर तारकादित्वके कारण इतच् प्रत्यय होकर सिद्ध हुआहै, वास्तवमें तो "वसति क्षुधोः० ३०४६" इस सूत्रसे इट् हुआ ॥ शुध धातु शोधनमें है । शुध्यति । शुशोध । शोद्धा ॥ षिधु धातु संराद्धिमें है । इस स्थलमें ऊदित् पाठ प्रामादिक है । सिद्ध्यति । सेद्धा । सेत्स्यति । असिधत् ॥ रध धातु हिंसा और संराद्धिमें है, संराद्धि शब्दसे निष्पत्ति जाननी। रध्यति । "रधिजभोरचि २३०२" इस सूत्रसे नुम् हुआ-ररन्ध । ररन्धतुः ॥

२५१५ रधादिभ्यश्च । ७ । २ । ४५ ॥

रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह्, एभ्यो वलाद्यार्द्धधातुकस्य वेट् स्यात् । ररन्धिथ-ररद्ध । ररन्धिव-रेध्व ॥

२५१५-रधादि अर्थात् रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह् और ष्णिह् धातुके उत्तर वलादि आर्धधातुकको विकल्प करके इट्का आगम हो । ररन्धिथ, ररद्ध । ररन्धिव, रेध्व ॥

२५१६ नेट्यलिटि रधेः । ७।१। ६२॥

लिड्वर्जे इटि रधेर्नुम्न स्यात् । रधिता-रद्धा । रधिष्यति-रत्स्यति । अङि नुम् । अनिदितामिति नलोपः । अरधत् ॥ १४॥ णश अदर्शने । नश्यति । ननाश । नेशतुः । नेशिथ ॥

२५१६-लिट्को छोडकर इट् परे रहते रध् धातुको नुम् न हो । रधिता, रद्धा । रधिष्यति, रत्स्यति । अङ् परे नुम् हुआ, "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप हुआ-अरधत् ॥

णश धातु अदर्शनमें । नश्यति । ननाश । नेशतुः । नेशिथ॥

२५१७ मस्जिनशोर्झलि ।७।१। ६०॥

नुम् स्यात् । ननंष्ठ । नेशिव-नेश्व । नेशिम-नेश्म । नशिता-नंष्टा । नशिष्यति-नङ्क्ष्यति-नश्येत् । नश्यात् । अनशत् । प्रणश्यति ॥

२५१७-झल् परे रहते मस्ज और नश धातुको नुम् हो । ननंष्ठ । नेशिव, नेश्व । नेशिम, नेश्म । नशिता, नंष्टा । नशिष्यति, नङ्क्ष्यति । नश्येत् । नश्यात् । अनशत् । प्रणश्यति ॥

२५१८ नशेः षान्तस्य ।८।४। ३६॥

णत्वं न स्यात् । प्रनंष्टा । अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम् । प्रनङ्क्ष्यति । नशिष्यति ॥१९॥ तृप प्रीणने । प्रीणनं तृप्तिस्तर्पणं च । नाग्निस्तृप्यति काष्ठानाम् । पितॄनताप्सीदिति भट्टिः । इत्युभयत्र दर्शनात् । ततर्पिथ-तत्रप्थ-ततर्प्थ । तर्पिता-तर्प्ता-त्रप्ता । कृशमृशस्पृशेति सिज्वा । अतर्पीत्-अत्राप्सीत्-अताप्सीत्-अतृपत्॥१६॥ दृप हर्षमोहनयोः । मोहनं गर्वः । दृप्यतीत्यादि। रधादित्वादिमौ वेट्कावमर्थमनुदात्तता ॥ १७॥ द्रुह जिघांसायाम् । वा द्रुहमुहेति वा घः । पक्षे ढः । दुद्रोग्ध-दुद्रोढ-दुद्रोहिथ । द्रोहिता-द्रोग्धा-द्रोढा । द्रोहिष्यति-ध्रोक्ष्यति । ढत्वघत्वयोस्तुल्यं रूपम् । अद्रुहत्॥१८॥ मुह वैचित्ये वैचित्यमविवेकः । मुह्यति । मुमोहिथ-मुमोग्ध-मुमोढ । मोग्धा-मोढा-मोहिता । मोहिष्यति-मोक्ष्यति । अमुहत्॥१९॥ ष्णुह उद्गिरणे । स्नुह्यति । सुष्णोह । सुष्णोहिथ-सुष्णोग्ध-सुष्णोढ । सुष्णुहिव-सुष्णुह्व । स्नोहिता-स्नोग्धा-स्नोढा । स्नोहिष्यति-स्नोक्ष्यति । अस्नुहत् ॥ २० ॥ ष्णिह प्रीतौ । स्निह्यति । सिष्णेह ॥ वृत् ॥ रधादयः समाप्ताः । पुषादयस्तु आगणान्तादिति सिद्धान्तः ॥ २१ ॥ शमु उपशमे ॥

२५१८-षान्त नश् धातुके नकारको णत्व न हो । प्रनंष्टा । अन्त शब्दका ग्रहण करनेसे भूतपूर्वकी प्रतिपत्ति जनाता है, अर्थात् पूर्वमें षकारान्त था, अब नहीं इस प्रकार जो नश धातु इसको भी णत्व न हो । प्रनङ्क्ष्यति । नशिष्यति ॥

तृप धातु प्रीणनमें है । "नाग्निस्तृप्यति काष्ठानाम्" "पितॄनताप्सीत्" इन दोनों स्थलोंमें तृप धातुका प्रीणन अर्थ दिखाया है । ततर्पिथ, तत्रप्थ, ततर्प्थ । तर्पिता, तर्प्ता, त्रप्ता । "कृशमृशस्पृश०" इस सूत्रसे विकल्प करके सिच् हुआ-अतर्पीत्, अत्राप्सीत्, अताप्सीत्, अतृपत् । दृप धातु हर्ष और मोहन अर्थात् गर्वमें है । दृप्यति-इत्यादि । रधादित्वके कारण यह दो धातु विकल्प करके इट् युक्त होतेहैं। अम् आदेशके निमित्त अनुदात्तता हो ॥

द्रुह धातु जिघांसामें है । "वा द्रुहमुह० ३२७" इस सूत्रसे विकल्प करके घ हुआ, विकल्प पक्षमें ढ हुआ-दुद्रोग्ध, दुद्रोढ, दुद्रोहिथ । द्रोहिता, द्रोग्धा, द्रोढा । द्रोहिष्यति, ध्रोक्ष्यति। ढत्व और घत्वका रूप तुल्य ही है । अद्रुहत् ॥ मुह धातु वैचित्य अर्थात् अविवेकमें है । मुह्यति । मुमोहिथ, मुमोग्ध, मुमोढ । मोग्धा, मोढा, मोहिता । मोहिष्यति, मोक्ष्यति । अमुहत् ॥ ष्णुह धातु उद्गिरणमें है । स्नुह्यति । सुष्णोह । सुष्णोहिथ, सुष्णोग्ध, सुष्णोढ । सुष्णुहिव, सुष्णुह्व । स्नोहिता, स्नोग्धा, स्नोढा । स्नोहिष्यति, स्नोक्ष्यति । अस्नुहत् ॥ ष्णिह धातु प्रीतिमें है । स्निह्यति । सिष्णेह ॥

रधादि धातु समाप्त हुए ॥

पुषादि धातु गणसमाप्ति पर्य्यन्त चलेंगे यह सिद्धान्त मत है ।

शमु धातु उपशममें है ॥

२५१९ शमामष्टानां दीर्घः श्यनि । ७ । ३ । ७४ ॥

शमादीनामित्यर्थः । प्रणिशाम्यति । शेमतुः। शेमिथ । शमिता । अशमत् ॥ १ ॥ तमु काङ्क्षायाम् । ताम्यति । तमिता । अतमत् ॥ २ ॥ दमु उपशमे । उपशमे इति ण्यन्तस्य । तेन सकर्मकोयम् । न तु शमिवदकर्मकः । अदमत्॥३॥ श्रमु तपसि खेदे च श्राम्यति । अश्रमत् ॥ ४ ॥ भ्रमु अनवस्थाने । वा भ्राशेति श्यन्वा । तत्र कृते शमामष्टानामिति दीर्घः । भ्राम्यति । लुङ्यङ् । अभ्रमत् । शेषं भ्वादिवत् ॥५ ॥ क्षमू सहने । क्षाम्यति । चक्षमिथ-चक्षन्थ । चक्षमिव-चक्षण्व । चक्षमिम-चक्षण्म । क्षमिता-क्षन्ता । अयमषित् । भ्वादिस्तु षित । अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा ॥ ६ ॥ क्लमु ग्लानौ । क्लाम्यति-क्लामति । शपीव श्यन्यपि ष्ठिवुक्लम्वित्येव दीर्घे सिद्धे शमादिपाठो विनुणर्थः । अङ् । अक्लमत् ॥ ७ ॥ मदी हर्षे । माद्यति । अमदत् । शमादयोऽष्टौ गताः ॥ ८ ॥ असु क्षेपणे । अस्यति । आस । असिता ॥

२५१९-श्यन् परे रहते शमादि आठ धातुओंको दीर्घ हो। प्रणिशाम्यति । शेमतुः । शेमिथ । शमिता । अशमत् ॥ तमु धातु आकांक्षामें है, ताम्यति । तमिता । अतमत् ॥ दमु धातु उपशममें है, उपशम शब्द णिजन्तका निर्देश हुआ है, इस कारण यह धातु सकर्मक है, किन्तु शम धातुके समान अकर्मक नहीं है । अदमत् ॥ श्रमु धातु तपस्या और खेदमें है । श्राम्यति । अश्रमत् ॥ भ्रमु धातु अनवस्थितिमें है । "वा भ्राश० २३२१" इस सूत्रसे विकल्प करके इस धातुके उत्तर श्यन् होगा, श्यन् होनेपर "शमामष्टानाम्० २५१९"

इस सूत्रसे दीर्घ होगा–भ्राम्यति । लुङ् परे धातुके उत्तर स्थित च्लिके स्थानमें अङ् हुआ–अभ्रमत् । शेष रूप भ्वादिके समान हैं ॥

क्षमू धातु सहनमें है । क्षाम्यति । चक्षमिथ, चक्षन्थ । चक्षमिव, चक्षण्व । चक्षमिम, चक्षण्म । क्षमिता, क्षन्ता । यह धातु अषित् है, भ्वादिमें षित् जानना, अषित् क्षम धातुका क्षान्ति और षकार इत् अर्थात् क्षमूष् धातुका क्षमा ऐसा रूप कृदंतमें होगा ॥ क्लमु धातु ग्लानिमें है । क्लाम्यति, क्लामति । शप् परे रहते जैसा दीर्घ होताहै, वैसेही श्यन् परे भी "ष्ठिवुक्लमु० २३२०" इस सूत्रसेही दीर्घ सिद्ध होता तो भी शमादिपाठ घिनुणर्थ है । अङ् परे अक्लमत् ॥ मदी धातु हर्षमें है । माद्यति । अमदत् ॥

शमादि आठ धातु समाप्त हुए ॥

असु धातु क्षेपणमें है । अस्यति । आस । असिता ॥

२५२० अस्यतेस्थुक् । ७ । ४ । १७ ॥

अङि परे । आस्थत् । अस्य पुषादित्वादङि सिद्धे अस्यतिवक्तीति वचनं तङर्थम् । तङ् तूपसर्गादस्यत्यूह्योरिति वक्ष्यते । पर्यास्थत ॥ १ ॥ यसु प्रयत्ने ॥

२५२०–अङ् परे रहते असु धातुको थुक्का आगम हो। आस्थत् । इस धातुके उत्तर पुषादित्वके कारण अङ् सिद्ध होनेपर भी "अस्यतिवक्ति० २४३८" इस सूत्रसे अङ्का विधान तङर्थ है, किन्तु तङ् प्रत्यय "उपसर्गादस्यत्यूह्योः० २७०१" (सूत्रपरवार्त्तिक) इस आगे आनेवाले सूत्रमें कथित होगा । पर्यास्थत ॥ यसु धातु प्रयत्नमें है ॥

२५२१ यसोऽनुपसर्गात् । ३ । १ । ७१ ॥

२५२१–उपसर्ग पूर्वमें न रहते यस् धातुके उत्तर विकल्प करके श्यन् हो ॥

२५२२ संयसश्च । ३ । १ । ७२ ॥

श्यन्वा स्यात् । यस्यति–यसति । संयस्यति–संयसति । अनुपसर्गात्किम् । प्रयस्यति ॥ २ ॥ जसु मोक्षणे । जस्यति ॥ ३ ॥ तसु उपक्षये॥ दसु च । तस्यति । अतसत् । दस्यति । अदसत् ॥ ५ ॥ वसु स्तम्भे । वस्यति । ववास। ववसतुः । न शसददेति निषेधः । बशादिरयमिति मतं तु । बेसतुः । बेसुः ॥ ६ ॥ व्युष विभागे । अयं दाहे पठितः । अर्थभेदेन त्वङर्थं पुनः पठ्यते । अव्युषत् । ओष्ठ्यादिर्दन्त्यान्त्योऽयम् । व्युसतीत्यन्ये । अयकारं बुस इत्यपरे ॥ ७ ॥ प्लुष दाहे । अप्लुषत् । पूर्वत्र पाठः सिजर्थ इत्याहुः । तद् भ्वादिपाठेन गतार्थमिति सुवचम् ॥ ८ ॥ विस प्रेरणे । विस्यति । अविसत्॥ ॥ ९ ॥ कुस संश्लेषणे । अकुसत् ॥ १० ॥ बुस उत्सर्गे ॥ ११ ॥ मुस खण्डने ॥ १२ ॥ मसी परिणामे । परिणामो विकारः । समी इत्येके ॥ ॥ १३ ॥ लुठ विलोडने ॥ १४ ॥ उच समवाये । उच्यति । उवोच । ऊचतुः । मा भवानुचत् ॥ १५ ॥ भृशु भ्रंशु अधःपतने । बभर्श । अभृशत् । अनिदितामिति नलोपः । भ्रश्यति । अभ्रशत् ॥ १७ ॥ वृश वरणे । वृश्यति । अवृशत् ॥ १८ ॥ कृश तनूकरणे । कृश्यति ॥१९॥ ञितृषा पिपासायाम् ॥ २० ॥ हृष तुष्टौ । श्यन्नङौ भौवादिकाद्विशेषः ॥ २१ ॥ रुष रिष हिंसायाम् । तीषसहेति वेट् । रोषिता–रोष्टा । रेषिता–रेष्टा ॥ २३ ॥ डिप क्षेपे ॥ २४ ॥ कुप क्रोधे ॥ २५ ॥ गुप व्याकुलत्वे ॥ २६ ॥ युपु रुपु लुपु विमोहने । युप्यति । रुप्यति । लुप्यति । लोपिता । लुप्यतिः सेट्कः । अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात् ॥ ॥ २९ ॥ लुभ गार्ध्ये । गार्ध्यमाकाङ्क्षा । तीषसहेति वेट् । लोभिता–लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादेरवृत्करणत्वाल्लोभतीत्यपीत्याहुः ॥ ३० ॥ क्षुभ सञ्चलने । क्षुभ्यति ॥ ३१ ॥ णभ तुभ हिंसायाम् । क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते तेषां द्युतादित्वादङ् सिद्धः । क्र्यादित्वात्पक्षे सिज्भवत्येव । इह पाठस्तु श्यनर्थः ॥ ३३ ॥ क्लिदू आर्द्रीभावे । क्लिद्यति । चिक्लेदिथ–चिक्लेत्थ । चिक्लिदिव–चिक्लिद्व । चिक्लिदिम–चिक्लिद्म । क्लेदिता–क्लेत्ता ॥ ३४ ॥ ञिमिदा स्नेहने । मिदेर्गुणः । मेद्यति । अमिदत् । द्युतादिपाठादेवामिदत्, अमेदीदिति सिद्धे इह पाठोऽमेदीदिति मा भूदिति । द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः ॥ ३५ ॥ ञिक्ष्विदा स्नेहनमोचनयोः ॥ ३६ ॥ ऋधु वृद्धौ । आनर्ध । आर्धत् ॥ ३७ ॥ गृधु अभिकाङ्क्षायाम् । अगृधत् ॥ ३८ ॥ वृत् ॥ पुषादयो दिवादयश्च वृत्ताः। केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम्। दिवादिस्तु भ्वादिवदाकृतिगणः । तेन क्षीयते मृग्यतीत्यादि सिद्धिरित्याहुः ॥

॥ इति दिवादयः ॥

२५२२–सम्पूर्वक यस् धातुके उत्तर भी विकल्प करके श्यन् हो–यस्यति, यसति । संयस्यति, संयसति । उपसर्गरहित क्यों कहा, तो उपसर्गपूर्वक होनेपर नित्य श्यन् होगा–प्रयस्यति ॥ जसु धातु मोक्षणमें है । जस्यति ॥ तसु और दसु धातु उपक्षयमें है । तस्यति । अत-

सत् । दस्यति । अदसत् ॥ वसु धातु स्तम्भनार्थमें है । वस्यति । ववास । ववसतुः । " नशसदद० २२६३ " इस सूत्रसे एत्व तथा अभ्यासलोपका निषेध हुआ । यह धातु बशादि है, इस मतमें–सेबतुः, बेसुः, ऐसा होगा ॥ व्युष धातु विभागमें है, यह धातु दाहार्थक भी है । अर्थभेदसे इसके उत्तर तङ्विधान करनेके निमित्त पुनर्वार पठित हुआ । अव्युषत् । कोई २ कहतेहैं इस धातुके आदिमें ओष्ठय वर्ण है और अन्तमें दन्त्य वर्ण है, जैसे–व्युसति । अन्य मतमें बुस धातु यकारहीन है ॥ प्लुष धातु दाहमें है । अप्लुषत् । सिच् विधानके निमित्त पूर्वमें पठित हुआहै । वह भ्वादि गणके पाठके कारण निरर्थक होताहै । विस धातु प्रेरणमें है । विस्यति । अविसत् ॥ कुस धातु संश्लेषणमें है । अकुसत् ॥ बुस धातु उत्सर्ग और मुस धातु खण्डनमें है ॥ मसी धातु परिणाम अर्थात् विकारमें है ॥ कोई २ कहतेहैं, वह समी धातु है ॥ लुठ धातु विलोडनमें है ॥ उच धातु समवायमें है । उच्यति । उवोच । ऊचतुः । ऊचुः । मा भवानुचत् ॥ भृशु और भ्रंशु धातु अधःपतनमें हैं । बभर्श । अभृशत् । " अनिदिताम्० ४१५ " इस सूत्रसे नकारका लोप हुआ–भ्रश्यति । अभ्रशत् । वृश धातु वरणमें है । वृश्यति । अवृशत् ॥ कृश धातु तनूकरणमें है । कृश्यति ॥ ञि तृषः धातु पिपासामें है ॥ हृष धातु तुष्टिमें भ्वादिगणीय हृष धातुके उत्तर श्यन् और अङ् हो, यही विशेष है ॥ रुष और रिष धातु हिंसामें हैं । "तीषसह० २३४०" इस सूत्रसे विकल्प करके इट् हो । रोषिता, रोष्टा । रेषिता, रेष्टा ॥ डिप धातु क्षेपमें है ॥ कुप धातु क्रोधमें है ॥ गुप धातु व्याकुलत्वमें है ॥ युपु, रुपु और लुपु धातु विमोहनमें हैं । युप्यति । रुप्यति । लुप्यति । लोपिता । लुप धातु सेट् है । अनिट्कारिकामें लिप धातुके साहचर्य्यके कारण तुदादिगणीयधातुका ही ग्रहण होगा ॥ लुभ धातु गार्द्ध्य अर्थात् आकांक्षामें है । "तीषसह० २३४०" इस सूत्रसे विकल्प करके इट् हुआ–लोभिता, लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादिके आकृतिगणत्वके कारण 'लोभति' ऐसा पद भी होगा, यह कोई २ कहतेहैं ॥ क्षुभ धातु संचलनमें है ॥ णभ और तुभ धातु हिंसामें हैं । क्षुभि, नभि, और तुभि धातु द्युतादि और क्र्यादि गणमें पठित हों । उनके उत्तर द्युतादित्वके कारण अङ् होगा और क्र्यादित्वके कारण विकल्प करके सिच् होगा । इस गणमें पाठ श्यन् प्रत्ययार्थ है ॥ क्लिदू धातु आर्द्रीभावमें है । क्लिद्यति । चिक्लेदिथ, चिक्लेत्थ । चिक्लिदिव, चिक्लिद्व । चिक्लिदिम, चिक्लिद्म । क्लेदिता, क्लेत्ता ॥ ञि मिदा धातु स्नेहनमें है । मिद धातुके इकारको गुण हो । मेद्यति । अमिदत् । द्युतादिके मध्यमें पाठ करनेसे ही 'अमिदत्, अमेदिष्ट' ऐसे पद सिद्ध होते, तथापि इस स्थलमें पाठ करनेसे 'अमेदीत्' ऐसा पद सिद्ध नहीं होसकता । द्युतादिसे पृथक् जो मिद धातु सो आत्मनेपदमें ही पढनी उचित है ॥ ञिक्ष्विदा धातु स्नेहन और मोचनमें है ॥ ऋधु धातु वृद्धिमें है । आनर्द्ध । आर्द्धत् ॥ गृधु धातु अभिकांक्षामें है । अगृधत् । पुषादि और दिवादिगणीय धातु समाप्त हुए । कोई २ कहतेहैं, पुषादि धातु समाप्तिके निमित्त ही वृत् पदका ग्रहण हुआ है, किन्तु दिवादि धातु भ्वादिके समान आकृतिगणीय हैं, इसी कारण 'क्षीयते, मृग्यते' इत्यादि पदोंकी सिद्धि हुईहै ॥

॥ इति दिवादिप्रकरणम् ॥

अथ स्वादयः ५.

षुञ् अभिषवे । अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च । तत्र स्नानेऽकर्मकः ॥

षुञ् धातु अभिषव अर्थात् स्नपन, पडिन, सुरासन्धान और स्नान अर्थमें है । इन सब अर्थोंके मध्यमें स्नानार्थमें यह धातु अकर्म्मक है ॥

२५२३ स्वादिभ्यः श्नुः । ३ । १ । ७३ ॥

सुनोति । सुनुतः । हुश्नुवोरिति यण् । सुन्वन्ति । सुन्वः–सुनुवः । सुन्वहे–सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । स्तुसुधूञ्भ्य इतीट् । असावीत् । असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव ॥

२५२३–स्वादिगणीय धातुके उत्तर श्नु प्रत्यय हो । सुनोति । सुनुतः । "हुश्नुवोः० २३८७" इस सूत्रसे यण् हुआ–सुन्वन्ति । सुन्वः, सुनुवः । सुन्वहे, सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । "स्तुसुधूञ्भ्यः० २३८५" इस सूत्रसे सु धातुके उत्तर स्थित सिच्को इट् हुआ–असावीत् । असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव ॥

२५२४ सुनोतेः स्यसनोः । ८ । ३ । ११७ ॥

स्ये सनि च परे सुञः षो न स्यात् । विसोष्यति ॥ १ ॥ षिञ् बन्धने । सिनोति । विसिनोति । सिषाय–सिष्ये । सेता ॥ २ ॥ शिञ् निशाने । तालव्यादिः । शेता ॥ ३ ॥ डुमिञ् प्रक्षेपणे । मीनातिमिनोतीत्यात्त्वम् । ममौ । ममिथ–ममाथ । मिम्ये । माता । मीयात्–मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ ४ ॥ चिञ् चयने । प्रणिचिनोति ॥

२५२४–स्य और सन् प्रत्यय परे रहते सुञ् धातुके सकारको षत्व न हो । विसोष्यति ॥ षिञ् धातु बन्धनमें है । सिनोति । विसिनोति । सिषाय । सिष्ये । सेता ॥ शिञ् धातु निशानमें है । यह धातु तालव्य शकारादि है । शेता ॥ डुमिञ् धातु प्रक्षेपणमें है । "मीनाति मिनोति० २५०८" इस सूत्रसे आकार हुआ–ममौ । ममिथ, ममाथ । मिम्ये । माता । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ चिञ् धातु चयनमें है । प्रणिचिनोति ॥

२५२५ विभाषा चेः । ७ । ३ । ५८ ॥

अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च । प्रणिचिकाय–चिचाय । चिक्ये–चिच्ये ।

अचैषीत्। अचेष्ट ॥ ५ ॥ स्तृञ् आच्छादने। स्तृणोति । स्तृणुते । गुणोऽर्तीति गुणः । स्तर्यात् ॥

२५२५-सन् और लिट् परे रहते अभ्यासके परे स्थित चिञ् धातुके चके स्थानमें विकल्प करके कुत्व हो । प्राणाचिकाय, चिचाय । चिक्ये, चिच्ये । अचैषीत् । अचेष्ट ॥ स्तृञ् धातु आच्छादनमें है । स्तृणोति । स्तृणुते । "गुणोऽर्ति०२३८०" इस सूत्रसे गुण हुआ-स्तर्यात् ॥

२५२६ ऋतश्च संयोगादेः ।७।२।४३ ॥

ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात्तङि । स्तरिषीष्ट-स्तृषीष्ट। अस्तरिष्ट-अस्तृत। ॥ ६ ॥ कृञ् हिंसायाम् । कृणोति । कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत्। अकृत ॥ ७ ॥ वृञ् वरणे ॥

२५२६-तङ् परे रहते ऋकारान्त संयोगादि धातुके परे लिङ् और सिच्के स्थानमें विकल्प करके इट् हो । स्तरिषीष्ट, स्तृषीष्ट । अस्तरिष्ट, अस्तृत ॥ कृञ् धातु हिंसामें है । कृणोति कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत ॥ वृञ् धातु वरणमें है ॥

२५२७ बभूथाततन्थजगृभ्मववर्थेति निगमे । ७ । २ । ६४ ॥

एषां वेदे इडभावो निपात्यते। तेन भाषायां थलीट् । ववरिथ । ववृव । ववृवहे । वरिता-वरीता ॥

२५२७-वेदमें बभूथ, ततन्थ, जगृम्भ और ववर्थ पदमें निपातनसे इट्का अभाव हो अत एव लोकमें थल्को इट् होताहै, जैसे-ववरिथ । ववृव । ववृवहे । वरिता, वरीता ॥

२५२८ लिङ्सिचोरात्मनेपदेषु । ७ । २ । ४२ ॥

वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ् सिचोरिड्वा स्यात्तङि ॥

२५२८-तङ् परे रहते वृङ् और वृञ् धातु और ऋकारान्त धातुओंके उत्तर लिङ् और सिच्को विकल्प करके इट् का आगम हो ॥

२५२९ न लिङि । ७ । २ । ३९ ॥

वॄतो लिङ इटो दीर्घो न स्यात् । वरिषीष्ट-वृषीष्ट । अवारीत् । अवरिष्ट-अवरीष्ट-अवृत ८॥ धुञ् कम्पने । धुनोति । धुनुते । अधौषीत्। अधोष्यत् ॥ ९ ॥ दीर्घान्तोऽप्ययम् । धूनोति । धूनुते । स्वरतिसूतीति वेट् । दुधविथ-दुधोथ। किति लिटि तु श्र्युकः कितीति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट्।दुधुविव।स्तुसुधूञ्भ्य इति नित्यमिट्। अधावीत्। अधविष्ट-अधोष्ट ॥ १०॥

अथ परस्मैपदिनः । दुदु उपतापे । दुनोति ॥ १ ॥ हि गतौ वृद्धौ च ॥

२५२९-वृत्-वृङ्, वृञ्, ऋदन्त धातुके उत्तर लिङ् को उद्देश कर विहित इट्को दीर्घ न हो । वरिषीष्ट, वृषीष्ट । अवारीत् । अवरिष्ट, अवरीष्ट, अवृत ॥ धुञ् धातु कंपनमेंहै धुनोति । धुनुते । अधौषीत् । अधोष्यत् । यह धातु दीर्घान्त भी है । धूनोति । धूनुते । "स्वरतिसूति० २२७९" इस सूत्रसे विकल्प करके इट् हुआ, दुधविथ-दुधोथ । किंतु लिट् परे रहते तो "श्र्युकः० २३८१" इस सूत्रसे इट्के निषेधको बाध कर क्रादिनियमके अनुसार नित्य इट् होताहै-दुधुविव । "स्तुसुधूञ्भ्यः० २३८५" इस सूत्रसे नित्य इट् हुआ- अधावीत् । अधविष्ट, अधोष्ट ॥

अब परस्मैपदी धातु कहतेहैं ।

दुदु धातु उपतापमें है । दुनोति ॥ हि धातु गति और वृद्धिमें है ॥

२५३० हिनुमीना । ८ । ४ । १५ ॥

उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात् । प्रहिणोति ॥

२५३०-उपसर्गस्थ निमित्तके परे हिनु और मीनाके नकारको णत्व हो । प्रहिणोति ॥

२५३१ हेरचङि । ७ । ३ । ५६ ॥

अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि । जिघाय ॥ २॥ पृ प्रीतौ । पृणोति। पर्त्ता ॥ ३ ॥ स्पृ प्रीतिपालनयोः ॥ प्रीतिचलनयोरित्यन्ये । चलनं जीवनमिति स्वामी । स्पृणोति।पस्पार ॥ ४ ॥ स्मृ इत्येके। स्मृणोति। पृणोत्यादयस्त्रयोपि छान्दसा इत्याहुः॥५॥ आप्लृ व्याप्तौ । आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृदित्वादङ्। आपत् ॥ ६ ॥ शक्लृ शक्तौ ॥ अशकत् ॥ ७ ॥ राध साध संसिद्धौ ॥ राध्नोति ॥

२५३१-अभ्यासके परे स्थित हि धातुसम्बन्धी हके स्थानमें कवर्ग हो, चङ् परे रहते न हो । जिघाय ॥ पृ धातु प्रीतिमें है । पृणोति । पर्त्ता ॥ स्पृ धातु प्रीति और पालनमें है, अन्य मतमें प्रीति और चलनमें है, स्वामीके मतमें चलन शब्दसे जीवनमें है । स्पृणोति । पस्पार । अन्य मतमें स्मृ धातु भी उक्तार्थक है । स्मृणोति । पृणोति-इत्यादि तीनों धातु वैदिक हैं । आप्लृ धातु व्याप्तिमें है । आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ता । आप्नुहि । लृकार इत् होनेके कारण अङ् हुआ-आपत् ॥ शक्लृ धातु शक्तिमें है । अशकत् ॥ राध और साध धातु संसिद्धिमें हैं । राध्नोति ॥

२५३२ राधो हिंसायाम् । ६।४।१२३॥

एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। अपरेधतुः । रेधुः । रेधिथ । राद्धा । साध्नोति । साद्धा । असात्सीत् । असाद्धाम् ॥ ९ ॥

अथ द्वावनुदात्तेतौ ॥ अशू व्याप्तौ संघाते च। अश्नुते ॥

२५३२–कित् लिट् और सेट् थल परे रहते हिंसार्थ राध धातुके एत्व और अभ्यासका लोप हो। अपरेधतुः। रेधुः। रेधिथ। राद्धा। साध्नोति। साद्धा। असात्सीत्। असाद्धाम् ॥

अब दो आत्मनेपदी धातु कहतेहैं।

अशू धातु व्याप्ति और संघातमें है। अश्नुते ॥

२५३३ अश्नोतेश्च । ७ । ४ । ७२ ॥

दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात्। आनशे। अशिता–अष्टा। अशिष्यते–अक्ष्यते। अश्नुवीत। अशिषीष्ट–अक्षीष्ट। आशिष्ट–आष्ट। आक्षाताम् ॥ १ ॥ ष्टिघ आस्कन्दने ॥ स्तिघ्नुते। तिष्टिघे। स्तेघिता ॥ २ ॥

अथ आगणान्तात्परस्मैपदिनः ॥ तिक तिग गतौ च। चादास्कन्दने। तिक्नोति। तिग्नोति ॥ २ ॥ षघ हिंसायाम् ॥ सघ्नोति ॥ ३ ॥ ञिधृषा प्रागल्भ्ये ॥ धृष्णोति। दधर्ष। धर्षिता ॥ ४ ॥ दम्भु दम्भने ॥ दम्भनं दम्भः। दभ्नोति। ददम्भ। श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरमिहाप्याश्रीयत इत्युक्तम्। अनिदितामिति नलोपः। तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ ॥ दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ ॥ * ॥ देभतुः–ददम्भतुः। इदं कित्त्वं पिदपिद्विषयकमिति सुधाकरादयः। तन्मते तिप्सिप्मिप्सु। देभ–देभिथ–देभेति रूपान्तरं बोध्यम्। अपिद्विषयकमिति न्यासकारादिमते तु। ददम्भ–ददंभिथ–ददम्भेत्येव। दभ्यात् ॥ ५ ॥ ऋधु वृद्धौ ॥ ६ ॥ तृप प्रीणन इत्येके ॥ क्षुभ्नादित्वाण्णत्वं न। तृप्नोति ॥ ७ ॥ छन्दसि ॥ आगणान्तादधिकारोयम्। अह व्याप्तौ ॥ अह्नोति ॥ १ ॥ दघ घातने पालने च ॥ दघ्नोति ॥ २ ॥ चमु भक्षणे। चम्नोति ॥ ३ ॥ रि क्षि चिरि जिरि दाश दृ हिंसायाम् ॥ रिणोति। क्षिणोति। अयं भाषायामपीत्येके। न तद्यशः शस्त्रभृतां क्षिणोति। ऋक्षीत्येक एवाजादिरित्यन्ये। ऋक्षिणोति। चिरिणोति। जिरिणोति। दाश्नोति। दृणोति ॥ ९ ॥ वृत् ॥

॥ इति स्वादयः ॥

२५३३–अश धातुको दीर्घ अभ्याससंज्ञक अवर्णके परे नुट्का आगम हो। आनशे। अशिता, अष्टा। अशिष्यते, अक्ष्यते। अश्नुवीत। अशिषीष्ट, अक्षीष्ट। आशिष्ट, आष्ट। आक्षाताम् ॥ ष्टिघ धातु आस्कन्दनमें है। स्तिघ्नुते। तिष्टिघे। स्तेघिता ॥

अब गणसमाप्ति तक परस्मैपदी धातु कहतेहैं ॥

तिक और तिग धातु गति और चकारसे आस्कन्दनमें है। तिक्नोति। तिग्नोति ॥ षघ धातु हिंसामें है। सघ्नोति ॥ ञि धृषा धातु प्रागल्भ्यमें है। धृष्णोति। दधर्ष। धर्षिता ॥ दम्भु धातु दम्भमें है। दभ्नोति। ददम्भ ॥

श्रन्थि, ग्रन्थि, दम्भि और स्वञ्जि धातुके उत्तर लिट्को कित्त्व हो विकल्प करके यह व्याकरणान्तरमें कथित है, इस स्थलमें भी इसका आश्रय किया जा सकता है यह पहले कहा गया है। "अनिदिताम् ४१५" इस सूत्रसे नकारके लोपके आभीयत्वके कारण असिद्धि होनेसे एत्व और अभ्यासलोपकी अप्राप्ति होनेपर वार्त्तिक कहतेहैं–दम्भ धातुके एत्व और अभ्यासका लोप हो * देभतुः, ददम्भतुः। यह श्रन्थि, ग्रन्थि इत्यादि सूत्रोक्त कित्वपित् और अपित् दोनों विषयक है, यह बात सुधाकरादिने कही है, उनके मतमें तिप्, सिप्, मिप् यह तीन प्रत्यय परे पूर्वोक्त कार्य होगा, देभ, देभिथ, देभ, यह रूपान्तर होंगे, अपित् विषयक है, ऐसा न्यासकारादिकोंका मत है उनके मतमें ददम्भ, ददम्भिथ, ददम्भ, इस प्रकार रूप होंगे। दभ्यात् ॥

ऋधु धातु वृद्धिमें है। किसीके मतमें तृप धातु प्रीणनमें है। क्षुभ्नादित्वके कारण नकारको णत्व नहीं होगा–तृप्नोति। 'वेदमें' इस पदका गण समाप्ति तक अधिकार है ॥ अह धातु व्याप्तिमें है। अह्नोति ॥ दघ धातु घातन और पालनमें है। दघ्नोति ॥ चमु धातु भक्षणमें है। चम्नोति ॥ रि, क्षि, चिरि, जिरि, दाश और दृ यह सम्पूर्ण धातु हिंसार्थमें हैं। रिणोति। क्षिणोति। किसी २ के मतमें क्षि धातुका भाषामें भी प्रयोग होताहै, जैसे–" न तद्यशः शस्त्रभृतां क्षिणोति " क्षि धातुको कोई २ ' ऋक्षि ' ऐसे अजादि धातु कहतेहैं, उनके मतमें ' ऋक्षिणोति ' ऐसा पद होगा। चिरिणोति। जिरिणोति। दाश्नोति। दृणोति ॥ वृत् ॥

॥ इति स्वादिप्रकरणम् ॥

अथ तुदादयः ६.

तुद व्यथने ॥ इतः षट् स्वरितेतः ॥

तुद धातु व्यथनमें है। यहांसे ६ धातु उभयपदी हैं ॥

२५३४ तुदादिभ्यः शः । ३ । १ । ७७ ॥

तुदति। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त ॥ १ ॥ णुद प्रेरणे। नुदति। नुदते। नुनोद। नुनुदे। नोत्ता ॥ २ ॥ दिश अतिसर्जने। अतिसर्जनं दानम्। देष्टा। दिक्षीष्ट। अदिक्षत्। अदिक्षत ॥ ३ ॥ भ्रस्ज पाके। ग्रहिज्येति संप्रसारणम्। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते ॥

२५३४–शप्के विषय रहते तुदादिगणीय धातुके उत्तर श प्रत्यय हो। तुदति। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त ॥ णुद धातु प्रेरणमें है। नुदति। नुदते। नुनोद। नुनुदे। नोत्ता ॥ दिश धातु अति-

सर्जन अर्थात् दानमें है । देष्टा । दिक्षीष्ट । अदिक्षत् । अदिक्षत ॥ भ्रस्ज धातु पाकमें है । "ग्रहिज्या० २४१२" इस सूत्रसे सम्प्रसारण अर्थात् भ्रस्ज धातुके रकारके स्थानमें ऋकार हुआ, सकारके स्थानमें चवर्गके योगमें श हुआ, शके स्थानमें जश्त्वके कारण ज् हुआ-भृज्जति । भृज्जते ॥

२५३५ भ्रस्जो रोपधयो रमन्यतरस्याम् । ६ । ४ । ४७ ॥

भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके । मित्त्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । बभर्ज । बभर्जतुः । बभर्जिथ-बभर्ष्ठ । बभर्जे । रमभावे बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जिथ । स्कोरिति सलोपः॥ व्रश्चेति षः । बभ्रष्ठ । बभ्रज्जे । भ्रष्टा-भर्ष्टा । भ्रक्ष्यति-भर्क्ष्यति ॥ क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन ॥ * ॥ भृज्ज्यात् । भृज्ज्यास्ताम् । भ्रक्षीष्ट-भर्क्षीष्ट । अभ्राक्षीत्-अभार्क्षीत् । अभ्रष्ट-अभर्ष्ट ॥ ४ ॥ क्षिप प्रेरणे ॥ क्षिपति । क्षिपते । क्षेप्ता । अक्षैप्सीत् । अक्षिप्त ॥५॥ कृष विलेखने ॥ कृषति । कृषते । क्रष्टा-कर्ष्टा । कृष्यात् । कृक्षीष्ट । स्पृशमृशकृषेति सिज्वा- पक्षे क्सः । सिचि अम् वा । अक्राक्षीत्-अकार्क्षीत्-अकृक्षत् । तङि लिङ्सिचाविति किंत्त्वादम्न । अकृष्ट । अकृक्षाताम् । अकृक्षत । अकृक्षत । अकृक्षाताम् । अकृक्षन्त ॥ ६ ॥ ऋषी गतौ । परस्मैपदी । ऋषति । आनर्ष ॥१॥ जुषी प्रीतिसेवनयोः ॥- आत्मनेपदिनश्चत्वारः । जुषते ॥ ओविजी भयचलनयोः ॥ प्रायेणायमुत्पूर्वः ॥ उद्विजते ॥

२५३५-आर्धधातुक विभक्ति परे रहते भ्रस्ज धातुके रेफ और उपधाके स्थानमें विकल्प करके रम्का आगम हो । मित्वके कारण अन्त्याच्के परे 'र' होगा । स्थानमें षष्ठीनिर्देशके कारण रकार और उपधाकी निवृत्ति हुई-बभर्ज । बभर्जतुः । बभर्जिथ, बभर्ष्ठ । बभर्जे । रम्के अभावपक्षमें-बभ्रज । बभ्रज्जतुः । बभ्रज्जिथ । "स्कोः० ३८०" इस सूत्रसे सकारका लोप हुआ, "व्रश्च० २९४" इस सूत्रसे षत्व हुआ- बभ्रष्ठ । बभ्रज्जे । भ्रष्टा, भर्ष्टा । भ्रक्ष्यति भर्क्ष्यति- ।

कित्, ङित् परे रहते "२२१७" सूत्रसे रमागमको बाध कर पूर्वविप्रतिषेधके कारण सम्प्रसारण हो-भृज्ज्यात् । भृज्ज्यास्ताम् । भ्रक्षीष्ट, भर्क्षीष्ट । अभ्राक्षीत् । अभार्क्षीत्, अभ्रष्ट-अभर्ष्ट ॥

क्षिप धातु प्रेरणमें है । क्षिपति । क्षिपते । क्षेप्ता । अक्षैप्सीत् । अक्षिप्त ॥ कृष धातु विलेखनमें है । कृषति । कृषते । क्रष्टा, कर्ष्टा । कृष्यात् । कृक्षीष्ट । "स्पृशमृशकृष०" इससे विकल्प करके सिच् हुआ, पक्षमें क्स हुआ, सिच् परे विकल्प करके अम् हुआ- अक्राक्षीत्, अकार्क्षीत्, अकृक्षत् । तङ् परे रहते "लिङ्सिचौ० २३००" इस सूत्रसे किंत्वके कारण अम् नहीं हुआ-अकृष्ट । अकृक्षाताम् । अकृक्षत । अकृक्षत । अकृक्षाताम् । अकृक्षन्त ॥ ऋषि धातु गतिमें है, यह परस्मैपदी है । ऋषति । आनर्ष ॥ जुषी धातु प्रीति और सेवनमें है ॥

अब चार धातु आत्मनेपदी कहतेहैं ।

जुषते ॥ ओविजी धातु भय और चलन में है । यह धातु प्रायः उत्पूर्वक प्रयुक्त होताहै, यथा-उद्विजते ॥

२५३६ विज इट् । १ । २ । २ ॥

विजेः पर इडादिः प्रत्ययो ङिद्वत् । उद्विजिता । उद्विजिष्यते ॥ २ ॥ ओलजी ओलस्जी व्रीडायाम् ॥ लजते । लेजे । लज्जते । ललज्जे ॥ ४ ॥

अथ परस्मैपदिनः ॥ ओव्रश्चू छेदने । ग्रहिज्या । वृश्चति । वव्रश्च । वव्रश्चतुः । वव्रश्चिथ-वव्रष्ठ । लिट्यभ्यासस्येति सम्प्रसारणम् । रेफस्य ऋकारः । उरत् । तस्याचः परस्मिन्निति स्थानिवद्भावात्र सम्प्रसारण इति वस्योत्वं न । व्रश्चिता-व्रष्टा । व्रश्चिष्यति-व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत्-अव्राक्षीत् । अव्रक्ष्यत् ॥ १ ॥ व्यच व्याजीकरणे । विचति । विव्याच । विविचतुः । व्यचिता । व्यचिष्यति । विच्यात् । अव्याचीत्-अव्यचीत् । व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते । अनसीति पर्युदासेन कृन्मात्रविषयत्वात् ॥ २ ॥ उछि उञ्छे ॥ उञ्छति ॥ ॥ ३ ॥ उच्छी विवासे ॥ उच्छति ॥ ४ ॥ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ ऋच्छत्यॄतामिति गुणः । द्विहल्ग्रहणस्यानेकहल्उपलक्षणत्वान्नुट् । आनर्छ । आनर्छतुः । ऋच्छिता ॥५॥ मिच्छ उत्क्लेशे ॥ उत्क्लेशः पीडा । मिमिच्छ । अमिच्छीत् ॥ ६ ॥ जर्ज चर्च झर्झ परिभाषणभर्त्सनयोः ॥ ९ ॥ त्वच संवरणे । तत्वाच ॥ १० ऋच स्तुतौ । आनर्च ॥ ११ ॥ उब्ज आर्जवे ॥ ॥ १२ ॥ उज्झ उत्सर्गे ॥ १३ ॥ लुभ विमोहने ॥ विमोहनमाकुलीकरणम् । लुभति । लोभिता-लोब्धा । लोभिष्यति ॥ १४ ॥ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु ॥ रिफति । रिरेफ । रिहेत्येके । शिशुं न विप्रामतिभीरिहन्ति ॥१५॥ तृप तृम्फ तृप्तौ ॥ आद्यः प्रथमान्तः । द्वितीयो द्वितीयान्तः । द्वावपि द्वितीयान्तावित्यन्ये । तृपति । ततर्प । तर्पिता । स्पृशमृशेति सिज्विकल्पः पौषादिकस्यैव । अङ्पवादत्वात् । ते-

नात्र नित्यं सिच्। अतर्पीत्। तृम्फति । शस्य ङित्त्वादनिदितामिति नलोपे ॥ शे तृम्फादीनां नुम्वाच्यः ॥ * ॥ आदिशब्दः प्रकारे । तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः। तृम्फति । ततृम्फ । तृफ्यात् ॥ १७ ॥ तुप तुम्प तुफ तुम्फ हिंसायाम् ॥ तुपति । तुम्पति । तुफति । तुम्फति ॥ २१ ॥ दृप दृम्फ उत्क्लेशे ॥ प्रथमः प्रथमान्तः । द्वितीयो द्वितीयान्तः । प्रथमो द्वितीयान्त इत्येके । दृपति । दृफति । दृम्फति॥२३॥ ऋफ ऋम्फ हिंसायाम् । ऋफति । आनर्फ । ऋम्फति । ऋम्फांचकार ॥ २५ ॥ गुफ गुम्फ ग्रन्थे॥गुफति । जुगोफ। गुम्फति। जुगुम्फ॥२७॥ उभ उम्भ पूरणे ॥ उभति । उवोभ । उम्भति । उम्भांचकार ॥ २९ ॥ शुभ शुम्भ शोभार्थे ॥ शुभति । शुम्भति ॥ ३१ ॥ दृभी ग्रन्थे । दृभति ॥ ३२ ॥ चृती हिंसाग्रन्थनयोः ॥ चर्तिता । से सिचीति वेट् । चर्तिष्यति–चर्त्स्यति–अचर्तीत् ॥ ३३ ॥ विध विधाने ॥ विधति । वेधिता ॥३४॥ जुड गतौ ॥ तवर्गपञ्चमान्त इत्येके। जुडति । मरुतो जुनन्ति ॥ ३५ ॥ मृड सुखने ॥ मृडति । मर्डिता ॥ ३६ ॥ पृड च ॥ पृडति ॥ ॥ ३७ ॥ पृण प्रीणने ॥ पृणति । पपर्ण ॥३८॥ वृण च ॥ वृणति ॥३९॥ मृण हिंसायाम्॥४०॥ तुण कौटिल्ये ॥ तुतोण ॥ ४१ ॥ पुण कर्मणि शुभे । पुणति ॥ ४२ ॥ मुण प्रतिज्ञाने ॥ ४३ ॥ कुण शब्दोपकरणयोः ॥ ४४ ॥ शुन गतौ॥४५॥ द्रुण हिंसागतिकौटिल्येषु ॥ ४६ ॥ घुण घूर्ण भ्रमणे॥४८॥षुर ऐश्वर्यदीप्त्योः । सुरति। सुषोर। आशिषि। सूर्यात्॥४९॥कुर शब्दे। कुरति।कूर्यात्। अत्र न भकुर्छुरामिति निषेधोन । करोतेरेव तत्र ग्रहणादित्याहुः ॥ ५० ॥ खुर छेदने ॥५१॥ मुर संवेष्टने ॥ ५२ ॥ क्षुर विलेखने ॥ ५३ ॥ घुर भीमार्थशब्दयोः ॥ ५४ ॥ पुर अग्रगमने ॥ ॥ ५५ ॥ वृहू उद्यमने । दन्त्योष्ठ्यादिः । पवर्गीयादिरित्यन्ये ॥ ५६ ॥ तृहू स्तृहू तृंहू हिंसार्थाः । तृहति । ततर्ह । स्तृहति । तस्तर्ह । तर्हिता–तर्ढा । स्तर्हिता–स्तर्ढा । अतृंहीत्–अतार्ङ्क्षीत् । अताण्ढाम् ॥ ५९ ॥ इषु इच्छायाम् । इषुगमीति छः । इच्छति । एषिता–एष्टा । एषिष्यति । इष्यात् । ऐषीत् ॥ ६० ॥ मिष स्पर्धायाम् । मिषति । मेषिता ॥ ६१ ॥ किल श्वैत्यक्रीडनयोः ॥ ६२ ॥ तिल स्नेहने ॥ ॥ ६३ ॥ चिल वसने ॥ ६४ ॥ चल विलसने ॥ ६५ ॥ इल स्वप्नक्षेपणयोः ॥६६॥ विल संवरणे । दन्त्योष्ठ्यादिः ॥ ६७ ॥ बिल भेदने । ओष्ठ्यादिः ॥ ६८ ॥ णिल गहने॥६९॥ हिल भावकरणे॥७०॥ शिल षिल उञ्छे ॥७२॥ मिल श्लेषणे ॥ ७३ ॥ लिख अक्षरविन्यासे। लिलेख ॥ ७४ ॥ कुट कौटिल्ये । गाङ्कुटादिभ्य इति ङित्त्वम् । चुकुटिथ । चुकोट । चुकुट । कुटिता ॥ ७५ ॥ पुट संश्लेषणे ॥ ७६ ॥ कुच सङ्कोचने ॥ ७७ ॥ गुज शब्दे ॥ ७८ ॥ गुड रक्षायाम् ॥ ७९ ॥ डिप क्षेपे ॥ ८० ॥ छुर छेदने ॥ नभकुर्छुरामिति न दीर्घः ॥ ८१ ॥ छुर्यात् ॥ स्फुट विकसने।स्फुटति।पुस्फोट ॥८२॥ मुट आक्षेपमर्दनयोः ॥ ८३ ॥ त्रुट छेदने । वा भ्राशेति श्यन्वा । त्रुट्यति । त्रुटति । तुत्रोट। त्रुटिता ॥ ८४ ॥ तुट कलहकर्मणि ॥ तुटति । तुतोट । तुटिता ॥ ८५ ॥ चुट छुट छेदने॥८७॥ जुड बन्धने ॥ ८८ ॥ कड मदे ॥ ८९ ॥ लुट संश्लेषणे ॥ ९० ॥ कृड घनत्वे । घनत्वं सान्द्रता। चकर्ड । कृडिता ॥ ९१ ॥ कुड बाल्ये ॥ ९२ ॥ पुड उत्सर्गे ॥ ९३ ॥ घुट प्रतिघाते ॥ ९४ ॥ तुड तोडने । तोडनं भेदः॥९५॥थुड स्थुड संवरणे थुडति । तुथोड । तुस्थोड ॥ ९७ ॥ खुड छुड इत्येके ॥ ९९ ॥ स्फुर स्फुल सञ्चलने ॥ १०१ ॥ स्फुर स्फुरणे ॥ स्फुल संचलने इत्येके ॥

२५३६–विज धातुके परे इडादि प्रत्यय ङिद्वत् हो, उद्विजिता । उद्विजिष्यते॥ ओलजी और ओलस्जी धातु व्रीडामें हैं । लजते। लेजे । लज्जते । ललज्जे ॥

अब परस्मैपदी धातु कहतेहैं ॥

ओव्रश्चू धातु छेदनमें है "ग्रहिज्या० २४१२" इस सूत्रसे सम्प्रसारण होकर–वृश्चति । वव्रश्च । वव्रश्चतुः । वव्रश्चिथ, वव्रष्ठ । यहां "लिट्यभ्यासस्य २४०८" इससे अभ्यास रेफको ऋकार सम्प्रसारण और "उरत् २२४४" इस सूत्रसे ऋकारके स्थानमें अकार हुआ, उसको "अचः परस्मिन्० ५०" इस सूत्रसे स्थानिवद्भावके कारण "न संप्रसारणे सम्प्रसारणम् ३६३" इस सूत्रसे संप्रसारणके निषेध होनेसे वकारके स्थानमें उकार नहीं हुआ । व्रश्चिता, व्रष्टा । व्रश्चिष्यति, व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत्, अव्राक्षीत् ॥ व्यच धातु व्याजीकरणमें है । विचति । विव्याच । विविचतुः । व्यचिता । व्यचिष्यति । विच्यात् । अव्याचीत्, अव्यचीत् । "व्यचेः कुटादित्वमनसि" यह वार्त्तिक तो इस स्थलमें नहीं लगेगा, क्योंकि, 'अनसि' ऐसे पर्युदासके कारण उक्त वार्त्तिकका कृन्मात्र विषय है ॥ उछि धातु उञ्छमें है । उञ्छति ॥ उच्छी धातु विवासमें है । उच्छति ॥ ऋच्छ धातु

गति, इन्द्रिय, प्रलय और मूर्त्तिभावमें है । "ऋच्छत्यृताम् २३८३" इस सूत्रसे गुण हुआ ॥ द्विहल्ग्रहणसे अनेक हल्का उपलक्षण जानाजाताहै, इस कारण ऋच्छ धातुको नुट्का आगम होगा—आनर्च्छ । आनर्च्छतुः । ऋच्छिता ॥ मिच्छ धातु उत्क्लेश, अर्थात् पीडामें है । मिमिच्छ । अमिच्छीत् । जर्ज, चर्च और झर्झ धातु परिभाषण और भर्त्सनमें है ॥ त्वच धातु संवरणमें है । तत्वाच ॥ ऋच धातु स्तुतिमें है । आनर्च ॥ उब्ज धातु आर्जवमें है ॥ उज्झधातु उत्सर्ग, अर्थात् त्यागमें है ॥ लुभ धातु विमोहन, अर्थात् आकुलीकरणमें है । लुभति । लोभिता, लोब्धा । लोभिष्यति ॥ रिफ धातु कत्थन, युद्ध, निन्दा, हिंसा और दानमें है । रिफति, रिरेफ । कोई २ कहतेहैं रिह धातु है, जैसे—'शिशुं न विप्रा मतिभी रिहन्ति' तृप और तृम्फ धातु तृप्तिमें है । प्रथम धातु प्रथमान्त, अर्थात् पकारान्त और द्वितीय द्वितीयान्त, अर्थात् फकारान्त है । कोई २ कहतेहैं दोनों द्वितीयान्त हैं । तृपति । ततर्प । तर्पिता । अङ्के अपवादत्वके कारण "स्पृशमृश०" इस सूत्रसे विकल्प करके सिच् पुषादि धातुओंके ही उत्तर होताहै, इस कारण इस स्थलमें नित्य सिच् होगा, अतर्पीत् । तृम्फति । शकारको ङित्त्वके कारण "अनिदिताम्० ४१५" इस सूत्रसे नकारका लोप होनेपर—

श परे रहते तृम्फादि धातुओंको नुम् हो * आदि शब्द प्रकारार्थक है, इस कारण इस स्थलमें जो नकारयुक्त हैं, वह तृम्फादि हैं । तृम्फति । ततृम्फ । तृम्फ्यात् । तुप, तुम्प, तुफ और तुम्फ धातु हिंसामें हैं । तुपति । तुम्पति । तुफति । तुम्फति ॥ दृप और दृम्फ धातु उत्क्लेशमें हैं । पहला प्रथमान्त और दूसरा द्वितीयान्त है, कोई २ कहतेहैं पहिला द्वितीयान्त है । दृपति । दृफति । दृम्फति ॥ ऋफ और ऋम्फ धातु हिंसार्थक हैं । ऋफति । ऋम्फति । ऋम्फाञ्चकार ॥ गुफ और गुम्फ धातु ग्रन्थनमें हैं । गुफति । जुगोफ । गुम्फति । जुगुम्फ ॥ उभ, उम्भ धातु पूरण अर्थमें हैं । उभति । उवोभ । उम्भति । उम्भाञ्चकार ॥ शुभ और शुम्भ धातु शोभनार्थमें हैं । शुभति । शुम्भति ॥ दृभी धातु ग्रन्थमें है । दृभति ॥ चृती धातु हिंसा और ग्रन्थनमें है । चर्तिता । "सेऽसिच० २५०६" इस सूत्रसे विकल्प करके इट् होकर—चर्तिष्यति, चर्त्स्यति । अचर्तीत् ॥ विध धातु विधानमें है । विधति । वेधिता ॥ जुड धातु गतिमें है । जुडति । कोई २ कहतेहैं, यह जुन धातु है, जैसे—'मरुतो जुनन्ति' ॥ मृड धातु सुखनमें है । मृडति । मर्डिता ॥ पृड धातु सुखन अर्थमें है । पृडति ॥ पृण धातु प्रीणनमें है । पृणति । पपर्ण ॥ वृण धातु भी उक्तार्थक है । वृणति ॥ मृण धातु हिंसामें है ॥ तुण धातु कौटिल्यमें है । तुतोण ॥ पुण धातु शुभ कर्ममें है । पुणति ॥ मुण धातु प्रतिज्ञानमें है ॥ कुण धातु शब्द और उपकरणमें है ॥ शुन धातु गतिमें है ॥ द्रुण धातु हिंसा, गति और कौटिल्यमें हैं ॥ घुण और घूर्ण धातु भ्रमणमें है ॥ पुर धातु ऐश्वर्य और दीप्तिमें है । पुरति । पुपोर । आशिष्अर्थमें—पूर्यात् ॥ कुर धातु शब्दमें है । कुरति । कूर्यात्, इस स्थलमें । "न भकुर्छुराम् १६२९" इस सूत्रसे उपधा दीर्घका निषेध नहीं होगा, क्यों कि, उस स्थलमें कुर धातुका ही ग्रहण है ॥ खुर धातु छेदनमें है ॥ मुर धातु संवेष्टनमें है ॥ क्षुर धातु विलेखनमें है ॥ घुर धातु भयानकार्थ और शब्दमें है ॥ पुर धातु अग्रगमनमें है बृहू धातु उद्यमनमें है, यह दन्त्योष्ठ्यादि है, अन्यमतसे पवर्गीयादि है ॥ तृहू, स्तृहू और तृंहू धातु हिंसार्थक हैं । तृहति । ततर्ह । स्तृहति । तस्तर्ह । तर्हिता, तर्ढा । स्तर्हिता, स्तर्ढा । अतृंहीत्, अतार्ंक्षीत् । अताण्ढाम् ॥ इष धातु इच्छामें है—"इषुगमि० २४००" इस सूत्रसे छ आदेश होकर—इच्छति । एषिता, एष्टा । एषिष्यति । इष्यात् । ऐषीत् ॥ मिष धातु स्पर्द्धामें है । मिषति । मेषिता ॥ किल धातु श्वैत्य और क्रीडामें है ॥ तिल धातु स्नेहनमें है ॥ चिल धातु वसनमें है ॥ चल धातु विलसनमें है ॥ इल धातु स्वप्न और क्षेपणमें है ॥ विल धातु संवरणमें है, यह धातु दन्त्योष्ठादि है ॥ बिल धातु भेदनमें है। यह ओष्ठ्यादि है ॥ णिल धातु गहनमें है ॥ हिल धातु भावकरणमें है ॥ शिल और षिल धातु उञ्छमें है ॥ मिल धातु श्लेषणमें है ॥ लिख धातु अक्षरविन्यास (लिखने) में है । लिलेख ॥ कुट धातु कौटिल्यमें है । "गाङ्कुटादिभ्यः० २४६१" इस सूत्रसे ङित्व होकर—चुकुटिथ । चुकोट, चुकुट । कुटिता ॥ पुट धातु संश्लेषणमें है ॥ कुच धातु संकोचनमें है ॥ गुज धातु शब्दमें है ॥ गुड धातु रक्षामें है ॥ डिप धातु क्षेपमें है ॥ छुर धातु छेदनमें हैं । "नभकुर्छुराम् १६२९" इस सूत्रसे दीर्घ न हुआ, छुर्यात् ॥ स्फुट धातु विकसनमें है। स्फुटति । पुस्फोट ॥ मुट धातु आक्षेप और मर्दनमें है ॥ त्रुट धातु छेदनमें है । "वा भ्राश० २३२१" इस सूत्रसे विकल्प करके श्यन् होकर—त्रुट्यति, त्रुटति । तुत्रोट । त्रुटिता ॥ तुट धातु कलहमें है । तुटति । तुतोट । तुटिता ॥ चुट और छुट धातु छेदनमें है ॥ जुड धातु बंधनमें है ॥ कड धातु मदमें है ॥ लुट् धातु संश्लेषणमें है ॥ कृड धातु घनत्व, अर्थात् सान्द्रतामें है । चकर्ड । कृडिता ॥ कुड धातु बाल्यमें है ॥ पुड धातु उत्सर्गमें है ॥ घुट धातु प्रतिघातमें है ॥ तुड धातु तोडन, अर्थात् भङ्ग करनेमें है ॥ थुड और स्थुड धातु संवरणमें है । थुडति । थुथोड । तुस्थोड । किसीके मतसे । खुड और छुड धातु है ॥ स्फुर और स्फुल धातु सञ्चलनमें है॥ स्फुर धातु स्फुरणमें है । स्फुल धातु सञ्चलनमें है, ऐसा कोई २ कहतेहैं ॥

२६३७ स्फुरतिस्फुलत्योर्निर्निविभ्यः । ८ । ३ । ७६ ॥

षत्वं वा स्यात् । निष्फुरति । निःस्फुरति । स्फर इत्यकारोपधं केचित्पठन्ति। पस्फार ॥ १०२ ॥ स्फुड चुड ब्रुड संवरणे ॥ १०५ ॥ क्रुड भृड निमज्जन इत्येके ॥ १०७ ॥ गुरी उद्यमने ॥ अनुदात्तेत् । गुरते । जुगुरे । गुरिता ॥ १०८ ॥ णू स्तवने ॥ दीर्घान्तः । परिणूतगुणोदयः ॥ इतश्चत्वारः परस्मैपदिनः ॥ नुवति । अनुवीत ॥ १ ॥

धू विधूनने ॥ धुवति ॥ २ ॥ गु पुरीषोत्सर्गे ॥ जुगुविथ–जुगुथ । गुता । गुष्यति । अगुषीत् । ह्रस्वादङ्गात् । अगुताम् । अगुषुः ॥ ३ ॥ ध्रु गतिस्थैर्ययोः ॥ ध्रुव इति पाठान्तरम् । आद्यस्य ध्रुवतीत्यादि गुवतिवत् । द्वितीयस्तु सेट् । दुध्रुविथ । ध्रुविता । ध्रुविष्यति। ध्रूव्यात् । अध्रुवीत् । अध्रुविष्टाम् ॥ ४ ॥ कुङ् शब्दे । दीर्घान्त इति कैयटादयः । कुविता । अकुविष्ट । ह्रस्वान्त इति न्यासकारः ॥ कुता । अकुत ॥१॥ वृत् ॥ कुटादयो वृत्ताः ॥

पृङ् व्यायामे ॥ प्रायेणायं व्याङ्पूर्वः । रिङ् । इयङ् । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते । व्यापृत । व्यापृषाताम् ॥ १ ॥ मृङ् प्राणत्यागे ॥

२५३७–निर्, नि और वि के परे स्थित स्फुर और स्फुल धातुके सकारको विकल्प करके षत्व हो, निःष्फुरति, निस्फुरति। निःष्फुलति, निस्फुलति । कोई स्फर ऐसा अकारोपध पाठ करतेहैं। पस्फार ॥ स्फुड, चुड और बुड धातु संवरणमें हैं ॥ कुड और भृड धातु निमजनमें हैं, यह किसी २ पंडितका मत है॥ गुरी धातु उद्यमनमें है, यह आत्मनेपदी है । गुरते । जुगुरे । गुरिता ॥ णू धातु स्तवनमें है, यह दीर्घ उकारान्त है, यथा– 'परिणूतगुणोदयः' ॥

अब चार परस्मैपदी धातु हैं ।

नुवति । अनुवीत् ॥ धू धातु विधूननमें है । धुवति ॥ गु धातु पुरीषोत्सर्गमें है । जुगुविथ, जुगुथ । गुता । गुष्यति । अगुषीत् । "ह्रस्वादङ्गात् २३६९" इससे सिच्का लोप होकर–अगुताम् । अगुषुः ॥ ध्रु धातु गति और स्थैर्यमें है । ध्रुव ऐसा पाठान्तर है । प्रथम धातुके 'ध्रुवति' इत्यादि गुवतिवत्, अर्थात् गु धातुके समान रूप होंगे। दूसरी धातु सेट् है । दुध्रुविथ । ध्रुविता । ध्रुविष्यति । ध्रुव्यात् । अध्रुवीत् । अध्रुविष्टाम् ॥ कुङ् धातु शब्दमें है, यह धातु दीर्घ उकारान्त है, ऐसा कैयटादि पंडितोंका मत है । कुविता । अकुविष्ट । यह न्यासकारके मतसे ह्रस्वान्त है । कुता । अकुत । कुटादि धातु समाप्त हुए ॥

पृङ् धातु व्यायाममें है, यह धातु प्रायः वि और आङ्पूर्वक है । रिङ् और इयङ् होकर–व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते ॥ व्यापृत । व्यापृषाताम् ॥ मृङ् धातु प्राणत्यागमें है ॥

२५३८ म्रियतेर्लुङ्लिङोश्च ।१।३।६१॥

लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र । ङित्त्वं स्वरार्थम् । म्रियते । ममार । ममर्थ । मम्रिव । मर्तासि ॥ मरिष्यति । मृषीष्ट । अमृत ॥ २ ॥

अथ परस्मैपदिनः सप्त ॥ रि पि गतौ । अन्तरङ्गत्वादियङ् । रियति । पियति । रेता । पेता ॥ २ ॥ धि धारणे ॥ ३ ॥ क्षि निवासगत्योः ॥ ४ ॥ षू प्रेरणे । सुवति । सविता॥५॥ कॄ विक्षेपे । किरति । किरतः । चकार । चकरतुः । करीता–करिता । कीर्यात्।अकारीत्॥

२५३८–लुङ्, लिङ् और शित्की प्रकृतिभूत मृङ् धातुके उत्तर तङ् हो, अन्यत्र न हो । स्वरार्थ ङ् इत् कियाहै । म्रियते । ममार । ममर्थ । मम्रिव । मर्त्तासि । मरिष्यति । मृषीष्ट । अमृत ॥

अब परस्मैपदी ७ धातु कहतेहैं ।

रि, पि, धातु गतिमें हैं । लघूपध गुणकी अपेक्षासे अन्तरङ्गत्वके कारण इयङ् होकर–रियति । रेता । पियति । पेता ॥ धि धातु धारणमें है ॥ क्षि धातु निवास और गतिमें है ॥ षू धातु प्रेरणमें है । सुवति । सविता ॥ कॄ धातु विक्षेपमें है । किरति । किरतः । चकार । चकरतुः । करीता–करिता । कीर्य्यात् । अकारीत् ॥

२५३९ किरतौ लवने । ६ ।१।१४० ॥

उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे । उपस्किरति ॥ अडभ्यासव्यवायेऽपि । सुट्कात्पूर्व इति वक्तव्यम् ॥*॥ उपास्किरत् । उपचस्कार॥

२५३९–छेदार्थ होनेपर उप उपसर्गके परे स्थित कॄ धातुको सुट्का आगम हो, उपस्किरति ।

अट् और अभ्यासके व्यवधान रहते भी ककारके पूर्वमें सुट् हो * उपास्किरत् । उपचस्कार ॥

२५४० हिंसायां प्रतेश्च । ६।१। १४१ ॥

उपात्प्रतेश्च किरतेः सुट् स्यात् हिंसायाम् । उपस्किरति । प्रतिस्किरति ॥ ६ ॥ गॄ निगरणे॥

२५४०–उप और प्रतिके परे स्थित कॄ धातुको हिंसार्थमें सुट्का आगम हो, उपस्किरति । प्रतिस्किरति ॥ गॄ धातु निगरणमें है ॥

२५४१ अचि विभाषा । ८ । २ ।२१॥

गिरतेरेफस्य लत्वं वा स्यादजादौ । गिलति–गिरति । जगाल–जगार । जगलिथ–जगरिथ । गलीता–गरीता । गलिता–गरिता ॥७॥ दृङ् आदरे। आद्रियते।आद्रियेते । आदद्रे। आदद्रिषे । आदर्ता । आदरिष्यते । आदृषीष्ट । आदृत । आदृषाताम् ॥ १ ॥ धृङ् अवस्थाने । ध्रियते ॥ २ ॥

अथ परस्मैपदिनः षोडश । प्रच्छ ज्ञीप्सायाम् ॥ पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ–पप्रष्ठ । प्रष्टा । प्रक्ष्यति। अप्राक्षीत् ॥ १॥ वृत् । किरादयो वृत्ताः । सृज विसर्गे । विभाषा सृजिदृशोः। ससर्जिथ–सस्रष्ठ। स्रष्टा । स्रक्ष्यति । सृजिदृशोर्झल्यमकितीत्यमागमः । सृजेत् । सृज्यात् । अस्राक्षीत् ॥ २ ॥ टुमस्जो शुद्धौ ॥

मज्जति । ममज्ज। ममज्जिथ। मस्जिनशोर्झलीति-नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः ॥*॥ संयोगादिलोपः । ममङ्क्थ । मंक्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥ ३ ॥ रुजो भङ्गे । रोक्ता । रोक्ष्यति । अरौक्षीत् । अरौक्ताम् ॥४॥ भुजो कौटिल्ये ॥ रुजिवत्॥५॥ छुप स्पर्शे । छोप्ता । अच्छौप्सीत् ॥६॥रुश रिश हिंसायाम् । तालव्यान्तौ । रोष्टा । रोक्ष्यति । रेष्टा । रेक्ष्यति ॥ ८ ॥ लिश गतौ । अलिक्षत् । ॥९॥ स्पृश संस्पर्शने। स्प्रष्टा-स्पर्ष्टा। स्प्रक्ष्यति-स्पर्क्ष्यति। अस्प्राक्षीत्-अस्पार्क्षीत्। अस्पृक्षत्१०॥ विच्छ गतौ । गुपूधूपेत्यायः । आर्द्धधातुके वा । विच्छायति।विच्छायांचकार-विविच्छ ॥ ११॥ विश प्रवेशने।विशति।वेष्टा॥१२॥ मृश आमर्शने। आमर्शनं स्पर्शः । अम्राक्षीत्-अमार्क्षीत् । अमृक्षत् ॥ १३ ॥ णुद प्रेरणे । कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनः पाठः ॥१४॥ षद्लृ विशरणगत्यवसादनेषु । सीदतीत्यादि भौवादिकवत्। इह पाठो नुम्विकल्पार्थः । सीदन्ती-सीदती । ज्वलादौ पाठस्तु णार्थः । सादः । स्वरार्थश्च । शबनुदात्तः । शस्तूदात्तः॥१५॥ शद्लृ शातने ॥ स्वरार्थ एष पुनः पाठः । शता तु नास्ति । शदेः शित इत्यात्मनेपदोक्तेः ॥ १६ ॥

अथ षट् स्वरितेतः । मिल सङ्गमे । मिल संश्लेषणे इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः। मिलति । मिलते । मिमेल । मिमिले ॥ १ ॥ मुच्लृ मोक्षणे ॥

२५४१-अजादि प्रत्यय परे रहते गॄ धातुके रकारके स्थानमें विकल्प करके लकार हो, गिलति, गिरति । जगाल, जगार । जगलिथ, जगरिथ । गलीता, गरीता। गलिता, गरिता। दृङ् धातु आदरमें है । आद्रियते । आद्रियेते । आदद्रे । आदद्रिषे । आदर्त्ता । आदरिष्यते । आदृषीष्ट । आदृत । आदृषाताम् ॥ धृङ् धातु अवस्थानमें है । ध्रियते ॥

अब १६ परस्मैपदी धातु कहतेहैं ।

प्रच्छ धातु ज्ञीप्सामें है । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ, पप्रष्ठ । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । किरादि धातु समाप्त हुए ॥

सृज धातु विसर्ग अर्थात् त्याग करनेमें है । "विभाषा सृजिदृशोः २४०४" इस सूत्रसे विकल्प करके इट् करके ससर्जिथ, सस्रष्ठ । स्रष्टा । स्रक्ष्यति । "सृजिदृशोर्झल्यमकिति २४०५" इस सूत्रसे अमागम हुआ । सृजेत् । सृज्यात् । अस्राक्षीत् ॥ टुमस्जो धातु शुद्धिमें है । मजति । ममज । ममजिथ । "मस्जिनशोर्झलि २५१७" इस सूत्रसे नुम्का आगम हुआ । मस्ज धातुके अन्त्य वर्णके पूर्वमें नुम् हो यह कहना चाहिये * संयोगके आदिका लोप हुआ, ममङ्क्थ । मङ्क्ता। मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥ रुज् धातु भंगमें है । रोक्ता । रोक्ष्यति । अरौक्षीत् । अरौक्ताम् ॥ भुजो धातु कुटिलतामें है । रुजि धातुकी समान इसके रूप होंगे ॥ छुप धातु स्पर्शमें है । छोप्ता । अच्छौप्सीत् ॥ रुश और रिश धातु हिंसामें हैं,यह धातु तालव्यान्त हैं । रोष्टा । रोक्ष्यति। रेष्टा । रेक्ष्यति ॥ लिश धातु गतिमें है । अलिक्षत् ॥ स्पृश धातु संस्पर्शनमें है । स्प्रष्टा, स्पर्ष्टा । स्प्रक्ष्यति, स्पर्क्ष्यति । अस्प्राक्षीत्, अस्पार्क्षीत् । अस्पृक्षत् ॥ विच्छ धातु गतिमें है । "गुपूधूप० २३०३"इस सूत्रसे आय प्रत्यय होगा। आर्धधातुक स्थलमें विकल्प करके होगा, विच्छायति । विच्छायाञ्चकार, विविच्छ ॥ विश धातु प्रवेशमें है । विशति । वेष्टा ॥ मृश धातु आमर्शनमें है । आमर्शन शब्दसे स्पर्श जानना । अम्राक्षीत्, अमार्क्षीत् । अमृक्षत्॥ णुद धातु प्रेरणमें है । कर्तृगामी क्रियाफल होनेपर भी परस्मैपदार्थ पुनः पाठ किया है॥षद्लृ धातु विशरण, गति और अवसादनमें है । सीदति, इत्यादि भ्वादिगणके धातुकी समान रूप होंगे । इस स्थलमें पाठ करनेसे विकल्प करके नुम् होगा । सीदन्ती, सीदती । तो ज्वलादि गणमें पाठ तो "ज्वलति०" इससे ण प्रत्ययार्थ है । सादः । और स्वरार्थ भी यहां पाठ कियाहै, शप् अनुदात्त और श उदात्त होताहै॥ शद्लृ धातु शातनमें है । स्वरार्थ इसका पुनः पाठ है । शतृ प्रत्यय तो नहीं होसकताहै, कारण कि, "शदेः शितः २३६२" इससे शित्प्रत्यय होनेवाला है जिससे ऐसे शद धातुको आत्मनेपद कहा है ।

अब ६ स्वरितेत् धातु कहतेहैं ।

मिल धातु संगममें है । श्लेषण अर्थमें पठित'मिल'धातुका पुनः पाठ कर्त्रभिप्राय क्रियाफलमें भी तङ् विधानार्थ है। मिलति । मिलते । मिमेल । मिमिले ॥ मुच्लृ धातु मोचनमें है ॥

२५४२ शेमुचादीनाम् । ७।१।५९॥

नुम् स्यात् । मुञ्चति ॥ मुञ्चते । मोक्ता । मुच्यात्। मुक्षीष्ट। अमुचत् ।अमुक्त।अमुक्षाताम् । ॥२॥ लुप्लृ छेदने । लुम्पति। लुम्पते । अलुपत्। अलुप्त ॥३॥ विद्लृ लाभे । विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूत्यादिमते तु सेडयम् । वेदिता । भाष्यादिमतेऽनिट्कः । वेत्ता । परिवेत्ता । परिर्वर्जने । ज्येष्ठं परित्यज्य दारानग्नींश्च लब्धवानित्यर्थः । तृन्तृचौ ॥ ४ ॥ लिप उपदेहे। उपदेहो वृद्धिः। लिम्पति। लिम्पते। लेप्ता। लिपिसिचीत्यङ् । तङि तु वा । अलिपत् । अलिपत-अलिप्त ॥ ५ ॥ षिच क्षरणे। सिञ्चति। सिञ्चते । असिचत् । असिचत-असिक्त । अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषेच ॥ ६ ॥

अथ त्रयः परस्मैपदिनः ॥ कृती छेदने । कृन्तति । चकर्त । कर्तिता । कर्तिष्यति-

कर्त्स्यति । अकर्तीत् ॥ १ ॥ खिद परिघाते । खिन्दति । चिखेद । खेत्ता । अयं दैन्ये दिवादौ रुधादौ च ॥ २ ॥ पिश अवयवे । पिंशति । पेशिता । अयं दीपनायामपि । त्वष्टा रूपाणि पिंशतु ॥ ३ ॥ इति मुचादयस्तुदादयश्च ॥

॥ इति तुदादयः ॥

२५४२–श प्रत्यय परे रहते मुचादि धातुओंको नुम् हो, मुञ्चति । मुञ्चते । मोक्ता । मुच्यात् । मुक्षीष्ट । अमुचत् । अमुक्त । अमुक्षाताम् ॥ लुप्लृ धातु छेदनमें है । लुम्पति । लुम्पते । अलुपत् । अलुप्त ॥ विद्लृ धातु लाभमें है । विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूत्यादि–पंडितोंके मतसे यह धातु सेट् है, इससे वेदिता । भाष्यकारादिके मतसे यह अनिट् है, इससे वेत्ता । परिवेत्ता, यहां परि शब्दसे वर्जन समझना, ज्येष्ठको त्यागकर अर्थात् ज्येष्ठके विवाहादिके पूर्वमें ही पत्नी और अग्निको प्राप्त किये हुए । यहां विद धातुके उत्तर तृन् अथवा तृच् प्रत्यय है॥ लिप धातु उपदेहमें है । उपदेह, अर्थात् वृद्धि । लिम्पति । लिम्पते । लेप्ता । "लिपिसिचि० २४१८" इस सूत्रसे अङ् होगा, परन्तु तङ्परे विकल्प करके होगा, अलिपत् । अलिपत,अलिप्त॥ षिच धातु क्षरणमें है । सिञ्चति । सिञ्चते । असिचत् । असिचत, असिक्त । अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषेच ॥

अब ३ परस्मैपदी धातु कहतेहैं ।

कृती धातु छेदनमें है । कृन्तति । चकर्त । कर्तिता । कर्तिष्यति, कर्त्स्यति । अकर्तीत् ॥ खिद धातु परिघातमें है । खिन्दति । चिखेद । खेत्ता । यह धातु दैन्यार्थमें दिवादि और रुधादिगणीय है ॥ पिश धातु अवयवमें है । पिंशति । पेशिता । यह धातु दीपनार्थमें भी है, यथा–'त्वष्टा रूपाणि पिंशतु' ॥ इति मुचादयस्तुदादयश्च ॥

॥ इति तुदादिप्रकरम् ॥

अथ रुधादयः ७.

रुधिर् आवरणे ॥ नव स्वरितेत इरितश्च ॥

रुधिर् धातु आवरणमें है ।

अब धातु उभयपदी और इरित् कहतेहैं ॥

२५४३ रुधादिभ्यः श्नम्।३।१।७८॥

शपोऽपवादः । मित्त्वादन्त्यादचः परः । नित्यत्वाद् गुणं बाधते । रुणद्धि । श्नसोरल्लोपः । णत्वस्यासिद्धत्वादनुस्वारः । परसवर्णः । तस्यासिद्धत्वाण्णत्वं न । न पदान्तेतिसूत्रेणाऽनुस्वारपरसवर्णयोरल्लोपो न स्थानिवत् । रुन्धः । रुन्धन्ति । रुन्धे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु । रुन्धात् । रुन्धि । रुणधानि । रुणधै । अरुणत् । अरुन्धाम् । अरुणत्–अरुणः । अरुणधम् । अरुधत्–अरौत्सीत् । अरुद्ध ॥ १ ॥ भिदिर् विदारणे ॥ भिनत्ति । भिन्ते । भेत्ता । भेत्स्यति । भेत्स्यते । अभिनत्–अभिनः । अभिनदम् । अभिन्त । अभिदत्–अभैत्सीत् । अभित्त ॥ २ ॥ छिदिर् द्वैधीकरणे । अच्छिदत्–अच्छैत्सीत् । अच्छित्त ॥३॥ रिचिर् विरेचने ॥ रिणक्ति । रिङ्क्ते । रिरेच । रिरिचे । रेक्ता । अरिणक् । अरिचत्–अरैक्षीत् । अरिक्त ॥ ४ ॥ विचिर् पृथग्भावे । विनक्ति । विङ्क्ते ॥ ५ ॥ क्षुदिर् सम्पेषणे ॥ क्षुणत्ति । क्षुन्ते । क्षोत्ता । अक्षुदत्–अक्षौत्सीत् । अक्षुत्त ॥ ६ ॥ युजिर् योगे ॥ योक्ता ॥ ७ ॥ उछृदिर् दीप्तिदेवनयोः॥ छृणत्ति । छृन्ते । चच्छर्द । सेसिचीति वेट् । चच्छृदिषे–चच्छृत्से । छर्दिता । छर्दिष्यति–छर्त्स्यति । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट ॥ ८ ॥ उतृदिर् हिंसानादरयोः ॥ तृणत्तीत्यादि ॥ ९ ॥ कृती वेष्टने । परस्मैपदी । कृणत्ति । आर्धधातुके तौदादिकवत् ॥ १० ॥ ञिइन्धी दीप्तौ ॥ त्रय आत्मनेपदिनः ॥

२५४३–रुधादि धातुके उत्तर श्नम् हो, यह श्नम् शप्का अपवाद (विशेषक) है । मकार इत् होनेके कारण अन्त्य अच्के परे होगा । नित्यत्वके कारण गुणको बाध करताहै । रुणद्धि । "श्नसोरल्लोपः" इस सूत्रसे श्नम्के अकारका लोप हुआ । श्नम्के मकार अकारकी इत्संज्ञा हुई नकार शेष रहा । णत्वके असिद्धके कारण नकारको अनुस्वार,और परसवर्ण हुआ, उसके असिद्धत्वके कारण फिर णत्व नहीं हुआ । अनुस्वार, परसवर्ण कर्त्तव्यमें अल्लोपके स्थानिवद्भाव तो नहीं होगा कारण कि,"न पदान्त० ५१"इस सूत्रसे स्थानिवद्भावका निषेध होजाताहै । रुन्धः । रुन्धन्ति । रुन्धे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु । रुन्धात् । रुन्धि । रुणधानि । रुणधै । अरुणत् । अरुन्धाम् । अरुणत्, अरुणः । अरुणधम् । अरुधत्, अरौत्सीत् । अरुद्ध ॥ भिदिर् धातु विदारणमें है । भिनत्ति । भिन्ते । भेत्ता । भेत्स्यति । अभिनत्, अभिनः । अभिनदम् । अभिन्त । अभिदत्, अभैत्सीत् । अभित्त ॥ छिदिर् धातु द्वैधीकरणमें है। अच्छिदत्,अच्छैत्सीत्। अच्छित्त॥रिचिर् धातु विरेचनमें है। रिणक्ति। रिङ्क्ते। रिरेच।रिरिचे । रेक्ता। अरिणक् । अरिचत्, अरैक्षीत् । अरिक्त॥विचिर् धातु पृथक् भावमें है । विनक्ति । विङ्क्ते ॥ क्षुदिर् धातु सम्पेषणमें है । क्षुणत्ति । क्षुन्ते । क्षोत्ता । अक्षुदत्, अक्षौत्सीत् । अक्षुत्त ॥ युजिर् योगमें है । योक्ता ॥ उच्छृदिर् धातु दीप्ति और पाशककीडामें है । छृणत्ति । छृन्ते । चच्छर्द । "सेऽसिचि० २५०६" इस सूत्रसे विकल्प करके इट् होकर–चच्छृदिषे, चच्छृत्से । छर्दिता । छर्दिष्यति, छर्त्स्यति । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट ॥ उतृदिर् धातु हिंसा और अनादरमें है । तृणत्ति। इत्यादि ॥ कृती धातु वेष्टनमें है, यह परस्मैपदी धातु है । कृणत्ति । आर्धधातुक स्थलमें इसके रूप तुदादिगणके

धातुकी समान होंगे ॥ ञिइन्धी धातु दीप्तिमें है, यह तीन धातु आत्मनेपदी हैं ॥

२५४४ श्नान्नलोपः । ६ । ४ । २३ ॥

श्नमः परस्य नस्य लोपः स्यात् । श्नसोरल्लोपः । इन्धे । इन्त्से । इन्धिता । इन्धै । ऐन्ध । ऐन्धाः ॥ १ ॥ खिद दैन्ये । खिन्ते । खेत्ता ॥ २ ॥ विद विचारणे । विन्ते । वेत्ता ॥ ३ ॥

अथ परस्मैपदिनः ॥ शिषॢ विशेषणे । शिनष्टि । शिंष्टः । शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । हेर्धिः । जश्त्वम् । झरो झरीति वा डलोपः । अनुस्वारपरसवर्णौ । शिण्ढि-शिण्ड्ढि । शिनषाणि । अशिनट् । लृदित्वादङ् । अशिषत् ॥ १ ॥ पिषॢ सञ्चूर्णने ॥ शिषिवत् । पिनष्टि ॥ २ ॥ भञ्जो आमर्दने ॥ भनक्ति । बभञ्जिथ-बभङ्क्थ । भङ्क्ता ॥ ३ ॥ भुज पालनाभ्यवहारयोः ॥ भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ॥ ४ ॥ तृह हिसि हिंसायाम् ॥

२५४४-श्नम्के परे नकारका लोप हो " श्नसोरल्लोपः " इससे अकारका लोप होकर-इन्धे । इन्त्से । इन्धिता । इन्धै । ऐन्ध । ऐन्धाः ॥ खिद धातु दैन्यमें है । खिन्ते । खेत्ता ॥ विद धातु विचारणमें है । विन्ते । वेत्ता ।

अब परस्मैपदी धातु कहतेहैं ।

शिषॢ धातु विशेषणमें है । शिनष्टि । शिंष्टः । शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । शिष धातुके उत्तर हिके स्थानमें धि, और षको जश्त्व, और ' झरोझरि० ७२ " इस सूत्रसे विकल्प करके डकारका लोप, अनुस्वार, और परसवर्ण होकर-शिण्ढि, शिण्ड्ढि । शिनषाणि । अशिनट् । लृकार इत् होनेके कारण च्लिके स्थानमें अङ् होकर-अशिषत् ॥ पिषॢ धातु संचूर्णनमें है । इसके रूप शिष धातुकी समान होंगे । पिनष्टि ॥ भञ्जो धातु आमर्दनमें है । भनक्ति । बभञ्जिथ, बभङ्क्थ । भङ्क्ता ॥ भुज धातु पालन और अभ्यवहार, अर्थात् भोजनमें है । भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् ॥ तृह और हिसि धातु हिंसामें हैं ॥

२५४५ तृणह इम् । ७ । ३ । ९२ ॥

तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता ॥ ६ ॥ उन्दी क्लेदने ॥ उनत्ति । उन्तः । उन्दन्ति । उन्दांचकार । औनत् । औन्ताम् । औन्दन् । औनः-औनत् । औनदम् ॥ ७ ॥ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ-आनङ्क्थ । अङ्क्ता । अञ्जिता । अङ्ग्धि । अनजानि । आनक् ॥

२५४५-हलादि पित् प्रत्यय परे रहते तृह धातुके उत्तर श्नम् होनेपर इमागम हो, तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता ॥ उन्दी धातु क्लेदनमें है । उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत् । औन्ताम् । औन्दन् । औनः, औनत् । औनदम् ॥ अञ्जू धातु व्यक्ति, म्रक्षण, कान्ति और गतिमें है । अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ, आनङ्क्थ । अङ्क्ता । अञ्जिता । अङ्ग्धि । अनजानि । आनक् ॥

२५४६ अञ्जेः सिचि । ७ । २ । ७१ ॥

अञ्जेः सिचो नित्यमिट् स्यात् । आञ्जीत् ॥ ८ ॥ तञ्चू संकोचने ॥ तञ्चिता-तङ्क्ता ॥ ९ ॥ ओविजी भयचलनयोः ॥ विनक्ति । विंक्तः । विज इडिति ङित्त्वम् । विविजिथ । विजिता । अविनक् । अविजीत् ॥ १० ॥ वृजी वर्जने ॥ वृणक्ति । वर्जिता ॥ ११ ॥ पृची संपर्के । पृणक्ति । पपर्च ॥ १२ ॥

॥ इति रुधादयः ॥

२५४६-अञ्जू धातुके उत्तर सिच्को नित्य इट् हो, आञ्जीत् ॥ तञ्चू धातु संकोचनमें है । तञ्चिता, तङ्क्ता ॥ ओविजी धातु भय और चलनमें है। विनक्ति । विङ्क्तः । "विज इट् २५३६" इस सूत्रसे ङित्त्व होकर-विविजिथ । विजिता । अविनक् । अविजीत् ॥ वृजी धातु वर्जनमें है । वृणक्ति । वर्जिता ॥ पृची धातु संपर्कमें है । पृणक्ति । पपर्च ॥

॥ इति रुधादिप्रकरणम् ॥

अथ तनादयः ८.

अथ सप्त स्वरितेतः ॥ तनु विस्तारे । तनादिकृञ्भ्य उः ॥ तनोति । तन्वः-तनुवः । तनुते । ततान । तेने । तनु । अतानीत्-अतनीत् ॥

यहांसे लेकर ७ धातु उभयपदी कहतेहैं । तनु धातु विस्तारमें है । " तनादिकृञ्भ्य उः " (तनादिगणीय धातु और कृञ् धातुके उत्तर उ प्रत्यय हो) इस सूत्रसे उ प्रत्यय करके-तनोति । तन्वः, तनुवः । तनुते । ततान । तेने । तनु । अतानीत्, अतनीत् ॥

२५४७ तनादिभ्यस्तथासोः । २ । ४ । ७९ ॥

तनादेः सिचो वा लुक् स्यात्तथासोः । थासा साहचर्यादेकवचनं तशब्दो गृह्यते । तेनेह न । यूयमतनिष्ट-अतानिष्ट । अनुदात्तोपदेशेत्यनुनासिकलोपः । तङि । अतत-अतनिष्ट । अतथाः-अतनिष्ठाः ॥ १ ॥ षणु दाने ॥ सनोति । सनुते । ये विभाषा । सायात्-सन्यात् । जनसनेत्यात्वम् । असात-असनिष्ट । असाथाः-असनिष्ठाः ॥ २ ॥ क्षणु हिंसायाम् ॥ क्षणोति । क्षणुते । ह्मयन्तेति न वृद्धिः । अक्ष

णीत् । अक्षत-अक्षणिष्ट । अक्षथाः-अक्षणिष्ठाः॥ ॥ ३ ॥ क्षिणु च ॥ उप्रत्ययनिमित्तो लघूपधगुणः संज्ञापूर्वको विधिरनित्य इति न भवतीत्यात्रेयादयः । भवत्येवेत्यन्ये । क्षिणोति-क्षेणोति । क्षेणितासि । क्षेणितासे । अक्षेणीत् । अक्षित-अक्षेणिष्ट ॥ ४ ॥ ऋणु गतौ ॥ ऋणोति-अर्णोति । ऋणुतः-अर्णुतः । ऋण्वन्ति-अर्णुवन्ति । आनर्ण-आनृणे । अर्णितासि । आर्णीत् । आर्त-आर्णिष्ट । आर्थाः-आर्णिष्ठाः ॥ ॥ ५ ॥ तृणु अदने ॥ तृणोति-तर्णोति । तृणुते-तर्णुते ॥ ६ ॥ घृणु दीप्तौ ॥ जघर्ण । जघृणे ॥ ७ ॥

अथ द्वावनुदात्तेतौ ॥ वनु याचने ॥ वनुते । ववने । चान्द्रमते परस्मैपदी । वनोति । ववान॥ ॥ १ ॥ मनु अवबोधने ॥ मनुते ॥ मेने ॥ २ ॥ डुकृञ् करणे ॥ करोति । अत उत्सार्वधातुके । कुरुतः । यण् । न भकुर्छुरामिति न दीर्घः । कुर्वन्ति ॥

२५४७-त और थास् प्रत्यय परे रहते तनादि धातुओंके उत्तर विकल्प करके सिच्का लुक् हो । थास् प्रत्ययके साहचर्यसे एकवचन तशब्दका ग्रहण होताहै, इस कारण 'यूयमतनिष्ट, अतानिष्ट' इस स्थलमें सिच्का लुक् न हुआ । "अनुदात्तोपदेश० २४२८" इस सूत्रसे अनुनासिक वर्णका लोप होकर-तङ्में अतत, अतनिष्ट । अतथाः, अतनिष्ठाः ॥ षणु धातु दानमें है, सनोति। सनुते । "ये विभाषा २३१९" इस सूत्रसे यकारादि प्रत्यय परे सन धातुके नकारके स्थानमें विकल्प करके आकार होकर-सायात्, सन्यात् । "जनसन० २५०४" इस सूत्रसे आत्व होकर-असात, असनिष्ट । असाथाः, असनिष्ठाः ॥ क्षणु धातु हिंसामें है । क्षणोति । क्षणुते । "ह्म्यन्त० २२९९" इस सूत्रसे वृद्धि न होकर-अक्षणीत् । अक्षत, अक्षणिष्ट । अक्षथाः, अक्षणिष्ठाः ॥ क्षिणु धातु भी उक्तार्थक है । उ प्रत्यय निमित्तक लघूपध गुण "संज्ञापूर्वको विधिरनित्यः" (संज्ञापूर्वक विधि अनित्य होताहै ।) इस परिभाषाके अनुसार नहीं होगा, यह आत्रेयादि मुनियोंका मत है । अन्यमतसे गुण होहीगा, जैसे-क्षिणोति, क्षेणोति । क्षेणितासि । क्षेणितासे । अक्षेणीत् । अक्षित, अक्षेणिष्ट ॥ ऋणु धातु गतिमें है । ऋणोति, अर्णोति । ऋणुतः, अर्णुतः । ऋण्वन्ति, अर्णुवन्ति । आनर्ण, आनृणे । अर्णितासि । आर्णीत् । आर्त्त, आर्णिष्ट । आर्थाः, आर्णिष्ठाः ॥ तृणु धातु अदनमें है । तृणोति, तर्णोति । तृणुते, तर्णुते ॥ घृणु धातु दीप्तिमें है । जघर्ण । जघृणे ॥

अब दो धातु आत्मनेपदी कहतेहैं ।

वनु धातु याचनमें है । वनुते । ववने । चान्द्रमतसे यह धातु परस्मैपदी है । वनोति । ववान ॥ मनु धातु अवबोधनमें है । मनुते । मेने ॥ डुकृञ् धातु करणमें है । करोति । "अत उत् सार्वधातुके २४६७" इससे उत्व होकर-कुरुतः । यण् और "न भकुर्छुराम् १६२९" इस सूत्रसे दीर्घ निषेध होकर कुर्वन्ति ॥

२५४८ नित्यं करोतेः । ६ । ४ । १०८ ॥

प्रत्ययोकारस्य नित्यं लोपः स्याद्वमोः परयोः । कुर्वः । कुर्मः । चकर्थ । चकृव । चकृषे । कर्ता । करिष्यति ॥

२५४८-व और म परे रहते कृ धातुके उत्तर प्रत्ययके उकारका नित्य लोप हो । कुर्वः । कुर्मः । चकर्थ । कर्त्ता । चकृव । करिष्यति ॥

२५४९ ये च । ६ । ४ । १०९ ॥

कृञ उलोपः स्याद्यादौ प्रत्यये परे । कुर्यात् । आशिषि । क्रियात् । कृषीष्ट। अकार्षीत् । तनादिभ्य इति लुकोऽभावे ह्रस्वादङ्गादिति सिचो लोपः। अकृत । अकृथाः ॥

२५४९-यकारादि प्रत्यय परे रहते कृ धातुके उकारका लोप हो । कुर्य्यात् । आशीर्लिङ्में-क्रियात् । कृषीष्ट । अकार्षीत् । "तनादिभ्यः० २५४७" इस सूत्रके लुक्के अभावमें "ह्रस्वादङ्गात्० २३६९" इस सूत्रसे सिच्का लोप होताहै, अकृत । अकृथाः ॥

२५५० संपरिभ्यां करोतौ भूषणे । ६ । १ । १३७ ॥

२५५०-भूषण अर्थ गम्यमान होनेपर सम्, और परि उपसर्गसे पर कृ धातुको सुट्का आगम हो ॥

२५५१ समवाये च । ६ । १ । १३८ ॥

संपरिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे । संस्करोति । अलंकरोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । संपूर्वस्य क्वचिदभूषणेऽपि सुट् । संस्कृतं भक्षा इति ज्ञापकात् । परिनिविभ्य इति षः । परिष्करोति ॥ सिवादीनां वा । पर्यष्कार्षीत् । पर्यस्कार्षीत् ॥

२५५१-समूह अर्थ गम्यमान होनेपर भी सम्, और परि उपसर्गसे पर कृ धातुको सुट्का आगम हो । संस्करोति, अर्थात् अलंकृत करताहै । संस्कुर्वन्ति, अर्थात् सब एकत्र होकर दलबद्ध होतेहैं । "संस्कृतं भक्षाः" इस ज्ञापकके कारण संपूर्वक कृ धातुको कभी २ भूषणसे भिन्न अर्थमें भी सुट् होताहै । परि, नि और वि पूर्वक कृ धातुके सुट्के सकारको षत्व हो । परिष्करोति । सिवादिके सकारको विकल्प करके षत्व होताहै । (२३५९) पर्यष्कार्षीत् । पर्यस्कार्षीत् ॥

२५५२ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च । ६ । १ । १३९ ॥

उपात्कृञः सुट् स्यादेष्वर्थेषु चात्प्रागुक्तयोर-

र्थयोः । प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्यस्याध्याहारः, आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या । अलंकृतेत्यर्थः । उपस्कृता ब्राह्मणाः । समुदिता इत्यर्थः । एधोदकस्योपस्कुरुते । गुणाधानं करोतीत्यर्थः । उपस्कृतं भुङ्क्ते । विकृतमित्यर्थः । उपस्कृतं ब्रूते । वाक्याध्याहारेण ब्रूते इत्यथः ॥

२५५२-प्रतियत्न, वैकृत और वाक्यके अध्याहार अर्थमें उपपूर्वक कृ धातुको सुट्का आगम हो। चकारसे प्रागुक्त अर्थमें अर्थात् भूषण और समूहअर्थमें भी हो। प्रतियत्न शब्दसे गुणाधान, वैकृत शब्दसे विकार वाक्याध्याहार अर्थात् आकाङ्क्षित एक देशका पूरण करना । उपस्कृता कन्या, अर्थात् अलंकृता । उपस्कृता ब्राह्मणाः, अर्थात् समुदिताः । एधोदकस्योपस्कुरुते, अर्थात् इन्धन जलका गुणाधान करताहै । उपस्कृतं भुङ्क्ते, अर्थात् विकृतभावसे भोजन करताहै । उपस्कृतं ब्रूते, अर्थात् वाक्याऽध्याहारपूर्वक बोलताहै ॥

२५५३ सुट्कात्पूर्वः । ६ । १ । १३५ ॥

अडभ्यासव्यवायेपीत्युक्तम् । संचस्कार । कात्पूर्व इत्यादि भाष्ये प्रत्याख्यातम् । तथा हि। पूर्वं धातुरुपसर्गेण युज्यते । अन्तरङ्गत्वात्सुट् । ततो द्वित्वम् । एवं च ऋतश्च संयोगादेर्गुणः । संचस्करतुः ॥ कृसृभृ० इति सूत्रे ऋतो भारद्वाजस्येतिसूत्रे च कृञोऽसुट इति वक्तव्यम् ॥ * ॥ तेन ससुट्कात्परस्येट् । संचस्करिथ । संचस्करिव। गुणोर्तीतिसूत्रे नित्यं छन्दसीतिसूत्रान्नित्यमित्यनुवर्तते । नित्यं यः संयोगादिस्तस्येत्यर्थात्सुटि गुणो न । संस्क्रियात् । ऋतश्च संयोगादेरिति लिङ्सिचोर्नेट् । एकाच उपदेशे इति सूत्रादुपदेश इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात् । संस्कृषीष्ट । समस्कृत । समस्कृषाताम् ॥ १ ॥

॥ इति तनादयः ॥

२५५३-सम्, परि और उपसे परे अट् और अभ्यासका व्यवधान रहते भी कृ धातुके ककारके पूर्वमें सुट्का आगम हो । सञ्चस्कार । "कात्पूर्वः" इत्यादि भाष्यमें प्रत्याख्यात हुए हैं, क्योंकि, पूर्वमें धातु उपसर्गके साथ युक्त होताहै, तो अन्तरङ्गत्वके कारण पहले सुट्, पश्चात् द्वित्व होगा । ऐसा होनेपर "ऋतश्च संयोगादेर्गुणः २३८९" इस सूत्रसे ऋकारान्त संयोगादि धातुको गुण होता है । सञ्चस्करतुः । "कृसृभृ० २२९३" इस सूत्रमें और "ऋतो भारद्वाजस्य २२९६" इस सूत्रमें सुट्से रहित कृ धातु ऐसा कहना चाहिये । इस कारण ससुट्क धातुके उत्तर इट् हो । सञ्चस्करिथ । सञ्चस्करिव । "गुणोऽर्ति० २३८०" इस सूत्रमें "नित्यं छन्दसि ३५८७" इस सूत्रसे 'नित्यम्' पदकी अनुवृत्ति होतीहै, इससे नित्य जो संयोगादि, उसको गुण न हो ऐसे अर्थ होनेसे सुट् पर रहते गुण नहीं होता जैसे-संस्क्रियात् । "ऋतश्च संयोगादेः २५२६" इस सूत्रसे लिङ् और सिच्को वैकल्पिक इट् नहीं होता, क्योंकि, "एकाच उपदेशे० २२७६" इस सूत्रसे 'उपदेशे' की अनुवृत्ति कर उपदेशमें 'संयोगादि' ऐसी व्याख्या करनेसे जैसे-संस्कृषीष्ट । समस्कृत । समस्कृषाताम् ॥

॥ इति तनादिप्रकरणम् ॥

अथ क्र्यादयः ९.

डुक्रीञ् द्रव्यविनिमये ॥

डुक्रीञ् धातु द्रव्यविनिमयमें है ॥

२५५४ क्र्यादिभ्यः श्ना । ३ । १ । ८१ ॥

क्रीणाति ॥ ई हल्यघोः । क्रीणीतः । ईत्वात्पूर्वं झेरन्तादेशः परत्वान्नित्यत्वादन्तरङ्गत्वाच्च । एवं झस्याद्भावः । ततः श्नाभ्यस्तयोरित्याल्लोपः। क्रीणन्ति । क्रीणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रियतुः । चिक्रयिथ-चिक्रेथ । चिक्रियिव । चिक्रियिषे । क्रेता-क्रेष्यति । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट ॥ १ ॥ प्रीञ् तर्पणे कान्तौ च ॥ कान्तिः कामना । प्रीणाति । प्रीणीते ॥ २ ॥ श्रीञ् पाके ॥ ३ ॥ मीञ् हिंसायाम् ॥ हिनुमीना । प्रमीणाति । प्रमीणीतः । मीनातिमिनोतीत्येज्विषये आत्वम् । ममौ । मिम्यतुः । ममिथ-ममाथ । मिम्ये । माता । मास्यति । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ ४ ॥ षिञ् बन्धने । सिनाति । सिनीते । सिषाय । सिष्ये । सेता ॥ ५ ॥ स्कुञ् आप्रवणे ॥

२५५४-क्र्यादि धातुओंके उत्तर श्ना प्रत्यय हो । सार्वधातुक प्रत्यय परे रहते क्रीणाति । "ई हल्यघोः २४९७" इस सूत्रसे श्ना प्रत्ययके आकारके स्थानमें ईकार हो, क्रीणीतः । ईत्वके पूर्वमें झिके स्थानमें परत्व, नित्यत्व और अन्तरङ्गत्वके कारण "झोऽन्तः" से 'अन्त' आदेश हो, और झके स्थानमें "आत्म० " अत् हो, पश्चात् "श्नाभ्यस्तयोः० २४८३" इस सूत्रसे आकारका लोप हो । क्रीणन्ति । क्रीणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रियतुः । चिक्रयिथ, चिक्रेथ । चिक्रियिव । चिक्रियिषे । क्रेता, । क्रेष्यति । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट ॥

प्रीञ् धातु तर्पण, और कान्ति अर्थात् कामनामें है । प्रीणाति । प्रीणीते ॥ श्रीञ् धातु पाकमें है ॥ मीञ् धातु हिंसामें है । "हिनुमीना २५३०" यह सूत्र यहां स्मरणार्थ है । प्रमीणाति । प्रमीणीतः । "मीनातिमिनोति० २५०८" इस सूत्रसे एच्के विषयमें आत्त्व हो । ममौ । मिम्यतुः । ममिथ, ममाथ । मिम्ये । माता । मास्यति ।

मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त ॥ षिञ् धातु बंधनमें है । सिनाति । सिनीते । सिषाय। सिष्ये । सेता ॥

स्कुञ् धातु आप्रवण अर्थात् सम्यक् प्लवनमें है ॥

२५५५ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च । ३ । १ । ८२ ॥

चात् श्ना । स्कुनोति । स्कुनुते । स्कुनाति । स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्कोष्ट ॥ ६ ॥ स्तन्भ्वादयश्चत्वारः सौत्राः । सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ द्वितीयो निष्कोषणार्थः । चतुर्थो धारणार्थ इत्याह । सर्वे परस्मैपदिनः । नलोपः । विष्टभ्नोति–विष्टभ्नाति । अवष्टभ्नोति–अवष्टभ्नाति । अवतष्टम्भ । जृस्तन्भ्विच्यङ् वा । व्यष्टभत्–व्यष्टम्भीत् । स्तुभ्नोति–स्तुभ्नाति ॥

२५५५–स्तन्भु, स्तुन्भु, स्कन्भु, स्कुन्भु और स्कुञ् धातुके उत्तर श्नु और श्ना प्रत्यय हो । स्कुनोति, स्कुनाति । स्कुनुते, स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्कोष्ट । स्तन्भु आदि ४ धातु सौत्र (सूत्रोक्त) हैं । एक आचार्य कहतेहैं कि, सब (४) ही रोधनार्थक हैं । माधवके मतमें प्रथम और तृतीय स्तम्भार्थ हैं, द्वितीय निष्कोषणार्थ और चतुर्थ धारणार्थ है, और सब परस्मैपदी हैं । नकारका लोप, विष्टभ्नोति, विष्टभ्नाति । अवष्टभ्नोति, अवष्टभ्नाति । अवतष्टम्भ । "जृस्तन्भु० २२९१" इस सूत्रसे विकल्प करके अङ्, व्यष्टभत्, व्यष्टम्भीत् । स्तुभ्नोति, स्तुभ्नाति ॥

२५५६ वेः स्कभ्नातेर्नित्यम् ।८।३।७७॥

वेः परस्य स्कभ्नातेः सस्य षः स्यात् । विष्कभ्नोति–विष्कभ्नाति।स्कुभ्नोति–स्कुभ्नाति ॥

२५५६–विपूर्वक स्कन्भ धातुके सकारको षत्व हो, विष्कभ्नोति, विष्कभ्नाति । स्कुभ्नोति, स्कुभ्नाति ॥

२५५७ हलः श्नः शानज्झौ ।३।१।८३॥

हलः परस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान–स्तुभान । स्कभान–स्कुभान । पक्षे स्तभ्नुहीत्यादि ॥ युञ् बन्धने ॥ युनाति । युनीते । योता ॥ ७ ॥ क्नूञ् शब्दे ॥ क्नूनाति । क्नूनीते । क्नविता ॥ ८ ॥ द्रूञ् हिंसायाम् ॥ द्रूणाति । द्रूणीते ॥ ९ ॥ पूञ् पवने ॥

२५५७–हि परे रहते हल्के परे श्नाके स्थानमें शानच् आदेश हो । स्तभान, स्तुभान । स्कभान, स्कुभान । पक्षमें स्तभ्नुहि इत्यादि पद होंगे । युञ् धातु बंधनमें है । युनाति । युनीते । योता ॥ क्नूञ् धातु शब्दमें है । क्नूनाति । क्नूनीते । क्नविता । द्रूञ् धातु हिंसामें है । द्रूणाति । द्रूणीते ॥ पूञ् धातु पवित्र करनेमें है ॥

२५५८ प्वादीनां ह्रस्वः । ७ । ३।८०॥

शिति परे । पुनाति । पुनीते । पविता॥१०॥ लूञ् छेदने ॥ लुनाति । लुनीते ॥ ११ ॥ स्तॄञ् आच्छादने स्तृणाति । स्तृणीते । तस्तार । तस्तरतुः । स्तरीता–स्तरिता । स्तृणीयात् । स्तृणीते । आशिषि स्तीर्यात् ॥ लिङ्सिचोरिति वेट् ॥ (न लिङि । ७ । २ । ३९) वॄत इटो लिङि दीर्घो न स्यात् । स्तरिषीष्ट। उश्चेति कित्त्वम्। स्तीर्षीष्ट । सिचि च परस्मैपदेष्विति न दीर्घः।अस्तारीत्।अस्तारिष्टाम्। अस्तरीष्ट–अस्तरिष्ट । अस्तीर्ष्ट॥१२॥कॄञ् हिंसायाम्॥ कृणाति । कृणीते । चकार । चकरे ॥ १३ ॥ वॄञ् वरणे ॥ वृणाति वृणीते । ववार । ववरे । वरीता–वरिता । आशिषि उदोष्ठ्यपूर्वस्य । वूर्यात् । वरिषीष्ट–वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरीष्ट–अवरिष्ट–अवूर्ष्ट ॥ १४ ॥ धूञ् कम्पने ॥ धुनाति । धुनीते । दुधविथ–दुधोथ । दुधुविव । धविता–धोता । स्तुसुधूञ्भ्य इतीट् । अधावीत् । अधविष्ट-अधोष्ट ॥ १५ ॥

अथ बध्नात्यन्ताः परस्मैपदिनः ॥ शॄ हिंसायाम् ॥ शॄदॄप्रां ह्रस्वो वेति ह्रस्वपक्षे यण् । अन्यदा ऋच्छत्यॄतामिति गुणः । शश्रतुः–शशरतुः । श्र्युकः कितीतिनिषेधस्य क्रादिनियमेन बाधः । शशरिव–शश्रिव । शरीता–शरिता । शृणीहि । शीर्यात् । अशारिष्टाम् ॥ १ ॥ पॄ पालनपूरणयोः ॥ पप्रतुः–पपरतुः । आशिषि, पूर्यात् ॥ २ ॥ वॄ वरणे ॥ भरण इत्येके ॥ ३ ॥ भॄ भर्त्सने ॥ भरणेऽप्येके ॥ ४ ॥ मॄ हिंसायाम्॥ मृणाति । ममार ॥ ५ ॥ दॄ विदारणे ॥ ददरतुः । दद्रुः ॥ ६ ॥ जॄ वयोहानौ ॥ ७ ॥ झॄ इत्येके ॥ ८ ॥ धॄ इत्यन्ये ॥ ९ ॥ नॄ नये॥१०॥ कॄ हिंसायाम् ॥ ११ ॥ ऋ गतौ ॥ ऋणाति । अरांचकार । अरीता–अरिता । आर्णात् । आर्णीताम् । ईर्यात् । आरीत् । आरिष्टाम् ॥ १२ ॥ गॄ शब्दे ॥ १३ ॥ ज्या वयोहानौ ॥ ग्रहिज्या ॥

२५५८–शित् परे रहते प्वादि धातुओंको ह्रस्व हो । पुनाति । पुनीते । पविता ॥ लूञ् धातु छेदनमें है । लुनाति । लुनीते ॥ स्तॄञ् धातु आच्छादनमें है । स्तृणाति । स्तृणीते । तस्तार । तस्तरतुः । स्तरीता, स्तरिता । स्तृणीयात् । स्तृणीते । आशीर्लिङ्में स्तीर्यात् । "लिङ्सिचोः० २५२८" इस सूत्रसे विकल्प करके इट् हो । "न लिङि २५२९" इस सूत्रसे

लिङ् परे रहते वृत (वृङ, वृञ्, ऋदन्त) धातुके उत्तर इट्को दीर्घ न हो । स्तारिषीष्ट । "उश्च २३६८" इस सूत्रसे कित्त्व हो । स्तीर्षीष्ट । सिच् परे रहते परस्मैपदमें दीर्घ न हो । (२३९२) अस्तारीत् । अस्तारिष्टाम् । अस्तरीष्ट । अस्तारिष्ट, अस्तीर्ष्ट ॥ कॄञ् धातु हिंसामें है । कृणाति । कृणीते । चकार । चकरे ॥ वॄञ् धातु वरणमें है । वृणाति । वृणीते । ववार । ववरे । वरीता, वरिता । आशीर्लिङ्में । ओष्ठयवर्ण पूर्वक जो ऋकार, तदन्त धातुको उकार हो । (२४९४) वूर्य्यात् । वारिषीष्ट । वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरीष्ट, अवारिष्ट, अवूर्ष्ट ॥ धूञ् धातु कम्पनमें है । धुनाति । धुनीते । दुधविथ, दुधोथ । दुधुविव । धोता, धविता । "स्तुसुधूञ्भ्यः २३८५"इस सूत्रसे धू धातुके उत्तरको इट् हो। अधावीत् । अधविष्ट, अधोष्ट ।

अब वध धातुतक परस्मैपदी हैं ॥ शॄ धातु हिंसामें है । "शॄदॄप्रां ह्रस्वो वा २४९५"इस सूत्रसे विहित ह्रस्वपक्षमें यण् हो । अन्य पक्षमें ।"ऋच्छत्यॄताम्२३८३"इस सूत्रसे गुण हो । शश्रतुः । शशरतुः ।"श्र्युकः किति २३८१"इस निषेध सूत्रका क्रयादि नियमसे बाध होगा । शशरिव, शश्रिव । शरीता, शरिता । शृणीहि । शीर्य्यात् । अशारिष्टाम् । पॄ धातु पालन और पूरणमें है । पप्रतुः, पपरतुः । आशीर्लिङ्में–पूर्य्यात् ॥ वॄ धातु वरणमें है । कोई २ कहतेहैं कि, यह भरणार्थक है । भॄ धातु भर्त्सनमें है । किसीके मतमें भरणार्थक है ॥ मॄ धातु हिंसामें है । मृणाति । ममार ॥ दॄ धातु विदारणमें है । ददरतुः । दद्रुः ॥ जॄ, झॄ और धॄ धातु वयोहानिमें है ॥ नॄ धातु नयमें है । कॄ धातु हिंसामें है । ॠ धातु गतिमें है । ऋणाति । अराञ्चकार । अरीता, अरिता । आर्णी-त् । आर्णीताम् । ईर्य्यात् । आरीत् । आरिष्टाम् ॥ गॄ धातु शब्दमें है । ज्या धातु वयोहानिमें है । "ग्रहिज्या० २४१२" यह सूत्र यहां स्मरणार्थहै ॥

२५५९ हलः । ६ । ४ । २ ॥

अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात् । इति दीर्घे कृते । प्वादीनां ह्रस्वः । जिनाति । जिज्यौ । जिज्यतुः ॥ १४ ॥ री गतिरेषणयोः ॥ रेषणं वृकशब्दः ॥ १५ ॥ ली श्लेषणे ॥ विभाषा लीयतेरित्येज्विषये आत्त्वं वा । ललौ–लिलाय । लाता–लेता॥१६॥ व्ली वरणे ॥ व्लिनाति ॥१७॥ प्ली गतौ ॥१८॥ वृत् ॥ ल्वादयो वृत्ताः । प्वादयोऽपीत्येके ॥ व्री वरणे ॥१९॥ भ्री भये॥भरण इत्येके ॥२०॥ क्षीष् हिंसायाम् ॥ एषां त्रयाणां ह्रस्वः । केचिन्मते तु न ॥ २१ ॥ ज्ञा अवबोधने ॥ ज्ञाजनोर्जा । जानाति । दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः॥२२॥बन्ध बन्धने । बध्नाति । बबन्धिथ–बबन्ध । बन्धा । बन्धारौ । भन्त्स्यति । बधान । अभान्त्सीत् । पूर्वत्रासिद्धमिति भष्भावात्पूर्वं झलो झलीति सिज्लोपः । प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न, प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात् । अबान्द्धाम् । अभान्त्सुः ॥ २३ ॥ वृङ् सम्भक्तौ । वृणीते । वव्रे । ववृषे । ववृढ्वे । वरीता–वरिता । अवरीष्ट–अवरिष्ट–अवृत ॥ १ ॥ श्रन्थ विमोचनप्रतिहर्षयोः ॥ इतः परस्मैपदिनः॥श्रथ्नाति । श्रन्थिग्रन्थीत्यादिना कित्त्वपक्षे एत्वाभ्यासलोपावप्यत्र वक्तव्यौ, इति हरदत्तादयः । श्रेथतुः । श्रेथुः । इदं कित्त्वं पितामपीति सुधाकरमते । श्रेथिथ । अस्मिन्नपि पक्षे णलि । शश्राथ । उत्तमे तु शश्राथ–शश्रथेति माधवः । तत्र मूलं मृग्यम् ॥ १ ॥ मन्थ विलोडने ॥ २ ॥ श्रन्थ ग्रन्थ सन्दर्भे ॥ अर्थभेदात् श्रन्थेः पुनः पाठः रूपं तूक्तम् ॥४॥ कुन्थ संश्लेषणे । संक्लेशे इत्येके । कुथ्नाति चुकुन्थ॥५॥कुथेति दुर्गः। चुकोथ ॥६॥ मृद क्षोदे ॥ मृद्नाति । मृदान ॥ ७ ॥ मृड च ॥ अयं सुखेपि । मृत्वम् । मृड्णाति ॥ ८ ॥ गुध रोषे ॥ गुध्नाति ॥ ९ ॥ कुष निष्कांशे ॥ कुष्णाति । कोषिता ॥

२५५९–अङ्गावयवीभूत हल्के परे जो सम्प्रसारण तदन्त अङ्गको दीर्घ हो, इससे दीर्घ होनेपर, " प्वादीनां ह्रस्वः २५५८" इस सूत्रसे ह्रस्व होगा । जिनाति । जिज्यौ । जिज्यतुः॥री धातु गति और रेषणमें है । रेषण अर्थात् वृकके शब्दमें ॥ ली धातु श्लेषणमें है । " विभाषा लीयतेः२५०९ " इस सूत्रसे एच्विषयमें विकल्प करके आत्त्व हो । ललौ । लिलाय । लाता, लेता ॥ व्ली धातु वरणमें है । व्लिनाति । प्ली धातु गतिमें है । ल्वादि धातु सम्पूर्ण हुए । कोई २ कहतेहैं कि, प्वादि धातु भी सम्पूर्ण हुए ।

व्री धातु वरणमें है । भ्री धातु भयमें है । किसी २ के मतमें यह भरणमें है ॥ क्षीष् धातु हिंसामें है, इन तीन धातु ओंको ह्रस्व हो, किसीके मतमें ह्रस्व नहीं होगा ॥ ज्ञा धातु अवबोधनमें है । " ज्ञा जनोर्जा २५११ " इस सूत्रसे ज्ञा धातुके स्थानमें ' जा ' आदेश हो । जानाति । सूत्रमें दीर्घ निर्देशके कारण ह्रस्व नहीं होगा ॥ बंध धातु बंधनमें है । बध्नाति । बबन्धिथ, बबन्ध । बन्धा । बन्धारौ । भन्त्स्यति । बधान । अभान्त्सीत् । " पूर्वत्रासिद्धम् १२ " इस सूत्रसे भष्भावके पूर्वमें "झलो झलि २२८१" इस सूत्रसे सिच्का लोप होगा । प्रत्यय लक्षणसे सकारादि प्रत्ययका आश्रय करके भष्भाव नहीं होगा, क्योंकि प्रत्ययलक्षणके प्रति सिच्के लोपको असिद्धत्व है । अबान्द्धाम् । अभान्त्सुः ॥ वृङ् धातु सम्भाक्तिम है । वृणीते । वव्रे । ववृषे । ववृढ्वे । वरीता, वरिता । अवरीष्ट, अवरिष्ट, अवृत ॥ श्रन्थ धातु विमोचन और प्रतिहर्षमें है । यहांसे परस्मैपदी हैं । श्रथ्नाति । हरदत्ता-

दिके मतमें "श्रन्थिग्रन्थि०" से किरवपक्षमें एत्व और अभ्यासका लोप भी होगा । श्रेथतुः । श्रेथुः । सुधाकरके मतमें इस पित्संज्ञक होनेपर भी इसकी कित्संज्ञा हो । श्रेथिथ । णल् परे–शश्राथ । उत्तम पुरुषमें शश्राथ–शश्रथ। यह माधवका मत है । इस विषयमें मूल अनुसंधेय है॥ मन्थ धातु विलोडनमें है ॥ श्रन्थ और ग्रन्थ धातु सन्दर्भमें हैं। अर्थभेदके कारण श्रन्थ धातुका पुनः पाठ हुआ, किन्तु इसका रूप पूर्वमें कह दिया है। कुन्थ धातु संश्लेषणमें है, किसीके मतमें संक्लेशमें है । कुथ्नाति । चुकुन्थ । दुर्गके मतमें यह 'कुथ' धातु है । चुकोथ ॥ मृद धातु क्षोदमें है । मृद्नाति । मृदान ॥ मृड धातु मर्दनमें है । और यह सुखमें भी है । ष्टुत्व हो । मृड्णाति॥गुध धातु रोषमें है । गुध्नाति ॥ कुष धातु निष्कोशमें है । कुष्णाति । कोषिता ॥

२५६० निरः कुषः । ७ । २ । ४६ ॥

निरः परात्कुषो वलादेरार्धधातुकस्य इड्वा स्यात् । निष्कोषिता–निष्कोष्टा । निरकोषीत्–निरकुक्षत् ॥ १० ॥ क्षुभ सञ्चलने ॥ (क्षुभ्नादिषु च । ८ । ४ । ३९ ॥) क्षुभ्नाति । क्षुभ्नीतः । क्षोभिता । क्षुभाण॥११॥ णभ तुभ हिंसायाम् ॥ नभ्नाति । तुभ्नाति । नभते–तोभते इति शपि । नभ्यति–तुभ्यतीति श्यनि॥१३॥क्लिशू विबाधने॥ शादिति श्चुत्वनिषेधः। क्लिश्नाति। क्लेशिता–क्लेष्टा। अक्लेशीत्–अक्लिक्षत् ॥ १४ ॥ अश भोजने ॥ अश्नाति । आश ॥ १५ ॥ उध्रस उञ्छे ॥ इकार इत्। ध्रस्नाति ॥ १६ ॥ उकारो धात्ववयव इत्येके । उध्रसांचकार ॥ १७ ॥ इष आभीक्ष्ण्ये ॥ पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम् । इष्णाति । तीषसहेत्यत्र सहिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः । एषिता । वस्तुतस्तु इष्णातेरपि इड्विकल्प उचितः । तथा च वार्तिकम् ॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेध इति ॥ * ॥ १८ ॥ विष विप्रयोगे ॥ विष्णाति । वेष्टा ॥ १९ ॥ प्लुष स्नेहनसेवनपूरणेषु ॥ प्रुष्णाति । प्लुष्णाति ॥२१॥ पुष पुष्टौ॥ पोषिता ॥२२॥ मुष स्तेये॥ मोषिता ॥ २३ ॥ खच भूतप्रादुर्भावे ॥ भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः । खश्नाति ॥ वान्तोयमित्येके ॥

२५६०–निर्पूर्वक कुष धातुसे पर वलादि आर्धधातुकके स्थानमें विकल्प करके इट् हो–निष्कोषिता,निष्कोष्टा । निरकोषीत्, निरकुक्षत् ॥ क्षुभ धातु संचलनमें है । "क्षुभ्नादिषु च ७९२" इस सूत्रसे णत्व न हो । क्षुभ्नाति । क्षुभ्नीतः । क्षोभिता । क्षुभाण ॥ णभ और तुभ धातु हिंसामें हैं । नभ्नाति । तुभ्नाति । शप् परे रहते–नभते । तोभते । श्यन् परे रहते–नभ्यति । तुभ्यति । क्लिशू धातु विबाधनमें है । "शात्११२" इस सूत्रसे श्चुत्व न होगा। क्लिश्नाति । क्लेशिता, क्लेष्टा । अक्लेशीत्, अक्लिक्षत्॥अश धातु भोजनमें है। अश्नाति।आश॥उध्रस् धातु उञ्छमें है । उकारकी इत्संज्ञा हुई । ध्रस्नाति । कोई२ कहतेहैं कि, उकार धातुका अवयव है । उध्रसाञ्चकार ॥ इष धातु आभीक्ष्ण्यमें है । आभीक्ष्ण्य शब्दसे पौनःपुन्य अथवा भृशार्थ समझना । इष्णाति । "तीषसह०२३४०" इस सूत्रसे सह शब्दके साहचर्य्यसे अकारविकरण तुदादिगणीय इष धातुका ही ग्रहण हुआ है, इष्यति अथवा इष्णाति-पद वाले इष धातुका ग्रहण नहीं है । एषिता । वस्तुतः (इष्णाति) इष धातुके परको विकल्प करके इट् होना उचित है, तथा च वार्त्तिक–"इषेस्तकारे श्यन् प्रत्ययात् प्रतिषेधः" अर्थात् श्यन् प्रत्ययवाले इष धातुसे पर तकारादि आर्धधातुकके इट्का प्रतिषेध है। विष धातु विप्रयोगमें है । विष्णाति । वेष्टा ॥ प्रुष और प्लुष धातु स्नेहन, सेवन और पूरणमें हैं–प्रुष्णाति । प्लुष्णाति ॥ पुष धातु पुष्टिमें है । पोषिता ॥ मुष धातु स्तेय (चोरी) में है । मोषिता ॥ खच धातु भूतप्रादुर्भावमें है–भूतप्रादुर्भाव शब्दसे अतिक्रान्तोत्पत्ति जाननी । खच्नाति । कोई २ कहतेहैं कि, यह धातु वकारान्त है ॥

२५६१ च्छ्वोः शूडनुनासिके च । ६ । ४ । १९ ॥

सतुक्कस्य छस्य वस्य च क्रमात् श ऊठ् एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति । खौनाति । चखाव । खविता । शानचः परत्वादूठि कृते हलन्तत्वाभावान्न शानच् । खौनीहि ॥२४॥ हिठ च ॥ ष्टुत्वम् । हिठ्णाति ॥ २५ ॥ ग्रह उपादाने ॥ स्वरितेत् । ग्रहिज्या–। गृह्णाति । गृह्णीते ॥

२५६१–अनुनासिक, क्वि और झलादि कित्, ङित् प्रत्यय परे रहते सतुक छ, और वके स्थानमें क्रमसे श और ऊठ् आदेश हो । खौनाति । चखाव । खविता । शानच्से परत्वके कारण ऊठ् होनेपर हलन्तके अभावके कारण शानच् नहीं होगा । खौनीहि ॥ हिठ धातु पूर्वोक्त अर्थमें है । ष्टुत्व होताहै । हिठ्णाति ॥ ग्रह धातु उपादानमें है । यह उभयपदी है । "ग्रहिज्या०२४१२" इस सूत्रसे ग्रह धातुको सम्प्रसारण हो । गृह्णाति । गृह्णीते ॥

२५६२ ग्रहोऽलिटि दीर्घः । ७।२।३७ ॥

एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यात् न तु लिटि। ग्रहीता। लिटि तु–जग्रहिथ। गृह्यात्। ग्रहीषीष्ट। ह्म्यन्तेति न वृद्धिः । अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् । अग्रहीषत ॥ १ ॥

॥ इति क्र्यादयः ॥

२२६२-एकाच् ग्रह धातुके उत्तर विहित प्रत्ययके इट्को दीर्घ हो। लिट् परे रहते नहीं हो, लिट्में न हो ग्रहीता, लिट्में तो 'जग्रहिथ' ऐसा होगा। गृह्यात्। ग्रहीषीष्ट। "ह्म्यन्त० २२९९" इस सूत्रसे वृद्धि नहीं होगी-अग्रहीत्। अग्रहीष्टाम्। अग्रहीष्ट। अग्रहीषाताम्। अग्रहीषत॥

॥ इति क्र्यादिप्रकरणम् ॥

अथ चुरादयः १०.

चुर स्तेये ॥

चुर धातु स्तेयमें है।

२५६३ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्। ३। १। २५॥

एभ्यो णिच् स्यात्। चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम्। चुरादिभ्यस्तु स्वार्थे। पुगन्तेति गुणः। सनाद्यन्ता इति धातुत्वम्। तिप्शबादिगुणायादेशौ। चोरयति॥

२५६३-सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोम, त्वच, वर्म, वर्ण, चूर्ण और चुरादि धातुओंके उत्तर स्वार्थमें णिच् हो। चूर्णान्त धातुओंके उत्तर "प्रातिपदिकात् धात्वर्थे" इस गण सूत्रसे णिच् होसकताहै तथापि उनका ग्रहण इस स्थलमें विस्तारार्थ है। चुरादिगणीय धातुओंके उत्तर तो स्वार्थमें णिच् हो। "पुगन्त० २१८९" इस सूत्रसे गुण हो "सनाद्यन्ताः० २३०४" इस सूत्रसे णिजन्तकी धातु संज्ञा हो। इस कारण उसके उत्तर तिप्, शप्, गुण, आय आदेश इत्यादि समस्त ही होंगे। चोरयति॥

२५६४ णिचश्च। १। ३। ७४॥

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट। णिश्रीति चङ्। णौ चङीति ह्रस्वः। द्वित्वम्। हलादिः शेषः। दीर्घो लघोरित्यभ्यासदीर्घः। अचूचुरत्। अचूचुरत॥१॥ चिति स्मृत्याम्॥ चिन्तयति। अचिचिन्तत्। चिन्तेति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम्। तेन चिन्त्यात्-चिन्त्यते इत्यादौ नलोपो न। चिन्तति। चिन्तेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके अत एकहल इत्यत्र वृत्तिकृता जगाण जगणतुरित्युदाहृतत्वात्। विशेषापेक्षमित्यपरे, अत एवाधृषाद्वेत्यस्य न वैयर्थ्यम्॥२॥ यत्रि संकोचे॥ यन्त्रयति। यन्त्रेति पठितुं शक्यम्। यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं कुद्रितन्त्रिमन्त्रिषु॥३॥ स्फुडि परिहासे॥ स्फुण्डयति। इदित्करणात्-स्फुण्डति॥ स्फुटीति पाठान्तरम्। स्फुण्टयति॥४॥ लक्ष दर्शनाङ्कनयोः॥५॥ कुद्रि अनृतभाषणे॥ कुन्द्रयति॥६॥ लड उपसेवायाम्॥ लाडयति॥७॥ मिदि स्नेहने॥ मिन्दयति। मिन्दति॥८॥ ओलडि उत्क्षेपणे॥ ओलण्डयति। ओलण्डति॥९॥ ओकार इदित्येके। लण्डयति। लण्डति॥१०॥ उकारादिरयमित्यन्ये। उलण्डयति॥११॥ जल अपवारणे॥१२॥ लज इत्येके॥१३॥ पीड अवगाहने। पीडयति॥

२५६४-क्रियाफल कर्तृगामी होनेपर णिजन्त धातुके उत्तर आत्मनेपद हो। चोरयते। चोरयामास। चोरयिता। चोर्यात्। चोरयिषीष्ट "णिश्रि० २३१२" इस सूत्रसे चङ् हो। "णौच०२३१४" इस सूत्रसे ह्रस्व हो। द्वित्व हो। "हलादिः शेषः २१७९" "दीर्घो लघोः २३१८" इस सूत्रसे दीर्घ हो। अचूचुरत्। अचूचुरत॥ चिति धातु स्मृतिमें है। चिन्तयति। अचिचिन्तत्। 'चिन्त' ऐसा पठितव्य होनेपर इदित्करण णिच्के पाक्षिकत्वका ज्ञापक है। अर्थात् णिच्के विकल्प पक्षमें इसकी इत्संज्ञा चरितार्थ होगी। इसी कारण 'चिन्त्यात्, चिन्त्यते' इत्यादि स्थलमें नकारका लोप नहीं होता। चिन्तति। चिन्तेत्। कोई २ कहतेहैं कि, यह ज्ञापक सामान्यापेक्ष है, क्योंकि, "अत एकहल्० २२६०" इस सूत्रमें वृत्तिकारने 'जगाण। जगणतुः' इत्यादि उदाहरण दियाहै। 'यह विशेषापेक्ष है' ऐसा भी कोई २ कहते हैं, अत एव "आधृषाद्वा" इस गणसूत्रकी व्यर्थता नहीं हुई॥ यत्रि धातु संकोचमें है। यंत्रयति। 'यन्त्र' ऐसा पाठ भी किया जासकताहै। जो तो माधवाचार्यने इदित्करणसे 'यंत्रति' ऐसा कहा है, वह चिन्त्य है। कुद्रि, तत्रि और मत्रि धातुमें भी इसी प्रकार है। स्फुडि धातु परिहासमें है। स्फुण्डयति। इकार इत् करनेसे 'स्फुण्डति' ऐसा होगा। 'स्फुटि' ऐसा पाठान्तर भी है, जैसे-स्फुण्टयति॥ लक्ष धातु दर्शन और अंकनमें है॥ कुद्रि धातु मिथ्या कथनमें है। कुन्द्रयति॥ लड धातु उपसेवामें है। लाडयति॥ मिदि धातु स्नेहनमें है। मिन्दयति। मिन्दति॥ ओ लडि धातु उत्क्षेपणमें है। ओलण्डयति। ओलण्डति। कोई २ कहतेहैं कि, इस धातुका ओकार इत्संज्ञक होताहै, ऐसा होनेपर-लण्डयति, लण्डति, ऐसा होगा। कोई २ कहतेहैं कि, यह धातु उकारादि है। उलण्डयति॥ जल धातु अपवारणमें है। कोई २ कहते हैं, कि 'लज' धातु है॥ पीड धातु अवगाहनमें है। पीडयति॥

२५६५ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्। ७। ४। ३॥

एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। अपीपिडत्-अपिपीडत्॥१४॥ नट अवस्यन्दने।

अवस्यन्दनं नाट्यम् ॥१५॥ श्रथ प्रयत्ने। प्रस्थाने इत्येके ॥ १६ ॥ बध संयमने ॥ बाधयति । बन्धेति चान्द्राः ॥ १७ ॥ पॄ पूरणे ॥ पारयति । दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गं तद्धि सङ्क्त्वाय । एवं पृणातिपिपर्तिभ्यां परितेत्यादिसिद्धावपि परति परत इत्यादिसिद्धिः फलम् ॥ ॥ १८ ॥ ऊर्ज बलप्राणनयोः ॥ १९ ॥ पक्ष परिग्रहे ॥२०॥ वर्ण चूर्ण प्रेरणे॥२१॥वर्ण वर्णन इत्येके॥२२॥ प्रथ प्रख्याने ॥ प्राथयति । नान्ये मितोऽहेताविति वक्ष्यमाणत्वान्नास्य मित्त्वम् ॥

२५६५—भ्राज, भास, भाष, दीप, जीव, मील और पीड धातुकी उपधाको विकल्प करके ह्रस्व हो, चङ् जिससे परे हो ऐसी णि परे रहते । अपीपिडत् । अपिपीडत् ॥ नट धातु अवस्यन्दनमें है । अवस्यन्दन शब्दसे नाट्य समझना ॥ श्रथ धातु प्रयत्नमें है । किसीके मतमें प्रस्थानार्थमें है । बध धातु संयमनमें है । बाधयति । चान्द्र मतमें यह 'बंध' धातु है ॥ पॄ धातु पूरणमें है । पारयति । दीर्घका उच्चारण णिच्के पाक्षिकत्वमें लिङ्ग और इट्के निमित्त है । इस प्रकार पृणाति (क्रैयादिक पॄ), और पिपर्त्ति (जौहोत्यादिक पॄ) से 'परिता' इत्यादि रूपोंकी सिद्धि होनेपर भी 'पारयति, परति, परतः' इत्यादि रूपोंकी सिद्धि फल है ॥ ऊर्ज धातु बल और प्राणनमें है ॥ पक्ष धातु परिग्रहमें है ॥ वर्ण और चूर्ण धातु प्रेरणमें है । किसीके मतमें वर्ण धातु वर्णनामें है ॥ प्रथ धातु प्रख्यानमें है । प्राथयति । "नान्ये मितोऽहेतौ" अर्थात् स्वार्थिक णिच् परे रहते ज्ञपादि पांच धातुओंको छोडकर अन्य धातु मित् नहीं होते, इस वक्ष्यमाण गणसूत्रसे यहां मित्त्व नहीं होगा ॥

२५६६ अत्स्मृदॄत्वरप्रथम्रदस्तॄस्पशाम् । ७ । ४ । ९५ ॥

एषामभ्यासस्य अकारोन्तादेशः स्याच्चङ्परे णौ । इत्वापवादः । अपप्रथत् ॥ २३ ॥ पृथ प्रक्षेपे ॥ पर्थयति ॥

२५६६—चङ् परक णि परे रहते स्मृ, दॄ, त्वर, प्रथ, म्रद, स्तॄ, और स्पश धातुके अभ्यासके स्थानमें अकार अन्तादेश हो । यह अकार इत्वका अपवाद है । अपप्रथत् । पृथ धातु प्रक्षेपमें है । पर्थयति ॥

२५६७ उर्ऋत् । ७ । ४ । ७ ॥

उपधाया ऋवर्णस्य स्थाने ऋत्स्याद्वा चङ्परे णौ।इररारामपवादः।अपीपृथत्-अपपर्थत् ॥२४॥ पथ इत्येके । पाथयति ॥ २५ ॥ षम्ब सम्ब धने । सम्बयति । अससम्बत् ॥ २६ ॥ शम्ब च ॥ अशशम्बत् ॥ २७ ॥ साम्ब इत्येके॥२८॥ भक्ष अदने ॥ २९ ॥ कुट्ट छेदनभर्त्सनयोः । पूरण इत्येके । कुट्टयति ॥ ३० ॥ पुट्ट चुट्ट अल्पीभावे ॥३२॥ अट्ट षुट्ट अनादरे॥अट्टयति । अयं दोपधः । ष्टुत्वस्यासिद्धत्वान्नन्द्रा इति निषेधः । आट्टिटत् ॥३४ ॥ लुण्ठ स्तेये ॥ लुण्ठयति । लुण्ठतीति। लुठ स्तेये इति भौवादिकस्य ॥३५॥शठ श्वठ असंस्कारगत्योः॥ ३७॥श्वठिइत्येके ॥३८॥तुजि पिजि हिंसाबलादाननिकेतनेषु॥तुञ्जयति।पिञ्जयति । इदित्करणात् तुञ्जति पिञ्जति ॥ ॥४०॥तुज पिजेति केचित॥४२॥ लजि लुजि इत्येके ॥ ४४ ॥ पिस गतौ ॥ पेसयति । पेसतीति तु शपि गतम् ॥ ४५ ॥ षान्त्व सामप्रयोगे ॥ ४६ ॥ श्वल्क वल्क परिभाषणे ॥ ४८ ॥ ष्णिह स्नेहने ॥ स्फिट इत्येके ॥ ५० ॥ स्मिट अनादरे ॥ अषोपदेशत्वान्न षः । असिस्मिटत् ॥ ॥ ५१ ॥ ष्मिङ् अनादर इत्येके । ङित्वस्यावयवेऽचरितार्थत्वाण्णिजन्तात्तङ् । स्माययते॥ ॥ ५२ ॥ श्लिष श्लेषणे ॥ ५३ ॥ पथि गतौ ॥ पन्थयति । पन्थति ॥ ५४ ॥ पिच्छ कुट्टने ॥ ॥ ५५ ॥ छदि संवरणे ॥ छन्दयति । छन्दति ॥ ॥५६॥श्रण दाने॥प्रायेणायं विपूर्वः । विश्राणयति ॥ ५७ ॥ तड आघाते ॥ ताडयति ॥ ५८ ॥ खड खडि कडि भेदने॥ खाडयति । खण्डयति। कण्डयति ॥ ६१ ॥ कुडि रक्षणे ॥ ६२ ॥ गुडि वेष्टने ॥ रक्षण इत्येके ॥ ६३ ॥ कुठि इत्यन्ये ॥ अवकुण्ठयति॥ अवकुण्ठति। गुठि इत्यपरे॥६५॥ खुडि खंडने॥६६॥वटि विभाजने॥वडि इत्येके॥ ॥६८॥मडि भूषायां हर्षे च॥६९॥भडि कल्याणे ॥७०॥ छर्द वमने ॥७१॥ पुस्त बुस्त आदरानादरयोः॥७३॥चुद संचोदने॥७४॥ नक्क धक्क नाशने ॥ णोपदेशलक्षणे पर्युदस्तोयम्। प्रनक्कयति ॥ ७६ ॥ चक्क चुक्क व्यथने ॥ ७८ ॥ क्षल शौचकर्मणि ॥ ७९ ॥ तल प्रतिष्ठायाम् ॥८०॥ तुल उन्माने ॥ तोलयति । तोलयामास । अतूतुलत् । कथं तुलयति तुलना इत्यादि । अतुलोपमाभ्यामिति निपातनादडन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् ॥८१॥ दुल उत्क्षेपे ॥८२॥ पुल महत्त्वे ॥ ८३ ॥ चुल समुच्छ्राये ॥ ८४ ॥ मूल रोहणे॥८५॥कल विल क्षेपे॥८७॥बिल भेदने ॥ ८८ ॥ तिल स्नेहने ॥ ८९ ॥ चल भृतौ ॥ ॥ ९० ॥ पाल रक्षणे ॥ ९१ ॥ लूष हिंसायाम् ॥ ९२ शुल्ब माने ॥ ९३ ॥ शूर्प च॥९४॥ चुट छेदने ॥ ९५ ॥ क्रुट सञ्चूर्णने ॥९६॥ पडि पसि नाशने ॥ पण्डयति । पण्डति । पंसयति ।

पंसति ॥ ९८ ॥ व्रज मार्ग संस्कारगत्योः ॥ ॥ १०० ॥ शुल्क अतिस्पर्शने ॥ १०१ ॥ चपि गत्याम् ॥ चम्पयति । चम्पति ॥ १०२ ॥ क्षपि क्षान्त्याम् ॥ क्षम्पयति । क्षम्पति ॥ १०३ ॥ छजि कृच्छ्रजीवने ॥ १०४ ॥ श्वर्त गत्याम् ॥ ॥ १०५ ॥ श्वभ्र च ॥ १०६ ॥ ज्ञप मिच्च । अयं ज्ञाने ज्ञापने च वर्तते ॥

२५६७-चङ् परक णि परे रहते धातुके उपधाभूत ऋवर्णके स्थानमें विकल्प करके ऋकार हो, यह इर्, अर् और आर्का अपवादक है । अपीपृथत्, अपपर्थत् । किसीके मतसे पथ धातु है । पाथयति ॥ षम्ब धातु संबन्धमें है । सम्बयति । असषम्बत् ॥ शम्ब धातु भी उक्तार्थक है । अशशम्बत् । किसीके मतसे साम्ब धातु है ॥ भक्ष धातु भक्षणमें है । कुट्ट धातु छेदन और भर्त्सन और किसीके मतसे पूरणार्थमें है । कुट्टयति ॥ पुट्ट और चुट्ट धातु अल्पीभावमें हैं ॥ अट्ट और षुट्ट धातु अनादरमें हैं अट्टयति । यह धातु दकारोपध है । ष्टुत्वके असिद्धत्वके कारण "नन्द्रा० २४४६" इस सूत्रसे दकारको द्वित्व नहीं होगा, आट्टिटत् ॥ लुण्ठ धातु चोरी करनेमें है । लुण्ठयति । 'लुण्ठति' यह 'लुठि स्तेये' इस भ्वादिगणीय धातुका रूप है ॥ शठ और श्वठ धातु असंस्कार और गतिमें हैं । कोई २ कहतेहैं श्वठि धातु है ॥ तुजि और पिजि धातु हिंसा, बल, आदान, और निकेतनार्थमें हैं । तुञ्जयति । पिञ्जयति । इदित् करणके कारण-तुञ्जति । पिञ्जति । कोई २ कहतेहैं तुज और पिज धातु हैं। कोई २ कहतेहैं लजि और लुजि धातु हैं ॥ पिस धातु गतिमें है । पेसयति । 'पेसति' यह तो शप परे कहा गया है ॥ षान्त्व धातु सामप्रयोगमें है ॥ श्वल्क और वल्क धातु परिभाषणमें है ॥ ष्णिह धातु स्नेहनमें है ॥ कोई स्फिट् धातु कहते हैं ॥ स्मिट् धातु अनादरमें है । अषोपदेशत्वके कारण षत्व नहीं होगा, असिस्मिटत् ॥ स्मिङ् धातु अनादरमें है । ङित्वके णिजन्तके अवयव ष्मिङ् धातुमें अचरितार्थत्वके कारण णिजन्तसे तङ् होगा, स्माययते ॥ श्लिष धातु श्लेषणमें है ॥ पथि धातु गतिमें है । पन्थयति । पन्थति ॥ पिच्छ धातु कुट्टनमें है ॥ छदि धातु संवरणमें है। छन्दयति । छन्दति ॥ श्रण धातु दानमें है, यह धातु प्रायः विपूर्वक है । विश्राणयति ॥ तड धातु आघातमें है । ताडयति ॥ खड, खडि और कडि धातु भेदनमें हैं । खाडयति। खंडयति । खण्डति । कण्डयति । कण्डति ॥ कुडि धातु रक्षा करनेमें है ॥ गुडि धातु वेष्टनमें है और किसीके मतसे रक्षणमें है । कोई २ इस धातुके स्थानमें कुठि धातु पढतेहैं । अवकुण्ठयति । अवकुण्ठति । कोई २ गुठि धातुका पाठ करतेहैं ॥ खुडि धातु खंडनमें है । वटि धातु विभाजनमें है । किसीके मतसे वडि धातु है ॥ मडि धातु भूषा और हर्षमें है ॥ भडि धातु कल्याणमें है ॥ छर्द धातु वमनमें है ॥ पुस्त और बुस्त धातु आदर और अनादरमें हैं ॥ चुद धातु सम्यक् प्रकारसे प्रेरणमें है ॥ नक्क और धक्क धातु नाशमें हैं । नक्क धातु णोपदेशके लक्षणमें पर्य्युदस्त है ॥ इससे णत्व न होगा, प्रनक्कयति ॥ चक्क और चुक्क धातु व्यथनमें हैं ॥ क्षल धातु शौचकर्ममें है ॥ तल धातु प्रतिष्ठामें है ॥ तुल धातु परिमाणमें है । तोलयति । अतूतुलत् । गुणविधायक शास्त्रके रहते 'तुलयति तुलना' इत्यादि प्रयोग किस प्रकार सिद्ध हुए ? तो "अतुलोपमाभ्याम् ६३०" इस सूत्रमें निपातनसे अदन्त तुला शब्दकी सिद्धि होनेपर उसके उत्तर णिच् है ॥ दुल धातु उत्क्षेपक्षणमें है ॥ पुल धातु महत्त्वमें है ॥ चुल धातु समुच्छ्रायमें है ॥ मूल धातु रोहणमें है ॥ कल और बिल धातु क्षेपणमें हैं ॥ बिल धातु भेदनमें है ॥ तिल धातु स्नेह करनेमें है । चल धातु भृतिमें है ॥ पाल धातु रक्षणमें है ॥ लूष धा हिंसामें है ॥ शुल्व और शूर्प धातु मानमें हैं॥चुट धातु छेदनमें है ॥ मुट धातु संचूर्णनमें है॥पडि और पसि धातु नाशनमें हैं । पण्डयति । पण्डति । पंसयति । पंसति॥व्रज धातु और मार्ग धातु संस्कारमें और गतिमें हैं॥शुल्क धातु अतिस्पर्शनमें है ॥ चपि धातु गतिमें है । चम्पयति । चम्पति ॥ क्षपि धातु क्षान्तिमें है ॥ क्षम्पयति । क्षम्पति ॥ लज धातु कष्टसे जीवन धारणमें है ॥ श्वर्त और श्वभ्र धातु गतिमें है ॥ ज्ञप धातु मित् हो । इस धातुका ज्ञान और ज्ञापनार्थ जानना ॥

२५६८ मितां ह्रस्वः । ६ । ४ । ९२ ॥

मितामुपधाया ह्रस्वः स्याण्णौ परे।ज्ञपयति ॥ ॥ १०७ ॥ यम च परिवेषणे ॥ चान्मित् । परिवेषणमिह वेष्टनम् । न तु भोजना नापि वेष्टना । यमयति चन्द्रम् । परिवेष्टत इत्यर्थः ॥ १०८ ॥ चह परिकल्पने ॥ चहयति । अचीचहत् । कथादौ वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौ न । अचचहत् ॥ चप इत्येके ॥ चपयति॥११०॥ रह त्याग इत्येके । अरीरहत् । कथादेस्तु अररहत् ॥ १११ ॥ बल प्राणने ॥ बलयति ॥ ११२ ॥ चिञ् चयने ॥

२५६८-णिच् परे रहते मित् धातुओंकी उपधाको ह्रस्व हो, ज्ञपयति ॥ यम धातु परिवेषणमें है । चकारसे यम धातु मित् हो । इस स्थलमें परिवेषण शब्दसे परिवेष्टन समझना । भोजन और वेष्टन नहीं ॥ यमयति-चन्द्रम्, अर्थात् चन्द्रको परिवेष्टन करताहै ॥ चह धातु परिकल्पनमें है । चहयति । अचीचहत् । कथादिमें वक्ष्यमाण चह धातुको तो अदन्तत्व होनेसे अग्लोपित्वके कारण दीर्घ और सन्वद्भाव नहीं होगा, जैसे-अचचहत् ॥ चप धातु भी उक्तार्थक है । चपयति ॥ रह धातु त्यागमें है, यह कोई २ कहतेहैं । अरीरहत् । कथादिका तो अररहत् ॥ बल धातु प्राणनमें है ॥ बलयति ॥ चिञ् धातु चयनमें है ॥

२५६९ चिस्फुरोर्णौ । ६ । १ । ५४ ॥

आत्वं वा स्यात् ॥

२५६९-णि परे रहते चि और स्फुर धातुको विकल्प करके आत्व हो ॥

२८७० अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ । ७ । ३ । ३६ ॥

चपयति । चययति । ञित्करणसामर्थ्यादस्य णिज्विकल्पः । चयते । प्रणिचयति । प्रनिचयति ॥ नान्ये मितोऽहेतौ ॥ अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः तेन शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न ॥ ११३ ॥ घट्ट चलने ॥ ११४ ॥ मुस्त सङ्घाते ॥ ११५ ॥ खट्ट संवरणे ॥ ११६ ॥ षट्ट स्फिट्ट चुबि हिंसायाम् ॥ ११९ ॥ पुल सङ्घाते ॥ १२० ॥ पूर्ण इत्येके ॥ पुणेत्यन्ये ॥ ॥ १२१ ॥ पुंस अभिवर्धने ॥ १२२ ॥ टकि बन्धने । टङ्कयति । टङ्कति ॥ १२३ ॥ धूस कान्तिकरणे ॥ धूसयति । दन्त्यान्तः । मूर्धन्यान्त इत्येके । तालव्यान्त इत्यपरे ॥ १२४ ॥ कीट वर्णे ॥ १२५ ॥ चूर्ण संकोचने ॥ १२६ ॥ पूज पूजायाम् ॥ १२७ ॥ अर्क स्तवने ॥ तपन इत्येके ॥ १२८ ॥ शुठ आलस्ये ॥ १२९ ॥ शुठि शोषणे ॥ शुण्ठयति । शुण्ठति ॥ १३० ॥ जुड प्रेरणे ॥ १३१ ॥ गज मार्ज शब्दार्थौ ॥ गाजयति । मार्जयति ॥ १३३ ॥ मर्च च ॥ मर्चयति ॥ ॥ १३४ ॥ घृ प्रस्रवणे ॥ स्रावण इत्येके ॥ १३५ ॥ पचि विस्तारवचने ॥ पञ्चयति । पञ्चति । पञ्चते इति व्यक्तार्थस्य शपि गतम् ॥ १३६ ॥ तिज निशाने ॥ तेजयति ॥ १३७ ॥ कृत संशब्दने ॥

२५७०—अर्ति, ह्री, व्ली, री, क्नूयी, क्ष्मायी और आकारान्त धातुओंके णि परे रहते पुक्का आगम हो, चपयति, चययति । ञित्करण सामर्थ्यके कारण इससे णिच् विकल्प होगा—चयते । प्रणिचयति, प्रनिचयति ।

"नान्ये मितोऽहेतौ" अहेतु अर्थात् स्वार्थिक णिच् परे रहते ज्ञपादि पांच धातुओंसे भिन्न धातु मित् न हो, इससे शमादि धातुओंको अमन्तत्व प्रयुक्त मित्त्व नहीं होगा ॥

घट्ट धातु चलनमें है ॥ मुस्त धातु संघातमें है ॥ खट्ट धातु संवरणमें है ॥ षट्ट, स्फिट्ट और चुबि धातु हिंसामें है ॥ पुल धातु समूहमें है । कोई २ पूर्ण धातु पढतेहैं । कोई २ पुण धातु कहतेहैं । पुंस धातु अभिवर्द्धनमें है ॥ टकि धातु बंधनमें है । टंकयति । टंकति ॥ धूस धातु कान्ति करनेमें है । धूसयति । यह धातु दन्त्य सकारान्त है । कोई २ कहतेहैं मूर्धन्य षकारान्त है । अन्य मतसे तालव्यान्त है ॥ कीट धातु वर्णमें है ॥ चूर्ण धातु संकोचनमें है ॥ पूज धातु पूजामें है ॥ अर्क धातु स्तवनमें है ॥ किसीके मतसे तपनार्थक है ॥ शुठ धातु आलस्यमें है ॥ शुठि धातु शोषणमें है । शुण्ठयति । शुण्ठति ॥ जुड धातु प्रेरणमें है ॥ गज और मार्ज धातु शब्दार्थक है । गाजयति । मार्जयति ॥ मर्च धातु भी उक्तार्थक है । मर्चयति ॥ घृ धातु प्रस्रवणमें है । किसीके मतसे स्रावणमें है ॥ पचि धातु विस्तार वचनमें है । पञ्चयति । (पञ्चते) ऐसा पद तो व्यक्तार्थक पचि धातुका शप्‌में कथित हुआ ॥ तिज धातु तीक्ष्णीकरणमें है । तेजयति ॥ कृत धातु संशब्दनमें है ॥

२८७१ उपधायाश्च । ७ । १ । १०१ ॥

धातोरुपधाभूतस्य ॠत इत्स्यात् रपरत्वम् । उपधायां चेति दीर्घः । कीर्तयति ॥ उक्कीर्तत् । अचीकृतत्—अचिकीर्तत् ॥ १३८ ॥ वर्ध छेदनपूरणयोः ॥ १३९ ॥ कुबि आच्छादने ॥ कुम्बयति ॥ कुभि इत्येके ॥ १४१ ॥ लुबि तुबि अदर्शने ॥ अर्दने इत्येके ॥ १४३ ॥ ह्लप व्यक्तायां वाचि ॥ क्लपेत्येके ॥ १४५ ॥ चुटि छेदने ॥ १४६ ॥ इल प्रेरणे ॥ एलयति । ऐलिलत् ॥ १४७ ॥ म्रक्ष म्लेच्छने ॥ १४८ ॥ म्लेच्छ अव्यक्तायां वाचि ॥ १४९ ॥ ब्रूस बर्ह हिंसायाम् ॥ १५१ ॥ केचिदिह गर्ज गर्द शब्दे, गर्ध अभिकाङ्क्षायामिति पठन्ति ॥ १५४ ॥ गुर्द पूर्वनिकेतने ॥ १५६ ॥ जसि रक्षणे ॥ मोक्षण इति केचित् । जंसयति । जंसति ॥ १५७ ॥ ईड स्तुतौ ॥ १५८ ॥ जसु हिंसायाम् ॥ १५९ ॥ पिडि सङ्घाते ॥ १६० ॥ रुष रोषे ॥ रुट इत्येके ॥ १६२ ॥ डिप क्षेपे ॥ १६३ ॥ ष्टुप समुच्छ्राये ॥ १६४ ॥

आकुस्मादात्मनेपदिनः ॥ कुस्मनाम्नो वेति वक्ष्यते तमभिव्याप्येत्यर्थः । अकर्तृगामिफलार्थमिदम् । चित सञ्चेतने ॥ चेतयते । अचीचितत ॥ १ ॥ दशि दंशने ॥ दंशयते । अददंशत । इदित्त्वाण्णिजभावे । दंशति । आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनैवेति व्याख्यातारः । नलोपे सञ्जिसाहचर्याद् भ्वादेरेव ग्रहणम् ॥ २ ॥ दसि दर्शनदंशनयोः ॥ दंसयते । दंसति । दसेत्यप्येके ॥ ४ ॥ डप डिप संघाते ॥ ६ ॥ तन्त्रि कुटुम्बधारणे । तन्त्रयते । चान्द्रास्तु धातुद्वयमिति मत्वा कुटुम्बयते इत्युदाहरन्ति ॥ ८ ॥ मन्त्रि गुप्तपरिभाषणे ॥ ९ ॥ स्पश ग्रहणसंश्लेषणयोः ॥ १० ॥ तर्ज भर्त्स तर्जने ॥ १२ ॥ बस्त गन्ध अर्दने ॥ बस्तयते । गन्धयते ॥ १४ ॥ विष्क हिंसायाम् ॥ हिष्केत्येके ॥ १६ ॥ निष्क परिमाणे ॥ १७ ॥ लल ईप्सायाम् ॥ १८ ॥ कूण संकोचने ॥ १९ ॥ तूण पूरणे ॥ २० ॥ भ्रूण आशाविशंकयोः ॥ २१ ॥

शठ श्लाघायाम् ॥ २२ ॥ यक्ष पूजायाम् ॥२३॥ स्यम वितर्के ॥ २४ ॥ गूर उद्यमने ॥ २५ ॥ शम लक्ष आलोचने ॥ नान्ये मित इति मित्त्वनिषेधः । शामयते ॥२७॥कुत्स अवक्षेपणे॥२८॥ त्रुट छेदने ॥ कुट इत्येके ॥ ३० ॥ गल स्रवणे ॥ ॥ ३१ ॥ भल आभण्डने ॥ ३२॥ कूट आप्रदाने॥ अवसादने इत्येके ॥ ३३ ॥ कुट्ट प्रतापने ॥३४॥ वञ्चु प्रलम्भने ॥ ३५॥ वृष शक्तिबन्धने । शक्तिबन्धनं प्रजननसामर्थ्यं शक्तिसंबन्धश्च । वर्षयते ॥ ३६ ॥ मद तृप्तियोगे ॥ मदयते ॥३७॥ दिवु परिकूजने ॥३८॥ गृ विज्ञाने । गारयते ॥३९॥ विद चेतनाख्याननिवासेषु ॥ वेदयते ॥ ४० ॥ सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् मान स्तम्भे ॥ मानयते ॥ ४१ ॥ यु जुगुप्सायाम् ॥ यावयते ॥ ४२ ॥ कुस्म नाम्नो वा ॥ कुस्मेति धातुः कुत्सितस्मयने वर्तते । कुस्मयते । अचुकुस्मत ॥ ४३ ॥ अथ वा कुस्मेति प्रातिपदिकं ततो धात्वर्थे णिच् ॥ इत्याकुस्मीयाः ॥

चर्च अध्ययने ॥१॥ बुक्क भाषणे ॥२॥ शब्द उपसर्गादाविष्कारे च ॥ चाद्भाषणे । प्रतिशब्दयति प्रतिश्रुतमाविष्करोतीत्यर्थः ॥ अनुपसर्गाच्च ॥ आविष्कार इत्येव । शब्दयति ॥ ३ ॥ कण निमीलने ॥ काणयति ॥ णौ चङ्युपधाया ह्रस्वः । काण्यादीनां वेति विकल्प्यते । अचीकणत् । अचकाणत् ॥ ४ ॥ जभि नाशने ॥ जम्भयति । जम्भति ॥५॥ षूद क्षरणे॥सूदयति। असूषुदत् ॥ ६ ॥ जसु ताडने ॥ जासयति । जसति ॥७॥ पश बन्धने ॥पाशयति ॥८॥ अम रोगे ॥ आमयति । नान्ये मित इति निषेधः। अम गत्यादौ शपि गतः । तस्माद्धेतुमण्णौ न कम्यमिचमामिति निषेधः । आमयति ॥ ९ ॥ चट स्फुट भेदने । विकासे शशपोः स्फुटति स्फोटते इत्युक्तम् ॥ ११ ॥ घट सङ्घाते । घाटयति ॥ ॥ १२ ॥ हन्त्यर्थाश्च ॥ नवगण्यामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्त इत्यर्थः ॥ दिवु मर्दने । उदित्त्वाद्देवतीत्यपि ॥ १३ ॥ अर्ज प्रतियत्ने ॥ अप्यमर्थान्तरेऽपि । द्रव्यमर्जयति॥१४॥ घुषिरविशब्दने ॥ घोषयति । घुषिरविशब्दन इति सूत्रेऽविशब्दन इति निषेधाल्लिङ्गादनित्योऽस्य णिच्। घोषति । इरित्त्वादङ्वा । अघुषत् । अघोषीत्। ण्यन्तस्य तु अजूघुषत् ॥ १५ ॥ आङः क्रन्दसातत्ये ॥ भौवादिकः क्रन्दधातुराह्वानाद्यर्थ उक्तः स एवाङ्पूर्वो णिचं लभते सातत्ये । आक्रन्दयति । अन्ये तु आङ्पूर्वो घुषिः क्रन्द सातत्ये इत्याहुः । आघोषयति ॥ ॥ १६ ॥ लस शिल्पयोगे ॥ १७ ॥ तसि भूष अलंकरणे । अवतंसयति । अवतंसति । भूषयति ॥१९॥ मोक्ष असने । मोक्षयति ॥२०॥ अर्ह पूजायाम् ॥ २१ ॥ ज्ञा नियोगे ॥ आज्ञापयति ॥ ॥ २२ ॥ भज विश्राणने ॥ २३ ॥ शृधु प्रसहने ॥ अशशर्धत्-अशीशृधत् ॥ २४ ॥ यत निकारोपस्कारयोः ॥ २५ ॥ रक लग आस्वादने ॥ रघ इत्येके ॥ रगेत्यन्ये ॥ २९ ॥ अञ्चु विशेषणे ॥ अञ्चयति । उदित्त्वमिड्विकल्पार्थम् । अत एव विभाषितो णिच् । अञ्चति । एवं शृधुजसु प्रभृतीनामपि बोध्यम् ॥ ३० ॥ लिगि चित्रीकरणे ॥ लिङ्गयति । लिङ्गति । ३१ ॥ मुद संसर्गे ॥ मोदयति सक्तून् घृतेन ॥ ३२ ॥ त्रस धारणे ॥ ग्रहण इत्येके । वारणे इत्यन्ये ॥३३॥ उध्रस उञ्छे । उकारो धात्ववयव इत्येके । नेत्यन्ये । ध्रासयति । उध्रासयति ॥ ३५ ॥ मुच प्रमोचने मोदने च ॥ ३६ ॥ वस स्नेहच्छेदापहरणेषु ॥ ३७ ॥ चर संशये ॥ ३८ ॥ च्यु सहने ॥ हसने चेत्येके । च्यावयति । च्युसेत्येके । च्योसयति ॥ ४० ॥ भुवोऽवकल्कने ॥ अवकल्कनं मिश्रीकरणमित्येके । चिन्तनमित्यन्ये । भावयति ॥ ४१ ॥ कृपेश्च । कल्पयति ॥४२॥

आस्वदः सकर्मकात् ॥ स्वदिमभिव्याप्य सम्भवत्कर्मभ्य एव णिच्। ग्रस ग्रहणे ॥ ग्रासयति फलम् ॥१॥ पुष धारणे ॥ पोषयत्याभरणम्॥२॥ दल विदारणे दालयति ॥ ३ ॥ पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि बृहि बर्ह बल्ह गुप धूप विच्छ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः ॥ पाटयति । पोटयति । लोटयति । तुञ्जयति । तुञ्जति । एवं परेषाम् । घाटयति । घण्टयति ॥

२५७१-धातुके उपधाभूत ऋकारके स्थानमें इत् हो रपरत्व होनेपर "उपधायाश्च २२६५" इस सूत्रसे दीर्घ होकर कीर्तयति । "उर्ऋत् २५६७" इस सूत्रसे उपधाभूत ऋवर्णके स्थानमें ऋत् होकर-अचीकृतत्, अचिकीर्तत् ॥ वर्ध धातु छेदन और पूरणमें है ॥ कुबि धातु आच्छादनमें है । कुम्ब-

यति। कोई कुभि धातु पढतेहैं, कुम्भयति ॥ छबि और तुबि धातु अदर्शनमें है। किसीके मतसे अर्दनमें है ॥ हप धातु स्पष्टवाक्य कथनमें है। कोई क्लप धातु पढतेहैं ॥ चुटि धातु छेदनमें है ॥ इल धातु प्रेरणमें है। प्रलयति । ऐलिलत् ॥ म्रक्ष धातु म्लेच्छनमें है ॥ म्लेच्छ धातु अव्यक्त शब्दमें है ॥ ब्रुस और बर्ह धातु हिंसामें है। कोई २ गर्ज और गर्द धातु शब्दमें और गर्ध धातु अभिकांक्षामें कहतेहैं ॥ गुर्द धातु पूर्वनिकेतनमें है ॥ जसि धातु रक्षण और किसीके मतसे मोक्षणमें है। जंसयति। जंसति ॥ ईड धातु स्तुतिमें है ॥ जसु धातु हिंसामें है ॥ पिडि धातु संघातमें है ॥ रुष धातु रोषमें है ॥ कोई रुठ धातु पढतेहैं ॥ डिप धातु क्षेपमें है ॥ स्तुप धातु समुच्छ्रायमें है।

अब कुस्म धातुतक आत्मनेपदी हैं, अर्थात् "कुस्मनाम्नो वा" यह पश्चात् वर्णित होगा वहां तक सम्पूर्ण धातु आत्मनेपदी हैं। यह अकर्तृगामि फलार्थ है।

चित धातु संचेतनमें है। चेतयते । अचीचितत् ॥ दशि धातु दंशनमें है। दंशयते । अददंशत् । इदित्वके कारण णिच्के अभाव पक्षमें, दंशति। व्याख्याकारोंके मतसे णिच् सन्नियोगसे ही कुस्म धातु पर्य्यन्त आत्मनेपद होगा इससे यहां आत्मनेपद नहीं हुआ ॥ नलोपशास्त्रमें सञ्जि धातुके साहचर्य्यसे भ्वादिगणीय धातुका ही ग्रहण है, इससे नलोप नहीं हुआ। दसि धातु दर्शन और दंशनमें है। दंसयते। दंसति। कोई २ कहते हैं, दस धातु है ॥ डप और डिप धातु संघातमें हैं ॥ तत्रि धातु कुटुम्बधारणमें है। तंत्रयते, चान्द्रनें तो यह दो धातु मान कर 'कुटुम्बयते' ऐसा उदाहरण दियाहै ॥ मत्रि धातु गुप्तपरिभाषणमें है ॥ स्पश धातु ग्रहण और संश्लेषणमें है ॥ तर्ज और भर्त्स धातु तर्जनमें है ॥ वस्त और गन्ध धातु अर्दनमें हैं। वस्तयते। गन्धयते ॥ विष्क धातु हिंसामें है। किसीके मतसे हिष्क धातु है ॥ निष्क धातु परिमाणमें है ॥ लल धातु ईप्सामें है ॥ कूण धातु संकोचमें है ॥ तूण धातु पूरणमें है ॥ भ्रूण धातु आशा और विशङ्कामें है ॥ शठ धातु श्लाघामें है ॥ यक्ष धातु पूजामें है स्यम धातु वितर्कमें है ॥ गूर धातु उद्यमनमें है ॥ शम और लक्ष धातु आलोचनमें है। "नान्ये मितः" इससे मित्त्वनिषेध हुआ। शामयते ॥ कुत्स धातु अवक्षेपणमें है ॥ त्रुट धातु छेदनमें है ॥ कोई कुट पढतेहैं ॥ गल धातु स्रवणमें है ॥ भल धातु आभण्डनमें है ॥ कूट धातु आप्रदानमें है ॥ किसीके मतसे अवसादनमें है ॥ कुट्ट धातु प्रतापनमें है ॥ वञ्चु धातु प्रलम्भनमें है ॥ वृष धातु प्रजनन सामर्थ्य, अर्थात् शक्तिबंधनमें है। वर्षयते ॥ मद धातु तृप्तियोगमें है। मदयते ॥ दिवु धातु परिकूजनमें है ॥ गृ धातु विज्ञानमें है। गारयते। विद धातु चेतना, आख्यान और विवासनमें है। वेदयते।

(कारिकाका अर्थ) "सत्ता अर्थमें दिवादिगणीय विद धातुके उत्तर श्यन् परे रहते विद्यते, ज्ञानार्थमें अदादिगणीय विद धातुके उत्तर शप्का लुक् होकर वेत्ति, विचारार्थमें रुधादिगणीय विद धातुके उत्तर श्नम् प्रत्यय होकर विन्ते, प्राप्ति, अर्थात् लाभार्थमें तुदादिगणीय विद धातुके उत्तर श होकर विन्दते और विन्दति पद क्रमसे सिद्ध है।

मान धातु स्तम्भमें है। मानयते ॥ यु धातु जुगुप्सामें है। यावयते ॥ "कुस्मनाम्नो वा" कुस्म धातु है कुत्सित हास्यमें है। कुस्मयते। अचुकुस्मत। अथवा कुस्म यह प्रातिपदिक है, उसके उत्तर धात्वर्थमें णिच् है ॥

आकुस्मीय धातु समाप्त हुए ॥

चर्च धातु अध्ययनमें है ॥ बुक्क धातु भाषणमें है ॥ शब्द धातु उपसर्गयुक्त होनेपर आविष्कार और चकारसे कथनमें है। प्रतिशब्दयति, अर्थात् प्रतिश्रुत विषयको आविष्कार करताहै। उपसर्गके उत्तर न होनेपर केवल आविष्कारार्थ ही समझना। शब्दयति ॥ कण धातु निमीलनमें है। काणयति । "णौ चङ्युपधाया ह्रस्वः १३१४" इससे ह्रस्व "काण्यादीनां वा" इस वार्त्तिकसे विकल्प करके होगा। इससे–अचीकणत्। अचकाणत् ॥ जभि धातु नाश करनेमें है। जम्भयति। जम्भति॥ षूद धातु क्षरणमें है । सूदयति । असूषुदत् ॥ जसु धातु ताडनमें है। जासयति। जसति ॥ पश धातु बंधनमें है। पाशयति। अम धातु रोगमें है । आमयति, यहां "नान्ये मितः०" इससे मित्त्व निषेध हुआ ॥ अम धातु गत्यादिमें शप्में कहचुकेहैं, उसके उत्तर हेतुमत् णिच् रहते "न कम्यमिचमाम्" इससे ह्रस्वनिषेध होकर 'आमयति' पद होगा ॥ चट और स्फुट धातु भेदनमें हैं। विकाशार्थमें श और शप्में स्फुटति । स्फोटते इस प्रकार कहा है ॥ घट धातु संघातमें है। घाटयति।

"हन्त्यर्थाश्च" नवगणीमें उक्त भी जो हन्त्यर्थक धातु, उससे स्वार्थमें णिच् हो ॥

दिवु धातु मर्दनमें है। उंकार इत् होनेके कारण 'देवति' पद भी होगा। अर्ज धातु प्रतियत्नमें है। यह धातु अन्यार्थमें भी प्रयुक्त होताहै, जैसे–द्रव्यमर्जयति ॥ घुषिर् धातु अविशब्दनमें है। घोषयति। "घुषिरविशब्दने २०६३" इस सूत्रमें 'अविशब्दने' ऐसे निषेधके कारण इसको नित्य णिच् नहीं होगा, घोषति । इर् इत् होनेके कारण विकल्प करके अङ् होगा, अघुषत्, अघोषीत् ॥ णिजन्त का तो 'अजूघुषत्' ऐसा होगा।

भ्वादिगणीय क्रन्द धातु आह्वानादि अर्थमें कहा गया है, वही सातत्यार्थमें आङ्पूर्वक होकर णिच्को लाभ करै। आक्रन्दयति । अन्य मतसे तो आङ्पूर्वक घुषि धातुसे क्रन्दसातत्य अर्थमें णिच् होगा। आघोषयति ॥ लस धातु शिल्पयोगमें है॥ तसि और भूष धातु अलंकरणमें है। अवतंसयति । अवतंसति। भूषयति ॥ अर्ह धातु पूजामें है ॥ ज्ञा धातु नियोगमें है। आज्ञापयति ॥ भज धातु वितरण करनेमें है ॥ शृधु धातु प्रहसनमें है। अशशर्द्धत्, अशीशृधत् ॥ यत धातु निकार और उपस्कारमें है ॥ रक और लग धातु आस्वादनमें है। कोई २ रघ धातु कहतेहैं। कोई २ रग धातु कहतेहैं ॥ अंचु धातु विशेषणमें है। अञ्चयति। उकार इत् होनेसे क्त्वा प्रत्ययसे होनेपर विकल्प करके इट् होगा. इसी कारण णिच् भी विकल्पसे होताहै। अञ्चति । इसी प्रकार शृधु, जसु आदि धातुओंके क्त्वा प्रत्ययमें रूप होंगे ॥ लिगि धातु चित्रीकरणमें है। लिङ्गयति, लिंगति ॥ मुद धातु संसर्गमें है। 'मोदयति सक्तून् घृतेन

त्रस धातु धारणमें किसीके मतसे ग्रहणमें है । अन्य मतसे वारणार्थमें है ॥ उध्रस धातु उञ्छमें है । कोई २ कहतेहैं, उकार धातुका ही अवयव है । अन्य मतसे ऐसा नहीं, उध्रासयति, ध्रासयति ॥ मुच धातु प्रमोचन और मोदनमें है।वस धातु स्नेह, छेद और अपहरणमें है ॥ चर धातु संशयमेंहै ॥ च्यु धातु सहनमें है । किसी २ के मतसे हसनमें है । च्यावयति । कोई २ च्युस धातु कहतेहैं । च्योसयति ॥

अवकल्कन, अर्थमें ही भू धातुके उत्तर णिच् हो ॥ कोई २ अवकल्कन शब्दका मिश्रीकरण और कोई २ चिन्तन अर्थ कहतेहैं । भावयति । कृप धातुसे भी अवकल्पनार्थमें णिच् हो—कल्पयति ॥

"आस्वदः सकर्मकात्" अर्थात् स्वदि धातु पर्यन्त सकर्मक धातुओंके ही उत्तर णिच् हो । ग्रस धातु ग्रहण करनेमें है । ग्रासयति फलम् ॥ पुष धातु धारणमें है । पोषयति आभरणम्। दल धातु विदारणार्थमें है । दालयति ॥ पट, पुट, लुट, तुजि, मिजि, पिजि, लुजि, भजि, लघि, त्रसि, पिसि, कुसि, दशि, कुशि, घट, घटि, बृहि, बर्ह, बल्ह, गुप, धूप, विच्छ, चीव, पुथ, लोकृ, लोचृ, णद, कुप, तर्क, वृतु और वृधु धातु भाषार्थक हैं । पाटयति । पोटयति । लोटयति । तुञ्जयति, तुञ्जति । इसी प्रकार अन्य धातुओंके भी रूप होंगे । घाटयति । घण्टयति ॥

२५७२ नाग्लोपिशास्वृदिताम्।७।४।२॥

णिच्यग्लोपिनः शास्तेर्ऋदितां च उपधाया ह्रस्वो न स्याच्चङ्परे णौ । अलुलोकत् । अलुलोचत् । वर्तयति । वर्धयति । उदित्त्वाद्वर्तति । वर्धति ॥ ३४ ॥ रुट लजि अजि दसि भृशि रुशि शीक नट पुटि जि चि रघि लघि अहि रहि महि च ॥ ४९ ॥ लडि तड नल च॥५२॥ पूरी आप्यायने ॥ ईदित्त्वं निष्ठायामिण्निषेधाय । अत एव णिज्वा । पूरयति । पूरति ॥५३ ॥ रुज हिंसायाम् ॥ ५४ ॥ ष्वद आस्वादने । स्वाद इत्येके ॥ असिष्वदत् । दीर्घस्य त्वषोपदेशत्वात् असिस्वदत् ॥ ५६ ॥ (इत्यास्वदीयाः)

आधृषाद्वा ॥ इत ऊर्ध्वं विभाषितणिचो धृषधातुमभिव्याप्य ॥ युज पृच संयमने । योजयति । योजति । अयौक्षीत् । पर्चयति । पर्चति । पर्चिता । अपर्चीत् ॥ २ ॥ अर्च पूजायाम् ॥ ॥ ३ ॥ षह मर्षणे ॥ साहयति । स एवायं नागः सहति कलभेभ्यः परिभवम् ॥ ४ ॥ ईर क्षेपे ॥ ५ ॥ ली द्रवीकरणे ॥ लाययति । लयति । लेता ॥ ६ ॥ वृजी वर्जने ॥ वर्जयति । वर्जति ॥ ७ ॥ वृञ् आवरणे ॥ वारयति । वरति । वरते । वरीता—वरिता ॥ ८ ॥ जॄ वयोहानौ । जारयति । जरति । जरीता—जरिता ॥ ९ ॥ ज्रि च ॥ ज्राययति । ज्रयति ॥ ज्रेता ॥ १० ॥ रिच वियोजनसम्पर्चनयोः ॥ रेचयति । रेचति । रेक्ता ॥ ११ ॥ शिष असर्वोपयोगे ॥ शेषयति । शेषति । शेष्टा । अशिक्षत् । अयं विपूर्वोऽतिशये ॥ १२ ॥ तप दाहे ॥ तापयति । तपति । तप्ता ॥ १३ ॥ तृप तृप्तौ ॥ सन्दीपने इत्येके । तर्पयति । तर्पति । तर्पिता ॥ १४ ॥ छृदी सन्दीपने ॥ छर्दयति । छर्दति । छर्दिता । छर्दिष्यति । सेसिचीति विकल्पो न । साहचर्यात्तत्र रौधादिकस्यैव ग्रहणात् ॥ १५ ॥ चृप छृप दृप सन्दीपन इत्येके ॥ चर्पयति । छर्पयति ॥ १८ ॥ दृभी भये । दर्भयति । दर्भति । दर्भिता ॥ १९ ॥ दृभ सन्दर्भे ॥ अयं तुदादावीदित् ॥ २० ॥ श्रथ मोक्षणे ॥ हिंसायामित्येके ॥ २१ ॥ मी गतौ ॥ माययति । मयति । मेता ॥ २२ ॥ ग्रन्थ बन्धने ॥ ग्रन्थयति । ग्रन्थति ॥ २३ ॥ शीक आमर्षणे ॥२४॥ चीक च ॥ २५ ॥ अर्द हिंसायाम् । स्वरितेत् । अर्दयति । अर्दति । अर्दते ॥ २६ ॥ हिसि हिंसायाम् ॥ हिंसयति । हिंसति । हिनस्तीति श्नमि गतम् ॥ २७ ॥ अर्ह पूजायाम् ॥ २८ ॥ आङः षद पद्यर्थे ॥ आसादयति । आसीदति । पाघ्रेति सीदादेशः । आसत्ता । आसात्सीत् ॥ २९ ॥ शुन्ध शौचकर्मणि ॥ शुन्धिता । अशुन्धीत् । अशुन्धिष्टाम् ॥ ३० ॥ छद अपवारणे । स्वरितेत् ॥ ३१ ॥ जुष परितर्कणे ॥ परितर्कणमूहो हिंसा वा ॥ परितर्पण इत्यन्ये । परितर्पणं परितृप्तिक्रिया । जोषयति । जोषति । प्रीतिसेवनयोर्जुषते इति तुदादौ ॥३२॥ धूञ् कम्पने ॥ णावित्यधिकृत्य ॥ धञ्प्रीञोर्नुग्वक्तव्यः ॥ * ॥ धूनयति । धवति । धवते । केचित्तु धूञ्प्रीणोरिति पठित्वा प्रीणातिसाहचर्याद्धुनातेरेव नुकमाहुः । धावयति ॥ ३३ ॥ अयं स्वादौ क्र्यादौ तुदादौ च । स्वादौ ह्रस्वश्च । तथा च कविरहस्ये॥

> धूनोति चम्पकवनानि धुनोत्यशोकं
> चूतं धुनाति धुवति स्फुटितातिमुक्तम् ॥
> वायुर्विधूनयति चम्पकपुष्परेणून्
> यत्कानने धवति चन्दनमञ्जरीश्च ॥ १ ॥

प्रीञ् तर्पणे ॥ प्रीणयति । धूञ्प्रीणोरिति हरदत्तोक्तपाठे तु । प्राययति । प्रयति । प्रयते ॥ ३४॥ श्रन्थ ग्रन्थ सन्दर्भे ॥ ३६ ॥ आप्लृ लम्भने ॥

आपयति । आपिपत् । आपति । आप्ता । आपत् । स्वरितेदयमित्येके । आपते ॥ ३७ ॥ तनु श्रद्धोपकरणयोः ॥ उपसर्गाच्च दैर्घ्ये ॥ तानयति । वितानयति। तनति। वितनति॥३८॥ चन श्रद्धोपहननयोरित्येके ॥ चानयति । चनति ॥ ३९ ॥ वद सन्देशवचने ॥ वादयति । स्वरितेत् । वदति । वदते । ववदतुः । ववदिथ । वद्यात् । अनुदात्तेदित्येके । ववदे ॥ ४० ॥ वच परिभाषणे । वाचयति । वचति । वक्ता । अवाक्षीत् ॥ ४१ ॥ मान पूजायाम् ॥ मानयति । मानति । मानिता । विचारणे तु भौवादिको नित्यसन्नन्तः । स्तम्भे–मानयते । इत्याकुस्मीयाः॥ मन्यते इति दिवादौ । मनुते इति तनादौ च ॥ ४२ ॥ भू प्राप्तावात्मनेपदी ॥ भावयते । भवते । णिच्सन्नियोगेनैवात्मनेपदमित्येके । भवति ॥४३॥ गर्ह विनिन्दने ॥४४॥ मार्ग अन्वेषणे ॥ ४५ ॥ कठि शोके ॥ उत्पूर्वोयमुत्कण्ठायाम्।कण्ठते इत्यात्मनेपदीगतः॥४६॥ मृजू शौचालंकारयोः । मार्जयति । मार्जति । मार्जिता–मार्ष्टा ॥ ४७ ॥ मृष तितिक्षायाम् । स्वरितेत् । मर्षयति । मर्षति । मर्षते । मृष्यति मृष्यते इति दिवादौ॥ सेचने शपि मर्षति॥४८॥ धृष प्रसहने॥धर्षयति।धर्षति।४९।इत्याधृषीयाः॥

अथादन्ताः ॥ कथ वाक्यप्रबन्धे ॥ अल्लोपस्य स्थानिवद्भावान्न वृद्धिः । कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ । अचकथत् ॥ १ ॥ वर ईप्सायाम् ॥ वरयति । वारयतीति गतम् ॥ २ ॥ गण संख्याने ॥ गणयति ॥

२५७२–णिच् परे अग्लोपि, शास् और ऋकारान्त धातुकी उपधाको चङ् परे रहते ह्रस्व न हो, अलुलोकत् । अलुलोचत् । वर्तयति । वर्द्धयति । उकारकी इत्संज्ञा होनेके कारण, वर्त्तति । वर्धति ॥ रुट, लजि, अजि, दसि, भृशि, रुशि, शीक, नट, पुटि, जिवि, रघि, लघि, अहि, रहि, महि, लडि तड और नल धातु भाषार्थक हैं ॥ पूरी धातु आप्यायनमें है । निष्ठामें इट् निषेधके निमित्त ईदित्व है, इसी कारण विकल्प करके णिच् होगा, पूरयति, पूरति ॥ रुज धातु हिंसामें है ॥ ष्वद धातु आस्वादनमें है । कोई स्वाद धातु कहतेहैं । असिष्वदत् । दीर्घका तो षोपदेश न होनेसे षत्व न होगा । असिस्वदत् ॥

"आधृषाद्वा" यहांसे युज धातुतक विकल्प करके णिच् हो। युज और पृच धातु संयमनमें है । योजयति, योजति । अयौक्षीत् ॥ पर्चयति, पर्चति । पर्चिता । अपर्चीत् ॥ अर्च धातु पूजामें है ॥ षह धातु मर्षणमें है । साहयति । 'स एवायं नागः

"णौ च संश्चङोः २६०१, २५७९" इन दो सूत्रोंसे इङ् धातुके स्थानमें गाङ् आदेश और श्वि धातुको विकल्प करके सम्प्रसारण हुआ-अधिजिगापयिषति। अध्यापिपयिषति। शिश्वाययिषति। शुशावयिषति। "ह्वः सम्प्रसारणम्२५८६" इस सूत्रसे सम्प्रसारण हुआ-जुहावयिषति। णिच् परे द्वित्वके पूर्वमें अच् स्थानिक आदेश न हो, ऐसा पहले कहचुकाहूं इससे उकारको द्वित्व हुआ। पुस्फारयिषति। चुक्षावयिषति॥

"ओः पुयण्ज्यपरे २५७७" इस सूत्रसे अभ्यासके उकारके स्थानमें इकार हुआ। पिपावयिषति। यियावयिषति। बिभावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। पवर्ग यण् और जकार कहनेसे 'ननावयिषति' इस स्थलमें इत्व नहीं हुआ। अवर्ण परे न होनेपर इत्व नहीं होगा-बुभूषति॥ "स्रवति० २५७८" इस सूत्रसे अभ्याससम्बन्धीय उकारको विकल्प करके इत्व हुआ-सिस्रावयिषति। सुस्रावयिषति-इत्यादि। इस सूत्रसे जो इत्व वह भी अवर्ण परे ही होगा, अन्यत्र नहीं, इससे यहां नहीं हुआ-शुश्रूषते॥

२६२७ स्तौतिण्योरेव षण्यभ्यासात्। ८। ३। ६१॥

अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्षभूते सनि नान्यस्य। तुष्टूषति। द्युतिस्वाप्योरित्युत्त्वम्। सुष्वापयिषति। सिषाधयिषति। स्तौतिण्योः किम्। सिसिक्षति। उपसर्गात्तु स्थादिष्वभ्यासेन चेति षत्वम्। परिषिषिक्षति। षणि किम्। तिष्ठासति। सुषुप्सति। अभ्यासादित्युक्तेर्नेह निषेधः। प्रतीषिषति। इक्। अधीषिषति॥

२६२७-षत्व हुआहै जिसके ऐसे सन् परे रहते अभ्याससम्बन्धीय इण्के परे स्थित स्तु धातु और ण्यन्त धातुके सकारको षत्व हो, अन्यत्र न हो। तुष्टूषति। "द्युतिस्वाप्योः २३४४" इस सूत्रसे उकार हुआ। सुष्वापयिषति। सिषाधयिषति।

स्तु धातु और ण्यन्त धातु भिन्न धातु होनेपर सिसिक्षति। उपसर्गके परे होनेपर "स्थादिष्वभ्यासेन २२७७" इस सूत्रसे षत्व होगा-परिषिषिक्षति।

षत्व हुआ हो ऐसा सन् परे न रहते तिष्ठासति, सुषुप्सति, इस प्रकार होगा॥

'अभ्यासात्' ऐसा कहनेसे इस सूत्रसे इस स्थलमें षत्वनिषेध नहीं होगा। इण् धातु-प्रतीषिषति। इक् धातु-अधीषिषति॥

२६२८ सः स्विदिस्वदिसहीनां च। ८। ३। ६२॥

अभ्यासेणः परस्य ण्यन्तानामेषां सस्य स एव न षः षणि परे। सिस्वेदयिषति। सिस्वादयिषति। सिसाहयिषति। स्थादिष्वेवाभ्यासस्येति नियमान्नेह। अभिसुसूषति॥

शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः। सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते॥

शैषिकाच्छैषिकः सरूपो न । तेन शालीये भव इति वाक्यमेव न तु छान्ताच्छः । सरूपः किम् । अहिच्छत्रे भव आहिच्छत्रः । आहिच्छत्रे भव आहिच्छत्रीयः अण्णन्ताच्छः । तथा मत्वर्थात्सरूपः स न । धनवानस्यास्ति । इह मतुबन्तान्मतुप् न । विरूपस्तु स्यादेव । दण्डिमती शाला । सरूप इत्यनुषज्यते । अर्थद्वारा सादृश्यं तस्यार्थः तेन इच्छासन्नन्तादिच्छासन्न । स्वार्थसन्नन्तात्तु स्यादेव । जुगुप्सिषते । मीमांसिषते ॥

॥ इति सन्नन्तप्रक्रिया ॥

२६२८–जिसे षत्व हुआ है, ऐसा सन् परे रहते अभ्याससम्बन्धीय इण्के उत्तर स्थित ण्यन्त स्विद्, स्वद और सह धातुके सकारको षत्व न हो । सिस्वेदयिषति । सिस्वादयिषति। सिसाहयिषति । स्थादि धातुओंके ही अभ्यासको षत्व हो, इस नियमके कारण 'अभिसुसूषति' यहां षत्व नहीं हुआ ॥

अब कारिकाकी व्याख्या करतेहैं–

शैषिक प्रत्ययके उत्तर स्वरूप शैषिक प्रत्यय न हो, उससे यह हुआ कि, 'शालीये भवः' इस स्थलमें वाक्यमात्र ही रहेगा, किन्तु छ प्रत्ययके उत्तर छ प्रत्यय नहीं होगा । सरूप ग्रहण करनेसे 'अहिच्छत्रे भवः=आहिच्छत्रः, आहिच्छत्रे भवः आहिच्छत्रीयः' इस स्थानमें अण् प्रत्ययान्तके उत्तर छ हुआ है । इसी प्रकार मत्वर्थीय प्रत्ययान्तके उत्तर सरूप मत्वर्थीय नहीं हो, इससे धनवानस्यास्ति–इस स्थलमें मतुप् प्रत्ययान्तके उत्तर मतुप् नहीं हुआ । यदि मत्वर्थीय विरूप अर्थात् विभिन्नरूप हो तो उसके उत्तर मतुप् होगा–दण्डिमती शाला । सरूप शब्दसे सदृरूप पदका सबके साथ अन्वय होगा । सरूप शब्दसे सदृशार्थक समझना । इसी कारण इच्छार्थक सन्नन्तके उत्तर फिर सरूप इच्छार्थक सन् नहीं होगा, किन्तु स्वार्थ सन्नन्तके उत्तर इच्छार्थक सन् होगा । जुगुप्सिषते । मीमांसिषते ॥

॥ इति सन्नन्तप्रकरणम् ॥

अथ यङन्तप्रक्रिया ।

२६२९ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् । ३ । १ । २२ ॥

पौनःपुन्यं भृशार्थश्च क्रियासमभिहारस्तस्मिन् द्योत्ये यङ् स्यात् ॥

२६२९–क्रियासमभिहार अर्थात् पौनःपुन्य और भृशार्थ होनेपर एकाच् हलादि धातुके उत्तर यङ् हो ॥

२६३० गुणो यङ्लुकोः । ७ । ४ । ८२ ॥

अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च । ङिदन्तत्वादात्मनेपदम् । सनाद्यन्ता इति धातुत्वाल्लडादयः । पुनःपुनरतिशयेन वा भवति बोभूयते । बोभूयांचक्रे । अबोभूयिष्ट । धातोः किम् । आर्धधातुकत्वं यथा स्यात् । तेन ब्रुवो वचिरित्यादि। एकाचः किम्। पुनःपुनर्जागर्ति । हलादेः किम् । भृशमीक्षते । भृशं शोभते, रोचते इत्यत्र यङ्नेति भाष्यम् । पौनःपुन्ये तु स्यादेव । रोरुच्यते । शोशुभ्यते ॥ सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः ॥ * ॥ आद्यास्त्रयश्चुरादावदन्ताः ॥ सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते।अनेकाच्त्वेनाषोपदेशत्वात्षत्वं न॥

२६३०–यङ् और यङ्लुक् परे रहते धातुसंबन्धीय अभ्यासको गुण हो ।"सनाद्यन्ता० २६०४"इस सूत्रसे धातुत्व सिद्ध होनेपर उसके उत्तर लट् आदि प्रत्यय प्रयुक्त होंगे । ङिदन्तत्वके कारण आत्मनेपदी होंगे । पुनःपुनः अतिशयेन वा भवति=बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट । धातुके उत्तर, ऐसा कहनेसे यङ्को आर्धधातुकत्व हुआ, उससे यह फल हुआ कि, ब्रू धातुके स्थानमें वच आदेश (२४५३) इत्यादि कार्य्य होगा ।

एकाच् कहनेसे 'पुनःपुनर्जागर्ति' इस स्थलमें यङ् नहीं हुआ । हलादि कहनेसे 'भृशम् ईक्षते, भृशं शोभते, रोचते' इन स्थलोंमें यङ् नहीं हो यह भाष्यमें लिखा है, किन्तु पौनःपुन्यार्थमें यङ् होगा–रोरुच्यते । शोशुभ्यते ॥

सूच, सूत्र, मूत्र, अट, ऋ, अश, ऊर्णु–इत्यादि धातुओंके उत्तर यङ् हो * । प्रथम तीन धातु चुरादिगणमें अकारान्त निर्दिष्ट हुए हैं । सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते अनेकाच्त्वके कारण षोपदेश होताहै, इस कारण षत्व नहीं होगा ॥

२६३१ यस्य हलः । ६ । ४ । ४९ ॥

यस्येति संघातग्रहणम् । हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके । आदेः परस्य । अतो लोपः । सोसूचांचक्रे । सोसूचिता । सोसूत्रिता । मोमूत्रिता ॥

२६३१–'यस्य' इस पदसे संघात अर्थात् अकार सहित यकारका ग्रहण है, आर्धधातुकसंज्ञक प्रत्यय परे रहते हल्के परे 'य' शब्दका लोप हो । "आदेः परस्य ४४" इस सूत्रसे 'य्' का लोप हुआ, "अतो लोपः२३०८" इस सूत्रसे अकारका लोप हुआ । सोसूचाञ्चक्रे । सोसूचिता । सोसूत्रिता । मोमूत्रिता ॥

२६३२ दीर्घोऽकितः । ७ । ४ । ८३ ॥

अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च । अटाट्यते ॥

२६३२–अकित् अर्थात् जिसकी कित् संज्ञा नहीं ऐसे अभ्यासको दीर्घ हो यङ् और यङ्लुक् परे रहते । अटाट्यते ॥

२६३३ यङि च । ७ । ४ । ३० ॥

अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि ।

यकारपररेफस्य न द्वित्वनिषेधः । अरार्यते इति भाष्योदाहरणात् । अरारिता । अशाशिता । ऊर्णोनूयते । बेभिद्यते । अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः । बेभिदिता । सासद्यते ॥

२६३३-यङ् परे रहते ऋ धातुको और संयोगादि ऋकारान्त धातुको गुण हो । यकार परे रहते पूर्ववर्त्ती रकारको द्वित्वनिषेध नहीं हो,कारण कि,'अरार्यते'ऐसा उदाहरण भाष्यमें कहाहै । अरारिता । अशाशिता । ऊर्णोनूयते । बेभिद्यते । अकारलोपके स्थानिवत्वके कारण उपधाको गुण नहीं होगा-बेभिदिता ॥

२६३४ नित्यं कौटिल्ये गतौ ।३।१।२३॥

गत्यर्थात् कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे । कुटिलं व्रजति वाव्रज्यते ॥

२६३४-गत्यर्थ धातुके उत्तर कौटिल्यार्थमें ही यङ् हो क्रियासमभिहारमें न हो । कुटिलं व्रजति=वाव्रज्यते ॥

२६३५ लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् । ३ । १ । २४ ॥

एभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हितं लुम्पति लोलुप्यते । सासद्यते ॥

२६३५-भावगर्हा अर्थात् धात्वर्थ निन्दा होनेपर लुप,सद, चर, जप, जभ, दह, दश और गॄ धातुके उत्तर यङ् हो । गर्हितं लुम्पति लोलुप्यते । सासद्यते ॥

२६३६ चरफलोश्च । ७ । ४ । ८७ ॥

अनयोरभ्यासस्यातो नुक् स्याद्यङ्यङ्लुकोः नुगित्यनेनानुस्वारो लक्ष्यते ॥ स च पदान्तवद्वाच्यः ॥*॥ वा पदान्तस्येति यथा स्यात् ॥

२६३६-यङ् और यङ्लुक् परे रहते चर और फल धातुके अभ्यासके अकारको नुक् हो । नुक् पदसे अनुस्वार लक्षित होताहै ।

वह अनुस्वार पदान्तवत् हो * इस कारण"वा पदान्तस्य १२५" इस सूत्रकी प्रवृत्ति होगी ॥

२६३७ उत्परस्यातः । ७।४।८८॥

चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्यङ्लुकोः । हलि चेति दीर्घः । चञ्चूर्यते-चंचूर्यते । पम्फुल्यते-पंफुल्यते ॥

२६३७-यङ् और यङ्लुक् परे रहते चर और फल धातुके अभ्यासके अकारके स्थानमें उत् हो । " हलि च ३५४" इस सूत्रसे इस उकारको दीर्घ होकर-चञ्चूर्यते, चंचूर्यते । पम्फुल्यते, पंफुल्यते ॥

२६३८ जपजभदहदशभञ्जपशां च । ७ । ४ । ८६ ॥

एषामभ्यासस्य नुक् स्याद्यङ्यङ्लुकोः । गर्हितं जपति जञ्जप्यते इत्यादि ॥

२६३८-यङ् और यङ्लुक् परे रहते जप, जभ, दह, दश, भञ्ज और पश धातुके अभ्यासको नुक्का आगम हो, गर्हितं जपति=जञ्जप्यते, इत्यादि ॥

२६३९ ग्रो यङि । ८ । २ । २० ॥

गिरते रेफस्य लत्वं स्याद्यङि । गर्हितं गिलति जेगिल्यते । घुमास्थेतीत्वम् । गुणः । देदीयते । पेपीयते । सेषीयते । विभाषा श्वेः । शोशूयते-शेश्वीयते । यङि च । सास्मर्यते । रीङ् ऋतः । चेक्रीयते । सुट् । सञ्चेस्क्रीयते ॥

२६३९-यङ् परे रहते गृ धातुके रकारके स्थानमें लकार हो, गर्हितं गिलति=जेगिल्यते । " घुमास्था० २४६२ " इस सूत्रसे ईकार और अभ्यास ईकारको गुण होकर-देदीयते । पेपीयते । सेषीयते । " विभाषा श्वेः २४२० " इस सूत्रसे विकल्प करके सम्प्रसारण होकर-शोशूयते, शेश्वीयते । "यङि च २६३३ " इस सूत्रसे गुण होकर-सास्मर्य्यते । " रीङ् ऋतः १२३४ " इस सूत्रसे रीङ् आदेश होकर-चेक्रीयते । सुट् आगम होकर-सञ्चेस्क्रीयते ॥

२६४० सिचो यङि ।८ । ३।११२॥

सिचः सस्य षो न स्याद्यङि । निसेसिच्यते ॥

२६४०-यङ् परे रहते सिच् धातुके सकारको षत्व न हो, निसेसिच्यते ॥

२६४१ न कवतेर्यङि । ७।४। ६३॥

कवतेरभ्यासस्य चुत्वं न स्याद्यङि । कोकूयते । कौतिकुवत्योस्तु चोकूयते ॥

२६४१-यङ् परे रहते कु धातुके अभ्यासको चुत्व अर्थात् कके स्थानमें च न हो । कोकूयते । ' कौति, कुवति ' अर्थात् अदादि तुदादि गणीय कु धातुके अभ्यास कके स्थानमें च होगा, चोकूयते ॥

२६४२ नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् । ७ । ४ । ८४ ॥

एषामभ्यासस्य नीगागमः स्याद्यङ्यङ्लुकोः अकित इत्युक्तेर्न दीर्घः । नलोपः । वनीवच्यते । सनीस्रस्यत इत्यादि ॥

२६४२-यङ् और यङ्लुक् परे रहते वञ्चु, स्रंसु, ध्वंसु, भ्रंसु, कस, पत, पद और स्कन्द धातुके अभ्यासको नीक्का आगम हो । " दीर्घोऽकितः " इस सूत्रमें अकित् पदका ग्रहण करनेसे इस स्थलमें दीर्घ नहीं होगा । नकारका लोप होकर-वनीवच्यते । सनीस्रस्यते, इत्यादि ॥

२६४३ नुगतोऽनुनासिकान्तस्य । ७ । ४ । ८५ ॥

अनुनासिकान्तस्याङ्गस्य योऽभ्यासो दन्तस्तस्य नुक् स्यात् । नुकानुस्वारो लक्ष्यत इत्युक्तम् । यँयम्यते-यंयम्यते । तपरत्वसामर्थ्याद् भूतपूर्व-

दीर्घस्यापि न । भाम क्रोधे । बाभाम्यते । ये विभाषा । जाजायते-जञ्जन्यते । हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः ॥ * ॥ जेघ्नीयते । हिंसायां किम् । जंघन्यते ॥

२६४३-यङ् और यङ्लुक् परे रहते अनुनासिकवर्णान्त अङ्गका जो अकारान्त अभ्यास, उसको नुक्का आगम हो । इस स्थलमें नुक् आगमसे अनुस्वार लक्षित होताहै । यँयम्यते, यंयम्यते । तपरत्वसामर्थ्यके कारण भूतपूर्व दीर्घको भी न होगा, जैसे-क्रोधार्थक भाम धातुका बाभाम्यते । "ये विभाषा २३१९" इस सूत्रसे जन धातुको विकल्प करके आत्व होकर-जाजायते, जञ्जन्यते ।

हिंसार्थमें हन् धातुके स्थानमें यङ् परे रहते घ्नी आदेश हो * जेघ्नीयते । हिंसाभिन्नार्थमें घ्नी आदेश नहीं होकर-जंघन्यते ॥

२६४४ रीगृदुपधस्य च ।७।४।९०॥

ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्यङ्लुकोः । वरीवृत्यते । क्षुभ्नादित्वान्न णः । नरीनृत्यते । जरीगृह्यते । उभयत्र लत्वम् । चलीक्लृप्यते ॥ रीगृत्वत इति वक्तव्यम् ॥ * ॥ वरीवृश्च्यते । परीपृच्छ्यते ॥

२६४४-यङ् और यङ्लुक् परे रहते ऋकारोपध धातुके अभ्यासको रीक्का आगम हो, वरीवृत्यते । क्षुभ्नादित्वके कारण नकारको णत्व नहीं होकर-नरीनृत्यते । जरीगृह्यते । क्लृप् धातुके अभ्यास और धातुसम्बन्धी दोनों रेफके स्थानमें लकार होकर-चलीक्लृप्यते ।

ऋकारविशिष्टधातुके अभ्यासको रीक्का आगम हो * ऐसा कहना चाहिये । वरीवृश्च्यते । परीपृच्छ्यते ॥

२६४५ स्वपिस्यमिव्येञां यङि । ६ । १ । १९ ।

सम्प्रसारणं स्याद् यङि । सोषुप्यते । सेसिम्यते । वेवीयते ॥

२६४५-यङ् प्रत्यय परे रहते स्वप, स्यम और व्येञ् धातुको सम्प्रसारण हो, सोषुप्यते । सेसिम्यते । वेवीयते ॥

२६४६ न वशः । ६ । १ । २० ॥

वावश्यते ॥

२६४६-यङ् परे रहते वश धातुको सम्प्रसारण न हो, वावश्यते ॥

२६४७ चायः की । ६ । १ । २१॥

चेकीयते ॥

२६४७-यङ् परे रहते चाय धातुके स्थानमें की आदेश हो, चेकीयते । की ऐसा दीर्घ उच्चारण यङ्लुगर्थ है, इसी कारण "न लुमताङ्गस्य" यह निषेध भी प्रवृत्त नहीं होकर की आदेश यङ्लुक्में होताही है, चेकीतः ॥

२६४८ ई घ्राध्मोः । ७ । ४ । ३१ ॥

जेघ्रीयते । देध्मीयते ॥

२६४८-यङ् परे घ्रा और ध्मा धातुके आकारके स्थानमें ईकार हो, जेघ्रीयते । देध्मीयते ॥

२६४९ अयङ्यि क्ङिति ।७।४।२२॥

शीङोऽयङादेशः स्याद्यादौ क्ङिति परे । शाशय्यते । अभ्यासस्य ह्रस्वः । ततो गुणः । ढोढौक्यते । तोत्रौक्यते ॥ * ॥

॥ इति यङन्तप्रक्रिया ॥

२६४९-यकारादि कित्, ङित् प्रत्यय परे रहते शीङ् धातुको अयङ् आदेश हो, शाशय्यते । अभ्यासको ह्रस्व पश्चात् गुण होकर-डोढौक्यते । तोत्रौक्यते ॥

॥ इति यङन्तप्रकरणम् ॥

अथ यङ्लुगन्तप्रक्रिया ।

२६५० यङोऽचि च । २ । ४।७४ ॥

यङोऽच्प्रत्यये लुक् स्याच्चकारात्तं विनापि बहुलं लुक् स्यात् । अनैमित्तिकोऽयम् । अन्तरङ्गत्वादादौ भवति । ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वम् । अभ्यासकार्यम् । धातुत्वाल्लडादयः । शेषात्कर्तरीति परस्मैपदम् । अनुदात्तङित इति तु न । ङित्त्वस्य प्रत्ययाऽप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः । यत्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत् । अत एव सुदृषत्प्रासाद इत्यत्राऽत्वसन्तस्येति दीर्घो न । येऽपि स्पर्धशीङादयोऽनुदात्तङितस्तेभ्योऽपि न । अनुदात्तङितः इत्यनुबन्धनिर्देशात् । तत्र च श्तिपा शपेति निषेधात् । अत एव श्यन्नादयो न । किंतु शबेव । चर्करीतं चेत्यगणेन निर्देशात् । किंतु शबेव । चर्करीतं चेत्य-

दादौ पाठाच्छपो लुक् ॥

२६५०-अच् प्रत्यय परे रहते यङ्का लुक् हो और चकारनिर्देशसे अच् प्रत्यय परे न रहते भी बहुल करके लुक् हो, यह यङ्लुक् अनैमित्तिक है, अत एव अन्तरङ्गत्वके कारण पहिले ही लुक् होगा, पश्चात् प्रत्ययलक्षणसे यङन्तत्वके कारण द्वित्व, अभ्यासकार्य्य और धातुत्व होनेसे उसके उत्तर लडादि प्रत्यय होंगे । "शेषात् कर्त्तरि० २१५९" इस सूत्रसे परस्मैपद होगा । "अनुदात्तङितः २१५७" इस सूत्रसे ङित्त्वके प्रत्यय और अप्रत्यय साधारण होनेसे प्रत्ययलक्षणकी अप्रवृत्तिके कारण आत्मनेपद नहीं होगा, कारण कि, जिस स्थलमें प्रत्ययका असाधारणरूप आश्रित होताहै, उसी स्थलमें प्रत्ययलक्षणकी प्रवृत्ति होताहै अत एव 'सुदृषत्प्रासादः' इस स्थलमें "अत्वसन्तस्य०४२५" इस सूत्रसे सुदृषत् शब्दके उत्तर जसको प्रत्ययलक्षण करके दीर्घ नहीं होताहै । जो भी स्पर्द्ध

और शीङ् आदि अनुदात्तेत् और ङित् धातु हैं उनके उत्तर भी आत्मनेपद नहीं होगा, क्योंकि, "अनुदात्तङितः० २१५७" इस सूत्रमें अनुबंधनिर्देशके कारण "श्तिपा श-पा०" इस परिभाषासे निषेध होजाताहै, अत एव उस स्थलमें गणनिर्देशके कारण श्यन् आदि प्रत्यय न होकर शप् ही होताहै। "चर्करीतञ्च" इसको अदादिगणमें पाठके कारण शप्का लुक् होगा।

२६५१ यङो वा । ७ । ३ । ९४ ॥

यङन्तात्परस्य हलादेः पितः सार्वधातुकस्य ईड्वा स्यात्। भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न। बोभूतु तेतिक्ते इति छन्दसि निपातनात्। अत एव यङ्लुग्भाषायामपि सिद्धः। न च यङ्लुक्यप्राप्त एव गुणाभावो निपात्यतामिति वाच्यम्। प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणात्। द्विः प्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्तात्। बोभवीति-बोभोति। बोभूतः। बोभुवति। बोभवांचकार। बोभविता।अबोभवीत्-अबोभोत्। अबोभूताम्। अबोभवुः। बोभूयात्। बोभूयाताम्। बोभूयास्ताम्। गातिस्थेति सिचो लुक्। यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक्। अबोभूवीत्-अबोभोत्। अबोभूताम्। अभ्यस्ताश्रयो जुस्। नित्यत्वाद्वुक्। अबोभूवुः। अबोभविष्यदित्यादि। पास्पर्धीति-पास्पर्धि। पास्पर्धः। पास्पर्धति। पास्पर्त्सि। झषस्तथोर्धोऽधः। पास्पर्धि। लङ्। अपास्पर्त्-अपास्पर्द्। सिपि दश्चेति रुत्वपक्षे। रो रि। अपास्पाः। जागाद्धि। जागात्सि। अजागात्। सिपि रुत्वपक्षे। अजागाः। नाथृ। नानात्ति। नानात्तः। दध। दादद्धि। दादद्धः। दाधत्सि। अदाधत्। अदादद्धाम्। अदादधुः। अदाधः-अदाधत्। लुङि। अदादाधीत्-अदादधीत्। चोस्कुन्दीति-चोस्कुन्ति।अचोस्कुन्। अचोस्कुन्ताम्। अचोस्कुन्दुः। मोमुदीति-मोमोत्ति। मोमोदांचकार। मोमोदिता। अमोमुदीत्-अमोमोत्। अमोमुत्ताम्। अमोमुदुः। अमोमुदीः-अमोमोः-अमोमोत्। लुङि गुणः। अमोमोदीत्। चोकूर्दीति। चोकूर्ति। लङ् तिप्। अचोकूर्दीत्। अचोकूर्त्। सिप्पक्षे। अचोकूः। अचोकूः। अजोगूः। वनीवञ्चीति-वनीवङ्क्ति। वनीवक्तः। वनीवचति। अवनीवञ्चीत्। अवनीवन्। जङ्गमीति-जङ्गन्ति। अनुदात्तोपदेशेत्यनुनासिकलोपः। जङ्गतः। जङ्गमति। म्वोश्च। जङ्गन्मि। जङ्गन्वः। एकाज्ग्रहणोक्तत्वान्नेण्निषेधः। जङ्गमिता। अनुनासिकलोपस्याभीयत्वेनासिद्धत्वान्न हेर्लुक्। जङ्गहि। मो नो धातोः। अजङ्गन्। अनुबन्धनिर्देशान्न च्लेरङ्। ह्म्यन्तेति न वृद्धिः। अजंगमीत्। अजंगमिष्टाम्। हन्तेर्यङ्लुक्। अभ्यासाच्चेति कुत्वं यद्यपि होहन्तेरित्यतो हन्तेरित्यनुवर्त्य विहितं तथापि यङ्लुकि भवत्येवेति न्यासकारः। श्तिपा शपेति निषेधस्त्वनित्यः। गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भावः। जङ्घनीति-जङ्घन्ति। जङ्घतः। जङ्घ्नति। जङ्घनिता। श्तिपा निर्देशाज्जादेशो न। जङ्घहि। अजङ्घनीत्-अजङ्घन्। जङ्घन्यात्। आशिषि तु। वध्यात्। अवधीत्। अवधिष्टामित्यादि। वधादेशस्य द्वित्वं न भवति स्थानिवत्त्वेनानभ्यासस्येति निषेधात्। तद्धि समानाधिकरणं धातोर्विशेषणं बहुव्रीहिबलात्। आङ्पूर्वात्तु आङो यमहन इत्यात्मनेपदम्। आजङ्घते इत्यादि। उत्परस्येति तपरत्वान्न गुणः। हलि चेति दीर्घस्तु स्यादेव। तस्यासिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात्। चञ्चुरीति-चञ्चूर्ति। चञ्चूर्त्तः। चञ्चुरति। अचञ्चुरीत्-अचञ्चूः। चङ्खनीति-चङ्खन्ति। जनसनेत्यात्वम्। चङ्खातः। गमहनेत्युपधालोपः।चङ्खनति।चङ्खहि।चङ्खनानि। अचङ्खनीत्-अचङ्खन्। अचङ्खाताम्।अचङ्खनुः। ये विभाषा। चङ्खायात्। चङ्खन्यात्। अचङ्खानीत्। अचङ्खनीत्। उतो वृद्धिरित्यत्र नाभ्यस्तस्येत्यनुवृत्तेरुतो वृद्धिर्न। योयोति-योयवीति। अयोयवीत्। अयोयोत्। योयुयात्। आशिषि दीर्घः। योयूयात्। अयोयावीत्। नोनवीति-नोनोति। जाहेति-जाहाति। ई हल्यघोः। जाहीतः। इह जहातेश्च, आ च हौ, लोपो यि घुमास्था, एर्लिङी-त्येते पञ्चापि न भवन्ति। श्तिपा निर्देशात्। जाहति। जाहेषि। जाहासि। जाहीथः। जाहीथ। जाहीहि। अजाहेत्-अजाहात्। अजाहीताम्। अजाहुः। जाहीयात्। आशिषि। जाहायात्। अजाहासीत्। अजाहासिष्टाम्। अजाहिष्यत्। लुका लुप्ते प्रत्ययलक्षणाभावात्स्वपिस्यमीत्युत्त्वं न। रुदादिभ्य इति गणनिर्दिष्टत्वादिण्न। सास्वपीति-सास्वप्ति। सास्वप्तः। सास्वपति। असास्वपीत्-असा-

स्वप्। सास्वप्यात्। आशिषि तु वचिस्वपी-त्युत्त्वम्। सासुप्यात्। असास्वापीत्-असास्वपीत्॥

२६५१--यङन्तके परे स्थित हलादि पित् सार्वधातुकको विकल्प करके ईट् हो। "भूसुवोः० २२२४" इस सूत्रसे भाषामें यङ्लुक् होनेपर गुणनिषेध नहीं होगा, कारण कि, "बोभूतु तेतिक्ते० ३५९६" इत्यादि पद वेदमें निपातनसे सिद्ध किये हैं, सो कहो यदि भाषामें भी गुणनिषेध हो तो उसीसे वेदमें भी गुणनिषेध होईजाता, फिर निपातन जो किया, वही पूर्वोक्त ज्ञापन करताहै, इसी कारण भाषामें भी यङ्लुक् सिद्ध हुआ, यदि कहो कि, द्वित्व होनेपर समुदायको अतिरिक्त होनेसे निषेधकी प्राप्ति नहीं है, इसलिये निपातन है, सो नहीं कह सकतेहो, कारण कि, प्रकृतिग्रहणसे यङ्लुगन्तका भी ग्रहण होताहै, कारण कि, षाष्ठ अर्थात् षष्ठाध्यायस्थ सूत्रसे विहित द्विर्वचनसे द्विःप्रयोगमात्र होताहै, प्रकृतसे कुछ भेद नहीं होताहै, ऐसा सिद्धान्त है। बोभवीति, बोभोति। बोभूतः। बोभुवति। बोभवाञ्चकार। बोभविता। अबोभवीत्, अबोभोत्। अबोभूताम्। अबोभवुः। बोभूयात्। बोभूयाताम्। बोभूयास्ताम्। "गातिस्था० २२२३" इस सूत्रसे सिच्का लुक् होगा। "यङो वा २६५१" इस सूत्रसे ईट्पक्षमें गुणको बाधा देकर नित्यत्वके कारण वुक् आगम होगा, अबोभूवीत्, अबोभूत्। अबोभूताम्। "गातिस्था०" इससे सिच्का लोप होनेपर सिच्के परे न होनेपर भी अभ्यस्ताश्रय झिके स्थान जुस् और नित्यत्वके कारण वुक्का आगम होकर-अबोभूवुः। अबोभविष्यत्, इत्यादि। पास्पर्धीति, पास्पर्धि। पास्पर्धः। पास्पर्धति। पास्पर्त्सि। "हुझल्भ्यो हेर्धिः २४२५" इस सूत्रसे हिके स्थानमें धि होकर-पास्पर्धि। लङ्में-अपास्पर्त्, अपास्पर्द्। सिप् परे "दश्च २४४६" इस सूत्रसे रुत्वपक्षमें "रो रि० १७३" इस सूत्रसे रकार परे रहते पूर्ववर्त्ती रकारका लोप होकर-अपास्पाः॥ जागाद्धि। जाघात्सि। अजाघात्। सिप् परे रहते रुत्वपक्षमें, अजाघाः॥ नाथृ धातुका-नानात्ति। नानात्तः॥ दध धातुका-दादद्धि। दादद्धः। दाधत्सि। अदाधत्॥ अदादद्धाम्। अदादधुः। अदाधः, अदाधत्। लुङ् परे-अदादाधीत्, अदादधीत्॥ चोस्कुन्दीति, चोस्कुन्ति। अचोस्कुन्। अचोस्कुन्ताम्। अचोस्कुन्दुः॥ मोमुदीति, मोमोत्ति। मोमोदाञ्चकार। मोमोदिता। अमोमुदीत्, अमोमोत्। अमोमुत्ताम्। अमोमुदुः। अमोमुदीः, अमोमोः, अमोमोत्। लुङ् परे गुण होकर-अमोमोदीत्॥ चोकूर्दीति, चोचकूर्ति। लङ्-तिप्। अचोकूर्दीत्, अचोकूर्त्। सिप् परे रुत्वपक्षमें। अचोकूः॥ अचोखूः॥ अजोगूः॥ वनीवञ्चीति, वनीवङ्क्ति। वनीवक्तः। वनीवचति। अवनीवञ्चीत्, अवनीवन्॥ जङ्गमीति, जङ्गन्ति। "अनुदात्तोपदेश० २४२८" इस सूत्रसे अनुनासिक वर्णका लोप होकर-जङ्गतः। जङ्गमति। "म्वोश्च २३०९" इस सूत्रसे नकार आदेश होकर-जङ्गन्मि। जङ्गन्वः। "एकाच् उपदेशे०" इसमें एकाच् ग्रहणके कारण "श्तिपा शपा०" इससे इट्निषेध नहीं होकर-जङ्गमिता। आभीयत्वके कारण अनुनासिक लोप, असिद्ध होनेसे हिका लुक् नहीं होकर-जङ्गहि। "मो नो धातोः ३४१" इस सूत्रसे मकारके स्थानमें नकारादेश होकर-अजङ्गन्॥ अनुबन्ध निर्देशके कारण श्लिके स्थानमें अङ् और 'ह्म्यन्त० २२९९" इस सूत्रसे वृद्धिनिषेधके कारण वृद्धि न होकर-अजङ्गमीत्। अजङ्गमिष्टाम्।

हन् धातुके उत्तर यङ्लुक् हुआ "अभ्यासाच्च २४३०" इस सूत्रसे कुत्व अर्थात् हके स्थानमें घ आदेश यद्यपि "हो हन्तेः० ३५८" इस सूत्रसे 'हन्तेः' इसकी अनुवृत्ति होकर विहित हुआ है तथापि यङ्लुक्में होताहै, यह न्यासकारका मत है "श्तिपा शपा०" इस परिभाषासे निषेध तो नहीं होगा, कारण कि, "गुणो यङ्लुकोः" इससे सामान्यापेक्ष ज्ञापन होताहै, कि, "श्तिपा शपा०" यह अनित्य है नहीं तो "एकाचो द्वे प्रथमस्य०" इसकी अनुवृत्ति करके "सन्यङोः" इससे द्वित्व करते समय उक्त परिभाषासे द्वित्वनिषेध होनेसे द्वित्व ही नहीं होगा, तब अभ्यास तो स्वतः नहीं होगा। फिर यङ्लुक्में अभ्यासको गुण विधान करना व्यर्थ ही होजाता। जंघनीति, जंघंति। जंघतः। जङ्घ्नति। जङ्घानता। श्तिप् निर्देशके कारण आदेश नहीं होकर-जंघहि। अजंघनीत्, अजंघन्। जंघन्यात्। आशिष्में वध्यात्। अवधीत्। अवधिष्टाम्, इत्यादि॥ द्विरुक्त हन्के स्थानमें वधादेशको द्वित्व न होगा, कारण कि स्थानिवद्भावसे "अनभ्यासस्य" यह निषेध होजाताहै, बहुव्रीहि समासके बलसे वह समानाधिकरण धातुका विशेषण है॥ आङ्पूर्वक होनेपर तो "आङो यमहनः २६९५" इस सूत्रसे आत्मनेपद होगा, आजंघते, इत्यादि॥

"उत् परस्य० २६३७" इस सूत्रसे विहित उत्में तपरत्व के कारण गुण नहीं होगा। "हलि च ३५४" इससे दीर्घ तो होहीगा, कारण कि, उसके असिद्ध होनेसे तपरत्व निवृत्तिका अयोग है। चञ्चुरीति, चञ्चूर्त्ति। चञ्चूर्त्तः। चञ्चुरति। अचञ्चुरीत्, अचञ्चूः॥ चङ्खनीति। चङ्खन्ति। "जनसन० २५०४" इस सूत्रसे आत्व होकर-चङ्खातः। "गमहन० २३६३" इस सूत्रसे उपधाका लोप होकर-चङ्खनति। चङ्खाहि। चङ्खनानि। अचङ्खनीत्, अचङ्खन्। अचङ्खाताम्। अचङ्खनुः, "ये विभाषा २३१९" इस सूत्रसे विकल्प करके आकार होकर-चङ्खायात्, चङ्खन्यात्। अचङ्खानीत्, अचङ्खनीत्।

"उतो वृद्धिः० २४४३" इस सूत्रमें "नाभ्यस्तस्य" इस अंशकी अनुवृत्तिके कारण उकारको वृद्धि नहीं होगी, योयोति, योयवीति। अयोयवीत्, अयोयोत्। योयुयात्। आशीर्लिङ्में दीर्घ होकर-योयूयात्। अयोयावीत्॥ नोनवीति, नोनोति।

जाहेति, जाहाति। "ई हल्यघोः २४९७" इस सूत्रसे दीर्घ ई होकर-जाहीतः। इस स्थलमें "जहातेश्च २४९८" "आ च हौ २४९९" "लोपो यि २५००" घुमास्था० २४६२" एर्लिङि २३७४" इन पांच सूत्रोंकी प्रवृत्ति नहीं होगी, क्यों कि, श्तिपूसे निर्देश हुआहै। जाहाति। जाहेषि, जाहासि।

जाहीथः । जाहीथ । जाहीहि । अजाहेत्, अजाहात् । अजाहीताम् । अजाहुः । जाहीयात् । आशीर्लिङ्में–जाहायात् । अजाहासीत् । अजाहासिष्टाम् । अजाहिष्यत् ।

लुक्से लुप्त होनेसे, प्रत्ययलक्षणके अभावके कारण "स्वपिस्यमि० २६४३" इस सूत्रसे उकार नहीं होगा । "रुदादिभ्य० २४७४" इस सूत्रसे गणनिर्देशके कारण इट् नहीं होगा, सास्वपीति, सास्वप्ति । सास्वप्तः । सास्वपति । असास्वपीत्, असास्वप् । सास्वप्यात् । आशीर्लिङ्में तो "वचिस्वपि० २४०९" इस सूत्रसे उकार होकर–सासुप्यात् । असास्वापीत्, असास्वपात् ॥

२६५२ रुग्रिकौ च लुकि । ७।४।९१ ॥

ऋदुपधस्य धातोरभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युर्यङ्लुकि ॥

२६५२–यङ् लुक् होनेपर–ऋकारोपध धातुके अभ्यासको रुक्, रिक् और रीक्का आगम हो ॥

२६५३ ऋतश्च । ७।४।९२ ॥

ऋदन्तधातोरपि तथा । वर्वृतीति–वरिवृतीति–वरीवृतीति, वर्वर्ति–वरिवर्ति–वरीवर्ति । वर्वृतः ३ । वर्वृतति ३ । वर्वर्तामास ३ । वर्वर्तिता ३ । गणनिर्दिष्टत्वान्न वृद्भ्यश्चतुर्भ्य इति न । वर्वर्तिष्यति ३ । अवर्वृतीत् ३, अवर्वर्त् ३ । सिपि दश्चेति रुत्वपक्षे रो रि । अवर्वाः ३ । गणनिर्दिष्टत्वादङ् । अवर्वर्तीत् ३ । चर्करीति ३ । चर्कर्ति–चरिकर्ति–चरीकर्ति । चर्कृतः ३ । चर्क्रति ३ । चर्करांचकार ३ । चर्करिता ३ । अचर्करीत् ३, अचर्कः ३ । चर्क्रियात् ३ । आशिषि रिङ् । चर्क्रियात् ३ । अचर्कारीत् ३ । ऋतश्चेति तपरत्वान्नेह । कॄ विक्षेपे । चाकर्ति । तातर्ति । तातीर्तः । तातिरति । तातीर्हि । तातराणि । अतातरीत्–अताः । अतातीर्ताम् । अतातरुः । अतातारीत् । अतातारिष्टामित्यादि । असंयङ्लुकि द्विर्वचनेऽभ्यासस्योरदत्त्वं रपरत्वम् । हलादिः शेषः । रुक् । रिग्रीकौ तु । अभ्यासस्यासवर्ण इति इयङ् । अरर्ति–अरियर्ति । अररीति–अरियरीति ॥ अर्ऋतः–अरियृतः । झि अत् । यण् रुको रो रीति लोपः । न च तस्मिन् कर्तव्ये यणः स्थानिवत्त्वम् । पूर्वत्रासिद्धीये तन्निषेधात् । आरति । अरिय्रति । लिङि श्तिपा निर्देशाद् गुणोऽर्तीति गुणो न । रिङ् रलोपः । दीर्घः । आरियात्–रिय्रियात् । गृह ग्रहणे । जर्गृहीति ३ । जर्गाढि ३ । जर्गृढः ३ । जर्गृहति ३ । अजर्घट् ३ । गृह्णातेस्तु जाग्रहीति–जाग्राढि । तस्मादौ ङिल्लभिसतं सम्प्रसारणम् । तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः । जागृढः । जागृहति । जाग्रहीषि–जाग्रक्षि । लुटि । जाग्रहिता । ग्रहोऽलिटीति दीर्घस्तु न । तत्रैकाच इत्यनुवृत्तेः । माधवस्तु दीर्घमाह तद्भाष्यविरुद्धम् । जर्गृधीति ३–जर्गर्द्धि ३ । जर्गृद्धः ३ । जर्गृधति ३ । जर्गृधीषि ३–जर्घर्त्सि ३ । अजर्गृधीत् ३–इडभावे गुणः । हलङ्यादिलोपः । भष्भावः । जश्त्वचर्त्वे । अजर्घर्त् ३ । अजर्गृद्धाम् ३ । सिपि दश्चेति पक्षे रुत्वम् । अजर्घाः ३–अजर्गर्धीत् ३ । अजर्गर्धिष्टाम् ३ । पापृच्छीति–पाप्रष्टि । तस्मादौ ग्रहिज्येति सम्प्रसारणं न भवति श्तिपा निर्देशात् । च्छ्वोः शूडिति शः । व्रश्चेति षः । पाप्रष्टः । पाप्रच्छति । पाप्रच्छिम । पाप्रच्छ्वः । पाप्रश्मः । यकारवकारान्तानां तूठभाविनां यङ्लुङ्नास्तीति च्छ्वोरिति सूत्रे भाष्ये ध्वनितम् । कैयटेनच स्पष्टीकृतम् । इदं च्छ्वोरिति यत्रोठ् तद्विषयकम् । ज्वरत्वरेत्यूठ्भाविनोः स्रिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यम् । माधवादिसम्मतं च । मव्य बन्धने । अयं यान्त ऊठ्भावी । तेवृ देवृ देवने इत्यादयो वान्ताः । हय गतौ । जाहयीति–जाहति । जाहतः । जाहयति । जाहयीषि–जाहसि । वलि लोपे यञादौ दीर्घः । जाहामि । जाहावः । जाहामः । हर्य गतिकान्त्योः । जाहर्यीति–जाहर्ति । जाहर्तः । जाहर्यति । लोटि । जाहर्हि । अजाहः । अजाहर्ताम् । अजाहर्युः । मव बन्धने ॥

२६५३–यङ्लुक् होनेपर ऋकारान्त धातुके भी अभ्यासको रुक्, रिक् और रीक्का आगम हो । वर्वृतीति । वरिवृतीति, वरीवृतीति, वर्वर्ति–वरिवर्ति–वरीवर्ति । वर्वृतः–वरिवृतः–वरीवृतः । वर्वृतति–वरिवृतति–वरीवृतति । वर्वर्तामास–वरिवर्तामास–वरीवर्तामास । वर्वर्तिता–वरिवर्तिता–वरीवर्तिता । गण निर्दिष्टत्वके कारण "न वृद्भ्यश्चतुर्भ्यः २३४८" इस सूत्रसे इट् निषेध नहीं होकर वर्वर्तिष्यति–वरिवर्तिष्यति–वरीवर्तिष्यति । अवर्वृतीत्–अवरिवृतीत्–अवरीवृतीत्, अवर्वर्त्–अवरीवर्त्–अवरिवर्त् । सिपि परे "दश्च २४६८" इस सूत्रसे रुत्वपक्षमें "रो रि १७३" इस सूत्रसे र परे रहते रकारका लोप होकर–अवर्वाः–अवरिवाः–अवरीवाः । गणनिर्देशके कारण अङ् नहीं होकर–अवर्वर्तीत्–अवरिवर्तीत्–अवरीवर्तीत् ॥ चर्करीति, चर्कर्ति–चरिकर्ति–चरीकर्ति । चर्कृतः ३ । चर्क्रति ३ । चर्करांचकार ३ । चर्करिता ३ । अचर्करीत् ३ । अचर्कः ३ । चर्कृयात् ३ । आशीर्लिङ्में रिङ् होकर चार्क्रियात् ३ । अचर्कारीत् ३ ॥ "ऋतश्च २६५३" इस सूत्रसे तपरत्वके कारण इस स्थलमें रुगादि नहीं होंगे, जैसे–विक्षेपार्थक कॄ धातुका चाकर्ति । तातर्ति । तातीर्तः । तातिरति ।

तातीर्हि। तातराणि। अतातरीत्, अतातः। अतातीर्ताम्। अतातरुः। अतातारीत्। अतातारिष्टाम्, इत्यादि॥ ऋ धातुको यङ् लुक् करनेपर द्वित्व पश्चात् अभ्यासको उरदत्व और रपरत्व होगा और "हलादिः शेषः २१७९" इस सूत्रसे अभ्यासके आदिमें स्थित हल्का शेष अन्य हल्का लोप होगा पश्चात् रुक् का आगम होगा, रिक् और रीक् आगमके पक्षमें तो "अभ्यासस्यासवर्णे २२९०" इस सूत्रसे इयङ् आदेश होगा। अरर्ति–अरियर्त्ति, अररीति–अरियरीति। अर्ऋतः–अरीयृतः। क्षि–अत्–यण् और "रो रि १७३" इस सूत्रसे रुक्का लोप होगा, लोप कर्तव्य होनेपर यण्का स्थानिवद्भाव तो नहीं कह सकतेहो क्योंकि, "पूर्वत्रासिद्धीये० इस" वचनसे उसका निषेध होजाताहै, आरीत। अरियृरति लिङ् परे दितपूनिर्देशके कारण "गुणोऽर्ति० २३८०" इस सूत्रसे गुण नहीं होगा। रिङ् रकारका लोप और पूर्वस्वरको दीर्घ होकर–आरियात्। अयूरियात्॥ ग्रह धातुका जर्गृहीति ३, जर्गर्दि ३। जर्गृढः ३। जर्गृहति ३। अजर्घट् ३॥ क्र्यादिगणपठित ग्रह धातुका तो जाग्रहीति–जाग्राढि। तस् आदि प्रत्यय परे ङित् निमित्त संप्रसारण होगा, उसको बहिरङ्गत्वके कारण असिद्ध होनेसे रुक् आदि नहीं होंगे, जागृढः। जागृहति। जाग्रहीषि, जाघ्रक्षि। लुट् परे जाग्रहिता, यहां "ग्रहोऽलिटि० २५६२" इस सूत्रसे दीर्घ तो नहीं होगा, कारण कि, उस स्थलमें एकाचकी अनुवृत्ति होतीहै। माधवने तो दीर्घ कहाहै, परन्तु वह भाष्यके विरुद्ध है। जर्गृधीति ३, जर्गर्धि ३। जर्गृद्धः ३। जर्गृधति३ जर्गृधीषि ३, जर्घर्त्सि ३। अजर्गृधीत् ३। इट्के अभावपक्षमें गुण "हल्ङ्याब्भ्यः०" इस सूत्रसे तिप्का लोप, भष्भाव, जश्त्व और चर्त्व होकर–अजर्घत् ३। अजर्गृद्धाम् ३। सिप् परे "दश्च २६६८" इस सूत्रसे पक्षमें रुत्व होकर–अजर्घाः३ अजर्गर्धीत् ३। अजर्गर्धिष्टाम् ३। पाप्रच्छीति, पाप्रष्टि। तसादिमें "ग्रहिज्या० २४१२" इस सूत्रसे सम्प्रसारण नहीं होगा, कारण कि, दितप् निर्देश कियाहै। "च्छ्वोः शूट्०" इस सूत्रसे श और "व्रश्च० २९४" इस सूत्रसे षत्व होकर–पाप्रष्टः। पाप्रच्छति। पाप्रश्मि। पाप्रच्छ्वः। पाप्रश्मः। ऊठ् होनेवाला है जिनको ऐसे यकारान्त और वकारान्त धातुके उत्तर यङ् लुक् नहीं होताहै यह "च्छ्वोः० २५६१" इस सूत्रके भाष्यमें ध्वनित है, और कैयटने भी स्पष्ट करके कहाहै, परन्तु यह यङ्लुक्निषेध जहां "च्छ्वो.० २५६१" इस सूत्रसे ऊठ् होनेवाला होगा, वहां नहीं लगेगा इस कारण "ज्वरत्वर० २५६४" इस सूत्रसे ऊठ्भावी स्रि, वि और मव्य धातुको तो यङ्लुक्में होताहीहै। यह न्यायानुगत और माधवादिके संमत भी है। मव्य धातु बंधनमें है, यह यकारान्त ऊठ्भावी हैं। देवनार्थक तेवृ और देवृ इत्यादि वकारान्त धातु हैं। हय धातु गतिमें है। जाहयीति, जाहाति। जाहतः। जाहयति। जाहयीषि, जाहसि। "लोपो व्योर्वलि" इस सूत्रसे यकारका लोप होनेपर यञादि सार्वधातुक परे दीर्घ होकर–जाहामि। जाहावः। जाहामः॥ हर्य धातु गति और कान्तिमें है। जाहर्यीति, जाहर्त्ति। जाहर्तः। जाहर्यति। लोट् परे–जाहर्हि। अजाहः। अजाहर्त्ताम्। अजाहर्युः॥ मव धातु बंधनमें है॥

२६५४ ज्वरत्वरस्रिव्यविमवामुपधायाश्च। ६। ४। २०॥

ज्वरादीनामुपधावकारयोरूठ् स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये। अत्र क्ङितीति नानुवर्तते। अवतेस्तुनि ओतुरिति दर्शनात्। अनुनासिकग्रहणं चानुवर्तते। अवतेर्मन्प्रत्यये तस्य टिलोपे ओमिति दर्शनात्। ईडभावे ऊठि पिति गुणः। मामोति–मामवीति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु। मामूतात्। मामूहि। मामवानि। अमामोत्–अमामोः। अमामवम्। अमामाव। अमामूम। तुर्वी हिंसायाम्। तोतूर्वीति॥

२६५४–क्विप् प्रत्यय, झलादि प्रत्यय और अनुनासिकादि प्रत्यय परे रहते ज्वर, त्वर, स्रिवि, अवि, मव इन धातुओंकी उपधा और वकारके स्थानमें ऊठ् हो, इस सूत्रमें 'क्ङिति' इस पदकी अनुवृत्ति नहीं होगी, कारण कि अव धातुके उत्तर तुन् प्रत्यय करनेपर ओतुः ऐसा पद होताहै। धातुके अनुनासिक ग्रहणकी अनुवृत्ति होगी, क्योंकि, अव धातुके उत्तर मन प्रत्यय करनेपर टिका लोप होकर 'ओम्' यह पद होताहै। ईट्के अभावपक्षमें ऊठ् करनेपर पित् प्रत्यय परे गुण होकर–मामोति। मामवीति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु। मामूतात्। मामूहि। मामवानि। अमामोत्। अमामोः। अमामवम्। अमामाव। अमामूम॥ तुर्वी धातु हिंसामें है। तोतूर्वीति॥

२६५५ राल्लोपः। ६। ४। २१॥

रेफात्परयोश्छ्वोर्लोपः स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये। इति वलोपः। लघूपधगुणः॥

२६५५–क्विप् प्रत्यय, झलादि प्रत्यय और अनुनासिकादि प्रत्यय परे रहते रकारके परे स्थित छकार और वकारका लोप हो, इस सूत्रसे वकारका लोप, पश्चात् लघु उपधाको गुण होकर–॥

२६५६ न धातुलोप आर्धधातुके। १। १। ४॥

धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः। इति नेह निषेधः। तिबादीनामनार्धधातुकत्वात्। तोतोर्ति। हलि चेति दीर्घः। तोतूर्तः। तोतूर्वति। तोथोर्ति। दोदोर्ति। दाधार्ति। मुर्छा। मोमूर्छीति। मोमोर्ति। मोमूर्तः। मोमूर्छतीत्यादि। आर्धधातुक इति विषयसप्तमी। तेन यङि विवक्षिते

अजेर्वी । वेवीयते । अस्य यङ्लुग्नास्ति । लुका अपहारे विषयत्वासम्भवेन वीभावस्याप्रवृत्तेः॥*॥

॥ इति यङ्लुगन्तप्रक्रिया ॥

२६५६–धात्वंशलोपके निमित्तीभूत आर्धधातुक संज्ञक प्रत्यय परे रहते इक्को गुण और वृद्धि न हो । तिप् आदि विभक्तियोंके आर्धधातुकत्वके अभावके कारण इस स्थलमें निषेध नहीं होकर–तोतोर्त्ति । "हलि च ३५४" इस सूत्रसे दीर्घ होकर–तोतूर्त्तः । तोतूर्वति ॥ तोथोर्त्ति ॥ दोदोर्त्ति ॥ दोधोर्ति॥मुर्च्छा धातुका मोमूर्छीति, मोमोर्त्ति । मोमूर्त्तः । मोमूर्च्छति, इत्यादि ॥ 'आर्धधातुके' इसमें विषयसप्तमी है इस कारण यङ् विवक्षित होनेपर अज धातुके स्थानमें वी आदेश होगा,वेवीयते इसको यङ्लुक् नहीं होताहै, क्योंकि, लुक्द्वारा यङ्का अपहार होनेपर आर्धधातुक विषयत्वके असम्भव होनेसे वी आदेशकी प्राप्ति ही नहीं है ॥

॥ इति यङ्लुगन्तप्रकरणम् ॥

अथ नामधातुप्रक्रिया ।

२६५७ सुप आत्मनः क्यच् ।३।१।८॥

इषिकर्मण एषितृसम्बधिनः सुबन्तादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात् धात्ववयवत्वात्सुब्लुक् ॥

२६५७–इष् धातुका कर्म हो और इच्छाकर्त्ताका सम्बन्धी हो, ऐसे सुबन्तके उत्तर इच्छार्थमें विकल्प करके क्यच् प्रत्यय हो । धातुके अवयवत्वके कारण सुप्का लुक् होगा ॥

२६५८ क्यचि च । ७ । ४ । ३३ ॥

अस्य ईत्स्यात् । आत्मनः पुत्रमिच्छति पुत्रीयति । वान्तो यि प्रत्यये । गव्यति । नाव्यति । लोपः शाकल्यस्येति तु न । अपदान्तत्वात् । तथा हि ॥

२६५८–क्यच् परे रहते अकारके स्थानमें ईकार हो, आत्मनः पुत्रमिच्छति=पुत्रीयति । "वान्तो यि प्रत्यये ६३" इस सूत्रसे अवादि आदेश होकर–गव्यति । नाव्यति । "लोपः शाकल्यस्य ६७" यह सूत्र अपदान्तत्वके कारण इस स्थलमें प्रवृत्त नहीं होताहै, वही कहतेहैं ॥

२६५९ नः क्ये । १ । ४ । १५ ॥

क्यचि क्यङि च नान्तमेव पदं स्यान्नान्यत् । सन्निपातपरिभाषया क्यचो यस्य लोपो न । गव्यांचकार । गव्यिता । नाव्यांचकार । नाव्यिता । नलोपः । राजीयति । प्रत्ययोत्तरपदयोश्च । त्वद्यति । मद्यति । एकार्थयोरित्येव । युष्मद्यति । अस्मद्यति । हलि च गीर्यति । पूर्यति । धातोरित्येव । नेह । दिवमिच्छति दिव्यति । इह पुरमिच्छति पुर्यतीति माधवोक्तं प्रत्युदाहरणं चिन्त्यम् । पुर्गिरोः साम्यात् । दीव्यतीति दीर्घस्तु प्राचः प्रामादिक एव । अदस्यति । रीङ् ऋतः । कर्त्रीयति॥ क्यच्व्योश्च । (६ । ४ । १५२ ॥) गार्गीयति । वाच्यति । अकृत्सार्वेति दीर्घः । कवीयति । समिध्यति ॥

२६५९–क्यच् और क्यङ् प्रत्यय परे रहते नकारान्तकी ही पद संज्ञा हो, अन्यकी न हो । सन्निपात परिभाषाद्वारा क्यच् प्रत्ययके यकारका लोप नहीं होकर–गव्यांचकार । गव्यिता । नाव्यांचकार । नाव्यिता । "नलोपः०" इस सूत्रसे नकारका लोप होकर–राजीयति, "प्रत्ययोत्तरपदयोश्च १३७२" इस सूत्रसे त्वत् और मत् आदेश होकर त्वद्यति । मद्यति । एकवचनार्थकमें ही त्वत् और मत् होंगे, अन्यार्थकमें अर्थात् द्विवचन और बहुवचनार्थमें नहीं होंगे, जैसे– युष्मद्यति । अस्मद्यति । "हलि च ३५४" इस सूत्रसे दीर्घ होकर–गीर्यति । पूर्यति । धातुको ही दीर्घ होताहै, इस कारण 'दिवमिच्छति दिव्यति' इस स्थलमें दीर्घ नहीं हुआ । पुरमिच्छति=पुर्यति,यह माधवोक्त प्रत्युदाहरण सर्वसम्मत नहीं है, क्योंकि पुर् और गिर् शब्दोंका साम्य है । दीव्यति, इस स्थलमें दीर्घ तो प्राचीनोंका प्रामादिक है । अदस्यति । "रीङ् ऋतः १२३४" इस सूत्रसे ऋके स्थानमें रीङ् आदेश होकर–कर्त्रीयति । "क्यच्व्योश्च २११९"इस सूत्रसे अपत्यसम्बन्धी यकारका लोप होकर–गार्गीयति । वाच्यति । "अकृत्सार्वधातुकयोः० २२९८" इस सूत्रसे दीर्घ होकर–कवीयति । समिध्यति ॥

२६६० क्यस्य विभाषा ।६।४।५०॥

हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्धधातुके । आदेः परस्य । अतो लोपः तस्य स्थानिवत्त्वाल्लघूपधगुणो न । समिधिता । समिध्यिता ॥ मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् न ॥ * ॥ किमिच्छति । इदमिच्छति । स्वरिच्छति ॥

२६६०–आर्धधातुक प्रत्यय परे रहते हल्के परे स्थित क्यच् और क्यङ्का विकल्प करके लोप हो । "आदेः परस्य० ४४" इस सूत्रसे आदिका लोप हुआ, "अतो लोपः २३०८" इस सूत्रसे अकारका लोप हुआ, अकार लोपके स्थानिवत्त्वके कारण लघु उपधाको गुण नहीं होकर–समिधिता, समिध्यिता ।

मान्तप्रकृतिक सुबन्त और अव्ययके उत्तर क्यच् प्रत्यय नहीं हो * किमिच्छति । इदमिच्छति । स्वरिच्छति ॥

२६६१ अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु । ७ । ४ । ३४ ॥

क्यजन्ता निपात्यन्ते । अशनायति । उदन्यति । धनायति । बुभुक्षादौ किम् । अशनीयति । उदकीयति । धनीयति ॥

२६६१–बुभुक्षा, अर्थात् क्षुधा, पिपासा और गर्ध, अर्थात् इच्छा अर्थमें यथाक्रम अशनाय, उदन्य और धनाय यह

क्यच् प्रत्ययान्त निपातनसे सिद्ध हों, अशनायति । उदन्यति । धनायति । बुभुक्षादि अर्थ न होनेपर—अशनीयति । उदकीयति । धनीयति ॥

२६६२ अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि । ७ । १ । ५१ ॥

एषां क्यचि असुगागमः स्यात् ॥ अश्ववृषयोर्मैथुनेच्छायाम् ॥ * ॥ अश्वस्यति वडवा । वृषस्यति गौः ॥ क्षीरलवणयोर्लालसायाम् ॥ * ॥ क्षीरस्यति बालः । लवणस्यति उष्ट्रः ॥ सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ ॥ * ॥ दधिस्यति । दध्यस्यति । मधुस्यति । मध्वस्यति ॥

२६६२—आत्मप्रीति अर्थमें अश्व, क्षीर, वृष, लवण इन शब्दोंके उत्तर क्यच् प्रत्यय परे रहते असुक्का आगम हो ।

अश्व और वृष शब्दके उत्तर मैथुनेच्छा होनेपर असुक्का आगम हो * अश्वस्यति वडवा । वृषस्यति गौः ।

क्षीर और लवण शब्दके उत्तर लालसार्थमें असुक् हो * क्षीरस्यति बालः । लवणस्यति उष्ट्रः ।

सम्पूर्ण प्रातिपदिकोंको क्यच् प्रत्यय परे लालसार्थमें सुक् और असुक्का आगम हो * दधिस्यति—दध्यस्यति । मधुस्यति-मध्वस्यति ॥

२६६३ काम्यच्च । ३ । १ । ९ ॥

उक्तविषये काम्यच् स्यात् । पुत्रमात्मन इच्छति पुत्रकाम्यति । इह यस्य हल इति लोपो न । अनर्थकत्वात् । यस्येति संघातग्रहणमित्युक्तम् । यशस्काम्यति । सर्पिष्काम्यति । मान्ताव्ययेभ्योऽप्ययं स्यादेव । किंकाम्यति । स्वःकाम्यति ॥

२६६३—उक्तविषयमें अर्थात् इष धातुका कर्म हो और इच्छा कर्त्ताका सम्बन्धी हो ऐसे सुबन्तके उत्तर इच्छा अर्थ होनेपर काम्यच् प्रत्यय हो, आत्मनः पुत्रमिच्छति=पुत्रकाम्यति । पुत्रकाम्यिता, इस स्थलमें अनर्थकत्वके कारण "यस्य हलः २६३१" इस सूत्रसे यकारका लोप नहीं होताहै, 'य' यह समूहका ग्रहण है, यह पूर्वमें कह आये हैं । यशस्काम्यति । सर्पिष्काम्यति । मकारान्त और अव्ययके उत्तर भी काम्यच् प्रत्यय होहीगा, किंकाम्यति । स्वःकाम्यति ॥

२६६४ उपमानादाचारे । ३ । १ । १० ॥

उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच् स्यात् । पुत्रमिवाचरति पुत्रीयति च्छात्रम् । विष्णूयति द्विजम् ॥ अधिकरणाच्चेति वक्तव्यम् ॥ * ॥ प्रासादीयति कुट्यां भिक्षुः । कुटीयति प्रासादे ॥

२६६४—उपमानवाचक कर्म सुबन्तके उत्तर आचारार्थमें क्यच् प्रत्यय हो, पुत्रमिवाचरति=पुत्रीयति च्छात्रम् । विष्णूयति द्विजम् ।

उपमानवाचक अधिकरण सुबन्तके भी उत्तर आचारार्थमें क्यच् प्रत्यय हो * प्रासादीयति कुट्यां भिक्षुः । कुटीयति प्रासादे ॥

२६६५ कर्तुः क्यङ् सलोपश्च । ३ । १ । ११ ॥

उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात् । सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात् । क्यङ् वेत्युक्तेः पक्षे वाक्यम् । सान्तस्य लोपस्तु क्यङ्सन्नियोगशिष्टः । स च व्यवस्थितः ॥ ओजसोऽप्सरसो नित्यमितरेषां विभाषया ॥ * ॥ कृष्ण इवाचरति कृष्णायते । ओजःशब्दो वृत्तिविषये तद्वति ॥ ओजायते । अप्सरायते । यशायते—यशस्यते । विद्वायते—विद्वस्यते । त्वद्यते । मद्यते । अनेकार्थत्वे तु युष्मद्यते । अस्मद्यते । क्यङ्मानिनोश्च । कुमारीवाचरति कुमारायते । हरिणीवाचरति हरितायते । गुर्वीव गुरूयते । सपत्नीव सपत्नायते—सपतीयते—सपत्नीयते । युवतिरिव युवायते । पट्वीमृद्व्याविव पट्वीमृदूयते । न कोपधायाः । पाचिकायते ॥ आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वक्तव्यः ॥ * ॥ वा ग्रहणात् क्यङपि । अवगल्भादयः पचाद्यजन्ताः । क्विप्सन्नियोगेनानुदात्तत्वमनुनासिकत्वं चाच्प्रत्ययस्य प्रतिज्ञायते तेन तङ् । अवगल्भते । क्लीबते । होडते । भूतपूर्वादप्यनेकाच आम् । एतद्वार्तिकारम्भसामर्थ्यात् । न च अवगल्भते इत्यादिसिद्धिस्तत्फलम् । केवलानामेवाचारेपि वृत्तिसम्भवात् । धातूनामनेकार्थत्वात् । अवगल्भांचक्रे । क्लीबाचक्रे । होडाञ्चक्रे । वार्त्तिकेऽवेत्युपसर्गविशिष्टपाठात् केवलादुपसर्गान्तरविशिष्टाच्च क्यङेवेति माधवादयः । तङ् नेति तूचितम् ॥ सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः ॥ * ॥ पूर्ववार्तिकं तु अनुबन्धासञ्जनार्थं तत्र क्विबनूद्यते । प्रातिपदिकग्रहणादिह सुप इति न सम्बध्यते । तेन पदकार्यं न । कृष्ण इवाचरति कृष्णति । अतो गुण इति शपा सह पररूपम् । अ इवाचरति अति । अतः । अन्ति । प्रत्ययग्रहणमपनीय अनेकाच इत्युक्तेर्नाम । औ । अतुः । उः । द्वित्वम् । अतो गुणे । अत आदेरिति दीर्घः । णल् । औ । वृद्धिः । अतुसादिषु त्वातो लोप इटि चेत्याल्लोपः ।

मालेवाचरति मालाति । लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वाद्वा क्विप् । मालांचकार । लङि । अमालात् । अत्र हल्ङ्यादिलोपो न । ङीप्साहचर्यादापोऽपि सोरेव लोपविधानात् । इट्सकौ । अमालासीत् । कविरिव कवयति । आशीर्लिङि । कवीयात् । सिचि वृद्धिरित्यत्र धातोरित्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नामधातोर्न वृद्धिरिति कैयटादयः । अकवयीत् । माधवस्तु नामधातोरपि वृद्धिमिच्छति । अकवायीत् । विरिव वयति । विवाय । विव्यतुः । अवयीत्-अवायीत् । श्रीरिव श्रयति । शिश्राय । शिश्रियतुः । पितेव पितरति । आशिषि रिङ् । पित्रियात् । भूरिव भवति । अत्र गातिस्थेति भुवो वुगिति भवतेरिति च न भवति । अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । अभावीत् । बुभाव । द्रुरिव द्रवति । णिश्रीति चङ् । अद्रावीत् ॥

२६६५-उपमानवाचक कर्तृ सुबन्तके उत्तर आचारार्थमें विकल्प करके क्यङ् प्रत्यय हो, और सकारान्त कर्तृवाचक शब्दका विकल्प करके लोप हो, और विकल्प करके क्यङ् हो, ऐसा कहनेसे पक्षमें वाक्य होगा । सकारान्त शब्दका लोप क्यङ् सन्नियोगशिष्ट है, अर्थात् जिस स्थानमें क्यङ् प्रत्यय होगा. उस स्थलमें ही सकारान्त शब्दके सकारका लोप होगा, यह लोप व्यवस्थित है, जैसे-

ओजस् और अप्सरस् शब्दके अन्तस्थित सकारका नित्य लोप हो, अन्य शब्दका विकल्प करके हो * कृष्ण इवाचरति कृष्णायते । ओजस् शब्दकी वृत्तिविषयमें ओजस्वीमें वृत्ति है । ओजायते । अप्सरायते । यशायते, यशस्यते । विद्वायते, विद्वस्यते । त्वद्यते । मद्यते । अनेकार्थ होनेपर तो युष्मद्यते । अस्मद्यते । "क्यङ्मानिनोश्च ८३७" इस सूत्रसे पुंवद्भाव होकर-कुमारीवाचरति=कुमारायते । हरिणीवाचरति=हरितायते । गुर्वीव=गुरूयते । सपत्नीव=सपत्नायते, सपतीयते, सपत्नीयते । युवतिरिव=युवायते । पट्वीमृद्वयाविव=पट्वीमृदूयते । "न कोपधायाः ८३८" इस सूत्रसे पुंवद्भाव निषेध होकर-पाचिकायते ।

आचारार्थमें अवगल्भ, क्लीब और होड शब्दके उत्तर विकल्प करके क्विप् प्रत्यय हो । विकल्प पक्षमें क्यङ् होगा । अवगल्भादि शब्द पचादित्वके कारण अच् प्रत्ययान्त हैं, क्विप् सन्नियोगसे प्रत्ययको अनुदात्तत्व और अनुनासिकत्व प्रतिज्ञात होताहै, इस कारण तङ् अर्थात् आत्मनेपद होगा, अवगल्भते । क्लीबते । होडते । इस वार्त्तिकारम्भसामर्थ्यसे भूतपूर्व अनेकाच् शब्दोंके उत्तर भी आम् प्रत्यय होगा । केवल 'अवगल्भते' इत्यादि पद सिद्धिके निमित्त ही यह वार्त्तिक है, ऐसा नहीं कहसकते कारण कि, केवल धातुको आचारार्थमें भी वृत्ति अर्थात् प्रत्ययकी सम्भावना है, धातुको अनेकार्थत्वके कारण अर्थमें भी भेद नहीं होगा । अवगल्भाञ्चक्रे । क्लीबाञ्चक्रे । होडाञ्चक्रे । वार्त्तिकमें 'अव' ऐसा उपसर्गयुक्त पाठ होनेके कारण केवल गल्भादि शब्द और अन्य उपसर्गविशिष्ट गल्भादि शब्दोंके उत्तर क्यङ् ही होगा, यह माधवादि आचार्योंका मत है आत्मनेपद न होगा, यह उचित है ।

सम्पूर्ण प्रातिपदिकोंके उत्तर विकल्प करके क्विप् हो * पूर्व वार्त्तिक तो अनुबन्धका आसंजनार्थ है, उस स्थलमें क्विप् अनूदित होताहै । प्रातिपदिकशब्दोंका ग्रहण करनेसे इस स्थलमें सुप्का संबन्ध नहीं होगा, इस कारण पदकार्य्य भी नहीं होगा, कृष्ण इवाचरति=कृष्णति । "अतो गुणे १९१" इस सूत्रसे शप्के साथ पररूप होकर-अ इवाचरति=अति । अतः । अन्ति । प्रत्यय ग्रहण त्यागकर "अनेकाचः" इस उक्तिके कारण आम् नहीं होगा, औ । अतुः । उः । द्वित्व हुआ, "अतो गुणे १९१" इस सूत्रसे पररूप, "अत आदेः २२४८" इस सूत्रसे दीर्घ, णल् विभक्तिके स्थानमें औ आदेश और वृद्धि हुई । अतुस् प्रभृतिमें तो "आतो लोप इटि च २३७२" इस सूत्रसे आकारका लोप हुआ, मालेवाचरति=मालाति, यहां लिङ्गविशिष्ट परिभाषासे अथवा एकादेशके पूर्वान्तत्वके कारण क्विप् हुआ । मालाञ्चकार । लङ् परे अमालात्, इस स्थलमें हल्ङ्यादि लोप नहीं होगा, कारण कि, ङीप्साहचर्यके कारण आप्से भी परे सुका ही लोप होताहै । इट् और सक् होकर-अमालासीत् । कविरिव=कवयति । आशीर्लिङ्में कवीयात् । "सिचि वृद्धि०२२९७" इस सूत्रमें धातुकी अनुवृत्ति करके धातुमात्र जो धातु उसको वृद्धि हो ऐसे व्याख्यानके कारण नाम धातुको वृद्धि नहीं होगी, यह कैयटादिकोंका अभिप्राय है । अकवयीत् । माधवके मतसे नामधातुको भी वृद्धि होगी । अकवायीत् । विरिव=वयति । विवाय । विव्यतुः । अवयीत्, अवायीत् । श्रीरिव=श्रयति । शिश्राय । शिश्रियतुः । पितेव=पितरति । आशीर्लिङ्में ऋके स्थानमें रिङ् हुआ, पित्रियात् । भूरिव=भवति । इस स्थलमें "गातिस्था० २२२३" "भुवो वुक्०२१७४" "भवतेः०२१८१" इन सूत्रोंका कार्य नहीं होगा, क्योंकि अभिव्यक्तत्वके कारण धातुपाठस्थका ही उस स्थलमें ग्रहण है । अभावीत् । बुभाव । द्रुरिव=द्रवति । "णिश्रि०२३१२" इस सूत्रसे चङ् नहीं होगा, अद्रावीत् ॥

२६६६ अनुनासिकस्य क्विझलोः क्ङिति ।६।४।१५॥

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति । मथीनति । ऋभुक्षीणति । द्यौरिव देवतीति माधवः । अत्र ऊठि यवतीत्युचितम् । क इव कति । चकाविति हरदत्तः । माधवस्तु ण्यल्लोपाविति वचनात् णलि वृद्धिं बाधित्वाऽतो लोपाच्चक इति रूपमाह । स्व इव स्वौ । सस्व । यत्तु स्वामास स्वांचकारेति तदनाकरमेव ॥

२६६६—क्विप् प्रत्यय और झलादि कित्, ङित् प्रत्यय परे रहते अनुनासिकान्त प्रातिपदिककी उपधाको दीर्घ हो, इदमिवाचरति=इदामति । राजेव आचरति=राजानति । पन्था इव=पथीनति । मथीनति= ऋभुक्षीणति । द्यौरिव देवति, ऐसा माधवाचार्यने कहाहै, इस स्थलमें ऊठ् होकर 'द्यवति' पद होना उचित है । क इव= कति । 'चक्रौ' ऐसा हरदत्तने कहाहै । माधवके मतसे तो "ण्यल्लोपौ०" इससे णल् परे वृद्धिको बाध कर "अतो लोपः" इस सूत्रसे अकारके लोपके कारण 'चक' ऐसा होगा । स्व इव=सस्वौ, सस्व । स्वामास, स्वाञ्चकार—इत्यादि पद तो अनाकर अर्थात् प्रामादिक हैं ॥

२६६७ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः । ३ । १ । १२ ॥

अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात् हलन्तानामेषां लोपश्च । अभृशो भृशो भवति भृशायते । अच्वेरिति पर्युदासबलाद्भूततद्भाव इति लब्धम् । तेनेह न, क्व दिवा भृशा भवन्ति । ये रात्रौ भृशा नक्षत्रादयस्ते दिवा क्व भवन्तीत्यर्थः । सुमनस् । अस्य सलोपः । सुमनायते । चुरादौ संग्राम युद्धे इति पठ्यते तत्र संग्रामेति प्रातिपदिकम् । तस्मात्तत्करोतीति णिच् सिद्धः । तत्सन्नियोगेनानुबन्ध आसज्यते । युद्धे योऽयं ग्रामशब्द इत्युक्तेऽपि सामर्थ्यात्संग्रामशब्दे लब्धे विशिष्टपाठो ज्ञापयति । उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते इति । तेन मनश्शब्दात्प्रागट् । स्वमनायत । उन्मनायते । उदमनायत । एवं चावागल्भत अवागल्भिष्टेत्यादावप्यवेत्यस्य पृथक्करणं बोध्यम् । ज्ञापकं च सजातीयविषयम् । तेन यत्रोपसर्गरूपं सकलं श्रूयते न त्वादेशेनापहृतं तत्रैव पृथक्कृतिः । एवं च आ ऊढः ओढः स इवाचर्य ओढायित्वा । अत्र उन्मनाय्य अवगल्भ्येतिवन्न ल्यप् । ज्ञापकस्य विशेषविषयत्वे षाष्ठं वार्तिकं तद्भाष्यं च प्रमाणम् । तथा हि ॥ उस्योमाङ्क्ष्वाटः प्रतिषेधः ॥*॥ उसि ओमाङोश्च पररूपं नेत्यर्थः । उस्रामैच्छत् । औस्रीयत् । ओङ्कारीयत । औढीयत् । आटश्चेति चशब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति षाष्ठे स्थितम् ॥

२६६७—अभूततद्भावविषयक भृशादि शब्दोंके उत्तर 'भवति' अर्थमें क्यङ् प्रत्यय हो, और भृशादिके मध्यमें हलन्त शब्दोंका लोप हो, अभृशो भृशो भवति=भृशायते । 'अच्वेः' इस पर्युदासबलसे अभूततद्भाव अर्थ लब्ध हुआ, इस कारण 'क्व दिवा भृशा भवन्ति' अर्थात् रात्रिकालमें जो सम्पूर्ण नक्षत्रराशि उदय होतेहैं, वह दिनमें कहां जातेहैं, इस स्थलमें क्यङ् नहीं हुआ । सुमनस् शब्दके सकारका लोप हुआ, सुमनायते । चुरादिमें संग्राम युद्धे ऐसे पठित है, उस स्थलमें संग्राम यह प्रातिपदिक है, इससे 'तत्करोति' इस अर्थमें णिच् सिद्ध हुआ। णिच्के सन्नियोगसे अनुबन्ध आसक्त होताहै । युद्धमें जो ग्राम शब्द ऐसा कहनेसे भी सामर्थ्यसे संग्राम शब्द लब्ध हो ही जाता फिर सम्—विशिष्ट पाठ करनेका क्या प्रयोजन है? तो वही सम्—विशिष्ट पाठ यह जनाताहै कि, उपसर्ग समानाकार पूर्वपद धातु संज्ञाप्रयोजक प्रत्यय चिकीर्षित होनेपर पृथक् किया जाय इससे मनस् शब्दके पूर्वमें अट् होगा, स्वमनायत । उन्मनायते । उदमनायत । इसी प्रकार अवागल्भत, अवागल्भिष्ट—इत्यादिमें भी 'अव' इस पूर्वपदका पृथक् करण जानना चाहिये । उपसर्गसमानाकार पूर्व पदका जो पथक् करण विषयक ज्ञापक वह सजातीय विषयक है, इसी कारण जिस स्थलमें उपसर्गरूप सम्पूर्ण श्रूयमाण हो अर्थात् आदेशके द्वारा विकारको प्राप्त न हुआ हो, उसी स्थलमें पृथक्करण होगा, अत एव आ ऊढः=ओढः+स इवाचर्य; इस विग्रहमें 'ओढायित्वा' इस स्थलमें उन्मनाय्य अवगल्भ्य इत्यादिकी समान ल्यप् नहीं हुआ । ज्ञापकके विशेष विषयत्वमें षष्ठाध्यायस्थ वार्त्तिक और उसका भाष्य प्रमाण जानना, वही कहतेहैं ।

"उस्योमाङ्क्ष्वाटः प्रतिषेधः" अर्थात् उस,ओम्,आर आङ् परे रहते आट्का पररूप नहीं हो* । उस्रामैच्छत्=औस्रीयत् । ओङ्कारीयत् । औढीयत् । "आटश्च २६९" इस स्थलमें जो चकार निर्दिष्ट है उससे पुनर्वार वृद्धि विधानके कारण यह सिद्ध हुआ ऐसा भाष्यके छठे अध्यायमें कहाहै । सो कहो यदि ज्ञापकको विशेष विषयत्व न हो तो आङ्परत्वके अभावसे पररूपकी प्राप्ति ही नहीं थी फिर निषेध करना व्यर्थ ही होजाता ॥

२६६८ लोहितादिडाज्भ्यः क्यष् । ३ । १ । १३ ॥

लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष् स्यात् ॥

२६६८—लोहितादि शब्दोंके और डाच् प्रत्ययान्त शब्दोंके उत्तर 'भवति' अर्थमें क्यष् प्रत्यय हो ॥

२६६९ वा क्यषः । १ । ३ । ९० ॥

क्यषन्तात्परस्मैपदं वा स्यात् लोहितायति लोहितायते । अत्राच्वेरित्यनुवृत्त्याऽभूततद्भावविषयत्वं लब्धं तच्च लोहितशब्दस्यैव विशेषणम् । न तु डाचोऽसम्भवात् । नाप्यादिशब्दग्राह्याणां तस्य प्रत्याख्यानात् । तथा च वार्तिकम् ॥ लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि·

ति ॥ * ॥ न चैवं काम्यच इव क्यषोऽपि ककारः श्रूयेत उच्चारणसामर्थ्यादिति वाच्यम् । तस्यापि भाष्ये प्रत्याख्यानात् । पटपटायति । पटपटायते । कृभ्वस्तियोगं विनापीह डाच् । डाजन्तात् क्यषो विधानसामर्थ्यात् । यत्तु,

लोहितश्यामदुःखानि हर्षगर्वसुखानि च ।
मूर्च्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी ॥

इति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरन्ति तद्भाष्यवार्तिकविरुद्धम् । तस्मात्तेभ्यः क्यङेव । श्यामायते । दुःखादयो वृत्तिविषये तद्वति वर्तन्ते । लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष । लोहिनीयति । लोहिनीयते ॥

२६६९–क्यष् प्रत्ययान्त नाम धातुके उत्तर विकल्प करके परस्मैपद हो, लोहितायति, लोहितायते । इस स्थलमें च्विकी अनुवृत्तिसे अभूततद्भाव, विषयत्व लब्ध हुआ, परन्तु वह लोहित शब्दका ही विशेषण है, डाच्का नहीं, क्योंकि, डाच् प्रत्ययका विशेषण होना असम्भव है और आदि शब्द ग्राह्य इतर शब्दका भी विशेषण नहीं होगा क्योंकि, भाष्यकारने क्यष्विधायक इस सूत्रमें आदि शब्दका प्रत्याख्यान किया है, वैसे ही वार्त्तिक है, यथा–

लोहित और डाच्प्रत्ययान्त शब्दोंके उत्तर क्यष् प्रत्यय हो और भृशादि शब्दोंके उत्तर क्यङ् आदि प्रत्यय हों * । यदि कहो कि, काम्यच् प्रत्ययके समान क्यष् प्रत्ययके उच्चारण सामर्थ्यके कारण ककार श्रुत होगा, ऐसा नहीं कह सकते हो क्योंकि, क्यष् प्रत्ययका ककार भी भाष्यमें प्रत्याख्यात हुआ है । पटपटायति, पटपटायते । डाजन्तके उत्तर क्यष् प्रत्यय विधानके=सामर्थ्यके कारण कृ, भू, अस् इन धातुओंके योग विना भी डाच् होगा । कोई लोहितादिकोंके मध्यमें, लोहित, श्याम, दुःख, हर्ष, गर्व, सुख, मूर्च्छा, निद्रा, कृपा, धूम, करुणा, नित्य, चर्म्म इनका पाठ करके श्यामादि शब्दोंके उत्तर भी क्यष् प्रत्यय करके दो पदोंका उदाहरण देतेहैं, वह भाष्य और वार्त्तिकके विरुद्ध है, इस कारण उनके उत्तर क्यङ् ही हुआ । श्यामायते । दुःखादि शब्द वृत्तिविषयमें दुःखादिमान्में वृत्ति है । लिङ्गविशिष्ट परिभाषासे लोहिनी शब्दके उत्तर भी क्यष् प्रत्यय होकर–लोहिनीयति, लोहिनीयते ॥

२६७० कष्टाय क्रमणे । ३ । १ । १४॥

चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः ॥ सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम् ॥ * ॥ कण्वं पापम् । सत्रादयो वृत्तिविषये पापार्थाः । तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ् । पापं चिकीर्षतीत्यस्वपदविग्रहः । सत्रायते । कक्षायते इत्यादि ॥

२६७०–चतुर्थीविभक्त्यन्त कष्ट शब्दके उत्तर उत्साहार्थमें क्यङ् प्रत्यय हो, कष्टाय क्रमते=कष्टायते, अर्थात् पाप करनेका उत्साह करता है ।

कण्व, अर्थात् पापचिकीर्षा होनेपर सत्र, कक्ष, कष्ट, कृच्छ्र और गहन शब्दोंके उत्तर क्यङ् प्रत्यय हो* कण्व नाम पापका है, सत्रादि भी वृत्तिविषयमें पापअर्थवाले हैं, द्वितीयान्त उनसे पाप करनेकी इच्छामें क्यङ् हुआ पापं चिकीर्षति, यह अस्वपद विग्रह है, सत्रायते । कक्षायते–इत्यादि ॥

२६७१ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः । ३ । १ । १५ ॥

रोमन्थतपोभ्यां कर्मभ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात् । रोमन्थं वर्तयति रोमन्थायते ॥ हनुचलन इति वक्तव्यम् ॥ * ॥ चर्वितस्याकृष्य पुनश्चर्वणमित्यर्थः । नेह । कीटो रोमन्थं वर्तयति । अपानप्रदेशान्निःसृतं द्रव्यमिह रोमन्थः । तदश्नातीत्यर्थ इति कैयटः । वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ ॥ तपसः परस्मैपदं च ॥*॥ तपश्चरति तपस्यति॥

२६७१–रोमन्थ और तपस् इन दो कर्म पदोंके उत्तर क्रमसे वर्तना और चरणार्थमें क्यङ् प्रत्यय हो, रोमन्थं वर्त्तयति=रोमन्थायते ।

तालुचलनसे चबाई हुई वस्तुको आकर्षणपूर्वक पुनश्चर्वण अर्थमें उक्त प्रत्यय हो * इस कारण 'कीटो रोमन्थं वर्त्तयति' इस स्थलमें क्यङ् प्रत्यय नहीं हुआ, इस स्थानमें अपान प्रदेशसे निःसृत द्रव्यको रोमन्थ कहतेहैं । उसको भोजन करताहै, ऐसा कैयटका मत है, न्यासकार और हरदत्तके मतसे वर्त्तुल करताहै ।

तपस् शब्दके उत्तर क्यङ् प्रत्यय होनेपर परस्मैपद होगा* तपश्चरति=तपस्यति ॥

२६७२ बाष्पोष्मभ्यामुद्वमने।३।१।१६॥

आभ्यां कर्मभ्यां क्यङ् स्यात् । बाष्पमुद्वमति बाष्पायते । ऊष्मायते । फेनाच्चेति वाच्यम् ॥ * ॥ फेनायते ॥

२६७२–बाष्प और ऊष्म शब्दके उत्तर उद्वमनार्थमें क्यङ् प्रत्यय हो, बाष्पमुद्वमति=बाष्पायते, ऊष्मायते ।

फेन शब्दके उत्तर भी क्यङ् प्रत्यय हो * फेनायते ॥

२६७३ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे । ३ । १ । १७ ॥

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते । पक्षे तत्करोतीति णिजपीष्यत इति न्यासः । शब्दयति ॥ सुदिनदुर्दिननीहारेभ्यश्च ॥ * ॥ सुदिनायते ॥

२६७३-शब्द, वैर, कलह, अभ्र, कण्व और मेघ इन कर्मोंके उत्तर ' करोति ' अर्थमें क्यङ् हो, शब्दं करोति= शब्दायते । पक्षमें "तत्करोति०"इससे णिच् भी होगा, यह न्यासकारका मत है । शब्दयति ।

सुदिन, दुर्दिन और नीहार शब्दके उत्तर क्यङ् प्रत्यय हो*सुदिनायते ॥

२६७४ सुखादिभ्यः कर्तृवेदनायाम् । ३ । १ । १८ ॥

सुखादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः । सुखं वेदयते सुखायते । कर्तृग्रहणं किम् । परस्य सुखं वेदयते ॥

२६७४-यदि सुखादि वेदना कर्त्ताको ही हो तो सुखादि शब्दोंके उत्तर वेदनार्थमें क्यङ् प्रत्यय हो, सुखं वेदयते= सुखायते । कर्तृ पदका ग्रहण करनेसे 'परस्य सुखं वेदयते' इस स्थलमें क्यङ् नहीं हुआ ॥

२६७५ नमोवरिवश्चित्रङः क्यच् ३।१।१९

करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये च । नमस्यति देवान् । पूजयतीत्यर्थः । वरिवस्यति गुरून् । शुश्रूषते इत्यर्थः । चित्रीयते । विस्मयते इत्यर्थः । विस्मापयत इत्यन्ये ॥

२६७५-नमस्, वरिवस् और चित्रङ् शब्दके उत्तर क्रियाविशेषमें अर्थात् पूजार्थमें, परिचर्य्यार्थ और आश्चर्य अर्थमें क्यच् प्रत्यय हो, नमस्यति देवान्, अर्थात् पूजा करताहै । वरिवस्यति गुरून्, सेवा करताहै । चित्रीयते, अर्थात् आश्चर्यान्वित होताहै । कोई २ कहतेहैं विस्मापयते, अथार्त् आश्चर्य्यान्वित करताहै ॥

२६७६ पुच्छभाण्डचीवराण्णिङ् । ३ । १ । २० ॥

पुच्छादुदसने व्यसने पर्यसने च ॥ * ॥ विविधं विरुद्धं वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते ॥ भाण्डात्समाचयने ॥ * ॥ सम्भाण्डयते । भाण्डानि समाचिनोति राशीकरोतीत्यर्थः। समबभाण्डत॥ चीवरादर्जने परिधाने च ॥ * ॥ सञ्चीवरयते भिक्षुः । चीवराण्यर्जयति परिधत्ते वेत्यर्थः ॥

२६७६-पुच्छ, भाण्ड, चीवर शब्दोंके उत्तर णिङ् हो । उदसन, व्यसन और पर्य्यसनार्थमें पुच्छ शब्दके उत्तर णिङ् हो * विविधं-विरुद्ध वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते ।

समाचयन, अर्थात् राशीकरणार्थमें भाण्ड शब्दके उत्तर णिङ् प्रत्यय हो*सम्भाण्डयते, भाण्डानि समाचिनोति, अर्थात् इकट्ठा करताहै । समबभाण्डत ।

अर्जन और परिधानार्थमें चीवर शब्दके उत्तर णिङ् हो * सञ्चीवरयते भिक्षुः । चीवराण्यर्जयति परिधत्ते वा, अर्थात् चीथडे एकत्र करताहै, अथवा पहिरताहै ॥

२६७७ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ।३।१।२१॥

कृञर्थे । मुण्डं करोति मुण्डयति ॥ व्रताद्भोजनतन्निवृत्त्योः ॥ * ॥ पयः शूद्रान्नं वा व्रतयति ॥ वस्त्रात्समाच्छादने ॥ * ॥ संवस्त्रयति ॥ हल्यादिभ्यो ग्रहणे ॥ * ॥ हलिकल्योरदन्तत्वं च निपात्यते । हलिं कलिं वा गृह्णाति, हलयति, कलयति । महद्धलं हलिः । परत्वाद् वृद्धौ सत्यामपीष्टवद्भावेनागेव लुप्यते, अतः सन्वद्भावदीर्घौ न । अजहलत् । अचकलत् । कृतं गृह्णाति कृतयति । तूस्तानि विहन्ति वितूस्तयति । तूस्तं केशा इत्येके । जटीभूताः केशा इत्यन्ये । पापमित्यपरे । मुण्डादयः सत्यापपाशेत्यत्रैव पठितुं युक्ताः । प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योऽपि णिजर्थम् । मुण्डयति माणवकम् । मिश्रयत्यन्नम् । श्लक्ष्णयति वस्त्रम् । लवणयति व्यञ्जनमिति । हलिकल्योरदन्तत्वार्थम् । सत्यस्य आपुगर्थम् । केषांचित्तु प्रपञ्चार्थम् । सत्यं करोत्याचष्टे वा सत्यापयति ॥ अर्थवेदयोरप्यापुग्वक्तव्यः ॥*॥ अर्थापयति । वेदापयति।पाशं विमुञ्चति विपाशयति । रूपं पश्यति रूपयति वीणयोपगायत्युपवीणयति । तूलेनानुकुष्णात्यनुतूलयति । तृणाग्रं तूलेनानुघट्टयतीत्यर्थः । श्लोकैरुपस्तौति उपश्लोकयति । सेनया अभियाति अभिषेणयति । उपसर्गात्सुनोतीति षः । अभ्यषेणयत् । प्राक्सितादिति षः। अभिषिषेणयिषति। स्थादिष्वभ्यासेन चेति षः । लोमान्यनुमार्ष्टि अनुलोमयति । त्वच संवरणे । घः। त्वचं गृह्णाति त्वचयति । वर्मणा सन्नह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसते अवचूर्णयति । इष्ठवदित्यतिदेशात्पुंवद्भावादयः।एनीमाचष्टे एतयति । दरदमाचष्टे दारदयति । पृथुं प्रथयति । वृद्धौ सत्यां पूर्वं वा टिलोपः । अपिप्रथत्-अपप्रथत । मृदुम् । म्रदयति । अमिम्रदत्-अमम्रदत् । भृशं कृशं दृढम् । भ्रशयति । क्रशयति । द्रढयति । अबभ्रशत् । अचक्रशत् । अदद्रढत् । परिव्रढयति । पर्यवव्रढत् । ऊढिमा-

ति ॥ * ॥ न चैवं काम्यच इव क्यषोऽपि ककारः श्रूयेत उच्चारणसामर्थ्यादिति वाच्यम् । तस्यापि भाष्ये प्रत्याख्यानात् । पटपटायति । पटपटायते । कृभ्वस्तियोगं विनापीह डाच् । डाजन्तात् क्यषो विधानसामर्थ्यात् । यत्तु,

लोहितश्यामदुःखानि हर्षगर्वसुखानि च ।
मूर्च्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी ॥

इति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरन्ति तद्भाष्यवार्तिकविरुद्धम् । तस्मात्तेभ्यः क्यङेव । श्यामायते । दुःखादयो वृत्तिविषये तद्वति वर्तन्ते । लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष । लोहिनीयति । लोहिनीयते ॥

२६६९-क्यष् प्रत्ययान्त नाम धातुके उत्तर विकल्प करके परस्मैपद हो, लोहितायति, लोहितायते । इस स्थलमें च्विकी अनुवृत्तिसे अभूततद्भाव, विषयत्व लब्ध हुआ, परन्तु वह लोहित शब्दका ही विशेषण है, डाच्का नहीं, क्योंकि, डाच् प्रत्ययका विशेषण होना असम्भव है और आदि शब्द ग्राह्य इतर शब्दका भी विशेषण नहीं होगा क्योंकि, भाष्यकारने क्यष्विधायक इस सूत्रमें आदि शब्दका प्रत्याख्यान किया है, वैसे ही वार्त्तिक है, यथा-

लोहित और डाच्प्रत्ययान्त शब्दोंके उत्तर क्यष् प्रत्यय हो और भृशादि शब्दोंके उत्तर क्यङ् आदि प्रत्यय हों * । यदि कहो कि, काम्यच् प्रत्ययके समान क्यष् प्रत्ययके उच्चारण सामर्थ्यके कारण ककार श्रुत होगा, ऐसा नहीं कह सकते हो क्योंकि, क्यष् प्रत्ययका ककार भी भाष्यमें प्रत्याख्यात हुआ है । पटपटायति, पटपटायते । डाजन्तके उत्तर क्यष् प्रत्यय विधानके=सामर्थ्यके कारण कृ, भू, अस् इन धातुओंके योग विना भी डाच् होगा । कोई लोहितादिकोंके मध्यमें, लोहित, श्याम, दुःख, हर्ष, गर्व, सुख, मूर्च्छा, निद्रा, कृपा, धूम, करुणा, नित्य,चर्म्म इनका पाठ करके श्यामादि शब्दोंके उत्तर भी क्यष् प्रत्यय करके दो पदोंका उदाहरण देतेहैं, वह भाष्य और वार्तिकके विरुद्ध है, इस कारण उनके उत्तर क्यङ् ही हुआ । श्यामायते । दुःखादि शब्द वृत्तिविषयमें दुःखादिमान्में वृत्ति है । लिङ्गविशिष्ट परिभाषासे लोहिनी शब्दके उत्तर भी क्यष् प्रत्यय होकर-लोहिनीयति, लोहिनीयते ॥

२६७० कष्टाय क्रमणे । ३ । १ । १४॥

चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् । कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः ॥ सत्त्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम् ॥ * ॥ कण्वं पापम् । सत्त्रादयो वृत्तिविषये पापार्थाः । तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ् । पापं चिकीर्षतीत्यस्वपदविग्रहः । सत्त्रायते । कक्षायते इत्यादि ॥

२६७०-चतुर्थीविभक्त्यन्त कष्ट शब्दके उत्तर उत्साहार्थमें क्यङ् प्रत्यय हो, कष्टाय क्रमते=कष्टायते, अर्थात् पाप करनेका उत्साह करता है ।

कण्व,अर्थात् पापचिकीर्षा होनेपर सत्त्र,कक्ष,कष्ट,कृच्छ्र और गहन शब्दोंके उत्तर क्यङ् प्रत्यय हो* कण्व नाम पापका है, सत्त्रादि भी वृत्तिविषयमें पापअर्थवाले हैं, द्वितीयान्त उनसे पाप करनेकी इच्छामें क्यङ् हुआ पापं चिकीर्षति, यह अस्वपद विग्रह है, सत्त्रायते । कक्षायते-इत्यादि ॥

२६७१ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः । ३ । १ । १५ ॥

रोमन्थतपोभ्यां कर्मभ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात् । रोमन्थं वर्तयति रोमन्थायते ॥ हनुचलन इति वक्तव्यम् ॥ * ॥ चर्वितस्याकृष्य पुनश्चर्वणमित्यर्थः । नेह । कीटो रोमन्थं वर्तयति । अपानप्रदेशान्निःसृतं द्रव्यमिह रोमन्थः । तदश्नातीत्यर्थ इति कैयटः । वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ ॥ तपसः परस्मैपदं च ॥*॥ तपश्चरति तपस्यति॥

२६७१-रोमन्थ और तपस् इन दो कर्म पदोंके उत्तर क्रमसे वर्तना और चरणार्थमें क्यङ प्रत्यय हो, रोमन्थं वर्त्तयति=रोमन्थायते ।

तालुचलनसे चवाई हुई वस्तुको आकर्षणपूर्वक पुनश्चर्वण अर्थमें उक्त प्रत्यय हो * इस कारण 'कीटो रोमन्थं वर्त्तयति' इस स्थलमें क्यङ् प्रत्यय नहीं हुआ, इस स्थानमें अपान प्रदेशसे निःसृत द्रव्यको रोमन्थ कहतेहैं । उसको भोजन करताहै, ऐसा कैयटका मत है, न्यासकार और हरदत्तके मतसे वर्त्तुल करताहै ।

तपस् शब्दके उत्तर क्यङ् प्रत्यय होनेपर परस्मैपद होगा* तपश्चरति=तपस्यति ॥

२६७२ बाष्पोष्मभ्यामुद्वमने।३।१।१६॥

आभ्यां कर्मभ्यां क्यङ् स्यात् । बाष्पमुद्वमति बाष्पायते । ऊष्मायते । फेनाच्चेति वाच्यम् ॥ * ॥ फेनायते ॥

२६७२-बाष्प और ऊष्म शब्दके उत्तर उद्वमनार्थमें क्यङ् प्रत्यय हो, बाष्पमुद्वमति=बाष्पायते, ऊष्मायते ।

फेन शब्दके उत्तर भी क्यङ् प्रत्यय हो * फेनायते ॥

२६७३ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे । ३ । १ । १७ ॥

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते। पक्षे तत्करोतीति णिजपीष्यत इति न्यासः । शब्दयति ॥ सुदिनदुर्दिननीहारेभ्यश्च ॥ * ॥ सुदिनायते ॥

२६७३-शब्द, वैर, कलह, अभ्र, कण्व और मेघ इन कर्मोंके उत्तर ' करोति ' अर्थमें क्यङ् हो, शब्दं करोति= शब्दायते । पक्षमें "तत्करोति०" इससे णिच् भी होगा, यह न्यासकारका मत है । शब्दयति ।

सुदिन, दुर्दिन और नीहार शब्दके उत्तर क्यङ् प्रत्यय हो* सुदिनायते ॥

२६७४ सुखादिभ्यः कर्तृवेदनायाम् । ३ । १ । १८ ॥

सुखादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः । सुखं वेदयते सुखायते । कर्तृग्रहणं किम् । परस्य सुखं वेदयते ॥

२६७४-यदि सुखादि वेदना कर्त्ताको ही हो तो सुखादि शब्दोंके उत्तर वेदनार्थमें क्यङ् प्रत्यय हो, सुखं वेदयते= सुखायते । कर्तृ पदका ग्रहण करनेसे 'परस्य सुखं वेदयते' इस स्थलमें क्यङ् नहीं हुआ ॥

२६७५ नमोवरिवश्चित्रङः क्यच् ३।१।१९

करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये च । नमस्यति देवान् । पूजयतीत्यर्थः । वरिवस्यति गुरून् । शुश्रूषते इत्यर्थः । चित्रीयते । विस्मयते इत्यर्थः । विस्मापयत इत्यन्ये ॥

२६७५-नमस्, वरिवस् और चित्रङ् शब्दके उत्तर क्रियाविशेषमें अर्थात् पूजार्थमें, परिचर्य्यार्थ और आश्चर्य अर्थमें क्यच् प्रत्यय हो, नमस्यति देवान्, अर्थात् पूजा करताहै । वरिवस्यति गुरून्, सेवा करताहै । चित्रीयते, अर्थात् आश्चर्यान्वित होताहै । कोई २ कहतेहैं विस्मापयते, अर्थात् आश्चर्य्यान्वित कराताहै ॥

२६७६ पुच्छभाण्डचीवराण्णिङ् । ३ । १ । २० ॥

पुच्छादुदसने व्यसने पर्यसने च ॥ * ॥ विविधं विरुद्धं वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते ॥ भाण्डात्समाचयने ॥ * ॥ सम्भाण्डयते । भाण्डानि समाचिनोति राशीकरोतीत्यर्थः। समवभाण्डत॥ चीवरादर्जने परिधाने च ॥ * ॥ सञ्चीवरयते भिक्षुः । चीवराण्यर्जयति परिधत्ते वेत्यर्थः ॥

२६७६-पुच्छ, भाण्ड, चीवर शब्दोंके उत्तर णिङ् हो।

उदसन, व्यसन और पर्य्यसनार्थमें पुच्छ शब्दके उत्तर णिङ् हो * विविधं-विरुद्धं वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते ।

समाचयन, अर्थात् राशीकरणार्थमें भाण्ड शब्दके उत्तर णिङ् प्रत्यय हो*सम्भाण्डयते, भाण्डानि समाचिनोति, अर्थात् इकट्ठा करताहै । समवभाण्डत ।

अर्जन और परिधानार्थमें चीवर शब्दके उत्तर णिङ् हो * सञ्चीवरयते भिक्षुः । चीवराण्यर्जयति परिधत्ते वा, अर्थात् चीथडे एकत्र करताहै, अथवा पहिरताहै ॥

२६७७ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्।३।१।२१॥

कृञर्थे । मुण्डं करोति मुण्डयति ॥ व्रताद्भोजनतन्निवृत्त्योः ॥ * ॥ पयः शूद्रान्नं वा व्रतयति ॥ वस्त्रात्समाच्छादने ॥ * ॥ संवस्त्रयति ॥ हल्यादिभ्यो ग्रहणे ॥ * ॥ हलिकल्योरदन्तत्वं च निपात्यते । हलिं कलिं वा गृह्णाति, हलयति, कलयति । महद्धलं हलिः । परत्वाद् वृद्धौ सत्यामपीष्टवद्भावेनागेव लुप्यते, अतः सन्वद्भावदीर्घौ न । अजहलत् । अचकलत् । कृतं गृह्णाति कृतयति । तूस्तानि विहन्ति वितूस्तयति । तूस्तं केशा इत्येके । जटीभूताः केशा इत्यन्ये । पापमित्यपरे । मुण्डादयः सत्यापपाशेत्यत्रैव पठितुं युक्ताः । प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योऽपि णिजर्थम् । मुण्डयति माणवकम् । मिश्रयत्यन्नम् । श्लक्ष्णयति वस्त्रम् । लवणयति व्यञ्जनमिति । हलिकल्योरदन्तत्वार्थम् । सत्यस्य आपुगर्थम् । केषांचित् प्रपञ्चार्थम् । सत्यं करोत्याचष्टे वा सत्यापयति ॥ अर्थवेदयोरप्यापुग्वक्तव्यः ॥*॥ अर्थापयति । वेदापयति।पाशं विमुञ्चति विपाशयति । रूपं पश्यति रूपयति वीणयोपगायत्युपवीणयति । तूलेनानुकुष्णात्यनुतूलयति । तृणाग्रं तूलेनानुघट्टयतीत्यर्थः । श्लोकैरुपस्तौति उपश्लोकयति । सेनया अभियाति अभिषेणयति । उपसर्गात्सुनोतीति षः । अभ्यषेणयत्। प्राक्सितादिति षः। अभिषिषेणयिषति। स्थादिष्वभ्यासेन चेति षः । लोमान्यनुमार्ष्टि अनुलोमयति । त्वच संवरणे । घः। त्वचं गृह्णाति त्वचयति । वर्मणा सन्नह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसते अवचूर्णयति । इष्ठवदित्यतिदेशात्पुंवद्भावादयः।एनीमाचष्टे एतयति । दरदमाचष्टे दारदयति । पृथुं प्रथयति । वृद्धौ सत्यां पूर्वं वा टिलोपः । अपिप्रथत्-अपप्रथत् । मृदुम् । म्रदयति । अमिम्रदत्-अमम्रदत् । भृशं कृशं दृढम् । भ्रशयति । क्रशयति । द्रढयति । अबभ्रशत् । अचक्रशत् । अदद्रढत् । परिव्रढयति । पर्यवव्रढत् । ऊढिमा-

ख्यत् औजिढत् । ढत्वादीनामसिद्धत्वात् हृतिशब्दस्य द्वित्वम् । पूर्वत्रासिद्धीयमद्वित्वे इति त्वनित्यमित्युक्तम् । ढि इत्यस्य द्वित्वमित्यन्ये । औडिढत् । ऊढमाख्यत् । औजढत्-औडढत् । ओः पुयणितिवर्गप्रत्याहारजग्रहो लिङ्गम् । द्वित्वे कार्ये णावच आदेशो नेति ऊनयतावुक्तम् । प्रकृत्यैकाच् । वृद्धिपुकौ । स्वापयति । त्वां मां वाऽऽचष्टे त्वापयति । मापयति । मपर्यन्तस्य त्वमौ । पररूपात्पूर्वं नित्यत्वाट्टिलोपः । वृद्धिः पुक् त्वादयति मादयतीति तु न्याय्यम् । अन्तरङ्गत्वात्पररूपे कृते प्रकृत्यैकाजिति प्रकृतिभावात् । न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यम् । भाष्यस्य प्रष्ठाद्युदाहरणविशेषेऽन्यथासिद्धिपरत्वात् । युवामावां वा युष्मयति । अस्मयति । श्वानमाचष्टे शावयति । नस्तद्धित इति टिलोपः । प्रकृतिभावस्तु न । येन नाप्राप्तिन्यायेन टेरित्यस्यैव बाधको हि सः । भत्वात्सम्प्रसारणम् । अन्ये तु नस्तद्धित इति नेहातिदिश्यते इष्ठनि तस्यादृष्टत्वात् । ब्रह्मिष्ठ इत्यादौ परत्वाट्टेरित्यस्यैव प्रवृत्तेः । तेन शुनयतीति रूपमाहुः । विद्वांसमाचष्टे विद्वयति । अङ्गवृत्तपरिभाषया संप्रसारणं नेत्येके । संप्रसारणे वृद्धाववादेशे च विदावयतीत्यन्ये । नित्यत्वाट्टिलोपात्प्राक्संप्रसारणम्। अन्तरङ्गत्वात्पूर्वरूपं टिलोपः । विदयति इत्यपरे । उदञ्चमाचष्टे उदीचयति । उदैचिचत् । प्रत्यञ्चम्, प्रतीचयति । प्रत्यचिचत् । इकोऽसवर्णे इति प्रकृतिभावपक्षे । प्रतिअचिचत् । सम्यञ्चमाचष्टे समीचयति । सम्यचिचत्-समिअचिचत् । तिर्यञ्चमाचष्टे तिरायति । अञ्चेष्टिलोपेनापहारेऽपि बहिरङ्गत्वेनासिद्धत्वात्तिरसस्तिरिः । असिद्धवदत्रेति । चिणो लुङ्न्यायेन प्रथमटिलोपोऽसिद्धः । अतः पुनष्टिलोपो न। अङ्गवृत्तपरिभाषया वा । चङ्यग्लोपित्वादुपधाह्रस्वो न । अतितिरायत् । सध्र्यञ्चमाचष्टे सध्राययति । अससध्रायत् । विष्वद्र्यञ्चम्, अविविष्वद्रायत् । देवद्र्यञ्चम्, देवद्राययति, अदिदेवद्रायत् । अदद्र्यञ्चम्, अददद्रायत् । अदमुयञ्चम्, अदमुआययति । आददमुआयत । अमुमुयञ्चम्, अमुमुआययति । चङि । आमुमुआयत् । भुवं भावयति । अबीभवत् । भ्रुवम्, अबुभ्रवत् । श्रियम्, अशिश्रयत् । गाम्, अजूगवत् । रायम्, अरीरयत् । नावम्, अनूनवत् । स्वश्वम्, स्वाशश्वत् । स्वः । अव्ययानां भमात्रे टिलोपः । स्वयति । अमस्वत्-असिस्वत् । बहून् भावयति । बहयतीत्यन्ये । विन्मतोरिति लुक् स्रग्विणम्, स्रजयति । संज्ञापूर्वकत्वान्न वृद्धिः । श्रीमतीं श्रीमन्तं वा । श्रययति । अशिश्रयत् । पयस्विनीम्, पयसयति । इह टिलोपो न । तदपवादस्य लुकः प्रवृत्तत्वात्। स्थूलम्, स्थवयति । दूरम्, दवयति । कथं तर्हि दूरयत्यवनते विवस्वतीति । दूरमतति अयते वा दूरात् । दूरातं कुर्वतीत्यर्थः । युवानं यवयति-कनयति । युवाल्पयोरिति वा कन् । अन्तिकं नेदयति । बाढं साधयति । प्रशस्यं प्रशस्ययति । इह श्रज्यौ न । उपसर्गस्य पृथक्कृतेः । वृद्धं ज्यापयति । वर्षयति । प्रियं प्रापयति । स्थिरं स्थापयति । स्फिरं स्फापयति । उरुं वरयति । वारयति । बहुलं बंहयति । गुरुं गरयति । तृप्रं त्रपयति। दीर्घं द्राघयति। वृन्दारकं वृन्दयति॥

॥ इति नामधातुप्रक्रिया ॥

२६७७-मुण्ड, मिश्र, श्लक्ष्ण, लवण, व्रत, वस्त्र, हल, कल, कृत, और तूस्त शब्दोंके उत्तर 'करोति' अर्थमें णिच् हो, मुण्डं करोति=मुंडयति ।

भोजन और उससे निवृत्ति होनेपर व्रत शब्दके उत्तर णिच् हो * पयःशूद्रान्नं वा व्रतयति ।

समाच्छादन अर्थमें वस्त्र शब्दके उत्तर णिच् हो * संवस्त्रयति ।

ग्रहणार्थमें हलादि शब्दोंके उत्तर णिच् हो*हलि और कलिको अकारान्तता निपातनसे सिद्ध है । हलिं कलिं वा गृह्णाति=हलयति । कलयति । महत् हलको हलि कहतेहैं । परत्वके कारण वृद्धि होनेपर भी इष्टवद्भावसे अक्का ही लोप हुआ, अत एव सन्वद्भाव और दीर्घ नहीं हुआ, अजहलत् । अचकलत् । कृतं गृह्णाति=कृतयति । तूस्तानि विहन्ति=वितूस्तयति । कोई २ कहतेहैं, तूस्त शब्दसे केश समझना । अन्यमतसे जटीभूत केश और दूसरोंके मतसे पाप समझना ।

मुण्डादि शब्दोंका "सत्यापपाश० २५६३ " इस सूत्रमें ही पाठ करना उचित था ।

" प्रातिपदिकाद्धात्वर्थे० " इससे ही सिद्ध होनेपर सापेक्षके भी उत्तर णिच् विधानार्थ किसी २ शब्दका ग्रहण है । मुण्डयति माणवकम् । मिश्रयति अन्नम् । श्लक्ष्णयति वस्त्रम्। लवणयति व्यञ्जनम् । हलि और कलि शब्दोंको अदन्तता विधानार्थ, सत्य शब्दको आपुक् आगमके निमित्त और अन्य शब्दोंका प्रपंचार्थ ग्रहण है । सत्यं करोति आचष्टे वा=सत्यापयति ।

अर्थ और वेद शब्दको भी आपुक् हो*अर्थापयति । वेदापयति । पाशं विमुञ्चति=विपाशयति । रूपं पश्यति=रूपयति ।

वीणया उपगायति=उपवीणयति । तूलेन अनुकुष्णाति=अनु-
तूलयति, अर्थात् तूलसे तृणाग्रको घटित करताहै । श्लोकै-
रुपस्तौति=उपश्लोकयति । सेनया अभियाति=अभिषेणयति,
यहां " उपसर्गात्सुनोति० २२७० " इस सूत्रसे षत्व हुआ,
अभ्यषेणयत्, यहां "प्राक् सितात्० २२७६ " इस सूत्रसे
षत्व हुआ । अभिषिषेणयिषति, यहां " स्थादिष्वभ्यासेन०
२२७७ " इस सूत्रसे षत्व हुआ । लोमान्यनुमार्ष्टि=अनुलो-
मयति ॥ त्वच धातु संवरणमें है । "पुंसि संज्ञायाम्" इस
सूत्रसे घ प्रत्यय हुआ, त्वचं गृह्णाति=त्वचयति । वर्मणा संन-
ह्यति=संवर्मयति । वर्णं गृह्णाति=वर्णयति । चूर्णैरवध्वंसते=
अवचूर्णयति । " इष्ठवत् " इस अतिदेशके कारण पुंव-
द्भाव, रभाव और टिका लोप आदि होंगे, एनीमाचष्टे=एत-
यति । दरदमाचष्टे=दारदयति । पृथुम्=प्रथयति । वृद्धि
होकर अथवा पहले टिका लोप हुआ, अपिप्रथत्,अपप्रथत्।
मृदुम्=म्रदयति । अमिम्रदत्, अमम्रदत् । भृश, कृश,
दृढ, शब्दोंके उत्तर णिच् होकर-भ्रशयति । क्रशयति ।
द्रढयति । अबभ्रशत् । अचक्रशत् । अदद्रढत् । परिवृढय-
ति । पर्यवव्रढत् । ऊढिमाख्यत्=औजिढत् । ढत्वादिकी
असिद्धिके कारण ढि शब्दको द्वित्व हुआ । " पूर्वत्रा-
सिद्धीयमद्वित्वे " यह तो अनित्य है, ऐसा उक्त हुआहै ।
अन्यमतसे ढि शब्दको द्वित्व होगा, औडिढत् ।
ऊढमाख्यत्=औजढत् । औडढत् । " ओः पुयण्जि०
२५७७ " इस सूत्रमें वर्ग, प्रत्याहार, जग्रहणसे द्वित्व
करनेपर णि परे अच् आदेश नहीं हो, यह ऊन धातु
प्रकरणमें कहाहै, इस कारण ढ शब्दको द्वित्व हुआ ।
" प्रकृत्यैकाच् २०१० " से प्रकृतिभाव, वृद्धि और
पुक्‌आगम होकर-स्वापयति। त्वां मां वाचष्टे=त्वापयति । माप-
यति, यहां मपर्यन्त शब्दके स्थानमें त्व और म आदेश पर-
रूपके पूर्वमें नित्यत्वके कारण टिका लोप, वृद्धि और पुगा-
गम हुआ । त्वादयति । मादयति । यह पक्ष तो ठीक है,
कारण कि, अन्तरङ्गत्वके कारण पररूप करनेपर " प्रकृत्यै-
काच् २०१० " इस सूत्रसे प्रकृतिभाव होताहै । भाष्यमें
प्रकृतिभाव प्रत्याख्यात है, यह भ्रम तो नहीं करना चाहिये,
कारण कि, भाष्यके प्रेष्ठादि उदाहरण विशेषोंसे अन्यथा-
सिद्धिपरत्व वर्णन है, नहीं तो ' स्थापयति ' इत्यादि प्रयोग
ही नहीं होंगे । युवाम् आवाम् वा=युष्मयति । अस्मयति ।
श्वानमाचष्टे=शावयति, यहां " नस्तद्धिते ६७९ " इस
सूत्रसे टिका लोप हुआ । प्रकृतिभाव तो नहीं होगा, कारण
कि, " येन नाप्राप्ति " इस न्यायसे वह प्रकृतिभाव "टेः
१७८६ " इस सूत्रका ही बाधक है । भत्वके कारण सम्प्र-
सारण हुआ । अन्य पण्डित तो ' नस्तद्धिते ६७९ " इस
सूत्रसे टिलोपका इस स्थलमें अतिदेश नहीं होगा, कारण कि,
इष्ठन् प्रत्यय परे वह देखा नहीं जाताहै, श्रेष्ठि इत्यादि
स्थलमें भी परत्वके कारण " टेः १७८६ " इस सूत्रकी
ही प्रवृत्ति होतीहै, इस कारण 'शुनयति' ऐसा रूप कहतेहैं ।
विद्वांसमाचष्टे=विद्वयति, यहां कोई २ कहतेहैं, अङ्गवृत्तपरि-
भाषासे सम्प्रसारण नहीं होगा । अन्य मतसे सम्प्रसारण,
वृद्धि और अवादेश होकर ' विदावयति ' ऐसा पद
होगा । और कोई तो नित्यत्वके कारण टिलोपके पूर्वमें
सम्प्रसारण, अन्तरङ्गत्वके कारण पूर्वरूप, पश्चात् टिका
लोप करके 'विदयति' ऐसा रूप कहतेहैं ॥ उदञ्चमाचष्टे=
उदीचयति । उदैचितत् ॥ प्रत्यञ्चम्=प्रतीचयति । प्रत्यचिचत् ।
"इकोऽसवर्णे० ९१" इस सूत्रसे प्रकृतिभाव पक्षमें प्रति-
अचिचत् । सम्यञ्चमाचष्टे=समीचयति । सम्यचिचत्, समिअ-
चिचत् । तिर्यञ्चमाचष्टे=तिराययति, यहां अञ्चु धातुकी टिका
लोप करके अपहार होनेपर भी बहिरंगत्वके कारण असिद्ध
होनेसे तिरस् शब्दके स्थानमें तिरि आदेश हुआ, और "असि-
द्धवदत्र० २९८३" इस सूत्रसे 'चिणो लुक्' इस न्यायके
अनुसार प्रथम टिका लोप असिद्ध हुआ, अत एव पुनर्वार
टिका लोप नहीं हुआ अथवा अङ्गवृत्तपरिभाषासे टिका लोप
नहीं हुआ । चङ् परे अक्‌का लोप होनेके कारण उपधाको
ह्रस्व नहीं होकर–अतितिरायत् ॥ सध्यञ्चमाचष्टे=सध्राययति ।
असमध्रायत् ॥ विष्वद्र्यञ्चम्=अविविष्वद्रायत् ॥ देवद्र्यञ्चम्=
देवद्राययति । अदिदेवद्रायत् ॥ अदद्र्यञ्चम्=अददद्रायत् ।
अदमुयञ्चम्=अदमुआययति । आददमुआयत् ॥ अमुमुयञ्चम् ।
अमुमुआययति । चङ् । आमुमुआयत् ॥ भुवम्=भावयति ।
अबीभवत् ॥ भ्रुवम्=अबुभ्रवत् ॥ श्रियम्=अशिश्रयत् ॥
गाम्=अजूगवत् ॥ रायम्=अरीरयत् ॥ नावम्=अनूनवत् ॥
स्वश्वम्=स्वाशश्वत्॥ स्वराचष्टे, इस विग्रहमें णिच् और अव्य-
यके भमात्रमें टिका लोप होकर–स्वयति । असस्वत् , असि-
स्वत्॥बहून्=भावयति। दूसरेके मतसे बहयति ॥ "विन्मतो०"
इससे लुक् होकर–स्रग्विणम्=स्रजयति । संज्ञापूर्वकत्वके
कारण वृद्धि नहीं हुई । श्रीमतीं–श्रीमन्तं वा=श्रययति । अशि-
श्रयत् । पयस्विनीम्=पयसयति । इस स्थलमें तदपवाद
लुक्की प्रवृत्तिके कारण टिका लोप नहीं हुआ ॥ स्थूलम्=
स्थवयति ॥ दूरम्=दवयति । " स्थूलदूर० " इससे यणादि
लोपको टिलोपापवाद होनेसे–' दूरयत्यवनते विवस्वतीति ' यह
प्रयोग कैसे बना ? इसपर कहतेहैं कि, इस स्थलमें दूरमतति
अयते वा दूरात्–दूरातं कुर्वति, इस विग्रहमें णिच् करके
' दूरयति ' यह प्रयोग है ॥ युवानम्=यवयति । कन-
यति, यहां " युवाल्पयोः० " इस सूत्रसे युव शब्दके स्थानमें
विकल्प करके कन् हुआ ॥ अन्तिकम्=नेदयति ॥ बाढम्=
साधयति । प्रशस्यम्=प्रशस्यति, यहां उपसर्गकी पृथक् कृतिके
कारण श्र और ज्य आदेश नहीं हुआ । वृद्धम्=ज्यापयति,
वर्षयति ॥ प्रियम्=प्रापयति ॥ स्थिरम्=स्थापयति ॥ स्फिरम्=
स्फापयति । उरुम्=वरयति, वारयति ॥ बहुलम्=बंह-
यति ॥ गुरुम्=गरयति ॥ तृप्रम्=त्रपयति । दीर्घम्=द्राघयति ॥
वृन्दारकम्=वृन्दयति ॥

॥ इति नामधातुप्रकरणम् ॥

अथ कण्ड्वादयः ।

२६७८ कण्ड्वादिभ्यो यक् ।३।१।२७॥

एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे।धा-
तुभ्यः किम् । प्रातिपदिकेभ्यो मा भूत् । द्विधा
हि कण्ड्वादयः । धातवः प्रातिपदिकानि च॥

कण्डूञ् गात्रविघर्षणे॥ कण्डूयति-कण्डूयते॥१॥ मन्तु अपराधे ॥ रोष इत्येके । मन्तूयति ॥ चन्द्रस्तु ञितमाह । मन्तूयते ॥ २ ॥ वल्गु पूजामाधुर्ययोः ॥ वल्गूयति ॥ ३ ॥ असु उपतापे॥असु असूञ् इत्येके।अस्यति।असूयति-असूयते ॥ ५ ॥ लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च ॥ दीप्तावित्येके । लेट्यति । लेटिता । लोट्यति । लोटिता ॥ ७ ॥ लेला दीप्तौ ॥८॥ इरस् इरज् इरञ् ईर्ष्यायाम् ॥ इरस्यति । इरज्यति । हलि चेति दीर्घः । ईर्यति । ईर्यते ॥ ११ ॥ उषस् प्रभातीभावे ॥ १२ ॥ वेद धौर्त्ये स्वप्ने च ॥ १३ ॥ मेधा आशुग्रहणे । मेधायति ॥ १४ ॥ कुषुभ क्षेपे ॥ कुषुभ्यति ॥ ॥ १५ ॥ मगध परिवेष्टने ॥ नीचदास्य इत्यन्ये ॥ १६ ॥ तन्तस् पम्पस् दुःखे ॥१८ ॥ सुख दुःख तत्क्रियायाम् ॥ सुख्यति। दुःख्यति। सुखं दुःखं चानुभवतीत्यर्थः ॥ २० ॥ सपर पूजायाम् ॥ २१ ॥ अरर आराकर्मणि ॥ २२ ॥ भिषज् चिकित्सायाम् ॥ २३ ॥ भिष्णज् उपसेवायाम् ॥ २४ ॥ इषुध शरधारणे ॥ २५ ॥ चरण वरण गतौ ॥ २७ ॥ चुरण चौर्ये ॥२८॥ तुरण त्वरायाम् ॥ २९ ॥ भुरण धारणपोषणयोः ॥ ३० ॥ गद्गद वाक्स्खलने ॥ ३१ ॥ एला केला खेला विलासे ॥ इलेत्यन्ये ॥ लेखा स्खलने च। अदन्तोऽयमित्यन्ये लेख्यति॥३६॥ लिट अल्पकुत्सनयोः ॥ लिट्यति ॥ ३७ ॥ लाट जीवने ॥ ३८ ॥ हृणीङ् रोषणे लज्जायां च ॥ ३९ ॥ महीङ् पूजायाम् ॥ महीयते । पूजां लभत इत्यर्थः ॥ ४० ॥ रेखा श्लाघासादनयोः ॥ ४१ ॥ द्रवस् परितापपरिचरणयोः ॥ ॥ ४२ ॥ तिरस् अन्तर्धौ ॥ ४३ ॥ अगद नीरोगत्वे ॥ ४४ ॥ उरस् बलार्थः ॥ उरस्यति । बलवान् भवतीत्यर्थः ॥४५॥ तरण गतौ ॥४६॥ पयस् प्रसृतौ ॥४७॥सम्भूयस् प्रभूतभावे॥४८॥ अम्बर संवर सम्भरणे ॥ ५० ॥ आकृतिगणोऽयम् ॥ * ॥

॥ इति कण्ड्वादयः ॥

२६७८-कण्ड्वादि धातुओंके उत्तर स्वार्थमें नित्य यक् प्रत्यय हो । धातु क्यों कहा ? तो प्रातिपदिकके उत्तर नहीं हो, कण्ड्वादि दो प्रकारके हैं, धातु और प्रातिपदिक । कण्डूञ् धातु गात्रविघर्षणमें है । कण्डूयति । कण्डूयते ॥ मन्तु धातु अपराध और किसीके मतसे रोषमें है । मन्तूयति । चन्द्रमतसे तो मन्तु धातु ञित् अर्थात्, उभयपदी है । मन्तूयते ॥ वल्गु धातु पूजा और माधुर्य्यमें है । वल्गूयति । असु धातु उपतापमें है । असु और असूञ् धातु कोई २ कहतेहैं । अस्यति । असूयति । असूयते ॥ लेट् और लोट् धातु धूर्त्तता, पूर्वभाव और स्वप्न और मतसे दीप्ति अर्थमें है । लेट्यति । लेटिता । लोट्यति । लोटिता ॥ लेला धातु दीप्तिमें है ॥ इरस्, इरज्, इरञ् धातु ईर्ष्यामें हैं । इरस्यति । इरज्यति । "हलि च० ३५४" इस सूत्रसे दीर्घ होकर-ईर्य्यति । ईर्य्यते ॥ उषस् धातु प्रभातीभावमें है ॥ वेद धातु धूर्त्तता और स्वप्नमें है । मेधा धातु आशु (शीघ्र) ग्रहणमें है। मेधायति ॥ कुषुभ धातु क्षेपमें है । कुषुभ्यति ॥ मगध धातु परिवेष्टनमें अन्यमतसे नीचदास्यमें है ॥ तन्तस् और पम्पस् धातु दुःखमें हैं । सुख और दुःख धातु तत्क्रियामें हैं । सुख्यति । दुःख्यति । अर्थात् सुख, दुःखका अनुभव करताहै । सपर धातु पूजामें है । अरर धातु आराकर्म्ममें है ॥ भिषज् धातु चिकित्सामें है ॥ भिष्णज् धातु उपसेवामें है ॥ इषुध धातु शर धारणमें है ॥ चरण और वरण धातु गतिमें हैं ॥ चुरण धातु चौर्य्यमें है ॥ तुरण धातु त्वरा करनेमें है ॥ भुरण धातु धारण और पोषणमें है ॥ गद्गद धातु वाक्स्खलनमें है ॥ एला, केला, खेला और इला धातु विलासमें हैं ॥ लेखा धातु स्खलनमें है । अन्यमतसे यह धातु अदन्त है । लेख्यति ॥ लिट धातु अल्प और कुत्सनमें है । लिट्यति ॥ लाट धातु जीवनमें है ॥ हृणीङ् धातु रोषण और लज्जा में है ॥ महीङ् धातु पूजामें है । महीयते, अर्थात् पूजालाभ करताहै ॥ रेखा धातु श्लाघा और आसादनमें है ॥ द्रवस् धातु परिताप और परिचरणमें है॥तिरस् धातु अन्तर्धानमें है ॥ अगद धातु नीरोगत्वमें है ॥ उरस् धातु बलमें है । उरस्यति, अर्थात् बलवान् होताहै ॥ तरण धातु गतिमें है ॥ पयस् धातु प्रसृतिमें है ॥ संभूयस् धातु प्रभूतभावमें है ॥ अम्बर और संवर धातु सम्भरणमें हैं॥ यह आकृतिगण है ॥

॥ इति कण्ड्वादिप्रकरणम् ॥

अथ प्रत्ययमाला।

कण्डूयतेः सन् ॥ सन्यङोरिति प्रथमस्यैकाचो द्वित्वे प्राप्ते ॥ कण्ड्वादेस्तृतीयस्येति वाच्यम् ॥ * ॥ कण्डूयियिषति । क्यजन्तात्सन् ॥ यथेष्टं नामधातुषु ॥ * ॥ आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः ॥ अजादेस्त्वाद्येतरस्य । पुपुत्रीयिषति । पुतित्रीयिषति । पुत्रीयियिषति । अशिश्वीयिषति । अश्वीयियिषति । नदराणां संयुक्तानामचः परस्यैव द्वित्वनिषेधः । इन्द्रीयतेः सन् । द्रीशब्दयिशब्दयोरन्यतरस्य द्वित्वम् । इन्दिद्रीयिषति । इन्द्रीयियिषति । चिचन्द्रीयिषति । चन्दिद्रीयिषति ।

चन्द्रीयियिषति। प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति । पिप्रापयिषति । प्रापिपयिषति। प्रापयियिषति। उरुं विवारयिषति । वारिरयिषति। वारयियिषति । बाढं सिसाधयिषतीत्यादिरूपत्रयम्। षत्वं तु नास्ति। आदेशो यः सकार इत्युक्तेः । यङ् सन् ण्यन्तात्सन्। बोभूयिषयिषति। यङ् णिच् सन्नन्ताण्णिच्। बोभूययिषतीत्यादि ॥

॥ इति प्रत्ययमाला ॥

कण्डूय धातुके उत्तर सन् प्रत्यय हुआ । "सन्यङोः २३९५" इस सूत्रसे प्रथम एकाच्को द्वित्व प्राप्त होनेपर–

कण्ड्वादिके तृतीय एकाच्को द्वित्व हो, ऐसा कहना चाहिये * इससे यि शब्दको द्वित्व होकर–कण्डूयियिषति। क्यजन्तके उत्तर सन् हुआ।

नामधातुविषयमें यथेष्ट हो, अर्थात् आद्य तीनके मध्यमें अन्यतमको द्वित्व हो* पुपुत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति। अजादि धातुके आदिको छोडकर द्वित्व होगा। अशिश्वीयिषति। अश्वीयियिषति। अच्के ही परे स्थित संयुक्त न, द और रकारको द्वित्व न होताहै, इस कारण इन्द्रीय धातुके उत्तर सन् करनेपर द्री शब्द और यि शब्दके मध्यमें अन्यतरको द्वित्व होगा, इन्दिद्रीयिषति। इन्द्रीयियिषति। चिचन्द्रीयिषति। चन्दिद्रीयिषति। चन्द्रीयियिषति। प्रियम् आख्यातुम् आचक्षाणं प्रेरयितुं वा इच्छति, इस विग्रहमें–पिप्रापयिषति। प्रापिपयिषति। प्रापयियिषति। उरुम्=विवारयिषति। वारिरयिषति। वारयियिषति। बाढम्=सिसाधयिषति, इत्यादि तीन रूप हुए। षत्व तो नहीं होगा, कारण कि, आदेशस्वरूप सकारको षत्व होताहै, ऐसे कह आएहैं। यङ्, सन् और ण्यन्तके उत्तर सन् होकर–बोभूयिषयिषति। यङ्, णिच् और सन्नन्तके उत्तर णिच् होकर–बोभूययिषति, इत्यादि ॥

॥ इति प्रत्ययमालाप्रकरणम् ॥

अथात्मनेपदप्रक्रिया ।

अनुदात्तङित आत्मनेपदम्। आस्ते। शेते ॥

२६७९ भावकर्मणोः । १ । ३ । १३ ॥

बभूवे। अनुबभूवे ॥

२६७९–२१५७–अनुदात्तेत् ङित् धातुसे आत्मनेपद हो। आस्ते। शेते ॥ भाववाच्यमें और कर्मवाच्यमें धातुके उत्तर आत्मनेपद हो, बभूवे। अनुबभूवे ॥

२६८० कर्तरि कर्मव्यतिहारे।१।३।१४॥

क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात्। व्यतिलुनीते। अन्यस्य योग्यं लवनं करोतीत्यर्थः। श्नसोरल्लोपः। व्यतिस्ते । व्यतिषाते। व्यतिषते। तासस्त्योरिति सलोपः । व्यतिसे। धि च। व्यतिध्वे। ह एति। व्यतिहे। व्यत्यसै व्यत्यास्त। व्यतिषीत। व्यतिराते ३। व्यतिभाते ३। व्यतिबभे ॥

२६८०–क्रियाका विनिमय होनेपर कर्तृवाच्यमें आत्मनेपद हो, व्यतिलुनीते, अन्यके योग्य लवन, अर्थात् छेदनको करताहै। "श्नसोरल्लोपः २४६९" इस सूत्रसे अकारका लोप हुआ, व्यतिस्ते। व्यतिषाते। व्यतिषते। "तासस्त्योः० २१९१" इस सूत्रसे सकारका लोप हुआ, व्यतिसे। "धि च २२४९" इससे सलोप होकर व्यतिध्वे। "ह एति २२५०" इससे सको ह होकर–व्यतिहे। व्यत्यसै। व्यत्यास्त। व्यतिषीत। व्यतिराते ३। व्यतिभाते ३। व्यतिबभे ॥

२६८१ न गतिहिंसार्थेभ्यः।१।३।१५॥

व्यतिगच्छन्ति । व्यतिघ्नन्ति ॥ प्रतिषेधे हसादीनामुपसंख्यानम् ॥ * ॥ हसादयो हसप्रकाराः शब्दक्रियाः। व्यतिहसन्ति । व्यतिजल्पन्ति ॥ हरतेरप्रतिषेधः ॥ * ॥ सम्प्रहरन्ते राजानः ॥

२६८१–कर्म्मव्यतिहारमें गत्यर्थक और हिंसार्थक धातुसे आत्मनेपद न हो, व्यतिगच्छन्ति। व्यतिघ्नन्ति।

प्रतिषेधविषयमें हसादिका उपसंख्यान करना चाहिये * हसादि शब्दसे हसप्रकार, शब्द क्रिया समझना। व्यतिहसन्ति। व्यतिजल्पन्ति।

हृ धातुको प्रतिषेध नहीं हो * सम्प्रहरन्ते राजानः ॥

२६८२ इतरेतरान्योन्योपपदाच्च । १ । ३ । १६ ॥

परस्परोपपदाच्चेति वक्तव्यम् ॥ * ॥ इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनंति ॥

२६८२–इतरेतर और अन्योन्य शब्द उपपद होनेपर कर्म्मव्यतिहारमें धातुके उत्तर आत्मनेपद न हो।

परस्पर शब्द उपपद रहते भी न हो ऐसा कहना चाहिये* इतरेतरस्य, अन्योन्यस्य, परस्परस्य वा व्यतिलुनन्ति ॥

२६८३ नेर्विशः । १ । ३ । १७ ॥

निविशते।

२६८३–निपूर्वक विश धातुके उत्तर आत्मनेपद हो, निविशते ॥

२६८४ परिव्यवेभ्यः क्रियः।१।३।१८॥

अकर्त्रभिप्रायार्थमिदम्। परिक्रीणीते । विक्रीणीते। अवक्रीणीते ॥

२६८४–परिपूर्वक, विपूर्वक और अवपूर्वक क्री धातुके उत्तर आत्मनेपद हो, अकर्त्रभिप्रायार्थ यह सूत्र है। परिक्रीणीते। विक्रीणीते। अवक्रीणीते ॥

२६८५ विपराभ्यां जेः । १ । ३ । १९ ॥

विजयते । पराजयते ॥

२६८५-वि और परापूर्वक जि धातुसे आत्मनेपद हो, विजयते । पराजयते ॥

२७८६ आङो दोऽनास्यविहरणे । १ । ३ । २० ॥

आङ्पूर्वाद्ददातेर्मुखविकसनादन्यत्रार्थे वर्तमानादात्मनेपदं स्यात् । विद्यामादत्ते । अनास्येति किम् । मुखं व्याददाति । आस्यग्रहणमविवक्षितम् । विपादिकां व्याददाति । पादस्फोटो विपादिका । नदी कूलं व्याददाति । पराङ्गकर्मकान्न निषेधः ॥ * ॥ व्याददते पिपीलिकाः पतङ्गस्य मुखम् ॥

२६८६-आङ्पूर्वक दा धातुके उत्तर मुखविकसनसे भिन्नार्थमें आत्मनेपद हो, विद्यामादत्ते । मुखविकसन अर्थ होनेपर-तो मुखं व्याददाति । सूत्रमें आस्य पदका ग्रहण अविवक्षित है, इससे विपादिकां व्याददाति । विपादिका शब्दसे पादस्फोट (पीडाविशेष) समझना । नदी कूलं व्याददाति ।

पराङ्गकर्मक दा धातुसे निषेध नहीं हो * व्याददते पिपीलिकाः पतङ्गस्य मुखम् ॥

२६८७क्रीडोऽनुसम्परिभ्यश्च । १ । ३ । २१ ॥

चादाङः । अनुक्रीडते । संक्रीडते । परिक्रीडते । आक्रीडते । अनोः कर्मप्रवचनीयान्न । उपसर्गेण समा साहचर्यात् । माणवकमनुक्रीडति । तेन सहेत्यर्थः । तृतीयार्थ इत्यनोः कर्मप्रवचनीयत्वम् ॥ समोऽकूजने ॥ * ॥ संक्रीडते । कूजने तु । संक्रीडति चक्रम् ॥ आगमेः क्षमायाम् ॥ * ॥ ण्यन्तस्येदं ग्रहणम् । आगमयस्व तावत् । मा त्वरिष्ठा इत्यर्थः ॥ शिक्षेर्जिज्ञासायाम् ॥ * ॥ धनुषि शिक्षते । धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः ॥ आशिषि नाथः ॥ * ॥ आशिष्येवेति नियमार्थं वार्तिकमित्युक्तम् । सर्पिषो नाथते । सर्पिर्मे स्यादित्याशास्त इत्यर्थः । कथं नाथसे किमु पतिं न भूभृतामिति । नाधस इति पाठ्यम् ॥ हरतेर्गतताच्छील्ये ॥ * ॥ गतं प्रकारः । पैतृकमश्वा अनुहरन्ते । मातृकं गावः । पितुर्मातुश्च गतं प्रकारं सततं परिशीलयन्तीत्यर्थः । ताच्छील्ये किम् । मातुरनुहरति ॥ किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम् ॥ * ॥ हर्षादयो विषयाः । तत्र हर्षो विक्षेपस्य कारणम् । इतरे फले ॥

२६८७-अनु, सम्, परि और चकारसे आङ्पूर्वक क्रीड धातुके उत्तर आत्मनेपद हो, अनुक्रीडते । संक्रीडते । परिक्रीडते । आक्रीडते । सम् उपसर्गके साथ साहचर्यके कारण कर्मप्रवचनीय अनुपूर्वक क्रीड धातुके उत्तर आत्मनेपद न होगा, माणवकमनुक्रीडति, अर्थात् माणवकके साथ क्रीडा करताहै । यहां "तृतीयार्थे ५४९" इस सूत्रसे अनु उपसर्गको कर्मप्रवचनीयत्व हुआहै ।

अकूजनार्थमें सम्पूर्वक क्रीड धातुसे आत्मनेपद हो * संक्रीडते । कूजनार्थमें तो संक्रीडति चक्रम् ।

क्षमा अर्थमें आङ्पूर्वक गम धातुसे आत्मनेपद हो * यहां ण्यन्तका ग्रहण है, आगमयस्व तावत् मा त्वरिष्ठा इत्यर्थः।

जिज्ञासार्थमें शिक्ष धातुके उत्तर आत्मनेपद हो * धनुषि शिक्षते, अर्थात् धनुर्विषयक ज्ञानमें शक्त होनेकी इच्छा करताहै ।

आशीर्वादार्थमें नाथ धातुसे आत्मनेपद हो * आशिष्हीमें हो इस नियमके निमित्त यह वार्त्तिक है,ऐसा पहले कह आएहैं। सर्पिषो नाथते । सर्पिमें स्यादित्याशास्ते इत्यर्थः । इस वार्त्तिकके रहते 'नाथसे किमु पतिं न भूभृताम्' यहां आत्मनेपद कैसे हुआ ? तो इस स्थलमें 'नाधसे' ऐसा पाठ करना उचित है ।

गतताच्छील्यमें हृ धातुसे आत्मनेपद हो * गत शब्दसे प्रकार जानना । पैतृकमश्वा अनुहरन्ते मातृकं गावः, अर्थात् पिता और माताके प्रकारको निरन्तर परिशीलन करतेहैं । ताच्छील्यभिन्नार्थमें मातुरनुहरति ।

हर्ष, जीविका और कुलाय करणार्थमें कृ धातुसे आत्मनेपद हो * कृ धातुको हर्षादि विषय है, उसमें हर्ष विक्षेपका कारण और तद्भिन्न जो है वह फल (साध्य) जानना ॥

२६८८ अपाच्चतुष्पाच्छकुनिष्वालेखने । ६ । १ । १४२ ॥

अपात्किरतेः सुट् स्यात् ॥ सुडपि हर्षादिष्वेव वक्तव्यः ॥ * ॥ अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी । श्वा आश्रयार्थी च । हर्षादिष्विति किम् । अपकिरति कुसुमम् । इह तङ्सुटौ न । हर्षादिमात्रविवक्षायां यद्यपि तङ् प्राप्तस्तथापि सुडभावे नेष्यते इत्याहुः । गजोऽपकिरति ॥ आङि नुप्रच्छ्योः ॥ * ॥ आनुते । आपृच्छते ॥ शप उपालम्भे ॥ * ॥ आक्रोशार्थात्स्वरितेतोऽकर्तृगेऽपि फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः । कृष्णाय शपते ॥

२६८८-खननमें अपसे परे स्थित कृ धातुको सुट्का आगम हो, चतुष्पद और शकुनि (पक्षिविशेष) गम्य होनेपर ।

सुट् भी हर्षादि ही अर्थमें हो * अपस्किरते वृषो हृष्टः । कुक्कुटो भक्षार्थी, श्वा आश्रयार्थी च । हर्षादिभिन्नार्थ होनेपर अपकिरति कुसुमम्, इस स्थलमें तङ्

और सुट् नहीं हुआ, यद्यपि हर्षादिमात्र विवक्षामें आत्मनेपदकी प्राप्ति है, तथापि सुट्के अभाव होनेपर नहीं होताहै-गजोऽपकिरति ।

आङ्पूर्वक नु और प्रच्छ धातुसे आत्मनेपद हो* आनुते। आपृच्छते ।

आक्रोशार्थक स्वरितेत् शप धातुसे कर्तृगामी फल न होनेपर भी शपथरूप अर्थमें आत्मनेपद हो * कृष्णाय शपते ॥

२६८९ समवप्रविभ्यः स्थः ।१।३।२२॥

सन्तिष्ठते । स्थाघ्वोरिच्च । समस्थित । समस्थिषाताम् । समस्थिषत । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ॥ आङः प्रतिज्ञायामुपसंख्यानम् ॥ * ॥ शब्दं नित्यमातिष्ठते । नित्यत्वेन प्रतिजानीते इत्यर्थः ॥

२६८९-सम्, अव प्र और विपूर्वक स्था धातुसे आत्मनेपद हो, सन्तिष्ठते । " स्थाघ्वोरिच्च २३८९" इस सूत्रसे इदादेश होकर-समस्थित । समस्थिषाताम् । समस्थिषत । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ।

आङ्पूर्वक स्था धातुसे प्रतिज्ञामें आत्मनेपद हो*शब्दं नित्यमातिष्ठते, अर्थात् नित्यत्वरूपसे प्रतिज्ञा करताहै ॥

२६९० प्रकाशनस्थेयाख्ययोश्च । १ । ३ । २३ ॥

गोपी कृष्णाय तिष्ठते । आशयं प्रकाशयतीत्यर्थः । संशय्य कर्णादिषु तिष्ठते यः । कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः ॥

२६९०-प्रकाशन, अर्थात् ज्ञापन, स्थेय, अर्थात् विवादपद निर्णयकर्त्ता अर्थमें वर्त्तमान स्था धातुसे आत्मनेपद हो, गोपी कृष्णाय तिष्ठते, अर्थात् कृष्णसे आशय प्रकाश करतीहै । ' संशय्य कर्णादिषु तिष्ठते यः ' अर्थात् कर्णादिको निर्णेतृत्वसे आश्रय करताहै ॥

२६९१ उदोऽनूर्ध्वकर्मणि ।१ ।३।२४ ॥

मुक्तावुत्तिष्ठते । अनूर्ध्वेति किम् । पीठादुत्तिष्ठति॥ईहायामेव॥*॥नेह। ग्रामाच्छतमुत्तिष्ठति॥

२६९१-ऊर्ध्व देशसंयोगानुकूलक्रियामें वृत्ति न हो ऐसे उत्पूर्वक स्था धातुसे आत्मनेपद हो, मुक्तावुत्तिष्ठते । ऊर्ध्वदेशसंयोगानुकूलक्रियामें वृत्ति होनेपर तो पीठादुत्तिष्ठति ।

ईहा अर्थात् चेष्टामें ही हो अन्यत्र नहीं*इससे 'ग्रामाच्छतमुत्तिष्ठति'-इस स्थलमें नहीं हुआ ॥

२६९२ उपान्मन्त्रकरणे । १।३। २५ ॥

आग्नेय्याऽऽग्नीध्रमुपतिष्ठते । मन्त्रकरणं किम् । भर्तारमुपतिष्ठति यौवनेन ॥ उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम् ॥ * ॥ आदित्यमुपतिष्ठते । कथं तर्हि स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति । देवतात्वारोपात्। नृपस्य देवतांशत्वाद्वा । गङ्गा यमुनामुपतिष्ठते । उपश्लिष्यतीत्यर्थः । रथिकानुपतिष्ठते । मित्रीकरोतीत्यर्थः । पन्थाः स्रुघ्नमुपतिष्ठते । प्राप्नोतीत्यर्थः ॥ वा लिप्सायामिति वक्तव्यम् ॥*॥ भिक्षुकः प्रभुमुपतिष्ठते-उपतिष्ठति वा । लिप्सया उपगच्छतीत्यर्थः ॥

२६९२-मंत्रकरणार्थमें उपपूर्वक स्था धातुसे आत्मनेपद हो, आग्नेय्याग्नीध्रमुपतिष्ठते । मंत्रकरण न होनेपर भर्त्तारमुपतिष्ठति यौवनेन ।

देवपूजा, सङ्गतिकरण, मित्रकरण और पथ अर्थमें उपपूर्वक स्था धातुसे आत्मनेपद हो*आदित्यमुपतिष्ठते । देवपूजा न होनेसे ' स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ' इस स्थलमें किस प्रकार आत्मनेपद हुआ ? इस पर कहतेहैं कि, देवतात्वारोपके कारण अथवा नृपके देवांशत्वके कारण आत्मनेपद हुआहै । गङ्गा यमुनामुपतिष्ठते, अर्थात् आलिङ्गन करतीहै । रथिकानुपतिष्ठते, अर्थात् मित्रता करताहै । पन्थाः स्रुघ्नमुपतिष्ठते, अर्थात् प्राप्त होताहै ।

लिप्सार्थमें विकल्प करके उक्त कार्य हो * भिक्षुकः प्रभुमुपतिष्ठते, उपतिष्ठति वा, अर्थात् लाभेच्छासे प्रभुके निकट जाताहै ॥

२६९३ अकर्मकाच्च । १ । ३ । २६ ॥

उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्। भोजनकाले उपतिष्ठते । सन्निहितो भवतीत्यर्थः ॥

२६९३-उपपूर्वक अकर्मक स्था धातुके उत्तर आत्मनेपद हो, भोजनकाले उपतिष्ठते, अर्थात् निकटस्थ होताहै ॥

२६९४ उद्विभ्यां तपः । १ । ३ । २७ ॥

अकर्मकादित्येव । उत्तपते । वितपते । दीप्यत इत्यर्थः॥स्वाङ्गकर्मकाच्चेति वक्तव्यम् *॥ स्वमङ्गं स्वाङ्गं न तु अद्रवमिति परिभाषितम् । उत्तपते वितपते वा पाणिम् । नेह सुवर्णमुत्तपति । सन्तापयति विलापयति वेत्यर्थः । चैत्रो मैत्रस्य पाणिमुत्तपति । सन्तापयतीत्यर्थः ।

२६९४-उत् और विपूर्वक अकर्मक तप धातुसे आत्मनेपद हो, उत्तपते । वितपते, अर्थात् दीप्त होताहै ।

स्वाङ्गकर्म्मक होनेपर भी आत्मनेपद हो * इस स्थलमें स्वाङ्गशब्दसे स्वकीय अंग समझना 'अद्रवं मूर्तिमत्स्वाङ्गम्' यह परिभाषित अंग नहीं । उत्तपते । वितपते पाणिम् । यहां नहीं हुआ, जैसे-सुवर्णमुत्तपति, अर्थात् सन्तापित अथवा विलापित करताहै । चैत्रो मैत्रस्य पाणिमुत्तपति अर्थात् सन्तापित करताहै ॥

२६९५ आङो यमहनः । १ । ३।२८॥

आयच्छते । आहते । अकर्मकात्स्वाङ्गकर्मकादित्येव । नेह । परस्य शिर आहन्ति । कथं

तर्हि आजघ्ने विषमविलोचनस्य वक्ष इति भारविः। आहध्वं मा रघूत्तममिति भट्टिश्च। प्रमाद एवायमिति भागवृत्तिः। प्राप्येत्यध्याहारो वा। ल्यब्लोपे पञ्चमीति तु ल्यबन्तं विनैव तदर्थावगतिर्यत्र तद्विषयम्। भेत्तुमित्यादि तुमुन्नन्ताध्याहारो वास्तु। समीपमेत्येति वा॥

२६९५-आङ्पूर्वक यम और हन धातुसे आत्मनेपद हो, आयच्छते। आहते। अकर्म्मक और स्वांगकर्म्मक होनेपर ही होगा अन्यत्र नहीं, इस कारण 'परस्य शिर आहन्ति' इस स्थलमें नहीं हुआ।

स्वांगकर्मक ही हन् धातुसे आत्मनेपद होनेसे 'आजघ्ने विषमविलोचनस्य वक्षः' ऐसा किरातमें और 'आहध्वं मा रघूत्तमम्' ऐसा भट्टिमें किस प्रकारसे प्रयोग सिद्ध हुआ ? तो भागवृत्तिके मतसे यह प्रामादिक है, अथवा 'प्राप्य' इसपदका अध्याहार होगा, "ल्यब्लोपे०" इस सूत्रसे पञ्चमी तो ल्यबन्तके विना ही जिस स्थलमें तदर्थकी अवगति होतीहै, उसी स्थलमें होतीहै, अथवा भेत्तुमित्यादि तुमुन्नन्तका अध्याहार होगा, अथवा 'समीपमेत्य' इसका अध्याहार होगा।

२६९६ आत्मनेपदेष्वन्यतरस्याम्। २।४।४४॥

हनो वधादेशो वा लुङि आत्मनेपदेषु परेषु। आवधिष्ट। आवधिषाताम्॥

२६९६-आत्मनेपद परे रहते लुङ्लकारमें हन् धातुके स्थानमें विकल्प करके वध आदेश हो, आवधिष्ट। आवधिषाताम्॥

२६९७ हनः सिच्। १।२।१४॥

किस्स्यात्। अनुनासिकलोपः। आहत। आहसाताम्। आहसत॥

२६९७-हन् धातुके उत्तर सिच्को कित्व हो, अनुनासिक वर्णका लोप होकर-आहत। आहसाताम्। आहसत॥

२६९८ यमो गन्धने। १।२।१५॥

सिच् कित्स्यात्। गन्धनं सूचनं परदोषाविष्करणम्। उदायत। गन्धने किम्। उदायंस्त पादम्। आकृष्टवानित्यर्थः॥

२६९८-गन्धनार्थमें यम धातुके उत्तर सिच्को कित्व हो, गंधन शब्दसे सूचन,अर्थात् परदोषाविष्करण (पराया दोष प्रगट करना) समझना। उदायत। गन्धनभिन्नार्थमें उदायंस्त पादम्, अर्थात् पादको आकर्षण किए हुए॥

२६९९ समो गम्यृच्छिभ्याम्। १।३।२९॥

अकर्मकाभ्यामित्येव संगच्छते॥

२६९९-अकर्मक संपूर्वक गम् और ऋच्छ धातुके उत्तर आत्मनेपद हो, संगच्छते॥

२७०० वा गमः। १।२।१३॥

गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः। संगसीष्ट-संगंसीष्ट। समगत-समगंस्त। समृच्छिष्यते। अकर्मकाभ्यां किम्। ग्रामं संगच्छति। विदिप्रच्छिस्वरतीनामुपसंख्यानम्॥ * ॥ वेत्तेरेव ग्रहणम्।संवित्ते।संविदाते॥

२७००-गम धातुके उत्तर झलादि लिङ् और सिच्को विकल्प करके कित्व हो, संगसीष्ट, संगंसीष्ट। समगत, समगंस्त। समृच्छिष्यते। अकर्मक न होनेपर तो ग्रामं संगच्छति।

संपूर्वक विद, प्रच्छ और स्वृ धातुसे आत्मनेपद हो * संवित्ते। संविदाते। इस स्थलमें अदादिगणीय विद धातुका ग्रहण है॥

२७०१ वेत्तेर्विभाषा। ७।१।७॥

वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात्। संविद्रते-संविदते। संविद्रताम्-संविदताम्। समविद्रत-समविदत। संपृच्छते। संस्वरते॥ अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्॥ * ॥ अर्तीति द्वयोर्ग्रहणम्। अङ्विधौ त्वियर्तेरेवेत्युक्तम्। मा समृत। मा समृषाताम्। मा समृषतेति। समार्त। समार्षाताम्। समार्षतेति च भ्वादेः। इयर्तेस्तु मा समरत। मा समरेताम्। मा समरन्त। समारत। समारेताम्। समारन्तेति च। संश्रृणुते। संपश्यते। अकर्मकादित्येव। अत एव रक्षांसीति पुरापि संश्रृणुमहे इति मुरारिप्रयोगः प्रामादिक इत्याहुः। अध्याहारो वा इति कथयद्भ्य इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेत्। शृणु।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥१॥

वहति भारम्। नदी वहति स्यन्दत इत्यर्थः। जीवति। नृत्यति। प्रसिद्धेर्यथा। मेघो वर्षति। कर्मणोऽविवक्षातो यथा। हितान्न यः संश्रृणुते स किंप्रभुः॥ उपसर्गादस्यत्यूह्योर्वेति वाच्यम्॥ ॥ * ॥ अकर्मकादिति निवृत्तम्। बन्धं निरस्यति-निरस्यते। समूहति-समूहते॥

२७०१-संपूर्वक विद धातुके परे स्थित झादेशके अत्को विकल्प करके रुट्का आगम हो,संविद्रते,संविदते। संविद्रताम्, संविदताम्। समविद्रत, समविदत। सम्पृच्छते। संस्वरते।

सम्पूर्वक अर्ति (ऋ) श्रु और दृश धातुके उत्तर आत्मनेपद हो * यहां अर्ति, इस पदसे दोनोंका ग्रहण है। अक-

विधिमें तो इयर्त्ति,अर्थात् दिवादिगणीय ऋका ही ग्रहण है।मा समृत । मा समृषाताम् । मा समृषत । समार्त । समर्षाताम् । समार्षत । यह स्वादिगणीय ऋ धातुका है । इयर्त्ति, अर्थात् दिवादिगणीयका तो मा समरत । मा समरेताम् । मा समरंत। समारत । समरेताम् । समारन्त । संश्रृणुते । संपश्यते । अकर्म्मक धातुके उत्तर ही होताहै, इस कारण 'रक्षांसीति पुरापि संश्रृणुमहे' ऐसा मुरारिका प्रयोग प्रामादिक है, अथवा 'कथयद्भयः' इसको अध्याहार करके होगा । इस अकर्मकाधिकारमें हन गमको कैसे अकर्म्मकत्व हुआ ? तो सुनो, धातुका अर्थ भिन्न होनेसे धात्वर्थसे उपसंग्रहमें प्रसिद्धिसे और कर्मकी अविवक्षासे अकर्म्मिका क्रिया होतीहै, जैसे—वहति भारम् । नदी वहति, अर्थात् वहतीहै । जीवति । नृत्यति । प्रसिद्धिसे जैसे—मेघो वर्षति। कर्म्मकी अविवक्षा होनेसे जैसे—'हितान्न यः संश्रृणुते स किंप्रभुः' ।

उपसर्गपूर्वक अस् धातु और ऊह धातुसे विकल्प करके आत्मनेपद हो * यहां 'अकर्मकात्' इसपदकी निवृत्ति हुई । बन्धं निरस्यति, निरस्यते । समूहति, समूहते ॥

२७०२ उपसर्गाद्ध्रस्व ऊहतेः।७।४।२३॥

यादौ क्ङिति । ब्रह्म समुह्यात् । अग्निं समुह्य ॥

२७०२–यकारादि कित्, ङित् प्रत्यय परे रहते उपसर्गके उत्तर ऊह धातुके ऊकारको ह्रस्व हो, ब्रह्म समुह्यात् । अग्निं समुह्य ॥

२७०३ निसमुपविभ्यो ह्वः ।१।३।३०॥

निह्वयते ॥

२७०३–नि, सम्, उप और विपूर्वक ह्वेञ् धातुके उत्तर आत्मनेपद हो, निह्वयते ॥

२७०४ स्पर्धायामाङः । १ । ३ ।३१॥

कृष्णश्चाणूरमाह्वयते । स्पर्धायां किम् । पुत्रमाह्वयति ॥

२७०४–आङ्पूर्वक ह्वेञ् धातुसे स्पर्द्धा अर्थमें आत्मनेपद हो । कृष्णश्चाणूरमाह्वयते । स्पर्धाभिन्नार्थमें यथा–पुत्रमाह्वयति ॥

२७०५ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः । १ । ३ । ३२ ॥

गन्धनं हिंसा । उत्कुरुते। सूचयतीत्यर्थः।सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव। अवक्षेपणं भर्त्सनम् । श्येनो वर्तिकामुदाकुरुते । भर्त्सयतीत्यर्थः।हरिमुपकुरुते। सेवते। परदारान्प्रकुरुते। तेषु सहसा प्रवर्तते।एधो दकस्योपस्कुरुते।गुणमाधत्ते। गाथाः प्रकुरुते । प्रकथयति । शतं प्रकुरुते । धर्मार्थं विनियुङ्क्ते । एषु किम् । कटं करोति ॥

२७०५–गन्धन, अर्थात् हिंसा, अवक्षेपण,सेवन, साहसिक्य, प्रतियत्न, प्रकथन और उपयोगार्थमें कृ धातुसे आत्मनेपद हो, उत्कुरुते, अर्थात् सूचन करताहै । सूचन प्राणवियोगके अनुकूल होनेसे हिंसा ही है।अवक्षेपण शब्दसे भर्त्सना समझना। श्येनो वर्त्तिकामुदाकुरुते, अर्थात् श्येनपक्षी वर्त्तिका(बटेर) को भर्त्सन करताहै । हरिमुपकुरुते,अर्थात् सेवा करताहै। परदारान् प्रकुरुते, अर्थात् परस्त्रियोंमें सहसा प्रवृत्त होताहै । एधो दकस्योपस्कुरुते, अर्थात् लकडी जलका गुण ग्रहण करती है । गाथाः प्रकुरुते, अर्थात् कहताहै । शतम्प्रकुरुते, अर्थात् धर्मार्थ विनियोग करताहै । यह सम्पूर्ण अर्थ न होनेपर कटं करोति ॥

२७०६ अधेः प्रसहने । १ । ३ । ३३॥

प्रसहनं क्षमाऽभिभवश्च । षह मर्षणेऽभिभवे चेति पाठात् । शत्रुमधिकुरुते । क्षमत इत्यर्थः । अभिभवतीति वा ॥

२७०६–प्रसहनार्थमें अधिपूर्वक कृ धातुके उत्तर आत्मनेपद हो, प्रसहन शब्दसे क्षमा और अभिभव समझना क्योंकि, षह धातु मर्षण और अभिभवमें है । शत्रुमधिकुरुते, अर्थात् शत्रुको क्षमा अथवा अभिभव करताहै ॥

२७०७ वेः शब्दकर्मणः । १ । ३।३४॥

स्वरान्विकुरुते । उच्चारयतीत्यर्थः । शब्दकर्मणः किम् । चित्तं विकरोति कामः ॥

२७०७–शब्द यदि कर्म्म हो तो विपूर्वक कृ धातुके उत्तर आत्मनेपद हो, यथा–स्वरान् विकुरुते, अर्थात् स्वर उच्चारण करताहै । शब्द कर्म्म न होनेपर जैसे–चित्तं विकरोति कामः ॥

२७०८ अकर्मकाच्च । १ । ३ । ३५ ॥

वेः कृञ इत्येव । छात्रा विकुर्वते । विकारं लभन्ते इत्यर्थः ॥

२७०८–अकर्म्मक विपूर्वक कृ धातुके उत्तर आत्मनेपद हो, छात्रा विकुर्वते, अर्थात् छात्रगण विकारको प्राप्त होतेहैं ॥

२७०९सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ।१।३।३६।

अत्रोत्सञ्जनज्ञानविगणनव्यया नयतेर्वाच्याः इतरे प्रयोगोपाधयः । तथा हि । शास्त्रे नयते । शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः । तेन च शिष्यसम्माननं फलितम् । उत्सञ्जने । दण्डमुन्नयते । उत्क्षिपतीत्यर्थः । माणवकमुपनयते। विधिना आत्मसमीपं प्रापयतीत्यर्थः। उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते । ज्ञाने । तत्त्वं नयते । निश्चिनोतीत्यर्थः। कर्मकरानुपनयते । भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः । विगणनमृणादेर्निर्यातनम् । करं वि-

जाताहै। सकर्म्मक न होनेपर जैसे—बाष्पमुच्चरति, अर्थात् भाफ ऊपर जाताहै ॥

२७२७ समस्तृतीयायुक्तात् ।१।३।५४॥

रथेन संचरते ॥

२७२७—तृतीयान्तसे युक्त सम् उपसर्गके परे स्थित चर धातुसे आत्मनेपद हो, यथा—रथेन संचरते । रथके द्वारा जाताहै ॥

२७२८ दाणश्च सा चेच्चतुर्थ्यर्थे । १।३।५५॥

संपूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे । दास्या संयच्छते । पूर्वसूत्रे सम इति षष्ठी । तेन सूत्रद्वयमिदं व्यवहितेऽपि प्रवर्तते । रथेन समुदाचरते।दास्या संप्रयच्छते॥

२७२८—तृतीया यदि चतुर्थ्यर्थमें हुई हो तो उस तृतीयान्त पदके योगमें सम्पूर्वक दाण् धातुके उत्तर आत्मनेपद हो, दास्या संयच्छते । पूर्वसूत्रमें ' समः ' यह पद षष्ठीविभक्त्यन्त है, इस कारण व्यवहित होनेपर भी दोनों सूत्र प्रवृत्त होतेहैं, जैसे—रथेन समुदाचरते । दास्या सम्प्रयच्छते ॥

२७२९ उपाद्यमः स्वकरणे ।१।३।५६॥

स्वकरणं स्वीकारः । भार्यामुपयच्छते ॥

२७२९—उपपूर्वक यम धातुके उत्तर स्वकरण अर्थात् स्वीकरणार्थमें आत्मनेपद हो, भार्यामुपयच्छते । भार्याको स्वीकार करताहै ॥

२७३० विभाषोपयमने । १ । २।१६॥

यमः सिच् कित्वा स्याद्विवाहे । रामः सीतामुपायत—उपायंस्त वा । उदवोढेत्यर्थः । गन्धनाङ्गे उपयमे तु पूर्वविप्रतिषेधान्नित्यं कित्त्वम् ॥

२७३०—विवाहार्थमें उपपूर्वक यम धातुके उत्तर विकल्प करके सिच् कित् हो, रामः सीतामुपायत, उपायंस्त वा, अर्थात् रामने सीताके साथ विवाह किया । गंधनाङ्ग उपयम होनेपर तो पूर्वविप्रतिषेधके कारण नित्य कित्व होगा ॥

२७३१ ज्ञाश्रुस्मृदृशां सनः ।१।३।५७॥

सन्नन्तानामेषां प्राग्वत् । धर्मं जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ॥

२७३१—सन् प्रत्ययान्त ज्ञा, श्रु, स्मृ, और दृश धातुके उत्तर आत्मनेपद हो, धर्मं जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ॥

२७३२ नानोर्ज्ञः । १ । ३ । ५८ ॥

पुत्रमनुजिज्ञासति । पूर्वसूत्रस्यैवायं निषेधः । अनन्तरस्येति न्यायात् । तेनेह न।सर्पिषोऽनुजिज्ञासते । सर्पिषा प्रवर्तितुमिच्छतीत्यर्थः । पूर्ववत्सन इति तङ् । अकर्मकाच्चेति केवलाद्विधानात् ॥

२७३२—अनुपूर्वक सन्नन्त ज्ञा धातुके उत्तर आत्मनेपद न हो, पुत्र मनुजिज्ञासति । यह सूत्र ' अनन्तरस्य० ' इस न्यायके अनुसार पूर्वसूत्रका ही निषेधक है।इस कारण इस स्थलमें निषेध नहीं हुआ, जैसे—सर्पिषोऽनुजिज्ञासते, सर्पिष् (घृत) द्वारा प्रवृत्त होनेकी इच्छा करताहै । इस स्थलमें " पूर्ववत्सनः २७३४ " इस सूत्रसे आत्मनेपद हुआ, क्योंकि, " अकर्मकाच्च २७१८ " इस सूत्रसे केवल ज्ञा धातुके उत्तर ही आत्मनेपद विहित हुआहै ॥

२७३३ प्रत्याङ्भ्यां श्रुवः । १ । ३।५९॥

आभ्यां सन्नन्ताच्छ्रुव उक्तं न स्यात् । प्रतिशुश्रूषति । आशुश्रूषति । कर्मप्रवचनीयात्स्यादेव। देवदत्तं प्रतिशुश्रूषते ॥

२७३३—प्रति और आङ्पूर्वक सन्नन्त श्रु धातुके उत्तर आत्मनेपद न हो, प्रतिशुश्रूषति । आशुश्रूषति । कर्म्मप्रवचनीयके उत्तर आत्मनेपद होहीगा,देवदत्तं प्रतिशुश्रूषते।

शदेः शितः । १ । ३ । ६० ॥

म्रियतेर्लुङ्लिङोश्च । १ । ३ । ६१॥

व्याख्यातम् ॥

" शदेः शितः २३६२ " और " म्रियतेर्लुङ्लिङोश्च २५३८ " यह दोनों सूत्र व्याख्यात हैं ॥

२७३४ पूर्ववत्सनः । १ । ३ । ६२ ॥

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् । एदिधिषते । शिशयिषते । निविविक्षते । पूर्ववत्किम् । बुभूषति । शदेरित्यादिसूत्रद्वये सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् । तेनेह न । शिशत्सति । मुमूर्षति ॥

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । १ । ३ । ६३ । एधां चक्रे ॥

२७३४—सन्के पूर्वमें जो धातु उसके तुल्य सन्नन्तके भी उत्तर आत्मनेपद हो, एदिधिषते । शिशयिषते । निविविक्षते । पूर्ववत् क्यों कहा? तो 'बुभूषति'यहां न हो''शदेः० २३६२'' ''म्रियते० २५३८'' इन दो सूत्रोंमें 'सनो न' इस अंशकी अनुवृत्ति करके वाक्यभेदसे व्याख्या होतीहै, इस कारण 'शिशत्सति । मुमूर्षति' इस स्थलमें आत्मनेपद नहीं हुआ ।

''आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य २२४०'' इस सूत्रसे आम्प्रकृतिके तुल्य अनुप्रयुज्यमान कृञ्से भी आत्मनेपद होकर एधाञ्चक्रे ॥

२७३५ प्रोपाभ्यां युजेरयज्ञपात्रेषु । १ । ३ । ६४ ॥

प्रयुङ्क्ते । उपयुङ्क्ते ॥ स्वराद्यन्तोपसर्गा-

दिति वक्तव्यम् ॥ * ॥ उद्युङ्क्ते । नियुङ्क्ते । अयज्ञपात्रेषु किम्। द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति॥

२७३५-यज्ञपात्र साधन न होनेपर प्र और उपपूर्वक युजधातुके उत्तर आत्मनेपदसंज्ञक प्रत्यय हों, प्रयुंक्ते। उपयुंक्ते।

"स्वराद्यन्तोपसर्गात्०" अर्थात् जिन उपसर्गोंके आदिमें अथवा अन्तमें स्वरवर्ण है, उनके उत्तर युज धातुसे आत्मनेपद हो ऐसा कहना चाहिये। * इसी कारण दुर्, निर् और सम् उपसर्गोंके उत्तर युजधातुसे आत्मनेपद न होगा। उद्युंक्ते। नियुंक्ते। यज्ञपात्र साधन होनेपर तो-द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति, यहां आत्मनेपद न हुआ॥

२७३६ समः क्ष्णुवः । १ । ३ । ६५ ॥

संक्ष्णुते शस्त्रम् ॥

२७३६-सम्पूर्वक क्ष्णु धातुके उत्तर आत्मनेपद हो, संक्ष्णुते शस्त्रम्॥

२७३७ भुजोऽनवने । १ । ३ । ६६ ॥

ओदनं भुङ्क्ते । अभ्यवहरतीत्यर्थः । बुभुजे पृथिवीपालः पृथिवीमिव केवलाम् । वृद्धो जनो दुःखशतानि भुंक्ते । इहोपभोगो भुजेरर्थः । अनवने किम् । महीं भुनक्ति ॥

२७३७-अनवनार्थमें भुज धातुके उत्तर आत्मनेपद हो, ओदनं भुंक्ते, अर्थात् चावक भोजन करता है, 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्' 'वृद्धो जनो दुःखशतानि भुंक्ते' इन स्थलोंमें भुज धातुका अर्थ उपभोग कहाहै। अनवन अर्थ न होनेपर तो-महीं भुनक्ति, अवन शब्दसे पालन समझना पृथिवीका पालन करताहै। इस स्थलमें 'भुजोऽदने' ऐसा सूत्र लाघवसे पाणिनिजीने नहीं किया इससे विदित करातेहैं कि, जिस धातुका पालन और दूसरा कोईभी अर्थ है उसी धातुका ग्रहण है ऐसा रौधादिक भुज धातु है, उसीका ग्रहण हुआ॥

२७३८ णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने । १ । ३ । ६७ ॥

ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेत् ण्यन्तेनोच्येत, अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यान्न त्वाध्याने । णिचश्चेति सिद्धेऽकर्त्रभिप्रायार्थमिदम् । कर्त्रभिप्राये तु विभाषोपपदेनेति विकल्पेऽणावकर्मकादिति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते ॥ कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम्। तथा हि। पश्यन्ति भवं भक्ताः । चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः । प्रेरणांशत्यागे । पश्यति भवः । विषयो भवतीत्यर्थः । ततो हेतुमण्णिच् । दर्शयन्ति भवं भक्ताः। पश्यन्तीत्यर्थः। पुनर्ण्यर्थस्याविवक्षायां दर्शयते भवः । इह प्रथमतृतीययोरवस्थयोर्द्वितीयचतुर्थ्योश्च तुल्योर्थः । तत्र तृतीयकक्षायां न तङ् । क्रियासाम्येऽप्यणौ कर्मकारकस्य णौ कर्तृत्वाभावात् । चतुर्थ्यां तु तङ् । द्वितीयामादाय क्रियासाम्यात् । प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च । एवमारोहयते हस्तीत्यप्युदाहरणम् । आरोहन्ति हस्तिनं हस्तिपकाः । न्यग्भावयन्तीत्यर्थः । तत आरोहति हस्ती । न्यग्भवतीत्यर्थः । ततो णिच् । आरोहयन्ति । आरोहन्तीत्यर्थः । तत आरोहयते । न्यग्भवतीत्यर्थः। यद्वा पश्यन्त्यारोहन्तीति प्रथमकक्षा प्राग्वत् । ततः कर्मण एव हेतुत्वारोपाण्णिच्। दर्शयति भवः । आरोहयति हस्ती । पश्यत आरोहतश्च प्रेरयतीत्यर्थः । ततो णिजभ्यां तत्प्रकृतिभ्यां च उपात्तयोर्द्वयोरपि प्रेषणयोस्त्यागे दर्शयते आरोहयते इत्युदाहरणम्। अर्थः प्राग्वत्। अस्मिन्पक्षे द्वितीयकक्षायां न तङ्। समानक्रियत्वाभावाण्णिजर्थस्याधिक्यात्। अनाध्याने किम् । स्मरति वनगुल्मं कोकिलः स्मरयति वनगुल्मः । उत्कण्ठापूर्वकस्मृतौ विषयो भवतीत्यर्थः॥ भीस्म्योर्हेतुभये । १ । ३ । ६८ । व्याख्यातम् ॥

२७३८-णिजन्त धातुके उत्तर आत्मनेपद हो, अणिजन्तावस्थामें जो क्रिया है यदि वही क्रिया णिजन्त धातुसे अभिहित हो, अणिजन्त कालमें जो कर्म कारक वह ण्यन्तकालमें कर्ता हो, आध्यान अर्थात् उत्कंठा पूर्वक स्मरण अर्थमें आत्मनेपद न हो। "णिचश्च २५६४" इस सूत्रसे आत्मनेपद सिद्ध होनेपर यह सूत्र अकर्त्रभिप्रायार्थ है,अर्थात् क्रियाफल कर्तृगामी न होनेपर भी आत्मनेपद होगा, क्रियाफल कर्तृगामी होनेपर तो "विभाषोपपदेन० २७४४" इस सूत्रसे विकल्प करके आत्मनेपदकी प्राप्ति रहते और "अणावकर्मकात्० २७५४" इस सूत्रसे परत्वके कारण परस्मैपदकी प्राप्ति होनेपर-पूर्वविप्रतिषेधसे इसी सूत्रसे आत्मनेपद होगा।

कर्तृस्थ भावक और कर्तृस्थक्रिय उदाहरण हैं,उनको दिखातेहैं यथा, पश्यन्ति भवं भक्ताः। अर्थात् भक्त लोग शिवको चाक्षुषज्ञानविषयीभूत करते हैं। अपरिस्पन्दन साध्य जो धात्वर्थ उसको भाव और परिस्पन्दन साध्य जो धात्वर्थ उसको क्रिया कहते हैं, साधनको कारक कहते हैं। गमन और आरोहणादि स्थलमें सपरिस्पन्द कर्त्ताही क्रिया साधन करताहै। णिजन्तार्थकी अविवक्षा होनेपर पश्यति भवः, अर्थात् शिव स्वयमेव चाक्षुषज्ञानविषय होतेहै उससे हेतुमण्णिच् करनेसे दर्शयंति भवं भक्ताः,भक्त लोग शिवको देखतेहैं।पुनः णिजर्थकी अविवक्षा होनेपर दर्शयते भवः।इस स्थलमें प्रथमा और तृतीया, अवस्थाका और द्वितीया तथा चतुर्थी अवस्थाका अर्थ तुल्य है।

क्रियाकी साम्य होनेपर भी अणिजन्त कालमें कर्म्मकारकको णिजन्तकालमें कर्तृत्वके अभावके कारण उस स्थलमें तृतीयकक्षामें आत्मनेपद न हुआ । द्वितीयासे क्रियाकी समताके कारण और प्रथमा अवस्थामें कर्म भवके कर्ता होनेके कारण चतुर्थ अवस्थामें तङ् हुआ । इसी प्रकार कर्तृस्थ क्रियाका उदाहरण यथा–आरोहयते हस्ती आरोहन्ति हस्तिनं हस्तिपकाः, न्यग्भावयन्ति इत्यर्थः । पश्चात् आरोहति हस्ती न्यग्भवतीत्यर्थः । पश्चात् णिच् हुआ । आरोहयन्ति आरोहन्ति इत्यर्थः । पश्चात् आरोहयते । न्यग्भवतीत्यर्थः । अथवा पश्यन्त्यारोहन्ति यह प्रथमकक्षा पूर्ववत् है । पश्चात् कर्म्मसे ही हेतुत्वारोपके कारण णिच् हुआ । दर्शयति भवः । आरोहयति हस्ती, पश्यत आरोहतश्च प्रेरयतीत्यर्थः । पश्चात् दोनों णिच् करके और दोनों प्रकृतियां करके प्राप्त दोनों प्रेषणोंका त्याग होनेपर-दर्शयते और आरोहयते यह दो उदाहरण हुए, इनका अर्थ पूर्ववत् है । इस पक्षकी द्वितीयकक्षामें समान क्रियाके अभावसे णिजर्थके आधिक्यके कारण तङ् अर्थात् आत्मनेपद नहीं होगा । आध्यानार्थ होनेपर तो–स्मरति वनगुल्मं कोकिलः । स्मरयति वनगुल्मः । अर्थात् उत्कंठापूर्वक स्मृतिके विषयीभूत होताहै । (२५९४) भी और स्मि धातुसे आत्मनेपद हो, यदि उसके हेतुसे भयकी उत्पत्ति हो, यह पूर्वमें कह दियाहै ॥

२७३९ गृधिवञ्च्योः प्रलम्भने।१।३।६९

प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यां प्राग्वत् । माणवकं गर्धयते । वञ्चयते वा । प्रलम्भने किम् । श्वानं गर्धयति । अभिकाङ्क्षामस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । वर्जयतीत्यर्थः ॥ लियः संमाननशालीनीकरणयोश्च । १ । ३।७० । व्याख्यातम् ॥

२७३९–प्रलम्भनार्थमें णिजन्त गृध और वञ्च धातुके उत्तर आत्मनेपद हो, यथा, माणवकं गर्धयते, वञ्चयते वा । प्रतारणार्थसे भिन्नार्थमें, श्वानं गर्धयति । अर्थात् इसकी आकांक्षा उत्पादन करताहै । अहिं वञ्चयति, अर्थात् सर्पको छोडताहै ।(२५९२) सम्मानन शालीनी करणार्थमें लि धातुके उत्तर आत्मनेपद हो ॥

२७४० मिथ्योपपदात्कृञोऽभ्यासे १। ३ । ७१ ॥

णेरित्येव । पदं मिथ्या कारयते । स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदात्किम् । पदं सुष्ठु कारयति । अभ्यासे किम् । सकृत्पदं मिथ्या कारयति ॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले । १ । ३।७२ । यजते । सुनुते । कर्त्रभिप्राये किम् ।ऋत्विजो यजन्ति । सुन्वन्ति॥

२७४०–अभ्यासार्थमें मिथ्याशब्दोपपद णिजन्त कृ धातुके उत्तर आत्मनेपद हो, पदं मिथ्या कारयते । अर्थात् स्वरादि दुष्ट पद बार २ उच्चारण करताहै । मिथ्याशब्दोपपद न होनेपर तो पदं सुष्ठु कारयन्ति । अभ्यासार्थ न होनेपर यथा–सकृत्पदं मिथ्या कारयति ।

स्वरितेत् (यजादि) और ञित् (सुञादि) धातुओंके उत्तर आत्मनेपद हो, यदि क्रियाका फल कर्तृगामी हो–यजते। सुनुते । कर्त्रभिप्राय न होनेपर अर्थात् क्रियाका फल कर्तृगामी न होनेपर तो ऋत्विजो यजन्ति । सुन्वन्ति ॥

२७४१ अपाद्वदः । १ । ३ । ७३ ॥

न्यायमपवदते । कर्त्रभिप्राय इत्येव । अपवदति । णिचश्च । १ । ३ । ७४ । कारयते ॥

२७४१–अपपूर्वक वद धातुके उत्तर आत्मनेपद हो, यथा–न्यायमपवदते क्रियाका फल कर्तृगामी होनेपर ही आत्मनेपद होगा । यहां न हुआ अपवदति । णिजन्तके उत्तर भी आत्मनेपद हो, कारयते ॥

२७४२ समुदाङ्भ्यो यमोऽग्रन्थे । १ । ३ । ७५ ॥

अग्रन्थे इति च्छेदः । व्रीहीन्संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । अग्रन्थे किम् । उद्यच्छति वेदम् । अधिगन्तुमुद्यमं करोतीत्यर्थः । कर्त्रभिप्राये इत्येव ॥

२७४२–क्रियाका फल कर्तृगामी होनेपर सम्, उद् और आङ्से पर अग्रन्थ विषयक यमधातुके उत्तर आत्मनेपद हो, व्रीहीन्संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । ग्रन्थविषयक यम धातुसे आत्मनेपद न हो–उद्यच्छति वेदम्।अर्थात् वेदाध्ययनके निमित्त उद्यम करताहै ॥

२७४३ अनुपसर्गाज्ज्ञः। १ । ३ । ७६॥

गां जानीते। अनुपसर्गात्किम् । स्वर्गं लोकं न प्रजानाति । कथं तर्हि भट्टिः । इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्येति । कर्मणि लिट् । नृपेणेति विपरिणामः ॥

२७४३–उपसर्ग पूर्वमें न हो ऐसे ज्ञा धातुके उत्तर आत्मनेपद हो, यथा, गां जानीते । उपसर्ग पूर्वमें रहते यथा–स्वर्गं लोकं न प्रजानाति । इह आत्मनेपद न हुआ, तो भट्टिमें 'इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य' इस स्थलमें अनुजज्ञे पद किस प्रकारसे सिद्ध हुआ । इस स्थलमें कर्ममें लिट् लकार करनेसे 'नृपेण' इस तृतीयान्त पदकी योजना करनेसे 'अनुजज्ञे' इस पदकी सिद्धि हो सकीहै ॥

२७४४ विभाषोपपदेन प्रतीयमाने । १ । ३ । ७७ ॥

स्वरितञित इत्यादिपञ्चसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात् । स्वं यज्ञं यजति–यजते वा । स्वं कटं करोति–कुरुते वा ।

स्वं पुत्रमपवदति-अपवदते वा। स्वं यज्ञं कारयति-कारयते वा। स्वं व्रीहिं संयच्छति-संयच्छते वा। स्वां गां जानाति-जानीते वा॥

॥ इत्यात्मनेपदप्रक्रिया ॥

२७४४-"स्वरितञितः" इत्यादि पांच सूत्रोंकरके जो आत्मनेपद विहित हुआ है, वह आत्मनेपद उपपदसे क्रियाफल कर्तृगामी प्रतीत होनेपर विकल्प करके हो। यथा-स्वं यज्ञं यजति यजते वा। स्वं कटं करोति कुरुते वा। स्व पुत्रं मपवदति अपवदते वा स्वं यज्ञं कारयति कारयते वा। स्वं व्रीहिं संयच्छति संयच्छते वा। स्वां गां जानाति जानीते वा॥

॥ इति आत्मनेपदप्रकरणं समाप्तम्॥

अथ परस्मैपदप्रक्रिया।

शेषात्कर्तरि परस्मैपदम्।१।३।७८॥ अत्ति॥

आत्मनेपदके निमित्तसे हीन जो धातु उससे कर्ता अर्थमें परस्मैपद हो, (२१५९) अत्ति॥

२७४५ अनुपराभ्यां कृञः।१।३।७९॥

कर्तृगेऽपि फले गन्धनादौ च परस्मैपदार्थमिदम्। अनुकरोति। पराकरोति। कर्तरीत्येव। भावकर्मणोर्मा भूत्। न चैवमपि कर्मकर्तरि प्रसङ्गः। कार्यातिदेशपक्षस्य मुख्यतया तत्र कर्मवत्कर्मणेत्यात्मनेपदेन परेणास्य बाधात्। शास्त्रातिदेशपक्षे तु कर्तरि कर्मेत्यतः शेषादित्यतश्च कर्तृग्रहणद्वयमनुवर्त्य कर्तैव यः कर्ता न तु कर्मकर्ता तत्रेति व्याख्येयम्॥

२७४५-क्रियाका फल कर्तृगामी होनेपर और गंधनादि अर्थोंमें अनुपूर्वक और परापूर्वक कृ धातुके उत्तर कर्त्ता अर्थमें परस्मैपद हो, यथा-अनुकरोति, पराकरोति। इस सूत्रमें कर्तरि इस पदकी अनुवृत्तिसे इस सूत्रसे परस्मैपद भावकर्म न हुआ, जो कहो कि, कर्मकर्तामें इससे परस्मैपद क्यों न हुआ तो इसका उत्तर यह है कि कार्य्यातिदेशकी मुख्यतासे "कर्मवत्कर्मणा०" इस सूत्रसे "अनुपराभ्यां कृञः" इसका बाध हुआ। शास्त्रातिदेश पक्षमें तो "कर्मवत्कर्मणा०"इससे आत्मनेपद नहीं होगा किंतु "भावकर्मणोः" इस करके आत्मनेपद होगा, तो यह सूत्र पूर्व है कैसे "अनुपराभ्यां कृञः" इसका बाध करेगा तो "कर्तरि शप्"इस सूत्रसे "शेषात्कर्तरि०" इस सूत्रसे दोनों कर्तृपदकी अनुवृत्ति करके कर्ताही जो कर्ता उस अर्थमें परस्मैपद हो, ऐसा अर्थ करनेमें इस सूत्रकी कर्मकर्ता अर्थमें प्रवृत्ति न हुई। ऐसी भाष्यकारादिकी व्याख्या जाननी चाहिये॥

२७४६ अभिप्रत्यतिभ्यः क्षिपः।१।३।८०॥

क्षिप प्रेरणे। स्वरितेत्। अभिक्षिपति॥

२७४६-अभिपूर्वक और प्रतिपूर्वक, क्षिप धातुके उत्तर परस्मैपद हो,क्षिप धातु प्रेरणार्थमें है। स्वरितेत् होनेसे परगामी क्रियाफलमें परस्मैपदकी प्राप्ति होनेपर भी कर्तृगामी क्रियाफल रहते हुये भी परस्मैपदार्थ सूत्र है। अभिक्षिपति।

२७४७ प्राद्वहः।१।३।८१॥

प्रवहति॥

२७४७-प्रपूर्वक वह धातुके उत्तर परस्मैपद हो। यथा-प्रवहति॥

२७४८ परेर्मृषः।१।३।८२॥

परिमृष्यति। भौवादिकस्य तु परिमर्षति। इह परेरिति योगं विभज्य वहेरपीति केचित्॥

२७४८-परिपूर्वक मृष धातुके उत्तर कर्तृगामी क्रियाफलमें भी परस्मैपद हो। यथा-परिमृष्यति। भौवादिक मृषधातुका परिमर्षति ऐसा पद होगा। इस स्थलमें "परेः" ऐसा योग विभाग अर्थात् भिन्न सूत्र करके वह धातुके उत्तर भी परस्मैपद होगा, ऐसा कोई कहतेहैं॥

२७४९ व्याङ्परिभ्यो रमः।१।३।८३॥

विरमति॥

२७४९-विपूर्वक, आङ्पूर्वक और परिपूर्वक रम्धातुके उत्तर परस्मैपद हो, यथा-विरमति।

२७५० उपाच्च।१।३।८४॥

यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। अन्तर्भावितण्यर्थोऽयम्॥

२७५०-उपपूर्वक रम्, धातुके उत्तर कर्तृगामी क्रियाफलमें परस्मैपद हो। यथा-यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। यह पद अन्तर्भावितण्यर्थ अर्थात् इसके अन्तरमें णिजन्तका अर्थ निहित है॥

२७५१ विभाषाऽकर्मकात्।१।३।८५॥

उपाद्रमेरकर्मकात्परस्मैपदं वा। उपरमति। उपरमते वा। निवर्तत इत्यर्थः॥

२७५१-उपपूर्वक अकर्मक रम् धातुके उत्तर विकल्प करके परस्मैपद हो। यथा-उपरमति, उपरमते वा। अर्थात् निवृत्त होताहै॥

२७५२ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः।१।३।८६॥

एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्। णिचश्चेत्यस्यापवादः। बोधयति पद्मम्। योधयति काष्ठानि। नाशयति दुःखम्। जनयति सुखम्। अध्यापयति वेदम्। प्रावयति। प्रापयतीत्यर्थः। द्रावयति। विलापयतीत्यर्थः। स्रावयति। स्यन्दयतीत्यर्थः॥

२७५२-णिजन्त, बुध धातु, युध धातु, नश धातु, जन धातु, इङ् धातु, प्रु धातु, द्रु धातु और स्रु धातुके उत्तर कर्त्तामें परस्मैपद हो। यह सूत्र "णिचश्च (२५६४)" इस सूत्रका अपवाद है। यथा-बोधयति पद्मम्। योधयति काष्ठानि।

नाशयति दुःखम् । जनयति सुखम् । अध्यापयति वेदम् । प्रावयति प्रापयतीत्यर्थः । द्रावयति विलापयतीत्यर्थः । स्रावयति स्यन्दयतीत्यर्थः ॥

२७५३ निगरणचलनार्थेभ्यश्च । १ । ३ । ८७ ॥

निगारयति । आशयति । भोजयति । चलति । कम्पयति ॥ अदेः प्रतिषेधः ॥ * ॥ आदयते देवदत्तेन । गतिबुद्धीतिकर्मत्वमादिखाद्योर्नेति प्रतिषिद्धम्। निगरणचलनेतिसूत्रेण प्राप्तस्यैवायं निषेधः। शेषादित्यकर्त्रभिप्राये परस्मैपदं स्यादेव। आदयत्यन्नं बटुना ॥

२७५३-भक्षणार्थक कम्पार्थक ण्यन्त धातुके उत्तर परस्मैपद हो। यथा-निगारयति । आशयति। भोजयति। चलयति । कम्पयति ।

'अदेः प्रतिषेधः' अर्थात् अद् धातुके उत्तर परस्मैपद न हो * । यथा, आदयते देवदत्तेन । "गतिबुद्धि (५४०)" इस सूत्रसे प्राप्त कर्म्म संज्ञाको, "आदिखाद्योर्न" इस वार्तिकसे निषेध होताहै। "निगरणचलन० (२७५३)"इस सूत्रसे प्राप्त जो परस्मैपद उसीका पूर्वोक्त वार्तिककरके निषेध होताहै "शेषात्कर्तरि०" इस सूत्रसे अकर्त्रभिप्रायमें परस्मैपद ही होगा। आदयति अन्नं बटुना ॥

२७५४ अणावकर्मकाच्चित्तवत्कर्तृकात् । १ । ३ । ८८ ॥

ण्यन्तात्परस्मैपदं स्यात्। शेते कृष्णस्तं गोपी शाययति ॥

२७५४-अण्यन्तमें अकर्मक और चित्तवत्कर्तृक जो धातु णिजन्त उससे परस्मैपद हो यथा-शेते कृष्णस्तं गोपी शाययति॥

२७५५ न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । १ । ३ । ८९ ॥

एभ्यो ण्यन्तेभ्यः परस्मैपदं न । पिबतिर्निगरणार्थः। इतरे चित्तवत्कर्तृकाऽकर्मकाः । नृतिश्चलनार्थोऽपि। तेन सूत्रद्वयेन प्राप्तिः। पाययते। दमयते। आयामयते । आयासयते । परिमोहयते। रोचयते। नर्तयते । वादयते । वासयते ॥ धेट उपसंख्यानम् ॥ * ॥ धापयेते शिशुमेकं समीची । अकर्त्रभिप्राये शेषादिति परस्मैपदं स्यादेव। वत्सान्पाययति पयः। दमयन्ती कमनीयतामदम् । भिक्षां वासयति ॥

वा क्यषः । १ । ३ । ९० ॥ लोहितायति-लोहितायते ॥ द्युद्भ्यो लुङि । १ । ३ । ९१ ॥ अद्युतत्-अद्योतिष्ट ॥ वृद्भ्यः स्यसनोः । १ । ३ । ९२ ॥ वर्त्स्यति-वर्तिष्यते । विवृत्सति-विवर्तिषते॥ लुटि च क्लृपः । १ । ३ । ९३ ॥ कल्प्ता । कल्प्तासि-कल्पितासे । कल्प्स्यति-कल्पिष्यते-कल्प्स्यते । चिक्लृप्सति-चिकल्पिषते-चिक्लृप्सते ॥

॥ इति पदव्यवस्था ॥

२७५५-णिजन्त पा धातु दमि धातु, आङ्पूर्वक यम और यस धातु परिपूर्वक मुह धातु और रुचि धातु नृति धातु, वद और वस धातुके उत्तर परस्मैपद न हो । इस स्थलमें पा धातु निगरणार्थक है, इससे 'निगरणचलनार्थे०' इस सूत्रसे परस्मैपदकी प्राप्ति है और इतर जो दम्यादिक धातु हैं चित्तवत्कर्तृक हैं इनसे 'अणावकर्मका०' इस सूत्रसे परस्मैपदकी प्राप्ति है। नृति धातु चलनार्थ भी है इससे 'निगरण०' इस सूत्रसे परस्मैपदकी प्राप्ति है, इस सूत्रसे निषेध हुआ पाययते । दमयते । आयामयते। आयासयते परिमोहयते । रोचयते । नर्त्तयते । वादयते । वासयते ॥

णिजन्त धेट् धातुके उत्तर परस्मैपद हो * जैसे, धापयेते शिशुमेकं समीची । क्रियाफल कर्तृगामी न होनेपर "शेषात् (२१५९)" इत्यादि सूत्रसे परस्मैपद ही होगा। वत्सान् पाययति पयः । दमयन्ती कमनीयतामदम् । "भिक्षां वासयति ।" "वाक्यषः (२६६९) " इस सूत्रसे विकल्प करके परस्मैपद होताहै । लोहितायति, लोहितायते । "द्युद्भ्यो लुङि (२३४५)" इस सूत्रसे विकल्प करके परस्मैपद हो। अद्युतत्-अद्योतिष्ट । "वृद्भ्यः स्यसनोः (२३४७)" इस सूत्रसे विकल्प करके परस्मैपद होगा। वर्त्स्यति-वर्तिष्यते । विवृत्सति-विवर्त्तिषते। "लुटि च क्लृपः (२३५१)" इससे विकल्प करके परस्मैपद हो। कल्प्ता। कल्प्तासि, कल्पितासे। कल्प्स्यति, कल्पिष्यते, कल्प्स्यते। चिक्लृप्सति । चिकल्पिषते, चिक्लृप्सते ॥

॥ इति परस्मैपदप्रकरणं समाप्तम् ॥

अथ भावकर्मप्रक्रिया।

अथ भावकर्मणोर्लडादयः । भावकर्मणोरिति तङ् ॥

इसके अनन्तर भावमें और कर्म्ममें लडादि प्रत्यय हों, पश्चात् "भावकर्मणोः (२६७९)" इस सूत्रसे आत्मनेपद होगा ॥

२७५६ सार्वधातुके यक् । ३ । १ । ६७ ॥

धात्वर्थक प्रत्ययः स्याद्भावकर्मवाचिनि सार्वधातुके परे। भावो भावना उत्पादना क्रिया। सा च धातुत्वेन सकलधातुवाच्या भावार्थकलकारेणानूद्यते । युष्मदस्मद्भ्यां सामानाधिकरण्याभावात्प्रथमपुरुषः । तिङाच्यभावनाया

असत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि । किं त्वेकवचनमेव । तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वादनभिहिते कर्तरि तृतीया । त्वया मयाऽन्यैश्च भूयते । बभूवे ॥

२७५६–भाव वाचक और कर्म्म वाचक सार्वधातुक प्रत्यय परे रहते धातुके उत्तर यक् प्रत्यय हो । इस स्थलमें भावशब्दसे भावना उत्पत्त्यनुकूलव्यापार क्रिया जाननी, इसको धातुत्व होनेके कारण वह सम्पूर्ण धातुओंके वाच्य हैं, वह भावार्थक लकारसे प्रयोग अनुवाद विषयीभूत भी जाती है । युष्मद्के और अस्मद्के साथ भावार्थक तिङ्के सामानाधिकरण्यके अभावके कारण अर्थात् मध्यम और उत्तम पुरुषोंके अविषयमें प्रथम पुरुष ही होगा । तिङ्वाच्य क्रियाके अद्रव्यत्वके कारण अर्थात् तिङ्वाच्य क्रिया कोई द्रव्य नहीं है । इस कारण लिङ्गसंख्याका अन्वय नहीं होताहै, इस कारण द्वित्वादिकी प्रतीति भी नहीं हुई, इस कारण द्विवचनादि नहीं होगा, किन्तु एकवचन ही होगा । एकवचनके औत्सर्गिकत्वके कारण संख्याकी अपेक्षा नहीं होती अत एव अनुक्त कर्त्तामें तृतीया विभक्ति होतीहै । यथा त्वया मया अन्यैश्च भूयते । बभूवे ॥

२७५७ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । ६ । ४ । ६२ ॥

उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च । अयमिट् चिण्वद्भावसन्नियोगशिष्टत्वात्तदभावे न । इहार्धधातुक इत्यधिकृतं सीयुटो विशेषणं नेतरेषामव्यभिचारात् । चिण्वद्भावाद् वृद्धिः । भाविता–भविता । भाविष्यते–भविष्यते । भूयताम् । अभूयत । भूयेत । भाविषीष्ट–भविषीष्ट ॥

२७५७–स्य आदि प्रत्यय परे रहते और भाव कर्म्म गम्यमान रहते उपदेशावस्थामें अर्थात् आद्योच्चारण कालमें जो अच् तदन्त जो धातु उसके और हन, ग्रह, दृश् इन धातुओंके चिण्की समान अर्थात् चिण् परे जो सम्पूर्ण अङ्गकार्य्य होतेहैं, उसी प्रकार अङ्गकार्य्य विकल्प करके हो, स्यादि प्रत्ययको इडागम भी हो । यह इट्, चिण्वद्भाव सन्नियोगशिष्टत्वके कारण उसके अभावमें अर्थात् चिण्वद्भावके अभावमें नहीं होगा । अव्यभिचारके कारण इस स्थानमें अधिकृत जो आर्धधातुक वह सीयुट्का विशेषण है, इतरका विशेषण नहींहै । चिण्वद्भावके कारण वृद्धि होगी । भाविता, भविता । भाविष्यते, भविष्यते । भूयताम् । अभूयत । भूयेत । भाविषीष्ट, भविषीष्ट ॥

२७५८ चिण् भावकर्मणोः । ३ । १ । ६६ ॥

च्लेश्चिण् स्याद्भावकर्मवाचिनि तशब्दे परे । अभावि । अभाविष्यत–अभविष्यत । तिङोक्तत्वात्कर्मणि न द्वितीया । अनुभूयत आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम्–अन्वभविषाताम् । णिलोपः । भाव्यते । भावयांचक्रे । भावयांबभूवे । भावयामासे । इह तशब्दस्य एशि इट् एत्वे च कृते ह एतीति हत्वं न । तासिसाहचर्यादस्तेरपि व्यतिहे इत्यादौ सार्वधातुके एति हत्वप्रवृत्तेरित्याहुः । भाविता । चिण्वदिट आभीयत्वे नासिद्धत्वाण्णिलोपः । पक्षे । भावयिता । भाविष्यते–भावयिष्यते । भाव्यताम् । अभाव्यत । भाव्येत । भाविषीष्ट–भावयिषीष्ट । अभावि । अभाविषाताम्–अभावयिषाताम् । बुभूष्यते । बुभूषांचक्रे । बुभूषिता । बुभूषिष्यते । बोभूय्यते । यङ्लुगन्तात्तु । बोभूयते । बोभवांचक्रे । बोभाविता–बोभविता । अकृत्सार्वेति दीर्घः । स्तूयते विष्णुः । तुष्टुवे । स्ताविता–स्तोता । स्ताविष्यते–स्तोष्यते । अस्तावि । अस्ताविषाताम्–अस्तोषाताम् । गुणोर्तीति गुणः । अर्यते । स्मर्यते । सस्मरे । परत्वान्नित्यत्वाच्च गुणे रपरे कृतेऽजन्तत्वाभावेऽप्युपदेशग्रहणाच्चिण्वदिट् । आरिता–अर्ता । स्मारिता-स्मर्ता । गुणोर्तीत्यत्र नित्यग्रहणानुवृत्तेरुक्तत्वान्नेह गुणः । संस्क्रियते । अनिदितामिति नलोपः । स्रस्यते । इदितस्तु नन्द्यते । सम्प्रसारणम् । इज्यते ॥ अयङ् यि क्ङिति । ७ । ४ । २२ ॥ शय्यते ॥

२७५८–भाववाचक अथवा कर्म्मवाचक त शब्द परे रहते च्लिके स्थानमें चिण् हो । अभावि । अभाविष्यत, अभविष्यत । तिङ्करके उक्त कर्म्ममें द्वितीया नहीं होगी । अनुभूयते आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयंते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम् । अन्वभविषाताम् । णिच्का लोप हो । भाव्यते । भावयाञ्चक्रे । भावयाम्बभूवे । भावयामासे । इस स्थलमें त शब्दके स्थानमें एश् आदेश करनेपर और इट्को एत्व करनेपर "ह एति (२२५०)" इस सूत्रसे हत्व नहीं होगा । तासि प्रत्ययके साहचर्य्यके कारण अस् धातुको भी व्यतिहे इत्यादि प्रयोगोंमें सार्वधातुक प्रत्यय एकार परे रहते हत्वप्रवृत्ति होगी, ऐसा कोई २ कहते हैं । भाविता । चिण्वदिट्को आभीयत्वके कारण असिद्धता होतीहै, अत एव णिका लोप होगा । पक्षमें । भावयिता । भाविष्यते, भावयिष्यते । भाव्यताम् । अभाव्यत । भाव्येत, भाविषीष्ट, भावयिषीष्ट । अभावि । अभाविषाताम् । अभावयिषाताम् । बुभूष्यते

बुभूषाञ्चक्रे । बुभूषिता । बुभूयिष्यते । बोभूय्यते । यङ्लुगन्तके उत्तर यक् होनेपर—बोभूयते। बोभवाञ्चक्रे । बोभाविता, बोभविता ।"अकृत्सार्वधातुकयोर्दीर्घः (२२९८)" इस सूत्रसे दीर्घ होगा । स्तूयते विष्णुः । तुष्टुवे । स्ताविता–स्तोता । स्ताविष्यते, स्तोष्यते । अस्तावि । अस्ताविषाताम् । अस्तोषाताम् । "गुणोऽर्तिसंयोगाद्योः २३८०" इस सूत्रसे गुण हुआ । अर्यते । स्मर्यते । सस्मरे । परत्व और नित्यत्वके कारण गुण और रपर करनेपर अजन्तत्वका अभाव होनेपर भी उपदेश ग्रहणके कारण चिण्वादट् होगा । आरिता–अर्त्ता । स्मरिता–स्मर्त्ता । "गुणोऽर्ति० (२३८०)" इस सूत्रसे नित्य ग्रहणकी अनुवृत्ति उक्त हुई है इस कारण इस स्थानमें गुण नहीं हुआ । संस्क्रियते । "अनिदिताम् (४१५)" इस सूत्रसे नकारका लोप हुआ । स्रस्यते । इदित् धातुके नकारका लोप नहीं होताहै । यथा, नन्द्यते । यज् धातुसे यक् होनेपर सम्प्रसारण हुआ । इज्यते । "अयङ् यि क्ङिति (२६४९)" इस सूत्रसे अयङ् आदेश हुआ–शय्यते ॥

२७५९ तनोतेर्यकि । ६ । ४ । ४४ ॥

आकारोन्तादेशो वा स्यात् । तायते–तन्यते । ये विभाषा । जायते–जन्यते ॥

२७५९–यक् परे रहते तन धातुको विकल्पकरके आकार अन्तादेश हो । तायते–तन्यते । " ये विभाषा (२३१९)" इस सूत्रसे विकल्प करके आकार हो । जायते–जन्यते ॥

२७६० तपोनुतापे च । ३ । १ । ६५॥

तपश्च्लेश्चिण्न स्यात्कर्मकर्तर्यनुतापे च । अन्वतप्त पापेन । पापं कर्तृ तेनाभ्याहत इत्यर्थः। कर्मणि लुङ् । यद्वा पापेन पुंसा कर्त्रा अशोचीत्यर्थः । घुमास्थेतीत्त्वम् । दीयते । धीयते । आदेच इत्यत्राशितीति कर्मधारयादित्संज्ञकशकारादौ निषेधः । एश आदिशित्त्वाभावात्तस्मिन्नात्त्वम् । जग्ले ॥

२७६०–कर्मकर्तामें अनुताप अर्थमें तप धातुके उत्तर च्लिके स्थानमें चिण् न हो । यथा, अन्वतप्त पापेन । पापं कर्तृ तेनाभ्याहतः पापके कारण दुःखी होताहै कर्ममें लुङ् हुआ । अथवा पापेन पुंसा कर्त्रा अशोचीत्यर्थः, अपराधी पुमान् शोकातुर होताहै । "घुमास्था (२४६२) " इस सूत्रसे ईत्व हो । यथा, दीयते । धीयते । "आदेच० २३७०" इस स्थलमें अशिति इस पदमें कर्मधारय समासके कारण इत्संज्ञक शकारादि प्रत्यय परे आकारका निषेध हुआ । इस स्थानमें एश्के आदिशित्त्वके अभावके कारण एश्के परे आत्त्वका निषेध नहीं होगा । जग्ले ॥

२७६१ आतो युक् चिण्कृतोः।७।३।३३

आदन्तानां युगागमः स्याच्चिणि ञिति णिति कृति च । दायिता–दाता । दायिषीष्ट–दासीष्ट । अदायि । अदायिषाताम्–अदिषाताम् । अधायिषाताम्–अधिषाताम् । अग्लायिषाताम्–अग्लासाताम् । हन्यते । अचिण्णलोरित्युक्तेर्हनस्तो न । हो हन्तेरिति कुत्वम् । घानिता–हन्ता । घानिष्यते–हनिष्यते । आशीर्लिङि वधादेशस्यापवादश्चिण्वद्भावः । आर्धधातुके सीयुटीति विशेषविहितत्वात् । घानिषीष्ट । पक्ष । वधिषीष्ट । अघानि । अघानिषाताम्। अहसाताम्।पक्षे वधादेशः।अवधि।अवधिषाताम् । अघानिष्यत–अहनिष्यत। न च स्यादिषु चिण्वदित्यतिदेशाद्वधादेशः स्यादिति वाच्यम्। अङ्गस्येत्यधिकारादाङ्गस्यैवातिदेशात्। गृह्यते । चिण्वदिटो न दीर्घत्वम् । प्रकृतस्य वलादिलक्षणस्यैवेटो ग्रहोऽलिटीत्यनेन दीर्घविधानात् । ग्राहिता-ग्रहीता । ग्राहिष्यते-ग्रहीष्यते । ग्राहिषीष्ट-ग्रहीषीष्ट । अग्राहि । अग्राहिषाताम्-अग्रहीषाताम् । दृश्यते । अदर्शि । अदर्शिषाताम् । सिचः कित्वादम्न। अदृक्षाताम्। गिरितेर्लुङि ध्वमि चतुरधिकं शतम्। तथा हि। चिण्वदिटो दीर्घो नेत्युक्तम् । अगारिध्वम् । द्वितीये त्विटि वृतो वेति वा दीर्घः । अगरीध्वम्-अगरिध्वम् । एषां त्रयाणां लत्वं ढत्वं द्वित्वत्रयं चेति पञ्च वैकल्पिकानि । इत्थं षण्णवतिः । लिङ्सिचोरिति विकल्पत्वादिड्भावे उश्चेति कित्वम् । इत्वं रपरत्वं हलि चेति दीर्घः। इणः षीध्वमिति नित्यं ढत्वम् । अगीर्ढ्वम् । ढवमानां द्वित्वविकल्पेऽष्टौ । उक्तषण्णवत्या सह सङ्कलने उक्ता संख्येति ॥

इट् दीर्घश्चिण्वदिट् लत्वढत्वे द्वित्वत्रिकं तथा ।
इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम् ॥

हेतुमण्ण्यन्तात्कर्मणि लः यक् । णिलोपः । शम्यते मोहो मुकुन्देन ॥

२७६१–चिण् परे रहते और ञित् प्रत्यय,णित् प्रत्यय परे रहते कृत् प्रत्यय परे रहते आकारान्त धातुके उत्तर युक् आगम हो । दायिता–दाता । दायिषीष्ट–दासीष्ट । अदायि । अदायिषाताम्, अदिषाताम् । अधायिषाताम्–अधिषाताम् अग्लायिषाताम्–अग्लासाताम् । हन्यते । "अचिण्णलोः २५७४ " इस कथनसे हन् धातुका तकार अन्तादेश नहीं होगा । " हो हन्तेः ३५८ " इस सूत्रसे कुत्व हुआ । घानिता–हन्ता । घानिष्यते–हनिष्यते। चिण्वद्भाव आशीर्लिङ्में हन् धातुके स्थानमें वधादेशका अपवादहै आर्धधातुक सीयुट् परे रहते चिण्वद्भाव विशेष करके विहित हुआ है । घानिषीष्ट । पक्षे । वधिषीष्ट । अघानि । अघानिषाताम्–अहसाताम् । पक्षमें वध आदेश होकर अवधि । अवधिषाताम् । अघानिष्यत–अहनिष्यत । स्यआदि प्रत्यय परे रहते चिण्वद्भाव हो, इस अतिदेशके कारण वधादेश होगा ऐसा नहीं कहना

चाहिये । क्योंकि "अङ्गस्य (२००) " इस अधिकारके कारण अङ्गाधिकारस्थ कार्यको ही अतिदेश हुआ । यथा, गृह्यते । चिण्वदिट्को दीर्घ नहीं होगा । प्रकृतवलादि लक्षण इट्को "ग्रहोऽलिटि(२५६२)" इस सूत्रसे दीर्घ विहित हुआहै।ग्राहिता–ग्रहीता।ग्राहिष्यते–ग्रहीष्यते।ग्राहिषीष्ट–ग्रहीषीष्ट। अग्राहि । अग्राहिषाताम्–अग्रहीषाताम् । दृश्यते । अदर्शि । अदर्शिषाताम् । सिच्को किद्वत्के कारण अम् नहीं होगा । अदृक्षाताम् । गॄ धातुके उत्तर लुङ्के ध्वम् परे रहते एक सौ चार रूप होंगे । चिण्वदिट्को दीर्घ नहीं होगा, पूर्वमें यह कह दियाहै । यथा, अगारिध्वम् । द्वितीय इट् रहते " वृतो वा २३९१ " इस सूत्रसे विकल्प करके दीर्घ हुआ । अगरीध्वम्, अगरिध्वम् । इन तीन रूपोंके–"अचि विभाषा " इस सूत्रसे रकारके स्थानमें लकार ढत्व और द्वित्वत्रय ऐसे पांच प्रकारके विकल्प होतेहैं । इसी प्रकार छियानवें ९६ रूप होंगे । " लिङ्सिचोः २५२८ " इस सूत्रसे विकल्प करके इट्के अभावपक्षमें "उश्च२३६८" इस सूत्रसे किद्वत्, इत्व रपरत्व और " हलि च ३५४" इस सूत्रसे दीर्घ हुआ। " इणः षीध्वम्० २२४७ " इस सूत्रसे नित्य ढ हुआ । अगीर्ढ्वम् । ढ, व, म, इनके विकल्प करके द्वित्व करनेपर आठ रूप होंगे । " अचो रहाभ्यां द्वे " इस सूत्रसे ढकारको द्वित्व करनेपर दोनों पदके ही वकारको " यणो मयः० " इस वार्त्तिकसे द्वित्व करनेपर चार रूप होंगे । इन चाररूपोंके मकारको " अनचि च " इस सूत्रसे द्वित्व करनेपर आठ प्रकारके रूप होंगे और ९६ के साथ मिलानेसे एकसौ चार प्रकारके रूप होंगे । इट्, दीर्घ, चिण्वदिट्, लत्व और ढत्व, द्वित्वत्रय इन आठके विकल्पसे १०४ रूप होंगे । हेतुमान् जो णिच् तदन्तके उत्तरकर्म्ममें ल, यक् और णिलोप करके शम्यते मोहो मुकुन्देन, ऐसा प्रयोग सिद्ध हुआ है ॥

२७६२ चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । ६ । ४ । ९३ ॥

चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात् । प्रकृता मितां ह्रस्व एव तु न विकल्पितः । ण्यन्ताण्णौ ह्रस्वविकल्पस्यासिद्धेः । दीर्घविधौ हि णिचो लोपो न स्थानिवदिति दीर्घः सिध्यति । ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारम् । भाष्ये तु पूर्वत्रासिद्धे न स्थानिवदित्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः । णाविति जातिपरो निर्देशः । "दीर्घग्रहणं चेदं मास्त्विति" तदाशयः।शामिता-शमिता-शमयिता।शामिष्यते-शमिष्यते-शमयिष्यते।यङन्ताण्णिच्।शंशम्यते।शंशामिता-शंशमिता-शंशमयिता।यङ्लुगन्ताण्णिच्यप्येवम्।भाष्यमते तु यङन्ताण्णिचि चिण्वदिटि दीर्घो नास्तीति विशेषः । ण्यन्तत्वाभावे, शम्यते मुनिना ॥

२७६२–चिण् और णमुल् परे है ऐसी णि परे रहते मित्संज्ञक धातुकी उपधाको विकल्प करके दीर्घ हो । प्रकृत "मितां ह्रस्वः (२५६८) " इस सूत्रमें विकल्पविधान न करके इस स्थानमें विकल्प करके दीर्घ विधान करतेहैं, इस आशङ्कासे कहतेहैं । प्रकृत अर्थात् प्रक्रान्त मित्संज्ञक धातुको विकल्प करके ह्रस्व तो पाणिनिजीने नहीं किया क्योंकि, णिजन्तके उत्तर पुनर्वार णिच् करनेपर विकल्पकरके ह्रस्वकी असिद्धि होगी । दीर्घ विधिमें णिच्का लोप स्थानिवत् नहीं होगा इस कारण दीर्घ सिद्ध होताहै । ह्रस्व विधिमें स्थानिवत्त्व अनिवार्य्य है । भाष्यमें " पूर्वत्रासिद्धे न स्थानिवत् " अर्थात् त्रैपादिक कार्य्य कर्त्तव्य होनेपर स्थानिवत् नहीं होगा, इस परिभाषाको स्वीकार करके "न पदान्त०" इस सूत्रमें द्विर्वचन सवर्ण अनुस्वार दीर्घ, जश्, और चर इन सबका प्रत्याख्यान करदिया है । " णौ " यह जाति परक निर्देश है । उसका फल दिखाते हैं, यथा, इस स्थलमें दीर्घग्रहण नहीं करना चाहिये ह्रस्व विकल्प द्वारा ही इष्टसिद्धि होगी, ऐसा इसका आशय है । शामिता, शमिता । शमयिता।शामिष्यते,शमिष्यते,शमयिष्यते। यङन्तके उत्तर णिच् करके शंशम्यते। शंशामिता,शंशमिता शंशमयिता। यङ्लुगन्तसे णिच् करके कर्ममें लकार करनेपर ही ऐसा रूप होगा।यङन्तके उत्तर णिच् करनेपर इस प्रकार ही रूप होंगे । किन्तु भाष्यके मतमें यङन्तके उत्तर चिण्वदिट् करनेपर दीर्घ नहीं होगा, यही विशेष है णिजन्तके अभावमें शम्यते मुनिना, ऐसा प्रयोग होगा ॥

२७६३ नोदात्तोपदेशस्य मान्तस्यानाचमेः । ७ । ३ । ३४ ॥

उपधाया वृद्धिर्न स्याच्चिणि ञिति णिति कृति च । अशमि । अदमि । उदात्तोपदेशस्येति किम् । अगामि । मान्तस्य किम् । अवादि। अनाचमेः किम् । आचामि ॥ अनाचमिकमिवमीनामिति वक्तव्यम् ॥ * ॥ चिणि आयादय इति णिङभावे । अकामि । णिङ्णिचोरप्येवम् । अवामि । वध हिंसायाम् । हलन्तः । जनिवध्योरिति न वृद्धिः । अवधि । जाग्रोऽविचिण्णल्ङित्स्विस्त्युक्तेर्न गुणः । अजागारि ॥

२७६३–चिण् परे रहते और ञित् णित् कृत् प्रत्यय परे रहते,चम् धातुसे भिन्न उपदेश अवस्थामें उदात्त जो मकारान्त धातु उसकी उपधाकी वृद्धि न हो। अशमि । अदमि । उदात्तोपदेशस्य इस पदको सूत्रमें क्यों किया । अगामि । इस पदमें भी वृद्धिका निषेध होजायगा।मान्तस्य सूत्रमें क्यों किया, " अवादि " यहां भी वृद्धिका निषेध होजायगा । सूत्रमें अनाचमेः क्यों किया,अचामि यहांभी वृद्धिका निषेध होजायगा। ' अनाचमि कमिवमीनामिति वक्तव्यम् ' अर्थात् आङ्पूर्वक चम, कम, वम इन धातुओंसे भिन्न उपदेश अवस्थामें उदात्त जो मान्त धातु उसकी उपधाकी वृद्धि न हो ऐसा

कहना चाहिये * चिण् परे रहते और "आयादय: २३०५" इस सूत्रसे णिङ्के अभाव पक्षमें अकामि इस प्रकार होगा। णिङ् और णिच् प्रत्यय परे रहते इसी प्रकार रूप होगा। अवामि। वध् धातु हिंसामें है। यह हलन्त है "जनिवध्यो: २५१२" इस सूत्रसे वृद्धि नहीं होगी। अवाधि। "जाग्रोऽविचिण्णल्ङित्सु २४८०" इस सूत्रसे गुण नहीं होगा। अजागारि ॥

२७६४ भञ्जेश्च चिणि। ६। ४। ३३॥

नलोपो वा स्यात्। अभाजि-अभञ्जि ॥

२७६४-चिण् परे रहते भञ्ज धातुके नकारका विकल्प करके लोप हो। अभाजि-अभञ्जि ॥

२७६५ विभाषा चिण्णमुलोः।७।१।६९।

लभेर्नुमागमो वा स्यात्। अलम्भि-अलाभि। व्यवस्थितविकल्पत्वात्प्रादेर्नित्यं नुम्। प्रालम्भि। द्विकर्मकाणां तु।

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः

गौर्दुह्यते पयः। अजा ग्रामं नीयते। ह्रियते। कृष्यते। उह्यते। बोध्यते माणवकं धर्मः, माणवको धर्ममिति वा। भोज्यते माणवकमोदनः माणवक ओदनं वा। देवदत्तो ग्रामं गम्यते। 'अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते'। मासो मासं वा आस्यते देवदत्तेन। णिजन्तात्तु प्रयोज्ये प्रत्ययः। मासमास्यते माणवकः ॥

॥ इति भावकर्मप्रक्रिया ॥

२७६५-चिण् और णमुल् प्रत्यय परे रहते लभ् धातुको विकल्प करके नुम्का आगम हो। यथा, अलम्भि-अलाभि। व्यवस्थित विकल्पत्वके कारण प्रपूर्वक लभ् धातुको नित्य नुम् हो। प्रालम्भि। (द्विकर्मक धातुके किस कर्ममें उक्त प्रत्यय होगा इस आशङ्कासे कहते हैं) द्विकर्म धातुओंके मध्यमें दुह धातुसे लेकर १२ धातुओंके उत्तर गौण कर्ममें और नी, हृ, कृष और वह धातुओंके मुख्य कर्ममें प्रत्यय हों, बुद्ध र्थक, भक्षार्थक और शब्द कर्मक धातुओंके इच्छाधीन अर्थात् गौण और मुख्य दोनों कर्मोंमें प्रत्यय होगा, अन्य णिजन्त धातुओंके प्रयोज्य कर्ममें उक्त प्रत्यय होंगे। यथा-गौर्दुह्यते पयः। अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते। बोध्यते माणवकं धर्मः। माणवको धर्मम् इति वा। भोज्यते माणवकमोदनः, माणवक ओदनं वा। देवदत्तो ग्रामं गम्यते। अकर्मक और देशकाल, भाव अध्वावाचक शब्द कर्म होनेपर धातुके उत्तर कर्म और भावमें लकार होगा। मासो मासं वा आस्यते देवदत्तेन। णिजन्त धातुके उत्तर प्रयोज्य कर्ममें प्रत्यय होगा। मासमास्यते माणवकः ॥

॥ इति भावकर्मप्रकरणम् ॥

अथ कर्मकर्तृप्रक्रिया।

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते। स्वव्यापारे स्वतन्त्रत्वात्। तेन पूर्वं करणत्वादिसत्त्वेपि सम्प्रतिकर्तृत्वात्कर्तरि लकारः। साध्वसिश्छिनत्ति। काष्ठानि पचन्ति, स्थाली पचति। कर्मणस्तु कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकास्तेभ्यो भावे कर्तरि च लकारः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्तरि तु ॥

जिस समय सौकार्य्यातिशय द्योतनके लिये कर्त्ताका व्यापार विवक्षित न हो, तब अपने व्यापारकी स्वतंत्रताके निमित्त अन्य कारक भी कर्तृसंज्ञाको प्राप्त होतेहैं, उससे यह सिद्ध हुआ कि, पूर्वमें करणादि होनेपर भी सम्प्रति कर्तृत्वके कारण कर्त्तामें लकार होंगे। साध्वसिश्छिनत्ति। काष्ठानि पचन्ति। स्थाली पचति। कर्म्मके कर्तृत्व विवक्षामें पहिले सकर्म्म भी जो धातु हैं, वे प्रायः अकर्म्मक हैं। इस कारण उससे भावमें और कर्त्तामें लकार होंगे-पच्यते ओदनेन। भिद्यते काष्ठेन। कर्त्तामें प्रत्यय होनेपर तो ॥

२७६६ कर्मवत्कर्मणा तुल्यक्रियः।३। १। ८७॥

कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात्। कार्यातिदेशोऽयम्। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। कर्तुरभिहितत्वात्प्रथमा। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। ननु भावे लकारे कर्तृद्वितीया स्यादस्मादतिदेशादिति चेन्न। लकारवाच्य एव कर्ता कर्मवत्। लिङ्याशिष्यङिति द्विलकारकाल्ल इत्यनुवृत्तेः। भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेः। अत एव कृत्यक्तखलर्थाः कर्मकर्तरि न भवन्ति किंतु भाव एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्विधाभवनं च। सैवेदानीं कर्तृस्था न तु तत्तुल्या। सत्यम्। कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। कर्मणेति किम्। करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। किंच कर्तृस्थक्रियेभ्यो माभूत्। गच्छति ग्रामः। आरोहति हस्ती।

अधिगच्छति शास्त्रार्थः, स्मरति, श्रद्दधाति वा यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पक्वेषु तण्डुलेषु यथा वा च्छिन्नेषु काष्ठेषु तत्र कर्मस्था क्रिया नेतरत्र। न हि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च कर्मस्था। तेन कारिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्। ज्ञानेच्छादिवद्यत्नस्य कर्तृस्थत्वात्। एतेनाऽनुव्यवस्यमानेर्थ इति व्याख्यातम्। कर्तृस्थत्वेन यगभावाच्छ्यनि कृते ओलोपे च रूपसिद्धेः। ताच्छील्यादावयं चानश् न त्वात्मनेपदम्॥ सकर्मकाणां प्रतिषेधो वक्तव्यः॥ *॥ अन्योन्यं स्पृशतः। अजा ग्रामं नयति॥ दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्॥ *॥

२७६६-जिस कर्ताकी क्रिया कर्मस्थ क्रियाके तुल्य हो, वह कर्त्ता कर्म्मवत् हो, यह कार्य्यातिदेश है। अर्थात् इस सूत्रसे कर्म्ममें जो सम्पूर्ण कार्य्य होताहै कर्तामें भी उन सब कार्य्योंका अतिदेश करतेहैं इससे यह हुआ कि, यक् आत्मनेपद, चिण् चिण्वदिट् ये सब कार्य कर्त्तामें लकार करनेपर होंगे, उक्तत्वके कारण कर्तामें प्रथमा होगी। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। भावमें लकार करनेपर इस अतिदेशके कारण कर्तामें द्वितीया विभक्ति होगी, ऐसा नहीं कहना चाहिये। क्योंकि "व्यत्ययो बहुलम्" "लिङ्याशिष्यङ् ३४३४" इस सूत्रस्थ २ लकारोंसे एक लकारकी अनुवृत्तिके कारण "कर्मवत्कर्मणा०" इस सूत्रका ऐसा अर्थ होगा कि लकारवाच्य जो कर्ता वह कर्मवत् हो भावमें प्रत्यय करनेपर लकारसे कर्त्ताकी उपस्थिति नहीं होतीहै, इस कारण कर्म्मकर्तामें कृत्य प्रत्यय, क्त प्रत्यय और खलर्थ प्रत्यय नहीं होंगे, किन्तु केवल भावमें ही होंगे। यथा-भेत्तव्यं कुसूलेन। पच् धातुकी और भिद् धातुकी कर्म्मस्था क्रिया विक्लित्ति और द्विधाभवन है वह इस समय कर्तृस्था है तत्तुल्या नहीं है ऐसा कहो तो सत्य है, कर्म्मत्वावस्था और कर्तृत्वावस्था भेदरूप जो उपाधि तदुपाधिक तत्समानाधिकरण क्रियाके भेदका आश्रयण करके तुल्यत्व व्यवहार किया है। कर्म्मणा यह पद सूत्रमें क्यों किया करण और अधिकरणके साथ तुल्य क्रिया हुई है जिसकी ऐसे कर्त्ताका साध्वसिः छिनत्ति इत्यादि स्थलमें कर्म्मवद्भाव नहीं होगा, और कर्तृस्थक्रियासे न होगा, यथा-गच्छति ग्रामः। आरोहति हस्ती। अधिगच्छति शास्त्रार्थः। स्मरति श्रद्दधाति वा जिस कर्म्ममें क्रियाकृत विशेष दृष्ट है। यथा पक्वेषु तंडुलेषु अथवा जिस प्रकार छिन्नेषु काष्ठेषु उसी स्थलमें कर्मस्था क्रिया है, अन्यत्र नहीं है। पक्वापक्व तंडुलमें जिस प्रकार वैलक्षण्य देखा जाताहै, इस प्रकार गतागत ग्राममें वैलक्षण्यकी उपलब्धि नहीं होती है। कृ धातुका अर्थ उत्पादन है। और उत्पत्ति क्रिया कर्म्मस्था है। उससे, 'कारिष्यते घटः' इत्यादि पद सिद्ध हुए। यत्नार्थ होनेपर 'कारिष्यते घटः' इत्यादि पद सिद्ध नहीं होगा। क्योंकि, ज्ञान और इच्छा इत्यादिके समान यत्नको कर्तृस्थत्व है। अत एव "अनुव्यवस्यमानेर्थे" ऐसी व्याख्या की है, कर्तृस्थत्वके कारण यक्के अभावसे श्यन् करनेपर पश्चात् ओकारका लोप करनेपर उक्त अनुव्यवस्यमान ऐसा पद सिद्ध हुआहै, (कर्म्मवत्त्वाभावमें इस स्थानमें शानच् किस प्रकारसे हुआ? इस आशङ्कासे कहते हैं) इस स्थानमें ताच्छील्यादि अर्थमें चानश् हुआ है आत्मनेपद नहीं हुआहै।

सकर्म्मक धातुके कर्त्ताको कर्म्मवद्भाव नहीं होगा * यथा-अन्योन्यं स्पृशतः। अजा ग्रामं नयति।

सकर्म्मक दुह धातु और पच् धातुका जो कर्त्ता, उसको कर्म्मवद्भाव बहुलसे हो। अर्थात् कहीं होगा कहीं न होगा।*

२७६७ न दुहस्नुनमां यक्चिणौ। ३।१।८९॥

एषां कर्मकर्तरि यक्चिणौ न स्तः। दुहेरनेन यक एव निषेधः। चिण् तु विकल्पिष्यते। शप् लुक्। गौः पयो दुग्धे॥

२७६७-दुह, स्नु और नम् धातुके उत्तर कर्म्मकर्तामें यक् और चिण् प्रत्यय न हो। इस सूत्रसे दुह धातुके केवल यक्का ही निषेध होताहै, चिण् तो विकल्प करके होता है शप्का लुक्, गौः पयो दुग्धे॥

२७६८ अचः कर्मकर्तरि। ३। १।६२॥

अजन्तात् च्लेश्चिण् वा स्यात्कर्मकर्तरि तशब्दे परे। अकारि-अकृत॥

२७६८-कर्म्मकर्तामें त शब्द परे रहते अजन्त धातुके उत्तर जो च्लि उसके स्थानमें विकल्प करके चिण् हो, अकारि, अकृत॥

२७६९ दुहश्च। ३।१।६३॥

अदोहि। पक्षे क्सः। लुग्वेति पक्षे लुक्। अदुग्ध-अधुक्षत। उदुम्बरः फलं पच्यते॥ सृजियुज्योः श्यंस्तु॥ *॥ अनयोः सकर्मकयोः कर्ता बहुलं कर्मवत् यगपवादश्च श्यन्वाच्य इत्यर्थः॥ सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम्॥ *॥ सृज्यते स्रजं भक्तः। श्रद्धया निष्पादयतीत्यर्थः। असर्जि। युज्यते ब्रह्मचारी योगम्॥ भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्॥ *॥ भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः। अलंकुरुते कन्या। अलमकृत। अवकिरते हस्ती। अवाकीर्ष्ट। गिरते। अगीर्ष्ट।

आद्रियते । आद्दत । किरादिस्तुदाद्यन्तर्गणः । चिकीर्षते कटः । अचिकीर्षिष्ट । इच्छायाः कर्तृस्थत्वेपि करोतिक्रियापेक्षमिह कर्मस्थक्रियात्वम् ॥

२७६९–कर्मकर्तामें त शब्द परे रहते दुह धातुके उत्तर च्लिके स्थानमें विकल्प करके चिण् आदेश हो । अदोहि । पक्षमें क्स होगा " लुग्वा (३६५) " इस सूत्रसे पक्षमें लुक् होगा । अदुग्ध, अधुक्षत । उदुम्बरः फलं पच्यते। (काल उदुम्बरं फलं पचति) (ऐसा होनेपर गौण कर्म्म उदुम्बरकी कर्तृत्व विवक्षामें यह उदाहरण है)।

सकर्म्मक सृज धातुका और युज धातुका कर्त्ता विकल्प करके कर्म्मवत् हो और यक्का अपवाद श्यन् हो * ।

सृज धातुका कर्त्ता श्रद्धायुक्त होनेपर कर्म्मवत् हो और श्यन् हो * । सृज्यते सृजं भक्तः । श्रद्धया निष्पादयतीत्यर्थः । असर्जि । युज्यते ब्रह्मचारी योगम् ।

भूषावाचक जो धातु, कृ आदि जो धातु और सन्प्रत्ययान्त जो सम्पूर्ण धातु उनके उत्तर यक्, चिण्, चिण्वदिट् न हो * । अलंकुरुते कन्या । अलमकृत । अवकिरते हस्ती । अवाकीर्ष्ट । गिरते । अगीर्ष्ट । आद्रियते । आद्दत । कृ आदि धातु तुदादि गणीय है । चिकीर्षते कटः । अचिकीर्षिष्ट । इच्छा यद्यपि कर्तृस्था है तथापि करोति क्रियाकी अपेक्षा करके कर्म्मस्थ क्रियात्व है । अत एव चिकीर्षते । इस स्थानमें आत्मनेपद सिद्ध हुआ ॥

२७७० न रुधः । ३ । १ । ६४ ॥

अस्माच्च्लेश्चिण्न । अवारुद्ध गौः । कर्मकर्तरीत्येव । अवारोधि गौर्गोपेन ।

२७७०–रुध धातुके उत्तर जो च्लि उसके स्थानमें चिण् आदेश न हो, अवारुद्ध गौः । इस स्थानमें कर्म्मकर्ताहीमें रुध धातुके उत्तर च्लिके स्थानमें चिण् न हो, इससे यहां च्लिके स्थानमें चिण् होगा । अवारोधि गौर्गोपेन ॥

२७७१ तपस्तपः कर्मकस्यैव । ३ । १ । ८८ ॥

कर्ता कर्मवत्स्यात् । विध्यर्थमिदम् । एवकारस्तु व्यर्थ एवेति वृत्त्यनुसारिणः । तप्यते तपस्तापसः । अर्जयतीत्यर्थः । तपोनुतापे चेति चिण्निषेधात्सिच् । अतप्त । तपःकर्मकस्येति किम् । उत्तपति सुवर्णं सुवर्णकारः ॥ न दुहस्नुनमां यक्चिणौ । ३ । १ । ८९ ॥ प्रस्नुते । प्रास्नाविष्ट–प्रास्नोष्ट । नमते दण्डः । अनंस्त । अन्तर्भावितण्यर्थोऽत्र नमिः ॥ यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम् ॥ * कारयते । अचीकरत । उच्छ्रयते दण्डः । उदशिश्रियत । चिण्वदिट् तु स्यादेव । कारिष्यते । उच्छ्रायिष्यते । ब्रूते कथाः । अवोचत ॥ भारद्वाजीयाः पठन्ति । णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम् ॥ * ॥ पुच्छमुदस्यति । उत्पुच्छयते गौः । अन्तर्भावितण्यर्थतायाम् । उत्पुच्छयते गाम् । पुनः कर्तृत्वविवक्षायाम् । उत्पुच्छयते गौः। उदपुपुच्छत । यक्चिणोः प्रतिषेधाच्छप्चङौ । श्रन्थिग्रन्थ्योराधृषीयत्वाण्णिजभावपक्षे ग्रहणम् । ग्रन्थति ग्रन्थम् । श्रन्थति मेखलां देवदत्तः। ग्रन्थते ग्रन्थः। अग्रन्थिष्ट। श्रन्थते । अश्रन्थिष्ट । क्र्यादिकयोस्तु । श्रथ्नीते । ग्रथ्नीते स्वयमेव । विकुर्वते सैन्धवाः । वल्गन्तीत्यर्थः । वेः शब्दकर्मणोऽकर्मकाच्चेति तङ् । अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे । विकुर्वते सैन्धवाः । व्यकारिष्ट । व्यकारिषाताम् । व्यकारिषत । व्यकृत । व्यकृषाताम् । व्यकृषत ॥

२७७१–तपःकर्मक तप धातुका कर्त्ता कर्म्मवत् हो, यह सूत्र विध्यर्थ है । एवकारका कुछ प्रयोजन नहीं है, इस कारण वृत्यनुसारी आचार्योंने उसको व्यर्थ कहाहै । यथा, तप्यते तपस्तापसः । अर्जयतीत्यर्थः । "तपोऽनुतापे च (२७६०)" इस सूत्रसे चिण् निषेधके कारण सिच् होगा, अतप्त । तपःकर्मकस्य इसको सूत्रमें क्यों किया ? तपति सुवर्णं सुवर्णकारः । यहां कर्मवद्भाव न हुआ । " न दुहस्नुनमां यक्चिणौ (२७६७) " इस सूत्रसे यक् और चिण् प्रत्ययका प्रतिषेध हुआ । प्रस्नुते । प्रास्नाविष्ट, प्रास्नोष्ट । नमते दंडः, अनंस्त । अन्तर्भावितण्यर्थ इस स्थानमें नम् धातु है ।

यक् और चिण् प्रत्ययके प्रतिषेधविषयमें हेतुमण्णिजन्त धातु और श्रि धातु और ब्रू धातु इनको उपसंख्यान करना चाहिये अर्थात् इनसे यक् और चिण्का प्रतिषेध होगा * । कारयते । अचीकरत् । उच्छ्रयते दण्डः । उदशिश्रियत । चिण्वदिट् तो होवेहीगा । कारिष्यते । उच्छ्रायिष्यते । ब्रूते कथाः । अवोचत । भारद्वाजीय आचार्य्योंने ऐसा पाठ कियाहै, यथा–

णिजन्त धातु श्रन्थ, ग्रन्थ और ब्रूञ् धातु और आत्मनेपदी जो अकर्म्मक धातु इन सम्पूर्ण धातुओंके उत्तर यक् और चिण्का प्रतिषेध हो * पुच्छमुदस्यति उत्पुच्छयते गौः जिस स्थानमें णिच्का अर्थ अन्तर्भूत है अर्थात् अन्तर्भावित ण्यर्थ होनेपर उत्पुच्छयते गाम् । पुनर्वार कर्तृत्व विवक्षा करनेपर उत्पुच्छयते गौः । उदपुपुच्छत । यक् और चिण्के प्रतिषेधके कारण शप् और चङ् होगा । श्रन्थ और ग्रन्थ धातुके आधृषीयत्वके कारण णिच्के अभाव पक्षमें यह प्रतिषेध जानना चाहिये । ग्रन्थति ग्रन्थम् । ग्रन्थति मेखलां देवदत्तः । ग्रन्थते ग्रन्थः । अग्रन्थिष्ट । श्रन्थते । अश्रन्थिष्ट । क्र्यादि पठित इन दो धातुओंके श्रथ्नीते । ग्रथ्नीते । ऐसे रूप होंगे । स्वयमेव विकुर्वते सैन्धवाः वल्गन्ति इत्यर्थः । "वेः शब्दकर्मणः २७०७" "अकर्मकाच्च २७०८" इस सूत्रसे आत्मनेपद हुआ । अन्तर्भावितण्यर्थका पुनर्वार प्रेरणांशत्याग करनेपर "विकुर्वते सैन्धवाः" ऐसा प्रयोग होगा । व्यकारिष्ट । व्यकारिषाताम् । व्यकारिषत । व्यकृत । व्यकृषाताम् । व्यकृषत ।

२७७२कुषिरजोः प्राचां श्यन्परस्मैपदं च । ३ । १ । ९० ॥

अनयोः कर्मकर्तरि न यक् किंतु श्यन्परस्मैपदं च । आत्मनेपदापवादः । कुष्यति-कुष्यते पादः । रज्यति-रज्यते वस्त्रम् । यगविषये तु नास्य प्रवृत्तिः । कोषिषीष्ट । रंक्षीष्ट ॥

॥ इति कर्मकर्तृप्रक्रिया ॥

२७७२-कुषि और रञ्ज धातुके कर्म्म कर्तामें यक् न हो, किन्तु विकल्प करके श्यन् और परस्मैपद हो । यह सूत्र आत्मनेपदका अपवाद है । कुष्यति, कुष्यते पादः । रज्यति, रज्यते वस्त्रम् । यक्‌के अविषयमें इसकी प्रवृत्ति नहीं होगी । अर्थात् श्यन् न होगा । कोषिषीष्ट । रङ्क्षीष्ट ।

॥ इति कर्म्मकर्तृप्रकरणम् ॥

अथ लकारार्थप्रक्रिया ।

२७७३अभिज्ञावचने लृट् ।३।२।११२॥

स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्यात् । लङोपवादः । स्मरसि कृष्ण गोकुले वत्स्यामः । एवं बुध्यसे चेतयसे इत्यादियोगेऽपि। तेषामपि प्रकरणादिवशेन स्मृतौ वृत्तिसम्भवात् ॥

२७७३-उपपद स्मृतिबोधक होनेपर भूतानद्यतन अर्थमें धातुके उत्तर लृट् हो, यह लङ्का अपवाद है । यथा,स्मरसि कृष्ण ! गोकुले वत्स्यामः,हे कृष्ण स्मरण है हम गोकुलमें रहते थे । इसी प्रकार बुध्यसे चेतयसे इत्यादि पदोंके प्रयोगमें भी धातुके उत्तर लृट् हो । तिनकी भी अर्थात् बुध्यसे चेतयसे इत्यादि पदोंकी भी प्रकरणादि बलसे स्मृतिविषयमें वृत्तिका सम्भव है ॥

२७७४ न यदि । ३ । २ । ११३ ॥

यद्योगे उक्तं न । अभिजानासि कृष्ण यद्वने अभुञ्ज्महि ॥

२७७४-यत् शब्दके योगमें उक्त विषयमें लृट् न हो । अभिजानासि कृष्ण ! यद्वने अभुञ्ज्महि,हे कृष्ण! स्मरण है जो हमने वनमें भोजन किया था ॥

२७७५ विभाषा साकाङ्क्षे ।३।२।११४॥

उक्तविषये लृड्वा स्यात् । लक्ष्यलक्षणभावेन साकाङ्क्षश्चेद्धात्वर्थः । स्मरसि कृष्ण वने वत्स्यामस्तत्र गाश्चारयिष्यामः । वासो लक्षणं चारणं लक्ष्यम् । पक्षे लङ् । यच्छब्दयोगेऽपि न यदीति बाधित्वा परत्वाद्विकल्पः ॥ परोक्षे लिट् । ३।२। ११५। चकार।उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम् । सुप्तोऽहं किल विललाप । बहु जगद पुरस्तात्तस्य मत्ता किलाहम् ॥ अत्यन्तापह्नवे लिड्वक्तव्यः ॥ * ॥ कलिङ्गेष्ववात्सीः नाहं कलिङ्गाञ्जगाम ॥

२७७५-उपपद स्मृतिबोधक होनेपर लक्ष्यलक्षण भावसे अर्थात् ज्ञाप्यज्ञापकभावके द्वारा धात्वर्थ यदि साकांक्ष हो तो विकल्प करके लृट् हो । यथा, स्मरसि कृष्ण ! वने वत्स्यामस्तत्र गाश्चारयिष्यामः। इस स्थानमें वास लक्षण है,और चारण लक्ष्य है पक्षमें लङ् होगा । यत् शब्दके योगमें "न यदि २७७४"इस सूत्रको बाधकर परत्वके कारण विकल्प करके लृट् हुआ । "परोक्षे लिट्२१७१" इस सूत्रसे लिट् हुआ । चकार । उत्तम पुरुष विषयमें चित्त विक्षेपादिसे परोक्ष जानना चाहिये । "सुप्तोऽहं किल विललाप ।" " बहु जगद पुरस्तात्तस्य मत्ता किलाहम् " ।

"अत्यन्तापह्नवे लिड्वक्तव्यः (२०८४) " अत्यन्त अपह्नव अर्थात् अपलापार्थ होनेपर धातुके उत्तर लिट् हो * "कलिङ्गेष्ववात्सीः नाहं कलिङ्गाञ्जगाम" ॥

२७७६हशश्वतोर्लङ् च । ३ ।२।११६॥

अनयोरुपपदयोर्लिड्विषये लङ् स्यात् । चाल्लिट् । इति हाकरोच्चकार वा । शश्वदकरोच्चकार वा ॥

२७७६—ह और शश्वत् शब्द उपपद होनेपर धातुके उत्तर लिट् विषयमें लङ् हो । चकार निर्देशके कारण लिट् भी हो । इति हाकरोच्चकार वा । शश्वदकरोच्चकार वा ॥

२७७७ प्रश्ने चासन्नकाले ।३।२।११७॥

प्रष्टव्यः प्रश्नः आसन्नकाले पृच्छ्यमानेऽर्थे लिड्विषये लङ्लिटौ स्तः । अगच्छत्किम्।जगाम किम् । अनासन्ने तु कंसं जघान किम् ॥

२७७७-आसन्नकालिक जिज्ञासितार्थ होनेपर लिट् विषयमें धातुके उत्तर लङ् और लिट् हो । अगच्छत् किम् । जगाम किम्,क्या अभी गये। जिस स्थानमें आसन्न कालिकार्थ नहीं है, उस स्थानमें 'कंसं जघान किम्', इस प्रकार होगा ॥

२७७८ लट् स्मे । ३ । २ । ११८ ॥

लिटोऽपवादः । यजति स्म युधिष्ठिरः ॥

२७७८-स्म शब्द उपपद रहते धातुके उत्तर लिट्के अर्थमें लट् हो यह सूत्र लिट्का अपवाद है । यजति स्म युधिष्ठिरः ॥

२७७९ अपरोक्षे च । ३ । २ । ११९ ॥

भूतानद्यतने लट् स्यात् स्मयोगे । एवं स्म पिता ब्रवीति ॥

२७७९-परोक्षसे भिन्न भूतानद्यतन अर्थ होनेपर स्म शब्दके योगमें धातुके उत्तर लट् हो । एवं स्म पिता ब्रवीति। यह बात पिताने कही थी ॥

२७८० ननौ पृष्टप्रतिवचने।३।२।१२०॥

अनद्यतने परोक्ष इति निवृत्तम् । भूते लट् स्यात् । अकार्षीः किम् । ननु करोमि भोः ॥

२७८०–अनद्यतन परोक्ष इस स्थलसे निवृत्त हुआ ननु शब्दके योगमें प्रत्युत्तर अर्थ होनेपर भूतकालमें धातुके उत्तर लट् हो। अकार्षीः किं ननु करोमि भोः ॥

२७८१ नन्वोर्विभाषा । ३ । २ ।१२१॥

अकार्षीः किम् । न करोमि । नाकार्षम् । अहं नु करोमि । अहं न्वकार्षम् ॥

२७८१–प्रत्युत्तर अर्थ होनेपर न शब्द और नु शब्दके योगमें भूतकालमें धातुके उत्तर लट् विकल्प करके हो । अकार्षीः किम्। क्या तुमने यह कार्य किया । न करोमि नहीं किया । पक्षमें लुङ् होगा । नाकर्षम् । अहं नु करोमि। पक्षमें अहं न्वकार्षम् ॥

२७८२ पुरि लुङ् चास्मे । ३।२।१२२॥

अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्तते । पुराशब्दयोगे भूतानद्यतने विभाषा लुङ् चाल्लट् न तु स्मयोगे । पक्षे यथाप्राप्तम् । वसन्तीह पुरा छात्राः अवात्सुः अवसन् ऊषुर्वा । अस्मे किम् । यजति स्म पुरा ॥ भविष्यतीत्यनुवर्तमाने ॥

२७८२–मंडूकप्लुतिन्यायसे अनद्यतन ग्रहणकी अनुवृत्ति होगी । पुराशब्दके योगमें भूतानद्यतन अर्थ होनेपर विकल्प करके लुङ् हो, और सूत्रमें चकार ग्रहण करनेके कारण लट् भी होगा, किन्तु स्म शब्दके योगमें नहीं होगा । लुङ् और लट्के अभाव पक्षमें लङ् और परोक्षमें लिट् होगा, यथा, वसन्तीह पुरा छात्राः अवात्सुः अवसन् ऊषुर्वा । स्म शब्दके योगमें–यजति स्म पुरा । " भविष्यति गम्यादयः " इस सूत्रसे भविष्यति पदकी अनुवृत्ति होगी ॥

२७८३ यावत्पुरानिपातयोर्लट्।३।३।४॥

यावद्भुङ्क्ते । पुरा भुङ्क्ते । निपातावेतौ निश्चयं द्योतयतः । निपातयोः किम् । यावद्दास्यते तावद्भोक्ष्यते । करणभूतया पुरा यास्यति ॥

२७८३–निपात संज्ञक यावत् और पुरा शब्दके योगमें भविष्यत् कालमें लट् हो । यथा, यावद्भुंक्ते । पुरा भुंक्ते । निपातसंज्ञक यावत् और पुरा शब्द निश्चयार्थक हैं । निपातसंज्ञक न होनेपर उनके उत्तर लट् होगा । यथा, यावत् दास्यते तावद्भोक्ष्यते । करणभूतया पुरा यास्यति ॥

२७८४ विभाषा कदाकर्ह्योः । ३।३।५॥

भविष्यति लट् वा स्यात् । कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा ॥

२७८४––कदा और कर्हि शब्दके योगमें भविष्यत्कालमें विकल्प करके लट् हो । यथा,कदा कर्हि वा भुंक्ते भोक्ष्यते भोक्ता वा ॥

२७८५ किंवृत्ते लिप्सायाम्।३।३।६॥

भविष्यति लड्वा स्यात् । कं कतरं कतमं वा भोजयसि भोजयिष्यसि भोजयितासि वा। लिप्सायां किम् । कः पाटलिपुत्रं गमिष्यति ॥

२७८५–किं शब्दसे निष्पन्न जो शब्द उसके योगमें लिप्सा अर्थमें भविष्यत् कालमें धातुके उत्तर विकल्प करके लट् हो। कं कतरं कतमं वा भोजयसि, दोनोंमें किसको और सब लोगोंमें किसको भोजन करावोगे । भोजयिष्यसि, भोजयितासि वा । जिस स्थानमें लिप्सार्थ नहीं है, उस स्थानमें कः पाटलिपुत्रं गमिष्यति । यहां लट् न हुआ ।

२७८६ लिप्स्यमानसिद्धौ च ।३।३।७॥

लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड्वा स्यात् । योऽन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा ॥

२७८६–लिप्स्यमान अन्नादिसे स्वर्गादिकी सिद्धि गम्यमान होनेपर भविष्यत् कालमें विकल्प करके लट् हो । योऽन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा ।

२७८७ लोडर्थलक्षणे च । ३ । ३ ।८॥

लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लड्वा स्यात् । कृष्णश्चेद्भुङ्क्ते त्वं गाश्चारय । पक्षे लट्लृटौ ॥

२७८७–जिसके द्वारा लोट्के अर्थ प्रैषादि लक्षित हों, उस अर्थमें वर्तमान जो धातु उसके उत्तर भविष्यत् कालमें विकल्प करके लट् हो । यथा, कृष्णश्चेद्भुंक्ते त्वं गाश्चारय । कृष्णके भोजन कालमें तुम गाय चरावो । पक्षमें लट् और लृट् होगा ॥

२७८८ लिङ् चोर्ध्वमौहूर्तिके ३।३।९॥

ऊर्ध्वं मुहूर्ताद्भवः ऊर्ध्वमौहूर्तिकः । निपातनात्समासः उत्तरपदवृद्धिश्च । ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्षणे वर्तमानाद्धातोर्लिङ्लटौ वा स्तः । मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा । अथ त्वं छन्दोधीष्व ॥

२७८८–ऊर्ध्वं मुहूर्त्तात् भवः इस विग्रहमें ऊर्ध्वमौहूर्त्तिकः पद सिद्ध हुआ । इस स्थानमें निपातनसे समास और उत्तर पदको वृद्धि हुई है। ऊर्ध्व मुहूर्त्तसे उत्पन्न अर्थात् मुहूर्त्तकी अपेक्षा अधिक कालमें लोडर्थ लक्षण अर्थमें वर्तमान जो धातु उससे भविष्यत् कालमें विकल्प करके लिङ् और लट् हो । मुहूर्त्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति आगन्ता वा, अथ त्वं छन्दोऽधीष्व ॥

२७८९ वर्तमानसामीप्ये वर्तमानवद्वा । ३ । ३ । १३१ ॥

समीपमेव सामीप्यम् । स्वार्थे ष्यञ् । वर्तमाने लडित्यारम्भ उणादयो बहुलमिति यावत् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमान-

समीपे भूते भविष्यति च वा स्युः । कदा आगतोसि । अयमागच्छामि । अयमागमम् । कदा गमिष्यसि । एष गच्छामि । गमिष्यामि वा ॥

२७८९–समीपमेव इस विग्रहमें स्वार्थमें ष्यञ् प्रत्यय करके सामीप्य पद सिद्ध हुआ । " वर्तमाने लट् २१५१ " इस सूत्रसे " उणादयो बहुलम् ३१६९ " इस सूत्रपर्यंत जिन २ धातुओंके उत्तर जो २ प्रत्यय विहित हुए हैं, वे सम्पूर्ण प्रत्यय इस वर्त्तमान सामीप्य भूत कालमें और वर्त्तमान सामीप्य भविष्यत् कालमें विकल्प करके हों । यथा, कदा आगतोऽसि । अयमागच्छामिऽअयमागमम् । कदा गमिष्यसि । एष गच्छामि, गमिष्यामि वा ॥

२७९० आशंसायां भूतवच्च।३।३।१३२।

वर्तमानसामीप्य इति नानुवर्तते । भविष्यति काले भूतवद्वर्तमानवच्च प्रत्यया वा स्युराशंसायाम् । देवश्चेदवर्षीत् वर्षति वर्षिष्यति वा। धान्यमवाप्स्म वपामः वप्स्यामो वा । सामान्यातिदेशे विशेषानतिदेशस्तेन लङ्लिटौ न ॥

२७९०–" वर्त्तमानसामीप्ये " इस पदकी इस स्थानमें अनुवृत्ति नहीं होगी । आशंसा अर्थमें भविष्यत् कालमें भूत कालकी और वर्त्तमान कालकी समान सम्पूर्ण प्रत्यय विकल्प करके हों । यथा, देवश्चेदवर्षीत् वर्षति वर्षिष्यति वा धान्यमवाप्स्म, वपामः, वप्स्यामो वा । सामान्यका अतिदेश होनेपर विशेषका अतिदेश नहीं होगा । अत एव इस स्थलमें लङ् और लिट् नहीं हुआ ॥

२७९१ क्षिप्रवचने लृट् । ३ ।३।१३३॥

क्षिप्रपर्याये उपपदे पूर्वविषये लृट् स्यात् । वृष्टिश्चेत्क्षिप्रमाशु त्वरितं वाऽऽयास्यति शीघ्रं वप्स्यामः । नेति वक्तव्ये लृड्ग्रहणं लुटोऽपि विषये यथा स्यात् । श्वः शीघ्रं वप्स्यामः ॥

२७९१–क्षिप्र पर्याय शब्द अर्थात् क्षिप्र, आशु, त्वरित, शीघ्र, द्रुत, सत्वर इत्यादि यदि उपपद हों, तो पूर्व विषयमें अर्थात् भविष्यत् कालमें लृट् हो । यथा, वृष्टिश्चेत् क्षिप्रम् आशु त्वरितं वा यास्यति शीघ्रं वप्स्यामः । क्षिप्रवचने न ऐसा सूत्र करनेपर कार्यकी सिद्धि रहते जो लृड्ग्रहण किया इससे लुट्के विषयमें भी लृट् होताहै । यथा, श्वः शीघ्रं वप्स्यामः ॥

२७९२ आशंसावचने लिङ्।३।३।१३४।

आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न तु भूतवत् । गुरुश्चेदुपेयादाशंसेऽधीयीय । आशंसे क्षिप्रमधीयीय ॥

२७९२–आशंसावाचक उपपद रहते भविष्यत् कालमें लिङ् हो अतीतके और वर्त्तमानके समान प्रत्यय न हो । यथा, गुरुश्चेदुपेयादाशंसेऽधीयीय आशंसे क्षिप्रमधीयीय ॥

२७९३ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः । ३ । ३ । १३५ ॥

क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न । यावज्जीवमन्नमदाद्दास्यति वा । सामीप्यं तुल्यजातीयेनाव्यवधानम् । येयं पौर्णमास्यतिक्रान्ता तस्याममीनाधित । सोमेनायष्ट । येयममावास्याऽऽगामिनी तस्याममीनाधास्यते । सोमेन यक्ष्यते ॥

२७९३–क्रियाका सातत्य और सामीप्य अर्थ गम्यमान होनेपर लङ् और लुट् नहीं हो । यथा, यावज्जीवमन्नमदाद्दास्यति वा । सामीप्य शब्दका अर्थ तुल्यजातीयके साथ अव्यवधान है । यथा, येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित । सोमेनायष्ट । येयममावास्यागामिनी तस्यामग्नीनाधास्यते, सोमेन यक्ष्यते ॥

२७९४ भविष्यति मर्यादावचनेऽवरस्मिन् । ३ । ३ । १३६॥

भविष्यति काले मर्यादोक्तावस्मिन्प्रविभागेऽनद्यतनवन्न । योयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तूनपास्यामः ॥

२७९४–भविष्यत् कालमें मर्यादोक्ति रहते अवरदेशमें विभाग गम्यमान रहते अनद्यतनवत् प्रत्यय नहीं हो (इस सूत्रमें देशकृत मर्यादा जाननी चाहिये)यथा,योऽयमध्वा गन्तव्य आपाटलिपुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून्पास्यामः ॥

२७९५ कालविभागे चानहोरात्राणाम् । ३ । ३ । १३७ ॥

पूर्वसूत्रं सर्वमनुवर्तते । अहोरात्रसम्बन्धिनि विभागे प्रतिषेधार्थमिदम् । योगविभाग उत्तरार्थः । योयं वत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । अनहोरात्राणां किम् । योयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः तत्राध्येतास्महे ॥

२७९५–इस सूत्रमें सम्पूर्ण पूर्व सूत्रकी अनुवृत्ति आती है । भविष्यत् कालमें मर्यादोक्ति रहते अहोरात्र सम्बन्धी विभागमें अनद्यतनवत्प्रत्यय न हो यह निषेध न हो । यह सूत्र अहोरात्रसंबन्धी विभागमें प्रतिषेधके निमित्त है योगविभाग उत्तर सूत्रमें अनुवृत्तिके निमित्त है (इस सूत्रमें कालकृत मर्यादा जाननी चाहिये) योऽयं वत्सर आगामी तस्य यदवरमाग्रहाण्यास्तत्र युक्ता अध्येष्यामहे । अहोरात्रसम्बन्धीय कालविभागमें योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः तत्राध्येतास्महे । ऐसा प्रयोग होगा ॥

२७९६ परस्मिन्विभाषा । ३ ।३।१३८।

अवरस्मिन्वर्ज्यं पूर्वसूत्रद्वयमनुवर्तते । अप्रा-

प्रविभाषेयम् । योयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे । अध्येतास्महे लिङ्निमित्ते लृङ् क्रियातिपत्तौ । ३ । ३।१३९। भविष्यतीत्येव । सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत ॥

२७९६-अतरास्मन् यह अंश परित्याग करके पहिलेके दोनों सूत्रोंकी अनुवृत्ति आती है । भविष्यत् कालमें मर्य्यादोक्ति रहते परमें अहोरात्र सम्बन्धीसे भिन्न कालविभाग रहते अनद्यतनवत्प्रत्यय विकल्प करके हों, यह सूत्र अप्राप्त विभाषा है । यथा, यो ह्ययं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे, अध्येतास्महे । "लिङ्निमित्ते लृङ् क्रियातिपत्तौ (२२२९)" इस सूत्रसे भविष्यत् कालमेंही लृङ् होगा, अन्य कालमें नहीं होगा । सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् । अच्छी वर्षा होगी तो सुकाल होगा ॥

२७९७ भूते च । ३ । ३ । १४० ॥

पूर्वसूत्रं संपूर्णमनुवर्तते ॥

२७९७-इस स्थानमें सम्पूर्ण पूर्व सूत्रकी अनुवृत्ति आती है, भूत कालमें क्रियाकी अनिष्पत्ति होनेपर हेतु और हेतुमद्भाव होनेपर लृङ् होगा ॥

२७९८ वोताप्योः । ३ । ३ । १४१ ॥

वा आ उताप्यांः । उताप्योरित्यतः प्राग्भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते । पूर्वसूत्रं तु उताप्योरित्यादौ प्रवर्तते इति विवेकः ॥

२७९८-"वा आ उताप्योः" इस स्थानमें ऐसा पदच्छेद होगा । "उताप्योः" इस सूत्रके पूर्वतक भूत लिङ्निमित्ते लृङ् वा इसका अधिकार है । "उताप्योः समर्थयोः" इसको लेकर "इच्छार्थेभ्यो विभाषा०" इस सूत्रतक "भूते च" इस पूर्व सूत्रका अधिकार जानना चाहिये ॥

२७९९ गर्हायां लडपिजात्वोः । ३ । ३ । १४२ ॥

आभ्यां योगे लट् स्यात् कालत्रये गर्हायाम् । लुङादीनपवादत्वादयं बाधते । अपि जायां त्यजसि जातु गणिकामाधत्से गर्हितमेतत् ॥

२७९९-अपि और जातु शब्दके योगमें गर्हा अर्थमें तीनों कालमें लट् हो । परत्वके कारण लुङादिककी यह सूत्र बाधता है । अपि जायां त्यजसि, जातु गणिकामाधत्से गर्हितमेतत् । क्या तूने स्त्री त्यागी है गणिका रक्खी है यह निन्दित है तीनों कालोंमें यह बात लगा लेनी ॥

२८०० विभाषा कथमि लिङ् च ३ । ३ । १४३ ॥

गर्हायामित्येव । कालत्रये लिङ् चाल्लट् । कथं धर्मं त्यजेस्त्यजसि वा । पक्षे कालत्रये लकाराः । अत्र भविष्यति नित्यं लृङ् भूते वा । कथं नाम तत्रभवान् धर्ममत्यक्ष्यत् ॥

२८००-कथम् शब्दके योगमें तीनों कालोंमें गर्हा अर्थ होनेपर विकल्प करके लिङ् हो । और चकारनिर्देशके कारण लट् भी हो । यथा, कथं धर्मं त्यजेः त्यजसि वा । पक्षमें तीनों कालोंमें विहित जो सम्पूर्ण लकार ये समस्त ही होंगे । इस स्थानमें भविष्यत् कालमें नित्य और भूतकालमें विकल्प करके लृङ् होगा । कथं नाम तत्र भवान् धर्ममत्यक्षत् । श्रीमान् आपने कैसे धर्मको त्यागन किया ॥

२८०१ किंवृत्ते लिङ्लृटौ ।३।३।१४४।

गर्हायामित्येव । विभाषा तु नानुवर्तते । कः कतरः कतमो वा हरिं निन्देत् निन्दिष्यति वा । लृङ् प्राग्वत् ॥

२८०१-किंशब्द निष्पन्न शब्द उपपद होनेपर गर्हा अर्थमें तीनों कालोंमें लिङ् और लृट् हो । इस स्थानमें गर्हामात्रकी ही अनुवृत्ति होगी, विभाषाकी अनुवृत्ति भाष्यकारादिकी व्याख्याके बलसे नहीं होगी । यथा, कः कतरः कतमो वा हरिं निन्देत्, निन्दिष्यति वा । पूर्ववत् क्रियाकी अनिष्पत्ति अर्थ होनेपर भविष्यत् कालमें नित्य और भूतकालमें विकल्प करके लृङ् होगा ॥

२८०२ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि । ३ । ३ । १४५ ॥

गर्हायामिति निवृत्तम् । अनवक्लृप्तिरसंभावना । अमर्षोऽक्षमा । न संभावयामि न मर्षये वा भवान् हरिं निन्देत् निन्दिष्यति वा । कः कतरः कतमो वा हरिं निन्देत् । निन्दिष्यति वा । लृङ् प्राग्वत् ॥

२८०२-इस स्थानमें गर्हायां इस पदकी निवृत्ति हुई अनवक्लृप्ति और अमर्ष अर्थ होनेपर तथा किंशब्दसे निष्पन्न शब्द उपपद होनेपर भी और न होनेपर तीनों कालोंमें लिङ् और लृट् हो । अनवक्लृप्ति शब्दसे असम्भावना और अमर्ष शब्दसे अक्षमा समझना । न सम्भावयामि, न मर्षये वा भवान् हरिं निन्देत् । निन्दिष्यति वा । कः कतरः कतमो वा हरिं निन्देत् । निन्दिष्यति वा । लृङ् पूर्ववत् क्रियाकी अनिष्पत्ति होनेपर भविष्यत्कालमें नित्य और भूतकालमें विकल्प करके लृङ् होगा ॥

२८०३ किंकिलास्त्यर्थेषु लृट् । ३ । ३ । १४६ ॥

अनवक्लृप्त्यमर्षयोरित्येतद्गर्हायां चेति यावदनुवर्तते । किंकिलेति समुदायः क्रोधद्योतक उपपदम् । अस्त्यर्थाः अस्तिभवतिविद्यतयः । लिङोऽपवादः । न श्रद्दधे न मर्षये वा किंकिल त्वं शूद्रान्नं भोक्ष्यसे । अस्ति भवति विद्यते वा शूद्रीं गमिष्यसि । अत्र लृङ् न ॥

२८०३-अनवक्लृप्त्यमर्षयोः इस पदकी अनुवृत्ति "गर्हायां च" इस सूत्रके पूर्वतक होतीहै । किंकिल शब्द और अस्त्यर्थ शब्द उपपद होनेपर अनवक्लृप्ति और अमर्ष अर्थमें तीनों कालोंमें लृट् हो । किंकिल शब्द क्रोधवाचक है । अस्ति, भवति, विद्यते यह सम्पूर्ण ही अस्त्यर्थ हैं । यह लिङ्का अपवाद है । न श्रद्दधे, न मर्षये वा किंकिल त्वं शूद्रान्नं भोक्ष्यसे । अस्ति भवति विद्यते वा शूद्रीं गमिष्यसि । इस स्थानमें लङ् नहीं होगा ॥

२८०४ जातुयदोर्लिङ् । ३ । ३ । १४७ ॥

यदायद्योरुपसंख्यानम् ॥ * ॥ लटोऽपवादः । जातु यद्यदा यदि वा त्वादृशो हरिं निन्देन्नावकल्पयामि न मर्षयामि । लङ् प्राग्वत् ॥

२८०४-जातु और यत् शब्दके योगमें अनवक्लृप्ति और अमर्ष अर्थ होनेपर तीनों कालोंमें लिङ् हो ॥

'यदायद्योरुपसंख्यानम्' अर्थात् यदा और यदि शब्दके योगमें भी लिङ् हो ऐसा कहना चाहिये * यह सूत्र लट्का अपवाद है । जातु, यद्यदा, यदि वा त्वादृशो हरिं निन्देन्नावकल्पयामि न मर्षयामि, पूर्ववत् लङ् होगा । अर्थात् क्रियाका अनिष्पत्ति अर्थ होनेपर भविष्यत्कालमें नित्य और भूतकालमें विकल्प करके लङ् होगा ॥

२८०५ यच्चयत्रयोः । ३ । ३ । १४८ ॥

यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे न मर्षयामि ॥

२८०५-यच्च और यत्र शब्दके योगमें अनवक्लृप्ति और अमर्ष अर्थ होनेपर तीनों कालोंमें लिङ् हो । (यह योगविभाग उत्तर सूत्रमें यच्च और यत्र शब्दकी ही अनुवृत्ति लानेके निमित्त है) यथा, यच्च, यत्र, वा त्वमेवं कुर्याः । न श्रद्दधे न मर्षयामि । क्रियाकी अनिष्पत्ति होनेपर भविष्यत्कालमें नित्य और भूतकालमें विकल्प करके लङ् हो ॥

२८०६ गर्हायां च । ३ । ३ । १४९ ॥

अनवक्लृप्त्यमर्षयोरिति निवृत्तम् । यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात् । यच्च यत्र वा त्वं शूद्रं याजयेः । अन्याय्यं तत् ॥

२८०६-इस स्थलमें अनवक्लृप्त्यमर्षयोः इस पदकी निवृत्ति हुई । यच्च और यत्र शब्दके योगमें लिङ् ही होगा । अन्य लकार नहीं होगा; यथा, यच्च यत्र वा त्वं शूद्रं याजयेः । अन्याय्यं तत् ॥

२८०७ चित्रीकरणे च । ३ । ३ । १५० ॥

यच्च यत्र वा त्वं शूद्रं याजयेः । आश्चर्यमेतत् ॥

२८०७-यच्च और यत्र शब्दके योगमें चित्रीकरण गम्यमान रहते धातुके उत्तर लिङ् हो । यथा, यच्च यत्र वा त्वं शूद्रं याजयेः । आश्चर्यमेतत् ।

२८०८ शेषे लृडयदौ । ३ । ३ । १५१ ॥

यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात् । आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति । अयदौ किम् । आश्चर्यं यदि सोऽधीयीत ॥

२८०८-यच्च, यत्र और यदि शब्द भिन्न शब्द उपपद होनेपर चित्रीकरण अर्थ गम्यमान होनेपर धातुके उत्तर तीनों कालोंमें लृट् हो, आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति । यदि शब्द भिन्न क्यों कहा ? आश्चर्यं यदि सोऽधीयीत, इस स्थानमें लृट् नहीं हुआ ॥

२८०९ उताप्योः समर्थयोर्लिङ् । ३ । ३ । १५२ ॥

बाढमित्यर्थेऽनयोस्तुल्यार्थता । उत अपि वा हन्यादघं हरिः । समर्थयोः किम् । उत दण्डः पतिष्यति । अपिधास्यति द्वारम् । प्रश्नः प्रच्छादनं च गम्यते । इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेपि नित्यो लङ् ॥

२८०९-दृढार्थमें दोनोंकी तुल्यार्थता जाननी चाहिये । तुल्यार्थक अपि और उत शब्दके योगमें तीनों कालोंमें धातुके उत्तर लिङ् हो, उत अपि वा हन्यादघं हरिः । समर्थयोः इस पदको सूत्रमें क्यों किया उत दंडः पतिष्यति अपिधास्यति द्वारम् । यहां लिङ् न हुआ इस स्थानमें प्रश्न और प्रच्छादन अर्थ जानना चाहिये इस सूत्रसे लेकर आगामी सूत्रोंसे हेतु और हेतुमद्भाव विषयमें क्रियाका अनिष्पत्ति अर्थ गम्यमान होनेपर भूतकालमें भी नित्य लिङ् होगा ॥

२८१० कामप्रवेदनेऽकच्चिति । ३ । ३ । १५३

स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यान्न तु कच्चिति । कामो मे भुञ्जीत भवान् । अकच्चितीति किम् । कच्चिज्जीवति ॥

२८१०-स्वाभिप्रायके आविष्करण अर्थ गम्यमान होनेपर तीनों कालोंमें धातुके उत्तर लिङ् हो, किन्तु कच्चित् शब्द उपपद होनेपर न हो, कामो मे भुञ्जीत भवान् । जिस स्थानमें कच्चित् शब्दका योग होगा उस स्थानमें कच्चित् जीवति इस स्थलमें लिङ् नहीं हुआ ॥

२८११ सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे । ३ । ३ । १५४ ॥

अलमर्थोऽत्र प्रौढिः । सम्भावनमित्यलमिति च प्रथमया सप्तम्या च विपरिणम्यते । सम्भावनेऽर्थे लिङ् स्यात्तच्चेत्सम्भावनमलमिति सिद्धाप्रयोगे सति । अपि गिरिं शिरसा भिन्द्यात् । सिद्धाप्रयोगे किम् । अलं कृष्णो हस्तिनं हनिष्यति ॥

२८११-यदि अलमर्थ यहां प्रौढि है सम्भावने और अलम् इन दोनों पदोंकी आवृत्ति करके द्वितीय उक्त पदोंके मध्यमें सम्भावने यह सप्तम्यन्तको प्रथमाके साथ विपरिणाम किया। अलं यह प्रथमान्तको सप्तम्यन्तके साथ विपरिणाम किया। क्रियामें योग्यतानिश्चयका नाम सम्भावन है, सम्भावन अर्थमें

लिङ् हो वह सम्भावन समर्थ यदि हो सिद्ध है अप्रयोग जिसका ऐसा अलं रहते अर्थात् अलमर्थ रहते अलं शब्द का प्रयोग न रहते लिङ् हो । यथा, अपि गिरिं शिरसा भिन्द्यात् । सिद्धाप्रयोगे इस पदको सूत्रमें क्यों किया अलं कृष्णो हस्तिनं हनिष्यति । इस स्थलमें लिङ् नहीं हुआ ॥

२८१२ विभाषा धातौ सम्भावनवचनेऽयदि । ३ । ३ । १५५ ॥

पूर्वसूत्रमनुवर्तते । सम्भावनेऽर्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यात् न तु यच्छब्दे । पूर्वेण नित्ये प्राप्ते वचनम् । सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान् । अयदि किम् । सम्भावयामि यद्भुञ्जीथास्त्वम् ॥

२८१२-पूर्वसूत्रकी अनुवृत्ति आती है । संभावनार्थक धातु उपपद होनेपर उक्त अर्थमें विकल्प करके लिङ् हो । यत् शब्दके योगमें नहीं हो, पूर्व सूत्रसे नित्य प्राप्ति रहते विकल्प विधानके निमित्त यह भिन्न सूत्र किया है । यथा, सम्भावयामि भुञ्जीत, भोक्ष्यते वा भवान् । अयदि यह पद सूत्रमें क्यों किया सम्भावयामि यत् भुञ्जीथास्त्वम् । इस स्थलमें नहीं हुआ ॥

२८१३ हेतुहेतुमतोर्लिङ् । ३।३।१५६॥

वा स्यात् । कृष्णं नमेच्चेत्सुखं यायात् । कृष्णं नंस्यति चेत्सुखं यास्यति ॥ भविष्यत्येवेष्यते ॥ * ॥ नेह । हन्तीति पलायते ॥

२८१३-हेतु और हेतुमान् अर्थ गम्यमान होनेपर भविष्यत्कालमें धातुके उत्तर विकल्प करके लिङ् हो । यथा, कृष्णं नमेचेत् सुखं यायात् । कृष्णं नंस्यति चेत् सुखं यास्यति ।

भविष्यत्कालमें ही होगा * अन्यत्र लिङ् न होगा । इस कारण "हन्तीति पलायते" इस स्थलमें नहीं हुआ ॥

२८१४ इच्छार्थेषु लिङ्लोटौ । ३ । ३ । १५७ ॥

इच्छामि भुञ्जीत भुङ्क्तां वा भवान् । एवं कामये प्रार्थये इत्यादियोगे बोध्यम् ॥ कामप्रवेदन इति वक्तव्यम्॥*॥ नेह । इच्छन् करोति॥

२८१४-इच्छार्थ धातु उपपद होनेपर धातुके उत्तर लिङ् और लोट् हो । यथा इच्छामि भुञ्जीत । भुङ्क्तां वा भवान् । इसी प्रकार कामयते प्रार्थयते इत्यादिके योगमें भी होगा ।

काम प्रवेदन अर्थात् स्वाभिप्रायाविष्करण अर्थ गम्यमान होनेपर धातुके उत्तर लिङ् और लोट् हो * इस कारण इच्छन करोति इस स्थानमें नहीं हुआ ॥

२८१५ लिङ् च । ३ । ३ । १५९ ॥

समानकर्तृकेषु इच्छार्थेषूपपदेषु लिङ् । भुञ्जीयेतीच्छति ॥

२८१५-समानकर्तृक इच्छार्थ धातु उपपद होनेपर धातुके उत्तर लिङ् हो, यथा, भुंजीय इति इच्छति ॥

२८१६ इच्छार्थेभ्यो विभाषा वर्तमाने । ३ । ३ । १६० ॥

लिङ् स्यात्पक्षे लट् । इच्छेत् । इच्छति । कामयेत । कामयते । विधिनिमन्त्रणेति लिङ् । विधौ-यजेत । निमन्त्रणे-इह भुञ्जीत भवान् । आमन्त्रणे-इहासीत । अधीष्टे-पुत्रमध्यापयेद्भवान् । संप्रश्ने-किं भो वेदमधीयीय उत तर्कम् । प्रार्थने-भो भोजनं लभेय । एवं लोट् ॥

२८१६-इच्छार्थ धातुके उत्तर वर्तमानकालमें विकल्प करके लिङ् हो, पक्षमें लट् होगा । यथा, इच्छेत् । इच्छति । कामयेत । कामयते । "विधिनिमंत्रणा० २२०८" इस सूत्रसे लिङ् होताहै । विधि विषयमें उदाहरण यथा, यजेत । निमंत्रण विषयमें उदाहरण यथा, इह भुंजीत भवान् । आमंत्रण विषयमें उदाहरण यथा, इहासीत । अधीष्ट विषयमें उदाहरण यथा, पुत्रमध्यापयेद्भवान् । संप्रश्न विषयमें यथा, किं भो वेदमधीयीय उत तर्कम् । प्रार्थना विषयमें यथा, भो भोजनं लभेय । इसी प्रकार लोट् भी होगा ॥

२८१७ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च । ३ । ३ । १६३ ॥

प्रैषो विधिः । अतिसर्गः कामचारानुज्ञा । भवता यष्टव्यम् । भवान्यजताम् । चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थम् ॥

२८१७-प्रैष अर्थात् विधि, अतिसर्ग अर्थात् कामचारानुज्ञा । विधि अर्थमें कामचारानुज्ञा अर्थमें प्राप्तकाल अर्थमें धातुके उत्तर कृत्य और लोट् हो । यथा, भवता यष्टव्यम् । भवान् यजताम् । चकारसे लोट्का अनुकर्षण प्राप्तकाल अर्थमें होनेके लिये कियाहै ॥

२८१८ लिङ् चोर्ध्वमौहूर्तिके । ३ । ३ । १६४ ॥

प्रैषादयोऽनुवर्तन्ते । मुहूर्तादूर्ध्वं यजेत यजताम् यष्टव्यम् ॥

२८१८-इस सूत्रमें प्रैषादिककी अनुवृत्ति हुई । प्रैष अतिसर्ग और प्राप्तकाल अर्थमें यदि ऊर्ध्वमौहूर्तिक अर्थ गम्यमान हो तो धातुके उत्तर लिङ् हो, मुहूर्तादूर्ध्वं यजेत यजताम् यष्टव्यम् ॥

२८१९ स्मे लोट् । ३ । ३ । १६५ ॥

पूर्वसूत्रस्य विषये । लिङः कृत्यानां चापवादः । ऊर्ध्वं मुहूर्ताद् यजतां स्म ॥

२८१९-यह सूत्र पूर्वसूत्रके विषयमें लिङ् और कृत्य प्रत्ययका अपवाद है, स्म शब्दके योगमें ऊर्ध्व मौहूर्तिक अर्थ गम्यमान हो तो धातुके उत्तर लोट् हो । यथा, ऊर्ध्वं मुहूर्ताद् यजतां स्म ॥

२८२० अधीष्टे च । ३ । ३ । १६६ ॥

स्मे उपपदेऽधीष्टे लोट् स्यात् । त्वं स्म अध्यापय ॥

२८२०–स्म शब्द उपपद होनेपर अधीष्ट अर्थात् सत्कारपूर्वक व्यापार अर्थ होनेपर धातुके उत्तर लोट् हो यथा, त्वं स्म अध्यापय ॥

२८२१ लिङ्यदि । ३ । ३ । १६८ ॥

यच्छब्दे उपपदे कालसमयवेलासु च लिङ् स्यात् । कालः समयो वेला वा यद्भुञ्जीत भवान् ॥

२८२१–यत् शब्द उपपद होनेपर और काल समय वेला इन तीनों शब्दोंके उपपद होनेपर धातुके उत्तर लिङ् हो । यथा, कालः समयो वेला वा यद् भुंजीत भवान् ॥

२८२२ अर्हे कृत्यतृचश्च ।३ ।३।१६९॥

चाल्लिङ् । त्वं कन्यां वहेः ॥

२८२२–योग्य अर्थ होनेपर धातुके उत्तर कृत्य और तृच् प्रत्यय हों, चकारसे लिङ् भी हो । यथा, त्वं कन्यां वहेः ॥

२८२३ शकि लिङ् च ।३ । ३।१७२॥

शक्तौ लिङ् स्यात् चात्कृत्याः।भारं त्वं वहेः॥ माङि लुङ् । ३ । ३ । १७५ ॥ मा कार्षीः । कथं मा भवतु मा भविष्यतीति । नायं माङ् किंतु माशब्दः ॥

२८२३–शक्त अर्थ होनेपर धातुके उत्तर लिङ् हो, और चकारसे कृत्य प्रत्यय भी हो । यथा, भारं त्वं वहेः । "माङि लुङ् २२१९" इस सूत्रसे मा शब्दके योगमें लुङ् हो, मा कार्षीः । तो–मा भवतु मा भविष्यति ऐसा पद किस प्रकारसे सिद्ध हुआ ? इस स्थानमें यह माङ् शब्द नहीं है, यह मा शब्द है । इस कारण लुङ् नहीं हुआ ।

२८२४ धातुसम्बन्धे प्रत्ययाः।३।४।१॥

धात्वर्थानां सम्बन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः । तिङ्वाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः । वसन् ददर्श । भूते लट् । अतीतवासकर्तृकं दर्शनमर्थः । सोमयाज्यस्य पुत्रो भविता । सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनम् ॥

२८२४–धात्वर्थके सम्बन्धमें जिस कालमें प्रत्यय उक्त हुए हैं, उससे दूसरे कालमें भी प्रत्यय हों । तिङन्त वाच्यक्रियाके प्राधान्यके कारण उनके अनुरोधसे गुणभूत क्रियावाचीके उत्तर प्रत्यय हों । यथा, "वसन् ददर्श" । इस स्थलमें भूतकालमें लट् हुआहै । अतीतवासकर्तृक दर्शनमर्थः । सोमयाज्यस्य पुत्रो भविता सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनम् ॥

२८२५ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः । ३ । ४ । २ ॥

पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तः । तिङामपवादः । तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तस्तिङ्संज्ञौ च । तध्वमोर्विषये तु हिस्वौ वा स्तः । पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते । हिस्वविधानसामर्थ्यात् । तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तरि । आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु ॥

२८२५–पौनःपुन्य और भृशार्थ गम्यमान होनेपर धातुके उत्तर लोट् हो।और इस लोट्के स्थानमें हि और स्व आदेश हों। हि और स्व आदेश तिङ्के अपवाद हैं।अर्थात् तिङादि आदेशको बाध करके ये दो ही आदेश होंगे और यह हि और स्व आदेश क्रमसे परस्मैपद और आत्मनेपदसंज्ञक हों और तिङ्संज्ञक हों । त और ध्वम् इन दोनोंके विषयमें हि और स्व विकल्प करके हों । हि और स्व इन दोनोंके विधान बलसे उनके पुरुष और वचनका अतिदेश नहीं होगा । इस कारण सम्पूर्ण पुरुष और सम्पूर्ण वचनोंके विषयमें कर्तामें परस्मैपदी धातुओंके उत्तर हि और भाव कर्ता कर्ममें आत्मनेपदी धातुओंके उत्तर स्व होगा ॥

२८२६ समुच्चयेऽन्यतरस्याम् ।३।४।३॥

अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्॥

२८२६–अनेक क्रियाका समुच्चय होनेपर धातुके उत्तर लोट् और लोट्के स्थानमें हि और स्व आदेश और त और ध्वम् इन दोनोंके विषयमें विकल्प करके हि और स्व आदेश यह सम्पूर्ण पूर्वोक्त कार्य्य विकल्प करके हों ॥

२८२७ यथाविध्यनुप्रयोगः पूर्वस्मिन् । ३ । ४ ।४।

आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः ॥

२८२७–"क्रियासमभिहारे॰" इस सूत्रसे विहित जो लोट् उसकी प्रकृतिभूत जो धातु उसका ही अनुप्रयोग होगा ॥

२८२८ समुच्चये सामान्यवचनस्य । ३ । ४ । ५ ॥

समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्यात् । अनुप्रयोगाद्यथायथं लडादयस्तिबादयश्च । ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः ॥ क्रियासमभिहारे द्वे वाच्ये ॥ * ॥ याहियाहीति याति । पुनःपुनरतिशयेन वा यानं तत्स्यार्थः । एककर्तृकं वर्तमानकालिकं यानं यातीत्यस्य । इति शब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति । एवं यातः । यान्ति । यासि । याथः । याथ । यातयातेति युयं

याथ । याहियाहीत्ययासीत् यास्यति वा । अधीष्वाधीष्वेत्यधीते । ध्वम्विषये पक्षेऽधीध्वमधीध्वमिति यूयमधीध्वे । समुच्चये तु सक्तूपिब धानाः खादेत्यभ्यवहरति । अन्नं भुङ्क्ष्व दाधिकमास्वादयस्वेत्यभ्यवहरते । तध्वमोस्तु पिबत-खादतेत्यभ्यवहरथ । भुङ्ध्वमास्वादयध्वमित्यभ्यवहरध्वे । पक्षे हिस्वौ । अत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः । पक्षे सक्तून् पिबति । धानाः खादति । अन्नं भुङ्क्ते । दाधिकमास्वदते । एतेन–

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ॥ विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः ॥ १ ॥

इति व्याख्यातम् । अवस्कन्दनलवनादिरूपा भूतानद्यतनपरोक्षा एककर्तृका अस्वास्थ्यक्रियेत्यर्थात् । इह पुनःपुनश्चस्कन्देत्यादिरर्थ इति तु व्याख्यानं भ्रममूलकमेव । द्वितीयसूत्रे क्रियासमभिहार इत्यस्यानुवृत्तेः । लोडन्तस्य द्वित्वापत्तेश्च । पुरीमवस्कन्देत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद् भ्रम एव । पुरुषवचनसंज्ञे इह नेत्युक्तत्वात् ॥

॥ इति लकारार्थप्रक्रिया ॥

२८२८–क्रियाके समुच्चय अर्थमें लोट् विधिमें सामान्यार्थ धातुका अनुप्रयोग हो । अनुप्रयोगके उत्तर यथायोग्य लट् आदि और तिप् आदि होंगे । तब उससे संख्या, काल और पुरुष विशेषार्थका प्रकाश होगा ।

क्रियासमभिहार अर्थमें धातुको द्वित्व हो * यथा, पुनः पुनरतिशयेन याति इस विग्रहमें याहियाहीतियाति ऐसा पद सिद्ध हुआ । पुनःपुनरतिशयेन वा यानम् " यह हि विभक्त्यन्तका अर्थ है । एककर्तृकं वर्त्तमानकालिकं यानम्, यह याति इस पदका अर्थ है । इति शब्द अभेदान्वयमें तात्पर्यग्राहक है । इसी प्रकारसे–यातः । यान्ति । यासि । याथः । याथ । यात । यातेति यूयं याथ, याहियाहीत्ययासीत् यास्यति वा । अधीष्वाधीष्वेत्यधीते । ध्वम् पक्षमें अधीध्वमधीध्वमिति यूयमधीध्वे । समुच्चय विषयमें तो ऐसा होगा । यथा, सक्तून्पिब धानाः खादेत्यभ्यवहरति । अन्नं भुङ्क्ष्व दाधिकमास्वादयस्वेत्यभ्यवहरते । त और ध्वम्का उदाहरण ऐसा होगा । यथा–पिबत–खादतेत्यभ्यवहरथ । भुङ्ध्वमास्वादयध्वमित्यभ्यवहरध्वे । पक्षमें हि और स्व आदेश होगा । इस स्थानमें समुच्चीयमान विशेषको अनुप्रयोगार्थ सामान्यके साथ अभेदान्वय होगा । पक्षमें सक्तून्पिबति । धानाः खादति । अन्नं भुङ्क्ते । दाधिकमास्वदते । इसमें "पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ॥ विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः ॥१ ॥" यह व्याख्यात हुआ । इस स्थलमें अवस्कन्दन लवनादिरूपा भूतानद्यतन परोक्षा एककर्तृक अस्वास्थ्य क्रिया ऐसा अर्थ होगा । इस स्थलमें पुनःपुनश्चस्कन्द इत्यादि अर्थकी जो व्याख्या करी है, वह भ्रममूलक है । कारण कि द्वितीय सूत्रमें क्रियासमभिहारकी अनुवृत्ति नहीं आती है लोडन्तकी द्वित्वरूप आपत्ति भी हो जायगी । पुरीमवस्कन्द इत्यादि पद मध्यम पुरुषका एकवचन है ऐसी जो किसीने व्याख्या करी है वह भी भ्रममूलक है । क्योंकि इस स्थलमें पुरुष वचन संज्ञा नहीं होगी ऐसा उक्त हुआ है ॥

इति श्रीमुरादाबादवास्तव्यमिश्रकुलोत्पन्नपण्डितज्वालाप्रसादमिश्रकृतौ सिद्धान्तकौमुदीटीकायां संजीविव्याख्यायां तिङन्तकाण्डम् ॥

॥ इति भट्टोजीदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्द्धे तिङन्तं समाप्तम् ॥

॥ श्रीः ॥

अथ कृदन्तकृत्यप्रक्रिया।

२८२९ धातोः । ३ । १ । ९१ ॥

आ तृतीयसमाप्तेरधिकारोऽयम् ॥ तत्रोपपदं सप्तमीस्थम् । ३ । १ । ९२ ॥ कृदतिङ् ३ । १ । ९३ ॥

२८२९–तृतीयाध्यायकी समाप्तिपर्यन्त "धातोः" इस पदका अधिकार जानना चाहिये । "तत्रोपपदं सप्तमीस्थम् ७८१" इस सूत्रसे उपपद संज्ञा होगी । (३७४) तिङ्भिन्न जो प्रत्यय उसकी कृत्संज्ञा हो ॥

२८३० वाऽसरूपोऽस्त्रियाम् ।३।१।९४॥

परिभाषेयम् । अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्र्यधिकारोक्तं विना ॥

२८३०–यह पारिभाषिक सूत्र है । यह धात्वधिकारमें असमानरूप अपवाद प्रत्यय स्त्रीलिङ्गाधिकारोक्त प्रत्ययोंको छोडकर अन्य उत्सर्ग शास्त्रका विकल्प करके बाधक होगा ॥

२८३१ कृत्याः । ३ । १ । ९५ ॥

अधिकारोऽयं ण्वुलः प्राक् ॥

२८३१–यहांसे लेकर " ण्वुल्तृचौ २८९५ " सूत्रके पूर्वतक " कृत्याः " इस पदका अधिकार । जानना चाहिये ॥

२८३२ कर्तरि कृत् । ३ । ४ । ६७ ॥

कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते ॥

२८३२–कर्तामें धातुके उत्तर कृत् प्रत्यय हो, इस सूत्रसे सब कृत्संज्ञक प्रत्ययोंकी कर्तामें प्राप्ति होनेपर–॥

२८३३ तयोरेव कृत्यक्तखलर्थाः । ३ । ४ । ७० ॥

एते भावकर्मणोरेव स्युः ॥

२८३३–धातुके उत्तर कृत्य, क्त और खलर्थ प्रत्यय भाव कर्ममें ही हों ॥

२८३४ तव्यत्तव्यानीयरः । ३।१।९६॥

धातोरेते प्रत्ययाः स्युः। तकाररेफौ स्वरार्थौ। एधितव्यम् एधनीयं त्वया। भावे औत्सर्गिकमेकवचनं क्लीबत्वं च । चेतव्यश्चयनीयो वा धर्मस्त्वया ॥ वसेस्तव्यत्कर्तरि णिच्च ॥ * ॥ वसतीति वास्तव्यः॥केलिमर उपसंख्यानम्॥*॥ पचेलिमा माषाः पक्तव्याः। भिदेलिमाः सरलाः भेत्तव्याः। कर्मणि प्रत्ययः॥ वृत्तिकारस्तु कर्मकर्तरि चायमिष्यत इत्याह। तद्भाष्यविरुद्धम्॥

२८३४–धातुके उत्तर कर्ममें और भावमें तव्यत्, तव्य और अनीयर् प्रत्यय हों, तकार और रकारकी इत्संज्ञा स्वरार्थ है । यथा, एधितव्यम्, एधनीयं त्वया । भावमें स्वाभाविक एकवचन और नपुंसकलिङ्ग होगा । चेतव्यश्चयनीयो वा धर्मस्त्वया ।

वस धातुके उत्तर कर्तामें तव्यत् प्रत्यय हो । वह प्रत्यय णित् हो । वसति इस विग्रहमें वास्तव्यः ऐसा पद सिद्ध हुआ ।

धातुके उत्तर केलिमर प्रत्यय हो । पचेलिमा माषाः पक्तव्याः । भिदेलिमाः सरला भेत्तव्याः । यहां कर्ममें प्रत्यय हुआ "कर्मकर्तरि चायमिष्यते" यह प्रत्यय कर्मकर्तामें इष्ट है ऐसा वृत्तिकारने कहाहै । यह भाष्यविरुद्ध है ॥

२८३५ कृत्यचः । ८ । ४ । २९ ॥

उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्। प्रयाणीयम् । अचः किम् । प्रमग्नः ॥ निर्विण्णस्योपसंख्यानम् ॥*॥ अचः परत्वाभावादप्राप्ते वचनम्। परस्य णत्वम्। पूर्वस्य ष्टुत्वम् । निर्विण्णः ॥

२८३५–उपसर्गस्थ निमित्तके और अच् प्रत्याहारके उत्तर जो कृत्प्रत्ययस्थ णकार उसको णत्व हो । प्रयाणीयम्, अचः इस पदको सूत्रमें क्यों किया ? प्रमग्नः इस पदमें भी णत्व हो जायगा ।

निर्विण्ण पदके नकारको णत्व हो । अच्के परे न होनेसे णत्वकी अप्राप्ति होनेपर णत्वार्थ इस वार्तिकका आरम्भ है । इस वार्तिकसे पर नकारको णत्व और पूर्व नकारके स्थानमें ष्टुत्व अर्थात् णकार होगा । निर्विण्णः ॥

२८३६ णेर्विभाषा । ८ । ४ । ३० ॥

उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात् । प्रयापणीयम्–प्रयापनीयम् । विहितविशेषणं किम्।यका व्यवधाने यथा स्यात् । प्रयाप्यमाणं पश्य । णत्वे दुर उपसर्गत्वं नेत्युक्तम् । दुर्यानम् । दुर्यापनम् ॥

२८३६–उपसर्गस्थ निमित्तके उत्तर ण्यन्तसे विहित जो कृत् तत्स्थ नकारको विकल्प करके णत्व हो,प्रयापणीयम्,प्रयापनीयम्। विहित विशेषणका क्या फल है, मध्यमें यक्व्यवधान होनेपर भी णत्व होगा। एतदर्थ विहित विशेषण है–प्रयाप्यमाणं पश्य। णत्वविधिमें दुर उपसर्गको उपसर्गत्व नहीं होगा यह पूर्वमें कह दियाहै । दुर्यानम् । दुर्यापनम् ॥

२८३७ हलश्चेजुपधात् । ८ । ४ । ३१ ॥

हलादेरिजुपधात्कृन्नस्याचः परस्य णो वा

स्यात् । प्रकोपणीयम्-प्रकोपनीयम् । हलः किम् । प्रोहणीयम् । इजुपधात्किम् । प्रवपणीयम् ॥

२८३७-उपसर्गस्थ निमित्तके उत्तर हलादि इजुपध धातुके और अच्के उत्तर जो कृत् न उसको विकल्प करके णत्व हो । प्रकोपणीयम्, प्रकोपनीयम् । हलादि कहनेसे प्रोहणीयम् । इस स्थलमें नित्य णत्व हुआ । इजुपध कहनेसे प्रवपणीयम् इस स्थलमें भी नित्य णत्व होगा ॥

२८३८ इजादेः सनुमः । ८ । ४ । ३२ ॥

सनुमश्चेद्भवति तर्हि इजादेर्हलन्ताद्विहितो यः कृत्तस्थस्यैव । प्रेङ्खणीयम् । इजादेः किम् । मगि सर्पणे । प्रमङ्गनीयम् । नुम्ग्रहणमनुस्वारोपलक्षणम् । अट्कुप्वाङिति सूत्रेऽप्येवम् । तेनेह न । प्रेन्वनम् । इह तु स्यादेव । प्रोम्भणम् ॥

२८३८-सनुम् धातुके उत्तर जो कृत्स्थ नकारको णत्व हो तो इजादि हलन्त धातुसे विहित जो कृत् तत्स्थ ही नकारको णत्व हो । यथा, प्रेंखणीयम् । जहां इजादि न होगा वहां णत्व न हो । मगि धातुका सर्पण अर्थ समझना। प्रमङ्गनीयम् । नुम् शब्दका ग्रहण अनुसारके उपलक्षणार्थ है। " अटकुप्वाङ् १९७ " इस सूत्रमें भी नुम्ग्रहण अनुस्वारके उपलक्षणार्थ है, इस कारण प्रेन्वनम् इस स्थानमें णत्व नहीं हुआ और प्रोम्भणम् इस स्थानमें णत्व हुआहै ॥

२८३९ वा निंसनिक्षनिन्दाम् । ८ । ४ । ३३ ॥

एषां नस्य णो वा स्यात् कृति परे । प्रणिंसितव्यम्-प्रनिंसितव्यम् ॥

२८३९-कृत् प्रत्यय परे रहते उपसर्गस्थ निमित्तके परे निंस, निक्ष और निन्द धातुके नकारको विकल्प करके णत्व हो, जैसे-प्रणिंसितव्यम्, प्रनिंसितव्यम् ॥

२८४० न भाभूपूकमिगमिप्यायीवेपाम् । ८ । ४ । ३४ ॥

एभ्यः कृत्रस्य णो न । प्रभानीयम् । प्रभवनीयम् ॥ पूञ् एवेह ग्रहणमिष्यते ॥ * ॥ पूङस्तु प्रपवणीयः सोमः ॥ ण्यन्तभादीनामुपसंख्यानम् ॥ * ॥ प्रभापनीयम् । कृशाज्ञः शस्य यो वेत्युक्तं णत्वप्रकरणोपरि तद्बोध्यम् । यत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वम् । प्रख्यानीयम् ॥

२८४०-उपसर्गस्थ निमित्तके उत्तर भा, भू, पू, कमि, गमि, प्यायी, और वेप् धातुके उत्तर कृत् प्रत्ययस्थ नकारको णत्व न हो । प्रभानीयम् । प्रभवनीयम् । पूञ् धातुका ही इस स्थानमें ग्रहण होगा । पूङ् धातुके उत्तर नकारको णत्व होगा। प्रपवणीयः सोमः ।

णिजन्त भा प्रभृति धातुओंके उत्तर नकारको णत्व न हो। यथा प्रभापनीयम् । असिद्ध काण्डमें क्शाञ्के शकारके स्थानमें विकल्प करके यकार हो यह पूर्व कह आये हैं । यह विधि णत्व प्रकरणके आगे समझना चाहिये । यत्वकी असिद्धि होनेसे शकार व्यवधान होगा, अत एव णत्व नहीं होगा । यथा प्रख्यानीयम् ॥

२८४१ कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ॥

स्नात्यनेन स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ॥

२८४१-कृत्यसंज्ञक प्रत्यय और ल्युट् प्रत्यय जिस अर्थमें उक्त हुएहैं तद्भिन्न अर्थमें भी वे हों । यथा, स्नात्यनेन इस विग्रहमें स्नानीयम् चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ॥

२८४२ अचो यत् । ३ । १ । ९७ ॥

अजन्ताद्धातोर्यत्स्यात् । चेयम् । जेयम् । अज्ग्रहणं शक्यमकर्तुम् । योगविभागोऽप्येवम् । तव्यदादिष्वेव यतोपि सुपठत्वात् ॥

२८४२-अजन्त धातुके उत्तर यत् प्रत्यय हो । यथा, चेयम्((चिञ्+यत्) जेयम् । इस सूत्रमें अच्का ग्रहण न करना चाहिये, कारण कि तिसका कोई प्रयोजन नहीं है और योगविभागका भी कोई प्रयोजन नहीं है । अत एव " तव्यत्तव्यानीयरः " इस सूत्रमें ही यत् प्रत्ययका भी पाठ करना उचित था ॥

२८४३ ईद्यति । ६ । ४ । ६५ ॥

यति परे आत ईत्स्यात् । गुणः । देयम् । ग्लेयम् ॥ तकिशसिचतियतिजनिभ्यो यद्वाच्यः ॥ * ॥ तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । जनेर्यद्विधिः स्वरार्थः, ण्यतापि रूपसिद्धेः । न च वृद्धिप्रसङ्गः, जनिवध्योश्चेति निषेधात् ॥ हनो वा यद्वधश्च वक्तव्यः ॥ * ॥ वध्यः । पक्षे वक्ष्यमाणो ण्यत् । घात्यः ॥

२८४३-यत् प्रत्यय परे रहते आकारके स्थानमें ईकार हो । पश्चात् धातुको गुण हो । यथा, देयम् । ग्लेयम् ।

" तकिशसिचतियतिजनिभ्यो यद्वाच्यः" इस वार्तिकसे तक्, शस्, चत्, यत् और जन् धातुके उत्तर यत् प्रत्यय हो । यथा, तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । जन धातुके उत्तर यत् प्रत्ययका विधान स्वरार्थ है, क्योंकि ण्यत् प्रत्ययके द्वारा भी जन्यम् पदकी सिद्धि होसकती है, फिर जो पुनर्वार यत् विधि है वह केवल स्वरार्थ है । यदि कहिये ण्यत् विधिमें वृद्धि होजायगी ऐसा कहना उचित नहीं है । क्योंकि "जनिवध्योश्च (२५१२)" इस सूत्रसे वृद्धिका निषेध होताहै * ।

हन् धातुके उत्तर यत् प्रत्यय और वधादेश विकल्प करके हों । यथा, वध्यः । पक्षमें वक्ष्यमाण ण्यत् प्रत्यय होगा यथा, घात्यः ॥

२८४४ पोरदुपधात् । ३ । १ । ९८ ॥

पवर्गान्तादुदुपधाद्यत्स्यात् । ण्यतोऽपवादः ।

शप्यम् । लभ्यम् । नानुबन्धकृतमसारूप्यम् । अतो न ण्यत् । तव्यदादयस्तु स्युरेव ॥

२८४४-पवर्गान्त अकारोपध धातुके उत्तर यत् प्रत्यय हो, यह यत् ण्यत्का अपवाद है । शप्यम् । लभ्यम् । अनुबन्धकृत असारूप्य नहीं होताहै इससे "वा सरूपोऽस्त्रियाम्" इस सूत्रसे विकल्प करके बाधसे ण्यत् प्रत्यय न हुआ तव्यदादिक प्रत्यय तो असरूप होनेसे होतेहैं ॥

२८४५ आङो यि । ७ । १ । ६५ ॥

आङः परस्य लभेर्नुम् स्याद्यादौ प्रत्यये विवक्षिते । नुमि कृतेऽदुपधत्वाभावात् ण्यदेव । आलम्भ्यो गौः ॥

२८४५-आङ्के परे जो लभ धातु तिसको नुम्का आगम हो । यकारादि प्रत्ययकी विवक्षामें नुम् करनेपर अदुपधत्वके अभावके कारण ण्यत् होगा । यथा, आलम्भ्यो गौः॥

२८४६ उपात्प्रशंसायाम् । ७ । १ । ६६ ॥

उपलम्भ्यः साधुः । स्तुतौ किम् । उपलब्धुं शक्य उपलभ्यः ॥

२८४६-प्रशंसा अर्थ होनेपर और यकारादि प्रत्ययकी विवक्षा रहते उपपूर्वक लभ धातुको नुम्का आगम हो, यथा, उपलम्भ्यः साधुः । जिस स्थानमें प्रशंसा न होगी उस स्थानमें उपलब्धुं शक्यः इस विग्रहमें उपलभ्यः पद होगा ॥

२८४७ शकिसहोश्च । ३ । १ । ९९ ॥

शक्यम् । सह्यम् ॥

२८४७-शक धातु और सह धातुके उत्तर यत् प्रत्यय हो । यथा, शक्यम् । सह्यम् ॥

२८४८ गदमदचरयमश्चानुपसर्गे । ३ । १ । १०० ॥

गद्यम् । मद्यम् । चर्यम् । चरेराङि चागुरौ ॥*॥ आचर्यो देशः । गन्तव्य इत्यर्थः । अगुरौ किम् । आचार्यो गुरुः । यमेर्नियमार्थम् । सोपसर्गान्मा भूदिति । प्रयाम्यम् । निपूर्वात्स्यादेव । तेन तत्र न भवेद्विनियम्यमिति वार्तिकप्रयोगात् । एतेनानियम्यस्य नायुक्तिः । त्वया नियम्या ननु दिव्यचक्षुषेत्यादि व्याख्यातम् । नियमे साधुरिति वा ॥

२८४८-उपसर्ग पूर्वमें न रहते गद, मद, चर और यम् धातुके उत्तर यत् प्रत्यय हो । यथा, गद्यम् । मद्यम् । चर्य्यम् ।

गुरुभिन्न अर्थ होनेपर आङ्पूर्वक चर धातुके उत्तर यत् प्रत्यय हो । आचर्यो देशः । गन्तव्य इत्यर्थः । जिस स्थानमें गुरु अर्थ होगा, उस स्थानमें आचार्यो गुरुः । "गोरदुपधात्" इस सूत्रसे यत् सिद्ध होनेपर भी जो इस सूत्रमें यम् धातुका ग्रहण कियाहै, वह उपसर्गके परे जो यम् धातु तिसके उत्तर यत् प्रत्यय नहीं होगा, इस नियमसे प्रयाम्यम्, यहां यत् प्रत्यय न हुआ । निपूर्वक यम् धातुके उत्तर तो यत् प्रत्यय होवेहीगा । क्योंकि " तेन तत्र न भवेद्विनियम्यम् " इस वार्तिकमें निपूर्वक यम धातुके उत्तर यत् प्रत्यय दृष्ट है इससे अनियम्यस्य नायुक्तिः इसमें और 'त्वया नियम्या ननुदिव्यचक्षुषा' इत्यादि स्थलमें नियम्य यहां यत्प्रत्ययान्त निपूर्वक यम् धातुका प्रयोग सिद्ध हुआ अथवा "नियमे साधुः" इस विग्रहमें "तत्र साधुः" इस सूत्रसे यत् प्रत्यय होनेपर भी उक्त स्थलोंमें नियम्य इस पदकी सिद्धि जाननी चाहिये ॥

२८४९ अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु । ३ । १ । १०१ ॥

वदेर्नञि उपपदे वदः सुपीति यत्क्यपोः प्राप्तयोर्यदेव सोपि गर्हायामेवेत्युभयार्थं निपातनम् । अवद्यं पापम् । गर्ह्ये किम् । अनुद्यं गुरुनाम । तद्धि न गर्ह्यं वचनानर्हं च ॥

आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥

इति स्मृतेः । पण्या गौः । व्यवहर्तव्येत्यर्थः । पाण्यमन्यत् । स्तुत्यर्हमित्यर्थः । अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृङो यत् । शतेन वर्या कन्या । वृत्यान्या ॥

२८४९-गर्ह्य पणितव्य और अनिरोध अर्थमें क्रमसे अवद्य पण्य, वर्य्य यह यत् प्रत्ययान्त पद निपातनसे सिद्ध हो । नञ् उपपद होनेपर वद धातुके उत्तर "वदः सुपि क्यप् च २८५४" इस सूत्रसे यत् और क्यप्की प्राप्ति होनेपर यत् ही होगा । यह यत् गर्ह्य अर्थमें ही होगा । इन दोनों नियमके निमित्त यह निपातन है । अवद्यम् पापम् जिस स्थानमें गर्ह्य अर्थ नहीं होगा उस स्थानमें अनुद्यं गुरुनाम यहां यत् प्रत्यय न हुआ । गुरुका नाम गर्हित नहीं है । किन्तु "आत्मनाम गुरोर्नाम नामातिकृपणस्य च ॥ श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः " इस स्मृतिके अनुसार तिनका नाम उच्चारण नहीं करते । पण्या गौः अर्थात् व्यवहर्तव्या । इससे अतिरिक्त स्थलमें पाण्यम् अर्थात् स्तुत्यर्ह इस स्थानमें ण्यत् हुआ । अनिरोध शब्दसे अप्रतिबंध अर्थात् आनियम लिया जाताहै इस अर्थमें वृङ् धातुके उत्तर यत् प्रत्यय होगा । यथा, शतेन वर्या कन्या । अन्य अर्थमें वृत्या इस प्रकार होगा ॥

२८५० वह्यं करणम् । ३ । १ । १०२ ॥

वहन्त्यनेनेति वह्यं शकटम् । करणं किम् । वाह्यम् । वोढव्यम् ॥

२८५०-करण कारकका अर्थ होनेपर वह्यं यह यत् प्रत्ययान्त पद निपातनसे सिद्ध हो । वहन्त्यनेनेति वह्यम् । शकटम्, यहां यत् प्रत्यय हुआ 'करणं' इस पदको सूत्रमें क्यों किया, वोढव्यम् इस स्थानमें यत् नहीं हुआ ण्यत् हुआहै ॥

२८५१ अर्यः स्वामिवैश्ययोः । ३ । १ । १०३ ।

ऋ गतौ अस्माद्यत् । ण्यतोऽपवादः । अर्यः

स्वामी वैश्यो वा । अनयोः किम् । आर्यो ब्राह्मणः । प्राप्तव्य इत्यर्थः ॥

२८५१-स्वामी और वैश्य अर्थ होनेपर अर्य्य यह यत् प्रत्ययान्त पद निपातनसे सिद्ध हो । ऋ धातु गतिमें है इस धातुके उत्तर यत् प्रत्यय हुआ । यह यत् प्रत्यय ण्यत् प्रत्यय का अपवाद है । अर्यः स्वामी वैश्यो वा जिस स्थानमें स्वामी और वैश्य अर्थ नहीं होगा उस स्थानमें आर्य्यो ब्राह्मणः प्राप्तव्यः इत्यर्थः । इस स्थानमें ण्यत् प्रत्यय हुआ ॥

२८५२ उपसर्या काल्या प्रजने । ३ । १ । १०४ ॥

गर्भग्रहणे प्राप्तकाला चेदित्यर्थः । उपसर्या गौः । गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः । प्रजने काल्येति किम् । उपसार्या काशी । प्राप्तव्येत्यर्थः ॥

२८५२-गर्भग्रहणमें प्राप्तकाला स्त्रीपशुव्यक्ति विवक्षित होनेपर उपसर्य्या यह यत् प्रत्ययान्त पद निपातनसे सिद्ध हो, सृ धातुके उत्तर निपातनसे यत् प्रत्यय हुआ । उपसर्य्या गौः गर्भाधानार्थं वृषभेणोपगन्तुं योग्या इत्यर्थः । प्रजने काल्या इसको सूत्रमें क्यों किया ? उपसर्य्या काशी । प्राप्तव्या इत्यर्थः । (काशी जाने योग्य है) ॥

२८५३ अजर्यं संगतम् । ३ । १ । १०५ ॥

नञ्पूर्वाज्जीर्यतेः कर्तरि यत्संगतं चेद्विशेष्यम् । न जीर्यतीत्यजर्यम् । तेन संगतमार्येण रामाजर्यं कुरु द्रुतमिति भट्टिः । मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्धेत्यत्र तु संगतमिति विशेष्यमध्याहार्यम् । संगतं किम् । अजरिता कम्बलः । भावे तु संगतकर्तृकेऽपि ण्यदेव । अजार्यं संगतेन ॥

२८५३-यदि सङ्गत यह विशेष्य हो तो यहां यत् नहीं हुआ ण्यत् प्रत्यय हुआहै । इस स्थलमें अजर्यम् यह यत् प्रत्ययान्त पद निपातनसे सिद्ध हो नञ् पूर्वक जॄ धातुके उत्तर कर्त्तामें यत् प्रत्यय निपातनसे हुआ । न जीर्य्यति । इस विग्रहमें अजर्य्यम् पद सिद्ध हुआ । जहां संगतं यह विशेष्य नहीं है यथा-"तेन सङ्गतमार्येण रामाजर्य्यं कुरु द्रुतम्" इस भट्टिके प्रयोगमें और "मृगैरजर्य्यं जरसोपदिष्टमदेहबंधाय पुनर्बबंध" । इस स्थलमें सङ्गत यह विशेष्य पदका अध्याहार करना चाहिये । जिस स्थानमें सङ्गत विशेष्य नहीं होगा उस स्थानमें अजरिता कम्बलः यहां यत् न हुआ तृच् हुआहै । संगतकर्तृकभावमें ण्यत् प्रत्यय होगा । अजार्य्यं संगतेन ॥

२८५४ वदः सुपि क्यप् च । ३ । १ । १०६ ॥

उत्तरसूत्रादिह भाव इत्यपकृष्यते । वदेर्भावे क्यप्स्याच्चाद्यत अनुपसर्गे सुप्युपपदे । ब्रह्मोद्यम् ब्रह्मवद्यम् । ब्रह्म वेदः तस्य वदनमित्यर्थः । कर्मणि प्रत्ययावित्येके । उपसर्गे तु ण्यदेव । अनुवाद्यम् । अपवाद्यम् ॥

२८५४-उत्तर सूत्रसे भाव इस पदकी अनुवृत्ति होगी । अनुपसर्ग सुप् अर्थात् सुबन्त पद उपपद होनेपर वद् धातुके उत्तर भावमें क्यप् प्रत्यय हो । चकार निर्देशके कारण यत् प्रत्यय भी हो । ब्रह्मोद्यम्, ब्रह्मवद्यम् । ब्रह्म वेदः । तस्य वदनमित्यर्थः । कोई २ कहते हैं इस स्थानमें कर्म्ममें यह दोनों प्रत्यय हैं । उपसर्ग उपपद होनेपर ण्यत् ही होगा अर्थात् यत् नहीं होगा । अनुवाद्यम् । अपवाद्यम् ॥

२८५५ भुवो भावे । ३ । १ । १०७ ॥

क्यप्स्यात् । ब्रह्मणो भावो ब्रह्मभूयम् । सुपीत्येव । भव्यम् । अनुपसर्ग इत्येव । प्रभव्यम् ॥

२८५५-भावमें भू धातुके उत्तर क्यप् प्रत्यय हो । ब्रह्मणो भावो ब्रह्मभूयम् । इस स्थानमें यदि सुबन्त पद उपपद हो तो ही क्यप् होगा । भव्यम् यहां क्यप् न हुआ । उपसर्गभिन्न ही पद उपपद रहते क्यप् होगा । प्रभव्यम् इस स्थानमें क्यप् नहीं हुआ ॥

२८५६ हनस्त च । ३ । १ । १०८ ॥

अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप्स्यात्तकारश्चान्तादेशः । ब्रह्मणो हननं ब्रह्महत्या । स्त्रीत्वं लोकात् ॥

२८५६-अनुपसर्ग सुप् अर्थात् सुबन्त उपपद होनेपर हन् धातुके उत्तर भावमें क्यप् प्रत्यय हो और तकार अन्तादेश हो ब्रह्मणो हननम् ब्रह्महत्या इस स्थलमें लौकिक प्रयोगके कारण स्त्रीत्व हुआ ॥

२८५७ एतिस्तुशास्वृदृजुषः क्यप् । ३ । १ । १०९ ॥

एभ्यः क्यप्स्यात् ॥

२८५७-इण् धातु और स्तु धातु शास् धातु वृ धातु दृ धातु और जुष् धातु इन सम्पूर्ण धातुओंके उत्तर क्यप् प्रत्यय हो ॥

२८५८ ह्रस्वस्य पिति कृति तुक् । ६ । १ । ७१ ॥

इत्यः । स्तुत्यः । शास इदङ्हलोः । शिष्यः । वृ इति वृञो ग्रहणं न वृङः । वृत्यः । वृङस्तु वार्या ऋत्विजः । आदृत्यः । जुष्यः । पुनः क्यब्ग्रुक्तिः परस्यापि ण्यतो बाधनार्था । अवश्यस्तुत्यः ॥ शंसिदुहिगुहिभ्यो वेति काशिका ॥ शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् । प्रशस्यस्य श्रः । ईडवन्दवृशंसदुहां ण्यत इति सूत्रद्वयबलाच्छंसेः सिद्धम् । इतरयोस्तु मूलं मृग्यम् ॥ आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम् ॥ * ॥ अंजू व्यक्तिम्रक्षणादिषु ।

बाहुलकात् करणे क्यप् । अनिदितामिति नलोपः । आज्यम् ॥

२८५८-पित्संज्ञक कृत् प्रत्यय परे रहते ह्रस्वको तुक्का आगम हो । इत्यः । स्तुत्यः । "शास इदङ्हलोः २४८६" इस सूत्रसे शास् धातुकी उपधाको इत्व हुआ । शिष्यः । वृ पदसे वृञ् धातुका ही ग्रहण होगा, वृङ् धातुका नहीं ग्रहण होगा । वृत्यः । वृङ् धातुका तो वार्य्या ऋत्विजः ऐसा होगा । आदृत्यः । जुष्यः । अनुवृत्ति द्वारा ही क्यप् की प्राप्ति होजाती फिर क्यप्का ग्रहण सूत्रमें क्यों किया पुनः क्यब्रुक्तिसे पर भी जो "ओराव०" यह सूत्र है उसको बाध करके इस सूत्रसे अवश्य उपपद रहते भी क्यप् ही होगा । यथा,अवश्यस्तुत्यः । शंसि, दुहि, गुहि इन सम्पूर्ण धातुओंके उत्तर क्यप् हो विकल्प करके ऐसा काशिकामें कहा है । शस्यम्, शंस्यम् । दुह्यम्, दोह्यम् । गुह्यम्, गोह्यम् । "प्रशस्यस्य श्रः २००९" "ईड-वन्दवृशंसदुहां ण्यतः २७०२"इन सूत्रोंमें क्यप् और ण्यत् दृष्ट है,इससे शंस् धातुके उत्तर ण्यत् और क्यप् होगा।किन्तु अपर दोनों धातुओंके उत्तर जो ण्यत् और क्यप्का विधान किया है वह अमूलक है ।

आङ् पूर्वादिति० इस वार्त्तिकसे आङ्पूर्वक अंजू धातुके उत्तर संज्ञा अर्थ होनेपर क्यप् हो । अंजू धातु व्यक्ति और म्रक्षणादि अर्थमें है । "कृत्यल्युटो बहुलम्" इस सूत्रसे करणमें क्यप् हुआ । "अनिदिताम्० ४१५"इस सूत्रसे नकारका लोप हुआ, आज्यम् ॥

२८५९ ऋदुपधाच्चाक्लृपिचृतेः । ३ । १ । ११० ॥

वृत् । वृत्यम् । वृध् । वृध्यम् । क्लृपिचृत्योस्तु कल्प्यम् । चर्त्यम् । तपरकरणं किम् । कॄत् । कीर्त्यम् । अनित्यण्यन्ताश्चुरादय इति णिजभावे ण्यत् । णिजन्तात्तु यदेव ॥

२८५९-क्लृप् और चृत् धातुसे भिन्न ऋकारोपध धातुके उत्तर क्यप् प्रत्यय हो। वृत्-वृत्यम्। वृध-वृध्यम् । क्लृप और चृत् धातुके उत्तर ण्यत् होगा । कल्प्यम् । चर्त्यम् । ऋत् इसमें तपरकरण क्यों किया,कॄत् कीर्त्यम् । इस स्थलमें भी क्यप् हो जायगा इस लिये कियाहै । चुरादि धातु नित्य ण्यन्त नहीं हैं, इस कारण णिच्के अभाव पक्षमें ण्यत् होगा । णिजन्तके उत्तर यत् ही होगा ।

२८६० ई च खनः । ३ । १ । १११ ॥

चात् क्यप् । आद्गुणः । खेयम् । इ चेति ह्रस्वः सुपठः ॥

२८६०-खन् धातुके उत्तर क्यप् हो और नकारके स्थानमें ईकार"आद्गुणः" इस सूत्रसे गुण होगा । यथा, खेयम् । "इ च" ऐसा ह्रस्व पाठ करना उचित है ॥

२८६१ भृञोऽसंज्ञायाम् । ३ । १ । ११२ ॥

भृत्याः कर्मकराः । भर्तव्या इत्यर्थः । क्रिया शब्दोऽयं न तु संज्ञा ॥ समश्च बहुलम् ॥ * ॥ संभृत्याः । संभार्याः । असंज्ञायामेव विकल्पार्थमिदं वार्तिकम् । असंज्ञायां किम् । भार्या नाम क्षत्रियाः । अथ कथं भार्या वधूरिति । इह हि संज्ञायां समजेति क्यपा भाव्यम् । संज्ञापर्युदासस्तु पुंसि चरितार्थः । सत्यम् । बिभर्त्तेर्भृ इति दीर्घान्तात् क्र्यादेर्वा ण्यत् । क्यप्तु भरतेरेव । तदनुबन्धकग्रहणे इति परिभाषया ॥

२८६१-संज्ञाभिन्न अर्थ होनेपर भृ धातुके उत्तर क्यप् हो । भृत्याः कर्मकराः भर्त्तव्याः इत्यर्थः । यह क्रियावाचक शब्द है संज्ञावाचक नहीं ।

'समश्च बहुलम्' इस वार्त्तिकसे संपूर्वक भृ धातुके उत्तर विकल्प करके क्यप् हो । संभृत्याः, संभार्य्याः । संज्ञाभिन्न ही अर्थमें विकल्पार्थ यह वार्तिक है । जिस स्थानमें संज्ञा होगी उस स्थानमें भार्या नाम क्षत्रियाः ऐसी संज्ञा होनेपर यहां ण्यत् हुआ । तो"भार्या वधूः" ऐसा प्रयोग किस प्रकार हुआ ? इस स्थलमें"संज्ञायां समज० ३२७६"इस सूत्रसे क्यप् होनेके योग्य है तो जो संज्ञाविषयमें निषेध किया है वह पुंलिंगमें चरितार्थ है। सत्य है । जुहोत्यादि जो भृ धातु तिसके उत्तर और क्र्यादिगणीय भॄ धातुके उत्तर ण्यत् होनेसे भार्या शब्द वधूवाचक सिद्ध होगा । क्यप् प्रत्यय तो भ्वादिगणपठित भृ धातुके ही उत्तर 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इस परिभाषाबलसे होगा ॥

२८६२ मृजेर्विभाषा । ३ । १ । ११३ ॥

मृजेः क्यब्वा स्यात्पक्षे ण्यत् । मृज्यः ॥

२८६२-मृज् धातुके उत्तर विकल्प करके क्यप् हो । पक्षमें ण्यत् हो । मृज्यः ॥

२८६३ चजोःकुघिण्यतोः । ७ । ३ । ५२ ॥

चस्य जस्य च कुत्वं स्यात् घिति ण्यति च प्रत्यये परे । निष्ठायामनिट इति वक्तव्यम् ॥ * ॥ तेनेह न । गर्ज्यम् । मृजेर्वृद्धिः । मार्ग्यः ॥

२८६३-घित् प्रत्यय और ण्यत् प्रत्यय परे रहते चकार और जकारको कुत्व हो ।

"निष्ठायामनिट इति वक्तव्यम्" अर्थात् निष्ठा प्रत्ययके परे अनिट् धातुका जो चकार और जकार उसके स्थानमें कुत्व हो ऐसा कहना चाहिये * इस कारण इस स्थानमें नहीं हुआ, यथा-गर्ज्यम् । मृज् धातुको वृद्धि होकर मार्ग्यः । यह सिद्ध हुआ ॥

२८६४ न्यङ्क्वादीनां च । ७ । ३ । ५३ ॥

कुत्वं स्यात् । न्यङ्कुः । नावञ्चेरिति उमत्ययः ॥

२८६४-न्यङ्कादि धातुओंको कुत्व हो । न्यंकुः । "नावञ्चेः" इस सूत्रसे उ प्रत्यय हुआ ॥

२८६५ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः । ३ । १ । ११४ ॥

एते सप्त क्यबन्ता निपात्यन्ते । राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः । यद्वा । लता-

त्मकः सोमो राजा स सूयते कण्डयतेऽत्रेत्यधिकरणे क्यप् निपातनाद्दीर्घः।राजसूयः।राजसूयम्। अर्धर्चादिः। सरत्याकाशे सूर्यः। कर्तरि क्यप्। निपातनादुत्त्वम्। यद्वा षू प्रेरणे तुदादिः। सुवति कर्मणि लोकं प्रेरयति क्यपो रुट्। मृषोपपदाद्वदेः कर्मणि नित्यं क्यप्। मृषोद्यम्। विशेष्यनिघ्नोऽयम्। उच्छ्रायसौन्दर्यगुणा मृषोद्याः। रोचते रुच्यः। गुपेरादेः कुत्वं च संज्ञायाम्। सुवर्णरजतभिन्नं धनं कुप्यम्। गोप्यमन्यत्। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः कर्मकर्तरि। शुद्धे तु कर्मणि कृष्टपाक्याः। न व्यथतेऽव्यथ्यः॥

२८६५–राजसूय, सूर्य, मृषोद्य, रुच्य, कुप्य, कृष्टपच्य और अव्यथ्य यह सात क्यप्प्रत्ययान्त पद निपातनसे सिद्ध हों। राजा सोतव्योऽभिषवद्वारा निष्पादयितव्यः। अथवा लतात्मकः सोमो राजा वह सूयते कण्डयतेऽत्र इस विग्रहमें अधिकरणमें क्यप् और निपातनके कारण दीर्घ होकर राजसूयः, राजसूयम् पद हुआ, यह अर्धर्चादिगण पठित है। सरति आकाशे इस विग्रहमें सूर्यः। सृ धातुके उत्तर कर्तामें क्यप् और निपातनसे उत्व हुआहै। उसके रपर होनेपर "हलिच" इस सूत्रसे दीर्घ होगा यद्वा षू धातु प्रेरणार्थमें है, यह तुदादि गणीय है। "सुवति कर्म्मणि लोकं प्रेरयति" इस विग्रहमें क्यप्के रुडागम करनेपर सूर्यः यह पद सिद्ध हुआ। मृषोपपद वद धातुके उत्तर कर्म्ममें नित्य क्यप् हो। मृषोद्यम्। यह पद विशेष्यनिघ्न अर्थात् विशेष्यानुयायी है। "उच्छ्रायसौन्दर्य्यगुणाः मृषोद्याः" रोचते इस विग्रहमें रुच्यः। संज्ञा होनेपर गुप् धातुके आदि वर्ण अर्थात् गकारके स्थानमें कुत्व हो। सुवर्ण और रजतसे भिन्न धनको कुप्य कहतेहैं। अन्यत्र गोप्यम् ऐसा रूप होगा। "कृष्टे स्वयमेव पच्यन्ते" इस विग्रहमें कृष्टपच्याः। यह कर्मकर्तामें होगा। केवल कर्म्ममें कृष्टपाक्याः ऐसा होगा। "नव्यथते" इस विग्रहमें अव्यथ्यः पद सिद्ध हुआ॥

२८६६ भिद्योद्ध्यौ नदे। ३।१।११५॥

भिदेरुज्झेश्च क्यप्। उज्झेर्धत्वं च। भिनत्ति कूलं भिद्यः। उज्झत्युदकमुद्ध्यः। नदे किम्। भेत्ता। उज्झिता॥

२८६६–नद अर्थ होनेपर भिद्य और उद्ध्य यह दो पद निपातनसे सिद्ध हों। भिद धातुसे और उज्झ धातुसे क्यप् हो और उज्झ धातुको धकार अन्तादेश हो। 'भिनत्ति कूलम्' इस विग्रहमें भिद्यः। उज्झत्युदकमुद्ध्यः। जिस स्थानमें नद नहीं होगा, उस स्थानमें भेत्ता। उज्झिता। ऐसा पद सिद्ध होगा॥

२८६७ पुष्यसिध्यौ नक्षत्रे।३।१।११६॥

अधिकरणे क्यन्निपात्यते। पुष्यन्त्यस्मिन्नर्थाः पुष्यः। सिध्यन्त्यस्मिन्सिध्यः॥

२८६७–नक्षत्र अर्थ होनेपर पुष्यः और सिध्यः यह दो पद निपातनसे सिद्ध हों। अधिकरणमें क्यप् प्रत्यय निपातनसे सिद्ध हो। पुष्यन्त्यस्मिन्नर्थाः पुष्यः। सिध्यन्त्यस्मिन्सिध्यः॥

२८६८ विपूयविनीयजित्या मुञ्जकल्कहलिषु। ३। १। ११७॥

पूङ्नीञ्जिभ्यः क्यप्। विपूयो मुञ्जः। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः कल्कः। "पिष्ट औषधिविशेष इत्यर्थः"। पापमिति वा। जित्यो हलिः बलेन कृष्टव्य इत्यर्थः। कृष्टसमीकरणार्थं स्थूलकाष्ठम्। अन्यत्तु विपव्यम्। विनेयम्। जेयम्॥

२८६८–मुञ्ज, कल्क, हल यह सम्पूर्ण अर्थ होनेपर क्रमसे विपूय, विनीय, जित्य यह सम्पूर्ण पद निपातनसे सिद्ध हों। अर्थात् पूङ् धातु णीञ् धातु और जि धातु इन संपूर्ण धातुओंके उत्तर निपातनसे क्यप् प्रत्यय हो। विपूयो मुञ्जः। रज्ज्वादिकरणाय शोधयितव्यः इत्यर्थः। विनीयः कल्कः पिष्ट औषधिविशेषः इत्यर्थः। पापम् इति वा। जित्यो हलिः, अर्थात् बलपूर्वक कृष्टव्य। जोती हुई भूमिको समान करनेके निमित्त स्थूल काष्ठ विशेषको जित्य कहतेहैं। जिस स्थानमें मुञ्जादि अर्थ नहीं होगा, उस स्थलमें, विपव्यम्। विनेयम्। जेयम्। इस प्रकारसे होगा॥

२८६९ प्रत्यपिभ्यां ग्रहेः। ३।१। ११८॥

छन्दसीति वक्तव्यम् ॥ * ॥ प्रतिगृह्यम्। अपिगृह्यम्। लोके तु प्रतिग्राह्यम्।अपिग्राह्यम्॥

२८६९–प्रतिपूर्वक और अपिपूर्वक ग्रह धातुके उत्तर क्यप् प्रत्यय हो।

वह "छन्दसीति वक्तव्यम्" अर्थात् वेदमें प्रतिपूर्वक और अपिपूर्वक ग्रह धातुके उत्तर क्यप् प्रत्यय हो * यथा, प्रतिगृह्यम्। अपिगृह्यम्। लौकिक प्रयोगमें प्रतिग्राह्यम्। अपिग्राह्यम्। यह पद होंगे॥

२८७० पदास्वैरिबाह्यापक्ष्येषु च। ३। १। ११९॥

अवगृह्यम्। प्रगृह्यं पदम्।अस्वैरी परतन्त्रः। गृह्यकाः शुकाः। पञ्जरादिबन्धनेन परतन्त्रीकृता इत्यर्थः। बाह्यायां ग्रामगृह्या सेना। ग्रामबहिर्भूतेत्यर्थः। स्त्रीलिंगनिर्देशात्पुन्नपुंसकयोर्न। पक्षे भवः पक्ष्यः। दिगादित्वाद्यत्। आर्यैर्गृह्यते आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः॥

२८७०–पद, अस्वैरि, बाह्य और पक्ष्य अर्थमें धातुके उत्तर क्यप् प्रत्यय हो। अवगृह्यम्। प्रगृह्यम् पदम्। अस्वैरी पदसे परतंत्र अर्थ समझना।गृह्यकाः शुकाः पञ्जरादिबंधनेन परतंत्रीकृता इत्यर्थः।बाह्य यथा, ग्रामगृह्या सेना ग्रामबहिर्भूता इत्यर्थः। स्त्रीलिङ्गनिर्देशके कारण पुँल्लिङ्ग और नपुंसकलिंग नहीं होगा। पक्षे भवः पक्ष्यः। दिगादिगण पठितत्वके कारण यत् प्रत्यय हुआ।

"आर्यैर्गृह्यते" इस विग्रहमें आर्यगृह्यः तत्पक्षाश्रितः इत्यर्थः ॥

२८७१ विभाषा कृवृषोः ।३।१।१२०॥

क्यप्स्यात् । कृत्यम् । वृष्यम् । पक्षे ॥

२८७१-कृ और वृष धातुके उत्तर विकल्प करके क्यप् हो। कृत्यम्। वृष्यम्। पक्षमें कैसा होगा, परसूत्रमें दिखावेंगे ॥

२८७२ ऋहलोर्ण्यत् । ३ ।१। १२४ ॥

ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्यात् । कार्यम् । वर्ष्यम् ॥

२८७२-ऋवर्णान्त धातु और हलन्त धातुके उत्तर ण्यत् प्रत्यय हो। यथा, कार्यम्। वर्ष्यम्।

२८७३ युग्यं च पत्रे । ३। १ ।१२१॥

पत्रं वाहनम् । युग्यो गौः । अत्र क्यप् कुत्वं च निपात्यते ॥

२८७३-पत्र अर्थात् वाहन अर्थ होनेपर युग्य यह पद निपातनसे सिद्ध हो। यथा, युग्यो गौः। इस स्थलमें क्यप् और कुत्व निपातनसे करतेहैं ॥

२८७४ अमावस्यदन्यतरस्याम् । ३ । १ । १२२ ॥

अमोपपदाद्वसेरधिकरणे ण्यत् । वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते । अमा सह वसतोऽस्यां चन्द्रार्कावमावास्या-अमावस्या । ऋहलोर्ण्यत् । चजोरिति कुत्वम् । पाक्यम् ॥ पाणौ सृजेर्ण्यद्वाच्यः ॥ * ॥ ऋदुपधलक्षणस्य क्यपोऽपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः ॥ समवपूर्वाच्च ॥ * ॥ समवसर्ग्या ॥

२८७४-अमा शब्द उपपद होनेपर वस् धातुके उत्तर अधिकरणमें ण्यत् प्रत्यय हो। वृद्धि होनेपर पाक्षिक ह्रस्व निपातनसे हुआ। अमा सह वसतेऽस्यां चन्द्राकौं अमावास्या, अमावस्या, " ऋहलोर्ण्यत् २८७२ " इस सूत्रसे ण्यत् प्रत्यय हुआ "चजोः २८६३ " इस सूत्रसे कुत्व होगा। पाक्यम्।

पाणि शब्द उपपद होनेपर सृज् धातुके उत्तर ण्यत् प्रत्यय हो, ऋकारोपध लक्षण क्यप्का अपवाद यह वार्त्तिक है। पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः * ।

समपूर्वक और अवपूर्वक सृज धातुके उत्तर क्यप् प्रत्यय हो। समवसर्ग्या ॥

२८७५ न क्वादेः । ७ । ३ । ५९ ॥

क्वादेर्धातोः कुत्वं न । गर्ज्यम् । वार्तिककारस्तु चजोरिति सूत्रे निष्ठायामनिट इति पूरयित्वा न क्वादेरित्यादि प्रत्याचख्यौ । तेन अर्जितर्जिप्रभृतीनां न कुत्वं निष्ठायां सेट्त्वात् । ग्लुचुग्लुञ्चुप्रभृतीनां तु क्वादित्वेऽपि कुत्वं स्यादेव । सूत्रमते तु यद्यपि विपरीतं प्राप्तं तथापि यथोत्तरं मुनीनां प्रामाण्यम् ॥

२८७५-कवर्गादि धातुओंके चकार और जकारके स्थानमें कुत्व न हो। गर्ज्यम्। वार्त्तिककारने "चजोः २८६३" इस सूत्रमें "निष्ठायामनिटः" इसको मिलाकर पूर्ण करके "न क्वादेः (२८०५)" इत्यादिको प्रत्याख्यान किया है। उससे यह हुआ कि, अर्जि, तर्जि आदि धातुओंके निष्ठा प्रत्ययके इट्के साथ वर्त्तमानत्वके कारण कुत्व नहीं होगा। और ग्लुचु, ग्लुञ्चु आदि धातुओंके कवर्गादित्व होनेपर भी कुत्व होवेहीगा। सूत्रकारके मतमें यद्यपि इस प्रकार विपरीत प्राप्त होताहै तथापि उत्तरोत्तर मुनियोंका प्रामाण्य स्वीकार करना चाहिये इससे यह हुआ कि, वार्त्तिककारके मतानुरोध निष्ठा प्रत्यय परे रहते अनिट् धातुको कुत्व करना चाहिये। यह फलितार्थ है ॥

२८७६ अजिव्रज्योश्च । ७ । ३ ।६०॥

न कुत्वम् । समाजः । परिव्राजः ॥

२८७६-अज् धातु और व्रज् धातुको कुत्व नहीं होगा। समाजः। परिव्राजः।

२८७७ भुजन्युब्जौ पाण्युपतापयोः । ७ । ३ । ६१ ॥

एतयोरेतौ निपात्यौ । भुज्यतेऽनेनेति भुजः पाणिः । हलश्चेति घञ् । न्युब्जन्त्यस्मिन्निति न्युब्जः । उपतापो रोगः । पाण्युपतापयोः किम् । भोगः समुद्गः ॥

२८७७-पाणि और उपताप अर्थ होनेपर क्रमसे भुज और न्युब्ज यह दो पद निपातनसे सिद्ध हों। अर्थात् घञ् परे रहते भुज धातुको कुत्व और गुणका अभाव और घञ् परे रहते निपूर्वक उब्ज धातुको कुत्वाभाव और दकारके स्थानमें बकार आदेश निपातनसे हो। भुज्यतेऽनेनेति भुजः पाणिः। " हलश्च ३३०० " इस सूत्रसे घञ् प्रत्यय हो। न्युब्जन्त्यस्मिन्निति न्युब्जः। उपताप शब्दसे रोग समझना। जिस स्थानमें पाणि और उपताप नहीं होगा उस स्थानमें भोगः। समुद्गः। ऐसा पद सिद्ध होगा ॥

२८७८ प्रयाजानुयाजौ यज्ञाङ्गे । ७ । ३ । ६२ ॥

एतौ निपातौ यज्ञाङ्गे । पञ्च प्रयाजाः । त्रयोऽनुयाजाः । यज्ञाङ्गे किम् । प्रयागः । अनुयागः ॥

२८७८-यज्ञका अङ्ग होनेपर प्रयाजः और अनुयाजः यह दोपद निपातनसे सिद्ध हों। पञ्च प्रयाजाः। त्रयोऽनुयाजाः। जिस स्थानमें यज्ञका अङ्ग नहीं होगा उस स्थानमें प्रयागः। अनुयागः। यह दो पद सिद्ध होंगे ॥

२८७९ वञ्चेर्गतौ । ७ । ३ । ६३ ॥

कुत्वं न । वञ्च्यम् । गतौ किम् । वङ्क्यं काष्ठम् । कुटिलीकृतमित्यर्थः ॥

२८७९–गति अर्थ होनेपर वञ्च धातुको कुत्व न हो। वञ्च्यम्। जिस स्थानमें गति अर्थ नहीं होगा उस स्थानमें वङ्क्यम्। काष्ठम्। कुटिलीकृतमित्यर्थः॥

२८८० ओक उचः के।७।३।६४॥

उचेर्गुणकुत्वे निपात्येते के परे। ओकः शकुन्तवृषलौ। इगुपधलक्षणः कः। घञा सिद्धे अन्तोदात्तार्थमिदम्॥

२८८०–ककार परे रहते उच धातुको गुण और कुत्व निपातनसे हों। ओकः शकुन्तवृषलौ। "इगुपध०" इस सूत्रसे क होगा। घञ् प्रत्ययसे सिद्ध होनेपर भी यह सूत्र अन्तोदात्तार्थ है॥

२८८१ ण्य आवश्यके।७।३।६५॥

कुत्वं न। अवश्यपाच्यम्॥

२८८१–आवश्यक अर्थमें जो ण्य प्रत्यय वह परे रहते कुत्व न हो। अवश्यपाच्यम्॥

२८८२ यजयाचरुचप्रवचर्चश्च।७।३।६६

ण्ये कुत्वं न। याज्यम्। याच्यम्। रोच्यम्। प्रवाच्यं ग्रन्थविशेषः। ऋच् अर्च्यम्। ऋदुपधत्वेप्यत एव ज्ञापकात् ण्यत्॥ त्यजेश्च॥ * ॥ त्याज्यम्। त्यजिपूज्योश्चेति काशिका॥ तत्र पूजेर्ग्रहणं चिन्त्यं भाष्यानुक्तत्वात्। ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति हि भाष्यम्॥

२८८२–यज, याच, रुच, प्रपूर्वक वच, ऋच् इन सम्पूर्ण धातुओंके उत्तर ण्यत् प्रत्यय रहते कुत्व न हो। याज्यम्। याच्यम्। रोच्यम्। प्रवाच्यम्। ग्रंथविशेष। ऋच् अर्च्यम्। यह धातु ऋदुपध है तो भी इस सूत्रसे ण्य प्रत्यय परे रहते कुत्वनिषेध विधानके कारण ण्यत् ही होगा।

"त्यजेश्च" अर्थात् त्यज धातुके उत्तर भी ण्यत् प्रत्यय रहते कुत्व न हो-त्याज्यम्। त्यज और पूज धातुके उत्तर ण्यत् प्रत्यय रहते कुत्व न हो, ऐसा काशिकाकारने कहा है। उस स्थानमें पूज धातुका ग्रहण श्रेष्ठ नहीं है, क्योंकि भाष्यमें वह उक्त नहीं है। ण्यत्प्रकरणमें "त्यजेरुपसंख्यानम्" ऐसा भाष्यकारने कहाहै॥

२८८३ वचोऽशब्दसंज्ञायाम्।७।३।६७॥

वाच्यम्। शब्दाख्यायां तु वाक्यम्॥

२८८३–ण्यत् प्रत्यय परे रहते अशब्दसंज्ञा होनेपर वच धातुको कुत्व न हो, वाच्यम्। अशब्द संज्ञा न होनेपर कुत्व हो। यथा, वाक्यम्॥

२८८४ प्रयोज्यनियोज्यौ शक्यार्थे।७।३।६८॥

प्रयोक्तुं शक्यः प्रयोज्यः। नियोक्तुं शक्यो नियोज्यो भृत्यः॥

२८८४–शक्य अर्थ होनेपर प्रयोज्य और नियोज्य ये दो पद निपातनसे सिद्ध हों। प्रयोक्तुं शक्यः इस विग्रहमें प्रयोज्यः। नियोक्तुं शक्यः नियोज्यः भृत्यः।

२८८५ भोज्यं भक्ष्ये।७।३।६९॥

भोग्यमन्यत्। ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम्॥ * ॥ लाप्यम्। दभिर्धातुष्वपठितोपि वार्तिकबलात्स्वीकार्यः। दाभ्यः॥

२८८५–भक्ष्य अर्थ होनेपर भोज्यं यह पद निपातनसे सिद्ध हो। अन्यार्थ होनेपर भोग्यम् ऐसा होगा।

"ण्यत्प्रकरणे लपिदभिभ्याञ्चेति वक्तव्यम्" अर्थात् लप् और दभ् धातुके उत्तर ण्यत् प्रत्यय हो * लाप्यम्। दाभिः। यह धातुके मध्यमें अपठित होनेपर भी वार्त्तिकके बलसे स्वीकार करनेके योग्य है। दाभ्यः॥

२८८६ ओरावश्यके।३।१।१२५॥

उवर्णान्ताद्धातोर्ण्यत्स्यादवश्यंभावे द्योत्ये। लाव्यम्। पाव्यम्॥

२८८६–अवश्यम्भाव अर्थ प्रतीयमान होनेपर उवर्णान्त धातुके उत्तर ण्यत् प्रत्यय हो। लाव्यम्। पाव्यम्। लू+ण्यत्= लाव्यम् पू+ण्यत्=पाव्यम्॥

२८८७ आसुयुवपिरपिलपित्रपिचमश्च।३।१।१२६॥

षुञ् आसाव्यम्। यु मिश्रणे। याव्यम्। वाप्यम्। राप्यम्। लाप्यम्। त्राप्यम्। चाम्यम्॥

२८८७–आङ्पूर्वक षु धातु यु धातु वप् धातु रप् धातु लप् धातु त्रप् धातु चम धातु इन सम्पूर्ण धातुओंके उत्तर ण्यत् प्रत्यय हो। षुञ् आसाव्यम्। यु धातु मिश्रणार्थमें है। याव्यम्। वाप्यम्। लाप्यम्। त्राप्यम्। चाप्यम्॥

२८८८ आनाय्योऽनित्ये।३।१।१२७॥

आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते। दक्षिणाग्निविशेष एवेदम्। सहि गार्हपत्यादानीयते नित्यश्च सततमप्रज्वलनात्। आनेयोऽन्यः घटादिः। वैश्यकुलादेरानीतो दक्षिणाग्निश्च॥

२८८८–अनित्य होनेपर आनाय्य यह पद निपातनसे सिद्ध हो। अर्थात् आङ्पूर्वक नी धातुके उत्तर ण्यत् और आय आदेश निपातनसे हों। दक्षिणाग्नि विशेष, ही अर्थमें यह निपातन समझना चाहिये, वह दक्षिणाग्नि गार्हपत्यसे आनीत होताहै और निरन्तर प्रज्वलित न होनेके कारण अनित्य है। अन्य अर्थ होनेपर अर्थात् गार्हपत्यसे आनीत न होनेपर वैश्यकुलसे आनीत होनेपर और घटादि अर्थ होनेपर आनेयः ऐसा होगा॥

२८८९ प्रणाय्योऽसंमतौ।३।१।१२८॥

संमतिः प्रीतिविषयीभवनं कर्मव्यापारः। तथा भोगेष्वादरोपि संमतिः। प्रणाय्यश्चोरः। प्रीत्यनर्ह इत्यर्थः। प्रणाय्योऽन्तेवासी। विरक्त इत्यर्थः। प्रणेयोऽन्यः॥

२८८९-असम्मति अर्थ होनेपर प्रणाय्यः यह पद निपातनसे सिद्ध हो। लोककी प्रीतिका विषय हो ऐसा जो कर्म्म व्यापार उसका नाम संमति है। इसी प्रकार भोगविषयमें जो आदर उसका भी नाम सम्मति है। प्रणाय्यश्चौरः प्रीत्यनर्ह इत्यर्थः। प्रणाय्योऽन्तेवासी विरक्त इत्यर्थः। इससे अन्य अर्थ होनेपर प्रणेयः ऐसा होगा॥

२८९० पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु। ३। १। १२९॥

मीयतेऽनेन पाय्यं मानम्। ण्यत् धात्वादेः पत्वं च। आतो युगिति युक्। सम्यङ्नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः।ण्यदायादेशः समो दीर्घश्च निपात्यते। निचीयतेऽस्मिन्धान्यादिकं निकाय्यो निवासः। अधिकरणे ण्यत्। आय् धात्वादेः कुत्वं च निपात्यते। धीयतेऽनया समिदिति धाय्या ऋक्॥

२८९०-मान, हवि, निवास, सामिधेनी इन सम्पूर्ण अर्थोंमें क्रमसे पाय्य, सान्नाय्य, निकाय्य, धाय्य यह सम्पूर्ण पद निपातनसे सिद्ध हों। मीयते अनेन इस विग्रहमें पाय्यं मा , इस स्थानमें मी धातुसे ण्यत् और धातुके आदि वर्णको पत्व निपातनसे होगा "मीनातिमिनोति०" इस सूत्रसे आत्व होनेपर "आतो युक् (२७६१)" इस सूत्रसे युक् हुआ। सम्यङ् नीयते होमार्थमग्निं प्रति इस विग्रहमें सान्नाय्यं हविर्विशेषः। इस स्थानमें ण्यत् आय् आदेश, सम्‌को दीर्घ निपातनसे जानना। निचीयतेऽस्मिन् धान्यादिकम् इस विग्रहमें निकाय्यो निवासः। इस स्थानमें अधिकरणमें ण्यत्, आय् धातुके आदिको कुत्व निपातनसे समझना चाहिये। धीयतेऽनया समित् इस विग्रहमें धाय्या ऋक्॥

२८९१ क्रतौ कुण्डपाय्यसंचाय्यौ। ३। १। १३०॥

कुण्डेन पीयतेऽस्मिन्सोमः कुण्डपाय्यः क्रतुः। संचीयतेऽसौ संचाय्यः॥

२८९१-क्रतु अर्थ होनेपर कुंडपाय्य और सञ्चाय्य यह दो पद निपातनसे सिद्ध हों। कुंडेन पीयतेऽस्मिन् सोमः इस विग्रहमें 'कुंडपाय्यः क्रतुः' सञ्चीयतेऽसौ 'सञ्चाय्यः'॥

२८९२ अग्नौ परिचाय्योपचाय्यसमूह्याः। ३। १। १३१॥

अग्निधारणार्थे स्थलविशेषे एते साधवः। अन्यत्र तु परिचेयम्। उपचेयम्। संवाह्यम्॥

२८९२-अग्नि धारणार्थ स्थल होनेपर परिचाय्य, उपचाय्य समूह्य यह सम्पूर्ण पद निपातनसे सिद्ध हों। अन्य अर्थ होनेपर परिचेयम्। उपचेयम्। संवाह्यम्। ऐसे होंगे॥

२८९३ चित्याग्निचित्ये च।३।१।१३२॥

चीयतेऽसौ चित्योऽग्निः। अग्नेश्चयनमग्निचित्या। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च।३।३।१६३। त्वया गन्तव्यम्। गमनीयम्। गम्यम्। इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः। स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयति। तेन क्तल्युट्तुमुन्खलर्थेषु नेति सिद्धम्। अर्हे कृत्यतृचश्च। ३। ३। १६९। स्तोतुमर्हः स्तुत्यः स्तुतिकर्म। स्तोता स्तुतिकर्ता। लिङा बाधा माभूदिति कृत्यतृचोर्विधिः॥

२८९३-चित्य और अग्निचित्य यह दो पद निपातनसे सिद्ध हों। चीयतेऽसौ इस विग्रहमें-चित्यः अग्निः। अग्नेश्चयनम् इस विग्रहमें-अग्निचित्या। "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च (२८१७)" इस सूत्रसे कृत्य प्रत्यय हुआ। त्वया गन्तव्यम्। गमनीयम्। गम्यम्। इस स्थानमें लोट्के द्वारा कृत्य प्रत्ययको बाध न हो। इस कारण दुबारा कृत्य प्रत्ययका विधान कियाहै स्त्री प्रत्ययाधिकारके परे वासरूप विधि कहीं २ न हो इसमें यह पुनः कृत्यविधान ज्ञापक है। उससे यह हुआ कि, क्त ल्युट् तुमुन् और खलर्थ प्रत्यय चिकीर्षित होनेपर वासरूप विधि नहीं होगी। "अर्हे कृत्यतृचश्च (२८२२)" इस सूत्रसे कृत्य प्रत्यय और तृच् प्रत्यय भी होगा। स्तोतुमर्हः इस विग्रहमें स्तुत्यः स्तुतिकर्म्म। स्तोता स्तुतिकर्त्ता। लिङ्के द्वारा बाध न हो इस निमित्त कृत्य और तृच् प्रत्ययका विधान है॥

२८९४ भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा।३।४।६८॥

एते कृत्यान्ताः कर्तरि वा निपात्यन्ते। पक्षे तयोरेवेति सकर्मकात्कर्मणि। अकर्मकात्तु भावे ज्ञेयाः। भवतीति भव्यः। भव्यमनेन वा। गायतीति गेयः साम्नामयम्। गेयं सामानेन वा इत्यादि। शकि लिङ् च। ३। ३। १७२। चात्कृत्याः। वोढुं शक्यो वोढव्यः। वहनीयो वाह्यः। लिङा बाधा मा भूदिति कृत्योक्तिः॥ लाघवादनेनैव ज्ञापनसंभवे प्रैषादिसूत्रे कृत्याश्चेति सुत्यजम्। अर्हे कृत्यतृचोर्ग्रहणं च॥

॥ इति कृत्सु कृत्यप्रक्रिया॥

२८९४-भव्य, गेय, प्रवचनीय, उपस्थानीय, जन्य, आप्लाव्य, आपात्य यह सम्पूर्ण कृत्यप्रत्ययान्त पद कर्तामें विकल्प करके निपातनसे सिद्ध हों। पक्षमें "तयोरेव" इस सूत्रसे सकर्म्मक धातुके उत्तर कर्म्ममें और अकर्म्मक धातुके उत्तर भावमें ही उक्त प्रत्यय होंगे। भवति इस विग्रहमें भव्यः। भव्यमनेन वा। गायति इस विग्रहमें गेयः। साम्नामयम्। गेयं सामानेन वा इत्यादि। "शकि लिङ् च (२८३३)" इस सूत्रमें चकारनिर्देशके कारण कृत्य प्रत्यय हो। वोढुं शक्यः इस

विग्रहमें वोढव्यः । वहनीयो वाह्यः । इस स्थानमें लिङ्के द्वारा कृत्यका बाध न हो इस कारण कृत्योक्ति है । लाघवके कारण इस चकारसे ही वासरूप विधिकी अप्रवृत्तिका ज्ञापक संभव होनेपर प्रैषादि सूत्रमें कृत्याश्च यह अंश त्याग करना उचित है । और "अर्हे कृत्यतृचश्च" इस सूत्रमें "कृत्यतृचः" इस अंशका भी त्याग करना उचित है ॥

॥ इति कदन्तकृत्यप्रक्रिया ॥

अथ कृत्प्रक्रिया ।

२८९५ ण्वुल्तृचौ । ३ । १ । १३३ ॥

धातोरेतौ स्तः । कर्तरि कृदिति कर्त्रर्थे । युवोरनाकौ । कारकः । कर्ता । वोढुमर्हो वोढा । कारिका । कर्त्री । गाङ्कुटेति ङित्त्वम् । कुटिता । अञ्णिदित्युक्तेर्न ङित्त्वम् । कोटकः । विज इट् । विजिता । हनस्तोऽचिण्णलोः । घातकः । आतो युक् । दायकः । नोदात्तोपदेशस्येति न वृद्धिः । शमकः । दमकः । अनिटस्तु नियामकः । जनिवध्योश्च । जनकः । वध हिंसायाम् । वधकः । रधिजभोरचि । रन्धकः । जम्भकः । नेट्यलिटि रधेः । रधिता–रद्धा । मस्जिनशोरिति नुम् । मङ्क्ता । नंष्टा–नशिता । रभेरशब्लिटोः । रम्भकः । रब्धा । लभेश्च । लम्भकः । लब्धा । तीषसह– । एषिता–एष्टा । सहिता–सोढा । दरिद्रातेरालोपः । दरिद्रिता । ण्वुलि न । दरिद्रायकः । कृत्यल्युट इत्येव सूत्रमस्तु । यत्र विहितास्ततोऽन्यत्रापि स्युरित्यर्थात् । एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थम् । पादाभ्यां ह्रियते पादहारकः । कर्मणि ण्वुल् । क्रमेः कर्तर्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः ॥ * ॥ प्रक्रन्ता । कर्तरीति किम् । प्रक्रमितव्यम् । आत्मनेपदेति किम् । संक्रमिता । अनन्यभावो विषयशब्दः । तेनानुपसर्गाद्वेति विकल्पार्हस्य न निषेधः । क्रमिता । तदर्हत्वमेव तद्विषयत्वम् । तेन क्रन्तेत्यपीति केचित् । गमेरिडित्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयति । सञ्जिगमिषिता । एवं न वृद्ध्यश्चतुर्भ्यः । विवृत्सिता । यङन्तात् ण्वुल् । अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । पापचकः । यङ्लुगन्तात्तु । पापाचकः ॥

२८९५–धातुके उत्तर कर्तामें ण्वुल् और तृच् प्रत्यय हों । "कर्तरि कृत् (२८३२)" इस सूत्रसे कर्त्रर्थमें ही कृत् प्रत्यय होगा । ण्वुल् प्रत्ययके णकारकी इत्संज्ञा हुई पूर्व स्वरको वृद्धि हुई और स्वरार्थलकारकी इत्संज्ञा हुई " वु " शेष रहा । तृच् प्रत्ययके चकारकी इत्संज्ञा हुई । " तृ " शेष रहा । " युवोरनाकौ १२४७ " इस सूत्रसे वुके स्थानमें अक् आदेश हुआ । यथा, कारकः । कर्ता । वोढुमर्हः इस विग्रहमें वोढा । कारिका, कर्त्री । " गाङ्कुटादिभ्यो० २४६१" इस सूत्रसे ङित्त्व हुआ । कुटिता । " अञ्णित् " इस उक्तिके कारण ङित्त्व नहीं होगा । कोटकः । "विज इट् २५३६ " इस सूत्रसे इडादि प्रत्यय ङिद्वत् हो । यथा, विजिता । "हनस्तोऽचिण्णलोः२५७४" इस सूत्रसे हन् धातुके नकारको तकार आदेश हुआ । घातकः । " आतो युक् २७६१ " इस सूत्रसे युगागम हुआ । दायकः । "नोदात्तोपदेशस्य२७६३" इस सूत्रसे वृद्धि नहीं होगी । शमकः । दमकः । अनिट् धातुका नियामकः ऐसा रूप होगा । "जनिवध्योश्च २५१२" इस सूत्रसे उपधाको वृद्धि नहीं होगी । जनकः । वध धातु हिंसा अर्थमें है वधकः । "रधिजभोरचि २३०२" इस सूत्रसे नुम्का आगम हुआ । रंधकः । जम्भकः । "नेट्यलिटि रधेः २५१६" इस सूत्रसे, "रधिजभोरचि"सूत्रसे प्राप्त नुम्का निषेध हुआ । रधिता, रद्धा । "मस्जिनशोर्झलि २५१७ " इस सूत्रसे नुम् हुआ । मङ्क्ता, नंष्टा, नशिता । "रभेरशब्लिटोः२५८१"इससे नुम हुआ । रम्भकः । रब्धा । "लभेश्च २५८२" इस सूत्रसे लभ् धातुको नुम् हुआ । लम्भकः । लब्धा । "तीषसह०२३४०"इस सूत्रसे विकल्प करके इट् हुआ । एषिता, एष्टा । सहिता, सोढा । दरिद्रा धातुके आकारका लोप हुआ । दरिद्रिता । ण्वुल् प्रत्यय परे रहते आकारका लोप नहीं होगा । दरिद्रायकः । "कृत्यलुटो बहुलम् २८४१" इस सूत्रमें बहुल पद न देकर "कृत्यलुटः २८४१" ऐसा ही सूत्र करते बहुल पदका ग्रहण क्यों किया ? जिस स्थलमें कृत्य और ल्युट् प्रत्यय विहित हैं उनसे भिन्न स्थलमें भी हो यह अर्थ "कृत्यल्युटः" इस सूत्रका होगा तो बहुलग्रहण योगविभागके द्वारा कृन्मात्र अर्थ के व्यभिचारके लिये जानना चाहिये । पादाभ्यां ह्रियते पादहारकः । इस स्थलमें कर्ममें ण्वुल् प्रत्यय हुआहै ।

"क्रमेकर्त्तर्य्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः" अर्थात् आत्मनेपद विषयीभूत क्रमधातुके उत्तर जो कृत् उसके कर्तामें इट् न हो * प्रक्रन्ता । कर्तरि यह पद सूत्रमें क्यों किया ? प्रक्रमितव्यम् । यहां भी निषेध होजायगा इसलिये उक्त पद कियाहै । आत्मनेपदविषयीभूतसे भिन्न स्थलमें अर्थात् परस्मैपदविषयीभूत स्थलमें इट् होगा । यथा, संक्रमिता । इस स्थानमें विषय शब्द अनन्यभाव रूप अर्थमें है । आत्मनेपदसे भिन्नका अविषय होकर भी तन्मात्रका विषय जानना चाहिये । उससे यह हुआ कि नित्यात्मनेपदी जो क्रम धातु उससे परे जो कृत् उसको इट् न हो इस कारण "अनुपसर्गाद्वा २७१६" इस सूत्रसे विकल्प करके आत्मनेपदके योग्य जो क्रम धातु उसके उत्तर कृत्को इट्का निषेध नहीं होगा । क्रमिता । तदर्हत्व ही तद्विषयत्व जानना चाहिये । इस कारण क्रन्ता ऐसा पद भी कोई २ प्रयोग करते हैं । "गमेरिट् २४०१" इस सूत्रमें परस्मैपद ग्रहणसे आत्मनेपद और शानच् प्रत्ययका अभाव दिखातेहैं । सञ्जिगमिषिता ।

इसी प्रकार " न वृद्ध्यश्चतुर्भ्यः २३४८ " इस सूत्रमें भी आत्मनेपद और शानच्का अभाव दिखाया है । विवृत्सिता । यङन्तके उत्तर ण्वुल् प्रत्यय होनेपर अल्लोपके स्थानिवत्त्वके कारण वृद्धि नहीं होगी । पापचकः । यङ्लुगन्तके उत्तर ण्वुल करनेपर पापाचकः ऐसा पद होगा ॥

२८९६ नंदिग्रहिपचादिभ्यो ल्युणिन्यचः । ३ । १ । १३४ ॥

नन्द्यादेर्ल्युर्ग्रह्यादेर्णिनिः पचादेरच् स्यात् । नन्दयतीति नन्दनः । जनमर्दयतीति जनार्दनः। मधुं सूदयतीति मधुसूदनः । विशेषेण भीषयतीति विभीषणः । लवणः । नन्द्यादिगणे निपातनाण्णत्वम् । ग्राही । स्थायी । मन्त्री । विशयी । वृद्ध्यभावो निपातनात् । विषयी । इह षत्वमपि । परिभावी । परिभवी । पाक्षिको वृद्ध्यभावो निपात्यते । पचादिराकृतिगणः । शिवशमरिष्टस्य करे । कर्मणि घटोठच् इति सूत्रयोः करोतेर्घटेश्चाच्प्रयोगात् । अच्प्रत्यये परे यङ्लुग्विधानाच्च । केषांचित्पाठस्त्वनुबन्धासञ्जनार्थः । केषांचित्प्रपञ्चार्थः । केषांचिद्बाधकबाधनार्थः । पचतीति पचः । नदट् । चोरट् । देवट् । इत्यादयष्टितः । नदी । चोरी । देवी । दीव्यतेरिगुपधेति कः प्राप्तः । जारभरा । श्वपचा । अनयोः कर्मण्यण् प्राप्तः । न्यङ्क्वादिषु पाठात् श्वपाकोपि । यङोचि चेति लुक् । न धातुलोप इति गुणवृद्धिनिषेधः । चेक्रियः । नेन्यः । लोलुवः । पोपुवः । मरीमृजः ॥ चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यम् ॥ * ॥ आगमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो हलादिःशेषश्च न । चराचरः । चलाचलः । पतापतः । वदावदः ॥ हन्तेर्घत्वं च ॥ * ॥ घत्वमभ्यासस्य उत्तरस्य त्वभ्यासाच्चेति कुत्वम् । घनाघनः ॥ पाटेर्णिलुक्चोक्च दीर्घश्चाभ्यासस्य ॥ * ॥ पाटूपटः । पक्षे चरः । चलः । पतः । वदः । हनः । पाटः । रात्रेः कृतीति वा नुम् । रात्रिञ्चरो रात्रिचरः ॥

२८९६–नंद्यादि धातुके उत्तर ल्यु प्रत्यय हो, ग्रहादि धातुके उत्तर णिनि प्रत्यय हो और पचादि धातुके उत्तर अच् प्रत्यय हो, यथा–नन्दयति इस विग्रहमें नन्दनः । जनमर्दयति इस विग्रहमें जनार्दनः । मधुं सूदयतीति मधुसूदनः । विशेषेण भीषयते इस विग्रहमें विभीषणः । लवणः । नन्दादि गणको पाणिनिजीने उच्चारण कियाहै इस हेतुसे निपातनके कारण णत्व हुआ । ग्राही । स्थायी । मंत्री । विशयी । निपातनके कारण वृद्धिका अभाव होगा । इस स्थानमें विषयी पदको षत्व भी निपातनसे हुआहै । परिभावी । परिभवी इस स्थानमें निपातनसे पाक्षिक वृद्धिका अभाव होताहै । "शिवशमरिष्टस्य करे (३४८९)" "कर्मणि घटोऽठच् (१८३६)" इन दोनों सूत्रोंमें कृ धातुके उत्तर और घट् धातुके उत्तर अच् प्रयोगके कारण और अच् प्रत्यय परे रहते "यङोचि च (२६५०)" इस सूत्रसे यङ्लुक्का विधान कियाहै इससे पचादि धातु आकृतिगण है। पचादिगणमें कितनेही धातुओंका पाठ अनुबंधके आसञ्जनके लिये है कितनेही धातुओंका विस्तारार्थ है। कितनेही धातुओंका बाधकबाधकनार्थ है । पचति इस विग्रहमें पचः । नदट्, चोरट्, देवट् इत्यादि शब्द टित् हैं । नदी । चोरी । देवी । दिव् धातुके उत्तर "इगुपध० (२८९७)" इस सूत्रसे क प्रत्यय प्राप्त हुआ है और जारभरा, श्वपचा इन दोनों पदोंमें "कर्मण्यण्"इससे अण् प्रत्यय प्राप्त हुआ । न्यङ्कादि मध्यमें पाठके कारण कुत्व होकर श्वपाकः पद सिद्ध होगा । "यङोचि" इस सूत्रसे यङ्लुक् होगा । "न धातुलोपः ० (२६५६)" इस सूत्रसे गुण और वृद्धिका निषेध हुआ । चेक्रियः । नेन्यः । लोलुवः । पोपुवः । परीमृजः ।

"चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यम्" अर्थात् चर, चल, पत,वद इन सम्पूर्ण धातुओंको विकल्प करके अच् परे द्वित्व और अभ्यासको आक्का आगम हो । * आगमको दीर्घ करनेके कारण अभ्यासको ह्रस्व और "हलादिःशेषः (२१७९)" नहीं होगा । चराचरः । चलाचलः । पतापतः । वदावदः ।

"हन्तेर्घत्वञ्च" अर्थात् इन धातुके हकारको घत्व भी हो*। यह घत्व अभ्यासको होगा और उत्तर पदको "अभ्यासाच्च (२४३०)" इस सूत्रसे कुत्व होगा । घनाघनः ।

"पाटेर्णिलुक्चोक्च दीर्घश्चाभ्यासस्य" अर्थात् इससे पाटिधातुके णि प्रत्ययका लुक्, द्वित्व, ऊक् और अभ्यासको दीर्घ होगा । पाटूपटः । पक्षमें चरः । चलः । पतः । वदः । हनः । पाटः । "रात्रेः कृति० (१००८)" इस सूत्रसे विकल्प करके नुम् होकर–रात्रिञ्चरः, रात्रिचरः ॥

२८९७ इगुपधज्ञाप्रीकिरः कः । ३ । १ । १३५ ॥

एभ्यः कः स्यात् । क्षिपः । लिखः । बुधः । कृशः । ज्ञः । प्रीणातीति प्रियः । किरतीति किरः । वासरूपविधिना ण्वुल्तृचावपि । क्षेपकः। क्षेप्ता ॥

२८९७–इगुपध धातु, ज्ञा धातु, प्री धातु और कॄ धातुओंके उत्तर कर्तामें क प्रत्यय हो, क्षिपः । लिखः । बुधः । कृशः । ज्ञः । प्रीणाति, इस विग्रहमें प्रियः । किरति, इ विग्रहमें किरः । वासरूपविधिके द्वारा ण्वुल् और तृच् प्रत्यय भी होगा, क्षेपकः । क्षेप्ता ॥

२८९८ आतश्चोपसर्गे । ३ । १ । १३६॥

कः स्यात् । श्याद्व्यधेति णस्यापवादः । सुग्लः । प्रज्ञः ॥

२८९८–उपसर्ग उपपद होनेपर आकारान्त धातुके उत्तर क प्रत्यय हो, यह सूत्र "श्याद्व्यधा० (२९०३)" इस सूत्रसे विहित ण प्रत्ययका अपवाद है । सुग्लः । प्रज्ञः ॥

२८९९ पाघ्राध्माधेड्दृशः शः । ३ । १ । १३७ ॥

पिबतीति पिबः । जिघ्रः । धमः । धयः । धया कन्या । धेट्ष्टित्त्वात् स्तनन्धयीति खशीव ङीप् प्राप्तः खशोऽन्यत्र नेष्यत इति हरदत्तः । पश्यतीति पश्यः । घ्रः संज्ञायां न । व्याघ्रादिभिरिति निर्देशात् ॥

२८९९–पा, घ्रा, ध्मा, धेट् और दृश् धातुओंके उत्तर कर्तामें श प्रत्यय हो, पिबति, इस विग्रहमें पिबः । जिघ्रः । धमः । धयः । धया कन्या । धेट् धातुको टित्त्वके कारण 'स्तनन्धयी' इसमें जैसे खशन्तासे ङीप् होताहै, वैसे यहां भी ङीप् प्राप्त हुआ, परन्तु खश् प्रत्ययसे अन्यत्र ङीप् नहीं होगा, ऐसा हरदत्त कहतेहैं । पश्यति, इस विग्रहमें पश्यः । घ्रा धातुके उत्तर संज्ञा होनेपर श प्रत्यय नहीं होगा, क्योंकि, "व्याघ्रादिभिः (७३५)" ऐसा निर्देश है ॥

२९०० अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च । ३ । १ । १३८ ॥

शः स्यात् । लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखार्थः सौत्रो हेतुमण्ण्यन्तः सातयः । वासरूपन्यायेन क्विपि सात् परमात्मा । सात्वन्तो भक्ताः । षह मर्षणे चुरादिः । हेतुमण्ण्यन्तो वा । साहयः । अनुपसर्गात्किम् । प्रलिपः ॥ नौ लिम्पेर्वाच्यः ॥ * ॥ निलिम्पा देवाः ॥ गवादिषु विन्देः संज्ञायाम् ॥ * ॥ गोविन्दः । अरविन्दम् ॥

२९००–उपसर्ग पूर्वमें न हो ऐसे लिम्प, विन्द, धारि, पारि, वेदि, उत्पूर्वक एजि, चेति, साति, साहि धातुओंके उत्तर श प्रत्यय हो, लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । साति धातु सुखार्थक, सौत्र हेतुमण्ण्यन्त है । सातयः । वासरूपन्यायसे क्विप् प्रत्यय परे 'सात्' होगा । सात् शब्दसे परमात्मा समझना । सात्वन्तो भक्ताः । षह धातु मर्षणमें है, यह चुरादिगणीय है, अथवा हेतुमण्णिजन्त है, साहयः । उपसर्गके पर होनेपर 'प्रलिपः' ऐसा होगा ।

निपूर्वक लिम्प धातुके उत्तर श प्रत्यय हो * यथा– निलिम्पाः देवाः ।

"गवादिषु विन्देः संज्ञायाम्" अर्थात् गवादि उपपद होनेपर संज्ञामें विन्द धातुके उत्तर श प्रत्यय हो * यथा– गां, भुवं, वेदं, स्वर्गं, वेद वा विन्दति गोविन्दः । अरविन्दम् ॥

२९०१ ददातिदधात्योर्विभाषा । ३ । १ । १३९ ॥

शः स्यात् । ददः । दधः । पक्षे वक्ष्यमाणो णः । अनुपसर्गादित्येव । प्रदः । प्रधः ॥

२९०१–जुहोत्यादिगणीय जो दा धातु और धा धातु उनके उत्तर विकल्प करके श प्रत्यय हो, ददः । दधः । पक्षमें वक्ष्यमाण ण प्रत्यय होगा । यह सूत्र भी उपसर्ग पूर्वमें न रहते ही होगा, इस कारण 'प्रदः । प्रधः' यहां न हुआ ॥

२९०२ ज्वलितिकसन्तेभ्यो णः । ३ । १ । १४० ॥

इतिशब्द आद्यर्थः । ज्वलादिभ्यः कसन्तेभ्यो णः स्याद्वा । पक्षेऽच् ज्वालः । ज्वलः । चालः । चलः । अनुपसर्गादित्येव । उज्ज्वलः ॥ तनोतेरुपसंख्यानम् ॥ * ॥ इहानुपसर्गादिति विभाषेति च न संबध्यते । अवतनोतीत्यवतानः ॥

२९०२–इस स्थलमें इति शब्द आद्यर्थक है । 'ज्वल दीप्तौ' इस धातुसे 'कस् गतौ' इस धातुतक तुदादि पठित जो धातु उनके उत्तर विकल्पसे ण प्रत्यय हो, विकल्प पक्षमें अच् प्रत्यय होगा, यथा–ज्वालः, ज्वलः । चालः, चलः । यह विधि भी उपसर्गके पर न होनेपर ही होगा, इससे 'उज्ज्वलः' यहां न हुआ ।

तन् धातुके उत्तर ण प्रत्यय हो * इस स्थानमें 'अनुपसर्गात्' और 'विभाषा' का सम्बन्ध नहीं होताहै, अवतनोति, इस विग्रहमें अवतानः ॥

२९०३ श्याद्व्यधास्रुसंस्र्वतीणवसावहलिहश्लिषश्वसश्च । ३ । १ । १४१ ॥

श्यैङ्प्रभृतिभ्यो नित्यं णः स्यात् । श्यैङोऽवश्यतेश्चादन्तत्वात्सिद्धे पृथग्ग्रहणमुपसर्गे कं बाधितुम् । अवश्यायः । प्रतिश्यायः । आत् । दायः । धायः । व्याधः । स्रु गतौ आङ्पूर्वः संपूर्वश्च । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः ॥

२९०३–श्यैङ् धातु, आदन्त धातु, व्यध धातु, आङ्पूर्वक स्रु धातु, संपूर्वक स्रु धातु, अतिपूर्वक इण् धातु, अवपूर्वक सो धातु, अवपूर्वक हृ धातु, लिह धातु, श्लिष धातु, और श्वस धातुओंके उत्तर कर्तामें नित्य ण प्रत्यय हो । श्यैङ् और अवपूर्वक सो धातुके उत्तर आदन्तत्वके कारण ण प्रत्यय सिद्ध होनेपर भी पृथक् २ कथन केवल उपसर्ग उपपद रहते प्रत्ययको बाधनार्थ है । अवश्यायः । प्रतिश्यायः । आदन्त धातुके उदाहरण, यथा–दायः । धायः । व्याधः । गत्यर्थक स्रु धातु आङ्पूर्वक और संपूर्वक है, यथा– आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः ॥

२९०४ दुन्योरनुपसर्गे ।३।१। १४२ ॥

णः स्यात् । दुनोतीति दावः । नीसाहचर्यात्सानुबन्धकाद्दुनोतेरेव णः । दवतेस्तु पचाद्यच् । दवः । नयतीति नायः । उपसर्गे तु प्रदवः । प्रणयः ॥

२९०४–उपसर्ग पूर्वमें न रहते दु और नी धातुके उत्तर कर्तामें ण प्रत्यय हो, यथा–दुनोति, इस विग्रहमें दावः । नी धातुके साहचर्यके कारण सानुबंध दु धातुके उत्तर ही ण प्रत्यय होगा । भ्वादिगणीय धातुके उत्तर तो पचादित्वके कारण अच् प्रत्यय होगा । दवः । नयति, इस विग्रहमें नायः । उपसर्गपूर्वक होनेपर तो ' प्रदवः । प्रणयः ' इस प्रकार होगा ॥

२९०५ विभाषा ग्रहः । ३। १।१४३ ॥

णो वा । पक्षेऽच् । व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः । भवतेश्चेति काशिका । भवो देवः संसारश्च । भावाः पदार्थाः । भाष्यमते तु प्राप्त्यर्थाच्चुरादिण्यन्तादच् । भावः ॥

२९०५–ग्रह धातुके उत्तर विकल्प करके ण प्रत्यय हो, पक्षमें अच् प्रत्यय होगा । यह व्यवस्थित विभाषा है, उससे यह हुआ कि, जलचर अर्थमें ग्राहः इस स्थलमें ण प्रत्यय हुआ । ज्योतिष् अर्थमें ' ग्रहः ' इस स्थानमें ण प्रत्यय नहीं हुआ ॥

भू धातुके उत्तर ण प्रत्यय हो, ऐसा काशिकाकारने कहा है । भवो देवः संसारश्च । भावाः पदार्थाः । भाष्यकारके मतसे तो चुरादिणिजन्त प्राप्त्यर्थक भू धातुके उत्तर अच् प्रत्यय करके 'भावः ' पद सिद्ध हुआहै ॥

२९०६ गेहे कः । ३ । १ । १४४ ॥

गेहे कर्तरि ग्रहेः कः स्यात् । गृह्णाति धान्यादिकमिति गृहम् । तात्स्थ्याद्गृहा दाराः ॥

२९०६–गेह कर्ता होनेपर ग्रह धातुके उत्तर क प्रत्यय हो गृह्णाति धान्यादिकमिति=गृहम् तात्स्थ्यात् गृहाः दाराः । अर्थात् धान्यादिको जो ग्रहणकरे उसको गृह कहतेहैं, उसमें रहनेके कारण गृह स्त्रीको भी कहतेहैं ॥

२९०७ शिल्पिनि ष्वुन् ।३ ।१।१४५॥

क्रियाकौशलं शिल्पं तद्वत्कर्तरि ष्वुन् स्यात् ॥ नृतिखनिरञ्जिभ्य एव ॥ * ॥ नर्तकः । नर्तकी । खनकः । खनकी ॥ असि अकेऽने च रञ्जेर्नलोपो वाच्यः ॥ *॥ रजकः । रजकी । भाष्यमते तु नृतिखनिभ्यामेव ष्वुन् । रञ्जेस्तु–क्वुन् शिल्पिसंज्ञयोरिति क्वुन् । टाप् । रजिका । पुंयोगे तु रजकी ॥

२९०७–क्रिया कौशलका नाम शिल्प है तद्वान् कर्त्ता, होनेपर धातुके उत्तर ष्वुन् प्रत्यय हो ।

"नृतिखनिरञ्जिभ्य एव" अर्थात् यह ष्वुन् प्रत्यय, नृत, खन, रञ्ज, धातुओंके उत्तर ही हो * नर्तकः । नर्तकी । खनकः । खनकी ।

"असि अकेऽने च रञ्जेर्नलोपो वाच्यः " अर्थात् अस्, अक और अन प्रत्यय परे रहते रञ्ज धातुके नकारका लोप हो * रजकः । रजकी । भाष्यकारके मतसे तो नृत और खन धातुके उत्तर ही ष्वुन् होगा, रञ्ज धातुके उत्तर तो "क्वुन्-शिल्पि संज्ञयोः" इससे क्वुन् प्रत्यय होगा, पश्चात् टाप् होकर–रजिका । पुंयोगमें तो रजकी ऐसा होगा ॥

२९०८ गः स्थकन् । ३ । १ । १४६॥

गायतेः स्थकन् स्यात् । शिल्पिनि कर्तरि । गाथकः ॥

२९०८–शिल्पी कर्त्ता होनेपर गा धातुके उत्तर थकन् प्रत्यय हो, गाथकः ॥

२९०९ ण्युट् च । ३ । १ । १४७॥

गायनः । टित्त्वाद्गायनी ॥

२९०९–शिल्पी कर्त्ता होनेपर गा धातुके उत्तर ण्युट् प्रत्यय भी हो, गायनः । टित्वके कारण ङीप् होकर गायनी ऐसा होगा ॥

२९१० हश्च व्रीहिकालयोः।३।१।१४८॥

हाको हाङश्च ण्युट् स्यात् व्रीहौ काले च कर्तरि । जहात्युदकमिति हायनो व्रीहिः । जहाति भावानिति हायनो वर्षम् । जिहीते प्राप्नोतीति वा ॥

२९१०–व्रीहि और काल कर्त्ता होनेपर ओहाक् और ओहाङ् धातुके उत्तर ण्युट प्रत्यय हो, जहात्युदकम्, इस विग्रहमें हायनो व्रीहिः । जहाति भवान्, इस विग्रहमें हायनो वर्षम् इसी प्रकार जिहीते अर्थात् प्राप्नोति, इस विग्रहमें भी उक्त पद हुआ ॥

२९११ प्रुसृल्वः समभिहारे वुन् । ३ । १ । १४९ ॥

समभिहारग्रहणेन साधुकारित्वं लक्ष्यते । प्रवकः । सरकः । लवकः ॥

२९११–प्रु, सृ, लू इन तीन धातुओंके उत्तर समभिहारार्थमें वुन् प्रत्यय हो, समभिहार शब्दका ग्रहण करनेसे साधुकारित्व लक्षित होताहै । प्रवकः । सरकः । लवकः ॥

२९१२ आशिषि च । ३ ।१ ।१५० ॥

आशीर्विषयार्थवृत्तेर्धातोर्वुन् स्यात्कर्तरि । जीवतात्–जीवकः । नन्दतात्–नन्दकः । आशीः प्रयोक्तुर्धर्मः । आशासितुः पित्रादेरियमुक्तिः ॥

२९१२-आशीरर्थमें धातुके उत्तर कर्तामें वुन् प्रत्यय हो, जीवतात्, इस विग्रहमें जीवकः । नन्दतात्, इस विग्रहमें नन्दकः । आशीर्वाद प्रयोक्ताका धर्म है । सम्यक् प्रकारसे शासन कर्ता पिता माता प्रभृतिकी यह उक्ति है ॥

२९१३ कर्मण्यण् । ३ । २ । १ ॥

कर्मण्युपपदे धातोरण् प्रत्ययः स्यात् । उपपदसमासः । कुम्भं करोतीति कुम्भकारः । आदित्यं पश्यतीत्यादावनभिधानान्न ॥ शीलिकामिभक्ष्याचरिभ्यो णः ॥ * ॥ अणोपवादार्थं वार्तिकम् । मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा ॥ ईक्षिक्षमिभ्यां च ॥*॥ सुखप्रतीक्षा । बहुक्षमा । कथं तर्हि गङ्गाधरभूधरादयः । कर्मणः शेषत्वविवक्षायां भविष्यन्ति ॥

२९१३-कर्म्म उपपद होनेपर धातुके उत्तर अण् प्रत्यय हो "उपपदमतिङ्" इस सूत्रसे उपपद समास हुआ, यथा-कुम्भं करोति, इस विग्रहमें कुम्भकारः । आदित्यं पश्यति, इत्यादि स्थलमें अनभिधानके कारण अण् नहीं होताहै ।

शील, कम्, भक्ष और आङ्पूर्वक चर धातुओंके उत्तर ण प्रत्यय हो * यह वार्त्तिक अण् प्रत्ययका अपवादार्थ है । मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा ।

ईक्ष और क्षम धातुके उत्तर ण प्रत्यय हो * सुखप्रतीक्षा । बहुक्षमा । अण् प्रत्ययके सम्भव रहते गंगाधर और भूधरादि पद किस प्रकारसे सिद्ध हुए ? तो इसपर कहतेहैं कि, इस स्थलमें कर्मकी शेषत्वविवक्षामें होंगे ॥

२९१४ ह्वावामश्च । ३ । २ । २ ॥

अण् स्यात्कापवादः । स्वर्गह्वायः । तन्तुवायः । धान्यमायः ॥

२९१४-ह्वा, वा, मा धातुओंके उत्तर अण् प्रत्यय हो, यह अण् प्रत्यय क प्रत्ययका बाधक है, यथा-स्वर्गह्वायः । तन्तुवायः । धान्यमायः ॥

२९१५ आतोऽनुपसर्गे कः । ३ । २।३॥

आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यान्नाऽण् । आतो लोपः । गोदः । पार्ष्णित्रम् । अनुपसर्गे किम् । गोसन्दायः ॥ कविधौ सर्वत्र संप्रसारणिभ्यो डः ॥ * ॥ ब्रह्म जिनाति ब्रह्मज्यः । सर्वत्र ग्रहणात् । आतश्चोपसर्गे । ३।३।१०६ । आह्वः । प्रह्वः ॥

२९१५-उपसर्ग पूर्वमें न रहते कर्म उपपद होनेपर आकारान्त धातुके उत्तर क प्रत्यय हो, अण् प्रत्यय न हो । आकारका लोप होकर-गोदः । पार्ष्णित्रम् । उपसर्ग पूर्वमें रहते तो गोसन्दायः ।

क प्रत्ययविधानमें सर्वत्र संप्रसारण होनेवाला है जिसके ऐसे धातुके उत्तर ड प्रत्यय हो * ब्रह्म जिनाति, इस विग्रहमें ब्रह्मज्यः सर्व ग्रहणके कारण उपसर्ग उपपद होनेपर आकारान्त धातुके उत्तर भी ड प्रत्यय ही होगा, यथा-आह्वः । प्रह्वः ॥

२९१६ सुपि स्थः । ३ । २ । ४ ॥

सुपीति योगो विभज्यते । सुपि उपपदे आदन्तात्कः स्यात् । द्वाभ्यां पिबतीति द्विपः । समस्थः । विषमस्थः । ततः स्थः । सुपि तिष्ठतेः कः स्यादारम्भसामर्थ्याद्भावे । आखूनामुत्थानमाखूत्थः ॥

२९१६-'सुपि' ऐसा सूत्र योगविभागसे कियाजाता है । सुबन्त उपपद होनेपर आकारान्त धातुके उत्तर क प्रत्यय हो, यथा-द्वाभ्यां पिबति, इस वि ... द्विपः । समस्थः।विषमस्थः। पश्चात् योगविभागसे 'स्थः' ऐसा द्वितीय सूत्र हुआ । सुबन्त उपपद होनेपर स्था धातुके उत्तर क प्रत्यय हो, आरम्भ सामर्थ्यके कारण भावमें क प्रत्यय होगा, जैसे-आखूनामुत्थानमाखूत्थः ॥

२९१७ प्रष्ठोऽग्रगामिनि । ८ । ३ । ९२॥

प्रतिष्ठत इति प्रष्ठो गौः । अग्रतो गच्छतीत्यर्थः । अग्रेति किम् । प्रस्थः ॥

२९१७-अग्रगामी अर्थमें प्रपूर्वक स्था धातुके उत्तर क प्रत्यय होनेपर निपातनसे षत्व होनेपर प्रतिष्ठते, इस विग्रहमें प्रष्ठो गौः । अग्रतो गच्छतीत्यर्थः । जिस स्थानमें अग्रगामी अर्थ नहीं होगा, उस स्थानमें षत्व नहीं होगा, यथा-प्रस्थः ॥

२९१८ अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः । ८ । ३ । ९७ ॥

स्थ इति कप्रत्ययान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्यः स्थस्य सस्य षः स्यात् । द्विष्ठः । त्रिष्ठः । इत ऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्तते । तत्राकर्मकेषु सुपीत्यस्य सम्बन्धः ॥

२९१८-'स्थ' यह क प्रत्ययान्तका अनुकरण है और उससे षष्ठ्यर्थमें प्रथमा हुई है । अम्ब, आम्ब, गो, भूमि, सव्य, अप, द्वि, त्रि, कुशे, कुशंकु, अंगु, मञ्जि, पुञ्जि, परमे, बर्हिष्, दिवि, अग्नि इन शब्दोंके उत्तर कप्रत्ययान्त स्था धातुके सकारको षत्व हो, द्विष्ठः । त्रिष्ठः । इसके आगे 'कर्मणि' 'सुपि' इन दोनोंकी अनुवृत्ति होगी, उनमें अकर्म्मक धातुओंमें 'सुपि' इसका संबन्ध होगा ॥

२९१९ तुन्दशोकयोः परिमृजापनुदोः । ३ । २ । ५ ॥

तुन्दशोकयोः कर्मणोरुपपदयोराभ्यां कः स्यात् ॥ आलस्यसुखाहरणयोरिति वक्तव्यम् ॥*॥ तुन्दं परिमार्ष्टीति तुन्दपरिमृजोऽलसः । शोकापनुदः । सुखस्याहर्ता । अलसादन्यत्र तुन्दपरि-

मार्ज एव। यश्च संसारासारत्वोपदेशेन शोकमपनुदति स शोकापनोदः ॥ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ॥ * ॥ मूलानि विभुजति मूलविभुजो रथः। आकृतिगणोऽयम् ॥ महीध्रः। कुध्रः। गिलतीति गिलः ॥

२९१९–तुन्द और शोक यह दो कर्म्म उपपद होनेपर यथाक्रम परिपूर्वक मृज धातुके उत्तर और अपपूर्वक तुद धातुके उत्तर क प्रत्यय हो।

आलस्य और सुखाहरणार्थमें क प्रत्यय हो ऐसा कहना चाहिये * यथा–तुन्दं परिमार्ष्टि, इस विग्रहमें तुन्दपरिमृजः। अलसः। शोकापनुदः। सुखस्याहर्त्ता। अलसभिन्नार्थमें 'तुन्दपरिमार्ज्जः' ऐसा ही होगा। जो व्यक्ति संसारके असारत्व उपदेशसे शोकका अपनोदन करताहै, उसका नाम शोकापनोद है।

कप्रकरणमें मूलविभुजादि शब्दोंसे क प्रत्ययको उपसंख्यान करना चाहिये * मूलानि विभुजति, इस विग्रहमें मूलविभुजो रथः। यह आकृतिगण है। महीध्रः। कुध्रः। गिलति, इस विग्रहमें गिलः ॥

२९२० प्रे दाज्ञः। ३। २। ६॥

दारूपाज्जानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कः स्यादणोपवादः। सर्वप्रदः। पथिप्रज्ञः। अनुपसर्ग इत्युक्तेः प्रादन्यस्मिन्सति न कः। गोसम्प्रदायः॥

२९२०–कर्म्म उपपद होनेपर प्रपूर्वक दा और ज्ञा धातुके उत्तर कर्त्तामें क प्रत्यय हो, यह अण् प्रत्ययका अपवाद है, यथा–सर्वप्रदः। पथिप्रज्ञः, सूत्रमें अनुपसर्ग ऐसी उक्ति होनेसे प्रभिन्न सुबन्त उपपद होनेपर क प्रत्यय नहीं होगा, यथा–गोसम्प्रदायः ॥

२९२१ समि ख्यः। ३। २। ७॥

गोसंख्यः ॥

२९२१–सुबन्त उपपद होनेपर संपूर्वक ख्या धातुके उत्तर कर्त्तामें क प्रत्यय हो, यथा–गोसंख्यः ॥

२९२२ गापोष्टक्। ३। २। ८॥

अनुपसृष्टाभ्यामाभ्यां टक् स्यात्कर्मण्युपपदे। सामगः। सामगी। उपसर्गे तु सामसङ्गायः॥ पिबतेः सुराशीध्वोरिति वाच्यम् ॥*॥ सुरापी। शीधुपी। अन्यत्र क्षीरपा ब्राह्मणी। सुरां पाति रक्षतीति सुरापा ॥

२९२२–कर्म्म उपपद होनेपर और उपसर्गपूर्वक न होनेपर गा धातु और पा धातुके उत्तर टक् प्रत्यय हो, यथा–सामगः। सामगी। उपसर्गपूर्वक होनेपर तो सामसङ्गायः।

सुरा और शीधु शब्द उपपद होनेपर पानवाचक पा धातुके उत्तर टक् प्रत्यय हो * सुरापी। शीधुपी। अन्य शब्द उपपद होनेपर नहीं होगा, क्षीरपा ब्राह्मणी। सुरां पाति रक्षति, इस विग्रहमें 'सुरापा' ऐसा पद होगा ॥

२९२३ हरतेरनुद्यमनेच्। ३। २। ९॥

अंशहरः। अनुद्यमने किम्। भारहारः॥ शक्तिलाङ्गलांकुशतोमरयष्टिघटघटीधनुष्षु ग्रहेरुपसंख्यानम् ॥ * ॥ शक्तिग्रहः। लाङ्गलग्रहः॥ सूत्रे च धार्यर्थे ॥ * ॥ सूत्रग्रहः। यस्तु सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव। सूत्रग्राहः॥

२९२३–अनुद्यमनार्थमें हृ धातुके उत्तर अच् प्रत्यय हो, यथा–अंशहरः। उद्यमनार्थ होनेपर–भारहारः ऐसा होगा।

शक्ति, लाङ्गल, अंकुश, तोमर, यष्टि, घट, घटी, धनुष् इन कर्म्मोंके उपपद होनेपर ग्रह धातुके उत्तर अच् प्रत्यय हो * यथा–शक्तिग्रहः। लाङ्गलग्रहः।

सूत्र कर्म उपपद होनेपर धारण अर्थमें ग्रह धातुके उत्तर अच् प्रत्यय हो * सूत्रग्रहः। जो तो सूत्र केवल ग्रहणमात्र करताहै, किन्तु धारण नहीं करताहै, उस स्थानमें अण् प्रत्यय ही होगा, सूत्रग्राहः ॥

२९२४ वयसि च। ३। २। १०॥

उद्यमनार्थं सूत्रम्। कवचहरः कुमारः ॥

२९२४–अवस्थारूप अर्थ गम्यमान होनेपर कर्म्म उपपद रहते हृञ् धातुके उत्तर अच् प्रत्यय हो, उद्यमनार्थ यह सूत्र है, यथा–कवचहरः कुमारः ॥

२९२५ आङि ताच्छील्ये। ३।२।११॥

पुष्पाण्याहरति तच्छीलः पुष्पाहरः। ताच्छील्ये किम्। भारहारः ॥

२९२५–कर्म्म उपपद होनेपर और ताच्छील्य गम्यमान होनेपर आङ्पूर्वक हृञ् धातुके उत्तर अच् प्रत्यय हो, पुष्पाण्याहरति तच्छीलः, इस विग्रहमें पुष्पाहरः। ताच्छील्यार्थ न होनेपर अच् प्रत्यय नहीं होगा, जैसे–भारहारः।

२९२६ अर्हः। ३। २। १२॥

अर्हतेरच् स्यात्कर्मण्युपपदेऽणोपवादः। पूजार्हा ब्राह्मणी ॥

२९२६–कर्म्म उपपद होनेपर अर्ह धातुके उत्तर अच् प्रत्यय हो, यह सूत्र अण् प्रत्ययका अपवाद है। पूजार्हा ब्राह्मणी ॥

२९२७ स्तम्बकर्णयो रमिजपोः। ३। २। १३॥

हस्तिसूचकयोरिति वक्तव्यम् ॥ * ॥ स्तम्बे रमते स्तम्बेरमो हस्ती। तत्पुरुषे कृतीति हलदन्तादिति वा ङेरलुक्। कर्णेजपः सूचकः ॥

२९२७–स्तम्ब और कर्ण शब्द उपपद होनेपर यथाक्रम रम और जप धातुके उत्तर अच् प्रत्यय हो।

यथाक्रम हस्ती और सूचक अर्थमें हो, ऐसा कहना चाहिये * यथा–स्तम्बे रमते=स्तम्बेरमो हस्ती, यहां "तत्पु-

रूपे कृति बहुलम् ९७२" अथवा "इलदन्तात्० ९६६" इस सूत्रसे ङिका अलुक् हुआ । कर्णेजपः सूचकः ॥

२९२८ शमि धातोः संज्ञायाम् ।३।२।१४

शम्भवः । शंवदः । पुनर्धातुग्रहणं बाधकविषयेऽपि प्रवृत्त्यर्थम् । कृञो हेत्वादिषु टो मा भूत् । शङ्करा नाम परिव्राजिका तच्छीला च ॥

२९२८-शम् शब्द उपपद होनेपर संज्ञामें धातुके उत्तर अच् प्रत्यय हो । शम्भवः । शंवदः । धातुके अधिकारसे सिद्धि होनेपर भी पुनर्वार धातुका ग्रहण बाधकविषयमें भी प्रवृत्तिके निमित्त है, इस कारण कृञ् धातुके उत्तर हेतु आदि अर्थोंमें ट प्रत्ययको बाधकर अच् प्रत्यय ही होता है, यथा-शंकरा नाम परिव्राजिका तच्छीला च ॥

२९२९ अधिकरणे शेतेः ।३।२।१५॥

खे शेते खशयः ॥ * ॥ पार्श्वादिषूपसंख्यानम् ॥ पार्श्वाभ्यां शेते पार्श्वशयः । पृष्ठशयः । उदरेण शेते उदरशयः ॥ उत्तानादिषु कर्तृषु ॥ * ॥ उत्तानः शेते उत्तानशयः। अवमूर्धशयः । अवनतो मूर्धा यस्य सः अवमूर्धा अधोमुखः शेत इत्यर्थः । गिरौ डश्छन्दसि ॥ * ॥ गिरौ शेते गिरिशः । कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सुकेशीति । गिरिरस्यास्तीति विग्रहे लोमादित्वाच्छः ॥

२९२९-अधिकरण उपपद होनेपर शीङ् धातुके उत्तर अच् प्रत्यय हो, यथा-खे शेते=खशयः ।

पार्श्वादि शब्द उपपद होनेपर शीङ् धातुके उत्तर अच् प्रत्यय हो * यथा-पार्श्वाभ्यां शेते=पार्श्वशयः।पृष्ठशयः । उदरेण शेते=उदरशयः ।

उत्तानादि कर्त्ता होनेपर शीङ् धातुके उत्तर अच् प्रत्यय हो * यथा-उत्तानः शेते उत्तानशयः । अवमूर्द्धशयः । अवनतो मूर्द्धा यस्य सः अवमूर्धा अधोमुखः शेते इत्यर्थः ।

वेदमें गिरि शब्द उपपद रहते शीङ् धातुके उत्तर ड प्रत्यय हो * गिरौ शेते=गिरिशः । वेदमें ड प्रत्यय होनेसे 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इस स्थलमें किस प्रकार गिरिश पद सिद्ध हुआहै ? तो इस स्थलमें गिरिरस्यास्ति इस विग्रहमें लोमादित्वके कारण श प्रत्यय हुआ है ॥

२९३० चरेष्टः ।३।२।१६॥

अधिकरणे उपपदे । कुरुचरः । कुरुचरी ॥

२९३०-अधिकरण उपपद होनेपर चर धातुके उत्तर ट प्रत्यय हो, यथा-कुरुषु चरति, इस विग्रहमें कुरुचरः । कुरुचरी ॥

२९३१ भिक्षासेनादायेषु च ।३।२।१७॥

भिक्षां चरतीति भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् । आदायचरः । कथं प्रेक्ष्य स्थितां सहचरीमिति । पचादिषु चरडिति पाठात् ॥

२९३१-भिक्षा, सेना और आदाय शब्द उपपद होनेपर चर धातुके उत्तर ट प्रत्यय हो,यथा-भिक्षां चरति,इस वाक्यमें भिक्षाचरः । सेनाचरः । 'आदय' पद आङ्पूर्वक दा धातुके उत्तर ल्यप् प्रत्यय करके सिद्ध हुआहै । आदायचरः । भिक्षादि उपपद न होनेसे ' प्रेक्ष्य स्थितां सहचरीम् ' इस स्थलमें सहचरी शब्द किस प्रकार सिद्ध हुआ ? तो इस स्थलमें पचादिकोंके मध्यमें चरट् इसका पाठ होनेसे टित्वके कारण ङीप् होताहै ॥

२९३२ पुरोऽग्रतोऽग्रेषु सर्तेः ।३।२।१८॥

पुरस्सरः । अग्रतस्सरः । अग्रमग्रेणाग्रे वा सरतीत्यग्रेसरः । सूत्रेऽग्रे इति एदन्तत्वमपि निपात्यते । कथं तर्हि यूथं तदग्रसरगर्वितकृष्णसारमिति । बाहुलकादिति हरदत्तः ॥

२९३२-पुरस्, अग्रतस् और अग्रे शब्द उपपद होनेपर सृ धातुके उत्तर ट प्रत्यय हो, यथा-पुरस्सरः । अग्रतस्सरः । अग्रम् अग्रेण अग्रे वा सरति, इस विग्रहमें अग्रेसरः । सूत्रमें अग्रे इसमें एकारान्तत्व निपातनसे सिद्ध है, ' यूथं तदग्रसरगर्वितकृष्णसारम्' इस स्थलमें तो अग्रसर पद बाहुलकके कारण सिद्ध हुआहै, ऐसा हरदत्तका मत है ॥

२९३३ पूर्वे कर्तरि ।३।२।१९॥

कर्तृवाचिनि पूर्वशब्दे उपपदे सर्तेष्टः स्यात् । पूर्वः सरतीति पूर्वसरः । कर्तरि किम् । पूर्वं देशं सरतीति पूर्वसारः ॥

२९३३-कर्तृवाचक पूर्व शब्द उपपद होनेपर सृ धातुके उत्तर ट प्रत्यय हो, पूर्वः सरति, इस विग्रहमें पूर्वसरः । जिस स्थानमें कर्तृवाचक पूर्व शब्द नहीं होगा, उस स्थानमें पूर्वं देशं सरति, इस विग्रहमें 'पूर्वसारः' ऐसा पद होगा ॥

२९३४ कृञो हेतुताच्छील्यानुलोम्येषु ।३।२।२०॥

एषु द्योत्येषु करोतेष्टः स्यात् । अतः कृकमीति सः । यशस्करी विद्या । श्राद्धकरः । वचनकरः ॥

२९३४-हेतु, ताच्छील्य और आनुलोम्य द्योत्य होनेपर कृञ् धातुके उत्तर ट प्रत्यय हो । "अतः कृकमि० १६०" इस सूत्रसे स आदेश होकर-यशस्करी विद्या । श्राद्धकरः । वचनकरः ॥

२९३५ दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ।३।२।२१॥

एषु कृञष्टः स्यात् अहेत्वादावपि । दिवाकरः । विभाकरः । निशाकरः । कस्कादित्वात्त्सः । भास्करः । बहुकरः । बहुशब्दस्य वैपुल्यार्थ

संख्यापेक्षया पृथग्ग्रहणम्। लिपिलिबिशब्दौ पर्यायौ । संख्या । एककरः । द्विकरः । कस्कादित्वादहस्करः । नित्यं समासेनुत्तरपदस्थस्येति षत्वम् । धनुष्करः । अरुष्करः ॥ किंयत्तद्बहुषु कृञोऽज्विधानमिति वार्त्तिकम् ॥ * ॥ किंकरा । यत्करा । तत्करा । हेत्वादौ टं बाधित्वा परत्वादच् । पुंयोगे ङीष् । किङ्करी ॥

२९३५-दिवा, विभा, निशा, प्रभा, भास्, कार, अन्त, अनन्त, आदि, बहु, नान्दी, किम्, लिपि, लिबि, बलि, भक्ति, कर्तृ, चित्र, क्षेत्र, संख्या, जंघा, बाहु, अहर्, यद्, तद्, धनुस्, और अरुष् शब्द उपपद होनेपर कृञ् धातुके उत्तर हेतु, ताच्छील्य और आनुलोम्यसे भिन्न अर्थमें भी कर्तामें ट प्रत्यय हो, यथा-दिवाकरः । विभाकरः । निशाकरः । कस्कादित्वके कारण सत्व होकर-भास्करः । बहुकरः । बहु शब्दका विपुलता अर्थमें संख्यावाचकत्व न होनेके कारण पृथक् ग्रहण हुआहै । लिपि और लिबि शब्दपर्य्याय हैं। संख्यावाचक उपपद रहते, यथा-एककरः । द्विकरः, इत्यादि कस्कादिमें होनेसे 'अहस्करः' "नित्यं समासेऽनुत्तरपदस्थस्य १५९" इससे षत्व होकर-धनुष्करः । अरुष्करः ।

किम्, यद्, तद्, और बहु शब्द उपपद होनेपर कृ धातुके उत्तर अच् प्रत्यय हो * यथा-किंकरा । यत्करा । तत्करा यहां हेतु, ताच्छील्य और आनुलोम्य अर्थमें परत्वके कारण ट प्रत्ययको बाधकर अच् प्रत्यय हुआ । पुंयोगमें उसके उत्तर ङीष् प्रत्यय होकर-किङ्करी ॥

२९३६ कर्मणि भृतौ । ३ । २ । २२ ॥

कर्मशब्दे उपपदे करोतेष्टः स्यात् । कर्मकरो भृतकः । कर्मकारोऽन्यः ॥

२९३६-कर्म्म शब्द उपपद होनेपर कृ धातुके उत्तर कर्तृवाच्यमें भृति, अर्थात् वेतन अर्थ होनेपर ट प्रत्यय हो, यथा-कर्म्मकरो भृतकः । कर्म्मकारोऽन्यः । इस स्थलमें कर्म्म शब्द पूर्वक कृ धातुके उत्तर अण् प्रत्यय हुआहै ॥

२९३७ न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु । ३ । २ । २३ ॥

एषु कृञष्टो न हेत्वादिषु प्राप्तः प्रतिषिध्यते । शब्दकार इत्यादि ॥

२९३७-शब्द, श्लोक, कलह, गाथा, वैर, चाटु, सूत्र, मंत्र और पद शब्द उपपद होनेपर कृञ् धातुके उत्तर ट प्रत्यय न हो । हेत्वादि अर्थमें ट प्रत्ययकी प्राप्ति हुई थी, परन्तु इस सूत्रसे उसका प्रतिषेध हुआ, यथा-शब्दकारः इत्यादि ॥

२९३८ स्तम्बशकृतोरिन् । ३ । २ । २४ ॥

व्रीहिवत्सयोरिति वक्तव्यम् ॥ * ॥ स्तम्बकारिर्व्रीहिः । शकृत्करिर्वत्सः । व्रीहिवत्सयोः किम् । स्तम्बकारः। शकृत्कारः ॥

२९३८-स्तम्ब और शकृत् शब्द उपपद रहते कृ धातुके उत्तर इन् प्रत्यय हो । यथाक्रम व्रीहि और वत्स वाच्य रहते ही ऐसा कहना चाहिये * यथा-स्तम्बकारिः व्रीहिः । शकृत्करिः वत्सः । व्रीहि और वत्ससे भिन्न अर्थमें तो स्तम्बकारः । शकृत्कारः ॥

२९३९ हरतेर्दृतिनाथयोः पशौ । ३ । २ । २५ ॥

दृतिनाथयोरुपपदयोर्हृञ इन् स्यात् पशौ कर्तरि । दृतिं हरतीति दृतिहरिः । नाथं नासारज्जुं हरतीति नाथहरिः। पशौ किम् । दृतिहारः। नाथहारः ॥

२९३९-पशु कर्त्ता होनेपर दृति और नाथ शब्द उपपद रहते हृञ् धातुके उत्तर इन् प्रत्यय हो, यथा-दृतिं हरति, इस विग्रहमें दृतिहरिः । नाथं नासारज्जुं हरति, इस विग्रहमें नाथहरिः, पशु कर्त्ता न होनेपर तो दृतिहारः । नाथहारः ॥

२९४० फलेग्रहिरात्मम्भरिश्च ।३।२।२६॥

फलानि गृह्णाति फलेग्रहिः । उपपदस्य एदन्तत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते । आत्मानं बिभर्तीति आत्मम्भरिः । आत्मनो मुमागमः । भृञ इन् । चात्कुक्षिम्भरिः । चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः । ज्योत्स्नाकरम्भमुदरम्भरयक्षकोरा इति मुरारिः ॥

२९४०-'फलेग्रहिः' और 'आत्मम्भरिः' यह दो पद निपातनसे सिद्ध हों । फलानि गृह्णाति, इस विग्रहमें फलशब्दपूर्वक ग्रह धातुके उत्तर इन् प्रत्यय और उपपदको अर्थात् फल शब्दको एकारान्तत्व निपातन होकर-फलेग्रहिः । आत्मानं बिभर्त्ति, इस विग्रहमें आत्मन् शब्द पूर्वक भृ धातुके उत्तर इन् प्रत्यय और आत्मन् शब्दको मुमागम निपातनसे होकर-आत्मम्भरिः । चकारसे 'कुक्षिम्भरिः' यह पद भी सिद्ध हुआ । चान्द्रके मतसे तो आत्मन्, उदर और कुक्षि शब्द उपपद होनेपर भृञ् धातुके उत्तर इन् प्रत्यय होगा, इस कारण मुरारिकृत ग्रन्थमें 'ज्योत्स्नाकरम्भमुदरंभरयक्षकोराः' ऐसा प्रयोग है ॥

२९४१ एजेः खश् । ३ । २ । २८ ॥

ण्यन्तादेजेः खश् स्यात् ॥

२९४१-णिजन्त एजि धातुके उत्तर कर्तृवाच्यमें खश् प्रत्यय हो ॥

२९४२ अरुर्द्विषदजन्तस्य मुम् । ६ । ३ । ६७ ॥

अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात् खिदन्ते उत्तरपदे न त्वव्ययस्य । शिखाच्छवादिः । जनमेजयतीति जनमेजयः ॥ वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य खशः उपसंख्यानम् ॥ * ॥ वातमजा मृगाः

२९४२-खिदन्त उत्तर पद रहते अरुष्, द्विषत् और अजन्त शब्दको मुम्का आगम हो, परन्तु अव्ययको मुमागम न हो। खश् प्रत्ययके श की इत्संज्ञा हुई, इस कारण धातुसे शप् आदि होंगे, यथा जनम् एजयति, इस विग्रहमें जनमेजयः।

वात, शुनी, तिल और शर्ध शब्द उपपद होनेपर यथाक्रम-अज, धेट्, तुद और हा धातुके उत्तर खश् प्रत्यय हो* यथा-वातमजाः, अर्थात् मृगाः ॥

२९४३ खित्यनव्ययस्य । ६ ।३।६६ ॥

खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात् । ततो मुम् । शुनिन्धयः । तिलन्तुदः । शर्द्धजहा माषाः। शर्द्धोपानशब्दः तं जहति इति विग्रहः । जहातिरन्तर्भावितण्यर्थः ॥

२९४३-खिदन्त पद परे रहते पूर्वपदको ह्रस्व हो, इससे ह्रस्व पश्चात् मुम्का आगम होकर-शुनिन्धयः । तिलन्तुदः । शर्द्धजहाः माषाः । शर्द्ध शब्दसे अपानशब्द समझना, उसको त्याग करते हैं । हा धातु अन्तर्भावितणिजन्तार्थ है ॥

२९४४ नासिकास्तनयोर्ध्माधेटोः । ३ । २ । २९ ॥

अत्र वार्तिकम् ॥ स्तने धेटो नासिकायां ध्मश्चेति वाच्यम् ॥ * ॥ स्तनं धयतीति स्तनन्धयः । धेटष्टित्वात् स्तनन्धयी । नासिकन्धमः । नासिकन्धयः ॥

२९४४-नासिका और स्तन शब्द उपपद होनेपर ध्मा और धेट् धातुके उत्तर खश् प्रत्यय हो । इस स्थलमें यह वार्त्तिक है कि,

स्तन शब्द उपपद रहते धेट् धातु और नासिका शब्द उपपद रहते ध्मा धातुके उत्तर और च शब्दसे धेट् धातुके उत्तर खश् प्रत्यय हो, स्तनं धयतीति स्तनंधयः । धेट् धातुको टित्व होनेसे ङीप् होकर-स्तनन्धयी । नासिकन्धमः । नासिकन्धयः ॥

२९४५ नाडीमुष्ट्योश्च । ३ । २ । ३० ॥

एतयोरुपपदयोः कर्मणोर्ध्माधेटोः खश् स्यात् ॥ यथासंख्यं नेष्यते ॥ * ॥ नाडिंधमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । घटीखारीखरीषूपसंख्यानम् ॥ * ॥ घटिन्धमः । घटिन्धय इत्यादि । खारी परिमाणविशेषः । खरी गर्दभी ॥

२९४५-नाडी और मुष्टिरूप कर्म उपपद होनेपर ध्मा और धेट् धातुके उत्तर खश् प्रत्यय हो । इस स्थलमें यथाक्रम इष्ट नहीं है, अर्थात् यथेच्छ होगा, यथा-नाडिन्धमः । नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः ।

घटी, खारी और खरी शब्द उपपद होनेपर ध्मा और धेट् धातुके उत्तर खश् प्रत्यय हो * यथा-घटिन्धमः । घटिन्धयः, इत्यादि । खारी शब्दसे परिमाणविशेष समझना । खरी शब्दसे गर्दभी जानना ॥

२९४६ उदि कूले रुजिवहोः ।३।२।३१॥

उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात् । कूलमुद्रुजतीति कूलमुद्रुजः । कूलमुद्वहः ॥

२९४६-कूल कर्म्म उपपद होनेपर उत्पूर्वक रुज और वह धातुके उत्तर खश् प्रत्यय हो, यथा-कूलम् उद्रुजति, इस विग्रहमें कूलमुद्रुजः किनारा तोडनेवाला । कूलम् उद्वहति, इस विग्रहमें कूलमुद्वहः ॥

२९४७ वहाभ्रे लिहः । ३ । २ । ३२ ॥

वहः स्कन्धस्तं लेढीति वहंलिहो गौः । अदादित्वाच्छपो लुक् । खशो ङित्त्वान्न गुणः । अभ्रंलिहो वायुः ॥

२९४७-वह और अभ्ररूप कर्म्म उपपद होनेपर लिह धातुके उत्तर खश् प्रत्यय हो, यथा-वहः स्कन्दस्तं लेढि, इस विग्रहमें वहंलिहो गौः । यहां अदादित्वके कारण लिह धातुके उत्तर शप्का लुक् हुआ । खश् प्रत्यय ङित् है, अत एव धातुके इक्को गुण न हुआ । अभ्रं लेढि, इस विग्रहमें अभ्रंलिहो वायुः ॥

२९४८ परिमाणे पचः । ३ । २ । ३३॥

प्रस्थम्पचा स्थाली । खारीम्पचः कटाहः ॥

२९४८-परिमाणवाचक शब्द उपपद होनेपर पच् धातुके उत्तर खश् प्रत्यय हो, यथा-प्रस्थंपचा स्थाली । खारीं पचति, इस विग्रहमें खारींपचः कटाहः ॥

२९४९ मितनखे च । ३ । २ ।३४॥

मितम्पचा ब्राह्मणी । नखम्पचा यवागूः । पचिरत्र तापवाची ॥

२९४९-मित और नख शब्द उपपद होनेपर खश् प्रत्यय हो, यथा-मितं पचति, इस विग्रहमें मितम्पचा ब्राह्मणी । नखं पचति, इस विग्रहमें नखम्पचा यवागूः । इस स्थलमें पच् धातु तापवाचक है ॥

२९५० विध्वरुषोस्तुदः । ३ । २ ।३५॥

विधुन्तुदः । मुमि कृते संयोगान्तस्य लोपः । अरुन्तुदः ॥

२९५०-विधु और अरुष् शब्द उपपद होनेपर तुद् धातुके उत्तर खश् प्रत्यय हो, यथा-विधुं तुदति, इस विग्रहमें विधुन्तुदः राहुः । मुम् आगम होनेपर संयोगान्तका लोप होकर अरुर्मर्म तुदति, इस विग्रहमें अरुन्तुदः (मर्मस्थानमें चोट पहुंचानेवाला) ॥

२९५१ असूर्यललाटयोर्दृशितपोः । ३ । २ । ३६ ॥

असूर्यमित्यसमर्थसमासः । दृशिना नञः सम्बन्धात् । सूर्यं न पश्यन्तीत्यसूर्यम्पश्या राजदाराः । ललाटन्तपः सूर्यः ॥

२९५१–दृश् धातुके साथ नञ्का संबन्ध होनेके कारण 'असूर्यम्' इस स्थलमें असमर्थ समास हुआहै । असूर्य्य और ललाट शब्द उपपद होनेपर यथाक्रम दृश् और तप् धातुके उत्तर खश् प्रत्यय हो । सूर्य्यं न पश्यंति, इस विग्रहमें असूर्यम्पश्या राजदाराः । ललाटं तपति, इस विग्रहमें ललाटन्तपः सूर्य्यः ॥

२९५२ उग्रम्पश्येरम्मदपाणिन्धमाश्च । ३ । २ । ३७ ॥

एते निपात्यन्ते । उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश् । उग्रं पश्यतीत्युग्रम्पश्यः। इरा उदकं तेन माद्यति दीप्यतेऽविन्धनत्वादिति इरम्मदो मेघज्योतिः । इह निपातनात् श्यन्न । पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमोऽध्वा । अन्धकाराद्यावृत इत्यर्थः । तत्र हि सर्पाद्यपनोदनाय पाणयः शब्द्यन्ते ॥

२९५२–उग्रम्पश्यः, इरम्मदः, पाणिन्धमः, यह तीन पद निपातनसे सिद्ध हों इस स्थलमें उग्र पद क्रियाका विशेषण है । ' उग्रम् ' यह क्रियाविशेषण उपपद होनेपर दृश् धातुके उत्तर खश् प्रत्यय होकर–उग्रं पश्यति, इस विग्रहमें उग्रम्पश्यः । इरा उपपद होनेपर मद् धातुके उत्तर खश् प्रत्यय हुआ । इरा शब्दसे उदक समझना । इरया माद्यति दीप्यते अविन्धनत्वात्, इस विग्रहमें इरम्मदो मेघज्योतिः (बिजली) यहां निपातनसे श्यन् प्रत्यय नहीं हुआ । पाणयो ध्मायन्तेऽस्मिन्, इस विग्रहमें पाणिन्धमः अध्वा, अर्थात् अन्धकारादिसे आवृत भाग उस स्थलमें सर्पादि दूरीकरणार्थ हस्तकी ध्वनि की जातीहै ॥

२९५३ प्रियवशे वदः खच् । ३ । २ । ३८ ॥

प्रियंवदः । वशंवदः ॥ गमेः सुपि वाच्यः ॥ * ॥ असंज्ञार्थमिदम् । मितङ्गमो हस्ती ॥ विहायसो विह इति वाच्यम् ॥ * ॥ खच्च डिद्वा वाच्यः ॥ * ॥ विहङ्गः । विहङ्गमः । भुजङ्गः ॥ भुजङ्गमः ।

२९५३–प्रिय और वश शब्द उपपद होनेपर वद् धातुके उत्तर खच् प्रत्यय हो, यथा–प्रियंवदः । वशंवदः ।

सुबन्त उपपद रहते गम् धातुके उत्तर खच् प्रत्यय हो * यह असंज्ञार्थ है संज्ञामें तो वक्ष्यमाण " गमश्च " इस सूत्रसे ही सिद्ध है मितङ्गमो हस्ती ।

विहायस् शब्दके स्थानमें विह आदेश हो * । खच् प्रत्यय विकल्प करके डित् हो विहङ्गः, विहङ्गमः–पक्षी । भुजङ्गः, भुजङ्गमः सर्पः ॥

२९५४ द्विषत्परयोस्तापेः । ३ । २ । ३९ ॥

खच् स्यात् ॥

२९५४–द्विषत् और पर शब्द उपपद होनेपर तापि धातुके उत्तर खच् प्रत्यय हो ॥

२९५५ खचि ह्रस्वः । ६ । ४ । ९४ ॥

खच्परे णौ उपधाया ह्रस्वः स्यात् । द्विषन्तं परं वा तापयतीति द्विषन्तपः । परन्तपः । घटघटीग्रहणाल्लिङ्गविशिष्टपरिभाषा अनित्या । तेनेह न । द्विषतीं तापयतीति द्विषतीतापः ॥

२९५५–खच्प्रत्ययपरक णि परे रहते धातुकी उपधाको ह्रस्व हो, यथा–द्विषन्तं परं वा तापयति, इस विग्रहमें द्विषन्तपः । परन्तपः शत्रुको ताप देनेवाला "शक्तिलाङ्गलांकुश०" इस सूत्रमें घट शब्दसे पृथक् घटी शब्दका ग्रहण करनेसे लिङ्गविशिष्टपरिभाषा अनित्य होतीहै, इस कारण द्विषती तापयति, इस विग्रहमें द्विषतीतापः (द्वेष करती हुई स्त्रीको दुःख देनेवाला) यहां खच् प्रत्यय नहीं हुआ ॥

२९५६ वाचि यमो व्रते । ३ । २ । ४० ॥

वाक्शब्दे उपपदे यमेः खच् स्याद्व्रते गम्ये ॥

२९५६–व्रत गम्य होनेपर वाक् शब्द उपपद रहते यम् धातुके उत्तर खच् प्रत्यय हो ॥

२९५७ वाचंयमपुरन्दरौ च । ६ । ३ । ६९ ॥

वाक्पुरोरमन्तत्वं निपात्यते । वाचंयमो मौनव्रती । व्रते किम् । अशक्त्यादिना वाचं यच्छतीति वाग्यामः ॥

२९५७–वाचंयमः पुरन्दरः, इनमें वाक् और पुर् शब्दको अमन्तत्व निपातनसे सिद्ध हो, यथा–वाचंयमो मौनव्रती । व्रत गम्य न होनेपर तो अशक्त्यादिना वाचं यच्छति, इस विग्रहमें वाग्यामः ॥

२९५८ पूःसर्वयोर्दारिसहोः । ३ । २ । ४१ ॥

पुरं दारयतीति पुरन्दरः । सर्वंसहः । सहिग्रहणमसंज्ञार्थम् ॥ भगे च दारेरिति काशिका ॥ बाहुलकेन लब्धमिदमित्याहुः । भगं दारयतीति भगन्दरः ॥

२९५८–पुर् और सर्व शब्द उपपद होनेपर यथाक्रम दारि धातु और सह धातुके उत्तर खच् प्रत्यय हो, पुरम् दारयति, इस विग्रहमें पुरन्दरः । सर्वंसहः । यहां सहिग्रहण असंज्ञार्थ है, संज्ञामें तो " संज्ञायां भृतॄवृजि० " इस सूत्रसे ही सिद्ध है ।

भाग शब्द उपपद रहते दारि धातुके उत्तर खच् प्रत्यय हो, यह काशिका है, कोई तो बाहुलकसे यह लब्ध होताहै, ऐसा कहतेहैं । भगं दारयति, इस विग्रहमें भगन्दरः (रोगविशेषः) ॥

२९५९ सर्वकूलाभ्रकरीषेषु कषः । ३ । २ । ४२ ॥

सर्वङ्कषः खलः । कूलङ्कषा नदी । अभ्रंकषो वायुः । करीषङ्कषा वात्या ॥

२९५९-सर्व, कूल, अभ्र और करीष शब्द उपपद होनेपर कष् धातुके उत्तर खच् प्रत्यय हो, यथा-सर्वङ्कषः खलः । कूलङ्कषा नदी । अभ्रङ्कषो वायुः । करीषङ्कषा वात्या ॥

२९६० मेघर्तिभयेषु कृञः ।३।२।४३ ॥

मेघङ्करः । ऋतिङ्करः । भयङ्करः । भयशब्देन तदन्तविधिः । अभयङ्करः ॥

२९६०-मेघ, ऋति और भय शब्द उपपद होनेपर कृञ् धातुके उत्तर खच् प्रत्यय हो, यथा-मेघंकरः । ऋतिङ्करः । भयङ्करः । भय शब्दसे तदन्तविधि होतीहै, इससे भय शब्दान्त शब्दके उत्तर भी खच् प्रत्यय होगा, यथा-अभयङ्करः ॥

२९६१ क्षेमप्रियमद्रेऽण् च ।३।२।४४॥

एषु कृञोऽण् स्यात् । चात् खच् । क्षेमंकरः-क्षेमकारः । प्रियङ्करः-प्रियकारः । मद्रङ्करः-मद्रकारः । वेति वाच्येऽण्ग्रहणं हेत्वादिषु टो मा भूदिति । कथं तर्हि अल्पारम्भाः क्षेमकरा इति । कर्मणः शेषत्वविवक्षायां पचाद्यच् ॥

२९६१-क्षेम, प्रिय और मद्र शब्द उपपद होनेपर कृञ् धातुके उत्तर अण् और चकारसे खच् प्रत्यय हो, यथा-क्षेमङ्करः । क्षेमकारः । प्रियङ्करः । प्रियकारः । मद्रङ्करः । मद्रकारः । वा शब्द ग्रहण करनेसे ही पक्षमें अण् प्रत्यय होता, फिर अणूग्रहण हेत्वादि अर्थमें ट प्रत्यय नहीं हो इसके निमित्त है । 'अल्पारम्भाः क्षेमकराः' इस स्थलमें तो कर्मकी शेषत्व विवक्षामें पचादित्वके कारण अच् प्रत्यय हुआहै ॥

२९६२ आशिते भुवः करणभावयोः। ३ । २ । ४५ ॥

आशितशब्दे उपपदे भवतेः खच् । आशितो भवत्यनेनाशितम्भव ओदनः । आशितस्य भवनम् आशितम्भवः ॥

२९६२-करण और भाववाच्यमें आशित शब्द उपपद होनेपर भू धातुके उत्तर खच् प्रत्यय हो, यथा-आशितो भवति अनेन, इस विग्रहमें आशितम्भवः ओदनः । आशितस्य भवनम्=आशितम्भवः ॥

२९६३ संज्ञायां भृतॄवृजिधारिसहितपिदमः । ३ । २ । ४६ ॥

विश्वं बिभर्तीति विश्वम्भरः । विश्वम्भरा । रथन्तरं साम । इह रथेन तरतीति व्युत्पत्तिमात्रं न त्ववयवार्थानुगमः । पतिंवरा कन्या । शत्रुंजयो हस्ती । युगंधरः पर्वतः । शत्रुंसहः । शत्रुंतपः । अरिंदमः । दमिः शमनार्थां तेन सकर्मक इत्युक्तम् । मतान्तरे तु अन्तर्भावितण्यर्थोऽत्र दमिः ॥

२९६३-संज्ञा होनेपर भृ, तॄ, वृ, जि, धारि, सहि, तप् और दम् धातुके उत्तर खच् प्रत्यय हो, यथा-विश्वं बिभर्ति, इस विग्रहमें विश्वम्भरः । विश्वम्भरा । रथन्तरम् साम, इस स्थलमें 'रथेन तरति' ऐसा व्युत्पत्तिमात्र है किन्तु कोई अवयवार्थका अनुगम नहीं है । पतिंवरा कन्या । शत्रुञ्जयो हस्ती । युगंधरः पर्वतः । शत्रुंसहः । शत्रुन्तपः । अरिन्दमः । दम् धातु शमनार्थमें है, इस कारण यह सकर्म्मक है । अन्य मतसे तो इस स्थलमें दम् धातु अन्तर्भावितणिजर्थ है ॥

२९६४ गमश्च । ३ । २ । ४७ ॥

सुतंगमः ॥

२९६४-संज्ञा अर्थ होनेपर गम् धातुके उत्तर खच् प्रत्यय हो, यथा-सुतङ्गमः ॥

२९६५ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः । ३ । २ । ४८ ॥

संज्ञायामिति निवृत्तम् । एषु गमेर्डः स्यात् । डित्वसामर्थ्यादभस्यापि टेर्लोपः । अन्तं गच्छतीत्यन्तग इत्यादि ॥ सर्वत्रपन्नयोरुपसंख्यानम् ॥ * ॥ सर्वत्रगः । पन्नं पतितं गच्छतीति पन्नगः । पन्नमिति पद्यतेः क्तान्तं क्रियाविशेषणम् ॥ उरसो लोपश्च ॥ * ॥ उरसा गच्छतीत्युरगः ॥ सुदुरोरधिकरणे ॥ * ॥ सुखेन गच्छत्यत्र सुगः । दुर्गः ॥ अन्यत्रापि दृश्यते इति वक्तव्यम् ॥ * ॥ ग्रामगः ॥ डे च विहायसो विहादेशो वक्तव्यः॥ ॥ * ॥ विहगः ॥

२९६५-यहां संज्ञायाम् इसकी निवृत्ति हुई । अन्त, अत्यन्त, अध्व, दूर, पार, सर्व और अनन्त शब्द उपपद होनेपर गम् धातुके उत्तर ड प्रत्यय हो, प्रत्ययमें डित्वसामर्थ्यके कारण अभसंज्ञक टिका भी लोप होगा, यथा-अन्तं गच्छति, इस विग्रहमें अन्तगः, इत्यादि ।

सर्वत्र और पन्न शब्द उपपद रहते गम् धातुके उत्तर ड प्रत्यय हो* यथा-सर्वत्रगः । पन्नं पतितं गच्छति, इस विग्रहमें पन्नगः सर्पः । पद् धातुसे क्त प्रत्यय करके 'पन्नम्' यह क्रियाका विशेषण है ।

उरस् शब्द उपपद रहते गम् धातुके उत्तर ड प्रत्यय हो और सकारका लोप हो * उरसा गच्छति, इस विग्रहमें उरगः ।

अधिकरण कारकमें सु और दुर् शब्द उपपद रहते गम् धातुके उत्तर ड प्रत्यय हो * यथा-सुखेन गच्छति अत्र, इस विग्रहमें सुगः । दुर्गः ।

अन्यत्र भी देखा जाताहै, ऐसा कहना चाहिये * इस कारण ग्रामगः।

ड प्रत्यय परे रहते विहायस् शब्दके स्थानमें विह आदेश हो ऐसा कहना चाहिये * विहगः॥

२९६६ आशिषि हनः। ३। २। ४९॥

शत्रुं वध्याच्छत्रुहः। आशिषि किम्। शत्रुघातः॥ दारावाहनोऽणन्तस्य च टः संज्ञायाम्॥ ॥ * ॥ दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण् टकारश्चान्तादेशो वक्तव्य इत्यर्थः। दार्वाघाटः॥ चारौ वा ॥ * ॥ चार्वाघाटः। चार्वाघातः। कर्मणि समि च ॥ * ॥ कर्मण्युपपदे संपूर्वाद्धन्तेरुक्तं वेत्यर्थः। वर्णान्संहन्तीति वर्णसङ्घाटः। पदसङ्घाटः। वर्णसङ्घातः। पदसङ्घातः॥

२९६६-आशीरर्थमें हन् धातुके उत्तर ड प्रत्यय हो, यथा-शत्रुं वध्यात्=शत्रुहः। आशीर्भिन्नार्थमें तो शत्रुघातः।

संज्ञामें दारु शब्द उपपद होनेपर आङ्पूर्वक हन् धातुके उत्तर अण् प्रत्यय हो और टकार अन्तादेश हो * यथा-दार्वाघाटः।

चारु शब्द उपपद होनेपर भी आङ्पूर्वक हन् धातुके उत्तर विकल्प करके अण् प्रत्यय हो और टकार अन्तादेश हो* चार्वाघाटः। चार्वाघातः।

कर्म उपपद होनेपर संपूर्वक हन् धातुके उत्तर विकल्प करके अण् प्रत्यय और टकार अन्तादेश हो * यथा-वर्णान् संहन्ति, इस विग्रहमें वर्णसंघाटः, वर्णसंघातः। पदसंघाटः, पदसंघातः॥

२९६७ अपे क्लेशतमसोः। ३।२।५०॥

अपपूर्वाद्धन्तेर्डः स्यात्। अनाशीरर्थमिदम्। क्लेशापहः पुत्रः। तमोऽपहः सूर्यः॥

२९६७-क्लेश और तमस् शब्द उपपद रहते अपपूर्वक हन् धातुके उत्तर ड प्रत्यय हो, यह सूत्र अनाशीरर्थ, अर्थात् आशीर्वादार्थसे भिन्नमें होनेके निमित्त है। क्लेशापहः पुत्रः। तमोऽपहः सूर्यः (अंधकारका नाशक)॥

२९६८ कुमारशीर्षयोर्णिनिः।३।२।५१॥

कुमारघाती। शिरसः शीर्षभावो निपात्यते। शीर्षघाती॥

२९६८-कुमार और शीर्ष शब्द उपपद रहते हन् धातुके उत्तर णिनि प्रत्यय हो, यथा-कुमारघाती। शिरस् शब्दके स्थानमें शीर्ष आदेश निपातनसे होकर-शीर्षघाती॥

२९६९ लक्षणे जायापत्योष्टक्।३।२।५२।

हन्तेष्टक् स्याल्लक्षणवति कर्तरि। जायाघ्नो ना। पतिघ्नी स्त्री॥

२९६९-कर्ता लक्षणविशिष्ट (शुभाशुभ लक्षणाक्रान्त) हो तो जाया और पति शब्द उपपद रहते हन् धातुके उत्तर टक् प्रत्यय हो, यथा-जायाघ्नो ना। पतिघ्नी स्त्री॥

२९७० अमनुष्यकर्तृके च। ३।२।५३॥

जायाघ्नस्तिलकालकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतम्। अमनुष्येति किम्। आखुघातः शूद्रः। अथ कथं बलभद्रः, प्रलम्बघ्नः, शत्रुघ्नः, कृतघ्न इत्यादि। मूलविभुजादित्वात्सिद्धम्। चोरघातो नगरघातो हस्तीति तु बाहुलकादणि॥

२९७०-मनुष्यसे भिन्न लक्षणवान् कर्त्ता होनेपर हन् धातुके उत्तर टक् प्रत्यय हो, यथा-जायाघ्नः तिलकालकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतम्। मनुष्य कर्त्ता होनेपर यथा॰ आखुघातः शूद्रः।

मनुष्यभिन्न कर्त्ता होनेपर ही प्रत्यय होनेसे बलभद्रः, प्रलम्बघ्नः, शत्रुघ्नः, कृतघ्नः इत्यादि पद किस प्रकारसे सिद्ध हुए। तो मूलविभुजादित्वके कारण क प्रत्यय करके सिद्ध हुएहैं। चोरघातः, नगरघातो हस्ती, इत्यादि पद तो बाहुलकके कारण अण् प्रत्यय होकर सिद्ध हुए हैं॥

२९७१ शक्तौ हस्तिकपाटयोः।३।२।५४॥

हन्तेष्टक् स्यात् शक्तौ द्योत्यायाम्। मनुष्यकर्तृकार्थमिदम्। हस्तिघ्नो ना। कपाटघ्नश्चोरः। कवाटेति पाठान्तरम्॥

२९७१-शक्ति द्योत्य होनेपर हस्तिन् और कपाट शब्द उपपद रहते हन् धातुसे टक् प्रत्यय हो, मनुष्यकर्तृकार्थ यह सूत्र है, यथा-हस्तिघ्नो ना। कपाटघ्नश्चोरः। 'कवाट' ऐसा पाठान्तर है॥

२९७२ पाणिघताडघौ शिल्पिनि। ३।२।५५॥

हन्तेष्टक् टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः। पाणिघः। ताडघः। शिल्पिनि किम्। पाणिघातः। ताडघातः॥ राजघ उपसंख्यानम्॥ * ॥ राजानं हन्ति राजघः॥

२९७२-शिल्पी कर्त्ता हो तो पाणि और ताड शब्द उपपद होनेपर निपातनसे हन् धातुके उत्तर टक् प्रत्यय, धातुकी टिका लोप और घत्व हो, यथा-पाणिघः। ताडघः। शिल्पी न होनेपर तो पाणिघातः। ताडघातः।

राजन् शब्द उपपद रहते निपातनसे हन् धातुके उत्तर टक् प्रत्यय, टिलोप और घत्व हो * यथा-राजानं हन्ति, इस विग्रहमें राजघः॥

२९७३ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। ३। २। ५६॥

एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपपदेषु कृञः ख्युन् स्यात्। अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यङ्करणम्। अच्वौ किम्। आढ्यीकुर्वन्त्यनेन। इह प्रतिषेधसामर्थ्यात् ल्युडपि नेति काशिका। भाष्यमते तु ल्युट् स्यादेव। अच्वावित्युत्तरार्थम्॥

२९७३-च्वि प्रत्ययार्थक हो और च्वि प्रत्ययान्त न हो ऐसे आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध और प्रिय ये कर्म उपपद हों तो कृञ् धातुके उत्तर करणमें ख्युन् प्रत्यय हो, यथा-अनाढ्यमाढ्यं कुर्वन्त्यनेन, इस विग्रहमें आढ्यङ्करणम् । च्वि प्रत्ययान्त होनेपर तो आढ्यीकुर्वन्त्यनेन, इस स्थलमें प्रतिषेधबलसे ल्युट् प्रत्यय भी न होगा, यह काशिकाकारका मत है, परन्तु भाष्यके मतसे तो ल्युट् होवेहीगा । 'अच्वौ' यह पद उत्तरार्थ है ॥

२९७४ कर्तरि भुवः खिष्णुच्खुकञौ । ३ । २ । ५७ ॥

आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेरेतौ स्तः॥अनाढ्य आढ्यो भवतीति आढ्यम्भविष्णुः। आढ्यम्भावुकः॥ स्पृशोऽनुदके क्विन् ।३ । २।५८॥ घृतस्पृक् । कर्मणीति निवृत्तम् । मन्त्रेण स्पृशतीति मन्त्रस्पृक् ॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ।३ । २ । ५९ । व्याख्यातम् ॥ त्यदादिषु दृशोऽनालोचने कञ्च । ३ । २ ।६० । समानान्ययोश्चेति वाच्यम् ॥ * ॥ सदृक् । सदृशः । अन्यादृक् । अन्यादृशः । क्सोऽपि वाच्यः ॥ * ॥ तादृक्षः । सदृक्षः । अन्यादृक्षः॥

२९७४-च्व्यर्थक और अच्व्यन्त आढ्यादि शब्द उपपद होनेपर कर्तामें भू धातुके उत्तर खिष्णुच् और खुकञ् प्रत्यय हों, यथा-अनाढ्यः आढ्यो भवति, इस विग्रहमें आढ्यम्भविष्णुः । आढ्यम्भावुकः ।

(४३२) उदकभिन्न सुबन्त उपपद रहते स्पृश् धातुके उत्तर क्विन् प्रत्यय हो, घृतस्पृक् इस स्थलमें कर्मणि इस पदकी निवृत्ति हुई । मंत्रेण स्पृशति, इस विग्रहमें मंत्रस्पृक् ।

(३७३) इनकी व्याख्या पूर्वमें करदी है ।

(४२९) त्यदादि शब्द उपपद रहते दृश् धातुके उत्तर अनालोचनार्थमें कञ् प्रत्यय और चकारसे क्विन् प्रत्यय हो ।

समान और अन्य शब्द उपपद रहते भी दृश् धातुसे कञ् और क्विन् प्रत्यय हो * यथा-सदृक् । सदृशः । अन्यादृक् । अन्यादृशः ।

पूर्वोक्त उपपद रहते दृश् धातुसे क्स प्रत्यय भी हो * यथा-तादृक्षः । सदृक्षः । अन्यादृक्षः ॥

२९७५ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् । ३। २ । ६१ ॥

एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे। द्युसत्।उपनिषत्।अण्डसूः।प्रसूः।मित्रद्विट्। प्रद्विट् । मित्रध्रुक्।प्रध्रुक्।गोधुक्। प्रधुक्। अश्वयुक् । प्रयुक् । वेदवित् । निविदित्यादि ॥ अग्रग्रामाभ्यां नयतेर्णो वाच्यः ॥ * ॥ अग्रणीः । ग्रामणीः ॥

२९७५-उपसर्ग पूर्वमें रहे वा न रहे सुबन्त उपपद रहते सत्, सू, द्विष, द्रुह, दुह, युज, विद, भिद, छिद, जि, नी, राज्, धातुओंके उत्तर क्विप् प्रत्यय हो, यथा-द्युसत् । उपनिषत् । अण्डसूः । प्रसूः । मित्रद्विट् । प्रद्विट् । मित्रध्रुक् । प्रध्रुक् । गोधुक् । प्रधुक् । अश्वयुक् । प्रयुक् । वेदवित् । निवित्, इत्यादि ।

अग्र और ग्राम शब्दके परे नी धातुके नकारको णत्व हो * अग्रणीः । ग्रामणीः ॥

२९७६ भजो ण्विः । ३ । २ । ६२ ॥

सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात् । अंशभाक् । प्रभाक् ॥

२९७६-सुबन्त पद और उपसर्ग उपपद होनेपर भज धातुके उत्तर ण्वि प्रत्यय हो, यथा-अंशभाक् । प्रभाक् ॥

२९७७ अदोऽनन्ने । ३ । २ । ६८ ॥

विट् स्यात् । आममत्ति आमात् । सस्यात् । अनन्ने किम् । अन्नादः ॥

२९७७-अन्न शब्दसे भिन्न उपपद होनेपर अद् धातुके उत्तर विट् प्रत्यय हो, यथा-आममत्ति, इस विग्रहमें आमात् । शस्यात् । अन्न शब्द उपपद होनेपर तो 'अन्नादः' ऐसा होगा ॥

२९७८ क्रव्ये च । ३ । २ । ६९ ॥

अदेर्विट् । पूर्वेण सिद्धे वचनमण्बाधनार्थम् । क्रव्यात् । आममांसभक्षकः । कथं तर्हि क्रव्यादोऽस्रप आशर इति । पक्वमांसशब्दे उपपदेऽण् । उपपदस्य क्रव्यादेशः पृषोदरादित्वात् ॥

२९७८-क्रव्य शब्द उपपद होनेपर अद् धातुके उत्तर विट् प्रत्यय हो, पूर्व सूत्रसे विट् प्रत्ययकी सिद्धि होनेपर भी अण् प्रत्ययके बाधनार्थ यह सूत्र किया है । यथा-क्रव्यात् आममांसभक्षकः । क्रव्य शब्द उपपद रहते अद् धातुसे विट् प्रत्यय होनेसे 'क्रव्यादोऽस्रप आशरः' यहां 'क्रव्यादः' ऐसा अकारान्त पद किस प्रकारसे सिद्ध हुआ । तो इस स्थलमें पक्व मांस शब्द उपपद रहते अद् धातुके उत्तर अण् प्रत्यय हुआहै, और उपपदके स्थानमें पृषोदरादित्वके कारण क्रव्य आदेश हुआहै ॥

२९७९ दुहः कब्घश्च । ३ । २ । ७० ॥

कामदुघा ॥

२९७९-कर्म उपपद रहते दुह धातुके उत्तर कप् प्रत्यय हो और हको घ आदेश हो, यथा-कामदुघा ॥

२९८० अन्येभ्योऽपि दृश्यन्ते।३।२।७५।

छन्दसीति निवृत्तम् । मनिन् क्वनिप् वनिप् विच् एते प्रत्यया धातोः स्युः ॥

२९८०-इस स्थलमें 'छन्दसि' इस पदकी निवृत्ति हुई। धातुके उत्तर मनिन्, कनिप्, वनिप् और विच् प्रत्यय हों॥

२९८१ नेड्वशि कृति। ७। २। ८॥

वशादेः कृत इण्न स्यात्। शृ। सुशर्मा। प्रातरित्वा॥

२९८१-वशादि कृत्को इट्का आगम न हो, यथा-शृ-सुशर्म्मा। प्रातरित्वा॥

२९८२ विड्वनोरनुनासिकस्याऽऽत्। ६। ४। ४१॥

अनुनासिकस्य आत्स्यात्। विजायत इति विजावा। ओणृ। अवावा। विच्। रोट्। रेट्। सुगण्॥

२९८२-विट् और वन प्रत्यय परे रहते अनुनासिकान्त धातुको आत्व हो, विजायते इति=विजावा। ओणृ धातुका अवावा। विच् प्रत्यय होकर-रोट्। रेट्। सुगण्॥

२९८३ क्विप् च। ३। २। ७६॥

अयमपि दृश्यते। सत्सूद्विषेति त्वस्यैव प्रपञ्चः उखास्रत्। पर्णध्वत्। वाहभ्रट्॥

२९८३-धातुसे क्विप् प्रत्यय भी हो। "सत्सूद्विष २९७५" यह सूत्र तो इसका ही प्रपंच है। उखास्रत्। पर्णध्वत्। वाहभ्रट्॥

२९८४ अन्तः। ८। ४। २०॥

पदान्तस्यानितेर्नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत्। हे प्राण्। शास इदितीत्त्वम्। मित्राणि शास्ति मित्रशीः॥ आशासः क्वावुपधाया इत्त्वं वाच्यम्॥ * आशीः। इत्वोत्त्वे। गीः। पूः॥

२९८४-उपसर्गस्थ निमित्तके परे स्थित हो तो पदान्त अन् धातुके नकारको णत्व हो, यथा-हे प्राण्। "शास इत्० २४८६" इससे शास धातुकी उपधाके स्थानमें इकार होकर मित्राणि शास्ति, इस विग्रहमें मित्रशीः।

क्वि प्रत्यय परे रहते आङ्पूर्वक शास् धातुकी उपधाके स्थानमें इकार हो * आशीः। इत्व होकर-गीः। उत्व होकर-पूः॥

२९८५ इस्मन्त्रन्क्विषु च। ६। ४। ९७॥

एषु छादेर्ह्रस्वः स्यात्। तनुच्छत्। अनुनासिकस्य क्वीति दीर्घः। मो नो धातोः। प्रतान्। प्रशान्। च्छ्वोरित्यूठ्। अक्षद्यूः। ज्वरत्वरेत्यूठ्। जूः। जूरौ। जूरः। तूः। स्रूः। ऊठ्। वृद्धिः। जनानवतीति जनौः। जनावौ। जनावः। मूः। मुवौ। मुवः। सुमूः। सुम्वौ। सुम्वः। राल्लोपः। मुर्छा। मूः। मुरौ। मुरः। धुर्वी। धूः॥

२९८५-इस् मन् त्रन् और क्विप् प्रत्यय परे रहते छादि धातुकी उपधाको ह्रस्व हो, तनुच्छत् "अनुनासिकस्य० २६६६" इस सूत्रसे दीर्घ और "मो नो धातोः ३४१" इस सूत्रसे मकारके स्थानमें नकार होकर-प्रतान्। प्रशान्। "च्छ्वोः० २५६१" इस सूत्रसे ऊठ् आदेश होकर-अक्षद्यूः। "ज्वरत्वर० २६५४" इस सूत्रसे ऊठ् होकर-जूः। जूरौ। जूरः। तूः। स्रूः। ऊठ् और वृद्धि होकर-जनानवति, इस विग्रहमें जनौः। जनावौ। जनावः। मूः। मुवौ। मुवः। सुमूः। सुम्वौ। सुम्वः। "राल्लोपः २६५६" इस सूत्रसे रकारके परवर्त्ती छकार और वकारका लोप होकर-मुर्छा मूः। मुरौ। मुरः। धुर्वी। धूः॥

२९८६ गमः क्वौ। ६। ४। ४०॥

अनुनासिकलोपः स्यात्। अङ्गगत्॥ गमादीनामिति वक्तव्यम्॥ *॥ परीतत्। संयत्। सुनत्॥ ऊङ् च गमादीनामिति वक्तव्यं लोपश्च॥ *॥ अग्रेगूः। भ्रमु। अग्रेभ्रूः॥

२९८६-क्वि प्रत्यय परे रहते गम् धातुके अनुनासिक अर्थात् मकारका लोप हो, अंकगत्।

"गमादीनामिति वक्तव्यम्" अर्थात् गम् आदि धातुओंके अनुनासिक वर्णका लोप हो * परीतत्। संयत्। सुनत्।

गम् आदि धातुओंको ऊङ् आदेश और अनुनासिक वर्णका लोप हो * अग्रेगूः। भ्रमु अग्रेभ्रूः॥

२९८७ स्थः क च। ३। २। ७७॥

चात् क्विप्। शंस्थः। शंस्थाः। शमि धातोरित्यचं बाधितुं सूत्रम्॥

२९८७-स्था धातुके उत्तर क प्रत्यय और चकारसे क्विप् प्रत्यय हो, यथा-शंस्थः। शंस्थाः। "शमि धातोः २९२८" इस सूत्रसे विहित अच् प्रत्ययको बाधनके निमित्त यह सूत्र कियाहै॥

२९८८ सुप्यजातौ णिनिस्ताच्छील्ये। ३। २। ७८॥

अजात्यर्थे सुपि धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। अजातौ किम्। ब्राह्मणानामन्त्रयिता। ताच्छील्ये किम्। उष्णं भुङ्क्ते कदाचित्। इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय उत्प्रभृतिभ्यामाङ्कि सर्तेरुपसंख्यानमिति पठितम्। हरदत्तमाधवादिभिश्च तदेवानुसृतम्। एतच्च भाष्यविरोधादुपेक्ष्यम्। प्रसिद्धश्चोपसर्गेपि णिनिः। स बभूवोपजीविनाम्। अनुयायिवर्गः। पतत्यधो धाम विसारि। न वञ्चनीयाः प्रभवोऽनुजीविभिरित्यादौ॥ साधुकारिण्युपसंख्यानम्॥ ॥ ब्रह्मणि वदः॥ *॥ अताच्छील्यार्थं वार्तिकद्वयम्। साधुदायी। ब्रह्मवादी॥

२९८८-ताच्छील्य द्योत्य होनेपर जातिभिन्नार्थक सुबन्त उपपद रहते धातुके उत्तर णिनि प्रत्यय हो, यथा-उष्णभोजी (गरम भोजन करनेके स्वभाववाला) शीतभोजी । जाति-वाचक उपपद होनेपर तो ब्राह्मणानामंत्रयिता । ताच्छील्य न होनेपर तो 'उष्णं भुंक्ते कदाचित्' ऐसा होगा । इस स्थलमें वृत्तिकारने उपसर्गभिन्न सुबन्त उपपद होनेपर णिनि प्रत्यय हो, ऐसी व्याख्या करके 'उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानम्' अर्थात् उत्, प्रति, आङ्पूर्वक सृ धातुसे णिनि प्रत्यय हो ऐसा पाठ कियाहै । हरदत्त, माधव आदि आचार्योंने भी उसका ही अनुसरण कियाहै, परन्तु यह भाष्यके विरुद्ध होनेसे त्याज्य है । उपसर्ग उपपद रहते णिनि प्रत्यय प्रसिद्ध भी है, यथा-'स बभूवोपजीविनाम्' 'अनुयायिवर्गः' 'पतत्यधो धाम विसारि' 'न वञ्चनीयाः प्रभवोऽनुजीविभिः' इत्यादि ।

'साधुकारिण्युपसंख्यानम्' साधुकारी अर्थ होनेपर धातुके उत्तर णिनि प्रत्यय हो * ।

ब्रह्मन् शब्द उपपद होनेपर वद धातुके उत्तर णिनि प्रत्यय हो * ताच्छील्यार्थ न होनेपर भी णिनि प्रत्यय होनेके निमित्त यह दोनों वार्त्तिक हैं, साधुदायी । ब्रह्मवादी ॥

२९८९ कर्तर्युपमाने । ३ । २ । ७९ ॥

णिनिः स्यात् । उपपदार्थः कर्ता प्रत्ययार्थस्य कर्तुरुपमानम् । उष्ट्र इव क्रोशति उष्ट्रक्रोशी । ध्वाङ्क्षरावी । अताच्छील्यार्थं जात्यर्थं च सूत्रम् । कर्तरि किम् । अपूपानिव भक्षयति माषान् । उपमाने किम् । उष्ट्रः क्रोशति ॥

२९८९-उपमानवाचक कर्त्ता उपपद होनेपर धातुके उत्तर णिनि प्रत्यय हो, उपपदार्थ जो कर्त्ता वह प्रत्ययार्थ कर्त्ताका उपमान है, यथा-उष्ट्र इव क्रोशति, इस विग्रहमें उष्ट्रक्रोशी । ध्वाङ्क्षरावी । अताच्छील्यार्थ और जात्यर्थ यह सूत्र है । कर्त्ता उपपद न होनेपर तो 'अपूपानिव भक्षयति माषान्' इस स्थानमें णिनि प्रत्यय नहीं हुआ । उपमान न होनेपर यथा-उष्ट्रः क्रोशति ॥

२९९० व्रते । ३ । २ । ८० ॥

णिनिः स्यात् । स्थण्डिलशायी ॥

२९९०-व्रत गम्यमान होनेपर धातुके उत्तर णिनि प्रत्यय हो, यथा-स्थण्डिलशायी ॥

२९९१ बहुलमाभीक्ष्ण्ये । ३ । २ । ८१ ॥

पौनःपुन्यं द्योत्यं सुप्युपपदे णिनिः । क्षीरपायिण उशीनराः ॥

२९९१-पौनःपुन्य द्योत्य होनेपर सुबन्त उपपद रहते धातुके उत्तर णिनि प्रत्यय हो, यथा-क्षीरपायिण उशीनराः ॥

२९९२ मनः । ३ । २ । ८२ ॥

सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी ॥

२९९२-सुबन्त उपपद होनेपर मन् धातुके उत्तर णिनि प्रत्यय हो, यथा-दर्शनीयमानी ॥

२९९३ आत्ममाने खश्च । ३ । २ । ८३ ॥

स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् स्यात् चाण्णिनिः । पण्डितमात्मानं मन्यते पण्डितम्मन्यः-पण्डितमानी । खित्यनव्ययस्य । कालिम्मन्या । अनव्ययस्य किम् । दिवामन्या ॥

२९९३-सुबन्त उपपद होनेपर स्वकर्मक मनन अर्थमें विद्यमान मन् धातुके उत्तर खश् प्रत्यय हो, और चकार निर्देशके कारण णिनि प्रत्यय भी हो, यथा-पण्डितमात्मानं मन्यते इस विग्रहमें पण्डितम्मन्यः । पण्डितमानी । " खित्यनव्ययस्य २९४३ " इस सूत्रसे खिदन्त उत्तर पद होनेसे पूर्वपदको ह्रस्व होकर कालिम्मन्या । अव्यय पूर्वपदको ह्रस्व नहीं होकर-दिवामन्या ॥

२९९४ इच एकाचोऽम्प्रत्ययवच्च । ६ । ३ । ६८ ॥

इजन्तादेकाचोऽम् स्यात्स च स्वाद्यम्वत्खिदन्ते परे । औतोम्शसोः । गाम्मन्यः । वाम्शसोः । स्त्रियम्मन्यः-स्त्रीम्मन्यः । नृ । नरम्मन्यः । भ्रुवम्मन्यः । श्रियमात्मानं मन्यते श्रिमन्यं कुलम् । भाष्यकारवचनात् श्रीशब्दस्य ह्रस्वो मुममोरभावश्च ॥

२९९४-खिदन्त उत्तर पद रहते इजन्त एकाच् पूर्वपदके उत्तर अम् प्रत्यय हो, और वह अम् स्वादिके मध्यमें पठित अम्के तुल्य हो । " औतोऽम्शसोः २८५ " इस सूत्रसे अम् और शस् सम्बन्धी अच् परे रहते ओकारान्त शब्दके ओकारके स्थानमें आकार होकर-गाम्मन्यः । " वाम्शसोः ३०२" इस सूत्रसे स्त्री शब्दको विकल्प करके इयङ् होकर-स्त्रियम्मन्यः, स्त्रीम्मन्यः । नृ-नरम्मन्यः । भ्रुवम्मन्यः । श्रियमात्मानं मन्यते, इस विग्रहमें श्रिमन्यम् कुलम्, यहां भाष्यकारके वचनसे श्रीशब्दके ईकारको ह्रस्व और मुम्, अम्का अभाव हुआ ॥

२९९५ भूते । ३ । २ । ८४ ॥

अधिकारोयम् । वर्तमाने लडिति यावत् ॥

२९९५-यह अधिकार सूत्रहै, अर्थात् " वर्त्तमाने लट् २१५१" इस सूत्रपर्य्यन्त 'भूते' इस पदका अधिकार है ॥

२९९६ करणे यजः । ३ । २ । ८५ ॥

करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी ॥

२९९६-करण कारक उपपद होनेपर भूतार्थक यज् धातुके उत्तर कर्तामें णिनि प्रत्यय हो, यथा-सोमेनेष्टवान्, इस विग्रहमें सोमयाजी । अग्निष्टोमयाजी । (अग्निष्टोमयज्ञ करनेवाला) ॥

२९९७ कर्मणि हनः । ३ । २ । ८६ ॥

पितृव्यघाती । कर्मणीत्येतत्सहे चेति यावदधिक्रियते ॥

२९९७-कर्म्म कारक उपपद होनेपर हन् धातुके उत्तर णिनि प्रत्यय हो, यथा-पितृव्यघाती । 'कर्मणि' इस पदका "सहे च ३००६" इस वक्ष्यमाण सूत्र पर्यन्त अधिकार है ॥

२९९८ ब्रह्मभ्रूणवृत्रेषु क्विप् ।३।२।८७॥

एषु कर्मसूपपदेषु हन्तेर्भूते क्विप्स्यात् । ब्रह्महा । भ्रूणहा । वृत्रहा । क्विप् चेत्येव सिद्धे नियमार्थमिदम् । ब्रह्मादिष्वेव, हन्तेरेव, भूत एव क्विबेवेति चतुर्विधोऽत्र नियम इति काशिका। ब्रह्मादिष्वेव, क्विबेवेति द्विविधो नियम इति भाष्यम् ॥

२९९८-ब्रह्मन्, भ्रूण, वृत्र इन तीन कर्म्मोंमें किसी एकके उपपद होनेपर भूतार्थमें हन् धातुके उत्तर क्विप् प्रत्यय हो, ब्रह्महा, भ्रूणहा (गर्भघाती) वृत्रहा ।

"क्विप् च २९२३" इसीसे सिद्ध होनेपर फिर यह सूत्र नियमके निमित्त है कि, "ब्रह्मादिष्वेव हन्तेरेव भूत एव क्विबेव" अर्थात् ब्रह्मादि उपपद रहतेही हन् धातुसे भूतकालमें क्विप् हो, ब्रह्मादि उपपद रहते हन् धातुसेही भूतकालमें क्विप् हो, ब्रह्मादि उपपद रहते हन् धातुसे भूतकालमें ही क्विप् हो, और ब्रह्मादि उपपद रहते हन् धातुसे भूतकालमें क्विप् ही हो, इन चार प्रकारका इस स्थलमें नियम है, यह काशिकाका मत है । भाष्यकारके मतसे तो 'ब्रह्मादिष्वेव क्विबेव' इन दो प्रकारका नियम है । इन नियमोंका फल स्वयम् ऊह करके समझना ॥

२९९९ सुकर्मपापमन्त्रपुण्येषु कृञः । ३ । २ । ८९ ॥

सुकर्मादिषु च कृञः क्विप्स्यात् । त्रिविधोऽत्र नियम इति काशिका । सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् । क्विबेवेति नियमात्कर्म कृतवानित्यत्राऽण्न । कृञ एवेति नियमान्मन्त्रमधीतवान्मन्त्राध्यायः अत्र न क्विप् । भूत एवेति नियमात् मन्त्रं करोति करिष्यति वेति विवक्षायां न क्विप् । स्वादिष्वेवेतिनियमाभावादन्यस्मिन्नप्युपपदे क्विप् । शास्त्रकृत् । भाष्यकृत् ॥

२९९९-सु, कर्म्म, पाप, मंत्र, पुण्य, यह कर्म्म उपपद होनेपर कृञ् धातुके उत्तर अतीतार्थमें क्विप् प्रत्यय हो, इस स्थलमें तीन प्रकारका नियम है, यह काशिकाका मत है। सुकृत् । कर्म्मकृत् । पापकृत् । मंत्रकृत् । पुण्यकृत् । क्विप् ही हो, इस नियमके कारण कर्म्मकृतवान् इस स्थानमें अण् प्रत्यय नहीं हुआ । कृञ् धातुके उत्तर ही हो इस नियमके कारण 'मंत्रमधीतवान्' इस विग्रहमें 'मंत्राध्यायः' इस स्थानमें क्विप् नहीं हुआ । भूतार्थमें ही हो, इस नियमके कारण 'मंत्रं करोति करिष्यति वा' ऐसी विवक्षा स्थलमें क्विप् नहीं हुआ । सु आदि उपपद होनेपर ही कृञ् धातुके उत्तर क्विप् हो, ऐसे नियम न होनेके कारण 'शास्त्रकृत् भाष्यकृत्,इन स्थलोंमें अन्य उपपद रहते भी क्विप् हुआ॥

३००० सोमे सुञः । ३ । २ । ९० ॥

सोमसुत् । चतुर्विधोऽत्र नियम इति काशिका । एवमुत्तरसूत्रेऽपि ॥

३०००-सोम शब्द उपपद होनेपर सुञ् धातुके उत्तर अतीतार्थमें क्विप् प्रत्यय हो, सोमसुत् । इस स्थलमें चार प्रकारका नियम है, यह काशिकाका मत है । ऐसा पर सूत्रमें भी नियम जानना ॥

३००१ अग्नौ चेः । ३ । २ । ९१ ॥

अग्निचित् ॥

३००१-अग्नि शब्द उपपद होनेपर चि धातुके उत्तर अतीतार्थमें क्विप् प्रत्यय हो, अग्निचित् ॥

३००२ कर्मण्यग्न्याख्यायाम् ३।२।९२॥

कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप्स्यात्। अग्न्याधारस्थलविशेषास्याख्यायाम्। श्येन इव चितः श्येनचित् ॥

३००२-अग्निके आधार स्थलविशेषका नाम होनेपर कर्म्म उपपद रहते कर्म्म ही कारकमें चि धातुके उत्तर अतीतार्थमें क्विप् प्रत्यय हो, श्येन इव चितः, इस विग्रहमें श्येनचित् ॥

३००३ कर्मणीनि विक्रियः । ३। २।९३॥

कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात् । कुत्सितग्रहणं कर्तव्यम् ॥ * ॥ सोमविक्रयी। घृतविक्रयी ॥

३००३-कर्म्म उपपद होनेपर विपूर्वक क्री धातुके उत्तर अतीतार्थमें इनि प्रत्यय हो ।

कुत्सित अर्थ होनेपर क्री धातुके उत्तर इनि प्रत्यय हो, ऐसा कहना चाहिये*सोमविक्रयी । घृतविक्रयी ॥

३००४ दृशेः क्वनिप् । ३ । २ । ९४ ॥

कर्मणि भूत इत्येव। पारं दृष्टवान् पारदृश्वा॥

३००४-कर्म्म कारक उपपद होनेपर अतीतार्थमें दृश् धातुके उत्तर क्वनिप् प्रत्यय हो, यथा-पारं दृष्टवान्, इस विग्रहमें पारदृश्वा ॥

३००५ राजनि युधि कृञः ।३।२।९५॥

क्वनिप्स्यात् । युधिरन्तर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा । राजकृत्वा ॥

३००५-राजन् शब्द उपपद होनेपर युध् और कृञ् धातुके उत्तर अतीतार्थमें क्वनिप् प्रत्यय हो, इस स्थलमें युध् धातु अन्तर्भावितण्यर्थ है, राजानं योधितवान्, इस विग्रहमें राजयुध्वा । राजकृत्वा ॥

३००६ सहे च । ३ । २ । ९६ ॥

कर्मणीति निवृत्तम् । सहयुध्वा । सहकृत्वा॥

३००६–'कर्मणि' यह पद इस स्थानमें निवृत्त हुआ, सह शब्द उपपद होनेपर युध् और कृञ् धातुके उत्तर अतीतार्थमें क्विप् प्रत्यय हो, यथा–सहयुध्वा । सहकृत्वा ॥

३००७ सप्तम्यां जनेर्डः । ३ । २ । ९७॥

सरसिजम् । मन्दुरायां जातो मन्दुरजः । ङ्यापोरिति ह्रस्वः ॥

३००७–सप्तम्यन्त उपपद होनेपर जन् धातुके उत्तर अतीतार्थमें ड प्रत्यय हो, सरसिजम् । मन्दुरायां जातः, इस विग्रहमें मन्दुरजः, यहां "ङ्यापोः० १००१" इस सूत्रसे पूर्वपदको ह्रस्व हुआहै ॥

३००८ पञ्चम्यामजातौ । ३ । २ । ९८॥

जातिशब्दवर्जिते पञ्चम्यन्त उपपदे जनेर्डः स्यात् । संस्कारजः । अदृष्टजः ॥

३००८–जातिशब्दभिन्न पञ्चम्यन्त उपपद होनेपर जन् धातुके उत्तर अतीतार्थमें ड प्रत्यय हो, संस्कारजः । अदृष्टजः ॥

३००९ उपसर्गे च संज्ञायाम् । ३ । २ । ९९।

प्रजा स्यात्सन्ततौ जने ॥

३००९–संज्ञामें उपसर्ग उपपद रहते जन् धातुके उत्तर अतीतार्थमें ड प्रत्यय हो, यथा–'प्रजा स्यात् सन्ततौ जने' ॥

३०१० अनौ कर्मणि । ३ । २ । १०० ।

अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात् । पुमांसमनुरुध्य जाता पुमनुजा ॥

३०१०–कर्म्म उपपद होनेपर अनुपूर्वक जन् धातुके उत्तर अतीतार्थमें ड प्रत्यय हो, यथा–पुमांसमनुरुध्य जाता=पुमनुजा ॥

३०११ अन्येष्वपि दृश्यते । ३ । २ । १०१।

अन्येष्वप्युपपदेषु जनेर्डः स्यात् । अजः । द्विजः । ब्राह्मणजः । अपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित् । परितः खाता परिखा ॥

३०११–अन्य उपपद होनेपर भी जन् धातुके उत्तर अतीतार्थमें ड प्रत्यय हो, यथा–अजः । द्विजः । ब्राह्मणजः । इस स्थलमें अपि शब्द सर्वोपाधि व्यभिचारार्थ है, उससे यह हुआ कि, अन्य कारक उपपद होनेपर भी अन्य धातुके उत्तर भी कहीं २ ड प्रत्यय होगा, यथा–परितः खाता, इस विग्रहमें परिखा (खाई) ॥

३०१२ क्तक्तवतू निष्ठा । १ । १ । २६॥

एतौ निष्ठासंज्ञौ स्तः ॥

३०१२–क्त और क्तवतु इन दो प्रत्ययोंकी निष्ठा संज्ञा हो ॥

३०१३ निष्ठा । ३ । २ । १०२ ॥

अतार्थवृत्तेर्धातोर्निष्ठा स्यात् । तत्र तयोरेवेति भावकर्मणोः क्तः । कर्तरि कृदिति कर्तरि क्तवतुः । उकावितौ । स्नातं मया । स्तुतस्त्वया विष्णुः । विष्णुर्विश्वं कृतवान् ॥

३०१३–अतीतार्थमें धातुके उत्तर निष्ठा प्रत्यय हो, उसमें "तयोरेव० २८३३" इस सूत्रसे भाव और कर्मवाच्यमें क्त प्रत्यय और "कर्त्तरि कृत् २८३२" इस सूत्रसे कर्तृवाच्यमें क्तवतु प्रत्यय होगा । प्रत्ययके उकार और ककार इत्संज्ञक हैं । स्नातं मया । स्तुतस्त्वया विष्णुः । विष्णुर्विश्वं कृतवान् ॥

३०१४ निष्ठायामण्यदर्थे । ६ । ४ । ६०॥

ण्यदर्थौ भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात् ॥

३०१४–ण्यत् प्रत्ययके अर्थ भाव और कर्म्म हैं उनसे अन्य अर्थमें जो निष्ठा प्रत्यय वह परे रहते क्षि धातुको दीर्घ हो ॥

३०१५ क्षियो दीर्घात् । ८ । २ । ४६ ॥

दीर्घात् क्षियो निष्ठातस्य नः स्यात् । क्षीणवान् । भावकर्मणोस्तु क्षितः कामो मया । श्र्युकः किति । श्रितः । श्रितवान् । भूतः । भूतवान् । क्षुतः ॥ ऊर्णोर्णुवद्भावो वाच्यः ॥ *॥ तेन एकाच्त्वान्नेट् । ऊर्णुतः । नुतः । वृतः ॥

३०१५–दीर्घान्त क्षि धातुके उत्तर निष्ठा प्रत्ययसम्बन्धी तकारके स्थानमें नकार हो, क्षीणवान् । भाव और कर्म्मवाच्यमें जिस स्थानमें निष्ठा प्रत्यय है, उस स्थानमें तो 'क्षितः कामो मया' ऐसा होगा । "श्र्युकः किति (२३८१)" इस सूत्रसे इट्का निषेध होकर श्रितः । श्रितवान् । भूतः । भूतवान् । क्षुतः ।

ऊर्णुञ् धातु नु धातुकी समान हो * इससे एकाच्त्वके कारण इट् नहीं होगा, ऊर्णुतः । नुतः । वृतः ॥

३०१६ रदाभ्यां निष्ठातो नः पूर्वस्य च दः । ८ । २ । ४२ ॥

रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात् । निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च । शॄ । ॠत इत् । रपरः, णत्वम् । शीर्णः । बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह । कृतस्यापत्यं कार्तिः । भिन्नः । छिन्नः ॥

३०१६–रेफ और दकारके परे जो निष्ठा प्रत्ययका सम्बन्धी तकार उसके स्थानमें नकार हो और निष्ठापेक्षासे पूर्वमें जो धातुसम्बन्धी दकार उसके स्थानमें नकार हो "ॠत इत्० (२३९०)" इस सूत्रसे इत्त्व, रपरत्व और णत्व होकर–शॄ धातुका शीर्णः ऐसा रूप होगा । बहिरङ्गत्वके कारण वृद्धि असिद्ध होतीहै, इस कारण इस स्थलमें नकार नहीं होगा, यथा–कृतस्यापत्यं=कार्तिः । भिन्नः छिन्नः, इत्यादि ॥

३०१७ संयोगादेरातोधातोर्यण्वतः । ८ । २ । ४३ ॥

निष्ठातस्य नः स्यात् । द्राणः । स्त्यानः । ग्लानः । म्लानः ॥

३०१७–संयोगादि, आकारान्त और यण् प्रत्याहारान्तर्गतवर्णविशिष्ट धातुके उत्तर निष्ठा प्रत्यय सम्बन्धी तकारके स्थानमें नकार हो, द्राणः । स्त्यानः । ग्लानः ॥

३०१८ ल्वादिभ्यः । ८ । २ । ४४ ॥

एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः । ज्या । ग्रहिज्या । जीनः ॥ दुग्वोर्दीर्घश्च ॥ * ॥ दु गतौ । दूनः । टुदु उपताप इत्ययं तु न गृह्यते सानुबन्धकत्वात् । मृदुतया दुतयेति माघः । गूनः ॥ पूञो विनाशे ॥ * ॥ पूना यवाः । विनष्टा इत्यर्थः । पूतमन्यत् ॥ सिनोतेर्ग्रासकर्मकर्तृकस्य ॥ * ॥ सिनो ग्रासः । ग्रासेति किम् । सिता पाशेन सूकरी । कर्मकर्तृकेति किम् । सितो ग्रासो देवदत्तेन ॥

३०१८–पूञ् धातुको लेकर २२ धातु क्र्यादि गणमें पठित हैं, उनमें पूञ् धातु त्याग कर लूञ् आदि २१ धातुओंके उत्तर निष्ठा प्रत्ययसम्बन्धी तकारके स्थानमें पूर्ववत् नकार हो, लूनः । ज्या धातुके उत्तर क्त प्रत्यय होनेपर. "ग्रहिज्या० २४१२" इस सूत्रसे संप्रसारण हुआ, जीनः ।

दु और गु धातुके उत्तर निष्ठा प्रत्ययसम्बन्धी तकारके स्थानमें नकार हो, और उक्त धातुओंके उकारको दीर्घ भी हो * गत्यर्थक दु धातुका–दूनः । इस स्थलमें 'टुदु उपतापे' इस दु धातुका ग्रहण नहीं है, कारण कि, यह अनुबन्ध युक्त है, इस कारण 'मृदुतया दुतया' ऐसा माघमें प्रयोग है । गूनः ।

विनाशार्थमें पूञ् धातुके उत्तर निष्ठा प्रत्ययके तकारके स्थानमें नकार हो * पूना यवाः । विनष्टा इत्यर्थः । अन्य अर्थमें 'पूतम्' पद होगा ।

यदि ग्रासरूप कर्म्म कर्त्ता हो तो बन्धनार्थक सिञ् धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें नकार हो * सिनो ग्रासः । पिंडीकृत ग्रास जब दध्यादि व्यञ्जनसे बन्धनमें अनुकूल होताहै तब कर्म्मको ही कर्तृत्व होताहै उसी स्थलमें यह वार्त्तिक प्रवृत्त होगा । ग्रास कर्मकर्त्तृक न होनेपर तो सिता पाशेन सूकरी । कर्म्म कर्तृक न होनेपर सितो ग्रासो देवदत्तेन ॥

३०१९ओदितश्च । ८ । २ । ४५ ॥

भुग्नो । भुग्नः । टुओश्वि । उच्छूनः । ओहाक् । प्रहीणः । स्वादय ओदित इत्युक्तम् । सूनः । सूनवान् । दूनः । दूनवान । ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट्–उड्डीनः ॥

३०१९–ओदित् धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें नकार आदेश हो, यथा–भुजो–भुग्नः । टुओश्वि धातुका उच्छूनः । ओहाक् धातुका प्रहीणः । स्वादिगणीय धातु ओदित् हैं, यह कहा है । सूनः । सूनवान् । दूनः । दूनवान् । ओदित् धातुके मध्यमें डीङ् धातुका पाठ होनेके कारण उसके उत्तर इट् नहीं होगा, यथा–उड्डीनः ॥

३०२० द्रवमूर्तिस्पर्शयोः श्यः । ६ । १ । २४ ॥

द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः सम्प्रसारणं स्यान्निष्ठायाम् ॥

३०२०–निष्ठा प्रत्यय परे रहते द्रव पदार्थकी मूर्त्ति अर्थात् काठिन्य और स्पर्श गम्यमान होनेपर श्यैङ् धातुको सम्प्रसारण हो ॥

३०२१ श्योऽस्पर्शे । ८ । २ । ४७ ॥

श्यैङो निष्ठातस्य नः स्यादस्पर्शेऽर्थे । हल इति दीर्घः । शीनं घृतम् । अस्पर्शे किम् । शीतं जलम् । द्रवमूर्तिस्पर्शयोः किम् । संश्यानो वृश्चिकः । शीतात्संकुचित इत्यर्थः ॥

३०२१–अस्पर्शार्थ गम्यमान होनेपर श्यैङ् धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें नकार हो । "हलः २५५९" इस सूत्रसे इकारको दीर्घ होकर–शीनं घृतम् । जिस स्थानमें स्पर्श अर्थ होगा, उस स्थानमें तो शीतं जलम् । द्रवमूर्त्ति स्पर्श न होनेपर–संश्यानो वृश्चिकः । शीतात् संकुचित इत्यर्थः ॥

३०२२ प्रतेश्च । ६ । १ । २५ ॥

प्रतिपूर्वस्य श्यः सम्प्रसारणं स्यान्निष्ठायाम् । प्रतिशीनः ॥

३०२२–निष्ठा प्रत्यय परे रहते प्रतिपूर्वक श्यैङ् धातुको संप्रसारण हो, यथा–प्रतिशीनः ।

३०२३ विभाषाऽभ्यवपूर्वस्य । ६ । १ । २६ ॥

श्यः संप्रसारणं वा स्यात् । अभिश्यानं घृतम् । अभिशीनम् । अवश्यानोऽवशीनो वृश्चिकः । व्यवस्थितविभाषेयम् । तेनेह न । समवश्यानः ॥

३०२३–निष्ठा प्रत्यय परे रहते अभिपूर्वक और अवपूर्वक श्यैङ् धातुको विकल्प करके संप्रसारण हो, यथा–अभिशीनम्, अभिश्यानम् घृतम् । अवशीनः, अवश्यानः वृश्चिकः । यह व्यवस्थित विभाषा है, इस कारण 'समवश्यानः' इस स्थलमें सम्प्रसारण नहीं हुआ ॥

३०२४ अञ्चोऽनपादाने । ८ । २ । ४८ ॥

अञ्चो निष्ठातस्य नः स्यान्न त्वपादाने ॥

३०२४–अञ्चु धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें नकार हो । अपादान वाचकका प्रयोग होनेपर नहीं हो ॥

३०२५ यस्य विभाषा । ७ । २ । १५ ॥

यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात् । उदितो वेति क्त्वायां वेट्त्वादिह नेट् । समक्तः । अनपादाने किम् । उदक्तमुदकं कूपात् ॥ नत्वस्यासिद्धत्वाद्व्रश्चेति षत्वे प्राप्ते ॥ निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः ॥ * ॥ वृक्णः । वृक्णवान् ॥

३०२५-जिस धातुके उत्तर वलादि आर्धधातुकको कदाचित् विकल्प करके इट् विहित है उसके उत्तर निष्ठा प्रत्ययको इट् नहीं हो । "उदितो वा (३३२८)" इस सूत्रसे क्त्वा प्रत्ययमें विकल्प करके इट् होनेके कारण इस स्थानमें इट् नहीं होगा, यथा-समक्तः । अपादान कारकका प्रयोग होनेपर तो 'उदक्तमुदकं कूपात्' इस स्थलमें क्त प्रत्ययके तकारके स्थानमें नकार नहीं हुआ । नत्वके असिद्धत्वके कारण "व्रश्च०" इस सूत्रसे षत्वकी प्राप्ति होनेपर-

षत्वविधि, स्वरविधि, प्रत्ययविधि और इड्विधि कर्त्तव्य रहते निष्ठादेश सिद्ध हो ऐसा कहना चाहिये * यथा-वृक्णः । वृक्णवान् ॥

३०२६ परिस्कन्दः प्राच्यभरतेषु । ८ । ३ । ७५ ॥

पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते । परिस्कन्दः । प्राच्येति किम् । परिष्कन्दः । परिस्कन्दः । परेश्चेति विकल्पः । स्तन्भेरिति षत्वे प्राप्ते ॥

३०२६-प्राच्य और भरत अर्थ होनेपर 'परिस्कन्दः' यह पद निपातनसे सिद्ध हो अर्थात् पूर्वसूत्रसे मूर्द्धन्य षकारकी प्राप्ति होनेपर इस स्थानमें निपातनसे उसका अभाव हो, 'परिस्कन्दः' जिस स्थानमें प्राच्य और भरत अर्थ नहीं होगा, उस स्थलमें 'परिष्कन्दः, परिस्कदः' ऐसा होगा, इस स्थानमें "परेश्च २३९९" इस सूत्रसे विकल्प करके षत्व हुआहै । "स्तन्भेः २२७२" इस सूत्रसे षत्व प्राप्त होनेपर- ॥

३०२७ प्रतिस्तब्धनिस्तब्धौ च । ८ । २ । ११४ ॥

अत्र षत्वं न स्यात् ॥

३०२७-'प्रतिस्तब्धः' और निस्तब्धः' यह दो पद निपातनसे सिद्ध हों, अर्थात् इन स्थानोंमें षत्व नहीं हो ॥

३०२८ दिवोऽविजिगीषायाम् । ८ । २ । ४९

दिवो निष्ठातस्य नः स्यादविजिगीषायाम् । द्यूनः । विजिगीषायां तु । द्यूतम् ॥

३०२८-अविजिगीषा अर्थ होनेपर दिव् धातुके उत्तर निष्ठा प्रत्ययसम्बन्धी तकारके स्थानमें नकार हो, द्यूनः । जिस स्थानमें विजिगीषा अर्थ है, उस स्थानमें 'द्यूतम्' ऐसा होगा इस स्थानमें तकारके स्थानमें नकार नहीं हुआ ॥

३०२९ निर्वाणोऽवाते । ८ । २ । ५० ॥

अवाते इति च्छेदः । निपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न । निर्वाणोऽग्निर्मुनिर्वा । वाते तु निर्वातो वातः ॥

३०२९-निर्वाणः अवाते ऐसा पदच्छेद है, यदि वायु कर्त्ता न हो तो, निपूर्वक वा धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें नकार हो, यथा-निर्वाणोऽग्निर्मुनिर्वा । (निर्वाण शब्दसे अग्नि और मुनि समझना) वायु कर्त्ता होनेपर तो 'निर्वातो वातः' ऐसा होगा, इस स्थानमें नकार नहीं हुआ ॥

३०३० शुषः कः । ८ । २ । ५१ ॥

निष्ठात इत्येव । शुष्कः ॥

३०३०-शुष् धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें ककार हो, यथा-शुष्कः ॥

३०३१ पचो वः । ८ । २ । ५२ ॥

पक्वः ॥

३०३१-पच् धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें वकार हो, यथा-पक्वः ॥

३०३२ क्षायो मः । ८ । २ । ५३ ॥

क्षामः ॥

३०३२-क्षै धातुके उत्तर निष्ठासम्बन्धी तकारके स्थानमें मकार हो, यथा-क्षामः (दुबला) ॥

३०३३ स्त्यः प्रपूर्वस्य । ६ । १ । २३ ॥

प्रात् स्त्यः सम्प्रसारणं स्यान्निष्ठायाम् ॥

३०३३-निष्ठा प्रत्यय परे रहते प्रपूर्वक स्त्यै धातुको सम्प्रसारण हो ॥

३०३४ प्रस्त्योऽन्यतरस्याम् । ८ । २ । ५४ ॥

निष्ठातस्य मो वा स्यात् । प्रस्तीमः । प्रस्तीतः । प्रात्किम् । स्त्यानः ॥

३०३४-प्रपूर्वक स्त्यै धातुके उत्तर निष्ठा प्रत्ययसम्बन्धी तकारके स्थानमें विकल्प करके मकार हो, यथा-प्रस्तीमः, प्रस्तीतः । जिस स्थानमें प्रपूर्वक नहीं होगा, उस स्थानमें 'स्त्यानः' ऐसा होगा ॥

३०३५ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः । ८ । २ । ५५ ॥

ञिफला । फुल्लः । निष्ठातस्य लत्वं निपात्यते । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते । फुल्लवान् । क्षीबादिषु क्तप्रत्ययस्यैव तलोपः तस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते । क्षीबो मत्तः कृशस्तनुः । उल्लाघो नीरोगः । अनुपसर्गात्किम् ॥

३०३५–अनुपसर्गके उत्तर अर्थात् पूर्वमें कोई उपसर्ग न रहते फुल्ल, क्षीब, कृश, उल्लाघ यह पद निपातनसे सिद्ध हों, जिफला धातुका ' फुल्लः ' इस स्थानमें निष्ठासम्बन्धी तकारके स्थानमें निपातनसे ल हुआ है ।

यह निपातन क्तवतु प्रत्ययके एकदेशको भी हो, यथा– फुल्लवान् । क्षीबादि शब्दमें तो क्त प्रत्ययके ही तकारका लोप और उसके असिद्धके कारण प्राप्त जो इट्, उसका अभाव निपातनसे होगा, क्षीबो मत्तः । कृशस्तनुः । उल्लाघो नीरोगः । उपसर्गके उत्तर होनेपर तो–॥

३०३६ आदितश्च । ७ । २ । १६ ॥

आकारेतो निष्ठाया इण्न स्यात् ॥

३०३६–आदित् धातुके उत्तर निष्ठा प्रत्ययको इट् न हो ॥

३०३७ ति च । ७ । ४ । ८९ ॥

चरफलोरत उत्स्यात्तादौ किति । प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति । फुल्ल विकसने पचाद्यच् । सूत्रं तु फुल्तादिनिवृत्त्यर्थम् ॥ उत्फुल्लसंफुल्लयोरुपसंख्यानम् ॥ * ॥

३०३७–तकारादि कित् प्रत्यय परे रहते चर और फल धातु सम्बन्धी अकारके स्थानमें उत् (उकार) हो, यथा– प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । उपसर्गसे परे न रहते ही फुल्लादि निपातन होनेसे "लोध्रद्रुमं सानुमतः प्रफुल्लम् " इस स्थलमें किस प्रकार फुल्ल पद सिद्ध हुआ ? तो इस स्थानमें विकसनार्थक फुल्ल धातुके उत्तर पचादित्वप्रयुक्त अच् प्रत्यय हुआहै । सूत्र तो केवल फुल्त, इत्यादि प्रयोगकी निवृत्तिके निमित्त है ।

'उत्फुल्लसंफुल्लयोरुपसंख्यानम्' अर्थात्'उत्फुल्लः संफुल्लः'यह दो पद निपातनसे सिद्ध हों * ॥

३०३८ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् । ८ । २ । ५६ ॥

एभ्यो निष्ठातस्य नो वा । नुन्नः–नुत्तः । विद विचारणे रौधादिक एव गृह्यते, उन्दिना परेण साहचर्यात् । विन्नः–वित्तः । वेत्तेस्तु विदितः । विद्यतेर्विन्नः । उन्दी ॥

३०३८–नुद, विद, उन्द, त्रा, घ्रा, ह्री, इन धातुओंके उत्तर निष्ठा प्रत्ययके तकारके स्थानमें विकल्प करके नकार हो, नुन्नः, नुत्तः । विचारण अर्थवाला जो रुधादिगणपठित विद् धातु, उसका ही इस स्थलमें ग्रहण होगा, कारण कि, परवर्ती उन्द् धातुके साथ उसका साहचर्य्य है । विन्नः, वित्तः । क्त प्रत्ययान्त अदादिगणपठित विद् धातुका तो 'विदितः' इस प्रकार होगा । दिवादिगणपठित विद धातुका तो 'विन्नः' इस प्रकार होगा । वैसे ही भाष्य है यथा–"वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते । विन्तेर्विन्नश्च वित्तश्च वित्तं भोगेषु विन्देतेरिति" । उन्दी धातुका उदाहरण कहतेहैं– ॥

३०३९ श्वीदितो निष्ठायाम् । ७ । २ । १४ ॥

श्वयतेरीदितश्च निष्ठाया इण्न । उन्नः–उत्तः । त्राणः–त्रातः । घ्राणः–घ्रातः । ह्रीणः–ह्रीतः ॥

३०३९–श्वि धातु और ईदित् धातुके उत्तर निष्ठा प्रत्ययको इट् न हो, यथा–उन्नः, उत्तः । त्राणः, त्रातः । घ्राणः, घ्रातः । ह्रीणः, ह्रीतः ॥

३०४० न ध्याख्यापॄमूर्च्छिमदाम् । ८ । २ । ५७ ॥

एभ्यो निष्ठातस्य नत्वं न । ध्यातः । ख्यातः । पूर्तः ॥ राल्लोपः । मूर्तः । मत्तः ॥

३०४०–ध्या, ख्या, पॄ, मूर्च्छि और मद् धातुओंके उत्तर निष्ठा प्रत्ययसम्बन्धी तकारके स्थानमें नकार न हो, यथा– ध्यातः । ख्यातः । पूर्तः । "राल्लोपः"इस सूत्रसे छकारका लोप होकर–मूर्तः । मत्तः ॥

३०४१ वित्तो भोगप्रत्यययोः । ८ । २ । ५८ ॥

विन्दतेर्निष्ठान्तस्य निपातोयं भोग्ये प्रतीते चार्थे । वित्तं धनम् । वित्तः पुरुषः । अनयोः किम् । विन्नः । विभाषा गमहनेति क्वसौ वेट्त्वादिह नेट् ॥

३०४१–भोग और प्रत्यय शब्द कर्मसाधन है इस आशयसे कहतेहैं कि, भोग्य और प्रतीत अर्थ होनेपर निष्ठाप्रत्ययान्त तुदादिगणीय विद् धातुका ' वित्तः ' यह निपातनसे सिद्ध हो, यथा–वित्तं धनम् । वित्तः पुरुषः।जिस स्थानमें भोग्य और प्रतीत अर्थ नहीं होगा, उस स्थानमें विन्नः यहां " विभाषा गमहन० ३०९९" इस सूत्रसे क्वसु प्रत्यय परे रहते विकल्प करके इट् विहित होनेसे इट् नहीं हुआ ॥

३०४२ भित्तं शकलम् । ८ । २ । ५९ ॥

भिन्नमन्यत् ॥

३०४२–शकल अर्थात् खण्ड अर्थ होनेपर 'भित्तम्' यह पद निपातनसे सिद्ध हो । अन्य अर्थ होनेपर ' भिन्नम् ' ऐसा होगा ॥

३०४३ ऋणमाधमर्ण्ये । ८ । २ । ६० ॥

ऋधातोः क्ते तकारस्य नत्वं निपात्यते अधमर्णव्यवहारे । ऋतमन्यत् ॥

३०४३–आधमर्ण्य अर्थ होनेपर 'ऋणम् ' यह पद निपातनसे सिद्ध हो अर्थात् ऋ धातुके उत्तर क्त प्रत्ययके तकारके स्थानमें निपातनसे नकार हो । अन्य अर्थमें'ऋतम्'ऐसा होगा। जिसको ऋण अधम, अर्थात् दुःखप्रद हो, वह अधमर्ण है, उसका भाव आधमर्ण्य है ॥

३०४४ स्फायः स्फी निष्ठायाम् ६ । १ । २२ ॥

स्फीतः ॥

३०४४–निष्ठा प्रत्यय परे रहते स्फाय् धातुके स्थानमें स्फी आदेश हो, स्फीतः ॥

३०४५ इणिनष्ठायाम् । ७ । २ । ४७ ॥

निरः कुषो निष्ठाया इट् स्यात् । यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः । निष्कुषितः ॥

३०४५–निपूर्वक कुष् धातुके उत्तर निष्ठा प्रत्ययको इट् हो, " यस्य विभाषा ३०२५" इस सूत्रसे इट्निषेधकी प्राप्ति होनेसे पुनर्वार यह विधि विहित है, निष्कुषितः ॥

३०४६ वसतिक्षुधोरिट् । ७ । २ । ५२॥

आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् । उषितः। क्षुधितः ॥

३०४६–वस् और क्षुध् धातुके परे स्थित क्त्वा और निष्ठा प्रत्ययको नित्य इट् हो, यथा–उषितः । क्षुधितः ॥

३०४७ अञ्चेः पूजायाम् । ७ । २।५३॥

पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् । अञ्चितः। गतौ तु अक्तः ॥

३०४७–पूजा अर्थवाला अञ्च् धातुके उत्तर क्त्वा और निष्ठा प्रत्ययको इट् हो, यथा–अञ्चितः । गत्यर्थक अञ्च् धातुका तो–अक्तः ॥

३०४८ लुभो विमोहने । ७ ।२ । ५४ ॥

लुभः क्त्वानिष्ठयोर्नित्यमिट् स्यान्न तु गार्ध्ये । लुभितः । गार्ध्ये तु लुब्धः ॥

३०४८–विमोहन अर्थमें लुभ् धातुके उत्तर क्त्वा और निष्ठा प्रत्ययको इट् हो, परन्तु गार्ध्य अर्थमें न हो, यथा–लुभितः, अर्थात् विमोहित । गार्द्ध्य अर्थमें तो इट् नहीं होकर–लुब्धः (लोभी) ॥

३०४९ क्लिशः क्त्वानिष्ठयोः ।७।२।५०॥

इड्वा स्यात् । क्लिश उपतापे नित्यं प्राप्ते।क्लिशू विबाधने अस्य क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः । क्लिशितः । क्लिष्टः ॥

३०४९–क्लिश् धातुके उत्तर क्त्वा और निष्ठा प्रत्ययको विकल्प करके इट् हो । उपतापार्थक क्लिश धातुके उत्तर प्रत्ययको नित्य इट्की प्राप्ति होनेपर और विबाधनार्थक क्लिशू धातुके उत्तर क्त्वा प्रत्ययमें विकल्प करके इट् सिद्ध होनेपर भी निष्ठा प्रत्ययमें निषेधकी प्राप्ति होनेपर विकल्प करके इट् विहित हुआहै, यथा–क्लिशितः, क्लिष्टः ॥

३०५० पूङश्च । ७ । २ । ५१ ॥

पूङः क्त्वानिष्ठयोरिड्वा स्यात् ॥

३०५०–पूङ् धातुके उत्तर क्त्वा और निष्ठा प्रत्ययको विकल्प करके इट् हो । " श्र्युकः किति २३८१" इस सूत्रसे इट् निषेधकी प्राप्ति होनेपर विकल्प करके इड्विधानके लिये यह सूत्र है ॥

३०५१ पूङः क्त्वा च । १ । २ । २२ ॥

पूङः क्त्वा निष्ठा च सेट् किन्न स्यात् । पवितः । पूतः । क्त्वाग्रहणमुत्तरार्थम् । नोपधादित्यत्र हि क्त्वैव सम्बध्यते ॥

३०५१–पूङ् धातुके उत्तर सेट् अर्थात् इट् विशिष्ट क्त्वा और निष्ठा प्रत्यय कित् न हो, यथा–पवितः, पूतः । इस सूत्रमें क्त्वा प्रत्ययका ग्रहण न करनेसे भी काम चल जाता, क्योंकि, " न क्त्वा सेट् " इस वक्ष्यमाण सूत्रसे ही कित्त्वनिषेध सिद्ध है, इस कारण कहतेहैं कि, क्त्वा ग्रहण उत्तरार्थ है । " नोपधात् ३३२४ " इस सूत्रमें क्त्वा मात्रका सम्बन्ध होताहै निष्ठाका नहीं ॥

३०५२ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः । १ । २ । १९ ॥

एभ्यः सेण्निष्ठा किन्न स्यात् । शयितः । शयितवान् । अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेशियतः । शेशियतवान ॥ आदिकर्मणि निष्ठा वक्तव्या ॥ * ॥

३०५२–शीङ्, स्विद्, मिद्, क्ष्विद्, और धृष् धातुओंके उत्तर इट्के साथ वर्त्तमान निष्ठा प्रत्यय कित् न हो, शयितः । शयितवान् । इस स्थलमें अनुबन्ध निर्देश यङ्लुक्निवृत्तिके निमित्त है । शेशियतः । शेशियतवान् ।

" आदिकर्मणि निष्ठा वक्तव्या।"अर्थात् आद्यलक्षण विशिष्ट क्रियावृत्ति धातुसे निष्ठा प्रत्यय हो *

३०५३ आदिकर्मणि क्तः कर्तरि च । ३ । ४ । ७१ ॥

आदिकर्मणि यः क्तः स कर्तरि स्यात् चाद्भावकर्मणोः ॥

३०५३–आदिकर्म्ममें जो क्त प्रत्यय उक्त हुआहै, वह कर्त्तामें हो और चकारनिर्देशके कारण भाव और कर्म्मवाच्यमें भी हो ॥

३०५४ विभाषा भावादिकर्मणोः । ७ । २ । १७ ॥

भावे आदिकर्मणि चादितो निष्ठाया इड्वा स्यात् । प्रस्वेदितश्चैत्रः । प्रस्वेदितं तेन । ञिष्विदेति भ्वादिरत्र गृह्यते ञिद्भिः साहचर्यात्। स्विद्यतेस्तु स्विदित इत्येव । ञिमिदा, ञिक्ष्विदा, दिवादौ भ्वादौ च । प्रमेदितः । प्रमेदितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रधर्षितः । प्रधर्षितवान् । धर्षितं तेन । सेट्कि । प्रस्विन्नः । प्रस्विन्नं तेनेत्यादि ॥

३०५४–भाववाच्यमें और आदिकर्म्ममें आदित् इत् धातुके उत्तर निष्ठा प्रत्ययको विकल्प करके इट् हो, यथा–

प्रक्ष्वेदितश्चैत्रः, अर्थात् चैत्रकर्तृक आरभ्यमाण प्रक्ष्वेदन क्रिया। प्रक्ष्वेदितं तेन। ञित् धातुके साथ साहचर्यके कारण 'ञिष्विदा' इस भ्वादिगणीय धातुका इस स्थानमें ग्रहण है, दिवादिगणीय स्विद धातुका तो 'स्विदितः' ऐसा ही रूप होगा। 'ञिमिदा' और 'ञिक्ष्विदा' यह दो धातु दिवादि और भ्वादिगणीय हैं, यथा—प्रमेदितः। प्रमेदितवान्। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। प्रधर्षितः। प्रधर्षितवान्। धर्षितं तेन। "निष्ठा शीङ०" इस सूत्रमें सेट्की अनुवृत्ति होनेसे 'प्रस्विन्नः। प्रस्विन्नं तेन' इत्यादि स्थलमें कित्त्व नहीं हुआ॥

३०५५ मृषस्तितिक्षायाम् ।१।२।२०॥

सेण्निष्ठा किन्न स्यात्। मर्षितः। मर्षितवान्। क्षमायां किम्। अपमृषितं वाक्यम्। अविस्पष्टमित्यर्थः॥

३०५५—तितिक्षा अर्थमें मृष् धातुके उत्तर इट्के साथ वर्त्तमान निष्ठा प्रत्यय कित् न हो, मर्षितः। मर्षितवान्। जिस स्थानमें क्षमा अर्थ नहीं होगा, उस स्थानमें 'अवमृषितं वाक्यम्' ऐसा होगा, अर्थात् अविस्पष्टमित्यर्थः॥

३०५६ उदुपधाद्भावादिकर्मणोरन्यतरस्याम्। १। २। २१॥

उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात्। द्युतितम्—द्योतितम्। मुदितम्—मोदितं साधुना॥ प्रद्युतितः—प्रद्योतितः। प्रमुदितः—प्रमोदितः साधुः। उदुपधात्किम्। विदितम्। भावेत्यादि किम्। रुचितं कार्षापणम्। सेट् किम्। कुष्टम्॥ शब्विकरणेभ्य एवेष्यते॥ *॥ नेह गुध्यतेर्गुधितम्॥

३०५६—उकारोपध धातुके उत्तर भाव और आदि कर्ममें सेट् निष्ठा विकल्प करके कित् न हो, यथा—द्युतितम्, द्योतितम्। मुदितम्, मोदितम्—साधुना। प्रद्युतितः, प्रद्योतितः। प्रमुदितः, प्रमोदितः- साधुः॥ उदुपध धातु न होनेपर विदितम् इस स्थानमें नित्य कित्त्व होगा। भावादिकर्म क्यों कहा? तो 'रुचितम्' यहां विकल्प करके कित्त्व न हुआ। इट्के साथ वर्त्तमान निष्ठा प्रत्यय हो, ऐसा क्यों कहा? तो 'कुष्टम्' यहां न हो।

शप् विकरण जो उकारोपध धातु उसके उत्तर ही निष्ठाको विकल्प करके कित्त्व इष्ट है, इस कारण इस स्थानमें नहीं हुआ, यथा—गुध्यतेर्गुधितम्॥

३०५७ निष्ठायां सेटि। ६। ४। ५२॥

णेर्लोपः स्यात्। भावितः। भावितवान्। श्वीदित इति नेट्। सम्प्रसारणम्। शूनः। दीप्तः। गुहू। गूढः। वनु। वतः। तनु। ततः। पतेः सनि वेट्कत्वादिडभावे प्राप्ते द्वितीयाश्रितेति सूत्रे निपातनादिट्। पतितः। सेसिचीति वेट्कत्वात्सिद्धे कृन्तत्यादीनामीदित्त्वेनानित्यत्वज्ञापनाद्वा। तेन धावितमिभराजधियेत्यादि। यस्य विभाषेत्यत्रैकाच इत्येव। दरिद्रितः॥

३०५७—इट्के साथ वर्त्तमान जो निष्ठा प्रत्यय, वह परे रहते धातुसे विहित णिच्का लोप हो, यथा—भावितः। भावितवान्। "श्वीदितः० ३०३९" इस सूत्रसे इट् निषेध और "वचिस्वपि०" इससे सम्प्रसारण होकर—शूनः। दीप्तः। गुहू—गूढः। वनु—वतः। तनु—ततः।

पत धातुके उत्तर सन् प्रत्ययको विकल्प करके इट् विधानके कारण निष्ठा प्रत्ययमें इट्का अभाव प्राप्त होनेपर "द्वितीयाश्रित० ६८६" इस सूत्रमें निपातनसे इट् हुआ, यथा—पतितः। अथवा "सेसिचि२५०६" इस सूत्रसे विकल्प करके इट् विधानके कारण निष्ठा प्रत्ययमें इट्निषेध सिद्ध होनेपर भी कृती, इत्यादि धातुके ईदित्करणसे "यस्य विभाषा २०२५" इस सूत्रके अनित्यत्व ज्ञापनके कारण 'पतितः' इस स्थलमें इट् होगा। अत एव 'धावितमिभराजधिया' इत्यादि प्रयोग सिद्ध हुए। "यस्य विभाषा २०२५" इस सूत्रसे एकाच् धातुके उत्तर ही निष्ठा प्रत्ययके इट्का निषेध होताहै, इस कारण 'दरिद्रितः' इस स्थलमें इट्निषेध नहीं हुआ॥

३०५८ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वराऽनायासभृशेषु। ७। २। १८॥

क्षुब्धादीन्यष्टावनिट्कानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु। द्रवद्रव्यसंपृक्ताः सक्तवो मन्थो, मन्थनदण्डश्च। क्षुब्धो मन्थश्चेत्। स्वान्तं मनः। ध्वान्तं तमः। लग्नं सक्तम्। निष्ठानत्वमपि निपातनात्। म्लिष्टमविस्पष्टम्। विरिब्धः। स्वरः। म्लेच्छ रेभृ अनयोरुपधाया इत्वमपि निपात्यते। फाण्टमनायाससाध्यः कषायविशेषः। माधवस्तु नवनीतभावात्प्रागवस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये आह। बाढं भृशम्। अन्यत्र तु क्षुभितम्। क्षुब्धो राजेति त्वागमशास्त्रस्यानित्यत्वात्। स्वनितम्। ध्वनितम्। लगितम्। म्लेच्छितम्। विरेभितम्। फणितम्। वाहितम्॥

३०५८—मन्थ, मनः, तमः, सक्त, अविस्पष्ट, स्वर, अनायास, भृश, इन आठ अर्थोंमें यथाक्रम क्षुब्ध, स्वान्त, ध्वान्त, लग्न, म्लिष्ट, विरिब्ध, फाण्ट, बाढ, यह आठ पद अनिट् निपातनसे सिद्ध हों। द्रवद्रव्यसे मिलित सक्तुका नाम और मथनेके दण्डका नाम मन्थ है। मन्थ अर्थ होनेपर—क्षुब्धः। मन अर्थ होनेपर—स्वान्तम्। तम अर्थमें—ध्वान्तम्। सक्त अर्थ होनेपर—लग्नम्, इस स्थानमें निपातनसे तकारके

स्थानमें नकार भी हुआहै । अविस्पष्ट अर्थ होनेपर–म्लिष्टम् । स्वर अर्थ होनेपर–विरिब्धः । म्लेच्छ और रेभृ इन दो धातुओंकी उपधाको निपातनसे इत्व भी हुआहै । फाण्ट शब्दसे अनायास साध्य कषायविशेष समझना । वेदभाष्यमें माधवाचार्य्य तो नवनीतके प्रागवस्थापन्न द्रव्यविशेषको फाण्ट कहते हैं । भृश अर्थात् पौनःपुन्यार्थमें–बाढम् । इससे अन्य अर्थ होनेपर–'क्षुभितम्' ऐसा पद होगा ।

'क्षुब्धो राजा' इस स्थानमें 'क्षुब्धः' यह पद तो आगमशास्त्रके अनित्यत्वके कारण सिद्ध हुआहै । स्वनितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम् । फणितम् । वाहितम् ॥

३०५९ धृषिशसी वैयात्ये ।७।२।१९॥

एतौ निष्ठायामविनय एवानिटौ स्तः । धृष्टो विशस्तः । अन्यत्र धर्षितः । विशसितः । भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति । अत एव नियमार्थमिदं सूत्रमिति वृत्तिः । धृषेरादित्त्वे फलं चिन्त्यमिति हरदत्तः । माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाह । धृष्टम्–धर्षितम् । प्रधृष्टः–प्रधर्षितः ॥

३०५९–निष्ठा प्रत्यय परे रहते धृष् धातु और शस् धातु वैयात्य, अर्थात् अविनय अर्थमें ही अनिट् हो, यथा–धृष्टः । विशस्तः । अन्य अर्थ होनेपर–धर्षितः । विशसितः । भावादि कर्म्ममें तो वैयात्य अर्थमें धृष् धातु नहीं है, अत एव यह सूत्र नियमार्थक है, नहीं तो "विभाषा भावादिकर्मणोः" इसको बाधक होनेसे विध्यर्थ ही होजाता, यह वृत्तिकारका मत है । धृष् धातुके आदित्वकी कोई आवश्यकता नहीं है, यह हरदत्तका मत है । माधव तो भावादिकर्म्ममें अवैयात्य अर्थमें धृष् धातुके उत्तर प्रत्ययको विकल्प करके इट् कहतेहैं, यथा–धृष्टम्, धर्षितम् । प्रधृष्टः, प्रधर्षितः ॥

३०६० दृढः स्थूलबलयोः ।७।२।२०॥

स्थूले बलवति च निपात्यते । दृह दृहि वृद्धौ । क्तस्येडभावः । तस्य ढत्वम् । हस्य लोपः । इदितो नलोपश्च । दृहितः । दृंहितोऽन्यः ॥

३०६०–स्थूल और बलवान् अर्थमें 'दृढः' यह पद निपातनसे सिद्ध हो, अर्थात् वृद्ध्यर्थक दृह और दृहि धातुसे विहित क्त प्रत्ययके इट्का अभाव और तकारके स्थानमें ढकार और हकारका लोप और इदित् धातुके नकारका भी लोप हो । अन्य अर्थ होनेपर–दृहितः । दृंहितः ॥

३०६१ प्रभौ परिवृढः । ७ । २ । २१ ॥

वृह वृहि वृद्धौ । निपातनं प्राग्वत् । परिवृहितः । परिवृंहितोऽन्यः ॥

३०६१–प्रभु अर्थमें 'परिवृढः' यह निपातनसे सिद्ध हो, अर्थात् पूर्वकी समान वृद्ध्यर्थक वृह और वृहि धातुके उत्तर क्त प्रत्ययके इडभाव और तकारके स्थानमें ढकार हकारका लोप इदित् धातुमें नकारका भी लोप हो, अन्य अर्थमें परिवृहितः । परिवृंहितः ॥

३०६२ कृच्छ्रगहनयोः कषः ।७।२।२२॥

कषो निष्ठाया इण्न स्यादेतयोरर्थयोः । कष्टं दुःखं तत्कारणं च । स्यात्कष्टं कृच्छ्रमाभीलम् । कष्टो मोहः । कष्टं शास्त्रम् । दुरवगाहमित्यर्थः । कषितमन्यत् ॥

३०६२–कृच्छ्र, अर्थात् कष्ट और गहन, अर्थात् दुरवगाह अर्थ होनेपर कष् धातुके उत्तर निष्ठा प्रत्ययको इट् न हो, कष्ट शब्दसे दुःख और दुःखका कारण समझना । 'स्यात् कष्टं कृच्छ्रमाभीलमित्यमरः' । कष्टो मोहः । कष्टं शास्त्रं दुरवगाहम् इत्यर्थः । अन्य अर्थमें–'कषितम्' ऐसा पद होगा ॥

३०६३ घुषिरविशब्दने । ७ । २ । २३॥

घुषिर्निष्ठायामनिट् स्यात् । घुष्टा रज्जुः । अविशब्दने किम् । घुषितं वाक्यम् । शब्देन प्रकटीकृताभिप्रायमित्यर्थः ॥

३०६३–अविशब्दन अर्थ होनेपर अर्थात् प्रतिज्ञाभिन्न अर्थ होनेपर निष्ठा प्रत्यय परे रहते घुषिर् धातु अनिट् हो, यथा–घुष्टा रज्जुः । जिस स्थानमें अविशब्दन अर्थ नहीं होगा, उस स्थानमें 'घुषितं वाक्यम्' ऐसा होगा, अर्थात् शब्दसे प्रकटीकृताभिप्रायक वाक्य जानना ॥

३०६४ अर्देः संनिविभ्यः । ७ । २ । २४॥

एतत्पूर्वादर्देर्निष्ठाया इण्न स्यात् । समर्णः । न्यर्णः । व्यर्णः । अर्दितोऽन्यः ॥

३०६४–संपूर्वक, निपूर्वक, विपूर्वक अर्द धातुके उत्तर निष्ठा प्रत्ययको इट् न हो, यथा–समर्णः । न्यर्णः । व्यर्णः । उक्त उपसर्गपूर्वक न होनेपर–'अर्दितः' ऐसा पद होगा ॥

३०६५ अभेश्चाविदूर्य्ये । ७ । २ । २५ ॥

अभ्यर्णम् । नातिदूरमासन्नं वा । अभ्यर्दितमन्यत् ॥

३०६५–आविदूर्य्य अर्थात् अनतिदूर अर्थ होनेपर, अभिपूर्वक अर्द धातुके उत्तर निष्ठा प्रत्ययको इट् हो, यथा-अभ्यर्णम् नातिदूरम् आसन्नं वा । अन्य अर्थ होनेपर 'अभ्यर्दितम्' ऐसा होगा ॥

३०६६ णेरध्ययने वृत्तम् । ७ । २ । २६॥

ण्यन्ताद् वृतेः क्तस्येडभावो णिलुक्चाधीयमानेऽर्थे । वृत्तं छन्दश्छात्रेण सम्पादितम् । अधीतमिति यावत् । अन्यत्र तु वर्तिता रज्जुः ॥

३०६६–अधीयमान अर्थ होनेपर णिजन्त वृत् धातुके उत्तर क्त प्रत्ययके इट्का अभाव और णिच्का लुक् हो, यथा–वृत्तं छन्दश्छात्रेण सम्पादितम् । अधीतमिति यावत् । अन्य अर्थ होनेपर–'वर्त्तिता रज्जुः' ऐसा होगा ॥

३०६७ शृतं पाके । ६ । १ । २७ ॥

श्रातिश्रपयत्योः क्ते शृभावो निपात्यते क्षीर-

हविषोः पाके ॥ शृतं क्षीरं स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः । क्षीरहविर्भ्यामन्यत्तु श्राणं श्रपितं वा ॥

३०६७-पाक अर्थ होनेपर 'शृतम्' यह पद निपातनसे सिद्ध हो, अर्थात् क्त प्रत्यय परे रहते श्रा और श्रपि धातुके स्थानमें निपातनसे शृ आदेश हो ।

क्षीर और हविष्का पाक होनेपर शृ आदेश हो यथा-शृतम् क्षीरम् स्वयमेव विक्लिन्नं पक्वं वा इत्यर्थः । क्षीर और हविष्से भिन्नपदार्थका पाक होनेपर-'श्राणम् श्रपितम् वा' ऐसा पद होगा ॥

३०६८ वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः । ७ । २ । २७ ॥

एते णिचि निष्ठान्ता वा निपात्यन्ते । पक्षे । दमितः । शमितः । पूरितः । दासितः । स्पाशितः । छादितः । ज्ञपितः ॥

३०६८-दान्त, शान्त, पूर्ण, दस्त, स्पष्ट, छन्न, ज्ञप्त यह निष्ठाप्रत्ययान्त पद णिच् परे विकल्प करके सिद्ध हों, विकल्प पक्षमें दमितः । शमितः । पूरितः । दासितः । स्पाशितः । छादितः । ज्ञपितः ॥

३०६९ रुष्यमत्वरसंघुषास्वनाम् । ७ । २ । २८ ॥

एभ्यो निष्ठाया इड्वा । रुषितः-रुष्टः । अमितः-आन्तः । तूर्णः-त्वरितः । अस्याऽऽदित्त्वे फलं मन्दम् । संघुष्टः-संघुषितः । आस्वान्तः-आस्वनितः ॥

३०६९-रुष्, अम्, त्वर और संपूर्वक घुष् धातु और आङ्पूर्वक स्वन् धातुओंके उत्तर निष्ठाप्रत्ययको विकल्प करके इट् हो, यथा-रुषितः, रुष्टः । अमितः, आन्तः । तूर्णः, त्वरितः । 'ञित्वरा संभ्रमे' इस धातुमें आकार इत् करनेका कोई प्रयोजन नहीं है । संघुष्टः, संघुषितः । आस्वान्तः, आस्वनितः ॥

३०७० हृषेर्लोमसु । ७ । २ । २९ ॥

हृषेर्निष्ठाया इड्वा स्यात् लोमसु विषये । हृष्टं-हृषितं लोम ॥ विस्मितप्रतिघातयोश्च ॥ * ॥ हृष्टो हृषितो मैत्रः । विस्मितः प्रतिहतो वेत्यर्थः । अन्यत्र तु । हृषु अलीके उदित्त्वान्निष्ठायां नेट् । हृष तुष्टौ इट् ॥

३०७०-लोम अर्थ होनेपर हृष् धातुके उत्तर जो निष्ठाप्रत्यय उसको विकल्प करके इट् हो, यथा-हृष्टम्, हृषितं लोम ।

"विस्मितप्रतिघातयोश्च" विस्मित और प्रतिघात अर्थ होनेपर हृष् धातुके उत्तर निष्ठाप्रत्ययको विकल्प करके इट् हो * यथा-हृष्टो, हृषितो मैत्रः, अर्थात् विस्मित और प्रतिहत मैत्र ऐसा अर्थ जानना चाहिये । अन्य अर्थ होनेपर तो अलीकार्थक हृष धातु उदित् है, इस कारण उसके उत्तर निष्ठाप्रत्ययको इट् नहीं होकर-'हृष्टः' और तुष्ट अर्थवाला हृष धातुके उत्तर निष्ठाप्रत्ययको इट् होकर-'हृषितः' ऐसा होगा ॥

३०७१ अपचितश्च । ७ । २ । ३० ॥

चायतेर्निपातोऽयं वा अपचितः-अपचायितः ।

३०७१-'अपचितः' यह पद भी निपातनसे सिद्ध हो, अर्थात् अपपूर्वक ण्यन्त चि धातुके स्थानमें निष्ठा प्रत्यय परे रहते, निपातनसे विकल्प करके चि आदेश हो, यथा-अपचितः, अपचायितः ॥

३०७२ प्यायः पी । ६ । १ । २८ ॥

वा स्यान्निष्ठायाम् । व्यवस्थितविभाषेयम् । तेन स्वाङ्गे नित्यम् । पीनं मुखम् । अन्यत्र प्यानः, पीनः स्वेदः । सोपसर्गस्य न । प्रप्यानः । आङ्पूर्वस्यान्धूधसोः स्यादेव । आपीनोन्धुः । आपीनमूधः ॥

३०७२-निष्ठाप्रत्यय परे रहते प्याय् धातुके स्थानमें विकल्प करके पी आदेश हो यह व्यवस्थित विभाषा है, इससे यह हुआ कि, स्वाङ्ग होनेपर प्याय् धातुके स्थानमें नित्य पी आदेश होगा, यथा-पीनं मुखम् । अन्य अर्थ होनेपर प्यानः, पीनः स्वेदः । उपसर्ग विशिष्ट प्याय् धातुके स्थानमें पी आदेश नहीं होगा, प्रप्यानः ।

अन्धु और ऊधस् अर्थ होनेपर आङ्पूर्वक प्याय धातुके स्थानमें पी आदेश होहीगा, यथा-आपीनोऽन्धुः । आपीनमूधः ॥

३०७३ ह्रादो निष्ठायाम् । ६ । ४ । ९५

ह्रस्वः स्यात् । प्रह्लन्नः ॥

३०७३-निष्ठा प्रत्यय परे रहते ह्राद् धातुको ह्रस्व हो, प्रह्लन्नः ॥

३०७४ द्यतिस्यतिमास्थामित्ति किति । ७ । ४ । ४० ॥

एषामिकारोन्तादेशः स्यात्तादौ किति । ईत्त्वदद्भावयोरपवादः । दितः । सितः । मा माङ् मेङ् । मितः । स्थितः ॥

३०७४-तकारादि कित् प्रत्यय परे रहते दो धातु, षो धातु, मा धातु और स्था धातुओंको इकार अन्तादेश हो, यह सूत्र ईत्त्व और दद्भावका बाधक है, यथा-दितः । सितः । मा धातु, माङ् धातु और मेङ् धातुओंका 'मितः' ऐसा पद हुआ । स्था धातुका स्थितः ॥

३०७५ शाच्छोरन्यतरस्याम् । ७ । ४ । ४१

शितः-शातः । छितः-छातः । व्यवस्थितविभाषात्वाद्व्रतविषये श्यतेर्नित्यम् । संशितं व्रतम् । सम्यक्संपादितमित्यर्थः । संशितो ब्राह्मणः । व्रतविषयकयत्नवानित्यर्थः ॥

३०७५-तकारादि कित् प्रत्यय परे रहते शो धातु और छो धातुको विकल्प करके इकार अन्तादेश हो, शितः, शातः । छितः,छातः । व्यवस्थित विभाषात्वके कारण व्रतविषयमें शो धातुको नित्य इकार अन्तादेश होगा, संशितं व्रतम्, अर्थात् सम्यक् सम्पादित व्रत । संशितो ब्राह्मणः, अर्थात् व्रतविषयक यत्नवान् ॥

३०७६ दधातेर्हिः । ७ । ४ । ४२ ॥

तादौ किति । अभिहितम् । निहितम् ॥

३०७६-तकारादि कित् प्रत्यय परे रहते धा धातुके स्थानमें हि आदेश हो, यथा-अभिहितम् । निहितम् ॥

३०७७ दो दद् घोः । ७ । ४ । ४६ ॥

घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ किति चर्त्वम् । दत्तः । घोः किम् । दातः । तान्तो वायमादेशः । न चैवं विदत्तमित्यादावुपसर्गस्य दस्तीति दीर्घापत्तिः । तकारादौ तद्विधानात् । दान्तो वा । धान्तो वा । न च दान्तत्वे निष्ठानत्वं धान्तत्वे झषस्तथोरिति धत्वं शङ्क्यम् । सन्निपातपरिभाषाविरोधात् ॥

३०७७-तकारादि कित् प्रत्यय परे रहते घुसंज्ञक दा धातुके स्थानमें दथ् आदेश हो, चर्त्व होकर-दत्तः । घुसंज्ञक न होनेपर दथ् आदेश नहीं होगा, यथा-दातः । अथवा यह आदेश तकारान्त है । यदि कहो कि, तकारान्त आदेश होनेपर 'विदत्तम्' इत्यादि स्थलमें उपसर्गको "दस्ति ३०७९" इस सूत्रसे दीर्घकी आपत्ति तो न होगी, क्योंकि, तकारादि उत्तर पदके परे रहते इगन्त उपसर्गस्थ अच्के स्थानमें यह दीर्घ विधान है । यह आदेश दकारान्त और धकारान्त यदि होवेगा तो दान्तत्व होनेपर निष्ठाको नत्व किंवा धान्तत्व होनेपर "झषस्तथोः० २२८०" इस सूत्रसे धत्वकी आशङ्का न होगी । क्योंकि धत्व होनेमें सन्निपातपरिभाषाविरोध होगा । इससे यह आदेश थकारान्त होनेपर ही निर्देश होताहै । कारण कि, तकारान्त करना हो तो दीर्घ होगा । दकारान्त होनेपर निष्ठाके स्थानमें नकार होगा । धकारान्त होनेपर धकारकी प्राप्ति होगी किन्तु थकारान्तमें कोई भी दोष नहीं है ॥

३०७८ अच उपसर्गात्तः ।७।४।४७॥

अजोन्तादुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति । चर्त्वम् । प्रत्तः । अवत्तः ॥

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

चशब्दाद्यथाप्राप्तम् ॥

३०७८-तकारादि ककार इत् प्रत्यय परे रहते अजन्त उपसर्गसे परे घुसंज्ञक दा धातुसंबन्धी आकारके स्थानमें तकार आदेश हो, और "खरि च" इस सूत्रसे चर्त्व भी होगा, जैसे-प्रत्तः । अवत्तः । आदिकर्म विषयमें अवदत्तं, विदत्तं, प्रदत्तं, सुदत्तम्, अनुदत्तं, निदत्तं यह सम्पूर्ण पद यथासंभव निपातनसे सिद्ध होंगे । च शब्दके द्वारा यथासंभव अर्थ जानना चाहिये ॥

३०७९ दस्ति । ६ । ३ । १२४ ॥

इगन्तोपसर्गस्य दीर्घः स्याद्दादेशो यस्तकारस्तदादावुत्तरपदे । खरि चेति चर्त्वमाश्रयात्सिद्धम् । नीत्तम् । सूत्तम । घुमास्थेतीत्त्वम् । धेट् । धीतम् । गीतम् । पीतम् । जनसनेत्यात्त्वम् । जातम् । सातम् । खातम् ॥

३०७९-दा इसके स्थानमें आदिष्ट जो तकार तदादि उत्तर पद परे रहते इगन्त उपसर्गको दीर्घ हो । (चर्त्वके असिद्धत्वके कारण दा के स्थानमें तकार आदेश ही नहीं हुआ तो किस प्रकारसे उक्त व्याख्या सङ्गत हुई, इस आशंकासे कहते हैं) " खरि च १२१ " इस सूत्रके आश्रय(बल)से चर्त्व हुआ । यथा, नीत्तम् । " घुमास्था २४६२ " इस सूत्रसे ईत्त्व होगा । धेट् धातुम् धीतम्-गै धातु-गीतम् । पा धातु-पीतम् । "जनसन० २५०४" इस सूत्रसे जन सन, और खन धातुके स्थानमें आकार आदेश हो । जातम् । सातम् । खातम् । खन+क्त=खात+अम् खातम् (गर्त) ॥

३०८० अदो जग्धिर्ल्यप्तिकिति । २ । ४ । ३६ ॥

ल्यबिति लुप्तसप्तमीकम् । अदो जग्धिः स्यात् ल्यपि तादौ किति च । इकार उच्चारणार्थः । धत्वम् । झरो झरि । जग्धः ॥

आदिकर्मणि क्तः कर्तरि च । ३ । ४ । ७१ ॥

प्रकृतः कटं सः । प्रकृतः कटस्तेन । निष्ठायामण्यदर्थ इति दीर्घः । क्षियो दीर्घादिति णत्वम् । प्रक्षीणः सः ॥

३०८०-इस सूत्रमें ल्यप् यह लुप्तसप्तमीका पद है । ल्यप् प्रत्यय और तकारादि ककार इत् प्रत्यय परे रहते अद् धातुके स्थानमें जग्धि आदेश हो । जग्धि इस स्थलमें इकार उच्चारणार्थ है । और तकारके स्थानमें धकार होकर । "झरो झरि ७१ " इस सूत्रसे धकारका लोप हुआ । जैसे-जग्धः । "आदिकर्मणि क्तः कर्त्तरि च ३०५३" इस सूत्रसे क्तप्रत्यय भी हुआ । यथा, प्रकृतः कटं सः । प्रकृतः कटस्तेन " निष्ठायामण्यदर्थे ३०१४ " इस सूत्रसे निष्ठा प्रत्यय परे रहते पूर्व स्वरको दीर्घ हो । "क्षियो दीर्घात् ३०१५ " इस सूत्रसे अण् प्रत्यय हुआ और क्षि धातुके इकारको दीर्घ और तकारके स्थानमें नकार हुआ और पश्चात् इस नकारको णत्व हुआ । जैसे-प्रक्षीणः सः-॥

३०८१ वा क्रोशदैन्ययोः । ६ । ४ । ६१ ।

क्षियो निष्ठायां दीर्घो वा स्यादाक्रोशे दैन्ये च । क्षीणायुर्भव । क्षितायुर्वा । क्षीणोऽयं तपस्वी । क्षितो वा ॥

३०८१–आक्रोश और दैन्य अर्थ होनेपर निष्ठा प्रत्यय परे रहते विकल्प करके क्षि धातुके इकारको दीर्घ हो । क्षीणायुर्भव क्षितायुर्वा । क्षीणोऽयं तपस्वी । क्षितो वा ॥

३०८२ निनदीभ्यां स्नातेः कौशले । ८ । ३ । ८९ ॥

आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये । निष्णातः शास्त्रेषु । नद्यां स्नातीति नदीष्णः । सुपीति कः ॥

३०८२–नि और नदी शब्दसे परे स्ना धातुके सकारको षत्व हो, कौशल अर्थ रहते । जैसे–निष्णातः शास्त्रेषु । नद्यां स्नाति इस विग्रहमें नदीष्णः । "सुपि २९१६" इस सूत्रसे स्नाधातुके उत्तर क प्रत्यय हुआ ॥

३०८३ सूत्रं प्रतिष्णातम् । ८ । ३ । ९० ॥

प्रतेः स्नातेः षत्वम् । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । अन्यत्र प्रतिस्नातम् ॥

३०८३–पवित्र अर्थ होनेपर प्रतिष्णातम् यह पद निपातनसे सिद्ध हुआ । अर्थात् प्रतिपूर्वक स्ना धातुके सकारको षत्व हुआ । जैसे–प्रतिष्णातम् सूत्रम् । अर्थात् शुद्ध अन्य अर्थ होनेपर प्रतिस्नातम् ऐसा होगा ॥

३०८४ कपिष्ठलो गोत्रे । ८ । ३ । ९१ ॥

कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः । गोत्रे किम् । कपीनां स्थलं कपिस्थलम् ॥

३०८४–गोत्र अर्थ होनेपर कपिष्ठलः यह पद निपातनसे सिद्ध हो, कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः । गोत्र न होनेपर किस प्रकार होगा ? कपीनां स्थलं कपिस्थलम् इस प्रकार होगा ॥

३०८५ विकुशमिपरिभ्यः स्थलम् । ८ । ३ । ९६ ॥

एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ॥

३०८५–वि, कु, शमि, परि–इन सम्पूर्ण शब्दोंसे पर स्थल शब्दके सकारको षत्व हो । जैसे–विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ॥

३०८६ गत्यार्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च । ३ । ४ । ७२ ।

एभ्यः कर्तरि क्तः स्यात् भावकर्मणोश्च । गङ्गां गतः । गङ्गां प्राप्तः । ग्लानः सः । लक्ष्मीमाश्लिष्टो हरिः । शेषमधिशयितः । वैकुण्ठमधिष्ठितः । शिवमुपासितः । हरिदिनमुपोषितः । राममनुजातः । गरुडमारूढः । विश्वमनुजीर्णः । पक्षे प्राप्ता गङ्गा तेनेत्यादि ॥

३०८६–गत्यर्थधातु, अकर्मकधातु, श्लिषधातु, शीङ्धातु स्थाधातु, आसधातु, वसधातु, जनधातु, रुहधातु, जॄषधातु–इन संपूर्ण धातुओंके उत्तर कर्तृवाच्य रहते और भाव तथा कर्मवाच्य रहते क्त प्रत्यय हो । जैसे–गंगां गतः । गङ्गां प्राप्तः । ग्लानः सः । लक्ष्मीमाश्लिष्टो हरिः । शेषमधिशयितः । वैकुण्ठमधिष्ठितः । शिवमुपासितः । हरिदिनमुपोषितः । राममनुजातः । गरुडमारूढः । विश्वमनुजीर्णः । पक्षे प्राप्ता गङ्गा तेन इत्यादि ॥

३०८७ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः । ३ । ४ । ७६ ॥

एभ्योऽधिकरणे क्तः स्यात् । चाद्यथाप्राप्तम् । ध्रौव्यं स्थैर्यम् ॥

मुकुन्दस्यासितमिदमिदं यातं रमापतेः ।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥

पक्षे आसेरकर्मकत्वात्कर्तरि भावे च । आसितो मुकुन्दः । आसितं तेन । गत्यर्थेभ्यः कर्तरि कर्मणि च । रमापतिरिदं यातः । तेनेदं यातम् । भुजेः कर्मणि । अनन्तेनेदं भुक्तम् । कथं भुक्ता ब्राह्मणा इति । भुक्तमस्ति एषामिति मत्वर्थीयोऽच् ॥

वर्तमाने इत्यधिकृत्य ॥

३०८७–ध्रौव्यार्थक, गत्यर्थक और प्रत्यवसानार्थक धातुसे अधिकरणवाच्य रहते क्त प्रत्यय हो । चकारसे यथाप्राप्त भाव और कर्मवाच्य रहते भी हो । ध्रौव्यशब्दसे स्थैर्य समझना यथा, "मुकुन्दस्यासितमिदम्" "इदं यातं रमापतेः"।"भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः" । "अधिकरणवाचिनश्च (६२६)" इस सूत्रसे अधिकरण वाच्य रहते कर्ता और कर्म इन दोनोंमें षष्ठी होगी । पक्षमें आसधातुके अकर्मकत्वके कारण कर्तृरूपार्थवाच्यमें और भावरूपार्थवाच्यमें क्त प्रत्यय होगा । यथा, आसितो मुकुन्दः । आसितं तेन । गत्यर्थकधातुसे कर्तृरूपार्थ वाच्य रहते और कर्मरूपार्थ वाच्य रहते क्त प्रत्यय होगा । जैसे–रमापतिरिदं यातः । तेन इदं यातम् । भुजधातुसे कर्मरूपार्थ वाच्य रहते क्त प्रत्यय होनेसे–अनन्तेन इदं भुक्तम् । भुक्ता ब्राह्मणाः इस स्थलमें भुक्ताः पद किस प्रकारसे सिद्ध हुआ? इस स्थलमें भुक्तमस्ति एषाम् इस विग्रहमें मत्वर्थीय अच् प्रत्ययके द्वारा उक्त पद सिद्ध हुआ ।

वर्तमान कालमें यह अधिकार करके कहते हैं अर्थात् यहांसे लेकर वक्ष्यमाण सूत्रमें वर्त्तमानमें क्त प्रत्यय होगा ॥

३०८८ ञीतः क्तः । ३ । २ । १८७ ॥

ञिक्ष्विदा । क्ष्विण्णः । ञिइन्धी । इद्धः ॥

३०८८–ञइत् धातुसे वर्तमान कालमें क्त प्रत्यय हो । जैसे–ञिक्ष्विदा धातु–क्ष्विण्णः । ञिइन्धी धातु–इद्धः ॥

३०८९ मतिबुद्धिपूजार्थेभ्यश्च । ३ । २ । १८८ ॥

मतिरिहेच्छा बुद्धेः पृथगुपादानात् । राज्ञां

मत इष्टः । तैरिष्यमाण इत्यर्थः । बुद्धः । विदितः । पूजितः । अर्चितः । चकारोऽनुक्तसमुच्चयार्थः । शीलितो रक्षितः क्षान्तः आक्रुष्टो जुष्ट इत्यादि ॥

३०८९–मत्यर्थकधातु बुद्ध्यर्थकधातु और पूजार्थकधातुसे वर्तमान कालमें क्त प्रत्यय हो । इस स्थलमें मतिशब्दसे इच्छा लेनेमें बुद्धिका पृथक् उपादान कारण है । जैसे–राज्ञां मतः इष्टः । तैरिष्यमाण इत्यर्थः । बुद्धः । विदितः । पूजितः । अर्चितः । इस स्थानमें चकारनिर्देशसे जो धातु नहीं कहे हैं उनका भी समुच्चय होगा । जैसे–शीलितः, रक्षितः, क्षान्तः, आक्रुष्टः, जुष्टः, रुष्टः, रुषितः, अभिव्याहृतः, हृष्टः, तुष्टः, क्रान्तः, संयतः, उद्यतः, कष्टम् । इत्यादि पद भविष्यत्कालमें क्त प्रत्ययमें पूर्ववत् सिद्ध हुए ॥

३०९० नपुंसके भावे क्तः ।३।२।११४॥

क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात् । जल्पितम् । शयितम् । हसितम् ॥

३०९०–क्लीबत्वविशिष्ट भाव वाच्य रहते कालसामान्यमें धातुसे क्त प्रत्यय हो । जैसे–जल्पितम् । शयितम् । हसितम् । जल्प्+इ+क्त=जल्पितम् ॥

३०९१ सुयजोर्ङ्वनिप् ।३।२।११४॥

सुनोतेर्यजेश्च ङ्वनिप्स्याद् भूते । सुत्वा । सुत्वानौ । यज्वा । यज्वानौ ॥

३०९१–भूतकालमें सु और यज धातुसे ङ्वनिप् प्रत्यय हो जैसे–सुत्वा । सुत्वानौ । यज्वा । यज्वानौ ॥

३०९२ जीर्यतेरतृन् । ३ । २ । १०४ ॥

भूत इत्येव । जरन् । जरन्तौ । जरन्तः । वासरूपन्यायेन निष्ठापि । जीर्णो जीर्णवान् ॥

३०९२–भूतकालमें जॄधातुसे अतृन् प्रत्यय हो । जरन् । जरन्तौ । जरन्तः । वासरूपन्यायसे जॄधातुसे निष्ठा प्रत्यय भी होगा । जैसे, जीर्णः । जीर्णवान् ॥

३०९३ छन्दसि लिट् । ३ ।२ । १०५ ॥

३०९३–वेदमें भूतसामान्यकालमें धातुसे लिट्लकार हो॥

३०९४ लिटः कानज्वा । ३ ।२।१०६॥

३०९४–लिट्के स्थानमें विकल्प करके कानच् प्रत्यय हो॥

३०९५ क्वसुश्च । ३ । २ । १०७ ॥

इह भूतसामान्ये छन्दसि लिट् । तस्य विधीयमानौ क्वसुकानचावपि छान्दसाविति त्रिमुनिमतम् । कवयस्तु बहुलं प्रयुञ्जते । तन्तस्थिवांसं नगरोपकण्ठे । श्रेयांसि सर्वाण्यधिजग्मुषस्त इत्यादि ॥

३०९५–[illegible] लिट्के स्थानमें क्वसु प्रत्यय हो । इस स्थलमें [illegible] विधीयमान जो वेदविषयमें लिट्, तिसके स्थानमें [illegible] और कानच यह भी वेदविषयमें हों । यह पाणिनि, कात्यायन और पतञ्जलि इन तीन मुनियोंका मत है । किन्तु कविगण बहुल प्रयोग करतेहैं अर्थात् इस नियमके अनुगामी नहीं होते कारण कि, कवि लोग निरंकुश हैं । इस कारण "तं तस्थिवांसं नगरोपकण्ठे" "श्रेयांसि सर्वाण्यधिजग्मुषस्ते" इत्यादि प्रयोग कालिदासने लिखे हैं ॥

३०९६ वस्वेकाजाद्घसाम् । ७ । २।६७॥

कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट् नान्येषाम् । एकाच् । आदिवान् । आरिवान् । आत् । ददिवान् । जक्षिवान् । एषां किम् । बभूवान् ॥

३०९६–कृतद्वित्व एकाच्धातुके अर्थात् द्वित्व होनेपर जिन धातुओंका एक अच्मात्र शेष रहे तिनके उत्तर आकारान्त धातुके उत्तर और अद धातुके स्थानमें कृतद्विर्वचन आदेश घस्लृके उत्तर क्वसुप्रत्ययको इट् हो अन्य धातुओंके उत्तर क्वसुको इट् न हो । एकाच्का उदाहरण, जैसे–आदिवान् । आरिवान् आकारान्तका उदाहरण जैसे–ददिवान् । घसका उदाहरण जैसे–जक्षिवान् । जिस स्थानमें यह धातु न होगा उस स्थानमें इट् नहीं होगा । जैसे–बभूवान् ॥

३०९७ भाषायां सदवसश्रुवः ।३।२।१०८

सदादिभ्यो भूतसामान्ये भाषायां लिड्वा स्यात् तस्य च नित्यं क्वसुः । निषेदुषीमासनबन्धधीरः । अध्यूषुषस्तामभवज्जनस्य । शुश्रुवान् ॥

३०९७–सद्, वस और श्रु इन धातुओंके उत्तर भाषामें भूतसामान्यमें विकल्प करके लिट् हो । इस लिट्के स्थानमें नित्य क्वसु प्रत्यय हो । "निषेदुषीमासनबंधधीरः" "अध्यूषुषस्तामभवज्जनस्य" शुश्रुवान् ॥

३०९८ उपेयिवाननाश्वाननूचानश्च । ३ । २ । १०९ ॥

एते निपात्यन्ते । उपपूर्वादिणो भाषायामपि भूतमात्रे लिड्वा तस्य नित्यं क्वसुः । इट् । उपेयिवान् । उपेयुषः स्वामपि मूर्तिमग्र्याम् ॥ उपेयुषी । उपेत्यविवक्षितम् ईयिवान् । समीयिवान् । नञ्पूर्वादश्नातेः क्वसुरिडभावश्च । भूतजयधृतेरनाशुष इति भारविः । अनुपूर्वाद्वचेः कर्तरि कानच् । वेदस्यानुवचनं कृतवाननूचानः ॥

३०९८–उपेयिवान्, अनाश्वान्, अनूचान, यह संपूर्ण पद निपातनसे सिद्ध हों । उपपूर्वक इण् धातुके उत्तर भूतकालमात्रमें भाषामें भी विकल्प करके लिट् हो । और इस लिट्के स्थानमें नित्य क्वसुप्रत्यय हो, और पश्चात् इट् हुआ, जैसे–उप+इण्+क्वसु=उपेयिवान् । "उपेयुषः स्वामपि मूर्तिमग्र्याम्" उपेयुषी । इस सूत्रमें उप यह अविवक्षित है । ईयिवान् । समीयिवान् । नञ्पूर्वक अश धातुके उत्तर क्वसु प्रत्यय हुआ और एकाच्प्रयुक्त प्राप्त इट्का अभाव निपातनसे होकर

अनाश्वान् हुआ। तैसेही "धृतज जयधृतेरनाशुषः" इति भारविः। अनुपूर्वक वचधातुके उत्तर कर्तृ वाच्य रहते कानच् प्रत्यय हो। जैसे, वेदस्यानुवचनं कृतवाननूचानः॥

३०९९ विभाषा गमहनविदविशाम्। ७।२।६८॥

एभ्यो वसोरिड्वा । जग्मिवान्-जगन्वान्। जघ्निवान्-जघन्वान्। विविदिवान्-विविद्वान्। विविशिवान्-विविश्वान्। विशिना साहचर्याद्विन्दतेर्ग्रहणम्। वेत्तेस्तु विविद्वान्। नेड्वशि कृतीतीण्निषेधः॥ दृशेश्च॥ * ॥ ददृशिवान्। ददृश्वान्॥

३०९९-गम, हन, विद, विश इन धातुओंके उत्तर क्सु प्रत्ययके स्थानमें विकल्प करके इट् हो। जैसे-जग्मिवान् जगन्वान्। जघ्निवान्-जघन्वान्। विविदिवान्-विविद्वान्। विविशिवान्-विविश्वान्। विश धातुके साहचर्य्यके कारण विन्द धातुका भी ग्रहण होगा। अदादिगणीय विद धातुके उत्तर क्सु प्रत्ययमें भी विविद्वान् ऐसा पद हुआ। "नेड्वशि कृति २९८१" इस सूत्रसे इट् न होगा। "दृशेश्च" इस वार्त्तिकसे दृश धातुके उत्तर क्सु प्रत्ययके स्थानमें विकल्प करके इट् हो। जैसे ददृशिवान्-ददृश्वान्॥

३१०० लटः शतृशानचावप्रथमासमानाधिकरणे।३।२।१२४॥

अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः। शबादि। पचन्तं चैत्रं पश्य॥

३१००-शत्रन्तार्थ शानजन्तार्थका प्रथमाभिन्न अन्य विभक्त्यन्तार्थके साथ सामानाधिकरण्य होनेपर लट्के स्थानमें वर्त्तमानकालमें शतृ और शानच् प्रत्यय हो।शतृ और शानच्के शकारकी इत्संज्ञा हुई। इसकारण तिसके उत्तर शप् आदि कार्य्य होंगे। जैसे-पचन्तं चैत्रं पश्य॥

३१०१ आने मुक्।७।२।८२॥

अङ्गस्यातो मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। तेन प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् ब्राह्मणः॥ माङ्याक्रोश इति वाच्यम्॥ * ॥ मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति। माङि लुङिति प्राप्ते। एतद्वचनसामर्थ्याल्लट्॥

३१०१-शानच् प्रत्ययका आन भाग परे रहते धातुके अंगसम्बन्धी अकारको मुक्का आगम हो। जैसे, पचमानं चैत्रं पश्य। अनुवृत्तिद्वारा अर्थात् पूर्वसूत्रसे इस स्थलमें लट्की अनुवृत्ति होसकती थी, तो पुनः लट्के ग्रहणकी क्या आवश्यकता है? इस कारण कहतेहैं कि यह केवल अधिक [illegible] इससे यह हुआ कि प्रथमाविभक्त्यन्तार्थके सामानाधिकरण्यमें भी कदापि लट्के स्थानमें शतृ और शानच् प्रत्यय होंगे। जैसे, सन् ब्राह्मणः। "माङ्याक्रोशे इति वाच्यम्" इस वार्तिकसे माङ् इस अव्यय शब्दका उपपद होनेपर आक्रोशार्थमें धातुके उत्तर लट्के स्थानमें शतृ और शानच् प्रत्यय हों। यथा, "माजीवन् यः परावज्ञादुःखदग्धोऽपि जीवति" "माङि लुङ्(२२१९)" इस सूत्रसे यद्यपि लुङ्की प्राप्ति होतीहै, तथापि इस वार्त्तिकके बलसे लट् ही होगा। परस्मैपदमें शतृ और आत्मनेपदमें शान हुआ॥

३१०२ संबोधने च।३।२।१२५॥

हे पचन्। हे पचमान॥

३१०२-संबोधनमें लट्के स्थानमें शतृ और शानच् प्रत्यय हो। जैसे, हे पचन्! हे पचमान!॥

३१०३ लक्षणहेत्वोः क्रियायाः। ३।२।१२६॥

क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोलः शतृशानचौ स्तः। शयाना भुञ्जते यवनाः। अर्जयन्वसति। हरिं पश्यन्मुच्यते। हेतुः फलं कारणं च। कृत्यचः।८।४।२९। प्रपीयमाणः सोमः॥

३१०३-क्रियाका परिचायक हेतुरूप जो अर्थ (फलरूप जो अर्थ) तदर्थक धातुके उत्तर जो लट् तिसके स्थानमें शतृ और शानच् प्रत्यय हों। जैसे-शयानाः भुञ्जते यवनाः। अर्जयन् वसति। हरिं पश्यन् मुच्यते। हेतुशब्दसे फल और कारण यह दो अर्थ समझने।

"कृत्यचः (२८३५)" इस सूत्रसे नकारको णत्व हुआ। प्रपीयमाणः सोमः॥

३१०४ ईदासः।२।२।८३॥

आसः परस्यानस्य ईत्स्यात्। आदेः परस्य। आसीनः॥

३१०४-आसधातुके उत्तर आनके स्थानमें ईत् (ईकार) हो। "आदेः परस्य (४४)" इस सूत्रसे आनके आकारके स्थानमें ही ईकार होगा। जैसे-आसीनः॥

३१०५ विदेः शतुर्वसुः।७।१।३६॥

वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात्। विदन्। विद्वान्। विदुषी॥

३१०५-विदधातुके उत्तर शतृप्रत्ययके स्थानमें विकल्प करके वसु प्रत्यय हो। जैसे-विदन्, विद्वान्, विदुषी॥

३१०६ तौ सत्।३।२।१२७॥

तौ शतृशानचौ सत्संज्ञौ स्तः॥

३१०६-इस शतृ और शानच्की सत्संज्ञा हो॥

३१०७ लटः सद्वा।३।३।१४॥

व्यवस्थितविभाषेयम्। तेनाप्रथमासामाना-

धिकरण्ये प्रत्ययोत्तरपदयोः सम्बोधने लक्षणहेत्वोश्च नित्यम् । करिष्यन्तं करिष्यमाणं पश्य । करिष्यतोऽपत्यं कारिष्यतः करिष्यद्भक्तिः । हे करिष्यन् । अर्जयिष्यन्वसति । प्रथमासमानाधिकरणेपि क्वचित् । करिष्यतीति करिष्यन् ॥

३१०७–लृट्के स्थानमें विकल्प करके सत् अर्थात् शतृ और शानच् प्रत्यय हों । यह विकल्प व्यवस्थित बिभाषा हैं । इससे यह फल हुआ कि प्रथमान्तार्थभिन्न सामानाधिकरण्यस्थलमें प्रत्यय और उत्तरपद परे रहते संबोधनमें और लक्षण और हेतु अर्थ होनेपर उक्तप्रत्यय नित्य होंगे जैसे–करिष्यन्तं करिष्यमाणं पश्य । करिष्यतोऽपत्यं कारिष्यतः । करिष्यद्भक्तिः । हे करिष्यन् ! अर्जयिष्यन् वसति । प्रथमासमानाधिकरणमें भी कहीं लृट्के स्थानमें सत् अर्थात् शतृ और शानच् प्रत्यय हों । जैसे, करिष्यतीति करिष्यन् ॥

३१०८ पूङ्यजोः शानन् ।३।२।१२८॥

वर्तमाने । पवमानः । यजमानः ।

३१०८–पूङ्धातु और यजधातुके उत्तर वर्त्तमानकालमें शानन् प्रत्यय हो । यह शानन् ण्वुलादिकी तरह स्वतन्त्र है लादेश नहीं है । जैसे–पवमानः । यजमानः ॥

३१०९ ताच्छील्यवयोवचनशक्तिषु चानश् ।३।२।१२९॥

एषु द्योत्येषु कर्तरि चानश् । भोगं भुञ्जानः । कवचं बिभ्राणः । शत्रुं निघ्नानः ॥

३१०९–ताच्छील्य, वय, वचन, शक्ति, यह सम्पूर्ण अर्थ द्योत्य रहते कर्तृवाच्यमें धातुके उत्तर चानश् प्रत्यय हो । जैसे, भोगं भुञ्जानः । कवचं बिभ्राणः । शत्रुं निघ्नानः । नि+हन्+आनश्=निघ्नानः ॥

३११० इङ्धार्योः शत्रकृच्छ्रिणि ।३।२।१३०॥

आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि । अधीयन् । धारयन् । अकृच्छ्रिणि किम् । कृच्छ्रेणाधीते । धारयति ॥

३११०–इङ्धातु और णिजन्त धृ धातुके उत्तर कृच्छ्रभिन्न कर्त्ता रहते, शतृ प्रत्यय हो । जैसे–अधीयन् । धारयन् । जिस स्थानमें कृच्छ्र कर्त्ता होगा, उस स्थलमें शतृ नहीं होगा । जैसे–कृच्छ्रेण अधीते । धारयति ॥

३१११ द्विषोऽमित्रे ।३।२।१३१॥

द्विषन् शत्रुः ॥

३१११–अमित्र अर्थ होनेपर द्विष्धातुके उत्तर शतृ प्रत्यय हो । जैसे–द्विषन् शत्रुः ॥

३११२ सुञो यज्ञसंयोगे ।३।२।१३२॥

सर्वे सुन्वन्तः सर्वे यजमानाः सत्रिणः ॥

३११२–यदि धातुका व्यापार यज्ञके साथ संयुज्यमान हो, तो सु धातुके उत्तर शतृ प्रत्यय हो । जैसे–सर्वे सुन्वन्तः । सर्वे यजमानाः सत्रिणः ॥

३११३ अर्हः प्रशंसायाम् ।३।२।१३३॥

अर्हन् ॥

३११३–प्रशंसा अर्थ वाच्य होनेपर अर्हधातुके उत्तर शतृ प्रत्यय हो । जैसे–अर्हन् ॥

३११४ आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु । ३ । २ । १३४ ॥

क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु बोध्याः ॥

३११४–क्विप्प्रत्ययतक वक्ष्यमाण प्रत्यय तच्छील, तद्धर्म और तत्साधुकारी अर्थमें ही प्रयुक्त हों ॥

३११५ तृन् । ३ । २ । १३५ ॥

कर्ता कटम् ॥

३११५–कर्तृवाच्यमें धातुके उत्तर तृन् प्रत्यय हो । जैसे–कर्त्ता कटम् ॥

३११६ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ३ । २ । १३६ ॥

अलङ्करिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्धिष्णुः । सहिष्णुः । चरिष्णुः ॥

३११६–अलंशब्दपूर्वक कृञ्धातु निर् और आङ् एतद्द्वयपूर्वक कृञ्धातु प्रपूर्वक जनधातु, उत्पूर्वक पचधातु, उत्पूर्वक पतधातु, उत्पूर्वक मद और रुचधातु, अपपूर्वक त्रपधातु, वृत, वृध, सह और चर धातु इन सम्पूर्ण धातुओंके उत्तर कर्तृवाच्य रहते इष्णुच् प्रत्यय हो । जैसे–अलङ्करिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्त्तिष्णुः । वर्द्धिष्णुः । सहिष्णुः । चरिष्णुः ॥

३११७ णेश्छन्दसि । ३ । २ ।१३७ ॥

वीरुधः पारयिष्णवः ॥

३११७–वैदिकप्रयोग स्थलमें णिजन्त धातुके उत्तर कर्तृवाच्य रहते इष्णुच् प्रत्यय हो । जैसे–वीरुधः पारयिष्णवः ॥

३११८ भुवश्च । ३ । २ । १३८ ॥

छन्दसीत्येव । भविष्णुः । कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति । निरंकुशाः कवयः । चकारोनुक्तसमुच्चयार्थः । भ्राजिष्णुरिति वृत्तिः । एवं क्षयिष्णुः । नैतद्भाष्ये दृष्टम् ॥

३११८-वेदमें भू धातुके उत्तर भी इष्णुच् प्रत्यय हो। जैसे-भविष्णुः । तो लौकिक "जगत्प्रभोरप्रभविष्णु वैष्णवम्"। ऐसे प्रयोग स्थलमें भू धातुके उत्तर इष्णुच् प्रत्यय किस प्रकार हुआ है ? इससे कहतेहैं कि, कविलोग निरंकुश अर्थात् सर्वदा सम्पूर्ण नियमोंके वशवर्ती नहीं होते । इस कारण लौकिक प्रयोगमें भी भू धातुके उत्तर इष्णुच् प्रत्यय किया है। इस सूत्रमें चकार अनुक्त समुच्चयार्थ है । अत एव वृत्तिकारके मतानुसार भ्राज+इष्णुच् प्रत्ययमें भ्राजिष्णुः । क्षि+इष्णुच्+ क्षयिष्णुः ऐसा पद होगा। किन्तु यह भाष्यमें देखा नहीं जाता। यहां वैदिकप्रकरण निवृत्त हुआ ॥

३११९ ग्लाजिस्थश्च ग्स्नुः।३।२।१३९॥

छन्दसीति निवृत्तम् । गिदयं न तु कित् । तेन स्थ ईत्वं न । ग्लास्नुः । गित्वान्न गुणः । जिष्णुः । स्थास्नुः । चाद्भुवः । श्र्युकः कितीत्यत्र गकारप्रश्लेषान्नेट् । भूष्णुः ॥ दंशेश्छन्दस्युपसंख्यानम् ॥ दङ्क्ष्णवः पशवः ॥

३११९-ग्लै धातु,जि धातु,और स्था धातुके उत्तर"ग्स्नु"प्रत्यय हो। यह गकारादि है। जो आदिमें ककार कहताहै सो प्रामादिक है प्रकृतमें गकार इत् है । इस कारण स्थाधातुके आकारके स्थानमें "घुमास्था" इससे ईकार नहीं होगा। जैसे-"ग्लास्नुः" गकार इत् होनेसे जिधातुके इकारको गुण नहीं होगा । चकारसे भूधातुसे भी "ग्स्नु" होगा । " श्र्युकः किति २३८१ " इस सूत्रमें गकारके प्रश्लेषके कारण प्रत्ययके आदिमें इट् नहीं होगा । जैसे-भूष्णुः । दंशधातुका वेदमें उपसंख्यान होगा अर्थात् वैदिक प्रयोगमें दंशधातुके उत्तर "ग्स्नु" प्रत्यय हो । जैसे-दङ्क्ष्णवः पशवः ॥

३१२० त्रसिगृधिधृषिक्षिपेः क्नुः । ३ । २ । १४० ॥

त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥

३१२०-त्रसि, गृधि, धृषि, और क्षिप् धातुके उत्तर क्नु प्रत्यय हो । जैसे-त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥

३१२१ शमित्यष्टाभ्यो घिनुण्।३।२।१४१

उकार उच्चारणार्थ इति काशिका । अनुबन्ध इति भाष्यम् । तेन शमिनितरा शमिनीतरेत्यत्र उगितश्चेति ह्रस्वविकल्पः । न चैवं शमी शमिनावित्यादौ नुम्प्रसङ्गः, झल्ग्रहणमपकृष्य झलन्तानामेव तद्विधानात् । नोदात्तोपदेशस्येति वृद्धिनिषेधः । शमी, तमी, दमी, श्रमी, भ्रमी, क्षमी, क्लमी, प्रमादी । उत्पूर्वान्मदेः अलंकृञा-दिसूत्रेणेष्णुजुक्तो, वासरूपविधिना घिनुणपि । उन्मादी । ताच्छीलिकेषु वासरूपविधिर्नास्ति इति तु प्रायिकम् ॥

३१२१-शम् आदि आठ धातुओंके उत्तर घिनुण् प्रत्यय हो । काशिकाकारके मतमें घिनुण् प्रत्ययका उकार उच्चारणार्थ है और भाष्यकारके मतमें उकार अनुबंधमात्र है । इस कारण शमिनितरा शमिनीतरा इस स्थलमें"उगितश्चेति(९८७)" इस सूत्रसे विकल्प करके ह्रस्व हुआ है । शमी । शमिनौ । इस स्थलमें नुम् होगा ऐसा कहना नहीं चाहिये । कारण कि, झल् पदका अपकर्षण करके झलन्तके उत्तर ही नुमका विधान हुआ है । अत एव शमिनौ इस स्थलमें नुमका प्रसंग भी नहीं होगा "नोदात्तोपदेशस्य (२७६३)" इस सूत्रसे वृद्धिका निषेध होगा । शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्लमी । प्रमादी । उत्पूर्वक मदधातुके उत्तर "अलंकृञ्" इत्यादि सूत्रसे इष्णुच् प्रत्यय उक्त हुआ है । और वासरूपविधिसे घिनुण् प्रत्यय भी होगा । तिससे उन्मादी यह पद सिद्ध हुआ । ताच्छीलिकप्रत्ययोंके विषयमें वासरूपविधि नहीं है ऐसा निषेध प्रायिक है ॥

३१२२ सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च । ३ । २ । १४२ ॥

घिनुण् स्यात् । सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ॥

३१२२-संपूर्वक पृच्धातु अनुपूर्वक रुध्धातु, आङ्पूर्वक यम्धातु, आङ्पूर्वक यसधातु, परिपूर्वक सृधातु, संपूर्वक सृजधातु, परिपूर्वक देवृधातु, संपूर्वक ज्वरधातु, परिपूर्वक क्षिपधातु, परिपूर्वक रटधातु, परिपूर्वक वदधातु, परिपूर्वक दहधातु, परिपूर्वक मुहधातु, दुष, द्विष, द्रुह, दुह और धातु, आङ्पूर्वक क्रीडधातु, विपूर्वक विचधातु, त्यज, रञ्ज और भजधातु, और अतिपूर्वक चरधातु, अपपूर्वक चरधातु, आङ्पूर्वक मुषधातु, और अभि तथा आङ् एतद्वयपूर्वक हनधातु, इन धातुओंके उत्तर कर्तृरूपार्थवाच्य रहते घिनुण् प्रत्यय हो । जैसे-सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ॥

३१२३ वौ कषलसकत्थस्रम्भः । ३ । २ । १४३ ॥

विकाषी । विलासी । विकत्थी । विस्रम्भी ॥

३१२३–विपूर्वक कप्, लस, कत्थ और स्रम्भ, इन धातुओंके उत्तर घिनुण् प्रत्यय हो । जैसे–विकापी । विलासी । विकत्थी । विस्रम्भी ॥

३१२४ अपे च लषः । ३ ।२।१४४॥

चाद्वौ । अपलाषी । विलाषी ॥

३१२४–अपि और विपूर्वक लष धातुके उत्तर घिनुण् प्रत्यय हो । जैसे–अपलापी । विलासी ॥

३१२५ प्रे लपसृद्रुमथवदवसः । ३ । २ । १४५ ॥

प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी ॥

३१२५–प्रपूर्वक लप, सृ, द्रु, मथ, वद, वस इन धातुओंके उत्तर घिनुण् प्रत्यय हो । जैसे–प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी ॥

३१२६ निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् । ३ । २ । १४६ ॥

पञ्चम्यर्थे प्रथमा । एभ्यो वुञ् स्यात् । निन्दकः । हिंसक इत्यादि । ण्वुला सिद्धे वुञ्वचनं ज्ञापकं तच्छीलादिषु वासरूपन्यायेन तृजादयो नेति ॥

३१२६–निन्द, हिंस, क्लिश, खाद ये धातु नाशसे णिजन्त नश विपूर्वक धातु, परिपूर्वक क्षिपधातु, परिपूर्वक रटधातु, परिपूर्वक वादिधातु, वि और आङ् एतद्द्वयपूर्वक भाषधातु, आङ्पूर्वक सूयधातु इन धातुओंके उत्तर वुञ् प्रत्यय हो । इस सूत्रमें पञ्चम्यर्थमें प्रथमा विभक्ति हुई है । जैसे–निन्दकः । हिंसकः इत्यादि । ण्वुल् प्रत्यय करके भी यद्यपि यह सम्पूर्ण सिद्ध होजाते, तथापि जो वुञ् प्रत्ययविधायक सूत्र किया है उससे ज्ञापित होताहै तच्छीलादि अर्थोंके विषयमें ' वासरूपन्यायानुसार ' तृच् आदि प्रत्यय नहीं होतेहैं ॥

३१२७ देविक्रुशोश्चोपसर्गे ।३।२।१४७॥

आदेवकः । आक्रोशकः । उपसर्गे किम् । देवयिता । क्रोष्टा ॥

३१२७–उपसर्ग उपपद होनेपर देवि (हेतुमण्ण्यन्त दिवु धातु) और क्रुश धातुके उत्तर वुञ् प्रत्यय हो । जैसे–आदेवकः । आक्रोशकः । उपसर्ग पूर्वमें न रहते ऐसे रूप होंगे, जैसे–देवयिता । क्रोष्टा ॥

३१२८ चलनशब्दार्थादकर्मकाद्युच् । ३ । २ । १४८ ॥

चलनार्थाच्छब्दार्थाच्च युच् स्यात् । चलनः । चोपनः । कम्पनः । शब्दनः । रवणः । अकर्मकात्किम् । पठिता विद्याम् ॥

३१२८–चलनार्थक और शब्दार्थक अकर्मक धातुके उत्तर युच् प्रत्यय हो । यथा–चलनः । चोपनः । कम्पनः । शब्दनः । रवणः । सकर्मक धातुके उत्तर युच् प्रत्यय नहीं होगा । जैसे–पठिता विद्याम् ॥

३१२९अनुदात्तेतश्चहलादेः।३।२।१४९॥

अकर्मकाद्युच् स्यात् । वर्तनः । वर्धनः । अनुदात्तेतः किम् । भविता । हलादेः किम् । एधिता । अकर्मकात्किम् । वसिता वस्त्रम् ॥

३१२९–अनुदात्तेत् (केवल आत्मनेपदी) जो अकर्मक हलादि धातु तिसके उत्तर युच् प्रत्यय हो । जैसे–वर्त्तनः । वर्द्धनः । अनुदात्तेत् न होनेसे भविता । इस स्थलमें भूधातुसे युच् नहीं हुआ । अनुदात्तेत्में हलादि विशेषण देनेसे एधिता, यहांपर युच्की अप्राप्ति रहते तृच्ही हुआ । अकर्मक न होनेपर सकर्मक अनुदात्तेतसे भी युच् नहीं होता तिससे वसिता वस्त्रम्, इस स्थलमें युच् नहीं हुआ ॥

३१३० जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः । ३ । २ ।१५०॥

जु इति सौत्रो धातुर्गतौ वेगे च । जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । पूर्वेण सिद्धे पदग्रहणं लषपतपदेत्युकञा बाधा मा भूदिति । तेन ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति । तेनालंकृञस्तृन्न ॥

३१३०–जु धातु, चङ्क्रम्य धातु, दन्द्रम्य धातु, सृ धातु, गृधि धातु, ज्वल धातु, शुच धातु, लष धातु, पत धातु और पद धातु इन धातुओंके उत्तर युच् प्रत्यय हो, जु यह सूत्रपठित धातु है यह गति और बोध अर्थमें प्रयुक्त हो । जैसे–जवनः । चंक्रमणः । दंद्रमणः । सरणः । पद धातुके अकर्मकत्व, अनुदात्तेत्त्व और हलादित्वके कारण " अनुदात्तेतश्च हलादेः " इस पूर्वसूत्रसे इसके उत्तर युच् प्रत्ययकी सिद्धि हो जाती, तो जो पुनर्वार इस सूत्रमें पद धातुका ग्रहण हुआहै, सो केवल "लषपतपद० ३१३४ " इस वक्ष्यमाण सूत्रसे उकञ् प्रत्यय होकर युच् प्रत्ययकी बाधा न हो, इस कारण विहित हुआ है ऐसा जानना चाहिये । तिससे यह फल हुआ कि तच्छीलादि विषयमें परस्पर वासरूप विधि नहीं है, इस कारण अलंशब्दपूर्वक कृञ् धातुके उत्तर तृन् प्रत्यय नहीं होगा ॥

३१३१ क्रुधमण्डार्थेभ्यश्च ।३।२।१५१॥

क्रोधनः । रोषणः । मण्डनः । भूषणः ॥

३१३१–क्रुध धातु और मंडार्थ अर्थात् भूषणार्थक धातुके उत्तर युच् प्रत्यय हो, जैसे–क्रोधनः । रोषणः । मंडनः । भूषणः इत्यादि ॥

३१३२ न यः । ३ । २ । १५२ ॥

यकारान्ताद्युच् न स्यात् । क्नूयिता । क्ष्मायिता ॥

३१३२–यकारान्तधातुके उत्तर युच् प्रत्यय न हो जैसे–क्नूयिता। क्ष्मायिता॥

३१३३ सूददीपदीक्षश्च। ३।२।१५३॥

युच् न स्यात्। सूदिता। दीपिता। दीक्षिता। नमिकम्पीति रेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति ताच्छीलिकेषु वासरूपविधिर्नास्तीति प्रायिकमिति। तेन कम्रा कमना युवतिः। कम्प्रा कम्पना शाखा। यदि सूदेर्युज् न कथं मधुसूदनः। नन्द्यादिः॥

३१३३–सूद, दीप और दीक्ष इन धातुओंके उत्तर युच् प्रत्यय न हो। जैसे–सूदिता। दीपिता। दीक्षिता। "नमिकम्पि० ३१४७" इस सूत्रके अनुसार "र" प्रत्ययसे युच् प्रत्ययकी बाधा सिद्ध होनेपर भी इस स्थानमें दीपधातुके ग्रहणसे जानना चाहिये कि, ताच्छील्यादि विषयमें वासरूपविधि न हो, यह प्रायिक है। इसप्रकार कम्रा कमना युवतिः। कम्प्रा कम्पना शाखा। इस स्थलमें युच् प्रत्यय और रकार प्रत्यय दोनों ही हुए। यदि सूद धातुके उत्तर युच् प्रत्यय नहीं होता तो, मधुसूदनः यह पद किस प्रकारसे सिद्ध हुआ? इस विषयमें कहतेहैं कि, नन्द्यादिगणमें सूद धातु पठित है अत एव तिसके उत्तर ल्यु प्रत्यय सिद्ध हुआ॥

३१३४ लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। ३। २। १५४॥

लाषुकः। पातुक इत्यादि॥

३१३४–लष, पत, पद, स्था, भू, वृष, हन, कम, गम और शॄ धातु, इन धातुओंके उत्तर उकञ् प्रत्यय हो, जैसे–लाषुकः। पातुकः इत्यादि॥

३१३५ जल्पभिक्षकुट्टलुण्टवृङः षाकन्। ३। २। १५५॥

जल्पाकः। भिक्षाकः। कुट्टाकः। लुण्टाकः। वराकः। वराकी॥

३१३५–जल्प, भिक्ष, कुट्ट, लुण्ट, और वृङ् धातुके उत्तर षाकन् प्रत्यय हो। जैसे–जल्पाकः। भिक्षाकः। कुट्टाकः। लुण्टाकः। वराकः। वराकी। जल्प्+षाकन्=जल्प्+आक=जल्पाक+सु=जल्पाकः इत्यादि॥

३१३६ प्रजोरिनिः। ३। २। १५६॥

प्रजवी। प्रजविनौ। प्रजविनः॥

३१३६–प्रपूर्वक जु धातुके उत्तर इनि प्रत्यय हो। जैसे–प्रजवी। प्रजविनौ। प्रजविनः॥

३१३७ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च। ३। २। १५७॥

जयी। दरी। क्षयी। विश्रयी। अत्ययी। वमी। अव्यथी। अभ्यमी। परिभवी। प्रसवी॥

३१३७–जि, दृ और क्षि धातु विपूर्वक श्री धातु, इण् धातु, वम धातु, नञ्पूर्वक व्यथ धातु, अभिपूर्वक अम धातु, परिपूर्वक भू धातु, प्रपूर्वक सू धातु, इन धातुओंके उत्तर इनि प्रत्यय हो। जैसे–जयी। दरी। क्षयी। विश्रयी। अत्ययी। वमी। अव्यथी। अभ्यमी। परिभवी। प्रसवी। प्र+सू+इन्=प्रसविन्=दीर्घ और नकारका लोप–प्रसवी॥

३१३८ स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्। ३। २। १५८॥

आद्याख्यश्चुरादावदन्ताः। स्पृहयालुः। गृहयालुः। पतयालुः। दयालुः। निद्रालुः। तत्पूर्वो द्रा। तदो नान्तत्वं निपात्यते। तन्द्रालुः॥ शीङो वाच्यः॥ * ॥ शयालुः॥

३१३८–स्पृहि धातु, गृहि धातु, पति धातु, दयि धातु, निपूर्वक द्रा धातु, तत्पूर्वक न्द्रा धातु और श्रत्पूर्वक डुधाञ् धातु इन धातुओंके उत्तर आलुच् प्रत्यय हो। इनमें प्रथम तीन अर्थात् स्पृहि, गृहि और पति धातु चुरादिगणमें आकारान्त पठित हुए हैं। जैसे, स्पृहयालुः। गृहयालुः। पतयालुः। दयालुः। तत्पूर्वक दा धातुके उत्तर निपातनसे तत्के अन्तिम तकारके स्थानमें नकार हो। जैसे–तन्द्रालुः। शीङ् धातुके उत्तर आलुच् प्रत्यय हो। जैसे–शयालुः। शी+"सार्वधातुकार्धधातुकयोः (२१६८)" से गुण शय्+आलुच्=शयालुः॥

३१३९ दाधेट्सिशदसदो रुः ३।२।१५९॥

दारुः। धारुः। सेरुः। शद्रुः। सद्रुः॥

३१३९–दा धातु, धेट् धातु, सि धातु, शद धातु, और सद धातुके उत्तर रु प्रत्यय हो। जैसे–दारुः। धारुः। सेरुः। शद्रुः। सद्रुः। दा+रु=दारु+सु=दारुः॥

३१४० सृघस्यदः क्मरच्। ३।२।१६०॥

सृमरः। घस्मरः। अद्मरः॥

३१४०–सृधातु, घसधातु और अदधातुके उत्तर क्मरच् प्रत्यय हो। जैसे–सृमरः। घस्मरः। अद्मरः॥

३१४१ भञ्जभासमिदो घुरच्। ३। २। १६१॥

भंगुरः। भासुरः। मेदुरः॥

३१४१–भञ्ज धातु, भास धातु और मिद धातुके उत्तर घुरच् प्रत्यय हो। जैसे–भंगुरः। भासुरः। मेदुरः॥

३१४२ विदिभिदिच्छिदेः कुरच्। ३। २। १६२॥

विदुरः। भिदुरम्। छिदुरम्॥

३१४२–विदि धातु, भिदि धातु, और छिदि धातुके उत्तर कुरच् प्रत्यय हो। जैसे–विदुरः। भिदुरम्। छिदुरम्॥

३१४३ इण्नशजिसर्तिभ्यः क्वरप् । ३ । २ । १६३ ॥

इत्वरः । इत्वरी । नश्वरः । जित्वरः । सृत्वरः ॥

३१४३–इण् धातु,नश धातु,जि धातु,और सृ धातुके उत्तर क्वरप् प्रत्यय हो । जैसे–इत्वरः । इत्वरी । नश्वरः । जित्वरः। सृत्वरः ॥

३१४४ गत्वरश्च । ३ । २ । १६४ ॥

गमेरनुनासिकलोपोपि निपात्यते । गत्वरी॥

३१४४–गमधातुके उत्तर भी क्वरप् प्रत्यय हो । और गमधातुका अनुनासिक वर्ण अर्थात् मकारका निपातनसे लोप हो । जैसे–गत्वरी ॥

३१४५ जागुरूकः । ३ । २ । १६५ ॥

जागर्तेरूकः स्यात् । जागरूकः ॥

३१४५–जागृधातुके उत्तर ऊक प्रत्यय हो । जैसे–जागरूकः (जागरणके शीलवाला) ॥

३१४६ यजजपदशां यङः।३।२।१६६॥

एभ्यो यङन्तेभ्य ऊकः स्यात् । दशामिति भाविना नलोपेन निर्देशः । यायजूकः । जञ्जपूकः । दन्दशूकः ॥

३१४६–यङन्त यज धातु, जप धातु, दन्श धातुके उत्तर ऊक् प्रत्यय हो । दशाम् यह पद भावि नकारके लोपके द्वारा निर्देश हुआ है । जैसे–यायजूकः । जञ्जपूकः । दन्दशूकः । दन्श+यङ्+ऊक=दन्दशूक (राक्षस, सर्प) ॥

३१४७ नमिकम्पिस्म्यजसकमहिंसदीपो रः । ३ । २ । १६७ ॥

नम्रः । कम्प्रः । स्मेरः । जसिर्नञ्पूर्वः क्रियासातत्ये वर्तते । अजस्रं सन्ततमित्यर्थः । कम्रः । हिंस्रः । दीप्रः ॥

३१४७–नमधातु, कम्पधातु, स्मिधातु, नञ्पूर्वक जसधातु कमधातु हिन्सधातु और दीपधातु, इन धातुओंके उत्तर र प्रत्यय हो । जैसे–नम्रः । कम्प्रः । स्मेरः । नञ्पूर्वक जसधातु क्रियाके सातत्यार्थ अर्थात् नैरन्तर्य्यार्थमें जैसे–अजस्रं सन्ततम् इत्यर्थः । कम्रः । हिंस्रः । दीप्रः ॥

३१४८ सनाशंसभिक्ष उः ।३।२।१६८॥

चिकीर्षुः । आशंसुः । भिक्षुः ॥

३१४८–सन्प्रत्ययान्त धातु स्तुत्यर्थक आङ्पूर्वक शंसु धातु और भिक्षधातु इन धातुओंके उत्तर उ प्रत्यय हो, जैसे–चिकीर्षुः । आशंसुः । भिक्षुः ॥

३१४९ विन्दुरिच्छुः । ३ । २ ।१६९॥

वेत्तेर्नुम् इषेश्छत्वं च निपात्यते । वेत्ति तच्छीलो विन्दुः । इच्छति इच्छुः ॥

३१४९–विन्दुः और इच्छुः यह दो पद निपातनसे सिद्ध हों । विदधातुको नुम् और इष्धातुके षकारके स्थानमें छकार निपातनसे सिद्ध हुआ है । जैसे–वेत्ति तच्छीलो विन्दुः । इच्छति इति इच्छुः ॥

३१५० क्याच्छन्दसि ।३ । २ ।१७०॥

देवाञ्जिगाति सुम्नयुः ॥

३१५०–इस सूत्रमें क्य शब्दसे क्यच्, क्यप्, क्यङ् इन सम्पूर्ण प्रत्ययोंका सामान्यतः ग्रहण है । व्याख्यानसे कण्ड्वादित्वप्रयुक्त जो यक् प्रत्यय तादृश यगन्तका भी ग्रहण होता है वेदमें क्य प्रत्ययान्त धातुके उत्तर अर्थात् क्यच्, क्यप्, क्यङ् कण्ड्वादि यक् इन सम्पूर्ण प्रत्ययान्त धातुके उत्तर उ प्रत्यय हो । जैसे–"देवान् जिगाति सुम्नयुः" ॥

३१५१ आदृगमहनजनः किकिनौ लिट् च । ३ । २ । १७१ ॥

आदन्तादृदन्ताद्गमादिभ्यश्च किकिनौ स्तश्छन्दसि तौ च लिड्वत् । पपिः सोमम् । ददिर्गाः । बभ्रिर्वज्रम् । जग्मिर्युवा । जघ्निर्वृत्रममित्रियम् । जज्ञिः । भाषायां धाञ्कृसृगमिजनिनमिभ्यः ॥ * ॥ दधिः । चक्रिः । सस्रिः जग्मिः । जज्ञिः । नेमिः ॥ सासहिवावहिचाचलिपापतीनामुपसंख्यानम् ॥ * ॥ यङन्तेभ्यः सहेत्यादिभ्यः किकिनौ पतेर्नीगभावश्च निपात्यते ॥

३१५१–आकारान्त धातु, ऋकारान्त धातु, गम धातु, हन धातु और जन धातु इन धातुओंके उत्तर वैदिक प्रयोगोंमें कि और किन् प्रत्यय हों । यह कि और किन् लिट्के तुल्य हों । जैसे–पपिः सोमम् । ददिर्गाः । बभ्रिर्वज्रम् । जग्मिर्युवा । "जघ्निर्वृत्रममित्रियम्" जज्ञिः ।

भाषामें धाञ् कृ सृ गम जन और नम इन धातुओंके उत्तर कि और किन् प्रत्यय हों* जैसे–दधिः । चक्रिः । सस्रिः। जग्मिः । जज्ञिः । नेमिः । "सासहिवावहिचाचलिपापतीनामुपसंख्यानम्" सासहि, वावहि, चाचलि, पापति, धातुके उत्तर अर्थात् यङन्त सह, वह, चल, और पत् धातुके उत्तर कि और किन् प्रत्यय हों । और पत् धातुके उत्तर नीक्का अभाव निपातनसे हो * ॥

३१५२ स्वपितृषोर्नजिङ् ।३।२।१७२॥

स्वप्नक् । तृष्णक् । तृष्णजौ । तृष्णजः । धृषेश्चेति वाच्यमिति काशिकादौ । धृष्णक् ॥

३१५२–स्वपि और तृष धातुके उत्तर नजिङ् प्रत्यय हो । जैसे–स्वप्नक् । तृष्णक् । तृष्णजौ । तृष्णजः। धृषधातुके उत्तर नजिङ् प्रत्यय हो । इस प्रकार काशिकामें कहा है जिससे धृष्णक् यह रूप सिद्ध हुआ ।

३१५३ शॄवन्द्योरारुः। ३। २ । १७३ ॥

शरारुः । वन्दारुः ॥

३१५३-यृ और अभिवादनस्तुत्यर्थक वदि धातुके उत्तर आरु प्रत्यय हो । जैसे-शरारुः । वन्दारुः ॥

३१५४ भियः क्रुक्लुकनौ ।३।२।१७४॥

भीरुः । भीलुकः ॥ क्रुकन्नपि वाच्यः ॥ * ॥ भीरुकः ॥

३१५४-भीधातुके उत्तर क्रु और क्लुकन् प्रत्यय हो । जैसे-भीरुः । भीलुकः ।

भी धातुके उत्तर क्रुकन् प्रत्ययभी हो*जैसे- भीरुकः ॥

३१५५ स्थेशभासपिसकसो वरच् । ३ । २ । १७५ ॥

स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः ॥

३१५५--स्था, ईश, भास, पिस और कस इन धातुओंके उत्तर वरच् प्रत्यय हो । जैसे-स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः ॥

३१५६ यश्च यङः । ३ । २ । १७६ ॥

यातेर्यङन्ताद्वरच् स्यात् । अतो लोपः । तस्याचः परस्मिन्निति स्थानिवद्भावे प्राप्ते । पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् । तस्य यलोपं प्रति स्थानिवद्भावनिषेधाल्लोपो व्योरिति यलोपः। अल्लोपस्य स्थानिवत्त्वमाश्रित्यातो लोपे प्राप्ते वरे लुप्तं न स्थानिवत् । यायावरः ॥

३१५६-यङन्त या धातुके उत्तर वरच् प्रत्यय हो । "अतो लोपः २३८० " इस सूत्रसे अकारका लोप हुआ । अकारका लोप होनेपर " अचः परस्मिन् ५०" इस सूत्रसे स्थानिवद्भावकी प्राप्ति होनेपर भी पदान्त निमित्त कार्य्य और द्वित्व आदि कर्त्तव्य होनेपर परनिमित्तक अच् स्थानिक आदेश स्थानिवत् नहीं होगा । इस कारण "न पदान्तद्विर्वचन" इस सूत्रसे यलोपके प्रति स्थानिवद्भावनिषेधके कारण "लोपो व्योः-८७३" इस सूत्रसे यकारका लोप हुआ । ऐसेही अकार लोपका स्थानिवत्त्व आश्रय करके "आतो लोप इटि च" इससे आकारका लोप प्राप्त होनेपर वरच् परे रहते लुप्त अकारका स्थानिवत्त्व नहीं होगा । जैसे-यायावरः। या+यङ्+वरच=यायावर (देशसे देशान्तर जानेवाला आश्वमेधिक घोडा वा जरत्कारुमुनि) ॥

३१५७ भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् । ३ ।२ । १७७ ॥

विभ्राट् । भाः । भासौ । धूः । धुरौ। विद्युत्। ऊर्क् । पूः । पुरौ । दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः । जूः। जुवौ। जुवः । ग्रावशब्दस्य धातुना समासः सूत्रे निपात्यते । ततः क्विप् । ग्रावस्तुत्॥

३१५७-भ्राज धातु, भास धातु, हिंसार्थक धुर्वी धातु, विपूर्वक द्युत धातु, ऊर्ज धातु, पॄ धातु, जु धातु, ग्रावपूर्वक स्तु इन धातुओंके उत्तर क्विप् प्रत्यय हो । जैसे-विभ्राट् । भाः । भासौ । धूः । धुरौ । विद्युत् । ऊर्क् । पूः । पुरौः । पुरः । इस स्थलमें दृशि धातुके ग्रहणके अपकर्षके कारण जु धातुके उकारको दीर्घ होगा । जूः । जुवौ । जुवः । ग्राव शब्दके साथ स्तु धातुका जो समास वह निपातन सिद्ध है। पश्चात् उसके उत्तर क्विप् प्रत्यय होकर ग्रावस्तुत् पद सिद्ध हुआ ॥

३१५८अन्येभ्योऽपि दृश्यते।३।२।१७८।

क्विप् । छित् । भिद् । दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम् क्वचिद्दीर्घः क्वचिदसम्प्रसारणं क्वचिद् द्वे क्वचिद्ध्रस्वः । तथा च वार्तिकम् ॥ क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च ॥ * ॥ क्विब्वचीत्यादिना उणादिसूत्रेण केषांचित्सिद्धे तच्छीलादौ तृना बाधा मा भूदिति वार्तिके ग्रहणम् । वक्तीति वाक् । पृच्छतीति प्राट् । आयतं स्तौति आयतस्तूः । कटं प्रवते कटप्रूः । जुरुक्तः । श्रयति हरिं श्रीः ॥ द्युतिगमिजुहोतीनां द्वे च ॥ * ॥ दृशिग्रहणादभ्याससंज्ञा । दिद्युत् । जगत् ॥ जुहोतेर्दीर्घश्च ॥ ॥ * ॥ जुहूः । दॄ भये । अस्य ह्रस्वश्च । दीर्यति ददृत् ॥ ध्यायतेः सम्प्रसारणं च॥* ॥ धीः॥

३१५८-अन्य धातुके उत्तर भी क्विप् प्रत्यय हो । जैसे-छिद्+क्विप्+छित् । भिद्+क्विप्+भिद् । इस स्थलमें अन्य विधि ग्रहणके निमित्त दृशि धातुका ग्रहण हुआ है। कहीं २ धातुके स्वरको दीर्घ होगा । कहीं २ सम्प्रसारण होगा, और कहीं द्वित्व होगा और कहीं ह्रस्व होगा । इस विषयमें वार्त्तिक है । जैसे-

क्विप् प्रत्यय, और वच् धातु,प्रच्छ धातु,आयत शब्दपूर्वक स्तु धातु,कट शब्दपूर्वक प्रु धातु,जु धातु,श्री धातु,इन सम्पूर्ण धातुओंके स्वरको दीर्घ और सम्प्रसारण होगा । * "क्विब्वचि" इत्यादि उणादि सूत्रसे दीर्घ और सम्प्रसारणकी बाधा होनेपर भी इसका जब वार्त्तिकमें ग्रहण हुआ है, तो तच्छीलादि अर्थमें तृन् प्रत्ययके द्वारा बाधा नहीं होगी ऐसा समझना चाहिये, जैसे-वक्ति इस विग्रहमें वाक् । पृच्छति इस विग्रहमें प्राट् । आयतं स्तौति इति आयतस्तूः । कटं प्रवते इति कटप्रूः । जु धातुके रूप पूर्वमें कह आये हैं । श्रयति हरिम् इति श्रीः ।

" द्युतिगमिजुहोतीनां द्वे च " * इस वार्त्तिकसे द्युत धातु, गम धातु, हु धातु, इन सम्पूर्ण धातुओंको द्वित्व भी हो * । दृशि ग्रहणके कारण इसकी अभ्यस्त संज्ञा हुई विद्युत् । जगत् ।

हु धातुको दीर्घ भी हो * । जैसे-जुहूः । दॄ धातु भयमें । इसको ह्रस्व भी हुआ । जैसे-दीर्यति इति ददृत् ॥

ध्यै धातुको सम्प्रसारण हो । * जैसे-धीः ॥

३१५९ भुवः संज्ञान्तरयोः।३।२।१७९॥

मित्रभूर्नाम कश्चित् । धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः ॥

३१५९-संज्ञा और अन्तर यह दो अर्थ होनेपर भू धातुके उत्तर क्विप् प्रत्यय हो । जैसे-मित्रभूः । मित्रभूशब्दसे किसी व्यक्तिका नाम समझना । ऋणदाता (कर्ज देनेवाला) और प्रतिग्रहीता (कर्ज लेनेवाला) इन दोनोंके मध्यमें विश्वासार्थ जो जामिन हो तिसको प्रतिभूः कहतेहैं ॥

३१६०विप्रसंभ्यो ड्वसंज्ञायाम् ३।२।१८०

एभ्यो भुवो डुः स्यान्न तु संज्ञायाम् । विभुर्व्यापकः । प्रभुः स्वामी । संभुर्जनिता । संज्ञायां तु विभूर्नाम कश्चित् ॥ मितद्र्वादिभ्य उपसंख्यानम् ॥ * ॥ मितं द्रवतीति मितद्रुः । शतद्रुः।शम्भुः। अन्तर्भावितण्यर्थोऽत्र भवतिः ॥

३१६०-विपूर्वक, प्रपूर्वक और संपूर्वक जो भू धातु तिसके उत्तर डु प्रत्यय हो । असंज्ञायाम् इस कथनसे संज्ञा होनेपर नहीं होगा । जैसे-विभुः व्यापकः । प्रभुः स्वामी । सम्भुः जनिता । संज्ञा होनेपर जैसे-विभूः अर्थात् इस नामकी कोई व्यक्ति ।

मित् पूर्वक द्रु धातुके उत्तर डु प्रत्यय हो * जैसे-मितं द्रवति इस विग्रहमें मितद्रुः । शतद्रुः । शम्भुः । शम्+ भू+डु=शम्भुः (शंकर महादेव) इस स्थलमें भू धातुमें णिजर्थ अन्तर्हित है ऐसा जानना चाहिये ॥

३१६१ धः कर्मणि ष्ट्रन् ।३।२।१८१।

धेटो धाञश्च कर्मण्यर्थे ष्ट्रन् स्यात् । धात्री जनन्यामलकी वसुमत्युपमातृषु ॥

३१६१-धेट् धातु और धाञ् धातुके उत्तर कर्म अर्थ होनेपर ष्ट्रन् प्रत्यय हो । जैसे-धात्री । धात्री शब्दसे जननी, आमलकी, वसुमती और उपमाता समझना ॥

३१६२दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ।३। २ ।१८२॥

दाबादेः ष्ट्रन् स्यात्करणेऽर्थे । दान्त्यनेन दात्रम् । नेत्रम् ॥

३१६२-दाप् धातु, नी, शस, यु, युज, स्तु, तुद, सि, सिच, मिह, पत, दश और नह इन सम्पूर्ण धातुओंके उत्तर ष्ट्रन् प्रत्यय हो, करणार्थ होनेपर जैसे-दान्त्यनेन इस विग्रहमें दात्रम् । नेत्रम् ॥

३१६३ तितुत्रतथसिसुसरकसेषु च। ३ । २ । ९ ॥

एषां दशानां कृत्प्रत्ययानामिण्न स्यात् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री॥

३१६३-ति, तुन, त्रन्, त, थन्, सि, सु, सर, क, स इन दश कृत् प्रत्ययोंके पूर्वमें इट् न हो । जैसे-शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री ॥

३१६४ हलसूकरयोः पुवः ।३।२।१८३॥

पूङ्पूञोः करणे ष्ट्रन् स्यात् । तच्चेत्करणं हलसूकरयोरवयवः । हलस्य सूकरस्य वा पोत्रम् । मुखमित्यर्थः ॥

३१६४-पूङ् धातु और पूञ् धातुके उत्तर करणार्थ होनेपर ष्ट्रन् प्रत्यय हो । यह करण यदि हल और सूकरका अवयव हो तो । जैसे-हलस्य सूकरस्य वा पोत्रम् । मुखमित्यर्थः ॥

३१६५ अर्तिलूधूसूखनसहचर इत्रः । ३ । २ । १८४ ॥

अरित्रम् । लवित्रम् । धुवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् ॥

३१६५-ऋ धातु, लू धातु, धू धातु, सू धातु, खन धातु, सह धातु, और चर धातुके उत्तर इत्र प्रत्यय हो जैसे-अरित्रम्।लवित्रम्। धुवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् । चर्+ इत्र+अम्=चरित्रम् (वृत्तान्त) ॥

३१६६ पुवः संज्ञायाम् । ३ ।२।१८५॥

पवित्रम् । येनाज्यमुत्पूयते यच्चानामिकावेष्टनम् ॥

३१६६-पूञ्धातुके उत्तर संज्ञा अर्थमें इत्र प्रत्यय हो । जैसे-पवित्रम् । येनाज्यमुत्पूयते यच्चानामिकावेष्टनम् । जिसके द्वारा घी पवित्र कियाजाता है, जो कुशाकी बनाकर अनामिकाअंगुलीमें पहरीजातीहै ॥

३१६७कर्तरि चर्षिदेवतयोः।३।२।१८६॥

पुव इत्रः स्यात् ऋषौ करणे देवतायां कर्तरि। ऋषिर्वेदमन्त्रः । तदुक्तमृषिणेति दर्शनात् । पूयतेऽनेनेति पवित्रम् । देवतायां त्वग्निः पवित्रं स मा पुनातु ॥ * ॥

॥ इति पूर्वकृदन्तं समाप्तम् ॥

३१६७-ऋषिकरण और देवता कर्त्ता ऐसा अर्थ वाच्य होनेपर पूञ्धातुके उत्तर इत्र प्रत्यय हो।ऋषिर्वेदमंत्रः । अर्थात् वेदमंत्र ऋषियोंद्वारा कहेगये हैं ऐसा देखा जाता है । जैसे-पूयतेऽनेन इस विग्रहमें पवित्रम् । देवता कर्त्ता होनेपर जैसे-अग्निः पवित्रं स मा पुनातु ॥

॥ इति पूर्वकृदन्तप्रकरणम् ॥

अथोणादयः ।

(उणादयो बहुलम्) ऐसा सूत्र पीछे सूत्रकार पाणिनि मुनिने कहा है, उस स्थलमें प्रकृतिविशेषसे प्रत्ययविशेष शाकटायनके कियेहुए पञ्चपादक्रमसे तीनसौ एक सूत्र दर्शित हुए हैं। उसी प्रकरणके आरम्भ निमित्त प्रतिज्ञा करते हैं कि अब उणादि सूत्र कहेंगे ॥

१ 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' ॥ ॥ करोतीति कारुः शिल्पी कारकश्च ॥ 'आतो युक्' । वातीति वायुः । पायुर्गुदम् । जयत्यभिभवति रोगान् जायुरौषधम् । मिनोति प्रक्षिपति देहे ऊष्माणमिति मायुः पित्तम् । स्वादुः । साध्नोति परकार्यं साधुः । अश्नुते आशु शीघ्रम्। 'आशुर्व्रीहिः पाटलः स्यात्' ॥

१–अब उणादि प्रत्यय कहेजाते हैं। कृ, वा, पा, जि, मि, स्वदि, साधि और अशू धातुके उत्तर उण् प्रत्यय हो। करोति इस विग्रहमें कृ+उण्=कारुः । कारुशब्दसे शिल्पी और कारक समझना। "आतो युक् २७६१" इस सूत्रसे आकारान्त धातुके उत्तर युक्का आगम हो। वाति इस विग्रहमें वा+उण्=वायुः । पा+उण्=पायुः । अर्थात् गुह्यदेश । जयति अभिभवति रोगान् इस विग्रहमें जि+उण्=जायुः । अर्थात् औषधविशेष । मिनोति प्रक्षिपति देहे ऊष्माणम् इस विग्रहमें मि+उण्=मायुः । अर्थात् पित्त । स्वद+उण्=स्वादुः । साध्नोति परकार्यम् इस विग्रहमें साध+उण्=साधुः । अश्नुते इस विग्रहमें अश+उण्=आशु शीघ्रम् । "आशुर्व्रीहिः पाटलः स्यात्" ॥

२ 'छन्दसीणः' ॥ ॥ मान आयौ ॥

२–वेदमें इण् धातुके उत्तर उण् प्रत्यय हो। जैसे–एति इस विग्रहमें इण्+उण्=आयुः । अर्थात् जीवितकाल आयु कहाताहै । "मान आयौ" ॥

३ 'दृसनिजनिचरिचटिभ्यो ञुण्' ॥ ॥ दीर्यत इति दारु । 'स्नुः प्रस्थः सानुरस्त्रियाम्' । जानु । जानुनी । इह 'जनिवध्योश्च' इति न निषेधः, अनुबन्धद्वयसामर्थ्यात् । चारु रम्यम् । मृगय्वादित्वात्कुप्रत्यये चटु प्रियं वाक्यम् । चाटु इत्यपि ॥

३–दृ विदारणे, षणु दाने, जन जनने, चर गतौ, चट भेदने, इन सम्पूर्ण धातुओंके उत्तर ञुण् प्रत्यय हो । दीर्यते इस विग्रहमें दृ ञुण्–दारु । षण्+ञुण्+सानुः । अमरकोषमें लिखाहै । "स्नुः प्रस्थः सानुरस्त्रियाम्" जन+ञुण्=जानु । जानुनी । इस स्थलमें अनुबंध द्वयकी सामर्थ्यके कारण "जनिवध्योश्च २५१२" इस सूत्रसे वृद्धिका निषेध नहीं हुआ । चर+ञुण्=चारु रम्यम् । चट्+ञुण्=चाटु अर्थात् प्रियवाक्य । मृगय्वादित्वके कारण कु प्रत्यय करनेपर चटु ऐसा पद भी हो ॥

४ 'किञ्जरयोः श्रिणः' ॥ ॥ किं शृणोतीति किंशारुः । सस्यशूकं बाणश्च । जरामेति जरायुर्गर्भाशयः । 'गर्भाशयो जरायुः स्यात्' ॥

४–शॄ हिंसायाम्, इण् गतौ । किंशब्दपूर्वक शॄ धातु और जराशब्दपूर्वक इण् धातुके उत्तर ञुण् प्रत्यय हो । जैसे–किं शृणोति इस विग्रहमें किं+शॄ+ञुण्=किंशारुः । अर्थात् शस्यशूक और बाण समझना । जरामेति जरा+इण्+ञुण्=जरायुः। "गर्भाशयको जरायु कहतेहैं" ॥

५ 'त्रोरश्च लः' ॥ ॥ तरन्त्यनेन वर्णा इति तालु ॥

५–तॄ प्लवनतरणयोः। इस धातुके उत्तर ञुण् प्रत्यय हो और रकारके स्थानमें लकार हुआ । जैसे–तरन्ति अनेन वर्णाः इस विग्रहमें तॄ+ञुण्=तालु ॥

६ 'कृके वचः कश्च' ॥ ॥ कृकेण गलेन वक्तीति कृकवाकुः । 'कृकवाकुर्मयूरे च सरटे चरणायुधे' इति विश्वः ॥

६–वच परिभाषणे । कृकशब्द उपपद होनेपर वच धातुके उत्तर ञुण् प्रत्यय हो और ककार अन्तादेश हो । जैसे–कृकेण गलेन वक्ति इति इस विग्रहमें कृक+वच+ञुण्=क=कृकवाकुः कृकवाकु शब्दसे मोर सरट और चरणायुध समझना । इति विश्वः ॥

७ 'भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः' ॥ ॥ भरति बिभर्ति वा भरुः स्वामी हरश्च । म्रियन्तेऽस्मिन् भूतानि मरुर्निर्जलदेशः । शेते शयुरजगरः । तरुर्वृक्षः । चरन्ति भक्षयन्ति देवता इममिति चरुः । त्सरुः खड्गादिमुष्टिः । तनुः स्वल्पम् । 'स्त्रियां मूर्तिस्तनुस्तनूः' । धनुः शस्त्रविशेषः । 'धनुषा च धनुं विदुः'।'धनुरिवाजनिवक्रः' इति श्रीहर्षः। मयुः किन्नरः । 'मद्गुः पानीयकाकिका' इति रभसः। न्यङ्क्वादित्वात्कुत्वम्।जश्त्वेन सस्य दः॥

७–भृञ् भरणे, डुभृञ् धारणपोषणयोः, मृङ् प्राणत्यागे, शीङ् स्वप्ने, तॄ प्लवनतरणयोः, चर गतौ, त्सर छद्मगतौ, तनु विस्तारे, धन धान्ये, डुमिञ् प्रक्षेपणे, टुमस्जो शुद्धौ, इन सब धातुओंके उत्तर उ प्रत्यय हो जैसे–भरति, बिभर्ति वा इस विग्रहमें भृ+उ+भरुः । अर्थात् स्वामी और हर । म्रियन्तेऽस्मिन् भूतानि इस विग्रहमें मृ+उ=मरुः अर्थात् निर्जल मरुभूमि । शेते इस विग्रहमें शी+उ=शयुः अर्थात् अजगर । तॄ+उ=तरुः अर्थात् वृक्ष । चरन्ति भक्षयन्ति देवता इमम् चर+उ=चरुः । त्सर+उ=त्सरुः । अर्थात् इस विग्रहमें खड्गमुष्टि । तन+उ=तनुः अर्थात् शरीर । "स्त्रियां मूर्तिस्तनुस्तनूः" । धन्+उ=धनुः अर्थात् शस्त्रविशेष । "धनुषा च धनुर्विदुः" "धनुरिवाजनि वक्रः" इति श्रीहर्षः । मयुः अर्थात् किन्नर । मस्ज+उ=मद्गुः । अर्थात् पक्षिविशेष (पानकौडी नामसे प्रसिद्ध है) यह रभसने कहा है । न्यङ्क्वादि-

त्वके कारण कुत्व पश्चात् जश्त्वके कारण सकारके स्थानमें दकार हुआ ॥

८ 'अणश्च' ॥ ॥ 'लवलेशकणाणवः' । चात्कटिवटिभ्याम् । कटति रसनां कटुः । वटति वदतीति वटुः ॥

८–अण् शब्दार्थे । इस धातुके उत्तर उ प्रत्यय हुआ । जैसे–अण्+उ=अणुः । अर्थात् सूक्ष्म । "लवलेशकणाणवः" चकारसे कटि और वटि धातुके उत्तर उ प्रत्यय हुआ । जैसे–कटुः अर्थात् रसविशेष । वटति वदति इस विग्रहमें वटुः ॥

९ 'धान्ये नित्'॥ ॥धान्ये वाच्येऽण उप्रत्ययः स्यात् । स च नित् । नित्वादाद्युदात्तः । प्रियङ्गवश्चमेऽणवश्चमे । 'व्रीहिभेदस्त्वणुः पुमान्' । नित्ग्रहणं फलिपाटीत्यादिसूत्रमभिव्याप्य सम्बध्यते ॥

९–धान्य होनेपर अण धातुके उत्तर उ प्रत्यय हो और उकार नित् हो । अर्थात् नकार इत् हो । नकारकी इत्संज्ञा होनेके कारण आदिम वर्ण उदात्त हुआ । जैसे–अणुः व्रीहिभेद । "प्रियङ्गवश्चमेऽणवश्चमे" । "व्रीहिभेदस्त्वणुः पुमान्" यहांका नित् ग्रहण "फलिपाटी" इत्यादि सूत्रपर्य्यन्त संवद्ध होगा ॥

१० 'शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' ॥ ॥ शृणातीति शरुः । 'शरुरायुधकोपयोः' । स्वरुर्वज्रम् । स्नेहुर्व्याधिः । चन्द्र इत्यन्ये । त्रपु सीसम् । 'पुंसि भूम्न्यसवः प्राणाः' 'वसुर्हृदेऽग्नौ योक्त्रेंशौ वसु तोये धने मणौ' । हनुर्वक्त्रैकदेशः । क्लेदुश्चन्द्रः । बन्धुः । मनुः ॥ चात् बिदि अवयवे । बिन्दुः ॥

१०–शॄ, स्वृ, स्निहि, त्रपि, असि, वसि, हनि, क्लिदि बंधि और मनि धातुके उत्तर उ प्रत्यय हो । जैसे–शृणोति इस विग्रहमें शॄ+उ=शरुः यह आयुध और कोप अर्थमें है। स्वृ+उ=स्वरुः अर्थात् वज्र । स्निह+उ=स्नेहुः अर्थात् व्याधि। अन्यमतमें चन्द्र भी समझना । त्रप+उ=त्रपु अर्थात् सीसक । असि=उ=असुः अर्थात् प्राण । असु शब्द पुंलिङ्ग बहुवचनान्त है । वस+उ=वसुः। वसुशब्दसे हृद, अग्नि, योक्त्र, अंशु, तोय, धन और मणि समझना । हन्+उ=हनुः । हनुशब्दसे मुखका एक अंश ठोडी समझना । क्लिद+उ=क्लेदुः । अर्थात् चन्द्र । बंध+उ=बन्धुः । मन+उ=मनुः । सूत्रमें चकार होनेसे अवयवार्थक बिद धातुके उत्तर भी उ प्रत्यय होगा । जैसे–बिद+उ=बिन्दुः ॥

११ 'स्यन्देः सम्प्रसारणं धश्च' ॥ ॥ 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः ॥

११–स्यन्द धातुके उत्तर उ प्रत्यय हो और यकारको सम्प्रसारण हो और दकारके स्थानमें धकार हो । जैसे–स्यन्द+ उ=सिन्धुः । सिन्धुशब्दसे देश, नद विशेष और समुद्र समझना । "सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः ॥

१२ 'उन्देरिच्चादेः' ॥ ॥ उनत्ति इन्दुः ॥

१२–उन्द धातुके उत्तर उ प्रत्यय हो, और धातुकी आदिके उकारके स्थानमें इकार हो जैसे–उनत्ति इस विग्रहमें उन्द+उ=इन्दुः ॥

१३ 'ईषेः किच्च' ॥ ॥ ईषेरुः स्यात्सच कित् आदेरिकारादेशश्च । ईषते हिनस्ति इषुः शरः । 'ईषुर्द्वयोः' ॥

१३–ईष धातुके उत्तर उ प्रत्यय हो । वह उकार कित्संज्ञक हो और धातुके ईकारके स्थानमें इकार हो । जैसे–ईषते हिनस्ति ईष+उ=इषुः । अर्थात् बाण । इषु शब्द पुंलिङ्ग और स्त्रीलिङ्ग है ॥

१४ 'स्कन्देः सलोपश्च' ॥ ॥ कन्दुः ॥

१४–स्कन्द धातुके उत्तर उ प्रत्यय हो और सकारका लोप हो । जैसे–कन्दुः ॥

१५ 'सृजेरसुम्च' ॥ ॥ चात्सलोप उप्रत्ययश्च । रज्जुः ॥

१५–सृज धातुके उत्तर उ प्रत्यय हो और धातुको असुम्का आगम हो । और चकारसे सकारका लोप और उ प्रत्यय हो । जैसे–रज्जुः ॥

१६ 'कृतेराद्यन्तविपर्ययश्च' ॥ ॥ ककारतकारयोर्विनिमयः । तर्कुः सूत्रवेष्टनम् ॥

१६–कृत धातुके उत्तर उ प्रत्यय और आदि और अन्त वर्णका विपर्य्यय अर्थात् ककार और तकारका विनिमय हो । जैसे–तर्कुः अर्थात् सूत्रवेष्टन (तकुआ) ॥

१७ 'नावञ्चेः'॥ ॥ न्यङ्क्वादित्वात्कुत्वम् । नियतमञ्चति न्यङ्कुर्मृगः ॥

१७–निपूर्वक अञ्चूधातुके उत्तर उ प्रत्यय हो और न्यङ्क्वादिसूत्रके अनुसार चकारके स्थानमें ककार हो । नियतमञ्चति न्यङ्कुः । अर्थात् मृगविशेष ॥

१८ 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' ॥ ॥ फलेर्गुक् । फल्गुः । पाटेः पटिः । पाटयतीति पटुः । नम्यतेऽनेन नाकुर्वल्मीकम् । मन्यते इति मधु । जायते इति जतु ॥

१८–फलि, पाटि, नमि, मनि और जनि धातुके उत्तर उ प्रत्यय हो, और यथाक्रमसे फलके अवयव लकारको गुक्का आगम हो और पाटि आदिकोंके पटि, नाकि, ध और त अन्तमें आदेश हों । जो अनेकाल् आदेश हैं वे सम्पूर्णको होंगे । और अन्य अन्तमें होंगे । फल+गुक्+उ=फल्गुः । पाटयति इस विग्रहमें पटुः । नम्यतेऽनेन इस विग्रहमें नाकुः अर्थात् वल्मीक । मन्यते इस विग्रहमें मधु । जायते इस विग्रहमें जतु ॥

१९ 'वलेर्गुक् च' ॥ ॥ वल संवरणे वल्गुः ॥

१९–वल् धातुके उत्तर उ प्रत्यय हो और वल्धातुके

लकारको गुक्का आगम हो। जैसे-संवरणार्थक वल्+उ=वल्गुः ॥

२० 'शः कित्सन्वच्च' ॥ ॥ श्यतेरुः स्यात्स च कित्सन्वच्च। शिशुर्बालः ॥

२०-शो धातुके उत्तर उ प्रत्यय हो और यह उ कित्संज्ञक हो। और तिसको सन्वत् कार्य्य हो। जैसे-शिशुः (बालक)।

२१ 'यो द्वे च' ॥ ॥ 'ययुरश्वोश्वमेधीयः'। सन्वदिति प्रकृते द्वेग्रहणमित्वनिवृत्त्यर्थम् ॥

२१-या धातुके उत्तर उ प्रत्यय हो और उसको द्वित्व हो। जैसे-ययुः ययुशब्दसे अश्वमेधका अश्व समझना। "शः कित्सन्वच्च" इस सूत्रसे सन्वत्की अनुवृत्ति होजाती तिससे द्वित्व होजाता, तो पुनः द्वित्व ग्रहण इत्व निवृत्तिके निमित्त है ॥

२२ 'कुर्भ्रश्च' ॥ ॥ 'बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ'। चादन्यतोपि। चक्रुः कर्ता। जघ्नुर्हन्ता। पपुः पालकः ॥

२२-भृ धातुके उत्तर कु प्रत्यय हो और धातुको द्वित्व हो। "बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ"। चकारसे अन्यधातुके उत्तर भी कु प्रत्यय हो। जैसे-चक्रुः कर्ता। जघ्नुर्हन्ता। पपुः पालकः ॥

२३ 'पॄभिदिव्यधिगृधिधृषिभ्यः' ॥ ॥ कुः स्यात्। पुरुः। भिनत्ति भिदुर्वज्रम्। ग्रहिज्येतिसम्प्रसारणम्। विरहिणं विध्यति विधुः। 'विधुः शशांके कर्पूरे हृषीकेशे च राक्षसे'। गृधुः कामः। धृषुर्दक्षः ॥

२३-पॄ, भिदि, व्यधि, गृधि, धृषि, इन धातुओंके उत्तर कु प्रत्यय हो। पुरुः। भिनत्ति भिदुर्वज्रम्। "ग्रहिज्येति २४१२" इस सूत्रसे सम्प्रसारण होगा। विरहिणं विध्यति विधुः। "विधुः शशांके कर्पूरे हृषीकेशे च राक्षसे" इस कोषसे विधुशब्द शशांक (चन्द्र), कर्पूर, हृषीकेश, राक्षस इन अर्थोंका वाचक है। गृधुः कामः। धृषुः दक्षः ॥

२४ 'कृग्रोरुच्च' ॥ ॥ करोतीति कुरुः। गृणाति गुरुः ॥

२४-कृ और गृ धातुके उत्तर कु प्रत्यय हो। और ऋकारके स्थानमें उकार हो। जैसे-कुरुः। गृणाति इति गुरुः ॥

२५ 'अपदुःसुषु स्थः' ॥ ॥ सुषामादिषु चेति षत्वम्। अपष्ठु प्रतिकूलम्। दुष्ठु। सुष्ठु ॥

२५-अपपूर्वक, दुर्पूर्वक, और सु पूर्वक स्था धातुके उत्तर कु प्रत्यय हो। तत्पश्चात् "सुषामादिषु च १०२२" इस सूत्रसे धातुके सकारको षत्व हो। जैसे-अपष्ठु, अर्थात् प्रतिकूल। दुष्ठु, सुष्ठु ॥

२६ 'रपेरिच्चोपधायाः' ॥ ॥ अनिष्टं रपतीति रिपुः ॥

२६-रप धातुकी उपधाके स्थानमें इकार हो। जैसे-अनिष्टं रपति इस विग्रहमें रिपुः ॥

२७ 'अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च' ॥ ॥ अर्जयति गुणान् ऋजुः। सर्वानविशेषेण पश्यतीति पशुः। कन्तुः। अन्धुः कूपः। 'पांशुर्ना न द्वयो रजः'। 'तालव्या अपि दन्त्याश्च सम्बसूकरपांसवः'। बाधते इति बाहुः। 'बाहुः स्त्रीपुंसयोर्भुजः ॥'

२७-अर्जि, दृशि, कमि, अमि, पशि, और बाध धातुके स्थानमें कु प्रत्यय परे रहते यथाक्रमसे ऋज, पश, तुक्, धुक्, दीर्घ और हकार आदेश हों। जैसे-अर्जयति गुणान् ऋजुः। सर्वान्-अविशेषेण पश्यतीति पशुः। कन्तुः। अन्धुः कूपः। "पांशुर्ना न द्वयो रजः" सम्ब सूकर और पांसु शब्द तालव्य शकारवाले तथा दन्त्य सकारवाले भी हैं। यहांपर दीर्घ भी हुआ है। बाधते इति बाहुः यहांपर धकारको हकार हुआ। "बाहुः स्त्रीपुंसयोर्भुजः" ।

२८ 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' ॥ ॥ त्रयाणां कुः सम्प्रसारणं भ्रस्जेः सलोपश्च। पृथुः। मृदुः। न्यङ्क्वादित्वात्कुत्वम्। भृज्जति तपसा भृगुः ॥

२८-प्रथि, म्रदि, और भ्रस्ज इन तीन धातुओंके उत्तर कु प्रत्यय सम्प्रसारण और भ्रस्ज धातुके सकारका लोप हो। जैसे-पृथुः। मृदुः। पश्चात् कुत्व हो। भृज्जति भृगुः। भृगु मुनि ॥

२९ 'लङ्घिबंह्योर्नलोपश्च' ॥ ॥ लघुः ॥ बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते ॥ * ॥ रघुर्नृपभेदः। बहुः ॥

२९-लंघ और बंह इन इन दो धातुओंके नकारका लोप और कु प्रत्यय हो। यथा, लघुः। बाल, मूल, लघु, अलम् और अंगुलि शब्दके लकारके स्थानमें विकल्प करके रकार हो। यथा, रघुः नृपभेदः। एक राजाका नाम। बहुः। बहुत।

३० 'ऊर्णोतेर्नुलोपश्च' ॥ ॥ ऊरु सक्थि ॥

३०-कु प्रत्यय परे रहते ऊर्णु धातुके णु भागका लोप हो। यथा, ऊरु अर्थात् सक्थि।

३१ 'महति ह्रस्वश्च' ॥ ॥ उरु महत् ॥

३१-महत् अर्थ होनेपर उकारको ह्रस्व हो। यथा, उरु अर्थात् महत् ॥

३२ 'श्लिषेः कश्च' ॥ ॥ श्लिष्यतीति श्लिकुर्भृत्यः। उद्यतो ज्योतिश्च ॥

३२-श्लिष धातुके उत्तर कु प्रत्यय हो षकारके स्थानमें ककार हो। यथा, श्लिष्यति इस विग्रहमें श्लिकुः अर्थात् भृत्य अथवा उद्यत ज्योति ॥

३३ 'आङ्परयोः खनिशॄभ्यां डिच्च' ॥ ॥

आखनतीत्याखुः । परं शृणातीति परशुः । पृषोदरादित्वादकारलोपात्पर्शुरपि ॥

३३-आङ्पूर्वक खन और परपूर्वक शॄ धातुके उत्तर कु प्रत्यय हो, और कु ङित्संज्ञक हो, यथा-आखनति इस विग्रहमें आखुः । परं शृणाति इति परशुः । पृषोदरादित्वके कारण पर शब्दके आकारका लोप होकर पर्शु पद भी हुआ ॥

३४ 'हरिमितयोर्द्रुवः' ॥ ॥ द्रु गतौ-अस्मात् हरिमितयोरुपपदयोः कुः स च डित् । हरिभिर्द्रूयते हरिद्रुर्वृक्षः । मितं द्रवति मितद्रुः समुद्रः ॥

३४-हरि और मित शब्द उपपद रहते द्रु धातुके परे कु प्रत्यय हो । यह प्रत्यय डित्संज्ञक हो । यथा, हरिभिर्द्रूयते हरिद्रुः अर्थात् वृक्षविशेष । मितं द्रवति मितद्रुः समुद्रः ॥

३५ 'शते च' ॥ ॥शतधा द्रवति शतद्रुः । बाहुलकात्केवलादपि । द्रवतीत्यूर्ध्वमिति द्रुर्वृक्षः शाखा च । तद्वान् द्रुमः ॥

३५-शत शब्दपूर्वक द्रु धातुके उत्तर कु प्रत्यय हो । यथा, शतधा द्रवति शतद्रुः । बाहुलक बलसे केवल द्रु धातुके उत्तर भी कु प्रत्यय हो । यथा, द्रवति ऊर्ध्वम् इति द्रुः वृक्ष और शाखा । तद्वान् द्रुमः ॥

३६ 'खरु-शंकु-पीयु-नीलंगु-लिगु' ॥ ॥ एतेऽमी कुप्रत्ययान्ता निपात्यन्ते ॥ खनतेरकारश्चान्तादेशः।खरुः कामः। क्रूरो मूर्खः अश्वश्च।'शंकुर्ना कीलशल्ययोः' पिबतेरीत्वं युगागमश्च पीयुर्वायसः कालः सुवर्णं च । निपूर्वाल्लगिगतावस्मात्कुनेर्दीर्घश्च नीलङ्गुः क्रिमिविशेषः शृगालश्च । नीलाङ्गुरिति पाठान्तरम् । तत्र धातोरपि दीर्घः । लगे सङ्गे अस्य अत इत्वं च । लगतीति लिगु चित्तम् । लिगुर्मूर्खः ॥

३६-खरु, शंकु, पीयु, नीलंगु और लिगु यह पांच शब्द कुप्रत्ययान्त निपातनसे सिद्ध हों । खन धातुके रकार अन्तादेश हो । यथा, खरुः अर्थात् कामः क्रूरो मूर्खः अश्वः । शंकु शब्द पुंलिङ्ग है वह कील और शल्यवाचक है पा धातुको ईत्व और युक् आगम हो । यथा, पीयुः अर्थात् वायस, काल और सुवर्ण । निपूर्वक गत्यर्थक लग धातुके उत्तर कु प्रत्यय हो और निरके इकारको दीर्घ हो । नीलंगु, अर्थात् कृमिविशेष और शृगाल । नीलांगुः ऐसा पाठान्तर भी है। उस स्थलमें निपातनसे धातुको भी दीर्घ हुआहै । लग धातु संगमें है । इस धातुके अकारके स्थानमें इकार हुआ । लगति इति लिगु अर्थात् चित्त और मूर्ख ॥

३७ 'मृगय्वादयश्च' ॥ ॥ एते कुप्रत्ययान्ता निपात्यंते । मृगं यातीति मृगयुर्व्याधः । देवयुर्धार्मिकः । मित्रयुर्लोकयात्राभिज्ञः । आकृतिगणोयम् ॥

३७-मृगयु आदि पद कुप्रत्ययान्त निपातनसे सिद्ध हों । मृगं याति इस विग्रहमें मृगयुः अर्थात् व्याधः । देवयुः अर्थात् धार्मिकः । मित्रयुः अर्थात् देवयात्राभिज्ञः । यह सब आकृति गणीय हैं ॥

३८'मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्' ॥ मन्दुरा वाजिशाला । वाशुरा रात्रिः । मथुरा । चतुरः । चङ्कुरो रथः । अङ्कुरः खर्जूरादित्वादङ्कूरोपि ॥

३८-मन्दि, वाशि, मथि, चति, चङ्कि, और अङ्कि धातुके उत्तर उरच् प्रत्यय हो । यथा, मन्दुरा वाजिशाला । वाशुरा रात्रिः । मथुरा । चतुरः । चंकुरो रथः । अंकुरः खर्जूरादित्वके कारण अंकूर शब्द भी सिद्ध हो ॥

३९ 'व्यथेः सम्प्रसारणं किच्च' ॥ ॥ 'विथुरश्चोररक्षसोः' ॥

३९-व्यथ धातुके उत्तर उरच् प्रत्यय हो व्यथ धातुको सम्प्रसारण हो और यह उरच् प्रत्यय कित्संज्ञक हो । यथा, विथुरः अर्थात् चोर और राक्षस ॥

४० 'मुकुरदर्दुरौ' ॥ ॥मुकुरो दर्पणः । बाहुलकान्मकुरोपि । दॄ विदारणे धातोर्द्विर्वचनमभ्यासस्य रुक् टिलोपश्च । 'दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः' । 'दर्दुरा चण्डिकायां स्याद्ग्रामजाले च दर्दुरम्' इति विश्वः ॥

४०-मुकुरः और दर्दुरः यह दो उरच् प्रत्ययान्त पद निपातनसे सिद्ध हों यथा, मुकुरो दर्पणः । बाहुलक बलसे मकुरः पद भी सिद्ध होताहै । दॄ धातु विदारणमें है । उरच् प्रत्यय परे रहते उसको द्वित्व हो और अभ्यासके रुक्का आगम और पश्चात् टिका लोप हो । यथा, दर्दुरः । दर्दुर शब्दसे मेघ, भेक, वाद्य भांड और अद्रिविशेष समझना । दर्दुर शब्दसे चंडिका होनेपर वह स्त्रीलिङ्ग है और ग्रामसमूह होनेपर क्लीबलिङ्ग है । यह विश्वकोशका मत है ॥

४१ 'मद्गुरादयश्च' ॥ ॥ उरजन्ता निपात्यंते । माद्यतेर्गुक् । मद्गुरो मत्स्यभेदः ॥ 'कबृ वर्णे' ॥ रुगागमः । 'कर्बुरः श्वेतरक्षसोः । बध्नातेः खर्जूरादित्वादूरोऽपि । 'बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु' इति रन्तिदेवः ॥ (कोकतेर्वा कुक्) ॥ ग० ॥ कुक्कुरः । कुकुरः ॥

४१-मद्गुरादि शब्द उरच् प्रत्ययान्त निपातनसे सिद्ध हों। यथा, मद धातुके उत्तर उरच् गुक्+मद्गुरः अर्थात् मत्स्यविशेष । कबृ धातु वर्णमें है । उसके उत्तर उरच्+रुक्+

कर्बुरः । 'कर्बुरः श्वेतरक्षसोः' (कर्बुर शब्द श्वेत और राक्षस-वाचक है) बंध धातुके उत्तर खर्जूरादि गणसे ऊर प्रत्यय भी हो । यथा, बंधूरः बन्धुरः । यह दोनों शब्द नम्र और सुन्दर-वाचक हैं और तीनों लिङ्गोंमें ही प्रयुक्त होतेहैं । यह रन्तिदे-वकी उक्ति है।कुक् धातुके उत्तर उरच् प्रत्यय परे रहते विकल्प करके कुक्का आगम हो । यथा, कुक्कुरः, कुकुरः ॥

४२ 'असेरुरन्' ॥ ॥ असुरः ॥ प्रज्ञाद्यण् । आसुरः ॥

४२–अस धातुके उत्तर उरन् प्रत्यय हो । यथा, असुरः। प्रज्ञादि गणमें पाठके कारण अण् प्रत्यय होगा । आसुरः ॥

४३ 'मसेश्च' ॥ ॥ पञ्चमे पादे मसेरूरन्निति वक्ष्यते । 'मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषि-ति । मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः॥ मसूरी पादरोगे स्यादुपधाने पुनः पुमान् । म-सूरमसुरौ च द्वौ' इति विश्वः ॥

४३–मस धातुके उत्तर उरच् प्रत्यय हो । "पञ्चम पादमें मस धातुके उत्तर ऊरन् प्रत्यय हो" ऐसा आगे कहा जायगा। मसूरा मसुरा व्रीहिविशेष और पण्ययोषित् (वेश्या) सम-झना । "मसूरा मसुरा वा ना वेश्या व्रीहिप्रभेदयोः । मसूरी पादरोगे स्यादुपधाने पुनः पुमान् । मसूरमसुरौ च द्वौ" इति विश्वः । (मसूर शब्द वेश्या, व्रीहिमें, मसूरी एकप्रकारके चरणरोगमें उपधान (तकिये) में पुल्लिंग है)॥

४४ 'शावशेराप्तौ' ॥ ॥ शु इति आश्चर्यें । श्वशुरः । 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः ॥

४४–आशु अर्थमें शु उपपद है उसके रहते प्राप्ति अर्थ गम्यमान होनेपर अशूङ् व्याप्तौ इस धातुके उत्तर उरन् प्रत्यय हो । श्वशुरः । "पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः" इत्यमरः । श्वशुर शब्द पति और पत्नीके पितामें है, श्वश्रूः (सास) शब्द पतिपत्नीकी मातामें वर्तताहै ॥

४५ 'अविमह्योष्टिषच्' ॥ ॥ अविषः॥महिषः॥

४५–अवि और मह धातुके उत्तर टिषच् प्रत्यय हो । यथा, अविषः । महिषः ॥

४६ 'अमेर्दीर्घश्च' ॥ ॥ 'आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि' ॥

४६–अम धातुके उत्तर टिषच् प्रत्यय हो, और पूर्व स्वरको दीर्घ भी हो । यथा, "आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि" (आमिष शब्द मांस और भोग्य वस्तुमें प्रयुक्त है) ॥

४७ 'रुहेर्वृद्धिश्च' ॥ ॥ 'रङ्कुशम्बररौहिषाः'। 'रौहिषो मृगभेदे स्याद्रौहिषं च तृणं मतम्' इति संसारावर्तः ॥

४७–रुह धातुके उत्तर टिषच् प्रत्यय हो । और पूर्वस्वरको वृद्धि हो । यथा, "रंकुशम्बररौहिषाः" "रौहिषो मृगभेदे स्याद्रौहिषं च तृणं मतम्" इति संसारावर्त्तः । (रौहिष एक-प्रकारका मृग, तृण अर्थमें नपुंसक है) ॥

४८ 'तवेर्णिद्वा' ॥ ॥ तवेति सौत्रो धातुः । तविषताविषावब्धौ स्वर्गे च । स्त्रियां तविषी ताविषी नदी देवकन्या भूमिश्च । तविषी बल-मिति वेदभाष्यम् ॥

४८–तव धातुके उत्तर टिषच् प्रत्यय हो और यह टिषच् प्रत्यय णित्संज्ञक हो । तव यह सूत्रविहित धातु है । यथा, "तविषताविषावब्धौ स्वर्गे च ।" स्त्रियां तविषी ताविषी नदी देवकन्या भूमिश्च । तविषी बलम् इति वेदभाष्यम् ॥

४९ 'नञि व्यथेः' ॥ ॥ 'अव्यथिषोऽब्धि-सूर्ययोः' । 'अव्यथिषी धरारात्र्योः' ॥

४९–नञ्पूर्वक व्यथ धातुके उत्तर टिषच् प्रत्यय हो, यथा, " अव्यथिषोऽब्धिसूर्ययोः " । " अव्यथिषी धरारात्र्योः " ॥

५० 'किलेर्बुक् च' ॥ ॥ किल्बिषम् ॥

५०–किल धातुके उत्तर टिषच् प्रत्यय हो और उसको बुक्का आगम हो, किल्बिषम् ॥

५१ 'इषिमदिमुदिखिदिछिदिभिदिमन्दिच-न्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्' ॥ ॥ इषिरोऽग्निः । मदिरा सुरा । 'मुदिरः कामुकाभ्रयोः' इति विश्वमेदिन्यौ । खिदिरश्चन्द्रः । 'छिदिरोऽसिकुठारयोः' । भिदिरं वज्रम् । मन्दिरं गृहम् । स्त्रियामपि । 'मन्दिरं मन्दिराऽपि स्यात्' इति विश्वः । 'चन्दिरौ चन्द्रहस्तिनौ' । तिमिरं तमोक्षिरोगश्च । मिहिरः सूर्यः । 'मुहिरः काम्यसभ्ययोः' । मुचिरो दाता। रुचिरम् । रुधिरम् बधिरः । शुष शोषणे । शुषिरं छिद्रम् । शुष्कमित्यन्ये ॥

५१–इषि, मदि, मुदि, खिदि, छिदि, भिदि, मन्दि, चन्दि, तिमि, मिहि, मुहि, मुचि, रुचि, रुधि, बन्धि और शुषि धातुके उत्तर किरच् प्रत्यय हो, यथा–इषिरोऽग्निः । मदिरा अर्थात् सुरा । मुदिरः अर्थात् कामुक और मेघ । यह विश्व और मेदिनीकोषका मत है । खिदिरः अर्थात् चन्द्र । छिदिरः अर्थात् कुठार, असि । भिदिरम् अर्थात् वज्र। मन्दि-रम् अर्थात् गृह । यह स्त्रीलिङ्ग भी है । " मन्दिरं मन्दिरापि स्यात् " इति विश्वः । " चन्दिरौ चन्द्रहस्तिनौ " तिमिरम्= अन्धकार अथवा अक्षिरोग समझना । मिहिरः अर्थात् सूर्य । "मुहिरः०" अर्थात् काम्य और सभ्य । मुचिरः शब्दसे दाता समझना । रुचिरम् (श्रेष्ठ)। रुधिरम्। बधिरः । (बहरा) । शुष् धातु शोषणमें । शुषिरं छिद्र और शुष्कमें है ॥

५२ 'अशेर्णित्'॥ ॥ आशिरो वह्निरक्षसोः॥

५२–अश धातुके उत्तर किरच् प्रत्यय हो और यह

किरन् प्रत्यय गित्संज्ञक हो । आशिरः शब्दसे वह्नि और राक्षस समझना ॥

५३ 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः' ॥ ॥ अजेर्वीभावाभावः । अजिरमंगणम् । शशेरुपधाया इत्त्वम् । 'शिशिरं स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्' । श्रथ मोचने-उपधाया इत्त्वं रेफलोपः । प्रत्ययरेफस्य लत्वम् । शिथिलम् । स्थास्फाय्योष्टिलोपः । स्थिरं निश्चलम् । स्फिरं प्रभूतम् । तिष्ठतेर्वुक् ह्रस्वत्वं च। स्थविरः। खदिरः। बाहुलकात् शीङो बुक् ह्रस्वत्वं च । शिबिरम् ॥

५३-अजिर, शिशिर, शिथिल, स्थिर, स्फिर, स्थविर और खदिर यह सम्पूर्ण किरच् प्रत्ययान्त शब्द निपातनसे सिद्ध हों । अज धातुके स्थानमें निपातनसे वीभाव न हो । अजिरम् अर्थात् आँगन । शश धातुकी उपधाके स्थानमें इकार निपातनसे हुआहै । शिशिरम् अर्थात् शीतऋतु तुषार और शीतल श्रथ धातु मोचनमें । उसकी उपधाके स्थानमें निपातनसे इकार और रकारका लोप और प्रत्ययका जो रेफ उसके स्थानमें लकार हो, शिथिलम् । स्था और स्फा धातुकी टिका लोप हो । स्थिरम् अर्थात् निश्चल । स्फिरम् अर्थात् प्रभूतम् । स्था धातुके उत्तर किरच् प्रत्यय हुआ और धातुको वुक्का आगम हो । स्थविरः खदिरः । इस स्थलमें बाहुलक बलसे शीङ् धातुके उत्तर बुक्का आगम और ह्रस्व होगा । शिबिरम् ॥

५४ 'सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्' ॥ ॥ सलति गच्छति निम्नमिति सलिलम् । कलिलम् । अनिलः । महिला । पृषोदरादित्वान्महेलापि । भड इति सौत्रो धातुः । 'भडिलौ शूरसेवकौ' । भण्डिलो दूतः कल्याणं च । शण्डिलो मुनिः । पिण्डिलो गणकः । तुण्डिलो मुखरः। कोकिलः। भविलो भव्यः । बाहुलकात्कुटिलः ॥

५४-सलि, कलि, अनि, महि, भडि, भंडि, शंडि, पिंडि, तुंडि, कुकि, और भू धातुके उत्तर इलच् प्रत्यय हो, यथा-सलति गच्छति निम्नम् इस विग्रहमें सलिलम् । कलिलः । अनिलः । महिला । पृषोदरादित्वके कारण महेला पद भी होगा । भड यह सूत्रजात धातु है । भडिल शब्दसे शूरवीर और सेवक समझना, भण्डिल शब्दसे दूत और कल्याण समझना, शण्डिल शब्दसे मुनि समझना । पिंडलः अर्थात् गणकः । तुंडिलः अर्थात् मुखरः। कोकिलः । भविलः भव्यः । बाहुलक बलसे कुटिलः ॥

५५ 'कमेः पश्च' ॥ ॥ कपिलः ॥

५५-कम धातुके उत्तर इलच् प्रत्यय हो, और मकारके स्थानमें पकार होगा । कपिलः ॥

५६ 'गुपादिभ्यः कित्' ॥ ॥ गुपिलो राजा । तिजिलो निशाकरः । गुहिलं वनम् ॥

५६-गुपादिधातुओंके उत्तर इलच् प्रत्यय हो, और यह इलच् प्रत्यय कित्संज्ञक हो, यथा-गुपिलः अर्थात् राजा । तिजिलः अर्थात् निशाकर । गुहिलम् अर्थात् वनम् ॥

५७ 'मिथिलादयश्च' ॥ ॥ मथ्यन्तेऽत्र रिपवो मिथिला नगरी । पथिलः पथिकः ॥

५७-मिथिलादि शब्द इलच् प्रत्ययान्त निपातनसे सिद्ध हों । मथ्यन्तेऽत्र रिपवो मिथिला अर्थात् नगरी । पथिलः अर्थात् पथिकः । मिथिलादि यथा, मिथिला नगरी । गतिला, वेत्रलता । तकिला अवधिः । चंडिला नदी । पथिलः पथिकः । इति ॥

५८ 'पतिकठिकुठिगडिगुडिदंशिभ्य एरक्' ॥ पतेरः पक्षी गन्ता च । कठेरः कृच्छ्रजीवी । कुठेरः पर्णाशः । बाहुलकान्नुम् । गंडेरो मेघः । गुडेरो गुडकः । दंशेरो हिंस्रः ॥

५८-पति, कठि, कुठि, गडि, गुडि, दंशि धातुके उत्तर एरक् प्रत्यय हो, यथा-पतेरः अर्थात् पक्षी और गन्ता । कठेरः कृच्छ्रजीवी । कुठेरः पर्णाशः (पत्तेखानेवाला) बाहुलक बलसे नुम् नहीं होगा । गंडेरो मेघः । गुडेरो गुडकः । दंशेरो हिंस्रः (हत्यारा) ॥

५९ 'कुम्बेर्नलोपश्च' ॥ ॥ कुबेरः ॥

५९--कुम्ब धातुके उत्तर एरक् प्रत्यय हो और धातुके नकारका लोप हो । यथा, कुबेरः । देवताओंका खजानची निधिपति ॥

६० 'शदेस्त च' ॥ ॥ शतेरः शत्रुः ॥

६०-शद धातुके उत्तर एरक् प्रत्यय हो और दकारके स्थानमें तकार हो, यथा-शतेरः अर्थात् शत्रुः ॥

६१ 'मूलेरादयः' ॥ ॥ एरगन्ता निपात्यन्ते । मूलेरा जटा । गुधेरो गोप्ता । गुहेरो लोहघातकः । मुहेरो मूर्खः ॥

६१-'मूलेर' आदि शब्द एरच् प्रत्ययान्त निपातनसे सिद्ध हों, यथा, मूलेरः अर्थात् जटा । गुधेरः अर्थात् गोप्ता (रक्षक) गुहेरः अर्थात् लोहघातकः । मुहेरः मूर्खः ॥

६२ 'कबेरोतच् पश्च' ॥ ॥ कपोतः पक्षी ॥

६२-कब धातुके उत्तर ओतच् प्रत्यय हो और बकारके स्थानमें पकारहो । यथा, कपोतः पक्षी ॥

६३ 'भातेर्डवतुः' ॥ ॥ भातीति भवान् ॥

६३-भा धातुके उत्तर डवतु प्रत्यय हो, यथा-भाति इति भवान् ॥

६४ 'कटिचकिभ्यामोरन्' ॥ ॥ कठोरः । चकोरः ॥

६४-कठि और चकि धातुके उत्तर ओरन् प्रत्यय हो, यथा-कठोरः । चकोरः ॥

६५ 'किशोरादयश्च' ॥ ॥ किम्पूर्वस्य शृणातेष्टिलोपः। किमोऽन्त्यलोपः। किशोरोऽश्वशावः। सहोरः साधुः॥

६५-'किशोरः' आदि शब्द ओरन् प्रत्ययान्त निपातनसे सिद्ध हों। किंपूर्वक शृणाति शृ धातुके उत्तर तरच् प्रत्यय हो किन्तु निपातनमें टिका लोप हो और किं भावके अन्त अर्थात् मकारका लोप हो। यथा, किशोरः अश्वशावकः। सहोरः साधुः॥

६६ 'कपिगडिगण्डिकटिपटिभ्य ओलच्'॥॥ कपीति निर्देशान्नलोपः। कपोलः। गडोलगण्डोलौ गुडकपर्यायौ। कटोलः कटुः। पटोलः॥

६६-कपि, गडि, गंडि, कटि, पटि, धातुके उत्तर ओलच् प्रत्यय हो। कपि ऐसे निर्देशके कारण नकारका लोप हो। यथा, कपोलः। गडोल और गंडोल यह दो शब्द गुडकपर्याय हैं। कटोलः कटुः। पटोलः॥

६७ 'मीनातेरूरन्' ॥ ॥ मयूरः॥

६७--मी धातुके उत्तर ऊरन् प्रत्यय हो। यथा, मयूरः (मोर)॥

६८ 'स्यन्देः संप्रसारणं च'॥ ॥ सिन्दूरम्॥

६८-स्यन्द धातुके उत्तर ऊरन् प्रत्यय हो और सम्प्रसारण हो, यथा-सिन्दूरम्॥

६९ 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्'॥ ॥ सिनोतीति सेतुः। तितुत्रेति नेट्। तन्तुः। गन्तुः। मस्तु दधिमण्डम्। सच्यत इति सक्तुः। अर्धर्चादिः। ज्वरत्वरेत्यूठ्। तत्र क्ङितीत्यनुवर्तत इति मते तु बाहुलकात्। ओतुर्बिडालः। धातुः। क्रोष्टा॥

६९-सि, तनि, गमि, मसि, सचि, अवि, धाञ् और क्रुश धातुके उत्तर तुन् प्रत्यय हो, यथा, सिनोति इति सेतुः। "तितुत्र० ३१६३" इस सूत्रसे इट् नहीं होगा। यथा, तन्तुः। गन्तुः। मस्तु अर्थात् दधिमंड। सच्यते इति सक्तुः। अर्द्धर्चादि है "ज्वरत्वर० २६५४" इस सूत्रसे ऊठ् आदेश हुआ। उस स्थलमें "क्ङिति" इस पदकी अनुवृत्ति होती है, यह मत बाहुलकके बलसे सिद्ध हुआ। यथा,-ओतुः, बिडालः। धातुः। क्रोष्टा॥

७० 'पः किच्च'॥ ॥ पिबतीति 'पितुर्वह्नौ दिवाकरे'॥

७०-पा धातुके उत्तर तुन् प्रत्यय हो और इस तुन्की कित्संज्ञा हो। यथा, पिबतीति। पितुः वह्नि और दिवाकर। (अग्नि और सूर्य)॥

७१ 'अर्तेश्च तुः'॥ ॥ अर्तेस्तुः स्यात्स च कित्। 'ऋतुः स्त्रीपुष्पकालयोः'॥

७१-ऋ धातुके उत्तर तु प्रत्यय हो और वह कित्संज्ञक हो "ऋतुः स्त्री पुष्पकालयोः" (वसन्तादि ऋतु, और स्त्रीके मासिक धर्मका समय)॥

७२ 'कमिमनिजनिगाभायाहिभ्यश्च'॥ ॥ एभ्यस्तुः स्यात्।'कन्तुः कन्दर्पचित्तयोः'। मन्तुरपराधः। जन्तुः प्राणी। 'गातुः पुंस्कोकिले भृङ्गे गन्धर्वे गायनेपि च'। भातुरादित्यः। 'यातुरध्वगकालयोः'। रक्षसि क्लीबे। हेतुः कारणम्॥

७२-कमि, मनि, जनि, गा, भा, या, हि इन सम्पूर्ण धातुओंके उत्तर तु प्रत्यय हो।"कन्तुः कन्दर्पचित्तयोः"(कामदेव और चित्त) मन्तुरपराधः। जन्तुः प्राणी। "गातुः पुंस्कोकिले भृङ्गे गंधर्वे गायनेपि च" गातुः शब्द पुंस्कोकिल भौंरे गन्धर्व और गायनमें। भातुः आदित्यः। "यातुः अध्वगकालयोः" "रक्षसि क्लीबः" यातुः शब्द मार्गगमन कर्ता काल अर्थमें है राक्षस अर्थमें क्लीब है। हेतुः कारणम्॥

७३ 'चायः किः'॥ ॥ 'केतुर्ग्रहपताकयोः॥

७३-चाय धातुके उत्तर तु प्रत्यय हो और चायके स्थानमें कि आदेश हो। यथा, "केतुर्ग्रहपताकयोः" (केतुका अर्थ ग्रह और ध्वजा)॥

७४ 'आप्नोतेर्ह्रस्वश्च'॥ ॥ अप्तुः शरीरम्॥

७४-आप धातुके उत्तर तु प्रत्यय हो और पूर्व स्वरको ह्रस्व हो। यथा, अप्तुः अर्थात् शरीर॥

७५ 'वसेस्तुन्'॥ ॥ वस्तु॥

७५-वस धातुके उत्तर तुन् प्रत्यय हो, यथा-वस्तु॥

७६'अगारे णिच्च'॥॥'वेश्मभूर्वास्तुरस्त्रियाम्'।

७६-अगार अर्थात् गृह होनेपर वस धातुके उत्तर तुन् प्रत्यय हो, और यह तुन् णित्संज्ञक हो। यथा, वास्तुः अर्थात् रहनेका घर। यह स्त्रीलिङ्ग नहीं है॥

७७ 'कृञः क्तुः'॥ ॥ क्रतुर्यज्ञः॥

७७-कृञ् धातुके उत्तर क्तु प्रत्यय हो क्रतु अर्थात् यज्ञ होनेपर। यथा, क्रतुः यज्ञ॥

७८ 'एधिवह्योश्च तुः'॥ ॥ एधतुः पुरुषः। वहतुरनड्वान्॥

७८-एधि और वह धातुके उत्तर तु प्रत्यय हो। यथा, एधतुः अर्थात् पुरुषः। वहतुः अर्थात् वृष॥

७९ 'जीवेरातुः'॥ ॥ 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे'॥

७९-जीव धातुके उत्तर आतु प्रत्यय हो। यथा, जीवातुः। जीवातु शब्द पुंलिङ्ग और नपुंसकलिङ्ग भी है। जीवातु शब्दसे भक्त, जीवित और जीवनौषध समझना॥

८० 'आतृकन् वृद्धिश्च'॥ ॥ जीवेरित्येव। 'जैवातृकस्त्विन्दुभिषगायुष्मत्सु कृषीवले'॥

८०-जीव धातुके उत्तर आतृकन् प्रत्यय हो और धातुके स्वरको वृद्धि हो, यथा-जैवातृकः। जैवातृक शब्दसे इन्दु, भिषक आयुष्मत् और कृषीवल समझना॥

८१ 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः'॥ ॥ 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता' । चमूः । तनूः । धनूः । शस्त्रम् । सर्ज सर्जने । सर्जूर्वणिक् । खर्ज व्यथने । खर्जूः पामा ॥

८१–कृषि,चमि,तनि,धनि,सर्जि और खर्जि धातुके उत्तर ऊ प्रत्यय हो,यथा–कर्षूः।कर्षू शब्द पुलिङ्गमें करीषाग्नि (उपलेकी आग) और नदी होनेपर स्त्रीलिङ्ग है । चमूः (सेना) । तनूः धनूः । अर्थात् शस्त्र । सर्ज धातु सर्जनमें इस धातुके उत्तर ऊ प्रत्यय हो । सर्जूः अर्थात् वणिक् । खर्ज धातु व्यथनमें है । खर्ज्जूः । अर्थात् पामा (रोगविशेष खुजली) ॥

८२ 'मृजेर्गुणश्च' ॥ ॥ मर्जूः शुद्धिकृत् ॥

८२–मृज धातुको गुण हो और ऊ प्रत्यय हो । मर्जूः इस शब्दसे शुद्धिकारी पदार्थ समझना ॥

८३ 'वहो धश्च' ॥ ॥'वधूर्जायास्नुषास्त्रीषु'॥

८३-वह धातुके उत्तर ऊ प्रत्यय हो और हकारके स्थानमें धकार हो । यथा, वधूः अर्थात् जाया और स्नुषा समझना और यह स्त्रीलिङ्ग है ॥

८४ 'कषेश्छश्च' ॥ ॥ कच्छूः पामा ॥

८४–कष धातुके उत्तर छ प्रत्यय हो । यथा, कच्छूः पामा॥

८५ 'णित्कसिपद्यर्तेः' ॥ ॥ कासूः शक्तिः । पादूश्चरणधारिणी । आरूः पिङ्गलः ॥

८५–कस पद और ऋ धातुके उत्तर ऊ प्रत्यय हो और यह ऊ णित्संज्ञक हो । यथा, कासूः शक्तिः । पादूः चरणधारिणी अर्थात् खडाऊ वा जूता । आरूः पिङ्गल ॥

८६ 'अणो डश्च' ॥ ॥ आडूर्जलप्लवद्रव्यम् ॥

८६–अण् धातुके उत्तर ऊ प्रत्यय हो और णकारको डकार आदेश हो यथा, आडूः अर्थात् जलप्लव द्रव्य ॥

८७ 'नञि लम्बेर्नलोपश्च' ॥ ॥ 'तुम्ब्यलाबूरुभे समे' इत्यमरः ॥

८७–नञ् पूर्वक लम्ब धातुके उत्तर ऊ प्रत्यय हो और धातुके नकारका लोप हो । यथा, अलाबूः । "तुम्ब्यलाबूरुभे समे" अर्थात् तुम्बी और अलाबू शब्द समान अर्थवाला समलिङ्ग है ॥

८८ 'के श्र एरङ् चास्य'॥ ॥ कशब्दे उपपदे शृणातेरूः स्यादरङ् आदेशः । 'कशेरूस्तृणकन्दे स्त्री'।बाहुलकादुप्रत्यये कशेरुः क्लीबे पुंसि च॥

८८–क शब्दपूर्वक शॄ धातुके उत्तर ऊ प्रत्यय हो और एरङ् आदेश हो । यथा, कशेरूः अर्थात् तृणकन्द यह स्त्रीलिङ्ग है । बाहुलक बलसे उ प्रत्यय होकर कशेरुः पद भी होताहै, किन्तु यह पुलिङ्ग और नपुंसकलिङ्ग है ॥

८९ 'त्रो दुट् च' ॥ ॥ तरतेरूः स्यात्तस्य दुट् । 'तर्दूः स्याद्दारुहस्तकः' ॥

८९–तॄ धातुके उत्तर ऊ प्रत्यय हो और प्रत्ययको दुट्का आगम हो । यथा, "तर्दूः स्याद्दारुहस्तकः" (काष्ठकी कडछी) ॥

९० 'दरिद्रातेर्यालोपश्च' ॥ ॥ इश्च आश्च यौ तयोर्लोपः । दर्द्रूः कुष्ठप्रभेदः ॥

९०–दरिद्रा धातुके उत्तर ऊ प्रत्यय हो और धातुके इकार और आकारका लोप हो । यथा, दर्द्रूः अर्थात् कुष्ठ रोगविशेष ॥

९१ 'नृतिशृध्योः कूः' ॥ ॥ नृतूर्नर्तकः । शृधूरपानम् ॥

९१–नृति, शृधि, धातुके उत्तर कू प्रत्यय हो । यथा, नृतूः अर्थात् नर्त्तक । शृधूः अर्थात् अपान ॥

९२ 'ऋतेरम् च' ॥ ॥ ऋतिः सौत्रो धातुः । ततः कूरमागमश्च । रंतूर्देवनदी सत्यवाक् च ॥

९२–ऋति धातु सूत्रजात है । ऋ धातुके उत्तर कू प्रत्यय हो और अमागम हो, यथा–रंतूः देवनदी और सत्यवाक्यका अर्थ है ॥

९३ 'अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः'॥॥ एते कूप्रत्ययान्ता निपात्यन्ते । अन्दूर्बन्धनम् । दृभी ग्रन्थे । निपातनान्नुम् । दृम्भूः । अनुस्वाराभावोऽपि निपातनादित्येके । दृन्भूः । (जनेर्बुक् ।) जम्बूः । जमु अदने इत्यस्येत्येके । बाहुलकाद्ध्रस्वोऽपि । जम्बुः।कफं लाति कफेलूः श्लेष्मातकः । निपातनादेत्वम् । कर्कं दधाति कर्कन्धूर्बदरी । निपातनान्नुम् । दिधिं धैर्यं स्यति त्यजतीति दिधिषूः पुनर्भूः। केचित्तु । अन्दूदृम्फूजम्बूकम्बू इति पठन्ति । दृम्फ उत्क्लेशे । दृम्फूः सर्पजातिः ॥ कमेर्बुक् ॥ ॥ कम्बूः परद्रव्यापहारी ॥

९३–अन्दू, दृम्भू,जम्बू ,कफेलू,कर्कन्धू,दिधिषू यह सम्पूर्ण कू प्रत्ययान्त शब्द निपातनसे सिद्ध हों । यथा, अन्दूः अर्थात् बंधन । दृभी ग्रन्थे । निपातनसे नुम् होगा । दृम्भूः । अनुस्वाराभाव भी निपातनसे होताहै । यह कोई २ कहतेहैं । दृन्भूः । जन धातुके उत्तर कू प्रत्यय हो और बुक्का आगम हो । जम्बूः । अदनार्थक जमु (खाना) धातुके उत्तर कू प्रत्यय और बुक्का आगम भी होगा । ऐसा कोई कहते हैं । बाहुलक बलसे ह्रस्व भी होगा । जम्बुः । कफं लाति कफेलूः अर्थात् श्लेष्मातक । निपातनसे एकार हुआ है । कर्कं दधाति इस विग्रहमें कर्कन्धूः । अर्थात् बदरी । इस स्थलमें निपातनसे नुम् हुआ है । दिधिं धैर्यं स्यति त्यजति इस विग्रमें दिधिषूः पुनर्भूः । कोई २ अन्दू, दृम्फू, जम्बू, कम्बू, ऐसा पाठ करतेहैं । दृम्फ धातु उत्क्लेशमें । दृम्फूः । अर्थात् सर्पजाति । कम धातुके उत्तर ऊ प्रत्यय हो और बुक्का आगम हो । कम्बूः अर्थात् परद्रव्यापहारी ॥

९४ 'मृग्रोरुतिः' ॥ ॥ मरुत् । गरुत्पक्षः ॥

९४–मृ और गॄ धातुके उत्तर उति प्रत्यय हो, यथा–मरुत् अर्थात् वायु । गरुत् अर्थात् पक्ष ॥

९५ 'ग्रो मुट् च' ॥ ॥ गिरतेरुतिस्तस्य च मुट्। गर्मुत्सुवर्णं तृणविशेषश्च ॥

९५–गॄ धातुके उत्तर उ प्रत्यय हो और प्रत्ययको मुट्का आगम हो, यथा–गर्मुत् अर्थात् सुवर्ण और तृणविशेष ॥

९६ 'हृषेरुलच्' ॥ ॥'हर्षुलो मृगकामिनोः'। बाहुलकाच्चटतेः। चटुलं शोभनम् ॥

९६–हृष् धातुके उत्तर उलच् प्रत्यय हो। हर्षुलः अर्थात् मृग और कामी। बाहुलकबलसे चट धातुके उत्तर उलच् प्रत्यय होगा। यथा–चटुलम् अर्थात् सुन्दर ॥

९७ हसृरुहियुषिभ्य इतिः ॥ ॥ 'हरित्ककुभि वर्णे च तृणवाजिविशेषयोः'। सरिन्नदी। रोहित् मृगविशेषस्य स्त्री। युष इति सौत्रो धातुः। ऋश्यस्य रोहित् पुरुषस्य योषित् इति भाष्यम् ॥

९७–हृ, सृ, रुहि और युष धातुके उत्तर इति प्रत्यय हो। यथा, हरित् अर्थात् दिक्, वर्ण, तृण, और वाजिविशेष। सरित् नदी। रोहित मृगविशेषकी स्त्री। युष यह सूत्रपठित धातु है। मत्स्यविशेषकी स्त्रीको रोहित और मनुष्य स्त्रीजातिको योषित् कहते हैं, यह भाष्यकारका मत है ॥

९८ 'ताडेर्णिलुक् च' ॥ ॥ ताडयतीति तडित् ॥

९८–ताड धातुके उत्तर इति प्रत्यय हो और णिका लुक् हो। ताडयति इति तडित् (बिजली) ॥

९९ 'शमेर्ढः' ॥ ॥ बाहुलकादित्संज्ञा एयादेश इट् च न। 'शण्ढः स्यात्पुंसि गोपतौ'। शण्ढः क्लीबः ॥

९९–शम धातुके उत्तर ढ प्रत्यय हो। बाहुलकबलसे इत्संज्ञा, एयादेश और इट् भी नहीं होगा। यथा, शण्ढः। शण्ढ शब्दसे नपुंसक और स्वेच्छाचारी बैल समझना चाहिये॥

१०० 'कमेरठः' ॥ ॥ कमठः। 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी। बाहुलकाज्जरठः ॥

१००–कम धातुके उत्तर अठ प्रत्यय हो, यथा–कमठः। कमठ शब्द कच्छप अर्थ होनेपर पुंलिङ्ग और भांडभेद होनेपर नपुंसकलिङ्ग है। यह मेदिनीकोषका मत है। बाहुलकबलसे जरठः पद भी होगा (जरठ–वृद्ध) ॥

१०१ 'रमेर्वृद्धिश्च' ॥ ॥ रामठं हिंगु ॥

१०१–रम धातुके उत्तर अठ प्रत्यय हो और अकारकी वृद्धि हो। यथा, रामठं हिंगु (हींग) ॥

१०२ 'शमेः खः' ॥ ॥ शङ्खः ॥

१०२–शम धातुके उत्तर ख प्रत्यय हो। शंखः ॥

१०३ 'कणेष्ठः' ॥ ॥ कण्ठः ॥

१०३–कण धातुके उत्तर ठ प्रत्यय हो। कण्ठः ॥

१०४ 'कलस्तृपश्च' ॥ ॥ तृपतेः कलप्रत्ययः चात्तृफतेः। तृपला लता। 'तृफला तु फलत्रिके' ॥

१०४–तृप धातुके उत्तर कल प्रत्यय हो और चकारसे तृफ धातुके उत्तर भी कल प्रत्यय हो, तृपला लता। तृफला। तृफलासे तीन फल समझना (हर, बहेडा, आमला) ॥

१०५ 'शपेर्वश्च' ॥ ॥ शबलः ॥

१०५–शप धातुके उत्तर कल प्रत्यय हो और पकारके स्थानमें वकार हो, यथा–शबलः ॥

१०६ 'वृषादिभ्यश्चित्' ॥ ॥ वृषलः। पललम्। बाहुलकाद् गुणः। सरलः। तरलः ॥ कमेर्बुक् ॥ ग० ॥ कम्बलः। मुस खण्डने मुसलम् ॥ लङ्गेर्वृद्धिश्च ॥ ग० ॥ लांगलम् ॥ कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् ॥ ॥ कुट्मलः। कुडेरपि। कुड्मलः। कश्मलम्। बाहुलकाद् गुणः। कोमलम् ॥

१०६–वृषादि धातुके उत्तर कल प्रत्यय हो और यह प्रत्यय चित्संज्ञक हो। यथा,वृषलः। पललम्। बाहुलकबलसे गुण हो। सरलः। तरलः। कम धातुके उत्तर कल प्रत्यय हो और वुक्का आगम हो। कम्बलः। मुस धातु खंडनमें है–मुसलम्। लङ्ग धातुको वृद्धि हो। लाङ्गलम्। कुटि, कशि, और कौति धातुके उत्तर कल प्रत्यय हो, प्रत्ययको मुट्का आगम हो। कुट्मलः। कुड धातुके उत्तर भी कल प्रत्यय हो, कुड्मलः। कश्मलम्। बाहुलकबलसे गुण हो। कोमलम् ॥

१०७ 'मृजेष्टिलोपश्च' ॥ ॥ मलम् ॥

१०७–मृज धातुके उत्तर कल प्रत्यय हो और टिका लोप हो। मलम् ॥

१०८ 'चुपेरच्चोपधायाः' ॥ ॥ चपलम् ॥

१०८–चुप धातुके उत्तर कल प्रत्यय हो और उपधाके स्थानमें अत् हो। चपलम् ॥

१०९ 'शकिशम्योर्नित्' ॥ ॥ शकलम् ॥ शमलम् ॥

१०९–शकि, और शमि धातुके उत्तर कल प्रत्यय हो और यह प्रत्यय नित्संज्ञक हो। शकलम्। शमलम् ॥

११० 'छो गुक् ह्रस्वश्च' ॥ ॥ छगलः। प्रज्ञादित्वाच्छागलः ॥

११०–छो धातुके उत्तर कल प्रत्यय हो और गुक्का आगम और ह्रस्व हो। यथा, छगलः प्रज्ञादित्वके बलसे छागलः ॥

१११ 'ञमन्ताड्डः' ॥ ॥ दण्डः। रण्डा। खण्डः। मण्डः। वण्डश्छिन्नहस्तः। अण्डः। बाहुलकात्सत्वाभावः। षण्डः संघातः। तालव्यादिरित्यपरे। शण्डः। गण्डः। चण्डः। पण्डः-क्लीबः। पण्डा बुद्धिः ॥

१११–ञम् अन्तमें है ऐसा जो धातु उसके उत्तर ड प्रत्यय हो। यथा, दण्डः। रण्डा। खण्डः। मण्डः। वण्डः

छिन्नहस्तः । अण्डः । बाहुलक बलसे सत्वाभाव होगा । यथा, षण्डः संघातः । कोई कहते हैं यह शब्द तालव्य शकारादि है । शण्डः । गण्डः । चण्डः । पण्डः । अर्थात् क्लीबः । पण्डा बुद्धिः ॥

११२ 'कादिभ्यः कित्' ॥ ॥ कवर्गादिभ्यो डः कित्स्यात् । कुण्डम् । काण्डम् । गुड् । गुडः । घुण भ्रमणे घुण्डो भ्रमरः ॥

११२-कवर्गादि धातुओंके उत्तर ड प्रत्यय हो और यह ड कित्संज्ञक हो । यथा, कुण्डम् । काण्डम् । गुड् । गुडः । घुण भ्रमणे । घुण्डो भ्रमरः ॥

११३ 'स्थाचतिमृजेरालञ्वालञालीयचः' ॥ ॥ तिष्ठतेरालञ् । स्थालम् । स्थाली । चतेर्वालञ् । चात्वालः । मृजेरालीयच् । मार्जालीयो बिडालः ॥

११३-स्था धातुके उत्तर आलञ् प्रत्यय हो, यथा-स्थालम्, स्थाली । चत धातुके उत्तर वालञ् प्रत्यय हो । यथा, चात्वालः । मृज धातुके उत्तर आलीयच् प्रत्यय हो । यथा, मार्जालीयो बिडालः ॥

११४ 'पतिचण्डिभ्यामालञ्' ॥ ॥ पातालम् । चण्डालः । प्रज्ञादित्वादणि चाण्डालोऽपीत्येके ॥

११४-पति और चडि धातुके उत्तर आलञ् प्रत्यय हो, यथा-पातालम् । चण्डालः । प्रज्ञादित्वके कारण धातुके उत्तर अण् प्रत्यय होकर चाण्डालः पद भी होगा ॥

११५ 'तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्' ॥ ॥ तमालः । विशालः । बिडालः । मृणालम् । कुलालः । कपालम् । पलालम् । पञ्चालाः ॥

११५-तमि, विशि, बिडि, मृणि, कुलि, कपि, पलि, पञ्चि धातुके उत्तर कालन् प्रत्यय हो । यथा, तमालः विशालः । बिडालः । मृणालम् । कुलालः । कपालम् । पलालम् । पञ्चालाः ॥

११६ 'पतेरंगच् पक्षिणि' ॥ ॥ पतंगः ॥

११६-पक्षि अर्थ होनेपर पत धातुके उत्तर अङ्गच् प्रत्यय हो । यथा, पतङ्गः ।

११७ 'तरत्यादिभ्यश्च' ॥ ॥ तरंगः । लवंगम् ॥

११७-तरति आदि धातुओंके उत्तर अङ्गच् प्रत्यय हो । यथा, तरङ्गः । लवंगम् ॥

११८ 'बिडादिभ्यः कित्' ॥ ॥ विडंगः । मृदङ्गः । कुरंगः । बाहुलकादुत्वं च ॥

११८-विडादि धातुओंके उत्तर अङ्गच् प्रत्यय हो और वह कित् हो, यथा-विडङ्गः । मृदङ्गः । कुरङ्गः यहां बाहुलकबलसे उत्त्व भी हुआ ॥

११९ 'सृवृञोर्वृद्धिश्च' ॥ सारंगः । वारंगः । खड्गादिमुष्टिः ॥

११९-सृ और वृञ् धातुके उत्तर अङ्गच् प्रत्यय हो और वृद्धि हो, यथा-सारङ्गः । वारङ्गः, अर्थात् खड्गादि मुष्टि॥

१२० 'गन् गम्यद्योः' ॥ ॥ गंगा । अद्गः पुरोडाशः ॥

१२०-गम् और अद् धातुके उत्तर गन् प्रत्यय हो यथा-गङ्गा । अद्गः पुरोडाशः ॥

१२१ 'छापूखडिभ्यः कित्' ॥ ॥ छागः । पूगः । खड्गः । बाहुलकात् षिट अनादरे गन्सत्वाभावश्च । षिड्गस्तरलः । 'षिड्गैरगद्यत ससंभ्रममेवमेका' इति माघः ॥

१२१-छा, पू, खडि धातुओंके उत्तर गन् प्रत्यय हो और वह गन् प्रत्यय कित् हो, यथा-छागः । पूगः । खड्गः । बाहुलकबलसे अनादरार्थक षिट धातुके उत्तर गन् प्रत्यय और सत्वका अभाव भी हुआ, यथा-षिड्गस्तरलः । अत एव 'षिड्गैरगद्यत ससंभ्रममेवमेके' अर्थात् सम्भ्रमके साथ चञ्चल पुरुषसे कोई इस तरह बोलेगये, ऐसे माघकाव्यमें कहाहै ॥

१२२ 'भृञः किन्नुट् च ॥ ॥ भृञो गन् कित्स्यात्तस्य नुट् च । 'भृंगाः षिड्गालिधूम्याटाः' ॥

१२२-भृञ् धातुके उत्तर गन् प्रत्यय हो, और वह प्रत्यय कित् हो, और उसके नुट्का आगम हो, यथा-"भृङ्गाः षिङ्गालिधूम्याटाः" ॥

१२३ 'शृणातेर्ह्रस्वश्च' ॥ ॥ शृंगम् ॥

१२३-शॄ धातुके उत्तर गन् प्रत्यय, उसके नुट्का आगम और शॄ धातुको ह्रस्व हो, यथा-शृङ्गम् ॥

१२४ 'गण् शकुनौ' ॥ ॥ नुडित्यनुवर्त्तते। शार्ङ्गः ॥

१२४-शकुनि अर्थमें शॄ धातुके उत्तर गण् प्रत्यय हो और नुट्का आगम हो, यथा-शार्ङ्गः ॥

१२५ 'मुदिग्रोर्गग्गौ' ॥ ॥ मुद्गः । गर्गः ॥

१२५-मुद् और गॄ धातुके उत्तर गक् और ग प्रत्यय हो, यथा-मुद्गः । गर्गः ॥

१२६ 'अण्डन् कृसृभृवृञः' ॥ ॥ करण्डः । सरण्डः । पक्षी भरण्डः स्वामी । वरण्डो मुखरोगः ॥

१२६-कृ, सृ, भृ और वृञ् धातुके उत्तर अण्डन प्रत्यय हो, यथा-करण्डः । सरण्डः पक्षी । भरण्डः स्वामी। वरण्डो मुखरोगः ॥

१२७ 'शॄदृभसोऽदिः' ॥ ॥ शरत् । 'दरद्धृदयकूलयोः' । भसज्जघनम् ॥

१२७-शॄ, दृ और भस् धातुके उत्तर अदि प्रत्यय हो, यथा-शरत् । दरत्, अर्थात् हृदय और कूल । भसत्, अर्थात् जघन ॥

१२८ 'दृणातेः षुग् ह्रस्वश्च' ॥ ॥ दृषत् ।

१२८–दृ धातुके उत्तर अदि प्रत्यय, षुक्का आगम और ह्रस्व हो, यथा–दृषत् ॥

१२९ 'त्यजितनियजिभ्यो डित्' ॥ ॥ त्यद् । तद् । यद् । सर्वादयः ॥

१२९–त्यज, तन् और यज् धातुके उत्तर आदि प्रत्यय हो और वह डित् हो, यथा–त्यद् । तद् । यद् । यह सब सर्वादि हैं ॥

१३० 'एतेस्तुट् च' ॥ ॥ एतद् ॥

१३०–इण् धातुके उत्तर अति प्रत्यय हो और तुट्का आगम हो, यथा–एतद् ॥

१३१ 'सर्तेरटिः' ॥ ॥ 'सरट् स्याद्वातमेघयोः' । वेदभाष्ये तु याभिः कृशानुमिति मन्त्रे सरड्भ्यो मधुमक्षिकाभ्य इति व्याख्यातम् ॥

१३१–सृ धातुके उत्तर अटि प्रत्यय हो यथा–सरट् । सरट् शब्दसे वायु और मेघ समझना । वेदभाष्यमें तो 'याभिः कृशानुम्' इस मंत्रमें 'सरड्भ्यो मधुमक्षिकाभ्यः' ऐसी व्याख्या करीहै ॥

१३२ 'लंघेर्नलोपश्च' ॥ ॥ लघट् वायुः ॥

१३२–लंघ धातुके उत्तर अटि प्रत्यय हो और नकारका लोप हो, यथा–लघट् वायुः ॥

१३३ 'पारयतेरजिः' ॥ ॥ पारक् सुवर्णम् ॥

१३३–पारि धातुके उत्तर अजि प्रत्यय हो, यथा–पारक् अर्थात् सुवर्ण ॥

१३४ 'प्रथः कित्सम्प्रसारणं च' ॥ ॥ पृथक् । स्वरादिपाठादव्ययत्वम् ॥

१३४–प्रथ धातुके उत्तर अजि प्रत्यय हो और वह कित् हो और धातुको सम्प्रसारण हो, यथा–पृथक् । स्वरादिगणमें पाठके कारण पृथक् शब्द अव्यय है ॥

१३५ 'भियः षुग्ह्रस्वश्च' ॥ ॥ भिषक् ॥

१३५–भी धातुके उत्तर अजि प्रत्यय हो और धातुको षुक्का आगम और ह्रस्व हो, यथा–भिषक् ॥

१३६ 'युष्यसिभ्यां मदिक्' ॥ युष् सौत्रो धातुः । युष्मद् । अस्मद् । त्वम्।अहम् ॥

१३६–युष् और अस् धातुके उत्तर मदिक् प्रत्यय हो, युष् यह सौत्र धातु है, यथा–युष्मद् । अस्मद् । त्वम् । अहम् ॥

१३७ 'अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्' ॥ ॥ एभ्यश्चतुर्दशभ्यो मन् । अर्मश्चक्षूरोगः । स्तोमः संघातः । सोमः । होमः । सर्मा गमनम् । धर्मः । क्षेमं कुशलम् । क्षोमम् । प्रज्ञाद्यणि क्षौमं च । भाम आदित्यः । यामः। 'वामः शोभनदुष्टयोः'। पद्मम् । यक्ष पूजायाम् । यक्ष्मो रोगराजः । नेमः ॥

१३७–ऋ, स्तु, सु, हु, सृ, धृ, क्षि, क्षु, भा, या, वा, पदि, यक्षि और नी धातुके उत्तर मन् प्रत्यय हो, यथा–अर्म्मः, अर्थात् चक्षूरोगः । स्तोमः समूहः । सोमः । होमः । सर्म्मो गमनम् । धर्म्मः । क्षेमम् कुशलम् । क्षोमम् । प्रज्ञादिगणमें पाठके कारण अण् प्रत्यय होकर 'क्षौमम्' पद भी होगा । भाम आदित्यः । यामः । (पहर) वामः, अर्थात् शोभन और दुष्ट । पद्मम् । यक्ष धातु पूजा करनेमें है । यक्ष्मो रोगराजः । नेमः ॥

१३८ 'जहातेः सन्वदालोपश्च' ॥ ॥ 'जिह्मः कुटिलमन्दयोः' ॥

१३८–ओहाक् धातुके उत्तर मन् प्रत्यय हो, वह सन्वत् हो और आकारका लोप हो, यथा–जिह्मः, अर्थात् कुटिल और मन्द ॥

१३९ 'अवतेष्टिलोपश्च' ॥ ॥ मन्प्रत्ययस्यायं टिलोपो न प्रकृतेः । अन्यथा डिदित्येव ब्रूयात् । ज्वरत्वरेति ऊठौ । तयोर्दीर्घे कृते गुणः । चादिपाठादव्ययत्वमित्युज्ज्वलदत्तस्तन्न तेषामसत्त्वार्थत्वात् । वस्तुतस्तु स्वरादिपाठादव्ययत्वम् । अवतीति ओम् ॥

१३९–अव धातुके उत्तर मन् प्रत्यय हो और टिका लोप हो । मन् प्रत्ययकीही टिका लोप होगा धातुका नहीं, अन्यथा डित् ऐसा ही कहते । "ज्वरत्वर० २६५४" इस सूत्रसे उपधा और वकारको ऊठ् आदेश हुआ । पश्चात् दोनोंको दीर्घ होनेपर गुण हुआ । चादिगणमें पाठके कारण वह अव्यय है,यह उज्ज्वलदत्तका मत है, परन्तु उसके असत्त्वार्थत्वके कारण वह ठीक नहीं है, वास्तविक तो स्वरादिगणमें पाठके कारण उसको अव्ययत्व होगा,अवतीति=ओम् ॥

१४० 'ग्रसेरा च' ॥ ॥ ग्रामः ॥

१४०–ग्रस् धातुके उत्तर मन् प्रत्यय हो और धातुको आकार हो, यथा–ग्रामः ॥

१४१ 'अविसिविसिशुषिभ्यः कित्' ॥ ॥ ऊमं नगरम् । स्यूमो रश्मिः । सिमः सर्वः । 'शुष्ममग्निसमीरयोः' ॥

१४१–अव्, सिव्, सि, और शुष् धातुके उत्तर मन् प्रत्यय कित् हो, यथा–ऊमं नगरम् । स्यूमो रश्मिः । सिमः सर्वः । शुष्मम् , अर्थात् अग्नि और वायु ॥

१४२ 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' ॥ ॥ 'इष्मः कामवसन्तयोः'। ईषीतिपाठे दीर्घादिः । युध्मः शरो योद्धा च । इध्मः समित् । दस्मो यजमानः । श्यामः । धूमः । सूमोऽन्तरिक्षम् । बाहुलकादीर्मं व्रणः ॥

१४२–इष ,युध,इन्ध,दस,श्या, धू और सू धातुके उत्तर मक् प्रत्यय हो, इष्मः, अर्थात् काम और वसन्त । 'ईषी' ऐसे

दीर्घपाठमें वह दीर्घादि जानना चाहिये । युध्मः, अर्थात् शर और योद्धा । इध्मः समित् । दस्मो यजमानः । श्यामः । धूमः । सूमोऽन्तरिक्षम् । बाहुलकबलसे ईर्म्मम्, अर्थात् व्रण॥

१४३ 'युजिरुचितिजां कुश्च' ॥ ॥ युग्मम् । रुक्मम् । तिग्मम् ॥

१४३–युज, रुच और तिज धातुके उत्तर मक् प्रत्यय हो और धातुसम्बन्धी चवर्गको कवर्ग हो, यथा–युग्मम् । रुक्मम् । तिग्मम् ॥

१४४ 'हन्तेर्हि च' ॥ ॥ हिमम् ॥

१४४–हन् धातुके उत्तर मक् प्रत्यय हो और हन् धातुके स्थानमें हि आदेश हो, यथा–हिमम् ॥

१४५ 'भियः षुग् वा' ॥ ॥ भीष्मः–भीमः॥

१४५–भी धातुके उत्तर मक् प्रत्यय हो और विकल्पकरके षुक्का आगम हो, यथा–भीष्मः, भीमः ॥

१४६ 'घर्मः' ॥ ॥ घृधातोर्मग्गुणश्च निपात्यते ॥

१४६–'घर्मः' यह निपातनसे सिद्ध हो, अर्थात् घृ धातुके उत्तर मक् प्रत्यय और गुण हो ॥

१४७ 'ग्रीष्मः' ॥ ॥ ग्रसतेर्निपातोऽयम् ॥

१४७–'ग्रीष्मः' यह निपातनसे सिद्ध हो अर्थात् ग्रस धातुके उत्तर मक् प्रत्यय और उपधाको ईकार, सकारको षत्व हो ॥

१४८ 'प्रथेः षिवन् सम्प्रसारणं च' ॥ ॥ पृथिवी । षवन्नित्येके । पृथवी । 'पृथवी पृथिवी पृथ्वी' इति शब्दार्णवः ॥

१४८–प्रथ धातुके उत्तर षिवन् प्रत्यय हो और धातुको सम्प्रसारण हो, यथा–पृथिवी। किसी२ के मतसे षवन् प्रत्यय हो, पृथवी अत एव "पृथवी पृथिवी पृथ्वी" ऐसा शब्दार्णवमें है ॥

१४९ 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' ॥ ॥ अश्वः । प्रुष स्नेहनादौ । 'प्रुष्वः स्यादृतुसूर्ययोः' । प्रुष्वा जलकणिका । लट्वा पक्षिभेदः फलं च । कण्वं पापम् । बाहुलकादित्वे किण्वमपि । खट्वा । विश्वम् ॥

१४९–अशू, प्रुष्, लट्, कण्, खट् और विश् धातुओंके उत्तर क्वन् प्रत्यय हो, यथा–अश्वः । प्रुष् धातु स्नेहनादिमें है प्रुष्वः, अर्थात् ऋतु और सूर्य्य । प्रुष्वा, अर्थात् जलकणिका । लट्वा, अर्थात् पक्षिविशेष और फलविशेष । कण्वम्, अर्थात् पाप । बाहुलकबलसे इत्व होनेपर किण्वम् पद भी होगा । खट्वा । विश्वम् ॥

१५० 'इण्शीभ्यां वन्' ॥ ॥ एवो गन्ता । 'ये च एवामरुतः' असत्त्वे निपातोयम् । 'शेवं मित्राय वरुणाय' ॥

१५०–इण् और शी धातुके उत्तर वन् प्रत्यय हो, एवः, अर्थात् गन्ता । 'ये च एवामरुतः' यह असत्त्वमें निपातन है। 'शेवं मित्राय वरुणाय' ॥

१५१ 'सर्वनीघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा अतन्त्रे' ॥ ॥ अकर्तर्येते निपात्यन्ते । सृतमनेन विश्वमिति सर्वम्। निपूर्वाद् घृषेर्गुणाभावोऽपि। निघृष्यतेऽनेन निघृष्वः खुरः । रिष्वो हिंस्रः । लष्वो नर्तकः । लिष्व इत्यन्ये । तत्रोपधाया इत्वमपि । शेतेऽस्मिन् सर्वमिति शिवः शम्भुः । शीङो ह्रस्वत्वम् । पट्वो रथो भूलोकश्च । प्रहूयते इति प्रह्वः । ह्वेञ आकारवकारलोपः । जहातेरालोपो वा । ईषेर्वन् ईष्व आचार्यः । इष्व इत्यन्ये । अतन्त्रे किम् । सर्ता सारकः । बाहुलकाद् ह्सतेः । ह्स्वः ॥

१५१–सर्व, नीघृष्व, रिष्व, लष्व, शिव, पट्व, प्रह्व, ईष्व, यह कर्तृभिन्न वाच्यमें निपातनसे सिद्ध हों, यथा–सृतमनेन विश्वम्, इस विग्रहमें सर्वम् । निपूर्वक घृष् धातुको गुणाभाव भी निपातनसे हो, यथा–निघृष्यतेऽनेन निघृष्वः खुरः । रिष्वो हिंस्रः । लष्वो नर्त्तकः । किसीके मतसे 'लिष्वः' यह भी होगा, इस स्थलमें उपधाको निपातनसे इकार भी हुआ । शेतेऽस्मिन् सर्वम्, इस विग्रहमें–शिवः शम्भुः, यहां शीङ् धातुको ह्रस्व हुआ । पट्वो रथो भूलोकश्च । प्रहूयते इति=प्रह्वः, यह ह्वेञ् धातुके आकार और वकारका लोप होकर अथवा ओहाक् धातुके आकारका लोप होकर सिद्ध है । ईष् धातुके उत्तर वन् प्रत्यय होकर–ईष्व आचार्यः । किसीके मतसे 'इष्वः' ऐसा होगा । कर्तृवाच्यमें तो 'सर्त्ता सारकः' ऐसा होगा । बाहुलकबलसे ह्स् धातुके उत्तर भी वन् प्रत्यय होगा, यथा–ह्स्वः ॥

१५२ 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' ॥ ॥ शेव इत्यन्तोदात्तार्थम् । यान्त्यनेन यह्वः ॥ ह्रस्वो हुगागमश्च । लिहन्त्यनया जिह्वा । लकारस्य जः गुणाभावश्च । गिरन्त्यनया ग्रीवा । ईडागमश्च । आप्नोतीत्याप्वा वायुः । मीवा उदरकृमिः । वायुरित्यन्ये ॥

१५२–शेव, यह्वा, जिह्वा, ग्रीवा, आप्वा, मीवा यह पद निपातनसे सिद्ध हों । शेवः यह अन्तोदात्तार्थ निपातन है, नहीं तो "इण्शीभ्याम्०" इसीसे सिद्ध होनेसे निपातन व्यर्थही होजाता । यान्ति अनेन=यह्वः यहां ह्रस्व और हुगागम हुआहै लिहन्त्यनया इति=जिह्वा, यहां लकारके स्थानमें जकार और गुणाभाव हुआहै । गिरन्त्यनया=ग्रीवा, यहां ईडागमभी हुआ है। आप्नोति इति=आप्वा वायुः । मीवा उदरकृमिः । अन्यमतसे वायु समझना ॥

१५३ 'कॄगॄशॄदॄभ्यो वः' ॥ ॥ कर्वः काम आखुश्च । गर्वः । शर्वः । दर्वो राक्षसः ॥

१५३–कॄ, गॄ, शॄ, दॄ धातुओंके उत्तर व प्रत्यय हो, यथा–कर्वः, अर्थात् काम आखुश्च । गर्वः । शर्वः । दर्वो राक्षसः ॥

१५४ 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' ॥ ॥ यौतीति युवा । वृषा इन्द्रः । तक्षा । राजा । धन्वा मरुः । धन्व शरासनम् । द्युवा सूर्यः । प्रतिदीव्यन्त्यस्मिन् प्रतिदिवा दिवसः ॥

१५४–यु, वृष्, तक्ष्, राज्, धन्व्, द्यु और प्रतिपूर्वक दिव धातुके उत्तर कनिन् प्रत्यय हो, यौति इति=युवा । वृषा, अर्थात् इन्द्रः । तक्षा । राजा । धन्वा मरुः । धन्व शरासनम् । द्युवा सूर्य्यः । प्रतिदीव्यन्ति अस्मिन्=प्रतिदिवा दिवसः ॥

१५५ 'सप्यशूभ्यां तुट् च' ॥ ॥ सप्त । अष्ट ॥

१५५–सप् और अश् धातुके उत्तर कनिन् प्रत्यय हो और तुट्का आगम हो, यथा–सप्त । अष्ट ॥

१५६ 'नञि जहातेः' ॥ ॥ अहः ॥

१५६–नञ्पूर्वक हा धातुके उत्तर कनिन् प्रत्यय हो, अहः ॥

१५७ 'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति' ॥ ॥ एते त्रयोदश कनिन्प्रत्ययान्ता निपात्यन्ते । श्वयतीति श्वा । उक्षा । पूषा । प्लिह गतौ । इकारस्य दीर्घत्वम् । प्लेहतीति प्लीहा कुक्षिव्याधिः । क्लिदू आर्द्रीभावे । क्लिद्यति क्लेदा चन्द्रः । स्निह्यतेर्गुणः । स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च । मुह्यन्त्यस्मिन्नाहते मूर्धा । मुहेरुपधाया दीर्घो धोन्तादेशो रमागमश्च । मज्जत्यस्थिषु मज्जा अस्थिसारः । अर्यपूर्वो माङ् । अर्यमा । विश्वं प्साति विश्वप्साऽग्निः । परिजायते परिज्मा चन्द्रोऽग्निश्च । जनेरुपधालोपो मश्चान्तादेशः । मातरि अन्तरिक्षे श्वयतीति मातरिश्वा । धातोरिकारलोपः । मह पूजायाम् । हस्य घो वुगागमश्च । मघवा इन्द्रः ॥

॥ इत्युणादिषु प्रथमः पादः ॥

१५७–श्वन्, उक्षन्, पूषन्, प्लीहन्, क्लेदन्, स्नेहन्, मूर्द्धन्, मज्जन्, अर्य्यमन्, विश्वप्सन्, परिज्मन्, मातरिश्वन्, मघवन्, यह कनिन्प्रत्ययान्त निपातनसे सिद्ध हों, श्वयतीति श्वा । उक्षा । पूषा । 'प्लिह गतौ' इसके इकारको दीर्घ होकर–'प्लेहति' इस विग्रहमें प्लीहा, अर्थात् कुक्षिव्याधिः । क्लिदू आर्द्रीभावे । क्लिद्यति इति=क्लेदा चन्द्रः । स्निह् धातुको गुण होकर–स्निह्यति, इस विग्रहमें स्नेहा, अर्थात् सुहृत् और चन्द्र । मुह्यन्त्यस्मिन् आहते=मूर्द्धा, यहां धातुकी उपधाको दीर्घ और धकारान्तादेश और रम्का आगम हुआ । मज्जति अस्थिषु=मज्जा, अर्थात् हड्डीका सार (चरबी) । अर्य्यपूर्वक माङ् धातुके उत्तर कनिन् होकर=अर्य्यमा । विश्वं प्साति, इस विग्रहसें विश्वप्सा । अग्निः । परिजायते परिज्मा अर्थात् चन्द्र और अग्नि । जन धातुकी उपधाका लोप हो और अन्तमें मकार आदेश हो, मातर्य्यन्तरिक्षे श्वयति इति मातरिश्वा । धातुके इकारका लोप हुआ । मह धातु पूजामें है । हके स्थानमें घ और वुगागम होगा, मघवा इन्द्रः ॥

॥ इत्युणादिसूत्रे प्रथमपादः ॥

---

१५८ 'कृहृभ्यामेणुः' ॥ ॥ करेणुः । हरेणुर्गन्धद्रव्यम् ॥

१५८–कृ और हृ धातुके उत्तर एणु प्रत्यय हो, यथा–करेणुः । हरेणुः । इस शब्दका अर्थ गन्धद्रव्य समझना ॥

१५९ 'हनिकुषिनीरमिकाशिभ्यः क्थन्' ॥ ॥ हथो विषण्णः । कुष्ठः । नीथो नेता । रथः । काष्ठम् ॥

१५९–हनि, कुषि, नी, रमि, काशि धातुके उत्तर क्थन् प्रत्यय हो, यथा–हथः अर्थात् विषण्णः । कुष्ठः । नीथो नेता । रथः काष्ठम् ॥

१६० 'अवे भृञः' ॥ ॥ अवभृथः ॥

१६०–अवपूर्वक भृञ् धातुके उत्तर क्थन् प्रत्यय हो, यथा–अवभृथः ॥

१६१ 'उषिकुषिगार्तिभ्यस्थन्' ॥ ॥ ओष्ठः । कोष्ठम् । गाथा । अर्थः । बाहुलकात्–शोथः ॥

१६१–उषि, कुषि, गा और आर्त्ति धातुके उत्तर थन् प्रत्यय हो, ओष्ठः । कोष्ठम् । गाथा । अर्थः । बाहुलकबलसे–शोथः ॥

१६२ 'सर्तेर्णित्' ॥ ॥ सार्थः समूहः ॥

१६२–सर्त्ति धातुके उत्तर थन् प्रत्यय हो और यह थन् णित्संज्ञक हो, यथा–सार्थः । अर्थात् समूहः ॥

१६३ 'जॄवृञ्भ्यामूथन्' ॥ ॥ जरूथं मांसम् । 'वरूथो रथगुप्तौ ना' ॥

१६३–जॄ और वृञ् धातुके उत्तर ऊथन् प्रत्यय हो, यथा–जरूथम्=मांसम् । "वरूथो रथगुप्तौ ना" वरूथ शब्द रथगुप्ति अर्थमें पुल्लिंग है ॥

१६४ 'पातॄतुदिवचिरिचिसिचिभ्यस्थक्' ॥ ॥ पीथो रविर्घृतं पीथम् । 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्' इति विश्वः । तुत्थोऽग्निः । उक्थं सामभेदः । रिक्थम् । बाहुलकादृचेरपि । 'रिक्थमृक्थं धनं वसु' । सिक्थम् ॥

१६४–पा, तॄ, तुदि, वाचि, रिचि, सिचि धातुके उत्तर थक् प्रत्यय हो, यथा–पीथो रविर्घृतं पीथम् । "तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु । अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्॥" तीर्थ, शास्त्र, यज्ञ क्षेत्र, उपाय, उपाध्याय, मंत्री, अवतार, ऋषि जुष्ट (सेवित), जल और स्त्रीके रजमें यह शब्द माना है । इति विश्वः । तुत्थोऽग्निः । उक्थं सामभेदः । रिक्थं धनम् । बाहुलक बलसे ऋच धातुके उत्तर भी थक् प्रत्यय हो । "रिक्थमृक्थं धनं वसु" सिक्थं अन्नम् ॥

१६४ 'अर्तेर्निरि' ॥ ॥ निर्ऋथं साम ॥

१६५-निरपूर्वक ऋ धातुके उत्तर थक् प्रत्यय हो, यथा-निर्ऋथं साम ॥

१६६ 'निशीथगोपीथावगथाः' ॥ ॥ निशीथोऽर्धरात्रः रात्रिमात्रं च । गोपीथं तीर्थम् । अवगथः प्रातःस्नातः ॥

१६६-निशीथ, गोपीथ, अवगथ, यह तीन पद निपातनसे सिद्ध हों । निशीथोऽर्द्धरात्रः रात्रिमात्रं च । गोपीथं तीर्थम् । अवगथः प्रातः स्नातः ॥

१६७ 'गश्चोदि' ॥ ॥ उद्गीथः साम्नो भागविशेषः ॥

१६७-उत्पूर्वक गै धातुके उत्तर थक् प्रत्यय हो, यथा-उद्गीथः, सामका भागविशेष ॥

१६८ 'समीणः'॥ ॥समिथो वह्निः संग्रामश्च॥

१६८-सम्पूर्वक इण् धातुके उत्तर थक् प्रत्यय हो, यथा, समिथः वह्नि और संग्राम ॥

१६९ 'तिथपृष्ठगूथयूथप्रोथाः' ॥ ॥ तिजेर्जलोपः । तिथोऽनलः कामश्च । पृष्ठम् । गूथं विष्ठा । यूथं समूहः । 'प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते' ॥

१६९-तिथ, पृष्ठ, गूथ, यूथ, प्रोथ यह सम्पूर्ण शब्द थक् प्रत्ययान्त निपातनसे सिद्ध हों । तिज धातुके जकारका लोप होगा । तिथः अनल और काम । पृष्ठम् । गूथं विष्ठा । यूथं समूहः । "प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते"। प्रोथम्-घोडेका मुख, प्रोथम्-प्रस्थान ॥

१७० 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्' ॥ ॥ द्वात्रिंशद्भ्यो रक् स्यात्।वलियलोपः।स्फारम्।न्यङ्क्वादित्वात्कुत्वम् । तक्रम् । वक्रम् । शक्रः । क्षिप्रम् । क्षुद्रः । सृप्रश्चन्द्रः । तृप्रः पुरोडाशः । दृप्रो बलवान् । वन्द्रः पूजकः । उन्दी-उन्द्रो जलचरः । श्वित्रं कुष्ठम् । 'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' । अजेर्वी । वीरः । नीरम् । पद्रो ग्रामः । मद्रो हर्षः देशभेदश्च । मुद्रा प्रत्ययकारिणी । खिद्रो रोगो दरिद्रश्च । छिद्रम् । भिद्रं वज्रम् । मन्द्रः । चन्द्रः । पचाद्यचि चन्दोपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिः' । दह्रोऽग्निः । दस्रः स्ववैंद्यः । दभ्रः समुद्रः स्वल्पं च । वसेः संप्रसारणे ॥

१७०-स्फायि, तञ्चि, वञ्चि, शकि, क्षिपि, क्षुदि, सृपि, तृपि, दृपि, वन्दि, उन्दि, श्विति, वृ, त्यजि, नी, पदि, मदि, मुदि, खिदि, छिदि, भिदि, मन्दि, चन्दि, दहि, दसि, दम्भि, वसि, वसि, वाशि, शीङ् हसि, सिधि, और शुभि इन ३२ धातुओंके उत्तर रक् प्रत्यय हो, वल परे रहते यकारका लोप हो। स्फारम्।न्यङ्क्वादि गणके मध्यस्थ होनेके कारण तञ्चि धातुके तकारको कुत्व हो । तक्रम् । वक्रम् । शक्रः । क्षिप्रम् । क्षुद्रः । सृप्रः । चन्द्रः। तृप्रः पुरोडाशः । दृप्रो-बलवान् । वन्द्रः-पूजकः । उन्दी धातु । उन्द्रो जलचरः । श्वित्रं कुष्ठम् । वृत्रः अर्थात् शत्रु, ध्वनि, ध्वान्त, शैल, चक्र, और दानव । अज धातुके स्थानमें वी आदेश हो, पश्चात् रक् प्रत्यय हो । वीरः । नीरम् । पद्रः-ग्रामः।मद्रः हर्ष और देशविशेष । मुद्रा प्रत्ययकारिणी (मुहर) । खिद्रः रोग विशेष और दरिद्र । छिद्रम् । भिद्रं-वज्रम् । मन्द्रः । चन्द्रः । पचादित्वके कारण चन्दः पद भी होताहै । " हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिः " । दह्रो अर्थात् अग्निः । दस्रः स्ववैंद्यः । अश्विनीकुमार । दभ्रः समुद्रः स्वल्पञ्च । वस धातुको सम्प्रसारण हुआ ॥

३१६८न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् । ८ । ३ । ११० ॥

रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्धन्यो न स्यात् । पूर्वपदादिति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भूयोभिप्राया । तेन शासिवसीतिप्राप्तमपि न । उस्रो रश्मिः । उस्रा गौः । वाश्रो दिवसः । वाश्रं मन्दिरम् । शीरोऽजगरः । हस्रो मूर्खः । सिध्रः साधुः । शुभ्रम् ॥ 'मुसेरक्' ॥ मुस्रम् । बाहुलकाद्-अश्रु ॥ ॥

३१६८-रकार परे रहते सकार और सृप्यादि सवनादि धातुओंका जो सकार वह मूर्द्धन्य न हो । " पूर्वपदात् ३६४३"इस सूत्रकी प्राप्ति हुई उसको निषेध करते हैं । यह वृत्ति पुनर्वार होगी यह अभिप्राय प्रकाश करते हैं । इसी कारण " शासिवसि० २४१०" इस सूत्रकी भी प्राप्ति हुईथी किन्तु वह नहीं हुई । उस्रः रश्मिः। उस्रा गौः। वाश्रो दिवसः। वाश्रं मन्दिरम् । शीरोऽजगरः । हस्रो मूर्खः । सिध्रः साधुः । शुभ्रम् । मुस् धातुके उत्तर रक् प्रत्यय । मुस्रम् । बाहुलकके कारण अश्रु ॥

१७१ 'चकिरम्योरुच्चोपधायाः' ॥ ॥ चुक्रमम्लद्रव्यम् । रुम्रोऽरुणः ॥

१७१-चकि और रमि धातुके उत्तर रक् प्रत्यय हो और उपधाके स्थानमें उकार हो । यथा, चुक्रम् अम्लद्रव्यम्-चूक । रुम्रोऽरुणः ॥

१७२ 'वौ कसेः' ॥ ॥ विकुस्रश्चन्द्रः ॥

१७२--विपूर्वक कस धातुके उत्तर रक् प्रत्यय हो । विकुस्रः चन्द्रः ॥

१७३ 'अमितम्योर्दीर्घश्च' ॥ ॥ आम्रम् । ताम्रम् ॥

१७३-अमि और तमि धातुके उत्तर रक् प्रत्यय हो और पूर्व स्वरको दीर्घ हो । आम्रम् । ताम्रम् ॥

१७४ 'निन्देर्नलोपश्च' ॥ ॥ निद्रा ॥

१७४–निन्द धातुके नकारका लोप हो और रक् प्रत्यय हो। निद्रा ॥

१७५ 'अर्देर्दीर्घश्च' ॥ ॥ आर्द्रम् ॥

१७५–अर्द धातुके उत्तर रक् प्रत्यय हो और पूर्व स्वरको दीर्घ हो। आर्द्रम् (गीला) ॥

१७६ 'शुचेर्दश्च' ॥ ॥ शूद्रः ॥

१७६–शुच धातुके उत्तर रक् प्रत्यय हो और चकारके स्थानमें दकार हो। पूर्व स्वरको दीर्घ हो। शूद्रः ॥

१७७ 'दुरीणो लोपश्च' ॥ ॥ दुःखेनेयते प्राप्यत इति दूरम् ॥

१७७–दुर् शब्द पूर्वक इण् धातुके उत्तर रक् प्रत्यय हो। और इण् धातुका लोप व स्वरको दीर्घ हो।दुःखेन ईयते प्राप्यते इति दूरम्। दुर्+इण्+रक्=दुर्+रक्=दूर+अम्=दूरम् ॥

१७८ 'कृतेश्छः क्रू च' ॥ ॥ कृच्छ्रम्। क्रूरः॥

१७८–कृत धातुके उत्तर रक् प्रत्यय हो और तकारको च्छ आदेश और कृत्को क्रू आदेश हो। कृच्छ्रम्। क्रूरः ॥

१७९ 'रोदेर्णिलुक् च'॥ ॥रोदयतीति रुद्रः॥

१७९–रोदि धातुके उत्तर रक् प्रत्यय हो और णिका लुक् हो। रोदयति इति रुद्रः ॥

१८० 'बहुलमन्यत्रापि संज्ञाछन्दसोः' ॥ ॥ णिलुगित्येव। 'वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे। ततः पर्णसहो वान्ति ततो देवः प्रवर्षति' ॥

१८०–संज्ञा और छंदमें और उससे भिन्न अन्यत्र भी णिके लुक्का प्रयोग देखा जाताहै। "वान्ति पर्णशुषो वातास्ततः पर्णमुचो परे।ततः पर्णसहो वान्ति ततो देवः प्रवर्षति"॥

१८१ 'जोरी च'॥ ॥जीरोऽणुः। ज्यश्चेत्येके॥

१८१–जु धातुके उत्तर रक् प्रत्यय और उकारके स्थानमें ईकार हो। यथा–जीरः अर्थात् अणुः। ज्या धातुके उत्तर रक् प्रत्यय होनेपर जीरः यह रूप होताहै ऐसा कोई २ कहतेहैं ॥

१८२ 'सुसूधागृधिभ्यः क्रन्' ॥ ॥ सुरः। सूरः। धीरः। गृध्रः ॥

१८२–सु, सू, धा, गृधि धातुके उत्तर क्रन् प्रत्यय हो। सुरः। सूरः। धीरः। गृध्रः ॥

१८३ 'शुसिचिमीनां दीर्घश्च'॥ ॥शुः सौत्रः। शूरः। सीरम्। चीरम्। मीरः समुद्रः ॥

१८३–शु, सि, चि, मि, धातुके उत्तर रक् प्रत्यय हो स्वरको दीर्घ हो। शु धातु सौत्र है। शूरः। सीरम्। चीरम्। मीरः अर्थात् समुद्रः ॥

१८४ 'वाविन्धेः' ॥ ॥ वीध्रं विमलम् ॥

१८४–वि उपसर्गपूर्वक इन्ध धातुके उत्तर रक् प्रत्यय हो और नकारका लोप हो। और इकारके स्थानमें ईकार दीर्घ हो। वीध्रम्–अर्थात् विमलम् (निर्मल) ॥

१८५ 'वृधिवपिभ्यां रन्' ॥ ॥ वर्ध्रं चर्म। वप्रः प्राकारः ॥

१८५–वृध और वपि धातुके उत्तर रन् प्रत्यय हो। वर्ध्रं चर्म। वप्रः प्राकारः (परकोटा) ॥

१८६ 'ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवत्रेरामालाः' ॥ ॥ रन्नन्ता ऊनविंशतिः।निपातनाद्गुणाभावः।ऋज्रो नायकः। इदि इन्द्रः। अङ्गेर्नलोपः। अग्रम्। 'वज्रोऽस्त्री हीरके पवौ'। डुवप् उपधाया इत्वम्। विप्रः। कुम्बिचुम्ब्योर्नलोपः कुब्रमरण्यम्। चुब्रं मुखम्। क्षुर विलेखने। रेफलोपः। अगुणः। क्षुरः। खुर छेदने। रलोपो गुणाभावश्च। खुरः। भन्देर्नलोपः। भद्रम्। उच समवाये। चस्य गः। उग्रः। जिभी–भेरी। पक्षे लः। भेलो जलतरणद्रव्यम्। शुचेश्चस्य कः। शुक्रः। पक्षे लः। शुक्लः। गुङ् वृद्धिः। 'गौरोऽरुणे सिते पीते'। वन संभक्तौ। वत्रो विभागी। इणो गुणाभावः। 'इरा मद्ये च वारिणि'। मा माने। माला॥

१८६–ऋज्र, इन्द्र, अग्र, वज्र, विप्र, कुब्र, चुब्र, क्षुर, खुर, भद्र, उग्र, भेर, भेल, शुक्र, शुक्ल, गौर, वत्र, इरा, माला यह१९ रन् प्रत्ययान्त शब्द निपातनसे सिद्ध हों, निपातनसे गुण न हो, यथा–ऋज्रो नायकः। इदि–इन्द्रः। अङ्ग धातुके नकारका लोप हो, अग्रम्। "वज्रोऽस्त्री हीरके पवौ" वप् धातुकी उपधाके स्थानमें ईकार हो। विप्रः। कुम्बि और चुम्ब धातुके नकारका लोप हो। कुब्रम्–अरण्यम्। चुब्रं–मुखम्। क्षुरः। खुर धातु छेदनमें है। रकारका लोप और गुणाभाव निपातनसे हो। खुरः। भन्द धातुके नकारका लोप हो। भद्रम्। उच धातु समवायमें है। चकारके स्थानमें ग हो। उग्रः। जिभी–भेरी, विकल्प पक्षमें ल हो। भेलो जलतरणद्रव्यम्। शुच् धातुके चकारके स्थानमें ककार हो। शुक्रः। पक्षमें ल हो। शुक्लः। गुङ् धातुको वृद्धि हो। "गौरोऽरुणे सिते पीते" वन धातु संभक्तिमें है। वत्रः–विभागी। इण् धातुको गुणाभाव हो। "इरा मद्ये च वारिणि"। मा धातु मानमें है। माला ॥

१८७ 'समि कस उकन्' ॥ ॥ कस गतौ। सम्यक्कसन्ति पलायन्ते जना अस्मादिति संकसुको दुर्जनः अस्थिरश्च ॥

१८७–सम्पूर्वक कस धातुके उत्तर उकन् प्रत्यय हो। कस धातु गतिमें है। सम्यक् कसन्ति पलायन्ते जनाः अस्मादिति संकसुकः–दुर्जनः अस्थिरश्च (स्थिर न रहनेवाला) ॥

१८८ 'पचिनशोर्णुकन्कनुमौ च'॥ ॥पचेः कः। पाकः सूपकारः। नशेर्नुम्। नंशुकः ॥

१८८–पच और नश धातुके उत्तर णुकन् प्रत्यय हो, और क्रमसे पच्को ककारान्तादेश नशको नुम्का आगम हो। पाकुकः सूपकारः। नश धातुको नुम् आगम होगा। नंशुकः ॥

१८९ 'भियः क्रुकन्' ॥ ॥ भीरुकः ॥

१८९-भी धातुके उत्तर क्रुकन् प्रत्यय हो । भीरुकः ॥

१९० 'कुन् शिल्पिसंज्ञयोरपूर्वस्यापि' ॥ ॥ रजकः । इक्षुकुट्टकः । चरकः । चष भक्षणे । चषकः । शुनकः । भषकः ॥

१९०-पूर्वमें कोई पद न हो तो शिल्पी होनेपर और संज्ञा होनेपर धातुके उत्तर क्वुन् प्रत्यय हो । रजकः (धोबी) इक्षुकुट्टकः । चरकः । चष भक्षणे । चषकः।शुनकः । भषकः (कुक्कुर) ॥

१९१ 'रमे रश्च लो वा' ॥ ॥ रमको विलासी । लमकः ॥

१९१-रम् धातुके उत्तर क्वुन् प्रत्यय हो और रकारके स्थानमें विकल्प करके लकार हो। रमकः विलासी । लमकः ॥

१९२ 'जहातेर्द्वे च' ॥ ॥ जहकस्त्यागी कालश्च ॥

१९२-हा धातुके उत्तर क्वुन् प्रत्यय हो और धातुको द्वित्व हो, यथा-जहकः त्यागी कालश्च । त्यागकरनेवाला और काल ॥

१९३ 'ध्मो धम च' ॥ ॥ धमकः कर्मकारः ॥

१९३-ध्मा धातुके स्थानमें धम आदेश हो और उसके उत्तर क्वुन् प्रत्यय हो । धमकः-कर्मकारः ॥

१९४ 'हनो वध च' ॥ ॥ वधकः ॥

१९४-हन धातुके उत्तर क्वुन् प्रत्यय हो और धातुके स्थानमें वध आदेश हो, वधकः ॥

१९५ 'बहुलमन्यत्रापि'॥ ॥ कुह विस्मापने । कुहकः । कृतकम् ॥

१९५--बाहुलकबलसे अन्य धातुओंके उत्तर क्वुन् प्रत्यय हो । कुह धातु विस्मापनमें है । कुहकः । कृतकम् ॥

१९६ 'कृषेर्वृद्धिश्चोदीचाम्' ॥ ॥ कार्षकः । कृषकः ॥

१९६-कृष धातुके उत्तर क्वुन् प्रत्यय और धातुके ऋकारको वृद्धि हो । उदीच्योंके मतमें-कार्षकः। कृषकः ॥

१९७ 'उदकं च' ॥ ॥ प्रपञ्चार्थम् ॥

१९७-उन्दी धातुके उत्तर भी क्वुन् प्रत्यय हो । उदकम् । पृथक् रूपसे निर्देश केवल विस्तारार्थ है ॥

१९८ 'वृश्चिकृषोः किकन्' ॥ ॥ वृश्चिकः । कृषिकः ॥

१९८-वृश्चि और कृष धातुके उत्तर किकन् प्रत्यय हो, यथा-वृश्चिकः । कृषिकः ॥

१९९ 'प्राङि पणिकषः' ॥ ॥ प्रापणिकः पण्यविक्रयी । प्राकषिकः परदारोपजीवी ॥

१९९-प्रपूर्वक और आङ्पूर्वक पण और कष धातुके उत्तर किकन् प्रत्यय हो । यथा-प्रापणिकः पण्यविक्रयी । प्राकषिकः परदारोपजीवी ॥

२०० 'मुषेर्दीर्घश्च' ॥ ॥ मूषिक आखुः ॥

२००-मुष धातुके उत्तर किकन् प्रत्यय हो और दीर्घ हो, यथा-मूषिकः आखुः ॥

२०१ 'स्यमेः संप्रसारणं च' ॥ ॥ चाद्दीर्घः। सीमिको वृक्षभेदः ॥

२०१-स्यमि धातुके उत्तर किकन् प्रत्यय हो, सम्प्रसारण और चकारसे दीर्घ हो, सीमिकः-वृक्षभेदः ॥

२०२ 'क्रिय इकन्' ॥ ॥ क्रयिकः क्रेता ॥

२०२--क्री धातुके उत्तर इकन् प्रत्यय हो । क्रयिकः क्रेता ॥

२०३ 'आङि पणिपनिपतिखनिभ्यः'॥ ॥ आपणिकः । आपनिकः इन्द्रनीलः किरातश्च । आपतिकः श्येनो दैवायत्तश्च । आखनिको मूषिको वराहश्च ॥

२०३-आङ्पूर्वक पण, पन, पत और खन धातुके उत्तर इकन् प्रत्यय हो । आपणिकः । आपनिकः-इन्द्रनीलः किरातश्च । आपतिकः श्येनो दैवायत्तश्च (दैवाधीन) । आखनिकः मूषिकः वराहश्च ॥

२०४ 'श्यास्त्याहृञविभ्य इनच्' ॥ ॥ श्येनः । स्त्येनः । हरिणः । अविनोऽध्वर्युः ॥

२०४--श्या, स्त्या, हृञ् और अवि धातुके उत्तर इनच् प्रत्यय हो, यथा-श्येनः । स्त्येनः । हरिणः । अविनः-अध्वर्युः ॥

२०५ 'वृजेः किच्च' ॥ ॥ वृजिनम् ॥

२०५-वृज धातुके उत्तर इनच् प्रत्यय हो और प्रत्यय कित्संज्ञक हो । वृजिनम् ॥

२०६ 'अजेरज च' ॥ ॥ वीभाववाधनार्थम् । अजिनम् ॥

२०६-अजि धातुके उत्तर इनच् प्रत्यय हो, और अजि धातुके स्थानमें अज्+इन रहते वी आदेश न हो,यथा-अजिनम् (चमडा) ॥

२०७ 'बहुलमन्यत्रापि' ॥ ॥ कठिनम् । नलिनम् । मलिनम् । कुण्डिनम् । यतेः ॥ यत्परुषि दिनम् । दिवसोऽपि दिनम् ॥

२०७-अन्यत्र भी बाहुलकबलसे प्रयोग देखा जाताहै, यथा-कठिनम् । नलिनम् । मलिनम् । कुण्डिनम् । दो धातुके उत्तर इनच् प्रत्यय हो, और बाहुलकबलसे आकारका लोप हुआ । " यत्परुषि दिनम् । दिवसोऽपि दिनम् " ॥

२०८ 'द्रुदक्षिभ्यामिनन्' ॥ ॥ द्रविणम् । दक्षिणः । दक्षिणा ॥

२०८-द्रु और दक्षि धातुके उत्तर इनन् प्रत्यय हो, द्रविणम् । दक्षिणः । दक्षिणा ॥

२०९ 'अर्तेः किदिच्च' ॥ ॥ इरिणं शून्यम् ॥

२०९-ऋ धातुके उत्तर इनन् प्रत्यय हो, और इस

प्रत्ययकी कित्संज्ञा हो, और धातुके स्थानमें इत् आदेश हो, यथा, इरिणं शून्यम् ॥

२१० 'वेपितुह्योर्ह्रस्वश्च' ॥ ॥ विपिनम् । तुहिनम् ॥

२१०–वेपि और तुहि धातुके उत्तर इनन् प्रत्यय हो और ह्रस्व हो । यथा, विपिनम् । तुहिनम् (तुषार) ॥

२११ 'तलिपुलिभ्यां च' ॥ ॥ 'तलिनं विरले स्तोके स्वच्छेऽपि तलिनं त्रिषु' । पुलिनम् ॥

२११–तलि और पुलि धातुके उत्तर इनन् प्रत्यय हो । यथा, तलिनम् अर्थात् विरल, स्तोक, स्वच्छ । स्वच्छार्थ तलिन शब्द त्रिलिङ्ग है । पुलिनम् ॥

२१२ 'गर्वेरत उच्च' ॥ ॥ गौरादित्वात् ङीष् । गुर्विणी गर्भिणी ॥

२१२–गर्व धातुके उत्तर इनन् प्रत्यय हो और अकारके स्थानमें उकार हो । गौरादिके कारण ङीष् प्रत्यय होकर स्त्रीलिङ्गमें गुर्विणी अर्थात् गर्भिणी ॥

२१३ 'रुहेश्च' ॥ ॥ रोहिणः ॥

२१३–रुह धातुके उत्तर इनन् प्रत्यय हो यथा–रोहिणः ।

२१४ 'महेरिनण् च' ॥ ॥ चादिनन् । माहिनम्–महिनं राज्यम् ॥

२१४–महि धातुके उत्तर इनण् और इनन् प्रत्यय हो । यथा, माहिनम् , महिनम् , राज्यम् ।

२१५ 'क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणं च' ॥ ॥ वाक् । प्राट् । श्रीः । स्रवत्यतो घृतादिकमिति स्रूर्यज्ञोपकरणम् । द्रूर्हिरण्यम् । कटप्रूः कामरूपी कीटश्च । 'जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्' ॥

२१५–वाचि, प्रच्छि, श्रि, स्रु, द्रु, प्रु, जु धातुके उत्तर क्विप् प्रत्यय हो, पश्चात् दीर्घ हो, और संप्रसारण न हो, यथा, वाक् । प्राट् । श्रीः । स्रवत्यतो घृतादिकम् इति स्रूः यज्ञोपकरणम् । द्रूर्हिरण्यम् । कटप्रूः कामरूपी और कीटविशेष । "जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्" । अर्थात् आकाश, सरस्वती, पिशाची और वेग अर्थमें, स्त्रीलिंगमें जानना ॥

२१६ 'आप्नोतेर्ह्रस्वश्च' ॥ ॥ आपः । अपः । अद्भिः । अद्भ्यः ॥

२१६–आप धातुके उत्तर क्विप् प्रत्यय हो । और आकार को ह्रस्व हो । आपः । अपः । अद्भिः । अद्भ्यः ॥

२१७ 'परौ व्रजेः षश्च पदान्ते' ॥ ॥ व्रजेः क्विब्दीर्घौ स्तः पदान्ते तु षश्च । परिव्राट् । परिव्राजौ ॥

२१७–परिपूर्वक व्रज धातुके उत्तर क्विप् प्रत्यय हो पश्चात् पूर्व स्वरको दीर्घ हो और पदके अन्त वर्णके स्थानमें ष हो, यथा, परिव्राट् । परिव्राजौ ॥

२१८ 'हुवः श्लुवच्च' ॥ ॥ जुहूः ॥

२१८–हु धातुके उत्तर क्विप् प्रत्यय हो । और श्लुवत् कार्य और दीर्घ हो । यथा, जुहूः ॥

२१९ 'स्रुवः कः' ॥ ॥ स्रुवः ॥

२१९–स्रु धातुके उत्तर क प्रत्यय हो । यथा, स्रुवः ।

२२० 'चिक् च ॥ ॥ इकार उच्चारणार्थः । क इत्कुत्वम् । स्रुक् । स्रुवं च स्रुचश्च सम्मृड्ढि ॥

२२०– स्रु धातुके उत्तर चिक् प्रत्यय हो, चिक्का इकार उच्चारणार्थ है ककारकी इत्संज्ञा हुई और चकारके स्थानमें ककार हुआ । स्रुक् । स्रुवं च स्रुचश्चसंमृड्ढि ॥

२२१ 'तनोतेरनश्च वः' ॥ ॥ तनोतेश्चिक् प्रत्ययः । अनो वशब्दादेशश्च । त्वक् ॥

२२१–तन धातुके उत्तर चिक् प्रत्यय हो और अन् भागके स्थानमें व आदेश हो त्वक् । (खाल) ॥

२२२ 'ग्लानुदिभ्यां डौः' ॥ ॥ ग्लौः । नौः ॥

२२२–ग्ला और नुदि धातुके उत्तर डौ प्रत्यय हो । ग्लौः । नौः ॥

२२३ 'च्विरव्ययम्' ॥ ॥ डौरित्येव । ग्लौ करोति । कृन्मेजन्त इति सिद्धे नियमार्थमिदम् । उणादिप्रत्ययान्तश्च्व्यन्त एवेति ॥

२२३–च्वि प्रत्यय अव्यय अर्थात् डौ प्रत्ययान्त च्व्यन्त अव्यय संज्ञक हो यथा–ग्लौ करोति। "कृन्मेजन्तः(४४९)"इस सूत्रसे अव्यय संज्ञा होजाती तो भी यह सूत्र किस लिये कहा?ऐसा कहो तो नियमार्थ यह सूत्र है कि उणादि प्रत्ययान्त पद च्वि प्रत्ययान्त ही अव्यय संज्ञक हों, इस नियमसे ग्लौः नौः इस स्थलमें उक्त सूत्रसे अव्यय संज्ञा न हुई ॥

२२४ 'रातेर्डैः' ॥ ॥ राः । रायौ । रायः ॥

२२४––रा धातुके उत्तर डै प्रत्यय हो । राः । रायौ । रायः ॥

२२५ 'गमेर्डोः' ॥ ॥ 'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु' बाहुलकाद् द्युतेरपि डोः । 'द्यौः स्त्री स्वर्गान्तरिक्षयोः' ॥

२२५–गम् धातुके उत्तर डोस् प्रत्यय हो । "गौर्नादित्ये[1] बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बु रश्मिदृग्बाणलोमसु" ॥ बाहुलकबलसे द्युत धातुके उत्तर भी डोस् प्रत्यय हो । "द्यौः स्त्री स्वर्गान्तरिक्षयोः " । द्यौः स्त्रीलिंग है । स्वर्ग और अन्तरिक्षमें वर्तमान है ॥

---

१ गोशब्द–आदित्य, बलीवर्द, किरण, यज्ञ अर्थमें पुँलिङ्ग है और दिशा, वाणी, भूमि, सुरभी, स्वर्ग, वज्र, अम्बु, रश्मि, नेत्र, बाण और लोम अर्थमें पुँलिंग और स्त्रीलिङ्ग है ॥

२२६ 'भ्रमेश्च डूः' ॥ ॥ भ्रूः । चाद्गमेः । अग्रेगूः ।

२२६–भ्रम धातुके उत्तर डू प्रत्यय हो । भ्रूः । गम् धातुके उत्तर भी डू प्रत्यय हो । अग्रेगूः ॥

२२७ 'दमेर्डोसिः' ॥ ॥ दोः । दोषौ ॥

२२७–दम् धातुके उत्तर डोस् प्रत्यय हो, दोः । दोषौ ॥

२२८ 'पणेरिज्यादेश्च वः' ॥ ॥ वणिक् । स्वार्थेऽण् । 'नैगमो वाणिजो वणिक्' ॥

२२८–पण् धातुके उत्तर इजि प्रत्यय हो और पके स्थानमें व हो । यथा वणिक् । स्वार्थमें अण् प्रत्यय हुआ । "नैगमो वाणिजो वणिक्" ॥

२२९ 'वशेः कित्' ॥ ॥ 'उशिगग्नौ घृतेपि च'

२२९–वश धातुके उत्तर इजि प्रत्यय हो और यह प्रत्यय कित्संज्ञक हो । "उशिगग्नौ घृतेऽपि च" ॥

२३० 'भृञ ऊच्च' ॥ ॥ भूरिक् भूमिः ॥

२३०–भृञ् धातुके उत्तर इजि प्रत्यय हो और धातुके ऋकारके स्थानमें ऊकार हो । यथा, भूरिक् भूमिः ॥

२३१ 'जसिसहोरुरिन्' ॥ ॥ जसुरिर्वज्रम् । सहुरिरादित्यः पृथिवी च ॥

२३१–जसि और सह धातुके उत्तर उरिन् प्रत्यय हो । जसुरिः वज्रम् । सहुरिः आदित्यः पृथिवी च ॥

२३२ 'सुयुरुवृञो युच्' ॥ ॥ सवनश्चन्द्रमाः । यवनः । रवणः कोकिलः । वरणः ॥

२३२–सु, यु, रु और वृञ् धातुके उत्तर युच् प्रत्यय हो । सवनः–चंद्रमाः । यवनः । रवणः–कोकिलः । वरणः॥

२३३ 'अशेरश च' ॥ ॥ अश्नोतेर्युच् स्यात् रशादेशश्च । रशना काञ्ची । जिह्वावाची तु दन्त्यसकारवान् ॥

२३३–अश धातुके उत्तर युच् प्रत्यय हो और धातुके स्थानमें रश आदेश हो । यथा, रशना काञ्ची । जिह्वा होनेपर रसना शब्द दन्त्यसकारविशिष्ट है ॥

२३४ 'उन्देर्नलोपश्च' ॥ ॥ ओदनः ॥

२३४–उन्द धातुके उत्तर युच् प्रत्यय हो और धातुके नकारका लोप हो, यथा, ओदनः । उन्द+युच्=उद्+यु=उद्+अन=ओद्+अन–ओदन+सु=ओदनः (भात) ॥

२३५ 'गमेर्गश्च' ॥ ॥ गमेर्युच् स्याद्गश्चादेशः । गगनम् ॥

२३५–गम् धातुके उत्तर युच् प्रत्यय हो और धातुके मकारके स्थानमें ग आदेश हो, यथा–गगनम् ॥

२३६ 'बहुलमन्यत्रापि' ॥ ॥ युच् स्यात् । स्यन्दनः । रोचना ॥

२३६–बाहुलक बलसे अन्य धातुओंके उत्तर भी युच् प्रत्यय हो । स्यन्दनः । रोचना ॥

२३७ 'रञ्जेः क्युन्' ॥ ॥ रजनम् ॥

२३७–रञ्ज धातुके उत्तर क्युन् प्रत्यय हो । रजनम् ॥

२३८ 'भूसूधूभ्रस्जिभ्यश्छन्दसि' ॥ ॥ भुवनम् । सुवन आदित्यः । धुवनो वह्निः । निधुवनं सुरतम् । भृज्जनमम्बरीषम् ॥

२३८–वेदमें भू, सू, धू और भ्रस्जि धातुके उत्तर क्युन् प्रत्यय हो, यथा, भुवनम् । सुवनः–आदित्यः । धुवनः–वह्निः । निधुवनं–सुरतम्–(स्त्रीप्रसंग) । भृज्जनम्–अम्बरीषम् ॥

२३९ 'कॄपॄवृजिमन्दिनिधाञः क्युः' ॥ ॥ किरणः । पुरणः–समुद्रः । वृजनमन्तरिक्षम् । मन्दनं स्तोत्रम् । निधनम् ॥

२३९–कॄ, पॄ, वृजि, मन्दि और निपूर्वक धाञ् धातुके उत्तर क्यु प्रत्यय हो यथा–किरणः । पुरणः–समुद्रः । वृजनम् अन्तरिक्षम् । मन्दनं स्तोत्रम् । निधनम् ॥

२४० 'धृषेर्धिष च संज्ञायाम्' ॥ ॥ धिषणो गुरुः । धिषणा धीः ॥

२४०–धृष धातुके उत्तर क्यु प्रत्यय और धिष् आदेश हो । यथा, धिषणः गुरुः । धिषणा बुद्धिः ॥

२४१ 'वर्तमाने पृषद् बृहन्महज्जगच्छतृवत्'॥ अतिप्रत्ययान्ता निपात्यन्ते । पृषु सेचने । गुणाभावः । पृषन्ति । बृहत् । महान् । गमेर्जगादेशः । जगत् ॥

२४१–वर्त्तमानमें शतृप्रत्ययान्त पदकी समान अति प्रत्ययान्त–पृषत्, बृहत्, महत्, जगत् यह सम्पूर्ण शब्द भी निपातनसे सिद्ध हों । यथा, सेचनार्थक पृष् धातुको गुणाभाव होकर–पृषन्ति । बृहत् । महान् । गम् धातुके स्थानमें जगादेश होकर जगत् ॥

२४२ 'संश्चत्तृपद्वेहत्' ॥ ॥ एते निपात्यन्ते । पृथक्करणं शतृवद्भावनिवृत्त्यर्थम् । संचिनोतेः सुट् । इकारलोपः । संश्चत् कुहकः । तृपच्छत्रम् । विपूर्वाद्धन्तेष्टिलोपः इत ए च । 'वेहद्गर्भोपघातिनी' ॥

२४२–संश्चत्, तृपत्, वेहत् यह निपातनसे सिद्ध हों पृथक् सूत्रकरण शतृवद्भाव निवृत्तिके निमित्त है । संपूर्वक चि धातुके उत्तर अति प्रत्यय सुट्का आगम और इकारका लोप होकर–संश्चत् कुहकः । तृपत् छत्रम् । विपूर्वक हन् धातुके उत्तर अति प्रत्यय, टिका लोप और इकारके स्थानमें एकार होकर–वेहत् गर्भोपघातिनी ॥

२४३ 'छन्दस्यसानच् शुजॄभ्याम्' ॥ ॥ शवसानः पन्थाः । जरसानः पुरुषः ॥

२४३–वेदमें शु और जॄ धातुके उत्तर असानच् प्रत्यय हो । यथा–शवसानः पन्थाः । जरसानः पुरुषः ॥

२४४ 'ऋञ्जिवृधिमन्दिसहिभ्यः कित्' ॥ ॥ ऋञ्जसानो मेघः । वृधसानः पुरुषः । मन्दसानोऽग्निर्जीवश्च । सहसानो यज्ञो मयूरश्च ॥

२४४–ऋञ्ज्,वृध्, मन्द् और सह् धातुके उत्तर असानच्

प्रत्यय हो और वह कित् हो, यथा-ऋञ्जसानो मेघः। वृधसानः पुरुषः। मन्दसानः, अर्थात् अग्नि और जीव।सहवानः, अर्थात् यज्ञ और मयूर॥

२४५ 'अर्तेर्गुणः शुट् च'॥ ॥अर्शसानोऽग्निः॥

२४५-ऋ धातुके उत्तर असानच् प्रत्यय, शुट्का आगम और गुण हो, यथा-अर्शसानः अर्थात् अग्निः॥

२४६ 'सम्यानच् स्तुवः' ॥ ॥ संस्तवानो वाग्मी ॥

२४६-सम्पूर्वक स्तु धातुके उत्तर आनच् प्रत्यय हो, यथा संस्तवानो वाग्मी॥

२४७ 'युधिबुधिदृशिभ्यः किच्च' ॥ ॥ युधानः। बुधानः। दृशानो लोकपालकः॥

२४७-युध्, बुध् और दृश् धातुके उत्तर आनच् प्रत्यय हो और वह कित् हो, यथा-युधानः। बुधानः। दृशानो लोकपालकः॥

२४८ 'हुर्छेः सनो लुक् छलोपश्च' ॥ ॥ जुहुराणश्चन्द्रमाः॥

२४८-सन्नन्त हुर्छ् धातुके उत्तर आनच् प्रत्यय हो और सन्का लुक् और छकारका लोप हो, यथा-जुहुराणश्चन्द्रः॥

२४९ 'श्वितेर्दश्च' ॥ ॥ शिश्विदानः पुण्यकर्मा॥

२४९-सन्नन्त श्विता धातुके उत्तर आनच् प्रत्यय हो और सन्का लुक् तकारके स्थानमें द आदेश हो, यथा-शिश्विदानः पुण्यकर्म्मा॥

२५० 'तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' ॥ ॥ शंसेः क्षदादिभ्यश्च क्रमात्तृन्तृचौ स्तः। तौ चानिटौ। शंस्ता स्तोता। शंस्तरौ। शंस्तरः। क्षदिः सौत्रो धातुः शकलीकरणे भक्षणे च। अनुदात्तेत्। 'वृक्ये चक्षदानम्' इति मन्त्रात्। 'उक्षाणं वा वेहतं वा क्षदन्ते' इति ब्राह्मणाच्च। 'क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे' ॥

२५०-संज्ञा होनेपर शंस् और क्षद् आदि धातुओंके उत्तर यथाक्रम तृन् और तृच् प्रत्यय हो, और दोनों प्रत्यय अनिट् हों, यथा-शंस्ता स्तोता। शंस्तरौ। शंस्तरः। क्षद् यह सूत्रसम्बन्धी धातु है, यह शकलीकरण और भक्षणार्थमें प्रयुक्त होताहै। 'वृक्ये चक्षदानम्' इस मंत्रके अनुसार और "उक्षाणं वा वेहतं वा क्षदन्ते" इस ब्राह्मणके अनुसार यह अनुदात्तेत् अर्थात् आत्मनेपदी है क्षत्ता अर्थात् सारथि, द्वारपाल और वैश्यामें शूद्रसे उत्पन्न हुआ व्यक्ति॥

२५१ 'बहुलमन्यत्रापि'। मन्। मन्ता। हन्। हन्ता। इत्यादि॥

२५१-अन्यत्र भी बहुलप्रकारसे उक्त प्रत्यय हों, यथा-मन्-मन्ता। हन्-हन्ता, इत्यादि॥

२५२ 'नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ' ॥ ॥ न पतन्त्यनेन पितरो नरके इति नप्ता पौत्रो दौहित्रश्च। नयतेः षुग्गुणश्च। नेष्टा। त्विषेरितोऽत्वम्। त्वष्टा। होता। पोता ऋत्विग्भेदः। भ्राजतेर्जलोपः। भ्राता। जायां माति जामाता। मान पूजायाम्। नलोपः। माता। पातेराकारस्य इत्वम्। पिता। दुहेस्तृच् इट् गुणाभावश्च। दुहिता॥

२५२-नप्तृ, नेष्टृ, त्वष्टृ, होतृ, पोतृ, भ्रातृ, जामातृ, मातृ, पितृ, दुहितृ, यह निपातनसे सिद्ध हों, न पतन्त्यनेन इति=नप्ता, अर्थात् जिसके होनेसे नरकमें पात न हो ऐसा पौत्र वा दौहित्र। नी धातुके उत्तर तृन् प्रत्यय, षुक्का आगम और गुण होकर-नेष्टा। त्विष् धातुके इकारके स्थानमें अकार होकर-त्वष्टा। होता। पोता-ऋत्विग्भेदः। भ्राज् धातुके जकारका लोप होकर-भ्राता। जायां माति=जामाता। मान् धातु पूजा करनेमें है। इससे तृन् प्रत्यय और नकारका लोप होकर-माता। पा धातुके अकारके स्थानमें इकार होकर-पिता। दुह् धातुके उत्तर तृच् को इट् और धातुको गुणाभाव होकर-दुहिता॥

२५३ 'सुव्यसेर्ऋन्' ॥ ॥ स्वसा॥

२५३-सुपूर्वक अस् धातुके उत्तर ऋन् प्रत्यय हो, स्वसा॥

२५४ 'यतेर्वृद्धिश्च' ॥ ॥ याता। 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्'॥

२५४-यत् धातुके उत्तर ऋन् हो और उपधाको वृद्धि हो, याता।"भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्"(भाइयोंकी बहुएं परस्पर याता कहाती हैं)॥

२५५ 'नञि च नन्देः' ॥ ॥ न नन्दति ननान्दा। इह वृद्धिर्नानुवर्तत इत्येके। 'ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सा' इति शब्दार्णवः ॥

२५५-नञ्पूर्वक नन्द् धातुके उत्तर ऋन् प्रत्यय हो, न नन्दति=ननान्दा। कोई कहतेहैं, इस सूत्रमें वृद्धिकी अनुवृत्ति नहीं आती है। "ननान्दा तु स्वसा पत्युर्ननन्दा नन्दनी च सा" इति शब्दार्णवः (पतिकी बहन ननान्दा कहाती है)॥

२५६ 'दिवेर्ऋः'[1] ॥ ॥ देवा। देवरः॥ 'स्वामिनो देवृदेवरौ'॥

२५६-दिव् धातुके उत्तर ऋ प्रत्यय हो, देवा। देवरः। "स्वामिनो देवृदेवरौ"॥

२५७ 'नयतेर्डिच्च' ॥ ॥ ना। नरौ। नरः॥

२५७-नी धातुके उत्तर ऋ प्रत्यय हो और वह प्रत्यय डित् हो, ना। नरौ। नरः॥

---

१ 'स्वावसेः' इति तु क्वाचित्कः पाठः। मनोरमायां तु नोपलभ्यते।

२५८ 'सव्ये स्थश्छन्दसि' ॥ ॥ अम्बाम्बेत्यत्र स्थास्थिन्स्थॄणामुपसंख्यानम् ॥ ॥ सव्येष्ठा सारथिः । सव्येष्ठरौ । सव्येष्ठरः ॥

२५८-वेदमें सव्यशब्दपूर्वक स्था धातुके उत्तर ऋ प्रत्यय हो । "अम्बाम्ब० २९१८" इस सूत्रमें ॥ स्था,स्थिन्,स्थॄ एतत्सम्बन्धी सकारको भी षत्वका उपसंख्यान करना चाहिये * यथा-सव्येष्ठा सारथिः।सव्येष्ठरौ । सव्येष्ठरः॥

२५९ 'अर्तिसृधृधम्यम्यश्यवितॄभ्योऽनिः'॥ ॥ अष्टभ्योऽनिप्रत्ययः स्यात् । अरणिरग्नेर्योनिः । सरणिः । धरणिः । धमनिः । अमनिर्गतिः । अशनिः । अवनिः।तरणिः।बाहुलकात् रजनिः ॥

२५९-ऋ, सृ, धृ, धम्, अम्, अश्, अव् और तॄ धातुके उत्तर अनि प्रत्यय हो, अरणिः अग्नेर्योनिः । सरणिः । धरणिः। धमनिः । अमनिर्गतिः । अशनिः । अवनिः।तरणिः। बाहुलकबलसे-रजनिः ॥

२६० 'आङि शुषेः सनश्छन्दसि' ॥ ॥ आशुशुक्षणिरग्निर्वातश्च ॥

२६०-वेदमें आङ्पूर्वक सन्नन्त शुष् धातुके उत्तर अनि प्रत्यय हो, आशुशुक्षणिः अग्निर्वायुश्च ॥

२६१ 'कृषेरादेश्च चः' ॥ ॥ चर्षणिर्जनः ॥

२६१-कृष् धातुके उत्तर अनि प्रत्यय हो और कके स्थानमें च हो, चर्षणिर्जनः ॥

२६२ 'अदेर्मुट् च' अद्मनिरग्निः ॥

२६२-अद् धातुके उत्तर अनि प्रत्यय हो और मुट्का आगम हो, अद्मनिः-अग्निः ॥

२६३ 'वृतेश्च' ॥ ॥ वर्तनिः । गोवर्धनस्तु चकारान्मुट् वर्त्मनिरित्याह ॥

२६३-वृत् धातुके उत्तर अनि प्रत्यय हो, वर्त्तनिः । गोवर्द्धनके मतसे तो चकारसे मुट् होकर ' वर्त्मनिः ' ऐसा होगा ॥

२६४ 'क्षिपेः किच्च' ॥ ॥ क्षिपणिरायुधम् ॥

२६४-क्षिप् धातुके उत्तर अनि प्रत्यय हो और प्रत्यय कित् हो, क्षिपणिरायुधम् ॥

२६५ 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' ॥ ॥ अर्चिर्ज्वाला । इदन्तोऽप्ययम् । 'अग्नेर्भ्राजन्ते अर्चयः' । शोचिर्दीप्तिः । हविः । सर्पिः । इस्मन्निति ह्रस्वः । छदिः पटलम् । छर्दिर्वमनव्याधिः । इदन्तोऽपि । 'छर्द्यतीसारशूलवान्' ॥

२६५-अर्च्, शुच्, हु, सृप्, छदि और छर्द धातुके उत्तर इसि प्रत्यय हो, अर्चिर्ज्वाला । यह शब्द इदन्त भी है यथा-'अग्नेर्भ्राजन्ते अर्चयः' । शोचिः-दीप्तिः । हविः । सर्पिः। "इस्मन्० २९८५" इस सूत्रसे ह्रस्व होकर=छदिः पटलम्। छर्दिर्वमनव्याधिः । यह इदन्त भी है । यथा-"छर्द्यतीसारशूलवान्" ॥

२६६ 'बृंहेर्नलोपश्च' ॥ ॥ 'बर्हिर्ना कुशशुष्मणोः' ॥

२६६-बृंह् धातुके उत्तर इसि प्रत्यय और नकारका लोप हो,यथा-"बर्हिर्ना कुशशुष्मणोः"(बर्हिः शब्द कुश और अग्निवाचक है) ॥

२६७ 'द्युतेरिसिन्नादेश्च जः' ॥ ॥ ज्योतिः॥

२६७-द्युत् धातुके उत्तर इसिन् प्रत्यय हो और आदि अर्थात् दके स्थानमें ज हो, ज्योतिः ॥

२६८ 'वसौ रुचेः संज्ञायाम्' ॥ ॥ वसुरोचिर्यज्ञः ॥

२६८-वसु शब्दपूर्वक रुच् धातुके उत्तर संज्ञामें इसिन् प्रत्यय हो, यथा-वसुरोचिर्यज्ञः ॥

२६९ 'भुवः कित्' ॥ ॥ भुविः समुद्रः ॥

२६९-भू धातुके उत्तर इसिन् प्रत्यय हो और प्रत्यय कित् हो, भुविः समुद्रः ॥

२७० 'सहो धश्च' ॥ ॥ सधिरनड्वान् ॥

२७०-सह् धातुके उत्तर इसिन् प्रत्यय हो और हके स्थानमें ध हो, सधिरनड्वान् (बैल) ॥

२७१'पिबतेस्थुक्'॥ ॥'पाथिश्चक्षुःसमुद्रयोः'।

२७१-पा धातुके उत्तर इसिन् प्रत्यय और थुक्का आगम हो, पाथिः, अर्थात् चक्षु और समुद्र ॥

२७२ 'जनेरुसिः' ॥ ॥ जनुर्जननम् ॥

२७२-जन् धातुके उत्तर उसि प्रत्यय हो, जनुर्जननम् ॥

२७३ 'मनेर्धश्छन्दसि' ॥ ॥ मधुः ॥

२७३-वेदमें मन् धातुके उत्तर उसि प्रत्यय हो और नके स्थानमें ध हो, मधुः ॥

२७४'अर्तिपॄवपियजितनिधनितपिभ्यो नित्'॥ अरुः । परुर्ग्रन्थिः । वपुः । यजुः । तनुः।तनुषी। तनूंषि । धनुरस्त्रियाम् । 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' । सान्तस्योदन्तस्य वा रूपम् । 'तपुः सूर्याग्निशत्रुषु' ॥

२७४-ऋ, पॄ, वप्, यज्, तन्,धन् और तप् धातुके उत्तर उसि प्रत्यय हो और वह प्रत्यय नित् हो, अरुः । परुर्ग्रन्थिः । वपुः । यजुः । तनुः । तनुषी । तनूंषि । धनुः शब्द स्त्रीलिङ्ग नहीं है । "धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति" यह सान्त अथवा उकारान्तका रूप है । तपुः, अर्थात् सूर्य, अग्नि और शत्रु ॥

२७५ 'एतेर्णिच्च' ॥ ॥ आयुः । आयुषी ॥

२७५-इण् धातुके उत्तर उसि प्रत्यय हो और वह प्रत्यय णित् हो, आयुः । आयुषी ॥

२७६ 'चक्षेः शिच्च' ॥ ॥ शित्वात्सार्वधातुकत्वेन ख्याञ्ञबाधः । चक्षुः ॥

२७६-चक्ष् धातुके उत्तर उसि प्रत्यय हो और वह शित् हो, शित्वके कारण सार्वधातुक होनेसे ख्याञ् आदेश न होकर चक्षुः (नेत्र) ॥

२७७ 'मुहेः किच्च' ॥ ॥ मुहुरव्ययम् ॥

२७७–मुह् धातुके उत्तर उसि प्रत्यय हो और वह कित् हो, मुहुः (वारंवार) यह अव्यय है ॥

२७८ 'बहुलमन्यत्रापि'। आचक्षुः।परिचक्षुः॥

२७८–अन्यत्र भी बहुल प्रकारसे उक्त प्रत्यय हो,आचक्षुः। परिचक्षुः ॥

२७९ 'कॄगॄशॄवृञ्चतिभ्यः ष्वरच्' ॥ ॥ 'कर्वरो व्याघ्ररक्षसोः'। गर्वरोऽहंकारी। शर्वरी रात्रिः। 'वर्वरः प्राकृतो जनः'। चत्वरम् ॥

२७९–कॄ, गॄ, शॄ, वृञ् और चत् धातुके उत्तर ष्वरच् प्रत्यय हो, कर्वरः, अर्थात् व्याघ्र और राक्षस। गर्वरोऽहंकारी। शर्वरी रात्रिः। वर्वरः प्राकृतजनः। चत्वरम् (चौराहा) ॥

२८० 'नौ सदेः' ॥ ॥ 'निषद्वरस्तु जम्बालः'। निषद्वरी रात्रिः ॥

॥ इत्युणादिषु द्वितीयः पादः ॥

२८०–निपूर्वक सद् धातुके उत्तर ष्वरच् प्रत्यय हो, निषद्वरः, अर्थात् जम्बालः। निषद्वरी रात्रिः ॥

॥ इत्युणादिसूत्रे द्वितीयपादः ॥

---

२८१ 'छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः' ॥ ॥ एकादश ष्वरच्प्रत्ययान्ता निपात्यन्ते। छिदिर् छद् अनयोस्तकारोऽन्तादेशः छिदेर्गुणाभावश्च। छित्वरो धूर्तः। 'छत्वरो गृहकुञ्जयोः'। धीवरः कैवर्तः। पीवरः स्थूलः। मीवरो हिंसकः। चिनोतेर्दीर्घश्च। चीवरं भिक्षुकप्रावरणम्। तीवरो जातिविशेषः। नीवरः परिव्राट्। गाहतेर्ह्रस्वत्वम्। गह्वरम्। कटे वर्षादौ। कट्वरं व्यञ्जनम्। यमेर्दकारः। संयद्वरो नृपः। पदेः सम्पद्वर इत्येके ॥

२८१–छित्वर, छत्वर, धीवर, पीवर, मीवर, चीवर, तीवर, नीवर, गह्वर, कट्वर, संयद्वर यह ११ ष्वरच्प्रत्ययान्त पद निपातनसे सिद्ध हैं। छिदिर्, छद्, इन दो धातुओंके तकारान्तादेश और धातुके इकारको गुणाभाव होकर–छित्वरः धूर्त्तः। छत्वरः–गृह और कुञ्ज। धीवरः कैवर्त्तः। पीवरः स्थूलः। मीवरो हिंसकः। चि धातुको दीर्घ होकर–चीवरम् (भिक्षुकका वस्त्र) तीवरो जातिविशेषः। नीवरः परिव्राट्। गाह् धातुको ह्रस्व होकर–गह्वरम्। कटे धातु वर्षादि अर्थमें है। उससे ष्वरच् होकर–कट्वरम् व्यंजनम्। यम् धातुके मके स्थानमें द होकर–संयद्वरो नृपः। पद् धातुका 'संपद्वरः' ऐसा रूप कोई २ कहते है ॥

२८२ 'इण्सिञ्जिदीङुष्यविभ्यो नक्'॥ ॥ 'इनः सूर्ये नृपे पत्यौ'। सिनः काणः। जिनोऽर्हन्। दीनः। उष्णः। ऊनः ॥

२८२–इण्, सिञ्, जि, दीङ्, उष् और अव् धातुके उत्तर नक् प्रत्यय हो, 'इनः सूर्ये नृपे पत्यौ'। सिनः काणः। जिनोऽर्हन्। दीनः। उष्णः। ऊनः (न्यून) ॥

२८३ 'फेनमीनौ' ॥ ॥ एतौ निपात्येते। स्फायतेः फेनः। मीनः ॥

२८३–फेन और मीन शब्द निपातनसे सिद्ध हों, स्फाय् धातुका फेनः। मीनः ॥

२८४ 'कृषेर्वर्णे' ॥ ॥ कृष्णः ॥

२८४–वर्ण होनेपर कृष् धातुके उत्तर नक् प्रत्यय हो,कृष्णः (श्याम) ॥

२८५ 'बन्धेर्ब्रधिबुधी च' ॥ ॥ ब्रध्नः। बुध्नः॥

२८५–बन्ध् धातुके उत्तर नक् प्रत्यय हो और धातुके स्थानमें ब्रध् और बुध् आदेश हो, ब्रध्नः। बुध्नः ॥

२८६ 'धापॄवस्यज्यतिभ्यो नः' ॥ ॥ 'धाना भृष्टयवे स्त्रियः'। पर्णं पत्रम्। पर्णः किंशुकः। 'वस्नो मूल्ये वेतने च'। अजेर्वी। वेनः। अत्न आदित्यः। बाहुलकात्–श्रृणोतेः श्रोणः पंगुः ॥

२८६–धा, पॄ, वस्, अज् और अत् धातुके उत्तर न प्रत्यय हो, "धाना भृष्टयवे स्त्रियः"। पर्णं पत्रम्। पर्णः किंशुकः। "वस्नो मूल्ये वेतने च"। अज धातुके स्थानमें वी आदेश होकर वेनः। अत्नः आदित्यः। बाहुलकबलसे श्रु धातुके भी उत्तर न प्रत्यय होकर–श्रोणः पंगुः ॥

२८७ 'लक्षेरट् च' ॥ ॥ लक्षेश्चुरादिण्यन्तान्नः स्यात्तस्याडागमश्च। चान्मुडित्येके। 'लक्षणं लक्ष्मणं नाम्नि चिह्ने च'। लक्षणो लक्ष्मणश्च रामभ्राता। 'लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा' ॥

२८७–चुरादि णिजन्त लक्ष् धातुके उत्तर न प्रत्यय हो और उसको अडागम हो, चकारसे मुट्का आगम हो, यह कोई कहतेहैं। "लक्षणं लक्ष्मणं नाम्नि चिह्ने च" लक्षणो लक्ष्मणश्च रामभ्राता "लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा"। (हंसी लक्षणा और सारसी लक्ष्मणा कहातीहै) ॥

२८८ 'वनेरिच्चोपधायाः' ॥ ॥ वेन्ना नदी ॥

२८८–वन् धातुके उत्तर न प्रत्यय हो, और उपधाको इकार हो, यथा–वेन्ना नदी ॥

२८९ 'सिवेष्टेर्यू च' ॥ ॥ दीर्घोच्चारणसामर्थ्यान्न गुणः। स्यून आदित्यः। बाहुलकात् केवलो नः। ऊठ्। अन्तरङ्गत्वाद्यण्। गुणः। स्योनः॥

२८९–सिव् धातुके उत्तर न प्रत्यय हो, और टिको यू आदेश हो, दीर्घोच्चारणके कारण गुण न होगा, यथा–स्यूनः आदित्यः। बाहुलकबलसे केवल न प्रत्यय और ऊठ्, अन्तरङ्गत्वके कारण यण् और गुण होकर–स्योनः ॥

२९० 'कॄवॄजॄसिद्रुपन्यनिस्वपिभ्यो नित्'॥ ॥ कर्णः। वर्णः। 'जर्णश्चन्द्रे च वृक्षे च'। सेना।

---

१ वृञ्वरणे। दीर्घपाठे तु वॄ वरणे।

द्रोणः । पन्नो नीचैर्गतिः । अन्नमोदनः । स्वप्नो निद्रा ॥

२९०–कृ, वृ, जॄ, षि, द्रु, पद्, अन् और स्वप् धातुके उत्तर न हो और वह नित् हो, कर्णः । वर्णः । जर्णः, अर्थात् चन्द्र और वृक्ष । सेना । द्रोणः । पन्नो नीचैर्गतिः । अन्नमोदनम् । स्वप्नो निद्रा ॥

२९१ 'धेट् इच्च' ॥ ॥ धेनः सिन्धुर्नदी धेना॥

२९१–धेट् धातुके उत्तर न प्रत्यय हो और इत्त्व हो, 'धेनः सिन्धुर्नदी धेना' ॥

२९२ 'तृषिशुषिरसिभ्यः कित्' ॥ ॥ तृष्णा। शुष्णः सूर्यो वह्निश्च । रस्नं द्रव्यम् ॥

२९२–तृष्, शुष् और रस् धातुके उत्तर न प्रत्यय हो और वह कित् हो, तृष्णा । शुष्णः, अर्थात् सूर्य और वह्नि । रस्नम्–द्रव्यम् ॥

२९३ 'सुवो दीर्घश्च' ॥ ॥ सूना वधस्थानम्॥

२९३–सुञ् धातुके उत्तर न प्रत्यय हो और दीर्घ हो, सूना–वधस्थानम ॥

२९४ 'रमेस्त च' ॥ ॥ रमयतीति रत्नम्॥

२९४–रम् धातुके उत्तर न प्रत्यय हो और मके स्थानमें त हो, रमयति इति=रत्नम् ॥

२९५ 'रास्नासास्नास्थूणावीणाः' ॥ ॥ रास्ना गन्धद्रव्यम् । सास्ना गोगलकम्बलः । स्थूणा गृहस्तम्भः। वीणा वल्लकी ॥

२९५–रास्ना, सास्ना, स्थूणा और वीणा यह पद निपातनसे सिद्ध हों, रास्ना गंधद्रव्यम् । सास्ना–गोगल कम्बलः । स्थूणा गृहस्तम्भः । वीणा वल्लकी ॥

२९६ 'गादाभ्यामिष्णुच्' ॥ ॥ गेष्णुर्गायनः। देष्णुर्दाता ॥

२९६–गा और दा धातुके उत्तर इष्णुच् प्रत्यय हो, गेष्णुः–गायनः । देष्णुः–दाता ॥

२९७ 'कृत्यशूभ्यः क्स्नः' ॥ ॥ कृत्स्नम् । अक्ष्णमखण्डम् ॥

२९७–कृत् और अश् धातुके उत्तर क्स्न प्रत्यय हो । कृत्स्नम् । अक्ष्णम्–अखण्डम् ॥

२९८ 'तिजेर्दीर्घश्च' ॥ ॥ तीक्ष्णम् ॥

२९८–तिज धातुके उत्तर क्स्न प्रत्यय और दीर्घ हो, तीक्ष्णम् ॥

२९९ 'श्लिषेरच्चोपधायाः' ॥ ॥ श्लक्ष्णम्॥

२९९–श्लिष् धातुके उत्तर क्स्न प्रत्यय हो और उपधाको अकार हो, श्लक्ष्णम्–(चिकना) ॥

३०० 'यजिमनिशुन्धिदसिजनिभ्यो युच्' ॥ ॥ यज्युरध्वर्युः 'मन्युर्दैन्ये क्रतौ क्रुधि' शुन्ध्युरग्निः। दस्युस्तस्करः । जन्युः शरीरी ॥

३००–यज्, मन्, शुन्ध्, दस् और जन् धातुके उत्तर युच् प्रत्यय हो, यज्युः–अध्वर्युः । मन्युः अर्थात् दैन्य, क्रतु और क्रोध । शुन्ध्युः–अग्निः । दस्युस्तस्करः । जन्युः शरीरी ॥

३०१ 'भुजिमृङ्भ्यां युक्त्युकौ' ॥ ॥ भुज्युर्भाजनम् । मृत्युः ॥

३०१–भुज् और मृङ् धातुके उत्तर यथाक्रम युक् और त्युक् प्रत्यय हो, भुज्युर्भाजनम् (वर्तन) । मृत्युः ॥

३०२ 'सर्तेरयुः' ॥ ॥ सरयुर्नदी । अयूरिति पाठान्तरम् । सरयूः ॥

३०२–सृ धातुके उत्तर अयु प्रत्यय हो, सरयुः–नदी । 'अयूः' ऐसा पाठान्तर है, सरयूः ॥

३०३ 'पानीविषिभ्यः पः' ॥ ॥ पाति रक्षत्यस्मादात्मानमिति पापम् । तद्योगात्पापः । नेपः पुरोहितः । बाहुलकाद्गुणाभावे नीपो वृक्षविशेषः । वेष्पः पानीयम् ॥

३०३–पा, नी, विष् धातुके उत्तर प प्रत्यय हो, पाति रक्षति अस्मात् आत्मानम् इति=पापम् । उसके योगके कारण पापः । नेपः पुरोहितः । बाहुलकबलसे गुण न होकर–नीपः वृक्षविशेषः । वेष्पः पानीयम् ॥

३०४ 'च्युवः किच्च' ॥ ॥ च्युपो वक्त्रम् ॥

३०४–च्यु धातुके उत्तर प प्रत्यय हो और वह कित् हो, च्युपो वक्त्रम् ॥

३०५'स्तुवो दीर्घश्च'॥ ॥ स्तूपः समुच्छ्रायः॥

३०५–स्तु धातुके उत्तर प प्रत्यय हो, और उकारको दीर्घ हो, स्तूपः समुच्छ्रायः ॥

३०६ 'सुशॄभ्यां निच्च' ॥ ॥ चात्कित् । सूपः। बाहुलकादूत्वम् । शूर्पम् ॥

३०६–सु और शॄ धातुके उत्तर प प्रत्यय हो, और वह नित् हो और चकारसे कित् हो, सूपः । बाहुलकसे ऊत्व होकर–शूर्पम् ॥

३०७ 'कुयुभ्यां च' ॥ कुवन्ति मण्डूका अस्मिन् कूपः । युवन्ति बध्नन्त्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः ॥

३०७–कु और यु धातुके उत्तर प प्रत्यय हो, कुवन्ति मण्डूका अस्मिन्=कूपः । युवन्ति बध्नन्ति अस्मिन् पशुमिति=यूपः यज्ञस्तंभः ॥

३०८'खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः'॥ ॥ सप्तैते पप्रत्ययान्ता निपात्यन्ते । खनतेर्नकारस्य षत्वम् । 'खष्पौ क्रोधबलात्कारौ' । शीलतेर्ह्रस्वः। शिल्पं कौशलम् । शसु हिंसायाम् । निपातनात्षत्वम् । शष्पं बालतृणं प्रतिभाक्षयश्च । बाधतेः षः । 'बाष्पो नेत्रजलोष्मणोः' । बाष्पं च । रौतेर्दीर्घः । 'रूपं स्वभावे सौन्दर्ये' । पॄ । पर्पं गृहं बालतृणं पंगुपीठं च । तल प्रतिष्ठाकरणे चुरादिणिचो लुक् । 'तल्पं शय्याट्टदारेषु' ॥

३०८–खष्प, शिल्प, शष्प, बाष्प, रूप, पर्प, तल्प, यह ७ पप्रत्ययान्त पद निपातनसे सिद्ध हों, खन् धातुके नकारके स्थानमें ष् होकर–खष्पः, अर्थात् क्रोध और बलात्कार। शील् धातुको ह्रस्व होकर–शिल्पं कौशलम्। हिंसार्थक सु धातुके सकारको निपातनसे षत्व होकर–शष्पम् अर्थात् बालतृण और प्रतिभाक्षय। बाध् धातुके धको ष आदेश होकर–'बाष्पो नेत्रजलोष्मणोः'। बाष्पञ्च।रु धातुके उकारको दीर्घ होकर–"रूपं स्वभावे सौन्दर्ये"। पृ धातुका–पर्पम्, अर्थात् गृह, बालतृण और पंगुपीठ। तल् धातु प्रतिष्ठाकरनेमें है। उससे विहित चुरादि णिच्का लोप होकर–"तल्पं शय्याट्टदारेषु"॥

३०९ 'स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्'॥ ॥ अयामन्तेति णेरयादेशः। स्तनयित्नुः। हर्षयित्नुः। पोषयित्नुः। गदयित्नुर्वावदूकः। मदयित्नुर्मदिरा॥

३०९–ण्यन्त–स्तन्, हृष्, पु, गद् और मद् धातुके उत्तर इत्नुच् प्रत्यय हो, "अयामन्त० २३११" इस सूत्रसे णिके स्थानमें अयादेश होकर–स्तनयित्नुः (बादल)। हर्षयित्नुः। पोषयित्नुः। गदयित्नुः–वावदूकः। मदयित्नुः–मदिरा॥

३१०'कृहनिभ्यां क्त्नुः'॥ ॥ कृत्नुः शिल्पी। हत्नुर्व्याधिः शस्त्रं च॥

३१०–कृ और हन् धातुके उत्तर क्त्नु प्रत्यय हो, कृत्नुः–शिल्पी। हत्नुः, अर्थात् व्याधि और शस्त्र॥

३११ 'गमेः सन्वच्च'॥ ॥ जिगत्नुः॥

३११–गम् धातुके उत्तर क्त्नु प्रत्यय हो और उसको सन्वद्भाव हो, जिगत्नुः॥

३१२ 'दाभाभ्यां नुः'॥ ॥ दानुर्दाता। भानुः॥

३१२–दा और भा धातुके उत्तर नु प्रत्यय हो, दानुः–दाता। भानुः (सूर्य)॥

३१३ 'वचेर्गश्च'॥ ॥ वग्नुः॥

३१३–वच् धातुके उत्तर नु प्रत्यय हो, और चके स्थानमें ग हो, वग्नुः॥

३१४ 'धेट इच्च'॥ ॥ धयति सुतानिति धेनुः॥

३१४–धेट् धातुके उत्तर नु प्रत्यय हो, और आकारको इत् हो, धयाति सुतान् इति=धेनुः॥

३१५ 'सुवः कित्'॥ ॥ 'सूनुः पुत्रेऽनुजे रवौ'॥

३१५–सू धातुके उत्तर नु प्रत्यय हो, और वह कित् हो, "सूनुः पुत्रेऽनुजे रवौ" अर्थात् पुत्र, छोटा-भाई और रवि॥

३१६ 'जहातेर्द्वे अन्तलोपश्च'॥ जह्नुः॥

३१६–हा धातुके उत्तर नु प्रत्यय हो, और धातुको द्वित्व, अन्तका लोप हो, जह्नुः (ऋषिविशेष)॥

३१७'स्थोणुः'॥ ॥'स्थाणुः कीले स्थिरे हरे'॥

३१७–स्था धातुके उत्तर णु प्रत्यय हो, "स्थाणुः कीले स्थिरे हरे"॥

३१८ 'अजिवृरीभ्यो निच्च'॥ ॥ अजेर्वी। वेणुः। वर्णुर्नददेशभेदयोः। 'रेणुर्द्वयोः स्त्रियां धूलिः'॥

३१८–अज्, वृ और री धातुके उत्तर णु प्रत्यय हो, और वह नित् हो। अज् धातुके स्थानमें वी देश होकर-वेणुः। वर्णुः नददेशभेदयोः। "रेणुर्द्वयोः स्त्रियां धूः"॥

३१९ 'विषेः किच्च'॥ ॥ विष्णुः॥

३१९–विष् धातुके उत्तर णु प्रत्यय हो, और वह कित् हो, विष्णुः॥

३२० 'कृदाधारार्चिकलिभ्यः कः'॥ ॥ बाहुलकान्न कस्येत्संज्ञा। 'कर्को धवलघोटकः' दाको दाता। धाकोऽनड्वानाधारश्च। राका पौर्णमासी। अर्कः। 'कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि'॥

३२०–कृ, दा, धा, रा, अर्च् और कल् धातुके उत्तर क प्रत्यय हो,"कर्को धवलघोटकः"। दाको दाता। धाकोऽनड्वान् आधारश्च। राका पौर्णमासी। अर्कः। "कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि"॥

३२१ 'सृवृभूशुषिमुषिभ्यः कक्'॥ ॥ 'सृक उत्पलवातयोः'। 'वृकः श्वापदकाकयोः'। भूकं छिद्रम्। शुष्कः। मुष्कोऽण्डम्॥

३२१–सृ, वृ, भू, शुष्, मुष् धातुओंके उत्तर कक् प्रत्यय हो, सृकः, अर्थात् उत्पल और वायु। वृकः, अर्थात् श्वापद और काक। भूकं छिद्रम्। शुष्कः। मुष्कः–अण्डकोषः॥

३२२ 'शुकवल्कोल्काः'॥ ॥ शुभेरन्त्यलोपः। शुकः। 'वल्कं वल्कलमस्त्रियाम्'। उष दाहे। षस्य लः। उल्का॥

३२२–शुक, वल्क, उल्क यह तीन कक्प्रत्ययान्त शब्द निपातनसे सिद्ध हों, शुभ् धातुके अन्तवर्णका लोप होकर–शुकः। वल्कं वल्कलम्। दाहार्थक उष् धातुके षके स्थानमें ल होकर–उल्का॥

३२३ 'इण्भीकापाशल्यतिमर्चिभ्यः कन्'॥ 'एके मुख्यान्यकेवलाः' 'भेको मण्डूकमेघयोः' इति विश्वमेदिन्यौ। काकः। पाकः शिशुः। शल्कं शकलम्। अत्कः पथिकः शरीरावयवश्च। मर्कः शरीरवायुः॥

३२३–इण्, भी, का, पा, शल्, अत्, मर्च् धातुओंके उत्तर कन् प्रत्यय हो, यथा–"एके मुख्यान्यकेवलाः" "भेको मण्डूकमेघयोः" यह विश्व और मेदिनीकोषमें है। काकः। पाकः शिशुः। शल्कं शकलम्। अत्कः पथिकः–शरीरावयवश्च। मर्कः शरीरवायुः॥

३२४ 'नौ हः' ॥ ॥ जहातेः कन् स्यान्नौ । निहाका गोधिका ॥

३२४-निपूर्वक हा धातुके उत्तर कन् प्रत्यय हो, निहाका गोधिका ॥

३२५ 'नौ सदेर्डिच्च' ॥ ॥ 'निष्कोऽस्त्री हेम्नि तत्पले' ॥

३२५--निपूर्वक सद् धातुके उत्तर कन् प्रत्यय हो, और वह प्रत्यय डित् हो, निष्कः, अर्थात् सुवर्ण और उसका पल ॥

३२६ 'स्यमेरीट् च' ॥ ॥ स्यमीको वल्मीकः वृक्षभेदश्च । इट् ह्रस्व इति केचित् । स्यमिकः ॥

३२६-स्यम् धातुके उत्तर कन् प्रत्यय हो, और ईट् हो, स्यमीको वल्मीको वृक्षविशेषश्च । किसी २ के मतसे ह्रस्व इट् होगा, स्यमिकः ॥

३२७ 'अजियुधुनीभ्यो दीर्घश्च' ॥ ॥ 'वीकः स्याद्वातपक्षिणोः' । यूका । धूको वायुः । नीको वृक्षविशेषः ॥

३२७-अज्, यु, धु, नी धातुके उत्तर कन् प्रत्यय और दीर्घ हो, वीकः, अर्थात् वात और पक्षी । यूका । धूको वायुः । नीको वृक्षविशेषः ॥

३२८ 'ह्रियो रश्च लो वा' ॥ ॥ 'ह्रीका ह्लीका त्रपा मता' ॥

३२८-ह्री धातुके उत्तर कन् प्रत्यय हो, और रके स्थानमें विकल्प करके ल हो, "ह्रीका ह्लीका त्रपा मता" ॥

३२९ 'शकेरुनोन्तोन्त्युनयः' ॥ ॥ उन उन्त उन्ति उनि एते चत्वारः स्युः । शकुनः । शकुन्तः । शकुन्तिः । शकुनिः ॥

३२९-शक् धातुके उत्तर उन, उन्त, उन्ति, उनि यह चार प्रत्यय हों, शकुनः । शकुन्तः । शकुन्तिः । शकुनिः । (पक्षी)॥

३३० 'भुवो झिच्' ॥ ॥ भवन्तिर्वर्तमानकालः । बाहुलकादवेश्च । अवन्तिः । वदेर्वदन्तिः । 'किंवदन्ती जनश्रुतिः' ॥

३३०-भू धातुके उत्तर झिच् प्रत्यय हो, भवन्तिर्वर्त्तमानकालः । बाहुलकबलसे अव् धातुके उत्तर भी होगा, अवन्तिः । वद धातुका वदन्तिः । "किंवदन्ती जनश्रुतिः" ॥

३३१ 'कन्युच् क्षिपेश्च' ॥ ॥ चाद् भुवः । क्षिपण्युर्वसन्तः । इत्युज्ज्वलदत्तः । 'भुवन्युः स्वामिसूर्ययोः' ॥

३३१-क्षिप् और चकारसे भू धातुके उत्तर कन्युच् प्रत्यय हो, क्षिपण्युर्वसन्तः । यह उज्ज्वलदत्तका मत है । "भुवन्युः स्वामिसूर्य्ययोः" ॥

३३२ 'अनुङ् नदेश्च' ॥ ॥ चात्क्षिपेः । नदनुर्मेघः । क्षिपणुर्वातः ॥

३३२-नद् और चकारसे क्षिप् धातुके उत्तर अनुङ् प्रत्यय हो, नदनुर्मेघः । क्षिपणुर्वातः ॥

३३३ 'कृवृदारिभ्य उनन्' ॥ ॥ 'करुणो वृक्षभेदः स्यात्करुणा च कृपा मता' । वरुणः । दारुणम् ॥

३३३-कृ, वृ और दारि धातुके उत्तर उनन् प्रत्यय हो, "करुणो वृक्षभेदः स्यात्करुणा च कृपा मता" वरुणः । दारुणम् ॥

३३४ 'त्रोरश्च लो वा' ॥ 'तरुणस्तलुना युवा' ॥

३३४-तृ धातुके उत्तर उनन् प्रत्यय हो और रके स्थानमें विकल्प करके ल हो, "तरुणस्तलुनो युवा" ॥

३३५ 'क्षुधिपिशिमिथिभ्यः कित्' ॥ ॥ क्षुधुनो म्लेच्छजातिः । पिशुनः । मिथुनम् ॥

३३५-क्षुध्, पिश् और मिथ् धातुके उत्तर उनन् प्रत्यय हो, और वह प्रत्यय कित् हो, क्षुधुनः-म्लेच्छजातिः । पिशुनः (चुगली करनेवाला) । मिथुनम् ॥

३३६ 'फलेर्गुक् च' ॥ ॥ फल्गुनः पार्थः । प्रज्ञाद्यण् । फाल्गुनः ॥

३३६-फल् धातुके उत्तर उनन् प्रत्यय हो, और गुक्का आगम हो, फल्गुनः पार्थः । प्रज्ञादि गणान्तर्गत होनेके कारण उसके उत्तर अण् प्रत्यय होकर-फाल्गुनः ॥

३३७ 'अशेर्लशश्च' ॥ ॥ लशुनम् ॥

३३७-अश् धातुके उत्तर उनन् प्रत्यय हो, और अश् धातुके स्थानमें लश् आदेश हो, लशुनम् ॥

३३८ 'अर्जेर्णिलुक् च' ॥ ॥ अर्जुनः

३३८-णिजन्त अर्ज् धातुके उत्तर उनन् प्रत्यय हो, और णिच्का लुक् हो, अर्ज्जुनः ॥

३३९ 'तृणाख्यायां चित्' ॥ ॥ चित्त्वादन्तोदात्तः । अर्जुनं तृणम् ॥

३३९-तृण अर्थ होनेपर अर्ज् धातुसे विहित उनन् प्रत्यय चित् हो, चकार इत् होनेके कारण अन्तोदात्त होगा, अर्ज्जुनं तृणम् ॥

३४० 'अर्तेश्च' ॥ ॥ अरुणः ॥

३४०-ऋ धातुके उत्तर उनन् प्रत्यय हो, अरुणः ॥

३४१ 'अजियमिशीङ्भ्यश्च' ॥ ॥ वयुनं देवमन्दिरम् । यमुना । शयुनोऽजगरः ॥

३४१-अज्, यम् और शीङ् धातुके उत्तर उनन् प्रत्यय हो, वयुनं देवमन्दिरम् । यमुना । शयुनोऽजगरः ॥

३४२ 'वृतॄवदिहनिकमिकषिभ्यः सः' ॥ ॥ वर्षम् । 'तर्षः प्लवसमुद्रयोः' । वत्सः । वत्सम् । वक्षः । हंसः । 'कंसोऽस्त्री पानभाजनम्' । कक्षं नक्षत्रम् ॥

३४२–वृ, तृ, वद्, हन्, कम् और कष् धातुके उत्तर स प्रत्यय हो, वर्षम्। "तर्षः प्लवसमुद्रयोः" ।वत्सः।वत्सम् वक्षः। हंसः। "कंसोऽस्त्री पानभाजनम्" । कक्षं नक्षत्रम् ॥

३४३ 'प्लुषेरच्चोपधायाः' ॥ ॥ प्लक्षः ॥

३४३–प्लुष् धातुके उत्तर स प्रत्यय हो, और उपधाको अकार हो, प्लक्षः (पिलखनका वृक्ष) ॥

३४४ 'मनेर्दीर्घश्च' ॥ ॥ मांसम् ॥

३४४–मन् धातुके उत्तर स प्रत्यय हो, और उपधाको दीर्घ हो, मांसम् ॥

३४५ 'अशेर्देवने' ॥ ॥ अक्षः ॥

३४५–देवनार्थमें अश् धातुके उत्तर स प्रत्यय हो, अक्षः। (पाशा) ॥

३४६ 'स्नुव्रश्चिकृत्यृषिभ्यः कित्' ॥ ॥ स्नुषा। वृक्षः । कृत्समुदकम् । ऋक्षं नक्षत्रम् ॥

३४६–स्नु, व्रश्च्, कृत् और ऋष् धातुके उत्तर स प्रत्यय हो, और वह स प्रत्यय कित् हो, स्नुषा । वृक्षः । कृत्समुदकम् । ऋक्षं नक्षत्रम् ॥

३४७ 'ऋषेर्जातौ' ॥ ॥ 'ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने । ऋक्षमुक्तं च नक्षत्रे' इति विश्वः ॥

३४७–जाति होनेपर ऋष् धातुके उत्तर स प्रत्यय हो, और वह कित् हो, "ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने। ऋक्षमुक्तञ्च नक्षत्रे" इति विश्वः ॥

३४८ 'उन्दिगुधिकुषिभ्यश्च' ॥ ॥ उत्सः प्रस्रवणम् । गुत्सः स्तबकः । कुक्षो जठरम् ॥

३४८–उन्द्, गुध् और कुश् धातुके उत्तर स प्रत्यय हो, और वह कित् हो, यथा–उत्सः प्रस्रवणम् । गुत्सः स्तबकः । कुक्षो जठर ॥

३४९ 'गृधिपण्योर्दकौ च' ॥ ॥ गृत्सः कामदेवः । पक्षः ॥

३४९–गृध् और पण् धातुके उत्तर कित् स प्रत्यय हो और यथाक्रम धके स्थानमें द और णके स्थानमें क आदेश हो, गृत्सः कामदेवः । पक्षः ॥

३५० 'अशेः सरः' ॥ ॥ अक्षरम् ॥

३५०–अश् धातुके उत्तर सर प्रत्यय हो, अक्षरम् ॥

३५१ 'वसेश्च' ॥ ॥ वत्सरः ॥

३५१–वस् धातुके उत्तर सर प्रत्यय हो, वत्सरः ॥

३५२ 'सम्पूर्वाच्चित्' ॥ ॥ संवत्सरः ॥

३५२–संपूर्वक वस् धातुसे सर प्रत्यय हो, और वह प्रत्यय चित् हो, संवत्सरः ॥

३५३ 'कृधूमदिभ्यः कित्' ॥ ॥ बाहुलकान्न षत्वम् । 'कृसरः स्यात्तिलौदनम्' । धूसरः । मत्सरः । 'मत्सरा मक्षिका ज्ञेया भम्भराली च सा मता' ॥

३५३–कृ, धू और मद् धातुके उत्तर सर प्रत्यय हो, और वह प्रत्यय कित् हो, बाहुलकबलसे षत्व नहीं होकर–कृसरः–तिलौदनम् । धूसरः । मत्सरः । मत्सरा, अर्थात् मक्षिका और भम्भराली ॥

३५४ 'पते रश्च लः' ॥ ॥ पत्सलः पन्थाः ॥

३५४–पत् धातुके उत्तर सर प्रत्यय हो, और प्रत्ययके रके स्थानमें ल हो, यथा–पत्सलः–पन्थाः (मार्ग) ॥

३५५ 'तन्यृषिभ्यां क्सरन्' ॥ ॥ तसरः सूत्रवेष्टने । ऋक्षरः ऋत्विक् ॥

३५५–तन् और ऋष् धातुके उत्तर क्सरन् प्रत्यय हो, 'तसरः सूत्रवेष्टने' । ऋक्षरः ऋत्विक् ॥

३५६ 'पीयुकणिभ्यां कालन् ह्रस्वः सम्प्रसारणं च' ॥ ॥ पीयुः सौत्रः । पियालो वृक्षभेदः । कुणालो देशभेदः ॥

३५६–पीयु और कण् धातुके उत्तर कालन् प्रत्यय हो, और क्रमसे ह्रस्व और संप्रसारण हो, पीयुः यह सौत्र धातु है । पियालो वृक्षभेदः । कुणालो देशभेदः ॥

३५७ 'कटिकुषिभ्यां काकुः'॥ ॥कटाकुः पक्षी। कुषाकुरग्निः सूर्यश्च ॥

३५७–कट् और कुष् धातुके उत्तर काकु प्रत्यय हो, यथा–कटाकुः पक्षी । कुषाकुः–अग्निः सूर्यश्च ॥

३५८ 'सर्तेर्दुक् च'॥ ॥'सृदाकुर्वातसरितोः'॥

३५८–सृ धातुके उत्तर काकु प्रत्यय हो, और दुक्का आगम हो, सृदाकुः–वायु और नदी ॥

३५९ 'वृतेर्वृद्धिश्च' ॥ ॥ वार्ताकुः । बाहुलकादुकारस्याऽऽत्वम् । वार्ताकम् ॥

३५९–वृत् धातुके उत्तर काकु प्रत्यय हो, और ऋकारको वृद्धि हो, वार्त्ताकुः । बाहुलकबलसे उकारके स्थानमें अकार होकर–वार्त्ताकम् ॥

३६० 'पर्देर्नित्संप्रसारणमल्लोपश्च'॥ ॥'पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे' ॥

३६०–पर्द धातुके उत्तर काकु प्रत्यय हो, और वह प्रत्यय नित् हो और रेफको संप्रसारण और अकारका लोप हो, पृदाकुः, अर्थात् वृश्चिक, व्याघ्र, चित्रक और सरीसृप ॥

३६१ 'सृयुवचिभ्योऽन्युजागूजक्नुचः' ॥ ॥ अन्युच् आगूच् अक्नुच् एते क्रमात्स्युः।'सरण्युर्मेघवातयोः' । यवागूः ।'वचक्नुर्विप्रवाग्मिनोः'॥

३६१–सृ, यु और वच् धातुके उत्तर यथाक्रम अन्युच्, आगूच् और अक्नुच् प्रत्यय हों, यथा–सरण्युः, अर्थात् मेघ और वायु । यवागूः । वचक्नुः, अर्थात् विप्र और वाग्मी ॥

३६२ 'आनकः शीङ्भियः'॥ ॥ शयानकोऽजगरः । भयानकः ॥

३६२–शी और भी धातुके उत्तर आनक प्रत्यय हो, यथा–शयानकः, अर्थात् अजगर । भयानकः ॥

३६३ 'आणको लूधूशिङ्घिधाञ्भ्यः' ॥ ॥ लवाणकं दात्रम् । धवाणको वातः । शिङ्घाणकः श्लेष्मा । पृषोदरादित्वात्पक्षे कलोपः । 'शिङ्घाणं नासिकामले'।धाणको दीनारभागः॥

३६३-लू, धू, शिङ्घ और धाञ् धातुके उत्तर आणक प्रत्यय हो, यथा-लवाणकं दात्रम् । धवाणको वातः । शिंघाणकः श्लेष्मा । पृषोदरादित्वके कारण ककारका लोप होकर "शिंघाणं नासिकामलम्" । धाणको दीनारभागः ॥

३६४ 'उल्मुकदर्विहोमिनः' ॥ ॥ उष दाहे । षस्य लः मुकप्रत्ययश्च । उल्मुकं ज्वलदङ्गारम् । दृणातेर्विः । दर्विः ॥ जुहोतेर्मिनिः ॥ होमी ॥

३६४-उल्मुक, दर्वि, होमी, यह तीन शब्द निपातनसे सिद्ध हों, दाहार्थक उष् धातुके षके स्थानमें ल और मुक प्रत्यय होकर-उल्मुकं ज्वलदङ्गारः, अर्थात् जलता हुआ अंगारा । दृ धातुके उत्तर वि प्रत्यय होकर-दर्विः (कडछी) हु धातुके उत्तर मिनि प्रत्यय होकर-होमी ॥

३६५ 'ह्रियः कुक् रश्च लो वा' ॥ ॥ ह्रीकुर्ह्रीकुर्लज्जावान् ॥

३६५-ह्री धातुके उत्तर कुक् प्रत्यय हो, और रके स्थानमें विकल्प करके ल हो, ह्रीकुः, ह्लीकुः अर्थात् लज्जावान् ॥

३६६ 'हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्' ॥ ॥ दशभ्यस्तन् स्यत् । तितुत्रेति नेट् । हस्तः। मर्तः। गर्तः। एतः कर्बुरः । वातः । अन्तः । दन्तः । 'लोतः स्यादश्रुचिह्नयोः' । 'पोतो बालवहित्रयोः' । धूर्तः । बाहुलकात्तुसेर्दीर्घश्च । तूस्तं पापं धूलिर्जटा च ॥

३६६-हस्, मृ, गृ, इण्, वा, अम्, दम्, लू, पू और धुर्व् धातुके उत्तर तन् प्रत्यय हो, । "तितुत्र० ३१६३" इस सूत्रसे इट् नहीं होकर हस्तः । मर्तः । गर्तः । एतः-कर्बुरः। वातः। अन्तः। दन्तः। लोतः अर्थात् अश्रु और चिह्न । 'पोतो बालवहित्रयोः' धूर्तः । बाहुलकसे तुस् धातुके उत्तर तन् प्रत्यय और धातुके उकारको दीर्घ होकर-तूस्तं पापं धूलिर्जटा च ॥

३६७ 'नञ्याप इट् च' ॥ ॥ नापितः ॥

३६७-नञ्पूर्वक आप् धातुके उत्तर तन् प्रत्यय और इट्का आगम हो, यथा-नापितः (नाई) ॥

३६८ 'तनिमृङ्भ्यां किच्च' ॥ ॥ ततम् । मृतम् ॥

३६८-तन् और मृङ् धातुके उत्तर तन प्रत्यय हो, और वह कित् हो, ततम् । मृतम् ॥

३६९ 'अञ्जिघृसिभ्यः क्तः' ॥ ॥ अक्तम् । घृतम् । सितम् ॥

३६९-अञ्ज्, घृ और सि धातुके उत्तर क्त प्रत्यय हो, अक्तम् । घृतम् । सितम्, अर्थात्-श्वेत ॥

३७० 'दुतनिभ्यां दीर्घश्च' ॥ ॥ दूतः । तातः ॥

३७०-दु और तन् धातुके उत्तर क्त प्रत्यय हो, और दीर्घ हो, दूतः । तातः ॥

३७१ 'जेर्मूट् चोदात्तः' ॥ ॥ जीमूतः ॥

३७१-जि धातुके उत्तर क्त प्रत्यय,दीर्घ और मुट्का आगम हो, यथा-जीमूतः (मेघ) ॥

३७२ 'लोष्टपलितौ' ॥ ॥ लुनातेः क्तः तस्य सुट् धातोर्गुणः । लोष्टम् । पलितम् ॥

३७२-लोष्ट और पलित शब्द निपातनसे सिद्ध हो, लु धातुके उत्तर क्त प्रत्यय उसको सुट्का आगम और धातुको गुण होकर-लोष्टम् । (मट्टीका ढेला) पलितम् ॥

३७३'हृश्याभ्यामितन्'॥ ॥हरितश्येतौ वर्णभेदौ।

३७३-हृ और श्या धातुके उत्तर इतन् प्रत्यय हो, हरितः श्येतः । अर्थात् वर्णविशेष ॥

३७४ 'रुहेरश्च लो वा' ॥ ॥ 'रोहितो मृगमत्स्ययोः' । लोहितं रक्तम् ॥

३७४-रुह धातुके उत्तर इतन् प्रत्यय हो, और रके स्थानमें विकल्प करके ल हो, रोहितः अर्थात् मृग और मत्स्य। लोहितं रक्तम् (लाल) ॥

३७५ 'पिशेः किच्च' ॥ ॥ पिशितं मांसम्॥

३७५-पिश् धातुके उत्तर इतन् प्रत्यय हो, और वह प्रत्यय कित् हो, पिशितम्-मांसम् ॥

३७६ 'श्रुदक्षिस्पृहिगृहिभ्य आय्यः' ॥ ॥ श्रवाय्यो यज्ञपशुः । दक्षाय्यो गरुडो गृध्रश्च । स्पृहयाय्यः । गृहयाय्यो गृहस्वामी ॥

३७६-श्रु, दक्ष, स्पृह् और गृह् धातुके उत्तर आय्य प्रत्यय हो, श्रवाय्यो यज्ञपशुः । दक्षाय्यो गरुडः गृध्रश्च । स्पृहयाय्यः । गृहयाय्यो गृहस्वामी ॥

३७७ 'दिधिषाय्यः' ॥ ॥ दधातेर्द्वित्वमित्वं षुक् च ॥ मित्र इव यो दिधिषाय्योऽभूत् ॥

३७७-दिधिषाय्यः । धा धातुके उत्तर आय्य प्रत्यय, धातुको द्वित्व, इत्व और षुक् आगम हो । मित्र इव ये दिधिषाय्यः । अर्थात् जो मित्रकी समान हो ॥

३७८ 'वृञ एण्यः' ॥ ॥ वरेण्यः ॥

३७८-वृञ् धातुके उत्तर एण्य प्रत्यय हो, वरेण्यः (स्तुतियोग्य, वरणयोग्य) ॥

३७९ 'स्तुवः क्सेय्यश्छन्दसि' ॥ ॥ स्तुषेय्यं पुरुवर्चसम् ॥

३७९-वेदमें स्तु धातुके उत्तर क्सेय्य प्रत्यय हो । स्तुषेय्यं पुरुवर्चसम् (बडी कान्ति) ॥

३८० 'राजेरन्यः' ॥ ॥ राजन्यो वह्निः ॥

३८०-राज धातुके उत्तर अन्य प्रत्यय हो, यथा-राजन्यः वह्निः । (अर्थात् अग्नि) ॥

३८१'शृरम्योश्च' ॥ ॥ शरण्यम् । रमण्यम्॥

३८१-शृ और रमि धातुके उत्तर अन्य प्रत्यय हो, शरण्यम्। रमण्यम (रमणयोग्य) ॥

३८२ 'अर्तेर्निच्' ॥ ॥ अरण्यम् ॥

३८२–ऋ धातुके उत्तर अन्य प्रत्यय हो, और यह प्रत्यय नित्संज्ञक हो, अरण्यम् (वन) ॥

३८३ 'पर्जन्यः' ॥ ॥ पृषु सेचने । षस्य जः । 'पर्जन्यः शक्रमेघयोः' ॥

३८३–पर्जन्यः । पृष धातु सेचन करनेमें है । षके स्थानमें ज होकर–पर्जन्यः । अर्थात् शक्र और मेघ ॥

३८४ 'वदेरान्यः' ॥ ॥ 'वदान्यस्त्यागिवाग्मिनोः' ॥

३८४–वद धातुके उत्तर आन्य प्रत्यय हो, यथा–वदान्यः । अर्थात् त्यागशील और वाग्मी ॥

३८५ 'अमिनक्षियजिवधिपतिभ्योऽत्रन्' ॥ ॥ अमत्रं भाजनम् । नक्षत्रम् । यजत्रः । वधत्रमायुधम् । पतत्रं तनूरुहम् ॥

३८५–अमि, नक्षि, यजि, वधि और पति धातुके उत्तर अत्रन् प्रत्यय हो, यथा, अमत्रं भाजनम् । नक्षत्रम् । यजत्रः वधत्रमायुधम् । पतत्रं तनूरुहम् (अर्थात्–रोम) ॥

३८६ 'गडेरादेश्चकः' ॥ ॥ कडत्रम् । डलयोरेकत्वस्मरणात्, कलत्रम् ॥

३८६–गड धातुके उत्तर अत्रन् प्रत्यय हो, और गके स्थानमें क हो, कडत्रम् । ड और ल यह दोनों ही एक हैं, इस कारण ल होकर–कलत्रम् (स्त्री) ॥

३८७'वृञश्चित्' ॥ ॥ वरत्रा चर्ममया रज्जुः॥

३८७–वृञ् धातुके उत्तर अत्रन् प्रत्यय हो, और यह प्रत्यय चित्संज्ञक हो, यथा–वरत्रा, चर्म्ममयी रज्जुः (अर्थात् चमडेकी बनी रस्सी) ॥

३८८ 'सुविदेः कत्रन्' ॥ ॥ सुविदत्रं कुटुम्बकम् ॥

३८८–सुपूर्वक विद धातुके उत्तर कत्रन् प्रत्यय हो, सुविदत्रम् कुटुम्बकम् ॥

३८९ 'कृतेर्नुम् च' ॥ ॥ कृन्तत्रं लाङ्गलम्॥

३८९–कृत धातुके उत्तर कत्रन् प्रत्यय और नुम् आगम हो, यथा–कृन्तत्रं लाङ्गलम् (अर्थात् हल) ॥

३९० 'भृमृदृशियजिपर्विपच्यमितमिनमिहर्यभ्योऽतच्' ॥ ॥ दशभ्योऽतच् स्यात् । भरतः । मरतो मृत्युः । दर्शतः सोमसूर्ययोः । यजतः ऋत्विक् । पर्वतः । पचतोऽग्निः । अमतो रोगः । तमतस्तृष्णापरः । नमतः प्रह्वः । हर्यतोऽश्वः ॥

३९०–भृ, मृ, दृशि, यजि, पर्वि, पचि, अमि, तमि, नमि, और हर्य्य धातुके उत्तर अतच् प्रत्यय हो, भरतः । मरतः–मृत्युः । दर्शतः–सोमः, सूर्यः । यजतः ऋत्विक् । पर्वतः । पचतः–अग्निः । अमतः–रोगः । तमतः–तृष्णापरः । नमतः–प्रह्वः । हर्य्यतः अश्वः (घोडा) । भृ+अतच्=भरत+सु=भरतः (पोषक वा नृपविशेष) ॥

३९१ 'पृषिरञ्जिभ्यां कित्' ॥ ॥ पृषतो मृगो बिन्दुश्च । रजतम् ॥

३९१–पृष और रञ्जि धातुके उत्तर अतच् प्रत्यय हो और यह प्रत्यय कित्संज्ञक हो । पृषतो मृगः बिन्दुः । रजतम् ॥

३९२ 'खलतिः' ॥ ॥ स्खलतेः सलोपः अतच्प्रत्ययान्तस्य इत्वं चाखलतिर्निष्केशशिराः॥

३९२–स्खल धातुके सकारका लोप, अतच् प्रत्यय और इत्व हो, यथा–खलतिः निष्केशशिराः, (जिसके शिरपर बाल न हों) ॥

३९३ 'शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः' ॥ ॥ सप्तभ्योऽथः स्यात् । शयथोऽजगरः। शपथः । रवथः कोकिलः । गमथः पथिकः पन्थाश्च । वञ्चथो धूर्तः । वन्दीतिपाठे वन्दतेर्वन्द्यतेवा वन्दथः स्तोता स्तुत्यश्च । जीवथ आयुष्मान् । प्राणथो बलवान् । बाहुलकाच्छमिदमिभ्याम्। 'शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः' ॥

३९३–शीङ्, शपि, रु, गमि, वञ्चि, जीवि, प्राणि, इन सात धातुओंके उत्तर अथ प्रत्यय हो, शयथः अजगरः । शपथः । रवथः–कोकिलः । गमथः–पथिकः पन्थाः । वञ्चथः धूर्त्तः । वन्दि ऐसे पाठमें 'वदि अभिवादनस्तुत्योः' इस धातुसे कर्तामें या कर्ममें अथ प्रत्यय करनेपर वन्दथः ऐसा रूप होगा । इसका अर्थ स्तोता और स्तुत्य । जीवथः आयुष्मान् । प्राणथः बलवान् । बाहुलकबलसे शमि और दमि धातुके उत्तर भी अथ प्रत्यय हो । "शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः" ॥

३९४ 'भृञश्चित्' ॥ ॥ भरथो लोकपालः॥

३९४–भृञ् धातुके उत्तर अथ प्रत्यय हो, और यह प्रत्यय चित्संज्ञक हो, भरथः लोकपालः ॥

३९५ 'रुदिविदिभ्यां ङित्' ॥ ॥ रोदितीति रुदथः शिशुः । वेत्तीति विदथः ॥

३९५–रुदि और विदि धातुके उत्तर अथ प्रत्यय हो और यह प्रत्यय ङित्संज्ञक हो, रोदिति इस विग्रहमें रुदथः–शिशुः । वेत्ति, विदथः ॥

३९६ 'उपसर्गे वसेः' ॥ ॥ आवसथो गृहम्। संवसथो ग्रामः ॥

३९६–उपसर्गपूर्वक वस धातुके उत्तर अथ प्रत्यय हो, यथा–आवसथः–गृहम् । संवसथः ग्रामः ॥

३९७ 'अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्' ॥ ॥ त्रयोदशभ्योऽसच् स्यात् । अततीत्यतसो वायुरात्मा च। अवतीत्यवसो राजा भानुश्च चमत्यस्मिन् चमसः सोमपानपात्रम् । ताम्यत्यस्मिन् तमसोऽन्ध-

कारः। नमसः अनुकूलः। 'रभसो वेगहर्षयोः'। लभसो धनं याचकश्च। नभति नभ्यति वा नभस आकाशः। तपसः पक्षी चन्द्रश्च। पतसः पक्षी। पनसः कण्टकिफलः। पणसः पण्यद्रव्यम्। महसं ज्ञानम्॥

३९७-अति, अवि, चमि, तमि, नमि, रभि, लभि, नभि, तपि, पति, पनि, पणि, महि, इन १३ धातुओंके उत्तर असच् प्रत्यय हो। अतति इति अतसः वायुः आत्मा। अवति इति अवसः राजा, भानुः। चमत्यस्मिन् चमसः सोमपानपात्रम्। ताम्यति अस्मिन् इति तमसः अन्धकारः। नमसः अनुकूलः। रभसः वेगः हर्षः। लभसः धनं याचकः। नभति नभ्यति वा नभसः आकाशः। तपसः पक्षी चन्द्रः। पतसः पक्षी। पनसः कण्टकिफलम्। पणसः पण्यद्रव्यम्। महसं ज्ञानम्॥

३९८ 'वेञस्तुट् च'॥ ॥ बाहुलकादात्वाभावः। वेतसः॥

३९८-वेञ् धातुके उत्तर असच् प्रत्यय हो और तुट्का आगम हो, बाहुलकबलसे आकारका अभाव होगा। यथा-वेतसः॥

३९९ 'वहियुभ्यां णित्'॥ ॥ वाहसोऽजगरः। यावसस्तृणसङ्घातः॥

३९९-वहि और यु धातुके उत्तर असच् प्रत्यय हो, और यह प्रत्यय णित्संज्ञक हो। वाहसः-अजगरः। यावसः-तृणसंघातः (तृणोंका समूह)॥

४०० 'वयश्च'॥ ॥ वय गतौ। वायसः काकः॥

४००-वय धातुके उत्तर असच् प्रत्यय हो, वायसः-काकः॥

४०१ 'दिवः कित्'॥ ॥ दिवसम्। दिवसः॥

४०१-दिव् धातुके उत्तर असच् प्रत्यय हो और यह प्रत्यय कित्संज्ञक हो। दिवसम्। दिवसः॥

४०२ 'कृशृशलिकलिगर्दिभ्योऽभच्'॥ ॥ करभः। शरभः। शलभः। कलभः। गर्दभः॥

४०२-कृ, शृ, शलि, कलि और गर्दि धातुके उत्तर अभच् प्रत्यय हो, करभः (हाथीकी सूँड)। शरभः (जन्तुविशेष) शलभः। कलभः (हाथीका बच्चा) गर्दभः (गधा)॥

४०३ 'ऋषिवृषिभ्यां कित्'॥ ॥ ऋषभः। वृषभः॥

४०३-ऋष और वृष धातुके उत्तर अभच् प्रत्यय हो और यह प्रत्यय कित्संज्ञक हो, ऋषभः। वृषभः (बैल)॥

४०४ 'रुषेर्लुष् च'॥ ॥ रुष हिंसायाम्। अस्मादभच् नित्कित्स्यात्। लुषादेशश्च। 'लुषभो मत्तदन्तिनि'॥

४०४-रुष धातुके उत्तर अभच् प्रत्यय हो, और वह नित् और कित्संज्ञक हो और लुष आदेश हो। लुषभः मत्तदन्ती (मतवाला हाथी)॥

४०५ 'रासिवल्लिभ्यां च'॥ ॥ रासभः। वल्लभः॥

४०५-रास और वल्ल धातुके उत्तर अभच् प्रत्यय हो, यथा-रासभः (गधा)। वल्लभः अर्थात् प्रिय॥

४०६ 'जॄविशिभ्यां झच्'॥ ॥ जरन्तो महिषः। वेशन्तः पल्वलम्॥

४०६-जॄ और विशि धातुके उत्तर झच् प्रत्यय हो, यथा-जरन्तः महिषः। वेशन्तः पल्वलम् (अल्प सरोवर)॥

४०७ 'रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि'॥ ॥ रोहन्तो वृक्षभेदः। नन्दन्तः पुत्रः। जीवन्त औषधम्। प्राणन्तो वायुः। षित्वात् ङीष्। रोहन्ती॥

४०७-रुहि, नन्दि, जीवि और प्राणि धातुओंके उत्तर अशीश अर्थमें झच् प्रत्यय हो और वह प्रत्यय षित्संज्ञक हो। रोहन्तः। वृक्षभेदः नन्दन्तः पुत्रः। जीवन्तः औषधम्। प्राणन्तः। वायुः। षित् प्रत्यय होनेके कारण स्त्रीलिङ्गमें ङीष् होगा। रोहन्ती॥

४०८ 'तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च'॥ ॥ दशभ्यो झच् स्यात्स च षित्। तरन्तः समुद्रः। तरन्ती नौका। भवन्तः कालः। वहन्तो वायुः। वसन्त ऋतुः। भासन्तः सूर्यः। साधन्तो भिक्षुः। गडेर्घटादित्वान्मित्त्वं ह्रस्वः। अयामन्तेति णेरयः। गण्डयन्तो जलदः। मण्डयन्तो भूषणम्। जयन्तः शक्रपुत्रः। नन्दयन्तो जलदः। नन्दकः॥

४०८-तॄ, भू, वहि, वासि, भासि, साधि, गडि, मण्डि, जि और नन्दि धातुके उत्तर झच् प्रत्यय हो, और यह प्रत्यय षित्संज्ञक हो, यथा-तरन्तः समुद्रः तरन्ती नौका। भवन्तः कालः। वहन्तः वायुः। वसन्तः ऋतुः। भासन्तः सूर्यः। साधन्तः भिक्षुः। गडि धातु घटादि गणीय होनेके कारण उसकी मित्संज्ञा हुई। पश्चात् "मितां ह्रस्वः" इस सूत्रसे ह्रस्व होनेपर "अयामन्त० २३११" इस सूत्रसे णिके स्थानमें अय् आदेश होगा। गंडयन्तः जलदः (मेघ)। मंडयन्तः भूषणम्। जयन्तः शक्रपुत्रः। नन्दयन्तः नन्दकः॥

४०९ 'हन्तेर्मुट् हि च'॥ ॥ हेमन्तः॥

४०९-हन् धातुके उत्तर झच् प्रत्यय हो और मुट् आगम और धातुके स्थानमें हि आदेश हो। हेमन्तः। (ऋतुका नाम)॥

४१० 'भन्देर्नलोपश्च'॥ ॥ भदन्तः प्रव्रजितः॥

४१०-भन्दि धातुके उत्तर झच् प्रत्यय हो, धातुके नकारका लोप हो, भदन्तः प्रव्रजितः (सन्यासी)॥

४११ 'ऋच्छेररः' ॥ ॥ ऋच्छरा वेश्या । बाहुलकाज्जर्जरझर्झरादयः ॥

४११--ऋच्छ धातुके उत्तर अर प्रत्यय हो, यथा--ऋच्छरा वेश्या । बाहुलकबलसे जर्जरः झर्झरः इत्यादि पद भी हों ॥

४१२ 'अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्' ॥ ॥ षड्भ्योऽरश्चित् स्यात् । अररं कपाटम् । कमरः कामुकः । भ्रमरः । चमरः । देवरः । वासरः ॥

४१२--अर्त्ति, कमि, भ्रमि, चमि, देवि और वासि धातुके उत्तर अर प्रत्यय हो, और यह प्रत्यय चित्संज्ञक हो, यथा--अररं कपाटम् (किवाड)। कमरः कामुकः (कामी)। भ्रमरः । चमरः । देवरः । वासरः (दिन) ॥

४१३ 'कुवः क्ररन्' ॥ ॥ कुररः पक्षिभेदः ॥

४१३--कु धातुके उत्तर क्ररन् प्रत्यय हो, कुररः पक्षिभेदः कु+क्ररन्=कुरर+सु=कुररः ॥

४१४ 'अङ्गिमदिमन्दिभ्य आरन्' ॥ ॥ अङ्गारः । मदारो वराहः । मन्दारः ॥

४१४--अङ्गि, मदि और मन्दि धातुके उत्तर आरन् प्रत्यय हो, अङ्गारः । मदारः--वराहः। मन्दारः--पारिजातः अर्थात् कल्पवृक्ष ॥

४१५ 'गडेः कड च' ॥ ॥ कडारः पारिजातकः ॥

४१५--गड धातुके उत्तर आरन् प्रत्यय हो और गड धातुके स्थानमें कड आदेश हो । कडारः (कल्पवृक्ष) ॥

४१६ 'शृङ्गारभृङ्गारौ'॥ ॥शृभृञ्भ्यामारन्नुम् । गुग्हस्वश्च। शृंगारो रसः।'भृंगारः कनकालुकः'॥

४१६--शृंगारः और भृंगारः यह दो पद निपातनसे सिद्ध हों । शृ और भृञ् धातुके उत्तर आरन् प्रत्यय हो और नुम् गुक् आगम और ह्रस्व हो, शृंगारः रसः । भृंगारः कनकालुका (झारी) ॥

४१७ 'कञ्जिमृजिभ्यां चित्' ॥ ॥ कञ्जिः सौत्रः । कञ्जारो मयूरः । मार्जारः ॥

४१७--कंजि और मृजि धातुके उत्तर आरन् प्रत्यय हो, कंजारः मयूरः । मार्जारः (बिलाव) ॥

४१८ 'कमेः किदुच्चोपधायाः' ॥ ॥ चिदित्यनुवृत्तेरन्तोदात्तः । कुमारः ॥

४१८--कम् धातुके उत्तर आरन् प्रत्यय हो, और वह कित्संज्ञक हो, और उपधाके स्थानमें उकार हो । चित् इस भागकी अनुवृत्ति होनेसे यह अन्तोदात्त होगा । कुमारः ॥

४१९ 'तुषारादयश्च' ॥ ॥ तुषारः । कासारः । सहार आम्रभेदः ॥

४१९--तुषारादि शब्द निपातनसे सिद्ध हों । तुषारः । कासारः । सहारः आम्रभेदः ॥

४२० 'दीङो नुट् च' ॥ ॥ दीनारः सुवर्णाभरणम् ॥

४२०--दीङ् धातुके उत्तर आरन् प्रत्यय हो, और नुट् आगम हो, दीनारः सुवर्णाभरणम् (सुवर्णमुद्रा) ॥

४२१ 'सर्त्तेरपः षुक् च' ॥ ॥ सर्षपः ॥

४२१--सर्त्ति धातुके उत्तर अप प्रत्यय हो,और षुक् आगम हो, सर्षपः ॥

४२२ 'उषिकुटिदलिकचिखजिभ्यः कपन्' ॥ 'उषपो वह्निसूर्ययोः' । कुटपो मानभाण्डम् । दलपः प्रहरणम् ॥ कचपं शाकपत्रम् । खजपं घृतम् ॥

४२२--उषि, कुटि, दलि, कचि और खजि धातुके उत्तर कपन् प्रत्यय हो,यथा--उषपः वह्नि और सूर्य । कुटपः मानभांडम् (तोलका वर्तन) । दलपः प्रहरणम् । कचपं शाकपत्रम् । खजपं घृतम् । खज्+कपन्=खज्+अपन्=खजप+अम् खजपम् अर्थात् घी ॥

४२३ 'क्वणेः संप्रसारणं च' ॥ ॥ कुणपम् ॥

४२३--क्वणि धातुके उत्तर कपन् प्रत्यय हो और धातुको सम्प्रसारण हो । कुणपम् ॥

४२४ 'कपश्चाक्रवर्म्मणस्य' ॥ स्वरे भेदः ॥

४२४--चाक्रवर्मणके मतमें कप् प्रत्यय होगा उसमें स्वरका भेद होगा ॥

४२५ 'विटपपिष्टपविशिपोलपाः'॥ ॥चत्वारोऽमी कपन्प्रत्ययान्ताः । विट शब्दे । विटपः । विशतेरादेः पः । प्रत्ययस्य तुट् । षत्वम् । पिष्टपं भुवनम् । विशतेः प्रत्ययादेरित्वम् । विशिपं मन्दिरम् ॥ वलतेः संप्रसारणम् ॥ ॥ 'उलपं कोमलं तृणम्' ॥

४२५--विटप, पिष्टप, विशिप और उलप यह चार शब्द कपन् प्रत्ययान्त निपातनसे सिद्ध हों । विट धातु शब्द करनेमें है । विटपः । विश धातुके आदिवर्णके स्थानमें प और प्रत्ययको तुट् आगम और षत्व हो, पिष्टपं भुवनम् । विश धातुके प्रत्ययके आदिको इकार हो, विशिपं मन्दिरम्। वल धातुको सम्प्रसारण हो, उलपं कोमलं तृणम् (कोमल तृणका नाम उलप है) ॥

४२६ 'वृतेस्तिकन्' ॥ ॥ वर्त्तिका ॥

४२६--वृत धातुके उत्तर तिकन् प्रत्यय हो, यथा--वर्त्तिका ॥

४२७ 'कृतिभिदिलतिभ्यः कित्' ॥ ॥ कृत्तिका । भित्तिका भित्तिः । लत्तिका गोधा ॥

४२७--कृति, भिदि और लति धातुके उत्तर तिकन् प्रत्यय हो, कृत्तिका । भित्तिका भित्तिः । लत्तिका गोधा ॥

४२८ 'इष्यशिभ्यां तकन्' ॥ ॥ इष्टका । अष्टका ॥

४२८--इष् और अश् धातुके उत्तर तकन् प्रत्यय हो,इष्टका अष्टका ॥

१ विष्टपमिति केचित् ।

४२९ 'इणस्तशन्तशसुनौ'॥ ॥एतशो ब्राह्मणः। स एव एतशाः ॥

४२९-इण् धातुके उत्तर तशन् और तशसुन् प्रत्यय हो, एतशो-ब्राह्मणः । वही-एतशाः ॥

४३० 'वीपतिभ्यां तनन्' ॥ ॥ वी गत्यादौ । वेतनम् । पत्तनम् ॥

४३०-वी और पति धातुके उत्तर तनन् प्रत्यय हो, वेतनम् । पत्तनम् ॥

४३१ 'दृदलिभ्यां भः' ॥ ॥ दर्भः । 'दल्भः स्यादृषिचक्रयोः' ॥

४३१-दृ और दलि धातुके उत्तर भन् प्रत्यय हो, दर्भः । दल्भः । अर्थात् ऋषि और चक्र ॥

४३२ 'अर्तिगृभ्यां भन्' ॥ ॥ अर्भः ।गर्भः॥

४३२-अर्त्ति और गृ धातुके उत्तर भन् प्रत्यय हो, अर्भः। गर्भः । अर्भः-(बालक) ॥

४३३ 'इणः कित्' ॥ ॥ इभः ॥

४३३-इण् धातुके उत्तर भन् प्रत्यय हो, और यह प्रत्यय कित्संज्ञक हो, इभः ॥

४३४ 'असिसञ्जिभ्यां क्थिन्' ॥ ॥ अस्थि । सक्थि ॥

४३४-असि और संजि धातुके उत्तर क्थिन् प्रत्यय हो, अस्थि । सक्थि ॥

४३५ 'प्लुषिकुषिशुषिभ्यः क्सिः' ॥ ॥ प्लुक्षिर्वह्निः । कुक्षिः । शुक्षिर्वातः ॥

४३५-प्लुषि, कुषि और शुषि धातुके उत्तर क्सिः प्रत्यय हो । प्लुक्षिः वह्निः । कुक्षिः । शुक्षिः-वातः ॥

४३६ 'अशेर्नित्' ॥ ॥ अक्षि ॥

४३६-अश् धातुके उत्तर क्सि प्रत्यय हो और यह प्रत्यय नित्संज्ञक हो, अक्षि (नेत्र) ॥

४३७ 'इषेः क्सुः' ॥ ॥ इक्षुः ॥

४३७-इषि धातुके उत्तर क्सु प्रत्यय हो, इक्षुः (गन्ना) ॥

४३८ 'अवितॄस्तृतन्त्रिभ्य ईः' ॥ ॥ 'अवीनारी रजस्वला' । तरीर्नौः । स्तरीर्धूमः । तन्त्रीर्वीणादेर्गुणः ॥

४३८-अवि, तॄ, स्तृ और तंत्रि धातुके उत्तर ई प्रत्यय हो अवीर्नारी रजस्वला । तरीः नौः । स्तरीः धूमः । तंत्रीः वीणा-गुणः । अव्+ई=अवी+सु=अवीः-रजस्वला स्त्री।तरीः-नौका। स्तरीः-धुआं । तन्त्री-वीणादिका डोरा ॥

४३९ 'यापोः किद्द्वे च' ॥ ॥ ययीरश्वः । 'पपीः स्यात्सोमसूर्ययोः' ॥

४३९-या और पा धातुके उत्तर ई प्रत्यय हो, और यह प्रत्यय कित्संज्ञक हो, और धातुको द्वित्व हो, ययीः अश्वः । पपीः सोमः सूर्यः ॥

४४० 'लक्षेर्मुट् च' ॥ ॥ लक्ष्मीः ॥

॥ इत्युणादिषु तृतीयः पादः ॥

४४०-लक्ष धातुके उत्तर ई प्रत्यय हो और मुट् आगम हो, लक्ष्मीः ॥

इत्युणादिषु तृतीयपादः ॥

४४१ 'वातप्रमीः' ॥ ॥ वातशब्दे उपपदे प्रपूर्वान्माधातोरीप्रत्ययः स च कित् । वातप्रमीः ॥ अयं स्त्रीपुंसयोः ॥

४४१-वातशब्दपूर्वक मा धातुके उत्तर ई प्रत्यय हो । यह प्रत्यय कित्संज्ञक हो, यथा-वातप्रमीः । यह शब्द स्त्री और पुँल्लिङ्गवाचक है ॥

४४२ 'ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निज्यतुजलिजिष्ठुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः' ॥ ॥ द्वादशभ्यः क्रमात्स्युः । अर्त्तेः कत्निच् यण् । 'बद्धमुष्टिः करो रत्निः सोऽरत्निः प्रसृताङ्गुलिः' । तनोतेर्यतुच् । तन्यतुर्वायू रात्रिश्च । अञ्जेरलिच् । अञ्जलिः । वनेरिष्ठुच् । वनिष्ठुः स्थविरान्त्रम् । अञ्जेरिष्ठच् । अञ्जिष्ठो भानुः । अर्पयतेरिसन् अर्पिसोऽग्रमांसम् । मदेः स्यन् । मत्स्यः । अतेरिथिन् । अतिथिः । अंगेरुलिः । अंगुलिः । कौतेरसः । कवसः । अच इत्येके । कवचम् । यौतेरासः । यवासो दुरालभा । कृशेरानुक् । कृशानुः ॥

४४२-ऋ धातुके उत्तर कत्निच् और यण् होगा । तनि धातुके उत्तर यतुच्, अंजि धातुके उत्तर अलिच् प्रत्यय, वनि धातुके उत्तर इष्णुच् प्रत्यय, अंजि धातुके उत्तर इष्ठच् प्रत्यय, अर्पि धातुके उत्तर इसन् प्रत्यय, मदि धातुके उत्तर स्यन् प्रत्यय, अति धातुके उत्तर इथिन् प्रत्यय, अंगि धातुके उत्तर उलि प्रत्यय, कु धातुके उत्तर अस प्रत्यय किसी २ के मतमें युच् प्रत्यय भी हो, यु धातुके उत्तर आस प्रत्यय हो, और कृशि धातुके उत्तर आनक् प्रत्यय हो, यथा-'रत्निः बद्धमुष्टिकरः' । "अरत्निः प्रसृतांगुलिः" । तन्यतुः वायुः रात्रिः । अंजलिः । वनिष्ठुः स्थविरांत्रम् ।अंजिष्ठः भानुः । अर्पिसः अग्रमांसम् । मत्स्यः । अतिथिः । अंगुलिः । कवसः, कोई अच् प्रत्यय कहतेहैं । कवचम् । यवासः-दुरालभा । कृशानुः (अग्नि) ॥

४४३ 'शॄः करन्' ॥ ॥ उत्तरसूत्रे किद्ग्रहणादिह ककारस्य नेत्त्वम् । शर्करा ॥

४४३-शॄ धातुके उत्तर करन् प्रत्यय हो । उत्तर सूत्रमें कित् ग्रहणके कारण इस स्थलमें ककारको इत्व न होगा । शर्करा ॥

४४४ 'पुषः कित्' ॥ ॥ पुष्करम् ॥

४४४-पुष धातुके उत्तर करन् प्रत्यय हो, और यह प्रत्यय कित्संज्ञक हो । पुष्करम् ॥

४४५ 'कलश्च' ॥ ॥ पुष्कलम् ॥

४४५–पुष धातुके उत्तर कल प्रत्यय भी हो । पुष्कलम् (पुष्कल अर्थात् पूर्ण) ॥

४४६ 'गमेरिनिः' ॥ ॥ गमिष्यतीति गमी॥

४४६–गम् धातुके उत्तर इनि प्रत्यय हो, गमी ॥

४४७ 'आङि णित्' ॥ ॥ आगामी ॥

४४७–आङ्पूर्वमें रहते गम धातुके उत्तर इनि प्रत्यय हो और वह णित्संज्ञक हो, आगामी (आनेवाला) ॥

४४८ 'भुवश्च' ॥ ॥ भावी ॥

४४८–भू धातुके उत्तर इनि प्रत्यय हो । भावी (होनेवाला) ॥

४४९ 'प्रे स्थः' ॥ ॥ प्रस्थायी ॥

४४९–प्रपूर्वक स्था धातुके उत्तर इनि प्रत्यय हो,प्रस्थायी॥

४५० 'परमे कित्' ॥ ॥ परमेष्ठी ॥

४५०–परमशब्दपूर्वक स्था धातुके उत्तर इनि प्रत्यय हो और वह कित्संज्ञक हो । परमेष्ठी ॥

४५१ 'मन्थः' ॥ ॥ मन्थतेरिनिः कित्स्यात् किस्वान्नकारलोपः । मन्थाः।मन्थानौ।मन्थानः ॥

४५१–मन्थ धातुके उत्तर इनि प्रत्यय हो और यह प्रत्यय कित्संज्ञक हो, कित्संज्ञक होनेके कारण नकारका लोप हो, मन्थाः । मन्थानौ । मन्थानः ॥

४५२ 'पतस्थ च' ॥ ॥ पन्थाः । पन्थानौ॥

४५२–पत धातुके उत्तर इनि प्रत्यय हो, थकारान्तादेश भी हो । पन्थाः । पन्थानौ ॥

४५३ 'खजेराकः' ॥ ॥ खजाकः पक्षी ॥

४५३–खजि धातुके उत्तर आक प्रत्यय हो, खजाकः पक्षी ॥

४५४ 'बलाकादयश्च' ॥ ॥ बलाका । शलाका । पताका ॥

४५४–बलाकादि शब्द निपातनसे सिद्ध हों । बलाका । शलाका । पताका ॥

४५५ 'पिनाकादयश्च' ॥ ॥ पातेरित्वं नुम् च । 'क्लीबपुंसोः पिनाकः स्याच्छूलशङ्करधन्वनोः' । तड आघाते । तडाकः ॥

४५५–पिनाकादि शब्द निपातनसे सिद्ध हों । पा धातुके आकारके स्थानमें इकार हो, और नुम् आगम हो । "क्लीब पुंसोः पिनाकः स्याच्छूलशङ्करधन्वनोः" अर्थात् पिनाक शब्द शंकरके धनुषमें क्लीबमें पुँल्लिंगमें वर्तताहै और शूलमें वर्तताहै । तड धातु आघातमें तडाकः ॥

४५६ 'कषिदूषिभ्यामीकन्' ॥ ॥ कषीका पक्षिजातिः । 'दूषिका नेत्रयोर्मलम्' ॥

४५६–कषि और दूषि धातुके उत्तर ईकन् प्रत्यय हो, कषीका । पक्षिजातिः । "दूषिका नेत्रयोर्मलम्" ॥

४५७ 'अनिहृषिभ्यां किच्च' ॥ ॥ अनीकम् । हृषीकम् ॥

४५७–अनि और हृषि धातुके उत्तर ईकन् प्रत्यय हो, और वह कित्संज्ञक हो, अनीकम् । हृषीकम् ॥

४५८ 'चङ्कणः कङ्कणश्च' ॥ ॥ कण शब्दे अस्माद्यङ्लुगन्तादीकन् धातोः कंकणादेशश्च । 'घण्टिकायां कंकणीका सैव प्रतिसरापि च' ॥

४५८–कण धातु शब्दकरनेमें है । यङ्लुगन्त कण धातुके उत्तर ईकन् प्रत्यय हो, और धातुके स्थानमें कङ्कणादेश हो, "घण्टिकायां कङ्कणीका सैव प्रतिसरापि च" । (छोटीघण्टी) ॥

४५९ 'शॄपॄवृञां द्वे रुक्चाभ्यासस्य' ॥ ॥ शर्शरीको हिंस्रः । पर्परीको दिवाकरः । वर्वरीकः कुटिलकेशः ॥

४५९–शॄ, पॄ, और वृञ् धातुके उत्तर ईकन् प्रत्यय हो, और धातुको द्वित्व हो, पश्चात् अभ्यासको रुक्का आगम हो। शर्शरीको हिंस्रः । पर्परीको दिवाकरः । वर्वरीकः कुटिलकेशः (अर्थात् टेढे बालोंवाला) ॥

४६० 'फर्फरीकादयश्च' ॥ ॥ स्फुर स्फुरणे । अस्मादीकन् धातोः फर्फरादेशः । फर्फरीकं किसलयम् । दर्दरीकं वादित्रम् । झर्झरीकं शरीरम्। तिन्तिडीको वृक्षभेदः । चर्रेर्नुम् च । चञ्चरीको भ्रमरः । मर्मरीको हीनजनः । कर्करीका गलन्तिका । पुणतेः पुण्डरीकं वादित्रम् । पुण्डरीको व्याघ्रोऽग्निर्दिग्गजश्च ॥

४६०–फर्फरीकादि शब्द निपातनसे सिद्ध हों । स्फुर धातु स्फुरणमें है । इस धातुके उत्तर ईकन् प्रत्यय और धातुके स्थानमें फर्फरादेश हो, फर्फरीकं किसलयम् (कमल) । दर्दरीकं वादित्रम् (बाजा) । झर्झरीकं शरीरम् । तिन्तिडीकः वृक्षभेदः (इमली) । चर धातुको नुम् हो, और उसके उत्तर ईकन् प्रत्यय हो । चञ्चरीकः(भौंरा)। मर्मरीकः–हीनजनः । कर्करीका गलन्तिका । पुण धातुके उत्तर ईकन् प्रत्यय हो, पुण्डरीकं वादित्रम् । पुण्डरीकः–व्याघ्रः, अग्निः और दिग्गजः ॥

४६१ 'ईषेः किद्ध्रस्वश्च' ॥ ॥ इषीका शलाका॥

४६१–ईष धातुके उत्तर ईकन् प्रत्यय हो, और वह कित्संज्ञक हो, और धातुको ह्रस्व हो, इषीका–शलाका ॥

४६२ 'ऋजेश्च' ॥ ॥ ऋजीकः उपहतः ॥

४६२–ऋजि धातुके उत्तर ईकन् प्रत्यय हो, ऋजीकः उपहतः ॥

४६३ 'सर्तेर्नुम् च' ॥ ॥ सृणीका लाला ॥

४६३–सृ धातुके उत्तर ईकन् प्रत्यय हो, और नुम् आगम हो, सृणीका–लाला ॥

४६४ 'मृडः कीकन्कङ्कणौ' ॥ ॥ मृडीको मृगः । मृडंकणः शिशुः ॥

४६४–मृड धातुके उत्तर कीकन् और कङ्कण प्रत्यय हो, मृडीकः मृगः । मृडङ्कणःशिशुः ॥

४६५ 'अलीकादयश्च' ॥ ॥ कीकन्नन्ता निपात्यन्ते । अल भूषणादौ । अलीकं मिथ्या । विपूर्वाद्व्यलीकं विप्रियं खेदश्च । 'वलीकं पटलप्रान्ते' इत्यादि ॥

४६५–अलीकादि शब्द कीकन्प्रत्ययान्त निपातनसे सिद्ध हों । अल धातु भूषणादिमें है । अलीकं मिथ्या । विपूर्वक होनेपर व्यलीकं विप्रियं खेदश्च । व्यलीक शब्द अप्रिय और खेदमें है । वलीकं पटलप्रान्ते, अर्थात् पटलके समीप ॥

४६६ 'कॄतॄभ्यामीषन्' ॥ ॥ करीषोऽस्त्री शुष्कगोमये । तरीषः तरिता ॥

४६६–कॄ और तॄ धातुके उत्तर ईषन् प्रत्यय हो, करीषः शुष्कगोमयः । (सूखा गोवर) तरीषः–तरिता ॥

४६७ 'शॄपॄभ्यां किच्च'॥ ॥शिरीषः। पुरीषम्॥

४६७–शॄ, पॄ धातुके उत्तर ईषन् प्रत्यय हो, और वह कित्संज्ञक हो, शिरीषः । पुरीषम्–(विष्ठा)॥

४६८ 'अर्जेर्ऋज च'॥ ॥'ऋजीषं पिष्टपचनम्'॥

४६८–अर्जि धातुके स्थानमें ऋज आदेश हो, और उसके उत्तर ईषन् प्रत्यय हो, 'ऋजीषं पिष्टपचनम्' ॥

४६९ 'अम्बरीषः' ॥ ॥ अयं निपात्यते । अबि शब्दे ॥ 'अम्बरीषः पुमान् भ्राष्ट्रम्' । अमरस्तु 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' ॥

४६९–शब्दार्थ अबि धातुके उत्तर ईषन् प्रत्यय होकर अम्बरीष शब्द निपातनसे सिद्ध हो, भ्राष्ट्रार्थमें अम्बरीषः यह पुमान् है । अमरस्तु "क्लीबेऽम्बरीषं भ्राष्ट्रो ना" पुल्लिंगमें भ्राष्ट्र शब्द है और नपुंसकमें अम्बरीष शब्द है यह अमरकोशमें है ॥

४७० 'कॄशॄपॄकटिपटिशौटिभ्य ईरन्' ॥ ॥ करीरो वंशांकुरः । शरीरम् । परीरं फलम् । कटीरः कन्दरो जघनप्रदेशश्च । पटीरश्चन्दनः कण्टकः कामश्च । 'शौटीरस्त्यागिवीरयोः' ब्राह्मणादित्वात् ष्यञ् । शौटीर्यम् ॥

४७०–कॄ, शॄ, पॄ, कटि, पटि और शौटि धातुके उत्तर ईरन् प्रत्यय हो, करीरो वंशांकुरः । शरीरम् । परीरं फलम् । कटीरः–कन्दरः जघनप्रदेशः (कन्दरा और जंघा) । पटीरः चन्दनः कण्टकः कामश्च। शौटीरस्त्यागी वीरः ।ब्राह्मणादि गणमध्यमें पाठके कारण ष्यञ् प्रत्यय भी होगा, शौटीर्य्यम् ॥

४७१ 'वशेः कित्' ॥ ॥ उशीरम् ॥

४७१–वश धातुके उत्तर ईरन् प्रत्यय हो, और वह कित्संज्ञक हो, उशीरम् (खस) ॥

४७२ 'कशेर्मुट् च' ॥ ॥ कश्मीरो देशः ॥

४७२–कशि धातुके उत्तर ईरन् प्रत्यय हो । और मुट्का आगम हो, कश्मीरः देशः ॥

४७३ 'कृण उच्च' ॥ ॥ कुरीरं मैथुनम् ॥

४७३–कृन् धातुके उत्तर ईरन् प्रत्यय और ऋके स्थानमें उकार हो, कुरीरं–मैथुनम् ॥

४७४ 'घसेः किच्च' ॥ ॥ क्षीरम् ॥

४७४–घस धातुके उत्तर ईरन् प्रत्यय कित्संज्ञक हो, क्षीरम् । (दूध) ॥

४७५ 'गभीरगम्भीरौ' ॥ ॥ गमेर्भः पक्षे नुम् च ॥

४७५–गम् धातुके उत्तर ईरन् प्रत्यय हो, और मके स्थानमें भ आदेश और पक्षमें नुम् आगम हो, गभीरः । गम्भीरः । (गहरा) ॥

४७६ 'विषा विहा' ॥ ॥ स्यतेर्जहातेश्च विपूर्वाभ्यामाप्रत्ययः । विषा बुद्धिः।विहा स्वर्गः। अव्यये इमे ॥

४७६–विपूर्वक स्यति और हा धातुके उत्तर आ प्रत्यय हो, विषा–बुद्धिः । विहा–स्वर्गः । यह अव्यय शब्द हैं ॥

४७७ 'पच एलिमच्' ॥ ॥ पचेलिमो वह्निरव्योः ॥

४७७–पच् धातुके उत्तर एलिमच् प्रत्यय हो, पचेलिमः वह्निरव्योः । अर्थात् अग्नि और सूर्य ॥

४७८ 'शीङो धुक्लक्वलञ्वालनः' ॥ ॥ चत्वारः प्रत्ययाः स्युः । शीधु मद्यम् । शीलं स्वभावः । शैवलः शैवालम् । बाहुलकाद्वस्य पोपि । 'शैवालं शैवलो न स्त्री शेपालो जलनीलिका' ॥

४७८–शीङ् धातुके उत्तर धुक्, लक्, वलञ् और वालन् यह चार प्रत्यय हों, शीधु मद्यम् । शीलम् स्वभावः । शैवलः । शैवालम् । बाहुलकसूत्रबलसे वकारके स्थानमें पकार हो । "शैवालः शैवलो न स्त्री शेपाली जलनीलिका" शैवालः अर्थात् सिवार स्त्रीलिङ्गमें शेपाली जलनीलिका नपुंसकमें शैवालम् ॥

४७९ 'मृकणिभ्यामूकोकणौ' ॥ ॥ मरूको मृगः । काणूकः काकः ॥

४७९–मृ और कणि धातुके उत्तर ऊक प्रत्यय और ऊकण् प्रत्यय हो, मरूको मृगः । काणूकः काकः ॥

४८० 'वलेरूकः' ॥ ॥ वलूकः पक्षी उत्पलमूलं च ॥

४८०–वल धातुके उत्तर ऊक प्रत्यय हो । वलूकः पक्षी उत्पलमूलञ्च (कमलकी जड़) ॥

४८१ 'उलूकादयश्च' ॥ ॥ वलेः संप्रसारणमूकश्च । 'उलूकाविन्द्रपेचकौ' । वावदूको वक्ता । भल्लूकः ॥ शमेर्बुक्च (ग०) शम्बूको जलशुक्तिः ॥

४८१–वल धातुके उत्तर ऊक प्रत्यय और वकारको सम्प्रसारण हो, " उलूकाविन्द्रपेचकौ" । वावदूको वक्ता । भल्लूकः । शम धातुके उत्तर बुक् आगम और ऊक् प्रत्यय हो, शम्बूको जलशुक्तिः । (जलकी सीपी, घोंघा) ॥

४८२ 'शलिमण्डिभ्यामूकण्' ॥ ॥ शालूकं कन्दविशेषः। मण्डूकः ॥

४८२-शलि और मण्डि धातुके उत्तर ऊकण् प्रत्यय हो, शालूकं कन्दविशेषः। मण्डूकः। शाल्+ऊकण्=शालूक+सु=शालूकः ॥

४८३ 'नियो मिः' ॥ ॥ नेमिः

४८३-नि धातुके उत्तर मि प्रत्यय हो, नेमिः (लीक) ॥

४८४ 'अर्त्तेरूच्च' ॥ ॥ ऊर्मिः ॥

४८४-ऋ धातुके उत्तर मि प्रत्यय और ऋके स्थानमें ऊकार हो, ऊर्मिः(लहर) ॥

४८५ 'भुवः कित्' ॥ ॥ भूमिः ॥

४८५-भू धातुके उत्तर मि प्रत्यय हो, और वह कित्संज्ञक हो, भूमिः ॥

४८६ 'अश्नातेरश्च' ॥ ॥ रश्मिः किरणो रज्जुश्च ॥

४८६-अश् धातुके उत्तर मि प्रत्यय हो, और रश् आदेश हो, रश्मिः किरण और रज्जु। अश्+मि=रश्मि+सु=रश्मिः। (किरण और रस्सी) ॥

४८७ 'दलिमः' ॥ ॥ दल विशरणे। दलिमरिन्द्रायुधम् ॥

४८७-दल धातुके मि प्रत्यय हो, 'दलिमरिन्द्रायुधम्' ॥

४८८ 'वीज्याज्वरिभ्यो निः' ॥ ॥ बाहुलकाण्णत्वम्। 'वेणिः स्यात्केशविन्यासः प्रवेणी च स्त्रियामुभे'। ज्यानिः। जूर्णिः ॥

४८८-वी, ज्या और ज्वरि धातुके उत्तर नि प्रत्यय हो, बाहुलकबलसे णत्व होगा। "वेणिः स्यात्केशविन्यासः प्रवेणी च स्त्रियामुभे"। ज्यानिः (जीर्णता, हानि) जूर्णिः। वेणिः-(स्त्रीजनोंके बालोंकी गुथी हुई चोटी) इसे प्रवेणी भी कहतेहैं ॥

४८९ 'सृवृषिभ्यां कित्' ॥ ॥ सृणिरंकुशः। 'वृष्णिः क्षत्रियमेषयोः' ॥

४८९-सृ और वृष धातुके उत्तर नि प्रत्यय हो, और वह कित्संज्ञक हो, सृणिः अंकुशः। "वृष्णिः क्षत्रियमेषयोः" ॥

४९० 'अङ्गेर्नलोपश्च' ॥ ॥ अग्निः ॥

४९०-अङ्ग धातुके उत्तर नि प्रत्यय हो और धातुके नकारका लोप हो, अग्निः ॥

४९१ 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' ॥ ॥ वह्निः। श्रेणिः। श्रोणिः। योनिः। द्रोणिः। ग्लानिः। हानिः। तूर्णिः। बाहुलकान्म्लानिः ॥

४९१-वहि, श्रि, श्रु, यु, द्रु, ग्ला, हा और त्वर धातुके उत्तर नि प्रत्यय हो वह नित्संज्ञक हो। वह्निः, श्रेणिः। योनिः। द्रोणिः। ग्लानिः। हानिः। तूर्णिः। बाहुलक सूत्रबलसे म्लानिः। श्रेणिः-पंक्ति, द्रोणिः-परिमाणविशेष वा जलादिआधार। म्लानिः-मलीनता। हानिः-अलाभ नुकसान ॥

४९२ 'घृणिपृश्निपार्ष्णिचूर्णिभूर्णि' ॥ ॥ एते पञ्च निपात्यन्ते। घृणिः किरणः। स्पृशतेः सलोपः। पृश्निरल्पशरीरः। पृषेर्वृद्धिश्च। पार्ष्णिः पादतलम्। चरेरुपधाया उत्त्वम्। चूर्णिः कपर्दकशतम्। बिभर्तेरुत्त्वम्। भूर्णिर्धरणी ॥

४९२-घृणि, पृश्नि, पार्ष्णि, चूर्णि और भूर्णि यह पांच पद निपातनसे सिद्ध हैं। घृणिः किरणः। स्पृश धातुके सकारका लोप हो, पृश्निः स्वल्प शरीर। पृष धातुको वृद्धि हो, पार्ष्णिः पादतलम्। चर धातुकी उपधाके स्थानमें उकार हो, चूर्णिः कपर्दकशतम्। भृ धातुकी ऋके स्थानमें दीर्घ ऊकार हो, भूर्णिः-धरणिः। (पृश्निः-छोटा शरीर) पार्ष्णिः-गुल्फका अधोभाग ॥

४९३ 'वृदृभ्यां विन्' ॥ ॥ वर्विर्घस्मरः। दर्विः ॥

४९३-वृ और दृ धातुके उत्तर विन् प्रत्यय हो, वर्विः घस्मरः। दर्विः ॥

४९४ 'जॄशॄस्तृजागृभ्यः क्विन्' ॥ ॥ जीर्विः पशुः। शीर्विर्हिंस्रः। स्तीर्विरध्वर्युः। जागृविर्नृपः ॥

४९४-जॄ, शॄ, स्तॄ और जागृ धातुके उत्तर क्विन् प्रत्यय हो, जीर्विः पशुः। शीर्विः हिंस्रः। स्तीर्विः अध्वर्युः। जागृविः नृपः ॥

४९५ 'दिवो द्वे दीर्घश्चाभ्यासस्य' ॥ ॥ 'दीदिविः स्वर्गमोक्षयोः' ॥

४९५-दिव् धातुको द्वित्व हो, और अभ्यासको दीर्घ हो, और क्विन् प्रत्यय हो "दीदिविः स्वर्गमोक्षयोः" ॥

४९६ 'कृविघृष्विच्छविस्थविकिकीदिवि' ॥ ॥ कृविस्तन्तुवायद्रव्यम्। घृष्विर्वराहः। छास्थोर्ह्रस्वत्वं च। छविर्दीप्तिः। स्थविस्तन्तुवायः। दीव्यतेः किकीपूर्वात्। किकीदिविश्चाषः। बाहुलकाद्ध्रस्वदीर्घयोर्विनिमयः। 'चाषेण किकिदीविना' ॥

४९६-कृवि, घृष्वि, छवि, स्थवि और किकीदिवि यह सम्पूर्ण शब्द निपातनसे सिद्ध हैं, कृविः तन्तुवायद्रव्यम्। घृष्विः वराहः। छा और स्था धातुको ह्रस्वता हो, छविः दीप्तिः। स्थविस्तन्तुवायः। किकीपूर्वक दिवि धातुके उत्तर इ प्रत्यय हो किकीदिविश्चाषः। इस स्थलमें बाहुलकबलसे ह्रस्व और दीर्घका भी विनिमय होगा। "चाषेण किकिदीविना" ॥

४९७ 'पातेर्डतिः' ॥ ॥ पतिः ॥

४९७-पा धातुके उत्तर डति प्रत्यय हो, पतिः ॥

४९८ 'शकेर्ऋतिन्' ॥ ॥ शकृत् ॥

४९८-शकि धातुके उत्तर ऋतिन् प्रत्यय हो, शकृत् ॥

४९९ 'अमेरतिः' ॥ ॥ अमतिः कालः ॥

४९९-अमि धातुके उत्तर अति प्रत्यय हो, अमतिः कालः ॥

५०० 'वहिवस्यर्तिभ्यश्चित्' ॥ ॥ वहतिः पवनः। 'वसतिर्गृहयामिन्योः'। अरतिः क्रोधः ॥

५००-वहि, वसि और अर्त्ति धातुके उत्तर अति प्रत्यय हो, और वह चित्संज्ञक हो, वहतिः पवनः । वसतिः गृह और यामिनी । अरतिः क्रोधः ॥

५०१ 'अञ्चेः को वा'॥ ॥ अंकतिरञ्चतिर्वातः॥

५०१-अञ्चि धातुके उत्तर अति प्रत्यय हो, और विकल्प करके चके स्थानमें क हो, अंकतिः अञ्चतिः वातः (वायु) ॥

५०२ 'हन्तेरंह च' ॥ ॥ हन्तेरतिः स्यादंहादेशश्च धातोः । हन्ति दुरितमनया अंहतिर्दानम् । 'प्रादेशनं निर्वपणमपवर्जनमंहतिः' ॥

५०२-हन धातुके स्थानमें अंह आदेश हो, और उसके उत्तर अति प्रत्यय हो, हन्ति दुरितमनया अंहतिः दानम् । " प्रादेशनं निर्वपणमपवर्जनमंहतिः " ॥

५०३ 'रमेर्नित्' ॥ ॥ 'रमतिः कालकामयोः' ॥

५०३-रम् धातुके उत्तर अति प्रत्यय हो, और वह नित्संज्ञक हो, "रमतिः कालकामयोः " ॥

५०४ 'सूङः क्रिः' ॥ ॥ सूरिः ॥

५०४-सूङ् धातुके उत्तर क्रि प्रत्यय हो, सूरिः ॥

५०५ 'अदिशदिभूशुभिभ्यः क्रिन्' ॥ ॥ अद्रिः । शद्रिः शर्करा । भूरि प्रचुरम् ॥ शुभ्रिर्ब्रह्मा ॥

५०५-अदि, शदि, भू और शुभि धातुके उत्तर क्रिन् प्रत्यय हो, अद्रिः । शद्रिः—शर्करा । भूरि–प्रचुरम् । शुभ्रिः–ब्रह्मा ॥

५०६ 'वङ्क्र्यादयश्च' ॥ ॥ क्रिन्नन्ता निपात्यन्ते । वङ्क्रिर्वाद्यभेदो गृहदारु पार्श्वास्थि च । वप्रिः क्षेत्रम् । 'अंहिरङ्घ्रिश्च चरणः' । तंदिः सौत्रो धातुः । तन्द्रिर्मोहः । बाहुलकाद् गुणः । भेरिः ॥

५०६-वङ्क्र्यादि शब्द क्रिन् प्रत्ययान्त निपातनसे सिद्ध हों, वंक्रिः वाद्यभेदः । गृहदारु पार्श्वास्थि । वप्रिः क्षेत्रम् । अंह्रिः अंघ्रिः चरणः । तंदिः यह सूत्रज धातु है । तंद्रिः–मोहः। बाहुलकबलसे गुण होगा । भेरिः ॥

५०७ 'राशदिभ्यां त्रिप्' ॥ ॥ रात्रिः । शत्रिः कुञ्जरः ॥

५०७-रा और शद् धातुके उत्तर त्रिप् प्रत्यय हो, रात्रिः। शत्रिः कुञ्जरः ॥

५०८ 'अदेस्त्रिनिश्च' ॥ ॥ चात्त्रिप् । अत्री । अत्रिणौ । अत्रिणः । अत्रिः । अत्री । अत्रयः ॥

५०८-अद धातुके उत्तर त्रिन् और त्रिप प्रत्यय हो, यथा–अत्त्री।अत्त्रिणौ । अत्त्रिणः । अत्त्रिः। अत्त्री । अत्त्रयः॥

५०९ 'पतेरत्रिन्' ॥ ॥ पतत्रिः पक्षी ॥

५०९-पत् धातुके उत्तर अत्रिन् प्रत्यय हो.पतत्रिः (पक्षी) ॥

५१० 'मृकणिभ्यामीचिः' ॥ ॥ मरीचिः । कणीचिः पल्लवो निनादश्च ॥

५१०-मृ और कणि धातुके उत्तर ईचि प्रत्यय हो, मरीचिः । कणीचिः पल्लवः निनादश्च । (मरीचिः–किरण । कणीचिः पत्ता, और शब्द) ॥

५११ 'श्वयतेश्चित्' ॥ ॥ श्वयीचिर्व्याधिः ॥

५११-श्वि धातुके उत्तर ईचि प्रत्यय हो, और वह चित्संज्ञक हो, श्वयीचिः व्याधिविशेषः ॥

५१२ 'वेञो डिच्च' ॥ ॥ वीचिस्तरंगः । नञ्समासे अवीचिर्नरकभेदः ॥

५१२-वेञ् धातुके उत्तर ईचि प्रत्यय हो,और वह डित्–संज्ञक हो । वीचिः तरङ्गः । नञ् समासमें अवीचि ऐसा पद सिद्ध हुआ । अवीचिः नरकः ॥

५१३ 'ऋहनिभ्यामूषन्' ॥ ॥ अरूषः सूर्यः । हनूषो राक्षसः ॥

५१३-ऋ और हनि धातुके उत्तर ऊषन् प्रत्यय हो, अरूषः सूर्यः हनूषः राक्षसः ॥

५१४ 'पुरः कुषन्' ॥ ॥ पुर अग्रगमने । पुरुषः । अन्येषामपीति दीर्घः । पूरुषः ॥

५१४-पुर् धातुके उत्तर कुषन् प्रत्यय हो, ' पुर अग्रगमने ' पुरुषः । " अन्येषामपि० ३५३९"इस सूत्रसे दीर्घ हुआ । पूरुषः ॥

५१५ 'पॄनहिकलिभ्य उषच्' ॥ ॥ परुषम् । नहुषः । कलुषम् ॥

५१५-पॄ, नहि और कलि धातुके उत्तर उषच् प्रत्यय हो; परुषम् । नहुषः कलुषम् (कलुषम्–पाप वा मैल) ॥

५१६ 'पीयेरूषन्' ॥ ॥ पीय इति सौत्रो धातुः । पीयूषम्। बाहुलकाद् गुणे ' पेयूषोऽभिनवं पयः' ॥

५१६-पीय धातुके उत्तर ऊषन् प्रत्यय हो, पीयूषम् (अमृत) बाहुलकसूत्रसे गुण होकर पेयूषः अभिनवं पयः (तुरतका दूध) ॥

५१७ 'मस्जेर्नुम् च' ॥ ॥ मञ्जूषा ॥

५१७-मस्ज धातुके उत्तर ऊषन् प्रत्यय हो, और नुम्का आगम हो, यथा–मञ्जूषा । (पिटारी) ॥

५१८ 'गंडेश्च' ॥ ॥ गण्डूषः । गण्डूषा ॥

५१८-गड धातुके उत्तर ऊषन प्रत्यय हो, गण्डूषः । गण्डूषा । (गण्डूषः–कुल्ला) ॥

५१९ 'अर्तेररुः' ॥ ॥ अररुः शत्रुः । अररू । अररवः ॥

५१९-ऋ धातुके उत्तर अरु प्रत्यय हो, अररुः शत्रुः । अररू । अररवः ॥

५२० 'कुटः किच्च' ॥ ॥ कुटरुर्वस्त्रगृहम् । कित्त्वप्रयोजनं चिन्त्यम् ॥

५२०-कुट धातुके उत्तर अरु प्रत्यय हो और वह कित्संज्ञक हो, कुटरुः वस्त्रगृहम् । इस स्थलमें ग्रन्थकारने जो कित्संज्ञाका विधान कियाहै, सो चिन्तनीय है ॥

५२१ 'शकादिभ्योऽटन्' ॥ ॥ शकटोऽस्त्रियाम् । ककिर्गत्यर्थः । कङ्कटः सन्नाहः । देवटः शिल्पी । करट इत्यादि ॥

५२१–शकादि धातुओंके उत्तर अटन् प्रत्यय हो, शकटः अर्थात् यानविशेष यह शब्द स्त्रीलिङ्ग नहीं है । ककि धातु, गत्यर्थमें है । कंकटः सन्नाहः । देवटः शिल्पी । करटः इत्यादि ॥

५२२ 'कृकदिकडिकटिभ्योऽम्बच्' ॥ ॥ करम्बं व्यामिश्रम् । कदिकडी सौत्रौ । कदम्बो वृक्षभेदः । कडम्बोऽग्रभागः । कटम्बो वादित्रम् ॥

५२२–कृ, कदि, कडि और कटि धातुके उत्तर अम्बच् प्रत्यय हो, करम्बम् व्यामिश्रम् । कदि और कडि यह दो धातु सूत्रज हैं । कदम्बः वृक्षभेदः । कडम्बः अग्रभागः । कटम्बो वादित्रम् ॥

५२३ 'कदेर्णित्पक्षिणि' ॥ ॥ कादम्बः कलहंसः ॥

५२३–पक्षि अर्थ होनेपर कदि धातुके उत्तर अम्बच् प्रत्यय हो, वह णित्संज्ञक हो । कादम्बः कलहंसः ॥

५२४ 'कलिकर्द्योरमः' ॥ ॥ कलमः । कर्दमः ॥

५२४–कलि और कर्दि धातुके उत्तर अम प्रत्यय हो, कलमः । कर्दमः (कलमः धान्य । कर्दमः–मुनिका-नाम, तथा कीचड़) ॥

५२५ 'कुणिपुल्योः किन्दच्' ॥ ॥ कुण शब्दोपकरणयोः । कुणिन्दः शब्दः । पुलिन्दो जातिविशेषः ॥

५२५–कुणि और पुलि धातुके उत्तर किन्दच् प्रत्यय हो, कुण धातु शब्द और उपकरणमें है । कुणिन्दः शब्दः । पुलिन्दः जातिविशेषः ॥

५२६ 'कुपेर्वा वश्च' ॥ ॥ कुपिन्दकुविन्दौ तन्तुवाये ॥

५२६–तन्तुवायार्थमें कुपि धातुके उत्तर किन्दच् प्रत्यय हो, और विकल्प करके पके स्थानमें व आदेश हो, कुपिन्दः कुविन्दः तन्तुवायः (जुलाहा) ॥

५२७ 'नौ षञ्जेर्घथिन्' ॥ ॥ निषंगथिरालिंगकः ॥

५२७–निपूर्वक संजि धातुके उत्तर घथिन् प्रत्यय हो, निषङ्गथिः आलिङ्गकः ॥

५२८ 'उदि ऋतेश्थिन्' ॥ ॥ उदरथिः समुद्रः ॥

५२८–उत्पूर्वक ऋ धातुके उत्तर थिन् प्रत्यय हो, और वह कित्संज्ञक हो, उदरथिः समुद्रः ॥

५२९ 'सर्तेर्णिच्च' ॥ ॥ सारथिः ॥

५२९–सृ धातुके उत्तर थिन् प्रत्यय हो, और वह णित्संज्ञक हो, सारथिः ॥

५३० 'खर्जिपिञ्जादिभ्य ऊरोलचौ' ॥ ॥ खर्जूरः । कर्पूरः । वल्लूरं शुष्कमांसम् । पिञ्जूलं कुशवर्तिः ॥ लङ्गेर्वृद्धिश्च (ग०)॥ ॥लांगूलम् । कूसुलः । तमेर्दुग्वृद्धिश्च । तांबूलम् । शृणातेर्दुग्वृद्धिश्च । शार्दूलः । दुकोः कक्च । दुकूलम् । कुकूलम् ॥

५३०–खर्जादि और पिञ्जादि धातुके उत्तर ऊर और ऊलच् प्रत्यय हो, खर्जूरः । कर्पूरः । वल्लूरं शुष्कमांसम् । पिंजूलं कुशवर्त्तिः । लङ्ग धातुके उत्तर ऊलच् प्रत्यय हो, और वृद्धि हो, लांगूलम् । कुसूलः । (कुसूलः–तुषाग्नि वा अन्नभरनेकी कोठी) । तमि धातुके उत्तर ऊलच् प्रत्यय हो दुक्का आगम और वृद्धि हो । ताम्बूलम् । शृ धातुके उत्तर ऊलच् प्रत्यय दुक् आगम और वृद्धि हो, शार्दूलः । दु और कु धातुके उत्तर ऊलच् प्रत्यय और कुक् आगम हो, दुकूलम् । दुकूल–वस्त्र । कुकूलम् ॥

५३१ 'कुवश्चट् दीर्घश्च' ॥ ॥ कूची चित्रलेखनिका ॥

५३१–कु धातुके उत्तर चट् प्रत्यय हो, और पूर्व स्वर दीर्घ हो, कूची चित्रलेखनिका । (कूची–जिससे चित्रमें रंग भरे जातेहैं) ॥

५३२ 'समीणः' ॥ ॥ समीचः समुद्रः । समीची हरिणी ॥

५३२–संपूर्वक इण् धातुके उत्तर चट् प्रत्यय और पूर्व स्वरको दीर्घ हो, समीचः समुद्रः । समीची हरिणी ॥

५३३ 'सिवेष्टेरू च' ॥ ॥ सूचो दर्भांकुरः । सूची ॥

५३३–सिव् धातुके उत्तर चट् प्रत्यय हो, और टिके स्थानमें ऊकार आदेश हो, सूचो दर्भाङ्कुरः । सूची ॥

५३४ 'शमेर्बन्' ॥ ॥ शम्बो मुसलाग्रस्थलोहमंडलकः ॥

५३४–शमि धातुके उत्तर बन् प्रत्यय हो, शम्बो मुसलाग्रस्थलोहमण्डलकः ॥

५३५ 'उल्बादयश्च' ॥ ॥ बन्नन्ता निपात्यन्ते । उच समवाये । चस्य लत्वं गुणाभावश्च । उल्बो गर्भाशयः । शुल्बं ताम्रम् । बिम्बम् ॥

५३५–उल्ब आदि शब्द बन् प्रत्ययान्त निपातनसे सिद्ध हों, उच धातु समवायमें है । बन् प्रत्यय होनेपर चकारके स्थानमें लकार और गुणाभाव हो । उल्बः गर्भाशयः । शुल्बं ताम्रम् । बिम्बम् । बिम्ब–सूरत जो दर्पणमें दीखती है ॥

५३६ 'स्थः स्तोऽम्बजबकौ' ॥ ॥ तिष्ठतेरम्बच् अबक एतौ स्तस्तादेशश्च । 'स्तम्बो गुच्छस्तृणादिनः' । स्तबकः पुष्पगुच्छः ॥

५३६–स्था धातुके उत्तर अम्बच् और अबक प्रत्यय हों, और स्थाके स्थानमें स्त आदेश हो, स्तम्बः तृणादिगुच्छः । स्तबकः पुष्पगुच्छः । (फूलोंका गुच्छा) ॥

५३७ 'शाशपिभ्यां ददनौ' ॥ ॥ 'शादो जम्बालशष्पयोः' ॥ शब्दः ॥

५३७-शा और शपि धातुके उत्तर द और दन् प्रत्यय हों "शादो जम्बालशष्पयोः" (छोटी २ घास) । शब्दः ॥

५३८ 'अब्दादयश्च' ॥ ॥ अवतीत्यब्दः ॥ कौतेर्नुम् ॥ ग० ॥ कुन्दः ॥

५३८-अब्दादि शब्द निपातनसे सिद्ध हों, अवतीति= अब्दः ॥

कु धातुके उत्तर द प्रत्यय और नुम्का आगम भी हो, कुन्दः ॥

५३९ 'वलिमलितनिभ्यः कयन्' ॥ ॥ वलयम् । मलयः । तनयः ॥

५३९-वल्, मल् और तन् धातुके उत्तर कयन् प्रत्यय हो वलयम् (कङ्कण)।मलयः (तन्नामक पर्वत) । तनयः (पुत्र)॥

५४० 'वृहोः षुग्दुकौ च' ॥ ॥ वृषयः आश्रयः । हृदयम् ॥

५४०-वृ और हृ धातुके उत्तर कयन् प्रत्यय हो, और धातुको यथाक्रम षुक् और दुक्का आगम हो,वृषयः-आश्रयः हृदयम् ॥

५४१ 'मिपीभ्यां रुः' ॥ ॥ मेरुः । पेरुः सूर्यः । बाहुलकात् पिबतेरपि । 'संवत्सरवपुः पारुः पेरुर्वासीर्दिनप्रणीः' ॥

५४१-मि और पी धातुके उत्तर रु प्रत्यय हो, मेरुः । पेरुः।सूर्यः। बाहुलकबलसे पा धातुके उत्तर भी रु प्रत्यय होगा, "संवत्सरवपुः पारुः पेरुर्वासीर्दिनप्रणीः" ॥

५४२ 'जत्र्वादयश्च' ॥ ॥ जत्रु । जत्रुणी । अश्रु । अश्रुणी ॥

५४२-जत्रु आदि शब्द निपातनसे सिद्ध हों, जत्रु । जत्रुणी । अश्रु । अश्रुणी ॥

५४३ 'रुशातिभ्यां क्रुन्' ॥ ॥ रुरुर्मृगभेदः । शातयतीति शत्रुः । प्रज्ञादौ पाठाद्ध्रस्वत्वम् ॥

५४३-रु और शाति धातुके उत्तर क्रुन् प्रत्यय हो, रुरुः मृगभेदः । शातयति, इस विग्रहमें 'शत्रुः' यहां प्रज्ञादिगणमें पाठके कारण ह्रस्व हुआ ॥

५४४ 'जनिदाच्युसृवृमदिपमिनमिभृञ्भ्य इत्वनत्वनत्लण्क्निनशकस्यडडदाटचः' ॥ ॥ जनित्वौ मातापितरौ । दात्वो दाता । च्यौत्नो गन्ता अण्डजः क्षीणपुण्यश्च । सृणिरंकुशश्चन्द्रः सूर्यो वायुश्च । वृशः आर्द्रकं मूलकं च । मत्स्यः । षण्ढः । डित्वाट्टिलोपः । नमतीति नटः शैलूषः बिभर्त्ति भरटः कुलालो भृतकश्च ॥

५४४-जन्, दा, च्यु, सृ, वृ, मद्, षम्, नम् और भृञ् [illegible] उत्तर यथाक्रमसे इत्वन्, त्वन ,त्नण्,क्निन् , शक्,स्य, [illegible], ड्ट और अटच् प्रत्यय हों, यथा-जनित्वौ मातापितरौ । दात्वो दाता । च्यौत्नः-गन्ता, अंडजः, क्षीणपुण्यश्च । सृणिः-अंकुशः, चन्द्रः, सूर्यः, वायुश्च । वृशः-आर्द्रकं मूलकञ्च । मत्स्यः । षण्ढः । ड् इत् होनेके कारण टिका लोप होकर-नमति, इस विग्रहमें नटः-शैलूषः बिभर्त्ति भरटः । कुलालो भृतकश्च ॥

५४५ 'अन्येभ्योपि दृश्यन्ते' ॥ ॥ पेत्वममृतम् भृशम् ॥

५४५-अन्य धातुओंके उत्तर भी उक्त प्रत्यय हो; पेत्वम-मृतम् । भृशम् ॥

५४६ 'कुसेरुम्भोमेदेताः' ॥ ॥ कुसुम्भम् । कुसुमम् । कुसीदम् । कुसितो जनपदः ॥

५४६-कुस् धातुके उत्तर उम्भ, उम, ईद और इत प्रत्यय हों, कुसुम्भम् । कुसुमम् । कुसीदम् । कुसितः-जनपदः ॥

५४७ 'सानसिवर्णसिपर्णसितण्डुलांकुशचषालेल्वलपल्वलधिष्ण्यशल्याः'॥ ॥सनोतेरसिप्रत्यय उपधावृद्धिः ।सानसिर्हिरण्यम्। वृञो नुक च। वर्णसिर्जलम् । पृ । पर्णसिर्जलगृहम् । तड आघाते । तण्डुलाः । अकि लक्षणे उशच् । अंकुशः । चषेरालः । 'चषालो यूपकटकः' । इल्वलो दैत्यभेदः । पल्वलम् । ञिधृषा । ऋकारस्य इकारः । धिष्ण्यम् । शलेर्यः । 'शल्यं वा पुंसि शंकुर्ना' ॥

५४७-सानसि, वर्णसि, पर्णसि, तण्डुल, अंकुश, चषाल, इल्वल, पल्वल, धिष्ण्य, शल्य, यह पद निपातनसे सिद्ध हों । सन धातुके उत्तर असि प्रत्यय होनेपर उपधाको वृद्धि होकर-सानसिः-हिरण्यम्। वृञ् धातुके उत्तर असि प्रत्यय और नुक्का आगम होकर-वर्णसिः-जलम्।पॄ धातुके उत्तर असि प्रत्यय और नुक्का आगम होकर-पर्णसिः-जलगृहम्।आघातार्थक तड् धातुके उत्तर उलच् प्रत्यय,नुगागम होकर तण्डुलाः । लक्षणार्थक अकि धातुके उत्तर उशच् प्रत्यय होकर-अंकुशः।चष् धातुके उत्तर आल प्रत्यय होकर चषालः-यूपकटकः।इल्वलः-दैत्यभेदः।पल्वलम्। धृष् धातुके उत्तर ण्य प्रत्यय और ऋकारके स्थानमें इकार होकर-धिष्ण्यम् । शल् धातुके उत्तर य प्रत्यय होकर-'शल्यं वा पुंसि शंकुर्ना' ॥

५४८ 'मूशक्यबिभ्यः क्लः' ॥ ॥ मूलम् । शक्लः प्रियंवदे । अम्ब्लो रसः । बाहुलकादमेः । अम्लः ॥

५४८-मू, शक् और अब् धातुके उत्तर क्ल प्रत्यय हो, मूलम् । शक्लः प्रियंवदः । अम्ब्लः रसः । बाहुलकबलसे अम धातुके उत्तर भी क्ल प्रत्यय होकर-अम्लः ॥

५४९ 'माछाससिभ्यो यः' ॥ ॥ माया । छाया । सस्यम् । बाहुलकात्सुनोतेः । 'सव्यं दक्षिणवामयोः' ॥

५४९–मा, छा और सस धातुके उत्तर य प्रत्यय हो, माया । छाया । सस्यम् । बाहुलकबलसे सु धातुके उत्तर भी य प्रत्यय होकर "सव्यं दक्षिणवामयोः" ॥

५५० 'जनेर्यक्' ॥ ॥ ये विभाषा । जन्यं युद्धम् । जाया भार्या ॥

५५०–जन् धातुके उत्तर यक् प्रत्यय हो, जन्यं–युद्धम् । "ये विभाषा" इससे आत्व होकर–जाया–भार्या ॥

५५१ 'अघ्न्यादयश्च' ॥ ॥ यगन्ता निपात्यन्ते । हन्तेर्यक् अडागम उपधालोपश्च । अघ्न्या माहेयी । अघ्न्यः प्रजापतिः । कनी दीप्तौ । कन्या । बवयोरैक्यम् । वन्ध्या ॥

५५१–यक् प्रत्ययान्त अघ्न्यादि शब्द निपातनसे सिद्ध हों, हन् धातुके उत्तर यक् प्रत्यय अडागम और उपधाको लोप होकर–अघ्न्या–माहेयी । अघ्न्यः–प्रजापतिः दीप्त्यर्थक कनी धातुका–कन्या । ब और वको एकत्व होनेसे–वन्ध्या ॥

५५२ 'स्नामदिपद्यर्त्तिपॄशकिभ्यो वनिप्' ॥ ॥ स्नावा रसिकः । मद्वा शिवः । पद्वा पन्थाः । 'अर्वा तुरङ्गगर्ह्ययोः' । पर्व ग्रन्थिः प्रस्तावश्च । शक्वा हस्ती । ङीब्रौ । शक्वरी अंगुलिः ॥

५५२–स्ना, मद्, पद्, ऋ, पॄ और शक् धातुके उत्तर वनिप् प्रत्यय हो, स्नावा–रसिकः । मद्वा–शिवः । पद्वा–पन्थाः । अर्वा–तुरङ्गगर्ह्ययोः । पर्व–ग्रन्थिः, प्रस्तावश्च । शक्वा–हस्ती । स्त्रीलिङ्गमें ङीप् और रकारान्तादेश होकर—शक्वरी–अंगुलिः ॥

५५३ 'शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप्' ॥ ॥ शीवा अजगरः । क्रुश्वा सृगालः । रुह्वा वृक्षः । जित्वा जेता । क्षित्वा वायुः । सृत्वा प्रजापतिः । धृत्वा विष्णुः ॥

५५३–शीङ्, क्रुश, रुह, जि, क्षि, सृ और धृ धातुके उत्तर क्वनिप् प्रत्यय हो शीवा–अजगरः । क्रुश्वा–शृगालः । रुह्वा–वृक्षः । जित्वा–जेता । क्षित्वा–वायुः । सृत्वा–प्रजापतिः । धृत्वा–विष्णुः ॥

५५४ 'ध्याप्योः संप्रसारणं च' ॥ ॥ धीवा कर्मकरः । पीवा स्थूलः ॥

५५४–ध्या और प्या धातुके उत्तर क्वनिप् प्रत्यय हो, और सम्प्रसारण हो, धीवा--कर्म्मकरः । पीवा–स्थूलः ॥

५५५ 'अदेर्ध च' ॥ ॥ अध्वा ॥

५५५–अद् धातुके उत्तर क्वनिप् प्रत्यय हो, और दके स्थानमें ध आदेश हो, अध्वा ॥

५५६ 'प्रे ईरशदोस्तुट् च' ॥ ॥ प्रेत्वा प्रशत्त्वा च सागरः । प्रेत्वरी प्रशत्त्वरी च नदी ॥

५५६प्रपूर्वक ईर् और शद् धातुके उत्तर क्वनिप् प्रत्यय हो, और तुट्का आगम हो, प्रेत्वा प्रशत्त्वा च सागरः । प्रेत्वरी प्रशत्त्वरी च नदी ॥

५५७ 'सर्वधातुभ्य इन्' ॥ ॥ पचिरग्निः । तुडिः । तुण्डिः । वलिः । वटिः । याजिः । देवयजिः । काशत इति काशिः । यतिः । मल्लिः । मल्ली । केलिः । मसी परिणामे । मसिः । बाहुलकाद् गुणः । कोटिः । हेलिः । बोधिः । नन्दिः । कलिः ॥

५५७–सब धातुके उत्तर इन् प्रत्यय हो, पचिः--अग्निः । तुडिः । तुण्डिः । वलिः । वटिः । याजिः । देवयजिः । काशते, इस विग्रहमें काशिः । यतिः । मल्लिः । मल्ली । केलिः । परिणामार्थक मसी धातुका--मसिः । बाहुलकबलसे इकको गुण होकर–कोटिः । हेलिः । बोधिः । नन्दिः । कलिः ॥

५५८ 'हृपिषिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च' ॥ ॥ "हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ । चन्द्रे कीले प्लवंगे च यमे वाते च कीर्त्तितः" ॥ पेषिर्वज्रम् । रोहिर्व्रती । वर्तिः । वेदिः । छेदिश्छेत्ता । कीर्त्तिः ॥

५५८—हृ, पिष्, रुह, वृत्, विद्, छिद, और कीर्त् धातुके उत्तर इन् प्रत्यय हो, "हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ । चन्द्रे क्लीवे प्लवङ्गे च यमे वाते च कीर्त्तितः" अर्थात्–हरिशब्द–विष्णु, सर्प, इन्द्र, भेक, सिंह, घोडा, रवि, चन्द्र, क्लिब, वांनर, यम, और पवनमें वर्तताहै । पेषिः--वज्रम । रोहिः--व्रती । वर्त्तिः । वेदिः । छेदिः–छेत्ता । कीर्तिः ॥

५५९ 'इगुपधात्कित्' ॥ ॥ कृषिः । ऋषिः । शुषिः । लिपिः । बाहुलकाद्वत्वे लिबिः । तूल निष्कर्षे । तूलिः । तूली कूर्चिका ॥

५५९--इगुपध धातुके उत्तर इन् प्रत्यय हो, और वह कित् हो, कृषिः । ऋषिः । शुषिः । लिपिः । बाहुलकबलसे पके स्थानमें बकार होकर--लिबिः । तूलधातु निष्कर्षमें है । तूलिः । तूली--कूर्चिका ॥

५६० 'भ्रमेः संप्रसारणं च' ॥ ॥ भृमिर्वातः बाहुलकाद भ्रमिः ॥

५६०--भ्रम धातुके उत्तर इन् प्रत्यय हो, और संप्रसारण हो, भृमिर्वातः । बाहुलकबलसे भ्रमिः ऐसा भी होगा ॥

५६१ 'क्रमितमिशतिस्तम्भामत इच्च' ॥ ॥ क्रिमिः । संप्रसारणानुवृत्तेः कृमिरपि । तिमिर्मत्स्यभेदः । 'शितिर्मेचकशुक्लयोः' । स्तिम्भिः समुद्रः ॥

५६१--क्रम, तम्, शत् और स्तम्भ् धातुके उत्तर इन् प्रत्यय हो, और धातुके अकारको इकार हो, क्रिमिः ।

सम्प्रसारणकी अनुवृत्ति होनेसे 'कृमिः' यह भी सिद्ध होगा। तिमिः–मत्स्यविशेषः। शितिः, अर्थात् कृष्ण और शुक्ल। स्तिम्भिः–समुद्रः॥

५६२ 'मनेरुच' ॥ ॥ मुनिः ॥

५६२–मन् धातुके उत्तर इन् प्रत्यय हो, और अकारके स्थानमें उकार हो, मुनिः॥

५६३ 'वर्णेर्बलिश्चाहिरण्ये' ॥ ॥ वर्णिः सौत्रः। अस्य बलिरादेशः। 'करोपहारयोः पुंसि बलिः प्राण्यङ्गके स्त्रियाम्'। हिरण्ये तु वर्णिः सुवर्णम् ॥

५६३–वर्ण धातुसे हिरण्यभिन्नार्थमें इन् प्रत्यय हो, और धातुके स्थानमें बलि आदेश हो, "करोपहारयोः पुंसि बलिः प्राण्यङ्गके स्त्रियाम्"। हिरण्यार्थमें बलि आदेश न होकर–वर्णिः–सुवर्णम॥

५६४ 'वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्' ॥ ॥ 'वासिश्छेदनवस्तुनि'। वापिः–वापी। याजिर्यष्टा। राजिः–राजी। व्राजिर्वातालिः। सादिः सारथिः। निघातिर्लोहघातिनी। वाशिरग्निः। वादिर्विद्वान्। वारिर्गजबन्धनी। जले तु क्लीबम्। बाहुलकात् 'हारिः पथिकसंहतौ' ॥

५६४–वस्, वप्, यज्, राज, व्रज्, सद्, हन्, वाश्, वादि और वारि धातुके उत्तर इञ् प्रत्यय हो। वासिः–छेदनवस्तु। वापिः, वापी। याजिः–यष्टा। राजिः। राजी। व्राजिः–वातालिः। सादिः–सारथिः। निघातिः–लोहघातिनी। वाशिः अग्निः। वादिः–विद्वान्। वारिः–गजबन्धनी। जल अर्थ होनेपर वारि शब्द क्लीबलिंग है। बाहुलकबलसे हारिः, अर्थात् पथिकसंहतिः॥

५६५ 'नहो भश्च' ॥ ॥ 'नाभिः स्यात्क्षत्त्रिये पुंसि'। प्राण्यंगे तु स्त्रियां पुंस्यपीति केचित् ॥

५६५–नह् धातुके उत्तर इञ् प्रत्यय हो, और हके स्थानमें भ आदेश हो, "नाभिः स्यात्क्षत्त्रिये पुंसि" प्राण्यङ्गे तु स्त्रियां पुंस्यपीति केचित्॥

५६६ 'कृषेर्वृद्धिश्छन्दसि' ॥ ॥ कार्षिः ॥

५६६–वेदमें कृष् धातुके उत्तर इञ् प्रत्यय हो, और ऋकारको वृद्धि हो, कार्षिः॥

५६७ 'शृः शकुनौ' ॥ ॥ शारिः। शारिका॥

५६७–शकुनि अर्थ होनेपर शृ धातुके उत्तर इञ् प्रत्यय हो, और वृद्धि हो, शारिः। शारिका॥

५६८ 'कृञ उदीचां कारुषु' ॥ ॥ कारिः शिल्पी ॥

५६८–उत्तरदेशीय कारु अर्थात् शिल्पी अर्थ होनेपर कृञ् धातुके उत्तर इञ् प्रत्यय और वृद्धि हो, कारिः–शिल्पी॥

५६९ 'जनिघसिभ्यामिण्' ॥ ॥ जनिर्जननम्। घासिर्भक्ष्यमग्निश्च ॥

५६९–जन् और घस् धातुके उत्तर इण् प्रत्यय हो, जनिः जननम्। घासिः–भक्ष्यमग्निश्च॥

५७० 'अज्यतिभ्यां च' ॥ ॥ आजिः संग्रामः। आतिः पक्षी ॥

५७०–अज् और अत् धातुके उत्तर इण् प्रत्यय हो, और स्वरको वृद्धि हो, आजिः–संग्रामः। आतिः–पक्षी॥

५७१ 'पादे च' ॥ ॥ पदाजिः। पदातिः ॥

५७१–पादशब्दपूर्वक अज् और अत् धातुके उत्तर इण् प्रत्यय हो, पदाजिः। पदातिः॥

५७२ 'अशिपणाय्योरुडायलुकौ च' ॥ ॥ अशेरुट्। राशिः पुञ्जः। पणायतेरायलुक्। पाणिः करः ॥

५७२–अश् और पणाय धातुके उत्तर इण् प्रत्यय हो और अश् धातुको रुट्का आगम और पणाय धातुके आयभागका लुक् हो, राशिः–पुंजः। पाणिः–करः॥

५७३ 'वातेर्डिच्च' ॥ ॥ विः पक्षी। स्त्रियां वीत्यपि ॥

५७३–वा धातुके उत्तर इण् प्रत्यय हो, और वह डित् हो, विः–पक्षी। स्त्रीलिङ्गमें 'वी' ऐसा भी होगा॥

५७४ 'प्र हरतेः कूपे' ॥ ॥ प्रहिः कूपः ॥

५७४–कूप होनेपर प्रपूर्वक हृ धातुके उत्तर डित् इण् प्रत्यय हो, प्रहिः–कूपः॥

५७५ 'नौ व्यो यलोपः पूर्वस्य च दीर्घः' ॥ व्येञ इण् स्याद् यलोपश्च नेर्दीर्घः। नीविः। नीवी वस्त्रग्रन्थौ मूलधने च ॥

५७५–निपूर्वक व्येञ् धातुके उत्तर इण् प्रत्यय हो, और यकारका लोप हो, और निके इकारको दीर्घ हो, नीविः। नीवी वस्त्रग्रन्थौ मूलधने च॥

५७६ 'समाने ख्यः स चोदात्तः' ॥ ॥ समानशब्दे उपपदे ख्या इत्यस्मादिण् स्यात्स च डिच्च यलोपश्च समानस्य तूदात्तः स इत्यादेशश्च। समानं ख्यायते जनैरिति। सखा।

५७६–समानशब्दपूर्वक ख्या धातुके उत्तर इण् प्रत्यय हो, और यह प्रत्यय डित् हो और यकारका लोप, समान शब्दको उदात्त स आदेश हो, समानं ख्यायते जनैः इति= सखा (मित्र)॥

५७७ 'आङि श्रिहनिभ्यां ह्रस्वश्च' ॥ ॥ इण् स्यात्स च डित् आङो ह्रस्वश्च। 'त्रियः पाल्यश्रिकोटयः'। 'सर्पे वृत्रासुरेऽप्यहिः' ॥

५७७–आङ्पूर्वक श्रि और हन् धातुके उत्तर डित् इण् प्रत्यय और आङ्को ह्रस्व हो, "स्त्रियः पाल्यश्रिकोटयः"। और "वृत्रासुरेऽप्यहिः"॥

५७८ 'अच इः' ॥ ॥ रविः । पविः । तरिः । कविः । अरिः । अलिः ॥

५७८–अजन्त धातुके उत्तर इ प्रत्यय हो, रविः । पविः । तरिः । कविः । अरिः । अलिः ॥

५७९ 'खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च' ॥ ॥ खनिः । कषिर्हिंस्रः । अजिः । असिः । वसिर्वस्त्रम् । वनिरग्निः । सनिर्भक्तिर्दानं च । ध्वनिः । ग्रन्थिः । चलिः पशुः ॥

५७९–खन्, कष्, अज्, अस्, वस्, वन्, सन्, ध्वन्, ग्रन्थ और चल् धातुके उत्तर इ प्रत्यय हो, खनिः । कषिः–हिंस्रः । अजिः । असिः । वसिः–वस्त्रम् । वनिः–अग्निः । सनिः–भक्तिः, दानं च । ध्वनिः । ग्रन्थिः । चलिः–पशुः ॥

५८० 'वृतेश्छन्दसि' ॥ ॥ वर्तिः ॥

५८०–वेदमें वृत् धातुके उत्तर इ प्रत्यय हो, वर्त्तिः ॥

५८१ 'भुजेः किच्च' ॥ ॥ भुजिः ॥

५८१–भुज् धातुके उत्तर इ प्रत्यय हो, और वह प्रत्यय कित् हो, भुजिः ॥

५८२ 'कॄगॄशॄपकुटिभिदिच्छिदिभ्यश्च' ॥ ॥ इः किरस्यात् । किरिर्वराहः । 'गिरिर्गौत्राक्षिरोगयोः' । गिरिणा काणः गिरिकाणः । शिरिः शलभो हन्ता च । पुरिर्नगरं राजा नदी च । कुटिः शाला शरीरं च । भिदिर्वज्रम् । छिदिः परशुः ॥

५८२–कॄ, गॄ, शॄ, पॄ, कुट्, भिद् और छिद् धातुके उत्तर इ प्रत्यय हो, और वह प्रत्यय कित् हो, किरिः–वराहः । "गिरिर्गौत्राक्षिरोगयोः" । गिरिणा काणः=गिरिकाणः। शिरिः–शलभः, हन्ता च । पुरिः–नगरम्, राजा, नदी च । कुटिः–शाला, शरीरं च । भिदिः–वज्रम् । छिदिः–परशुः ॥

५८३ 'कुडिकम्प्योर्नलोपश्च' ॥ ॥ कुडि दाह । कुडिर्देहः । कपिः ॥

५८३–कुण्ड् और कम्प् धातुके उत्तर इ प्रत्यय हो, और नकारका लोप हो, कुडि धातु दाहमें है । कुडिः देहः। कपिः (वानर) ॥

५८४ 'सर्वधातुभ्यो मनिन्' ॥ ॥ क्रियत इति कर्म । चर्म । भस्म । जन्म । शर्म । स्थाम बलम्।इस्मन्निति ह्रस्वः । छद्म । सुत्रामा॥

५८४–सब धातुओंके उत्तर मनिन् प्रत्यय हो, क्रियते, इस विग्रहमें कर्म्म । चर्म्म । भस्म । जन्म । शर्म्म । स्थाम-बलम् । " इस्मन्० २९८५" इस सूत्रसे ह्रस्व होकर–छद्म । सुत्रामा (इन्द्र) ॥

५८५ 'बृंहेर्नोच्च' ॥ ॥ नकारस्याकारः । 'ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः' ॥

५८५–बृंह धातुके उत्तर मनिन् प्रत्यय हो, और नकारके स्थानमें अकार हो, "ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः" (ब्रह्मशब्द तत्त्व, तप, वेद, ब्रह्मा और प्रजापतिमें वर्तताहै) ॥

५८६ 'अशिशकिभ्यां छन्दसि' ॥ ॥ अश्मा । शक्मा ॥

५८६–वेदमें अश् और शक् धातुके उत्तर मनिन् प्रत्यय हो, अश्मा । शक्मा ॥

५८७ 'हृभृधृसृस्तृशॄभ्य इमनिच्' ॥ ॥ हरिमा कालः । भरिमा कुटुम्बम् । धरिमा रूपम् । सरिमा वायुः। स्तरिमा तल्पम्।शरिमा प्रसवः॥

५८७–हृ, भृ, धृ, सृ, स्तृ और शॄ धातुके उत्तर इमनिच् प्रत्यय हो, हरिमा–कालः । भरिमा–कुटुम्बम्। धरिमा–रूपम्। सरिमा–वायुः । स्तरिमा–तल्पम् । शरिमा–प्रसवः ॥

५८८ 'जनिमृङ्भ्यामिमनिन्' ॥ ॥ जनिमा जन्म । मरिमा मृत्युः ॥

५८८–जन् और मृङ् धातुके उत्तर इमनिन् प्रत्यय हो, जनिमा–जन्म । मरिमा–मृत्युः ॥

५८९ 'वेञः सर्वत्र' ॥ ॥ छन्दसि भाषायां चेत्यर्थः । वेमा तन्तुवायदण्डः । अर्धर्चादिः । सामनी वेमनी इति वृत्तिः ॥

५८९–वेद और लोक दोनोंमें वेञ् धातुके उत्तर इमनिन् प्रत्यय हो, वेमा–तन्तुवायदण्डः । यह अर्द्धर्चादि है । सामनी वेमनी, यह वृत्ति है ॥

५९० 'नामन्–सीमन्–व्योमन्–रोमन्–लोमन्–पाप्मन्–धामन्' ॥ ॥ सप्त अमी निपात्यन्ते । म्नायतेऽनेनेति नाम । सिनोतेर्दीर्घः । सीमा । सीमानौ । सीमानः । पक्षे डाप् । सीमे। सीमाः । व्येञोऽन्त्यस्योत्वं गुणः । व्योम । रौतेः रोम । लोम । पाप्मा पापम् । धाम परिमाणं तेजश्च ॥

५९०–नामन्, सीमन्, व्योमन्, रोमन्, लोमन्, पाप्मन्, धामन्, यह सात शब्द निपातनसे सिद्ध हों, म्नायते अनेन इति=नाम । सि धातुके उत्तर इमनिन् प्रत्यय होनेपर दीर्घ होकर–सीमा । सीमानौ । सीमानः । पक्षमें डाप् प्रत्यय होगा, सीमे । सीमाः । व्येञ् धातुके अन्तभागको उकार और गुण होकर–व्योम । रु धातुका–रोम । लोम । पाप्मा–पापम् । धाम–परिमाणं तेजश्च ॥

५९१ 'मिथुने मनिः' ॥ ॥ उपसर्गक्रियासंबंधो मिथुनम् । स्वरार्थमिदम् । सुशर्मा ॥

५९१–मिथुनवाच्यमें मनि प्रत्यय हो, उपसर्ग और क्रियाके सम्बन्धको मिथुन कहतेहैं । "सर्वधातुभ्यो मनिन्" इससे मनिन् प्रत्यय करके सिद्ध होनेपर भी यह विधि स्वरार्थ है । सुशर्म्मा ॥

५९२ 'सातिभ्यां मनिन्मनिणौ' ॥ ॥ स्यति साम । सामनी । आत्मा ॥

५९२-सो और अत् धातुके उत्तर क्रमसे मनिन् और मनिण् प्रत्यय हों, स्यति इति=साम । सामनी । आत्मा ॥

५९३ 'हनिमशिभ्यां सिकन्' ॥ ॥ हंसिका हंसयोषिति । मक्षिका ॥

५९३-हन् और मश् धातुके उत्तर सिकन् प्रत्यय हो, हंसिका-हंसयोषित् । मक्षिका ॥

५९४ 'कोररन्' ॥ ॥ कवरः ॥

५९४-कु धातुके उत्तर अरन् प्रत्यय हो, कवरः । (केशपाश) ॥

५९५ 'गिर उडच्' ॥ ॥ गरुडः ॥

५९५-गॄ धातुके उत्तर उडच् प्रत्यय हो, गरुडः ॥

५९६ 'इन्देः कमिर्नलोपश्च' ॥ ॥ इदम् ॥

५९६-इन्द् धातुके उत्तर कमि प्रत्यय हो, और नकारका लोप हो, इदम् ॥

५९७ 'कायतेर्डिमिः' ॥ ॥ किम् ॥

५९७-कै धातुके उत्तर डिमि प्रत्यय हो, किम् ॥

५९८ 'सर्वधातुभ्यः ष्ट्रन्' ॥ ॥ वस्त्रम् । अस्त्रम् । शस्त्रम् । इस्मन्निति ह्रस्वत्वम् । छादनाच्छत्रम् ॥

५९८-सब धातुओंके उत्तर ष्ट्रन् प्रत्यय हो, वस्त्रम् । अस्त्रम् । शस्त्रम् । "इस्मन्० २९८५" इस सूत्रसे ह्रस्व होकर-छादयति इति=छत्रम् ॥

५९९ 'भ्रस्जिगमिनमिहनिविशयशां वृद्धिश्च' ॥ ॥ भ्राष्ट्रः । गांत्रं शकटम् । नांत्रं स्तोत्रम् । हांत्रं मरणम् । वैष्ट्रं पिष्टपम् । आष्ट्रमाकाशम् ॥

५९९-भ्रस्ज्, गम् , नम् , हन् , विश् और अश् धातुके उत्तर ष्ट्रन् प्रत्यय हो, और वृद्धि हो, भ्राष्ट्रः । गांत्रं-शकटम्-नांत्रम्-स्तोत्रम् । हान्त्रम्-मरणम् । वैष्ट्रम्-पिष्टपम्-आष्ट्रम्-आकाशम् ॥

६०० 'दिवेर्द्युच' ॥ ॥ द्यौत्रं ज्योतिः ॥

६००-दिव् धातुके उत्तर ष्ट्रन् प्रत्यय हो, और धातुके स्थानमें द्युत् आदेश और वृद्धि हो, द्यौत्रम्-ज्योतिः ॥

६०१ 'उषिखनिभ्यां कित्' ॥ ॥ उष्ट्रः । खात्रं खनित्रं जलाधारश्च ॥

६०१-उष् और खन् धातुके उत्तर ष्ट्रन् प्रत्यय हो, और वह प्रत्यय कित् हो, उष्ट्रः । खात्रम्-खनित्रं, जलाधारश्च ॥

६०२ 'सिविमुच्योष्टेरू च' ॥ ॥ सूत्रम् । मूत्रम् ॥

६०२-सिव् और मुच् धातुके उत्तर ष्ट्रन् प्रत्यय हो, और धातुकी टिके स्थानमें ऊकार हो, सूत्रम् ॥

६०३ 'अमिचिमिदिशसिभ्यः क्त्रः' ॥ ॥ अन्त्रम् । चित्रम् । मित्रम् । शस्त्रम् ॥

६०३-अम्, चि, मिद् और शस्, धातुके उत्तर क्त्र प्रत्यय हो, अंत्रम् । चित्रम् । मित्रम् । शस्त्रम् ॥

६०४ 'पुवो ह्रस्वश्च' ॥ ॥ पुत्रः ॥

६०४-पू धातुके उत्तर क्त्र प्रत्यय हो, और धातुको ह्रस्व हो, पुत्रः ॥

६०५ 'स्त्यायतेर्ड्ट्' ॥ ॥ स्त्री ॥

६०५-स्त्यै धातुके उत्तर ड्रट् प्रत्यय हो, स्त्री ॥

६०६ 'गुधृवीपचिवचियमिसदिक्षादिभ्यस्त्रः' ॥ ॥ 'गोत्रं स्यान्नामवंशयोः' । गोत्रा पृथिवी । धर्त्रं गृहम् । वेत्रम् । पत्रम् । वक्त्रम् । यन्त्रम् । सत्रम् । क्षत्त्रम् ॥

६०६-गु, धृ, वी, पच्, वच्, यम्, सद् और क्षद् धातुके उत्तर त्र प्रत्यय हो, गोत्रम्-नाम, वंशश्च । गोत्रा-पृथिवी । धर्त्रं-गृहम् । वेत्रम् । पक्त्रम् । वक्त्रम् । मंत्रम् । सत्त्रम् । क्षत्त्रम् ॥

६०७ 'हुयामाश्रुभसिभ्यस्त्रन्' ॥ ॥ होत्रम् । यात्रा । मात्रा । श्रोत्रम् । भस्त्रा ॥

६०७-हु, या, मा, श्रु, और भस धातुके उत्तर त्रन् प्रत्यय हो, होत्रम् । यात्रा । मात्रा । श्रोत्रम् । भस्त्रा (धौंकनी) ॥

६०८ 'गमेरा च' ॥ ॥ गात्रम् ॥

६०८-गम् धातुके उत्तर त्रन् प्रत्यय हो, और मकारको आकार आदेश हो, गात्रम् (शरीरके अवयव) ॥

६०९ 'दादिभ्यश्छन्दसि' ॥ ॥ दात्रम् । पात्रम् ॥

६०९-वेदमें दा आदि धातुओंके उत्तर त्रन् प्रत्यय हो, दात्रम् । पात्रम् ॥

६१० 'भूवादिगृभ्यो णित्रन्' ॥ ॥ भावित्रम् । वादित्रम् । गारित्रमोदनम् ॥

६१०-भू, वादि और गॄ धातुके उत्तर णित्रन् प्रत्यय हो, भावित्रम् । वादित्रम् । गारित्रम्-ओदनम् ॥

६११ 'चरेर्वृत्ते' ॥ ॥ चारित्रम् ॥

६११-वृत्त वाच्यमें चर् धातुके उत्तर णित्रन् प्रत्यय हो, चारित्रम् ॥

६१२ 'अशित्रादिभ्य इत्रोत्रौ' ॥ ॥ अशित्रम् । वहित्रम् । धरित्री मही । त्रैङ् एवमादिभ्य उत्रः । त्रोत्रं प्रहरणम् । वृञ् । वरुत्रं प्रावरणम् ॥

६१२-अश् आदि और त्रा आदि धातुओंके उत्तर क्रमसे इत्र और उत्र प्रत्यय हो, अशित्रम् । वहित्रम् । धरित्री-मही । त्रैङ् आदि धातुओंके उत्तर उत्र प्रत्यय होकर-त्रोत्रम्-प्रहरणम् । वरुत्रम्-प्रावरणम् ॥

६१३ 'अमेर्द्विषति चित्' ॥ ॥ अमित्रः शत्रुः ॥

६१३-शत्रु अर्थमें अम् धातुके उत्तर इत्र प्रत्यय हो और वह चित् हो, अमित्रः-शत्रुः ॥

६१४ 'आ समिण्निकषिभ्याम्' ॥ ॥ संपूर्वादिणो निपूर्वात्कषेश्च आ स्यात् । स्वरादित्वादव्ययत्वम् । समया । निकषा ॥

६१४–सम्पूर्वक इण् धातु और निपूर्वक कष् धातुके उत्तर आ प्रत्यय हो, स्वरादित्वके कारण यह अव्यय संज्ञक हुआ । समया । निकषा (समीप) ॥

६१५ 'चितेः कणः कश्च' ॥ ॥ बाहुलकादगुणः । 'चिक्कणं मसृणं स्निग्धम्' ॥

६१५–चित् धातुके उत्तर कण प्रत्यय हो, और क आदेश हो, बाहुलकवलसे गुण न होकर– "चिक्कणं मसृणं स्निग्धम्" (चिकना) ॥

६१६ 'सूचेः स्मन्' ॥ ॥ सूक्ष्मम् ॥

६१६–सूच् धातुके उत्तर स्मन् प्रत्यय हो, सूक्ष्मम् ॥

६१७ 'पातेर्डुम्सुन्' ॥ ॥ पुमान् ॥

६१७–पा धातुके उत्तर डुम्सुन् प्रत्यय हो, पुमान् ॥

६१८ 'रुचिभुजिभ्यां किष्यन्' ॥ ॥ रुचिष्यमिष्टम् । भुजिष्यो दासः ॥

६१८–रुच् और भुज् धातुके उत्तर किष्यन् प्रत्यय हो, रुचिष्यम्–इष्टम् । भुजिष्यो दासः ॥

६१९ 'वसेस्तिः' ॥ ॥ 'वस्तिर्नाभेरधो द्वयोः' । 'वस्तयः स्युर्दशासूत्रे' । बाहुलकात् शासः । शास्तिः राजदण्डः । विन्ध्याख्यमगमस्यतीत्यगस्तिः । शकन्ध्वादिः ॥

६१९–वस् धातुके उत्तर ति प्रत्यय हो, "वस्तिर्नाभेरधो द्वयोः" " वस्तयः स्युर्दशासूत्रे" बाहुलकबलसे शास धातुके उत्तर भी ति प्रत्यय होकर–शास्तिः–राजदण्डः । विंध्याख्यमगमस्यति इति–अगस्तिः, यह शकन्ध्वादि है ॥

६२० 'सावसेः' ॥ ॥ स्वस्ति । स्वरादिपाठादव्ययत्वम् ॥

६२०–सुपूर्वक अस् धातुके उत्तर ति प्रत्यय हो, स्वस्ति (कल्याण) स्वरादिमें पाठ होनेसे यह अव्यय है ॥

६२१ 'वौ तसेः' ॥ ॥ वितस्तिः ॥

६२१–विपूर्वक तस् धातुके उत्तर ति प्रत्यय हो, वितस्तिः (वालिस्त) ॥ (वौ शसेः) ऐसा मूलपाठ होनेपर विपूर्वक शस् धातुके उत्तर ति प्रत्यय हो, विशस्तिः ॥

६२२ 'पदिप्रथिभ्यां नित्'॥॥ पत्तिः । प्रथितिः । तितुत्रेष्वग्रहादीनामितीट् ॥

६२२–पद् और प्रथ् धातुके उत्तर ति प्रत्यय हो, और वह नित् हो, पत्तिः । प्रथितिः, यहां " तितुत्रेष्वग्रहादीनाम्" इस वार्तिकसे इट् हुआ ॥

६२३ 'दृणातेर्ह्रस्वश्च' ॥ ॥ दृतिः ॥

६२३–दृ धातुके उत्तर ति प्रत्यय हो, और ऋकारको ह्रस्व हो, दृतिः ॥

६२४ 'कृतकृपिभ्यः कीटन्' ॥ ॥ किरीटं शिरोवेष्टनम् । तिरीटं सुवर्णम् । 'कृपीटं कुक्षिवारिणोः' ॥

६२४–कॄ, तॄ, और कृप् धातुके उत्तर कीटन् प्रत्यय हो, किरीटम्–शिरोवेष्टनम् । तिरीटं–सुवर्णम् । "कृपीटं कुक्षि वारिणोः" ॥

६२५ 'रुचिवचिकुचिकुटिभ्यः कितच्' ॥ ॥ रुचितमिष्टम् । उचितम् । कुचितं परिमितम् । कुटितं कुटिलम् ॥

६२५–रुच्, वच्, कुच् और कुट् धातुके उत्तर कितच् प्रत्यय हो, रुचितमिष्टम् । उचितम् । कुचितं–परिमितम् । कुटितं–कुटिलम् ॥

६२६ 'कुटिकुषिभ्यां क्मलन्' ॥ ॥ कुट्मलम् । कुष्मलम् ॥

६२६–कुट् और कुष् धातुके उत्तर क्मलन् प्रत्यय हो, कुट्मलम् । कुष्मलम् ॥

६२७ 'कुषेर्लश्च' ॥ ॥ कुल्मलं पापम् ॥

६२७–कुष् धातुके उत्तर क्मलन् प्रत्यय है, और धातुके षके स्थानमें लकार हो, कुल्मलम्–पापम् ॥

६२८ 'सर्वधातुभ्योऽसुन्' ॥ ॥ चेतः । सरः । पयः । सदः ॥

६२८–सब धातुओंके उत्तर असुन् प्रत्यय हो चेतः । सरः । पयः । सदः ॥

६२९ 'रपेरत एच्च' ॥ ॥ रेपोऽवद्यम् ॥

६२९–रप् धातुके उत्तर असुन् प्रत्यय और अकारके स्थानमें एकार हो, रेपोऽवद्यम् ॥

६३० 'अशेर्देवने युट् च' ॥ ॥ देवने स्तुतौ । यशः ॥

६३०–अश् धातुके उत्तर देवन (स्तुति) अर्थमें असुन् प्रत्यय हो, और युट्का आगम हो, यशः ॥

६३१ 'उब्जेर्बले बलोपश्च' ॥ ॥ ओजः ॥

६३१–बलार्थमे उब्ज् धातुके उत्तर असुन् प्रत्यय हो,और बकारका लोप हो, ओजः ॥

६३२ 'श्वेः संप्रसारणं च' ॥ ॥ शवः । शवसी । बलपर्यायोऽयम् ॥

६३२–श्वि धातुके उत्तर असुन् प्रत्यय हो, और धातुको सम्प्रसारण हो, शवः । शवसी । यह शब्द बलपर्य्याय है ॥

६३३ 'श्रयतेः स्वाङ्गे शिरः किच्च' ॥ ॥ श्रयतेः शिर आदेशोऽसुन् किच्च । शिरः । शिरसी ॥

६३३–श्रि धातुको शिर् आदेश हो, और असुन् प्रत्यय हो, और वह कित् हो, शिरः । शिरसी ॥

६३४ 'अर्तेरुच्च' ॥ ॥ उरः ॥

६३४–ऋ धातुके उत्तर असुन् प्रत्यय हो, और अकारके स्थानमें उकार हो, उरः ॥

६३५ 'व्याधौ शुट् च' ॥ ॥ अर्शो गुदव्याधिः ॥

६३५–व्याधि अर्थमें ऋ धातुके उत्तर असुन् प्रत्यय और शुट्का आगम हो, अर्शो गुदव्याधिः (बवासीर) ॥

६३६ 'उदके नुट् च' ॥ ॥ अर्तेरसुन् स्यात्तस्य च नुट् । अर्णः । अर्णसी ॥

६३६–उदकार्थमें ऋ धातुके उत्तर असुन् प्रत्यय और नुट्का आगम हो, अर्णः । अर्णसी ॥

६३७ 'इण आगसि' ॥ ॥ एनः ॥

६३७–आगः, अर्थात् अपराधार्थमें इण् धातुसे असुन् प्रत्यय हो, और नुट्का आगम हो, एनः (अपराध) ॥

६३८ 'रिचेर्धने घिच्च' ॥ ॥ चात्प्रत्ययस्य नुट् । घित्त्वात्कुत्वम् । रेक्णः सुवर्णम् ॥

६३८–धनार्थमें रिच् धातुके उत्तर असुन् प्रत्यय हो, और वह घित् हो, और चकारसे प्रत्ययको नुट्का आगम हो, घित्वके कारण चके स्थानमें क होगा, रेक्णः–सुवर्णम् ॥

६३९ 'चायतेरन्ने ह्रस्वश्च' ॥ ॥ चनो भक्तम्॥

६३९–चाय् धातुके उत्तर अन्नार्थमें असुन् प्रत्यय हो, और नुट्का आगम और धातुको ह्रस्व हो, चनः–भक्तम् ॥

६४० 'वृङ्शीङ्भ्यां रूपस्वांगयोः पुट् च' ॥ वर्पो रूपम् । शेपो गुह्यम् ॥

६४०–वृङ् और शीङ् धातुके उत्तर रूप और स्वाङ्ग अर्थमें असुन् प्रत्यय और पुट्का आगम हो, वर्पो रूपम् । शेपो गुह्यम् ॥

६४१ 'स्रुरीभ्यां तुट् च' ॥ ॥ स्रोतः।रेतः॥

६४१–स्रु और री धातुके उत्तर असुन् प्रत्यय और तुट्का आगम हो, स्रोतः । रेतः । (वीर्य) ॥

६४२ 'पातेर्बले जुट् च' ॥ ॥ पाजः । पाजसी ॥

६४२–पा धातुके उत्तर बलार्थमें असुन् प्रत्यय और जुट्का आगम हो, पाजः । पाजसी (बल) ॥

६४३ 'उदके थुट् च' ॥ ॥ पाथः ॥

६४३–उदकार्थमें पा धातुके उत्तर असुन् प्रत्यय और थुट्का आगम हो, पाथः (जल) ॥

६४४ 'अन्ने च' ॥ पाथो भक्तम् ॥

६४४–अन्नार्थमें पा धातुके उत्तर असुन् प्रत्यय और थुट्का आगम हो, पाथः–भक्तम् ॥

६४५ 'अदेर्नुम् धौ च' ॥ ॥ अदेर्भक्ते वाच्येऽसुन् नुमागमो धादेशश्च । अन्धोऽन्नम् ॥

६४५–भक्त अर्थमें अद् धातुके उत्तर असुन् प्रत्यय और नुम्का आगम और दकारको धकार आदेश हो, अन्धः–अन्नम् ॥

६४६ 'स्कन्देश्च स्वांगे' ॥ ॥ स्कन्धः । स्कन्धसी ॥

६४६–स्वाङ्गार्थमें स्कन्द् धातुके उत्तर असुन् प्रत्यय और ध आदेश हो, स्कन्धः । स्कन्धसी ॥

६४७ 'आपः कर्माख्यायाम्' ॥ ॥ कर्माख्यायां ह्रस्वो नुट् च वा । अप्नः । अपः । बाहुलकात् । आपः । आपसी ॥

६४७–आप् धातुके उत्तर कर्माख्यामें असुन् प्रत्यय हो, और ह्रस्व और नुट्का आगम हो, विकल्प करके, अप्नः, अपः । बाहुलक बलसे–आपः । आपसी ॥

६४८ 'रूपे जुट् च' ॥ ॥ अब्जो रूपम् ॥

६४८–रूप अर्थमें आप् धातुके उत्तर असुन् प्रत्यय, धातुको ह्रस्व और जुट्का आगम हो, अब्जो रूपम् ॥

६४९ 'उदके नुम्भौ च' ॥ ॥ अम्भः ॥

६४९–उदकार्थमें आप् धातुके उत्तर असुन् प्रत्यय, नुम् का आगम और भ आदेश हो, अम्भः (जल) ॥

६५० 'नहेर्दिवि भश्च' ॥ ॥ नभः ॥

६५०–नह् धातुके उत्तर आकाश वाच्यमें असुन् प्रत्यय और हको भ आदेश हो, नभः (आकाश) ॥

६५१ 'इण आगोऽपराधे च' ॥ ॥ 'आगः पापापराधयोः' ॥

६५१–अपराधार्थमें इण् धातुको आग आदेश, और असुन् प्रत्यय हो, "आगः पापापराधयोः" अर्थात् पाप और अपराध ॥

६५२ 'अमेर्हुक् च' ॥ ॥ अंहः ॥

६५२–अम् धातुके उत्तर असुन् प्रत्यय और हुक्का आगम हो, अंहः ॥

६५३ 'रमेश्च' ॥ ॥ रंहः ॥

६५३–रम् धातुके उत्तर असुन् प्रत्यय और हुक् आगम हो, रंहः (वेग) ॥

६५४ 'देशे ह च' ॥ ॥ रमन्तेऽस्मिन् रहः ॥

६५४–देशार्थमें रम् धातुके उत्तर असुन् प्रत्यय और ह आदेश हो, रमन्ते अस्मिन्=रहः ॥

६५५ 'अञ्च्यञ्जियुजिभृजिभ्यः कुश्च' ॥ ॥ एभ्योऽसुन् कवर्गश्चान्तादेशः । 'अङ्गःपक्षिहृदशरीरयोः' । अंगः पक्षी । योगः समाधिः । भर्गस्तेजः ॥

६५५–अञ्च्, अञ्ज्, युज् और भृज् धातुके उत्तर असुन् प्रत्यय और कवर्ग अन्तादेश हो "अङ्गःपक्षिहृदशरीरयोः" । अङ्गः–पक्षी । योगः–समाधिः । भर्गः–तेजः ॥

६५६ 'भूरञ्जिभ्यां कित्' ॥ ॥ भुवः रजः ॥

६५६–भू और रञ्ज् धातुके उत्तर असुन् प्रत्यय हो, और वह कित् हो, भुवः । रजः ॥

६५७ 'वसेर्णित्' ॥ ॥ वासो वस्त्रम् ॥

६५७–वस् धातुके उत्तर असुन् प्रत्यय हो, और वह णित् हो, वासो वस्त्रम् ॥

६५८ 'चन्देरादेश्च छः' ॥ ॥ छन्दः ॥

६५८–चन्द् धातुके उत्तर असुन् प्रत्यय और आदि वर्णको छ आदेश हो, छन्दः ॥

६५९ 'पचिवचिभ्यां सुट् च' ॥ ॥ 'पक्षसी तु स्मृतौ पक्षौ' । वक्षो हृदयम् ॥

६५९–पच् और वच् धातुके उत्तर असुन् प्रत्यय हो, और सुट्का आगम हो, "पक्षसी तु स्मृतौ पक्षौ" वक्षो हृदयम् ॥

६६० 'वहिहाधाञ्भ्यश्छन्दसि' ॥ ॥ वक्षाः अनड्वान् । हासाश्चन्द्रः । धासाः पर्वत इति प्राञ्चः । वस्तुतस्तु णिदित्यनुवर्तते न तु सुट् । तेन वहेरुपधावृद्धिः । इतरयोरातो युगिति युक् । 'शोणा धृष्णू नृवाहसा' । 'श्रोता हवं गृणतः स्तोमवाहाः' । 'विश्वो विहायाः' । 'वाजम्भरो विहायाः' । 'देवो नयः पृथिवीं विश्वधायाः' । 'अधारयत् पृथिवीं विश्वधायसम्' । 'धर्णसं भूरिधायसम्' इत्यादि ॥

६६०–वेदमें वह् हा और धाञ् धातुके उत्तर असुन् प्रत्यय हो, वक्षाः–अनड्वान् । हासाश्चन्द्रः । धासाः–पर्वतः। ऐसे प्राचीन कहतेहैं। वास्तविक तो णित् इसकीही अनुवृत्ति होतीहै सुट्की नहीं इस कारण वहि धातुकी उपधाको वृद्धि होगी, और अपर धातुओं को "आतो युक्(१७६१)" इस सूत्रसे युक्का आगम होगा, यथा "शोणा धृष्णू नृवाहसा" । "श्रोता हवं गृणतः स्तोमवाहाः" । "विश्वो विहायाः" । "वाजम्भरो विहायाः" । "देवो नयः पृथिवीं विश्वधायाः" । "अधारयत् पृथिवीं विश्वधायसम्" । "धर्णसं भूरिधायसम्" इत्यादि ॥

६६१ 'इण आसिः' ॥ ॥ अयाः वह्निः । स्वरादिपाठादव्ययत्वम् ॥

६६१–इण् धातुके उत्तर आसि प्रत्यय हो, अयाः–वह्नि। स्वरादिगणमें पाठके कारण यह अव्ययसंज्ञक है ॥

६६२ 'मिथुनेऽसिः पूर्ववच्च सर्वम्' ॥ ॥ उपसर्गविशिष्टो धातुर्मिथुनं तत्रासुनोपवादोऽसिः स्वरार्थः सुयशाः ॥

६६२–मिथुनमें धातुके उत्तर असि प्रत्यय हो, और पूर्ववत् आगमादि समस्त कार्य्य हों, अर्थात् जिस धातुको जो जो कार्य्य असुन् प्रत्ययमें कहे गयेहैं वह सब कार्य उस२ धातुको असि प्रत्ययमें भी हों । उपसर्गविशिष्ट जो धातु उसको मिथुन कहतेहैं, उसमें असुन् प्रत्ययका विशेषक जो असि प्रत्यय वह स्वरार्थ है, यथा–सुयशाः॥

६६३ 'नञि हन एह च' ॥ ॥ अनेहाः । अनेहसौ ॥

६६३–नञ् पूर्वक हन् धातुके उत्तर असुन् प्रत्यय हो, और धातुको एह आदेश हो, अनेहाः । अनेहसौ ॥

६६४ 'विधाञो वेध च' ॥ ॥ विदधातीति वेधाः ॥

६६४–विपूर्वक धाञ् धातुके उत्तर असुन् प्रत्यय हो, और धाके स्थानमें वेध आदेश हो, विदधाति इति=वेधाः ॥

६६५ 'नुवो धुट् च' ॥ ॥ नोधाः ॥

६६५–नु धातुके उत्तर असुन् प्रत्यय हो, और धुट्का आगम हो, नोधाः ॥

६६६ 'गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च' ॥ ॥ असिः स्यात् । सुतपाः । जातवेदाः । गतिकारकोपपदात् कृदित्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम् ॥

६६६–गति और कारक उपपद होनेपर धातुके उत्तर असि प्रत्यय हो, और पूर्वपदका प्रकृतिस्वर हो, सुतपाः । जातवेदाः । "गतिकारकोपपदात्कृत्०" इस सूत्रसे उत्तर पदको प्रकृतिस्वर विहित होनेसे अवशिष्टको अनुदात्तत्व प्राप्त होनेपर उसके अपवादके निमित्त यह सूत्र किया है ॥

६६७ 'चन्द्रे मो डित्' ॥ ॥ चन्द्रोपपदान्माङोऽसिः स्यात्स च डित् । चन्द्रमाः ॥

६६७–चन्द्र शब्द उपपद होनेपर माङ् धातुके उत्तर असि प्रत्यय हो, और वह डित् हो, चन्द्रमाः ॥

६६८ 'वयसि धाञः' ॥ ॥ वयोधास्तरुणः॥

६६८–वयस् शब्द पूर्वक धाञ् धातुके उत्तर असि प्रत्यय हो, वयोधाः–तरुणः ॥

६६९ 'पयसि च' ॥ ॥ पयोधाः समुद्रो मेघश्च ॥

६६९–पयस् शब्दपूर्वक धाञ् धातुके उत्तर असि प्रत्यय हो, पयोधाः समुद्रो मेघः ॥

६७० 'पुरसि च' ॥ ॥ पुरोधाः ॥

६७०–पुरस् शब्दपूर्वक धाञ् धातुके उत्तर असि प्रत्यय हो, पुरोधाः (पुरोहित) ॥

६७१ 'पुरूरवाः' ॥ ॥ पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते ॥

६७१–पुरुशब्द पूर्वक रु धातुके उत्तर निपातनसे असि प्रत्यय और पुरु शब्दको दीर्घ हो, पुरूरवाः (राजाका नाम)॥

६७२ 'चक्षेर्बहुलं शिच्च' ॥ ॥ नृचक्षाः ॥

६७२–चक्ष् धातुके उत्तर असि प्रत्यय हो, और वह बहुल करके शित् हो, नृचक्षाः ॥

६७३ 'उषः कित्' ॥ ॥ उषः ॥

६७३–उष् धातुके उत्तर असि प्रत्यय हो, और वह कित् हो, उषः ॥

६७४ 'दमेरुनसिः' ॥ ॥ 'सप्तार्चिर्दमुनाः' ॥

६७४–दम् धातुके उत्तर उनसि प्रत्यय हो, "सप्तार्चिर्दमुनाः" (अग्निः) ॥

६७५ 'अंगतेरसिरिरुडागमश्च' ॥ ॥अंगिराः॥

६७५–अङ्ग धातुके उत्तर असि प्रत्यय और, इरुट्का आगम हो, अङ्गिराः ॥

६७६ 'सर्तेरप्पूर्वादसिः' ॥ ॥ अप्सराः । प्रायेणायं भूम्नि । अप्सरसः ॥

६७६–अप् शब्दपूर्वक सृ धातुके उत्तर असि प्रत्यय हो, अप्सराः । यह शब्द प्रायः बहुवचनान्त है, अप्सरसः ॥

६७७ 'विदिभुजिभ्यां विश्वे'॥ ॥ विश्ववेदाः। विश्वभोजाः ॥

६७७-विश्व शब्दपूर्वक विद् और भुज् धातुके उत्तर असि प्रत्यय हो, विश्ववेदाः । विश्वभोजाः ॥

६७८ 'वशेः कनसिः' ॥ ॥ संप्रसारणम् । उशनाः ॥

॥ इत्युणादिषु चतुर्थः पादः ॥

६७८-वश् धातुके उत्तर कनसि प्रत्यय हो, धातुको सम्प्रसारण होकर-उशनाः (शुक्र) ॥

॥ इत्युणादिषु चतुर्थपादः ॥

---

६७९ 'अदिभुवो डुतच्' ॥ ॥ अद्भुतम् ॥

६७९-अद् उपपद होनेपर भू धातुके उत्तर डुतच् प्रत्यय हो, अद्भुतम् ॥

६८० 'गुधेरूमः' ॥ ॥ गोधूमः ॥

६८०-गुध् धातुके उत्तर ऊम प्रत्यय हो, गोधूमः (गेहूं)

६८१ 'मसेरूरन्' ॥ ॥ मसूरः । प्रथमे पादे असेरुरन्मसेश्चेत्यत्र व्याख्यातः ॥

६८१-मस् धातुके उत्तर ऊरन् प्रत्यय हो, मसूरः । प्रथम पादमें "असेरुरन्मसेश्च" इस सूत्रमें यह व्याख्यात है ॥

६८२ 'स्थः किच्च' ॥ ॥ स्थूरो मनुष्यः ॥

६८२-स्था धातुके उत्तर ऊरन् प्रत्यय हो, और वह कित् हो, स्थूरो मनुष्यः ॥

६८३ 'पातेरतिः' ॥ ॥ पातिः स्वामी । सम्पातिः पक्षिराजः ॥

६८३-पा धातुके उत्तर अति प्रत्यय हो, पातिः-स्वामी । संपातिः-पक्षिराजः ॥

६८४ 'वातेर्नित्' ॥ ॥ 'वातिरादित्यसोमयोः' ॥

६८४-वा धातुके उत्तर अति प्रत्यय हो, और वह नित् हो, वातिः-'आदित्यसोमयोः' ॥

६८५ 'अर्तेश्च' ॥ ॥ अरतिरुद्वेगः ॥

६८५-ऋ धातुके उत्तर अति प्रत्यय हो,अरतिः-उद्वेगः॥

६८६ 'तृहेः क्नो हलोपश्च' ॥ ॥ तृणम् ॥

६८६-तृह् धातुके उत्तर क्न प्रत्यय हो और हकारका लोप हो, तृणम ॥

६८७'वृञ्लुटितनिताडिभ्य उलच् तण्डश्च'॥ व्रियन्ते लुटयन्ते तन्यन्ते ताडयन्त इति वा तण्डुलाः ॥

६८७-वृञ्, लुट् तन्, और ताडि, धातुके उत्तर उलच् प्रत्यय हो, और तण्ड हो, व्रियन्ते, लुटयन्ते, तन्यन्ते, ताडयन्ते इति वा, इस विग्रहमें तण्डुलाः (चावल) ॥

६८८ 'दंसेष्टटनौ न आ च' ॥ ॥ 'दासः सेवकशूद्रयोः' ॥

६८८-दन्स धातुके उत्तर ट, टन् प्रत्यय हों, और नके स्थानमें आ आदेश हो, "दासः सेवकशूद्रयोः" ॥

६८९ 'दंशेश्च' ॥ ॥ दाशो धीवरः ॥

६८९-दंश धातुके उत्तर भी यह प्रत्यय और आदेश हो। दाशो धीवरः । (धीमर) ॥

६९० 'उदि चेर्डसिः' ॥ ॥ स्वरादिपाठादव्ययत्वम् । उच्चैः ॥

६९०-उत्पूर्वक चि धातुके उत्तर डैसि प्रत्यय हो, उच्चैः (ऊंचा) और स्वरादिगणके मध्यमें पठित होनेके कारण इसकी अव्यय संज्ञा होगी ॥

६९१ 'नौ दीर्घश्च' ॥ ॥ नीचैः ॥

६९१-निपूर्वक चि धातुके उत्तर डैसि प्रत्यय हो, और निके इकारको दीर्घ हो, नीचैः । (नीचा) ॥

६९२'सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः'॥ रमे सुपूर्वाद्दमे वाच्ये क्तः स्यात् । कित्त्वादनुनासिकलोपः । सूरत उपशान्तो दयालुश्च ॥

६९२-सुपूर्व रम् धातुके उत्तर दम अर्थ होनेपर क्त प्रत्यय हो, और पूर्व पदको दीर्घ हो, कित्वके कारण अनुनासिक वर्णका लोप हो, सूरतः उपशान्तः,दयालुः ॥

६९३ 'पूञो यण्णुक् ह्रस्वश्च' ॥ ॥ यत्प्रत्ययः । पुण्यम् ॥

६९३-पू धातुके उत्तर यत् प्रत्यय हो, और णुक् आगम और ह्रस्व हो, पुण्यम् ॥

६९४ 'स्रंसेः शिः कुट् किच्च' ॥ ॥ स्रंसतेः शिरादेशः यत्प्रत्ययः कित्तस्य कुडागमश्च ॥ शिक्यम् ॥

६९४-स्रंस धातुके उत्तर यत् प्रत्यय हो, और यह प्रत्यय कित्संज्ञक हो धातुको शि आदेश और उसको कुडागम हो, शिक्यम् । (छींका) ॥

६९५ 'अर्तेः क्युरुच्च' ॥ ॥ उरणो मेषः ॥

६९५-ऋ-धातुके उत्तर क्यु प्रत्यय और अकारके स्थानमें उकार हो, उरणः-मेषः । (मेढा) ॥

६९६ 'हिंसेरीरन्नीरचौ' ॥ ॥ हिंसीरो व्याघ्रदुष्टयोः ॥

६९६-हिंस धातुके उत्तर ईरन् और ईरच प्रत्यय हों, हिंसीरः व्याघ्रः दुष्टः ॥

६९७ 'उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च' ॥ ॥ उदरम् ॥

६९७-उत्पूर्वक दॄ धातुके उत्तर अच् और अल् प्रत्यय हों, और पूर्वपदके अन्त भागका अर्थात् दकारका लोप हो, उदरम् । (पेट) ॥

६९८ 'डित् खनेर्मुट् स चोदात्तः' ॥ ॥ अच् अल् च डित्स्याद्धातोर्मुट् स चोदात्तः । मुखम् ॥

६९८-खन धातुके उत्तर अच् और अल् प्रत्यय हों और

धातुको मुट् आगम हो,और वह डित्संज्ञक और उदात्तस्वर हो मुखम् ॥

६९९ 'अमेः सन्' ॥ ॥ अंसः ॥

६९९--अमि धातुके उत्तर सन् प्रत्यय हो, अंसः ॥

७०० 'मुहेः खो मूर्च' ॥ ॥ मूर्खः ॥

७००--मुह् धातुके उत्तर ख प्रत्यय हो, और मूर् आदेश हो, मूर्खः ॥

७०१ 'नहेर्हलोपश्च' ॥ ॥ नखः ॥

७०१--नह् धातुके उत्तर ख प्रत्यय हो, और हकारका लोप हो, नखः ॥

७०२ 'शीङो ह्रस्वश्च' ॥ ॥ शिखा ॥

७०२--शीङ् धातुके उत्तर ख प्रत्यय हो, और ह्रस्व हो, शिखा ॥

७०३ 'माङ ऊखो मय् च' ॥ ॥ मयूखः ॥

७०३--माङ् धातुके उत्तर ऊख प्रत्यय हो, और धातुके स्थानमें मय आदेश हो । मयूखय् (किरण) ॥

७०४ 'कलिगलिभ्यां फगस्योच्च' ॥ ॥ कुल्फः शरीरावयवो रोगश्च । गुल्फः पादग्रन्थिः॥

७०४--कलि और गलि धातुके उत्तर फक् प्रत्यय हो, और अको उत् आदेश हो, कुल्फः शरीरावयवो रोगश्च । गुल्फः पादग्रन्थिः ॥

७०५ 'स्पृशेः श्वणशुनौ पृ च' ॥ ॥ श्वण्शुनौ प्रत्ययौ पृ इत्यादेशः । 'पार्श्वोऽस्त्री कक्षयोरधः' । पर्शुरायुधम् ॥

७०५--स्पृश् धातुके उत्तर श्वण् और शुन् प्रत्यय हों, और धातुके स्थानमें पृ आदेश हो, "पार्श्वोऽस्त्री कक्षयोरधः"। पर्शुः आयुधम् । (फरस्या) ॥

७०६ 'श्मनि श्रयतेर्डुन्' ॥ ॥ श्मन्शब्दो मुखवाची । मुखमाश्रयत इति श्मश्रु ॥

७०६--श्मन् शब्दपूर्वक श्रि धातुके उत्तर डुन् प्रत्यय हो, श्मन् शब्दसे मुख समझना । मुखमाश्रयते इति श्मश्रु (मूंछ) ॥

७०७ 'अश्र्वादयश्च' ॥ ॥ अश्रु नयनजलम्॥

७०७--अश्रु आदि शब्द निपातनसे सिद्ध हों । अश्रु नयनजलम् ॥

७०८ 'जनेष्टन् लोपश्च' ॥ ॥ जटा ॥

७०८--जन धातुके उत्तर टन् प्रत्यय हो, और धातुके नकारका लोप हो, जटा ॥

७०९ 'अच् तस्य जङ्घ च' ॥ ॥ तस्य जनेः जङ्घादेशः स्याद्च । जङ्घा ॥

७०९--जन धातुके उत्तर अच् प्रत्यय हो, और धातुके स्थानमें जंघ आदेश हो जंघा ॥

७१० 'हन्तेः शरीरावयवे द्वे च'॥ ॥ जघनम् 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः'॥

७१०--हन धातुके उत्तर भी शरीरावयवार्थमें अच् प्रत्यय हो, और द्वित्व हो, जघनम् । "पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः" । स्त्रीके कमरके नीचेका भाग नितम्ब कहाताहै पुरोभाग जंघा ॥

७११ 'क्लिशेरन् लो लोपश्च' ॥ ॥ लकारस्य लोपः । केशः ॥

७११--क्लिश धातुके उत्तर अन् प्रत्यय हो, और लकारका लोप हो--केशः ॥

७१२ 'फलेरितजादेश्च पः' ॥ ॥ पलितम्॥

७१२--फल धातुके उत्तर इतच् प्रत्यय हो, और फके स्थानमें प हो, पलितम् ॥

७१३ 'कृञादिभ्यः संज्ञायां वुन्' ॥ ॥ करकः । करका ॥ कटकः । नरकम् । नरकः । 'नरको नारकोऽपि च' इति द्विरूपकोशः । सरकं गगनम् । कोरकः । कोरकं च ॥

७१३--कृञादि धातुके उत्तर संज्ञार्थमें वुन् प्रत्यय हो करकः।करका।कटकः। नरकम्।नरकः।"नरको नारकोऽपि च"। इति द्विरूपकोशः । सरकं गमनम् । कोरकः कोरकञ्च ॥

७१४ 'चीकयतेराद्यन्तविपर्ययश्च' ॥ ॥ कीचको वंशभेदः ॥

७१४--ण्यन्त चीक धातुके उत्तर वुन् प्रत्यय हो, आदि और अन्तवर्णका विपर्य्यय हो, कीचको वंशभेदः । (जिनमें वायु भरजानेसे शब्द होताहै ऐसे बांस) ॥

७१५ 'पचिमच्योरिच्चोपधायाः' ॥ ॥ पेचकः । मेचकः ॥

७१५--पचि और मचि धातुके उत्तर वुन् प्रत्यय हो, और उपधाके स्थानमें इकार हो, पेचकः । मेचकः ॥

७१६ 'जनेररष्ठ च' ॥ ॥ जठरम् ॥

७१६--जन धातुके उत्तर अर् प्रत्यय हो और, धातुके नकारके स्थानमें ठ आदेश हो, जठरम् ॥

७१७ 'वचिमनिभ्यां चिच्च' ॥ ॥ वठरो मूर्खः । 'मठरो मुनिशौण्डयोः' । बिदादित्वान्माठरः । गर्गादित्वान्माठर्यः ॥

७१७--वचि और मनि धातुके उत्तर वुन् प्रत्यय हो और यह चित्संज्ञक हो, वठरः मूर्खः । "मठरो मुनिशौंडयोः" बिदादि गणीय होनेके कारण माठरः पद भी सिद्ध होगा । गर्गादि गणमें पाठ होनेसे माठर्यः ऐसा भी पद होता है ॥

७१८ 'ऊर्जि दृणातेरलचौ पूर्वपदान्तलोपश्च' ॥ ॥ 'ऊर्दरः शूररक्षसोः'॥

७१८--ऊर्ज उपपद रहते दृ धातुके उत्तर अल् और अच् प्रत्यय हों, और पूर्वपदके अन्तका लोप हो । "ऊर्दरः शूररक्षसोः" ॥

७१९ 'कुदरादयश्च' ॥ ॥ कुदरः कुसूलः । मृदरं विलसत् । सृदरः सर्पः ॥

७१९--कुदरादि शब्द निपातनसे सिद्ध हों । कुदरः कुसूलः । मृदरं विलसत् । सृदरः सर्पः ॥

७२० 'हन्तेर्युनाद्यन्तयोर्घत्वतत्वे' ॥ ॥ घातनो मारकः ॥

७२०-हन् धातुके उत्तर युन् प्रत्यय हो, और धातुके आदि वर्ण अर्थात् ह के स्थानमें घ और अन्त वर्ण अर्थात् न के स्थानमें त हो, । घातनः मारकः ॥

७२१ 'क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च' ॥ ॥ क्रान्तुः पक्षी । गान्तुः पथिकः । क्षान्तुर्मशकः ॥

७२१-क्रमि, गमि और क्षमि धातुके उत्तर तुन् प्रत्यय और वृद्धि हो, क्रान्तुः पक्षी । पान्तुः-पथिकः । क्षान्तुर्मशकः (अर्थात् मच्छर) ॥

७२२ 'हर्यतेः कन्यन् हिरच्' ॥ ॥ कन्यन् प्रत्ययः । हिरण्यम् ॥

७२२-हर्य धातुके उत्तर कन्यन् प्रत्यय और धातुके स्थानमें हिरच् आदेश हो । यथा-हिरण्यम् (सुवर्ण) ॥

७२३ 'कृञः पासः'॥ ॥ कर्पासः । विल्वादित्वात्कार्पासं वस्त्रम् ॥

७२३-कृञ् धातुके उत्तर पास प्रत्यय हो, कर्पासः । (कपास) विल्वादित्वके कारण कार्पासं वस्त्रम् (कपडा) ॥

७२४ 'जनेस्तु रश्च' ॥ ॥ जर्तुर्हस्ती योनिश्च॥

७२४-जनि धातुके उत्तर तु प्रत्यय और रकारान्तादेश हो, जर्तुः हस्ती योनिश्च ॥

७२५ 'ऊर्णोतेर्डः' ॥ ॥ ऊर्णा ॥

७२५-ऊर्णु धातुके उत्तर ड प्रत्यय हो, ऊर्णा ॥

७२६ 'दधातेर्यन्नुट् च' ॥ ॥ धान्यम् ॥

७२६-धा धातुके उत्तर यत् प्रत्यय और उसको नुट् आगम हो । धान्यम् ॥

७२७ 'जीर्यतेः क्रिन् रश्च वः' ॥ ॥ 'जिव्रिः स्यात्कलपक्षिणोः'।बाहुलकाद्धलि चेति दीर्घो न॥

७२७-जॄ धातुके उत्तर क्रिन् प्रत्यय हो, और र के स्थानमें व आदेश हो, "जिव्रिः स्यात्कालपक्षिणोः" । " बाहुलकात् हलि च ३५४ " इस सूत्रसे दीर्घ न होगा ॥

७२८ 'मव्यतेर्यलोपो मश्चापतुट् चालः'॥ ॥ मव्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्त्यस्य । ममापतालो विषये॥

७२८-मव्य धातुके उत्तर आल् प्रत्यय हो और उसको आपतुट् आगम, यकारका लोप और अन्त वर्णके स्थानमें मकार हो, 'ममापतालो विषये ' ॥

७२९ 'ऋजेः कीकन्' ॥ ॥ ऋजीक इन्द्रो धूमश्च ॥

७२९-ऋज् धातुके उत्तर कीकन् प्रत्यय हो, ऋजीकः इन्द्रो धूमश्च ॥

७३० 'तनोतेर्डउः सन्वच्च' ॥ ॥ 'तितउः पुंसि क्लीबे च' ॥

७३०--तन धातुके उत्तर डउ प्रत्यय हो, और उसको सन्वत् कार्य हो, "तितउः पुंसि क्लीबे च " ॥

७३१ 'अर्भकपृथुकपाका वयसि' ॥ ॥ ऋधु वृद्धौ । अतो वुन् । भकारश्चान्तादेशः । प्रथेः कुकन्संप्रसारणं च । पिबतेः कन् ॥

७३१-अर्भक, पृथुक और पाक शब्द वयोऽर्थमें निपातनसे सिद्ध हों । ऋधु वृद्धौ । ऋध धातुके उत्तर वुन् प्रत्यय हो और अन्तमें भकार आदेश हो । अर्भकः (बालक)। प्रथ धातुके उत्तर कुकन् प्रत्यय और सम्प्रसारण हो पृथुकः । पा धातुके उत्तर कन् प्रत्यय होगा । पाकः ॥

७३२ 'अवद्यावमाधमार्वरेफाः कुत्सिते'॥ ॥ वदेर्नञि यत् । अवद्यम् । अवतेरमः । वस्य पक्षे धः । अवमः । अधमः । अर्तेर्वन् । अर्वा॥ रिफतेस्तौदादिकात् अः रेफः ॥

७३२-अवद्य, अवम, अधम, अर्व, रेफ शब्द कुत्सितार्थमें नञ् उपपद रहते वद धातुके उत्तर यत् प्रत्यय निपातनसे सिद्ध होगा । अवद्यम् । अव धातुके उत्तर अम प्रत्यय होगा और विकल्प करके व के स्थानमें ध होगा, अवमः । अधमः । अर्ति धातुके उत्तर न् प्रत्यय होगा । अर्वा । तुदादि गणीय रिफ धातुके उत्तर अ प्रत्यय होगा । रेफः ॥

७३३ 'लीरीङो ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोः' ॥ ॥ तरौ प्रत्ययौ क्रमात् स्तो धातोर्ह्रस्वः प्रत्ययस्य पुट् । लिप्तं श्लिष्टम् । रिप्रं कुत्सितम् ॥

७३३-श्लेषण और कुत्सन अर्थ होनेपर लीङ् और रीङ् धातुके उत्तर क्रमसे त और र प्रत्यय हों । धातुको ह्रस्व हो; और प्रत्ययको पुट् आगम हो । लिप्तं श्लिष्टम् । रिप्रं कुत्सितम् । (निकम्मा) ॥

७३४ 'क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च' ॥ ॥ क्लिशेः कन् स्यात् उपधाया ईत्वं लस्य लोपो नामागमश्च । कीनाशो यमः । कित्वफलं चिन्त्यम् ॥

७३४-क्लिश धातुके उत्तर कन् प्रत्यय हो, पश्चात् उपधाके स्थानमें ईकार, लकारका लोप और नामागम हो, कीनाशो यमः । कित्संज्ञा करनेका फल विवेच्य है ॥

७३५ 'अश्नोतेराशुकर्मणि वरट् च' ॥ ॥ चकारादुपधाया ईत्वम् । ईश्वरः ॥

७३५-अश धातुके उत्तर शीघ्र करण अर्थमें वरट् प्रत्यय हो चकारके कारण उपधाके स्थानमें ईत्व हो,ईश्वरः॥

७३६ 'चतेरुरन्' ॥ ॥ चत्वारः ॥

७३६--चति धातुके उत्तर उरन् प्रत्यय हो, चत्वारः । (चार) ॥

७३७ 'प्राततेररन्' ॥ ॥ प्रातः ॥

७३७-प्रपूर्वक अति धातुके उत्तर अरन् प्रत्यय हो, प्रातः ॥

७३८ 'अमेस्तुट् च' ॥ ॥ अन्तर्मध्यम् ॥

७३८–अमि धातुके उत्तर अरन् प्रत्यय हो, और तुट् आगम हो, अन्तः मध्यम् ॥

७३९ 'दहेर्गोलोपो दश्च नः' ॥ ॥ गप्रत्ययो धातोरन्त्यस्य लोपो दकारस्य नकारः । नगः ॥

७३९–दह धातुके उत्तर ग प्रत्यय, धातुके अन्त-भागका लोप और दकारके स्थानमें नकार हो, । नगः (पर्वत, अचल) ॥

७४० 'सिचेः संज्ञायां हनुमौ कश्च' ॥ ॥ सिञ्चतेः कप्रत्ययो हकारादेशो नुम् च स्यात् । सिंहः ॥

७४०–संज्ञा अर्थ होनेपर सिच् धातुके उत्तर क प्रत्यय और हकारान्तादेश नुम् आगम हो, सिंहः ॥

७४१ 'व्याङि घ्रातेश्च जातौ' ॥ ॥ कप्रत्ययः स्यात् । व्याघ्रः ॥

७४१–जाति अर्थमें विपूर्वक और आङ्पूर्वक घ्रा धातुके उत्तर क प्रत्यय हो, व्याघ्रः ॥

७४२ 'हन्तेरच् घुर च' ॥ ॥ घोरम् ॥

७४२–हन धातुके उत्तर अच् प्रत्यय और घुर आदेश हो, घोरम् ॥

७४३ 'क्षमेरुपधालोपश्च' ॥ ॥ चादच् ।क्ष्मा॥

७४३–क्षमि धातुकी उपधाका लोप हो, और अच् प्रत्यय हो, क्ष्मा ॥

७४४ 'तरतेर्ड्रिः' ॥ ॥ त्रयः । त्रीन् ॥

७४४–तृ धातुके उत्तर ड्रि प्रत्यय हो, त्रयः त्रीन् ॥

७४५ 'ग्रहेरनिः'॥ ॥ ग्रहणिः । ङीष्। ग्रहणी व्याधिभेदः ॥

७४५–ग्रह धातुके उत्तर अनि प्रत्यय हो, ग्रहणिः । इसके उत्तर ङीष् प्रत्यय भी होगा । ग्रहणी व्याधिभेदः । (दस्तोंकी बीमारी) ॥

७४६ 'प्रथेरमच्' ॥ ॥ प्रथमः ॥

७४६–प्रथि धातुके उत्तर अमच् प्रत्यय हो, प्रथमः । (पहला) ॥

७४७ 'चरेश्च' ॥ ॥ चरमः ॥

७४७–चर धातुके उत्तर अमच् प्रत्यय हो, चरमः । (अन्त) ॥

७४८ 'मङ्गेरलच्' ॥ ॥ मङ्गलम् ॥

॥ इत्युणादिषु पञ्चमः पादः ॥

७४८–मङ्गि धातुके उत्तर अलच् प्रत्यय हो, मङ्गलम् ॥

॥ इत्युणादिसूत्रे पञ्चमः पादः ॥

॥ इत्युणादिप्रकरणम् ॥

अथोत्तरकृदन्तम् ।

३१६९ उणादयो बहुलम् । ३ । ३ ।१॥

एते वर्तमाने संज्ञायां च बहुलं स्युः । केचिदविहिता अप्यूह्याः ॥

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥

३१६९–उणादि प्रत्यय वर्त्तमान कालमें और संज्ञामें बाहुल्य रूपसे हों इन पञ्चपादी उणादि सूत्रोंमें जो सम्पूर्ण प्रत्यय विहित हुए हैं उनसे भिन्न प्रत्ययोंका भी बाहुल्य रूपसे ऊह करना चाहिये । ऊहनप्रकार लिखते हैं, कि, प्रथम तो संज्ञा-विषयमें, संपूर्ण धातुओंके रूप ऊहनीय हैं पश्चात् सम्पूर्ण प्रत्यय, और तत्पश्चात् सम्पूर्ण अनुबन्ध कार्यके अनुसार जानना चाहिये । यथा, कारुः । वायुः । पायुः । मायुः । स्वादुः । साधुः । आशुः । इतना ही उणादिमें शास्त्र (अनुशासन) है ॥

३१७० भूतेऽपि दृश्यन्ते । ३ । ३।२॥

३१७०–उणादि प्रत्ययोंका प्रयोग अतीत कालमें भी देखा जाताहै अर्थात् वर्त्तमान कालमें ही बाहुल्य रूपसे और अतीत कालमें अल्प परिमाणसे प्रयोग देखा जाताहै ॥

३१७१ भविष्यति गम्यादयः।३।३।३॥

३१७१–गमी आदि णिनिप्रत्ययान्त शब्द भविष्यत् कालमें ही निपातनसे सिद्ध हों ॥

३१७२ दाशगोघ्नौ संप्रदाने।३।४।७३॥

एतौ संप्रदाने कारके निपात्येते । दाशन्ति तस्मै दाशः । गां हन्ति तस्मै गोघ्नोऽतिथिः ॥

३१७२–दाश और गोघ्न यह दो अच्प्रत्ययान्त क प्रत्य-यान्त शब्द सम्प्रदान कारकमें निपातनसे सिद्ध हों, अर्थात् दाश धातुसे सम्प्रदानमें अच् प्रत्यय और गो पूर्वक हन् धातुसे क प्रत्यय सम्प्रदानमें निपातनसे हों, दाशन्ति तस्मै दाशः । गां हंति तस्मै गोघ्नोऽतिथिः ॥

३१७३ भीमादयोऽपादाने।३।४। ७४॥

भीमः । भीष्मः । प्रस्कन्दनः । प्रस्कः । मूर्खः । खलतिः ॥

३१७३–भीमादि शब्द अपादान कारकमें निपातनसे सिद्ध हों । भीमः । भीष्मः । प्रस्कन्दनः । प्रस्कः । मूर्खः । खलतिः–(इन्द्रलुप्त रोगवाला) ॥

३१७४ ताभ्यामन्यत्रोणादयः । ३ । ४ । ७५ ॥

संप्रदानपरामर्शार्थं ताभ्यामिति । ततोऽसौ भवति तन्तुः । वृत्तं तदिति वर्त्म । चरितं तदिति चर्म ॥

३१७४-सम्प्रदान और अपादान कारकभिन्न अन्यकारकमें उणादि प्रत्यय हों। कृत् प्रत्यय होनेके कारण कर्तृकारकमें ही प्राप्ति हुई थी किन्तु इस सूत्रसे कर्म्मादिमें भी उणादि प्रत्यय होंगे। यथा, ततोऽसौ भवति इस विग्रहमें तन्तुः वृत्तं तदिति वर्त्म। चरितं तत् इति चर्म्म॥

३१७५ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्। ३। ३। १०॥

क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः। मान्तत्वादव्ययत्वम्। कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति। अत्र वासरूपेण तृजादयो न पुनर्ण्वुलुक्तेः॥

३१७५-क्रियार्थक क्रियावाचक पद उपपद होनेपर भविष्यत् कालमें धातुके उत्तर तुमुन् और ण्वुल् प्रत्यय हों। मकारान्तत्वके कारण तदन्त पद अव्यय हों, यथा-कृष्णं द्रष्टुं याति। कृष्णदर्शको याति। इस स्थलमें क्रियानिमित्तक क्रियावाचक पद उपपद होनेपर वासरूप विधिसे तृच् आदि प्रत्यय नहीं होंगे। कारण कि, पुनर्वार ण्वुल् प्रत्यय उक्त हुआहै॥

३१७६ समानकर्तृकेषु तुमुन्। ३। ३। १५८॥

अक्रियार्थोपपदार्थमेतत्। इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् स्यात्। इच्छति भोक्तुम्। वष्टि वाञ्छति वा॥

३१७६-जिस स्थलमें क्रियार्थक क्रियावाचक पद उपपद नहीं है उस स्थलमें तुमुन् प्रत्ययके विधानार्थ यह सूत्र है, इच्छार्थमें वर्त्तमान ऐसी एक कर्त्तावाली सम्पूर्ण धातु उपपद रहते धातुके उत्तर तुमुन् प्रत्यय हो, इच्छति भोक्तुं, वष्टि वाञ्छति वा। एक कर्त्ता न होनेपर 'पुत्रस्य पठनमिच्छति' यहां तुमुन् न हुआ॥

३१७७ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्। ३। ४। ६५॥

एषूपपदेषु धातोस्तुमुन् स्यात्। शक्नोति भोक्तुम्। एवं धृष्णोतीत्यादौ। अर्थग्रहणमस्तिनैव संबध्यते, अनन्तरत्वात्। अस्ति भवति विद्यते वा भोक्तुम्॥

३१७७-शक, धृष, ज्ञा, ग्ला, घट, रभ, लभ, क्रम, सह, अर्ह और अस्त्यर्थ धातु उपपद होनेपर धातुके उत्तर तुमुन् प्रत्यय हो, शक्नोति भोक्तुम्। इसी प्रकारसे अन्यत्र-यथा, धृष्णोति भोक्तुम् इत्यादि। अनन्तरत्वके कारण अर्थ शब्दका अस्ति पदके ही साथ संबन्ध हुआ अस्ति भवति विद्यते वा भोक्तुम्॥

३१७८ पर्याप्तिवचनेष्वलमर्थेषु। ३। ४। ६६॥

पर्याप्तिः पूर्णता। तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन् स्यात्। पर्याप्तो भोक्तुं प्रवीणः कुशलः पटुरित्यादि। पर्याप्तिवचनेषु किम्। अलंभुक्त्वा। अलमर्थेषु किम्। पर्याप्तं भुङ्क्ते। प्रभूततेह गम्यते न तु भोक्तुः सामर्थ्यम्॥

३१७८-पर्य्याप्ति अर्थात् पूर्णता तद्वाचक और अलमर्थ अर्थात् सामर्थ्यवाचक शब्द उपपद होनेपर धातुके उत्तर तुमुन् प्रत्यय हो, पर्य्याप्तो भोक्तुम्। प्रवीणः कुशलः पटुः इत्यादि। पर्य्याप्तिवाचक न होनेपर, अलं भुक्त्वा। अलमर्थ न होनेपर पर्य्याप्तं भुंक्ते। इस स्थलमें भोजनकर्त्ताकी सामर्थ्य नहीं है किन्तु प्रचुरार्थ गम्यमान है॥

३१७९ कालसमयवेलासु तुमुन्। ३। ३। १६७॥

पर्यायोपादानमर्थोपलक्षणार्थम्। कालार्थेषूपपदेषु तुमुन् स्यात्। कालः समयो वेला अनेहा वा भोक्तुम्। प्रैषादिग्रहणमिहानुवर्तते तेनेह न। भूतानि कालः पचतीति वार्ता॥

३१७९-"कालादिषु तुमुन्" ऐसा सूत्र करनेसे कार्यसिद्धि रहते पर्यायोपादान कालार्थक उपपद रहते तुमुन् विधानार्थ है। कालवाचक, समयवाचक और वेलावाचक शब्द उपपद होनेपर धातुके उत्तर तुमुन् प्रत्यय हो, यथा-कालः समयः वेला अनेहा वा भोक्तुम्। इस स्थलमें प्रैषादि शब्दोंकी अनुवृत्ति होती है। इसी कारण "भूतानि कालः पचतीति वार्ता" इस स्थलमें तुमुन् नहीं हुआ॥

३१८० भाववचनाश्च। ३। ३। ११॥

भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः। यागाय याति॥

३१८०-"भावे" इस सूत्रका अधिकार करके वक्ष्यमाण घञादि प्रत्यय क्रियानिमित्तक क्रियावाचक पद उपपद होनेपर भविष्यत् कालमें धातुके उत्तर हों, यथा-यागाय याति॥

३१८१ अण् कर्मणि च। ३। ३। १२॥

कर्मण्युपपदे क्रियार्थायां क्रियायां चाण् स्यात्। ण्वुलोऽपवादः। काण्डलावो व्रजति। परत्वादयं कादीन् बाधते। कम्बलदायो व्रजति॥

३१८१-कर्म्म उपपद होनेपर क्रियानिमित्तक क्रियावाचक पद उपपद होनेपर धातुके उत्तर भविष्यत् कालमें अण् प्रत्यय हो, यह अण् प्रत्यय ण्वुल् प्रत्ययका अपवाद है यथा-कांडलावो व्रजति। परत्वके कारण यह प्रत्यय ककारादि प्रत्ययोंको बाधता है। कम्बलदायो व्रजति॥

३१८२ पदरुजविशस्पृशो घञ्। ३। ३। १६॥

भविष्यतीति निवृत्तम्। पद्यतेऽसौ पादः। रुजतीति रोगः। विशतीति वेशः। स्पृशतीति स्पर्शः

३१८२-यहांसे भविष्यत् अर्थकी निवृत्ति हुई। पद, रुज, विश और स्पृश धातुके उत्तर घञ् प्रत्यय हो,यथा-पद्यते असौ इति पादः। रुजति इति रोगः। विशतीति वेशः। स्पृशति इति स्पर्शः॥

३१८३ सृ स्थिरे। ३। ३। १७॥

सृ इति लुप्तविभक्तिकम्। सर्तेः स्थिरे कर्त्तरि घञ् स्यात्। सरति कालान्तरमिति सारः॥ अतीव्याधिमत्स्यबलेषु चेति वाच्यम्॥ * ॥ अतीसारो व्याधिः। अन्तर्भावितण्यर्थोऽत्र सरतिः रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसारो मत्स्यः। सारो बले दृढांशे च॥

३१८३-सृ यह लुप्तविभक्तिक है। स्थिर कर्त्ता अर्थमें सृ धातुके उत्तर घञ् प्रत्यय हो, यथा-सरति कालान्तरम् इति सारः। सृ धातुसे व्याधि, मत्स्य, और बल अर्थमें घञ् हो ऐसा कहना चाहिये *॥ अतीसारो व्याधिः। इस स्थलमें सृ धातु अन्तर्भावित णिजर्थ है। अर्थात् जो व्याधि रुधिरादिको अतिशय करके निर्गत करै उसको अतीसार कहतेहैं। विसारो मत्स्यः। सार शब्दसे बल और दृढांश समझना॥

३१८४ भावे। ३। ३। १८॥

सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्। पाकः। पाकौ॥

३१८४-सिद्धावस्थापन्न धात्वर्थ होनेपर धातुसे घञ् प्रत्यय हो, यथा, पाकः। पाकौ। (सिद्धभोजन)॥

३१८५ स्फुरतिस्फुलत्योर्घञि। ६। १। ४७॥

अनयोरेच आत्वं स्याद् घञि। स्फारः। स्फालः। उपसर्गस्य घञीति दीर्घः। परीहारः। इकः काशे। ६। ३। १२३॥ काशे उत्तरपदे इगन्तस्यैव प्रादेर्दीर्घः। नीकाशः। अनूकाशः। इकः किम्। प्रकाशः। नोदात्तोपदेशेति न वृद्धिः। शमः। आचमादेस्तु। आचामः। कामः। वामः। विश्राम इति त्वपाणिनीयम्॥

३१८५-घञ् प्रत्यय परे रहते स्फुर और स्फुल धातुके एच्के स्थानमें आकार हो, यथा-स्फारः। स्फालः। "उपसर्गस्य घञि० (१०४४)" इस सूत्रसे दीर्घ होकर परीहारः। काश शब्द उपपद होनेपर इगन्तही आदि उपसर्गको दीर्घ हो। नीकाशः। अनूकाशः। इगन्त उपसर्ग उपपद न होनेपर दीर्घ नहीं होगा, प्रकाशः। "नोदात्तोपदेश०(२७६३)" इस सूत्रसे वृद्धि नहीं होगी, यथा-शमः। आङ्पूर्वक चमादि धातुओंके तो, आचामः। कामः। वामः। विश्रामः। यह पद पाणिनि महर्षिको अभिप्रेत नहीं है॥

३१८६ स्यदो जवे। ६। ४। २८॥

स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते। स्यदो वेगः। अन्यत्र स्यन्दः॥

३१८६-घञ् प्रत्यय परे रहते स्यन्दि धातुके नकारका लोप हो, और वृद्धिका अभाव निपातनसे सिद्ध हो, स्यदो वेगः। अन्य अर्थमें अर्थात् प्रस्रवण अर्थमें नकारका लोप नहीं होगा, यथा-स्यन्दः (टपकना)॥

३१८७ अवोदैधौद्मप्रश्रथहिमश्रथाः। ६। ४। २९॥

अवोदः अवक्लेदनम्। एध इन्धनम्। ओद्म उन्दनम्। श्रन्थेर्नलोपो वृद्ध्यभावश्च॥

३१८७-अवोद,एध,ओद्म,प्रश्रथ,हिम,श्रथ यह संपूर्ण पद निपातनसे सिद्ध हों, यथा-अवोदः अवक्लेदनम्। एध इन्धनम्। ओद्म उन्दनम्। श्रन्थ धातुके नकारका लोप हो, और अकारको वृद्धि न हो, प्रश्रथः। इत्यादि॥

३१८८ अकर्तरि च कारके संज्ञायाम्। ३। ३। १९॥

कर्तृभिन्ने कारके घञ् स्यात्॥

३१८८-कर्तृभिन्न कारकमें संज्ञा होनेपर धातुके उत्तर घञ् प्रत्यय हो॥

३१८९ घञि च भावकरणयोः। ६। ४। २७॥

रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम्। रज्यत्यस्मिन् रङ्गः। प्रास्यते इति प्रासः। संज्ञायामिति प्रायिकम्। को भवता लाभो लब्ध इत उत्तरं भावे अकर्तरि कारक इति कृत्यल्युटो बहुलमिति यावद् द्वयमप्यनुवर्तते॥

३१८९--भाव और करणमें घञ् प्रत्यय परे रहते रञ्ज धातुके नकारका लोप हो, रागः। भाव, और करण अर्थ न होनेपर रज्यति अस्मिन् इस विग्रहमें रङ्गः। इस स्थलमें नकारका लोप नहीं हुआ। प्रास्यते इति प्रासः। "संज्ञायाम्" अर्थात् संज्ञा होनेपर घञ् होगा ऐसा जो कहा है वह प्रायिक अभिप्रायमें है अर्थात् सर्वत्र नहीं। यथा, को भवता लाभः लब्धः। इस स्थलमें संज्ञा नहीं है तथापि घञ् प्रत्यय हुआहै। इससे परवर्त्ती सूत्रमें "भावे" और "अकर्तरि कारके" इन दोनों पदोंकी "कृत्यल्युटो बहुलम् २८४१" इस सूत्रतक अनुवृत्ति होगी॥

३१९० परिमाणाख्यायां सर्वेभ्यः। ३। ३। २७॥

घञ्। अजपोर्बाधनार्थमिदम्। एकस्तण्डुलनिचायः। द्वौ शूर्पनिष्पावौ। द्वौ कारौ॥

दारजारौ कर्तरि णिलुक्च ॥ * ॥ दारयन्तीति दाराः । जारयन्तीति जाराः ॥

३१९०-परिमाण अर्थ होनेपर भावमें और कर्तृभिन्न कारकमें सम्पूर्ण धातुओंके उत्तर घञ् प्रत्यय हो, अच् और अप् प्रत्ययके बाधनार्थ यह सूत्र विहित हुआहै । एकस्तण्डुलनिचायः । द्वौ शूर्पनिष्पावौ । द्वौ कारौ ॥

"दारजारौ कर्त्तरि णिलुक् च" ण्यन्त दॄ धातुसे और जॄ धातुसे कर्तामें घञ् प्रत्यय हो और णिलोपको बाध कर णि लुक् हो ऐसा कहना चाहिये* दारयन्ति इस विग्रहमें कर्त्तामें घञ् और णिका लुक् होकर दाराः पद सिद्ध हुआहै । तथा जारयन्ति इस विग्रहमें कर्त्तामें घञ् और णिका लुक् होकर जाराः पद सिद्ध हुआहै । दाराः-स्त्री । जाराः (यार)॥

३१९१ इङश्च । ३ । ३ । २१ ॥

घञ् । अचोपवादः । उपेत्य अस्मादधीयते उपाध्यायः ॥ अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष् ॥ * ॥ उपाध्याया । उपाध्यायी ॥ शॄ वायुवर्णनिवृत्तेषु ॥ * ॥ शॄ इत्यविभक्तिको निर्देशः । शारो वायुः । करणे घञ् । शारो वर्णः । चित्रीकरणमिह धात्वर्थः । निव्रियते आव्रियतेऽनेनेति निवृतमावरणम् । बाहुलकात्करणे क्तः । गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः । अकृतमावरण इत्यर्थः ॥

३१९१-कर्तृभिन्न कारकमें इङ् धातुके उत्तर घञ् प्रत्यय हो यह सूत्र अच् प्रत्ययका बाधक है, यथा, "उपेत्य अस्मात् अधीयते"इस विग्रहमें, उपाध्यायः ॥

अपादान कारकमें स्त्रीलिङ्गमें घञ् प्रत्यय हो और इस घञ् प्रत्ययान्त पदके उत्तर विकल्प करके ङीष् हो, यथा-उपाध्याया, उपाध्यायी ॥

वायु वर्ण और निवृत्त अर्थ होनेपर शॄ धातुके उत्तर घञ् प्रत्यय हो * शॄ इसमें विभक्तियुक्त न करके निर्देश कियाहै । शारो वायुः । शॄ धातुके उत्तर करणमें घञ् प्रत्यय हुआहै । शारो वर्णः । इस स्थलमें शॄ धातुका अर्थ चित्रीकरण है । "निव्रियते आव्रियते अनेन" इस विग्रहमें निवृत्त अर्थात् आदरणार्थमें वृ धातुके उत्तर बाहुलकबलसे करणमें क्त प्रत्यय हुआहै। निवृत्तम्-"गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः" अकृत-प्रावरण इत्यर्थः ॥

३१९२ उपसर्गे रुवः । ३ । ३ । २२ ॥

घञ् । संरावः । उपसर्गे किम् । रवः ॥

३१९२-भावमें और कर्तृभिन्न कारकमें उपसर्गपूर्वक रु धातुके उत्तर घञ् प्रत्यय हो, यथा, संरावः । उपसर्गपूर्वक न होनेपर घञ् नहीं होगा । यथा, रवः ॥

३१९३ अभिनिसः स्तनः शब्दसंज्ञायाम् । ८ । ३ । ८६ ॥

अस्मात् स्तनेः सस्य मूर्धन्यः । अभिनिष्टानो वर्णः । शब्दसंज्ञायां किम् । अभिनिः स्तनति मृदङ्गः ॥

३१९३-शब्दसंज्ञा होनेपर अभिपूर्वक और निस्पूर्वक स्तन धातुके सकारको मूर्धन्य हो, यथा-अभिनिष्टानो वर्णः । शब्दसंज्ञा न होनेपर अभिनिः स्तनति मृदङ्गः ॥

३१९४ समि युद्रुदुवः । ३ । ३ । २३ ॥

संयूयते मिश्रीक्रियते गुडादिभिरिति संयावः पिष्टविकारोऽपूपविशेषः । सन्द्रावः । सन्दावः ॥

३१९४-सम्पूर्वक यु, द्रु और दु धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-संयूयते मिश्रीक्रियते डादिभिः इति संयावः । अर्थात् पिष्टविकारोऽपूपविशेषः, सन्द्रावः । सन्दावः ॥

३१९५ श्रिणीभुवोऽनुपसर्गे ।३।३।२४॥

श्रायः । नायः । भावः । अनुपसर्गे किम् । प्रश्रयः।प्रणयः । प्रभवः। कथं प्रभावो राज्ञ इति। प्रकृष्टो भाव इति प्रादिसमासः । कथं राज्ञो नय इति । बाहुलकात् ॥

३१९५-उपसर्ग पूर्वमें न रहते श्रि, नी और भू धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा, श्रायः । नायः । भावः । उपसर्ग पूर्वमें रहते घञ् नहीं होगा, यथा-प्रश्रयः । प्रणयः । प्रभवः । "प्रभावो राज्ञः" इस स्थलमें प्रभाव पद किस प्रकारसे सिद्ध हुआ ? प्रकृष्टः भावः । इस प्रादि समासमें प्रभावः पद निष्पन्न हुआहै । प्रथम भू धातुके उत्तर घञ् प्रत्यय होनेपर भावः पश्चात् समासद्वारा सिद्ध हुआहै । "राज्ञो नयः" इस स्थलमें नयः पद किस प्रकारसे सिद्ध हुआ ? यह बाहुलकबलसे हुआहै ऐसा जानना चाहिये ॥

३१९६ वौ क्षुश्रुवः । ३ । ३ । २५ ॥

विक्षावः । विश्रावः । वौ किम् । क्षवः।श्रवः॥

३१९६-विपूर्वक क्षु और श्रु धातुके उत्तर भावमें और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-विक्षावः । विश्रावः । जिस स्थानमें विपूर्वक नहीं होगा उस स्थानमें घञ् नहीं होगा, यथा-क्षवः । श्रवः । श्रु+अच्=श्रवः-(कान) ॥

३१९७ अवोदोर्नियः । ३ । ३ । २६ ॥

अवनायः अधोनयनम् । उन्नायः ऊर्ध्वनयनम् । कथमुन्नयः उत्प्रेक्षेति । बाहुलकात् ॥

३१९७-अवपूर्वक और उत्पूर्वक नी धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा-अवनायः-अधोनयनम् । उन्नायः-ऊर्ध्वनयनम् । "उन्नयः उत्प्रेक्षा" इस स्थलमें उन्नयः पद किस प्रकारसे सिद्ध हुआ ? बाहुलकबलसे सिद्ध हुआहै ॥

३१९८ प्रे द्रुस्तुस्रुवः । ३ । ३ । २७ ॥

प्रद्रावः । प्रस्तावः । प्रस्रावः । प्रे इति किम् । द्रवः । स्तवः । स्रवः ॥

३१९८–प्रपूर्वक, द्रु, स्तु और श्रु धातुके उत्तर भाव और कर्तृभिन्न कारकमें घञ् प्रत्यय है, प्रद्रावः । प्रस्तावः।प्रस्रावः। प्रपूर्वक न होनेपर द्रवः, स्तवः, स्रवः ॥

३१९९ निरभ्योः पूल्वोः । ३ ।३।२८॥

निष्पूयते शूर्पादिभिरिति निष्पावो धान्यविशेषः । अभिलावः।निरभ्योः किम्।पवः।लवः॥

३१९९–निर्पूर्वक पू धातु और अभिपूर्वक लू धातुके उत्तर भाव, और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा–निष्पूयते शूर्पादिभिः इस विग्रहमें निष्पावः अर्थात् धान्यविशेष। अभिलावः । निर् और अभिपूर्वक न होनेपर पवः । लवः । इस स्थलमें घञ् नहीं हुआ ॥

३२०० उन्न्योर्ग्रः । ३ । ३ । २९ ॥

उद्गारः । निगारः । उन्न्योः किम् । गरः ॥

३२००–भावमें और कर्तृभिन्न कारकमें उत् और निपूर्वक गॄ धातुके उत्तर घञ् प्रत्यय हो, यथा–उद्गारः । निगारः । उत् और निपूर्वक न होनेपर,गरः । इस स्थलमें घञ् नहीं हुआ । अच् हुआ ॥

३२०१ कॄ धान्ये। ३ । ३ । ३० ॥

कॄ इत्यस्माद्धान्यविषयकादुन्न्योर्घञ् स्यात् । उत्कारो निकारो धान्यस्य विक्षेप इत्यर्थः । धान्ये किम् । भिक्षोत्करः । पुष्पनिकरः ॥

३२०१–धान्य अर्थ होनेपर भावमें और कर्तृभिन्न कारकमें उत् और निपूर्वक कॄ धातुके उत्तर घञ् प्रत्यय हो, यथा–उत्कारः । निकारः । अर्थात् धान्यका विक्षेप । धान्य न होनेपर, भिक्षोत्करः । पुष्पनिकरः । इस प्रकार होगा ॥

३२०२ यज्ञे समि स्तुवः । ३ । ३।३१॥

समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः संस्तावः । यज्ञे किम् । संस्तवः परिचयः॥

३२०२–यज्ञ अर्थ होनेपर भावमें और कर्तृभिन्न कारकमें सम्पूर्वक स्तु धातुके उत्तर घञ् प्रत्यय हो, यथा, "समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः स देशः संस्तावः ।" (संस्तावः–जिस देशमें सामवेदी मिलकर स्तुति करते हैं) । यज्ञ न होनेपर संस्तवः अर्थात् परिचयः ॥

३२०३ प्रे स्त्रोऽयज्ञे। ३ । ३। ३२ ॥

अयज्ञे इति छेदः। यज्ञे इति प्रकृतत्वात् । प्रस्तारः।अयज्ञे किम्।बर्हिषः प्रस्तरो मुष्टिविशेषः॥

३२०३–यज्ञभि अर्थ होनेपर प्रपूर्वक स्तॄ धातुके उत्तर भावमें और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, पूर्वसूत्रमें यज्ञ अर्थ देखा जाताहै, अत एव इस स्थलमें अयज्ञ यह पदच्छेद क्रिया, यथा, प्रस्तारः । जिस स्थानमें यज्ञार्थ होगा उस स्थलमें बर्हिषः प्रस्तरः मुष्टिविशेषः ऐसा होगा ॥

३२०४ प्रथने वावशब्दे । ३ । ३ ।३३॥

विपूर्वात् स्तृणातेर्घञ् स्यादशब्दविषये प्रथने। पटस्य विस्तारः । प्रथने किम् । तृणविस्तरः । अशब्दे किम् । ग्रन्थविस्तरः ॥

३२०४–शब्दभिन्न विषयीभूत आख्यान होनेपर भावमें और कर्तृभिन्न कारकमें विपूर्वक स्तॄ धातुके उत्तर घञ् प्रत्यय हो, यथा–पटस्य विस्तारः । प्रथन अर्थात् आख्यान अर्थ न होनेपर तृणविस्तरः । शब्द अर्थ होनेपर, ग्रन्थविस्तरः ॥

३२०५ छन्दोनाम्नि च । ३ । ३।३४॥

स्त्र इत्यनुवर्तते । विष्टारपङ्क्तिश्छन्दः । विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ् ततः कर्मधारयः ॥

३२०५–'स्त्रः' इस पदकी यहाँ अनुवृत्ति होतीहै छन्दका नाम होनेपर विपूर्वक स्तॄ धातुके उत्तर भावमें और कर्तृभिन्न कारकमें घञ् प्रत्यय हो, यथा, विष्टारपंक्तिः अर्थात् इस नाम का छन्द । इस स्थलमें "विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्" इस विग्रहमें अधिकरणमें घञ् प्रत्यय हुआहै । पश्चात् कर्मधारय समास हुआहै ॥

३२०६ छन्दोनाम्नि च। ८। ३ ।९४॥

विपूर्वात् स्तृणातेर्घञन्तस्य सस्य षत्वं स्याच्छन्दोनाम्नि । इति षत्वम् ॥

३२०६–छन्दका नाम होनेपर घञ् प्रत्ययान्त विपूर्वक स्तॄ धातुके सकारको षत्व हो । इस सूत्रसे षत्व हुआ ॥

३२०७ उदि ग्रहः । ३ । ३ । ३५ ॥

उद्ग्राहः॥

३२०७-उत्पूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो,यथा-उद्ग्राहः॥

३२०८ समि मुष्टौ । ३ । ३ । ३६ ॥

मल्लस्य संग्राहः।मुष्टौ किम्। द्रव्यस्य संग्रहः॥

३२०८–मुष्टिविषयक धात्वर्थ गम्यमान होनेपर सम्पूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो, यथा–मल्लस्य संग्राहः दृढ ग्रहण मुष्टिसे होताहै । इस कारण मुष्टिविषयक धात्वर्थ गम्यमान है । मुष्टिविषयक धात्वर्थ न होनेपर यथा–द्रव्यस्य संग्रहः ॥

३२०९ परिन्योर्नीणोर्द्यूताभ्रेषयोः । ३ । ३ । ३७ ॥

परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ् स्यात् क्रमेण द्यूतेऽभ्रेषे च विषये । परिणायेन शारान् हन्ति । समन्तान्नयनेनेत्यर्थः । एषोऽत्र न्यायः । उचितमित्यर्थः । द्यूताभ्रेषयोः किम् । परिणयो विवाहः । न्ययो नाशः ॥

३२०९–परिपूर्वक नी धातुके उत्तर द्यूत विषयक नयन अर्थ होनेपर निपूर्वक इण् धातुके उत्तर अभ्रेष विषयक गमन अर्थ होनेपर घञ् प्रत्यय हो, यथा–परिणायेन शारान् हन्ति समन्तान्नयनेनेत्यर्थः । एषोऽत्र न्यायः अर्थात् यही इस स्थलमें उचित है । द्यूतविषयक नयन और अभ्रेष विषयक गमन अर्थ न होनेपर परिणयो विवाहः । न्ययो नाशः ॥

३२१० परावनुपात्यय इणः।३।३।३८॥

क्रमप्राप्तस्य अनतिपातोऽनुपात्ययः । तव पर्यायः । अनुपात्यये किम् । कालस्य पर्ययः । अतिपात इत्यर्थः ॥

३२१०-क्रम प्राप्तिका अनतिपात अर्थात् अविच्छेद अर्थ होनेपर परिपूर्वक इण् धातुके उत्तर घञ् प्रत्यय हो, तव पर्य्यायः । जिस स्थानमें क्रमप्राप्तिका अनतिपात नहीं होगा उस स्थानमें कालस्य पर्य्ययः अतिपातः इत्यर्थः ॥

३२११ व्युपयोः शेतेः पर्याये।३।३।३९॥

तव विशायः । तव राजोपशायः । पर्याये किम् । विशयः । संशयः । उपशयः समीपशयनम् ॥

३२११-पर्याय गम्यमान होनेपर विपूर्वक और उपपूर्वक शीङ् धातुके उत्तर घञ् प्रत्यय हो, यथा-तव विशायः । तव राजोपशायः । पर्य्यायसे भिन्नार्थमें, विशयः। संशयः। उपशयः समपिशयनम् ॥

३२१२ हस्तादाने चेरस्तेये ।३।३।४०॥

हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । हस्तादाने किम् । वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति । अस्तेये किम् । पुष्पप्रचयश्चौर्येण ॥

३२१२-स्तेयसे भिन्न हस्तादान गम्यमान होनेपर चिञ् धातुके उत्तर घञ् प्रत्यय हो, हस्तादान शब्दसे आदेय वस्तुकी प्रत्यासत्ति जानना चाहिये, यथा-पुष्पप्रचायः । घञ् होनेसे वृद्धि होगी । हस्तसे प्रचय करताहै, हस्तादाने किम् , वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति । स्तेय होनेपर पुष्पप्रचयश्चौर्येण॥

३२१३ निवासचितिशरीरोपसमाधानेष्वादेश्च कः । ३ । ३ । ४१ ॥

एषु चिनोतेर्घञ् आदेश्च ककारः । उपसमाधानं राशीकरणं तच्च धात्वर्थः । अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः । निवासे । काशीनिकायः । चितौ । आकायमग्निं चिन्वीत । शरीरे । चीयतेऽस्मिन्नस्थ्यादिकमिति कायः । समूहे । गोमयनिकायः । एषु किम् । चयः । चः कः इति वक्तव्ये आदेरित्युक्तेर्यङ्लुक्यादेरेव यथा स्यादिति । गोमयानां निकेचायः । पुनःपुना राशीकरणमित्यर्थः ॥

३२१३-निवास, चिति, शरीर, उपसमाधान इन सम्पूर्ण अर्थोंमें चि धातुके उत्तर घञ् प्रत्यय हो और आदि वर्णके स्थानमें क आदेश हो, उपसमाधान शब्दसे राशीकरण समझना । यही धातुका अर्थ है । अन्य अर्थ प्रत्ययार्थ कारकके उपाधिभूत हैं । निवासार्थमें यथा-काशीनिकायः। चिति अर्थमें उदाहरण. । यथा, आकायमग्निं चिन्वीत । शरीरार्थमें यथा-चीयतेऽस्मिन्नस्थ्यादिकमिति कायः। इस विग्रहमें कायः। ऐसा पद हुआ। (जिसमें अस्थि आदिका चयन हो वह कायः) समूहार्थमें यथा, गोमयनिकायः । जिस स्थानमें यह समस्त अर्थ नहीं होंगे उस स्थानमें चयः ऐसा होगा। चके स्थानमें क हो ऐसा कहना ही ठीक है। फिर जो आदिके स्थानमें कहा है वह यङ्लुक् होनेपर आदिके स्थानमें ककार आदेश होगा इस निमित्त है । गोमयानां निकेचायः अर्थात् बार २ राशीकरण समझना ॥

३२१४ सङ्घे चानौत्तराधर्ये।३।३।४२॥

चेर्घञ् आदेश्च कः । भिक्षुनिकायः । प्राणिनां समूहः संघः । अनौत्तराधर्ये किम् । सूकरनिचयः । संघे किम् । ज्ञानकर्मसमुच्चयः ॥

३२१४-उत्तराधर भावसे भिन्न समूह अर्थमें चि धातुके उत्तर घञ् प्रत्यय हो, और आदि वर्णके स्थानमें ककार आदेश हो, यथा-भिक्षुनिकायः । प्राणिसमूहको संघ कहतेहैं । जिस स्थानमें उत्तराधर भाव अर्थ है उस स्थानमें सूकरनिचयः। स्तन्यपानार्थ सूकर उत्तराधरभावसे शयन करता है, जिस स्थानमें समूह न होगा उस स्थानमें ज्ञानकर्मसमुच्चयः । (अर्थात् ज्ञान और कर्मका एकीभाव) ॥

३२१५ कर्मव्यतिहारे णच् स्त्रियाम् । ३ । ३ । ४३ ॥

स्त्रीलिङ्गे भावे णच् ॥

३२१५-कर्म्मका व्यतिहार अर्थ होनेपर स्त्रीलिङ्गभावमें णच् प्रत्यय हो ॥

३२१६ णचः स्त्रियामञ् । ५।४।१४॥

३२१६-स्त्रीलिङ्गमें विहित णच् प्रत्ययान्त शब्दके उत्तर अञ् प्रत्यय हो ॥

३२१७ न कर्मव्यतिहारे। ७। ३। ६ ॥

अत्र ऐच् न स्यात् । व्यावक्रोशी । व्यावहासी ॥

३२१७-कर्म्मव्यतिहार अर्थ होनेपर ऐच् आगम नहीं होगा, व्यावक्रोशी । व्यावहासी ॥

३२१८ अभिविधौ भाव इनुण् । ३ । ३ । ४४ ॥ ॥ आदिवृद्धिः ॥

३२१८-कार्त्स्न्य करके सम्बन्ध गम्यमान होनेपर भावमें इनुण् प्रत्यय हो ॥

३२१९ अणिनुणः । ५ । ४ । १५ ॥

इनण्यनपत्ये । सांराविणं वर्तते ॥

३२१९-इनुण् प्रत्ययान्त शब्दके उत्तर स्वार्थमें अण् प्रत्यय हो, आदि पदको वृद्धि हो । "इनण्यनपत्ये (१२४५)" इस सूत्रसे प्रकृतिभाव होगा । सांराविणम् वर्तते ॥

३२२० आक्रोशेऽवन्योर्ग्रहः ।३।३।४५॥

अव नि एतयोर्ग्रहेर्घञ् स्यात् शापे । अवग्राहस्ते भूयात् । अभिभव इत्यर्थः । निग्राहस्ते भूयात् । बाध इत्यर्थः । आक्रोशे किम् । अवग्रहः पदस्य । निग्रहश्चोरस्य ॥

३२२०–शाप अर्थ होनेपर अवपूर्वक और निपूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो, अवग्राहस्ते भूयात् । अवग्राह शब्दसे अभिभव समझना । निग्राहस्ते भूयात् । निग्राह शब्दसे बाध समझना । जिस स्थानमें आक्रोश अर्थ नहीं होगा, उस स्थलमें अवग्रहः पदस्य । निग्रहः चोरस्य । इत्यादि ॥

३२२१ प्रे लिप्सायाम् । ३ । ३ । ४६ ॥

पात्रप्रग्राहेण चरति भिक्षुः ॥

३२२१–लिप्सा अर्थात् लाभेच्छा होनेपर प्रपूर्वक ग्रह धातुके उत्तर घञ् प्रत्यय हो, यथा, पात्रप्रग्राहेण चरति भिक्षुः । लिप्साते भिन्न अर्थमें, प्रग्रहो देवदत्तस्य । प्र+ग्रह+घञ्=प्रग्राहः ॥

३२२२ परौ यज्ञे । ३ । ३ । ४७ ॥

उत्तरः परिग्राहः । स्फ्येन वेदेः स्वीकरणम् ॥

३२२२–प्रयुज्यमान होनेपर परि पद रहते ग्रह धातुसे घञ् प्रत्यय हो, उत्तरः परिग्राहः । स्फ्येन वेदेः स्वीकरणम् ॥

३२२३ नौ वृ धान्ये ।३। ३। ४८ ॥

वृ इति लुप्तपञ्चमीकम् । नीवाराः । धान्ये किम् । निवरा कन्या । क्तिन्विषयेपि बाहुलकादप् । प्रवरा सेतिवत् ॥

३२२३–वृ यह लुप्त पञ्चमीका पद है, धान्य अर्थ होनेपर निपूर्वक वृ धातुके उत्तर घञ् प्रत्यय हो, यथा, नीवारः (मुनिअन्न)"उपसर्गस्य घञ्० ६।३।१२२ "इससे उपसर्गको दीर्घ हुआ जिस स्थानमें धान्य अर्थ नहीं होगा उस स्थानमें निवरा कन्या । क्तिन्विषयमें भी बाहुलकबलसे अप् प्रत्यय होगा यथा, प्रवरा सा । इस प्रकार होगा ॥

३२२४ उदि श्रयतियौतिपूद्रुवः ३।३।४९॥

उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । कथं पतनान्ताः समुच्छ्रया इति । बाहुलकात् ॥

३२२४–उद् उपपद रहते श्रि, यु, पू, द्रु इन सम्पूर्ण धातुओंके उत्तर घञ् प्रत्यय हो, यथा–उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः। ऐसा होनेपर"पतनान्ताः समुच्छ्रायाः"ऐसा प्रयोग किस प्रकारसे सिद्ध हुआ ? वह बाहुलकबलसे सिद्ध हुआहै ऐसा जानना चाहिये ॥

३२२५ विभाषाङि रुप्लुवोः।३।३।५०॥

आरावः । आरवः । आप्लावः । आप्लवः ॥

३२२५–आङ् उपपद रहते रु और प्लु धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा–आरावः, आरवः । आप्लावः, आप्लवः ॥

३२२६ अवे ग्रहो वर्षप्रतिबन्धे । ३ । ३ । ५१ ॥

विभाषेति वर्तते । अवग्रहः । अवग्राहः । वर्षप्रतिबन्धे किम् । अवग्रहः पदस्य ॥

३२२६–विभाषा पदकी अनुवृत्ति आती है । वर्षप्रतिबन्ध अर्थ होनेपर अव उपपद रहते ग्रह धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, अवग्राहः, अवग्रहः । वर्षप्रतिबन्ध अर्थ न होनेपर, अवग्रहः पदस्य । इस प्रकार होगा ॥

३२२७ प्रे वणिजाम् । ३। ३। ५२ ॥

प्रे ग्रहेर्घञ् वा वणिजां संबंधी चेत्प्रत्ययार्थः। तुलासूत्रमिति यावत् । तुलाप्रग्राहेण चरति । तुलाप्रग्रहेण ॥

३२२७–यदि प्रत्ययार्थ वणिक् सम्बन्धी अर्थात् तुलासूत्र हो तो प्रपूर्वक ग्रह धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा, तुलाप्रग्राहेण चरति तुला प्रग्रहेण वा ॥

३२२८ रश्मौ च । ३ । ३ । ५३ ॥

प्रग्रहः । प्रग्राहः ॥

३२२८–रश्मि अर्थ होनेपर प्रपूर्वक ग्रह धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा, प्रग्राहः–प्रग्रहः ॥

३२२९ वृणोतेराच्छादने । ३।३।५४॥

विभाषा प्र इत्येव । प्रवारः । प्रवरः ॥

३२२९–आच्छादनार्थ होनेपर प्रपूर्वक वृ धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा, प्रवारः–प्रवरः ॥

३२३० परौ भुवोऽवज्ञाने । ३ ।३।५५॥

परिभावः । परिभवः । अवज्ञाने किम् । सर्वतो भवनं परिभवः ॥

३२३०–अवज्ञा अर्थ होनेपर परिपूर्वक भू धातुके उत्तर विकल्प करके घञ् प्रत्यय हो, यथा–परिभावः, परिभवः । जिस स्थानमें अवज्ञा अर्थ नहीं होगा, उस स्थानमें–सर्वतो भवनं परिभवः । इसप्रकार होगा ॥

३२३१ एरच् । ३ । ३ । ५६ ॥

चयः । जयः ॥ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम् ॥ * भयम् । वर्षम् ॥

३२३१–इकारान्त धातुके उत्तर अच् प्रत्यय हो, यथा–चयः । जयः ॥

भी आदि धातुओंके उत्तर भी अच् प्रत्यय हो * पूर्वोक्त वार्तिकका प्रयोजन कहते हैं ॥

नपुंसक लिङ्गमें क्तादि प्रत्यय न हों इसलियेभी आदि धातुसे अच् प्रत्ययका विधान किया है * भयम् । वर्षम् ॥

३२३२ ऋदोरप् । ३ । ३ । ५७ ॥

ऋवर्णान्तादुवर्णान्तादप् । करः । गरः । शरः । यवः । लवः । स्तवः । पवः ॥

३२३२ ऋवर्णान्त और उवर्णान्त धातुके उत्तर अप् प्रत्यय हो, यथा—करः । गरः । शरः । यवः । लवः । स्तवः । पवः ॥

३२३३ वृक्षासनयोर्विष्टरः ।८।३।९३॥

अनयोर्विपूर्वस्य स्तृः षत्वं निपात्यते । विष्टरो वृक्ष आसनं च । वृक्षेत्यादि किम् । वाक्यस्य विस्तरः ॥

३२३३—वृक्ष और आसन अर्थ होनेपर विपूर्वक स्तृ धातुके सकारको निपातनसे षत्व हो, यथा—विष्टरः अर्थात् वृक्ष और आसन। वृक्षादि अर्थ न होनेपर,वाक्यस्य विस्तरः ॥

३२३४ ग्रहवृदृनिश्चिगमश्च । ३।३।५८॥

अप् स्यात् । घञोऽपवादः । ग्रहः । वरः । दरः । निश्चयः । गमः ॥ वशिरण्योरुपसंख्यानम् ॥ * ॥ वशः । रणः ॥ घञर्थे कविधानम् ॥ * ॥ प्रस्थः । विघ्नः ॥ द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम् ॥ * ॥ चक्रम् । चिक्लिदम् । चक्नसः ॥

३२३४—ग्रह धातु, वृ धातु, दृ धातु, निर्पूर्वक चि धातु और गम धातुके उत्तर अप् प्रत्यय हो, यह सूत्र घञ् और अच् प्रत्ययका अपवाद है, यथा—ग्रहः । वरः । दरः । निश्चयः । गमः ।

वश और रण धातुके उत्तर भी अप् प्रत्यय हो । ऐसा कहना चाहिये * यथा—वशः । रणः ।

घञ् प्रत्ययके अर्थमें कप् प्रत्यय भी हो * । यथा—प्रस्थः । विघ्नः ।

द्वित्वप्रकरणमें "एकाचो द्वे प्रथमस्य" इस द्वित्वप्रकरणमें क प्रत्यय परे रहते कृञ् आदि धातुओंके एकाच् प्रथम अवयवको द्वित्व हो* । यथा—चक्रम्। चिक्लिदम् । चक्नसः ॥

३२३५ उपसर्गेऽदः ।३।३।५९॥

अप् स्यात् ॥

३२३५—उपसर्ग उपपद रहते अद धातुके उत्तर अप् प्रत्यय हो ॥

३२३६ घञपोश्च । २।४।३८॥

अदेर्घस्लृ स्यात् घञि अपि च । प्रघसः । विघसः । उपसर्गे किम् । घासः ॥

३२३६—घञ् और अप् प्रत्यय परे रहते अद धातुके स्थानमें घस्लृ आदेश हो, यथा—प्रघसः । विघसः । उपसर्ग उपपद न होनेपर, घासः ॥

३२३७ नौ ण च । ३ । ३ । ६० ॥

नौ उपपदे अदेर्णः स्यादप् च । न्यादः । निघसः ॥

३२३७—नि उपपद रहते अद धातुके उत्तर ण प्रत्यय है और अप् प्रत्यय भी हो, यथा—न्यादः । निघसः ॥

३२३८ व्यधजपोरनुपसर्गे । ३।३। ६१॥

अप् स्यात् । व्यधः । जपः । उपसर्गे तु आव्याधः । उपजापः ॥

३२३८—उपसर्ग पूर्वक न होनेपर व्यध धातुके और जप धातुके उत्तर अप् प्रत्यय हो, यथा—व्यधः । जपः । उपसर्ग पूर्वक होनेपर घञ् प्रत्यय होगा । यथा—आव्याधः । उपजापः ॥

३२३९ स्वनहसोर्वा । ३ । ३ । ६२॥

अप् । पक्षे घञ् । स्वनः । स्वानः । हसः । हासः । अनुपसर्ग इत्येव । प्रस्वानः । प्रहासः ॥

३२३९—उपसर्ग पूर्वमें न हो ऐसा जो स्वन और हस धातु उसके उत्तर विकल्प करके अप् प्रत्यय हो, पक्षमें घञ् प्रत्यय होगा। यथा—स्वनः, स्वानः । हसः, हासः । जिस स्थलमें उपसर्ग पूर्वमें हो, उस स्थलमें घञ् प्रत्यय होगा। यथा, प्रस्वानः । प्रहासः । स्वन्+अप्=स्वनः । स्वन्+घञ्=स्वानः ॥

३२४० यमः समुपनिविषु च।३।३।६३॥

एषु अनुपसर्गे च यमेरप् वा । संयमः । संयामः । उपयमः । उपयामः । नियमः । नियामः । वियमः । वियामः । यमः । यामः॥

३२४०—सम्, उप, नि और वि उपपद रहते यम धातुके उत्तर और अनुपसर्ग पूर्वक यम धातुके उत्तर विकल्प करके अप् प्रत्यय हो, यथा—संयमः, संयामः । उपयमः, उपयामः । नियमः, नियामः । वियमः, वियामः । यमः, यामः । पक्षमें घञ्=यामः ॥

३२४१ नौ गदनदपठस्वनः।३।३।६४॥

अप् वा स्यात् । निगदः । निगादः । निनदः। निनादः । निपठः । निपाठः । निस्वनः । निस्वानः ॥

३२४१—निपूर्वक गद, नद, पठ और स्वन धातुके उत्तर विकल्प करके अप् प्रत्यय हो, यथा—निगदः, निगादः । निनदः, निनादः । निपठः,निपाठः । निस्वनः, निस्वानः ॥

३२४२ क्वणो वीणायां च ।३। ३। ६५ ॥

नावनुपसर्गे च वीणाविषयाच्च क्वणतेरप् वा स्यात् । वीणाग्रहणं प्राद्यर्थम् । निक्वणः । निक्वाणः । क्वणः । क्वाणः । वीणायां तु प्रक्वणः । प्रक्वाणः ॥

३२४२—निपूर्वक और अनुपसर्गपूर्वक वीणाविषयक जो क्वण धातु उसके उत्तर विकल्प करके अप् प्रत्यय हो, वीणा शब्दग्रहण प्रादि उपसर्गार्थ है, यथा—निक्वणः, निक्वाणः । क्वणः,क्वाणः । वीणा विषयमें प्रक्वणः, प्रक्वाणः । इस प्रकार होगा ॥

३२४३ नित्यं पणः परिमाणे ।३।३।६६॥

अप् स्यात् । मूलकपणः । शाकपणः । व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सोऽस्य विषयः । परिमाणे किम् । पाणः ॥

३२४३-परिमाणविशेष अर्थ गम्यमान होनेपर पण धातुके उत्तर नित्य ही अप् प्रत्यय हो,यथा-मूलकपणः। शाकपणः।व्यवहारार्थ मूलकादिकी परिमित जो मुट्ठी बांधी जाती है, इस स्थलमें परिमाण शब्दसे वही समझनी चाहिये । परिमाण न होनेपर पाणः ऐसा पद होगा ॥

३२४४ मदोऽनुपसर्गे । ३ । ३ । ६७॥

धनमदः । उपसर्गे तु । उन्मादः ॥

३२४४-उपसर्गपूर्वक न होनेपर मद धातुके उत्तर अप् प्रत्यय हो, यथा-धनमदः । जिस स्थानमें उपसर्गपूर्वक होगा उस स्थलमें उन्मादः ऐसा होगा । उन्मद=घञ्= उन्मादः (बावलापन) ॥

३२४५ प्रमदसम्मदौ हर्षे । ३ ।३।६८॥

हर्षे किम् । प्रमादः । संमादः ॥

३२४५-हर्ष अर्थ होनेपर प्रमद और संमद यह दो पद निपातनसे सिद्ध हों, जिस स्थानमें हर्ष नहीं होगा उस स्थलमें प्रमादः । संमादः । इस प्रकार होगा ॥

३२४६ समुदोरजः पशुषु । ३।३।६९॥

संपूर्वोऽजिः समुदाये उत्पूर्वश्च प्रेरणे तस्मात्पशुविषयकादप् स्यात्। अघञपोरित्युक्तेर्वीभावो न । समजः पशूनां सङ्घः । उदजः पशूनां प्रेरणम् । पशुषु किम् । समाजो ब्राह्मणानाम् । उदाजः क्षत्त्रियाणाम् ॥

३२४६-सम् उद् उपसर्ग उपपद रहते पशुविषयक अज धातुके उत्तर अप् प्रत्यय हो, सूत्रमें "अघञपो"ऐसी उक्तिके कारण वीभाव नहीं होगा, यथा-समजः पशुसमूहः । उदजः पशुप्रेरणम् । पशुविषयक न होनेपर अर्थात् पशुसे भिन्न अन्यजातिविषयक होनेपर " समाजः ब्राह्मणानाम् " इस स्थानमें अप् प्रत्यय नहीं होगा । उदाजः क्षत्त्रियाणाम् । इस स्थलमें अप् नहीं हुआ ॥

३२४७ अक्षेषु ग्लहः । ३ । ३ । ७० ॥

अक्षशब्देन देवनं लक्ष्यते तत्र यत्पणरूपेण ग्राह्यं तत्र ग्लह इति निपात्यते अक्षस्य ग्लहः । व्यात्युक्षीमभिसरणग्लहामदीव्यन् । अक्षेषु किम्। पादस्य ग्रहः ॥

३२४७-अक्ष शब्दसे पाशक्रीडा समझना । इस क्रीडाविषयमें पणरूपसे जो गृहीत होताहै उस अर्थमें ग्लह ऐसा पद निपातनसे सिद्ध हो, अर्थात् ग्रह धातुके उत्तर अप् प्रत्यय होकर रकारके स्थानमें ल होगा,यथा-अक्षस्य ग्लहः।"व्यात्युक्षीमाभिसरणग्लहामदीव्यन् " । अक्षभिन्नार्थमें पादस्य ग्रहः।

इस स्थलमें " ग्रहवृद० " इस सूत्रसे अप् प्रत्यय हुआ । लकार नहीं हुआ ॥

३२४८ प्रजने सर्त्तेः । ३ । ३ । ७१ ॥

प्रजनं प्रथमगर्भग्रहणम् । गवामुपसरः । कथमवसरः प्रसर इति । अधिकरणे पुंसि संज्ञायामिति घः ॥

३२४८-प्रजन अर्थात् गर्भग्रहण अर्थ होनेपर सृ धातुके उत्तर अप् प्रत्यय हो, यथा-गवामुपसरः । अवसरः और प्रसरः यह दो पद किस प्रकारसे सिद्ध हुए हैं ? अधिकरणमें "पुंसि संज्ञायाम्०३२९६ " इस सूत्रसे घ प्रत्यय हुआहै ॥

३२४९ ह्वः संप्रसारणं च न्यभ्युपविषु । ३ । ३ । ७२ ॥

निहवः । अभिहवः । उपहवः । विहवः । एषु किम् । प्रह्वायः ॥

३२४९-नि, अभि, उप और वि उपसर्ग उपपद रहते ह्वेञ् धातुके उत्तर अप् प्रत्यय हो, और सम्प्रसारण हो, यथा-निहवः । अभिहवः । उपहवः । विहवः । यह सम्पूर्ण पूर्वमें न रहते अर्थात् इनसे भिन्न अन्य उपसर्ग पूर्वमें रहते घञ् होगा, यथा-प्रह्वायः ॥

३२५० आङि युद्धे । ३ । ३ । ७३ ॥

आहूयन्तेऽस्मिन्नित्याहवः । युद्धे किम् । आह्वायः ॥

३२५०—युद्ध अर्थ होनेपर आङ्पूर्वक ह्वेञ् धातुके उत्तर भी अप् प्रत्यय हो, और सम्प्रसारण हो, यथा-आहूयन्ते अस्मिन् इस विग्रहमें आहवः (युद्ध) । युद्ध अर्थ न होनेपर आह्वायः इस प्रकार होगा ॥

३२५१ निपानमाहावः । ३ । ३ ।७४॥

आङ्पूर्वस्य ह्वयतेः संप्रसारणमप् वृद्धिश्चोदकाधारश्चेद्वाच्यः । आहावस्तु निपानं स्यादुपकूपजलाशये ॥

३२५१-यदि निपान अर्थात् उदकाधार अर्थ हो तो आहवः यह पद निपातनसे सिद्ध हो, अर्थात् आङ्पूर्वक ह्वेञ् धातुके उत्तर अप् प्रत्यय और वृद्धि सम्प्रसारण निपातनसे सिद्ध होगा । " आहवस्तु निपानं स्यादुपकूपजलाशये " ॥

३२५२ भावेऽनुपसर्गस्य । ३ ।३।७५॥

अनुपसर्गस्य ह्वयतेः संप्रसारणमप् च स्याद् भावे । हवः ॥

३२५२-उपसर्ग पूर्वमें न रहते ऐसी जो ह्वेञ् धातु उसके उत्तर भावमें अप् प्रत्यय हो, और सम्प्रसारण हो, यथा-हवः॥

३२५३ हनश्च वधः । ३ । ३ । ७६ ॥

अनुपसर्गाद्धन्तेर्भावे अप् स्यात् वधादेशश्चान्तोदात्तः वधेन दस्युम् । चाद्घञ् । घातः ॥

३२५३-अनुपसर्ग पूर्वक हन् धातुके उत्तर भावमें अप् प्रत्यय हो, और हन धातुके स्थानमें वधादेश हो, और उसके अन्तवर्णको उदात्त स्वर हो, यथा-वधेनः दस्युम्। चकार निर्देशके कारण घञ् प्रत्यय भी हो,यथा-घातः ॥

३२५४ मूर्तौ घनः। ३। ३। ७७॥

मूर्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरप् स्यात् घनश्चादेशः। अभ्रघनः । कथं सैन्धवघनमानयेति। धर्मशब्देन धर्मी लक्ष्यते ॥

३२५४-मूर्ति अर्थात् काठिन्य अर्थ होनेपर हन धातुके उत्तर अप् प्रत्यय हो और हन धातुके स्थानमें घन आदेश हो, अभ्रघनः। तो " सैन्धवघनमानय" इस स्थलमें किस प्रकारसे प्रयोग हुआ ? इस स्थानमें धर्म शब्दसे धर्मी अर्थात् धर्मवान् लक्षित होताहै ॥

३२५५ अन्तर्घनो देशे। ३। ३। ७८॥

वाहीकग्रामविशेषस्य संज्ञेयम् । अन्तर्घण इति पाठान्तरम् ॥

३२५५-देश अर्थ होनेपर ' अन्तर्घनः ' यह पद निपातनसे सिद्ध हो, यह वाहीकग्रामविशेषकी संज्ञा है। 'अन्तर्घणः' ऐसा पाठान्तर भी है ॥

३२५६ अगारैकदेशे प्रघणः प्रघाणश्च। ३। ३। ७९॥

द्वारदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो वाह्यश्च। तत्र वाह्ये प्रकोष्ठे निपातनमिदम्। प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः। प्रघाणः। कर्मण्यप्। पक्षे वृद्धिः ॥

३२५६-अगार अर्थात् गृहका एकदेश होनेपर ' प्रघणः' और 'प्रघाणः' यह पद निपातनसे सिद्ध हों, द्वारदेशमें दो प्रकोष्ठ होतेहैं आभ्यन्तर और वाह्य उसमें वाह्य प्रकोष्ठ होनेपर यह निपातन है, यथा-प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते, इस विग्रहमें ' प्रघणः, प्रघाणः ' इस स्थलमें कर्मवाच्यमें अप् प्रत्यय हुआहै और विकल्प करके वृद्धि हुईहै ॥

३२५७ उद्घनोऽत्याधानम् ।३।३।८०॥

अत्याधानमुपरि स्थापनम् । यस्मिन् काष्ठे अन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्घनः। अधिकरणेऽप् ॥

३२५७-अत्याधान अर्थात् उपरि स्थापन अर्थ होनेपर 'उद्घनः' यह पद निपातनसे सिद्ध हो, जिस काष्ठके ऊपर दूसरा काष्ठ रखकर छेदन कियाजाय उसको'उद्घनः' कहतेहैं, इस स्थलमें अधिकरणवाच्यमें अप् प्रत्यय हुआहै ॥

३२५८ अपघनोऽङ्गम्। ३। ३। ८१॥

अङ्गं शरीरावयवः। स चेह न सर्वः किंतु पाणिः पादश्चेत्याहुः। करणेऽप्। अपघातोऽन्यः॥

३२५८-अङ्ग अर्थात् शरीरावयव वाच्य होनेपर ' अपघनः ' यह पद निपातनसे सिद्ध हो। वह अङ्ग यहां सब नहीं लेना, किन्तु पाणि और पाद यह पूर्वाचार्य्य कहेहैं । ' अपघनः' यहां करणवाच्यमें अप् प्रत्यय हुआहै। अन्यार्थमें 'अपघातः ' ऐसा होगा ॥

३२५९ करणेऽयोविद्रुषु। ३। ३।८२॥

एषु हन्तेः करणेऽप् स्याद्घनादेशश्च। अयो हन्यतेऽनेनेत्ययोघनः। विघनः। द्रुघनः।द्रुघण इत्येके। पूर्वपदात्संज्ञायामिति णत्वम्। संज्ञैषा कुठारस्य। द्रुर्वृक्षः ॥

३२५९-अयस्, वि और द्रु शब्द उपपद होनेपर करण वाच्यमें हन् धातुके उत्तर अप् प्रत्यय हो, और हन् धातुके स्थानमें घन आदेश हो, यथा-अयो हन्यते अनेन, इस विग्रहमें अयोघनः। विघनः। द्रुघनः। ' द्रुघणः' ऐसा कोई कहतेहैं यहां "पूर्वपदात् संज्ञायाम् ८५७ " इस सूत्रसे णत्व हुआ। द्रुघणः यह कुठारकी संज्ञा है।द्रु शब्दसे वृक्ष समझना॥

३२६० स्तम्बे क च। ३। ३। ८३ ॥

स्तम्बे उपपदे हन्तेः करणे कः स्यादप् च पक्षे घनादेशश्च । स्तम्बघ्नः । स्तम्बघनः। करण इत्येव। स्तम्बघातः ॥

३२६०-स्तम्ब शब्द उपपद होनेपर हन् धातुके उत्तर करणवाच्यमें क और अप् प्रत्यय हो, पक्षमें धातुके स्थानमें घन आदेश हो, यथा-स्तम्बघ्नः, स्तम्बघनः । करणभिन्नमें 'स्तम्बघातः ' पद होगा ॥

३२६१ परौ घः। ३। ३। ८४ ॥

परौ हन्तेरप् स्यात्करणे घशब्दश्चादेशः। परिहन्यतेऽनेनेति परिघः ॥

३२६१-परिपूर्वक हन् धातुके उत्तर करणवाच्यमें अप् प्रत्यय हो, और धातुके स्थानमें घ आदेश हो, यथा-परिहन्यते अनेन, इस विग्रहमें परिघः ॥

३२६२ परेश्च घाङ्कयोः। ८। २।२२॥

परे रेफस्य लो वा स्याद् घशब्देऽङ्कशब्दे च। पलिघः-परिघः।पल्यंकः-पर्यङ्कः।इह तरप्तमपौ घ इति कृत्रिमस्य न ग्रहणं व्याख्यानात् ॥

३२६२-घ शब्द और अंक शब्द परे रहते परि उपसर्गके रकारके स्थानमें विकल्प करके लकार आदेश हो, यथा-पलिघः, परिघः। पल्यङ्कः, पर्यंकः। इस सूत्रमें "तरप्तमपौ घः २००३" इस सूत्रोक्त कृत्रिम घका ग्रहण नहीं है कारण कि, ऐसा व्याख्यान है ॥

३२६३ उपघ्न आश्रये। ३।३। ८५॥

उपपूर्वाद्धन्तेरप् स्यादुपधालोपश्च । आश्रयशब्देन सामीप्यं लक्ष्यते । पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः ॥

३२६३-आश्रय अर्थ होनेपर उपपूर्वक हन् धातुके

उत्तर अप् प्रत्यय हो, और उपधाका लोप हो, आश्रय शब्दसे इस स्थानमें सामीप्य समझना, यथा—पर्वतेन उपहन्यते अर्थात् सामीप्येन गम्यते, इस विग्रहमें पर्वतोपघ्नः ॥

३२६४ सङ्घोद्घौ गणप्रशंसयोः । ३ । ३ । ८६ ॥

संहननं संघः । भावेऽप् । उद्धन्यते उत्कृष्टो ज्ञायते इत्युद्घः । कर्मण्यप् । गत्यर्थानां बुद्धयर्थत्वात् हन्तिर्ज्ञाने ॥

३२६४—संघ और उद्घ यह दो शब्द यथाक्रम गण और प्रशंसा अर्थमें निपातनसे सिद्ध हों, यथा—संहननम्, इस विग्रहमें 'संघः' इस स्थलमें भाववाच्यमें अप् प्रत्यय हुआहै उद्धन्यते उत्कृष्टो ज्ञायते, इस विग्रहमें 'उद्घः' इस स्थलमें कर्मवाच्यमें अप् प्रत्यय हुआहै । गत्यर्थक धातुओंका बुद्धयर्थक होनेके कारण हन् धातु ज्ञानार्थमें है, अतएव 'उद्धन्यते' इसका 'उत्कृष्टो ज्ञायते' ऐसा विवरण लिखे हैं ॥

३२६५ निघो निमितम् ।३। ३ । ८७॥

समन्तान्मितं निमितम् । निर्विशेषं हन्यन्ते ज्ञायन्त इति निघाः वृक्षाः । समारोहपरिणाहा इत्यर्थः ॥

३२६५—निमित अर्थ होनेपर 'निघः' यह पद निपातनसे सिद्ध हो । समन्तात् मितको निमित कहतेहैं, निर्विशेषं हन्यन्ते ज्ञायन्ते, इस विग्रहमें निघाः—वृक्षाः, अर्थात् समारोहणसे विस्तारयुक्त ॥

३२६६ ड्वितः क्त्रिः । ३ । ३ । ८८ ॥

अयं भाव एव स्वभावात् । क्त्रेर्मम्नित्यम् । नित्यग्रहणात् क्त्रिर्मब्विषयः । अत एव क्त्र्यन्तेन न विग्रहः । डुपचष् पाके । पाकेन निर्वृत्तं पक्त्रिमम् । डुवप् । उप्त्रिमम् ॥

३२६६—डु इत् है जिसमें ऐसे धातुके उत्तर क्त्रि प्रत्यय हो, यह प्रत्यय स्वभावसे भाववाच्यमें ही होताहै । "क्त्रेर्मम्नित्यम् १५७०" इससे क्त्रिप्रत्ययान्तके उत्तर निर्वृत्तार्थमें नित्य मप् होगा । नित्य शब्दके ग्रहणके कारण क्त्रि प्रत्ययान्तही मप् प्रत्ययके विषयीभूत है, अतएव क्त्रिप्रत्ययान्तके साथ विग्रह नहीं हुआ, यथा—पाकार्थक डुपचष् धातुका पाकेन निर्वृत्तम्, इस विग्रहमें पक्त्रिमम् । बीज सन्तानार्थक डुवप् धातुका उप्त्रिमम् ॥

३२६७ ट्वितोऽथुच् । ३ । ३ । ८९ ॥

अयमपि स्वभावाद् भाव एव । टुवेपृ । वेपथुः । श्वयथुः ॥

३२६७—ट्वित् धातुओंके उत्तर अथुच् प्रत्यय हो, यह प्रत्यय भी स्वभावतः भाववाच्यमें ही होताहै, यथा—टुवेपृ धातुका वेपथुः । श्वयथुः ॥

३२६८ यजयाचयतविच्छप्रच्छरक्षो नङ् । ३ । ३ । ९० ॥

यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । प्रश्ने चासन्नेति ज्ञापकान्न संप्रसारणम् । ङित्त्वं तु विश्न इत्यत्र गुणनिषेधाय । रक्ष्णः ॥

३२६८—यज्, याच्, यत्, विच्छ्, प्रच्छ् और रक्ष् धातुके उत्तर नङ् प्रत्यय हो, यथा—यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। यहां "प्रश्ने चासन्न० २७७७" इस ज्ञापकसे सम्प्रसारण नहीं हुआ । 'विश्नः' इस स्थलमें गुणनिषेधके निमित्त प्रत्ययमें ङित्करण है । रक्ष्णः ॥

३२६९ स्वपो नन् । ३ । ३ । ९१ ॥

स्वप्नः ॥

३२६९—स्वप् धातुके उत्तर नन् प्रत्यय हो, यथा—स्वप्नः ॥

३२७० उपसर्गे घोः किः । ३।३।९२ ॥

प्रधिः । अन्तर्धिः। उपाधीयतेऽनेनेत्युपाधिः॥

३२७०—उपसर्ग उपपद रहते घुसंज्ञक धातुके उत्तर कि प्रत्यय हो, प्रधिः । अन्तर्धिः । उपाधीयतेऽनेनेत्युपाधिः ॥

३२७१ कर्मण्यधिकरणे च ।३।३।९३॥

कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे । जलानि धीयन्तेऽस्मिन्निति जलधिः ॥

३२७१—कर्म्म उपपद होनेपर अधिकरणवाच्यमें घुसंज्ञक धातुके उत्तर कि प्रत्यय हो, यथा—जलानि धीयन्ते अस्मिन्, इस विग्रहमें जलधिः (समुद्र) ॥

३२७२ स्त्रियां क्तिन् । ३ । ३ । ९४ ॥

स्त्रीलिंगे भावादौ क्तिन् स्याद् घञोऽपवादः। अजपौ तु परत्वाद्बाधते । कृतिः । चितिः । स्तुतिः । स्फायी । स्फातिः । स्फीतिकाम इति तु प्रामादिकम् । क्तान्ताद्भावत्वर्थे णिचि अच इरिति वा समाधेयम् ॥ श्रुयजीषिस्तुभ्यः करणे ॥ * ॥ श्रूयतेऽनया श्रुतिः । यजेरिषेश्च इष्टिः । स्तुतिः । ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः ॥*॥ तेन नत्वम्।कीर्णिः।गीर्णिः।लूनिः। धूनिः । यूनिः।ह्लाद इति योगविभागात् क्तिनि ह्रस्वः। प्रह्लत्तिः। ति च। सूर्तिः । फुल्लतिः॥चायतेः क्तिनि चिभावो वाच्यः ॥ * ॥ अपचितिः ॥ सम्पदादिभ्यः क्विप् ॥ * ॥ सम्पत् । विपत् ॥ क्तिन्नपीष्यते ॥ * ॥ सम्पत्तिः । विपत्तिः ॥

३२७२—स्त्रीलिङ्गमें भावादिवाच्यमें धातुके उत्तर क्तिन् प्रत्यय हो, यह घञ् प्रत्ययका विशेषक है । अच् और अप् प्रत्ययको तो परत्वके कारण बाधता है, यथा—कृतिः। चितिः । स्तुतिः । स्फायी—स्फातिः। स्फीतिकामः, यह तो प्रामादिक है,

अथवा क्त प्रत्ययान्तके उत्तर धात्वर्थमें णिच् प्रत्यय करनेपर "अच इः" इस सूत्रसे इ प्रत्यय करके उक्तपदकी सिद्धि होगी।

श्रु, यज, इष, स्तु, धातुओंके उत्तर करणवाच्यमें क्तिन् प्रत्यय हो * श्रूयते अनया, इस विग्रहमें श्रुतिः। यज् और इष् धातुके उत्तर क्तिन् प्रत्यय करके 'इष्टिः' ऐसा पद होगा। स्तुतिः।

ॠ धातु और लू आदि धातुओंके उत्तर क्तिन् प्रत्यय निष्ठा प्रत्ययकी समान हो * इसलिये नत्व होगा, कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः। "ह्लादः ३०७३" ऐसे योगविभाग अर्थात् भिन्न सूत्रकरणके कारण क्तिन् प्रत्यय परे ह्रस्व होगा, प्रह्लत्तिः। "ति च ३०३७" इससे उत्व होकर चूर्त्तिः। फुल्तिः।

"चायतेः क्तिनि चिभावो वाच्यः" अर्थात् चाय् धातुको क्तिन् प्रत्यय परे रहते चिभाव हो * अपचितिः।

"सम्पदादिभ्यः क्विप्" अर्थात् पद आदि धातुके उत्तर क्विप् प्रत्यय हो* सम्पत्। विपत्।

क्तिन् प्रत्यय भी सम्पदादि धातुसे हो * यथा-सम्पत्तिः। विपत्तिः॥

३२७३ स्थागापापचो भावे।३।३।९५॥

क्तिन् स्यादङोऽपवादः। प्रस्थितिः। उपस्थितिः। संगीतिः। सम्पीतिः। पक्तिः। कथमवस्था संस्थेति व्यवस्थायामिति ज्ञापकात्॥

३२७३-स्था, गा, पा और पच् धातुओंके उत्तर भाववाच्यमें क्तिन् प्रत्यय हो, यह अङ् प्रत्ययका विशेषक अर्थात् अपवाद है, न यथा-प्रस्थितिः। उपस्थितिः। सङ्गीतिः। सम्पीतिः। पक्तिः। अङ् प्रत्ययका बाध होजानेसे अवस्था और संस्था यह पद किस प्रकारसे सिद्ध हुआ? तो 'व्यवस्थायाम्' इस ज्ञापकके कारण क्वचित् अङ् प्रत्यय भी होनेसे उक्त पद सिद्ध हुए॥

३२७४ ऊतियूतिजूतिसातिहेतिकीर्तयश्च।३।३।९७॥

अवतेर्ज्वरत्वरेत्यूठ्। ऊतिः। स्वरार्थं वचनम्। उदात्त इति हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। द्यतिस्यतिमास्थेतीत्वे प्राप्ते इत्त्वाभावो निपात्यते। सनोतेर्वा जनसनेत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः॥

३२७४-ऊति, यूति, जूति, साति, हेति और कीर्ति यह क्तिन् प्रत्ययान्त पद निपातनसे सिद्ध हों, यथा-अव धातुको "ज्वरत्वर० २६५४" इस सूत्रसे ऊठ् होकर-ऊतिः। यह सूत्र स्वरार्थ है, "उदात्तः" इस पदकी अनुवृत्ति आतीहै। यूतिः। जूतिः। इन दोनों पदोंमें दीर्घ निपातनसे हुआहै। सा धातुके उत्तर क्तिन् प्रत्यय होकर-सातिः, यहां "द्यतिस्यतिमास्था० ३०७४" इस सूत्रसे प्राप्त इत्वका अभाव निपातनसे हुआ। अथवा सन धातुको "जनसन० २५०४" इस सूत्रसे आकार होनेपर निपातन स्वरविधानके निमित्त जानना। हन अथवा हि धातुका हेतिः। कृत धातुका कीर्तिः॥

३२७५ व्रजयजोर्भावे क्यप्।३।३।९८॥

व्रज्या। इज्या॥

३२७५-व्रज् और यज् धातुके उत्तर भाववाच्यमें क्यप् हो, यथा-व्रज्या। इज्या॥

३२७६ संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः।३।३।९९॥

समजादिभ्यः स्त्रियां भावादौ क्यप्स्यात्स चोदात्तः संज्ञायाम्॥ अजेः क्यपि वीभावो नेति वाच्यम्॥ * ॥ समजन्ति तस्यामिति समज्या सभा। निषीदन्त्यस्यामिति निषद्या आपणः। निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यतेऽनयेति मन्या गलपार्श्वशिरा। विदन्त्यनया विद्या। सुत्या अभिषवः। शय्या। भृत्या। ईयतेऽनया इत्या शिबिका॥

३२७६-संज्ञामें संपूर्वक अज्, निपूर्वक सद्, निपूर्वक पत्, मन्, विद्, षुञ्, शीङ् भृञ् और इण् धातुओंके उत्तर स्त्रीलिङ्गमें भावादिवाच्यमें क्यप् प्रत्यय हो, और वह उदात्त हो।

अज् धातुको क्यप् प्रत्यय परे वीभाव न हो * यथा-समजन्ति अस्याम्, इस विग्रहमें समज्या, अर्थात् सभा। निषीदन्त्यस्याम्=निषद्या-आपणः। निपतन्त्यस्याम् इस विग्रहमें निपत्या-पिच्छिला भूमिः। मन्यते अनया, इस विग्रहमें मन्या गलपार्श्वशिरा। विदन्त्यनया, इस विग्रहमें विद्या। सुनोति अनया=सुत्या-अभिषवः। शेते अस्याम्=शय्या। भृत्या। ईयते अनया, इत्या-शिबिका॥

३२७७ कृञः श च।३।३।१००॥

कृञ इति योगविभागः। कृञः क्यप्स्यात्। कृत्या। श च। चात् क्तिन्। क्रिया। कृतिः॥

३२७७-"कृञः" यह योगविभाग है, कृञ् धातुके उत्तर क्यप् प्रत्यय हो, यथा-कृत्या। श च कृञ् धातुके उत्तर श प्रत्यय हो, और चकारनिर्देशके कारण क्तिन् प्रत्यय भी हो, यथा-क्रिया। कृतिः॥

३२७८ इच्छा।३।३।१०१॥

इषेर्भावे शो यगभावश्च निपात्यते। इच्छा॥ परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् * शो यक् च निपात्यते परिचर्या पूजा। परिसर्या परिसरणम्। अत्र गुणोऽपि। मृग अन्वेषणे चुरादावदन्तः। अतो लोपाभावोऽपि। शे यकि णिलोपः। मृगया। अटतेः शे यकि टयशब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घश्च। अटाट्या॥ जागर्तेरकारो वा पक्षे शः। जागरा। जागर्या॥

३२७८–निपातनसे इष् धातुके उत्तर भाववाच्यमें श प्रत्यय हो, और यक् प्रत्ययका अभाव हो, इच्छा ।

परिचर्या, परिसर्या, मृगया, अटाट्या, यह पद भी निपातनसे निष्पन्न हों, अर्थात् परिपूर्वक चर आदि धातुओंके उत्तर श और यक् निपातनसे हो * यथा–परिसर्य्या–पूजा परिसर्य्या–परिसरणम्, इस स्थलमें गुण भी हुआ । चुरादिमें अन्वेषणार्थक मृग धातु अदन्त है, उसके अकारका लोपाभाव भी निपातनसे हुआ, श प्रत्यय और यक् होनेपर णिका लोप होकर–मृगया । अट् धातुसे श प्रत्यय और यक् करनेपर टय शब्दको द्वित्व और पूर्वभागमें यकारनिवृत्ति और दीर्घ निपातनसे होकर अटाट्या ॥

"जागर्तेरकारो वा०" अर्थात् जागृ धातुके उत्तर विकल्प करके अकार प्रत्यय हो * विकल्प पक्षमें श प्रत्यय होगा, यथा–जागरा, जागर्य्या ॥

३२७९ अ प्रत्ययात् । ३ । ३ ।१०२॥

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात् । चिकीर्षा । पुत्रकाम्या ॥

३२७९–प्रत्ययान्त धातुके उत्तर स्त्रीलिंगमें अकार प्रत्यय हो, यथा–चिकीर्षा पुत्रकाम्या ॥

३२८० गुरोश्च हलः । ३ । ३ ।१०३ ॥

गुरुमतो हलन्तात् स्त्रियामकारः स्यात् । ईहा । ऊहा । गुरोः किम् । भक्तिः । हलः किम् । नीतिः॥निष्ठायां सेट इति वक्तव्यम् ॥*॥ नेह । आप्तिः । तितुत्रेति नेट् । दीप्तिः ॥ तितुत्रेष्वग्रहादीनामिति वाच्यम् ॥ * ॥ निगृहीतिः । निपठितिः ॥

३२८०–गुरुस्वरविशिष्ट व्यञ्जनवर्णान्त धातुके उत्तर स्त्रीलिङ्गमें अकार प्रत्यय हो, यथा–ईहा । ऊहा । गुरुविशिष्ट न होनेपर तो भक्तिः । हलन्त न होनेपर तो नीतिः ।

निष्ठा प्रत्यय परे रहते सेट् हो ऐसे गुरुमान् हलन्त धातुके उत्तर अकार हो, ऐसा कहना चाहिये * इससे 'आप्तिः' इस स्थलमें अकार प्रत्यय नहीं हुआ, क्योंकि–इस स्थलमें "तितुत्रे० ३१६३" । इस सूत्रसे इट् नहीं होताहै । दीप्तिः ।

"तितुत्रेष्वग्रहादीनाम्०" अर्थात् तितुत्र सूत्रसे ग्रहादि भिन्नधातुके उत्तर इट्निषेध हो, ऐसा कहना चाहिये * यथा–निगृहीतिः । निपठितिः ॥

३२८१ षिद्भिदादिभ्योऽङ्।३।३।१०४॥

षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् । जॄष् । ऋदृशोऽङि गुणः । जरा । त्रपूष् । त्रपा । भिदा । विदारण एवायम् । भित्तिरन्या । छिदा । मृजा । कृपेः संप्रसारणं च । कृपा ॥

३२८१–षित् धातु और भिदादि धातुओंके उत्तर स्त्रीलिङ्गमें अङ् प्रत्यय हो, जॄष् धातुको अङ् प्रत्यय परे रहते "ऋदृशोऽङि २४०६" इस सूत्रसे गुण होकर–जरा।त्रपूष्–त्रपा । भिदा । विदारणार्थमें ही यह पद होगा, अन्य अर्थमें भित्तिः होगा । छिदा । मृजा ।

कृप् धातुको सम्प्रसारण भी हो, कृपा ॥

३२८२ चिन्तिपूजिकथिकुम्बिचर्चश्च । ३ । ३ । १०५ ॥

अङ् स्याद्युचोऽपवादः । चिन्ता । पूजा । कथा । कुम्बा । चर्चा ॥

३२८२–चिन्त्, पूज्, कथ्, कुम्ब् और चर्च् धातुके उत्तर अङ् प्रत्यय हो, यह सूत्र युच् प्रत्ययका विशेषक है; चिन्ता । पूजा । कथा । कुम्बा । चर्चा ॥

३२८३ आतश्चोपसर्गे । ३ ।३।१०६ ॥

अङ् स्यात् । क्तिनोऽपवादः । प्रदा । उपदा। श्रदन्तरोरुपसर्गवद्वृत्तिः । श्रद्धा । अन्तर्धा । उपसर्गे घोः किरित्यनेन किः । अन्तर्धिः ॥

३२८३–उपसर्ग पूर्वमें रहते आकारान्त धातुके उत्तर अङ् प्रत्यय हो, यह क्तिन् प्रत्ययका विशेषक है, यथा–प्रदा । उपदा ॥

श्रत् और अन्तः शब्दको उपसर्गकी समान कार्य्य हो, इससे श्रत् शब्द अन्तः शब्द उपपद रहते भी आकारान्त धातुके उत्तर अङ् प्रत्यय होगा, यथा–श्रद्धा । अन्तर्द्धा । "उपसर्गे घोः किः ३२७० " इससे कि प्रत्यय होकर–अन्तर्धिः ॥

३२८४ ण्यासश्रन्थो युच्।३।३।१०७॥

अकारस्यापवादः । कारणा । हारणा । आसना । श्रन्थना ॥ घट्टिवन्दिविदिभ्यश्चेति वाच्यम् ॥ * ॥ घट्टना । वन्दना । वेदना ॥ इषेरनिच्छार्थस्य ॥ * ॥ अन्वेषणा ॥ परेर्वा ॥*॥ पर्येषणा । परीष्टिः ॥

३२८४–णिजन्त धातु आस् धातु और श्रन्थ् धातुके उत्तर युच् प्रत्यय हो, यह अकार प्रत्ययका विशेषक है, यथा–कारणा । हारणा । आसना । श्रन्थना ।

घट्, वन्द् और विद् धातुके उत्तर भी युच् प्रत्यय हो * यथा–घट्टना । वन्दना । वेदना ।

अनिच्छार्थक इष् धातुके उत्तर युच् प्रत्यय हो * यथा–अन्वेषणा ।

परिपूर्वक इष् धातुके उत्तर विकल्प करके युच् प्रत्यय हो* यथा–पर्य्येषणा, परीष्टिः ॥

३२८५ रोगाख्यायां ण्वुल्बहुलम् । ३ । ३ । १०८ ॥

प्रच्छर्दिका । प्रवाहिका । विचर्चिका । क्वचिन्न । शिरोर्तिः ॥ धात्वर्थनिर्देशे ण्वुल्वक्त-

व्यः ॥ * ॥ आसिका । शायिका ॥ इक्श्तिपौ धातुनिर्देशे ॥ * ॥ पचिः । पचतिः ॥ वर्णात्कारः ॥ * ॥ निर्देश इत्येव । अकारः ॥ ककारः ॥ रादिफः॥*॥रेफः॥मत्वर्थाच्छः ॥*॥ बहुलवचनादकारलोपः । मत्वर्थीयः ॥ इणजादिभ्यः ॥ * ॥ आजिः । आतिः । इञ् वपादिभ्यः ॥ * ॥ वापिः । वासिः । स्वरे भेदः ॥ इक् कृष्यादिभ्यः ॥ * ॥ कृषिः । गिरिः ॥

३२८५-रोगकी आख्या अर्थात् नाम होनेपर धातुके उत्तर बहुल करके ण्वुल् प्रत्यय हो, यथा-प्रच्छर्दिका । प्रवाहिका । विचर्चिका । किसी २ स्थलमें ण्वुल् प्रत्यय न होगा, यथा-शिरोऽर्त्तिः ।

धातुके अर्थनिर्देशमें ण्वुल् प्रत्यय हो * यथा-आसिका । शायिका ।

धातुनिर्देशमें इक् और श्तिप् प्रत्यय हो * पचिः । पचतिः ।

वर्णके निर्देशमें वर्णसे कार प्रत्यय हो * यथा-अकारः । ककारः ।

रवर्णके उत्तर इफ प्रत्यय हो * यथा-रेफः ।

मत्वर्थ शब्दके उत्तर छ प्रत्यय हो * बहुलवचनसे अकारका लोप होकर-मत्वर्थीयः ।

अजादि धातुओंके उत्तर इण् प्रत्यय हो * यथा-आजिः । आतिः ।

वपादि धातुओंके उत्तर इञ् प्रत्यय हो * यथा-वापिः । वासिः । इण् प्रत्ययसे इञ् प्रत्ययमें केवल स्वरविशेष है ।

कृष्यादि धातुओंके उत्तर इक् प्रत्यय हो * यथा-कृषिः । गिरिः ॥

३२८६ संज्ञायाम् । ३ । ३ । १०९ ॥

अत्र धातोर्ण्वुल् । उद्दालकपुष्पभञ्जिका ॥

३२८६-संज्ञा होनेपर धातुके उत्तर ण्वुल् हो, उद्दालकपुष्पभञ्जिका ॥

३२८७ विभाषाख्यानपरिप्रश्नयोरिञ्च । ३ । ३ । ११० ॥

परिप्रश्ने आख्याने च गम्ये इञ् स्याच्चात् ण्वुल्। विभाषोक्तेर्यथाप्राप्तमन्येपि। कां त्वं कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षीः । सर्वां कारिं कारिकां क्रियां कृत्यां कृतिं वाऽकार्षम्। एवं गणिं गणिकां गणनाम् । पाचिं पाचिकां पचां पक्तिम् ॥

३२८७-आख्यान और परिप्रश्न गम्य होनेपर धातुके उत्तर विकल्प करके इञ् प्रत्यय और चकारसे ण्वुल् प्रत्यय हो, विभाषा पदकी उक्तिके कारण यथाप्राप्त अन्यप्रत्यय भी होगा, यथा-कां, त्वं, कारिं, कारिकां, क्रियां, कृत्यां, कृतिं, वा अकार्षीः । सर्वां, कारिं, कारिकां, क्रियां, कृत्यां, कृतिं वा अकार्षम् । इसी प्रकार गणिं, गणिकाम्, गणनाम् । पाचिं, पाचिकां, पचां, पक्तिम् ॥

३२८८ पर्यायार्हर्णोत्पत्तिषु ण्वुच् । ३ । ३ । १११ ॥

पर्यायः परिपाटी क्रमः । अर्हणमर्हः योग्यता । पर्यायादिषु द्योत्येषु ण्वुच् वा स्यात् । भवत आसिका । शायिका । अग्रगामिका । भवानिक्षुभक्षिकामर्हति । ऋणे । इक्षुभक्षिकां मे धारयति । उत्पत्तौ । इक्षुभक्षिका उदपादि ॥

३२८८-पर्य्याय, अर्ह, ऋण और उत्पत्ति द्योत्य रहते धातुके उत्तर विकल्प करके ण्वुच प्रत्यय हो, पर्य्याय शब्दसे परिपाटी अर्थात् क्रम समझना । अर्ह शब्दसे योग्यता समझना । यथा-भवत आसिका शायिका । अग्रगामिका । भवानिक्षुभक्षिकामर्हति । ऋण अर्थमें यथा-इक्षुभक्षिकां मे धारयति । उत्पत्ति अर्थमें यथा-इक्षुभक्षिका उदपादि ॥

३२८९ आक्रोशे नञ्यनिः।३।३।११२॥

विभाषेति निवृत्तम् । नञि उपपदेऽनिः स्यादाक्रोशे।अजीवनिस्ते शठ भूयात् । अप्रयाणिः॥ कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ॥ भावेऽकर्तरि च कारके संज्ञायामिति च निवृत्तम् । राज्ञा भुज्यन्ते राजभोजनाः शालयः ॥ नपुंसके भावे क्तः । ३ । ३ । ११४ ॥

३२८९-इस सूत्रसे विभाषा पदकी निवृत्ति हुई । नञ् शब्द उपपद होनेपर आक्रोशार्थमें धातुके उत्तर अनि प्रत्यय हो, यथा-अजीवनिस्ते शठ भूयात् । अप्रयाणिः ॥

(२८४१)-कृत्य प्रत्यय और ल्युट् प्रत्यय बहुल प्रकारसे हो, "भावेऽकर्त्तरि च कारके संज्ञायाम्" इन दोनोंकी यहां निवृत्ति हुई राज्ञा भुज्यन्ते राजभोजनाः-शालयः ॥

(३०९० भाववाच्य और नपुंसक लिंगमें धातुके उत्तर क्त प्रत्यय हो) ॥

३२९० ल्युट् च । ३ । ३ । ११५ ॥

हसितम् । हसनम् । योगविभाग उत्तरार्थः॥

३२९०-भाववाच्यमें नपुंसक लिङ्गमें धातुके उत्तर ल्युट् प्रत्यय भी हो, यथा-हसितम् । हसनम् । भिन्न सूत्र करना उत्तरार्थ है ॥

३२९१ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् । ३ । ३ । ११६ ॥

येन स्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन् कर्मण्युपपदे ल्युट् स्यात् । पूर्वेण सिद्धे नित्यसमासार्थं वचनम् । पयःपानं सुखम् । कर्तुरिति किम् । गुरोः स्नापनं सुखम् । नेह गुरुः कर्ता किं तु कर्म ॥

३२९१-जिस कर्म्मसे स्पृश्यमान कर्त्ताके शरीरका सुख उत्पन्न हो वह कर्म्म उपपद होनेपर धातुके उत्तर ल्युट् प्रत्यय हो, पूर्वसूत्रसे सिद्ध होनेपर भी यह सूत्र केवल नित्य समासार्थ है यथा-पयःपानम् सुखम्। 'कर्त्तुः' क्यों कहा ? तो 'गुरोः स्नापनं सुखम्' इस स्थलमें ल्युट् नहीं हो, यहां गुरु कर्त्ता नहीं है किन्तु कर्म है ॥

३२९२ वा यौ । २ । ४ । ५७ ॥

अजेर्वी वा स्याद् यौ । प्रवयणम् । प्राजनम् ॥

३२९२-यु प्रत्यय परे रहते अज् धातुको विकल्प करके वी आदेश हो, यथा-प्रवयणम्, प्राजनम् ॥

३२९३ करणाधिकरणयोश्च ३।३।११७॥

ल्युट् स्यात् । इध्मप्रव्रश्चनः कुठारः । गोदोहनी स्थाली । खलः प्राक् करणाधिकरणयोरित्यधिकारः ॥

३२९३-करण और अधिकरण वाच्यमें धातुके उत्तर ल्युट् प्रत्यय हो, यथा-इध्मप्रव्रश्चनः-कुठारः । गोदोहनी-स्थाली । खल् प्रत्ययके पूर्वतक 'करणाधिकरणयोः' इसका अधिकार चलैगा ॥

३२९४ अन्तरदेशे । ८ । ४ । २४ ॥

अन्तःशब्दाद्धन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । देशे तु अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्घ्नन्ति । तपरः किम् । अन्तरघानि ॥

३२९४-देशभिन्न अर्थ होनेपर अन्तः शब्दके परे हन् धातुके नकारको णत्व हो, यथा-अन्तर्हणनम् । देश अर्थ होनेपर अन्तर्हननो देशः । इस स्थलमें णत्व नहीं हुआ। अत् पूर्वक नकारको ही णत्व होगा, इस कारण 'अन्तर्घ्नन्ति' इस स्थलमें णत्व नहीं हुआ । तपरः कहनेकी आवश्यकता क्या है ? तो 'अन्तरघानि' इस स्थानमें णत्व नहीं हो ॥

३२९५ अयनं च । ८ । ४ । २५ ॥

अयनस्य णोऽन्तःशब्दात्परस्य । अन्तरयणम् । अदेश इत्येव । अन्तरयनो देशः ॥

३२९५-देश भिन्नार्थमें अन्तः शब्दके परवर्ती अयन शब्दके नकारको णत्व हो, यथा-अन्तरयणम् । जिस स्थानमें देश अर्थ होगा, उस स्थानमें णत्व नहीं होगा, यथा-अन्तरयनो देशः ॥

३२९६ पुंसि संज्ञायां घः प्रायेण । ३ । ३ । ११८ ॥

३२९६-संज्ञा होनेपर पुँल्लिंगमें धातुके उत्तर घ प्रत्यय हो-॥

३२९७ छादेर्घेऽद्व्युपसर्गस्य ।६।४।९६॥

द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद् घे परे । दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः । अद्वीति किम् । समुपच्छादः । आकुर्वन्त्यस्मिन् आकरः ॥

३२९७-द्विप्रभृति उपसर्गोंसे हीन छादि धातुओंको ह्रस्व हो घ प्रत्यय परे रहते, यथा-दन्ताश्छाद्यन्ते अनेन, इस विग्रहमें दन्तच्छदः । प्रच्छदः । द्विप्रभृति उपसर्गोंसे हीन हो ऐसा क्यों कहा ? तो 'समुपच्छादः' यहां ह्रस्व न हो । आकुर्वन्त्यस्मिन्, इस विग्रहमें आकरः ॥

३२९८ गोचरसंचरवहव्रजव्यजापणनिगमाश्च । ३ । ३ । ११९ ॥

घान्ता निपात्यन्ते । हलश्चेति वक्ष्यमाणस्य घञोऽपवादः । गावश्चरन्त्यस्मिन्निति गोचरो देशः । संचरन्तेऽनेन संचरो मार्गः । वहन्त्यनेन वहः स्कन्धः । व्रजः । व्यजस्तालवृन्तम् । निपातनाद्वीभावो न । आपणः पण्यस्थानम् । निगच्छन्त्यनेन निगमश्छन्दः । चात्कषः । निकषः ॥

३२९८-गोचर, सञ्चर, वह, व्रज, व्यज, आपण और निगम यह घ प्रत्ययान्त पद निपातनसे सिद्ध हों, यह सूत्र "हलश्च ३३००" इस सूत्रसे वक्ष्यमाण घञ् प्रत्ययका विशेषक है, यथा-गावश्चरन्त्यस्मिन्, इस विग्रहमें गोचरो देशः । सञ्चरन्ते अनेन, इस विग्रहमें सञ्चरो मार्गः । वहन्त्यनेन, इस विग्रहमें वहः-स्कन्धः । व्रजः । व्यजः-तालवृन्तम् । यह निपातनके कारण अज् धातुके स्थानमें वी आदेश नहीं हुआ। आपणः-पण्यस्थानम् । निगच्छन्त्यनेन, इस विग्रहमें निगमश्छन्दः । चकारनिर्देशके कारण 'कषः निकषः' यह दो पद भी निपातनसे सिद्ध हुए ॥

३२९९ अवे तॄस्त्रोर्घञ् । ३ । ३।१२०॥

अवतारः कूपादेः । अवस्तारो जवनिका ॥

३२९९-अव पूर्वक तॄ और स्तॄ धातुके उत्तर संज्ञामें करण और अधिकरण वाच्यमें पुँल्लिङ्गमें घञ् प्रत्यय हो, यथा अवतारः कूपादेः । अवस्तारो जवनिका ॥

३३०० हलश्च । ३ । ३ । १२१ ॥

हलन्ताद्घञ् स्यात् । घापवादः । रमन्ते योगिनोऽस्मिन्निति रामः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः । विमार्गः समूहनी ॥

३३००-करण और अधिकरण वाच्यमें पुँल्लिङ्गमें संज्ञा होनेपर हलन्त धातुके उत्तर घञ् प्रत्यय हो, यह सूत्र घ प्रत्ययका अपवाद है।रमन्ते योगिनोऽस्मिन्,इस विग्रहमें रामः। अपमृज्यतेऽनेन व्याध्यादिः, इस विग्रहमें अपामार्गः । विमार्गः समूहनी ॥

३३०१ अध्यायन्यायोद्यावसंहाराश्च । ३ । ३ । १२२ ॥

अधीयतेऽस्मिन् अध्यायः । नियन्ति उद्युवन्ति संहरन्त्यनेनेति विग्रहः ॥ अवहाराधारावायानामुपसंख्यानम् ॥ * ॥

३३०१-अध्याय, न्याय,उद्याव, संहार यह घञ् प्रत्ययान्त

शब्द निपातनसे सिद्ध हों, यथा–अधीयते अस्मिन्, इस विग्रहमें अध्यायः । नियन्ति अनेन, इस विग्रहमें न्यायः । उद्युवन्ति अनेन, इस विग्रहमें उद्यावः । संहरन्ति अनेन इस विग्रहमें संहारः ।

अवहार, आधार, आवाय यह घञ् प्रत्ययान्त शब्द निपातनसे सिद्ध हों ॥

३३०२ उदङ्कोऽनुदके । ३ । ३ ।१२३॥

उत्पूर्वादञ्चतेर्घञ् स्यात् न तूदके । घृतमुदच्यते उद्ध्रियतेऽस्मिन्निति घृतोदङ्कश्चर्ममयं भाण्डम् । अनुदके किम् । उदकोदञ्चनः ॥

३३०२–'उदङ्कः' यह घञ् प्रत्ययान्त शब्द निपातनसे सिद्ध हो, उदक भिन्न अर्थ होनेपर अर्थात् उत्पूर्वक अंच् धातुके उत्तर उदकभिन्न अर्थमें घञ् प्रत्यय हो, यथा–घृतमुदच्यते उद्ध्रियते अस्मिन्, इस विग्रहमें घृतोदङ्कः–चर्म्ममयं-भाण्डम् । उदक अर्थ होनेपर घञ् प्रत्यय नहीं होगा, यथा–उदकोदञ्चनः ॥

३३०३ जालमानायः । ३ । ३ ।१२४॥

आनीयन्ते मत्स्यादयोऽनेनेत्यानायः । जालमिति किम् । आनयनः ॥

३३०३–जाल अर्थ होनेपर 'आनायः' यह घञ् प्रत्ययान्त पद निपातनसे सिद्ध हो, यथा–आनीयन्ते मत्स्यादयोऽनेन, इस विग्रहमें आनायः । जिस स्थानमें जाल नहीं होगा, उस स्थानमें आनयनः ॥

३३०४ खनो घ च । ३ । ३ । १२५॥

चाद् घञ् । आखनः । आखानः । घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम् । तेन भगः पदमित्यादि ॥ खनेर्डडरेकेकवका वाच्याः ॥ * ॥ आखः । आखरः।आखनिकः । आखनिकवकः । एते खनित्रवचनाः ॥

३३०४–खन् धातुके उत्तर घ प्रत्यय हो, और चकारनिर्देशसे घञ् प्रत्यय हो, यथा–आखनः । आखानः । खन् धातुमें घित् प्रयुक्त कार्य्यप्रवृत्ति योग्य वर्ण न होनेसे प्रत्ययमें घित् करण अन्य धातुके उत्तर भी यह प्रत्यय हो, यह जतानेके निमित्त है, इससे भगः पदम् इत्यादि पदोंकी सिद्धि हुई ।

" खनेर्डडरेकेकवकाः वाच्याः" अर्थात् खन् धातुके उत्तर ड, डर, इक, इकवक यह चार प्रत्यय हों * यथा–आखः । आखरः । आखनिकः । आखनिकवकः । यह सब खनित्रवाचक हैं ॥

३३०५ ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् । ३ । ३ । १२६ ॥

करणाधिकरणयोरिति निवृत्तम् । एषु दुःखसुखार्थेषूपपदेषु खल् स्यात् । तयोरेवेति भावे कर्मणि च कृच्छ्रे । दुष्करः कटो भवता । अकृच्छ्रे । ईषत्करः । सुकरः ॥ निमिमीलियां खलचोरात्त्वं नेति वाच्यम् ॥*॥ ईषन्निमयः । दुष्प्रमयः। सुविलयः । निमयः । मयः । लयः॥

३३०५–'करणाधिकरणयोः' यह निवृत्त हुआ। दुःख और सुखवाचक ईषत्, दुस् और सु यह तीन शब्द उपपद होनेपर अर्थात् पूर्वमें रहते धातुके उत्तर खल् प्रत्यय हो, " तयोरेव० २८३३ " इस सूत्रसे भाव और कर्म्मवाच्यमें होगा, दुःखार्थका उदाहरण यथा–दुष्करः कटो भवता (तुमसे चटाई बननी कठिन है) सुखार्थका उदाहरण जैसे–ईषत्करः । सुकरः ।

"निमिमीलियां खलचोरात्त्वं नेति वाच्यम् " अर्थात् निमिपूर्वक मि धातु मी धातु ली धातुको खल् और अच् प्रत्यय परे रहते आत्व न हो * यथा–ईषन्नियमः । दुःप्रमयः । सुविलयः । निमयः । मयः । लयः ॥

३३०६ उपसर्गात् खल्घञोः ।७।१।६७॥

उपसर्गादेव लभेर्नुम् स्यात् । ईषत्प्रलम्भः । दुष्प्रलम्भः । सुप्रलम्भः । उपालम्भः । उपसर्गात्किम् । ईषल्लभः । लाभः ॥

३३०६–खल् और घञ् प्रत्यय परे रहते उपसर्गपूर्वक ही, लभ् धातुके उत्तर नुम्का आगम हो, यथा–ईषत्प्रलम्भः। दुष्प्रलम्भः । सुप्रलम्भः । उपालम्भः । जिस स्थानमें उपसर्गपूर्वक नहीं होगा, उस स्थानमें ईषल्लभः । लाभः। ऐसा होगा ॥

३३०७ न सुदुर्भ्यां केवलाभ्याम् । ७ । १ । ६८ ॥

उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम्न स्यात् खल्घञोः । सुलभम् । दुर्लभम् । केवलाभ्यां किम् । सुप्रलम्भः । अतिदुर्लम्भः । कथं तर्हि अतिसुलभमतिदुर्लभमिति । यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति ॥

३३०७–खल् और घञ् प्रत्यय परे रहते उपसर्गान्तरसे रहित सु और दुर् उपसर्गके परे स्थित लभ् धातुके नुम्का आगम न हो, सुलभम् । दुर्लभम् । जिस स्थानमें उपसर्गान्तरसे रहित नहीं होगा, उस स्थानमें सुप्रलम्भः । अतिदुर्लम्भः । उपसर्गान्तरसे रहित ही सु और दुर् उपसर्गके परे स्थित लभ् धातुको नुम्का निषेध होनेसे ' अतिसुलभम्' और 'अतिदुर्लभम्' यह पद किस प्रकारसे सिद्ध हुए ? तो जिस स्थानमें सु और अति शब्दकी कर्म्मप्रवचनीय संज्ञा होगी, उस स्थानमें उक्त पद सिद्ध होंगे ॥

३३०८ कर्तृकर्मणोश्च भूकृञोः । ३ । ३ । १२७ ॥

कर्तृकर्मणोरीषदादिषु च उपपदेषु भूकृञोः । खल् स्यात् । यथासंख्यं नेष्यते । कर्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये ईषदादयस्तु ततः

प्राक् ॥ कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्॥*॥ खित्वान्मुम् । अनाढ्येनाढ्येन दुःखेन भूयते दुराढ्यम्भवम् । ईषदाढ्यम्भवम् । स्वाढ्यम्भवम् । ईषदाढ्यङ्करः । दुराढ्यङ्करः । स्वाढ्यंकरः । च्व्यर्थयोः किम् । आढ्येन सुभूयते ॥

३३०८–कर्त्ता, कर्म्म और ईषत्, दुस् और सु शब्द उपपद होनेपर भू और कृञ् धातुके उत्तर खल् प्रत्यय हो । इस स्थानमें ग्रन्थकारने क्रमकी इच्छा नहीं कीहै । कर्त्ता और कर्म्मको धातुके अव्यवधानसे प्रयोग करना चाहिये । ईषदादि शब्दको तो उसके पश्चात् प्रयोग करना चाहिये ।

कर्ता और कर्म्म च्वि प्रत्ययार्थक हो तो उक्तकार्य्य हो ऐसा कहना चाहिये * खित्वके कारण मुम्का आगम होगा, यथा–अनाढ्येनाढ्येन दुःखेन भूयते, इस विग्रहमें दुराढ्यम्भवम् । ईषदाढ्यम्भवम् । स्वाढ्यम्भवम् । ईषदाढ्यंकरः । दुराढ्यंकरः । स्वाढ्यंकरः । जिस स्थानमें च्वि प्रत्ययार्थक कर्त्ता और कर्म्म नहीं होगा, उस स्थानमें 'आढ्येन सुभूयते' इस प्रकार होगा ॥

३३०९ आतो युच् । ३ । ३ । १२८ ॥

खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः ॥ भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः ॥ * ॥ दुःशासनः । दुर्योधन इत्यादि ॥

३३०९–आकारान्त धातुके उत्तर युच् प्रत्यय हो, यह प्रत्यय खल् प्रत्ययका विशेषक है, यथा–ईषत् पानः सोमो भवता । दुष्पानः । सुपानः ।

"भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज् वाच्यः" अर्थात् भाषामें शास्, युध्, दृश्, धृष् और मृष् धातुके उत्तर युच् प्रत्यय हो * यथा–दुःशासनः । दुर्योधनः । इत्यादि ॥

३३१० षात्पदान्तात् । ८ । ४ ।३५॥

नस्य णो न । निष्पानम् । सर्पिष्पानम् । षात्किम् । निणयः । पदान्तात्किम् । पुष्णाति । पदे अन्तः पदान्तः इति सप्तमीसमासोयम् । तेनेह न । सुसर्पिष्केण ॥

३३१०–अडादि व्यवधान रहते भी पदान्त षकारके परे स्थित नकारको णत्व न हो, निष्पानम् । सर्पिष्पानम् । षकारके परे न होनेसे निर्णयः । जिस स्थानमें पदान्त षकारके परे नहीं होगा, उस स्थानमें पुष्णाति । "पदेऽन्तः=पदान्तः" इस प्रकार यह पद सप्तमीतत्पुरुषसमाससे निष्पन्न है, इस कारण इस स्थानमें णत्वनिषेध नहीं हुआ, यथा–सुसर्पिष्केण ॥

३३११ आवश्यकाधमर्ण्ययोर्णिनिः । ३ । ३ । १७० ॥

अवश्यंकारी । शतन्दायी ॥

३३११–आवश्यक और अधमर्ण अर्थ होनेपर धातुके उत्तर णिनि प्रत्यय हो, अवश्यङ्कारी । शतन्दायी ॥

३३१२ कृत्याश्च । ३ । ३ । १७१ ॥

आवश्यकाधमर्ण्ययोरित्येव । अवश्यं हरिः सेव्यः । शतं देयम् ॥

३३१२–आवश्यक और अधमर्ण अर्थ होनेपर धातुके उत्तर कृत्य प्रत्यय हो, अवश्यं हरिः सेव्यः । शतन्देयम् ॥

३३१३ क्तिच्क्तौ च संज्ञायाम् । ३ । ३ । १७४ ॥

धातोः क्तिच् क्तश्च स्यादाशिषि संज्ञायाम् । तितुत्रेति नेट् । भवतात् भूतिः ॥

३३१३–आशीर्वादार्थमें संज्ञा होनेपर धातुके उत्तर क्तिच् और क्त प्रत्यय हो, "तितुत्रेति०३१६३"इस सूत्रसे इट् निषेध होकर–यथा–भवतात्=भूतिः ॥

३३१४ न क्तिचि दीर्घश्च । ६ ।४।३९॥

अनिटां वनतितनोत्यादीनां च दीर्घानुनासिकलोपौ न स्तः क्तिचि परे । यन्तिः । रन्तिः । वन्तिः । तन्तिः ॥

३३१४–क्तिच प्रत्यय परे रहते आनिट् धातु और वन् तथा तनादि धातुओंको दीर्घ और अनुनासिक वर्णका लोप न हो, यथा–यन्तिः, रन्तिः, वन्तिः, तन्तिः ॥

३३१५ सनः क्तिचि लोपश्चास्याऽन्यतरस्याम् । ६ । ४ । ४५ ॥

सनोतेः क्तिचि आत्वं वा स्याल्लोपश्च वा । सनुतात् । सातिः । सतिः । सन्तिः । देवा एनं देयासुर्देवदत्तः ॥

३३१५–क्तिच् प्रत्यय परे रहते सन धातुको आकार हो विकल्प करके, और धातुके नकारका लोप हो विकल्प करके, यथा–सनुतात्, इस विग्रहमें सातिः,सतिः, सन्तिः । देवा एनं देयासुः देवदत्तः ॥

३३१६ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा । ३ । ४ । १८ ॥

प्रतिषेधार्थयोरलङ्खल्वोरुपपदयोः क्त्वा स्यात् प्राचां ग्रहणं पूजार्थम् । अमैवाव्ययेनेतिनियमान्नोपपदसमासः । दोदद्धोः । अलं दत्त्वा । घुमास्था । पीत्वा खलु । अलंखल्वोः किम् । मा कार्षीत् । प्रतिषेधयोः किम् । अलंकारः ॥

३३१६–प्रतिषेधार्थक अलम् और खलु शब्द उपपद होनेपर अर्थात् पूर्वमें रहते धातुके उत्तर क्त्वा प्रत्यय हो,सूत्रमें 'प्राचाम्' इस पदका ग्रहण पूजार्थ जानना " अमैवाव्ययेन ७८३ " इस नियमके कारण उपपदसमास नहीं होगा । "दो दद् घोः ३०७७ " इस सूत्रसे दा धातुके स्थानमें दद्

आदेश हुआ, यथा–अलं दत्त्वा । "घुमास्था० २४६२" इस सूत्रसे धातुके आकारके स्थानमें ईकार होकर–पीत्वा खलु । अलम् और खलु शब्द उपपद न होनेपर क्त्वा प्रत्यय नहीं होगा, यथा–मा कार्षीत् । प्रतिषेधार्थक न होनेपर क्त्वा प्रत्यय नहीं होगा, यथा–अलङ्कारः (भूषण) ॥

३३१७ उदीचां माङो व्यतीहारे । ३ । ४ । १९ ॥

व्यतीहारेऽर्थे माङः क्त्वा स्यात् । अपूर्वकालार्थमिदम् ॥

३३१७–व्यतीहारार्थमें माङ् धातुके उत्तर क्त्वा प्रत्यय हो, यह सूत्र पूर्वकालार्थक नहीं है–॥

३३१८ मयतेरिदन्यतरस्याम् । ६ । ४ । ७० ॥

मेङ इकारोन्तादेशः स्याद्वा ल्यपि । अपमित्य याचते । अपमाय । उदीचां ग्रहणाद्यथाप्राप्तमपि । याचित्वा अपमयते ॥

३३१८–मेङ् धातुके एकारके स्थानमें इकार आदेश हो विकल्प करके ल्यप् प्रत्यय परे रहते, यथा–अपमित्य याचते । अपमाय । 'उदीचाम्' इस पदका ग्रहण करनेके कारण यथाप्राप्त अन्य प्रत्यय भी होंगे, यथा–याचित्वा अपमयते॥

३३१९ परावरयोगे च । ३ । ४ । २० ॥

परेण पूर्वस्यावरेण परस्य योगे गम्ये धातोः क्त्वा स्यात् । अप्राप्य नदीं पर्वतः।परनदीयोगोऽत्र पर्वतस्य । अतिक्रम्य पर्वतं स्थिता नदी । अवरपर्वतयोगोऽत्र नद्याः ॥

३३१९–परके साथ पूर्वका और अवरके साथ परका योग गम्य होनेपर धातुके उत्तर क्त्वा प्रत्यय हो, यथा–अप्राप्य नदीं पर्वतः, इस स्थानमें पर्वतका पर नदीके साथ योग है । अतिक्रम्य पर्वतं स्थिता नदी, इस स्थलमें नदीका अवर पर्वतके साथ योग है ॥

३३२० समानकर्तृकयोः पूर्वकाले । ३ । ४ । २१ ॥

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् । क्त्वा तु अव्ययकृतो भावे । भुक्त्वा व्रजति । द्वित्वमतन्त्रम् । स्नात्वा भुक्त्वा पीत्वा व्रजति । अनुदात्तेत्यनुनासिकलोपः । विष्णुं नत्वा स्तौति । स्वरत्यादेः श्र्युकः क्तितीति नित्यमिडभावः पूर्वविप्रतिषेधेन । स्तृत्वा । सूत्वा । धूत्वा ॥

३३२०–एककर्तृक धात्वर्थके मध्य पूर्वकालमें विद्यमान जो धातु उसके उत्तर क्त्वा प्रत्यय हो, 'अव्ययकृतो भावे' इस सूत्रसे भाववाच्यमें क्त्वा प्रत्यय होगा, यथा–भुक्त्वा व्रजति। सूत्रमें द्विवचन विवक्षित नहीं है, इससे स्नात्वा, भुक्त्वा, पीत्वा व्रजति । "अनुदात्त० २४२८" इस सूत्रसे अनुनासिक वर्णका लोप होकर–विष्णुं नत्वा स्तौति । स्तृ आदि धातुओंको "श्र्युकः किति २३८१" इस सूत्रसे नित्य इट्का अभाव पूर्वविप्रतिषेधसे होकर–स्तृत्वा । सूत्वा । धूत्वा ॥

३३२१ क्त्वि स्कन्दिस्यन्दोः । ६ । ४ । ३१ ॥

एतयोर्नलोपो न स्यात् क्त्वि परे । स्कन्त्वा । ऊदित्त्वाद्विड्वा । स्यन्दित्वा । स्यन्त्वा ॥

३३२१–क्त्वा प्रत्यय परे रहते स्कन्द और स्यन्द धातुके नकारका लोप न हो, यथा–स्कन्त्वा । ऊकार इत् होनेके कारण स्यन्द धातुके उत्तर इट् विकल्प करके होगा, यथा–स्यन्दित्वा, स्यन्त्वा ॥

३३२२ न क्त्वा सेट् । १ । २ । १८ ॥

सेट् क्त्वा किन्न स्यात् । शयित्वा । सेट् किम् । कृत्वा ॥

३३२२–इट्के साथ विद्यमान जो क्त्वा प्रत्यय वह कित् न हो, यथा–शयित्वा । जिस स्थानमें सेट् नहीं होगा, उस स्थलमें कित्वनिषेध नहीं होगा, यथा–कृत्वा ॥

३३२३ मृडमृदगुधकुषक्लिशवदवसः क्त्वा । १ । २ । ७ ॥

एभ्यः सेट् क्त्वा कित् । मृडित्वा । क्लिशः क्त्वेति वेट् । क्लिशित्वा । क्लिष्ट्वा । उदित्वा । उषित्वा । रुदविदेति कित्वम् । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ॥

३३२३–मृड्, मृद्, गुध्, कुष्, क्लिश्, वद् और वस् धातुओंके उत्तर सेट् क्त्वा प्रत्यय कित् हो, यथा–मृडित्वा । "क्लिशः क्त्वा ३०४९" इस सूत्रसे विकल्प करके इट् होकर क्लिशित्वा, क्लिष्ट्वा । उषित्वा । उदित्वा । "रुदविद० २६०९" इस सूत्रसे कित्व होकर रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ॥

३३२४ नोपधात्थफान्ताद्वा । १ । २ । २३ ॥

सेट् क्त्वा कित्स्याद्वा । श्रथित्वा । श्रन्थित्वा । गुफित्वा । गुम्फित्वा । नोपधात्किम् । कोथित्वा । रेफित्वा ॥

३३२४–नकारोपध थकारान्त और फकारान्त धातुओंके उत्तर सेट् क्त्वा प्रत्यय कित् हो विकल्प करके, यथा-श्रथित्वा, श्रन्थित्वा। गुफित्वा, गुम्फित्वा । नकारोपध धातु न होनेपर कित्व नहीं होगा, अत एव गुण होकर–कोथित्वा रेफित्वा ॥

३३२५ वञ्चिलुञ्च्यृतश्च । १ । २ । २४ ॥

सेट् क्त्वा किद्वा । वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । ऋतित्वा । अर्तित्वा ॥

३३२५–वञ्च्, लुञ्च्, ऋत् धातुओंके उत्तर सेट् क्त्वा प्रत्ययकी विकल्प करके कित्व हो, यथा–वचित्वा, वञ्चित्वा । लुचित्वा, लुञ्चित्वा । ऋतित्वा, अर्तित्वा ॥

३३२६ तृषिमृषिकृशेः काश्यपस्य। १।२।२५॥

एभ्यः सेट् क्त्वा किद्वा। तृषित्वा। तर्षित्वा। मृषित्वा। मर्षित्वा। कृशित्वा। कर्शित्वा। रलो व्युपधादिति वा कित्त्वम्। द्युतित्वा। द्योतित्वा। लिखित्वा। लेखित्वा। रलः किम्। सेवित्वा। व्युपधात्किम्। वर्तित्वा। हलादेः किम्। एषित्वा। सेट् किम्। भुक्त्वा। वसतिक्षुधोरिट्। उषित्वा। क्षुधित्वा। क्षोधित्वा। अञ्चेः पूजायामिति नित्यमिट्। अञ्चित्वा। गतौ तु। अक्त्वेत्यपि। लुभित्वा। लोभित्वा। लुभोऽविमोहन इतीट्। विमोहने तु लुब्ध्वा॥

३३२६–काश्यपमुनिके मतसे तृष्, मृष्, कृश् इन तीन धातुओंके उत्तर सेट् क्त्वा प्रत्ययको कित्त्व हो, यथा–तृषित्वा, तर्षित्वा। मृषित्वा, मर्षित्वा। कृशित्वा, कर्शित्वा। "रलो व्युपधात्० २६१७" इस सूत्रसे विकल्प करके कित्त्व होकर–द्युतित्वा, द्योतित्वा। लिखित्वा, लेखित्वा।

जिस स्थानमें रलन्त धातुके परे नहीं होगा, उस स्थानमें कित्त्व नहीं होगा, यथा–सेवित्वा।

इकारोपध और उकारोपध न होनेसे कित्त्व न होकर–वर्त्तित्वा। हलादि न होनेसे कित्त्व नहीं होकर–एषित्वा। सेट् अर्थात् इट्के साथ युक्त क्त्वा प्रत्यय न होनेसे कित्त्व नहीं होकर–भुक्त्वा॥

"वसतिक्षुधोरिट् ३०४६" इस सूत्रसे वस् और क्षुध् धातुके उत्तर क्त्वा प्रत्ययको इट् होकर–उषित्वा। क्षुधित्वा, क्षोधित्वा। "अञ्चेः पूजायाम् ३०४७" इससे पूजार्थक अञ्च् धातुके उत्तर नित्य इट् होकर–अञ्चित्वा। गत्यर्थक अञ्च् धातुके उत्तर इट् नहीं होगा, यथा–अक्त्वा। "लुभोऽविमोहने ३०४८" इस सूत्रसे अविमोहनार्थमें इट् होकर–लुभित्वा, लोभित्वा। विमोहनार्थमें तो इट् नहीं होगा, यथा–लुब्ध्वा॥

३३२७ जॄव्रश्च्योः क्त्वि। ७।२।५५॥

आभ्यां परस्य क्त्व इट् स्यात्। जरीत्वा। जरित्वा। व्रश्चित्वा॥

३३२७–जॄ और व्रश्च् धातुके उत्तर क्त्वा प्रत्ययको इट् हो, यथा–जरीत्वा, जरित्वा। व्रश्चित्वा॥

३३२८ उदितो वा। ७।२।५६॥

उदितः परस्य क्त्व इड्वा। शमित्वा। अनुनासिकस्य क्वीति दीर्घः। शान्त्वा। देवित्वा। द्यूत्वा॥

३३२८–उदित् धातुके उत्तर क्त्वा प्रत्ययको विकल्प करके इट् हो, शमित्वा। "अनुनासिकस्य क्विप्० २६६६" इस सूत्रसे दीर्घ होकर शान्त्वा। देवित्वा, द्यूत्वा॥

३३२९ क्रमश्च क्त्वि। ६।४।१८॥

क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे। क्रान्त्वा। क्रन्त्वा। झलि किम्। क्रमित्वा। पूङश्चेति वेट्। पवित्वा। पूत्वा॥

३३२९–झलादिक्त्वा प्रत्यय परे रहते क्रम् धातुकी उपधाको विकल्प करके दीर्घ हो, यथा–क्रान्त्वा, क्रन्त्वा। झलादि न होनेपर 'क्रमित्वा' इस प्रकार होगा। "पूङश्च ३०५०" इस सूत्रसे विकल्प करके इट् होकर–पवित्वा, पूत्वा॥

३३३० जान्तनशां विभाषा। ६।४।३२॥

जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि परे। भक्त्वा। भङ्क्त्वा। रक्त्वा। रङ्क्त्वा। मस्जिनशोरिति नुम्। तस्य पक्षे लोपः। नष्ट्वा। नंष्ट्वा। रधादिभ्यश्चेतीट्पक्षे। नशित्वा। झलादाविति वाच्यम्। नेह। अञ्जित्वा। ऊदित्त्वाद्वेट्। पक्षे। अक्त्वा। अङ्क्त्वा। जनसनखनां सञ्झलोरित्यात्त्वम्। खात्वा। खनित्वा। द्यतिस्यतीतीत्त्वम्। दित्वा। सित्वा। मित्वा। स्थित्वा। दधातेर्हिः। हित्वा॥

३३३०–क्त्वा प्रत्यय परे रहते जकारान्त धातु और नश धातुके नकारका विकल्प करके लोप हो, भक्त्वा, भङ्क्त्वा। रक्त्वा, रङ्क्त्वा। "मस्जिनशो० २५१७" इस सूत्रसे नुम् हुआ, उसका विकल्प करके लोप होकर–नष्ट्वा, नंष्ट्वा। "रधादिभ्यश्च २५१४" इस सूत्रसे इट् पक्षमें 'नशित्वा' इस प्रकार रूप होगा।

"झलादाविति वाच्यम्" अर्थात् झलादि क्त्वा प्रत्यय परे रहते विकल्प करके नकारका लोप हो ऐसा कहना चाहिये *। इससे यहां नहीं हुआ, यथा–अञ्जित्वा, यहां ऊकार इत् होनेके कारण विकल्प करके इट् हुआ है। इट्के विकल्पपक्षमें अक्त्वा, अङ्क्त्वा। "जनसन० २५०४" इस सूत्रसे धातुको आकार होकर, यथा–खात्वा, खनित्वा। "द्यतिस्यति० ३०७४" इस सूत्रसे इकार होकर–दित्वा। सित्वा। मित्वा। स्थित्वा। "दधातेर्हि० २०७६" इस सूत्रसे धा धातुके स्थानमें हि आदेश होकर–हित्वा॥

३३३१ जहातेश्च क्त्वि। ७।४।४३॥

हित्वा। हाङस्तु। हात्वा। अदो जग्धिः। जग्ध्वा॥

३३३१–ओहाक् धातुको क्त्वा प्रत्यय परे रहते हि आदेश हो, यथा–हित्वा। हाङ् धातुका तो 'हात्वा' ऐसा पद होगा। "अदो जग्धि: ३०८०" इस सूत्रसे अद् धातुको जग्धि आदेश होकर–यथा–जग्ध्वा॥

३३३२ समासेऽनञ्पूर्वे क्त्वो ल्यप्। ७।१।३७॥

अव्ययपूर्वपदे अनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। अनञ् किम्। अकृत्वा। पर्युदासाश्रयणान्नेह। परमकृत्वा॥

३३३२-अव्यय पूर्वपदक नञ् भिन्न तत्पुरुष समास होनेपर क्त्वा प्रत्ययके स्थानमें ल्यप् आदेश हो,तुक् आगम होकर-यथा-प्रकृत्य । नञ्तत्पुरुष समास होनेपर ल्यप् नहीं होगा, यथा-अकृत्वा । पर्युदास नञ्के आश्रयणके कारण यहां भी ल्यबादेश नहीं हुआ, यथा-परमकृत्वा ॥

३३३३ षत्वतुकोरसिद्धः ।६। १ । ८६॥

षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात् । कोऽसिचत् । इह षत्वं न । अधीत्य । प्रेत्य । ह्रस्वस्येति तुक् ॥

३३३३-षत्व और तुक् कर्त्तव्य रहते एकादेशशास्त्र असिद्ध हो, इससे कोऽसिचत्, इस स्थानमें षत्व नहीं हुआ । अधीत्य । प्रेत्य यहां "ह्रस्वस्य० २८५८" इस सूत्रसे तुक् आगम हुआहै ॥

३३३४ वा ल्यपि । ६ । ४ । ३८ ॥

अनुदात्तोपदेशानां वनतितनोत्यादीनामनुनासिकलोपो वा स्याल्ल्यपि। व्यवस्थितविभाषेयम्।तेन मान्तानिटां वा नान्तानिटां वनादीनां च नित्यम् । आगत्य । आगम्य । प्रणत्य । प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य । वितत्य । अदो जग्धिः । अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते । जग्धिविधौ ल्यब्ग्रहणात् । तेन हित्वदत्त्वाऽऽत्वेत्त्वदीर्घत्वशूठिटो ल्यपि न । विधाय। प्रदाय। प्रखन्य । प्रस्थाय । प्रक्रम्य । आपृच्छ्य । प्रदीव्य ।

३३३४-ल्यप् प्रत्यय पर रहते नुदात्तोपदश धातु और वन् धातु और तनादि धातुओंके विकल्प करके अनुनासिकका लोप हो, यह व्यवस्थित विभाषा है, इससे यह फल हुआ कि, मान्त अनिट धातुके अनुनासिक वर्णका विकल्प करके लोप और नान्त अनिट् धातुओंके और वन आदि धातुओंके अनुनासिक वर्णका नित्य लोप होगा, यथा-आगत्य, आगम्य । प्रणत्य, प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य । वितत्य । "अदो जग्धिः ३०८०" इस सूत्रसे अद धातुके स्थानमें जग्धि आदेश हो । जग्ध्यादेशकी विधिमें ल्यप् ग्रहणके कारण ल्यप् आदेश बहिरङ्ग होनेपर भी अन्तरङ्ग विधिको बाध करताहै, इससे यह फल हुआ कि, ल्यप् परे हि आदेश दत्व, आत्व, इत्व, दीर्घ, शूठ् और इट् यह सम्पूर्ण कार्य्य नहीं होंगे, यथा-विधाय । प्रदाय । प्रखन्य । प्रस्थाय । प्रक्रम्य । आपृच्छ्य । प्रदीव्य ॥

३३३५ न ल्यपि । ६ । ४ । ६९ ॥

ल्यपि परे घुमास्थादेरीत्वं न । धेट् । प्रधाय। प्रमाय । प्रगाय । प्रपाय । प्रहाय । प्रसाय । मीनातिमिनोतीत्यात्त्वम् । प्रमाय । निमाय । उपदाय । विभाषा लीयतेः । विलाय । विलीय । णिलोपः । उत्तार्य । विचार्य ॥

३३३५-ल्यप् प्रत्यय परे रहते घुसंज्ञक और मा और स्था आदि धातुओंको ईकार नहीं हो, धेट् प्रधाय । प्रमाय । प्रगाय । प्रपाय । प्रहाय । प्रसाय । "मीनाति मिनोति० २५०८" इस सूत्रसे आत्त्व होकर-प्रमाय । निमाय । उपदाय । "विभाषा लीयतेः २५०९" इस सूत्रसे विकल्प करके आत्व होकर-विलाय, विलीय । णिका लोप होकर-उत्तार्य्य । विचार्य ॥

३३३६ ल्यपि लघुपूर्वात् । ६ ।४।५६॥

लघुपूर्वात्परस्य णेरयादेशः स्यात् ल्यपि । विगणय्य । प्रणमय्य । प्रवेभिदय्य । लघुपूर्वात्किम् । संप्रधार्य ॥

३३३६-ल्यप् प्रत्यय परे रहते लघुपूर्वक धातुके परे जो णि उसके स्थानमें अय आदेश हो, विगणय्य । प्रणमय्य । प्रवेभिदय्य । जिस स्थानमें लघुपूर्वक नहीं होगा उस स्थानमें अयादेश न होकर-'सम्प्रधार्य्य' इस प्रकार होगा ॥

३३३७ विभाषापः । ६ । ४ । ५७ ॥

आप्नोतेर्णेरयादेशो वा स्यात् ल्यपि ।प्रापय्य । प्राप्य ॥

३३३७-ल्यप् प्रत्यय परे रहते आप् धातुके परे स्थित णिके स्थानमें विकल्प करके अय आदेश हो, यथा-प्रापय्य, प्राप्य ॥

३३३८ क्षियः । ६ । ४ । ५९ ॥

क्षियो ल्यपि दीर्घः स्यात् । प्रक्षीय ॥

३३३८-ल्यप् प्रत्यय परे रहते क्षि धातुके इकारको दीर्घ हो, प्रक्षीय ॥

३३३९ ल्यपि च । ६ । १ । ४१ ॥

वेञो ल्यपि संप्रसारणं न स्यात् । प्रवाय ।

३३३९-ल्यप् प्रत्यय परे रहते वेञ् धातुको सम्प्रसारण न हो, प्रवाय ॥

३३४० ज्यश्च । ६ । १ । ४२ ॥

प्रज्याय ॥

३३४०-ल्यप् प्रत्यय परे रहते ज्या धातुको सम्प्रसारण हो, प्रज्याय ॥

३३४१ व्यश्च । ६ । १ । ४३ ॥

उपव्याय ॥

३३४१-ल्यप् प्रत्यय परे रहते व्येञ् धातुको सम्प्रसारण न हो, उपव्याय ॥

३३४२ विभाषा परेः । ६ । १ । ४४ ॥

परेर्व्येञो वा संप्रसारणं स्याल्ल्यपि । तुकं बाधित्वा परत्वाद्धल इति दीर्घः । परिवीय । परिव्याय । कथं मुखं व्यादाय स्वपिति, नेत्रे निमील्य हसतीति।व्यादानसंमीलनोत्तरकालेऽपि स्वापहासयोरनुवृत्तेस्तदंशविवक्षया भविष्यति ॥

३३४२ल्यप् प्रत्यय परे रहते परिपूर्वक व्येञ् धातुको विकल्प करके सम्प्रसारण हो, तुक्को बाधकर परत्वके कारण " हलः २५५९ " इस सूत्रसे दीर्घ होकर–परिवीय, परिव्याय।

मुखव्यादान और नेत्रनिमीलनको स्वाप् और हासके बाद होनेके कारण पूर्वकाल विशिष्टार्थ वृत्ति धातुको न होनेसे किस प्रकार ' मुखं व्यादाय स्वपिति ' यह प्रयोग और "नेत्रे निमील्य हसति" यह प्रयोग सिद्ध हुए? तो व्यादान और सम्मीलनके उत्तरकालमें भी निद्रा और हासके संबन्धके कारण उस अंशकी विवक्षासे होगा॥

३३४३ आभीक्ष्ण्ये णमुल् च।३।४।२२॥

पौनःपुन्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा च। द्वित्वम्। स्मारंस्मारं नमति शिवम्। स्मृत्वास्मृत्वा। पायंपायम्। भोजंभोजम्। श्रावंश्रावम्। चिण्णमुलोरिति णमुल्परे णौ वा दीर्घः। गामंगामम्। विभाषाचिण्णमुलोरिति नुम् वा। लम्भंलम्भम्। लाभंलाभम्। व्यवस्थितविभाषया उपसृष्टस्य नित्यं नुम्। प्रलम्भंप्रलम्भम्। जाग्रोऽविचिण्णिति गुणः। जागरंजागरम्। ण्यन्तस्याप्येवम्॥

३३४३–पौनःपुन्य अर्थ द्योत्य होनेपर पूर्वविषयमें णमुल् और क्त्वा प्रत्यय हो, द्वित्व होकर–स्मारंस्मारं नमति शिवम्। स्मृत्वास्मृत्वा। पायंपायम्। भोजंभोजम्। श्रावंश्रावम्। "चिण्णमुलोः० २७६२" इस सूत्रसे णमुल्परक णि प्रत्यय परे रहते विकल्प करके दीर्घ होकर–गामंगामम्। गमंगमम्। विभाषा चिण्णमुलोः २७६५" इस सूत्रसे विकल्प करके नुम् होकर–लम्भंलम्भम्। लाभंलाभम्। व्यवस्थित विभाषासे उपसर्गविशिष्ट लभ् धातुको नित्य नुम् होकर–प्रलम्भंप्रलम्भम्। "जाग्रोऽविचिण्० २४८० " इस सूत्रसे गुण होकर–जागरंजागरम्। णिजन्तके भी इसी प्रकार रूप होंगे॥

३३४४ न यद्यनाकाङ्क्षे। ३। ४।२३॥

यच्छब्दे उपपदे पूर्वकाले यत्प्राप्तं तन्न यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षते चेत्। यदयं भुङ्क्ते ततः पठति। इह क्त्वाणमुलौ न। अनाकाङ्क्षे किम्। यदयं भुक्त्वा व्रजति ततोऽधीते॥

३३४४–जिस वाक्यमें पूर्व और उत्तर कालाभिधायी क्रिया है, वह वाक्य यदि अपर वाक्यकी आकांक्षा न करे तो यत् शब्द उपपद होनेपर पूर्वकालमें प्राप्त क्त्वा और णमुल् प्रत्यय नहीं हो, यदयं भुंक्ते ततः पठति। इस स्थानमें क्त्वा वा णमुल् प्रत्यय नहीं हुआ। अनाकांक्षे क्यों कहा? तो भुक्त्वा व्रजति ततोऽधीते॥

३३४५ विभाषाग्रे प्रथमपूर्वेषु।३।४।२४॥

आभीक्ष्ण्ये इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः। अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमम्भोजम्। प्रथमम्भुक्त्वा। पूर्वम्भोजम्। पूर्वम्भुक्त्वा। पक्षे लडादयः। अग्रे भुङ्क्ते ततो व्रजति। आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव विधिः। अग्रे भोजम्भोजं व्रजति। भुक्त्वाभुक्त्वा॥

३३४५–इस सूत्रमें पौनःपुन्य अर्थकी अनुवृत्ति नहीं होती है। अग्रे, प्रथम और पूर्व यह तीन उपपद रहते एककर्तृक धातुके उत्तर पूर्वकाल विषयमें विकल्प करके क्त्वा और णमुल् प्रत्यय हो, यथा–अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमं भोजम्। प्रथमं भुक्त्वा। पूर्वं भोजम्। पूर्वं भुक्त्वा। विकल्प पक्षमें लट् आदि प्रत्यय होंगे, यथा–अग्रे भुंक्ते ततो व्रजति। पौनःपुन्य अर्थमें तो पूर्वविप्रतिषेधके कारण नित्य ही विधि हुई। यथा–अग्रे भोजंभोजं व्रजति। भुक्त्वाभुक्त्वा॥

३३४६ कर्मण्याक्रोशे कृञः खमुञ्। ३। ४। २५॥

कर्मण्युपपदे आक्रोशे गम्ये। चौरंकारमाक्रोशति। करोतिरुच्चारणे। चारशब्दमुच्चार्येत्यर्थः॥

३३४६–कर्म उपपद होनेपर और आक्रोश अर्थ गम्यमान होनेपर कृञ् धातुके उत्तर खमुञ् प्रत्यय हो, यथा–चौरंकारमाक्रोशति, इस स्थलमें कृ धातुका अर्थ उच्चारण समझना अत एव चौरंकारमाक्रोशति इसका चौर शब्द उच्चारण करके आक्रोश करताहै, ऐसा अर्थ हुआ॥

३३४७ स्वादुमि णमुल्। ३। ४।२६॥

स्वाद्वर्थेषु कृञो णमुल् स्यादेककर्तृकयोः पूर्वकाले। पूर्वपदस्य मान्तत्वं निपात्यते। अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते। संपन्नंकारम्। लवणंकारम्। संपन्नलवणशब्दौ स्वादुपर्यायौ। वासरूपेण क्त्वापि। स्वादुं कृत्वा भुङ्क्ते॥

३३४७–स्वाद्वर्थक शब्द उपपद होनेपर एककर्तृक धात्वर्थके पूर्वकालविषयमें कृञ् धातुके उत्तर णमुल् प्रत्यय हो, पूर्वपदको मान्तत्व निपातनसे सिद्ध होकर, यथा–अस्वादुं स्वादुं कृत्वा भुंक्ते, इस विग्रहमें स्वादुङ्कारं भुंक्ते। सम्पन्नंकारम्। लवणंकारम्। सम्पन्न और लवण यह दो शब्द स्वादुपर्य्याय हैं। वासरूपविधिसे क्त्वा प्रत्यय भी होगा, यथा–स्वादुं कृत्वा भुंक्ते॥

३३४८ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्। ३। ४। २७॥

एषु कृञो णमुल् स्यात् सिद्धः अप्रयोगोऽस्य एवंभूतश्चेत् कृञ्। व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः।

अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारं भुङ्क्ते । इत्थं भुङ्क्त इत्यर्थः । सिद्धेति किम् । शिरोऽन्यथा कृत्वा भुङ्क्ते ॥

३३४८-अन्यथा, एवम्, कथम्, और इत्थम् यह चार शब्द उपपद होनेपर कृञ् धातुके उत्तर णमुल् प्रत्यय हो, यदि यह कृञ् धातुका अप्रयोग सिद्ध हो तो, यथा-अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारं भुंक्ते, अर्थात् इस प्रकार भोजन करताहै । कृ धातुके प्रयोग सिद्ध होनेपर तो शिरोऽन्यथा कृत्वा भुंक्ते ॥

३३४९ यथातथयोरसूयाप्रतिवचने । ३ । ४ । २८ ॥

कृञः सिद्धाप्रयोग इत्येव असूयया प्रतिवचने । यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन ॥

३३४९-यथा और तथा उपपद होनेपर और असूयासे प्रतिवचन गम्य होनेपर सिद्धाप्रयोग कृञ् धातुके उत्तर णमुल् प्रत्यय हो, यथा-यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन ॥

३३५० कर्मणि दृशिविदोः साकल्ये । ३ । ४ । २९ ॥

कर्मण्युपपदे णमुल् स्यात् । कन्यादर्शं वरयति । सर्वाः कन्या इत्यर्थः । ब्राह्मणवेदं भोजयति । यंयं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः ॥

३३५०-कर्म उपपद होनेपर दृश् और विद् धातुके उत्तर साकल्यार्थमें णमुल् प्रत्यय हो, यथा-कन्यादर्शं वरयति, अर्थात् सम्पूर्ण कन्याओंको देखकर वरण करताहै । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयति इत्यर्थः ॥

३३५१ यावति विन्दजीवोः । ३ । ४ । ३० ॥

यावद्वेदं भुङ्क्ते । यावल्लभते । तावदित्यर्थः । यावज्जीवमधीते ॥

३३५१-यावत् शब्द उपपद होनेपर विन्द् और जीव् धातुके उत्तर णमुल् प्रत्यय हो, यथा-यावद्वेदं भुंक्ते । यावल्लभते तावदित्यर्थः । यावज्जीवमधीते ॥

३३५२ चर्मोदरयोः पूरेः । ३ । ४ । ३१ ॥

कर्मणीत्येव । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ॥

३३५२-चर्म और उदर शब्द उपपद होनेपर पूर धातुके उत्तर णमुल् प्रत्यय हो, यथा-चर्मपूरं स्तृणाति । उदरपूरं भुंक्ते ॥

३३५३ वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् । ३ । ४ । ३२ ॥

कर्मण्युपपदे पूरेर्णमुल् स्यादूकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये । गोष्पदपूरं वृष्टो देवः । गोष्पदप्रं वृष्टो देवः । अस्येति किम् । उपपदस्य माभूत् । मूषिकाबिलप्रम् ॥

३३५३-कर्म उपपद होनेपर पूर धातुके उत्तर णमुल् प्रत्यय हो, और धातुके ऊकारका विकल्प करके लोप हो, यदि समुदायसे वर्षप्रमाण गम्य हो तो, यथा-गोष्पदपूरं वृष्टो देवः । गोष्पदप्रं वृष्टो देवः । सूत्रमें "अस्य" ऐसा क्यों कहा ? तो उपपदके ऊकारका लोप नहीं हो, यथा-मूषिकाबिलप्रम् ॥

३३५४ चेले क्नोपेः । ३ । ४ । ३३ ॥

चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल् स्याद्वर्षप्रमाणे । चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ॥

३३५४-वर्षाका प्रमाण होनेपर चेलार्थक कर्म उपपद रहते क्नुप् धातुके उत्तर णमुल् प्रत्यय हो, यथा-चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् ॥

३३५५ निमूलसमूलयोः कषः । ३ । ४ । ३४ ॥

कर्मणीत्येव । कषादिष्वनुप्रयोगं वक्ष्यति । अत्र प्रकरणे पूर्वकाल इति न सम्बध्यते । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषतीत्यर्थः । एकस्यापि धात्वर्थस्य निमूलादिविशेषणसंबन्धाद्भेदः । तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः ॥

३३५५-निमूल और समूल यह दो कर्म उपपद होनेपर कष् धातुके उत्तर णमुल् प्रत्यय हो, कषादिविषयमें अनुप्रयोग पश्चात् कहेंगे । इस प्रकरणमें पूर्वकालका संबन्ध नहीं होताहै । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषतीत्यर्थः । धात्वर्थ एक होनेपर भी निमूलादि विशेषण सम्बन्धसे भेद है, इस कारण सामान्यविशेषभावसे विशेषणको विशेष्यभाव हुआहै ॥

३३५६ शुष्कचूर्णरूक्षेषु पिषः । ३ । ४ । ३५ ॥

एषु कर्मसु पिषेर्णमुल् । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । चूर्णपेषम् । रूक्षपेषम् ॥

३३५६-शुष्क, चूर्ण और रूक्ष यह उपपद होनेपर पिष् धातुके उत्तर णमुल् प्रत्यय हो, यथा-शुष्कपेषं पिनष्टि । शुष्कं पिनष्टि इत्यर्थः । चूर्णपेषम् । रूक्षपेषम् ॥

३३५७ समूलाकृतजीवेषु हन्कृञ्ग्रहः । ३ । ४ ॥ ३६ ॥

कर्मणीत्येव । समूलघातं हन्ति । अकृतकारं करोति । जीवग्राहं गृह्णाति । जीवति इति जीवः । इगुपधलक्षणः कः । जीवन्तं गृह्णातीत्यर्थः ॥

३३५७-समूल,अकृत और जीव यह कर्म्म उपपद होनेपर यथाक्रमसे हन् कृञ् और ग्रह धातुके उत्तर णमुल् प्रत्यय हो । यथा, समूलघातं हन्ति । अकृतकारं करोति।जीवग्राहं गृह्णाति। जीवति इस विग्रहमें जीवः । "इगुपधज्ञाप्रीकिरः कः (२८९७)" इस सूत्रसे क प्रत्यय हुआ है। जीवन्तं गृह्णाति इत्यर्थः ॥

३३५८ करणे हनः । ३ । ४ । ३७ ॥

पादघातं हन्ति । पादेन हन्तीत्यर्थः । यथाविध्यनुप्रयोगार्थः सन्नित्यसमासार्थोयं योगः । भिन्नधातुसम्बन्धे तु हिंसार्थानां चेति वक्ष्यते॥

३३५८-करणवाचक पद उपपद होनेपर हन् धातुके उत्तर णमुल् प्रत्यय हो, यथा-पादघातं हन्ति । पादेन हन्तीत्यर्थः । यथाविधि अनुप्रयोग होकर नित्य समासार्थ यह पृथक् सूत्र विहित हुआहै । किन्तु इससे भिन्न धातु संबन्धमें "हिंसार्थानाञ्च (३३६९)" इस सूत्रको आगे कहेंगे ॥

३३५९ स्नेहने पिषः । ३।४। ३८॥

स्निह्यते येन तस्मिन् करणे पिषेर्णमुल् । उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः ॥

३३५९-जिसके द्वारा स्निग्ध हो ऐसा करण उपपद होनेपर पिष धातुके उत्तर णमुल् प्रत्यय हो, उदपेषं पिनष्टि उदकेन पिनष्टीत्यर्थः ॥

३३६० हस्ते वर्तिग्रहोः।३।४।३९॥

हस्तार्थे करणे । हस्तवर्तं वर्तयति । करवर्तम् , हस्तेन गुलिकां करोतीत्यर्थः । हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् ॥

३३६०-हस्त अर्थ हो ऐसा करण उपपद होनेपर वृत और ग्रह धातुके उत्तर णमुल् प्रत्यय हो, यथा-हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् ॥

३३६१ स्वे पुषः । ३ । ४ । ४०॥

करण इत्येव । स्व इत्यर्थग्रहणम् । तेन स्वरूपे पर्याये विशेषे च णमुल्। स्वपोषं पुष्णाति। धनपोषम् । गोपोषम् ॥

३३६१-स्वार्थमें करणवाचक पद उपपद होनेपर पुष धातुके उत्तर णमुल् प्रत्यय हो, इस स्थलमें स्वशब्दके अर्थका ही ग्रहण जानना चाहिये । उससे यह फल हुआ कि स्वशब्दका स्वरूप करण, पर्य्यायवाची करण और विशेषार्थ वाचक करण उपपद होनेपर पुष धातुके उत्तर णमुल् प्रत्यय हो, यथा-स्वपोषं पुष्णाति । धनपोषम् । गोपोषम् ॥

३३६२ अधिकरणे बन्धः । ३।४।४१॥

चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ॥

३३६२-अधिकरण वाचक पद उपपद होनेपर बन्ध धातुके उत्तर णमुल् प्रत्यय हो, यथा-चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ॥

३३६३ संज्ञायाम् । ३ । ४ । ४२ ॥

बध्नातेर्णमुल् संज्ञायाम् । क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धम् । अट्टालिकाबन्धम् । बन्धविशेषाणां संज्ञा एताः ॥

३३६३-संज्ञा अर्थ होनेपर बन्ध धातुके उत्तर णमुल् प्रत्यय हो, यथा-क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धम् । अट्टालिकाबन्धम् । यह बन्धविशेषोंकी संज्ञा हैं ॥

३३६४ कर्त्रोर्जीवपुरुषयोर्नशिवहोः । ३ । ४ । ४३ ॥

जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः ॥

३३६४-कर्तृवाचक जीव और पुरुष उपपद होनेपर क्रमसे नश और वह धातुके उत्तर णमुल् प्रत्यय हो, यथा, जीवनाशं नश्यति । जीवो नश्यति इत्यर्थः । पुरुषवाहं वहति । पुरुषो वहतीत्यर्थः ॥

३३६५ ऊर्ध्वे शुषिपूरोः । ३ ।४। ४४॥

ऊर्ध्वे कर्तरि । ऊर्ध्वशोषं शुष्यति । वृक्षादिरूर्ध्व एव तिष्ठञ्छुष्यतीत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वमुख एव घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः ॥

३३६५-ऊर्ध्वरूप कर्त्ता उपपद होनेपर शुष और पूरि धातुके उत्तर णमुल् प्रत्यय हो, यथा-ऊर्ध्वशोषं शुष्यति । वृक्षादिरूर्ध्व एव तिष्ठन् शुष्यति इत्यर्थः । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वमुख एव घटादिः वर्षोदकादिना पूर्णो भवति इत्यर्थः ॥

३३६६ उपमाने कर्मणि च ।३।४।४५॥

चात्कर्तरि । घृतनिधायं निहितं जलम् । घृतमिव सुरक्षितमित्यर्थः । अजकनाशं नष्टः । अजक इव नष्ट इत्यर्थः ॥

३३६६-उपमान वाचक कर्म्म और चकार निर्देशके कारण उपमान वाचक कर्त्ता उपपद होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-घृतनिधायं निहितं जलम् । घृतमिव सुरक्षितमित्यर्थः । अजकनाशं नष्टः । अजक इव नष्ट इत्यर्थः ॥

३३६७ कषादिषु यथाविध्यनुप्रयोगः । ३ । ४ । ४६ ॥

यस्माण्णमुलुक्तः स एवानुप्रयोक्तव्य इत्यर्थः। तथैवोदाहृतम् ॥

३३६७-कषादि विषयमें जिस धातुके उत्तर णमुल् प्रत्यय हो, उस धातुका अनुप्रयोग कर्त्तव्य है । इसी प्रकार उदाहरण दियाहै ॥

३३६८ उपदंशस्तृतीयायाम् ।३।४।४७॥

इतः प्रभृति पूर्वकाल इति संबध्यते । तृतीयाप्रभृतीन्यन्यतरस्यामिति वा समासः । मूलकोपदंशं भुंक्ते । मूलकेनोपदंशम् । दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीया।यद्यप्युपदंशिना सह न शाब्दः सम्बन्धस्तथाप्यार्थोऽस्त्येव कर्मत्वात्। एतावतैव सामर्थ्येन प्रत्ययः समासश्च । तृतीयायामिति वचनसामर्थ्यात् ॥

३३६८-इस सूत्रसे पूर्वकालका मण्डूकप्लुति करके अनुवृत्तिके कारण संबन्ध होगा। तृतीयान्त उपपद रहते समान कर्तृक धात्वर्थके मध्यमें पूर्व कालमें विद्यमान जो उपपूर्वक दंश धातु उसके उत्तर णमुल् प्रत्यय हो, "तृतीयाप्रभृतीन्यन्यतरस्याम् (७८४)" इस सूत्रसे विकल्प करके समास होगा, यथा-मूलकोपदंशं भुंक्ते मूलकेनोपदंशम् इस स्थलमें दश्यमान मूलकको भुजि क्रियामें करणत्वके कारण मूलक शब्दसे तृतीया विभक्ति हुई । यद्यपि उपदंशके साथ शाब्दसंबन्ध नहीं है तथापि कर्मत्वके कारण आर्थसंबंध है ही । "तृतीयायाम्"इस वचन सामर्थ्यके कारण प्रत्यय और समास होगा॥

३३६९ हिंसार्थानां च समानकर्मकाणाम् । ३ । ४ । ४८ ॥

तृतीयान्त उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थाण्णमुल् स्यात्। दण्डोपघातं गाः कालयति । दण्डेनोपघातम् । दण्डताडम् । समानकर्मकाणामिति किम् । दण्डेन चोरमाहत्य गाः कालयति ॥

३३६९-तृतीयान्त पद उपपद होनेपर अनु प्रयुक्त धातुके साथ एककर्म्मक जो हिंसार्थ धातु, उसके उत्तर णमुल् प्रत्यय हो, यथा दंडोपघातं गाः कालयति । दंडेनोपघातम् । दण्डताडम् । एककर्म्मक जिस स्थानमें नहीं होगा उस स्थानमें दण्डेन चौरमाहत्य गाः कालयति ॥

३३७० सप्तम्यां चोपपीडरुधकर्षः । ३ । ४ । ४९ ॥

उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल् स्यात् । पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडम् । पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति । व्रजेन व्रजे उपरोधं वा । पाण्युपकर्षं धानाः संगृह्णाति पाणावुपकर्षम् । पाणिनोपकर्षम् ॥

३३७०-सप्तम्यन्त और तृतीयान्त उपपद होनेपर उप-पूर्वक पीड, रुध, कृष इन धातुओंके उत्तर णमुल् प्रत्यय हो, यथा-पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडम् । पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति । व्रजेन उपरोधम् व्रजे उपरोधम् वा । पाण्युपकर्षं धानाः संगृह्णाति । पाणावुपकर्षम् । पाणिनोपकर्षं वा ॥

३३७१ समासत्तौ । ३ । ४ । ५० ॥

तृतीयासप्तम्योर्धातोर्णमुल् स्यात्सन्निकर्षे गम्यमाने । केशग्राहं युध्यन्ते । केशेषु गृहीत्वा । हस्तग्राहम् । हस्तेन गृहीत्वा ॥

३३७१-तृतीयान्त और सप्तम्यन्त पद उपपद होनेपर और सन्निकर्ष गम्यमान होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-केशग्राहं युध्यन्ते केशेषु गृहीत्वा । हस्तग्राहम् । हस्तेन गृहीत्वा ॥

३३७२ प्रमाणे च । ३ । ४ । ५१ ॥

तृतीयासप्तम्योरित्येव । द्व्यंगुलोत्कर्षं खण्डिकां छिनत्ति । द्व्यंगुलेन द्व्यंगुले वोत्कर्षम् ॥

३३७२-तृतीयान्त और सप्तम्यन्त पद उपपद होनेपर और प्रमाण गम्यमान होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-द्व्यंगुलोत्कर्षं खण्डिकां छिनत्ति । द्व्यंगुलेन द्व्यंगुले वा उत्कर्षम् ॥

३३७३ अपादाने परीप्सायाम् । ३ । ४ । ५२ ॥

परीप्सा त्वरा । शय्योत्थायं धावति ॥

३३७३-अपादान कारक अर्थात् पञ्चम्यन्त पद उपपद होनेपर और परीप्सा अर्थात् त्वरा अर्थ होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-शय्योत्थायं धावति । (शय्यासे उठते ही दौडता है) ॥

३३७४ द्वितीयायां च । ३ । ४ । ५३॥

परीप्सायामित्येव । यष्टिग्राहं युध्यन्ते । लोष्टग्राहम् ॥

३३७४-द्वितीयान्त पद उपपद होनेपर धातुके उत्तर त्वरा अर्थमें णमुल् प्रत्यय हो, यथा-यष्टिग्राहं युध्यन्ते(बडी शीघ्रतासे लकडी लेकर लडने जाते हैं) लोष्टग्राहम् ॥

३३७५ अपगुरो णमुलि । ६ । १।५३॥

गुरी उद्यमने इत्यस्यैचो वा आत्स्याण्णमुलि। अस्यपगारं युध्यन्ते । अस्यपगोरम् ॥

३३७५-णमुल् प्रत्यय परे रहते उद्यमनार्थक अपपूर्वक गुरी धातुके एच्के अर्थात् ओकारके स्थानमें विकल्प करके आकार हो, यथा-अस्यपगारम् युध्यंते अस्यपगोरम् ॥

३३७६ स्वांगेऽध्रुवे । ३ । ४ । ५४ ॥

द्वितीयायामित्येव । अध्रुवे स्वांगे द्वितीयान्ते धातोर्णमुल् । भ्रूविक्षेपं कथयति । भ्रुवं विक्षेपम् । अध्रुवे किम् । शिर उत्क्षिप्य । येन विना न जीवनं तद् ध्रुवम् ॥

२३७६-द्वितीयान्त अध्रुव स्वाङ्ग वाचक शब्द उपपद होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-भ्रूविक्षेपं कथयति । भ्रुवं विक्षेपम् । जिस स्थानमें ध्रुव स्वाङ्ग होगा उस स्थलमें शिरः उत्क्षिप्य । जिसके विना जो जीव जीवित नहीं रहता, उसका नाम ध्रुव है ॥

२३७७ परिक्लिश्यमाने च ।३।४।५५॥

सर्वतो विबाध्यमाने स्वांगे द्वितीयान्ते णमुल् स्यात् । उरःप्रतिपेषं युध्यन्ते । कृत्स्नमुरः पीडयन्त इत्यर्थः । उरोविदारं प्रतिचस्करे नखैः । ध्रुवार्थमिदम् ॥

२३७७-परिक्लिश्यमान अर्थात् सब प्रकारसे विबाध्यमान अर्थ होनेपर और द्वितीयान्त स्वांगवाचक शब्द उपपद होनेपर धातुके उत्तर णमुल् प्रत्यय हो, यथा-उरःप्रतिपेषम् युध्यन्ते । कृत्स्नमुरः पीडयन्ते इत्यर्थः । "उरोविदारं प्रतिचस्करे नखैः" ध्रुवार्थ यह सूत्र है ॥

२३७८ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः । ३ । ४ । ५६॥

द्वितीयायामित्येव । द्वितीयान्त उपपदे विश्यादिभ्यो णमुल् स्याद्व्याप्यमान आसेव्यमाने चार्थे गम्ये । गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः । क्रियायाः पौनःपुन्यमासेवा । नित्यवीप्सयोरिति द्वित्वं तु न भवति । समासेनैव स्वभावतस्तयोरुक्तत्वात्। यद्यप्याभीक्ष्ण्ये णमुलुक्त एव तथापि उपपदसंज्ञार्थमासेवायामिह पुनर्विधिः। गेहानुप्रवेशमास्ते गेहङ्गेहमनुप्रवेशम् । गेहमनुप्रवेशमनुप्रवेशम् । एवं गेहानुप्रपातम् । गेहानुप्रपादम् । गेहानुस्कन्दम् । असमासे तु गेहस्य णमुलन्तस्य च पर्यायेण द्वित्वम् ॥

२३७८-द्वितीयान्त पद उपपद होनेपर और व्याप्यमान और आसेव्यमान अर्थ होनेपर विशि,पति, पदि, स्कन्द इन चार धातुओंके उत्तर णमुल् प्रत्यय हो, गृहादि द्रव्यका विशि आदि क्रियाओंके साथ जो साकल्य करके संबन्ध उसका नाम व्याप्ति है । आसेवा अर्थात् क्रियाका पौनःपुन्य "नित्यवीप्सयोः (२१४०)" इस सूत्रसे समासके द्वारा ही स्वभावतः नित्य और वीप्साके उक्तत्वके कारण द्वित्व नहीं होगा । यद्यपि आभीक्ष्ण्य अर्थमें णमुल् उक्त हुआ है तथापि उपपद संज्ञाके निमित्त आसेवा विषयमें पुनर्विधान होगा । यह बताता है, यथा-गेहानुप्रवेशमास्ते, गेहंगेहमनुप्रवेशम् । इसी प्रकार गेहानुप्रपातम् । गेहानुप्रपादम् । गेहानुस्कन्धम् । असमास विषयमें गेह शब्दको और णमुल् प्रत्ययान्तको पर्याय करके द्वित्व होगा ॥

२३७९ अस्यतितृषोः क्रियान्तरे कालेषु । ३ । ४ । ५७ ॥

क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः । तस्मिन्धात्वर्थे वर्तमानादस्यतेस्तृष्यतेश्च कालवाचिषुद्वितीयान्तेषूपपदेषु णमुल्स्यात्। द्व्यहात्यासं गाः पाययति। द्व्यहमत्यासम्।द्व्यहतर्षम्। द्व्यहन्तर्षम्। अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥

२३७९-क्रियाको अन्तर अर्थात् व्यवधान करे जो क्रिया उसका नाम क्रियान्तर है, यह क्रियान्तर धात्वर्थ होनेपर कालवाचक द्वितीयान्त पद उपपद होनेपर असि और तृष् धातुके उत्तर णमुल् प्रत्यय हो, यथा-द्व्यहात्यासं गाः पाययति द्व्यहमत्यासम् । द्व्यहतर्षम् । द्व्यहन्तर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥

२३८० नाम्न्यादिशिग्रहोः ।३।४।५८॥

द्वितीयायामित्येव । नामादेशमाचष्टे । नामग्राहमाह्वयति ॥

२३८०-द्वितीयान्त नामन् शब्द उपपद होनेपर आङ्पूर्वक दिशि और आङ्पूर्वक ग्रहि धातुके उत्तर णमुल् प्रत्यय हो, नामादेशमाचष्टे । नामग्राहमाह्वयति ॥

२३८१ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ । ३ । ४ । ५९ ॥

अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनम् । उच्चैःकृत्य-उच्चैःकृत्वा-उच्चैःकारमप्रियमाचष्टे । नीचैःकृत्य-नीचैः कृत्वा-नीचैःकारं प्रियं ब्रूते ॥

२३८१-अव्यय शब्द उपपद होनेपर और अयथाभिप्रेत आख्यान होनेपर कृञ् धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो, अप्रियको उच्च करके प्रियको नीच करके कथनको अयथाभिप्रेताख्यान कहते हैं, यथा-उच्चैःकृत्य, उच्चैःकृत्वा, उच्चैःकारमप्रियमाचष्टे । नीचैःकृत्य, नीचैःकृत्वा, नीचैःकारं प्रियं ब्रूते ॥

२३८२ तिर्यच्यपवर्गे । ३ । ४ । ६०॥

तिर्यक्शब्द उपपदे कृञः क्त्वाणमुलौ स्तः समाप्तौ गम्यायाम् । तिर्यक्कृत्य-तिर्यक्कृत्वा-तिर्यक्कारं गतः । समाप्य गत इत्यर्थः । अपवर्गे किम् । तिर्यक्कृत्वा काष्ठं गतः ॥

२३८२-समाप्ति अर्थ होनेपर और तिर्यक् शब्द उपपद होनेपर कृञ् धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो,यथा-तिर्यक्कृत्य तिर्यक्कृत्वा तिर्यक्कारं गतः, समाप्य गत

इत्यर्थः । अपवर्ग अर्थात् समाप्ति अर्थ न होनेपर तिर्य्यक्-कृत्वा काष्ठं गतः ॥

३३८३ स्वांगे तस्प्रत्यये कृभ्वोः । ३ । ४ । ६१ ॥

मुखतःकृत्य गतः । मुखतः कृत्वा । मुखतःकारम् । मुखतोभूय । मुखतो भूत्वा । मुखतोभावम् ॥

३३८३–तस् प्रत्ययान्त स्वाङ्गवाचक शब्द उपपद रहते कृ और भू धातुके उत्तर णमुल् प्रत्यय हो, यथा मुखतःकृत्य गतः, मुखतः कृत्वा । मुखतःकारम् । मुखतोभूयः । मुखतो भूत्वा । मुखतोभावम् ॥

३३८४ नाधार्थप्रत्यये च्व्यर्थे । ३ । ४ । ६२ ॥

नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभ्वोः क्त्वाणमुलौ स्तः । अनाना नाना कृत्वा नानाकृत्य–नाना कृत्वा–नानाकारम् । विनाकृत्य–विना कृत्वा–विनाकारम् । नानाभूय–नाना भूत्वा–नानाभावम् । अनेकं द्रव्यमेकं भूत्वा :एकधाभूय–एकधा भूत्वा–एकधाभावम् । एकधाकृत्य–एकधाकृत्वा–एकधाकारम् । प्रत्ययग्रहणं किम् । हिरुक्कृत्वा । पृथग्भूत्वा ॥

३३८४–च्वि प्रत्ययार्थ विषयमें अर्थात् अभूत तद्भाव में नाधार्थ प्रत्ययान्त पद उपपद होनेपर कृ और भू धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो, यथा–अनाना नाना कृत्वा । नानाकृत्य । नाना कृत्वा । नानाकारम् । विनाकृत्य । विना कृत्वा । विनाकारम् । नानाभूय । नाना भूत्वा । नानाभावम् । अनेकं द्रव्यमेकं भूत्वा । एकधाभूय । एकधा भूत्वा । एकधाभावम् । एकधाकृत्य । एकधा कृत्वा । एकधाकारम् । नाधार्थ प्रत्यय न होनेपर, हिरुक् कृत्वा । पृथग् भूत्वा । इस स्थानमें इस सूत्र करके प्रत्यय नहीं हुआ ॥

३३८५ तूष्णीमि भुवः । ३ । ४ । ६३ ॥

तूष्णींशब्दे भुवः क्त्वाणमुलौ स्तः । तूष्णींभूय । तूष्णींभूत्वा । तूष्णीं भावम् ॥

३३८५–तूष्णीम् शब्द उपपद रहते भूधातुके उत्तर क्त्वा और णमुल् प्रत्यय हों, यथा–तूष्णींभूय । तूष्णीं भूत्वा । तूष्णींभावम् ॥

३३८६ अन्वच्यानुलोम्ये ।३।४।६४ ॥

अन्वक्शब्द उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने । अन्वग्भूय आस्ते । अन्वग्भूत्वा । अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतो वाऽनुकूलो भूत्वा आस्त इत्यर्थः । आनुलोम्ये किम् । अन्वग्भूत्वा तिष्ठति । पृष्ठतो भूत्वेत्यर्थः ॥

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे॥१॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥ २ ॥

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम् ॥

३३८६–अन्वक् शब्द उपपद होनेपर और आनुकूल्य अर्थ होनेपर भू धातुके उत्तर क्त्वा और णमुल् प्रत्यय हो, यथा अन्वग्भूय आस्ते । अन्वग्भूत्वा । अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतः वानुकूलो भूत्वा आस्ते इत्यर्थः । जिस स्थानमें आनुकूल्य अर्थ नहीं होगा, उस स्थानमें णमुल् प्रत्यय नहीं होगा, केवल क्त्वा प्रत्यय होगा, यथा–अन्वग्भूत्वा तिष्ठति । तिष्ठतो भूत्वा तिष्ठति इत्यर्थः ॥

इस प्रकार इस ग्रन्थमें दिङ्मात्र लौकिक शब्दोंके प्रयोग दिखाये हैं इनका विस्तार शब्दकौस्तुभमें देखना चाहिये । यह सिद्धान्तकौमुदी भट्टोजिदीक्षितकी बनाई हुई है, यह भवानी और भगवान् विश्वनाथकी प्रीतिके निमित्त हो ॥ २ ॥

॥ इति कृदन्तप्रकरणं समाप्तम् ॥

॥ इति सिद्धान्तकौमुद्यां पंडितज्वालाप्रसादमिश्रकृतभाषाटीकायां कृदन्तप्रकरणं समाप्तम् ॥

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

अथ वैदिकप्रक्रिया ।

३३८७ छन्दसि पुनर्वस्वोरेकवचनम् । १ । २ । ६१ ॥

द्वयोरेकवचनं वा स्यात् । पुनर्वसुर्नक्षत्रं पुनर्वसू वा । लोके तु द्विवचनमेव ॥

३३८७-वेदमें पुनर्वसु शब्दसे द्विवचन स्थलमें विकल्प करके एक वचन हो, यथा-पुनर्वसुः नक्षत्रम् पुनर्वसू वा । लौकिकमें तो द्विवचन ही होगा, यथा-पुनर्वसू ॥

३३८८ विशाखयोश्च । १ । २ । ६२ ॥

प्राग्वत् । विशाखा नक्षत्रं विशाखे वा ॥

३३८८-वेदमें विशाखा शब्दसे द्विवचन स्थलमें विकल्प करके एकवचन हो, यथा-विशाखा नक्षत्रम् विशाखे वा ॥

३३८९ षष्ठीयुक्तश्छन्दसि वा । १ । ४ । ९ ॥

षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञा वा स्यात् । क्षेत्रस्य पतिना वयम् । इह वेति योगं विभज्य छन्दसीत्यनुवर्तते । तेन सर्वे विधयश्छन्दसि वैकल्पिकाः । बहुलं छन्दसीत्यादिरस्यैव प्रपञ्चः ॥ यचि भम् ॥ नभोङ्गिरोमनुषां वत्युपसंख्यानम् ॥ * ॥ नभसा तुल्यं नभस्वत् । भत्वाद्रुत्वाभावः । अङ्गिरस्वदङ्गिरः । मनुष्वदग्ने । जनेरुसीति विहित उसिप्रत्ययो मनेरपि बाहुलकात् ॥ वृषण्वस्वश्वयोः ॥ * ॥ वृष वर्षकं वसु यस्य स वृषण्वसुः । वृषा अश्वो यस्य वृषणश्वः । इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्बाध्यते । अत एव पदान्तस्येति णत्वनिषेधोपि न । अल्लोपोऽन इत्यल्लोपो न अनङ्गत्वात् ॥

३३८९-वेदमें षष्ठी विभक्त्यन्त पदके साथ युक्त पति शब्द विकल्प करके घिसंज्ञक हो, यथा-क्षेत्रस्य पतिना वयम् । इस सूत्रमें वा शब्दका पृथक् ग्रहण करके 'छन्दसि' इस पदकी अनुवृत्ति आती है, इससे वेदमें सब विधि विकल्प करके होते हैं । "बहुलं छन्दसि ३४०१ " इत्यादि वक्ष्यमाण सूत्र इसका ही प्रपञ्च है । "यचिभम् २३१" यादि अजादि कप् प्रत्ययावधि स्वादि असर्वनाम स्थान परे रहते पूर्वको भ संज्ञा हो ॥

नभस्, अङ्गिरस् और मनुष् शब्दको भ संज्ञा हो वत् प्रत्यय परे रहते * यथा-नभसा तुल्यम्=नभस्वत् । इस स्थानमें भत्व होनेसे रुत्वाभाव होताहै । अङ्गिरसा तुल्यम्=अङ्गिरस्वदङ्गिरः । मनुषा तुल्यम्=मनुष्वदग्ने । यहां "जनेरुसि" इस सूत्रसे विहित उसि प्रत्यय केवल जन धातुके उत्तर (नहीं, किन्तु बाहुलकबलसे मन् धातुके उत्तर) भी हुआ ।

वसु और अश्व शब्द परे रहते वृषन् शब्दकी भ संज्ञा हो * यथा-वृष वर्षकं वसु यस्य सः=वृषण्वसुः । वृषा अश्वो यस्य=वृषणश्वः । इस स्थलमें अन्तर्वर्ती विभक्तिको आश्रय करके पदत्व होनेसे नलोपकी प्राप्ति हुई, परन्तु वह भत्वके कारण निवारित होताहै । अत एव " पदान्तस्य १९८ " इस सूत्रसे णत्वनिषेध भी नहीं होताहै । अङ्गसंज्ञा न होनेके कारण "अल्लोपोऽनः २३४" इस सूत्रसे अकारका लोप नहीं हुआ ॥

३३९० अयस्मयादीनि छन्दसि । १ । ४ । २० ॥

एतानि च्छन्दसि साधूनि । भपदसंज्ञाधिकाराद्यथायोगं संज्ञाद्वयं बोध्यम् । तथा च वार्तिकम् ॥ उभयसंज्ञान्यपीति वक्तव्यमिति ॥ * ॥ स सुष्टुभास ऋक्वता गणेन । पदत्वात्कुत्वम् । भत्वाज्जत्वाऽभावः । जश्त्वविधानार्थाया: पदसंज्ञाया भत्वसामर्थ्येन बाधात् । नैनं हिन्वन्त्यपि वाजिनेषु । अत्र पदत्वाद् जश्त्वम् । भत्वात्कुत्वाभावः ॥ ते प्राग्धातोः ॥

३३९०-वेदमें अयस्मयादि शब्द निपातनसे सिद्ध हों । भ और पद संज्ञाधिकार होनेके कारण उक्त दोनों संज्ञा यथायोग समझनी चाहियें। इस विषयमें वृत्तिकारने कहाहै कि-

वे इमें दोनों संज्ञा कहनी चाहियें * यथा-स सुष्टुभास ऋक्व गणन, इस स्थलमें पदत्वके कारण कुत्व हुआ है और भत्वके कारण जश्त्व नहीं हुआ क्यों कि, भत्व सामर्थ्यके कारण जश्त्वविधानार्थक पदसंज्ञाका बाध अर्थात् निषेध होताहै । नैनं हिन्वन्त्यपि वाजिनेषु (वाचामिनाः प्रभवस्तेष्वप्येनं विद्वांसं न हिन्वन्ति विवदितुं न गच्छन्ति इत्यर्थः) इस स्थलमें पदत्वके कारण जश्त्व हुआहै और भत्वके कारण कुत्व नहीं हुआ । गतिसंज्ञक और उपसर्गसंज्ञक शब्द धातुओंके पूर्वमें ही प्रयुक्त हों ॥

३३९१ छन्दसि परेऽपि । १ । ४ । ८१ ॥

३३९१-वेदमें गतिसंज्ञक और उपसर्गसंज्ञक शब्द धातुके परेभी प्रयुक्त हों ॥

३३९२ व्यवहिताश्च । १ । ४ । ८२ ॥

हरिभ्यां याह्योक आ । आ मन्द्रैरिन्द्रहरिभिर्याहि ॥

३३९२-धातुसे व्यवहित भी गतिसंज्ञक और उपसर्गसंज्ञक शब्द प्रयुक्त हों, हरिभ्यां याह्योक आ । आ मन्द्रैरिन्द्र हरिभिर्याहि ॥

३३९३ इन्धिभवतिभ्यां च । १ । २ । ६ ॥

आभ्यां परो लिट् कित् । समीधे दस्युहन्तमम् । पुत्र ईधे अथर्वणः । बभूव । इदं प्रत्याख्यातम् ॥ इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति ॥

॥ इति प्रथमोऽध्यायः ॥

३३९३-वेदमें इन्ध् और भू धातुके उत्तर लिट् प्रत्यय कित् हो, यथा-समीधे दस्युहन्तमम् । पुत्र ! ईधे अथर्वणः । इस स्थलमें कित्वके कारण नकारका लोप हुआ है । बभूव । इस स्थलमें कित्वके कारण गुण नहीं हुआ । इन्धि धातुके छन्दोविषयत्वके कारण और भू धातुके वुक् आगमके नित्यत्वके कारण इन्ध और भू धातुके उत्तर लिट्को कित्वविधान करना निरर्थक है ॥

॥ इति प्रथमोऽध्यायः ॥

३३९४ तृतीया च होश्छन्दसि ।२।३।३॥

जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च । यवाग्वाऽग्निहोत्रं जुहोति । अग्निहोत्रशब्दोऽत्र हविषि वर्तते । यस्याग्निहोत्रमधिश्रितममेध्यमापद्येतेत्यादिप्रयोगदर्शनात् । अग्नये हूयत इति व्युत्पत्तेश्च । यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः ॥

३३९४-वेदमें हु धातुके कर्ममें तृतीया और द्वितीया विभक्ति हों, यथा-यवाग्वा अग्निहोत्रं जुहोति, अर्थात् यवागू नामक हवि देवतोद्देशसे अर्पण करताहै । 'यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत ' इत्यादि प्रयोगदर्शनके कारण और "अग्नये हूयते " इस व्युत्पत्तिके कारण इस स्थानमें अग्निहोत्र शब्द हविर्वाचक है ॥

३३९५ द्वितीया ब्राह्मणे ।२।३।६०॥

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात् । षष्ठ्यपवादः । गामस्य तदहः सभायां दीव्येयुः ॥

३३९५-ब्राह्मण विषयमें अर्थात् मंत्रभिन्न वैदिक प्रयोगोंमें द्यूतार्थक और क्रयविक्रय व्यवहारार्थक दिव् धातुके कर्ममें द्वितीया विभक्ति हो, यह षष्ठीविभक्तिकी अपवादक है, यथा-गामस्य तदहः सभायां दीव्येयुः ॥

३३९६ चतुर्थ्यर्थे बहुलं छन्दसि । २ । ३ । ६२ ॥

षष्ठी स्यात् । पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम् । वनस्पतिभ्य इत्यर्थः ॥ षष्ठ्यर्थे चतुर्थीति वाच्यम् ॥ * ॥ या खर्वेण पिबति तस्यै खर्वः ॥

३३९६-वेदमें चतुर्थ्यर्थमें बहुल करके षष्ठी विभक्ति हो, यथा-पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम्, इस स्थानमें ' वनस्पतिभ्यः ' के स्थलमें ' वनस्पतीनाम्' हुआहै ।

षष्ठ्यर्थमें चतुर्थी हो, यह कहना चाहिये*यथा-या खर्वेण पिबति तस्यै खर्वः ॥

३३९७ यजेश्च करणे । २ । ३ । ६३ ॥

इह छन्दसि बहुलं षष्ठी । घृतस्य घृतेन वा यजते ॥

३३९७-वेदमें यज् धातुके करणमें विकल्प करके षष्ठी विभक्ति हो, यथा-घृतस्य घृतेन वा यजते ॥

३३९८ बहुलं छन्दसि ।२। ४ । ३९ ॥

अदो घस्लादेशः स्यात् । घस्तान्नूनम् । लुङि मन्त्रे घसेति च्लेर्लुक् अधभावः । सग्धिश्च मे ॥

३३९८-वेदमें अद् धातुके स्थानमें विकल्प करके घस्लृ आदेश हो, यथा-घस्तान्नूनम् । लुङ् परे रहते " मंत्रे घसह्वर ३४०२ " इत्यादि वक्ष्यमाण सूत्रसे च्लिको लुक् और अडागमाभाव हुआ । "सग्धिश्चमे" यहां अद् धातुसे क्तिन्, घस्लादेश, "घसिभसोर्हलि च ३५५० " इस सूत्रसे उपधालोप, "झलो झलि २२८१ " इस सूत्रसे सकारलोप, "झषस्तथोः० २२८० " इस सूत्रसे धत्व, घके स्थानमें ज, पश्चात् समान शब्दके साथ समास और समानको स आदेश हुआहै ॥

३३९९ हेमन्तशिशिरावहोरात्रे च च्छन्दसि । २ । ४ । २८ ॥

द्वन्द्वः पूर्ववल्लिंगः । हेमन्तश्च शिशिरं च हेमन्तशिशिरौ । अहोरात्रे । अदिप्रभृतिभ्यः शपः ॥

३३९९-वेदमें हेमन्तशिशिरौ और अहोरात्रे यह दो पद द्वन्द्व समासमें पूर्ववत् लिङ्गको प्राप्त हों, यथा-हेमन्तश्च शिशिरश्च=हेमन्तशिशिरौ । अहश्च रात्रिश्च=अहोरात्रे । " अदिप्रभृतिभ्यः शपः २४२२ " अदादि धातुके परे स्थित शप्का लुक् हो ॥

३४०० बहुलं छन्दसि । २ । ४।७३ ॥

वृत्रं हनति वृत्रहा । अहिः शयत उपपृक्पृथिकाः । अत्र लुङ् न । अदादिभिन्नेऽपि क्वचिल्लुक् । त्राध्वं नो देवाः । जुहोत्यादिभ्यः श्लुः ॥

३४००-वेदमें बहुल करके अदादि गणीय धातुओंके उत्तर शप्का लुक् हो, यथा-वृत्रं हनति वृत्रहा । अहिः शयत उपपृक् पृथिकाः । इस स्थानमें शप्का लुक् नहीं हुआ । अदादिभिन्न स्थलमें भी कहीं २ लुक् होगा, यथा-त्राध्वं नो देवाः । इस स्थलमें भ्वादिगणीय त्रै धातुके उत्तर शप्का लुक् हुआहै । "२४८९" जुहोत्यादिगणीय धातुओंके उत्तर शप्के स्थानमें श्लु आदेश हो, यह सूत्र यहां स्मरणार्थ उल्लिखित है ॥

३४०१ बहुलं छन्दसि । २ । ४ । ७६॥

दाति प्रियाणि चिद्वसु । अन्यत्रापि । पूर्णा विवष्टि ॥

३४०१-वेदमें जुहोत्यादिगणीय धातुके उत्तर बहुल करके शप्के स्थानमें श्लु आदेश हो, यथा-दाति प्रियाणि चिद्वसु । जुहोत्यादिभिन्न धातुके उत्तर भी श्लु आदेश होगा, यथा-

पूर्णा विवष्टि, यहां अदादिगणीय वश् धातुके उत्तर शप्को लुक्, पश्चात् द्वित्व, "भृञामित् २४९६" बहुलं छन्दसि इस सूत्रसे अभ्यासको इकार "व्रश्च० २९४" इस सूत्रसे शके स्थानमें ष और तके स्थानमें ट हुआ ॥

३४०२ मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः । २ । ४ । ८० ॥

लिरिति च्लेः प्राचां संज्ञा । एभ्यो लेर्लुक् स्यान्मन्त्रे । अक्षन्नमी मदन्त हि । घस्लादेशस्य गमहनेत्युपधालोपे शासिवसीति षः । माह्वर्मित्रस्य । धूर्तिः प्रणङ्मर्त्यस्य । नशेर्वेति कुत्वम् । सुरुचो वेन आवः । मा न आधक् । आदित्याकारान्तग्रहणम् । आप्रा द्यावापृथिवी । परावर्ग्भारभृद्यथा । अक्रन्नुषसः । त्वे रयिं जागृवांसो अनुग्मन् । मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम् । अज्ञत वा अस्य दन्ताः । विभाषानुवृत्तेर्नेह । न ता अगृभ्णन्नजनिष्ट हि षः ॥

॥ इति द्वितीयोऽध्यायः ॥

३४०२–मंत्रमें घस् (अद धातुके स्थानमें आदिष्ट) ह्वर (ह्वृ कौटिल्ये) णश (णश अदर्शने) वृ (वृञ् वरणे) वृङ् (वृङ् सभक्तौ) दह (दह भस्मी करणे) आत् (आकारान्त प्रा–पूरणे इत्यादि) वृज् (वृजी वर्जने) कृ (डुकृञ् करणे) गम और जन् धातुओंके परे स्थित लि अर्थात् च्लिका लुक् हो, यथा–अक्षन्नमीमदन्त हि, यहां अद+लुङ्+झि–घस्लादेश, "गमहन २३६३" इस सूत्रसे उपधालोप, "शासिवसि० २४१०" इस सूत्रसे सके स्थानमें ष–हुआहै । माह्वर्मित्रस्य (माङ् पूर्वक ह्वृ+लुङ्+तिप् "इतश्च २२०७" इस सूत्रसे इकार लोप, च्लिका लुक्+सार्वधातुकत्वके कारण गुण, रपरत्व और "हल्ङ्याप्० २५२" इस सूत्रसे लोप हुआ है । धूर्त्तिः प्रणङ्मर्त्यस्य । प्र+णश्+लुङ्, तिप्, "हल्ङ्याप्०" इस सूत्रसे लोप, "उपसर्गादसमासे (२२८७)" इस सूत्रसे णत्व, शकारके स्थानमें ककार, कके स्थानमें ङ् होकर प्रनङ्) । सुरुचो वेन आवः । (आवृ+लुङ्+सिप्=आवः) । मान आधक् । (आदह "दादेर्धातोः० ३२५" इस सूत्रसे घ आदेश, "एकाचो बशो० ३२६" से भष्भाव) । "आप्रा द्यावा पृथिवी" परावर्ग्भारभृद् यथा । अक्रन्नुषसः । त्वे रयिं जागृवांसोऽनुग्मन् । मंत्र शब्द ग्रहण ब्राह्मणका भी उपलक्षण अर्थात् ग्राहक होताहै । यथा–"अज्ञत वा अस्य दन्ताः" । लोकमें यथा–अघसत् । अह्वार्षीत् । अनशत् । अवारीत् । अधाक्षीत् । आप्रासीः । अवर्जीत् । अकार्षीत् । अगमत् । अजनि, अजनिष्ट । विभाषाकी अनुवृत्तिके कारण यहां च्लिका लुक् नहीं होगा, यथा–"न ता अगृभ्णन्नजनिष्ट हि षः" ॥

॥ इति द्वितीयोऽध्यायः ॥

३४०३ अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि । ३ । १ । ४२ ॥

आद्येषु चतुर्षु लुङि आम् अक इत्यनुप्रयोगश्च । अभ्युत्सादयामकः । अभ्युदसीषददिति लोके । प्रजनयामकः । प्राजीजनदित्यर्थः । चिकयामकः । अचैषीदित्यर्थे चिनोतेराम् द्विर्वचनं कुत्वं च । रमयामकः । अरीरमत् । पावयांक्रियात् । पाव्यादिति लोके । विदामक्रन् । अवेदिषुः ॥

३४०३–वेदमें अभ्युत्सादयामकः, प्रजनयामकः, चिकयामकः, रमयामकः, पावयांक्रियात् और विदामक्रन् इत्यादि पद निपातनसे सिद्ध हों, इस स्थलमें प्रथम चार पदोंमें लुङ् परे आम्, और अक्का अनुप्रयोग हो, यथा–अभ्युत्सादयामकः । लोकमें अभ्युदसीषदत् । इसी प्रकार प्रजनयामकः । लोकमें, प्राजीजनत् । चिकयामकः । अचैषीत् । इस अर्थमें चि धातुके उत्तर आम्, द्वित्व और कुत्व हुआ है । रमयामकः । लोकमें, अरीरमत् । पावयांक्रियात् । लोकमें, पाव्यात् । विदामक्रन् । लोकमें, अवेदिषुः ॥

३४०४ गुपेश्छन्दसि । ३ । १ । ५० ॥

च्लेश्चङ् । गृहानजूगुपतं युवम् । अगौप्तमित्यर्थः ॥

३४०४–गुप् धातुके उत्तर च्लिके स्थानमें विकल्प करके चङ् आदेश हो, यथा–गृहानजूगुपतं युवम् । अगौप्तमित्यर्थः ॥

३४०५ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः । ३ । १ । ५१ ॥

च्लेश्चङ् न । मा त्वायतो जरितुः काममूनयीः । मा त्वाग्निर्ध्वनयीत् ॥

३४०५–वेदमें ऊन धातु, ध्वन धातु, इल धातु, अर्द धातुके उत्तर च्लिके स्थानमें चङ् आदेश न हो, यथा–मा त्वायतो जरितुः काममूनयीः (त्वायतः त्वामिच्छतः जरितुः, स्तोतुः । मम काममभिलाषं मा ऊनयीः ऊनं मा कार्षीः) लोकमें औनः "मा त्वाग्निर्ध्वनयीत्" । भाषामें अदध्वनत् । ऐलयीत् । आर्दयीत् । लोकमें ऐलिलत् । आर्दिदत् ॥

३४०६ कृमृदृरुहिभ्यश्छन्दसि । ३ । १ । ५९ ॥

च्लेरङ् वा । इदं तेभ्योकरं नमः । अमरत् । अदरत् । यत्सानोः सानुमारुहत् ॥

३४०६–वेदमें कृ, मृ, दृ, और रुह धातुके उत्तर च्लिके स्थानमें विकल्प करके अङ् हो, यथा–"इदं तेभ्योऽकरं नमः" । अमरत् । अदरत् । यत्सानोः सानुमारुहत् । लोकमें, अकार्षीत् । अमृत । अदारीत् । अरुक्षत् ॥

३४०७ छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ।३।१।१२३॥

कृन्ततेर्निस्पूर्वात् क्यपि प्राप्ते ण्यत् । आद्यन्तयोर्विपर्यासः निसः षत्वं च। निष्टर्क्यं चिन्वीत पशुकामः। देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च। स्पर्द्धन्ते वा उ देवहूये। प्र उत् आभ्यां नयतेः क्यप्। प्रणीयः। उन्नीयः। उत्पूर्वाच्छिषेः क्यप्। उच्छिष्यः। मृङ्स्तृञ्ध्वृभ्यो यत्। मर्यः। स्तर्या। स्त्रियामेवायम्। ध्वर्यः। खनेर्यण्यतौ खन्यः। खान्यः। यजेर्यः। शुन्धध्वं दैव्याय कर्मणे देवयज्यायै। आङ्पूर्वात्पृच्छेः क्यप्। आपृच्छ्यं धरुणं वा ज्यर्षति। सीव्यतेः क्यप् षत्वं च। प्रतिषीव्यः। ब्रह्मणि वदेर्ण्यत्। ब्रह्मवाद्यम्। लोके तु वदः सुपि क्यप् चेति क्यब्यतौ।भवतेः स्तौतेश्च ण्यत्। भाव्यः। स्ताव्यः। उपपूर्वाच्चिनोतेर्ण्यदायादेशश्च पृड उत्तरपदे। उपचाय्यपृडम् ॥ हिरण्य इति वक्तव्यम् ॥ * ॥ उपचेयपृडमेवान्यत्। मृड सुखने पृड चेत्यस्मादिगुपधलक्षणः कः ॥

३५२०–यजुर्वेदमें अकार परे रहते एङन्त उरस् शब्द संधिद्वारा विकृत न हो, यथा–"उरो अन्तरिक्षम्" । इस स्थलमें "प्रकृत्यान्तः० ३५१८" इस सूत्रसे उक्त पद सिद्ध होजाते पुनः सूत्रकरणकी आवश्यकता क्या ? इस शंकापर

कहतेहैं कि,-यजुर्वेदमें पादके अभावके कारण पूर्वसूत्रसे सिद्ध न होनेके कारण पृथक् सूत्र कियाहै ॥

३५२१ आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे । ६ । १ । ११८ ॥

यजुषि अति प्रकृत्या । आपो अस्मान्मातरः। जुषाणो अग्निराज्यस्य । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधि नाके । अम्बे अम्बाले अम्बिके । अस्मादेव वचनादम्बार्थेति ह्रस्वो न ॥

३५२१-यजुर्वेदमें अत् परे रहते आपो, जुषाणो, वृष्णो, वर्षिष्ठे, अम्बे, अम्बाले, अम्बिके, इन पदोंका एङ् प्रकृतिसे रहे यथा-" आपो अस्मान्मातरः " । " जुषाणो अग्निराज्यस्य" । "वृष्णो अंशुभ्याम्" । "वर्षिष्ठे अधिनाके" । "अम्बे,अम्बाले, अम्बिके"इस स्थलमें इसी वचनसे"अम्बार्थनद्योः०" इससे ह्रस्व नहीं हुआ, इस सूत्रमें आपः यह पद जस्विभक्त्यन्त है । जुषाणो पद सुविभक्त्यन्त है । तीसरा ङसन्त है । चौथा ङ्यन्त और शेष सम्बोधनान्त है ॥

३५२२ अङ्ग इत्यादौ च । ६।१।११९॥

अङ्गशब्दे य एङ् तदादौ अकारे च य एङ्पूर्वः सोऽति प्रकृत्या यजुषि । प्राणो अंगे अंगे अदीव्यत् ॥

३५२२-यजुर्वेदमें अकार परे रहते अंग शब्दमें जो एङ् और उसके आदिभूत अकारके परे पूर्व जो एङ् वह दोनो एङ् विकृत न हों, यथा-"प्राणो अंगे अंगे अदीव्यत्" ॥

३५२३अनुदात्ते च कुधपरे।६।१।१२०॥

कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि । अयं सो अग्निः । अयं सो अध्वरः । अनुदात्ते किम् । अधोऽग्रे रुद्रे । अग्रशब्द आद्युदात्तः । कुधपरे किम् । सोऽयमग्निमतः ॥

३५२३-यजुर्वेदमें कवर्ग और धकार परे है, ऐसा अनुदात्त अत् परे रहते एङ् विकृत न हो, यथा-"अयं सो अग्निः" । "अयं सो अध्वरः" । अनुदात्त न होनेपर यथा-"अधोऽग्रे रुद्रे" इस स्थानमें अग्र शब्दका प्रथम वर्ण उदात्त है । कवर्ग और धकार परे न रहते तो एङ् विकृत होगा, यथा-"सोयमग्निमतः" ॥

३५२४ अवपथासि च । ६।१।१२१ ॥

अनुदात्ते अकारादौ अवपथाःशब्दे परे यजुषि एङ् प्रकृत्या । त्रीरुद्रेभ्यो अवपथाः।वपेस्थासि लिङि तिङ्ङतिङ इत्यनुदात्तत्वम् । अनुदात्ते किम् । यद्रुद्रेभ्योऽवपथाः । निपातैर्यद्यदीति निघातो न ॥

३५२४-यजुर्वेदमें अनुदात्त अकारादि अवपथाः शब्द परे रहते एङ् प्रकृतिसे रहै, यथा-"त्रीरुद्रेभ्यो अवपथाः" यहां वप धातुसे थास् कर यासु करनेपर "तिङ्ङतिङः ३९३५" इस सूत्रसे अनुदात्तत्व हुआ । अनुदात्त न होनेपर एङ् विकृत होगा, यथा-"यद्रुद्रेभ्योऽवपथाः" यहां "निपातैर्यद्यदि३९३७"इस वक्ष्यमाण सूत्रसे निघातस्वर नहीं हुआ॥

३५२५ आङोऽनुनासिकश्छन्दसि । ६ । १ । १२६ ॥

आङोऽचि परेऽनुनासिकः स्यात् स च प्रकृत्या- अभ्र आँ अपः । गभीर आँ उग्रपुत्रे ॥ ईषाअक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः ॥ * ॥ ईषा अक्षो हिरण्ययःज्या इयम् । पूषा अविष्टु॥

३५२५-वेदमें अच् परे रहते आङ् अनुनासिक हो, और वह प्रकृतिसे रहै, अर्थात् संधिद्वारा विकृत न हो, यथा-"अभ्र आँ अपः" यहां आङ् सप्तम्यर्थद्योतक है । "गभीर आँ उग्रपुत्रे" ॥

वेदमें ईषा अक्षादि शब्दोंको प्रकृतिभाव हो ऐसा कहना चाहिये * यथा-"ईषा अक्षो हिरण्ययः" । "ज्या इयम्" "पूषा अविष्टुः" ॥

३५२६स्यश्छन्दसि बहुलम्।६।१।१३३।

स्य इत्यस्य सोर्लोपः स्याद्धलि।एष स्य भानुः॥

३५२६-वेदमें हल् अर्थात् व्यञ्जन वर्ण परे रहते स्य इसके उत्तर सु विभक्तिका लोप हो, यथा- "एष स्य भानुः" ॥

३५२७ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । ६ । १ । १५१ ॥

ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे । हरिश्चन्द्रो मरुद्गणः । सुश्चन्द्र दस्म ॥

३५२७-मंत्रमें ह्रस्वके उत्तर उत्तरपदभूत चन्द्र। शब्दको सुडागम हो, यथा-" हरिश्चन्द्रो मरुद्गणः " सुश्चन्द्र दस्म ॥

३५२८ पितरामातरा च च्छन्दसि । ६ । ३ । ३३ ॥

द्वन्द्वे निपातः । आ मा गन्तां पितरामातरा च । चाद्विपरीतमपि मातरापितरा नू चिदिष्टौ॥ समानस्य छन्दस्य मूर्धप्रभृत्युदर्केषु । ६ । ३।८४॥ समानस्य सः स्यान्मूर्धादिभिन्ने उत्तरपदे । सगर्भ्यः ॥ छन्दसि स्त्रियां बहुलम् ॥ * ॥ विष्वग्देवयोरद्र्यादेशः । विश्वाची च घृताची च । देवद्रीचीं नयत देवयन्तः । कद्रीची ॥

३५२८-वेदमें द्वन्द्वसमासमें पितरामातरा यह पद निपातनसे सिद्ध हो, यथा-"आ मा गंतां पितरामातरा च" । सूत्रमें चकार द्वारा विपरीत भी होगा, यथा-"मातरापितरा नू चिदिष्टौ" ॥

वेदमें मूर्द्धादि भिन्न उत्तरपद परे रहते समान शब्दके स्थानमें स आदेश हो, (१०१२) यथा-"सगर्भ्यः" ॥

वेदमें स्त्रीलिङ्गमें बहुल करके अद्र्यादेश हो *। "विष्वग्देवयोः०" से अद्र्यादेश न होकर यथा-"विश्वाची च घृताची च देवद्रीचीं । नयत देवयन्तः" । अद्र्यादेश होकर-कद्रीची ॥

३५२९ सध मादस्थयोश्छन्दसि । ६ । ३ । ९६ ॥

सहस्य सधादेशः स्यात् । इन्द्र त्वास्मिन्त्सधमादे । सोमः सधस्थम् ॥

३५२९-वेदमें माद और स्थ शब्द परे रहते सह शब्दके स्थानमें सध आदेश हो, यथा-"इन्द्र त्वास्मिन्त्सधमादे" । "सोमः सधस्थम्" ॥

३५३० पथि च च्छन्दसि।६।३।१०८॥

पथिशब्दे उत्तरपदे कोः कवं कादेशश्च । कवपथः । कापथः । कुपथः ॥

३५३०-वेदमें उत्तरपदभूत पथिन् शब्द परे रहते कु शब्दके स्थानमें कव और का आदेश हो, यथा-कवपथः । कापथः । कुपथः ॥

३५३१ साढ्यै साढ्वा साढेति निगमे। ६ । ३ । ११३ ॥

सहेः क्त्वाप्रत्यये आद्यं द्वयं तृनि तृतीयं निपात्यते । मरुद्भिरुग्रः पृतनासु साह्ळा । अचोर्मध्यस्थस्य डस्य ळः ढस्य ह्ळश्च प्रातिशाख्ये विहितः । आह हि । " द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः । ह्ळकारतामेति स एव चास्य ढकारः सन्नूष्मणा सम्प्रयुक्तः " ॥ इति ॥

३५३१-वेद (निगम) में सह धातुके उत्तर क्त्वा प्रत्यय करके निपातनसे साढ्यै, साढ्वा यह दो पद और तृन् प्रत्यय करके 'साढा' यह पद सिद्ध हों, यथा-"मरुद्भिरुग्रः पृतनासु साह्ळा" । प्रातिशाख्यमें दो अच्के मध्यस्थित डकारके स्थानमें ळ और ढके स्थानमें ह्ळ आदेश विहित है। कहा है कि, इस आचार्यके मतसे दो स्वरके मध्यवर्ती डकार ळकार रूपसे परिणत होताहै और वही डकार ऊष्मवर्णसंयुक्त होनेसे ढकार होकर दो अच्के मध्यमें ह्ळकार होताहै ॥

३५३२ छन्दसि च । ६ । ३।१२६॥

अष्टन आत्वं स्यादुत्तरपदे । अष्टापदी ॥

३५३२-वेदमें उत्तर पद परे रहते अष्टन् शब्दको आकार हो, "अष्टापदी" यहां अष्टौ पादा अस्याः, इस विग्रहमें "संख्यासुपूर्वस्य ८७९" इससे पादका लोप करनेपर "पादोऽन्यतरस्याम् ४५७" इससे ङीप् हुआ ॥

३५३३ मन्त्रे सोमाऽश्वेन्द्रियविश्वदेव्यस्य मतौ । ६ । ३ । १३१ ॥

दीर्घः स्यान्मन्त्रे । अश्वावतीं सोमावतीम् । इन्द्रियावान्मदिन्तमः । विश्वकर्मणा विश्वदेव्यावता ॥

३५३३-मंत्रमें मतुप् प्रत्यय परे रहते सोम, अश्व, इन्द्रिय, विश्व और देव्य शब्दको दीर्घ हो, यथा-अश्वावतीम् सोमावतीम् । "इन्द्रियावान् मदिन्तमः" । "विश्वकर्मणा विश्वदेव्यावता" ॥

३५३४ ओषधेश्च विभक्तावप्रथमायाम् । ६ । ३ । १३२ ॥

दीर्घः स्यान्मन्त्रे । यदोषधीभ्य अदधात्योषधीषु ॥

३५३४-मंत्रमें प्रथमाभिन्न विभक्ति परे रहते ओषधि शब्दके इकारको दीर्घ हो, यथा-"यदोषधीभ्य अदधात्योषधीषु" ॥

३५३५ ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् । ६ । ३ । १३३ ॥

दीर्घः स्यात् । आ तू न इन्द्र । नू मर्तः । उत वा घा स्यालात् । मक्षू गोमन्तमीमहे । भरता जातवेदसम् । तङिति थादेशस्य ङित्त्वपक्षे ग्रहणम् । तेनेह न । शृणोत ग्रावाणः । कूमनाः । अत्रा ते भद्रा । यत्रा नश्चक्रा । उरुष्याणः ॥

३५३५-ऋग्विषयमें तु, नु, घ, मक्षु, तङ्, कु, त्र, उरुष्य शब्दके स्वरको दीर्घ हो, यथा-"आ तू न इन्द्र" । "नू मर्तः" । "उत वा घा स्यालात्" । "मक्षू गोमन्तमीमहे" । "भरता जातवेदसम्" । तङ् यह ङित्त्वपक्षमें थकारादेशका ग्रहण है, इस कारण 'शृणोत ग्रावाणः' इस स्थानमें दीर्घ नहीं हुआ । "कूमनाः" । "अत्रा ते भद्रा" । "यत्रा नश्चक्रा" । उरुष्याणः ॥

३५३६ इकः सुञि । ६ । ३ १३४ ॥

ऋचि दीर्घ इत्येव । अभीषुणः सखीनाम् । सुञ इति षः । नश्च धातुस्थोरुषुभ्य इति णः ॥

३५३६-ऋक्विषयमें सुञ् धातु परे रहते इगन्त अर्थात् इ, उ, ऋ, ऌकारान्त शब्दोंको दीर्घ हो यथा-"अभीषुणः सखीनाम् " यहां "सुञः ३६४४" इस वक्ष्यमाण सूत्रसे पूर्वपदस्थ निमित्तके परे सुञ् धातुके सकारको षत्व हुआ, और "नश्च धातुस्थोरुषुभ्यः ३६४९" इस वक्ष्यमाण सूत्रसे णत्व हुआ ॥

३५३७ द्व्यचोऽतस्तिङः । ६। ३।१३५॥

मन्त्रे दीर्घः । विद्मा हि चक्रा जरसम् ॥

३५३७-ऋक् विषयमें दो स्वरविशिष्ट तिङ्प्रत्ययान्त पदके अकारको दीर्घ हो, यथा-"विद्मा हि चक्रा जरसम्"॥

३५३८ निपातस्य च । ६ । ३ । १३६ ॥

एवा हि ते ॥

३५३८-ऋग्विषयमें निपातको दीर्घ हो, "एवा हि ते" । इस स्थानमें एव शब्दको चादिमें पाठके कारण निपात संज्ञा हुई है ॥

३५३९ अन्येषामपि दृश्यते । ६ । ३ । १३७ ।

अन्येषामपि पूर्वपदस्थानां दीर्घः स्यात् । पूरुषः । दण्डादण्डि ॥

३५३९-वेदमें पूर्वपदस्थ अन्यको भी दीर्घ हो, यथा-पूरुषः । दण्डादण्डि ॥

३५४० छन्दस्युभयथा । ६ । ४ । ५ ॥

वामि दीर्घो वा । धाता धातॄणामिति बह्वृचाः । तैत्तिरीयास्तु ह्रस्वमेव पठन्ति ॥

३५४०-वेदमें आम् विभक्ति परे रहते पूर्वस्वरको विकल्प करके दीर्घ हो, यथा-"धाता धातॄणाम्" यह बह्वृचलोग कहते हैं, तैत्तरीयशाखाध्यायी लोग तो दीर्घके स्थानमें ह्रस्वपाठ करते हैं ॥

३५४१ वाषपूर्वस्य निगमे । ६ । ४ । ९ ॥

षपूर्वस्यान उपधाया वा दीर्घोऽसंबुद्धौ सर्वनामस्थाने परे । ऋभुक्षाणम् । ऋभुक्षणम् । निगमे किम् । तक्षा । तक्षाणौ ॥

३५४१-निगममें सम्बोधनभिन्न सर्वनाम स्थान परे रहते षकार पूर्वक अन्की उपधाको विकल्प करके दीर्घ हो, यथा-" ऋभुक्षाणम्, ऋभुक्षणम् " । निगम भिन्न स्थलमें अर्थात् लोकमें तो नित्य दीर्घ होगा, यथा-तक्षा । तक्षाणौ ॥

३५४२ जनिता मन्त्रे । ६ । ४ । ५३ ॥

इडादौ तृचि णिलोपो निपात्यते । यो नः पिता जनिता ॥

३५४२-वेदमें मंत्रविषयमें इडादि (इट् आदिमें है ऐसे) तृच् प्रत्यय परे रहते 'जनिता' इसमें निपातनसे णि अर्थात् णिच्का लोप हो, यथा-"यो नः पिता जनिता" ॥ लोकमें जनयिता ॥

३५४३ शमिता यज्ञे । ६ । ४ । ५४ ॥

शमयितेत्यर्थः ॥

३५४३-वेदमें यज्ञ वाक्य होनेपर इट् आदिमें है जिसके ऐसा तृच् प्रत्यय परे रहते निपातनसे शम धातुके उत्तर णिच्का लोप हो, यथा-शमिता । अन्यत्र अर्थात् लोकमें शमयिता ॥

३५४४ युप्लुवोर्दीर्घश्छन्दसि । ६ । ४ । ५८ ॥

ल्यपीत्यनुवर्तते । वियूय । विप्लूय । आडजादीनाम् । ६ । ४ । ७२ ॥

३५४४-वेदमें ल्यप् प्रत्यय परे रहते यु और प्लु धातुके उकारको दीर्घ हो, यथा-वियूय । विप्लूय । वेदभिन्न अर्थात् लोकमें यथा-आयुत्य । आप्लुत्य ।।

" आडजादीनाम् २२४४ " लुङादि विभक्ति परे रहते अजादि धातुको आट्का आगम हो ॥

३५४५ छन्दस्यपि दृश्यते । ६ । ४ । ७३ ॥

अनजादीनामित्यर्थः । आनट् । आवः । "न माङ्योगे । ६ । ४ । ७४" ॥

३५४५-वेदमें अनजादि अर्थात् स्वरवर्ण आदिमें न हो ऐसे धातुओंको भी आट्का आगम हो,यथा-आनट् । आवः। 'आनक्' यहां नश् धातुसे लुङ् 'मन्त्रे घस० ३४०२' इससे च्लिका लुक् 'नशेर्वा ४३१' इसकी प्रवृत्ति न होनेपर "व्रश्च० २९४" इससे षत्व, जश्त्व और चर्त्व हुआ । 'आवः' यहां वृञ् धातुसे लुङ्, च्लिका लुक् गुण, रेफको विसर्ग हुआ ॥

माङ् शब्दके योगमें अट् और आट्का आगम न हो (२२२८) ॥

३५४६ बहुलं छन्दस्यमाङ्योगेऽपि । ६ । ४ । ७५ ॥

अडाटौ न स्तः माङ्योगेपि स्तः ॥ जनिष्ठा उग्रः सहसे तुरायः । मा वः क्षेत्रे परबीजान्यवाप्सुः ॥

३५४६-वेदमें माङ् शब्दका योग हो अथवा न हो तथापि धातुको बहुल करके अट् और आट् आगम हो, अर्थात् माङ् शब्दका योग न होनेपर भी नहीं हो और माङ् शब्दके योग होनेपर भी हो,यथा-"जनिष्ठा उग्रः सहसे तुरायः" यहां जन् धातुसे लुङ्+थास्+अडागमाभाव हुआ । माङ्योगमें भी अडागमका उदाहरण, यथा-"मा वः क्षेत्रे परबीजान्यवाप्सुः" । वो युष्माकं क्षेत्रे भार्यायां परबीजानि अन्येषां वीर्याणि मा अवाप्सुः उप्तानि मा भूवन् इत्यर्थः । 'अवाप्सुः' यहां वप् धातुसे कर्ममें लुङ् अडागम और व्यत्ययसे परस्मैपद हुआ । और च्लिके स्थानमें सिच् "वदव्रज० २२६७" से वृद्धि हुई । यह उदाहरण काशिकाके अनुरोधसे है, क्यों कि, अध्ययनमें 'वाप्सुः' ऐसा ही पाठ देखाजाताहै । माङ्योगमें अडागमका उदाहरणान्तर अन्वेषण करलेना ॥

३५४७ इरयोरे । ६ । ४ । ७६ ॥

प्रथमं दध्र आपः । रेभावस्याभीयत्वेनासिद्धत्वादालोपः। अत्र रेशब्दस्येटि कृते पुनरपि रेभावः। तदर्थं च सूत्रे द्विवचनान्तं निर्दिष्टमिरयोरिति ॥

३५४७-वेदमें धातुके उत्तर 'इरे' इसके स्थानमें रे आदेश हो, यथा-"प्रथमं दध्र आपः" यहां आभीयत्वके कारण रे भावकी असिद्धि होनेसे आकारका लोप हुआ । इस स्थानमें रे शब्दको इट् करनेपर फिर रेभाव हुआ, इसकारण सूत्रमें "इरयोः" । ऐसा द्विवचनान्त निर्देश कियाहै । नहीं तो लक्षणप्रतिपदोक्त परिभाषासे पुनर्वार रे आदेश नहीं होता ॥

३५४८ छन्दस्युभयथा ।६। ४। ८६ ॥

भूसुधियोर्यण् स्यादियङुवङौ च। वनेषु चित्रं विभ्वम्। विभुवं वा। सुध्यो नव्यमग्ने। सुधियो वा ॥ तन्वादीनां छन्दसि बहुलम् ॥ * ॥ तन्वं पुषेम तनुवं वा। त्र्यम्बकम्। त्रियम्बकम् ॥

३५४८–वेदमें भू और सुधी शब्दको यण् और इयङ् और उवङ् यह दो आदेश हों, यथा–"वनेषु चित्रम् विभ्वम्"। विभुवं वा "सुध्यो नव्यमग्ने"। सुधियो वा।

तन्वादि शब्दोंको वेदमें उक्त आदेश बहुलकरके हो * यथा–तन्वं पुषेम। तनुवं वा। त्र्यम्बकम्। त्रियम्बकम्। (त्रीणि अम्बकानि नेत्राणि अस्य असौ त्र्यम्बको रुद्रः) ॥

३५४९ तनिपत्योश्छन्दसि ।६।४।९९॥

एतयोरुपधालोपः क्ङिति प्रत्यये। वितत्निरे कवयः। शकुना इव पप्तिम ॥

३५४९–वेदमें कित् और ङित् प्रत्यय परे रहते तन् धातु और पत् धातुकी उपधाका लोप हो, यथा–"वितत्निरे कवयः"। इस स्थलमें अकारलोपके असिद्धत्व होनेपर भी लोप विधानकी सामर्थ्यके कारण "अत एकहल्मध्ये० २२६०" इस सूत्रसे एत्व और अभ्यासका लोप नहीं हुआ। "शकुना इव पप्तिम"। पत+लिट्+म=पप्तिम लोकमें वितेनिरे। पेतिम इस प्रकार होंगे ॥

३५५० घसिभसोर्हलि च ।६।४।१००॥

सग्धिश्च मे। बब्धां ते हरी धानाः। "हुझल्भ्यो हेर्धिः ६।४।१०१" ॥

३५५०–वेदमें हलादि और अजादि कित् और ङित् प्रत्यय परे रहते घस् और भस् धातुकी उपधाका लोप हो, यथा–"सग्धिश्चमे"। अद धातुसे क्तिन् प्रत्यय "बहुलं छन्दसि" इस सूत्रसे अद धातुके स्थानमें घस आदेश और उपधाका लोप, "झलो झलि २२८१" इस सूत्रसे सकारका लोप, तकारके स्थानमें धकार, घको जश्त्व, पश्चात् 'समान ग्धिः सग्धिः' इस प्रकार समास करके "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु १०१२" इस सूत्रसे समान शब्दके स्थानमें स आदेश होकर सग्धिः। "बब्धान्ते हरी धानाः" यहां भस्+लोट् ताम्+श्लु पश्चात् पर और नित्य भी उपधालोपको बाध करके बाहुलकबलसे "श्लौ" इस सूत्रसे द्वित्व, पश्चात् उपधाका लोप, सकारलोप, धत्व और जश्त्व करके 'बब्धाम्' पद सिद्ध हुआ है। हु धातु और झलन्त धातुके उत्तर हिके स्थानमें धि आदेश हो २४२५ ॥

३५५१ श्रुशृणुपॄकृवृभ्यश्छन्दसि । ६। ४। १०२ ॥

श्रुधी हवम्। शृणुधी गिरः। रायस्पूर्धि। उरुणस्कृधि। अपावृधि ॥

३५५१–वेदमें श्रु, शृणु, पॄ, कृ और वृ धातुके उत्तर हिके स्थानमें धि आदेश हो, यथा–"श्रुधी हवम्" यहां "बहुलं छन्दसि" इस सूत्रसे शप्का लुक्, "अन्येषामपि० ३५३९" इस सूत्रसे दीर्घ हुआ। "शृणुधी गिरः"। श्रु धातुको शृभाव विधान सामर्थ्यके कारण "उतश्च प्रत्ययात्० १३३४" इस सूत्रसे हिका लुक् न हुआ और पूर्ववत् दीर्घ और हिके स्थानमें धि हुआ। "रायस्पूर्धि"। यहां शप्का लुक् "उदोष्ठ्यपूर्वस्य २४९४" इस सूत्रसे ऋके स्थानमें उकार और "हलि च ३५४" इस सूत्रसे दीर्घ हुआ। "उरुणस्कृधि" यहां "नश्चधातुस्थोरुषुभ्यः" इस सूत्रसे णत्व, "कः करत्० ३६३५" इस सूत्रसे विसर्गके स्थानमें सत्व हुआ "अपावृधि"। इस स्थलमें पूर्ववत् दीर्घ हुआ ॥

३५५२ वा छन्दसि । ६ । ४ । ८८॥

हिरपिद्वा ॥

३५५२–वेदमें हि विभक्ति विकल्प करके अपित् हो।

३५५३ अङितश्च ।६ । ४ । १०३ ॥

हेर्धिः स्यात्। रारन्धि। रमेर्व्यत्ययेन परस्मैपदम्। शपः श्लुरभ्यासदीर्घश्च। अस्मै प्रयन्धि। युयोधि जातवेदः। यमेः शपो लुक्। यौतेः शपः श्लुः ॥

३५५३–वेदमें अङित् हिके स्थानमें धि आदेश हो, यथा रारन्धि। यहां रम् धातुको व्यत्ययसे परस्मैपद हुआ, शप्के स्थानमें श्लु आदेश और अभ्यासको दीर्घ हुआ। "अस्मै प्रयन्धि" "युयोधि जातवेदः" यहां यम् धातुके उत्तर शप्का लुक् हुआ। यु धातुके उत्तर शप्के स्थानमें श्लु आदेश हुआ ॥

३५५४ मन्त्रेष्वाङ्यादेरात्मनः । ६ । ४ । १४१ ॥

आत्मन्शब्दस्यादेर्लोपः स्यादाङि। त्मना देवेषु ॥

३५५४–वेदमें आङ् प्रत्यय परे रहते आत्मन् शब्दके आदिभागका लोप हो, यथा–"त्मना देवस्य"। लोकमें आत्मना ॥

३५५५ विभाषर्जोश्छन्दसि।६।४।१६२॥

ऋजुशब्दस्य ऋतः स्थाने रः स्याद्वा इष्ठेमेयस्सु। त्वं रजिष्ठमनुनेषि। ऋजिष्ठं वा ॥

३५५५–वेदमें इष्ठ इमन् और ईयसुन् प्रत्यय परे रहते ऋजु शब्दके ऋकारके स्थानमें विकल्प करके र आदेश हो, यथा–" त्वं रजिष्ठमनुनेषि "। ऋजिष्ठं वा ॥

३५५६ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि । ६ । ४ ।१७५॥

ऋतौ भवमृत्व्यम्। वास्तुनि भवं वास्त्व्यम्। वास्त्वं च। मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते। माध्वीर्नः सन्त्वोषधीः। हिरण्य

शब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते । हिरण्येन सविता रथेन ॥

॥ इति षष्ठोऽध्यायः ॥

३५५६-वेदमें ऋत्व्य, वास्त्व्य, वास्त्व, माध्वी, हिरण्यय, यह निपातनसे सिद्ध हों, यथा-ऋतौ भवम्, इस विग्रहमें निपातनसे यत् प्रत्यय परे यणादेश होकर-ऋत्व्यम्। वास्तुनि भवम्, इस विग्रहमें यत् और अण् प्रत्यय परे निपातनसे यणादेश होकर वास्त्व्यम् । वास्त्वम् च । मधु शब्दको स्त्रीलिङ्गमें निपातनसे यण् आदेश होकर-यथा-"माध्वीर्नः सन्त्वोषधीः" । हिरण्य शब्दके उत्तर विहित मयट् प्रत्ययके मकारका निपातनसे लोप होकर-" हिरण्ययेन सविता रथेन" ॥

॥ इति षष्ठोऽध्यायः ॥

" शीङो रुट् । ७ । १ । ६ । "

शीङ् धातुके परे झादेश अत्को रुट्का आगम हो२४४२॥

३५५७ बहुलं छन्दसि । ७ । १ । ८ ॥

रुडागमः स्यात् । लोपस्त आत्मनेपदेष्विति पक्षे तलोपः । धेनवो दुह्रे । लोपाभावे घृतं दुह्रते ।अदृश्रमस्य।"अतो भिस ऐस् ।७।१।९" ॥

३५५७-वेदमें शीङ् धातुके परे झादेश अत्को बहुल करके रुट्का आगम हो, " लोपस्त आत्मनेपदेषु ३५६३ " इस सूत्रसे पक्षमें तकारका लोप होकर-यथा-"धेनवो दुह्रे" (दुह्+लट्, टेरेत्व, झको अत् आदेश, रुट्, तकारका लोप) लोपाभावमें घृतं दुह्रते । " अदृश्रमस्य " यहां दृश् धातुसे+लुङ्, व्यत्ययसे प्रथमपुरुषके बहुवचन स्थानमें उत्तम पुरुषका एकवचन और उसको रुडागम हुआहै । अदन्त अङ्गके उत्तर भिस्के स्थानमें ऐस् हो २०३-॥

३५५८ बहुलं छन्दसि । ७ । १ । १० ॥

अग्निर्देवेभिः ॥

३५५८-वेदमें भिस्के स्थानमें बहुल करके ऐस् हो, यथा-" अग्निर्देवेभिः " ॥

३५५९ नेतराच्छन्दसि । ७ । १ । २६ ॥

स्वमोरद्ड् न । वार्त्रघ्नमितरम् । छन्दसि किम् । इतरत्काष्ठम् ॥ "समासेऽनञ्पूर्वे क्त्वो ल्यप् । ७ । १ । ३७ ॥

३५५९-वेदमें इतर शब्दके परे सु और अम्के स्थानमें अदड् आदेश न हो, यथा-"वार्त्रघ्नमितरम्" । लोकमें तो 'इतरत् काष्ठम्' ऐसा होगा। अनञ् पूर्वक समासमें क्त्वाके स्थानमें ल्यप् आदेश हो ३३३२-॥

३५६० क्त्वापि च्छन्दसि । ७।१।३८ ॥

यजमानं परिधापयित्वा ॥

३५६०-अनञ् पूर्वक समासमें क्त्वा आदेश भी हो अपि शब्दसे ल्यप् भी समास और असमासमें हो इस स्थलमें अपि शब्द समाप्त ल्यप्का बाधक है, यथा-"यजमानं परिधापयित्वा" यहां णिजन्त परिपूर्वक धा धातुके उत्तर क्त्वा प्रत्यय, उसके स्थानमें ल्यबादेश प्राप्त होनेपर क्त्वा आदेश हुआ ॥

३५६१ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः । ७ । १ । ३९ ॥

ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते सुः। परमे व्योमन् व्योमनि इति प्राप्ते ङेर्लुक्। धीती। मती। सुष्टुती। धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घः। या सुरथा रथीतमा दिविस्पृशा अश्विना। यौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आ । नताद्ब्राह्मणम् । नतमिति प्राप्ते आत् । यादेव विद्म तात्वा । यमिति प्राप्ते । न युष्मे वाजबन्धवः। अस्मे इन्द्राबृहस्पती । युष्मासु अस्मभ्यमिति प्राप्ते शे । उरुया । धृष्णुया। उरुणा धृष्णुनेति प्राप्ते या । नाभा पृथिव्याः। नाभाविति प्राप्ते डा। ता अनुष्ठ्योच्च्यावयतात्। अनुष्ठानमनुष्ठा। व्यवस्थावदङ्। आङो ड्या। साधुया । साध्विति प्राप्ते याच् । वसन्ता यजेत । वसन्ते इति प्राप्ते आल् ॥ इयाडियाजीकाराणामुपसंख्यानम् ॥*॥ उर्विया । दार्विया। उरुणा दारुणेति प्राप्ते इया। सुक्षेत्रिया।सुक्षेत्रिणेति प्राप्ते डियाच्।दृतिं न शुष्कं सरसी शयानम्। ङेरीकार इत्याहुः । तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता । वस्तुतस्तु ङीषन्तात् ङेर्लुक् । ईकारादेशस्य तूदाहरणान्तरं मृग्यम् ॥ आङ्याजयारामुपसंख्यानाम् ॥ * ॥ प्रबाहवा सिसृतम् । प्रबाहुनेति प्राप्ते आङादेशः। घेर्ङितीति गुणः । स्वप्नया । स्वप्नेनेति प्राप्ते अयाच्। स नः सिन्धुमिव नावया । ना वेति प्राप्ते अयार्। रित्स्वरः ॥

३५६१-वेदमें सुप्के स्थानमें सु, सुप्का लुक्, पूर्वसवर्णदीर्घ, आ, आत्, शे, या, डा, ड्या, याच् और आल् आदेश हों, यथा-"ऋजवः सन्तु पन्थाः" । इस स्थलमें 'पन्थानः' ऐसा प्राप्त होनेपर सु हुआ है । "परमे व्योमन्"। इस स्थानमें 'व्योमनि' इस प्रकार प्राप्त होनेपर ङिका लुक् हुआहै । 'धीती मती सुष्टुती' इन स्थलोंमें 'धीत्या मत्या सुष्टुत्या' इस प्रकार प्राप्त होनेपर पूर्वसवर्ण दीर्घ हुआ है । "या सुरथा रथीतमा दिवि स्पृशा अश्विना" इस स्थलमें यौ सुरथौ दिविस्पृशौ ऐसे प्राप्त होनेपर आ हुआ है । "नताद् ब्राह्मणम्"इस स्थानमें'नतम्' ऐसे प्राप्त होनेपर आत् हुआ है। "यादेव विद्म तात्वा" यहां 'यम्' ऐसे प्राप्तमें आत् हुआ है "न युष्मे वाज बन्धवः॥ अस्मे इन्द्रा बृहस्पति"इस स्थानमें युष्मासु और अस्मभ्यम् ऐसा प्राप्त होनेपर शे हुआ है ।

"उरुया । धृष्णुया" इस स्थानमें 'उरुणा' और 'धृष्णुना' ऐसे प्राप्त होनेपर या हुआ है । "नाभा पृथिव्याः" इस स्थानमें नाभौ ऐसा प्राप्त होनेपर डा हुआहै । "ता अनुष्ठोच्यावयतात्" इस स्थलमें अनुष्ठानम्, इस विग्रहमें 'अनुष्ठा' पद हुआ, यहां 'व्यवस्था' पदकी समान अङ् आङ्के स्थानमें ड्या और डित्वके कारण टिका लोप हुआ है 'साधुया' इस स्थानमें 'साधु' ऐसे प्राप्त होनेपर याच् हुआ है । "वसन्ता यजेत" इस स्थानमें 'वसन्ते' ऐसे प्राप्त होनेपर आल् हुआ है ॥

सुपोंके स्थानमें इया, डियाच् और ईकार आदेश भी हो * यथा-"उर्विया दार्विया" यहां उरुणा और 'दारुणा' ऐसा प्राप्त होनेपर इया हुआ है । 'सुक्षेत्रिया' यहां 'सुक्षेत्रिणा' ऐसा प्राप्त होनेपर डियाच् हुआहै । "दृतिं न शुष्कं सरसीशयानम्" इस स्थलमें ङिके स्थानमें ईकार हुआहै । इस स्थलमें आद्युदात्त प्राप्त होनेपर व्यत्ययसे अन्तोदात्तता हुई है। वास्तविक तो ङीष् प्रत्ययान्तके परे ङिका लुक् हुआहै, तब ईकारादेशका उदाहरण अन्वेष्टव्य है ।

सुपोंके स्थानमें आङ्, अयाच् और अयार् आदेश भी हो* यथा-"प्रबाहवा सिसृतम्" इस स्थानमें प्रबाहुना ऐसा प्राप्त होनेपर आङ् आदेश हुआहै, और "घेर्ङिति २४५" इस सूत्रसे उकारको गुण हुआहै । 'स्वप्नया' इस स्थानमें 'स्वप्नेन' ऐसी प्राप्त होनेपर अयाच्-हुआ है । "स नः सिन्धुमिव नावया" इस स्थानमें 'नावा' ऐसा प्राप्त होनेपर अयार् हुआ और "रिति" इस सूत्रसे रित्स्वर हुआ ॥

३५६२ अमो मश् । ७ । १ । ४० ॥

मिबादेशस्यामो मश् स्यात् । अकार उच्चारणार्थः । शित्वात्सर्वादेशः । अस्तिसिच इति ईट् । वधीं वृत्रम् । अवधिषमिति प्राप्ते ॥

३५६२-वेदमें मिबादेश अम्के स्थानमें मश् आदेश हो, मश्का अकार उच्चारणार्थ है मश्का शकार इत् होनेके कारण सर्वादेश होगा । यथा-"वधीं वृत्रम्" यहां 'अवधिषम्' ऐसा प्राप्त था । इस स्थानमें हन् धातुसे लुङ् "हनो वध "लिङि लुङि च" इससे वधादेश, च्लिको सिच् "तस्थस्थ०" इससे मिप्को अम्भाव उसको मशादेश, "अस्तिसिचः २२२५" इससे अपृक्त मको इट् "इट ईटि" इससे सिच्का लोप, सवर्णदीर्घ, "बहुलं छन्दसि" इससे अडागमका अभाव हुआ है ॥

३५६३ लोपस्त आत्मनेपदेषु ७।१।४१॥

छन्दसि । देवा अदुह । अदुहतेति प्राप्ते । दक्षिणतः शये । शेते इति प्राप्ते । आत्मेति किम् । उत्सं दुहन्ति ॥

३५६३-वेदमें आत्मनेपदका जो तकार उसका लोप हो, यथा-"देवा अदुह" यहां अदुहत ऐसा प्राप्त था यहां दुह्+लङ् त "आत्मनेपदेष्वनतः" इससे झको अत् आदेश, "बहुलं छन्दसि" इससे रुट् तकारका लोप, दोनो अकारको "अतो गुणे" इससे पररूप हुआ । "दक्षिणतः शये" इस स्थलमें 'शेते' ऐसा प्राप्त था परन्तु तलोप करके अय् आदेश होनेपर 'शये' हुआ है । आत्मनेपद न होनेपर तकारका लोप नहीं होगा,यथा-"उत्सं दुहन्ति" ॥

३५६४ ध्वमो ध्वात् । ७ । १ । ४२ ॥

अन्तरेवोष्माणं वारयध्वात् । वारयध्वमिति प्राप्ते ॥

३५६४-वेदमें ध्वम् प्रत्ययके स्थानमें ध्वात् आदेश हो, यथा-"अन्तरे वोष्माणं वारयध्वात्" यहां 'वारयध्वम्' ऐसा प्राप्त था ॥

३५६५ यजध्वैनमिति च । ७।१।४३ ॥

एनमित्यस्मिन्परे ध्वमोन्तलोपो निपात्यते । यजध्वैनं प्रियमेधाः । वकारस्य यकारो निपात्यत इति वृत्तिकारोक्तिः प्रामादिकी ॥

३५६५-वेदमें 'एनम्' यह पद परे रहते ध्वम् प्रत्ययके अन्तभागका निपातनसे लोप हो, यथा-"यजध्वैनं प्रियमेधाः" वकारके स्थानमें निपातनसे यकार आदेश हो, ऐसी जो वृत्तिकारकी उक्ति है, वह प्रामादिकी है ॥

३५६६ तस्य तात् । ७ । १ । ४४ ॥

मध्यमपुरुषबहुवचनस्य स्थाने तात्स्यात् । गात्रमस्यानूनं कृणुतात् । कृणुतेति प्राप्ते । सूर्यं चक्षुर्गमयतात् । गमयतेति प्राप्ते ॥

३५६६-वेदमें त अर्थात् मध्यम पुरुष सम्बन्धी बहुवचनके स्थानमें तात् आदेश हो, यथा-"गात्रमस्या नूनं कृणुतात्" 'कृणुत' ऐसा प्राप्त होनेपर कृणुतात् हुआ है "सूर्यं चक्षुर्गमयतात्" 'गमयत' ऐसा प्राप्तमें गमयतात् हुआ है।

३५६७ तप्तनप्तनथनाश्च ।७।१ । ४५ ॥

तस्येत्येव । शृणोत ग्रावाणः । शृणुतेति प्राप्ते तप् । सुनोतन पचत ब्रह्मवाहसे । दधातन द्रविणं चित्रमस्मै । तनप् । मरुतस्तज्जुजुष्टन । जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च । विश्वे देवासो मरुतो यतिष्ठन । यत्संख्याकाः स्थेत्यर्थः । यच्छब्दाच्छान्दसो डतिः । अस्तेस्तस्य थनादेशः ॥

३५६७-वेदमें तके स्थानमें तप्, तनप्, तन और थन आदेश हों, यथा-"शृणोत ग्रावाणः" इस स्थानमें 'शृणुत' ऐसा प्राप्त होनेपर तप् आदेश और अङित् होनेसे गुण होकर 'शृणोत' ऐसा हुआ है । "सुनोतन पचत ब्रह्मवाहसे" "दधातन द्रविणं चित्रमस्मै" इन स्थलोंमें तनप् हुआ है । "मरुतस्तज्जुजुष्टन" यहां 'जुषध्वम्' ऐसा प्राप्त होनेपर व्यत्ययसे परस्मैपद और श्लु प्रत्यय हुआ है । "विश्वे देवासो मरुतो यतिष्ठन" यत् संख्याकाः स्थ इत्यर्थः । यत् शब्दके उत्तर छान्दस डति प्रत्यय हुआ है । अस धातुक उत्तर तके स्थानमें थनादेश हुआहै । 'मोस' यह आत्मभक्तिक निर्देश है । इकार उच्चारणार्थ है ॥

३५६८ इदन्तो मसि । ७।१।४६॥

मसीत्यविभक्तिको निर्देशः । इकार उच्चारणार्थः । मस् इत्ययमिकाररूपचरमावयवविशिष्टः स्यात् । मस इगागमः स्यादिति यावत् । नमो भरन्त एमसि । त्वमस्माकं तव स्मसि । इमः स्म इति प्राप्ते ॥

३५६८-वेदमें मस् यह इकाररूप अन्तावयवविशिष्ट हो अर्थात् मस् इस सकारान्त प्रत्ययको इम्का आगम हो । यथा-"नमो भरन्त एमसि" । "त्वमस्माकं तव स्मसि" । यहां 'इमः' और 'स्म' ऐसा प्राप्त होनेपर 'एमसि' और 'स्मसि' हुआ है ॥

३५६९ क्त्वो यक् । ७। १ ।४७॥

दिवं सुपर्णो गत्वाय ॥

३५६९-वेदमें क्त्वा प्रत्ययको यक्का आगम हो, यथा-"दिवं सुपर्णो गत्वाय" ॥

३५७० इष्ट्वीनमिति च । ७ । १ ।४८॥

क्त्वाप्रत्ययस्य ईनम् अन्तादेशो निपात्यते । इष्ट्वीनं देवान् । इष्ट्वा इति प्राप्ते ॥

३५७०-वेदमें क्त्वा प्रत्ययको निपातनसे 'ईनम्' अन्तादेश हो, यथा-"इष्ट्वीनं देवान्" यहां इष्ट्वा ऐसा प्राप्त था 'इष्ट्वीनम्' यहां यज्+क्त्वा "वचिस्वपि०" इससे सम्प्रसारण, "व्रश्च०" इससे षत्व, ष्टुत्व, अकारको 'ईनम्' आदेश हुआ ॥

३५७१ स्नात्व्यादयश्च । ७ । १ । ४९॥

आदिशब्दः प्रकारार्थः । आकारस्य ईकारो निपात्यते । स्विन्नः स्नात्वी मलादिव । पीत्वी सोमस्य वावृधे । स्नात्वा पीत्वेति प्राप्ते ॥

३५७१-यहां आदि शब्द प्रकारार्थक है । वेदमें स्नात्वी इत्यादि शब्द निपातनसे सिद्ध हों । अर्थात् क्त्वा प्रत्ययके आकारके स्थानमें निपातनसे ईकार हो, यथा-"स्विन्नः स्नात्वी मलादिव" "पीत्वी सोमस्य वावृधे" यहां 'स्नात्वा' और 'पीत्वा' ऐसा प्राप्त होनेपर स्नात्वी और पीत्वी हुआ है ॥

३५७२ आज्जसेरसुक् । ७ । १ । ५० ॥

अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात् । देवासः । ब्राह्मणासः ॥

३५७२-वेदमें अवर्णान्त अङ्गके उत्तर जस्को असुक्का आगम हो, यथा-देवासः । ब्राह्मणासः । लोकमें तो देवाः । ब्राह्मणाः ऐसा होगा ॥

३५७३ श्रीग्रामण्योश्छन्दसि।७।१।५६॥

आमो नुट् । श्रीणामुदारो धरुणो रयीणाम् । सूतग्रामणीनाम् ॥

३५७३-वेदमें श्री और ग्रामणी शब्दोंके उत्तर आम्को नुट्का आगम हो, यथा-"श्रीणामुदारो धरुणो रयीणाम्" । "सूतग्रामणीनाम्" । 'श्रीणाम्' यह "वामि" इससे नदी संज्ञाके अभाव पक्षमें उदाहरण है, नदीसंज्ञापक्षमें तो "ह्रस्वनद्यापः" इसीसे सिद्ध है ॥

३५७४ गोः पादान्ते । ७ । १ । ५७ ॥

विद्मा हि त्वा गोपतिं शूर गोनाम् । पादान्ते किम् । गवां शता पृक्षयामेषु । पादान्तेऽपि क्वचिन्न । छन्दसि सर्वेषां वैकल्पिकत्वात् । विराजं गोपतिं गवाम् ॥

३५७४-वेदमें पाद(चरण)के अन्तमें स्थित गो शब्दके उत्तर आम्को नुट्का आगम हो, यथा-" विद्मा हि त्वा गोपतिं शूर गोनाम् " । पदान्तमें न होनेपर " गवां शता पृक्षयामेषु " इस स्थानमें नुट्का आगम न हुआ । वेदमें आगम और प्रत्ययादि सबके वैकल्पिकत्वके कारण कहीं २ पदान्तमें भी नुट्का आगम न होगा, यथा- 'विराजं गोपतिं गवाम् ' पादसे इस स्थलमें ऋचाका चरण जानना कारण कि, यहां ' छन्दसि' इसका अधिकार है ॥

३५७५ छन्दस्यपि दृश्यते ।७।१।७६॥

अस्थ्यादीनामनङ्।इन्द्रो दधीचो अस्थभिः॥

३५७५-वेदमें टादि हलादि विभक्ति परे रहते भी अस्थ्यादि शब्दोंको अनङ् आदेश हो, यथा-" इन्द्रो दधीचोऽस्थभिः" इस स्थानमें 'अस्थिभिः' ऐसा प्राप्त होनेपर ' अस्थभिः ' हुआहै । इस स्थलमें " छन्दसि च " ऐसा सूत्र करनेसे ही सिद्ध होनेपर "अपि दृश्यते " यह सर्वोपाधिका व्यभिचारार्थ है, इससे टादि अजादिविभक्ति परे विहित अनङादेश हलादिविभक्ति परे भी होताहै, यथा 'अस्थभिः' और विभक्तिके परे उक्त अनङादेश अविभक्तिके परे भी होताहै, यथा-' अस्थन्वन्तं पदनस्था बिभर्ति ' । 'अस्थन्वन्तम् ' यहां अस्थिशब्दसे मतुप् अनङादेश करनेपर " अनो नुट् " इससे मतुप्को नुट् और अनङ्के नकारका लोप हुआ ॥

३५७६ ई च द्विवचने । ७ । १ । ७७॥

अस्थ्यादीनामित्येव । अक्षीभ्यां ते नासिकाभ्याम् ॥

३५७६-वेदमें द्विवचन विभक्ति परे रहते अस्थ्यादि शब्दोंके इकारके स्थानमें दीर्घ ईकार हो, यथा-"अक्षीभ्यां ते नासिकाभ्याम्" ॥

३५७७ दृक्स्ववस्स्वतवसां छन्दसि। ७ । १ । ८३ ॥

एषां नुम् स्यात्सौ । कीदृङ्ङिन्द्रः । स्ववान्। स्वतवान् ॥ " उदोष्ठ्यपूर्वस्य । ७।१।१०२॥"

३५७७-वेदमें सुविभक्ति परे रहते दृक्, स्ववस् और स्वतवस् शब्दोंको नुमागम हो, यथा-कीदृङ्ङिन्द्रः। स्ववान् । स्वतवान् " उदोष्ठ्यपूर्वस्य २४९४ " यह सूत्र यहां स्मरणार्थ है ॥

३५७८ बहुलं छन्दसि । ७ ।१।१०३॥

ततुरिः ॥

३५७८–वेदमें अङ्गावयव ओष्ठ्यपूर्वक जो ऋृत् तदन्त अङ्गको बहुल करके उत्व हो, यथा–ततुरिः ॥

३५७९ हु ह्वरेश्छन्दसि । ७ । २ ।३१॥

ह्वरेर्निष्ठायां हु आदेशः स्यात् । अहुतमसि हविर्धानम् ॥

३५७९–वेदमें ह्वृ धातुको निष्ठा प्रत्यय परे रहते हु आदेश हो, यथा–" अहुतमसि हविर्धानम् " ॥

३५८० अपरिह्वृताश्च । ७ । २ । ३२ ॥

पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते । अपरिह्वृताः सनुयाम वाजम् ॥

३५८०–वेदमें नञ् परिपूर्वक ह्वृ धातुको निष्ठा प्रत्यय परे रहते निपातनसे पूर्वसूत्रोक्त आदेश न हो, यथा–"अपरिह्वृताः सनुयाम वाजम्" ॥

३५८१ सोमे ह्वरितः । ७ । २ । ३३ ॥

इड्गुणौ निपात्येते । मा नः सोमो ह्वरितः ॥

३५८१–वेदमें सोम अर्थ होनेपर और निष्ठा प्रत्यय परे रहते ह्वृ धातुको निपातनसे इट् और गुण हो, यथा–"मा नः सोमो ह्वरितः " ॥

३५८२ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च । ७।२।३४॥

अष्टादश निपात्यन्ते । तत्र ग्रसु स्कम्भु स्तम्भु एषामुदित्त्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इण्निपात्यते । युवं शचीभिर्ग्रसितामुञ्चतम् । विष्कभिते अजरे । येन स्वः स्तभितम् । सत्येनोत्तभिता भूमिः । स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य मा भूदिति। चते याचने । कस गतौ । आभ्यां क्तस्येडभावः। चत्ता इतश्चत्तामुतः । त्रिधा ह श्यावमश्विना विकस्तम् । उत्तानाया हृदयं यद्विकस्तम् । निपातनबहुत्वापेक्षया सूत्र बहुवचनं विकस्ता इति तेनैकवचनान्तोऽपि प्रयोगः साधुरेव । शसु शंसु शासु एभ्यस्तृच इडभावः । एकस्त्वष्टुरश्वस्याविशस्ता । ग्रावग्राभ उत शंस्ता । प्रशास्ता पोता । तरतेर्वृङ्वृञोश्च तृच उट् ऊट् एतावागमौ निपात्येते । तरुतारं रथानाम् ।तरूतारम् । वरुतारम् वरूतारम् । वरूत्रीभिः सुशरणो नो अस्तु । अत्र ङीबन्तनिपातनं प्रपञ्चार्थम् । वरूतृशब्दो हि निपातितः । ततो ङीपा गतार्थत्वात् । उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते । ज्वल दीप्तौ । क्षर संचलने । टुवम उद्गिरणे । अम गत्यादिषु । इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्पठन्ति । तत्र क्षमूष् सहने इति धातुर्बोध्यः । भाषायां तु ग्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिताः । विशसिता–शंसिता–शासिता । तरीता–तरिता । वरीता–वरिता । उज्ज्वलति । क्षरति । पाठान्तरे क्षमति । वमति । अमति ॥ " बभूथाऽऽततन्थजगृम्भववर्थेति निगमे । ७।२।६४ " ॥ विश्वा तमुत्सं यत आवभूथ । येनान्तरिक्षमुर्वाततन्थ । जगृभ्मा ते दक्षिणमिन्द्र हस्तम् । त्वं ज्योतिषा वि तमो ववर्थ । भाषायां तु । बभूविथ । आतेनिथ । जगृहिम । ववरिथेति ॥

३५८२–वेदमें ग्रसित, स्कभित, स्तभित, उत्तभित, चत्त, विकस्त, विशस्तृ, शंस्तृ, शास्तृ, तरुतृ, तरूतृ, वरुतृ, वरूतृ, वरूत्री, उज्ज्वलिति, क्षरिति, वमिति और अमिति यह अठारह पद निपातनसे सिद्ध हों । उनमें ग्रसु, स्कम्भु और स्तम्भु इन धातुओंका उकार इत् होनेके कारण निष्ठा प्रत्यय परे इट्का प्रतिषेध प्राप्त होनेपर निपातनसे इट् होगा, यथा–" युवं शचीभिर्ग्रसितामुञ्चतम् " "विस्कभिते अजरे" "येन स्वः स्तभितम् " । " सत्येनोत्तभिता भूमिः " 'स्तभिता' इसीसे सिद्ध होनेपर भी उत्पूर्वक स्तम्भ धातुको ' उत्तभित ' ऐसा निपातन केवल उत्से भिन्न उपसर्ग पूर्वमें रहते तादृश निपातन नहीं हो इस निमित्त है । 'चते याचने' और ' कस गतौ ' इन दो धातुओंके उत्तर क्त प्रत्ययको इट्का आगम न होकर–यथा–" चत्ता इतश्चत्तामुतः " । "त्रिधा ह श्यावमश्विना विकस्तम् " । " उत्तानाया हृदयं यद्विकस्तम् " । सूत्रमें 'विकस्ताः' ऐसा बहुवचन निपातनगत बहुत्वकी अपेक्षासे है, अत एव एकवचनान्त प्रयोग भी साधु ही है । शसु, शंसु और शासु धातुके उत्तर तृच् प्रत्ययको इट् आगम न होकर–यथा–" एकस्त्वष्टुरश्वस्याविशस्ता " " ग्रावग्राभ उत शंस्ता " । " प्रशास्ता पोता" । तॄ, वृङ्, और वृञ् धातुके उत्तर तृच् प्रत्ययको निपातनसे उट् और ऊट् यह दो आगम होकर–यथा–" तरुतारं रथानाम् " तरूतारम् । वरुतारम् । वरूतारम् । "वरूत्रीभिः सुशरणो नो अस्तु " इस स्थलमें ङीप्प्रत्ययान्त निपातन प्रपञ्चार्थ है, क्यों कि, वरूतृ शब्द निपातनसिद्ध है, उसके उत्तर ङीप् प्रत्यय करके गतार्थ होजाताहै । उज्ज्वलादि चार धातुओंके अर्थात् ज्वल दीप्तौ, क्षर संचलने, टुवम् उद्गिरणे, अम् गत्यादिषु, इन धातुओंके उत्तर शप्के स्थानमें निपातनसे इकारादेश हुआहै । कोई २ ' क्षरिति ' इस पदके आगे 'क्षमिति' ऐसे पदका भी पाठ करतेहैं, उस स्थलमें ' क्षमूष्

सहने ' यह धातु जाननी चाहिये । लोकमें तो निष्ठा प्रत्ययान्त धातुका, ग्रस्तः । स्कम्भु–स्कब्धः । स्तम्भु–स्तब्धः । उत्तम्भु–उत्तब्धः । चते–चतितः । विकस–विकसितः । शसु–विशसिता । शंसु–शंसिता । शासु–शासिता। तृ–तरीता–तरिता,वृङ्, वृञ्–वरीता वरिता । उत्पूर्वक ज्वल–उज्ज्वलति। क्षर–क्षरति । पाठान्तरमें क्षम-क्षमति । वम–वमति । अम–अमति । ऐसे पद होंगे ॥

वेदमें बभूथ, आततन्थ, जगृम्भ और ववर्थ यह पद निपातनसे सिद्ध हों, अर्थात् इनको वेदमें निपातनसे इट् न हो, २९२७ यथा–" विद्मा तमुत्सं यत आबभूथ " । " येनान्तरिक्षमुर्वाततन्थ " " जगृम्मा ते दक्षिणमिन्द्र हस्तम् " " त्वं ज्योतिषा वितमो ववर्थ " । लोकमें तो ' बभूविथ । आतेनिथ । जगृहिम । ववरिथ ' इस प्रकार होंगे ॥

३५८३ सनिंससनिवांसम् । ७ ।२।६९॥

सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसोरिट् । एत्वाभ्यासलोपाभावश्च निपात्यते ॥

पावकादीनां छन्दसि प्रत्ययस्थात्कादित्वं नेति वाच्यम् ॥ * ॥ हिरण्यवर्णाः शुचयः पावकाः ॥

३५८३–वेदमें निपातनसे सनिम्पूर्वक भौवादिक सन् धातु अथवा तानादिक सन धातुके उत्तर क्वसु प्रत्ययको इट् हो, और एत्व और अभ्यास लोपका अभाव हो, यथा–सनिं ससनिवांसम् ॥

वेदमें पावकादि शब्दोंके उत्तर प्रत्ययस्थ ककारसे पूर्व अकारको इत्व न हो*यथा–"हिरण्यवर्णाः शुचयः पावकाः" लोकमें प्रत्ययस्थ ककारके पूर्ववर्त्ती अकारके स्थानमें इकार होगा, यथा–पाविकाः ॥

३५८४ घोर्लोपो लेटि वा । ७।३।७०॥

दधद्रत्नानि दाशुषे । सोमो ददद्गन्धर्वाय । यदग्निरग्नये ददात् ॥

३५८४–वेदमें लेट् परे रहते घुसंज्ञक धातुके आकारका विकल्प करके लोप हो, यथा–" दधद्रत्नानि दाशुषे"यहां धा धातुसे लेट्, श्लु, द्वित्व होकर–'दधाति ' इस प्रकार होनेपर आकारका लोप और " लेटोऽडाटौ ३४२७ " इस सूत्रसे अडागम और " इतश्च लोपः परस्मैपदेषु ३४२६ " इससे इकार लोप हुआ । " सोमो ददद् गन्धर्वाय" । "यदग्निरग्नये ददात्"। पूर्व दोनों स्थलोंमें आकारका लोप हुआहै और पर स्थलमें लोपाभाव हुआहै ॥

३५८५ मीनातेर्निगमे । ७ । ३ ।८१॥

शिति ह्रस्वः । प्रमिणन्ति व्रतानि । लोके प्रमीणाति । "अस्तिसिचोऽपृक्ते । ७ ।३।९६"॥

३५८५–वेदमें शित् प्रत्यय परे रहते भी धातुके ईकारको ह्रस्व हो, यथा–" प्रमिणन्ति व्रतानि " इस स्थलमें "हिनुमीना २५३०" इस सूत्रसे णत्व हुआहै । लोकमें प्रमीणाति । " अस्तिसिचोऽपृक्ते २२२५ " यह सूत्र यहां स्मरणार्थक है–॥

३५८६ बहुलं छन्दसि । ७ । ३ । ९७॥

सर्वमा इदम् ॥

ह्रस्वस्य गुणः । जसि च । जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः ॥ * ॥ अधा शतक्रत्वो यूयम् । शतक्रतवः । पश्वे नृभ्यो यथा गवे । पशवे । नाभ्यस्तस्याचीति निषेधे बहुलं छन्दसीति वक्तव्यम् ॥ * ॥ आ-नुषग्जुजोषत् ॥

३५८६–वेदमें बहुल करके विद्यमान सिच् और अस् धातुके उत्तर अपृक्तसंज्ञक हल्को ईट् हो, यथा– "सर्वमा इदम्" यहां अस धातुके उत्तर लङ्, तिप्, "आडजादीनाम् २२५४ " इस सूत्रसे आट्, शप्का लुक् " अस्तिसिच० २२२५ " इस सूत्रसे ईट्का अभाव होनेपर अपृक्तत्वके कारण " हल्ङ्याप्०"से तका लोप रुत्व और विसर्ग हुआ । ह्रस्वको गुण हो सुम्बुद्धि परे रहते "जसि च २४१" ह्रस्वको गुण हो जस् प्रत्यय परे रहते ॥

जसादि प्रत्यय परे रहते वेदमें ' णौ चङ्युपधायाः' इस शास्त्रसे पूर्व शास्त्रविहित कार्य्य विकल्प करके हो * यथा– " अधा शतक्रत्वो यूयम् " । " शतक्रतवः " पश्वेनृभ्यो यथागवे" "पशवे" ॥

" नाभ्यस्तस्याचि २५०३ " इस गुणनिषेध शास्त्रमें 'बहुलं छन्दसि' ऐसा कहना चाहिये, अर्थात् " नाभ्यस्तस्याचि० " इसमें गुणनिषेध वेदमें विकल्प करके हो*"जुजोषत् " यहां प्रीति और सेवनार्थक जुष् धातुसे लेट् व्यत्ययसे परस्मैपद, तिप्, इकारका लोप, "लेटो " इस सूत्रसे अट्, व्यत्ययसे शप्के स्थानमें श्लु और द्वित्व हुआहै ॥

३५८७ नित्यं छन्दसि । ७ । ४ । ८ ॥

छन्दसि विषये चङ्युपधाया ऋवर्णस्य ऋन्नित्यम् । अवीवृधत् ॥

३५८७–वेदमें चङ् परे रहते उपधाभूत ऋवर्णके स्थानमें नित्य ऋकार हो, यथा–"अवीवृधत् " ॥

३५८८ न च्छन्दस्यपुत्रस्य ।७।४।३५॥

पुत्रभिन्नस्यादन्तस्य क्यचि ईत्वदीर्घौ न । मित्रयुः । क्याच्छन्दसीति उः । अपुत्रस्य किम्। पुत्रीयन्तः सुदानवः । अपुत्रादीनामिति वाच्यम् ॥ * ॥ जनीयन्तो न्वग्रवः । जनमिच्छन्त इत्यर्थः ॥

३५८८–क्यच् प्रत्यय परे रहते पुत्रभिन्न अकारान्त शब्दोंके अकारके स्थानमें ईकार और दीर्घ न हो, यथा– "मित्रायुः" यहां " क्याच्छन्दसि ३१५०" इस सूत्रसे उकार हुआ 'अपुत्रस्य' यह क्यों कहा ? तो " पुत्रीयन्तः सुदानवः" इस स्थलमें ईत्व और दीर्घ न हो ॥

'अपुत्रादीनाम्' अर्थात् पुत्रादिभिन्नको क्यच् परे ईत्व,दीर्घ न हो ऐसा कहना चाहिये * यथा–"जनीयन्तोऽन्वग्रवः " अर्थात् जनको इच्छा करतेहैं ॥

३५८९ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति । ७ । ४ । ३६ ॥

एते क्यचि निपात्यन्ते । भाषायां तु उप्रत्ययाभावाद् दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति ॥

३५८९-क्यच् प्रत्यय परे दुरस्युः, द्रविणस्युः, वृषण्यति, रिषण्यति, यह पद निपातनसे सिद्ध हों । लोकमें तो उ प्रत्ययके अभावके कारण 'दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति' इस प्रकार होंगे । 'दुरस्युः' इत्यादिमें दुष्ट शब्दको दुरस् भाव,द्रविणको द्रविणस्,वृषको वृषण्, रिष्टको रिषण् भाव निपातनसे हुआहै ॥

३५९० अश्वाघस्यात् । ७ । ४ । ३७ ॥

अश्व अघ एतयोः क्यचि आत्स्याच्छन्दसि । अश्वायन्तो मघवन् । मा त्वा वृका अघायवः । न च्छन्दसीति निषेधो न ईत्वमात्रस्य किंतु दीर्घस्यापीति । अत्रेदमेव सूत्रं ज्ञापकम् ॥

३५९०-वेदमें क्यच् प्रत्यय परे रहते अश्व और अघ शब्दके अकारको आत् हो, "अश्वायन्तो मघवन्" मा त्वा वृका अघायवः" । "न च्छन्दसि" इस सूत्रसे केवल ईत्वमात्रका निषेध नहीं होगा, किन्तु दीर्घका भी निषेध होगा, इसमें यह सूत्र ही ज्ञापक है ॥

३५९१ देवसुम्नयोर्यजुषि काठके । ७ । ४ । ३८ ॥

अनयोः क्यचि आत्स्याद्यजुषि कठशाखायाम् । देवायन्तो यजमानाः । सुम्नायन्तो हवामहे । इह यजुःशब्दो न मन्त्रमात्रपरः किंतु वेदोपलक्षकः । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति। किं च ऋग्वेदेपि भवति।स चेन्मन्त्रो यजुषि कठशाखायां दृष्टः।यजुषीति किम् । देवाञ्जिगाति सुम्नयुः । बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणमिति हरदत्तः॥

३५९१-यजुर्वेदीय कठशाखा विषयमें क्यच् परे रहते देव और सुम्न शब्दोंके अकारको आत् हो, यथा-"देवायन्तो यजमानाः" । "सुम्नायन्तो हवामहे" । इस स्थलमें यजुः शब्द केवल मंत्रमात्रपरक नहीं है, किन्तु वेदोपलक्षक है । इस कारण युजुर्वेदान्तर्गत ऋगात्मक मंत्रोंमें भी यह कार्य होगा । और ऋग्वेदमें भी होसकता है, यदि वही मंत्र यजुर्वेद विषयक कठशाखामें दृष्ट हो तो । यजुर्वेदीय कठ शाखा न होनेपर "देवाञ्जिगातिसुम्नयुः" ऐसा होगा।बह्वृचोंके भी कठशाखा होतीहै, इस कारण यह प्रत्युदाहरण है, ऐसा हरदत्त कहतेहैं ॥

३५९२ कव्यध्वरपृतनस्यर्चिलोपः । ७ । ४ । ३९ ॥

स पूर्वया निविदा कव्यतायोः । अध्वर्युं वा मधुपाणिम् । मदयन्तं पृतन्युम् ॥ "दधातेर्हिः । ७ । ४ । ४२ ।" "जहातेश्च क्त्वि । ७ । ४ । ४३" ॥

३५९२-ऋक् विषयमें क्यच् परे रहते कवि, अध्वर और पृतना शब्दोंके अन्त्यका लोप हो, मृगय्वादि गणमें अध्वर्यु शब्द पठित है, इससे उसकी व्युत्पत्त्यन्तर समझना "स पूर्वया निविदा कव्यतायोः"। "अध्वर्युं वा मधुपाणिम्" "मदयन्तं पृतन्युम्" । "दधातेर्हिः ३०७६" "जहातेश्च क्त्वि ३३३१" यह दोनों सूत्र यहां स्मरणार्थ हैं ॥

३५९३ विभाषा छन्दसि । ७। ४।४४॥

हित्वा शरीरम् । हीत्वा वा ॥

३५९३-वेदमें हा धातुके स्थानमें विकल्प करके हि आदेश हो, हि आदेशाभाव पक्षमें "घुमास्था०" इस सूत्रसे ईकार होगा, यथा-हित्वा शरीरम् । हीत्वा वा ॥

३५९४ सुधितवसुधितनेमधितधिष्वधिषीय च । ७ । ४ । ४५ ॥

सु वसु नेम एतत्पूर्वस्य दधातेः क्ते प्रत्यये इत्वं निपात्यते । गर्भं माता सुधितं वक्षणासु । वसुधितमग्नौ । नेमधिता न पौंस्या ॥ क्तिन्यपि दृश्यते । उत श्वेतं वसुधितिं निरेके । धिष्व वज्रं दक्षिण इन्द्र हस्ते । धत्स्वेति प्राप्ते । सुरेता रेतो धिषीय । आशीर्लिङि । इट् । इटोऽत् । धासीयेति प्राप्ते ॥

अपो भि ॥ मासश्छन्दसीति वक्तव्यम् ॥*॥ माद्भिः शरद्भिः ॥स्ववस्वतवसोरुषसश्चेष्यते॥*॥ स्ववद्भिः । अवतेरसुन् । शोभनमवो येषां ते स्ववसस्तैः । तु इति सौत्रो धातुस्तस्मादसुन् । स्वं तवो येषां तैः स्वतवद्भिः । समुषद्भिरजायथाः । मिथुनेऽसिः । वसेः किच्चेत्यसिप्रत्यय इति हरदत्तः । पञ्चपादीरीत्या तु उषः किदिति प्राग्व्याख्यातम् ॥ "न कवतेर्यङि ॥७।४।६३।"

३५९४-वेदमें सु वसु और नेम शब्दपूर्वक धा धातुके आकारके स्थानमें क्त प्रत्यय परे रहते निपातनसे इत्व हो, यथा-"गर्भं माता सुधितं वक्षणासु" । "वसुधितमग्नौ" । "नेमधिता न पौंस्या" क्तिन् प्रत्यय परे भी इत्व देखेजातेहै, यथा-"उत श्वेतं वसुधितिं निरेके" । "धिष्व वज्रं दक्षिण इन्द्र हस्ते" यहां 'धत्स्व' ऐसा प्राप्त था परन्तु निपातनसे 'धिष्व' हुआ । "सुरेता रेतो धिषीय" यहां आशीर्लिङ्में इट्, उसके स्थानमें अत् होकर 'धासीय' ऐसा प्राप्त था

"अपो भि ४४२" अप् शब्दके पकारके स्थानमें त हो, भादि प्रत्यय परे रहते ॥

"मासश्छन्दसीति वक्तव्यम्" अर्थात् भादि प्रत्यय परे रहते वेदमें मास् शब्दके सके स्थानमें तकार हो, ऐसा कहना चाहिये * माद्भिः शरद्भिः ।

स्ववस्, स्वतवस् और उषस् शब्दोंके सके स्थानमें तकार हो * "स्ववद्भिः" यहां अव धातुके उत्तर असुन् प्रत्यय पश्चात् सुशोभनम् अवो येषां ते=स्ववसः तैः, इस विग्रहमें, 'स्ववद्भिः' पद सिद्ध हुआहै । तु यह सूत्रान्तर्गत धातु है, उसके उत्तर असुन् प्रत्यय हुआ पश्चात् स्व तवो येषां तैः इस विग्रहमें "स्वतवद्भिः" हुआ । "समुषद्भिरजायथाः" यहां मिथुनेसिः "वसेः किच्च" इस सूत्रसे असि प्रत्यय हुआहै, यह हरदत्तका मत है । पञ्चपादीरीत्यनुसार उष धातुके उत्तर कित् प्रत्यय होकर उक्त रूप हुआहै यह पूर्वमें व्याख्या की है । "न कवतेर्यङि" यह सूत्र यहां स्मरणार्थ है ॥

३५९५ कृषेश्छन्दसि । ७ । ४ । ६४ ॥

यङि अभ्यासस्य चुत्वं न । करीकृष्यते ॥

३५९५-वेदमें कृष् धातुके अभ्यासको यङ् परे रहते चुत्व न हो अर्थात् कके स्थानमें चकार न हो, यथा-करीकृष्यते ॥

३५९६ दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च । ७ । ४ । ६५ ॥

एतेऽष्टादश निपात्यन्ते । आद्यास्त्रयो धृङो धारयतेर्वा । भवतेर्यङ्लुगन्तस्य गुणाभावः । तेन भाषायां गुणो लभ्यते । तिजेर्यङ्लुगन्तात्तङ् इयर्तेर्लिटि हलादिःशेषापवादो रेफस्य लत्वमित्त्वाभावश्च निपात्यते । अलर्षियुध्म खजकृत्पुरन्दरः । सिपा निर्देशो न तन्त्रम् । अलर्ति दक्ष उत । फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतरि अभ्यासस्य नीगागमो निपात्यते । आपनीफणत् । स्यन्देः संपूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक् । धातुसकारस्य षत्वम् । करोतेर्यङ्लुगन्तस्याभ्यासस्य चुत्वाभावः । क्रन्देर्लुङि च्लेरङ् द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च । कनिक्रदज्जनुषम् । अक्रन्दीदित्यर्थः । बिभर्तेरभ्यासस्य जश्त्वाभावः । वि यो भरिभ्रदोषधीषु । ध्वरतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य विगागमो धातोर्ऋकारलोपश्च । दविध्वतो रश्मयः सूर्यस्य । द्युतेरभ्यासस्य संप्रसारणाभावोऽत्वं विगागमश्च । दविद्युतद्दीद्यच्छोशुचानः । तरतेः शतरि श्लौ अभ्यासस्य रिगागमः । सहोर्जा तरित्रतः । सृपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य । वृजेः शतरि श्लावभ्यासस्य रीक् । मृजेर्लिटि णल् अभ्यासस्य रुक् धातोश्च युक् । दमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च । वक्ष्यन्ती वेदा गनीगन्ति कर्णम् ॥

३५९६-दाधर्त्ति, दर्धर्त्ति, दर्धर्षि, बोभूतु, तेतिक्ते, अलर्षि, आपनीफणत्, संसनिष्यदत्, करिक्रत्, कनिक्रदत्, भरिभ्रत्, दविध्वत्, दविद्युतत्, तरित्रतः, सरीसृपतम्, वरीव्रजत्, मर्मृज्या, आगनीगन्ति, यह अठारह पद वेदमें निपातनसे सिद्ध हों, उनमें पहिलेका तीन धृ अथवा धारि धातुके रूप हैं । यङ्लुगन्त भू धातुको गुणभाव हुआ, इस कारण लोकमें गुण होगा, यङ् लुगन्त तिज् धातुके उत्तर तङ् हुआहै ऋ धातुके उत्तर विट् परे हलादिः शेषापवाद रेफके स्थानमें लकार, इत्वाभाव निपातनसे होकर-"अलर्षि युध्म खजकृत् पुरन्दरः" सिप् करके निर्देश शास्त्रसम्मत नहीं है इससे "अलर्ति दक्ष उत" यह हुआ । आङ् पूर्वक यङ्लुगन्त फण धातुसे शतृ प्रत्यय होनेपर अभ्यासको नीक्का आगम निपातनसे होकर, आपनीफणत् । संपूर्वक स्यन्द धातुके उत्तर यङ्का लुक्, और शतृ प्रत्यय होनेपर अभ्यासको नीक्का आगम और धातुके सकारको षत्व हुआ । यङ्लुगन्त कृ धातुके अभ्यासको चुत्वाभाव अर्थात् "कुहोश्चुः" इस सूत्रसे प्राप्त कके स्थानमें चकार न हुआ । क्रन्द धातुके उत्तर लुङ् परे च्लिके स्थानमें अङ्, पश्चात् द्वित्व, अभ्यास कवर्गको चवर्गका अभाव और निक्का आगम होकर-"कनिक्रदज्जनुषम्" अर्थात् रोदन कियाथा । भृ धातुके उत्तर शतृ प्रत्यय करके अभ्यासको जश्त्वका अभाव और रिगागम होकर यथा "वि यो भरिभ्रदोषधीषु"। यङ् लुगन्त ध्वृ धातुके उत्तर शतृ प्रत्यय परे अभ्यासको विक्का आगम और धातुके ऋकारका लोप होकर-यथा-"दविध्वतो रश्मयः सूर्यस्य" । यङ्लुगन्त द्युत् धातुके उत्तर शतृ प्रत्यय परे अभ्यासको "द्युतिस्वाप्योः संप्रसारणम् २३४४" इस सूत्रसे प्राप्त सम्प्रसारण का अभाव और अत्व अर्थात् अकार और विगागम होकर-यथा-"दविद्युतद्दीद्यच्छोशुचानः" तॄ धातुके उत्तर शतृ, श्लु प्रत्यय और अभ्यासको रिगागम होकर-यथा-"सहोर्जा तरित्रतः" । सृप् धातुके उत्तर शतृ और श्लु प्रत्यय द्वितीयैकवचनमें अभ्यासको रीगागम हुआ । वृज् धातुसे शतृ और श्लु, अभ्यासको रीगागम हुआ । मृज् धातुके उत्तर लिट्, णल् अभ्यासको रुक् और धातुको युक्का आगम हुआ । आङ्पूर्वक दम् धातुके उत्तर लट् और श्लु अभ्यासको चुत्वाभाव और नीक्का आगम होकर-यथा-"वक्ष्यन्ती वेदा गनीगन्ति कर्णम्" ॥

३५९७ ससूवेति निगमे । ७ । ४ । ७४ ॥

सूतेर्लिटि परस्मैपदं युगागमोऽभ्यासस्य चात्वं निपात्यते । गृष्टिः ससूव स्थविरम् । सुषुव इति भाषायाम् ॥

३५९७-वेदमें लिट् लकारमें सू धातुसे परस्मैपद और वुगागम और अभ्यासको आत्व अर्थात् ऊकारके स्थानमें आकार निपातनसे हो, यथा-"गृष्टिः ससूव स्थविरम्"। भाषामें "सुषुवे" ऐसा पद होगा ॥

३५९८ बहुलं छन्दसि ।७। ४। ७८॥

अभ्यासस्य इकारः स्याच्छन्दसि । पूर्णां विवष्टि । विशेरेतद्रूपम् ॥

॥ इति सप्तमोऽध्यायः ॥

३५९८-वेदमें धातुसम्बन्धी अभ्यासको इकार हो, यथा-"पूर्णां विवष्टि" यह विश् धातुका रूप है। विश् धातुसे लिट्, तिप्,णप्के स्थानमें श्लु, द्वित्व, अभ्यासको इत्व "व्रश्च०" इससे षत्व और ष्टुत्व होकर 'विवष्टि' यह पद सिद्ध हुआ है ॥

इति सप्तमोऽध्यायः।

३५९९ प्रसमुपोदः पादपूरणे ।८।१।६॥

एषां द्वे स्तः पादपूरणे । प्रप्रायमग्निः । संसमिद्युवसे । उपोप मे परामृश । किं नोदुदु हर्षसे ॥

३५९९-वेदमें पादपूरण होनेपर प्र,सम्, उप और उत् इन अव्यय शब्दोंको द्वित्व हो, यथा-"प्रप्रायमग्निः"। "संसमिद्युवसे" । "उपोप मे परामृश" । "किं नोदुदु हर्षसे" ॥

३६०० छन्दसीरः ।८।२।१५॥

इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात् । हरिवते हर्यश्वाय । गीर्वान् ॥

३६००-वेदमें इवर्णान्त और रेफान्त शब्दके परवर्ती मतुप्के मकारके स्थानमें वकार हो, यथा-"हरिवते हर्यश्वाय" गीर्वान्। "र्वोरुपधाया दीर्घ इकः" इससे दीर्घ ॥

३६०१ अनो नुट्।८।२।१६॥

अनन्तान्मतोर्नुट् स्यात् । अक्षण्वन्तः कर्णवन्तः। अस्थन्वन्तं यदनस्था ॥

३६०१-वेदमें अन् भागान्त शब्दके उत्तर मतुप्को नुट् आगम हो, यथा-"अक्षण्वन्तः, कर्णवन्तः" । अस्थन्वन्तं यदनस्था बिभर्ति ॥

३६०२ नाद्घस्य।८।२।१७॥

नान्तात्परस्य घस्य नुट् । सुपथिन्तरः ॥ भूरिदाव्नस्तुड्वाच्यः ॥ * ॥ भूरिदावत्तरो जनः। ईद्रथिनः ॥ * ॥ रथीतरः । रथीतमं रथीनाम्॥

३६०२-वेदमें नकारान्त शब्दोंके परे स्थित घको नुट्का आगम हो। यथा, "सुपथिन्तरः"।

भूरिदावन् शब्दके उत्तर घको तुट्का आगम हो * "भूरिदावत्तरो जनः" दा+वनिप्+तरप्+ "न लोपः प्रातिपदिकान्तस्य" इससे नकारका लोप, तुडागम। रथिन् शब्दको घ परे रहते इत् हो*। रथीतरः।"रथीतमं रथीनाम्" ॥

३६०३ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि च्छन्दसि ।८।२।६१॥

सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठाया नत्वाभावो निपात्यते । नसत्तमञ्जसा। निषत्तमस्य चरतः। असन्नं निषण्णमिति प्राप्ते । उन्देर्नञ्पूर्वस्यानुत्तम्। प्रतूर्तमिति त्वरतेः । तुर्वीत्यस्य वा। सूर्तमिति सृ इत्यस्य। गूर्तमिति गुरी इत्यस्य॥

३६०३-वेदमें नसत्त, निषत्त, अनुत्त, प्रतूर्त्त, सूर्त्त, गूर्त्त यह पद निपातनसे सिद्ध हों। नसत्त और निषत्त इस स्थलमें नञ्पूर्वक और निपूर्वक सद् धातुके उत्तर निष्ठा प्रत्यय होकर निपातनसे नत्वाभाव हुआहै । यथा-"नसत्तमञ्जसा" । "निषत्तमस्य चरतः" लौकिक प्रयोग, असन्नम् निषण्णम् इस प्रकार होगा। नञ्पूर्वक उन्द धातुके उत्तर निष्ठा प्रत्यय करके अनुत्तम् पद सिद्ध हुआहै। भाषामें अनुन्नम् । प्रपूर्वक त्वर अथवा तुर्व धातुके उत्तर निष्ठा प्रत्यय करके प्रतूर्त्त पद सिद्ध हुआहै । "ज्वरत्वर० २६५४" इत्यादिसे ऊठ्। लोकमें प्रतूर्णम् । सृ धातुके उत्तर निष्ठा प्रत्यय करनेपर सूर्त्तम्। "उरण्रपरः" गुरी धातुसे निष्ठा प्रत्यय करनेपर गूर्त्तम् इत्यादि पद सिद्ध हुएहैं। लोकमें गूर्णम्। इस प्रकार होगा ॥

३६०४ अम्नरूधरवरित्युभयथा छन्दसि।८।२।७०॥

रुर्वा रेफो वा। अम्न एव । अम्नरेव । ऊध एव-ऊधरेव । अव एव-अवरेव ॥

३६०४-वेदमें अम्न, ऊध और अव शब्दके उत्तर विकल्प करके निपातनसे रु, अथवा रेफ हो, यथा-अम्न-एव, रुत्वपक्षमें "भोभगो० १६७" इससे रुको यकार"लोपः शाकल्यस्य"से लोप। अम्नरेव। ऊध एव=ऊधरेव। अव एव=अवरेव। अम्नर् ऊधर् और अवर् शब्द विकल्प करके रु अथवा र् होकर निपातनसे सिद्ध हुए हैं ॥

३६०५ भुवश्च महाव्याहृतेः।८।२।७१॥

भुव इति । भुवरिति ॥

३६०५-वेदमें महाव्याहृति अर्थमें भुव शब्दके उत्तर रु अथवा र् हो, यथा-भुव+इति=भुवरिति । भूः भुवः स्वः यह तीन महाव्याहृति पृथिवी अन्तरिक्ष और स्वर्गकी वाचक हैं ॥

३६०६ ओमभ्यादाने।८।२।८७॥

ओंशब्दस्य प्लुतः स्यादारम्भे । ओ३म् अग्निमीळे पुरोहितम् । अभ्यादाने किम् । ओमित्येकाक्षरम् ॥

३६०६-अभ्यादान अर्थात् आरम्भ होनेपर अथवा वेदादिमंत्रोंके प्रथममें ओं शब्द प्लुत स्वर हो, यथा-"ओ३म्

अग्निमीळे पुरोहितम्" । आरम्भ न होनेपर "ओमित्येकाक्षरं ब्रह्म" । इस स्थलमें प्लुत स्वर नहीं हुआ ॥

३६०७ ये यज्ञकर्मणि । ८ । २ । ८८ ॥

ये ३ यजामहे । यज्ञेति किम् । ये यजामहे॥

३६०७–यज्ञकर्म्म होनेपर वेदमें "ये" इस पदको प्लुत स्वर हो, यथा–"ये ३ यजामहे" । यज्ञ कर्म्म न होनेपर प्लुत स्वर नहीं होगा । यथा–"ये यजामहे" ॥

३६०८ प्रणवष्टेः । ८ । २ । ८९ ॥

यज्ञकर्मणि टेरोमित्यादेशः स्यात् । अपां रेतांसि जिन्वतो३म् । टेः किम् । हलन्तेऽन्त्यस्य मा भूत् ॥

३६०८–यज्ञकर्म्म होनेपर टिके स्थानमें प्लुत "ओम्" आदेश हो, यथा–"अपां रेतांसि जिन्वतो३म्" । टिभिन्न अन्य स्थल होनेपर हलन्त शब्दके अन्त्य वर्णके स्थानमें ओमादेश नहीं होगा ॥

३६०९ याज्यान्तः । ८ । २ । ९० ॥

ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । जिह्वामग्ने चकृषे हव्यवाहा३म् । अन्तः किम् । याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेः स्यात् सर्वान्तस्य चेष्यते ॥

३६०९–याज्यानुवाक्यकांडनामक प्रकरणमें जो सम्पूर्ण मंत्र है यज्ञकर्म्म होनेपर उनकी अन्त्य टिके स्थानमें प्लुत स्वर हो, यथा–"जिह्वामग्ने चकृषे हव्यवाहा३म्" । याज्यका अन्त्य न होनेपर वाक्य समुदाय रूप याज्य मंत्रके प्रति वाक्यमें टिके स्थानमें प्लुत स्वर होगा, और सर्वान्त टिके स्थानमें प्लुत स्वर इष्ट है ॥

३६१० ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । ८ । २ । ९१ ॥

एषामादेः प्लुतो यज्ञकर्मणि । अग्नयेऽनुब्रू ३ हि । अग्नये गोमयानि प्रे३ष्य । अस्तु श्रौ ३ षट् । सोमस्याग्ने वीही ३ वौ ३ षट् । अग्निमा ३ वह ॥

३६१०–वेदमें यज्ञकर्म्म होनेपर ब्रूहि, प्रेष्य, श्रौषट्, वौषट् और आवह पदके आदि वर्णको प्लुत स्वर हो, यथा–"अग्नये नुब्रू३हि।अग्नये गोमयानि प्रे३ष्य"।"अस्तु श्रौ३षट्"। "सोमस्याग्ने वीही३वौ३षट्" । "अग्निमा३वह" ॥

३६११ अग्नीत्प्रेषणे परस्य च । ८ । २ । ९२ ॥

अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात्परस्य च। ओ ३ श्रा ३ वय । नेह । अग्नीदग्नीन्विहर। बर्हिस्तृणीहि ॥

३६११–वेदमें यज्ञकर्म्म होनेपर अग्नीत्प्रेषणार्थमें आदि वर्ण और उसके परवर्त्ती वर्णको प्लुत स्वर हो, यथा–"ओ३ श्रा३वय" । किन्तु "अग्नीदग्नीन्विहर" और "बर्हिस्तृणीहि"। इन दो स्थलोंमें नहीं होगा ॥

३६१२ विभाषा पृष्टप्रतिवचने हेः । ८ । २ । ९३ ॥

प्लुतः । अकार्षीः कटम् । अकार्षं हि ३ । अकार्षं हि । पृष्टेति किम् । कटं करिष्यति हि । हेः किम् । करोमि ननु ॥

३६१२–वेदमें पृष्ट विषयका प्रतिवचन होनेपर "हि" शब्दको विकल्प करके प्लुत स्वर हो,यथा–"अकार्षीः कटम्"। "अकार्षं हि३" । "अकार्षं हि" । पृष्ट प्रतिवचन न होनेपर यथा–"कटं करिष्यति हि" हि शब्द न होनेपर "करोमि ननु" ॥

३६१३ निगृह्यानुयोगे च । ८ । २ । ९४ ॥

अत्र यद्वाक्यं तस्य टेः प्लुतो वा । अद्यामावास्येत्यात्थ ३। अमावास्येत्येवं वादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुयुज्यते ॥

३६१३–निग्रहपूर्वक अनुयोग अर्थमें वर्तमान जो वाक्य उसकी टिके स्थानमें विकल्प करके प्लुत स्वर हो, यथा–"अद्यामावास्येत्यात्थ३" । अर्थात् आज अमावास्या है इस प्रकार कहनेवालेको युक्तिसे उसके निज मतसे प्रच्यावित करके ऐसा अनुयोग करना होताहै ॥

३६१४ आम्रेडितं भर्त्सने । ८ । २ । ९५ ॥

दस्योदस्यो ३ घातयिष्यामि त्वाम् । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । चौरचौर ३ ॥

३६१४–भर्त्सनार्थमें आम्रेडित अर्थात् दो तीन वार उक्त जो पद उसके अन्तकी टिके स्थानमें प्लुत स्वर हो, यथा–दस्योदस्यो३घातयिष्यामि त्वाम्" । इस स्थलमें आम्रेडित शब्दग्रहणसे द्विरुक्त जानना चाहिये । "चौरचौर ३" इस स्थलमें भी प्लुत हुआ ॥

३६१५ अङ्गयुक्तं तिङाकाङ्क्षम् । ८ । २ । ९६ ॥

अङ्गेत्यनेन युक्तं तिङन्तं प्लवते । अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म । तिङ् किम् । अङ्ग देवदत्त मिथ्या वदसि । आकाङ्क्षं किम् । अङ्ग पच । नैतदपरमाकाङ्क्षति । भर्त्सन इत्येव । अङ्गाधीष्व भक्तं तव दास्यामि ॥

३६१५–आकांक्षा होनेपर अङ्ग शब्द करके युक्त तिङन्त पदके अन्त वर्णको प्लुत स्वर हो, यथा–"अङ्ग कूज३इदानीं ज्ञास्यसि जाल्म" तिङन्त न होनेपर अङ्ग देवदत्त मिथ्या वदसि यहाँ प्लुत न हुआ । आकांक्षा न होनेपर यथा–"अङ्ग" । "पच" । यह तिङन्त अन्यका आकांक्षा नहीं करताहै । इस सूत्रसे भर्त्सन अर्थमें ही प्लुत होताहै, यथा–"अङ्गाधीष्व भक्तं तव दास्यामि" यहाँ प्लुत न हुआ ॥

३६१६ विचार्यमाणानाम् । ८।२।९७॥

वाक्यानां टेः प्लुतः । होतव्यं दीक्षितस्य गृहा ३ इ । न होतव्य३मिति । होतव्यं न होतव्यमिति विचार्यते । प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः ॥

३६१६–विचार्य्यमाण वाक्यकी टिके स्थानमें प्लुत स्वर हो, यथा–"होतव्यं दीक्षितस्य गृहा ३इ" । " न होतव्य३मिति " । अर्थात् होम करना उचित है कि, नहीं सो विचार करताहै । प्रमाणसे वस्तुतत्त्वकी परीक्षा करनेको विचार कहतेहैं ॥

३६१७ पूर्वं तु भाषायाम् । ८।२।९८॥

६-शकारादि और मकारादि भिन्न शब्द उसका अन्तवर्ण उदात्त हो, यथा-नखम्। उखा। सुखम्। दुःखम्। "नखम्" इस स्थानमें "स्वाङ्गशिटाम्०" इस वक्ष्यमाण सूत्रसे आद्युदात्त प्राप्त था, परन्तु यह सूत्र उसका बाधक हुआ। उखा शब्दसे भाण्डविशेष समझना, उसको कृत्रिमत्वके कारण "खय्युवर्णं कृत्रिमा चेत्" इस वक्ष्यमाण सूत्रसे उवर्णको उदात्तत्व प्राप्त होनेपर और सुख और दुःख शब्दको "नब्विषयस्य" इस वक्ष्यमाण सूत्रसे आद्युदात्त प्राप्त होनेपर उसका इस सूत्रसे बाध हुआ। श्मादि होनेपर अर्थात् शकारादि और मकारादि होनेपर तो "शिखा। मुखम्" यहां खशब्दान्तोदात्त नहीं हुआ इस स्थलमें मुख शब्दको "स्वाङ्गशिटाम्०" अथवा "नब्विषयस्य" इस सूत्रसे आद्युदात्तत्व होताहै। शिखा शब्दको तो "शीङः खो निद्ध्रस्वश्च" इससे उणादिमें नित्त्वोक्तिसे वा अन्तरङ्गत्वके कारण टाप्से पहले "स्वाङ्गशिटाम्०" इससे आद्युदात्तत्व होताहै॥

७ 'द्विष्ठवत्सरतिशत्थान्तानाम्'॥ एषामन्त उदात्तः स्यात्। अतिशयेन बहुलो बंहिष्ठः। नित्त्वादाद्युदात्तत्वे प्राप्ते। बंहिष्ठैरश्वैः सुवृता रथेन यद्वंहिष्ठं नातिविधे इत्यादौ व्यत्ययादा-

द्युदात्तः । संवत्सरः।अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । सप्ततिः । अशीतिः । लघावन्त इति प्राप्ते । चत्वारिंशत् । इहापि प्राग्वत् । अभ्यूर्णवाना प्रभृथस्यायोः । अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । थाथादिसूत्रेण गतार्थमेतत् ॥

७–ष्ठि, वत्सर, ति, शत्, थ शब्दान्त पदोंके अन्तवर्ण उदात्त हों, "अतिशयेन बहुलो बंहिष्ठः" ।इष्ठन् प्रत्ययका नकार इत् होनेके कारण तदन्त शब्दको आद्युदात्तत्व प्राप्त था, परन्तु इस सूत्रसे उसका बाध होकर अन्तोदात्त हुआहै। "बंहिष्ठैरश्वैः सुवृता रथेन" । "यद्वंहिष्ठं नातिविधे" इत्यादि स्थलमें तो व्यत्ययसे आद्युदात्तत्व होताहै । "संवत्सरः"इस स्थलमें अव्यय पूर्वपद प्रकृतिस्वरका बाध होताहै । "सप्ततिः । अशीतिः" । इन स्थलोंमें "लघावन्त०" इस सूत्रसे उदात्त प्राप्त था। "चत्वारिंशत्" इस स्थलमेंभी उसी सूत्रसे उदात्त प्राप्त था "अभ्यूर्णवाना प्रभृथस्यायोः" इस स्थलमें अव्यय पूर्वपद प्रकृतिस्वरका बाध होताहै । यह पंडितोंने कहाहै । थाथादि सूत्रसे यह सूत्र गतार्थ है ॥

८ 'दक्षिणस्य साधौ' ॥ अन्त उदात्तः स्यात् । साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया स्वाङ्गशिटामित्याद्युदात्तः । अर्थान्तरे तु लघावन्त इति गुरुरुदात्तः । दक्षिणः सरलोदारपरच्छन्दानुवर्तिष्विति कोशः ॥

८–साधु अर्थात् प्रावीण्यार्थमें दक्षिण शब्दके अन्तवर्णको उदात्तस्वर हो, जिस स्थानमें साधु अर्थ न होकर तद्भिन्न अर्थात् व्यवस्था अर्थ है, उस स्थानमें सर्वनामता होनेसे "स्वाङ्गशिटाम्०" इस सूत्रसे आदिवर्ण उदात्त होगा । अर्थान्तर होनेपर तो "लघावन्ते०" इससे गुरुवर्ण उदात्त होगा । दक्षिण शब्दसे सरल, उदार और परच्छन्दानुवर्ती समझना ॥

९'स्वांगाख्यायामादिर्वा'॥इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः। दक्षिणो बाहुः । आख्याग्रहणं किम् । प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति ॥

९–स्वाङ्गाख्या होनेपर (स्वाङ्गवाचक होनेपर) दक्षिण शब्दके आदि और अन्त वर्ण पर्य्यायसे उदात्त हों, यथा– "दक्षिणो बाहुः" इस स्थलमें आदि और अन्त दोनों उदात्त हैं । सूत्रमें आख्या शब्दके ग्रहणका प्रयोजन क्या है ? इसपर कहतेहैं कि, "प्रत्यङ् मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति" (जो पुरुष पश्चिमकी तरफको मुख करके बैठताहै, उसका बांया हाथ दक्षिणकी तरफ रहताहै) इस स्थलमें दोनों वर्ण उदात्त नहीं हों ॥

१० 'छन्दसि च' ॥ अस्वाङ्गार्थमिदम् । दक्षिणः । इह पर्यायेणाद्यन्तावुदात्तौ ॥

१०–वेदमें स्वाङ्गवाचक न होनेपर भी दक्षिण शब्दका आदि और अन्तवर्ण पर्य्याय (क्रम) से उदात्त हो, यथा– "दक्षिणः" यहां क्रमसे आदि और अन्तवर्ण उदात्त हुआहै ॥

११'कृष्णस्यामृगाख्या चेत्' ॥ अन्त उदात्तः । वर्णानां तणेत्याद्युदात्तत्वे प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां व्रीहीणाम् । कृष्णो नोनाव वृषभः। मृगाख्यायां तु । कृष्णो रात्र्यै ॥

११–मृग अर्थात् पशु अर्थ न होनेपर कृष्ण शब्दका अन्तवर्ण उदात्त हो, "वर्णानां तण०"इस सूत्रसे आद्युदात्तकी प्राप्ति थी, परन्तु इस सूत्रसे वह न होकर अन्तोदात्त हुआ, यथा–"कृष्णानां व्रीहिणाम्" । "कृष्णो नोनाव वृषभः" । मृगाख्या होनेपर तो "कृष्णो रात्र्यै" ॥

१२'वा नामधेयस्य'॥कृष्णस्येत्येव । अयं वा कृष्णो अश्विना । कृष्ण ऋषिः ॥

१२–नामधेयवाचक कृष्ण शब्दका अन्तवर्ण उदात्त हो, यथा–"अयं वा कृष्णो अश्विना" । कृष्ण ऋषिः ॥

१३'शुक्लगौरयोरादिः'॥नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्त्तत इति तु युक्तम् । सरो गौरो यथा पिबेत्यत्रान्तोदात्तदर्शनात् ॥

१३–वेदमें शुक्ल और गौर शब्दका आदिवर्ण नित्य उदात्त हो, ऐसा कोई २ कहतेहैं । (इस सूत्रमें वा शब्दकी अनुवृत्ति होती है यह युक्त नहीं है क्योंकि, "सरो गौरो यथा पिब" इस स्थलमें गौर शब्दका अन्तवर्ण उदात्त देखा जाताहै ॥

१४ 'अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः' ॥ अङ्गुष्ठस्य स्वांगानामकुर्वादीनामिति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थ आरम्भः । वशाग्रहणं नियमार्थं छन्दस्येवेति । तेन लोक आद्युदात्ततेत्याहुः ॥

१४–वेदमें अंगुष्ठ, उदक, बक और वशा शब्दका अन्तवर्ण उदात्त हो, अंगुष्ठ शब्दका "स्वाङ्गानामकुर्वादीनाम् " इस वक्ष्यमाण सूत्रसे दूसरे वर्णकी उदात्तस्वरकी प्राप्ति होनेपर अन्तोदात्तार्थ सूत्रारम्भ कियाहै । सूत्रमें वशा शब्दग्रहण नियमार्थक है, कि, वेदमें ही वशा शब्दका अन्तवर्ण उदात्त हो इससे लोकमें आद्युदात्त ही होगा ॥

१५ 'पृष्ठस्य च' ॥ छन्दस्यन्त उदात्तः स्याद्वा भाषायाम् । पृष्ठम् ॥

१५–वेदमें पृष्ठ शब्दका अन्तवर्ण उदात्त हो और भाषामें विकल्प करके उदात्त हो, यथा–पृष्ठम् ॥

१६ 'अर्जुनस्य तृणाख्या चेत्' ॥ उनर्वन्तानामित्याद्युदात्तस्यापवादः ॥

१६–तृणका नाम होनेपर अर्ज्जुन शब्दका अन्तवर्ण विकल्प करके उदात्त हो, "उनर्वन्तानाम् " इस वक्ष्यमाण सूत्रसे आदि वर्ण उदात्त होता, किन्तु उसके प्रतिषेधके निमित्त भिन्न सूत्रको विधान कियाहै ॥

१७ 'अर्यस्य स्वाम्याख्या चेत्'॥ यान्तस्यान्त्यात्पूर्वमिति यतोऽनाव इति वाद्युदात्ते प्राप्ते वचनम्॥

१७-वेदमें स्वामी अर्थ होनेपर अर्य शब्दका अन्त वर्ण उदात्त हो, स्वामीसे भिन्न अन्य अर्थमें न हो, "यान्तस्यान्त्यात्पूर्वम्" अर्थात् यकारान्त शब्दके अन्तवर्णसे पूर्व वर्ण उदात्त हो, इस वक्ष्यमाण सूत्र और "यतोऽनाव ३७०१" अर्थात् यत्प्रत्ययान्त दो स्वरयुक्त शब्दका आदि वर्ण उदात्त हो, नौ शब्दका न हो, इस पूर्व सूत्रसे आदि वर्णको उदात्तता ही सिद्ध होती, इस कारण उसका बाधक भिन्न सूत्र कियाहै ॥

१८ 'आशाया अदिगाख्या चेत्' ॥ दिगाख्याव्यावृत्त्यर्थमिदम् । अत एव ज्ञापकाद्दिक्पर्यायस्याद्युदात्तता । इन्द्र आशाभ्यस्परि ॥

१८-वेदमें यदि दिक् अर्थ न हो तो आशा शब्दका अंत वर्ण उदात्त हो, दिग्वाचक शब्दकी व्यावृत्तिके निमित्त यह सूत्र कियाहै । अत एव दिक्पर्य्यायवाचक जो सम्पूर्ण (आशा, काष्ठा,इत्यादि) शब्द उनका आदि वर्ण उदात्त होगा । यथा- "इन्द्र आशाभ्यस्परि" ॥

१९ 'नक्षत्राणामाब्विषयाणाम्'॥ अन्त उदात्तः स्यात् । आश्लेषाऽनुराधादीनां लघावन्त इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् ॥

१९-आब्विषयीभूत अर्थात् आबन्त नक्षत्रवाचक शब्दका अन्त वर्ण उदात्त हो,आश्लेषा और अनुराधा इत्यादि आकारान्त नक्षत्रवाचक शब्दका "लघावन्ते०" अर्थात् लघु वर्ण अन्तमें रहते और दो लघु रहते बहच्क शब्दका गुरु वर्ण उदात्त और ज्येष्ठा, श्रविष्ठा, धनिष्ठा शब्द इष्ठन् प्रत्ययान्त होनेसे उनके आदि वर्णकी उदात्तता प्राप्त हुई थी, किन्तु उसके बाधके निमित्त यह सूत्र कियाहै । (ज्येष्ठः इत्यादि "प्रशस्यस्य श्रः २००९" "ज्य च २०११" इससे प्रशस्य शब्दसे इष्ठन् प्रत्यय परे हुए सन्ते ज्या आदेश । श्रविष्ठा श्रवणं श्रवः सोऽस्त्यस्याः सा श्रवती।धनं विद्यते अस्याः सा धनवती, अतिशयिता श्रवती श्रविष्ठा, धनिष्ठा, इष्ठन् होनेपर "विन्मतोर्लुक्" इससे मतुप्का लोप)॥

२० 'न कुपूर्वस्य कृत्तिकाख्या चेत्' ॥ अन्त उदात्तो न । कृत्तिका नक्षत्रम् । केचित्तु कुपूर्वो य आप् तद्विषयाणामिति व्याख्याय आर्यिका बहुलिका इत्यत्रान्तोदात्तो नेत्याहुः ॥

२०-कृत्तिका अर्थ होनेपर कवर्ग पूर्वक आकारान्त नक्षत्र वाचक शब्दोंका अन्त वर्ण उदात्त न हो, यथा-"कृत्तिका नक्षत्रम्" कोई २ कुपूर्वक जो आप् तदन्त शब्दका अन्त वर्ण उदात्त न हो ऐसा कहते हैं, यथा, "आर्यिका । बहुलिका"॥

२१ 'घृतादीनां च' ॥ अन्त उदात्तः । घृतं मिमिक्ष । आकृतिगणोऽयम् ॥

२१-घृतादि शब्दका अन्त वर्ण उदात्त हो, यथा, "घृतं मिमिक्षे" । यह आकृतिगण है ॥

२२ 'ज्येष्ठकनिष्ठयोर्वयसि' ॥ अन्त उदात्तः स्यात् । ज्येष्ठ आह चमसा । कनिष्ठ आह चतुरः । वयसि किम् । ज्येष्ठः श्रेष्ठः । कनिष्ठोऽल्पिकः । इह नित्त्वादाद्युदात्त एव ॥

२२-वयस् अर्थ होनेपर ज्येष्ठ और कनिष्ठ शब्दका अन्त वर्ण उदात्त हो, यथा-"ज्येष्ठ आह चमसा"। "कनिष्ठ आह चतुरः" । वयस् अर्थ न होनेपर ज्येष्ठः-श्रेष्ठः । कनिष्ठः- अल्पिकः । इस स्थलमें नित्त्वके कारण अर्थात् इष्ठन् प्रत्यय होनेके कारण आद्युदात्त ही हुआ । ज्येष्ठः "वृद्धस्य च२०१३" इससे इष्ठन् परे होनेसे ज्या आदेश हुआ,कनिष्ठः "युवाल्पयोः कनन्यतरस्याम्" इससे युवन् शब्दको कन् आदेश हुआ ॥

२३ 'बिल्वतिष्ययोः स्वरितो वा'॥ अनयोरन्तः स्वरितो वा स्यात् । पक्षे उदात्तः ॥

॥ इति फिट्सूत्रेषु प्रथमः पादः ॥

२३-बिल्व और तिष्य शब्दका अन्त वर्ण विकल्प करके स्वरित हो, विकल्प पक्षमें उदात्त हो ॥

इति फिट्सूत्रेषु प्रथमः पादः ।

२४ 'अथादिः प्राक् शकटेः'॥ अधिकारोऽयम् । शकटिशकट्योरिति यावत् ॥

२४-इसके पश्चात् "शकटिशकट्योः" इस वक्ष्यमाण सूत्रके पूर्व सूत्र पर्यन्त 'आदिः' इस पदको अधिकार समझना चाहिये ॥

२५ 'ह्रस्वान्तस्य स्त्रीविषयस्य'॥ आदिरुदात्तः स्यात् । बलिः । तनुः ॥

२५-स्त्रीलिङ्गमें ह्रस्वान्त शब्दका आदि वर्ण उदात्त हो, यथा-बलिः । तनुः ॥

२६ 'नब्विषयस्यानिसन्तस्य'॥ वने न वा यः। इसन्तस्य तु सर्पिः । नप् नपुंसकम् ॥

२६-नब्विषयीभूत अर्थात् नपुंसक लिङ्गमें इस् भागान्त शब्दभिन्न अन्य शब्दका आदि वर्ण उदात्त हो, यथा-'वने न वा यः' इस् भागान्त शब्द यथा-सर्पिः । नप् शब्दसे नपुंसक समझना, सर्पिः='अर्चिशुचि०' इत्यादिसे इसि हुआ ॥

२७ 'तृणधान्यानां च द्व्यषाम्'॥ द्व्यचामित्यर्थः। कुशाः।काशाः।माषाः।तिलाः।बह्वचां तु गोधूमाः॥

२७-दो स्वरयुक्त तृण वाचक और धान्यवाचक शब्दोंका आदि वर्ण उदात्त हो, यथा-कुशाः । काशाः । माषाः । तिलाः । बहु अच् युक्त होनेपर यथा-गोधूमाः ॥

२८ 'त्रः संख्यायाः' ॥ पञ्च । चत्वारः ॥

२८-नकारान्त और रकारान्त संख्यावाचक शब्दोंका आदि वर्ण उदात्त हो, यथा-पञ्च । चत्वारः ॥

२९ 'स्वांगशिटामदन्तानाम्'॥शिट् सर्वनाम। कर्णाभ्यां चुबुकादधि । ओष्ठाविव मधु । विश्वो विहायाः ॥

२९–वेदमें आकारान्त स्वाङ्ग वाचक सर्वनाम शब्दोंका आदि वर्ण उदात्त हो, यथा–कर्णाभ्यां चुबुका दधि । ओष्ठा विव मधु । विश्वो विहायाः ॥

३० 'प्राणिनां कुपूर्वम्'॥कवर्गात्पूर्व आदिरुदात्तः। काकः । वृकः । शुकेषु मे । प्राणिनां किम् । क्षीरं सर्पिर्मधूदकम् ॥

३०–कवर्गके पूर्ववर्ती प्राणिवाचक शब्दका आदि वर्ण उदात्त हो, यथा–काकः । वृकः । शुकेषु मे । प्राणिवाचक न होनेपर यथा–क्षीरं सर्पिर्मधूदकम् ॥

३१ 'खय्युवर्णं कृत्रिमाख्या चेत्' ॥ खयि परे उवर्णमुदात्तं स्यात् । कन्दुकः ॥

३१–खय् संज्ञक वर्ण परे रहते और कृत्रिम द्रव्यका नाम होनेपर पूर्ववर्ती उवर्ण उदात्त हो, यथा–कन्दुकः ॥

३२ 'उनर्वन्नन्तानाम्'॥उन । वरुणं वो रिशादसम् । ऋ । स्वसारं त्वा कृणवै । वन् । पीवानं मेषम् ॥

३२–उन, ऋ और वन् अन्तमें हो ऐसा पदका आदि वर्ण उदात्त हो, उन यथा–वरुणं वो रिशादसम् । ऋ–स्वसारं त्वा कृणवै । वन्–पीवानं मेषम् ॥

३३ 'वर्णानां तणतिनितान्तानाम्' ॥ आदिरुदात्तः । एतः । हरिणः । शितिः । पृश्निः। हरित् ॥

३३–त, ण, ति, नि, और तकारान्त जो वर्णवाचक शब्द उनका आदि वर्ण उदात्त हो, यथा–एतः । हरिणः । शितिः। पृश्निः । हरित् ॥

३४ 'ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये' ॥ ऋद्वर्ज्यं ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः ॥

३४–ताच्छील्य अर्थ होनेपर ऋकारको छोडकर ह्रस्वान्तका आदिभूत ह्रस्व उदात्त हो, यथा–मुनिः ॥

३५ 'अक्षस्यादेवनस्य' ॥ आदिरुदात्तः । तस्य नाक्षः । देवने तु । अक्षैर्मा दीव्यः ॥

३५–देवन अर्थात् क्रीडा अर्थ न होनेपर अक्ष शब्दका आदि वर्ण उदात्त हो, यथा–तस्य नाक्षः । देवन अर्थ होनेपर–अक्षैर्मा दीव्यः । यहां आदि वर्ण उदात्त न हुआ ॥

३६ 'अर्धस्यासमद्योतने' ॥ अर्धो ग्रामस्य । समेंऽशके तु अर्धं पिप्पल्याः ॥

३६–असमान अर्थ होनेपर अर्द्ध शब्दका आदिवर्ण उदात्त हो, यथा–"अर्द्धो ग्रामस्य" । किन्तु समानांश होनेपर "अर्द्धं पिप्पल्याः" । इस प्रकार होगा ॥

३७ 'पीतद्वर्थानाम्' ॥ आदिरुदात्तः । पीतद्रुः सरलः ॥

३७–पीतद्रु अर्थात् वृक्षवाचक शब्दका आदि वर्ण उदात्त हो, यथा–पीतद्रुः सरलः ॥

३८ 'ग्रामादीनां च' ॥ ग्रामः । सोमः । यामः ॥

३८–ग्रामादि शब्दोंका आदि वर्ण उदात्त हो, यथा–ग्रामः । सोमः । यामः ॥

३९ 'लुबन्तस्योपमेयनामधेयस्य' ॥ चञ्चेव चञ्चा । स्फिगन्तस्येति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा ॥

३९–उपमेय जो नामवाचक लुबन्त शब्द उसका आदि वर्ण उदात्त हो, यथा–चञ्चेव चञ्चा । "स्फिगन्तस्य" । ऐसा पाठान्तर भी है । स्फिक् यह लुप्की प्राचीन सम्मत संज्ञा है ॥

४० 'न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्'॥ एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव तालः । मेरुरिव मेरुः।व्याघ्रः । सिंहः। महिषः ॥

४०–वृक्ष, पर्वत, व्याघ्र, सिंह और महिष ये जो उपमेयवाचक शब्द हैं इनका आदिवर्ण उदात्त न हो, यथा–ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः ॥

४१ 'राजविशेषस्य यमन्वा चेत्'॥यमन्वा वृद्धः। आङ्ग उदाहरणम् । अङ्गाः प्रत्युदाहरणम् ॥

४१–यमन्वा अर्थात् वृद्ध अर्थ होनेपर राजविशेषवाचक शब्दका आदि वर्ण उदात्त हो, उदाहरण यथा–आंगः । प्रत्युदाहरण–अंगाः ॥

४२ 'लघावन्ते द्वयोश्च बह्वषो गुरुः' ॥ अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वच्कस्य गुरुरुदात्तः । कल्याणः । कोलाहलः ॥

४२–लघु वर्ण अन्तमें रहते और दो लघु रहते बहु अच्विशिष्ट शब्दका गुरु वर्ण उदात्त हो, यथा–कल्याणः । कोलाहलः ॥

४३ 'स्त्रीविषयवर्णाक्षुपूर्वाणाम्' ॥ एषां त्रयाणामाद्युदात्तः । स्त्रीविषयः । मल्लिका । वर्णः । श्येनी । हरिणी । अक्षुशब्दात्पूर्वोऽस्त्येषां ते अक्षुपूर्वाः । तरक्षुः ॥

४३–स्त्रीवाचक, वर्णवाचक और विद्यमानपूर्वक अक्षु शब्दका आदि वर्ण उदात्त हो, स्त्रीवाचक यथा–मल्लिका । वर्ण यथा–श्येनी । हरिणी । जिन शब्दोंके परे अक्षु शब्द रहे वह अक्षुपूर्व हैं । अक्षुपूर्व यथा–तरक्षुः ॥

४४ 'शकुनीनां च लघु पूर्वम्'॥पूर्वं लघु उदात्तं स्यात् । कुक्कुटः । तित्तिरिः । खंजरीटः ॥

४४–शकुनी अर्थात् पक्षिवाचक शब्दका आदि लघु वर्ण उदात्त हो, यथा–कुक्कुटः । तित्तिरिः । खञ्जरीटः ॥

४५ 'नर्तुप्राण्याख्यायाम्'॥यथालक्षणं प्राप्तमुदात्तत्वं न। वसन्तः। कृकलासः॥

४५-ऋतु और प्राणीवाचक शब्दका आदि लघु वर्ण उदात्त न हो, यथा-वसन्तः। कृकलासः॥

४६ 'धान्यानां च वृद्धक्षान्तानाम्'॥ आदिरुदात्तः। कान्तानाम्। श्यामाकाः। षान्तानाम्। माषाः॥

४६-वृद्धसंज्ञक कान्त और षकारान्त धान्यवाचक शब्दका आदि उदात्त हो। कान्त यथा-श्यामाकाः। षान्त यथा-राजमाषाः॥

४७ 'जनपदशब्दानामषान्तानाम्'॥ आदिरुदात्तः। केकयः॥

४७-जनपदवाचक अजन्त शब्दका आदि वर्ण उदात्त हो, यथा-केकयः॥

४८ 'हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा'॥ हयिति हल्संज्ञा। पललम्। शललम्। हयादीनां किम्। एकलः। असंयुक्तेति किम्। मल्लः॥

४८-हयादि अर्थात् हलादि असंयुक्त लकारान्त शब्दका अन्त्य और आदि दोनों वर्ण विकल्प करके उदात्त हों, यथा-पललम्। शललम्। हलादि न होनेपर। एकलः। असंयुक्त न होनेपर मल्लः॥

४९ 'इगन्तानां च द्व्यषाम्'॥ आदिरुदात्तः। कृषिः।

॥ इति फिट्सूत्रेषु द्वितीयः पादः॥

४९-इ, उ, ऋ और लृकार अन्तमें हो ऐसा दो स्वरयुक्त शब्दका आदि वर्ण उदात्त हो, यथा-कृषिः॥

इति फिट्सूत्रेषु द्वितीयपादः।

५० 'अथ द्वितीयं प्रागीषात्'॥ ईषान्तस्य हलादेरित्यतः प्राक् द्वितीयाधिकारः॥

५०-"ईषान्तस्य हलादेः" इस वक्ष्यमाण सूत्रके पूर्वपर्यन्त द्वितीयाधिकार जानना चाहिये॥

५१ 'त्र्यचां प्राङ्मकरात्'॥ मकरवरूढेत्यतः प्राक् त्र्यचामित्यधिकारः॥

५१-"मकरवरूढ०" इत्यादि वक्ष्यमाण सूत्रके पूर्वपर्यन्त 'त्र्यचाम्' इस पदका अधिकार जानना॥

५२ 'स्वाङ्गानामकुर्वादीनाम्'॥ कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम्। ललाटम्। कुर्वादीनां तु। कपोलः। रसना। वदनम्॥

५२-कवर्ग, रेफ और वकारादि वर्जन करके तीन स्वरयुक्त स्वाङ्गवाचक शब्दका दूसरा वर्ण उदात्त हो, यथा-ललाटम्। कवर्गादि होनेपर यथा-कपोलः। रसना। वदनम्॥

५३ 'मादीनां च'॥ मलयः। मकरः॥

५३-मकार आदिमें है ऐसे तीन स्वरयुक्त शब्दका द्वितीय वर्ण उदात्त हो, यथा-मलयः। मकरः॥

५४ 'शादीनां शाकानाम्'॥ शीतन्या। शतपुष्पा॥

५४-शाकवाचक तालव्य शकार आदिमें है ऐसे तीन स्वरयुक्त शब्दका द्वितीय वर्ण उदात्त हो, यथा-शीतन्या। शतपुष्पा॥

५५ 'पान्तानां गुर्वादीनाम्'॥ पादपः। आतपः। लघ्वादीनां तु। अनूपम्। द्व्यचां तु। नीपम्॥

५५-जिन शब्दोंके अन्तमें पकार और आदिमें गुरुवर्ण रहै ऐसे जो तीन स्वरयुक्त शब्द उसका द्वितीय वर्ण उदात्त हो, यथा-पादपः। आतपः। आदिमें लघु वर्ण रहते नहीं होगा। यथा-अनूपम्। पूर्ववत् दो स्वरयुक्त शब्दका अन्त वर्ण उदात्त हो, यथा-नीपम्॥

५६ 'युतान्यण्यन्तानाम्'॥ युत। अयुतम्। अनि। धमनिः। अणि। विपणिः॥

५६-युत, अनि और अणि यह भाग अन्तमें हैं ऐसे तीन स्वरयुक्त शब्दका दूसरा वर्ण उदात्त हो, यथा-युत-अयुतम्। अनि-धमनिः। अणि-विपणिः॥

५७ 'मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा'॥ एषामादिर्द्वितीयो वोदात्तः। मकरः। वरूढ इत्यादि॥

५७-मकर, वरूढ, पारेवत, वितस्त, इक्षु, आर्जि, द्राक्षा, कला, उमा, काष्ठा, पेष्ठा और काशीना शब्दका आदि वर्ण और द्वितीय वर्ण उदात्त हो, यथा-मकरः। वरूढः। इत्यादि॥

५८ 'छन्दसि च'॥ अमकराद्यर्थ आरम्भः। लक्ष्यानुसारादादिर्द्वितीयश्चोदात्तो ज्ञेयः॥

५८-वेदमें मकारादि शब्द और अन्य शब्दोंका आदि वर्ण और द्वितीय वर्ण उदात्त हों॥

५९ 'कर्दमादीनां च'॥ आदिर्द्वितीयो वोदात्तः॥

५९-कर्दमा, कुलटा, उदक, गान्धारि इत्यादि शब्दोंका आदि अथवा द्वितीय वर्ण उदात्त हो, यथा-कर्दमा इत्यादि॥

६० 'सुगन्धितेजनस्य ते वा'॥ आदिर्द्वितीयस्तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः। सुगन्धितेजनाः॥

६०-सुगन्धितेजन शब्दका आदि वर्ण द्वितीय वर्ण और ते शब्द यह तीन वर्ण पर्य्याय (क्रम) से उदात्त हों, यथा-सुगन्धितेजनाः॥

६१ 'नपः फलान्तानाम्'॥ आदिर्द्वितीयं वोदात्तम्। राजादनफलम्॥

६१-फल शब्द अन्तमें रहते नप् अर्थात् नपुंसक (क्लीबलिङ्ग) शब्दका आदि और द्वितीय वर्ण उदात्त हो, यथा-राजादनफलम्। नपुंसक न होनेपर दासीफली वृक्षः॥

६२ 'यान्तस्यान्त्यात्पूर्वम्'॥ कुलायः॥

६२-यकारान्त शब्दके अन्त वर्णसे पूर्व वर्ण उदात्त हो, यथा-कुलायः ॥

६३ 'थान्तस्य च नालघुनी' ॥ नाशब्दो लघु च उदात्ते स्तः । सनाथा सभा ॥

६३-थकारान्त शब्दके "ना" और लघुसंज्ञक शब्द उदात्त हों, यथा-सनाथा सभा । कोई २ "आन्तस्य च नालघुनी" । ऐसा सूत्रपाठ करके "आकारान्तके नाशब्दके जो अन्त्य वर्णसे पूर्व लघुसंज्ञक वर्ण वह उदात्त हो," इस प्रकार व्याख्या करते हैं और नना, दिवा, मुधा, इस प्रकार उदाहरण देते हैं ॥

६४ 'शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च' ॥ अन्त्यात्पूर्वमुदात्तं द्वितीयं वा ॥

६४-शिशुमार, उदुम्बर, बलीवर्द, उष्ट्रार (उष्टार) और पुरूरवस् शब्दके अन्त्य वर्णसे पूर्व वर्ण और द्वितीय वर्ण विकल्प करके उदात्त हो ॥

६५ 'सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्' ॥ द्वितीयमुदात्तं वा ॥

६५-साङ्काश्य, काम्पिल्य,नासिक्य और दार्वाघाट शब्दका द्वितीय वर्ण विकल्प करके उदात्त हो ॥

६६ 'ईषान्तस्य हयादेरादिर्वा' ॥ हलीषा । लाङ्गलीषा ॥

६६-ईषाशब्दान्त हलादि शब्दका आदि वर्ण विकल्प करके उदात्त हो, यथा-हलीषा, लांगलीषा ॥

६७ 'उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्' ॥ एषामादिरुदात्तः स्यात् ॥

६७-उशीर, दाशेर, कपाल, पलाल, शैवाल, श्यामाक, शारीर, शराव, हृदय, हिरण्य, अरण्य, अपत्य और देवर शब्दका आदि वर्ण उदात्त हो ॥

६८ 'महिष्याषाढयोर्जायेष्टकाख्या चेत्' ॥ आदिरुदात्तः । महिषी जाया । आषाढा उपदधाति ॥

॥ इति फिट्सूत्रेषु तृतीयः पादः ॥

६८-जाया अर्थमें महिषी शब्द और इष्टकार्थमें आषाढा शब्दका आदि वर्ण उदात्त हो,यथा-महिषी जाया । आषाढा उपदधाति ॥

इति फिट्सूत्रेषु तृतीयपादः ।

६९ 'शकटिशकट्योरक्षरमक्षरं पर्यायेण' ॥ उदात्तम् । शकटिः । शकटी ॥

६९-शकटि और शकटी शब्दके प्रत्येक अक्षरको पर्याय (क्रम) से उदात्त स्वर हो, यथा-शकटिः । शकटी ॥

७० 'गोष्ठजस्य ब्राह्मणनामधेयस्य' ॥ अक्षरमक्षरं पर्यायेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ॥

७०-ब्राह्मणका नाम होनेपर गोष्ठज शब्दके प्रत्येक अक्षरको पर्याय (क्रम) से उदात्त स्वर हो, यथा-गोष्ठजो ब्राह्मणः । ब्राह्मणका नाम न होनेपर उदात्त स्वर नहीं होगा, यथा-गोष्ठजः पशुः । इस स्थलमें कृदुत्तरपदप्रकृतिस्वरसे अन्तमें उदात्त होगा ॥

७१ 'पारावतस्योपोत्तमवर्जम्' ॥ शेषं क्रमेणोदात्तम् । पारावतः ॥

७१-पारावत शब्दका उपोत्तम (अन्तसमीप) वर्ण भिन्न अन्य वर्णोंको क्रमसे उदात्त स्वर हो, यथा-पारावतः ॥

७२ 'धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम्' ॥ एषां चतुर्णां धूप्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥

७२-धूम्रजानु, मुञ्जकेश, कालवाल और स्थालीपाक इन चार शब्दोंके क्रमसे धू,ज,ल और स्थ इन चार वर्णको छोडकर अवशिष्ट वर्णोंको क्रमसे उदात्त स्वर हो, यथा-धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥

७३ 'कपिकेशहरिकेशयोश्छन्दसि' ॥ कपिकेशः । हरिकेशः ॥

७३-वेदमें कपिकेश और हरिकेश इन दो शब्दोंके क्रमसे सम्पूर्ण अक्षरोंको उदात्त स्वर हो, यथा-कपिकेशः । हरिकेशः ॥

७४ 'न्यङ्स्वरौ स्वरितौ' ॥ स्पष्टम् । न्यङ्ङुत्तानः । व्यचक्षयत्स्वः ॥

७४-न्यङ् और स्वर शब्दके सम्पूर्ण वर्णोंको स्वरित स्वर हो, यथा-न्यङ्ङुत्तानः । व्यचक्षयत्स्वः ॥

७५ 'न्यर्बुदव्यल्कशयोरादिः' ॥ स्वरितः स्यात् ॥

७५-न्यर्बुद और व्यल्कश शब्दके आदि वर्णको स्वरित स्वर हो ॥

७६ 'तिल्यशिक्यकाश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः' ॥ स्वरितः स्यात् । तिलानां भवनं क्षेत्रं तिल्यम् । यतोऽनाव इति प्राप्ते ॥

७६-तिल्य, शिक्य,काश्मर्य्य,धान्य,कन्या, राजन्य और मनुष्य शब्दके अन्त्य वर्णको स्वरित स्वर हो,यथा-"तिल्यम्" जिस खेतमें तिल उत्पन्न होतेहैं उसको तिल्य कहतेहैं । वैश्वानर्य्या शिक्यमादत्ते । प्रभिन्नाय मत्यमन्थ्यास्यति । वज्रः काश्मर्य्योवज्रेण । "यतोऽनावः३७०१" इस सूत्रसे आद्युदात्तकी प्राप्ति थी किन्तु इस सूत्रसे उसका निषेध होगया ॥

७७ 'बिल्वभक्ष्यवीर्याणि छन्दसि' ॥ अन्तस्वरितानि । ततो बिल्व उदतिष्ठत् ॥

७७-वेदमें बिल्व, भक्ष्य और वीर्य्य शब्दके अन्त वर्णको स्वरित स्वर हो, यथा-ततो बिल्व उदतिष्ठत् ॥

७८ 'त्वत्त्वसमसिमेत्यनुच्चानि' ॥ त्वत्तरीरु त्वत् । उत त्वः पश्यन् । नभन्तामन्यके समे । सिमस्मै ॥

७८-स्वत्, त्व, सम और सिम शब्दोंके अन्त वर्णको अनुदात्त स्वर हो, यथा-स्तरी स्वत् । उत त्वः पश्यन् । नभन्तामन्यके समे । सिमस्मै ॥

७९ 'सिमस्याथर्वणेऽन्त उदात्तः' ॥ अथर्वण इति प्रायिकम् । तत्र दृष्टस्येत्येवं परं वा । तेन वासस्तनुते सिमस्मै इत्यृग्वेदेऽपि भवत्येव ॥

७९-अथर्व वेदमें सिम शब्दके अन्त वर्णको उदात्त स्वर हो, अथर्वणका ग्रहण प्रायिक है अन्यमें भी हो, यथा-वासस्तनुते सिमस्मै । ऋग्वेदमें भी इसी प्रकार अनुदात्त स्वर हो ॥

८० 'निपाता आद्युदात्ताः' ॥ स्वाहा ॥

८०-निपातसंज्ञक स्वाहा और स्वधा आदि शब्दोंके आदि वर्णको उदात्त स्वर हो, यथा-स्वाहा ॥

८१ 'उपसर्गाश्चाभिवर्जम्' ॥

८१-अभिभिन्न अन्य समस्त उपसर्गोंके आदि वर्णको उदात्त स्वर हो ॥

८२ 'एवादीनामन्तः' ॥ एवमादीनामिति पाठान्तरम् । एव । एवम् । नूनम् । सह । ते मित्र सूरिभिः सह । षष्ठस्य तृतीये सहस्य स इति प्रकरणे सहशब्द आद्युदात्त इति तु प्राञ्चः, तच्चिन्त्यम् ॥

८२-एव (पाठन्तरमें एवम्) आदि शब्दोंके अन्त्य वर्णको उदात्त स्वर हो, यथा-एव । एवम् । नूनम् । सह । सहते मित्र सूरिभिः । " षष्ठस्य तृतीये " इस स्थलमें " सहस्य सः १००९ " इस प्रकरणमें जो सह शब्द है वह आद्युदात्त है, यह प्राचीनोंका मत है । किन्तु वह विवेच्य है । कहीं [सहते पुत्र सूरिभिः] पाठ है ॥

८३ 'वाचादीनामुभावुदात्तौ' ॥ उभौ ग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय ॥

८३-वाचाआदि शब्दोंके दोनों वर्ण उदात्त हों । दोनों शब्दोंका ग्रहण करनेसे "अनुदात्तं पदमेकवर्ज्यम् " । इस सूत्रके द्वारा विहित अनुदात्त स्वरका बाध होताहै ॥

८४ 'चादयोऽनुदात्ताः' ॥ स्पष्टम् ॥

८४-च वा इत्यादि शब्दोंका अनुदात्त स्वर हो ॥

८५ 'यथेति पादान्ते' ॥ तन्नेमिमृभवो यथा । पादान्ते किम् । यथानो अदितिः करत् ॥

८५-पादके अन्तमें रहते " यथा " शब्दको अनुदात्त स्वर हो, तन्नेमिमृभवो यथा । पादान्तमें न होनेपर उदात्त होगा । यथा-यथा नो अदितिः करत् ॥

८६ 'प्रकारादिद्विरुक्तौ' ॥ परस्यान्त उदात्तः ॥ पटुपटुः ॥

८६-"प्रकारे गुणवचनस्य २१४७ " इत्यादि सूत्रसे द्वित्व होनेपर परवर्त्ती भागके अन्त वर्णको उदात्त स्वर हो, यथा, पटुपटुः ॥

८७ 'शेषं सर्वमनुदात्तम्' ॥ शेषं नित्यादिद्विरुक्तस्य परमित्यर्थः । प्रप्रायम् । दिवेदिवे ॥

॥ इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः ॥

८७-नित्यादि अर्थमें द्वित्व होनेपर परके समस्त वर्णको अनुदात्त स्वर हो, यथा-प्रप्रायम् । दिवेदिवे ॥

॥ इति फिट्सूत्रेषु तुरीयपादः ॥

३७०८ आद्युदात्तश्च । ३ । १ । ३ ॥

प्रत्ययः आद्युदात्तः स्यात् । अग्निः कर्तव्यम् ॥

३७०८-प्रत्ययके आदि वर्णको उदात्त स्वर हो, यथा-अग्निः कर्तव्यम् । अङ्गके नकारका लोप और नि प्रत्यय=अग्निः । कृ-तव्य=कर्त्तव्यम् । इत्यादि ॥

३७०९ अनुदात्तौ सुप्पितौ । ३।१।४ ॥

पूर्वस्यापवादः । यज्ञस्य । न यो युच्छति । शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ ॥

३७०९-सुप् अर्थात् सु औ जस् इत्यादि विभक्ति और पित्संज्ञक प्रत्ययके आदि वर्णको अनुदात्त स्वर हो, यह सूत्र पूर्व सूत्रका अपवाद है । यथा, यज्ञस्य न यो युच्छति । प्रमादार्थक युच्छ धातुको " धातोः " इस सूत्रसे अन्तोदात्त और शप् "उदात्तादनुदात्तस्य ३६६०" इस सूत्रसे स्वरित हुआ । "स्वरितात्संहितायामनुदात्तानाम् " इस सूत्रसे तिप्के प्रचय हुआ ॥

३७१० चितः । ६ । १ । १६३ ॥

अन्त उदात्तः स्यात् ॥ चितः सप्रकृतेर्बह्वकजर्थम् ॥ * ॥ चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः ॥ नभन्तामन्यके समे । यके सरस्वति । तकत्सु ते ॥

३७१०-चित् प्रत्ययान्त समुदायके अन्त वर्णको उदात्त स्वर हो,

चित् प्रत्यय होनेपर प्रकृति प्रत्ययसमुदायके अन्त वर्णको उदात्त स्वर हो, ऐसा कहना चाहिये * यथा, नभन्तामन्यके समे । यके सरस्वति । तकत्सुते ॥

३७११ तद्धितस्य । ६ । १ । १६४ ॥

चितस्तद्धितस्यान्त उदात्तः । पूर्वेण सिद्धे ञित्स्वरबाधनार्थमिदम् । कौञ्जायनाः ॥

३७११-चित् तद्धित प्रत्ययान्त शब्दके अन्त वर्णको उदात्त स्वर हो, पूर्व सूत्रसे वह सिद्ध होनेपर भी ञित्स्वरके बाधनार्थ पुनः इस सूत्रका विधान हुआहै, यथा-कौञ्जायनाः । कुञ्ज (१०९९) शब्दके उत्तर अपत्यार्थमें च्फञ् । (११००) इससे आयञ् । (२०७२) (११९३) ॥

३७१२ कितः । ६ । १। १६५ ॥

कितस्तद्धितस्यान्त उदात्तः । यदाग्नेयः ॥

३७१२-कित् तद्धित प्रत्ययान्त शब्दका अन्त वर्ण उदात्त हो, यथा, यदाग्नेयः । (अग्नि+ढक्) ॥

३७१३ तिसृभ्यो जसः । ६ । १ । १६६ ॥

अन्त उदात्तः । तिस्रो द्यावः सवितुः ॥

३७१३–तिसृ शब्दके उत्तर जस् विभक्तिका अन्त वर्ण उदात्त हो, यथा, तिस्रो द्यावः सवितुः । अन्तोदान्त त्रिशब्दके स्थानमें तिसृ आदेश हुआ । पाहिले स्थानिवद्भावके कारण अन्तोदात्त हुआ । पश्चात् "अनुदात्तौ सुप्पितौ ३७०९" इस सूत्रसे जस् अनुदात्त हुआ । और "अचि र ऋतः २९९"इस सूत्रसे रकारादेश करनेपर "उदात्तस्वरितयोर्यणः० ३६५७" इस सूत्रसे जस को स्वरितत्व प्राप्त हुआ था, किन्तु वर्तमान सूत्रसे उसका निषेध होगया ॥

३७१४ सावेकाचस्तृतीयादिर्विभक्तिः । ६ । १ । १६८ ॥

साविति सप्तमीबहुवचनम् । तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता । वाचा विरूपः । सौ किम् । राज्ञेत्यादौ एकाचोऽपि राजशब्दात्परस्य मा भूत् ॥ राज्ञो नु ते । एकाचः किम् । विधत्ते राजनि त्वे । तृतीयादिः किम् । न ददर्श वाचम् ॥

३७१४–"सु" यह सप्तमीका बहुवचन है, प्रथमाका एक वचन नहीं है । सप्तमीके बहुवचनमें जो एकाच् शब्द उसके उत्तर तृतीयादि विभक्तिको उदात्त स्वर हो, यथा, वाचा विरूपः । सु परे न होनेपर राज्ञा इत्यादि स्थलमें एकाच् होने पर भी राज शब्दके उत्तर तृतीयादि विभक्तिको उदात्त स्वर नहीं हुआ । राज्ञो नु ते । एकाच् क्यों कहा तो ऐसा न कहने-पर 'विधत्ते राजनि त्वे' इसमें भी होता । तृतीयादि क्यों कहा ऐसा न कहनेपर 'न ददर्श वाचम्' में पूर्वोक्त स्वर होजाता ॥

३७१५ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे । ६ । १ । १६९ ॥

नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयाविभक्तिरन्तोदात्ता वा स्यात् । परमवाचा ॥

३७१५–नित्याधिकारविहित समासभिन्न स्थलमें जो उत्तरपद वह अन्तोदात्त और एकाच् हो, उसके उत्तर तृतीयादि विभक्तिके अन्त वर्णको विकल्प करके उदात्त स्वर हो, यथा–परमवाचा ॥

३७१६ अञ्चेश्छन्दस्यसर्वनामस्थानम् । ६ । १ । १७० ॥

अञ्चेः परा विभक्तिरुदात्ता । इन्द्रो दधीचः । चाविति पूर्वपदान्तोदात्तत्वं प्राप्तं तृतीयादिरित्यनुवर्तमाने सर्वनामस्थानग्रहणं शस्परिग्रहार्थम् । प्रतीचो बाहून् ॥

३७१६–अञ्च धातुके उत्तर असर्वनामस्थान अर्थात् सर्वनामस्थानसे भिन्न विभक्ति उदात्त हो, यथा–इन्द्रो दधीचः । "चौ" इस सूत्रसे पूर्व पदान्तको उदात्तत्व प्राप्त हुआ । "तृतीयादि" इस पदकी अनुवृत्ति करके कार्य सिद्ध होनेपर असर्वनामस्थानका ग्रहण, शस् विभक्तिके परिग्रहणके निमित्त है, यथा–प्रतीचो बाहून् । दधीच=दधि अञ्चतीति "ऋत्विक्० ३७३" इससे क्विन् "अनिदिताम्० ४१५" इससे नलोप "अचः ४१६" इससे अकारका लोप "चौ ४१७" इससे दीर्घ ॥

३७१७ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः । ६ । १ । १७१ ॥

एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता। प्रष्ठौहः । प्रष्ठौहा ॥ ऊठ्युपधाग्रहणं कर्तव्यम् ॥ * ॥ इह मा भूत् । अक्षद्युवा । अक्षद्युवे । इदम् । एभिर्नृभिर्नृतमः । अन्वादेशे न । अन्तोदात्तादित्यनुवृत्तेः । न च तत्रान्तोदात्तताऽप्यस्तीति वाच्यम्। इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादाविति सूत्रेणानुदात्तस्य अशोविधानात् । प्र ते बभ्रू । माभ्यां गा अनु । पद्दन्नोमास्हृन्निश् इति षट् पदादयः । पद्भ्यां भूमिः । दद्भिर्नजिह्वा । अहरहर्जायते मासिमासि । मनश्चिन्मे हृद आ । अप् । अपां फेनेन । पुम् । अभ्रातेव पुंसः । रै । राया वयम् । रायो धर्ता विवस्वतः । दिव् । उपत्वाग्ने दिवेदिवे ॥

३७१७–ऊठ्, इदम्, पदादि अर्थात् पद,दत्, नस्, मास्, हृत्, निश्, इत्यादि अप्, पुम्, रै और दिव् इन सम्पूर्ण शब्दोंके उत्तर असर्वनामस्थान विभक्तिको उदात्त स्वर हो, यथा–प्रष्ठौहः । "छन्दसि सहः" "वहश्च" इससे ण्विः । "वाह ऊठ्" प्रष्ठौहा ॥

ऊठ् विषयमें उपधाभूत ऊठ्का ग्रहण कर्त्तव्य है, किन्तु उस स्थलमें नहीं होगा, अक्षद्युवा । अक्षद्युवे । इदम् । एभिर्नृभिर्नृतमः । अन्वादेश अर्थमें विभक्तिको उदात्त स्वर नहीं होगा, क्यों कि, "अन्तोदात्तात्" इस भागकी अनुवृत्ति होती है, अन्वादेश अर्थमें इदम् शब्द अन्तोदात्त नहीं है । क्यों कि "इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ३५०" इस सूत्र से अनुदात्तविशिष्ट अश्का विधान करते हैं, "प्रते बभ्रू । माभ्यां गा अनु(यजु० ३१।१३)।पद्भ्यां भूमिः।दद्भिर्नजिह्वा।अहरहर्जायते मासिमासि।मनश्चिन्मे हृद आ।अप्। (यजु० १९७१) अपां फेनेन । पुम् । अभ्रातेव पुंसः । रै । राया वयम् । रायो धर्ता विवस्वतः । दिव । उप त्वाग्ने दिवेदिवे ॥

३७१८ अष्टनो दीर्घात् । ६ । १ । १७२ ॥

शसादिर्विभक्तिरुदात्ता । अष्टाभिर्दशभिः ॥

३७१८–दीर्घ स्वरान्त अष्टन् शब्दके उत्तर शसादि असर्वनामस्थान विभक्तिको उदात्त स्वर हो, यथा–अष्टाभिर्दशभिः ॥

३७१९ शतुरनुमो नद्यजादी।६।१।१७३॥

अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात्। अच्छा रवं प्रथमा जानती। कृण्वते। अन्तोदात्तात्किम्। दधती। अभ्यस्तानामादिरित्याद्युदात्तः। अनुमः किम्। तुदन्ती। एकादेशोऽत्र उदात्तः। अदुपदेशात्परत्वाच्छतुर्लसार्वधातुक इति निघातः॥

३७१९-अनुम् अर्थात् नुमागम न हो ऐसा जो शतृप्रत्यय तदन्त अन्तोदात्तके उत्तर नदी और अजादि शसादि विभक्तिको उदात्त स्वर हो, यथा-अच्छा रवं प्रथमा जानती। कृण्वते। अन्तोदात्तके परे शसादि विभक्ति न होनेपर, दधती। इस स्थलमें "अभ्यस्तानामादिः ३६७३" इस सूत्रसे आद्युदात्त हुआ। नुम् आगम होनेपर तुदन्ती तुद्+शतृ+नुम् इस स्थलमें एकादेश उदात्त हुआहै। अकारोपदेशके परत्वके कारण शतृ प्रत्ययको "तास्यनुदा०" इत्यादि सूत्रसे निघात स्वर हुआ॥

३७२० उदात्तयणो हल्पूर्वात्। ६।१।१७४॥

उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी शसादिर्विभक्तिश्च उदात्ता स्यात्। चोदयित्री सूनृतानाम्। एषा नेत्री। ऋतं देवाय कृण्वते सवित्रे॥

३७२०-उदात्तके स्थानमें जो यण् हल् पूर्वक उसके उत्तर नदी और शसादि विभक्तिको उदात्त स्वर हो, यथा-"चोदयित्री सूनृतानाम्"। एषा नेत्री। ऋतं देवाय कृण्वते सवित्रे॥

३७२१ नोङ्धात्वोः।६।१।१७५॥

अनयोर्यणः परे शसादय उदात्ता न स्युः। ब्रह्मबन्ध्वा। सेत्पृश्निः सुभ्वे॥

३७२१-ऊङ् प्रत्ययके स्थानमें और धातुके स्थानमें जो यण् उसके उत्तर शसादि विभक्तिको उदात्त स्वर न हो, यथा-ब्रह्मबन्ध्वा। सेत्पृश्निः सुभ्वे॥

३७२२ ह्रस्वनुड्भ्यां मतुप्।६।१।१७६॥

ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबुदात्तः। यो अब्दिमाँ उदनिमाँ इयर्ति। नुटः। अक्षण्वन्तः कर्णवन्तः सखायः। अन्तोदात्तात्किम्। मा त्वा विददिषुमान्। स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र न। मरुत्वानिंद्र नियुत्वान्वायवागहि॥ रेशब्दाच्च॥ *॥ रेवाँ इद्रेवतः॥

३७२२-ह्रस्वान्त अन्तोदात्त और नुट्के उत्तर जो मतुप् प्रत्यय वह उदात्त हो, ह्रस्वान्त यथा-"यो अब्दिमाँ उदनिमाँ इयर्ति" नुट् यथा-अक्षण्वन्तः कर्णवन्तः सखायः। अन्तोदात्तके उत्तर न होनेपर, मात्वा विददिषुमान्। स्वरविधिमें व्यञ्जन वर्ण अविद्यमानवत् हो, अत एव इस स्थलमें वह ईप्सित नहीं हुआ। "मरुत्वानिन्द्र। नियुत्वान्वायवागहि"॥

रे शब्दके उत्तर मतु प्रत्ययको उदात्त स्वर हो, यथा-"रेवाँ इद्रेवतः"। अब्दिमान् आपो दीयन्तेऽस्मिन्निति "कर्मण्यधिकरणे च" इससे कि। अक्षण्वन्तः अक्षि+मतुप् "अस्थिदधि० ३२२" 'छन्दस्यपि दृश्यते' इससे अनङ्, "अनो नुट्" इसके असिद्ध होनेपर पहले नकारका लोप। भूतपूर्व गतिसे मतुपको नुट् "मादुपधाया० २८९७" इससे वत्व। रेवाँ रयिरस्यास्तीति मतुप् "रयेर्मतौ बहुलम्" इससे सम्प्रसारण, पूर्वरूप, आद्गुणः, फिर ह्रस्वाभाव॥

३७२३ नामन्यतरस्याम्।६।१।१७७॥

मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा। चेतन्ती सुमतीनाम्॥

३७२३-मतुप् प्रत्यय परे रहते जो ह्रस्व तदन्त अन्तोदात्त वर्णके उत्तर नाम् विभक्तिको विकल्प करके उदात्त स्वर हो, यथा-चेतन्ती सुमतीनाम्॥

३७२४ ङ्याश्छन्दसि बहुलम्। ६।१।१७८॥

ङ्याः परो नामुदात्तो वा। देवसेनानामभिभञ्जतीनाम्। वेत्युक्तेर्नेह। जयन्तीनां मरुतो यन्तु॥

३७२४-ङीके उत्तर नाम् विभक्तिको विकल्प करके उदात्त स्वर हो, यथा-"देवसेनानामभिभञ्जतीनाम्"। इस सूत्रमें वा शब्दके ग्रहणके कारण "जयन्तीनां मरुतो यन्तु" इस स्थलमें उदात्त स्वर नहीं हुआ॥

३७२५ षट्त्रिचतुर्भ्यो हलादिः। ६।१।१७९॥

एभ्यो हलादिर्विभक्तिरुदात्ता। आ षड्भिर्हूयमानः। त्रिभिष्ट्वं देव॥

३७२५-षट् और त्रि, चतुर् शब्दके उत्तर हलादि विभक्तिको उदात्त स्वर हो, यथा-आषड्भिर्हूयमानः। त्रिभिष्ट्वं देव॥

३७२६ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः।६।१।१८२॥

एभ्यः प्रागुक्तं न। गवां शता। गोभ्यो गातुम्। शुनश्चिच्छेपम्। सौ प्रथमैकवचने अवर्णान्तात्। तेभ्यो द्युम्नम्। तेषां पाहि श्रुधी हवम्॥

३७२६-गो, श्वन, सु परे रहते अवर्णान्त, राट्, अङ्, क्रुङ्, और कृत् इन सम्पूर्ण शब्दोंके उत्तर हलादि विभक्तिको उदात्त स्वर न हो, यथा-गवां शता। गोभ्यो गातुम्। "शुनश्चिच्छेपम्"। सु विभक्ति अर्थात् प्रथमाके

एकवचनमें जो अवर्णान्त शब्द उसको सावर्ण कहते हैं। "तेभ्यो द्युम्नम्" । तेषां पाहि श्रुधीहवम् ॥

३७२७ दिवो झल् । ६ । १ । १८३ ॥

दिवः परा झलादिर्विभक्तिर्नोदात्ता द्युभिरक्तुभिः । झलिति किम् । उप त्वाग्ने दिवेदिवे ॥

३७२७–दिव् शब्दके उत्तर झलादि विभक्तिको उदात्त स्वर न हो, यथा–द्युभिरक्तुभिः । झल् विभक्ति न होनेपर, उप त्वाग्ने दिवेदिवे ॥

३७२८ नृ चान्यतरस्याम् ।६।१।१८४॥

नुः परा झलादिर्विभक्तिर्वोदात्ता।नृभिर्येमानः।

३७२८–नृ शब्दके उत्तर झलादि विभक्तिको विकल्प करके उदात्त स्वर हो, यथा–नृभिर्येमानः ॥

३७२९ तित्स्वरितम् । ६ । १ । १८५॥

निगदव्याख्यातम्। क्व नूनम् ॥

३७२९–तित् को स्वरित स्वर हो, निगदव्याख्यातम् । अर्थात् उच्चारणके द्वारा व्याख्यात । यथा–क्व नूनम् ॥

३७३० तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ।६।१। १८६ ॥

अस्मात्परं लसार्वधातुकमनुदात्तं स्यात् । तासि । कर्ता । कर्तारौ । कर्तारः । प्रत्ययस्वरापवादोऽयम् । अनुदात्तेत् । य आस्ते । ङितः । अभिचष्टे अनृतेभिः । अदुपदेशात् । पुरुभुजा चनस्यतम् । चित्स्वरोऽप्यनेन बाध्यते । वर्धमानं स्वे दमे । तास्यादिभ्यः किम् । अभि वृधे गृणीतः । उपदेशग्रहणात् नेह । हतो वृत्राण्यार्या । लग्रहणं किम् । कर्तारं निघ्नानाः। सार्वधातुकं किम् । शिश्ये । अह्न्विङोः किम् । हुते । यदधीते ॥ विदीन्धिखिदिभ्यो नेति वक्तव्यम् ॥ * ॥ इन्धे राजा । एतच्चानुदात्तस्य च यत्रेति सूत्रे भाष्ये स्थितम् ॥

३७३०–तासि अनुदात्तेत् और उपदेशमें ङित् अत् अर्थात् उपदेशमें अकारान्त और ङित् इनके उत्तर जो लादेश सार्वधातुक वह अनुदात्त हो, हु और इङ्को न हो, तासि यथा–कर्त्ता । कर्तारौ । कर्तारः । यह प्रत्यय स्वरका अपवाद है । अनुदात्तेत् यथा–य आस्ते । ङित् यथा–अभिचष्टे अनृतेभिः । अदुपदेश यथा–पुरुभुजा चनस्यतम् । इस सूत्रसे चित् स्वरको भी बाध होताहै । "वर्धमानं स्वे दमे" । तासि आदिके उत्तर न होनेपर यथा–"अभि वृधे गृणीतः" । उपदेशग्रहणके कारण इस स्थलमें नहीं होगा, यथा–"हतो वृत्राण्यार्या" लग्रहण न होनेपर यथा–"कर्तारं निघ्नानाः" । सार्वधातुक न होनेपर शिश्ये । हु और इङ् धातु होनेपर हुते । यदधीते ॥ विदि, इन्धि और खिदि धातुके उत्तर होनेपर नहीं होगा * यथा–इन्धे राजा । यह "अनुदात्तस्य च यत्र ३६५१" इस सूत्रके भाष्यमें गृहीत हुआहै । कर्ता (२१८८) एकवचनमें डित्व होनेसे टिका लोप कर्तारौ "रि च"इससे सकारका लोप । वर्द्धमान वृधु+लट्+शानच् "आने मुक्" इससे मुक् । शिश्ये="एरनेकाचः (२७२)" इससे यणादेश, "लिट् च" से यह आर्धधातुक है ॥

३७३१ आदिः सिचोऽन्यतरस्याम्। ६ । १ । १८७ ॥

सिजन्तस्यादिरुदात्तो वा । यासिष्टं वर्तिरश्विनौ ॥

३७३१–सिच् प्रत्ययान्तका आदि वर्ण विकल्प करके उदात्त हो, यथा–"यासिष्टं वर्तिरश्विनौ" । यासिष्टम्=या+लुङ् थस्को तम् "च्लि लुङि" "च्लेः सिच्" "यमरमनमातां० २३७७" इससे इट् सक् । "बहुलं छन्दसि" अमाङ् योगमें भी अडभाव ॥

३७३२ थलि च सेटीडन्तो वा । ६ । १ । १९६ ॥

सेटि थलन्ते पदे इडुदात्तः अन्तो वा आदिर्वा स्यात् । यदा नैते त्रयस्तदा लितीति प्रत्ययात्पूर्वमुदात्तम् । लुलविथ । अत्र चत्वारोपि पर्यायेणोदात्ताः ॥

३७३२–इट्युक्त थलन्त पदका इट् उदात्त अन्त उदात्त और आद्युदात्त हो, जब यह तीनों नहीं होंगे, तब "लिति" इस सूत्रसे लित् प्रत्ययका पूर्व उदात्त होगा, यथा–लुलविथ । इस स्थलमें चारों ही क्रमसे उदात्त हुए ॥

३७३३ उपोत्तमं रिति ।६।१ । १२७ ॥

रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात् । यदाहवनीये ॥

॥ इति प्रत्ययस्वराः ॥

३७३३–रित् प्रत्ययान्त शब्दका उपोत्तम वर्ण उदात्त हो, यथा–यदाहवनीये ॥

इति प्रत्यय स्वराः ।

३७३४ समासस्य । ६ । १ । २२३ ॥

अन्त उदात्तः स्यात् । यज्ञश्रियम् ॥

३७३४–समासका अन्त वर्ण उदात्त हो, यथा–यज्ञश्रियम् ॥

३७३५ बहुव्रीहौ प्रकृत्या पूर्वपदम् । ६ । २ । १ ॥

उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात् । सत्यश्चित्रश्रवस्तमः । उदात्तेत्यादि किम् ।

सर्वानुदात्ते पूर्वपदे समासान्तोदात्तत्वमेव यथा स्यात् । समपादः ॥

३७३५-बहुव्रीहि समासमें उदात्त अथवा स्वरित स्वर-योगमें पूर्व पदको प्रकृतिस्वर हो, यथा-" सत्यश्चित्र श्रवस्तमः " । उदात्त स्वरितयुक्त न होनेपर सर्वानुदात्त पूर्व पदमें जिस प्रकार समासको अन्तोदात्त ही होगा । इसी प्रकार होगा, यथा-समपादः । चित्रं श्रवा यस्य सः चित्रश्रवः । श्रूयत इति श्रवः ॥

३७३६ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ।६।२।२॥

सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या । तुल्यश्वेतः । कृत्यतुल्याख्या अजात्येति तत्पुरुषः । किरिणा काणः किरिकाणः । पतयन्मन्दयत्सखम् । मन्दयति मादके इन्द्रे सखेति सप्तमीतत्पुरुषः । शस्त्री श्यामा ॥ अव्यये नञ्कुनिपातानाम् ॥ * ॥ अयज्ञो वा एषः । परिगणनं किम् । स्नात्वाकालकः । मुहूर्तसुखम् । भोज्योष्णम् ॥

३७३६-तुल्यार्थ शब्द तृतीया विभक्त्यन्त पद, सप्तमीविभक्त्यन्त पद, उपमानवाचक शब्द, अव्यय शब्द, द्वितीयाविभक्त्यन्त पद और आकृतिवाचक शब्द यह सात पूर्वमें रहते तत्पुरुष समासमें प्रकृति स्वर हों, तुल्यार्थ यथा-तुल्यश्वेतः । "कृत्यतुल्याख्या अजात्या"इस सूत्रसे तत्पुरुष समास हुआहै। तृतीया,यथा-किरिणा काणः किरिकाणः।"पतयन्मन्दयत्सखम्" । "मन्दयति मादके इन्द्रे सखेति" इस वाक्यमें सप्तमी तत्पुरुष समास हुआहै । शस्त्री श्यामा । "अव्यये नञ्कुनिपातानाम् " अव्ययविषयमें नञ् कु और निपात इन सबके पूर्वपद प्रकृति स्वर हो, ऐसा परिगणन करना चाहिये* "अयज्ञो वा एषः"।परिगणन न होनेपर यथा-स्नात्वा कालकः। मुहूर्तसुखम् । भोज्योष्णम् ॥

३७३७ वर्णो वर्णेष्वनेते । ६ ।२। ३ ॥

वर्णवाचिन्युत्तरपदे एतवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे । कृष्णसारङ्गः । लोहितकल्माषः । कृष्णशब्दो नक्प्रत्ययान्तः । लोहितशब्द इतन्नन्तः । वर्णः किम् । परमकृष्णः । वर्णेषु किम् । कृष्णतिलाः । अनेते किम् । कृष्णैतः ॥

३७३७-एत वर्जित वर्णवाचक पद परे रहते वर्णबोधक पूर्व पदको तत्पुरुष समासमें प्रकृतिस्वर हो, यथा-कृष्णसारङ्गः । लोहितकल्माषः । कृष्ण शब्द नक् प्रत्ययान्त है । लोहित शब्द इतन् प्रत्ययान्त है । वर्ण वाचक पूर्वपद न होनेपर परमकृष्णः । वर्ण वाचक उत्तर पद न होनेपर कृष्णतिलाः । एत शब्द उत्तर पद होनेपर कृष्णैतः । कृष्ण शब्द मृगवाचक होनेसे वेदमें अन्तोदात्त है भाषामें वर्णवाचक आद्युदात्त है ॥

३७३८ गाधलवणयोः प्रमाणे ।६।२।४॥

एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या स्यात् । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । यावद्गवे दीयते तावदित्यर्थः । अरित्रशब्द इत्रन्नन्तो मध्योदात्तः । प्रमाणमियत्तापरिच्छेदमात्रं न पुनरायाम एव । प्रमाणे किम् । परमगाधम् ॥

३७३८-प्रमाणवाचक गाध और लवण शब्द परे रहते तत्पुरुष समासमें पूर्व पदको प्रकृतिस्वर हो, यथा-" अरित्रगाधमुदकम् " । अर्थात् अरित्र प्रमाण । गोलवणम् । गौको जितना परिमाणविशिष्ट लवण दियाजाताहै उतना परिमाण जानना चाहिये । अरित्र शब्द इत्र प्रत्ययान्त मध्योदात्त है, प्रमाण शब्दसे इयत्ता परिच्छेद मात्र जानना, किन्तु आयाम नहीं । प्रमाणवाचक न होनेपर परमगाधम् । गाधृ प्रतिष्ठायाम् । कर्ममें घञ् ॥

३७३९ दायाद्यं दायादे । ६ । २ । ५ ॥

तत्पुरुषे प्रकृत्या । धनदायादः । धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः । दायाद्यं किम् । परमदायादः ॥

३७३९-दायाद शब्द परे रहते दायाद्यवाची पूर्व पदको तत्पुरुष समासमें प्रकृतिस्वर हो, यथा-धनदायादः । इस स्थलमें धनशब्दसे ' कृपॄवृजिमन्दिनिधाञः क्युः ' इससे क्यु प्रत्यय हुआहै, तो प्रत्यय स्वरद्वारा इसको आद्युदात्त स्वर होगा, दायाद्यवाची पूर्व न होनेपर परमदायादः । ऐसा होगा ॥

३७४० प्रतिबन्धि चिरकृच्छ्रयोः । ६ । २ । ६ ॥

प्रतिबन्धवाचि पूर्वपदं प्रकृत्या एतयोः परतस्तत्पुरुषे । गमनचिरम् । व्याहरणकृच्छ्रम् । गमनं कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते । प्रतिबन्धि किम् । मूत्रकृच्छ्रम् ॥

३७४०-चिर और कृच्छ् शब्द परे होनेपर प्रतिबन्धवाचक पूर्वपदको तत्पुरुषसमासमें प्रकृतिस्वर हो, यथा-गमनचिरम् । व्याहरणकृच्छ्रम् । गमन कारणविकलतासे चिरकालभावि कृच्छ्रयोगि होनेसे प्रतिबन्धि होताहै प्रतिबन्धवाचक पद पूर्वमें न होनेपर "मूत्रकृच्छ्रम्" ऐसा होगा । यह षष्ठीसमास है ॥

३७४१ पदेऽपदेशे । ६ । २ । ७ ॥

व्याजवाचिनि पदशब्दे उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे । मूत्रपदेन प्रस्थितः । उच्चारपदेन मूत्रशब्दो घञन्तः । उच्चारशब्दो घञ-

न्तस्थाथादिस्वरेणान्तोदात्तः। अपदेशे किम्। विष्णुपदम्॥

३७४१–व्याजवाचक पद शब्द उत्तरपद रहते पूर्वपदको तत्पुरुषसमासमें प्रकृतिस्वर हो, यथा–मूत्रपदेन प्रस्थितः। उच्चारपदेन। मूत्र शब्द घञ्प्रत्ययान्त है। उच्चार शब्द घञ्प्रत्ययान्त है अत एव थाथादिस्वरसे अन्तोदात्त हुआहै। अपदेशवाचक न होनेपर विष्णुपदम्। यह षष्ठीसमास है॥

३७४२ निवाते वातत्राणे। ६। २। ८॥

निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या। कुटीनिवातम्। कुड्यनिवातम्। कुटीशब्दो गौरादिङीषन्तः। कुड्यशब्दो ड्यगन्तः। यगन्त इत्यन्ये। वातत्राणे किम्। राजनिवाते वसति। निवातशब्दोयं रूढः पार्श्वे॥

३७४२–तत्पुरुषसमासमें वातत्राणवाचक निवात शब्द परे रहते पूर्ववर्त्ती पदको प्रकृतिस्वर हो,यथा–कुटीनिवातम्।कुड्यनिवातम्। कुटी शब्द गौरादिगणीय होनेके कारण ङीष्प्रत्ययान्त है। कुड्य शब्द ड्यगन्त है। अन्यमतसे यगन्त है। वातत्राणार्थक न होनेपर "राजनिवाते वसति" यहां निवात शब्द पार्श्व अर्थमें रूढ है॥

३७४३ शारदेऽनार्तवे। ६। २। ९॥

ऋतौ भवमार्तवम्। तदन्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात्। रज्जुशारदमुदकम्। शारदशब्दो नूतनार्थः। तस्यास्वपदविग्रहः।रज्ज्वोः सद्य उद्धृतम्। रज्जुशब्दः सृजेरसुम् चेत्याद्युदात्तो व्युत्पादितः। अनार्तवे किम्। उत्तमशारदम्॥

३७४३–ऋतुमें होनेवालेको आर्त्तव कहतेहैं, उससे भिन्न अर्थमें विद्यमान शारद शब्द परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, "रज्जुशारदमुदकम्" इस स्थलमें शारद शब्द नूतनार्थक है, उसका "रज्ज्वोः सद्य उद्धृतम्" ऐसा अस्वपद विग्रह है, रज्जु शब्द "सृजेरसुम्" इस सूत्रसे आद्युदात्त व्युत्पादित है। आर्त्तव होनेपर तो उत्तमशारदम्। (शरदि ऋतौ भवं शारदम्)॥

३७४४ अध्वर्युकषाययोर्जातौ। ६। २। १०।

एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम्। कठाध्वर्युः। दौवारिककषायम्। कठशब्दः पचाद्यजन्तः तस्माद्वैशम्पायनान्तेवासिभ्यश्चेति णिनेः कठचरकाल्लुगिति लुक्। द्वारि नियुक्त इति ठक्यन्तोदात्तो दौवारिकशब्दः। जातौ किम्। परमाध्वर्युः॥

३७४४–अध्वर्यु और कषाय शब्द परे रहते जातिवाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–काठध्वर्युः। दौवारिककषायम्। कठ शब्द पचाद्यजन्त है। उससे "वैशम्पायनान्तेवासिभ्यश्च" इस सूत्रसे विहित णिनि प्रत्ययका "कठचरकाल्लुक १४८७" इस सूत्रसे लुक् हुआ। द्वारि नियुक्तः, इस विग्रहमें ठक् प्रत्यय होनेपर, अन्तोदात्त दौवारिक शब्द हुआ। जातिवाचक तत्पुरुष न होनेपर परमाध्वर्युः। (अध्वरं यज्ञं यातीति अध्वर्युः)॥

३७४५ सदृशप्रतिरूपयोः सादृश्ये। ६। २। ११॥

अनयोः पूर्वं प्रकृत्या। पितृसदृशः। सादृश्ये किम्। परमसदृशः। समासार्थोऽत्र पूज्यमानता न सादृश्यम्॥

३७४५–सादृश्यार्थक सदृश और प्रतिरूप शब्द परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–पितृसदृशः। सादृश्यार्थ न होनेपर परमसदृशः। समासार्थ इस स्थलमें पूज्यमानता है सादृश्य नहीं॥

३७४६ द्विगौ प्रमाणे। ६। २। १२॥

द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम्। प्राच्यसप्तसमः। सप्त समाः प्रमाणमस्य। प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक्। प्राच्यशब्द आद्युदात्तः। प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः। द्विगौ किम्। व्रीहिप्रस्थः। प्रमाणे किम्। परमसप्तसमम्॥

३७४६–द्विगुसंज्ञक प्रमाणवाचक उत्तरपद परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–प्राच्यसप्तसमः। सप्त समाः प्रमाणमस्य, इस विग्रहमें "प्रमाणे लो द्विगोर्नित्यम्" इस सूत्रसे मात्रच् प्रत्ययका लुक् हुआ। प्राच्य शब्द आद्युदात्त है। प्राच्यश्चासौ सप्तसमश्च=प्राच्यसप्तसमः। द्विगुसंज्ञक न होनेपर व्रीहिप्रस्थः। प्रमाणवाचक न होनेपर परमसप्तसमम्॥

३७४७ गन्तव्यपण्यं वाणिजे। ६। २। १३॥

वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरम्। मद्रवाणिजः। गोवाणिजः। सप्तमीसमासः। मद्रशब्दो रक्प्रत्ययान्तः। गन्तव्येति किम्। परमवाणिजः॥

३७४७–वाणिज शब्द परे रहते तत्पुरुषसमासमें गन्तव्यवाचक और पण्यवाचक पूर्वपदको प्रकृतिस्वर हो, यथा–मद्रवाणिजः। गोवाणिजः। इस स्थलमें सप्तमीतत्पुरुषसमास हुआहै। मद्र शब्द "स्फायितञ्चि" से रक्प्रत्ययान्त है। गन्तव्यवाचक न होनेपर परमवाणिजः। (मद्रवाणिजः=मद्रेषु गत्वा व्यवहरतीत्यर्थः)॥

३७४८ मात्रोपज्ञोपक्रमच्छाये नपुंसके। ६। २। १४॥

मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे

तथा । भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षाशब्दो गुरोश्च हल इत्यप्रत्ययान्तः । पाणिन्युपज्ञम् । पाणिनिशब्द आद्युदात्तः । नन्दोपक्रमम् । नन्दशब्दः पचाद्यजन्तः । इषुच्छायम् । इषुशब्द आद्युदात्तो नित्त्वात् । नपुंसके किम् । कुड्यच्छाया ॥

३७४८–मात्र, उपज्ञ, उपक्रम और छाया शब्द परे रहते नपुंसकवाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा––भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षा शब्द "गुरोश्च हलः ३२८०"इस सूत्रसे श प्रत्ययान्त है । पाणिन्युपज्ञम् । पाणिनि शब्द आद्युदात्त है । नन्दोपक्रमम् । नन्द शब्द पचाद्यजन्त है । इषुच्छायम् । इषु शब्द नित्त्वके कारण आद्युदात्त है । नपुंसक न होनेपर कुड्यच्छाया ॥

३७४९ सुखप्रिययोर्हिते । ६ । २।१५॥

एतयोः परयोर्हितवाचिनि तत्पुरुषे तथा । गमनप्रियम् । गमनसुखम् । गमनशब्दे लित्स्वरः। हिते किम् । परमसुखम् ॥

३७४९–सुख और प्रिय शब्द परे रहते हितवाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–गमनप्रियम् । गमनसुखम् । गमनशब्दमें लित्स्वर है । हितवाचक तत्पुरुषसमास न होनेपर परमसुखम् ॥

३७५० प्रीतौ च । ६ । २ । १६ ॥

प्रीतौ गम्यायां प्रागुक्तम् । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ।प्रीतौ किम्।राजसुखम् ॥

३७५०–प्रीति गम्यमान होनेपर तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–ब्राह्मणसुखम् पायसम् । छात्रप्रियोऽनध्यायः । ब्राह्मण और छात्र शब्द प्रत्ययस्वरसे अन्तोदात्त हैं प्रीति न होनेपर राजसुखम् यहां प्रकृतिस्वर न हुआ ॥

३७५१ स्वं स्वामिनि । ६ । २ । १७ ॥

स्वामिशब्दे परे स्ववाचि पूर्वपदं तथा । गोस्वामी । स्वं किम् । परमस्वामी ॥

३७५१–स्वामि शब्द परे रहते तत्पुरुषसमासमें स्ववाचक पूर्वपदको प्रकृतिस्वर हो, यथा–गोस्वामी । स्ववाचक न होनेपर परमस्वामी ॥

३७५२ पत्यावैश्वर्ये । ६ । २ । १८ ॥

दमूना गृहपतिर्दमे ॥

३७५२–ऐश्वर्यार्थक पति शब्द परे रहते तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–दमूना गृहपतिर्दमे ॥

३७५३न भूवाक्चिद्दिधिषु ।६।२।१९ ॥

पतिशब्दे परे ऐश्वर्यवाचिनि तत्पुरुषे नैतानि प्रकृत्या । भुवः पतिर्भूपतिः । वाक्पतिः । चित्पतिः । दिधिषुपतिः ॥

३७५३–पति शब्द परे रहते ऐश्वर्यवाचक तत्पुरुषसमासमें पूर्वस्थित भू, वाक्, चित् और दिधिषु शब्दको प्रकृतिस्वर न हो, यथा–भुवः पतिः=भूपतिः । वाक्पतिः । चित्पतिः । दिधिषुपतिः ॥

३७५४ वा भुवनम् । ६ । २ । २० ॥

उक्तविषये भुवनपतिः । भूसूधूभ्रस्जिभ्य इति क्युन्नन्तो भुवनशब्दः ॥

३७५४–पति शब्द परे रहते ऐश्वर्यवाचक तत्पुरुषसमासमें पूर्ववर्ती भुवन शब्दको विकल्प करके प्रकृतिस्वर हो, यथा–भुवनपतिः । "भूसूधूभ्रस्जिभ्यः" इस सूत्रसे भू धातुके उत्तर क्युन् प्रत्यय होकर भुवन शब्द सिद्ध हुआहै ॥

३७५५ आशङ्काऽऽबाधनेदीयस्सु सम्भावने । ६ । २ । २१ ॥

अस्तित्वाध्यवसायः सम्भावनम् । गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशङ्क्यते आबाध्यते निकटतरमिति वा सम्भाव्यते । सम्भावने किम् । परमनेदीयः ॥

३७५५–अस्तित्वका जो अध्यवसाय, उसको संभावना कहतेहैं । आशङ्क आबाध और नेदीय शब्द परे रहते संभावनावाचक तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशंक्यते आबाध्यते निकटतरमिति वा सम्भाव्यते । सम्भावनार्थक न होनेपर, परमनेदीयः ॥

३७५६ पूर्वे भूतपूर्वे । ६ । २ । २२ ॥

आढ्यो भूतपूर्वः आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्त्तते । भूतपूर्वे किम् । परमपूर्वः ॥

३७५६–भूतपूर्वार्थक पूर्व शब्द परे रहते पूर्वपदको प्रकृतिस्वर हो, यथा–आढ्यो भूतपूर्वः, इस विग्रहमें आढ्यपूर्वः । पूर्व शब्द वृत्तिविषयमें भूतपूर्वार्थमें वर्त्ताहै । भूतपूर्वार्थक पूर्व शब्द न होनेपर परमपूर्वः ॥

३७५७ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये । ६ । २ । २३ ॥

एषु पूर्वं प्रकृत्या । मद्रसविधम् । गान्धारसनीडम् । काश्मीरसमर्यादम् । मद्रसवेशम् । मद्रसदेशम् । सामीप्ये किम् । सह मर्यादया समर्यादं क्षेत्रम् । चैत्रसमर्यादम् ॥

३७५७–समीप्यार्थक सविध, सनीड, समर्य्याद, सवेश और सदेश शब्द परे रहते पूर्वपदको तत्पुरुषसमासमें प्रकृतिस्वर हो, यथा–मद्रसविधम् । गान्धारसनीडम् । काश्मीरसमर्य्यादम् । मद्रसवेशम् । मद्रसदेशम् । सामीप्यार्थक न होनेपर, सह मर्यादया=समर्य्यादं क्षेत्रम् । चैत्रसमर्यादम् ॥

३७५८ विस्पष्टादीनि गुणवचनेषु । ६ । २ । २४ ॥

विस्पष्टकटुकम् । विस्पष्टशब्दो गतिरनन्तर इत्याद्युदात्तः । विस्पष्टेति किम् । परमलवणम् । गुणेति किम् । विस्पष्टब्राह्मणः । विस्पष्ट । विचित्र । व्यक्त । सम्पन्न । पण्डित । कुशल । चपल । निपुण ॥

३७५८-गुणवाचक शब्द परे रहते विस्पष्टादि पूर्वपदको प्रकृतिस्वर हो, यथा-विस्पष्टकटुकम् । विस्पष्ट शब्द "गतिरनन्तर० ३७८३" इस सूत्रसे आद्युदात्त है । विस्पष्टादि न होनेपर परमलवणम् । गुणवाचक शब्द परे न रहते विस्पष्टब्राह्मणः । विस्पष्टादिगण यथा-विस्पष्ट, विचित्र, व्यक्त, सम्पन्न, पण्डित, कुशल, चपल और निपुण ॥

३७५९ श्रज्याऽवमकन्पापवत्सु भावे कर्मधारये । ६ । २ । २५ ॥

श्र ज्य अवम कन् इत्यादेशवति पापवाचिनि चोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या । गमनश्रेष्ठम् । गमनज्यायः । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । श्रेत्यादि किम् । गमनशोभनम् । भावे किम् । गम्यतेऽनेनेति गमनम् । गमनं श्रेयो गमनश्रेयः । कर्मेति किम् । षष्ठीसमासे मा भूत् ॥

३७५९-श्र, ज्य, अवम कन् आदेश विशिष्ट शब्द और पापवाचक शब्द परे रहते कर्म्मधारयसमासमें भाववाचक पूर्वपदको प्रकृतिस्वर हो, यथा-गमनश्रेष्ठम् । गमनज्यायः । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । श्र इत्यादि आदेश विशिष्ट शब्द और पापवाचक शब्द परे न होनेपर गमनशोभनम् । पूर्वपद भाववाचक न होनेपर गम्यतेऽनेनेति=गमनं=गमनं श्रेयो गमनश्रेयः।'कर्मधारये' क्यों कहा? तो षष्ठीतत्पुरुष समास होनेपर नहीं हो ॥

३७६० कुमारश्च । ६ । २ । २६ ॥

कर्मधारये । कुमारश्रमणा । कुमारशब्दोऽन्तोदात्तः ॥

३७६०-कर्म्मधारय समासमें कुमार पूर्वपदको प्रकृतिस्वर हो, यथा-कुमारश्रमणा । कुमार शब्द अन्तोदात्त है ॥

३७६१ आदिः प्रत्येनसि । ६। २।२७ ॥

कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्मधारये। प्रतिगतमेनोऽस्य प्रत्येनाः । कुमारप्रत्येनाः ॥

३७६१-कर्म्मधारयसमासमें प्रत्येनस् शब्द परे रहते कुमार शब्दके आदिको प्रकृतिस्वर हो, यथा-प्रतिगतमेनोऽस्य=प्रत्येनाः । कुमारप्रत्येनाः ॥

३७६२ पूगेष्वन्यतरस्याम् । ६।२।२८॥

पूगा गणास्तेषूक्तं वा । कुमारचातकाः । कुमारजीमूताः । आद्युदात्तत्वाभावे कुमारश्चेत्येव भवति ॥

३७६२-पूग अर्थात् गणवाचक शब्द परे रहते कर्म्मधारयसमासमें पूर्ववर्त्ती कुमारशब्दका आदि वर्ण विकल्प करके उदात्त हो, यथा-कुमारचातकाः । कुमारजीमूताः । आद्युदात्तत्वाभाव होनेपर " कुमारश्च ३७६० " इससे प्रकृतिस्वर होगा ॥

३७६३ इगन्तकालकपालभगालशरावेषु द्विगौ । ६ । २ । २९ ॥

एषु परेषु पूर्वं प्रकृत्या । पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः । दश मासान् भूतो दशमास्यः। पंच मासान् भूतः पंचमास्यः । तमधीष्ट इत्यधिकारे द्विगोर्यप् पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । त्रः संख्याया इति पञ्चन्शब्द आद्युदात्तः । इगन्तादिषु किम् । पञ्चाश्वः । द्विगौ किम् । परमारत्निः ॥

३७६३-द्विगु समासमें इगन्त शब्द, कालवाचक, कपाल, भगाल और शराव शब्द परे रहते पूर्वपदको प्रकृतिस्वर हो, यथा-पञ्च अरत्नयः प्रमाणमस्य, इस विग्रहमें पञ्चारत्निः । दश मासान् भूतो दशमास्यः । पञ्च मासान् भूतः पञ्चमास्यः । यहां " तमधीष्ट० १७४४ " इस अधिकारमें "द्विगोर्यप्" इससे यप् प्रत्यय हुआ । पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । " त्रः संख्यायाः " इस सूत्रसे पञ्चन् शब्द आद्युदात्त है । इगन्तादि शब्द परे न रहते कैसा होगा ? तो, पञ्चाश्वः । द्विगुसमास न होनेपर कैसा होगा ? तो, परमारत्निः ॥

३७६४ बह्वन्यतरस्याम् ।६।२ । ३० ॥

बहुशब्दस्तथा वा । बह्वरत्निः । बहुमास्यः । बहुकपालः । बहुशब्दोन्तोदात्तः । तस्य यणि सत्युदात्तस्वरितयोरिति भवति ॥

३७६४-इगन्तादि शब्द परे रहते द्विगुसमासमें पूर्ववर्त्ती बहु शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-बह्वरत्निः । बाहुमास्यः । बहुकपालः । बहु शब्द अन्तोदात्त है, उसको यण् होनेपर " उदात्तस्वरितयोः० ३६५७ " इस सूत्रसे अरत्नि शब्दके आदिको स्वरित हुआ ॥

३७६५ दिष्टिवितस्त्योश्च ।६।२। ३१ ॥

एतयोः परतः पूर्वपदं प्रकृत्या वा द्विगौ । पञ्चदिष्टिः । पञ्चवितस्तिः ॥

३७६५-द्विगुसमासमें दिष्टि और वितस्ति शब्द परे रहते पूर्वपदको विकल्प करके प्रकृतिस्वर हो, यथा-पञ्चदिष्टिः पञ्चवितस्तिः ॥

३७६६ सप्तमी सिद्धशुष्कपक्कबन्धेष्वकालात् । ६ । २ । ३२ ॥

अकालवाचि सप्तम्यन्तं प्रकृत्या सिद्धादिषु । साङ्काश्यसिद्धः । साङ्काश्येति ण्यान्तः । आतपशुष्कः । भ्राष्ट्रपक्कः । भ्राष्ट्रेति ष्ट्रन्नन्तः । चक्रबन्धः । चक्रशब्दोऽन्तोदात्तः।अकालात्किम् । पूर्वाह्णसिद्धः । कृत्स्वरेण बाधितः सप्तमीस्वरः प्रतिप्रसूयते ॥

३७६६–तत्पुरुषसमासमें सिद्ध, शुष्क, पक्क और बन्ध शब्द परे रहते अकालवाचक सप्तम्यन्त पदको प्रकृतिस्वर हो, यथा–साङ्काश्यसिद्धः । साङ्काश्य शब्द " वुञ्छण्० " इससे ण्य प्रत्ययान्त है । आतपशुष्कः । भ्राष्ट्रपक्कः । भ्राष्ट्र पद ष्ट्रन्प्रत्ययान्त है । चक्रबन्धः । चक्र शब्द अन्तोदात्त है । कालवाचक सप्तम्यन्त होनेपर कैसा होगा ? तो, पूर्वाह्णसिद्धः । इस सूत्रसे कृत्प्रत्ययके स्वरसे बाधित सप्तमीस्वर प्रतिप्रसूत होता है ॥

३७६७ परिप्रत्युपाऽपावर्ज्यमानाऽहोरात्रावयवेषु । ६ । २ । ३३ ॥

एते प्रकृत्या वर्ज्यमानवाचिनि अहोरात्रावयववाचिनि चोत्तरपदे । परित्रिगर्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । प्रत्यपररात्रम् । उपपूर्वरात्रम् । अपत्रिगर्तम् । उपसर्गा आद्युदात्ताः । बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम् । अपपर्योरेव वर्ज्यमानमुत्तरपदम् । तयोरेव वर्ज्यमानार्थत्वात् । अहोरात्रावयवा अपि वर्ज्यमाना एव । तयोर्भवन्ति । वर्ज्येति किम् । अग्निं प्रति प्रत्यग्नि ॥

३७६७–तत्पुरुषसमासमें वर्ज्यमानवाचक और अहोरात्रिका अवयववाचक पद उत्तर पद रहते पूर्ववर्त्ती परि, प्रति, उप और अपको प्रकृतिस्वर हो, यथा–परित्रिगर्त्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । प्रत्यपररात्रम् । उपपूर्वरात्रम् । अपत्रिगर्त्तम् । उपसर्ग आद्युदात्त है । बहुव्रीहि और तत्पुरुषसमासमें सिद्ध होनेपर भी यह सूत्र अव्ययीभावसमासार्थ है । अप और परिशब्दका ही उत्तरपद वर्ज्यमानवाचक होगा, कारण कि, उन दोनोंका ही वर्ज्यमानार्थत्व है । अहोरात्रावयव भी उनका वर्ज्यमानही होता है । वर्ज्यमान न होनेपर कैसा होगा ? तो, अग्निं प्रति=प्रत्यग्नि ॥

३७६८ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु । ६ । २ । ३४ ॥

राजन्यवाचिनां बहुवचनान्तानामन्धकवृष्णिषु वर्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या । श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनिराद्युदात्तो लक्षणया तदपत्ये वर्तते । राजन्येति किम् । द्वैप्यभैमायनाः।द्वीपे भवा द्वैप्याः।भैमेरपत्यं युवा भैमायनः । अन्धकवृष्णय एते न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम् । नैते तथा । बहुवचनं किम् । संकर्षणवासुदेवौ । द्वन्द्वे किम् । वृष्णीनां कुमाराः वृष्णिकुमाराः । अन्धकवृष्णिषु किम् । कुरुपञ्चालाः ॥

३७६८–राजन्यवाचक बहुवचनान्तपदके अन्धक और वृष्णिमें वर्त्तमान द्वन्द्वसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनि शब्द आद्युदात्त है, वह लक्षणावृत्तिसे शिनिके अपत्यको कहता है । राजन्यवाचक न होनेपर कैसा होगा? तो, द्वैप्यभैमायनाः द्वीपे भवाः, इस विग्रहमें द्वैप्याः । भैमेरपत्यं युवा, इस विग्रहमें भैमायनः । यह अन्धक और वृष्णि हैं, किन्तु राजन्य नहीं हैं, कारण कि, इस स्थलमें राजन्य शब्द अभिषिक्तवंश्यक क्षत्रियका ग्रहणार्थ है, वैसा यह नहीं है । बहुवचनान्त न होनेपर कैसा होगा ? तो, संकर्षणवासुदेवौ । द्वन्द्व न होनेपर वृष्णीनां कुमाराः, इस विग्रहमें वृष्णिकुमाराः । अन्धक और वृष्णि न होनेपर कैसा होगा ? तो कुरुपञ्चालाः ॥

३७६९ संख्या । ६ । २ । ३५ ॥

संख्यावाचि पूर्वपदं प्रकृत्या द्वन्द्वे । द्वादश । त्रयोदश । त्रेस्त्रयसादेश आद्युदात्तो निपात्यते ॥

३७६९–द्वन्द्वसमासमें संख्यावाचक पूर्वपदको प्रकृतिस्वर हो, यथा–द्वादश । 'त्रयोदश' इस स्थलमें त्रि शब्दके स्थानमें निपातनसे आद्युदात्त त्रयस् आदेश हुआ है ॥

३७७० आचार्योपसर्जनश्चान्तेवासी । ६ । २ । ३६ ॥

आचार्योपसर्जनान्तेवासिनां द्वन्द्वे पूर्वपदं प्रकृत्या । पाणिनीयरौढीयाः । छस्वरेण मध्योदात्तावेतौ । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणम् । सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायते । तेनेह न । पाणिनीयदेवदत्तौ । आचार्येति किम् । छान्दसवैयाकरणाः ॥ अन्तेवासी किम् । आपिशलपाणिनीये शास्त्रे ॥

३७७०–आचार्य्योपसर्जन अन्तेवासियोंके द्वन्द्वसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–पाणिनीयरौढीयाः । यह दानों छस्वरसे मध्योदात्त हैं । ' आचार्य्योपसर्जन ' शब्द द्वन्द्वका विशेषण है, जिससे समस्त द्वन्द्व आचार्योपसर्जन (जाना जाय,) इस कारण " पाणिनीयदेवदत्तौ " इस स्थलमें प्रकृतिस्वर नहीं हुआ । आचार्य्योपसर्जन अन्तेवासियोंका द्वन्द्व न होनेपर कैसा होगा? तो, छान्दसवैयाकरणाः । अन्तेवासिओंका द्वन्द्व न होनेपर कैसा होगा ? तो आपिशलपाणिनीये शास्त्रे ॥

३७७१ कार्तकौजपादयश्च ।६।२।३७॥

एषां द्वंद्वे पूर्वपदं प्रकृत्या । कार्तकौजपौ । कृतस्येदं कुजपस्येदमित्यण्णन्तावितौ । सावर्णिमाण्डूकेयौ ॥

३७७१–कार्तकौजपादि शब्दोंके द्वन्द्वसमासमें पूर्वपदको प्रकृतिस्वर हो, यथा–कार्तकौजपौ । कृतस्य इदं कुजपस्य इदम्, इस विग्रहमें कृत और कुजप शब्दके उत्तर अण् प्रत्यय हुआ है । सावर्णिमाण्डूकेयौ । (कुर्भूमिः तत्र जाताः कुजाः तान् पातीति कुजपः । कृतकुजपाभ्यामपत्ये ऋष्यण् । माण्डूकेय-मण्डूक शब्दसे ढक्) ॥

३७७२ महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ।६।२।३८॥

महच्छब्दः प्रकृत्या व्रीह्यादिषु दशसु । महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । महच्छब्दोन्तोदात्तः । सन्महदिति प्रतिपदोक्तसमास एवायं स्वरः । नेह । महतो व्रीहिर्महद्व्रीहिः ॥

३७७२–व्रीहि, अपराह्ण, गृष्टि, इष्वास, जाबाल, भार, भारत, हैलिहिल, रौरव और प्रवृद्ध शब्द परे रहते पूर्ववर्त्ती महत् शब्दको प्रकृतिस्वर हो, यथा–महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महाजाबालः । महाभारः । महाभारतः । महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । महत् शब्द अन्तोदात्त है । यह स्वर " सन्महत् ७४० " इस सूत्रसे प्रतिपदोक्त समासमें ही होगा, इस कारण महतो व्रीहिः, इस विग्रहमें महद्व्रीहिः यहां महत् शब्दको प्रकृतिस्वर न हुआ ॥

३७७३ क्षुल्लकश्च वैश्वदेवे ।६।२।३९॥

चान्महान् । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु केऽन्तोदात्तः ॥

३७७३–वैश्वदेव शब्द परे रहते पूर्ववर्त्ती क्षुल्लक शब्दको और चकारसे महत् शब्दको प्रकृतिस्वर हो, यथा–क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः, इसके उत्तर अज्ञानादि अर्थमें क प्रत्यय होनेपर क्षुल्लक शब्द अन्तोदात्त हुआ ॥

३७७४ उष्ट्रः सादिवाम्योः ।६।२।४०॥

उष्ट्रसादी । उष्ट्रवामी । उषेः ष्ट्रनि उष्ट्रशब्द आद्युदात्तः ॥

३७७४–सादि और वामि शब्द परे रहते पूर्ववर्त्ती उष्ट्र शब्दको प्रकृतिस्वर हो, यथा–उष्ट्रसादी । उष्ट्रवामी । उष धातुके उत्तर ष्ट्रन् प्रत्यय होनेपर उष्ट्र शब्द आद्युदात्त हुआ ॥

३७७५ गौः सादसादिसारथिषु ।६।२।४१॥

गोसादः । गोसादिः । गोसारथिः ॥

३७७५–साद, सादि और सारथि शब्द परे रहते पूर्ववर्ती गो शब्दको प्रकृतिस्वर हो, यथा–गोसादः । गोसादिः गोसारथिः ॥

३७७६ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ।६।२।४२।

एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या । कुरूणां गार्हपतं कुरुगार्हपतम् । उप्रत्ययान्तः कुरुः ॥ वृजेरिति वाच्यम् ॥ * ॥ वृजिगार्हपतम् । वृजिराद्युदात्तः । रिक्तो गुरुः रिक्तगुरुः। रिक्ते विभाषेति रिक्तशब्द आद्युदात्तः। असूता जरती असूतजरती । अश्लीला दृढरूपा अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्यास्ति तत् श्लीलम् । सिध्मादित्वाल्लच् । कपिलकादित्वाल्लत्वम् । पारे वडवेव पारेवडवा । निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूः तैतिलकद्रूः । तितिलिनोऽपत्यं छात्रो वा इत्यण्णन्तः । पण्यशब्दो यदन्तत्वादाद्युदात्तः । पण्यकम्बलः । संज्ञायामिति वक्तव्यम् ॥ * ॥ अन्यत्र पणितव्ये कंबले समासान्तोदात्तत्वमेव।प्रतिपदोक्ते समासे कृत्या इत्येष स्वरो विहितः । दास्या भारो दासीभारः। देवहूतिः । यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न विशिष्यवचनं विहितं स सर्वोपि दासीभारादिषु द्रष्टव्यः ॥ स राये सपुरन्ध्याम् । पुरं शरीरं ध्रियतेऽस्यामिति कर्मण्यधिकरणे चेति किप्रत्ययः । अलुक् छान्दसः । नञ्विषयस्येत्याद्युदात्तः पुरशब्दः ॥

३७७६–कुरुगार्हपत, रिक्तगुरु, असूतजरती, अश्लीलदृढरूपा, पारेवडवा, तैतिलकद्रू, और पण्यकम्बल, यह सात समस्त पदोंके और दासीभारादि शब्दोंके पूर्ववर्त्ती पदको प्रकृतिस्वर हो, यथा–कुरूणां गार्हपतम् इस विग्रहमें कुरुगार्हपतम् । कुरु शब्द उप्रत्ययान्त है । वृजि शब्दको गार्हपत शब्द परे रहते प्रकृतिस्वर हो, ऐसा कहना चाहिये* वृजिगार्हपतम् । वृजि शब्द आद्युदात्त है । रिक्तो गुरुः, इस विग्रहमें रिक्तगुरुः । " रिक्ते विभाषा ३६९६ " इस सूत्रसे रिक्त शब्द आद्युदात्त है । असूता जरती, इस विग्रहमें असूतजरती । अश्लीला दृढरूपा, इस विग्रहमें अश्लीलदृढरूपा । अश्लील शब्द नञ्समासत्वके कारण आद्युदात्त है । श्रीर्यस्यास्ति, इस वाक्यमें सिध्मादित्वके कारण लच्

प्रत्यय, और कपिलकादिगणमें पाठके कारण लत्व होकर ' श्लीलम् ' पद हुआ है । पारे वडवा इव, इस वाक्यमें "पारे वडवा" यह निपातनके कारण स्वार्थमें समास और विभक्तिका अलोप हुआ । पार शब्द घृतादि होनेके कारण अन्तोदात्त है । तैतिलानां कद्रूः, इस विग्रहमें तैतिलकद्रूः । तितिलिनोऽपत्यं छात्रो वा, इस विग्रहमें तितिलिन् शब्दके उत्तर अण् प्रत्यय हुआहै । पण्य शब्द यत् प्रत्ययान्त होनेके कारण आद्युदात्त है । पण्यकम्बलः ॥

संज्ञा होनेपर पण्यकम्बल शब्दके पूर्वपदको प्रकृतिस्वर हो, ऐसा कहना चाहिये* अन्यत्र पणितव्य कम्बल अर्थ होनेपर समासान्तोदात्त ही होगा, कारण कि, प्रतिपदोक्त समासमें " कृत्याः २८३१ " इससे स्वर विहित है । दास्याः भारः, इस विग्रहमें दासीभारः । देवहूतिः । जिस तत्पुरुषसमासमें पूर्वपदको प्रकृतिस्वर इष्ट है, परन्तु विशेष करके कोई वचन विहित नहीं है, उसको दासीभारादिमें समझना । स राये सपुरन्ध्याम् । पुरं शरीरं ध्रियते अस्याम्, इस विग्रहमें "कर्मण्यधिकरणे च ३२७१ " इस सूत्रसे कि प्रत्यय होकर पुरन्धि शब्द सिद्ध हुआहै । छान्दसत्वके कारण इस स्थलमें पुरं पदकी विभक्तिका लोप नहीं हुआ। "नव् विषयस्य" इस सूत्रसे पुर शब्द आद्युदात्त है ॥

३७७७ चतुर्थी तदर्थे । ६ । २ । ४३ ॥

चतुर्थ्यन्तार्थाय यत्तद्वाचिन्युत्तरपदे चतुर्थ्यन्तं प्रकृत्या । युपाय दारु यूपदारु ॥

३७७७-चतुर्थी विभक्त्यन्तके निमित्त जो हो, तद्वाचक पद परे रहते पूर्ववर्त्ती चतुर्थी विभक्त्यन्त पदको प्रकृतिस्वर हो, यथा यूपाय दारु, इस विग्रहमें यूपदारु ॥

३७७८ अर्थे । ६ । २ । ४४ ॥

अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् ॥

३७७८-अर्थ शब्द परे रहते पूर्ववर्त्ती चतुर्थ्यन्त पदको प्रकृति स्वर हो, यथा-देवाय इदम्, इस वाक्यमें देवार्थम् ॥

३७७९ क्ते च । ६ । २ । ४५ ॥

क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या । गोहितम् ॥

३७७९-क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती चतुर्थ्यन्त पदको प्रकृतिस्वर हो, यथा-गवे हितम्, इस वाक्यमें गोहितम् ॥

३७८० कर्मधारयेऽनिष्ठा । ६ । २ । ४६ ॥

क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्रेणिकृताः । श्रेणिशब्द आद्युदात्तः। पूगकृताः । पूगशब्दोऽन्तोदात्तः । कर्मधारये किम् । श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठा किम् । कृताऽकृतम् ॥

३७८०-कर्मधारयसमासमें क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती जो अनिष्ठान्त पद (जो क्तक्तवतु प्रत्ययान्त नहीं हो) उसको प्रकृतिस्वर हो, यथा-श्रेणिकृताः । श्रेणि शब्द आद्युदात्त है । पूगकृताः । पूग शब्द अन्तोदात्त है । कर्मधारयसमास न होनेपर कैसा होगा ? तो, श्रेण्या कृतम्, इस विग्रहमें श्रेणिकृतम् । निष्ठा प्रत्ययान्त पूर्वपद रहते कैसा होगा ? तो, कृताकृतम् ॥

३७८१ अहीने द्वितीया । ६ । २ । ४७ ॥

अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या । कष्टश्रितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । ग्रामशब्दो नित्स्वरेण । अहीने किम् । कान्तारातीतः ॥ अनुपसर्ग इति वक्तव्यम् ॥ * ॥ नेह । सुखप्राप्तः । थाथेत्यस्यापवादोऽयम् ॥

३७८१-अहीनवाचक समासमें क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती द्वितीया विभक्त्यन्त पदको प्रकृतिस्वर हो, यथा-कष्टं श्रितः, इस वाक्यमें कष्टश्रितः। ग्रामं गतः, ग्रामगतः। कष्ट शब्द अन्तोदात्त है । ग्राम शब्द नित्वके कारण आद्युदात्त है । अहीनवाचक समास न होनेपर कैसा होगा ? तो, कान्तारातीतः । उपसर्ग रहित क्तान्तपद परे रहते पूर्वपदको प्रकृतिस्वर हो, ऐसा कहना चाहिये * इस कारण 'सुखप्राप्तः' इस स्थलमें नहीं हुआ । यह सूत्र थाथादि सूत्रसे विहितस्वरका अपवाद है ॥

३७८२ तृतीया कर्मणि । ६ । २ । ४८ ॥

कर्मवाचके क्तान्ते परे तृतीयान्तं प्रकृत्या । त्वोतासः । रुद्रहतः । महाराजहतः । रुद्रो रगन्तः । कर्मणि किम् । रथेन यातो रथयातः ॥

३७८२-कर्म्मवाचक क्तप्रत्ययान्त पद परे रहते पूर्ववर्त्ती तृतीया विभक्त्यन्त पदको प्रकृतिस्वर हो, यथा-त्वोतासः । रुद्रेण हतः, इस विग्रहमें, रुद्रहतः । महाराजहतः । रुद्र शब्द रक्प्रत्ययान्त है । कर्म्मवाचक क्त प्रत्ययान्त पद परे न रहते यथा-रथेन यातः, इस वाक्यमें ' रथयातः ' । इस स्थलमें प्रकृतिस्वर न हुआ ॥

३७८३ गतिरनन्तरः । ६ । २ । ४९ ॥

कर्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या । थाथेत्यस्यापवादः । पुरोहितम् । अनन्तरः किम् । अभ्युद्धृतः । कारकपूर्वपदस्य तु सतिशिष्टस्थाथादिस्वर एव । दूरादागतः ॥

३७८३-कर्म्मवाचक क्त प्रत्ययान्त पद परे रहते पूर्ववर्त्ती अव्यवहित गतिसंज्ञक शब्दको प्रकृतिस्वर हो, यह सूत्र थाथादि सूत्रका अपवाद है, यथा-पुरोहितम् । अव्यवहित न होनेपर कैसा होगा, ? तो, अभ्युद्धृतः । कारक पूर्वपदको तो सतिशिष्ट थाथादि स्वर ही होगा, यथा-दूरादागतः ॥

३७८४ तादौ च निति कृत्यतौ । ६ । २ । ५० ॥

तकारादौ निति तुशब्दवर्जिते कृति परेऽनन्तरो गतिः प्रकृत्या । अग्नेरायो नृतमस्य प्रभूतौ । सङ्गतिं गोः । कृत्स्वरापवादः । तादौ किम् । प्रजल्पाकः । निति किम् । प्रकर्ता । तृजन्तः । अतौ किम् । आगन्तुः ॥

३७८४–तकारादि, नित् तु शब्द वर्जित कृत् प्रत्यय परे रहते पूर्ववर्त्ती अव्यवहित जो गतिसंज्ञक शब्द उसको प्रकृतिस्वर हो, यथा–अग्ने रायोनृतमस्य प्रभूतौ । सङ्गितिं गोः । यह कृत्स्वरका अपवाद है । तकारादिप्रत्यय न होनेपर यथा–प्रजल्पाकः । नित् प्रत्यय न होनेपर यथा–प्रकर्ता । प्रकर्ता यह तृच्प्रत्ययान्त है । तु प्रत्यय होनेपर कैसा होगा ? तो, आगन्तुः॥

३७८५ तवै चान्तश्च युगपत्।६।२।५१॥

तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चानन्तरः प्रकृत्या युगपच्चैतदुभयं स्यात् । अन्वेतवा उ । कृत्स्वरापवादः ॥

३७८५–एककालमें तवैप्रत्ययान्त शब्दके अन्तवर्णको उदात्तस्वर हो, और तवैप्रत्ययान्त पद परे रहते अव्यवहित पूर्ववर्त्ती गतिसंज्ञक शब्दको प्रकृतिस्वर हो,यथा–अन्वेतवा उ । यह कृत्स्वरका अपवाद है । पर्य्यायनिवृत्तिके निमित्त युगपत् शब्दका ग्रहण कियाहै । 'अन्वेतवा उ' यहां अनु शब्द "उपसर्गाश्चाभिवर्जम्" इस सूत्रसे आद्युदात्त है ॥

३७८६ अनिगन्तोऽञ्चतौ वप्रत्यये । ६ । २ । ५२ ॥

अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या । ये पराञ्चस्तान् । अनिगन्त इति किम् । प्रत्यञ्चो यन्तु । कृत्स्वरात्परत्वादयमेव । जहि वृष्ण्यानि कृणुही पराचः । वप्रत्यये किम् । उदञ्चनम् ॥

३७८६–व प्रत्ययान्त अञ्च् धातु परे रहते पूर्ववर्त्ती अनिगन्त अर्थात् इगन्त (इ–उ–ऋ–लृकारान्त) न हो ऐसा जो गतिसंज्ञक शब्द उसको प्रकृतिस्वर हो, यथा–ये पराञ्चस्तान् । इगन्त गतिसंज्ञक होनेपर कैसा होगा ? तो प्रत्यञ्चो यन्तु । कृत्स्वरसे परत्वके कारण यही स्वर होगा । " जहि वृष्ण्यानि कृणुही पराचः " । व प्रत्ययान्त अञ्च् धातु परे न होनेपर कैसा होगा ? तो उदञ्चनम् । " पराञ्चः " यहां " ऋत्विक्० " इससे किन् " उगिदचां सर्वनामस्थाने० " इससे नुम् हुआहै ॥

३७८७ न्यधी च । ६ । २ । ५३ ॥

वप्रत्ययान्तेऽञ्चतावगिन्तावपि न्यधी प्रकृत्या । न्यङ्ङुत्तानः । उदात्तस्वरितयोर्यण इति अञ्चतेरकारः स्वरितः । अध्यङ् ॥

३७८७–व प्रत्ययान्त अञ्च् धातु परे रहते पूर्ववर्त्ती नि और अधि शब्दको इकारान्त होनेपर भी प्रकृतिस्वर हो, यथा–न्यङ्ङुत्तानः । यहां " उदात्तस्वरितयोर्यणः ३६५७ " इस सूत्रसे अञ्च् धातुके अकारको स्वरितस्वर हुआ । अध्यङ् ॥

३७८८ ईषदन्यतरस्याम् ।६।२।५४॥

ईषत्कडारः । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्यादौ कृत्स्वर एव ॥

३७८८–ईषत् शब्दको प्रकृतिस्वर हो विकल्प करके, यथा–ईषत्कडारः । ईषत् शब्द अन्तोदात्त है । 'ईषद्भेदः' इत्यादि स्थलमें तो परत्वके कारण कृत्स्वर ही होगा ॥

३७८९ हिरण्यपरिमाणं धने।६।२।५५॥

सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने । द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनम् । बहुव्रीहावपि परत्वाद्विकल्प एव । हिरण्यं किम् । प्रस्थधनम् । परिमाणं किम् । काञ्चनधनम् । धने किम् । निष्कमाला॥

३७८९–धन शब्द परे रहते हिरण्यके परिमाणवाचक पूर्वपदको विकल्प करके प्रकृतिस्वर हो, यथा–द्वे सुवर्णे परिमाणमस्य, इस विग्रहमें द्विसुवर्णम्+तदेव धनम्=द्विसुवर्णधनम् । बहुव्रीहिसमासमें भी परत्वके कारण विकल्प करके पूर्वपदप्रकृतिस्वर ही होगा । हिरण्यवाचक न होनेपर कैसा होगा? तो प्रस्थधनम् । परिमाणवाचक न होनेपर कैसा होगा? तो काञ्चनधनम् । धन शब्द परे न होनेपर कैसा होगा? तो निष्कमाला । (पाँच कृष्णलाओंका एक मासा, १६ मासेका एक सुवर्ण, ४सुवर्णका एक पल होताहै ॥

३७९० प्रथमोऽचिरोपसम्पत्तौ । ६ । २ । ५६ ॥

प्रथमशब्दो वा प्रकृत्याऽभिनवत्वे । प्रथमवैयाकरणः । सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः प्रथेरमजन्तः । अचिरेति किम् । प्रथमो वैयाकरणः ॥

३७९०–अचिरोपसंपत्ति अर्थात् अभिनवत्व द्योत्य होनेपर प्रथम शब्दको विकल्प करके प्रकृतिस्वर हो, यथा–प्रथमवैयाकरणः । प्रथ धातुके उत्तर अमच् प्रत्यय करके प्रथम शब्द सिद्ध हुआहै । अचिरोपसम्पत्ति न होनेपर कैसा होगा ? तो प्रथमो वैयाकरणः । अर्थात् वैयाकरणोंमें प्रधान । यहां अन्तोदात्त ही होगा ॥

३७९१ कतरकतमौ कर्मधारये।६।२।५७

वा प्रकृत्या । कतरकठः कर्मधारयग्रहणमुत्तरार्थम् । इह तु प्रतिपदोक्तत्वादेव सिद्धम् ॥

३७९१–कर्मधारयसमासमें पूर्ववर्त्ती कतर और कतम शब्दको विकल्प करके प्रकृतिस्वर हो, यथा–कतरकठः । कर्मधारय शब्दका ग्रहण उत्तरार्थ है । इस स्थलमें तो प्रतिपदोक्तत्वसे ही प्रकृतिस्वर सिद्ध है ॥

३७९२ आर्यो ब्राह्मणकुमारयोः । ६ । २ । ५८ ॥

आर्यकुमारः । आर्यब्राह्मणः । आर्यो ण्यदन्तत्वादन्तस्वरितः । आर्यः किम् । परमब्राह्मणः । ब्राह्मणादीति किम् । आर्यक्षत्रियः । कर्मधारय इत्येव ॥

३७९२-ब्राह्मण और कुमार शब्द परे रहते पूर्ववर्त्ती आर्य्य शब्दको कर्मधारयसमासमें प्रकृतिस्वर हो, यथा-आर्य्यब्राह्मणः। आर्य्यकुमारः। आर्य्य शब्द ण्यत् प्रत्ययान्त है, अत एव उसका अन्त्यवर्ण स्वरित है। आर्य्य शब्द पूर्वमें न होनेपर कैसा होगा ? तो परमब्राह्मणः। ब्राह्मणादि शब्द परे न होनेपर कैसा होगा? तो आर्य्यक्षत्रियः॥

३७९३ राजा च। ६। २। ५९॥

ब्राह्मणकुमारयोः परतो वा प्रकृत्या कर्मधारये। राजब्राह्मणः। राजकुमारः। योगविभाग उत्तरार्थः॥

३७९३-कर्म्मधारयसमासमें ब्राह्मण और कुमार शब्द परे रहते पूर्ववर्त्ती राजन् शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-राजब्राह्मणः। राजकुमारः। योगविभाग उत्तर-सूत्रमें राजन् शब्दकी अनुवृत्त्यर्थ है॥

३७९४ षष्ठी प्रत्येनसि। ६। २। ६०॥

षष्ठ्यन्तो राजा प्रत्येनसि परे वा प्रकृत्या। राजप्रत्येनाः। षष्ठी किम् अन्यत्र न॥

३७९४-कर्म्मधारयसमासमें प्रत्येनस् शब्द परे रहते पूर्ववर्त्ती षष्ठीविभक्त्यन्त राजन् शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-राजप्रत्येनाः। षष्ठीविभक्त्यन्त क्यों कहा ? तो अन्यत्र अर्थात् राजा चासौ प्रत्येनाश्च, इस विग्रहमें "राजप्रत्येनाः" यहां नहीं हो॥

३७९५ क्ते नित्यार्थे। ६। २। ६१॥

क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या। नित्यप्रहसितः। काला इति द्वितीयासमासोऽयम्। नित्यशब्दस्त्यबन्त आद्युदात्तः। हसित इति थाथादिस्वरेणान्तोदात्तः। नित्यार्थे किम्। मुहूर्तप्रहसितः॥

३७९५-नित्यार्थक समासमें क्तप्रत्ययान्त शब्द परे रहते पूर्ववर्त्ती शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-"नित्यप्रहसितः" यहां "कालाः ६९०" इस सूत्रसे द्वितीयातत्पुरुषसमास हुआ। नित्य शब्द त्यप् प्रत्ययान्त है, अत एव आद्युदात्त है। हसित शब्द थाथादिस्वरसे अन्तोदात्त है। नित्यार्थक समास न होनेपर कैसा होगा ? तो मुहूर्त्तप्रहसितः॥

३७९६ ग्रामः शिल्पिनि। ६। २। ६२॥

वा प्रकृत्या। ग्रामनापितः। ग्रामशब्दः आद्युदात्तः। ग्रामः किम्। परमनापितः। शिल्पिनि किम्। ग्रामरथ्या॥

३७९६-शिल्पिवाचक शब्द परे रहते पूर्ववर्त्ती ग्राम शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-ग्रामनापितः। ग्राम शब्द आद्युदात्त है। ग्राम शब्द पूर्वमें न होनेपर तो परमनापितः। शिल्पिवाचक शब्द परे न होनेपर कैसा होगा ? तो ग्रामरथ्या॥

३७९७ राजा च प्रशंसायाम्। ६। २। ६३॥

शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या। राजनापितः। राजकुलालः। प्रशंसायां किम्। राजनापितः। शिल्पिनि किम्। राजहस्ती॥

३७९७-शिल्पिवाचक शब्द परे रहते प्रशंसार्थ पूर्ववर्त्ती राजन् शब्दको विकल्प करके प्रकृतिस्वर हो, यथा-राजनापितः। राजकुलालः। प्रशंसार्थ न होनेपर कैसा होगा ? तो राजनापितः। शिल्पिवाचक शब्द परे न होनेपर कैसा होगा ? तो राजहस्ती॥

३७९८ आदिरुदात्तः। ६। २। ६४॥

अधिकारोऽयम्॥

३७९८-पूर्वपदका आदिवर्ण उदात्त हो, यह अधिकार-सूत्र है। 'पूर्वपदकम्' इसका यहां अर्थात् षष्ठ्यन्तत्वेन विपरिणाम है। इस प्रकरणमें सब जगह पूर्वपदविषयमें षष्ठ्यर्थमें प्रथमा जानना॥

३७९९ सप्तमीहारिणौ धर्म्येऽहरणे। ६। २। ६५॥

सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे। देयं यः स्वीकरोति स हारीत्युच्यते। धर्म्यमित्याचारनियतं देयम्। मुकुटेकार्षापणम्। हलेद्विपदिका। संज्ञायामिति सप्तमीसमासः। कारनाम्नि चेत्यलुक्। याज्ञिकाश्वः। वैयाकरणहस्ती। क्वचिदयमाचारो मुकुटादिषु कार्षापणादि दातव्यं याज्ञिकादीनां त्वश्वादिरिति। धर्म्ये-ति किम्। कर्मकरवर्द्धितकः। अहरणे किम्। वाडवहरणम्। वडवाया अयं वाडवः। तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यद्दीयते तद्धरणमित्युच्यते। परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इत्यहरण इति निषेधेन ज्ञाप्यते। तेन वाडवहार्यमिति हारिस्वरः सिद्ध्यति॥

३७९९-हरणभिन्न धर्म्यबोधक शब्द परे रहते पूर्ववर्त्ती सप्तम्यन्त और हारिवाचक शब्दोंका आदिवर्ण उदात्त हो, देयं यः स्वीकरोति स हारी, अर्थात् जो व्यक्तिदेय वस्तुको स्वीकार करे उसको हारी कहतेहैं। धर्म्य शब्दसे आचार-नियत देय द्रव्य समझना। यथा-मुकुटेकार्षापणम्। हलेद्विपदिका। यहां "संज्ञायाम् ७२१" इस सूत्रसे सप्तमी-तत्पुरुषसमास हुआ। "कारनाम्नि० ९६८" इस सूत्रसे विभक्तिका अलुक् हुआ। याज्ञिकाश्वः। वैयाकरणहस्ती। किसी २ स्थानमें इस प्रकार आचार है कि, मुकुटादिमें कार्षापण दियाजाताहै और याज्ञिकादिओंको तो अश्वादि देय होताहै। धर्म्यबोधक शब्द परे न होनेपर कैसा होगा ? तो कर्मकरवर्द्धितकः। हरणभिन्न धर्म्यबोधक शब्द परे न होनेपर कैसा होगा ? तो वाडवहरणम्। वडवाया अयं वाडवः।

वडवा संबन्धिको वाडव कहतेहैं । बीजनिषेकके पश्चात् शरीर-पोषणार्थ घोडीको जो दियाजाय उसको हरण कहतेहैं । कृत्स्वर परवर्त्ती होनेपर भी हारिस्वरके द्वारा बाधित होताहै, यह 'अहरणे' इस निषेधसे जानाजाताहै, इसकारण 'वाडवहार्य्यम्' इस स्थलमें हारिस्वर सिद्ध होताहै ॥

३८०० युक्ते च । ६ । २ । ६६ ॥

युक्तवाचिनि समासे पूर्वमाद्युदात्तम् । गोबल्लवः । कर्तव्ये तत्परो युक्तः ॥

३८००–युक्तवाचक समासमें पूर्वपदको आद्युदात्तस्वर हो, यथा–गोबल्लवः । कर्त्तव्यमें तत्परको युक्त कहतेहैं ॥

३८०१ विभाषाऽध्यक्षे । ६ । २ ।६७॥

गवाध्यक्षः ॥

३८०१–अध्यक्ष शब्द परे रहते समासमें पूर्वपदको आद्युदात्तस्वर हो, यथा–गवाध्यक्षः ॥

३८०२ पापं च शिल्पिनि ।६।२।६८॥

पापनापितः ॥ पापाणके इति प्रतिपदोक्तस्यैव ग्रहणात् षष्ठीसमासे न ॥

३८०२–शिल्पिवाचक शब्द परे रहते पूर्ववर्त्ती पाप शब्दको आद्युदात्तस्वर हो, यथा–पापनापितः । इस सूत्रमें "पापाणके ७३३" इस प्रतिपदोक्तसमासके ही ग्रहणके कारण षष्ठीतत्पुरुषसमासमें नहीं होगा ॥

३८०३ गोत्राऽन्तेवासिमाणवब्राह्मणेषु क्षेपे । ६ । २ । ६९ ॥

भार्यासौश्रुतः । सुश्रुतोऽपत्यस्य भार्याप्रधानतया क्षेपः । अन्तेवासी । कुमारीदाक्षाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयते ते एवं क्षिप्यन्ते । भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवः । भयब्राह्मणः । भयेन ब्राह्मणः सम्पद्यते । गोत्रादिषु किम् । दासीश्रोत्रियः । क्षेपे किम् । परमब्राह्मणः ॥

३८०३–क्षेपवाची समासमें, गोत्रवाचक अन्तेवासिवाचक, माणवक और ब्राह्मण शब्द परे रहते पूर्ववर्त्ती पदको आद्युदात्तस्वर हो, यथा–भार्यासौश्रुतः । सुश्रुतकी सन्तानको भार्याप्रधानत्वके कारण उसकी निन्दा है । अन्तेवासी यथा–कुमारीदाक्षाः । ओदनपाणिनीयाः । अर्थात् कुमारी आदिके लाभके निमित्त जो दाक्ष्यादिसे प्रोक्त शास्त्रको अध्ययन करें, वह इसप्रकारसे निन्दित होतेहैं । भिक्षामाणवः । "भिक्षां लप्स्येऽहम्" ऐसा जो कहै, उसको भिक्षा माणव कहतेहैं । भयब्राह्मणः । भयसे जो ब्राह्मण बनगयाहो । गोत्रादि परे न होनेपर कैसा होगा ? तो दासीश्रोत्रियः । क्षेपार्थक समास न होनेपर कैसा होगा ? तो परमब्राह्मणः । (दाक्षिणा प्रोक्तम्= दाक्षम् तदधीते दाक्षः । सुशृणोतीति=सुश्रुत् तस्यापत्यं सौश्रुतः) ॥

३८०४ अङ्गानि मैरेये ।६।२।७०॥

मद्यविशेषो मैरेयः । मधुमैरेयः । मधुविकारस्य तस्य मध्वङ्गम् । अङ्गानि किम् । परममैरेयः । मैरेये किम् । पुष्पासवः ॥

३८०४–मद्यविशेषको मैरेय कहतेहैं, मैरेय शब्द परे रहते पूर्ववर्त्ती मद्यार्थारम्भक वाचक शब्दको आद्युदात्तस्वर हो, यथा–मधुमैरेयः । मधुका विकार मद्य है, अत एव मधु मद्यका अङ्ग आरम्भक होता है । मद्यका आरम्भकवाची न होनेपर कैसा होगा ? तो परममैरेयः । मैरेय शब्द परे न होनेपर कैसा होगा ? तो पुष्पासवः ॥

३८०५ भक्ताख्यास्तदर्थेषु । ६।२।७१॥

भक्तमन्नम् । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नविशेषाः । भक्ताख्याः किम् । समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते । तदर्थेषु किम् । भिक्षाप्रियः । बहुव्रीहिरयम् । अत्र पूर्वपदमन्तोदात्तम् ॥

३८०५–भक्तार्थवाचक शब्द परे रहते भक्तवाचक पूर्वपदको अनुदात्तस्वर हो, यथा–भिक्षाकंसः । भाजीकंसः । भिक्षादि शब्दसे अन्नविशेष समझना । भक्तवाचक पूर्वपद न होनेपर कैसा होगा ? तो समाशशालयः । 'समशनम् समाशः' इससे क्रियामात्र कहाजाता है । भक्तार्थवाचक शब्द परे न होनेपर कैसा होगा?तो भिक्षाप्रियः । यह बहुव्रीहिसमासनिष्पन्न है । यहां पूर्वपद अन्तोदात्त है ॥

३८०६ गोबिडालसिंहसैन्धवेषूपमाने । ६ । २ । ७२ ॥

धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्यं गौरिवेति विग्रहः । व्याघ्रादिः । गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते । उपमाने किम् । परमसिंहः ॥

३८०६–उपमानवाचक गो, बिडाल, सिंह और सैन्धव शब्द परे रहते पूर्ववर्त्ती पदको अनुदात्तस्वर हो, यथा–धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्यं गौरिव, इस विग्रहमें धान्यगवः पद सिद्ध हुआ है । यह व्याघ्रादि है । गौकी आकृतिसे राशीकृत धान्यको धान्यगव कहते हैं । उपमानवाचक न होनेपर कैसा होगा ? तो परमसिंहः । इस स्थलमें पूर्वपद अनुदात्त नहीं हुआ ॥

३८०७ अके जीविकार्थे । ६ । २।७३॥

दन्तलेखकः । यस्य दन्तलेखनेन जीविका । नित्यं क्रीडेति समासः । अके किम् । रमणीयकर्ता। जीविकार्थे किम्।इक्षुभक्षिकां मे धारयसि॥

३८०७–अकप्रत्ययान्त जीविकावाचक शब्द परे रहते समासमें पूर्वपद आद्युदात्त हो, यथा–दन्तलेखकः । जिसकी दन्तलेखनद्वारा जीविका हो, वह दन्तलेखक कहाता है । इस स्थलमें " नित्यं क्रीडा ७११ " इस सूत्रसे समास हुआ है ।

अक प्रत्ययान्त पद परे न रहते कैसा होगा? तो रमणीयकर्त्ता। जीविकार्थक न होनेपर कैसा होगा? तो इक्षुभक्षिकां मे धारयसि ॥

३८०८ प्राचां क्रीडायाम् । ६ ।२।७४॥

प्राग्देशवर्त्तिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं स्यात् । उद्दालकपुष्पभञ्जिका । संज्ञायामिति ण्वुल् । प्राचां किम् । जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा। क्रीडायां किम् । तव पुष्पप्रचायिका । पर्याये ण्वुल् ॥

३८०८-पूर्वदेशवर्त्ती लोगोंकी जो क्रीडा, तद्वाचक समासमें अक प्रत्ययान्त पद परे रहते पूर्ववर्त्ती पद आद्युदात्त हो, यथा-उद्दालकपुष्पभञ्जिका । इस स्थलमें "संज्ञायाम् ३२८६" इस सूत्रसे ण्वुल् प्रत्यय हुआ है । पूर्वदेशवासिओंकी क्रीडा न होनेपर कैसा होगा? तो जीवपुत्रप्रचायिका । यह उत्तरदेशिओंकी क्रीडा है, क्रीडा न होनेपर तो तव पुष्पप्रचायिका यहां पर्यायमें ण्वुल् प्रत्यय हुआ है ॥

३८०९ अणि नियुक्ते । ६ । २ । ७५॥

अण्णन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्रधारः । नियुक्ते किम् । काण्डलावः ॥

३८०९-अण्प्रत्ययान्त शब्द परे रहते नियुक्तवाचक समासमें पूर्ववर्त्ती पद आद्युदात्त हो, यथा-छत्रधारः । नियुक्तवाचक समास न होनेपर कैसा होगा? तो काण्डलावः ॥

३८१० शिल्पिनि चाऽकृञः ।६।२।७६॥

शिल्पिवाचिनि समासे अण्णन्ते परे पूर्वमाद्युदात्तं सचेदण् कृञः परो न भवति । तन्तुवायः । शिल्पिनि किम् । काण्डलावः । अकृञः किम् । कुम्भकारः ॥

३८१०-शिल्पिवाचक समासमें अण्प्रत्ययान्त शब्द परे रहते पूर्वपद आद्युदात्त हो, वह अण् प्रत्यय यदि कृञ् धातुके उत्तर विहित न हो तो, यथा-तन्तुवायः । शिल्पीवाचक समास न होनेपर कैसा होगा? तो काण्डलावः । कृञ् धातुके उत्तर अण् प्रत्यय होनेपर कैसा होगा? तो कुम्भकारः ॥

३८११ संज्ञायां च । ६ । २ । ७७ ॥

अण्णन्ते परे । तन्तुवायो नाम कृमिः । अकृञ इत्येव । रथकारो नाम ब्राह्मणः ॥

३८११-संज्ञा होनेपर अण्प्रत्ययान्त पद परे रहते पूर्वपदको आद्युदात्तस्वर हो, यथा-तन्तुवायो नाम कृमिः । कृञ् धातुके उत्तर अण् प्रत्यय न होनेपर ही होगा, इस कारण "रथकारो नाम ब्राह्मणः" यहां न हुआ ॥

३८१२ गोतन्तियवं पाले । ६ ।२।७८॥

गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थो योगः । गो इति किम् । वत्सपालः । पाले इति किम् । गोरक्षः ॥

३८१२-पाल शब्द परे रहते पूर्ववर्त्ती गो, तन्ति और यव शब्दको आद्युदात्तस्वर हो, यथा-गोपालः । तन्तिपालः । यवपालः । योग शब्दका अनियुक्त अर्थ जानना । गो शब्द पूर्वमें न रहते कैसा होगा? तो वत्सपालः । पाल शब्द परे न होनेपर कैसा होगा? तो गोरक्षः ॥

३८१३ णिनि । ६ । २ । ७९ ॥

पुष्पहारी ॥

३८१३-णिन्प्रत्ययान्त पद परे रहते पूर्ववर्त्ती पद आद्युदात्त हो, यथा-पुष्पहारी ॥

३८१४ उपमानं शब्दार्थप्रकृतावेव । ६ । २ । ८० ॥

उपमानवाचि पूर्वपदं णिन्यन्ते परे आद्युदात्तम् । उष्ट्रक्रोशी । ध्वाङ्क्षरावी । उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम् । शब्दार्थप्रकृतौ किम् । वृकवञ्ची । प्रकृतिग्रहणं किम् । प्रकृतिरेव यत्रोपसर्ग निरपेक्षा शब्दार्था तत्रैव यथा स्यात् । इह मा भूत् । गर्दभोच्चारी ॥

३८१४-शब्दार्थक धातुप्रकृतिक णिन्प्रत्ययान्त पद परे रहते पूर्ववर्त्ती उपमानवाचक पद आद्युदात्त हो, यथा-उष्ट्रक्रोशी । ध्वाङ्क्षरावी । इस स्थलमें उपमान शब्दका ग्रहण इस योगके और पूर्वयोगके विषयविभागार्थ है । शब्दार्थक धातुप्रकृतिक न होनेपर कैसा होगा? तो वृकवञ्ची । प्रकृति-शब्दका ग्रहण क्यों किया? तो जिस स्थलमें प्रकृति ही उपसर्गनिरपेक्षक होकर शब्दार्थक हो, उसी स्थलमें हो अन्यत्र नहीं, अत एव "गर्दभोच्चारी" इस स्थलमें आद्युदात्त नहीं हुआ ॥

३८१५ युक्तारोह्यादयश्च ।६। २ । ८१ ॥

आद्युदात्ताः । युक्तारोही । आगतयोधी । क्षीरहोता ॥

३८१५-युक्तारोही आदि शब्दोंको आद्युदात्तस्वर हो, यथा-युक्तारोही । आगतयोधी । क्षीर होता ॥

३८१६ दीर्घकाशतुषभ्राष्ट्रवटं जे । ६ । २ । ८२ ॥

कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः वटजः ॥

३८१६-ज शब्द परे रहते दीर्घान्त पूर्वपद और काश, तुष, भ्राष्ट्र और वट शब्द आद्युदात्त हों, यथा-कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥

३८१७ अन्त्यात्पूर्वं बह्वचः ।६।२।८३॥

बह्वचः पूर्वस्यान्त्यात्पूर्वपदमुदात्तं जे उत्तर-

पदे । उपसरजः । आमलकीजः । बह्वचः किम् । दग्धजानि तृणानि ॥

३८१७–ज शब्द परे रहते पूर्ववर्त्ती बहुस्वरविशिष्ट शब्दका अन्त्यसे पूर्व जो पद वह उदात्त हो, यथा–उपसरजः । आमलकीजः । बहुस्वरविशिष्ट न होनेपर कैसा होगा ? तो दग्धजानि तृणानि । स्त्रीगवादिमें गर्भाधानके निमित्त जो बलीवर्दोंका प्रथम गमन, उसको उपसर कहते हैं 'प्रजने सर्तेः' इससे अप्, तत्र जातः उपसरजः ॥

३८१८ ग्रामेऽनिवसन्तः ।६।२।८४॥

ग्रामे परे पूर्वपदमुदात्तम् । तच्चेन्निवसद्वाचि न। मल्लग्रामः । ग्रामशब्दोऽत्र समूहवाची । देवग्रामः। देवस्वामिकः। अनिवसन्तः किम् । दाक्षिग्रामः । दाक्षिनिवासः ॥

३८१८–ग्राम शब्द परे रहते पूर्वपद उदात्त हो ग्राम शब्द यदि निवासार्थक न हो, यथा–मल्लग्रामः । इस स्थलमें ग्राम शब्दसे समूह समझना । देवग्रामः,अर्थात् देवस्वामिकः । निवासार्थक होनेपर कैसा होगा ? तो दाक्षिग्रामः, अर्थात् दाक्षिनिवासः ॥

३८१९ घोषादिषु च ।६।२।८५॥

दाक्षिघोषः । दाक्षिकटः । दाक्षिह्रदः ॥

३८१९–घोषादि शब्द परे रहते पूर्वपद आद्युदात्त हो, यथा–दाक्षिघोषः । दाक्षिकटः । दाक्षिह्रदः ॥

३८२० छात्र्यादयः शालायाम् ।६।२।८६॥

छात्रिशाला । व्याडिशाला । यदापि शालान्तः समासो नपुंसकलिङ्गो भवति तदापि तत्पुरुषे शालायां नपुंसक इत्येतस्मात्पूर्वविप्रतिषेधेनाऽयमेव स्वरः । छात्रिशालम् ॥

३८२०–शाला शब्द परे रहते पूर्ववर्त्ती छात्रि आदि शब्द आद्युदात्त हो, यथा–छात्रिशाला । व्याडिशाला । जब भी शाला शब्दान्त समास क्लीबलिङ्ग होता है तबभी "तत्पुरुषे शालायां नपुंसके ३८५७" इस सूत्रसे पूर्वप्रतिषेधके कारण यह आद्युदात्तस्वर ही होगा, यथा–छात्रिशालम् ॥

३८२१ प्रस्थेऽवृद्धमकर्क्यादीनाम् ।६।२।८७॥

प्रस्थशब्दे उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् । इन्द्रप्रस्थः । अवृद्धं किम् । दाक्षिप्रस्थः । अकर्क्यादीनामिति किम् । कर्कीप्रस्थः । मकरीप्रस्थः ॥

३८२१–प्रस्थ शब्द परे रहते कर्क्यादि शब्दभिन्न अवृद्ध अर्थात् वृद्धसंज्ञक न हो ऐसे पूर्वपदको आद्युदात्तस्वर हो, यथा–इन्द्रप्रस्थः । वृद्धसंज्ञक होनेपर कैसा होगा ? तो दाक्षिप्रस्थः । कर्क्यादि शब्द होनेपर कैसा होगा ? तो कर्कीप्रस्थः । मकरीप्रस्थः ॥

३८२२ मालादीनां च ।६।२।८८॥

वृद्धार्थमिदम् । मालाप्रस्थः । शोणाप्रस्थः ॥

३८२२–प्रस्थ शब्द परे रहते पूर्ववर्त्ती मालादि शब्दोंको आद्युदात्तस्वर हो, यह वृद्धार्थ सूत्र है । यथा–मालाप्रस्थः । शोणाप्रस्थः "एङ् प्राचां देशे" इससे शोण शब्दको वृद्धत्व हुआ ॥

३८२३ अमहन्नवन्नगरेऽनुदीचाम् ।६।२।८९॥

नगरे परे महन्नवन्वर्जितं पूर्वमाद्युदात्तं स्यात् तच्चेदुदीचां न । ब्रह्मनगरम् । अमेति किम् । महानगरम् । नवनगरम् । अनुदीचां किम् । कार्तिनगरम् ॥

३८२३–नगर शब्द परे रहते महत् और नवन् शब्द भिन्न पूर्ववर्त्ती शब्द आद्युदात्त हो वह यदि उत्तरदेशवासिओं का न हो तो, यथा–ब्रह्मनगरम् । महदादि पूर्वपद होनेपर कैसा होगा ? तो महानगरम् । नवनगरम् । उत्तरदेशवासिओंका होनेपर यथा–कार्तिनगरम् ॥

३८२४ अर्मे चाऽवर्णं द्व्यच् त्र्यच् ।६।२।९०॥

अर्मे परे द्व्यच् त्र्यच् पूर्वमवर्णान्तमाद्युदात्तम् । गुप्तार्मम् । कुक्कुटार्मम् । अवर्णं किम् । बृहदर्मम् । द्व्यच् त्र्यच् किम् । कपिञ्जलार्मम् । अमहन्नवन्नित्येव । महार्मम् । नवार्मम् ॥

३८२४–अर्म्म शब्द परे रहते पूर्ववर्त्ती द्विस्वर और त्रिस्वरविशिष्ट पूर्ववर्त्ती अवर्णान्त पद आद्युदात्त हो, यथा–गुप्तार्मम् । कुक्कुटार्मम् । अवर्णान्त न होनेपर यथा–बृहदर्मम् । द्व्यच् त्र्यच् न होनेपर यथा–कपिञ्जलार्मम् । महत् और नवन् शब्द भिन्न ही अवर्णान्त पूर्वपद आद्युदात्त होगा इससे "महार्मम् । नवार्मम्" यहां आद्युदात्तस्वर नहीं हुआ ॥

३८२५ न भूताधिकसञ्जीवमद्राश्मकज्जलम् ।६।२।९१॥

अर्मे परे नैतान्याद्युदात्तानि । भूतार्मम् । अधिकार्मम् । सञ्जीवार्मम् । मद्राश्मग्रहणं सङ्घातविगृहीतार्थम् । मद्रार्मम् । अश्मार्मम् । मद्राश्मार्मम् । कज्जलार्मम् ॥ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ॥ * ॥ दिवोदासाय दाशुषे ॥

३८२५–अर्म्म शब्द परे रहते पूर्ववर्त्ती भूत, अधिक, सञ्जीव, मद्र, अश्म और कज्जल शब्दको आद्युदात्त स्वर न हो, यथा–भूतार्म्मम् । अधिकार्म्मम् । सञ्जीवार्म्मम् । मद्राश्म शब्दका ग्रहण संघातार्थ और विगृहीतार्थ है, यथा–मद्रार्म्मम् । अश्मार्म्मम् । मद्राश्मार्म्मम् । कज्जलार्म्मम् ।

आद्युदात्त प्रकरणमें दिवोदासादि शब्दोंके आद्युदात्तका उपसंख्यान करना चाहिये * यथा-दिवो॑दासाय दा॒शुषे॑ ॥

३८२६ अन्तः । ६ । २ । ९२ ॥

अधिकारोऽयम् । प्रागुत्तरपदादिग्रहणात् ॥

३८२६-यह अधिकारसूत्र है, इसका उत्तरपदादिग्रहणके पूर्वपर्य्यन्त अधिकार चलेगा-॥

३८२७ सर्वं गुणकार्त्स्न्ये । ६ ।२।९३॥

सर्वशब्दः पूर्वपदमन्तोदात्तम् । सर्वश्वेतः । सर्वमहान् । सर्वं किम् । परमश्वेतः । आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकार्त्स्न्ये वर्तते । गुणेति किम् । सर्वसौवर्णः । कार्त्स्न्ये किम् । सर्वेषां श्वेततरः सर्वश्वेतः ॥

३८२७-गुणकार्त्स्न्यमें वर्त्तमान पूर्ववर्त्ती सर्व शब्द अन्तोदात्त हो, यथा-सर्वश्वेतः । सर्वमहान् । सर्व शब्द पूर्वमें न होनेपर यथा-परमश्वेतः । आश्रयव्याप्तिसे श्वेतको परमत्व है, अत एव गुणकार्त्स्न्यमें वर्तमान है । गुणकार्त्स्न्यबोधक सर्व शब्द न होनेपर यथा-सर्वसौवर्णः । कार्त्स्न्यबोधक न होनेपर यथा-सर्वेषां श्वेततरः=सर्वश्वेतः ॥

३८२८ संज्ञायां गिरिनिकाययोः । ६ । २ । ९४ ॥

एतयोः परतः पूर्वमन्तोदात्तम् । अञ्जनागिरिः । मौण्डनिकायः । संज्ञायां किम् । परमगिरिः । ब्राह्मणनिकायः ॥

३८२८-संज्ञा होनेपर गिरि और निकाय शब्द परे रहते पूर्ववर्त्ती पदको आद्युदात्तस्वर हो, यथा-अञ्जनागिरिः । मौण्डनिकायः । संज्ञा न होनेपर यथा-परमगिरिः । ब्राह्मणनिकायः । " अञ्जनागिरिः " इसमें " वनगिर्योः संज्ञायाम्० " इससे दीर्घ हुआहै ॥

३८२९ कुमार्यां वयसि । ६ । २ ।९५॥

पूर्वपदमन्तोदात्तम् । वृद्धकुमारी । कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः । तत्र वय इह गृह्यते न कुमारत्वमेव । वयसि किम् । परमकुमारी ॥

३८२९-कुमारी शब्द परे रहते वयस्में वर्तमान पूर्ववर्त्ती शब्दका अन्तवर्ण उदात्त हो, यथा-वृद्धकुमारी । कुमारी शब्द पुरुषके साथ असम्प्रयोगरूप प्रवृत्तिनिमित्तको लेकर प्रयुक्त हुआहै, इसलिये वृद्धादि शब्दोंके साथ समानाधिकरण होताहै । वह वयःक्रम इस स्थलमें वृद्धत्व गृहीत है, कुमारत्वही नहीं, इससे'वयसि'यह पूर्वपदका विशेषण है,यह सूचित हुआ है, अवस्थावाचक न होनेपर परमकुमारी ॥

३८३० उदकेऽकेवले । ६ । २।९६॥

अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमन्तोदात्तम् । गुडोदकम् । स्वरे कृतेऽत्र एकादेशः । स्वरितो वाऽनुदात्ते पदादाविति पक्षे स्वरितः । अकेवले किम् । शीतोदकम् ॥

३८३०-अकेवल अर्थात् मिश्रवाचक समासमें उदक शब्द परे रहते पूर्वपद अन्तोदात्त हो, यथा-गुडोदकम् । स्वर करनेपर इस स्थलमें एकादेश होगा, " स्वरितो वानुदात्ते पदादौ ३६५९ " इस सूत्रसे विकल्पपक्षमें स्वरित स्वर होगा । केवलार्थमें यथा-शीतोदकम् । गुडमिश्रमुदकम्-गुडोदकम् ॥

३८३१ द्विगौ क्रतौ । ६ । २ । ९७ ॥

द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् । गर्गत्रिरात्रः । द्विगौ किम् । अतिरात्रः । क्रतौ किम् । बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः ॥

३८३१-उत्तर पद द्विगु समास क्रतुवाचक परे रहते पूर्व पद अन्तोदात्त हो, यथा-गर्गत्रिरात्रः । द्विगु समास न होनेपर अतिरात्रः । क्रतु न होनेपर यथा-बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः । तिसृणां रात्रीणां समाहारस्त्रिरात्रम् । "अहःसर्वैकदेश० ७८७ " इससे अच् समासान्त, ' संख्यापूर्वं रात्रं क्लीबम् ' इससे नपुंसक । रात्रिमतिक्रान्तः अतिरात्रः॥

३८३२ सभायां नपुंसके । ६ । २।९८॥

सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् । गोपालसभम् । स्त्रीसभम् । सभायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । राजसभा । प्रतिपदोक्तनपुंसकग्रहणान्नेह । रमणीयसभम् । ब्राह्मणकुलम् ॥

३८३२-नपुंसकलिङ्ग समासमें सभा शब्द परे रहते पूर्व पद अन्तोदात्त हो, यथा-गोपालसभम् । स्त्रीसभम् । सभा शब्द परे न होनेपर ब्राह्मणसेनम् । नपुंसक न होनेपर यथा-राजसभा । इस स्थलमें प्रतिपदोक्त नपुंसकके ग्रहणके कारण रमणीयसभम्, ब्राह्मणकुलम्, इन पदोंमें पूर्वपदको अन्तोदात्त न हुआ । रमणीया सभा यस्येति रमणीयसभम्-बहुव्रीहिः ॥

३८३३ पुरे प्राचाम् । ६ । २ । ९९ ॥

देवदत्तपुरम् । नान्दीपुरम् । प्राचां किम् । शिवपुरम् ॥

३८३३-पूर्व देश होनेपर समासमें पुर शब्द परे रहते पूर्व पदको अन्तोदात्त स्वर हो, यथा-देवदत्तपुरम् । नान्दीपुरम् । पूर्व देश न होनेपर शिवपुरम् ॥

३८३४ अरिष्टगौडपूर्वे च।६।२।१००॥

पुरे परे अरिष्टगौडपूर्वे समासे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणं किम् । इहापि यथा स्यात् । अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् ॥

३८३४–पुर शब्द परे रहते अरिष्ट, गौड पूर्वक समासमें पूर्व पद अन्तोदात्त हो, यथा–अरिष्टपुरम् । गौडपुरम् । पूर्व शब्दके ग्रहणके कारण अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् । इस स्थलमें भी पूर्वपद अन्तोदात्त हुआ ॥

३८३५ न हास्तिनफलकमार्देयाः । ६ । २ । १०१ ॥

पुरे परे नैतान्यन्तोदात्तानि । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदेरपत्यमिति शुभ्रादित्वात् ढक् ॥

३८३५–पुर शब्द परे रहते पूर्ववर्त्ती हास्तिन, फलक और मार्देय शब्दको अन्तोदात्त स्वर हो, यथा–हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । " मृदेरपत्यम् " इस विग्रहमें शुभ्रादित्वके कारण ढक् प्रत्यय हुआहै । (११४२) इससे उकारका लोप हुआहै ॥

३८३६ कुसूलकूपकुम्भशालं बिले । ६ । २ । १०२ ॥

एतान्यन्तोदात्तानि बिले परे । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालबिलम् । कुसूलादि किम् । सर्पबिलम् । बिलेति किम् । कुसूलस्वामी ॥

३८३६–बिल शब्द परे रहते पूर्ववर्त्ती कुसूल, कूप, कुम्भ और शाल शब्दको अन्तोदात्तस्वर हो, यथा–कुसूलबिलम् । कूपबिलम् । कुम्भबिलम् । शालबिलम् । कुसूलादि पूर्वमें न होनेपर कैसा होगा ? तो सर्पबिलम् । बिल शब्द परे न होनेपर यथा–कुसूलस्वामी ॥

३८३७ दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु । ६ । २ । १०३ ॥

दिक्शब्दा अन्तोदात्ता भवन्त्येषु । पूर्वेषुकामशमी । अपरकृष्णमृत्तिका । जनपदे । पूर्वपञ्चालाः । आख्याने । पूर्वयायातम् । पूर्वचानराटम् । शब्दग्रहणं कालवाचिदिक्शब्दस्य परिग्रहार्थम् ॥

३८३७–ग्रामवाचक, जनपदवाचक, आख्यानवाचक और चानराट शब्द परे रहते पूर्ववर्त्ती दिक्वाचक शब्द अन्तोदात्त हो, यथा–पूर्वेषुकामशमी । अपरकृष्णमृत्तिका । आख्यानक, जनपद शब्दसे देश समझना, यथा–पूर्वपञ्चालाः । आख्यानका उदाहरण यथा–पूर्वयायातम् । पूर्वचानराटम् । शब्दका ग्रहण कालवाचक दिक् शब्दके परिग्रहार्थ है ॥

३८३८ आचार्योपसर्जनश्चाऽन्तेवासिनि । ६ । २ । १०४ ॥

आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ता भवन्ति । पूर्वपाणिनीयाः । आचार्येति किम् । पूर्वान्तेवासी । अन्तेवासिनि किम् । पूर्वपाणिनीयं शास्त्रम् ॥

३८३८–आचार्योपसर्जन अन्तेवासिवाचक शब्द परे रहते दिक्वाचक शब्दको अन्तोदात्तस्वर हो, यथा–पूर्वपाणिनीयाः । आचार्योपसर्जन अन्तेवासिन् शब्द न होनेपर कैसा होगा ? तो पूर्वान्तेवासी । अन्तेवासिवाचक शब्द परे न होनेपर यथा–पूर्वपाणिनीयं शास्त्रम् ॥

३८३९ उत्तरपदवृद्धौ सर्वं च । ६ । २ । १०५ ॥

उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चान्तोदान्ता भवन्ति । सर्वपाञ्चालकः । अपरपाञ्चालकः ॥ अधिकारग्रहणं किम् । सर्वभासः । सर्वकारकः ॥

३८३९–" उत्तरपदस्य " इस सूत्रके अधिकार करके विहित जो वृद्धि, तद्विशिष्ट उत्तरपद परे रहते सर्व शब्द और दिक्वाचक शब्द अन्तोदात्त हो, यथा–सर्वपाञ्चालकः । अधिकारशब्दका ग्रहण करनेसे " सर्वभासः, सर्वकारकः " यहां न हुआ ॥

३८४० बहुव्रीहौ विश्वं संज्ञायाम् । ६ । २ । १०६ ॥

बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । विश्वकर्मा । विश्वदेवः । आविश्वदेवं सत्पतिम् । बहुव्रीहौ किम् । विश्वे च ते देवाश्च विश्वदेवाः । संज्ञायां किम् । विश्वदेवः । प्रागव्ययीभावाद्बहुव्रीह्यधिकारः ॥

३८४०–बहुव्रीहिसमासमें संज्ञा होनेपर पूर्वपदभूत विश्व शब्द अन्तोदात्त हो, यह सूत्र पूर्वपद प्रकृतिस्वरसे प्राप्त आद्युदात्तस्वरका विशेषक है । यथा–विश्वकर्म्मा । विश्वदेवः । आविश्वदेवं सत्पतिम् । बहुव्रीहि न होनेपर कैसा होगा ? तो विश्वे च ते देवाश्च=विश्वदेवाः । संज्ञा न होनेपर कैसा होगा ? तो विश्वदेवः । अव्ययीभावके पूर्वपर्यन्त बहुव्रीहिका अधिकार है ॥

३८४१ उदराऽश्वेषुषु । ६ । २ । १०७ ॥

संज्ञायामितिवर्तते । वृकोदरः । हर्यश्वः । महेषुः ॥

३८४१–बहुव्रीहि समासमें उदर, अश्व और इषु शब्द परे रहते पूर्वपदभूत शब्दको अन्तोदात्त स्वर हो, यथा–वृकोदरः । हर्यश्वः । महेषुः ॥

३८४२ क्षेपे । ६ । २ । १०८ ॥

उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम् । घटोदरः । कन्दुकाश्वः । चलाचलेषुः । अनुदरः इत्यत्र नञ्सुभ्यामिति भवति विप्रतिषेधेन ॥

३८४२-क्षेप अर्थात् निन्दा होनेपर बहुव्रीहिसमासमें उदर, अश्व और इषु शब्द परे रहते पूर्वपद अन्तोदात्त हो, यथा-घटोदरः । कन्दुकाश्वः चलाचलेषुः । "अनुदरः" इस स्थलमें तो विप्रतिषेधसे "नञ्सुभ्याम् (३९०६)" इस सूत्रसे उत्तरपदको अन्तोदात्त होताहै ॥

३८४३ नदी बन्धुनि । ६ । २।१०९ ॥

बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ । गार्गीबन्धुः । नदी किम् । ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । बन्धुनि किम् । गार्गीप्रियः ॥

३८४३-बहुव्रीहिसमासमें बन्धु शब्द परे रहते नद्यन्त पूर्वपद अन्तोदात्त हो, यथा-गार्गीबन्धुः । नद्यन्त पूर्वपद न होनेपर कैसा होगा ? तो, ब्रह्मबन्धुः यहाँ ब्रह्मन् शब्द आद्युदात्त है । बन्धु शब्द परे न होनेपर कैसा होगा ? तो गार्गीप्रियः ॥

३८४४ निष्ठोपसर्गपूर्वमन्यतरस्याम् । ६ । २ । ११० ॥

निष्ठान्त पूर्वपदमन्तोदात्तं वा । प्रधौतपादः। निष्ठा किम् । प्रसेवकमुखः । उपसर्गपूर्वं किम् । शुष्कमुखः ॥

३८४४-बहुव्रीहिसमासमें उपसर्गपूर्वक निष्ठाप्रत्ययान्त पद विकल्प करके अन्तोदात्त हो, यथा-प्रधौतपादः । निष्ठाप्रत्ययान्त न होनेपर कैसा होगा ? तो प्रसेवकमुखः । उपसर्गपूर्वक न होनेपर कैसा होगा ? तो शुष्कमुखः ॥

३८४५ उत्तरपदाऽऽदिः ।६।२।१११ ॥

उत्तरपदाधिकार आपादान्तम् । आद्यधिकारस्तु प्रकृत्या भगालमित्यवधिकः ॥

३८४५--पादसमाप्तिपर्य्यन्त उत्तरपदका अधिकार चलेगा । आदिका अधिकार तो"प्रकृत्या भगालम् ३८७१" इस सूत्रतक चलेगा ॥

३८४६ कर्णो वर्णलक्षणात्।६।२।११२॥

वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शंकुकर्णः । कर्णः किम् । श्वेतपादः । वर्णलक्षणात्किम् । शोभनकर्णः ॥

३८४६-बहुव्रीहिसमासमें वर्णवाचक और लक्षणवाचक शब्दके परवर्त्ती कर्ण शब्द आद्युदात्त हो, यथा-शुक्लकर्णः । शंकुकर्णः । कर्ण शब्द परे न होनेपर कैसा होगा ? तो श्वेतपादः । वर्ण और लक्षणवाचक शब्दके परे न होनेपर कैसा होगा ? तो शोभनकर्णः । (शङ्कुः कर्णे यस्य, इस विग्रहमें "सप्तमीविशेषणे०" इससे सप्तम्यन्तके पूर्वनिपातकी प्राप्ति होनेपर "गड्वादेः परा सप्तमी" इससे परनिपात, "कर्णे लक्षणस्या० १०३६" इससे दीर्घ होकर-शंकुकर्णः)॥

३८४७ संज्ञौपम्ययोश्च । ६।२।११३ ॥

कर्ण आद्युदात्तः । मणिकर्णः । औपम्ये । गोकर्णः ॥

३८४७-संज्ञा और औपम्यमें जो बहुव्रीहि उसमें उत्तरपदभूत कर्ण शब्द आद्युदात्त हो, संज्ञामें यथा-मणिकर्णः । औपम्यमें यथा-गोकर्णः ॥

३८४८ कण्ठपृष्ठग्रीवाजङ्घं च । ६ । २ । ११४ ॥

संज्ञौपम्ययोर्बहुव्रीहौ । शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजंघः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजंघः ॥

३८४८-संज्ञा और औपम्यमें जो बहुव्रीहि उसमें उत्तरपदभूत कण्ठ, पृष्ठ, ग्रीवा और जंघा शब्दको आद्युदात्त स्वर हो, संज्ञामें यथा-शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजंघः । औपम्यमें यथा-खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजंघः ॥

३८४९ शृङ्गमवस्थायां च।६।२।११५॥

शृङ्गशब्दोऽवस्थायां संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ । उद्गतशृंगः । द्व्यङ्गुलशृंगः । अत्र शृंगोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था । संज्ञायाम्। ऋष्यशृंगः । उपमायाम् । मेषशृंगः। अवस्थेति किम् । स्थूलशृंगः ॥

३८४९-बहुव्रीहिसमासमें अवस्था, संज्ञा और औपम्यमें उत्तरपदभूत शृङ्ग शब्द आद्युदात्त हो, यथा-उद्गतशृङ्गः । द्व्यंगुलशृङ्गः । इस स्थलमें शृङ्गोद्गमनादि कृत गोप्रभृति पशुओंकी वयोविशेष अवस्था है । संज्ञामें यथा-ऋष्यशृङ्गः । औपम्यमें यथा-मेषशृङ्गः । अवस्था न होनेपर यथा-स्थूलशृङ्गः ॥

३८५० नञो जरमरमित्रमृताः । ६ । २ । ११६ ॥

नञः पर एते आद्युदात्ता बहुव्रीहौ । ता मे जराय्वजरम्।अमरम्। अमित्रमर्दय।श्रवो देवेष्वमृतम्। नञः किम् । ब्राह्मणमित्रः । जेति किम् । अशत्रुः ॥

३८५०-बहुव्रीहि समासमें नञ्के परवर्त्ती जर, मर, मित्र और मृत शब्दको आद्युदात्त स्वर हो, यथा-ता मे जराय्वजरम् । अमरम् । अमित्रमर्दय । श्रवो देवेष्वमृतम् । नञ्के उत्तर न होनेपर यथा-ब्राह्मणमित्रः । जरादि शब्द न होनेपर यथा-अशत्रुः । (जरणं जरः "ऋदोरप्" । मरणं मरः न मरणम्=अमरम् इसी निपातनसे अप् । मित्रम् ञिमिदा धातुसे "अमिचिमिदिशसिभ्यः क्रः" "मृतम्" यहां "नपुंसके भावे क्तः"। सूत्रमें शब्द परत्व होनेसे पुँल्लिंग पढा है)॥

३८५१ सोर्मनसी अलोमोषसी । ६ । २ । ११७ ॥

सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाद्युदात्तं स्यात् । नञ्सुभ्यामित्यस्यापवादः । सुकर्माणः सुयुजः । स नो वक्षदनिमानः सुवत्मा । शिवा पशुभ्यः सुमनाः सुवर्चाः । सुपेशसस्करति । सोः किम् । कृतकर्मा । मनसी किम् । सुराजा । अलोमोषसी किम् । सुलोमा। सुषाः । कपि तु परत्वात्कपि पूर्वमिति भवति । सुकर्मकः । सुस्रोतस्कः ॥

३८५१-बहुव्रीहि समासमें सु शब्दके परवर्त्ती लोमन् और उषस् शब्दभिन्न मन्नन्त और असन्त शब्दको आद्युदात्त स्वर हो, यह सूत्र " नञ्सुभ्याम् ३९०६ " सूत्रका बाधक है, यथा-सुकर्म्माणः सुयुजः । स नो वक्षदनिमानः सुवत्मा शिवा पशुभ्यः सुमनाः सुवर्चाः।सुपेशसस्करति। सु शब्दके उत्तर न होनेपर कैसा होगा ? तो कृतकर्मा । 'मनसी' क्योंकहा ? तो "सुराजा"यहां न हो लोमन् और उषस् शब्द होनेपर कैसा होगा, तो सुलोमा । सुषाः । कप् प्रत्यय परे रहते तो परत्वके कारण "कपि पूर्वम्" इस सूत्रसे पूर्वपदको आद्युदात्त होगा, यथा-सुकर्म्मकः । सुस्रोतस्कः ॥

३८५२ क्रत्वादयश्च । ६ । २ । ११८ ॥

सोः परे आद्युदात्ताः स्युः । साम्राज्याय सुक्रतुः । सुप्रतीकः। सुहव्यः।सुप्रतूर्तिमनेहसम्॥

३८५२-बहुव्रीहिसमासमें सु शब्दके परवर्त्ती क्रतुआदि शब्द आद्युदात्त हो, यथा-साम्राज्याय सुक्रतुः । सुप्रतीकः । सुहव्यः । सुप्रतूर्तिमनेहसम् ॥

३८५३ आद्युदात्तं द्व्यच् छन्दसि । ६ । २ । ११९ ॥

यदाद्युदात्तं द्व्यच् तत्सोरुत्तरं बहुव्रीहावाद्युदात्तम् । अधा स्वश्वाः । सुरथाँ आतिथिग्वे । नित्स्वरेणाश्वरथावाद्युदात्तौ । आद्युदात्तं किम् । यासुबाहुः । द्व्यच् किम् । सुगुरसत्सुहिरण्यः । हिरण्यशब्दस्त्र्यच् ॥

३८५३-वेदमें सु शब्दके परवर्त्ती जो द्विस्वरयुक्त आद्युदात्त शब्द उसको बहुव्रीहि समासमें आद्युदात्त स्वर हो, यथा-अधा स्वश्वाः । सुरथाँ आतिथिग्वे । नित्स्वरसे अश्व और रथ शब्द आद्युदात्त हैं । आद्युदात्त न होनेपर यथा-यासुबाहुः । द्व्यच् न होनेपर कैसा होगा ? तो 'सुगुरसत्सुहिरण्यः' इस स्थलमें हिरण्य तीन स्वरसे युक्त है ॥

३८५४ वीरवीर्यौ च । ६ । २ । १२० ॥

सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ । सुवीरेण रयिणा । सुवीर्यस्य गोमतः । वीर्यशब्दो यत्प्रत्ययान्तः । तत्र यतोऽनाव इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥

३८५४-बहुव्रीहिसमासमें सु शब्दके परवर्त्ती वीर और वीर्य्य शब्दको आद्युदात्त स्वर हो,वेदमें यथा-सुवीरेण रयिणा। सुवीर्य्यस्य गोमतः । वीर्य्य शब्द यत् प्रत्ययान्त है, इस स्थलमें " यतोऽनावः ३७०१ " इस सूत्रसे आद्युदात्तस्वर नहीं हो, यह ज्ञापनके लिये वीर्य्य शब्दका ग्रहण है, नहीं तो पूर्व सूत्रसे ही सिद्ध होनेपर वीर्य्यग्रहण व्यर्थ ही होजाता ॥

३८५५ कूलतीरतूलमूलशालाऽक्षसममव्ययीभावे । ६ । २ । १२१ ॥

उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिष्वेते । कूलादिग्रहणं किम्। उपकुम्भम् । अव्ययीभावे किम् । परमकूलम् ॥

३८५५-अव्ययीभाव समासमें उत्तरपदभूत कूल, तीर, तूल, मूल, शाल, अक्ष और सम शब्दको आद्युदात्त स्वर हो, यथा-उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिमें उपकूलादि शब्द पठित हैं । कूलादि शब्द परे न रहते यथा-उपकुम्भम् । अव्ययीभाव समास न होनेपर यथा-परमकूलम् ॥

३८५६ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ । ६ । २ । १२२ ॥

द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । द्विगौ किम् । परमकंसः ॥

३८५६-द्विगु समासमें उत्तरपदभूत कंस, मन्थ, शूर्प, पाय्य और काण्ड शब्दको आद्युदात्त स्वर हो, यथा-द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । द्विगु समास न होनेपर यथा-परमकंसः । 'द्विकंसः' यहां द्वाभ्यां कंसाभ्यां क्रीतः, इस विग्रहमें " कंसाट्टिठन् " इससे टिठन् प्रत्यय, " अध्यर्द्धपूर्वा० " इससे लुक् । " द्विशूर्पः " यहां "शूर्पादञन्यतरस्याम्" इससे अञ् । द्विकाण्डम् द्वे काण्डे प्रमाणमस्य, इस विग्रहमें "प्रमाणे द्वयसच्० १८३८" इससे मात्रच् "प्रमाणे लो द्विगोर्नित्यम्" इससे लुक् ॥

३८५७ तत्पुरुषे शालायां नपुंसके । ६ । २ । १२३ ॥

शालाशब्दान्ते तत्पुरुषे नपुंसकलिंगे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । तत्पुरुषे किम्। दृढशालं ब्राह्मणकुलम् । शालायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । ब्राह्मणशाला ॥

३८५७-शाला शब्द अन्तमें है, ऐसा क्लीबलिङ्ग तत्पुरुषसमासमें उत्तरपद आद्युदात्त हो, यथा-ब्राह्मणशालम्। तत्पुरुष न होनेपर यथा-दृढशालम्, ब्राह्मणकुलम् । शाला

शब्द अन्तमें न होनेपर यथा—ब्राह्मणसेनम् । क्लीबलिङ्गक न होनेपर यथा—ब्राह्मणशाला ॥

३८५८ कन्था च । ६ । २ । १२४ ॥

तत्पुरुषे नपुंसकलिंगे कन्थाशब्द उत्तरपदमाद्युदात्तम्। सौशमिकन्थम् । आह्वरकन्थम् । नपुंसके किम् । दाक्षिकन्था ॥

३८५८—कन्था शब्दान्त क्लीबलिङ्गक तत्पुरुषसमासमें उत्तरपद आद्युदात्त हो, यथा—सौशमिकन्थम् । आह्वरकन्थम्। क्लीबलिङ्गक न होनेपर यथा—दाक्षिकन्था ॥

३८५९ आदिश्चिहणादीनाम् ६।२।१२५।

कन्थान्ते तत्पुरुषे नपुंसकलिंगे चिहणादीनामादिरुदात्तः। चिहणकन्थम् । मदुरकन्थम्। आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् ॥

३८५९—कन्था शब्दान्त क्लीबलिङ्गक तत्पुरुषसमासमें चिहणादि शब्दका आदि उदात्त हो, यथा—चिहणकन्थम् । मदुरकन्थम् । पूर्व सूत्रसे आदि शब्दकी अनुवृत्ति आनेपर भी पुनर्वार आदि शब्दका ग्रहण पूर्वपदके आद्युदात्तार्थ है ॥

३८६० चेलखेटकटुककाण्डं गर्हायाम् । ६ । २ । १२६ ॥

चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम्। नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां गर्हा। व्याघ्रादित्वात्समासः । गर्हायां किम् । परमचेलम् ॥

३८६०—तत्पुरुषसमासमें निन्दा गम्य होनेपर उत्तरपदभूत चेलादि अर्थात् चेल, खेट, कटुक और काण्ड शब्दका आदि उदात्त हो, यथा—पुत्रचेलम । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिका सादृश्यसे पुत्रादिकी गर्हा (निन्दा) होती है । इस स्थलमें व्याघ्रादित्वके कारण समास हुआहै । गर्हा न होनेपर यथा—परमचेलम् ॥

३८६१ चीरमुपमानम् ।६।२ । १२७ ॥

वस्त्रं चीरमिव वस्त्रचीरम् । कम्बलचीरम् । उपमानं किम् । परमचीरम् ॥

३८६१—तत्पुरुषमें उपमानवाचक उत्तरपदभूत चीर शब्दका आदि उदात्त हो, यथा—वस्त्रं चीरमिव=वस्त्रचीरम् । कम्बलचीरम् । उपमानवाचक न होनेपर कैसा होगा ? तो परमचीरम् ॥

३८६२ पललसूपशाकं मिश्रे । ६ । २ । १२८ ॥

घृतपललम् । घृतसूपः । घृतशाकम् । भक्ष्येण मिश्रीकरणमिति समासः । मिश्रे किम् परमपललम् ॥

३८६२—मिश्रवाची तत्पुरुषसमासमें उत्तरपदभूत पलल, सूप और शाक शब्दका आदि उदात्त हो, यथा—घृतपललम् । घृतसूपः । घृतशाकम् । इस स्थलमें "भक्ष्येण मिश्रीकरणम् ६९७" इससे समास हुआहै । मिश्रवाचक न होनेपर यथा—परमपललम् । (घृतेन मिश्रं पललम्=घृतपललम् । इत्यादि) ॥

३८६३ कूलसूदस्थलकर्षाः संज्ञायाम् । ६ । २ । १२९ ॥

आद्युदात्तास्तत्पुरुषे । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । ग्रामसंज्ञा एताः । संज्ञायां किम् । परमकूलम् ॥

३८६३—तत्पुरुषसमासमें संज्ञा होनेपर उत्तरपदभूत कूल, सूद, स्थल और कर्ष शब्दका आदि उदात्त हो, यथा—दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । यह सब ग्रामवाची हैं । संज्ञा न होनेपर यथा—परमकूलम् ॥

३८६४ अकर्मधारये राज्यम् । ६ । २ । १३० ॥

कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । अकेति किम् । परमराज्यम् ॥ चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन ॥ * ॥ कुचेलम् । कुराज्यम् ॥

३८६४—कर्मधारयवर्जित तत्पुरुषसमासमें उत्तरपदभूत राज्य शब्दका आदि उदात्त हो, यथा—ब्राह्मणराज्यम् । कर्मधारय होनेपर कैसा होगा ? तो परमराज्यम् ॥

चेलराज्यादिस्वरको बाधकर पूर्वविप्रतिषेधसे अव्ययस्वर हो* कुचेलम् । कुराज्यम् ॥

३८६५ वर्ग्यादयश्च । ६ ।२ । १३१ ॥

अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । अकर्मधारय इत्येव । परमवर्ग्यः । वर्ग्यादिर्दिगाद्यन्तर्गणः ॥

३८६५—तत्पुरुषसमासमें उत्तरपदभूत वर्ग्य आदि शब्दोंका आदि उदात्त हो, यथा—अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । कर्मधारय भिन्न ही तत्पुरुषसमासमें होगा, इससे यहां न हुआ, यथा—परमवर्ग्यः । वर्ग्यादि दिगाद्यन्तर्गण है ॥

३८६६ पुत्रः पुम्भ्यः । ६ । २। १३२ ॥

पुमशब्देभ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे । दाशकिपुत्रः । माहिषपुत्रः । पुत्रः किम् । कौनटिमातुलः । पुम्भ्यः किम् । दाक्षीपुत्रः ॥

३८६६—तत्पुरुषसमासमें पुम् शब्दके परवर्ती पुत्र शब्दका आदि उदात्त हो, यथा—दाशकिपुत्रः । माहिषपुत्रः । पुत्र शब्द परे न होनेपर कैसा होगा? तो कौनटिमातुलः । पुम् शब्दके परे न होनेपर यथा—दाक्षीपुत्रः ॥

३८६७ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । ६ । २ । १३३ ॥

एभ्यः पुत्रो नाद्युदात्तः । आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च ग्रहणम् । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्ताः सम्बन्धिनः । श्यालपुत्रः। ज्ञातयो मातापितृसम्बन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः ॥

३८६७-तत्पुरुष समासमें आचार्य्य, राज, ऋत्विक् संयुक्त और ज्ञातिवाचक शब्दोंके उत्तर स्थित पुत्र शब्दका आदि वर्ण उदात्त न हो, सूत्रमें आख्या शब्दका ग्रहण करनेसे आचार्य्यादि शब्द और तत्पर्य्यायवाचक शब्द और तद्विशेष सबहीका ग्रहण होताहै, यथा-आचार्य्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्त शब्दसे संबन्धी समझना, यथा-श्यालपुत्रः । ज्ञाति शब्दसे पितृ और मातृसंबन्धीय बान्धव समझना । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । कस्कादिमें पाठ होनेसे षत्व ॥

३८६८ चूर्णादीन्यप्राणिषष्ठ्याः । ६ । २ । १३४ ॥

एतानि प्राणिभिन्नषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे । मुद्गचूर्णम् । अप्रेति किम् । मत्स्यचूर्णम् ॥

३८६८तत्पुरुष समासमें अप्राणिवाचक षष्ठ्यन्त पदके उत्तर स्थित चूर्णादि शब्दोंका आदि वर्ण उदात्त हो, मुद्गचूर्णम् । अप्राणिवाचक शब्द न होनेपर यथा-मत्स्यचूर्णम् । चूर्ण=पचाद्यच् ॥

३८६९ षट् च काण्डादीनि।६।२।१३५॥

अप्राणिषष्ठ्या आद्युदात्तानि । दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम् । षट् किम् । राजसूदः । अप्रेति किम् । दत्तकाण्डम् ॥

३८६९-तत्पुरुष समासमें अप्राणीवाचक षष्ठ्यन्त पदके उत्तर स्थित काण्डादि छः शब्दोंका आदि वर्ण उदात्त हो, यथा-दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम्। "चेलखेट०" सूत्रसे "कूलसूद०" इत्यादि सूत्रस्थ कूल शब्दपर्य्यन्त छः शब्द न होनेपर राजसूदः। प्राणिवाचक होनेपर यथा-दत्तकाण्डम् ॥

३८७० कुण्डं वनम् । ६ । २ । १३६ ॥

कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे । दर्भकुण्डम् । कुण्डशब्दोत्र सादृश्ये । वनं किम् । मृत्कुण्डम् ॥

३८७०-वनवाचक तत्पुरुष समासमें कुण्ड शब्द आद्युदात्त हो, यथा-दर्भकुण्डम् । इस स्थलमें कुण्ड शब्दसे सादृश्य समझना । वनवाचक न होनेपर, यथा-मृत्कुण्डम् (भाजनविशेष) ॥

३८७१ प्रकृत्या भगालम् ।६।२।१३७॥

भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या । कुम्भीभगालम्।कुम्भीनदालम् । कुम्भीकपालम् । मध्योदात्ता एते प्रकृत्येत्यधिकृतमन्त इति यावत् ॥

३८७१-तत्पुरुष समासमें भगाल अर्थात् नरकपालवाचक उत्तर पदको प्रकृतिस्वर हो, यथा-कुम्भीभगालम् । कुम्भीनदालम् । कुम्भीकपालम् । यह मध्योदात्त हैं, इस सूत्रसे (३८७७) अन्तः सूत्रतक प्रकृतिस्वराधिकार जानना अर्थात् प्रकृतिस्वर होगा ॥

३८७२ शितेर्नित्याऽबह्वज्बहुव्रीहावभसत् । ६ । २ । १३८ ॥

शितेः परं नित्याबह्वच्कं प्रकृत्या । शितिपादः । शित्यंसः।पादशब्दो वृषादित्वादाद्युदात्तः अंसशब्दः प्रत्ययस्य नित्त्वात् । शितेः किम्।दर्शनीयपादः । अभसत्किम् । शितिभसत् । शितिराद्युदात्तः।पूर्वपदप्रकृतिस्वरापवादोयं योगः॥

३८७२-बहुव्रीहि समासमें शिति शब्दके उत्तर स्थित नित्यबहुस्वरविशिष्ट न हो ऐसे (एकस्वरविशिष्ट) शब्दको प्रकृतिस्वर हो, भसत् शब्दको न हो, यथा-शितिपादः । शित्यंशः । पाद शब्द वृषादित्वके कारण आद्युदात्त हुआ । अंस शब्द प्रत्ययके नित्त्वके कारण आद्युदात्त है । शिति शब्दके उत्तर न होनेपर यथा-दर्शनीयपादः । भसत् शब्द होनेपर यथा-शितिभसत् । शिति शब्द आद्युदात्त है । पूर्वपदप्रकृतिस्वरापवाद यह सूत्र है । अम्+सन् । अंशः ॥

३८७३ गतिकारकोपपदात्कृत । ६ । २ । १३९ ॥

एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे । प्रकारकः । प्रहरणम् । शोणा धृष्णू नृवाहसा । इध्मप्रव्रश्चनः । उपपदात् । उच्चैःकारम्।ईषत्करः। गतीति किम् । देवस्य कारकः । शेषे षष्ठी । कृद्ग्रहणं स्पष्टार्थम् । प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृते आम् । तत्र सतिशिष्टत्वादामस्स्वरो भवतीत्येके । प्रपचतिदेश्यार्थं तु कृद्ग्रहणमित्यन्ये ॥

३८७३-तत्पुरुष समासमें गतिसंज्ञक शब्द, कारक औ उपपदके उत्तर कृत्प्रत्ययान्त पदको प्रकृतिस्वर हो, यथा-प्रकारकः । प्रहरणम् । "शोणाधृष्णू नृवाहसा"। इध्मप्रव्रश्चनः (ल्युट) उपपद यथा- उच्चैःकारम् (णमुल) ईषत्करः ।

(३३०५) इससे खल् गतिसंज्ञकके उत्तर न होनेपर यथा-देवस्य कारकः । शेषे षष्ठी इस स्थलमें कृत् पदका ग्रहण स्पष्टार्थ है, प्रपचतितराम् । इस स्थलमें तरबादि प्रत्ययान्त पदके साथ समास करनेपर आम् हुआ है । उस स्थलमें सतिशिष्टत्वके कारण आम् प्रत्ययको स्वर होता है, ऐसा कोई २ कहते हैं ॥

३८७४ उभे वनस्पत्यादिषु युगपत्। ६ । २ । १४० ॥

एषु पूर्वोत्तरपदे युगपत्प्रकृत्या । वनस्पतिं वन आ । बृहस्पतिं यः । बृहच्छब्दोऽत्राद्युदात्तो निपात्यते । हर्षया शचीपतिम् । शार्ङ्गरवादित्वादाद्युदात्तः शचीशब्दः । शचीभिर्न इति दर्शनात् । तनूनपादुच्यते । नराशंसं वाजिनम् । निपातनाद्दीर्घः । शुनःशेपम् ॥

३८७४-तत्पुरुष समासमें वनस्पति आदि शब्दोंमें पूर्व पद और उत्तरपद दोनोंको ही एक कालमें प्रकृतिस्वर हो, यथा-वनस्पतिं वन आ । बृहस्पतिं यः । इस स्थलमें बृहत् शब्द निपातनसे आद्युदात्त होगा । हर्षया शचीपतिम् । शार्ङ्गरवादित्वके कारण शची शब्द आद्युदात्त है, कारण कि, शचीभिर्न ऐसा प्रयोग दीखता है । तनूनपात् । नराशंसं वाजिनम् । निपातनसे दीर्घ हुआ है । शुनःशेपम् । पति= पा+डति नराशंसम् नरा एनं शंसन्ति, नृ+कर्ममें घञ् । शुनः-शेपम् शुन इव शेपोस्येति बहुव्रीहिः "शेपपुच्छलाङ्गूलेषु शुनः" । इससे षष्ठीका अलुक् ॥

३८७५ देवताद्वन्द्वे च । ६ । २ । १४१ ॥

उभे युगपत्प्रकृत्या स्तः । आप इन्द्रावरुणौ । इन्द्राबृहस्पती वयम् । देवता किम् । प्लक्षन्यग्रोधौ । द्वन्द्वे किम् । अग्निष्टोमः ॥

३८७५-देवतावाचक शब्दोंके द्वन्द्व समासमें पूर्व और उत्तर दोनों पदोंको एक कालमें प्रकृतिस्वर हो, यथा-आप इन्द्रावरुणौ । इन्द्रा बृहस्पती वयम् । देवतावाचक न होनेपर यथा-प्लक्षन्यग्रोधौ । द्वन्द्व न होनेपर यथा-अग्निष्टोमः (९२४) । वरुणः "कृवृदारिभ्य उनन्" इससे वृ+उनन् । "देवताद्वन्द्वे च" इससे पूर्व पदको आनङ् ॥

३८७६ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु । ६ । २ । १४२ ॥

पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न । इन्द्राग्निभ्यां कंवृषणः । अपृथिव्यादौ किम् । द्यावापृथिवी जनयत् । आद्युदात्तो द्यावा निपात्यते । पृथिवीत्यन्तोदात्तः । रुद्रसोमौ । रोदेर्णिलुक्चेति रगन्तो रुद्रशब्दः । इन्द्रापूषणौ । श्वन्नुक्षन्पूषन्निति पूषा अन्तोदात्तो निपात्यते । शुक्रामन्थिनौ । मन्थिन्निनन्तत्वादन्तोदात्तः । उत्तरपदग्रहणमनुदात्तादावित्युत्तरपदविशेषणं यथा स्यात् द्वन्द्वविशेषणं मा भूत् । अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम् ॥

३८७६-देवतावाचक शब्दके द्वन्द्व समासमें पृथिवी, रुद्र, पूष और मन्थि शब्दभिन्न अन्य अनुदात्त स्वर आदिमें है जिसके ऐसा पद परे रहते प्रागुक्त कार्य न हो, यथा-इन्द्राग्निभ्यां कंवृषणः । पृथिव्यादि शब्द अन्तमें होनेपर यथा-(ऋ० ८ । २ । १३) द्यावापृथिवी जनयन् । द्यावा शब्द निपातनसिद्ध आद्युदात्त है, पृथिवी शब्द अन्तोदात्त है, रुद्रसोमौ "रोदेर्णिलुक् च" इस सूत्रसे रक् प्रत्यय हुआ है। इन्द्रापूषणौ। 'श्वन्नुक्षन्पूषन्'इस सूत्रसे पूषन् शब्द अन्तोदात्त निपातित है, शुक्रामन्थिनौ अन्नन्त होनेसे अन्तोदात्त है । उत्तर पदका ग्रहण 'अनुदात्तादौ'इस उत्तर पदका विशेषण हो । द्वन्द्वका विशेषण न हो, इस लिये है । उसी प्रकार इस प्रयोगसे विधि और प्रतिषेध दोनों विषयका ही विभाग हो इस लिये है ॥

३८७७ अन्तः । ६ । २ । १४३ ॥

अधिकारोऽयम् ॥

३८७७-" अन्तः " यह अधिकारसूत्र है, अर्थात् इस सूत्रसे अन्तोदात्त स्वरका अधिकार चलैगा ॥

३८७८ थाऽथघञ्क्ताऽजऽबित्रकाणाम् । ६ । २ । १४४ ॥

थ अथ घञ् क्त अच् अप् इत्र क एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः । प्रभृथस्यायोः । आवसथः । घञ् । प्रभेदः । क्त । धर्ता वज्री पुरुष्टुतः । पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः । अच् । प्रक्षयः । अप् । प्रलवः । इत्र । प्रलवित्रम् । क । गोवृषः । मूलविभुजादित्वात्कः । गतिकारकोपपदादित्येव । सुस्तुतं भवता ॥

३८७८-गतिकारक और उपपदके उत्तर स्थित थ, अथ, घञ्, क्त, अच्, अप्, इत्र, क शब्द अन्तमें है ऐसे शब्दका अन्त वर्ण उदात्त हो, यथा-प्रभृथस्यायोः । थ-आवसथः । घञ्-प्रभेदः । क्त-धर्ता वज्री पुरुष्टुतः । पुरुषु अर्थात् बहुप्रदेशेषु स्तुत इस विग्रहमें पुरुष्टुतः पद सिद्ध हुआ है । अच्-प्रक्षयः । अप्-प्रलवः । इत्र-प्रलवित्रम् । क-गोवृषः । इस स्थलमें मूलविभुजादित्वके कारण क प्रत्यय हुआ है । गतिकारकोपपदके उत्तर ही होगा, अन्यत्र नहीं होगा, यथा-सुस्तुतं भवता ॥

३८७९ सूपमानात् क्तः । ६ । २ । १४५ ॥

सोरुपमानाच्च परं क्तान्तमन्तोदात्तम् । ऋतस्य योनौ सुकृतस्य । शशप्लुतः ॥

३८७९-सु शब्द और उपमानवाचक शब्दके उत्तर क्त प्रत्ययान्त पदका अन्त वर्ण उदात्त हो, यथा-ऋतस्य योनौ सुकृतस्य, शशप्लुतः । शश इव प्लुतः=शशप्लुतः ॥

३८८० संज्ञायामनाचितादीनाम् । ६ । २ । १४६ ॥

गतिकारकोपपदात् क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा । उपहूतः शाकल्यः । परिजग्धः । कौण्डिन्यः । अनेति किम् । आचितम् । आस्थापितम् ॥

३८८०–गतिकारकोपपदके उत्तर क्तप्रत्ययान्त पदका अन्त वर्ण उदात्त हो आचितादि शब्दोंको न हो, यथा–उपहूतः । शाकल्यः । परिजग्धः । कौण्डिन्यः । अनाचितादीनाम् इस पदको सूत्रमें क्यों किया ? आचितम् । आस्थापितम् । यहां भी अन्तोदात्त होजायगा। परिजग्धः=अदको जग्धादेश। आचितम्=चिञ्+क्त । आस्थापितम्=ष्ठा+णिच्+क्त ॥

३८८१ प्रवृद्धादीनां च । ६ ।२।१४७॥

एषां क्तान्तमुत्तरपदमन्तोदात्तम् । प्रवृद्धः । प्रयुक्तः।असंज्ञार्थोऽयमारम्भः।आकृतिगणोऽयम्॥

३८८१–प्रवृद्धादिशब्दोंके क्त प्रत्ययान्तका अन्त वर्ण उदात्त हो, यथा–प्रवृद्धः । प्रयुक्तः । असंज्ञार्थ यह सूत्र है । प्रवृद्धादि आकृतिगण है ॥

३८८२ कारकाद्दत्तश्रुतयोरेवाशिषि। ६ । २ । १४८ ॥

संज्ञायामन्त उदात्तः । देवदत्तः । विष्णुश्रुतः । कारकात्किम् । संभूतो रामायणः । अस्मान्नियमादत्र संज्ञायामनेति न । दत्तश्रुतयोः किम् । देवपालितः । तृतीयाकर्मणीति तु भवति । एव किम् । कारकावधारणं यथा स्याद् दत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति । संश्रुतः । आशिषि किम् । दैवैः खाता देवखाता । आशिष्येवेत्येवमत्रेष्टो नियमः । तेनानाहतो नदति देवदत्त इत्यत्र न । शङ्खविशेषस्य संज्ञेयम् । तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरत्वमेव भवति।

३८८२–तत्पुरुष समासमें आशीर्वादार्थमें संज्ञा होनेपर कारकके उत्तर दत्त और श्रुत शब्दका अन्त वर्ण उदात्त हो, यथा–देवदत्तः । विष्णुश्रुतः । कारकके उत्तर न होनेपर यथा–संभूतो रामायणः । दत्त और श्रुत शब्द न होनेपर यथा–देवपालितः। इस नियमके कारण इस स्थलमें "संज्ञायामनाचिता० ३८८० ,, इत्यादि पूर्ववर्त्ती सूत्रसे नहीं होगा । तो " तृतीया कर्म्मणि ३७८२" इस सूत्रसे होगा, एव ग्रहण क्यों किया ऐसा कहो तो कारकावधारण हो, दत्तश्रुतावधारण न हो, इसलिये है । कारक उत्तर न होनेपर भी दत्त और श्रुत शब्दका अन्त वर्ण उदात्त हो, यथा–संश्रुतः । आशीर्वाद न होनेपर यथा–दैवैः खाता देवखाता । इस स्थलमें आशीर्वादार्थमें ही होगा, ऐसा ही नियम इष्ट अर्थात् अभिप्रेत है, इस कारण अनानाहतो नदति देवदत्तः । इस स्थलमें नहीं हुआ । देवदत्त शब्दसे शंखविशेषकी संज्ञा अर्थात् नाम जानना । " तृतीया कर्म्मणि ३७८२ " इस सूत्रसे पूर्वपद प्रकृतिस्वर ही होता है । देवदत्तः=देवा एनं देयासुरित्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः "आशिषि लिङ्लोटौ" " क्तिच्क्तौ च संज्ञायाम् " इससे क्त, " दो दद्घोः" इससे दथ्आदेश । विष्णुश्रुतः=विष्णुरेनं श्रूयादित्येवं प्रार्थिते विष्णुना श्रुतः विष्णुश्रुतः ॥

३८८३ इत्थम्भूतेन कृतमिति च । ६ । २ । १४९ ॥

इत्थम्भूतेन कृतमित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात् । सुप्तप्रलपितम् । प्रमत्तगीतम् । कृतमिति क्रियासामान्ये करोतिर्नाभूतप्रादुर्भाव एव । तेन प्रलपिताद्यपि कृतं भवति । तृतीया कर्मणीत्यस्यापवादः ॥

३८८३–" इत्थंभूतेन कृतम् " इस अर्थमें जो समास हो, उस समासमें क्तप्रत्ययान्त जो उत्तर पद उसका अन्त वर्ण उदात्त हो, सुप्तप्रलपितम् । प्रमत्तगीतम् । कृत पद क्रियासामान्यमें है, करोति अभूतप्रादुर्भावार्थमें ही नहीं है । इसी कारण प्रलपितादि भी कृत हुए हैं । यह " तृतीया कर्म्मणि (३७८३) " इस सूत्रका अपवाद है ॥

३८८४ अनो भावकर्मवचनः । ६ । २ । १५० ॥

कारकात्परमनप्रत्ययान्तं भाववचनं कर्मवचनं चान्तोदात्तम् । पयःपानं सुखम् । राजभोजनाः शालयः । अनः किम् । हस्तादायः । भेति किम् । दन्तधावनम् । करणे ल्युट् । कारकात्किम् । निदर्शनम् ॥

३८८४–तत्पुरुष समासमें कारकके उत्तर भाववचन और कर्म्मवचन अनप्रत्ययान्त शब्दका अन्त वर्ण उदात्त हो, यथा–पयःपानम् सुखम् । राजभोजनाः शालयः । अन प्रत्ययान्त न होनेपर यथा–हस्तादायः । भाववचन और कर्मवचन न होनेपर यथा–दन्तधावनम् इस स्थलमें करणमें ल्युट् अर्थात् अन हुआ है । कारकके उत्तर न होनेपर यथा–निदर्शनम् ॥

३८८५ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ६।२।१५१॥

कारकात्पराणि एतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे । कृत्स्वरापवादः । रथवर्त्म । पाणिनिकृतिः । छन्दोव्याख्यानम् । राजशयनम् । राजासनम् । अश्वस्थानम् । ब्राह्मण-

याजकः। गोक्रीतः। कारकात्किम् । प्रभूतौ सङ्गतिम् । अत्र तादौ च नितीति स्वरः ॥

३८८५-तत्पुरुष समासमें कारकके उत्तर मन और क्तिन्प्रत्ययान्त शब्द व्याख्यान, शयन, आसन, स्थान और याजकादि गण और क्रीत शब्दके अन्त वर्णको उदात्त स्वर हो, यह कृत् स्वरका अपवाद है यथा-रथवर्त्म। पाणिनिकृतिः। छन्दोव्याख्यानम् । राजशयनम् । राजासनम् । अश्वस्थानम् । ब्राह्मणयाजकः । गोक्रीतः । कारकके उत्तर न होनेपर यथा-प्रभूतौ सङ्गतिम् । इस स्थलमें " तादौ च निति ३७८४ " इस सूत्रसे प्रकृतिस्वर होगा । व्याख्यानम=करणमें ल्युट् हुआ। कृति+कृ+क्तिन् ॥

३८८६ सप्तम्याः पुण्यम् । ६।२।१५२॥

अन्तोदात्तम् । अध्ययनपुण्यम् । तत्पुरुषे तुल्यार्थे इति प्राप्तम् । सप्तम्याः किम् । वेदेन पुण्यं वेदपुण्यम् ॥

३८८६-सप्तमी तत्पुरुष समासमें पुण्य शब्दका अन्त वर्ण उदात्त हो, यथा-अध्ययनपुण्यम् (३७३६) की प्राप्ति है, सप्तमी तत्पुरुष न होनेपर यथा-वेदेन पुण्यम्,इस विग्रहमें वेदपुण्यम् ऐसा होगा ॥

३८८७ ऊनार्थकलहं तृतीयायाः । ६ । २ । १५३ ॥

माषोनम् । माषविकलम् । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादोऽयम् । अत्र केचिदर्थेति स्वरूपग्रहणमिच्छन्ति । धान्यार्थः । ऊनशब्देन त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम्॥

३८८७-तृतीयान्तके उत्तर तत्पुरुष समासमें ऊनार्थ शब्द और कलह शब्दका अन्त वर्ण उदात्त हो, यथा-माषोनम् । माषविकलम् । वाक्कलहः । यह सूत्र तृतीया पूर्वपद प्रकृति स्वरका अपवाद है । इस सूत्रमें कोई २ अर्थ शब्दसे स्वरूप ग्रहण करतेहैं । यथा, धान्यार्थः। ऊन शब्दद्वारा अर्थ निर्देशके कारण तदर्थकका ही ग्रहण होगा । इस सूत्रसे प्रतिपदोक्तत्वके कारण तृतीयान्तके ऊनार्थादि शब्दोंके अन्त वर्ण का उदात्त सिद्ध होनपर सूत्रमें तृतीयाग्रहण स्पष्टार्थ है ॥

३८८८ मिश्रं चानुपसर्गमसन्धौ । ६ । २ । १५४ ॥

पणबन्धेनैकार्थ्यं सन्धिः । तिलमिश्राः । सर्पिर्मिश्राः । मिश्रं किम् । गुडधानाः। अनुपसर्गं किम् । तिलसंमिश्राः । मिश्रग्रहणे सोपसर्गग्रहणस्येदमेव ज्ञापकम् । असन्धौ किम् । ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः ॥

३८८८-तृतीयान्तके उत्तर संधि अर्थात् पणबन्धद्वारा एकार्थ न होनेपर उपसर्ग पूर्वमें नहीं अर्थात् उपसर्गके उत्तर न होकर अन्य शब्दके उत्तर होनेपर मिश्र शब्दका अन्त वर्ण उदात्त हो, (पणबन्धन द्वारा ऐकार्थ्य अर्थात् जो आप मेरा यह कार्य करोगे तो मैं आपका यह कार्य करूंगा यह पणबन्ध है इसको सन्धि कहते हैं) । यथा-तिलमिश्राः(६९३) सर्पिर्मिश्राः । मिश्र होनेपर गुडधानाः (६९७) ऐसा होगा, उपसर्ग होनेपर तिलसंमिश्राः ऐसा होगा । मिश्र शब्दका ग्रहण करनेसे सोपसर्गका भी ग्रहण होताहै । संधि होनेपर यथा-ब्राह्मणमिश्रो राजा ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः । ब्राह्मणमिश्रो राजा=जो आप मेरा यह कार्य करोगे तो मैं आपका यह कार्य करूंगा इस पणबन्ध करके ब्राह्मणोंके साथ मिलाहुआ दूसरे लोग तो स्वरूपभेदग्रहण करनेको संधि कहते हैं ब्राह्मणमिश्रः इस प्रयोगमें ब्राह्मणोंमें एकीभावको प्राप्त हुआ भी राजा स्वरूपसे जानाजाताहै ॥ गुडमिश्रः इस प्रयोगमें गुडसे एकीभूत होनेसे स्वरूपका भेद न होगा ॥

३८८९ नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिताः । ६ ।२।१५५॥

सम्पाद्याद्यर्थतद्धितान्तान्नञो गुणप्रतिषेधे वर्तमानात्परेऽन्तोदात्ताः । कर्णवेष्टकाभ्यां संपादि कार्णवेष्टकिकम् । न कार्णवेष्टकिकमकार्णवेष्टकिकम् । छेदमर्हति छैदिकः । न छैदिकोऽच्छैदिकः। न वत्सेभ्यो हितोऽवत्सीयः । न सन्तापाय प्रभवति असन्तापिकः । नञः किम् । गर्दभरथमर्हति गार्दभरथिकः । विगार्दभरथिकः । गुणप्रतिषेधे किम् । गार्दभरथिकादन्योऽगार्दभरथिकः । गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं सम्पादितत्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति । संपेति किम् । पाणिनीयमधीते पाणिनीयः । न पाणिनीयः अपाणिनीयः । तद्धिताः किम्।वोढुमर्हति वोढा।न वोढाऽवोढा ॥

३८८९-सम्पादिन् अर्थात् सम्पादन, अर्ह अर्थात् योग्यतार्थमें हित और अलमर्थमें विद्यमान जो तद्धितप्रत्ययान्त शब्द वह गुणप्रतिषेधार्थमें वर्तमान जो नञ् उसके उत्तर होनेपर उसका अन्त वर्ण उदात्त हो, यथा-कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकम् । न कार्णवेष्टकिकमकार्णवेष्टकिकम् । छेदमर्हति छैदिकः । न छैदिकोऽच्छैदिकः । न वत्सेभ्यो हितोऽवत्सीयः । न संतापाय प्रभवति असन्तापिकः । नञ्के उत्तर न होनेपर गर्दभरथमर्हति गार्दभरथिकः । विगार्दभरथिकः । गुणप्रतिषेध न होनेपर गार्दभरथिकादन्योऽगार्दभरथिकः । सम्पादित्वादि तद्धितार्थमें प्रवृत्ति निमित्त गुण शब्द करके कहा हुआहै । जिस स्थलमें उसका प्रतिषेध होगा उस स्थानमें ही यह विधि जानना चाहिये । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति । [illegible]दित अर्थ न होनेपर यथा-पाणिनीयमधीते

पाणिनीयः। न पाणिनीयः अपाणिनीयः। तद्धितप्रत्ययान्त न होनेपर यथा–वोढुं अर्हति वोढा। न वोढाऽवोढा इत्यादि। वोढा (२८२२) इससे 'तृच्' "सहिवहोरोदवर्णस्य" इससे ओत्॥

३८९० ययतोश्चाऽतदर्थे।६।२।१५६॥

ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात्परस्यान्त उदात्तः स्यात्। पाशानां समूहः पाश्या। न पाश्या अपाश्या। अदन्त्यम्। अतदर्थे किम्। अपाद्यम्। तद्धितः किम्। अदेयम्। गुणप्रतिषेधे किम्। दन्त्यादन्यददन्त्यम्। तदनुबन्धग्रहणे नातदनुबन्धकस्येति नेह। अवामदेव्यम्॥

३८९०–य और यत् जो तद्धित तदन्त जो उत्तर पद गुणप्रतिषेधविषयीभूत नञ्के उत्तर उसका अन्त वर्ण उदात्त हो, यथा–पाशानां समूहः पाश्या। न पाश्या अपाश्या। अदन्त्यम्। तदर्थ न होनेपर यथा–अपाद्यम्। तद्धित न होनेपर यथा–अदेयम् (२८४२) (२८४३) इत्व होनेसे गुण। गुणप्रतिषेध न होनेपर यथा–दन्त्यादन्यददन्त्यम्। तदनुबन्धक शब्दका ग्रहण करनेसे तदनुबन्धकभिन्नका ग्रहण नहीं होगा, यथा–अवामदेव्यम्॥

३८९१ अच्कावशक्तौ।६।२।१५७॥

अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम्। अपचः। पक्तुमशक्तः। अविलिखः। अशक्तौ किम्। अपचो दीक्षितः। गुणप्रतिषेधे इत्येव। अन्योऽयं पचादपचः॥

३८९१–अशक्ति अर्थ गम्यमान होनेपर नञ्के परे रहते अजन्त और ककारान्त पदका अन्त वर्ण उदात्त हो, यथा–अपचः अर्थात् जो व्यक्ति पाककरनेमें शक्त न हो। अविलिखः। अशक्ति न होनेपर यथा–अपचो दीक्षितः। गुणप्रतिषेधमें ही होगा, यथा–अन्योऽयं पचादपचः। अपचः=पचाद्यच्। अपचो दीक्षितः=इसमें दीक्षित शास्त्रसे विरोध होनेके कारण नहीं पकाता न कि अशक्त होनेसे॥

३८९२ आक्रोशे च।६।२।१५८॥

नञः परावच्कावन्तोदात्तावाक्रोशे। अपचो जाल्मः। पक्तुं न शक्नोतीत्येवमाक्रोश्यते। अविक्षिपः॥

३८९२–आक्रोशार्थमें नञ्के उत्तर अजन्त और कान्त शब्दका अन्त वर्ण उदात्त हो, यथा–अपचो जाल्मः अर्थात् यह व्यक्ति पाक नहीं करसकता इस प्रकार अपमानित होताहै। अविक्षिपः॥

३८९३ संज्ञायाम्।६।२।१५९॥

नञः परमन्तोदात्तं संज्ञायामाक्रोशे। अदेवदत्तः॥

३८९३–आक्रोशार्थमें संज्ञा होनेपर नञ्के उत्तर शब्दका अन्त वर्ण उदात्त हो, यथा–अदेवदत्तः। देवदत्त होनेपर भी अपने योग्य कर्म नहीं करता यह आक्षेप है॥

३८९४ कृत्योकेष्णुच्चार्वादयश्च।६।२।१६०॥

नञः परेऽन्तोदात्ताः स्युः। अकर्तव्यः। उक। अनागामुकः। इष्णुच्। अनलंकरिष्णुः। इष्णुज्ग्रहणे खिष्णुचो ह्यनुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्यात्। अनाढ्यम्भविष्णुः। चार्वादिः। अचारुः। असाधुः॥ राजाह्नोश्छन्दसि॥ अराजा। अनहः। भाषायां नञः स्वर एव॥

३८९४–कृत्यप्रत्ययान्त उक प्रत्ययान्त और इष्णुच् प्रत्ययान्त शब्द और चारु आदि गण नञ्के परे रहते अन्तोदात्त हों, यथा, अकर्त्तव्यः। उक यथा–अनागामुकः। इष्णुच्=अनलंकरिष्णुः। इष्णुच् प्रत्ययका ग्रहण करनेसे दो अनुबन्धविशिष्ट खिष्णुच् प्रत्ययका भी ग्रहण होगा, क्यों कि,इकारादि विधान सामर्थ्यसे खिष्णुच् प्रत्ययका भी ग्रहण होगा। अनाढ्यम्भविष्णुः। चार्वादि यथा–अचारुः। असाधुः। 'राजाह्नोश्छन्दसि' इस सूत्रसे अराजा। अनहः। भाषामें नञ्का जो स्वर वही होगा। साधु कृवापाजि० (उण्)॥

३८९५ विभाषा तृन्नन्नतीक्ष्णशुचिषु।६।२।१६१॥

तृन्। अकर्त्ता। अन्न। अनन्नम्। अतीक्ष्णम्। अशुचि। पक्षे अव्ययस्वरः॥

३८९५–नञ्के परे रहते तृन्प्रत्ययान्त शब्द अन्न, तीक्ष्ण और शुचि शब्दका अन्त वर्ण विकल्प करके उदात्त हो, यथा–तृन्–अकर्त्ता। अन्न–अनन्नम्। अतीक्ष्णम्। अशुचि। विकल्प पक्षमें अव्ययस्वर होगा॥

३८९६ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने।६।२।१६२॥

एभ्योऽनयोरन्त उदात्तः। इदं प्रथममस्य स इदंप्रथमः। एतद्द्वितीयः। तत्पञ्चमः। बहुव्रीहौ किम्। अनेन प्रथम इदंप्रथमः। तृतीयेति योगविभागात्समासः। इदमेतत्तद्भ्यः किम्। यत्प्रथमः। प्रथमपूरणयोः किम्। तानि बहून्यस्य तद्बहुः। क्रियागणने किम्। अयं प्रथमः प्रधानं येषां ते इदंप्रथमाः। द्रव्यगणनमिदम्। गणने किम्। अयं प्रथम एषां ते इदम्प्रथमाः। इदम्प्रधाना इत्यर्थः। उत्तरपदस्य कार्यित्वात्कापि पूर्वमन्तोदात्तम्। इदम्प्रथमकाः॥

बहुव्रीहावित्यधिकारो वनं समास इत्यतः प्राग्बोध्यः ॥

३८९६–क्रियागणनार्थमें बहुव्रीहि समासमें इदम् एतत् और तत् शब्दके उत्तर प्रथम और पूरणवाचक शब्दका अन्त वर्ण उदात्त हो, यथा–"इदं प्रथममस्य" इस विग्रहमें (गणनामें) सः इदं प्रथमः । एतद्द्वितीयः । तत्पञ्चमः । बहुव्रीहि न होनेपर यथा–अनेन प्रथम इदंप्रथमः । इस स्थलमें, "तृतीया० (६९२)" इस भिन्न सूत्रसे तृतीया-तत्पुरुष समासमें सिद्ध हुआहै । इदम् एतत् और तत् शब्दके उत्तर न होनेपर यथा–यत्प्रथमः । प्रथम और पूरणार्थ न होनेपर यथा–तानि बहूनि अस्य इस विग्रहमें तद्बहुः । क्रियागणन न होनेपर यथा–अयंप्रथमः प्रधानं येषां ते इदंप्रथमाः । यह द्रव्यगणन है, क्रियागणन नहीं है।गणनार्थ न होनेपर यथा-अयं प्रथम एषां ते इदंप्रथमाः।अर्थात् यह व्यक्ति इनका प्रधान है, उत्तर पदके कार्यित्वके कारण "कपि पूर्वम्" इस वक्ष्यमाणसूत्रसे वह अन्तोदात्त होगा, यथा–इदंप्रथमकाः । यहांसे "वनं समासे ३९१२" इस सूत्रतक बहुव्रीहिसमासाधिकार चलेगा ॥

३८९७ संख्यायास्तनः।६।२।१६३॥

बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुःस्तना । संख्यायाः किम् । दर्शनीयस्तना । स्तनः किम् । द्विशिराः ॥

३८९७–बहुव्रीहि समासमें संख्यावाचक शब्दके उत्तर स्तन शब्दका अन्त वर्ण उदात्त हो, यथा–द्विस्तना । चतुःस्तना । संख्यावाचक न होनेपर यथा–दर्शनीयस्तना । स्तन शब्द न होनेपर यथा–द्विशिराः ॥

३८९८ विभाषा छन्दसि।६।२।१६४॥

द्विस्तनीं करोति वामदेवः । चतुःस्तनां करोति द्यावापृथिव्योर्दोहनाय ॥

३८९८–वेदमें बहुव्रीहि समासमें संख्यावाचक शब्दके उत्तर स्तन शब्दके अन्त वर्णको विकल्प करके उदात्त स्वर हो, यथा–द्विस्तनीं करोति वामदेवः,।चतुःस्तनां करोति द्यावापृथिव्योर्दोहनाय ॥

३८९९ संज्ञायां मित्राजिनयोः । ६।२।१६५॥

देवमित्रः । कृष्णाजिनम् । संज्ञायां किम् । प्रियमित्रः ॥ ऋषिप्रतिषेधोऽत्र मित्रे ॥ * ॥ विश्वामित्र ऋषिः ॥

३८९९बहुव्रीहि समासमें संज्ञा होनेपर उत्तरपद जो मित्र और अजिन शब्द उनका अन्त वर्ण उदात्त हो, यथा–देवमित्रः । कृष्णाजिनम् । संज्ञा न होनेपर यथा–प्रियमित्रः ॥

मित्र शब्द परे रहते ऋषि अर्थमें उक्त स्वर नहीं होगा * यथा–विश्वामित्र ऋषिः ॥

३९०० व्यवायिनोऽन्तरम्।६।२।१६६॥

व्यवधानवाचकात्परमन्तरमन्तोदात्तम् । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः । व्यवधायिनः किम् । आत्मान्तरः । अन्यस्वभाव इत्यर्थः ॥

३९००–बहुव्रीहि समासमें व्यवधानवाचक शब्दके उत्तर शब्दका अन्त वर्ण उदात्त हो, यथा–वस्त्रमन्तरं व्यवधायकं यस्य इस विग्रहमें वस्त्रान्तरः । व्यवधानवाचक न होनेपर यथा–आत्मान्तरः । अन्यस्वभाव इत्यर्थः ॥

३९०१ मुखं स्वांगम् ।६।२।१६७॥

गौरमुखः । स्वाङ्गं किम् । दीर्घमुखा शाला ॥

३९०१–बहुव्रीहि समासमें स्वाङ्गवाचक उत्तरपद मुख शब्दका अन्त वर्ण उदात्त हो, यथा–गौरमुखः । स्वाङ्ग न होनेपर, यथा–दीर्घमुखा शाला । अर्थात् चौडेद्वारवाली ॥

३९०२ नाऽव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ।६।२।१६८॥

उच्चैर्मुखः । प्राङ्मुखः । गोमुखः । महामुखः।स्थूलमुखः।मुष्टिमुखः।पृथुमुखः।वत्समुखः। पूर्वपदप्रकृतिस्वरोऽत्र । गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोपि विकल्पोऽनेन बाध्यते ॥

३९०२–बहुव्रीहि समासमें अव्यय शब्द, दिग्वाचक शब्द गो, महत्, स्थूल, मुष्टि, पृथु और वत्स शब्दके उत्तर जो मुख शब्द उसका अन्त वर्ण उदात्त हो, यथा–उच्चैर्मुखः । प्राङ्मुखः । गोमुखः । महामुखः । स्थूलमुखः । मुष्टिमुखः । पृथुमुखः । वत्समुखः । इस स्थलमें पूर्व पदको प्रकृतिस्वर हुआहै । पूर्ववर्त्ती गो, मुष्टि और वत्स शब्दके उपमानलक्षण विहित जो विकल्प वह भी इस सूत्रसे बाधित होताहै । मुष्टिः= मुष्+क्तिच् । पृथुः='प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ' इससे प्रथसे कु प्रत्यय करके पृथुः । वत्सः=वद+सः। गोमुखः गौर्मुखमिव मुखं यस्य सः ॥

३९०३ निष्ठोपमानादन्यतरस्याम् । ६।२।१६९॥

निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वाऽन्तोदात्तं बहुव्रीहौ । प्रक्षालितमुखः । पक्षे निष्ठोपसर्गेति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति । उपमानम् । सिंहमुखः ॥

३९०३–बहुव्रीहि समासमें निष्ठाप्रत्ययान्त शब्द और उपमानवाचक शब्दके उत्तर स्वांगवाचक मुख शब्दको विकल्प करके अन्तोदात्त स्वर हो, यथा–प्रक्षालितमुखः । विकल्प पक्षमें " निष्ठोपसर्ग० " इत्यादि सूत्रसे पूर्वपदका अन्त वर्ण उदात्त होगा, पूर्व पदको प्रकृतिस्वरत्वके कारण गतिस्वर भी होगा । उपमान यथा–सिंहमुखः ॥

३९०४ जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः । ६ । २ । १७० ॥

सारंगजग्धः । मासजातः । सुखजातः । दुःखजातः । जातिकालेति किम् । पुत्रजातः । अनाच्छादनात्किम् । वस्त्रच्छन्नः । अकृतेति किम् । कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः। अस्माज्ज्ञापकान्निष्ठान्तस्य परनिपातः ॥

३९०४–बहुव्रीहि समासमें जातिवाचक शब्द कालवाचक शब्द और सुखादि शब्दोंके उत्तर आच्छादनवाचक शब्दके उत्तर न होनेपर क्तप्रत्ययान्त शब्दका अन्त वर्ण उदात्त हो, कृत मित और प्रतिपन्न शब्दको न हो, यथा–सारङ्गजग्धः । मासजातः । सुखजातः । दुःखजातः । जाति और काल वाचक शब्दके परे न होनेपर यथा–पुत्रजातः । आच्छादनार्थ शब्दके उत्तर होनेपर यथा–वस्त्रच्छन्नः । कृतादि शब्दोंका यथा–कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः ऐसे प्रयोगमें निष्ठान्तपद परे रहते अन्तोदात्त विधानसे क्तान्तका परनिपात जानना चाहिये । सारंगजग्धः=सारंगः पक्षिविशेषः स जग्धो भक्षितो येनेति विग्रहः।वस्त्रः=वस्+ष्ट्रन्॥

३९०५ वा जाते । ६ । २ । १७१ ॥

जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः । दन्तजातः । मासजातः ॥

३९०५–बहुव्रीहि समासमें जातिवाचक और कालवाचक और सुखादि शब्दोंके उत्तर जो जात शब्द वह विकल्प करके अन्तोदात्त हो, यथा–दन्तजातः । मासजातः ॥

३९०६ नञ्सुभ्याम् । ६ । २ । १७२॥

बहुव्रीहावुत्तरपदमन्तोदात्तम् । अव्रीहिः । सुमाषः ॥

३९०६–बहुव्रीहि समासमें नञ् और सु शब्दके उत्तर जो उत्तरपद उसका अन्तवर्ण उदात्त हो, यथा–अव्रीहिः । सुमाषः ॥

३९०७ कपि पूर्वम् । ६ । २ । १७३ ॥

नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य पूर्वमुदात्तं कपि परे । अब्रह्मबन्धुकः । सुकुमारीकः ॥

३९०७–बहुव्रीहि समासमें नञ् और सु शब्दके उत्तर जो उत्तरपद तदन्तसमासका पूर्ववर्ण कप् प्रत्यय परे रहते उदात्त हो, यथा–अब्रह्मबन्धुकः सुकुमारीकः ॥

३९०८ ह्रस्वान्तेऽन्त्यात्पूर्वम् । ६ । २ । १७४ ॥

ह्रस्वान्ते उत्तरपदे समासे चान्त्यात्पूर्वमुदात्तं कपि नञ्सुभ्यां परं बहुव्रीहौ । अव्रीहिकः । सुमाषकः । पूर्वमित्यनुवर्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमार्थम् । ह्रस्वान्तेन्त्यादेव पूर्वपदमुदात्तं न कपि पूर्वमिति । अज्ञकः । कबन्तस्यैवान्तोदात्तत्वम् ॥

३९०८–बहुव्रीहि समासमें ह्रस्वान्त उत्तरपद परे रहते नञ् और सु शब्दके उत्तर कप् प्रत्यय परे रहते अन्त्यवर्णसे पूर्व वर्ण उदात्त हो, यथा–अव्रीहिकः । सुमाषकः । पूर्वसूत्रसे पूर्वपदकी अनुवृत्ति होसकती है, तथापि पुनर्वार उस शब्दका ग्रहण वाक्यभेदसे नियमार्थ जानना चाहिये एक वाक्यसे । ह्रस्वान्त उत्तरपद परे रहते अन्त्यवर्णसे पूर्व वर्णको उदात्तत्व होगा । द्वितीय वाक्यसे ह्रस्वान्त उत्तर पद परे रहते अन्त्यवर्णसे ही पूर्व वर्ण उदात्त हो, कप् प्रत्यय परे रहते पूर्व वर्ण उदात्त न हो, ऐसा नियम होगा, यथा–अज्ञकः । इस स्थलमें कप् प्रत्ययान्तशब्दका ही अन्तवर्ण उदात्त हुआ ॥

३९०९ बहोर्नञ्वदुत्तरपदभूम्नि । ६ । २ । १७५ ॥

उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात्। बहुव्रीहिकः । बहुमित्रकः । उत्तरपदेति किम् । बहुषु मानोऽस्य स बहुमानः ॥

३९०९–बहुव्रीहि समासमें उत्तर पदार्थमें बहुत्ववाचक बहु शब्दके परवर्ती पदको नञ्के स्वरके समान स्वर हो, यथा–बहुव्रीहिकः । बहुमित्रकः । उत्तरपदार्थमें बहुत्ववाचक न होनेपर यथा–बहुषु मानोऽस्य स बहुमानः ॥

३९१० न गुणादयोऽवयवाः । ६ । २ । १७६ ॥

अवयववाचिनो बहोः परे गुणादयो नान्तोदात्ता बहुव्रीहौ । बहुगुणा रज्जुः । बह्वक्षरं पदम् । बह्वध्यायः । गुणादिराकृतिगणः । अवयवाः किम् । बहुगुणो द्विजः । अध्ययनश्रुतसदाचारादयो गुणाः ॥

३९१०–बहुव्रीहि समासमें बहु शब्दके उत्तर अवयववाचक गुणादि शब्द अन्तोदात्त न हो, यथा–बहुगुणा रज्जुः । बह्वक्षरं पदम् । बह्वध्यायः । गुणादि आकृतिगण है । अवयववाचक न होनेपर यथा–बहुगुणो द्विजः । गुण शब्दसे अध्ययन श्रुत और सदाचारादि समझना ॥

३९११ उपसर्गात्स्वांगं ध्रुवमपर्शु । ६ । २ । १७७ ॥

प्रपृष्ठः । प्रललाटः । ध्रुवमेकरूपम् । उपसर्गात्किम् । दर्शनीयपृष्ठः । स्वांगं किम् । प्रशाखो वृक्षः । ध्रुवं किम् । उद्बाहुः । अपर्शु किम् । विपर्शुः ॥

३९११-बहुव्रीहि समासमें उपसर्गके उत्तर स्वाङ्गवाचक ध्रुवार्थक शब्दको अन्तोदात्त स्वर, हो, पर्शु शब्दको न हो, यथा-प्रपृष्ठः। प्रललाटः। ध्रुव शब्दसे एकरूप समझना। उपसर्गके उत्तर न होनेपर यथा-दर्शनीयपृष्ठः। स्वाङ्गवाचक न होनेपर यथा-प्रशाखो वृक्षः। ध्रुवार्थ न होनेपर यथा-उद्बाहुः। पर्शु शब्द होनेपर यथा-विपर्शुः॥

३९१२ वनं समासे। ६।२।१७८॥

समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदात्तम्। तस्येदिमे प्रवणे॥

३९१२-समासमात्रमें उपसर्गके उत्तर जो उत्तर पद वन शब्द वह अन्तोदात्त हो, यथा-तस्येदिमे प्रवणे। प्रवण= (प्रनिरन्तः णत्व)॥

३९१३ अन्तः। ६।२।१७९॥

अस्मात्परं वनमन्तोदात्तम् अन्तर्वणो देशः। अनुपसर्गार्थमिदम्॥

३९१३-समासमात्रमें अन्तःशब्दके उत्तर वन शब्दका अन्तवर्ण उदात्त हो, यथा-अन्तर्वणो देशः। यह सूत्र अनुपसर्गार्थ अर्थात् उपसर्ग पूर्वमें न रहते भी अन्तोदात्तार्थ है॥

३९१४ अन्तश्च। ६।२।१८०॥

उपसर्गादन्तःशब्दोन्तोदात्तः। पर्यन्तः। समन्तः॥

३९१४-समासमात्रमें उपसर्गके उत्तर अन्तःशब्दका अन्त वर्ण उदात्त हो, यथा-पर्यन्तः। समन्तः॥

३९१५ न निविभ्याम्। ६।२।१८१॥

न्यन्तः। व्यन्तः। पूर्वपदप्रकृतिस्वरे यणि च कृते उदात्तस्वरितयोर्यण इति स्वरितः॥

३९१५-समासमात्रमें नि और वि शब्दके उत्तर अन्तःशब्दका अन्त वर्ण उदात्त न हो, यथा-न्यन्तः। व्यन्तः। पूर्वपदको प्रकृतिस्वर और यण् करनेपर "उदात्तस्वरितयोर्यणः ३६५७" इस सूत्रसे स्वरित होगा॥

३९१६ परेरभितोभावि मण्डलम्। ६।२।१८२॥

परेः परमभित उभयतो भावो यस्यास्ति तत्कूलादि मण्डलं चान्तोदात्तम्। परिकूलम्। परिमण्डलम्॥

३९१६-समासमात्रमें परिशब्दके उत्तर अभितोभाविवाचक मण्डल अन्तोदात्त हो, यथा-परिकूलम्। परिमण्डलम्॥

३९१७ प्रादस्वांगं संज्ञायाम्। ६।२।१८३॥

प्रगृहम्। अस्वांगं किम्। प्रपदम्॥

३९१७-समासमात्रमें संज्ञा होनेपर प्र शब्दके उत्तर अस्वाङ्गवाचक शब्द अन्तोदात्त हो, यथा-प्रगृहम्। स्वाङ्गवाचक होनेपर यथा-प्रपदम्॥

३९१८ निरुदकादीनि च। ६।२।१८४॥

अन्तोदात्तानि। निरुदकम्। निरुपलम्॥

३९१८-समासमात्रमें निरुदकादि शब्दोंका अन्त वर्ण उदात्त हो, यथा-निरुदकम्। निरुपलम्॥

३९१९ अभेर्मुखम्। ६।२।१८५॥

अभिमुखम्। उपसर्गात्स्वांगमितिसिद्धे बहुव्रीह्यर्थमध्रुवार्थमस्वांगार्थं च। अभिमुखा शाला॥

३९१९-समासमात्रमें अभिपूर्वक मुख शब्दका अन्त वर्ण उदात्त हो, यथा-अभिमुखम्। "उपसर्गात्स्वांगम्०" इस सूत्रसे सिद्ध होनेपर भी बहुव्रीहिके निमित्त अध्रुवार्थ और अस्वाङ्गार्थ यह सूत्र जानना चाहिये। अत एव अभिमुखा शाला। इस स्थलमें भी हुआ॥

३९२० अपाच्च। ६।२।१८६॥

अपमुखम्। योगविभाग उत्तरार्थः॥

३९२०-बहुव्रीहि समासमें अपपूर्वक मुख शब्दका अन्त वर्ण उदात्त हो, यथा-अपमुखम्। उत्तरसूत्रमें अनुवृत्तिके निमित्त भिन्न सूत्र कियाहै॥

३९२१ स्फिगपूतवीणाऽञ्जोऽध्वकुक्षिसीरनामनाम च। ६।२।१८७॥

अपादिमान्यन्तोदात्तानि। अपस्फिगम्। अपपूतम्। अपवीणम्। अञ्जस्। अपाञ्जः। अध्वन्। अपाध्वम्। उपसर्गादध्वन इत्यस्याभावे इदम्। एतदेव च ज्ञापकं समासान्ताऽनित्यत्वे। अपकुक्षि। सीरनाम। अपसीरम्। अपहलम्। नाम। अपनाम॥ स्फिगपूतवीणाकुक्षिग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वांगार्थं च॥

३९२१-समासमें अपके उत्तर स्फिग, पूत, वीणा, अञ्जस्, अध्वन्, कुक्षि, सीरनाम और नामन् शब्दका अन्त वर्ण उदात्त हो, यथा-अपस्फिगम्। अपपूतम्। अपवीणम्। अञ्जस्-अपाञ्जः। अध्वन्-अपाध्वम्। "उपसर्गादध्वनः ९५३" इस सूत्रके अभावमें "स्फिगपूत०" इस सूत्रसे उदात्त होताहै। यह सूत्र समासान्तके अनित्यत्वका ज्ञापक है, अपकुक्षि। सीरनाम अर्थात् हलादिका नाम यथा-अपसीरम्। अपहलम्। नामन् यथा-अपनाम। स्फिग, पूत, वीणा और कुक्षि शब्दका ग्रहण अबहुव्रीह्यर्थ और अध्रुवार्थ और अस्वाङ्गार्थ है॥

३९२२ अधेरुपरिस्थम्। ६।२।१८८॥

अध्यारूढो दन्तोऽधिदन्तः। दन्तस्योपरि जातो दन्तः। उपरिस्थं किम्। अधिकरणम्॥

३९२२-अधिके उत्तर उपरिस्थलवाची अन्तोदात्त हो, यथा-अध्यारूढो दन्तः अधिदन्तः। दन्तके ऊपर उत्पन्न हुए दाँतोंको उपरिस्थ कहतेहैं। उपरिस्थ न होनेपर यथा, अधिकरणम्॥

३९२३ अनोपरमप्रधानकनीयसी । ६ । २ । १८९ ॥

अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम्। अनुगतो ज्येष्ठमनुज्येष्ठः । पूर्वपदार्थप्रधानः प्रादिसमासः । अनुगतः कनीयाननुकनीयान् । उत्तरपदार्थप्रधानः । प्रधानार्थं च कनीयोग्रहणम् । अप्रेति किम् । अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥

३९२३-अनु शब्दके उत्तर अप्रधानवाचक और कनीयस् शब्द अन्तोदात्त हो, यथा-अनुगतो ज्येष्ठम् अनुज्येष्ठः । इस स्थलमें पूर्व पदार्थ प्रधान और प्रादिसमास हुआहै।अनुगतः कनीयाननुकनीयान् । इस स्थलमें उत्तर पदार्थ प्रधान हुआहै। और इस स्थलमें प्रधानार्थ कनीयस् शब्दका ग्रहण हुआहै । प्रधानवाचक होनेपर यथा--अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥

३९२४ पुरुषश्चाऽन्वादिष्टः ।६।२।१९०॥

अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः । अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टः किम् । अनुगतः पुरुषोऽनुपुरुषः ॥

३९२४-अनु शब्दके उत्तर अन्वादिष्टवाचक पुरुष शब्दका अन्त वर्ण उदात्त हो, यथा-अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टवाचक न होनेपर यथा-अनुगतः पुरुषोऽनुपुरुषः । अनु पश्चादादिष्टः कथितः ॥

३९२५ अतेरकृत्पदे । ६ । २ । १९१ ॥

अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः । अत्यङ्कुशो नागः । अतिपदा गायत्री । अकृत्पदे किम् । अतिकारकः ॥ अतेर्धातुलोप इति वाच्यम् ॥ * ॥ इह मा भूत् । शोभनो गार्ग्योऽतिगार्ग्यः । इह च स्यात् । अतिक्रान्तः कारुमतिकारुकः ॥

३९२५-अति शब्दके उत्तर अकृदन्त अर्थात् कृत्प्रत्यान्त न हो ऐसा जो शब्द और पद शब्द अन्तोदात्त हो, यथा-अत्यंकुशो नागः । अतिपदा गायत्री । अकृदन्त पद होनेपर यथा-अतिकारकः ॥

अतिके उत्तर शब्द धातुका लोप होनेपर अन्तोदात्त हो* इस स्थलमें धातुका लोप नहीं हुआहै । शोभनो गार्ग्योऽतिगार्ग्यः । अतिक्रान्तः कारुमतिकारुकः इस स्थलमें हुआहै । अत्यंकुशः=अंकुशमतिक्रान्तः । अतिकारकः=शोभनः कारकः ॥

३९२६ नेरनिधाने । ६ । २ । १९२ ॥

निधानमप्रकाशता । ततोऽन्यदनिधानं प्रकाशनमित्यर्थः । निमूलम् । न्यक्षम् । अनिधाने किम् । निहितो दण्डो निदण्डः ॥

३९२६-निधान-अप्रकाश।तद्भिन्न अर्थात् प्रकाश अर्थ होनेपर नि शब्दके उत्तर जो उत्तर पद उसका अन्त वर्ण उदात्त हो, यथा-निमूलम् । न्यक्षम् । निधानार्थमें यथा-निहितो दण्डो निदण्डः । निर्गतं मूलमस्य, निर्गतं वा मूलम् निमूलम् ॥

३९२७ प्रतेरंश्वादयस्तत्पुरुषे।६।२।१९३॥

प्रतेः परेंऽश्वादयोऽन्तोदात्ताः । प्रतिगतोंऽशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । समासान्तस्यानित्यत्वान्न टच् ॥

३९२७-प्रति शब्दके उत्तर अंशु आदि शब्द अन्तोदात्त हों, यथा-प्रतिगतः-अंशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । इस स्थलमें समासान्तके अनित्यत्वके कारण टच् प्रत्यय नहीं हुआ ॥

३९२८ उपाद् द्व्यजजिनमगौरादयः। ६ । २ । १९४ ॥

उपात्परं यद् द्व्यचकमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन्वर्जयित्वा । उपदेवः । उपेन्द्रः। उपाजिनम् । अगौरादयः किम् । उपगौरः । उपतैषः । तत्पुरुषे किम् । उपगतः सोमोऽस्य स उपसोमः ॥

३९२८-तत्पुरुष समासमें उप शब्दके उत्तर जो दोस्वरविशिष्ट शब्द और अजिन शब्द उसका अन्त वर्ण उदात्त हो, गौरादि शब्दोंको न हो, यथा-उपदेवः । उपेन्द्रः । उपाजिनम् । गौरादि होनेपर यथा-उपगौरः । उपतैषः । तत्पुरुष समास न होनेपर यथा-उपगतः सोमोऽस्य स उपसोमः ॥

३९२९ सोरवक्षेपणे । ६ । २ । १९५ ॥

सुप्रत्यवसितः । सुरत्र पूजायामेव । वाक्यार्थस्त्वत्र निन्दा असूयया तथाभिधानात् । सोः किम् । कुब्राह्मणः । अवक्षेपणे किम् । सुवृषणम् ॥

३९२९-अवक्षेपणार्थमें सुके उत्तर जो उत्तरपद उसका अन्त वर्ण उदात्त हो, यथा-सुप्रत्यवसितः । इस स्थलमें सु शब्दसे पूजा समझना, वाक्यार्थ तो यहां निन्दा है, कारण कि, असूयासे निन्दा अभिहित होतीहै । सु शब्दके उत्तर न होनेपर यथा-कुब्राह्मणः । अवक्षेपणार्थ न होनेपर यथा-सुवृषणम् ॥

३९३० विभाषोत्पुच्छे।६ । २।१९६ ॥

तत्पुरुषे । उत्क्रान्तः पुच्छादुत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयते एरच् उत्पुच्छस्तदा थाथादिस्वरेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् । सेयमुभयत्र विभाषा । तत्पुरुषे किम् । उदस्तं पुच्छं येन स उत्पुच्छः ॥

३९३०-उत्पूर्वक पुच्छ शब्दका अन्तवर्ण उदात्त हो विकल्प करके तत्पुरुषमें, यथा-उत्क्रान्तः पुच्छादुत्पुच्छः । जब तो-पुच्छमुदस्यति उत्पुच्छयते, इस विग्रहमें " एरच् ३२३१ " इस सूत्रसे अच् होकर-' उत्पुच्छः ' होगा तब

थाथादि स्वरसे नित्य अन्तोदात्तता प्राप्त होनेपर विकल्प-विधानके निमित्त यह सूत्र है । यह उभयत्र विभाषा है । तत्पुरुष न होनेपर यथा–उदस्तं पुच्छं येन सः=उत्पुच्छः ॥

३९३१ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ । ६ । २ । १९७ ॥

आभ्यां परेष्वेष्वन्तोदात्तो वा । द्विपाच्चतुष्पाच्च रथाय । त्रिपादूर्ध्वः । द्विदन् । त्रिमूर्धानं सप्तरश्मिम् । मूर्धन्नित्यकृतसमासान्त एव मूर्धशब्दः । तस्यैतत्प्रयोजनमसत्यपि समासान्ते अन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकमनित्यः समासान्तो भवतीति। यद्यपि च समासन्तः क्रियते तथापि बहुव्रीहिकार्यत्वात्तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव । द्विमूर्धः । त्रिमूर्धः । द्वित्रिभ्यां किम् । कल्याणमूर्धा । बहुव्रीहौ किम् । द्वयोर्मूर्धा द्विमूर्धा ॥

३९३१–बहुव्रीहिसमासमें द्वि और त्रि शब्दके परे पाद, दत् और मूर्द्धन् शब्दको अन्तोदात्तस्वर हो, द्विपाच्चतुष्पाच्च रथाय । त्रिपादूर्ध्वः । द्विदन् । त्रिमूर्धानं सप्तरश्मिम् । मूर्द्धन् यह अकृतसमासान्तही मूर्ध शब्द है, इसका यह प्रयोजन है कि, समासान्त प्रत्यय न होनेपर भी अन्तोदात्त हो । यही निर्देश ज्ञापन करताहै कि, समासान्तविधि अनित्य होताहै । यद्यपि समासान्त कियाजाताहै तथापि बहुव्रीहिकार्यत्वके कारण और बहुव्रीहिके एकदेशत्वके कारण पक्षमें समासान्तोदात्तत्व होताही है,यथा–द्विमूर्द्धः+त्रिमूर्द्धः।द्वि और त्रिशब्दके उत्तर न होनेपर यथा–कल्याणमूर्द्धा । बहुव्रीहि न होनेपर यथा–द्वयोर्मूर्द्धा=द्विमूर्द्धा ॥

३९३२ सक्थं चाऽक्रान्तात् ।६।२।१९८॥

गौरसक्थः । श्लक्ष्णसक्थः । अक्रान्तात्किम् । चक्रसक्थः । समासान्तस्य षचश्चित्त्वान्नित्यमेवान्तोदात्तत्वं भवति ॥

३९३२–क्रशब्दान्तपदके उत्तर न होनेपर बहुव्रीहिसमासमें सक्थ शब्दका अन्तवर्ण उदात्त हो, यथा–गौरसक्थः । श्लक्ष्णसक्थः । क्रशब्दान्तपदके उत्तर होनेपर यथा–"चक्रसक्थः" । इस स्थलमें समासान्त षच् प्रत्ययके चित्व (च् इत्) के कारण नित्य ही अन्तोदात्तत्व होताहै ॥

३९३३ परादिश्छन्दसि बहुलम् । ६ । २ । १९९ ॥

छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा। अजिसक्थमालभेत । अत्र वार्त्तिकम् ॥

परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ॥
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः॥*॥

इति । परादिः । तु विजाता उरुक्षया । परान्तः । नियेन मुष्टिहत्यया । यस्त्रिचक्रः । पूर्वान्तः । विश्वायुर्धेहि ॥

॥ इति समासस्वराः ॥

३९३३–वेदमें परवर्ती सक्थ शब्दका आदिवर्ण विकल्प करके उदात्त हो, यथा–अजिसक्थमालभेत । इस स्थलमें वार्त्तिक ऐसा है, कि–परादि,परान्त पूर्वान्त और पूर्वादि बहुतसे स्थलोंमें उदात्त देखे जातेहैं,परन्तु वह बहुल ग्रहण लभ्य-व्यत्ययसे होताहै । अत एव बहुलग्रहणचरितार्थ हुआ,नहीं तो पूर्वसूत्रसे ही विभाषापदकी अनुवृत्ति करके विकल्प सिद्ध होनेपर बहुलग्रहण व्यर्थ ही होजाता । परादि यथा–भविजाता उरुक्षया । परान्त यथा–नियेन मुष्टिहत्यया । यस्त्रिचक्रः । पूर्वान्त यथा–विश्वायुर्धेहि ॥

इति समासस्वराः ।

३९३४ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः । ८ । १ । २७ ॥

तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः । पचति गोत्रम् । पचतिपचति गोत्रम् । एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः। कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् । तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम् । गोत्रादीति किम् । पचति पापम् । कुत्सेति किम् । खनति गोत्रं समेत्य कूपम् ॥

३९३४–कुत्सन अर्थात् निन्दा और आभीक्ष्ण्य अर्थात् पौनःपुन्य अर्थ होनेपर तिङन्त पदके उत्तर गोत्रादि शब्द अनुदात्त हों । गोत्रादि यथा–गोत्र, ब्रुव, प्रवचन, प्रयतन, पवन, यजन, प्रहसन, प्रकथन, प्रत्यायन, प्रचक्षण, विचक्षण, अवचक्षण, स्वाध्याय, भूयिष्ठ और वानाम । उदाहरण यथा–"पचति गोत्रम् । पचतिपचति गोत्रम्" । इस स्थलमें पौनःपुन्य है अर्थात् विवाहादिमें गोत्र वारंवार सुखी करताहै । इसी प्रकार ब्रुव आदि शब्द अनुदात्त होंगे । कुत्सन और आभीक्ष्ण्य शब्द पाठका विशेषण है। इस कारण अन्य सूत्रमें भी गोत्रादिका ग्रहण करनेसे कुत्सन और आभीक्ष्ण्यार्थमें ही कार्य होगा । गोत्रादिभिन्न शब्द होनेपर "पचति पापम्" इस स्थलमें पाप शब्द क्रियाका विशेषण है, इस कारण अनुदात्त नहीं हुआ । कुत्सनादि अर्थ न होनेपर "खनति गोत्रम् समेत्य कूपम्" अर्थात् गोत्रके सब मिलकर कूप खोदते हैं । इस स्थलमें भी अनुदात्त नहीं हुआ ॥

३९३५ तिङ्ङतिङः । ८ । १ । २८ ॥

अतिङन्तात्पदात्परं तिङन्तं निहन्यते । अग्निमीळे ॥

३९३५–अतिङन्त पदके उत्तर स्थित तिङन्त पद अनुदात्त हो अर्थात् यदि पूर्व पद तिङन्त न हो, तो तत्परवर्ती तिङन्त पद अनुदात्त हो, और यदि पूर्व पद तिङन्त हो, तो परवर्ती तिङन्त पद अनुदात्त न हो, यथा–अग्निमीळे ।

सूत्रमें अतिङ् पदका ग्रहण करना निष्प्रयोजन है, कारण कि, एकवाक्यमें केवल दो तिङन्त पद नहीं रह सकते इस कारण पूर्व पद सुबन्त ही होगा, पूर्वमें तिङन्त पद न होनेपर "पचति भवति" इस स्थलमें पर पद अनुदात्त नहीं हुआ ॥

३९३६ न लुट् । ८ । १ । २९ ॥

लुडन्तं न निहन्यते । श्वःकर्ता ॥

३९३६–ल्युट्विभक्त्यन्त पद अनुदात्त न हो, यहांसे अनुदात्तके निषेधसूत्र हैं यथा–"श्वःकर्ता" । इस स्थलमें एकवचनमें टिका लोप होनेपर उदात्तनिवृत्तिस्वरसे डा प्रत्ययको उदात्त स्वर हुआहै ॥

३९३७ निपातैर्यद्यदिहन्तकुविन्नेच्चेचण्कच्चिद्यत्रयुक्तम् । ८ । १ । ३० ॥

एतैर्निपातैर्युक्तं न निहन्यते । यदग्ने स्यामहं त्वम् । युवां यदीकृथः । कुविदङ्ग आसन् । अचित्तिभिश्चकृमा कच्चित् । पुत्रासो यत्र पितरो भवन्ति ॥

३९३७–यत्, यदि, हन्त, कुवित्, नेत्, चेत्, चण्, कच्चित् और यत्र इन संपूर्ण निपातोंसे युक्त जो तिङन्तपद वह अनुदात्त न हो, यथा–"यदग्ने स्यामहं त्वम्" । (अस्–विधिलिङ्+अम्=स्याम्) । "युवां यदीकृथः" "कुविदङ्ग आसन्" । "अचित्तिभिश्चकृमा कच्चित्" । इस स्थलमें 'चकृमा' यहां लिट् प्रत्ययस्वरके कारण अन्तोदात्त होताहै । "पुत्रासो यत्र पितरो भवन्ति" यदादि निपातका योग न होनेपर अर्थात् जब यत् आदिकी निपात संज्ञा नहीं है, तब कैसा होगा ? तो यत् कूजति शकटम् ॥

३९३८ नह प्रत्यारम्भे । ८ । १ । ३१ ॥

नहेत्यनेन युक्तं तिङन्तं नानुदात्तम् । प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः । नह भोक्ष्यसे । प्रत्यारम्भे किम् । नह वै तस्मिन् लोके दक्षिणमिच्छन्ति ॥

३९३८–प्रत्यारम्भ होनेपर नह शब्दसे युक्त जो तिङन्तपद वह अनुदात्त न हो । नह शब्द निपातसमुदाय है, यह निषेधार्थक है । प्रतिषेधयुक्त जो आरम्भ, उसको प्रत्यारम्भ कहतेहैं, यथा–"नह भोक्ष्यसे" प्रत्यारम्भ न होनेपर कैसा होगा ? तो "नह वै तस्मिन् लोके दक्षिणमिच्छन्ति" ॥

३९३९ सत्यं प्रश्ने । ८ । १ । ३२ ॥

सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने । सत्यं भोक्ष्यसे । प्रश्ने किम् । सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम ॥

१ यत् आदिका अर्थ यह है, यथा–"यद्यदार्थे च हेतौ च विचारे यदि चेच्चणः । हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः । कच्चित् प्रश्ने नेत्प्रिषेधे प्रशंसायां कुवित्स्मृतम् । "यत्रेत्याधारे" अर्थात् यत्–पदार्थ और हेतुमें, यदि, चेत् और चण–विचारमें, हन्त–हर्ष, अनुकम्पा, वाक्यारम्भ और विषादमें, कच्चित्–प्रश्नमें, निषेधमें, कुवित्–प्रशंसामें तथा यत्र आधार अर्थमें वर्तता है ॥

३९३९–प्रश्न गम्य होनेपर सत्य शब्दसे युक्त जो तिङन्तपद वह अनुदात्त न हो, यथा–"सत्यं भोक्ष्यसे" । प्रश्न गम्य न होनेपर न होगा, यथा–"सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम" ॥

३९४० अङ्गाऽप्रातिलोम्ये । ८ । १ । ३३ ॥

अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम् । अङ्ग कुरु । अप्रातिलोम्ये किम् । अंग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म । अनभिप्रेतमसौ कुर्वन्प्रातिलोमो भवति ॥

३९४०–अप्रातिलोम्य अर्थात् अभिमतकारित्व होनेपर अङ्ग शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा–"अंग कुरु" प्रातिलोम्य अर्थात् प्रतिकूलकारित्व होनेपर कैसा होगा ? तो अंग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म । यह अनभिप्रेत काम करनेसे प्रतिलोम है ॥

३९४१ हि च । ८ । १ । ३४ ॥

हियुक्तं तिङन्तं नानुदात्तम् । आ हि स्मायाति । आ हि रुहन्तम् ॥

३९४१–अप्रातिलोम्यमें हिशब्दयुक्त तिङन्तपद अनुदात्त न हो, यथा–आ हि स्मायाति । आ हि रुहन्तम् ॥

३९४२ छन्दस्यनेकमपि साकाङ्क्षम् । ८ । १ । ३५ ॥

हीत्यनेनयुक्तं साकाङ्क्षमनेकमपि नानुदात्तम् । अनृतं हि मत्तो वदति पाप्मा चैनं पुनाति । तिङन्तद्वयमपि न निहन्यते ॥

३९४२–वेदमें हि शब्दसे युक्त साकाङ्क्ष अर्थात् परस्पर आकांक्षा युक्त अनेक तिङन्तपद भी अनुदात्त न हों । यथा–"अनृतं हि मत्तो वदति पाप्मा चैनं पुनाति" यहां दोनों तिङन्तपद अनुदात्त न हुए ॥

३९४३ यावद्यथाभ्याम् । ८ । १ । ३६ ॥

आभ्यां योगे तिङन्तं नानुदात्तम् । यथा चित्कण्वमावतम् ॥

३९४३–यावत् और यथा शब्दके योगमें तिङन्तपद अनुदात्त न हो, यथा–यथा चित्कण्वमावतम् ॥

३९४४ पूजायां नानन्तरम् । ८ । १ । ३७ ॥

यावद्यथाभ्यां युक्तमनन्तरं तिङन्तं पूजायां नानुदात्तम् । यावत्पचति शोभनम् । यथा पचति शोभनम् । पूजायां किम् । यावद्भुङ्क्ते । अनन्तरं किम् । यावद्देवदत्तः पचति शोभनम् । पूर्वेणात्र निघातः प्रतिषिध्यते ॥

३९४४–यदि, यावत् और यथा शब्दसे युक्त तिङन्तपदके मध्यमें अन्य कोई शब्द व्यवधान न हो तो तिङन्तपद पूजामें अनुदात्त न हो, यथा–यावत् पचति शोभनम् । पूजाभिन्नार्थमें यथा–यावद्भुङ्क्ते । अनन्तर अर्थात् अव्यवधान

न होनेपर कैसा होगा ? तो "यावद्देवदत्तः पचति शोभनम्" इस स्थलमें पूर्वसूत्रसे प्राप्त अनुदात्त प्रतिषिद्ध होता है ॥

३९४५ उपसर्गव्यपेतं च । ८ । १ । ३८ ॥

पूर्वेणानन्तरमित्युक्तम् । उपसर्गव्यवधानार्थं वचनम् । यावत्प्रपचति शोभनम् । अनन्तरमित्येव । यावद्देवदत्तः प्रपचति शोभनम् ॥

३९४५-पूजामें यावत् और यथा शब्दसे युक्त और उपसर्गसे व्यवहित जो तिङन्तपद वह अनुदात्त न हो, पूर्व सूत्रसे अव्यवहित तिङन्तपदको अनुदात्तका निषेध होता है । यह सूत्र उपसर्ग व्यवधानमें भी निषेधार्थ है । यथा-यावत् प्रपचाति शोभनम् । यावत् और यथा शब्दसे युक्त अव्यवहित ही सोपसर्ग तिङन्तपदके अनुदात्तका निषेध होगा, इस कारण यहां न हुआ, यथा-यावद्देवदत्तः प्रपचति शोभनम् ॥

३९४६ तुपश्यपश्यताऽहैः पूजायाम् । ८ । १ । ३९ ॥

एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम् । आदह स्वधामनु पुनर्गर्भत्वमेरिरे ॥

३९४६-पूजामें तु, पश्य, पश्यत और अह शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा-" आदह स्वधा मनु पुनर्गर्भत्वमेरिरे" ॥

३९४७ अहो च । ८ । १ । ४० ॥

एतद्योगेनानुदात्तं पूजायाम् । अहो देवदत्तः पचति शोभनम् ॥

३९४७-पूजामें अहो शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा-" अहो देवदत्तः पचति शोभनम्" । योगविभाग उत्तरार्थ है । नहीं तो तु प्रभृतिके योगमें भी उत्तरसूत्रकी प्रवृत्ति होजाती ॥

३९४८ शेषे विभाषा । ८ । १ । ४१ ॥

अहो इत्यनेन युक्तं तिङन्तं वानुदात्तमपूजायाम् । अहो कटं करिष्यति ॥

३९४८-पूजाभिन्नार्थमें अहो शब्दसे युक्त तिङन्तपद विकल्प करके अनुदात्त हो, यथा-" अहो कटं करिष्यति" ॥

३९४९ पुरा च परीप्सायाम् । ८ । १ । ४२ ॥

पुरेत्यनेन युक्तं वानुदात्तं त्वरायाम् । अधीष्व माणवक पुरा विद्योतते विद्युत् । निकटागामिन्यत्र पुराशब्दः । परीप्सायां किम् । न तेन स्म पुरा धीयते । चिरातीतेऽत्र पुरा ॥

३९४९-परीप्सा अर्थात् त्वरा होनेपर पुरा शब्दसे युक्त तिङन्तपद अनुदात्त विकल्प करके हो, यथा-" अधीष्व माणवक पुरा विद्योतते विद्युत् " अर्थात् शीघ्र पाठ करो बिजली चमकती है। इस स्थलमें पुरा शब्द निकटागामी अर्थमें समझना। परीप्सा न होनेपर यथा-" न तेन स्म पुरा धीयते " इस स्थलमें पुरा शब्दसे चिरातीत काल समझना ॥

३९५० नन्वित्यनुज्ञैषणायाम् । ८ । १ । ४३ ॥

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तमनुज्ञाप्रार्थनायाम् । ननु गच्छामि भोः । अनुजानीहि मां गच्छन्तमित्यर्थः । अन्विति किम् । अकार्षीः कटं त्वम् । ननु करोमि । पृष्टप्रतिवचनमेतत् ॥

३९५०-अनुज्ञाकी प्रार्थना होनेपर ननु शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा-"ननु गच्छामि भोः " अर्थात् मुझको जानेकी अनुमति दो । अनुज्ञा प्रार्थना न होनेपर कैसा होगा ? तो अकार्षीः कटं त्वम् । ननु करोमि, अर्थात् तुमने चटाई बनाया ? महाशय ! बनाता हूं, यह पृष्टप्रतिवचन है ॥

३९५१ किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् । ८ । १ । ४४ ॥

क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं नानुदात्तम् । किं द्विजः पचत्याहोस्विद्गच्छति । क्रियेति किम् । साधनप्रश्ने मा भूत् । किं भक्तं पचत्यपूपान्वा । प्रश्ने किम् । किं पठति । क्षेपोयम् । अनुपसर्गं किम् । किं प्रपचति उत प्रकरोति । अप्रतिषिद्धं किम् । किं द्विजो न पचति ॥

३९५१-क्रियाप्रश्नमें वर्त्तमान किं शब्दसे युक्त अनुपसर्ग अप्रतिषिद्धार्थक तिङन्तपद अनुदात्त न हो, किं द्विजः पचत्याहोस्विद्गच्छति । क्रियाप्रश्न न होकर साधनप्रश्न होनेपर अनुदात्त न होगा यथा-किं भक्तं पचत्यपूपान्वा । प्रश्नभिन्नमें कैसा होगा ? तो " किं पठति " यह क्षेप अर्थात् निन्दा है । अनुपसर्ग न होनेपर कैसा होगा ? तो किं प्रपचति उत प्रकरोति । अप्रतिषिद्धार्थक न होनेपर यथा-किं द्विजो न पचति ॥

३९५२ लोपे विभाषा । ८ । १ । ४५ ॥

किमोऽप्रयोगे उक्तं वा । देवदत्तः पचत्याहोस्वित्पठति ॥

३९५२-क्रियाप्रश्नमें विद्यमान किं शब्दका लोप अर्थात् प्रयोग न होनेपर अनुपसर्ग अप्रतिषिद्धार्थक तिङन्तपद विकल्प करके अनुदात्त न हो, यथा-देवदत्तः पचत्याहोस्वित्पठति ॥

३९५३ एहिमन्ये प्रहासे लृट् । ८ । १ । ४६ ॥

एहिमन्ये इत्यनेन युक्तं लृडन्तं नानुदात्तं क्रीडायाम् । एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्वतिथिभिः । प्रहासे किम् । एहि मन्यसे ओदनं भोक्ष्ये इति सुष्ठु मन्यसे । गत्यर्थलोटा लृडित्यनेनैव सिद्धे नियमार्थोऽयमारम्भः । एहि-

मन्येयुक्ते प्रहास एव नान्यत्र । एहिं मन्यसे ओदनं भोक्ष्ये ॥

३९५३–प्रहास अर्थात् क्रीडा होनेपर 'एहिमन्ये' इस पदसे युक्त लृट् प्रत्ययान्तपद अनुदात्त न हो, यथा–एहि मन्ये भक्तं भोक्ष्यसे भुक्तं तत्त्वतिथिभिः । प्रहासे क्यों कहा ? तो "एहि मन्यसे ओदनं भोक्ष्ये इति सुष्ठु मन्यसे" यहां न हो "गत्यर्थलोटा लृट्० ३९५८" इस वक्ष्यमाण सूत्रसे सिद्ध होनेपर नियमार्थ इस सूत्रका आरम्भ है कि प्रहासार्थमें ही 'एहि मन्ये' इस पदसे युक्त तिङन्त अनुदात्त न हो, अन्यत्र नहीं, यथा–एहि मन्यसे ओदनं भोक्ष्ये ॥

३९५४ जात्वपूर्वम् । ८ । १ । ४७ ॥

अविद्यमानपूर्वं यज्जातु तेन युक्तं तिङन्तं नानुदात्तम् । जातु भोक्ष्यसे । अपूर्वं किम् । कटं जातु करिष्यसि ॥

३९५४–पूर्वमें कोई पद न हो ऐसे जातु शब्दसे युक्त तिङन्तपद अनुदात्त न हो, यथा–जातु भोक्ष्यसे। पूर्वमें कोई पद होनेपर कैसा होगा ? तो कटं जातु करिष्यसि ॥

३९५५ किंवृत्तं च चिदुत्तरम् । ८ । १ । ४८ ॥

अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तम् तेन युक्तं तिङन्तं नानुदात्तम् । विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम् । कश्चिद्भुंक्ते । कतरश्चित् । कतमश्चिद्वा । चिदुत्तरं किम् । को भुंक्ते । अपूर्वमित्येव । रामः किंचित्पठति ॥

३९५५–पूर्वमें कोई पद न हो और चित् शब्द परे हो ऐसा जो किंवृत्त शब्द उससे युक्त तिङन्तपद अनुदात्त न हो, विभक्त्यन्त, डतर और डतम प्रत्ययान्त किंशब्दके रूपको किंवृत्त कहतेहैं, यथा–कश्चिद्भुंक्ते । कतरश्चित् । कतमश्चिद्वा । चित् शब्द परे न रहते किस प्रकार होगा ? तो को भुंक्ते । पूर्वमें कोई पद न होनेपर ही होगा, इससे "रामः किंचित् पठति" यहां अनुदात्तनिषेध न हुआ ॥

३९५६ आहो उताहो चाऽनन्तरम् । ८ । १ । ४९ ॥

आहो उताहो इत्याभ्यां युक्तं तिङन्तं नानुदात्तम् । आहो उताहो वा भुंक्ते । अनन्तरमित्येव । शेषे विभाषां वक्ष्यति । अपूर्वेति किम् । देव आहो भुंक्ते ॥

३९५६–पूर्वमें कोई पद न रहते आहो और उताहो इन दो पदोंसे युक्त तिङन्तपद अनुदात्त न हो, यथा–आहो उताहो वा भुंक्ते । अनन्तर अर्थात् आहो, उताहो इन दो पदोंको और धातुके मध्यमें व्यवधान न रहनेपर ही अनुदात्त नहीं होगा, कारण कि, शेषमें विकल्प करके कहेंगे। पूर्वमें कोई पद होनेपर कैसा होगा ? तो देव आहो भुंक्ते ॥

३९५७ शेषे विभाषा । ८ । १ । ५० ॥

आभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तम् । आहो देवः पचति ॥

३९५७–आहो और उताहो इन दो पदोंसे युक्त व्यवहित तिङन्तपद विकल्प करके अनुदात्त हो, यथा–आहो देवः पचति ॥

३९५८ गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् । ८ । १ । ५१ ॥

गत्यर्थानां लोटा युक्तं तिङन्तं नानुदात्तम् यत्रैव कारके लोट् तत्रैव लडपि चेत् । आगच्छ देव ग्रामं द्रक्ष्यसि । उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते । गत्यर्थे किम् । पच देव ओदनं भोक्ष्यसेऽन्नम् । लोटा किम् । आगच्छेदेव ग्रामं द्रक्ष्यस्येनम् । लट् किम् । आगच्छ देव ग्रामं पश्यस्येनम् । न चेदिति किम् । आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यते । सर्वं किम् । आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्राऽपि निघातनिषेधो यथा स्यात् । यल्लोडन्तस्य कारकं तच्चान्यच्च लडन्तेनोच्यते ॥

३९५८–जिसी कारकमें लोट् हो, यदि उसी कारकमें लृट् भी हो तो गत्यर्थ प्रकृतिक लोडन्तसे युक्त लृट्स्थानिक तिङन्तपद अनुदात्त न हो, यथा–आगच्छ देव ग्रामं द्रक्ष्यसि उह्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते । गत्यर्थ प्रकृतिक लोट् न होनेपर कैसा होगा ? तो पच देव ओदनं भोक्ष्यसेऽन्नम्। लोडन्तसे युक्त न होनेपर आगच्छेदेव ग्रामं द्रक्ष्यस्येनम्। लृट् न होनेपर कैसा होगा ? तो आगच्छ देव ग्रामं पश्यस्येनम् । 'न चेत्' यह क्यों कहा? तो "आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यते यहां निषेध न हो । सर्व शब्दका ग्रहण क्यों किया ? तो "आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनम्" इस स्थलमें भी निघातस्वरका निषेध हो; यहां लोडन्तका जो कारक वह और अन्यकारक भी लृडन्तसे उक्त होताहै ॥

३९५९ लोट् च । ८ । १ । ५२ ॥

लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम् । आगच्छ देव ग्रामं पश्य । गत्यर्थेति किम् । पच देवौदनं भुङ्क्ष्वैनम् । लोट् किम् । आगच्छ देव ग्रामं पश्यसि । न चेत्कारकं सर्वान्यदित्येव । आगच्छ देव ग्रामं पश्यत्वेनं रामः । सर्वग्रहणात्त्विह स्यादेव । आगच्छ देव ग्रामं त्वं चाहं च पश्यावः । योगविभाग उत्तरार्थः ॥

३९५९–लोडन्त पद यदि गत्यर्थ प्रकृतिक लोडन्तसे युक्त हो तो अनुदात्त न हो, यथा–आगच्छ देव ग्रामं पश्य । गत्यर्थ प्रकृतिक लोडन्तसे युक्त न होनेपर कैसा होगा ? तो

पच देवौदनं भुङ्क्ष्वैनम् । लोडन्त न होनेपर कैसा होगा ? तो आगच्छ देव ग्रामं पश्यसि । सब कारक अन्द न होनेपर ही होगा, इससे यहां न हुआ, यथा–आगच्छ देव ग्रामं पश्यत्वेनं रामः । सर्व शब्दका ग्रहण करनेसे इस स्थलमें ही होगा, यथा–आगच्छ देव ग्रामं त्वं चाहं च पश्यावः । योगविभाग उत्तरार्थ है ॥

३९६० विभाषितं सोपसर्गमनुत्तमम् । ८ । १ । ५३ ॥

लोडन्तं गत्यर्थलोटा युक्तं तिङन्तं वानुदात्तम्। आगच्छ देव ग्रामं प्रविश । सोपसर्गं किम् । आगच्छ देव ग्रामं पश्य । अनुत्तमं किम् । आगच्छानि देव ग्रामं प्रविशानि ॥

३९६०–गत्यर्थ प्रकृतिक लोडन्तसे युक्त सोपसर्ग अनुत्तम लोडादेशान्तपद विकल्प करके अनुदात्त हो, यथा–आगच्छ देव ग्रामं प्रविश । उपसर्गयुक्त न होनेपर कैसा होगा ? तो आगच्छ देव ग्रामं पश्य । उत्तम संज्ञक लोट्स्थानिकादेश न होनेपर यथा–आगच्छानि देव ग्रामं प्रविशानि ॥

३९६१ हन्त च । ८ । १ । ५४ ॥

हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम् । हन्त प्रविश । सोपसर्गमित्येव । हन्त कुरु । निपातैर्यद्यदीति निघातप्रतिषेधः । अनुत्तमं किम् । हन्त प्रभुनजावहै ॥

३९६१–हन्त शब्दसे युक्त उपसर्गपूर्वक उत्तमभिन्न लोडादेशान्त पद विकल्प करके अनुदात्त हो, यथा–हन्त प्रविश । उपसर्गपूर्वक न होनेपर न होगा, यथा–"हन्त कुरु" यहां "निपातैर्यद्यदि३९३७" इस सूत्रसे निघातस्वरका निषेध हुआ। उत्तम पुरुषमें कैसा होगा ? तो "हन्त प्रभुनजावहै" यह भुज् धातुके उत्तर लोट्, "भुजोऽनवने" इस सूत्रसे आत्मनेपद हुआहै ॥

३९६२ आम एकान्तरमामन्त्रितमनन्तिके । ८ । १ । ५५ ॥

आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तम् । आम् पचसि देवदत्त ३ । एकान्तरं किम् । आम् प्रपचसि देवदत्त ३ । आमन्त्रितं किम् । आम् पचति देवदत्तः । अनन्तिके किम् । आम् पचसि देवदत्त ॥

३९६२–आम्से परे एकपदसे व्यवहित आमंत्रितपद अनुदात्त न हो समीप गम्य न होनेपर यथा–आम् पचसि देवदत्त ३ । एकान्तर न होनेपर–आम् प्रपचसि देवदत्त ३ आमंत्रितपद न होनेपर कैसा होगा? तो आम् पचति देवदत्तः अन्तिक गम्य होनेपर यथा–आम् पचसि देवदत्त ॥

३९६३ यद्धितुपरं छन्दसि । ८ । १ । ५६ ॥

तिङन्तं नानुदात्तम् । उदसृजो यदङ्गिरः । उशन्ति हि । आख्यास्यामि तु ते । निपातैर्यदिति हि चेति तु पश्येति च सिद्धे नियमार्थमिदम् । एतैरेव परभूतैर्योगे नान्यैरिति । जायेस्वारोहावेहि । एहीति गत्यर्थलोटा युक्तस्य लोडन्तस्य निघातो भवति ॥

३९६३–वेदमें यत् हि और तु शब्द परे रहते तिङन्तपद अनुदात्त न हो, यथा–उदसृजो यदङ्गिरः । उशन्ति हि । आख्यास्यामि तु ते । "निपातैर्यत्० ३९३७, हि च३९४१" और "तु पश्य० ३९४६" इन तीन सूत्रोंसे पूर्वोक्त कार्य्यकी सिद्धि होनेपर यह सूत्र नियमार्थ है कि, परस्थित यही संपूर्ण शब्दके योगमें अनुदात्तका निषेध हो अन्यशब्दके योगमें नहीं, इससे "जायेस्वारोहावेहि" इस स्थलमें गत्यर्थक इण् धातु प्रकृतिक लोडन्तसे युक्त लोडन्त रोहाव पदको "लोट् च" से प्राप्त निघातस्वरका प्रतिषेध न हुआ ॥

३९६४ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः । ८ । १ । ५७ ॥

एषु षट्सु परतस्तिङन्तं नानुदात्तम् । देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । अगतेः किम् । देवः प्रपचति चन ॥

३९६४–गतिसंज्ञकसे परे न होनेपर चन, चित्, इव, गोत्रादि तद्धित प्रत्यय और आम्रेडित संज्ञक शब्द परे रहते तिङन्तपद अनुदात्त न हो, यथा–देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । गतिसंज्ञकसे परे होनेपर यथा–देवः प्रपचति चन ॥

३९६५ चादिषु च । ८ । १ । ५८ ॥

चवाहाहैवेषु परेषु तिङन्तं नानुदात्तम् । देवः पचति च खादति च । अगतेरित्येव । देवः प्रपचति च प्रखादति च । प्रथमस्य चवायोग इति निघातः प्रतिषिध्यते द्वितीयं तु निहन्यत एव ॥

३९६५–गतिसंज्ञकसे परे न होनेपर च, वा, ह, अह, एव इतने शब्द परे रहते तिङन्तपद अनुदात्त न हो, "देवः पचति च खादति च" इस स्थलमें "चवायोगे०३९६६" इस सूत्रसे प्रथमतिङन्तपदको निघातस्वर प्रतिषिद्ध होताहै, दूसरेको तो निघातस्वर होहीगा ॥

३९६६ चवायोगे प्रथमा । ८ । १ । ५९ ॥

चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता । गाश्च चारयति वीणां वा वादयति । इतो वा सातिमीमहे । उत्तरवाक्ययोरनुषज्जनीयतिङन्तापेक्षयेयं प्राथमिकी । योगे किम् ।

पूर्वभूतयोरपि योगे निघातार्थम्। प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूत् ॥

३९६६–च, वा इन दो निपातोंके योगमें प्रथमा तिङ्विभक्ति अनुदात्त न हो, गाश्च चारयति वीणां वा वादयति। इतो वा सातिमीमहे। यहां उत्तरके दोनों वाक्योंमें अर्थात् देवो वा पार्थिवादधि, इन्द्रं महो वा रजसः इन दोनों वाक्योंमें अनुषञ्जनीय तिङन्तकी अपेक्षासे यह तिङ्विभक्ति प्राथमिकी है। योगग्रहण क्यों किया ? तो पूर्वस्थित भी उन दोनोंके योगमें निघातस्वर हो। प्रथमा शब्दका ग्रहण द्वितीयादि तिङन्तके अनुदात्तका निषेध न हो, इसके निमित्त है ॥

३९६७ हेति क्षियायाम् ।८।१।६०॥

हयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता धर्मव्यतिक्रमे। स्वयं ह रथेन याति ३। उपाध्यायं पदातिं गमयति। क्षियाशीरिति प्लुतः ॥

३९६७–धर्मव्यतिक्रममें ह युक्त प्रथमा तिङ्विभक्ति अनुदात्त न हो, यथा–स्वयं ह रथेन याति ३। उपाध्यायं पदातिं गमयति। "क्षियाशीः ३६३०" इससे प्लुत हुआ है। शिष्यका रथमें बैठकर जाना उपाध्यायका पैदल जाना आचारविरुद्ध है ॥

३९६८ अहेति विनियोगे च।८।१।६१॥

अहयुक्ता प्रथमा तिङ्भक्तिर्नानुदात्ता नानाप्रयोजने नियोगे क्षियायां च। त्वमह ग्रामं गच्छ। त्वमह रथेनारण्यं गच्छ। क्षियायां स्वयमह रथेन याति ३। उपाध्यायं पदातिं नयति ॥

३९६८–नानाप्रयोजनक नियोग और क्षिया अर्थात् धर्मव्यतिक्रमार्थमें अहयुक्त प्रथमा तिङ्विभक्ति अनुदात्त न हो, यथा–त्वमह ग्रामं गच्छ। त्वमह रथेनारण्यं गच्छ। क्षियामें यथा–स्वयमह रथेन याति ३। उपाध्यायं पदातिं नयति ॥

३९६९ चाहलोप एवेत्यवधारणम्। ८।१।६२॥

च अह एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता। देव एव ग्रामं गच्छतु। देव एवारण्यं गच्छतु। ग्राममरण्यं च गच्छत्वित्यर्थः। देव एव ग्रामं गच्छतु। राम एवारण्यं गच्छतु। ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः। इहाहलोपः स च केवलार्थः। अवधारणं किम्। देव क्व भोक्ष्यसे। न क्वचिदित्यर्थः। अनवक्लृप्तावेव ॥

३९६९–अवधारणार्थक एव शब्दप्रयोगमें च और अह यह दोनों निपातका लोप होनेपर प्रथमा तिङ्विभक्ति अनुदात्त न हो, यथा–देव एव ग्रामं गच्छतु। देव एवारण्यं गच्छतु अर्थात् ग्राम और अरण्यको जायँ। देव एव ग्रामं गच्छतु। राम एवारण्यं गच्छतु। अर्थात् केवल ग्राम और केवल अरण्यको जायँ। इस स्थलमें अह शब्दका लोप है, वह केवलार्थक है। अवधारणार्थ न होनेपर कैसा होगा ? तो देव क्व भोक्ष्यसे, अर्थात् देव कहां भोजन करोगे ? कहीं नहीं। इस स्थलमें अनवक्लृप्ति अर्थमें एव शब्द प्रयुक्त है ॥

३९७० चादिलोपे विभाषा ।८।१।६३॥

चवाहाहैवानां लोपे प्रथमातिङ्विभक्तिर्नानुदात्ता। चलोपे। इन्द्र वाजेषु नोऽव। शुक्ला व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति। वालोपे। व्रीहिभिर्यजेत। यवैर्यजेत ॥

३९७०–च, वा, ह, अह और एव शब्दके लोपमें प्रथमा तिङ्विभक्ति विकल्प करके अनुदात्त न हो, चलोपमें यथा–इन्द्र वाजेषु नोऽव। शुक्ला व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति। वा शब्दका लोप होनेपर यथा–व्रीहिभिर्यजेत। यवैर्यजेत ॥

३९७१ वैवावेति च च्छन्दसि।८।१।६४॥

अहवै देवानामासीत्। अयं वाव हस्त आसीत् ॥

३९७१–वेदमें वै और वाव शब्दके योगमें प्रथमा तिङ्विभक्ति विकल्प करके अनुदात्त न हो, यथा–अहवै देवानामासीत्। अयं वाव हस्त आसीत् ॥

३९७२ एकान्याभ्यां समर्थाभ्याम्। ८। १। ६५॥

आभ्यां युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता छन्दसि। अजामेकां जिन्वति। प्रजामेकां रक्षति। तयोरन्यः पिप्पलं स्वाद्वत्ति। समर्थाभ्यां किम्। एको देवानुपातिष्ठत्। एक इति संख्यापरं नान्यार्थम् ॥

३९७२–वेदमें तुल्यार्थवाचक एक और अन्य शब्दोंके योगमें प्रथम तिङन्त पद विकल्प करके अनुदात्त न हों, यथा–"अजामेकां जिन्वति"। "प्रजामेकां रक्षति"। तयोरन्यः पिप्पलं स्वाद्वत्ति (ऋ० २। ३। १७) समर्थन होनेपर यथा–"एको देवानुपातिष्ठत्"। इस स्थलमें एक शब्द संख्यावाचक है। अन्यार्थक नहीं है। जिन्वति= जिवि=इदित् होनेसे नुम्, लट्, तिप्, शप् ॥

३९७३ यद्वृत्तान्नित्यम्। ८। १।६६॥

यत्र पदे यच्छब्दस्ततः परं तिङन्तं नानुदात्तम्। यो भुङ्क्ते। यद्वयङ्गायुर्वाति। अत्र व्यवहिते कार्यमिष्यते ॥

३९७३–जिस पदमें यद् शब्द है उसके उत्तर तिङन्त पद अनुदात्त न हो, यथा–यो भुङ्क्ते। यद्वयङ्गायुर्वाति। इस स्थलमें यत् पदके और तिङन्त पदके मध्यमें कोई

पदका व्यवधान रहते अनुदात्त इष्ट है। यद्र्यङ् यद्+अञ्च्+क्विन् " विष्वग्देवयोश्च " इससे टिको अद्रि आदेश हुआ ॥

३९७४ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ।८।१।६७॥

पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम् । काष्ठाध्यापकः । मलोपश्च वक्तव्यः ॥*॥ दारुणाध्यापकः । अज्ञाताध्यापकः ॥ समासान्तोदात्तत्वापवादः । एतत्समास इष्यते ॥ नेह। दारुणमध्यापक इति वृत्तिमतम् । पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेपि नानन्तर्यमाश्रीयत इति ॥

३९७४-पूजनार्थक काष्ठादि शब्दोंके उत्तर पूजितवाचक शब्द अनुदात्त हो, यथा-काष्ठाध्यापकः मकारका लोप हो * दारुणाध्यापकः । अज्ञाताध्यापकः । यह समासान्तोदात्तका अपवाद है । यह समासमें ही होगा । दारुणमध्यापकः इस स्थलमें नहीं होगा,यह वृत्तिकारका अभिप्राय है । "पूजनात्" इस पदके द्वारा पूजित शब्दका ग्रहण होजाता, फिर किस कारण पुनर्वार पूजितग्रहण किया ? अनन्तर पूजित शब्दकी प्राप्तिके निमित्त ऐसा ग्रहण किया है । यह ज्ञापक है कि, इस प्रकरणमें पञ्चमी निर्देश रहते भी आनन्तर्य्य आश्रित नहीं होगा । काष्ठादि शब्द यथा-काष्ठ, दारुण, कल्याण, अनुक्त, इत्यादि हैं ॥

३९७५ सगतिरपि तिङ् ।८।१।६८॥

पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम् । यत्काष्ठं प्रपचति । तिङ्ङतिङः इति निघातस्य निपातैर्यदिति निषेधे प्राप्ते विधिरयम्। सगतिग्रहणाच्च गतिरपि निहन्यते ॥ गतिग्रहणे उपसर्गग्रहणमिष्यते ॥ * ॥ नेह । यत्काष्ठं शुक्लीकरोति ॥

३९७५-पूजनार्थक काष्ठादि शब्दोंके उत्तर गतिसहित तिङन्त पूजित पद अनुदात्त हो, यथा-यत्काष्ठं प्रपचति । " तिङ्ङतिङः (३९३५)" इस सूत्रसे विहित निघात स्वरको " निपातैर्यत्० (३९३७) " इस सूत्रसे निषेधकी प्राप्ति होनेपर यह विधि जानना चाहिये । सगति पदका ग्रहण करनेसे केवल गतिसंज्ञकको भी निघात स्वर हो।

गति शब्दका ग्रहण करनेसे उपसर्गका ग्रहण इष्ट है*अत एव " यत्काष्ठं शुक्ली करोति " इस स्थलमें अनुदात्त नहीं हुआ । जिस स्थलमें तुल्य योगमें सह शब्द है उस स्थलमें दोनोंको ही कार्य होता है, यथा-सपुत्रो भोज्यताम् । ऐसा कहनेसे पिता और पुत्र दोनोंका भोजन समझना । अपि शब्दका ग्रहण करनेसे जिस स्थलमें गति संज्ञकका योग नहीं होगा, उस स्थलमें केवल तिङन्तको ही होगा । गतिसंज्ञक शब्दका प्रयोग होनेपर दोनोंके साथ ही होगा । तिङ्ग्रहणसे पूर्वयोगका अतिङ्विषयत्व ज्ञापित होता है ॥

३९७६ कुत्सने च सुप्यगोत्रादौ ।८।१।६९॥

कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः । पचति पूति । प्रपचति पूति । पचति मिथ्या । कुत्सने किम् । प्रपचति शोभनम् । सुपि किम् । पचति क्लिश्नाति । अगोत्रादौ किम् । पचति गोत्रम् ॥ क्रियाकुत्सन इति वाच्यम्॥*॥ कर्तुः कुत्सने मा भूत् । पचति पूतिर्देवदत्तः ॥ पूति श्चानुबन्ध इति वाच्यम् ॥ * ॥ तेनायं चकारानुबन्धत्वादन्तोदात्तः ॥ बावह्वर्थमनुदात्तमिति वाच्यम् ॥ * ॥ पचन्तिपूति ॥

३९७६-कुत्सनार्थ गोत्रादिभिन्न सुबन्त पद परे रहते सगति और अगति अर्थात् गतिसंज्ञक शब्द करके युक्त अथवा अयुक्त जो तिङन्त पद वह अनुदात्त हो, यथा-पचति पूति । प्रपचति पूति । पचति मिथ्या । प्रपचति मिथ्या । कुत्सनार्थ न होनेपर प्रपचति शोभनम् । सुबन्त पद परे न होनेपर पचति क्लिश्नाति । गोत्रादि होनेपर पचति गोत्रम् ।

क्रियाके कुत्सन अर्थमें तिङन्त अनुदात्त हो, ऐसा कहना चाहिये * कर्त्ताके कुत्सन अर्थ होनेपर नहीं होगा । यथा-" पचति पूतिर्देवदत्तः " ।

अनुबन्धसहित पूति शब्द रहते तिङन्त अनुदात्त हो ऐसा कहना चाहिये* चकारानुबन्धसे यह अन्तोदात्त है, तिबन्त पूति शब्द आद्युदात्त है अत एव चकारानुबन्धत्वके कारण वह अन्तोदात्त होगा ।

बहुवचनान्त तिङन्त पद विकल्प करके अनुदात्त हो * जब तिङन्तको निघात स्वर हो, तबपूति शब्द अन्तोदात्त है अन्य स्थलमें आद्युदात्त है, यथा-पचन्ति पूति ॥

३९७७ गतिर्गतौ ।८।१।७०॥

अनुदात्तः । अभ्युद्धरति । गतिः । किम् । दत्तः पचति । गतौ किम् । आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ॥

३९७७-गतिसंज्ञक परे रहते गतिसंज्ञक अनुदात्त हो । यथा-अभ्युद्धराति । गतिसंज्ञक न होनेपर यथा-दत्तः पचति । गति परे न रहते यथा-" आमन्द्रैरिन्द्र " । हरिभिर्याहि मयूररोमभिः ॥

३९७८ तिङि चोदात्तवति ।८।१।७१॥

गतिरनुदात्तः यत्प्रपचति । तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् । अन्यथा हि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात् प्रत्यये न स्यात् । उदात्तवति किम् । प्रपचति ॥

॥ इति तिङन्तस्वराः ॥

३९७८-उदात्त स्वर विशिष्ट तिङन्त पद परे रहते गतिसंज्ञक शब्द उदात्त हो, यह सूत्र " निपाता आद्युदात्ताः "

इस सूत्रका अपवाद है । यथा–यत्प्रपचति "निपातैर्यद्यदि०" इस सूत्रसे निघात स्वरके प्रतिषेधके कारण तिङन्त पदको उदात्त स्वर होगा। उदात्त विशिष्टके परिमाणार्थ तिङ् शब्दका ग्रहण हुआ है । अन्यथा 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा' इस वचनबलसे उदात्त स्वर विशिष्ट धातु परे रहते गतिसंज्ञक उदात्त होंगे, उदात्त स्वर विशिष्ट प्रत्यय परे रहते न होंगे, उदात्त स्वर न होनेपर यथा–प्रपचति ॥

इति तिङन्तस्वर प्रकरणम् ।

अथ वैदिकवाक्येषु स्वरसञ्चारप्रकारः कथ्यते । अग्निमीळ इति प्रथमा ऋक् । तत्राग्निशब्दोऽव्युत्पत्तिपक्षे फिष इत्यन्तोदात्त इति माधवः । वस्तुतस्तु घृतादित्वात् । व्युत्पत्तौ तु निप्रत्ययस्वरेण । अम् सुप्त्वादनुदात्तः । अमि पूर्व इत्येकादेशस्त्वेकादेश उदात्तेनेत्युदात्तः । ईळे । तिङ्ङतिङ इति निघातः । संहितायां तूदात्तादनुदात्तस्येतीकारः स्वरितः । स्वरितात्संहितायामिति ळे इत्यस्य प्रचयापरपर्याया एकश्रुतिः। पुरःशब्दोन्तोदात्तः पूर्वाधरावराणामित्यसिप्रत्ययस्वरात् । हितशब्दोपि धाञो निष्ठायां दधातेर्हिरिति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः । पुरोऽव्ययमिति गतिसंज्ञायां कुगतीति समासे समासान्तोदात्तेतत्पुरुषे तुल्यार्थेत्यव्ययपूर्वपदप्रकृतिस्वरे गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वपूर्वोपमर्देन प्राप्ते गतिरनन्तर इति पूर्वपदप्रकृतिस्वरः । पुरःशब्दोकारस्य संहितायां प्रचये प्राप्ते उदात्तस्वरितपरस्य सन्नतर इत्यनुदात्ततरः । यज्ञस्य । नङः प्रत्ययस्वरः । विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वम् । देवम् । पचाद्यच् । फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तः । ऋत्विक्छब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । होतृशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । रत्नशब्दो नब्विषयस्येत्याद्युदात्तः । रत्नानि दधातीति रत्नधाः । समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वान्तोदात्तः । तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचयावित्यादि यथाशास्त्रमुन्नेयम् ॥

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ॥
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ॥१॥

इति सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितविरचितायां वैदिकस्वरप्रक्रिया ॥

अब वैदिक प्रकरणमें स्वरसमूहकी संचारप्रणाली कही जातीहै । अग्निमीळेपुरोहितं यज्ञस्य देवमृत्विजम् होतारं रत्नधातमम्" यह ऋग्वेदका प्रथम ऋक् अर्थात् मंत्र है । इस स्थानमें अग्नि शब्द अव्युत्पत्ति पक्षमें "फिष०" इस सूत्रसे अन्तोदात्त होगा, यह माधव कहतेहैं । वास्तवमें घृतादित्वके कारण अन्तोदात्त है किन्तु व्युत्पत्तिविषयमें नि प्रत्ययस्वरसे अम् सुप् होनेके कारण अनुदात्त है । "अमि पूर्वः" इस सूत्रसे एकादेश तो "एकादेश उदात्तेन० ३६५८" इस सूत्रसे उदात्त स्वर हुआ । ईळे[1] इससे "तिङ्ङतिङः ३९३५" इस सूत्रसे निघात हुआ । किन्तु संहितामें "उदात्तानुदात्तस्य० (३६६०)" अर्थात् उदात्तके परे अनुदात्त स्वरित हो, इस सूत्रसे ईकारको स्वरित स्वर हुआ । "स्वरितात्संहितायाम् ३६६८" इस सूत्रसे "ळे" इस भागको प्रचयापरपर्य्याय एकश्रुतिस्वर हुआ । पुरः शब्द अन्तोदात्त है "पूर्वाधरावरा०" इस सूत्रसे जो असि प्रत्यय हुआहै उसके स्वरसे इस स्थलमें पुरः शब्द अन्तोदात्त है । हित शब्द धा धातुके उत्तर क्त प्रत्यय और धातुके स्थानमें हि आदेश करके निष्पन्न हुआहै । यह प्रत्यय स्वरसे अन्तोदात्त है । "पुरोऽव्ययम् (७६८)" इस सूत्रसे गतिसंज्ञा सिद्ध होनेपर और "कुगति० ७६१" इस सूत्रसे समास होनेपर समासान्तोदात्त और "तत्पुरुषे तुल्यार्थ० ३७३६" इस सूत्रसे अव्यय पूर्वपद प्रकृतिस्वर "गतिकारकोपपदात्कृत् ३८७३" इस सूत्रसे कृदुत्तर पद प्रकृतिस्वर और थाथादिस्वर पूर्वपूर्वके उपमर्द्दद्वारा प्राप्त होनेपर "गतिरनन्तरः ३७८३" इस सूत्रसे पूर्वपद प्रकृतिस्वर हुआ । पुरःशब्दोकारके संहिता होनेपर प्रचय प्राप्त होनेपर "उदात्त स्वरित परस्य सन्नतरः ३६६९" इस सूत्रसे अनुदात्ततर स्वर होता है । यज्ञस्य । इस पदके नङ्को प्रत्ययस्वर हुआ । विभक्तिको सुप्त्वके कारण अनुदात्तत्व होनेपर स्वरित हुआ । देवम् । इस स्थलमें पचादित्वके कारण अच्, फिट्स्वर, प्रत्ययस्वर, और चित्स्वरद्वारा अन्तोदात्त है । ऋत्विक् शब्द कृदुत्तरपद प्रकृतिस्वरसे अन्तोदात्त है । होतृ शब्द तृन्प्रत्ययान्त है, यह नित्स्वरसे आद्युदात्त है । रत्न शब्द "नब्विषयस्य २६" इस सूत्रसे आद्युदात्त है । रत्नानि दधाति इस विग्रहमें रत्नधाः। समासस्वरसे अथवा कृदुत्तर पद प्रकृतिस्वरसे अन्तोदात्त है । तमप्का पकार इत्संज्ञक होनेके कारण अनुदात्त होनेपर स्वरित और प्रचय इत्यादि यथाशास्त्र जानने, इस प्रकारसे वैदिक प्रयोगोंके समूहोंका सम्पूर्णांश दिखाया गया ॥

इति श्रीमत्कान्यकुब्जवंशोद्भवपण्डितसुखानन्दमिश्रात्मज–ज्वालाप्रसादमिश्रकृत–भाषाटीकायां सिद्धान्तकौमुद्यां स्वरप्रकरणं समाप्तम् ॥

---

१ ईळे–ईड स्तुतौ लट् उत्तम पुरुषका एकवचन इट् टिको एत्व । 'द्वयोश्चास्यस्वरयोः' इस प्रातिशाख्य सूत्रसे ळः, यज्ञस्य=यज इसको "यजयाच०" इससे नङ् । ऋत्विजम्=ऋतु+यज+क्विन्, "वचिस्वपि०" इससे सम्प्रसारण, "नब्विषयस्य०," इससे इसन्त वर्जित नित्य नपुंसकको आदि उदात्त होताहै ॥

लिङ्गानुशासनम्।

अथ स्त्र्यधिकारः।

१ 'लिङ्गम्' ॥

१-लिंगम् ॥

२ 'स्त्री' ॥ अधिकारसूत्रे एते ॥

२-स्त्री, यह दोनों अधिकार सूत्र हैं, परन्तु दोनोंको अधिकारसूत्रत्व होनेपर भी 'लिङ्गम्' इसका शास्त्रसमाप्तिपर्य्यन्त और 'स्त्री' इसका "ताराधारा" इस सूत्रपर्य्यन्त अधिकार चलेगा, यह पार्थक्य है ॥

३ 'ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः' ॥ ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। स्वस्रादिपञ्चकस्यैव ङीब्निषेधेन कर्त्रीत्यादेर्ङीपा ईकारान्तत्वात्। तिसृचतस्रोस्तु स्त्रियामादेशतया विधानेपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् ॥

३-ऋकारान्त मातृ, दुहितृ, स्वसृ, योतृ और ननान्द (ननान्द) यह पांच ही शब्द स्त्रीलिङ्ग हैं, कारण कि, स्वस्रादि पांच ही शब्दोंके उत्तर स्त्रीलिङ्गमें विहित ङीप्के निषेधके कारण, कर्त्री इत्यादि पदोंको ङीप्के योगसे ईकारान्तत्व होजाताहै और स्त्रीलिङ्गमें तिसृ, चतसृ आदेश होनेके कारण उनको ऋकारान्त होनेपर भी त्रि और चतुर शब्दको ऋदन्तत्व नहीं है ॥

४ 'अन्यूप्रत्ययान्तो धातुः' ॥ अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनिः। चमूः। प्रत्ययग्रहणं किम्। देवयतेः क्विप्। द्यूः। विशेष्यलिङ्गः ॥

४-अनिप्रत्ययान्त और ऊप्रत्ययान्त धातुजात शब्द स्त्रीलिङ्ग हों, यथा-अवनिः। चमूः। प्रत्यय ग्रहणका प्रयोजन क्या है? तो दिव् धातुके उत्तर क्विप् करके 'द्यू' यह पद स्त्रीलिङ्ग न हो, यह विशेष्यलिङ्ग है ॥

५ 'अशनिभरण्यरणयः पुंसि च' ॥ इयमयं वा अशनिः ॥

५-अशनि, भरणि, अरणि शब्द पुंलिङ्गमें और स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयमयं वा अशनिः ॥

६ 'मिन्यन्तः' ॥ मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूमिः। ग्लानिः ॥

६-मि प्रत्ययान्त और नि प्रत्ययान्त धातुजात शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-भूमिः ग्लानिः ॥

७ 'वह्निवृष्ण्यग्नयः पुंसि' ॥ पूर्वस्यापवादः ॥

७-वह्नि, वृष्णि और अग्नि शब्द पुँलिङ्गमें प्रयुक्त हों, यह सूत्र पूर्वसूत्रका अपवाद है ॥

८ 'श्रोणियोन्यूर्मयः पुंसि च' ॥ इयमयं वा श्रोणिः ॥

८-श्रोणि, योनि और ऊर्मि शब्द पुँलिङ्ग और स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयमयं वा श्रोणिः ॥

९ 'क्तिन्नन्तः' ॥ स्पष्टम्। कृतिरित्यादि ॥

९-क्तिन् प्रत्ययान्त शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-कृतिः इत्यादि ॥

१० 'ईकारान्तश्च' ॥ ईप्रत्ययान्तः स्त्री स्यात्। लक्ष्मीः ॥

१०-ई प्रत्ययान्त शब्द स्त्रीलिंगमें प्रयुक्त हो, यथा-लक्ष्मीः ॥

११ 'ऊङाबन्तश्च' ॥ कुरूः। विद्या ॥

११-ऊङ् प्रत्ययान्त और आबन्त शब्दोंका स्त्रीलिंगमें प्रयोग हो, यथा-कुरूः। विद्या ॥

१२ 'य्वन्तमेकाक्षरम्' ॥ श्रीः। भूः। एकाक्षरं किम्। पृथुश्रीः ॥

१२-ईकारान्त, ऊकारान्त एकाक्षर शब्दका स्त्रीलिंगमें प्रयोग हो, यथा-श्रीः। भूः। एकाक्षर न होनेपर कैसा होगा? तो 'पृथुश्रीः' यह शब्द पुँलिंग है ॥

१३ 'विंशत्यादिरानवतेः' ॥ इयं विंशतिः। त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः ॥

१३-विंशतिसे नवतिपर्यन्त संख्यावाचक शब्दोंका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं विंशतिः। इयं त्रिंशत्। इयं चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः ॥

१४ 'दुन्दुभिरक्षेषु' ॥ इयं दुन्दुभिः। अक्षेषु किम्। अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः ॥

१४-अक्ष अर्थमें दुन्दुभि शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं दुन्दुभिः। अक्ष अर्थ न होनेपर पुँलिङ्ग होगा, यथा-अयं दुन्दुभिः, । अर्थात् वाद्यविशेष वा असुर ॥

१५ 'नाभिरक्षत्रिये' ॥ इयं नाभिः ॥

१५-अक्षत्रिय अर्थमें नाभि शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं नाभिः ॥

१६ 'उभावप्यन्यत्र पुंसि' ॥ दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः। नाभिः क्षत्रियः। कथं तर्हि-"समुल्लसत्पंकजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः" इति भारविः उच्यते। दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम्। वस्तुतस्तु। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्यात्पुंस्त्वमपीह साधु। अत एव-"नाभिर्मुख्यनृपे चक्रमध्यक्षत्त्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे" इति मेदिनी। रभसोऽप्याह-"मुख्यराट् क्षत्त्रिये नाभिः पुंसि प्राण्यंगके द्वयोः। चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे" इति। एवमेवंविधेऽन्यत्रापि बोध्यम् ॥

१६-दुन्दभि और नाभि शब्द पूर्वोक्तार्थसे भिन्न अर्थमें पुँल्लिङ्ग हों, यथा-नाभिः क्षत्रियः अक्षत्रिय वाच्यमें स्त्रीलिङ्ग होनेसे भारविका " समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः " ऐसा प्रयोग किस प्रकार सिद्ध हुआ? इस विषयमें कहते हैं कि, दृढभक्तिः इत्यादि प्रयोगोंकी समान कोमलैः इस स्थलमें सामान्यमें नपुंसकलिङ्ग है । वास्तविक तो "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इस भाष्यके अनुसार इस स्थलमें पुँल्लिङ्ग भी साधु है, अत एव " नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे " ऐसा मेदिनीमें लिखा है । रभसने भी कहा है कि, "मुख्यराट् क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे " । इसी प्रकार अन्यत्र भी ऐसे जगहमें समझना ॥

१७ 'तलन्तः' ॥ अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामस्य समूहो ग्रामता । देव एव देवता ॥

१७-तल्प्रत्ययान्त शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-शुक्लस्य भावः=शुक्लता । ब्राह्मणस्य कर्म=ब्राह्मणता । ग्रामस्य समूहः=ग्रामता । देव एव=देवता ॥

१८ 'भूमिविद्युत्सरिल्लतावनिताभिधानानि'॥ भूमिर्भूः । विद्युत्सौदामनी । सरिन्निम्नगा । लता वल्ली । वनिता योषित् ॥

१८-भूमि, विद्युत्, सरित्, लता और वनितावाचक शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-भूमिः-भूः । विद्युत्-सौदामनी । सरिन्निम्नगा । लता-वल्ली । वनिता-योषित् ॥

१९ 'यादो नपुंसकम्' ॥ यादःशब्दः सरिद्वाचकोपि क्लीबं स्यात् ॥

१९-यादस् शब्द नदीवाचक होनेपर भी स्त्रीलिङ्ग न होकर क्लीबलिङ्गमें प्रयुक्त हो ॥

२० 'भाःस्रुक्स्रग्दिगुष्णिगुपानहः' ॥ एते स्त्रियां स्युः । इयं भाः इत्यादि ॥

२०-भास्, स्रुच्, स्रज्, दिश्, उष्णिह्, उपानह् शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं भाः । इत्यादि ॥

२१ 'स्थूणोर्णे नपुंसके च' ॥ एते स्त्रियां क्लीबे च स्तः । स्थूणा-स्थूणम् । ऊर्णा-ऊर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका । ऊर्णा तु मेषादिलोम ॥

२१-स्थूणा और ऊर्ण शब्द क्लीबलिङ्ग और स्त्रीलिङ्गमें प्रयुक्त हों, यथा--स्थूणा, स्थूणम् । ऊर्णा, ऊर्णम् । स्थूणा शब्दसे काष्ठमयी द्विकर्णिका (खूँटी) समझना । ऊर्णा शब्दसे मेषका लोम समझना ॥

२२ 'गृहशशाभ्यां क्लीबे' ॥ नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । "शशोर्णं शशलोमनि" इत्यमरः ॥

२२-क्रमसे गृह और शश शब्दके परे स्थित स्थूणा और ऊर्णा शब्द क्लीब हों, यह सूत्र नियमार्थक है कि, गृह और शश शब्दके परे ही क्रमसे स्थूणा और ऊर्णा शब्द नपुंसक हो, यथा-गृहस्थूणम् । शशोर्णम्, अर्थात् शशलोम । "शशोर्णं शशलोमनि " ऐसा अमरकोश है ॥

२३ 'प्रावृड्विप्रुड्रुट्तृड्विट्त्विषः' ॥ एते स्त्रियां स्युः ॥

२३-प्रावृष्, विप्रुष्, रुष्, तृष्, विश्, और त्विष् शब्दका स्त्रीलिंङ्गमें प्रयोग हो ॥

२४ 'दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यंगुलयः' ॥ एते स्त्रियां स्युः । पक्षे ङीष् । दर्वी-दर्विरित्यादि ॥

२४-दर्वि, विदि, वेदि, खनि, शानि, अश्रि, वेशि, कृषि, ओषधि, कटि, और अङ्गुलि शब्दोंका स्त्रीलिङ्गमें प्रयोग हो, विकल्प करके ङीष् प्रत्यय भी होकर यथा-दर्वी, दर्विः । इत्यादि ॥

२५ 'तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः' ॥ एते प्राग्वत् । इयं तिथिरित्यादि । अमरस्त्वाह—"तिथयो द्वयोः" इति । तथा च भारविः-"तस्य भुवि बहुतिथास्तिथय " इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च-"निखिलान्निशि पौर्णिमातिथीन्" इति ॥

२५-तिथि, नाडि, रुचि, वीचि, नालि, धूलि, किकि, केलि, छवि, रात्रि आदि शब्दोंका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं तिथिः । अमरसिंहने तो " तिथयो द्वयोः " ऐसा कहा है और भारविने " तस्य भुवि बहुतिथास्तिथयः " ऐसा प्रयोग किया है । स्त्रीत्व होनेपर तो "बहुतिथ्यः" ऐसा प्रयोग होजाता । श्रीहर्षनेभी " निखिलान्निशि पौर्णिमातिथीन् " ऐसे प्रयोग किया है ॥

२६ 'शष्कुलिराजिकुट्यशनिवर्त्तिभ्रुकुटित्रुटिवलिपंक्तयः' ॥ एतेऽपि स्त्रियां स्युः । इयं शष्कुलिः ॥

२६-शष्कुलि, राजि, कुटि, अशनि, वर्त्ति, भ्रुकुटि, त्रुटि, वलि, पंक्ति शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं शष्कुलिः ॥

२७ 'प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः' ॥ इयं प्रतिपदित्यादि । उषा उच्छन्ती । उषाः प्रातरधिष्ठात्री देवता ॥

२७-प्रतिपद्, आपद्, विपद्, सम्पद्, शरद्, संसद्, परिषद्, उषस्, संवित्, क्षुत्, पुत्, मुत्, समिध्, शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं प्रतिपद् । उषाः उच्छन्ती । उषाः अर्थात् प्रातरधिष्ठात्री देवता ॥

२८ 'आशीर्धूःपूर्गीर्द्वारः' ॥ इयमाशीरित्यादि ॥

२८-आशिष्, धुर्, पुर्, गिर्, और द्वार् शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयमाशीः इत्यादि ॥

२९ 'अप्सुमनस्समासिकतावर्षाणां बहुत्वं च' ॥ अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च । आप इमाः । "स्त्रियः सुमनसः पुष्पम्" "सुमना मालती जातिः" । देववाची तु पुंस्येव । "सुपर्वाणः सुमनसः" बहुत्वं प्रायिकम् । एका च सिकता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्यप्रयोगात् । समांसमां विजायत इत्यत्र समायांसमायामिति भाष्याच्च । विभाषाघ्राधे· डिति सूत्रे अघ्रासातां सुमनसाविति वृत्तिव्या· ख्यायां हरदत्तोऽप्येवम् ॥

२९-अप्, सुमनस्, समा, सिकता, वर्षा यह पांच शब्द स्त्रीलिङ्गमें और बहुवचनमें प्रयुक्त हों, यथा-आपः इमाः । " स्त्रियः सुमनसः पुष्पम् " । " सुमना मालती जतिः " । देवतावाचक सुमनस् शब्द तो पुँल्लिङ्ग ही है, यथा-" सुपर्वाणः सुमनसः " । इनका बहुत्वविधान प्रायिक है कारण कि, " एका च सिकता तैलदानेऽसमर्था " ऐसा अर्थवत् सूत्रमें भाष्य प्रयोग है और "समांसमां विजायते" इस स्थलमें " समायांसमायाम् " ऐसा भाष्यमें वर्णित है । और " विभाषाघ्राधेट्० " इस सूत्रमें " अघ्रासातां सुमनसौ " ऐसा वृत्तिव्याख्यामें हरदत्तने भी कहा है ॥

३० ' स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिजः ' ॥ इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक् ॥

३०-स्रज्, त्वच्, ज्योक्, वाच्, यवागू, नौ और स्फिच् शब्दका स्त्रीलिङ्गमें प्रयोग हो, यथा-इयं स्रक् । त्वक् । ज्योक् । वाक् । यवागूः । नौः । स्फिक् ॥

३१ 'तृटिसीमासंबध्याः' ॥ इयं तृटिः । सीमा । सम्बध्या ॥

३१-तृटि, सीमा और संबध्या शब्द स्त्रीलिङ्गमें प्रयुक्त हों, यथा-इयं तृटिः । सीमा । संबध्या ॥

३२ 'चुल्लिवेणिखार्यश्च' ॥ स्पष्टम् ॥

३२-चुल्लि, वेणि, खारि शब्द स्त्रीलिङ्गमें प्रयुक्त हों ॥

३३ 'ताराधाराज्योत्स्नादयश्च' ॥

३३-तारा, धारा, ज्योत्स्ना आदि शब्द स्त्रीलिङ्गमें प्रयुक्त हों ॥

३४ 'शलाका स्त्रियां नित्यम्' ॥ नित्यग्रहण- मन्येषां क्वचिद्व्यभिचारं ज्ञापयति ॥

॥ इति स्त्र्यधिकारः ॥

३४-शलाका शब्द नित्य स्त्रीलिङ्ग हो, नित्य शब्द ग्रहण अन्य शब्दोंके स्त्रीत्वका कहीं २ व्यभिचार ज्ञापन करता है । जिस २ स्थानमें व्यभिचार होता है, वह पहिले ही कह- दिया है ॥

इति स्त्रीलिङ्गप्रकरणम् ।

अथ पुँल्लिङ्गाधिकारः ।

३५ 'पुमान्' ॥ अधिकारोयम् ॥

३५-यहांसे पुँल्लिङ्गका अधिकार है ॥

३६ 'घञबन्तः' ॥ पाकः । त्यागः । करः । गरः । भावार्थ एवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिन्नादिभि- र्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम् । सम्बन्धम· नुवर्तिष्यत इति ॥

३६-घञ् और अप्प्रत्ययान्त शब्द पुँल्लिंग हों, यथा- पाकः । त्यागः । अप् यथा-करः । गरः । भाववाच्यमें विहित जो घञ् और अप् तदन्तमें ही यह सूत्र प्रवृत्त होगा, कारण कि, नपुंसकत्वविशिष्टभावमें क्त और ल्युट् प्रत्यय और स्त्रीत्वविशिष्टभावमें क्तिन् आदि प्रत्यय बाधक होजाता- है कर्म्मादिवाच्यमें घञ् आदि प्रत्ययान्त शब्द भी विशेष्य- लिंग होंगे, अत एव भाष्यकारने " सम्बन्धमनुवर्तिष्यते " यहां कर्मवाच्यमें घञ् करके क्लीबलिंगका प्रयोग किया है ॥

३७ ' घाजन्तश्च' ॥ विस्तरः । गोचरः । चयः । जयः । इत्यादि ॥

३७-घ और अच्प्रत्ययान्त पद पुँल्लिङ्गमें प्रयुक्त हों, विस्तरः । गोचरः । चयः । जयः । इत्यादि ॥

३८ 'भयलिङ्गभगपदानि नपुंसके ॥ एतानि नपुंसके स्युः । भयम् । लिङ्गम् । भगम् । पदम्॥

३८-भय, लिङ्ग, भग और पद शब्द क्लीबलिङ्गमें प्रयुक्त हों, यथा-भयम् । लिङ्गम् । भगम् । पदम् ॥

३९ 'नङन्तः' ॥ नङ्प्रत्यान्तः पुंसि स्यात् । यज्ञः । यत्नः ॥

३९-नङ्प्रत्ययान्त शब्दका पुँल्लिङ्गमें प्रयोग हो, यथा- यज्ञः । यत्नः ॥

४० 'याच्ञा स्त्रियाम्' ॥ पूर्वस्यापवादः ॥

४०-याच्ञा शब्द स्त्रीलिङ्गमें प्रयुक्त हो, यह सूत्र पूर्वसूत्रका अपवाद है ॥

४१ 'क्यन्तो घुः' ॥ किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । क्यन्तः किम् । दानम् । घुः किम् । जज्ञिर्बीजम् ॥

४१-किप्रत्ययान्त घुसंज्ञक धातुनिष्पन्न शब्द अर्थात् दा और धा धातुनिष्पन्न शब्द पुँल्लिङ्ग हों,यथा-आधिः । निधिः। उदधिः । किप्रत्ययान्त न होनेपर न होगा, यथा-दानम् । घुसंज्ञक न होनेपर यथा-जज्ञिर्बीजम् ॥

४२ 'इषुधिः स्त्री च' ॥ इषुधिशब्दः स्त्रियां पुंसि च ॥ पूर्वस्यापवादः ॥

४२-इषुधि शब्द स्त्रीलिङ्ग और पुँल्लिङ्गमें प्रयुक्त हो, यह पूर्वसूत्रका अपवाद है ॥

४३ 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपंकाभिधानानि' ॥ एतानि पुंसि स्युः । देवाः सुराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रोऽब्धिः । नखः करुरुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरो मार्गणः । पंकः कर्दम इत्यादि ॥

४३–देव, असुर, आत्मन्, स्वर्ग, गिरि, समुद्र, नख, केश, दन्त, स्तन, भुज, कण्ठ, खड्ग, शर और पंक-वाचक शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–देवाः सुराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रोऽब्धिः । नखः करुरुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजः दोः । कण्ठो गलः । खड्गो करवालः । शरो मार्गणः । पंकः कर्दमः । इत्यादि ॥

४४ 'त्रिविष्टपत्रिभुवने नपुंसके' ॥ स्पष्टम् । तृतीयं विष्टपं त्रिविष्टपम् । स्वर्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः ॥

४४–त्रिविष्टप और त्रिभुवन शब्द क्लीवलिंग हों, तृतीयं विष्टपम्=त्रिविष्टपम् । स्वर्ग पर्याय होनेसे पुंस्त्व प्राप्त होनेपर, उसके निवारणके निमित्त यह सूत्र कियाहै ॥

४५ 'द्यौः स्त्रियाम्' ॥ द्योदिवोस्तन्त्रेणोपादानमिदम् ॥

४५–द्यौ और दिव् शब्द स्त्रीलिंगमें प्रयुक्त हों, यहां द्यो और दिव् शब्दका तन्त्रसे उपादान है । (स्वर्गवाचक होनेके कारण पुँल्लिंगत्व प्राप्त था उसके निषेध करनेके लिये यह सूत्र कियाहै) ॥

४६ 'इषुबाहू स्त्रियां च' ॥ चात्पुंसि ॥

४६–इषु और बाहु शब्द स्त्रीलिंगमें प्रयुक्त हों, चकार-निर्देशके कारण पुँल्लिंगमें भी प्रयुक्त हों ॥

४७ 'बाणकाण्डौ नपुंसके च' ॥ चात्पुंसि । त्रिविष्टपेत्यादिचतुःसूत्री देवासुरेत्यस्यापवादः ॥

४७–बाण और काण्ड शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों "त्रिविष्टप" इत्यादि चार सूत्र "देवासुर०" इस सूत्रके अपवाद हैं ॥

४८ 'नान्तः' ॥ अयं पुंसि । राजा । तक्षा । न च चर्मवर्मादिष्वतिव्याप्तिः । मन्व्यच्कोकर्तरीति नपुंसकप्रकरणे वक्ष्यमाणत्वात् ॥

४८–नकारान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–राजा । तक्षा । ऐसे होनेपर चर्मन् और वर्मन् आदि शब्दोंमें अतिव्याप्ति तो नहीं कहसकते हो, क्यों कि, मन्प्रत्ययान्त दो अच् विशिष्ट शब्द क्लीवलिंगमें प्रयुक्त हों कर्तृवाच्यमें नहीं ऐसा नपुंसक प्रकरणमें वक्ष्यमाण है ॥

४९ 'क्रतुपुरुषकपोलगुल्फमेघाभिधानानि' ॥ क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः ॥

४९–क्रतु, पुरुष, कपोल, गुल्फ और मेघवाचक शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः ॥

५० 'अभ्रं नपुंसकम्' ॥ पूर्वस्यापवादः ॥

५०–अभ्र शब्द नपुंसकलिंगमें प्रयुक्त हो, यह सूत्र पूर्वसूत्रका अपवाद है ॥

५१ 'उकारान्तः' ॥ अयं पुंसि स्यात् । प्रभुः । इक्षुः । "हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् ॥ द्वयोः कपोलावयवे" इति मेदिनिः । "करेणुरिभ्यां स्त्री नेभे" इत्यमरः । एवं जातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तंच––"लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इति । एवमन्यत्रापि ॥

५१–उकारान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–प्रभुः । इक्षुः । "हट्टविलासिनी नृत्यारम्भ और रोगार्थमें हनु शब्द स्त्रीलिंग है" कपोलोंके अवयवार्थमें पुँल्लिंग और स्त्रीलिंग है" स्त्रीलिंग है ऐसा मेदिनी है करेणु शब्द हस्तिनी अर्थमें हस्ती होनेपर पुँल्लिंग है, इस प्रकार विशेष वचन से अनाक्रान्त जो हो, वह प्रकृत सूत्रका विषयीभूत है, कहा है कि, यदि विशेषसूत्र बाधक न हो तो लिंगका शेषविधि ग्राह्य होताहै इस प्रकार अन्यत्र भी समझना ॥

५२ 'धेनुरज्जुकुहुसरयुतनुरेणुप्रियंगवः' ॥ स्त्रियाम् ॥

५२–धेनु, रज्जु, कुहु, सरयु, तनु, रेणु और प्रियंगु शब्द स्त्रीलिंगमें प्रयुक्त हों ॥

५३ 'समासे रज्जुः पुंसि च' ॥ कर्कटरज्जुना-कर्कटरज्ज्वा ॥

५३–समासमें रज्जु शब्द पुँल्लिंगमें भी प्रयुक्त हो, कर्कटरज्जुना, कर्कटरज्ज्वा ॥

५४ 'श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके' ॥

५४–श्मश्रु, जानु, वसु, स्वादु, अश्रु, जतु, त्रपु और तालु शब्द क्लीबलिंगमें प्रयुक्त हों ॥

५५ 'वसु चार्थवाचि' ॥ अर्थवाचीति किम् । "वसुर्मयूखाग्निधनाधिपेषु" ॥

५५–धनवाचक वसु शब्द नपुंसकलिंगमें प्रयुक्त हो, धनवाचक न होनेपर यथा–"वसुर्मयूखाग्निधनाधिपेषु" ॥

५६ 'मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च' ॥ चात्पुंसि । अयं मद्गुः इदं मद्गु ॥

५६–मद्गु, मधु, सीधु, शीधु, सानु, कमण्डलु शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों, यथा–अयम् मद्गुः, इदम् मद्गु ॥

५७ 'रुत्वन्तः' ॥ मेरुः । सेतुः ॥

५७–रु और तु शब्दान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–मेरुः । सेतुः ॥

५८ 'दारुकसेरुजतुवस्तुमस्तूनि नपुंसके' ॥ रुत्वंत इति पुंस्त्वस्यापवादः । इदं दारु ॥

५८-दारु, कसेरु, जतु, वस्तु और मस्तु शब्द नपुंसकलिंगमें प्रयुक्त हों, यह सूत्र "रुत्वन्तः" इस पूर्वोक्त सूत्रसे प्राप्त पुंस्त्वका अपवाद है, यथा-इदं दारु ॥

५९ 'सक्तुर्नपुंसके च' ॥ चात्पुंसि । सक्तुः-सक्तु ॥

५९-सक्तु शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हो, यथा-सक्तुः, सक्तु ॥

६० 'प्राग्रश्मेरकारान्तः' ॥ रश्मिदिवसाभिधानमिति वक्ष्यति प्रागेतस्मादकारान्त इत्यधिक्रियते ॥

६०-" रश्मिदिवसाभिधानम् " इस सूत्रके पूर्वपर्यन्त "अकारान्त" शब्दका अधिकार है-॥

६१ 'कोपधः' ॥ कोपधोऽकारान्तः पुंसि स्यात् । स्तबकः । कल्कः ॥

६१-ककारोपध अकारान्त शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-स्तबकः । कल्कः ॥

६२ 'चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके' ॥ पूर्वसूत्रापवादः ॥

६२-ककारोपध अकारान्त चिबुक, शालूक, प्रातिपदिक, अंशुक, उल्मुक शब्द नपुंसकलिंगमें प्रयुक्त हों, यह सूत्र पूर्वसूत्रका अपवाद है ॥

६३ 'कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च' ॥ चात्पुंसि । अयं कण्टकः । इदं कण्टकमित्यादि ॥

६३-ककारोपध अकारान्त कण्टक, अनीक, सरक, मोदक, चषक, मस्तक, पुस्तक, तडाक, निष्क, शुष्क, वर्चस्क, पिनाक, भाण्डक, पिण्डक, कटक, शण्डक, पिटक, तालक, फलक और पुलाक शब्द नपुंसक और पुँल्लिंगमें प्रयुक्त हों, यथा-अयं कण्टकः, इदं कण्टकम् । इत्यादि ॥

६४ 'टोपधः' ॥ टोपधोऽकारान्तः पुंसि स्यात् । घटः । पटः ॥

६४-अकारान्त टकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-घटः । पटः । इत्यादि ॥

६५ 'किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके' ॥ किरीटमित्यादि ॥

६५-अकारान्त टकारोपध किरीट, मुकुट, ललाट, वट, वीट, शृंगाट, कराट और लोष्ट शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा-किरीटम् । इत्यादि ॥

६६ 'कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च' ॥ चात्पुंसि । कुटः-कुटमित्यादि ॥

६६-अकारान्त टकारोपध, कुट, कूट, कपट, कवाट, कर्पट, नट, निकट, कीट और कट शब्द क्लीबलिंग और पुँल्लिंगमें प्रयुक्त हों, यथा कुटः, कुटम् । इत्यादि ॥

६७ 'णोपधः' ॥ णोपधोऽकारान्तः पुंसि स्यात् । गुणः । गणः । पाषाणः ॥

६७-अकारान्त णकारोपध शब्द पुँल्लिंग में प्रयुक्त हों, यथा-गुणः । गणः । पाषाणः । इत्यादि ॥

६८ 'ऋणलवणपर्णतोरणरणोष्णानि नपुंसके' ॥ पूर्वसूत्रापवादः ॥

६८-अकारान्त णकारोपध ऋण, लवण, पर्ण, तोरण, रण और उष्ण शब्द नपुंसकलिंगमें प्रयुक्त हों, यह पूर्वसूत्रका अपवाद है ॥

६९ 'कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च' ॥ चात्पुंसि ॥

६९-अकारान्त णकारोपध कार्षापण, स्वर्ण, सुवर्ण, व्रण, चरण, वृषण, विषाण, चूर्ण और तृण शब्द नपुंसक और पुँल्लिंगमें प्रयुक्त हों, यथा-कार्षापणः, कार्षापणम् । इत्यादि ॥

७० 'थोपधः' ॥ रथः ॥

७०-अकारान्त थकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-रथः ॥

७१ 'काष्ठपृष्ठसिक्थोक्थानि नपुंसके' ॥ इदं काष्ठमित्यादि ॥

७१-अकारान्त काष्ठ, पृष्ठ, सिक्थ, और उक्थ शब्द नपुंसकलिंगमें प्रयुक्त हों, इदं काष्ठम् इत्यादि ॥

७२ 'काष्ठा दिगर्था स्त्रियाम्' ॥ इमाः काष्ठाः ॥

७२-काष्ठा शब्द दिग्वाचक होनेपर स्त्रीलिंगमें प्रयुक्त हो, यथा-इमाः काष्ठाः ॥

७३ 'तीर्थप्रोथयूथगाथानि नपुंसके च' ॥ चात्पुंसि । अयं तीर्थः । इदं तीर्थम् ॥

७३-अकारान्त थकारोपध तीर्थ, प्रोथ, यूथ और गाथ शब्द पुँल्लिंग और नपुंसकलिंगमें प्रयुक्त हों, यथा-अयं तीर्थः, इदं तीर्थम् ॥

७४ 'नोपधः' ॥ अदन्तः पुंसि । इनः । फेनः ॥

७४-अकारान्त नकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-इनः । फेनः ॥

७५ 'जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके' ॥ पूर्वस्यापवादः ॥

७५-अकारान्त नकारोपध जघन, अजिन, तुहिन, कानन, वन वृजिन, विपिन, वेतन, शासन, सोपान, मिथुन, श्मशान, रत्न, निम्न, और चिह्न शब्द नपुंसकलिंगमें प्रयुक्त हों, यह पूर्वसूत्रका अपवाद है ॥

७६ 'मानयानाऽभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसम्भावनविभावनविमानानि नपुंसके च' ॥

चात्पुंसि। अयं मानः। इदं मानम्॥

७६–अकारान्त नकारोपध, मान, यान, अभिधान, नलिन, पुलिन, उद्यान, शयन, आसन, स्थान, चन्दन, आलान, सम्मान, भवन, वसन, संभावन, विभावन और विमान शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों, यथा–अयं मानः, इदं मानम्। इत्यादि॥

७७ 'पोपधः'॥अदन्तः पुंसि। यूपः। दीपः। सर्पः॥

७७–अकारान्त पकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–यूपः। दीपः। सर्पः॥

७८ 'पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके'॥ इदं पापमित्यादि॥

७८–अकारान्त पकारोपध, पाप, रूप, उडुप, तल्प, शिल्प, पुष्प, शष्प, समीप और अन्तरीप शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–इदं पापम्॥

७९ 'शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च'॥ अयं शूर्पः। इदं शूर्पमित्यादि॥

७९–अकारान्त पकारोपध, शूर्प, कुतप, कुणप, द्वीप और विटप शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों, यथा–अयं शूर्पः। इदं शूर्पम् इत्यादि॥

८० 'भोपधः'॥ स्तम्भः। कुम्भः॥

८०–अकारान्त भकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–स्तम्भः। कुम्भः॥

८१ 'तलभं नपुंसकम्'॥ पूर्वस्यापवादः॥

८१–अकारान्त तलभ शब्द नपुंसकलिंगमें प्रयुक्त हो, यह सूत्र पूर्वसूत्रका अपवाद है॥

८२ 'जृम्भं नपुंसके च'॥ जृंभम्। जृम्भः॥

८२–अकारान्त जृम्भ शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हो, यथा–जृम्भम्, जृम्भः॥

८३ 'मोपधः'॥ सोमः। भीमः॥

८३–अकारान्त मकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–सोमः। भीमः॥

८४ 'रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके'॥ इदं रुक्ममित्यादि॥

८४–अकारान्त मकारोपध, रुक्म, सिध्म, युग्म, इध्म, गुल्म, अध्यात्म और कुंकुम शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–इदं रुक्मम्। इत्यादि॥

८५ 'संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च'॥ चात्पुंसि। अयं संग्रामः। इदं संग्रामम्॥

८५–अकारान्त मकारोपध, संग्राम, दाडिम, कुसुम, आश्रम, क्षेम, क्षौम, होम और उद्दाम शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों, यथा–अयं संग्रामः, इदं संग्रामम्। इत्यादि॥

८६ 'योपधः'॥ समयः। हयः॥

८६–अकारान्त यकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–हयः। समयः॥

८७ 'किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके'॥ स्पष्टम्॥

८७–अकारान्त यकारोपध, किसलय, हृदय, इन्द्रिय और उत्तरीय शब्द नपुंसकलिंगमें प्रयुक्त हों॥

८८ 'गोमयकषायमलयान्वयाव्ययानि नपुंसके च'॥ गोमयः। गोमयम्॥

८८–अकारान्त यकारोपध, गोमय, कषाय, मलय, अन्वय और अव्यय शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों, यथा–गोमयः, गोमयम्। इत्यादि॥

८९ 'रोपधः'॥ क्षुरः। अङ्कुरः॥

८९–अकारान्त रकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–क्षुरः। अंकुरः॥

९० 'द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनीरतीरदूरकृच्छ्ररंध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके'॥ इदं द्वारमित्यादि॥

९०–अकारान्त रकारोपध द्वार, अग्र, स्फार, तक्र, वक्र, वप्र, क्षिप्र, क्षुद्र नीर, तीर, दूर, कृच्छ्र, रन्ध्र, अश्र, श्वभ्र, भीर, गभीर, क्रूर, विचित्र, केयूर, केदार, उदर, अजस्र, शरीर, कन्दर, मन्दार, पञ्जर, अजर, जठर, अजिर, वैर, चामर, पुष्कर, गह्वर, कुहर, कुटीर, कुलीर, चत्वर, काश्मीर, नीर, अम्बर, शिशिर, तंत्र, यंत्र, क्षत्र, क्षेत्र मित्र, कलत्र, चित्र, मूत्र, सूत्र, वक्त्र, नेत्र, गोत्र, अंगुलित्र, भलत्र, अस्त्र, शस्त्र, शास्त्र, वस्त्र, पत्र, पात्र और छत्र शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–इदं द्वारम्। इत्यादि॥

९१ 'शुक्रमदेवतायाम्'॥ इदं शुक्रं रेतः॥

९१–अकारान्त रकारोपध शुक्र शब्द देवताभिन्नार्थमें नपुंसकलिंग हो, यथा–इदं शुक्रम्, अर्थात् रेतः। (देवतार्थमें पुँल्लिंग होगा यथा–शुक्रो दैत्यगुरुः)॥

९२ 'चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृंगारभृंगारमन्दारोशीरतिमिरशिशिराणि नपुंसके च'॥ चात्पुंसि। चक्रः–चक्रमित्यादि॥

९२–अकारान्त रकारोपध चक्र, वज्र, अन्धकार, सार, आवार, पार, क्षीर, तोमर, शृंगार, भृङ्गार, मन्दार, उशीर, तिमिर और शिशिर, शब्द नपुंसक और पुँल्लिङ्गमें प्रयुक्त हों, यथा–चक्रः, चक्रम्। इत्यादि॥

९३ 'षोपधः' ॥ वृषः । वृक्षः ॥

९३-अकारान्त षकारोपध शब्द पुँल्लिङ्गमें प्रयुक्त हों, यथा-वृषः । वृक्षः ॥

९४ 'शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके' ॥

९४-शिरीष, ऋजीष, अंबरीष, पीयूष, पुरीष, किल्बिष और कल्माष शब्द क्लीबलिंगमें प्रयुक्त हों ॥

९५ 'यूषकरीषमिषविषवर्षाणि नपुंसके च' ॥ चात्पुंसि । अयं यूषः । इदं यूषमित्यादि ॥

९५-यूष, करीष, मिष, विष और वर्ष शब्द नपुंसक और चकारसे पुँल्लिंगमें प्रयुक्त हों, यथा-अयं यूषः, इदं यूषम् ॥

९६ 'सोपधः' ॥ वत्सः।वायसः। महानसः ॥

९६-अकारान्त सकारोपध शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-वत्सः । वायसः । महानसः ॥

९७ 'पनसबिसबुससाहसानि नपुंसके' ॥

९७-पनस, बिस, बुस और साहस शब्द नपुंसकलिंगमें प्रयुक्त हों ॥

९८ 'चमसांसरसनिर्यासोपवासकार्पासवासभासकासकांसमांसानि नपुंसके च' ॥ इदं चमसम् । अयं चमस इत्यादि ॥

९८-चमस, अंस,रस, निर्यास, उपवास, कार्पास, वास, भास, कास, कांस और मांस शब्द क्लीब और पुँल्लिंगमें प्रयुक्त हों, यथा-इदम् चमसम् , अयं चमसः । इत्यादि ॥

९९ 'कंसं चाप्राणिनि' ॥ ''कंसोऽस्त्री पानभाजनम्''। प्राणिनि तु। कंसो नाम कश्चिद्राजा॥

९९-अप्राणी अर्थमें कंस शब्द नपुंसक और पुँल्लिंगमें प्रयुक्त हो । कंस शब्दसे पीनेका पात्र समझना । प्राणी होनेपर पुँल्लिंगमें प्रयुक्त होगा, यथा-कंसो नाम कश्चिद्राजा ॥

१०० 'रश्मिदिवसाभिधानानि' ॥ एतानि पुंसि स्युः । रश्मिर्मयूखः । दिवसो घस्रः ॥

१००-रश्मि और दिवसवाचक शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-रश्मिर्मयूखः । दिवसो घस्रः । इत्यादि ॥

१०१ 'दीधितिः स्त्रियाम्' ॥ पूर्वस्यापवादः॥

१०१-दीधिति शब्द स्त्रीलिंगमें प्रयुक्त हो, यह पूर्वसूत्रका अपवाद है ॥

१०२ 'दिनाहनी नपुंसके'॥अयमप्यपवादः॥

१०२-दिन और अहन् शब्द नपुंसकलिंगमें प्रयुक्त हों, यह भी अपवादसूत्र है ॥

१०३ 'मानाभिधानानि' ॥ एतानि पुंसि स्युः । कुडवः । प्रस्थः ॥

१०३-मानवाचक शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-कुडवः । प्रस्थः ॥

१०४ 'द्रोणाढकौ नपुंसके च' ॥ इदं द्रोणम्। अयं द्रोणः ॥

१०४-द्रोण और आढक शब्द नपुंसक और पुँल्लिंगमें प्रयुक्त हों, यथा-इदं द्रोणम् , अयं द्रोणः ॥

१०५ 'खारीमानिके स्त्रियाम्' ॥ इयं खारी । इयं मानिका ॥

१०५-खारी और मानिका शब्द स्त्रीलिंगमें प्रयुक्त हों, यथा-इयं खारी । इयं मानिका ॥

१०६ 'दाराक्षतलाजासूनां बहुत्वं च' ॥ इमे दाराः ॥

१०६-दार, अक्षत, लाज और असु शब्दको बहुत्व और चकारसे पुंस्त्व हो, यथा-इमे दाराः ॥

१०७ 'नाडयपजनोपपदानि व्रणाङ्गपदानि'॥ यथासंख्यं नाडयाद्युपपदानि व्रणादीनि पुंसि स्युः । अयं नाडीव्रणः । अपाङ्गः । जनपदः । व्रणादीनामुभयलिङ्गत्वेपि क्लीबत्वनिवृत्त्यर्थं सूत्रम् ॥

१०७-नाडी अप और जन शब्द उपपद रहते क्रमसे व्रण, अंग और पद शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-नाडीव्रणः । अपांगः । जनपदः । व्रणादि शब्दोंके उभयलिंगत्व होनेपर भी क्लीबत्वनिवृत्त्यर्थ यह सूत्र किया है ॥

१०८ 'मरुद्गरुत्तरदृत्विजः' ॥ अयं मरुत् ॥

१०८-मरुत्, गरुत्, तरत् और ऋत्विज् शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-अयं मरुत् ॥

१०९ 'ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः' ॥ एते पुंसि स्युः । अयमृषिः ॥

१०९-ऋषि, राशि, दृति, ग्रन्थि, क्रिमि, ध्वनि, बलि, कौलि, मौलि, रवि, कवि, कपि और मुनि शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-अयमृषिः । इत्यादि ॥

११० 'ध्वजगजमुञ्जपुञ्जाः' ॥ एते पुंसि ॥

११०-ध्वज, गज, मुञ्ज और पुञ्ज शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-ध्वजः । इत्यादि ॥

१११ 'हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः' ॥ एते पुंसि । अमरस्तु-'मुहूर्तोऽस्त्रियाम्' इत्याह ॥

१११-हस्त, कुन्त, अन्त, व्रात, वात, दूत, धूर्त, सूत, चूत और मुहूर्त शब्द पुँल्लिंगमें प्रयुक्त हों, अमरकोषमें तो मुहूर्त शब्दको स्त्रीभिन्न सब लिंग कहाहै ॥

११२ 'षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः' ॥ अयं षण्डः ॥

११२-षण्ड, मण्ड, करण्ड, भरण्ड, वरण्ड, तुण्ड, गण्ड, मुण्ड, पाषण्ड और शिखण्ड शब्द पुँल्लिंगमें प्रयुक्त हों, यथा-अयं षण्डः ॥

११३ 'वंशांशपुरोडाशाः' ॥ अयं वंशः। पुरो दाश्यते पुरोडाशः। कर्मणि घञ्। भवव्याख्यानयोः प्रकरणे पौरोडाशपुरोडाशात्ष्ठन्निति विकारप्रकरणे व्रीहेः पुरोडाश इति च निपातनात्प्रकृतसूत्र एव निपातनाद्वा दस्य डत्वम्। "पुरोडाशभुजामिष्टम्" इति माघः॥

११३-वंश, अंश और पुरोडाश शब्द पुँल्लिगमें प्रयुक्त हों, यथा-अयं वंशः। पुरो दाश्यते इस विग्रहमें "पुरोडाशः" यहां कर्ममें घञ् हुआ। भव और व्याख्यान प्रकरणमें "पौरोडाशपुरोडाशात्ष्ठन् १४४९" इस सूत्रमें और विकार प्रकरणमें "व्रीहेः पुरोडाशे १५२८" इस सूत्रमें निपातनसे अथवा प्रकृतसूत्रमें निपातनसे द के स्थानमें ड हुआ। अतएव "पुरोडाशभुजामिष्टम्" ऐसा माघमें प्रयोग है॥

११४ 'ह्रदकन्दकुन्दबुद्बुदशब्दाः' ॥ अयं ह्रदः॥

११४-ह्रद, कन्द, कुन्द, बुद्बुद और शब्द पुँल्लिगमें प्रयुक्त हों, यथा-अयं ह्रदः। इत्यादि॥

११५ 'अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः'॥ अयमर्घः॥

११५-अर्घ, पथिन्, मथिन्, ऋभुक्षिन्, स्तम्ब, नितम्ब और पूग शब्द पुँल्लिगमें प्रयुक्त हों, यथा-अयमर्घः॥

११६ 'पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरंगतुरंगगन्धस्कन्धमृदंगसंगसमुद्रपुङ्खाः'। अयं पल्लव इत्यादि॥

११६-पल्लव, पल्वल, कफ, रेफ, कटाह, निर्व्यूह, मठ, मणि, तरंग, तुरंग, गन्ध, स्कन्ध, मृदंग, संग, समुद्र और पुंख शब्द पुँल्लिगमें प्रयुक्त हों, यथा-अयं पल्लवः। इत्यादि॥

११७ 'सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः'॥ एत । अयं सारथिः॥

॥ इति पुँल्लिगाधिकारः॥

११७-सारथि, अतिथि, कुक्षि, वस्ति, पाणि और अञ्जलि शब्द पुँल्लिगमें प्रयुक्त हों, यथा-अयं सारथिः। इत्यादि॥

इति पुँल्लिगाधिकारः।

अथ नपुंसकाधिकारः।

११८ 'नपुंसकम्' ॥ अधिकारोऽयम्॥

११८-यहांसे नपुंसकाधिकार आरम्भ हुआहै-॥

११९ 'भावे ल्युडन्तः' ॥ हसनम्। भावे किम्। पचनोऽग्निः। इध्मव्रश्चनः कुठारः॥

११९-भाववाच्यमें जो ल्युट् तदन्त शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा-हसनम्। भाववाच्यमें न होनेपर पुँल्लिंग होगा, यथा-पचनः, अर्थात् अग्निः। इध्मव्रश्चनः, अर्थात् कुठारः॥

१२० 'निष्ठा च' ॥ भावे या निष्ठा तदन्तं क्लीबं स्यात्। हसितम्। गीतम्॥

१२०-भाववाच्यमें विहित जो निष्ठा (क्त प्रत्यय) तदन्त शब्द नपुंसकलिंग हों, यथा-हसितम्। गीतम्। इत्यादि॥

१२१ 'त्वष्यञौ तद्धितौ' ॥ शुक्लत्वम्। शौक्ल्यम्॥ ष्यञः षित्त्वसामर्थ्यात्पक्षे स्त्रीत्वम्। चातुर्यम्-चातुरी। सामग्र्यम्-सामग्री। औचित्यम्-औचिती॥

१२१-तद्धितके मध्यमें त्व और ष्यञ् जो प्रत्यय तदन्त शब्द नपुंसकलिङ्ग हों, यथा-शुक्लत्वम्; शौक्ल्यम्। ष्यञ् प्रत्ययको षित्त्वसामर्थ्यके कारण विकल्प करके स्त्रीलिङ्ग होगा। यथा-चातुर्य्यम्, चातुरी। सामग्र्यम्, सामग्री। औचित्यम्, औचिती॥

१२२ 'कर्मणि च ब्राह्मणादिगुणवचनेभ्यः'॥ ब्राह्मणस्य कर्म ब्राह्मण्यम्॥

१२२-कर्म्म होनेपर ब्राह्मणादि शब्द और गुणवाचक शब्दोंके उत्तर जो ष्यञ् तदन्त शब्द नपुंसकलिंग हों, यथा-ब्राह्मणस्य कर्म्म ब्राह्मण्यम्॥

१२३ 'यद्यढग्यगञ्ण्वुञ्छाश्च भावकर्मणि'॥ एतदन्तानि क्लीबानि॥ स्तेनाद्यन्नलोपश्च। स्तेयम्। सख्युर्यः। सख्यम्। कपिज्ञात्योर्ढक्। कापेयम्। पत्यन्तपुरोहितादिभ्यो यक्। आधिपत्यम्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। औष्ट्रम्। हायनान्तयुवादिभ्योऽण्। द्वैहायनम्। द्वन्द्वमनोज्ञादिभ्यो वुञ्। पितापुत्रकम्। होत्राभ्यश्छः। अच्छावाकीयम्॥ अव्ययीभावः। अधिस्त्रि॥

१२३-भाव और कर्म्म होनेपर जो यत्, य, ढक्, यक्, अञ्, अण, वुञ्, और छ प्रत्यय तदन्त शब्द नपुंसकलिङ्ग हों। "स्तेनाद्यन्नलोपश्च १७९०" इस सूत्रसे स्तेन शब्दके उत्तर यत् प्रत्यय और नकारका लोप हुआ है। "स्तेनस्य भावः स्तेयम्"। "सख्युर्यः १७९१" सख्यम्। "कपिज्ञात्योर्ढक् १७९२" कापेयम्। "पत्यन्तपुरोहितादिभ्यो यक १७९३" आधिपत्यम्। "प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् १७९४" औष्ट्रम्। "हायनान्तयुवादिभ्योऽण् १७९५" द्वैहायनम्। "द्वन्द्वमनोज्ञादिभ्यो वुञ्" पितापुत्रकम्। "होत्राभ्यश्छः १८०" अच्छावाकीयम्। अव्ययीभाव समास संज्ञक शब्द नपुंसकलिङ्ग हों, यथा-अधिस्त्रि॥

१२४ 'द्वन्द्वैकत्वम्' ॥ पाणिपादम्॥

१२४-समाहारद्वन्द्व समास शब्द नपुंसकलिङ्ग हों, यथा-पाणिपादम्॥

१२५ 'अभाषायां हेमन्तशिशिरावहोरात्रे च' ॥ स्पष्टम् ॥

१२५-भाषाभिन्नार्थमें और अहोरात्रार्थमें हेमन्त और शिशिर शब्द पुँल्लिङ्ग और नपुंसकलिङ्ग हों ॥

१२६ 'अनञ्कर्मधारयस्तत्पुरुषः' ॥ अधिकारोयम् ॥

१२६-यहांसे अनञ् कर्मधारय और तत्पुरुषका अधिकार आरम्भ हुआ ॥

१२७ 'अनल्पे छाया' ॥ शरच्छायम् ॥

१२७-अनल्पार्थमें समासान्त छाया शब्द नपुंसकलिंग हो, यथा-शरच्छायम् ॥

१२८ 'राजामनुष्यपूर्वा सभा' ॥ इनसभमित्यादि ॥

१२८-राजपूर्वक और मनुष्यपूर्वक सभा शब्द क्लीबलिंग हो, यथा-इनसभम् । इत्यादि ॥

१२९ 'सुरासेनाच्छायाशालानिशा स्त्रियां च'॥

१२९-सुरा, सेना, छाया, शाला और निशा शब्द स्त्रीलिंग और नपुंसकलिंग हों, ॥

१३० 'परवत्' ॥ अन्यस्तत्पुरुषः परवल्लिंगः स्यात् ॥ रात्राह्नाहाः पुंसि ॥

१३०-अन्य तत्पुरुषमें परवल्लिङ्ग हो, रात्र, अह और अह शब्द अन्तमें हों ऐसे शब्द पुँल्लिंग हों ॥

१३१ 'अपथपुण्याहे नपुंसके' ॥

१३१-अपथ और पुण्याह शब्द नपुंसकलिंग हों ॥

१३२ 'संख्यापूर्वा रात्रिः' ॥ त्रिरात्रम् । संख्यापूर्वेति किम् । सर्वरात्रः ॥

१३२-संख्यावाचक शब्द पूर्वक रात्रि शब्द नपुंसकलिंग हो, यथा-त्रिरात्रम् । संख्यापूर्वक न होनेपर पुँल्लिंग हो । यथा-सर्वरात्रः ॥

१३३ 'द्विगुः स्त्रियां च' ॥ व्यवस्थया । पञ्चमूली । त्रिभुवनम् ॥

१३३-द्विगु समास शब्द स्त्रीलिंग और नपुंसकलिंग हों, यथा-पञ्चमूली । त्रिभुवनम् । इत्यादि ॥

१३४ 'इसुसन्तः' ॥ हविः । धनुः ॥

१३४-इस् और उस् अन्तमें हों ऐसे शब्द नपुंसकलिंगम हों, यथा-हविः । धनुः ॥

१३५ 'अर्चिः स्त्रियां च' ॥ इसन्तत्वेपि अर्चिः स्त्रियां नपुंसके च स्यात् । इयमिदं वा अर्चिः ॥

१३५-अर्चिः शब्द स्त्रीलिंग हो, इस् अन्तमें होनेपर भी अर्चिः शब्द स्त्रीलिंग और नपुंसकलिंग हो, यथा-इयमिदं वा अर्चिः ॥

१३६ 'छदिः स्त्रियामेव' ॥ इयं छदिः । छाद्यते अनेनेति छदेश्चुरादिण्यन्तादर्चिशुचीत्यादिना इस् । इस्मन्नित्यादिना ह्रस्वः । "पटलं छदिः" इत्यमरः । तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः ॥

१३६-छदि शब्द स्त्रीलिंग हो, यथा-इयं छदिः । "छाद्यते अनेन" इस वाक्यमें चुरादिगणीय णिजन्त छद धातुके उत्तर "अर्चिशुचि" इत्यादि सूत्रसे इस् प्रत्यय, "इस्मन्०" इस सूत्रसे ह्रस्व होगा । अमरकोषमें "पटलं छदिः" ऐसा प्रयोग होनेसे अमरकोषके व्याख्याताने पटल शब्दके साहचर्य्यके कारण छदि शब्दको नपुंसकलिंग होना कहा है, किन्तु वह ग्राह्य नहीं है ॥

१३७ 'मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि' ॥ एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहं कालम् । वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम् । कार्मुकं शरासनम् । विवरं बिलम् । जलं वारि । हलं लांगलम् । धनं द्रविणम् । अन्नमशनम् । अस्यापवादानाह त्रिसूत्र्या ॥

१३७-मुख, नयन, लोह, वन, मांस, रुधिर, कार्म्मुक, विवर, जल, हल, धन और अन्नवाचक शब्द नपुंसकलिंग हों, यथा-मुखम्।आननम्-नयनम्-लोचनम्। लोहम्-कालम्। वनं-गहनम् । मांसमामिषम् । रुधिरम्-रक्तम्। कार्म्मुकं-शरासनम् । विवरं-बिलम् । जलम्-वारि । हलम्-लाङ्गलम् । धनम्-द्रविणम् । अन्नम्-अशनम् । इस सूत्रका अपवाद त्रिसूत्री करके कहा है ॥

१३८ 'सीरार्थौदनाः पुंसि' ॥

१३८-सीर अर्थ और ओदन शब्द पुँल्लिंगमें प्रयुक्त हों ॥

१३९ 'वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च' ॥ वक्त्रो वक्त्रम् । नेत्रो नेत्रम् । अरण्योऽरण्यम् । गाण्डीवो गाण्डीवम् ॥

१३९-वक्त्र, नेत्र, अरण्य और गाण्डीव शब्द पुँल्लिंग और नपुंसकलिंगमें प्रयुक्त हों, यथा-वक्त्रो, वक्त्रम् । नेत्रो, नेत्रम् । अरण्योऽरण्यम् । गाण्डीवो, गाण्डीवम् ॥

१४० 'अटवी स्त्रियाम्' ॥

१४०-अटवी शब्द स्त्रीलिंगमें प्रयुक्त हो ॥

१४१ 'लोपधः' ॥ कुलम् । कूलम् । स्थलम् ॥

१४१-लकारोपध शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा-कुलम्, कूलम् । स्थलम् ॥

१४२ 'तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि' ॥ अयं तूलः ॥

१४२–तूल, उपल, ताल, कुसूल, तरल, कम्बल, देवल और वृषल शब्द पुँल्लिंगमें प्रयुक्त हों, यथा–अयं तूलः । इत्यादि ॥

१४३ 'शीलमूलमंगलसालकमलतलमुसलकुण्डलपललमृणालवालवालनिगलपलालबिडालखिलशूलाः पुंसि च' ॥ चात् क्लीबे । इदं शीलमित्यादि ॥

१४३–शील, मूल, मंगल, साल, कमल, तल, मुसल, कुण्डल, पलल, मृणाल, बाल, वाल, निगल, पलाल, बिडाल, खिल और शूल शब्द पुँल्लिंग और नपुंसकलिंगमें प्रयुक्त हों, यथा–शीलः, शीलम् । इत्यादि ॥

१४४ 'शतादिः संख्या' ॥ शतम् । सहस्रम् । शतादिरिति किम् । एको द्वौ बहवः । संख्येति किम् । शतशृंगो नाम पर्वतः ॥

१४४–शतादिसंख्यावाचक शब्द नपुंसकलिङ्गमें प्रयुक्त हों । यथा–शतम् । सहस्रम् । शतादिभिन्न होनेपर पुँल्लिङ्ग होगा । यथा–एकः । द्वौ । बहवः । किन्तु संख्या न होनेपर संज्ञा होनेपर पुँल्लिंग होगा । यथा–शतशृङ्गः । अर्थात् तन्नामक पर्वत ॥

१४५ 'शतायुतप्रयुताः पुंसि च' ॥ अयं शतः । इदं शतमित्यादि ॥

१४५–शत, अयुत और प्रयुत शब्द पुँल्लिंग और नपुंसक लिंगमें प्रयुक्त हों, यथा–अयं शतः, इदं शतमित्यादि ॥

१४६ 'लक्षा कोटिः स्त्रियाम्' ॥ इयं लक्षा । इयं कोटिः । "वा लक्षा नियुतं च तत्" इत्यमरात् क्लीबेपि लक्षम् ॥

१४६–लक्षा और कोटि शब्द स्त्रीलिंगमें प्रयुक्त हों, यथा–इयं लक्षा । इयं कोटिः । अमरकोषमें " वा लक्षा नियुतं च तत् " ऐसा निर्देश करनेसे लक्ष शब्द नपुंसकलिंग भी होगा । यथा–लक्षम् ॥

१४७ 'शंकुः पुंसि' ॥ सहस्रः क्वचित् । अयं सहस्रः । इदं सहस्रम् ॥

१४७–शङ्कु शब्द पुँल्लिंग हो, अर्थविशेषमें सहस्र शब्द पुंल्लिङ्ग और नपुंसकलिङ्गमें प्रयुक्त हो, यथा–सहस्रः, सहस्रम् ॥

१४८ 'मन्व्यन्नकोऽकर्तरि' ॥ मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्यात्र तु कर्तरि । वर्म । चर्म । द्व्यच्कः किम् । अणिमा । महिमा । अकर्तरि किम् । ददाति इति दामा ॥

१४८–मन्प्रत्ययान्त दो स्वर विशिष्ट शब्द नपुंसकलिंगमें प्रयुक्त हों, कर्तृवाच्यमें न हों, यथा–चर्म्म । वर्म्म । दो स्वर विशिष्ट न होनेपर स्त्रीलिंग हो, यथा–अणिमा । महिमा । कर्तृवाच्य होनेपर यथा, ददाति इति दामा ॥

१४९ 'ब्रह्मन् पुंसि च' ॥ अयं ब्रह्मा । इदं ब्रह्म ॥

१४९–ब्रह्मन् शब्द पुँल्लिंग और नपुंसकलिंगमें प्रयुक्त हो, यथा–अयं ब्रह्मा, इदं ब्रह्म ॥

१५० 'नामरोमणी नपुंसके' ॥ मन्व्द्यचक इत्यस्यायं प्रपञ्चः ॥

१५०–नामन् और रोमन् शब्द नपुंसकलिंगमें प्रयुक्त हों, यह सूत्र " मन्द्व्यच्कः०" इस सूत्रका प्रपंचमात्र है ॥

१५१ 'असन्तो द्व्यच्कः' ॥ यशः । मनः । तपः । द्व्यच्कः किम् । चन्द्रमाः ॥

१५१–अस् अन्तमें हो ऐसे दो स्वरविशिष्ट शब्द नपुंसकलिंगमें प्रयुक्त हों । यथा–यशः । मनः । तपः । दो अच् न होनेपर पुँल्लिंग होगा । यथा–चन्द्रमाः ॥

१५२ 'अप्सराः स्त्रियाम्' ॥ एता अप्सरसः । प्रायेणायं बहुवचनान्तः ॥

१५२–अप्सरस् शब्द स्त्रीलिंगमें प्रयुक्त हो, यथा–एता अप्सरसः । अप्सरः शब्द प्रायः बहुवचनान्त है ॥

१५३ 'त्रान्तः' ॥ पत्रम् । छत्रम् ॥

१५३–त्रप्रत्ययान्त शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा–पत्रम् । छत्रम् ॥

१५४ 'यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव' ॥

१५४–त्रप्रत्ययान्त यात्रा, मात्रा, भस्त्रा, दंष्ट्रा और वरत्रा शब्द स्त्रीलिंगमें प्रयुक्त हों ॥

१५५ 'भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि' ॥ अयं भृत्रः । न मित्रममित्रः । "तस्य मित्राण्यमित्रास्ते" इति माघः । "स्याताममित्रौ मित्रे च" इति च । यत्तु द्विषोऽमित्र इति सूत्रे हरदत्तेनोक्तम् । अमेर्द्विषदित्यौणादिक इत्रच् । "अमेरमित्रं मित्रस्य व्यथयेत्" इत्यादौ मध्योदात्तस्तु चिन्त्यः । नञ्समासेऽप्येवम् । परवल्लिंगतापि स्यादिति तु तत्र दोषान्तरमिति तत्प्रकृतसूत्रापर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि नञो जरमरमित्रमृता इति षाष्ठसूत्रास्मरणमूलकमिति दिक् ॥

१५५–त्रप्रत्ययान्त भृत्र, अमित्र, छात्र, पुत्र, मंत्र, वृत्र, मेढ्र और उष्ट्र शब्द पुँल्लिंगमें प्रयुक्त हों । यथा–अयं भृत्रः । न मित्रम् अमित्रः । "तस्य मित्राण्यमित्रास्ते" और " स्याताममित्रौ मित्रे च " । माघमें ऐसा प्रयोग है । किन्तु " द्विषोऽमित्रे ३१११ " इस सूत्रमें हरदत्तने कहा है

कि, " अमेर्द्विषति चित् " इस सूत्रसे इत्रच् प्रत्यय हुआ है, " अमैरमित्रं मित्त्रस्य व्यथयेत् " इत्यादि प्रयोगोंमें जो मध्योदात्त कहा है, वह चिन्तनीय है। नञ् समासमें भी ऐसी परवल्लिंगता होगी। ऐसा कहनेपर उस विषयमें दोषान्तर तत्प्रकृतसूत्रके अपर्य्यालोचनामूलक है। स्वरदोषका उद्भावन भी " नञो जरमरमित्रमृताः ३८५० " इत्यादि पाठ सूत्रके अस्मरण मूलक है॥

१५६ 'पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च'॥

१५६-त्र प्रत्ययान्त पत्र, पात्र, पवित्र, सूत्र, छत्र शब्द पुँल्लिङ्ग और नपुंसकलिंगमें प्रयुक्त हों, यथा, पत्रः, पत्रम्॥

१५७ 'बलकुसुमशुल्बयुद्धपत्तनरणाभिधानानि'॥ बलं वीर्यम्॥

१५७-बल, कुसुम, शुल्व, युद्ध, पत्तन और रणवाचक शब्द नपुंसकलिंग हों, यथा-बलं-वीर्यम्॥

१५८ 'पद्मकमलोत्पलानि पुंसि च'॥ पद्मादयः शब्दाः कुसुमाभिधायित्वेपि द्विलिंगाः स्युः। अमरोऽप्याह॥ "वा पुंसि पद्मं नलिनम्" इति। एवं च अर्द्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेवेति वृत्तिग्रन्थो मतान्तरेण नेयः॥

१५८-पद्म, कमल, उत्पल शब्द कुसुमवाचक होनेपर भी पुँल्लिंग और नपुंसकलिंगमें प्रयुक्त हों। अमरकोषमें कहा है कि, "वा पुंसि पद्मं नलिनम्" अर्थात् पद्म और नलिन शब्द विकल्प करके पुँल्लिंग हों, किन्तु "अर्द्धर्चाः०" सूत्रमें कमल अर्थमें पद्म शब्द केवल नपुंसकलिंग है यह वृत्ति ग्रन्थ मतांतर करके जानना चाहिये॥

१५९ 'आहवसंग्रामौ पुंसि'॥

१५९-आहव और संग्राम शब्द पुँल्लिंगमें प्रयुक्त हों॥

१६० 'आजिः स्त्रियामेव'॥

१६०-आजि शब्द स्त्रीलिंगमें प्रयुक्त हो॥

१६१ 'फलजातिः'॥ फलजातिवाची शब्दो नपुंसकं स्यात्। आमलकम्। आम्रम्॥

१६१-फलजातिवाचक शब्द नपुंसक लिंगमें प्रयुक्त हों, यथा-आमलकम्। आम्रम्॥

१६२ 'वृक्षजातिः'॥ स्त्रियामेव क्वचिदेवेदम्। हरीतकी॥

१६२-वृक्षजातिवाचक शब्द कहीं २ स्त्रीलिंग हों, यथा-हरीतकी॥

१६३ 'वियज्जगत्सकृत्शकन्पृषच्छकृद्यकृदुदश्वितः'॥ एते क्लीबाः स्युः॥

१६३-वियत्, जगत्, सकृत्, शकन्, पृषत्, शकृत्, यकृत् और उदश्वित् शब्द नपुंसकलिंगमें प्रयुक्त हों॥

१६४ 'नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि'॥

१६४-नवनीत, अवत, अन, अनृत, अमृत, निमित्त, वित्त, चित्त, पित्त, व्रत, रजत, वृत्त और पलित शब्द नपुंसकलिंगमें प्रयुक्त हों॥

१६५ 'श्राद्धकुलिशदैवपीठकुण्डांकांगदधिसक्थ्यक्ष्यस्थ्यास्पदाकाशकण्वबीजानि'॥ एतानि क्लीबे स्युः॥

१६५-श्राद्ध, कुलिश, दैव, पीठ, कुण्ड, अंक, अंग, दधि, सक्थि, अक्षि, अस्थि, आस्पद, आकाश, कण्व और बीज शब्द नपुंसकलिंग हों॥

१६६ 'दैवं पुंसि च'॥ दैवम्। दैवः॥

१६६-दैव शब्द पुँल्लिंग और नपुंसकलिंग हो, यथा-दैवम्, दैवः॥

१६७ 'धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि'॥ इदं धान्यमित्यादि॥

१६७-धान्य, आज्य, सस्य, रूप्य, पण्य, वर्ण्य, धृष्य, हव्य, कव्य, काव्य, सत्य, अपत्य, मूल्य, शिक्य, कुड्य, मद्य, हर्म्य, तूर्य और सैन्य शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा-धान्यम्। इत्यादि॥

१६८ 'द्वन्द्वबर्हदुःखबडिशपिच्छबिंबकुटुम्बकवचवरशरवृन्दारकाणि'॥

१६८-द्वन्द्व, बर्ह, दुःख, बडिश, पिच्छ, बिम्ब, कुटुम्ब, कवच, वर, शर और वृन्दारक शब्द नपुंसकलिंगमें प्रयुक्त हों, यथा-द्वन्द्वम्। इत्यादि॥

१६९ 'अक्षमिन्द्रिये'॥ इंद्रिये किम्। रथांगादौ मा भूत्॥

॥ इति नपुंसकाधिकारः॥

१६९-इन्द्रियबोधक अक्ष शब्द नपुंसकलिंगमें प्रयुक्त हो। इन्द्रियभिन्नार्थ (रथांगादि) में पुँल्लिंग हो, यथा-अक्षः॥

इति नपुंसकाधिकारः।

अथ स्त्रीपुंसाधिकारः।

१७० 'स्त्री पुंसयोः'॥ अधिकारोयम्॥

१७०-'स्त्रीपुंसयोः' यह अधिकारसूत्र है यहांसे स्त्री और पुँल्लिङ्गका अधिकार चलैगा॥

१७१ 'गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः'॥ इयमयं वा गौः॥

१७१-गो, मणि, यष्टि, मुष्टि, पाटलि, वस्ति, शाल्मलि, त्रुटि, मसि और मरीचि शब्द पुँल्लिंग और स्त्रीलिंगमें प्रयुक्त हों, यथा-इयमयं वा गौः॥

१७२ 'मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः'॥ इयमयं वा मृत्युः॥

१७२–मृत्यु, सीधु, कर्कन्धु, किष्कु, कण्डु और रेणु शब्द पुँलिंग और स्त्रीलिंगमें प्रयुक्त हों, यथा–इयमयं वा मृत्युः ॥

१७३ 'गुणवचनमुकारान्तं नपुंसकं च' ॥ त्रिलिंगमित्यर्थः । पटु--पटुः--पट्वी ॥

१७३–गुणवाचक उकारान्त शब्द तीनों लिंगोंमें प्रयुक्त हों, यथा–पटु, पटुः, पट्वी ॥

१७४ 'अपत्यार्थतद्धिते' ॥ औपगवः–औपगवी ॥

॥ इति स्त्रीपुंसाधिकारः ॥

१७४–अपत्यार्थ तद्धितप्रत्ययान्त शब्द पुँलिंग और स्त्रीलिंगमें प्रयुक्त हों, यथा–औपगवः, औपगवी । इत्यादि ॥

इति स्त्रीपुंसाधिकारः ।

अथ पुंनपुंसकाधिकारः ।

१७५ 'पुन्नपुंसकयोः' ॥ अधिकारोयम् ॥

१७५–यहांसे पुँलिंग और नपुंसकलिंगका अधिकार चलेगा ॥

१७६ 'घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः' ॥ अयं घृतः । इदं घृतम् ॥

१७६–घृत, भूत, मुस्त, क्ष्वेलित, ऐरावत, पुस्तक, बुस्त और लोहित शब्द पुन्नपुंसकलिंग हों, यथा–अयं घृतः, इदं घृतम् । इत्यादि ॥

१७७ 'शृंगार्घनिदाघोद्यमशल्यदृढाः' ॥ अयं शृंगः । इदं शृंगम् ॥

१७७–शृंग, अर्घ, निदाघ, उद्यम, शल्य और दृढ शब्द पुन्नपुंसकलिंग हों, यथा, अयं शृंगः, इदं शृंगम् ॥

१७८ 'व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः' ॥ अयं व्रजः । इदं व्रजम् ॥

१७८–व्रज, कुञ्ज, कुथ, कूर्च, प्रस्थ, दर्प, अर्भ, अर्धर्च, दर्भ और पुच्छ शब्द पुन्नपुंसकलिंग हों, यथा–अयं व्रजः, इदं व्रजम् ॥

१७९ 'कबन्धौषधायुधान्ताः' ॥ स्पष्टम् ॥

१७९–कबन्ध औषध और आयुध शब्द अन्तमें हों ऐसे शब्द पुन्नपुंसकलिंग हों ॥

१८० 'दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः' ॥ एते पुन्नपुंसकयोः स्युः । "कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले" इति विश्वः । शलाकावाची तु स्त्रियाम् । तथा च–जानपदादिसूत्रेणायोविकारे ङीषि । कुशी । दारुणि तु टापा "कुशा वानस्पत्याः स्थ ता मा यात" इति श्रुतिः । अतः कुकमीति सूत्रे कुशाकर्णीष्विति प्रयोगश्च । व्याससूत्रे च–" हानौपूपायनशब्दे शेषत्वात्कुशाच्छन्दः" इति तत्र शारीरकभाष्येप्येवम् । एवं च । श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थित आच्छन्द इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः ॥

१८०–दण्ड, मण्ड, खण्ड, शव, सैन्धव, पार्श्व, आकाश, कुश, काश, अङ्कुश, और कुलिश शब्द पुन्नपुंसकलिङ्ग हों, " कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले " इति विश्वः । शलाकावाचक कुश शब्द स्त्रीलिङ्ग हो, जानपदादि सूत्रसे लोहविकारार्थमें ङीष् प्रत्यय करके कुशी पद हो । दारु होनेपर टाप् हो, यथा–" कुशा वानस्पत्याः स्थ ता मा यात" इति श्रुतिः । अत एव " कुकमि० १६० " इत्यादि सूत्रमें कुशाकर्णीषु इत्यादि प्रयोग है । और व्याससूत्रमें भी हानि अर्थमें उपायन शब्द शेष होनेके कारण कुशाच्छन्दः ऐसा लिखित है । शारीरक भाष्यमें भी ऐसा लिखा है, ऐसी श्रुति, सूत्र और भाष्यके एकवाक्यत्व होनेसे आच्छन्द इत्यादि स्थलमें आङ्प्रश्लेषादिपर जो भामती ग्रन्थ है वह केवल प्रौढवादमात्र है, यह बहुश्रुत पंडितोंका मत है ॥

१८१ 'गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च' ॥

॥ इति पुन्नपुंसकाधिकारः ॥

१८१–गृह, मेह, देह, पट्ट, पटह, अष्टापद, अम्बुद, ककुद शब्द पुन्नपुंसकलिंग हों ॥

इति पुन्नपुंसकाधिकारः ।

१८२ 'अविशिष्टलिङ्गम्' ॥

१८२–यहांसे अविशिष्ट लिंगका अधिकार चलैगा ॥

१८३ 'अव्ययं कतियुष्मदस्मदः' ॥

१८३–च, वा इत्यादि अव्यय शब्द कति शब्द और युष्मद् अस्मद् शब्द विशिष्ट लिंग कार्य्य शून्य अर्थात् त्रिलिंग हों, यथा–उच्चैः–तरुः, लता, मन्दिरम् । कति–पुरुषाः, स्त्रियः, बलानि । त्वं–पुमान्, स्त्री, कुलम् । अहं पुमान् ॥

१८४ 'ष्णान्ता संख्या' ॥

१८४–षकारान्त और नकारान्त संख्यावाचक शब्द त्रिलिंग हों, यथा--पञ्च, षट्–पुरुषाः, स्त्रियः, कुलानि ॥

१८५ 'शिष्टा परवत्' ॥ एकः पुरुषः । एका स्त्री । एकं कुलम् ॥

१८५--अविशिष्ट शब्द परवत् लिंग हों, यथा--एकः पुरुषः, एका स्त्री, एकं कुलम् ॥

१८६ 'गुणवचनं च' ॥ शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् ॥

१८६--गुणवाचक शुक्लादि शब्द गुणी अर्थमें त्रिलिंग हों, यथा--शुक्लः पटः, शुक्ला पटी, शुक्लं वस्त्रम् । गुणमात्र होनेपर पुँल्लिंग होगा ॥

१८७ 'कृत्याश्च' ॥ करणा ॥

१८७--कृत्यप्रत्ययान्त शब्द त्रिलिंगमें हों, यथा--गायकः, गायिका, गायकम् ॥

१८८ 'करणाधिकरणयोर्ल्युट् च' ॥

१८८--करण और अधिकरणवाच्यमें ल्युट् प्रत्ययान्त शब्द त्रिलिंग हों, यथा--साधनः, साधना, साधनम् ॥

१८९ 'सर्वादीनि सर्वनामानि' ॥ स्पष्टार्थेयं त्रिसूत्री ॥

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यामुत्तरार्धे पाणिनीयलिङ्गानुशासनसूत्रवृत्तिः समाप्ता ॥ ॥ श्रीरस्तु ॥

१८९--सर्वादि सर्वनाम शब्द त्रिलिंग हों, यथा--सर्वः । सर्वा । सर्वम् । इत्यादि ॥

इति लिंगानुशासनप्रकरणम् ।

इति श्रीमत्कान्यकुब्जवंशावतंसपण्डितप्रवरमिश्रसुखानन्दात्मजविद्यावारिधिमहोपदेशकवेदभाष्यकारमुरादाबादनिवासिपण्डितज्वालाप्रसादमिश्रकृता भाषाटीकायुता सिद्धान्तकौमुदी समाप्ता ॥

॥ समाप्तेयं वैयाकरणसिद्धान्तकौमुदीमुत्तरार्धम् ॥

पुस्तक मिलनेका पता--

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रालय-मुंबई.

॥ श्रीः ॥

अथ पाणिनीयशिक्षाप्रारंभः।

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा । शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः ॥१॥ प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः । पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥२॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥३॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४ ॥ अनुस्वारो विसर्गश्च ᳵक ᳵपौ चापि पराश्रितौ । दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥ ५ ॥१ ॥ आत्मा बुद्ध्या समेत्यार्थन्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥६॥ मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७॥ कण्ठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तन्निबोधत॥१०॥२॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥ उदात्तौ निषादगान्धारावनुदात्त ऋषभधैवतौ । स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥ अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ॥ जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च॥१३॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च । जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥यद्योभावप्रसंधानमुकारादि परं पदम् । स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ १५ ॥ ३ ॥ हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू । स्युर्मूर्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥१७॥ जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः । एऐ तु कण्ठतालव्यावोऔ कण्ठोष्ठजौ स्मृतौ ॥१८॥ अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् । ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥ संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् । घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ २० ॥४ ॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् । तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ ॥ २१ ॥ अनुस्वारयमानां च नासिकास्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥२२ ॥ अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वराननु । अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥२३॥अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥ २४ ॥ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् । भीतापतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥२५॥५॥ यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते । एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥२६॥ रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत्पूर्वमक्षरम् । दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥ २७ ॥ हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि नासिकायां तथार्धं च रङ्गस्यैवं द्विमात्रता ॥ २८ ॥ हृदयादुत्करे तिष्ठन्कांस्येन स्वमनुस्वरन् । मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनम् ॥ २९॥ मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत् । सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम ॥३०॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः । सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१॥ ६ ॥ गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोऽपकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३॥ शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् । काकस्वरं शिरसि गतं तथा स्थानविवर्जितम् ॥ ३४ ॥ उपांशु दष्टं त्वरितं निरस्तं विलंबितं गद्गदितं प्रगीतम् । निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ॥ ३५ ॥ प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन । मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥३६॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् । मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७ ॥ ७ ॥ अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरः स्मृताः । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥ यमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः ।ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ॥३९ ॥ ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते । दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि ॥ ४० ॥ छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥ ८ ॥ उदात्तमाख्याति वृतोऽङ्गुलीनां

प्रदेशिनीमूलनिविष्टमूर्धा । उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥ ४३॥ उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् । निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४ ॥ अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् । मध्योदात्तं स्वरितं ह्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥ ४५ ॥ अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती । अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम्॥ ॥ ४६ ॥ हविषां मध्योदात्तं स्वरिति स्वरितम् । बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम्॥ ४७॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥४८ ॥ ९॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ ४९॥कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् । न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥ सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् । सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१॥ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ५२ ॥ अनक्षरमनायुष्यं विस्वरं व्याधिपीडितम् । अक्षताशस्त्ररूपेण वज्रं पतति मस्तके ॥ ५३ ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥५४॥ हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् । ऋग्यजुः सामभिः पूतो ब्रह्मलोके महीयते ॥ ५५ ॥ १० ॥ शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते । वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५६ ॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५७ ॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः। तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥५८॥ अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९ ॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः । स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीतिदिवीति॥६०॥११॥ अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथागीत्यचोस्पृष्टोदात्तं चाषस्तु शंकर एकादश ॥

॥ इति पाणिनीया शिक्षा समाप्ता ॥

श्रीः ।

॥ श्रीगणेशाय नमः ॥

पाणिनीयाऽष्टाध्यायीमूत्रपाठ आरभ्यते ।

अथ प्रथमोऽध्यायः ।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ॥
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ॥
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ २ ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ॥
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ ३ ॥

ॐ-अइउण् ॥ १ ॥ ऋऌक् ॥ २ ॥ एओङ् ॥ ३ ॥ ऐऔच् ॥ ४ ॥ हयवरट् ॥ ५ ॥ लण् ॥ ॥ ६ ॥ ञमङणनम् ॥ ७ ॥ झभञ् ॥ ८ ॥ घढधष् ॥ ९ ॥ जबगडदश् ॥ १० ॥ खफछठथचटतव् ॥ ११ ॥ कपय् ॥१२॥ शषसर्॥१३॥ हल् ॥ १४ ॥

वृद्धिरादैच् ॥ १ ॥ अदेङ् गुणः ॥२॥ इको गुणवृद्धी ॥ ३ ॥ न धातुलोप आर्धधातुके ॥ ४ ॥ क्ङिति च॥५॥ दीधीवेवीटाम् ॥ ६ ॥ हलोऽनन्तराः संयोगः ॥ ७ ॥ मुखनासिकावचनोऽनुनासिकः ॥ ८ ॥ तुल्यास्यप्रयत्नं सवर्णम् ॥ ९ ॥ नाऽऽज्झलौ ॥ १० ॥ ःईदूदेद्द्विवचनं प्रगृह्यम् ॥ ११ ॥ अदसो मात् ॥ १२॥ शे ॥ १३ ॥ निपात एकाजनाङ् ॥ १४ ॥ ओत् ॥ १५ ॥ सम्बुद्धौ शाकल्यस्येतावनार्षे ॥ १६ ॥ उञः ॥ १७ ॥ ऊँ॥१८॥ ईदूतौ च सप्तम्यर्थे ॥१९॥ दाधा घ्वदाप् ॥ २० ॥१ ॥ आद्यन्तवदेकस्मिन् ॥ २१ ॥ तरप्तमपौ घः ॥ २२ ॥ बहुगणवतुडति संख्या ॥ २३ ॥ ष्णान्ता षट् ॥ २४ ॥ डति च ॥ २५ ॥ क्तक्तवतू निष्ठा ॥ २६ ॥ सर्वादीनि सर्वनामानि ॥२७ ॥ विभाषा दिक्समासे बहुव्रीहौ ॥२८॥ न बहुव्रीहौ ॥ २९ ॥ तृतीयासमासे ॥ ३० ॥ द्वन्द्वे च ॥ ३१ ॥ विभाषा जसि ॥ ३२ ॥ प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥ ३३ ॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥३४॥ स्वमज्ञातिधनाख्यायाम् ॥ ॥ ३५ ॥ अन्तरं बहिर्योगोपसंव्यानयोः ॥ ३६ ॥ स्वरादिनिपातमव्ययम् ॥ ३७ ॥ तद्धितश्चासर्वविभक्तिः ॥ ३८ ॥ कृन्मेजन्तः ॥ ३९ ॥ क्त्वातोसुन्कसुनः ॥ ४० ॥ २॥ अव्ययीभावश्च ॥ ४१ ॥ शि सर्वनामस्थानम् ॥ ४२ ॥ सुडनपुंसकस्य ॥ ४३ ॥ नवेति विभाषा ॥४४॥ इग्यणः सम्प्रसारणम् ॥ ४५ ॥ आद्यन्तौ टकितौ ॥ ४६ ॥ मिदचोन्त्यात्परः॥४७॥एच इग्घ्रस्वादेशे ॥४८॥ षष्ठी स्थानेयोगा ॥ ४९ ॥ स्थानेऽन्तरतमः[1] ॥५०॥ उरण् रपरः॥५१॥ अलोन्त्यस्य ॥ ५२ ॥ ङिच्च ॥५३॥ आदेः परस्य॥५४॥ अनेकाल्शित्सर्वस्य ॥ ५५ ॥ स्थानिवदादेशोऽनल्विधौ ॥५६॥ अचः परस्मिन्पूर्वविधौ ॥ ॥ ५७॥ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णाऽनुस्वारदीर्घजश्चर्विधिषु ॥ ५८ ॥ द्विर्वचनेऽचि ॥ ५९ ॥ अदर्शनं लोपः ॥ ६० ॥ ३ ॥ प्रत्ययस्य लुक्श्लुलुपः ॥ ६१ ॥ प्रत्ययलोपे प्रत्ययलक्षणम् ॥६२॥ न लुमताङ्गस्य ॥६३॥ अचोऽन्त्यादि टि ॥ ६४ ॥ अलोन्त्यात्पूर्व उपधा ॥ ६५॥ तस्मिन्निति निर्दिष्टे पूर्वस्य ॥६६॥ तस्मादित्युत्तरस्य ॥६७॥ स्वं रूपं शब्दस्याऽशब्दसंज्ञा ॥ ६८ ॥ अणुदित्सवर्णस्य चाऽप्रत्ययः ॥ ६९ ॥ तपरस्तत्कालस्य ॥ ७० ॥ आदिरन्त्येन सहेता ॥ ७१ ॥ येन विधिस्तदन्तस्य ॥ ७२ ॥ वृद्धिर्यस्याचामादिस्तद् वृद्धम् ॥७३॥ त्यदादीनि च ॥७४॥ एङ् प्राचां देशे ॥ ७५ ॥ १५ ॥ (वृद्धिराद्यन्तवदव्ययीभावः प्रत्ययस्य लुक् पञ्चदश) ॥

इति प्रथमाऽध्यायस्य प्रथमः पादः ॥ १ ॥

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ १ ॥ विज इट् ॥ २ ॥ विभाषोर्णोः ॥ ३ ॥ सार्वधातुकमपित् ॥ ४ ॥ असंयोगाल्लिट् कित् ॥ ५ ॥ इन्धिभवतिभ्यां च ॥ ६ ॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥७॥ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ८ ॥ इको झल् ॥ ९ ॥ हलन्ताच्च ॥ १० ॥ लिङ्सिचावात्मनेपदेषु ॥ ११ ॥ उश्च ॥ १२ ॥ वा गमः ॥ १३ ॥ हनः सिच् ॥१४॥ यमो गन्धने ॥१५॥ विभाषोपयमने ॥ १६ ॥ स्थाघ्वोरिच्च ॥ १७ ॥ न क्त्वा सेट् ॥ १८ ॥ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ॥ १९ ॥ मृषस्तितिक्षायाम् ॥ २० ॥ १ ॥ उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ॥ २१ ॥ पूङः क्त्वा च ॥२२ ॥ नोपधात्थफान्ताद्वा ॥ २३ ॥ वञ्चिलुञ्च्यृतश्च ॥ २४ ॥ तृषिमृ-

---

१ अथ महाभाष्यसंमतश्रीनागोजीभट्टकृताष्टाध्यायीपाठोऽत्र टिप्पणीरूपेण संगृह्यते ॥-॥ उञ ऊँ इत्यस्य "उञः" इत्येकम्। "ऊँ" इत्यपरमिति योगविभागोऽत्र भाष्ये ।

[1] स्थानेन्तरतमे इति सप्तम्यन्तपाठः क्वचित्संहितापाठेऽङ्गीकृतः ।

पिक्रोशः काश्यपस्य ॥ २५ ॥ रलो व्युपधाद्धलादेः संश्च ॥ ॥ २६ ॥ ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ २७ ॥ अचश्च ॥ ॥ २८ ॥ उच्चैरुदात्तः ॥ २९ ॥ नीचैरनुदात्तः ॥३०॥ समाहारः स्वरितः ॥ ३१ ॥ तस्यादित उदात्तमर्धह्रस्वम् ॥ ३२ ॥ एकश्रुतिदूरात्सम्बुद्धौ ॥ ३३॥ यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३४ ॥ उच्चैस्तरां वा वषट्कारः ॥ ३५ ॥ विभाषा छन्दसि ॥ ३६ ॥ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ ३७ ॥ देवब्रह्मणोरनुदात्तः ॥ ३८ ॥ स्वरितात्संहितायामनुदात्तानाम् ॥ ३९ ॥ उदात्तस्वरितपरस्य सन्नतरः ॥ ४० ॥ २ ॥ अपृक्त एकाल् प्रत्ययः ॥ ॥ ४१ ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ ॥ ४२ ॥ प्रथमानिर्दिष्टं समास उपसर्जनम् ॥४३॥ एकविभक्ति चापूर्वनिपाते ॥ ४४ ॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ ४५ ॥ कृत्तद्धितसमासाश्च ॥ ४६ ॥ ह्रस्वो नपुंसकेप्रातिपदिकस्य ॥ ४७॥ गोस्त्रियोरुपसर्जनस्य ॥ ४८ ॥ लुक् तद्धितलुकि ॥ ४९ ॥ इद्गोण्याः ॥५०॥ लुपि युक्तवद्व्यक्तिवचने ॥ ५१ ॥ विशेषणानां चाऽजातेः ॥ ५२ ॥ तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५३॥ लुब्योगाऽप्रख्यानात् ॥ ५४ ॥ योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥ ५५ ॥ प्रधानप्रत्ययार्थवचनमर्थस्याऽन्यप्रमाणत्वात् ॥ ५६ ॥ कालोपसर्जने च तुल्यम् ॥ ५७ । जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ॥ ५८ ॥ अस्मदो द्वयोश्च ॥ ५९ ॥ फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ६० ॥ ३ ॥ छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६१ ॥ विशाखयोश्च ॥६२॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ६३ ॥ सरूपाणामेकशेष एकविभक्तौ ॥ ६४ ॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ ६५ ॥ स्त्रीपुंवच्च ॥ ६६ ॥ पुमान् स्त्रिया ॥ ६७ ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ६८ ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ ६९ ॥ पिता मात्रा ॥ ७० ॥ श्वशुरः श्वश्र्वा ॥ ७१ ॥ त्यदादीनि सर्वैर्नित्यम् ॥ ७२ ॥ ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ॥ ७३॥ १३॥ गाङ्कुटाद्युदुपधादपृक्तछन्दसिपुनर्वस्वोस्त्रयोदश) ॥

इति प्रथमाऽध्यायस्य द्वितीयः पादः ॥२॥

भूवादयो धातवः ॥ १ ॥ उपदेशेऽजनुनासिक इत् ॥ ॥ २ ॥ हलन्त्यम् ॥ ३ ॥ न विभक्तौ तुस्माः ॥ ४ ॥ आदिर्ञिटुडवः ॥ ५ ॥ षः प्रत्ययस्य ॥६॥ चुटू ॥ ७॥ लशक्वतद्धिते ॥ ८ ॥ तस्य लोपः ॥ ९ ॥ यथासंख्यमनुदेशः समानाम् ॥१०॥ स्वरितेनाधिकारः ॥११॥ अनुदात्तङित आत्मनेपदम् ॥ १२ ॥ भावकर्मणोः ॥१३॥ कर्तरि कर्मव्यतीहारे ॥ १४ ॥ न गतिहिंसार्थेभ्यः ॥ १५ ॥ इतरेतरान्योन्योपपदाच्च ॥ १६ ॥ नेर्विशः ॥ १७ ॥ परिव्यवेभ्यः क्रियः ॥ १८ ॥ विपराभ्यां जेः ॥ १९ ॥ आङो दोऽनास्यविहरणे ॥ २० ॥ १ ॥ क्रीडोऽनुसम्परिभ्यश्च ॥ २१ ॥ समवप्रविभ्यः स्थः ॥२२॥ प्रकाशनस्थेयाख्ययोश्च ॥ २३ ॥ उदोऽनूर्ध्वकर्मणि॥२४॥ उपान्मन्त्रकरणे ॥ २५॥ अकर्मकाच्च ॥ २६ ॥ उद्विभ्यां तपः ॥ २७ ॥ आङो यमहनः ॥ २८ ॥ समो गम्यृच्छिभ्याम् ॥ २९ ॥ निसमुपविभ्यो ह्वः ॥ ३० ॥ स्पर्धायामाङः ॥ ३१ ॥ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ ३२ ॥ अधेः प्रसहने ॥ ३३ ॥ वेः शब्दकर्मणः ॥ ३४ ॥ अकर्मकाच्च ॥ ३५ ॥ सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ ॥ ३६ ॥ कर्तृस्थे चाशरीरे कर्मणि ॥३७ ॥ वृत्तिसर्गतायनेषु क्रमः ॥ ३८ ॥ उपपराभ्याम् ॥ ३९ ॥ आङ उद्गमने ॥ ४० ॥ २ ॥ वेः पादविहरणे ॥४१॥ प्रोपाभ्यां समर्थाभ्याम् ॥ ४२ ॥ अनुपसर्गाद्वा ॥ ४३ ॥ अपह्नवे ज्ञः ॥ ४४ ॥ अकर्मकाच्च ॥ ४५ ॥ सम्प्रतिभ्यामनाध्याने ॥ ४६ ॥ भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ ४७ ॥ व्यक्तवाचां समुच्चारणे ॥४८॥ अनोरकर्मकात् ॥ ४९ ॥ विभाषा विप्रलापे ॥ ५० ॥ अवाद्ग्रः ॥ ५१ ॥ समः प्रतिज्ञाने ॥ ५२ ॥ उदश्चरः सकर्मकात् ॥ ५३ ॥ समस्तृतीयायुक्तात् ॥५४॥ दाणश्च सा चेच्चतुर्थ्यर्थे॥५५॥ उपाद्यमः स्वकरणे ॥ ५६ ॥ ज्ञाश्रुस्मृदृशां सनः ॥ ५७ ॥ नानोर्ज्ञः ॥ ५८ ॥ प्रत्याङ्भ्यां श्रुवः ॥ ५९ ॥ शदेः शितः ॥ ६० ॥ ३ ॥ म्रियतेर्लुङ्लिङोश्च ॥ ६१ ॥ पूर्ववत्सनः ॥६२॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥ ६३॥ प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ ६४ ॥ समः क्ष्णुवः ॥ ॥ ६५ ॥ भुजोऽनवने ॥ ६६॥ णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने ॥ ६७ ॥ भीस्म्योर्हेतुभये ॥ ६८ ॥ गृधिवञ्च्योः प्रलम्भने ॥ ६९ ॥ लियः संमाननशालीनीकरणयोश्च ॥७०॥ मिथ्योपपदात्कृञोऽभ्यासे ॥ ७१ ॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ ७२ ॥ अपाद्वदः ॥ ७३ ॥ णिचश्च ॥ ७४ ॥ समुदाङ्भ्यो यमोऽग्रन्थे ॥ ॥ ७५ ॥ अनुपसर्गाज्ज्ञः ॥ ७६ ॥ विभाषोपपदेन प्रतीयमाने ॥ ७७ ॥ शेषात्कर्तरि परस्मैपदम् ॥ ७८ ॥ अनुपराभ्यां कृञः ॥ ॥ ७९ ॥ अभिप्रत्यतिभ्यः क्षिपः ॥ ८० ॥ ४ ॥ प्राद्वहः ॥ ८१ ॥ परेर्मृषः ॥ ८२ ॥ व्याङ्परिभ्यो रमः ॥ ८३ ॥ उपाच्च ॥ ८४ ॥ विभाषाऽकर्मकात् ॥ ८५॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥८६॥ निगरणचलनार्थेभ्यश्च ॥ ८७ ॥ अणावकर्मकाच्चित्तवत्कर्तृकात् ॥८८॥ न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ ८९ ॥ वा क्यषः ॥ ९० ॥ द्युद्भ्यो लुङि ॥ ९१ ॥

वृद्धयः स्यसनोः ॥९२॥ लुटि च क्लृपः॥९३ ॥१२ ॥ (भूवादयः क्रीडोनु वेः पादम्रियतेः प्राद्वहस्त्रयोदश) ॥

इति प्रथमाध्यायस्य तृतीयः पादः ॥ ३ ॥

आकडारादेका संज्ञा ॥ १ ॥ विप्रतिषेधे परं कार्यम् ॥ ॥ २ ॥ यूस्त्र्याख्यौ नदी ॥ ३ ॥ नेयङुवङ्स्थानावस्त्री ॥ ॥ ४ ॥ वामि ॥ ५ ॥ ङिति ह्रस्वश्च ॥६॥ शेषो घ्यसखि ॥ ७ ॥ पतिः समास एव ॥ ८ ॥ षष्ठीयुक्तश्छन्दसि वा ॥ ९ ॥ ह्रस्वं लघु ॥ १० ॥ संयोगे गुरु ॥ ११ ॥ दीर्घं च ॥ १२ ॥ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥ १३ ॥ सुप्तिङन्तं पदम् ॥ १४॥ नः क्ये ॥ १५ ॥ सिति च ॥ १६ ॥ स्वादिष्वसर्वनामस्थाने ॥१७ ॥ यचि भम् ॥ १८ ॥ तसौ मत्वर्थे ॥ १९ ॥ अयस्मयादीनि च्छन्दसि ॥ २० ॥ १ ॥ बहुषु बहुवचनम् ॥ २१ ॥ द्व्येकयोर्द्विवचनैकवचने ॥ २२ ॥ कारके ॥ २३ ॥ ध्रुवमपायेऽपादानम् ॥ २४ ॥ भीत्रार्थानां भयहेतुः ॥ २५ ॥ पराजेरसोढः ॥ २६ ॥ वारणार्थानामीप्सितः ॥ २७ ॥ अन्तर्धौ येनादर्शनमिच्छति ॥ २८ ॥ आख्यातोपयोगे ॥ २९ ॥ जनिकर्तुः प्रकृतिः ॥ ३० ॥ भुवः प्रभवः ॥ ॥३१॥ कर्मणा यमभिप्रैति स संप्रदानम्॥३२॥रुच्यर्थानां प्रीयमाणः॥३३ ॥श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥३४ ॥ धारेरुत्तमर्णः॥३५॥स्पृहेरीप्सितः ॥३६॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥३७॥ क्रुधद्रुहोरुपसृष्टयोः कर्म ॥३८॥ राधीक्ष्योर्यस्य विप्रश्नः ॥३९॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ ४० ॥ २ ॥ अनुप्रतिगृणश्च ॥ ४१ ॥ साधकतमं करणम् ॥ ४२ ॥ दिवः कर्म च ॥ ४३ ॥ परिक्रयणे संप्रदानमन्यतरस्याम् ॥ ४४ ॥ आधारोऽधिकरणम् ॥ ४५ ॥ अधिशीङ्स्थासां कर्म ॥४६ ॥ अभिनिविशश्च ॥ ४७ ॥ उपान्वध्याङ्वसः ॥ ४८ ॥ कर्तुरीप्सिततमं कर्म ॥ ४९ ॥ तथायुक्तं चानीप्सितम् ॥ ५० ॥ अकथितं च ॥ ५१ ॥ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥ ५२ ॥ हृक्रोरन्यतरस्याम् ॥ ५३ ॥ स्वतन्त्रः कर्ता ॥ ५४ ॥ तत्प्रयोजको हेतुश्च ॥ ५५ ॥ प्राग्रीश्वरान्निपाताः ॥ ५६ ॥ चादयोऽसत्त्वे ॥ ५७ ॥ प्रादयः ॥५८॥ उपसर्गाः क्रियायोगे ॥ ५९ ॥ गतिश्च ॥ ६० ॥ ३ ॥ ऊर्यादिच्विडाचश्च ॥ ॥ ६१ ॥ अनुकरणं चानितिपरम् ॥ ६२ ॥ आदरानादरयोः सदसती ॥ ६३ ॥ भूषणेऽलम् ॥ ६४ ॥ अन्तरपरिग्रहे ॥ ६५ ॥ कणेमनसी श्रद्धाप्रतीघाते ॥ ॥ ६६ ॥ पुरोऽव्ययम् ॥ ६७ ॥ अस्तं च ॥ ६८॥ अच्छ गत्यर्थवदेषु ॥ ६९ ॥ अदोनुपदेशे ॥ ७० ॥ तिरोऽन्तर्धौ ॥ ७१॥ विभाषा कृञि ॥ ७२ ॥उपाजेऽन्वाजे ॥ ७३ ॥ साक्षात्प्रभृतीनि च ॥ ७४ ॥ अनत्याधान उरसिमनसी ॥ ७५ ॥ मध्ये पदे निवचने च॥७६॥नित्यं हस्ते पाणावुपयमने ॥ ७७॥ प्राध्वं बन्धने ॥७८॥ जीविकोपनिषदावौपम्ये ॥ ७९ ॥ ते प्राग्धातोः ॥ ८० ॥ ४ छन्दसि परेऽपि ॥ ८१ ॥ व्यवहिताश्च ॥ ८२ ॥ कर्मप्रवचनीयाः ॥ ८३ ॥ अनुर्लक्षणे ॥ ८४ ॥ तृतीयार्थे ॥ ८५ ॥ हीने ॥ ८६ ॥ उपोऽधिके च ॥ ८७ ॥ अपपरी वर्जने ॥ ८८ ॥ आङ्मर्यादावचने ॥ ८९ ॥ लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः॥९०॥अभिरभागे ॥ ९१ ॥ प्रतिः प्रतिनिधिप्रतिदानयोः ॥ ९२ ॥ अधिपरी अनर्थकौ ॥ ९३ ॥ सुः पूजायाम् ॥ ९४ ॥ अतिरतिक्रमणे च ॥ ९५ ॥ अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु ॥९६ ॥ अधिरीश्वरे ॥ ९७॥ विभाषाकृञि ॥ ९८ ॥ लः परस्मैपदम् ॥ ९९ ॥ तङानावात्मनेपदम् ॥ १०० ॥ ५ ॥ तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः ॥ १०१ ॥ तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ १०२ ॥ सुपः ॥१०३॥ विभक्तिश्च ॥ १०४॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः॥१०५॥ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ १०६ ॥ अस्मद्युत्तमः ॥१०७॥ शेषे प्रथमः ॥ १०८ ॥ परः सन्निकर्षः संहिता॥१०९॥विरामोऽवसानम् ॥११०॥६॥ (आकडाराद्बहुष्वनुप्रतिगृण ऊर्यादिच्छन्दसि तिङो दश)॥

इति प्रथमाध्यायस्य चतुर्थः पादः ॥ ४ ॥

इति प्रथमोध्यायः ॥ १ ॥

अथ द्वितीयोध्यायः ।

समर्थः पदविधिः ॥ १ ॥ सुबामन्त्रिते पराङ्गवत्स्वरे ॥ २ ॥ प्राक्कडारात्समासः ॥ ३ ॥ सह सुपा ॥ ४ ॥ अव्ययीभावः ॥ ५ ॥ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ॥ ६ ॥ यथाऽसादृश्ये ॥ ७ ॥ यावदवधारणे ॥ ८ ॥ सुप् प्रतिना मात्रार्थे ॥ ९॥ अक्षशलाकासंख्याः परिणा ॥ १० ॥ विभाषा ॥ ११ ॥ अपपरिबहिरञ्चवः पञ्चम्या ॥ १२ ॥ आङ् मर्यादाभिविध्योः ॥ १३ ॥ लक्षणेनाभिप्रती आभिमुख्ये ॥ १४ ॥ अनुर्यत्समया ॥ १५ ॥ यस्य चायामः॥१६॥ तिष्ठद्गुप्रभृतीनि च ॥ १७ ॥ पारे मध्ये षष्ठ्या वा ॥ १८ ॥ संख्या वंश्येन ॥ १९ ॥ नदीभिश्च ॥ २० ॥ ॥ १ ॥ अन्यपदार्थे च संज्ञायाम् ॥२१॥ तत्पुरुषः ॥ २२॥

द्विगुश्च ॥ २३ ॥ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ २४ ॥ स्वयं क्तेन ॥२५ ॥ खट्वा क्षेपे ॥ २६॥ सामि ॥ २७ ॥ कालाः ॥ २८ ॥ अत्यन्तसंयोगे च ॥ ॥ २९ ॥ तृतीया तत्कृतार्थेन गुणवचनेन ॥ ३० ॥ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ ३१ ॥ कर्तृकरणे कृता बहुलम् ॥३२॥ कृत्यैरधिकार्थवचने ॥३३॥ अन्नेन व्यञ्जनम् ॥३४॥ भक्ष्येण मिश्रीकरणम् ॥ ३५ ॥ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥ ३६ ॥ पञ्चमी भयेन ॥ ३७ ॥ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः॥ ॥ ३८ ॥ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥ ३९ ॥ सप्तमी शौण्डैः ॥ ४० ॥ २ ॥ सिद्धशुष्कपक्वबन्धैश्च ॥ ॥ ४१ ॥ ध्वाङ्क्षेण क्षेपे ॥ ४२ ॥ कृत्यैर्ऋणे ॥ ४३ ॥ संज्ञायाम् ॥४४॥ क्तेनाहोरात्रावयवाः ॥४५॥ तत्र ॥४६॥ क्षेपे ॥ ४७ ॥ पात्रेसमितादयश्च ॥ ४८ ॥ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥ ४९ ॥ दिक्संख्ये संज्ञायाम् ॥ ५० ॥ तद्धितार्थोत्तरपदसमाहारे च ॥ ५१ ॥ संख्यापूर्वो द्विगुः ॥ ५२ ॥ कुत्सितानि कुत्सनैः ॥ ५३ ॥ पापाणके कुत्सितैः ॥५४ ॥ उपमानानि सामान्यवचनैः ॥ ५५ ॥ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ ५६ ॥ विशेषणं विशेष्येण बहुलम् ॥ ५७ ॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥ ५८ ॥ श्रेण्यादयः कृतादिभिः ॥ ५९ ॥ क्तेन नञ्विशिष्टेनानञ् ॥ ६० ॥ ३ ॥ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥ ६१ ॥ वृन्दारकनागकुञ्जरैः पूज्यमानम् ॥ ६२ ॥ कतरकतमौ जातिपरिप्रश्ने ॥ ६३ ॥ किं क्षेपे ॥ ६४ ॥ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ६५ ॥ प्रशंसावचनैश्च ॥ ६६ ॥ युवा खलतिपलितवलितजरतीभिः ॥ ६७ ॥ कृत्यतुल्याख्या अजात्या ॥ ६८ ॥ वर्णो वर्णेन ॥ ६९ ॥ कुमारः श्रमणादिभिः ॥ ७० ॥ चतुष्पादो गर्भिण्या ॥ ७१ ॥ मयूरव्यंसकादयश्च ॥७२॥ ॥१२॥ (समर्थोऽन्यपदार्थे च सिद्धशुष्कसन्महद्द्वादश) ॥

इति द्वितीयाध्यायस्य प्रथमः पादः ॥ १ ॥

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥ १ ॥ अर्धं नपुंसकम् ॥ २ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ॥ ॥ ३ ॥ प्राप्तापन्ने च द्वितीयया ॥ ४ ॥ कालाः परिमाणिना ॥ ५ ॥ नञ् ॥ ६ ॥ ईषदकृता ॥ ७ ॥ षष्ठी ॥ ८ ॥ याजकादिभिश्च ॥ ९ ॥ न निर्धारणे॥१०॥ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ ११ ॥ क्तेन च पूजायाम् ॥१२॥ अधिकरणवाचिना च ॥१३॥ कर्मणि च ॥ १४ ॥ तृजकाभ्यां कर्तरि ॥ १५ ॥ कर्तरि च ॥ ॥ १६ ॥ नित्यं क्रीडाजीविकयोः ॥ १७॥ कुगतिप्रादयः ॥ १८ ॥ उपपदमतिङ् ॥ १९ ॥ अमैवाव्ययेन ॥ २० ॥ १ ॥ तृतीयाप्रभृतीन्यन्यतरस्याम्॥२१॥ क्त्वा च ॥ २२ ॥ शेषो बहुव्रीहिः ॥ २३ ॥ अनेकमन्यपदार्थे ॥ २४ ॥ संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये ॥ ॥ २५ ॥ दिङ्नामान्यन्तराले ॥ २६ ॥ तत्र तेनेदमिति सरूपे ॥ २७ ॥ तेन सहेति तुल्य योगे ॥ २८ ॥ चार्थे द्वन्द्वः ॥ २९॥ उपसर्जनं पूर्वम् ॥३०॥ राजदन्तादिषु परम् ॥३१॥ द्वन्द्वे घि ॥ ३२ ॥ अजाद्यदन्तम् ॥ ३३ ॥ अल्पाच्तरम् ॥ ३४ ॥ सप्तमीविशेषणे बहुव्रीहौ ॥ ३५ ॥ निष्ठा ॥ ३६ ॥ वाहिताग्न्यादिषु ॥ ३७ ॥ कडाराः कर्मधारये ॥ ३८ ॥ १८ ॥ (पूर्वापराधरोत्तरं तृतीयाप्रभृतीन्यष्टादश) ॥

इति द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

अनभिहिते ॥ १ ॥ कर्मणि द्वितीया ॥ २ ॥ तृतीया च होश्छन्दसि ॥ ३ ॥ अन्तराऽन्तरेण युक्ते ॥ ४ ॥ कालाध्वनोरत्यन्तसंयोगे ॥ ५ ॥ अपवर्गे तृतीया ॥ ६॥ सप्तमीपञ्चम्यौकारकमध्ये ॥ ७ ॥ कर्मप्रवचनीययुक्ते द्वितीया ॥ ८ ॥ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ ९ ॥ पञ्चम्यपाङ्परिभिः ॥ १० ॥ प्रतिनिधिप्रतिदाने च यस्मात् ॥ ११ ॥ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ १२ ॥ चतुर्थी संप्रदाने ॥ १३ ॥ क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥ १४ ॥ तुमर्थाच्च भाववचनात् ॥ १५ ॥ नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च ॥ १६ ॥ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ॥ १७ ॥ कर्तृकरणयोस्तृतीया ॥१८॥ सहयुक्तेऽप्रधाने ॥ १९ ॥ येनाङ्गविकारः ॥ २० ॥ १॥ इत्थंभूतलक्षणे ॥ २१ ॥ संज्ञोऽन्यतरस्यां कर्मणि ॥ २२ ॥ हेतौ ॥ २३ ॥ अकर्तर्यृणे पञ्चमी ॥ २४ ॥ विभाषा गुणेऽस्त्रियाम् ॥ २५ ॥ षष्ठी हेतुप्रयोगे ॥ २६ ॥ सर्वनाम्नस्तृतीया च ॥ २७॥ अपादाने पञ्चमी ॥ २८ ॥ अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ २९ ॥ षष्ठ्यतसर्थप्रत्ययेन ॥ ३० ॥ एनपा द्वितीया ॥ ३१ ॥ पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ॥ ३२ ॥ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥३३ ॥ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥ ३४ ॥ दूरान्तिकार्थेभ्यो द्वितीया च ॥ ३५ ॥ सप्तम्यधिकरणे च ॥ ३६ ॥ यस्य च भावेन भावलक्षणम् ॥ ३७ ॥ षष्ठी चानादरे ॥ ३८ ॥ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ ॥ ३९ ॥ आयुक्तकुशलाभ्यां चासेवायाम् ॥ ४० ॥ २ ॥ यतश्च निर्धारणम् ॥ ४१ ॥ पञ्चमी विभक्ते ॥ ४२ ॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥ ४३ ॥ प्रसितोत्सुकाभ्यां तृतीया च ॥ ४४ ॥ नक्षत्रे च लुपि ॥ ४५ ॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ ४६ ॥ संबोधने च ॥ ४७ ॥ सामन्त्रितम् ॥ ४८ ॥ एकवचनं संबुद्धिः ॥ ४९ ॥ षष्ठी शेषे ॥ ५० ॥ ज्ञोऽविदर्थस्य करणे ॥ ५१ ॥ अधीगर्थदयेशां कर्मणि ॥ ५२ ॥ कृञः प्रतियत्ने ॥ ५३ ॥ रुजार्थानां भाववचनानामज्वरेः ॥ ५४ ॥ आशिषि नाथः ॥ ५५ ॥ जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ ५६ ॥ व्यवहृपणोः समर्थयोः ॥ ५७ ॥ दिवस्तदर्थस्य ॥ ५८ ॥ विभाषोपसर्गे ॥ ५९ ॥ द्वितीया ब्राह्मणे ॥ ६० ॥ ॥ ३ ॥ प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ॥ ६१ ॥ चतुर्थ्यर्थे बहुलं छन्दसि ॥ ॥ ६२ ॥ यजेश्च करणे ॥ ६३ ॥ कृत्वोर्थप्रयोगे कालेऽधिकरणे ॥ ६४ ॥ कर्तृकर्मणोः कृति ॥ ६५ ॥ उभयप्राप्तौ कर्मणि ॥ ६६ ॥ क्तस्य च वर्तमाने ॥ ६७ ॥ अधिकरणवाचिनश्च ॥ ६८ ॥ न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥ ६९ ॥ अकेनोर्भविष्यदाधमर्ण्ययोः ॥ ७० ॥ कृत्यानां कर्तरि वा ॥ ७१ ॥ तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् ॥ ७२ ॥ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ ७३ ॥ ॥ १३ ॥ (अनभिहित इत्थं यतश्च प्रेष्यब्रुवोस्त्रयोदश) ॥

इति द्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

द्विगुरेकवचनम् ॥ १ ॥ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥ २ ॥ अनुवादे चरणानाम् ॥ ३ ॥ अध्वर्युक्रतुरनपुंसकम् ॥ ४ ॥ अध्ययनतोऽविप्रकृष्टाख्यानाम् ॥ ५ ॥ जातिरप्राणिनाम् ॥ ६ ॥ विशिष्टलिङ्गोनदीदेशोऽग्रामाः ॥ ७ ॥ क्षुद्रजन्तवः ॥ ८ ॥ येषां च विरोधः शाश्वतिकः ॥ ९ ॥ शूद्राणामनिरवसितानाम् ॥ १० ॥ गवाश्वप्रभृतीनि च ॥ ११ ॥ विभाषावृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ॥ १२ ॥ विप्रतिषिद्धं चानधिकरणवाचि ॥ १३ ॥ न दधिपयआदीनि ॥ १४॥ अधिकरणैतावत्त्वे च॥१५॥ विभाषा समीपे ॥ १६ ॥ स नपुंसकम् ॥ १७ ॥ अव्ययीभावश्च ॥ १८ ॥ तत्पुरुषोऽनञ्कर्मधारयः ॥१९॥ संज्ञायां कन्थोशीनरेषु ॥२० ॥ १॥ उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥ २१ ॥ छाया बाहुल्ये ॥ २२ ॥ सभा राजाऽमनुष्यपूर्वा ॥ २३ ॥ अशाला च ॥ २४ ॥ विभाषा सेनासुराच्छायाशालानिशानाम् ॥ २५ ॥ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ २६ ॥ पूर्ववदश्ववडवौ ॥ २७ ॥ हेमन्तशिशिरावहोरात्रे च च्छन्दसि ॥ २८ ॥ रात्राह्नाहाः पुंसि ॥ २९ ॥ अपथं नपुंसकम् ॥ ३० ॥ अर्धर्चाः पुंसि च ॥३१॥ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥ ३२ ॥ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ ३३॥ द्वितीयाटौस्स्वेनः ॥ ३४ ॥ आर्धधातुके ॥ ३५॥ अदो जग्धिर्ल्यप्ति किति ॥ ३६॥ लुङ्सनोर्घस्लृ ॥ ३७ ॥ घञपोश्च ॥ ३८ ॥ बहुलं छन्दसि ॥३९॥ लिट्यन्यतरस्याम् ॥ ॥ ४० ॥ २ ॥ वेञो वयिः ॥ ४१ ॥ हनो वध लिङि ॥ ४२॥ लुङि च ॥ ४३ ॥ आत्मनेपदेष्वन्यतरस्याम् ॥ ४४ ॥ इणो गा लुङि ॥ ४५ ॥ णौ गमिरबोधने ॥ ४६ ॥ सनि च ॥ ४७ ॥ इङश्च ॥ ४८ ॥ गाङ् लिटि ॥४९॥ विभाषा लुङ्लृङोः ॥ ५० ॥ णौ च संश्चङोः ॥ ५१ ॥ अस्तेर्भूः ॥ ५२॥ ब्रुवो वचिः ॥ ५३ ॥ चक्षिङः ख्याञ् ॥ ५४ ॥ वा लिटि ॥ ५५ ॥ अजेर्व्यघञपोः॥५६॥ वा यौ ॥ ५७ ॥ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः॥ ॥ ५८ ॥ पैलादिभ्यश्च ॥५९॥ इञः प्राचाम् ॥६०॥३॥ न तौल्वलिभ्यः॥ ६१ ॥ तद्राजस्य बहुषु तेनैवाऽस्त्रियाम ॥ ६२ ॥ यस्कादिभ्यो गोत्रे ॥ ६३ ॥ यञञोश्च ॥ ॥ ६४ ॥ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥ ६५॥ बह्वच इञः प्राच्यभरतेषु ॥ ६६ ॥ न गोपवनादिभ्यः ॥ ॥ ६७ ॥ तिककितवादिभ्यो द्वन्द्वे ॥ ६८ ॥ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ॥ ६९ ॥ आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥७०॥ सुपो धातुप्रातिपदिकयोः ॥ ७१॥ अदिप्रभृतिभ्यः शपः ॥ ७२॥ बहुलं छन्दसि ॥ ७३ ॥ यङोऽचि च ॥ ७४ ॥ जुहोत्यादिभ्यः श्लुः ॥ ७५ ॥ बहुलं छन्दसि ॥ ७६ ॥ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ ७७ ॥ विभाषा घ्राधेट्शाच्छासः ॥ ७८ ॥ तनादिभ्यस्तथासोः ॥ ७९॥ मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ॥ ८० ॥ ४ ॥ आमः ॥ ८१ ॥ अव्ययादाप्सुपः ॥ ८२ ॥ नाव्ययीभावादतोऽम् त्वपञ्चम्याः ॥ ८३ ॥ तृतीयासप्तम्योर्बहुलम् ॥ ८४ ॥ लुटः प्रथमस्य डारौरसः ॥ ८५॥ ५॥ (द्विगुरुपज्ञोक्रमं वेञो वयिर्न तौल्वलिभ्य आमः पञ्च) ॥ **इति द्वितीयाध्यायस्य तुरीयः पादः ॥ ४ ॥**

इति द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

प्रत्ययः ॥ १ ॥ परश्च ॥ २ ॥ आद्युदात्तश्च ॥ ३ ॥ अनुदात्तौ सुप्पितौ ॥ ४ ॥ गुप्तिज्किद्भ्यः सन् ॥ ५ ॥ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥६॥ धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ ७ ॥ सुप आत्मनः क्यच् ॥ ८ ॥ काम्यच्च ॥ ९ ॥ उपमानादाचारे ॥ १० ॥ कर्तुः क्यङ् सलोपश्च ॥ ११ ॥ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥ १२ ॥ लोहितादिडाज्भ्यः क्यष् ॥ १३ ॥

कष्टाय क्रमणे ॥ १४ ॥ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ॥ १५॥ बाष्पोष्मभ्यामुद्वमने ॥ १६॥ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ॥ १७ ॥ सुखादिभ्यः कर्तृवेदनायाम् ॥ १८ ॥ नमोवरिवश्चित्रङः क्यच् ॥ १९ ॥ पुच्छभाण्डचीवराण्णिङ् ॥ २० ॥ १ ॥ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ २१ ॥ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥ २२ ॥ नित्यं कौटिल्ये गतौ ॥ २३ ॥ लुप सदचरजपजभदहदशगॄभ्यो भावगर्हायाम् ॥ २४ ॥ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ २५ ॥हेतुमति च ॥ २६॥ कण्ड्वादिभ्यो यक् ॥ २७ ॥ गुपूधूपविच्छिपणिपनिभ्य आयः॥२८॥ ऋतेरीयङ् ॥२९ ॥ कमेर्णिङ् ॥ ॥३०॥आयादय आर्धधातुके वा॥३१॥ सनाद्यन्ता धातवः ॥३२॥ स्यतासी लृलुटोः ॥३३॥ सिब्बहुलं लेटि॥३४॥ कास्प्रत्ययादाममन्त्रे लिटि ॥३५ ॥ इजादेश्च गुरुमतोऽनृच्छः ॥ ३६ ॥ दयायासश्च ॥३७॥ उषविदजागृभ्योऽन्यतरस्याम् ॥ ३८ ॥ भीह्रीभृहुवां श्लुवच्च ॥ ३९ ॥ कृञ्चानुप्रयुज्यते लिटि ॥४० ॥ २ ॥ विदांकुर्वन्त्वित्यन्यतरस्याम् ॥ ४१ ॥ अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि ॥ ४२ ॥च्लि लुङि ॥ ॥४३॥ च्लेः सिच्॥४४॥शल इगुपधादनिटः क्सः॥४५॥ श्लिष आलिङ्गने ॥ ४६ ॥ न दृशः ॥ ४७ ॥ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ॥ ४८ विभाषा धेट्श्व्योः ॥ ४९ ॥ गुपेश्छन्दसि ॥ ५० ॥ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः॥ ॥ ५१ ॥ अस्यतिवक्तिख्यातिभ्योऽङ् ॥५२ ॥ लिपिसिचिह्वश्च ॥ ५३ ॥ आत्मनेपदेष्वन्यतरस्याम् ॥ ५४॥ पुषादिद्युताद्यॢदितः परस्मैपदेषु ॥ ५५ ॥ सर्तिशास्त्यर्तिभ्यश्च ॥ ५६ ॥ इरितो वा ॥ ५७ ॥ जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ॥ ५८ ॥ कृमृदृरुहिभ्यश्छन्दसि ॥ ॥ ५९ ॥ च्चिण् ते पदः ॥ ६० ॥ ३ ॥ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ॥ ६१ ॥ अचः कर्मकर्तरि ॥६२॥ दुहश्च ॥ ६३ ॥ न रुधः ॥ ६४ ॥ तपोऽनुतापे च ॥ ६५ ॥ चिण् भावकर्मणोः ॥ ६६ ॥ सार्वधातुके यक् ॥ ६७ ॥ कर्तरि शप् ॥ ६८ ॥ दिवादिभ्यः श्यन् ॥ ६९ ॥ वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥ ७० ॥ यसोऽनुपसर्गात् ॥ ७१ ॥ संयसश्च ॥ ७२ ॥ स्वादिभ्यः श्नुः ॥ ७३ ॥ श्रुवः शृ च ॥ ७४ ॥ अक्षोऽन्यतरस्याम् ॥ ७५ ॥ तनूकरणे तक्षः ॥ ७६ ॥ तुदादिभ्यः शः ॥ ७७ ॥ रुधादिभ्यः श्नम् ॥ ७८ ॥ तनादिकृञ्भ्य उः ॥ ७९ ॥ धिन्विकृण्व्योर च ॥ ८० ॥ ४ ॥ क्र्यादिभ्यः श्ना ॥ ८१ ॥ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च ॥ ८२ ॥ हलः श्नः शानज्झौ ॥ ८३ ॥ छन्दसि शायजपि ॥ ८४ ॥ व्यत्ययो बहुलम् ॥ ८५ ॥ लिङ्याशिष्यङ् ॥ ८६ ॥ कर्मवत्कर्मणा तुल्यक्रियः ॥ ॥ ८७ ॥ तपस्तपःकर्मकस्यैव ॥ ८८ ॥ न दुहस्नुनमां यक्चिणौ ॥ ८९ ॥ कुषिरजोः प्राचां श्यन्परस्मैपदं च ॥ ९० ॥ धातोः ॥ ९१ ॥ तत्रोपपदं सप्तमीस्थम् ॥ ॥ ९२ ॥ कृदतिङ् ॥ ९३ ॥ वासरूपोऽस्त्रियाम् ॥ ॥ ९४ ॥ कृत्याः ॥ ९५ ॥ तव्यत्तव्यानीयरः ॥ ९६ ॥ अचो यत् ॥ ९७ ॥ पोरदुपधात् ॥ ९८ ॥ शकिसहोश्च ॥ ॥ ९९ ॥ गदमदचरयमश्चानुपसर्गे ॥ १०० ॥ ५ ॥ अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु॥ ॥ १०१ ॥ वह्यं करणम् ॥ १०२ ॥ अर्यः स्वामिवैश्ययोः ॥ १०३ ॥ उपसर्या काल्या प्रजने ॥ १०४ ॥अजर्यं सङ्गतम् ॥ ॥ १०५ ॥ वदः सुपि क्यप् च ॥ १०६ ॥ भुवो भावे ॥ १०७ ॥ हनस्त च ॥ १०८ ॥ एतिस्तुशास्वृदृजुषः क्यप् ॥१०९॥ ऋदुपधाच्चाक्लृपि चृतेः ॥ ११० ॥ ई च खनः ॥ १११ ॥ भृञोऽसंज्ञायाम् ॥ ११२ ॥ मृजेर्विभाषा ॥ ११३ ॥ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ ११४ ॥ भिद्योद्ध्यौ नदे ॥ ११५ ॥ पुष्यसिद्ध्यौ नक्षत्रे ॥ ११६ ॥ विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥ ११७ ॥ प्रत्यपिभ्यां ग्रहेः छन्दसि[1] ॥ ॥ ११८ ॥ पदास्वैरिबाह्यापक्ष्येषु च ॥ ११९ ॥ विभाषा कृवृषोः ॥ १२० ॥ ६ ॥ युग्यं च पत्रे ॥ १२१ ॥ अमावस्यदन्यतरस्याम् ॥ १२२ ॥ छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छयप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि॥१२३॥ ऋहलोर्ण्यत् ॥ १२४ ॥ ओरावश्यके ॥ १२५ ॥ आसुयुवपिरपिलपित्रपिचमश्च ॥ १२६ ॥ आनाय्योऽनित्ये ॥ ॥ १२७ ॥ प्रणाय्योऽसंमतौ ॥ १२८ ॥ पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु ॥ १२९ ॥ क्रतौ कुण्डपाय्यसंचाय्यौ ॥ १३० ॥ अग्नौ परिचाय्योपचाय्यसमूह्याः ॥ १३१ ॥ चित्याग्निचित्ये च ॥ १३२ ॥ ण्वुल्तृचौ ॥ १३३ ॥ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥ १३४ ॥ इगुपधज्ञाप्रीकिरः कः ॥ १३५ ॥ आतश्चोपसर्गे ॥ १३६॥ पाघ्राध्माधेट्दृशः शः॥१३७॥ अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। ॥ १३८ ॥ ददातिदधात्योर्विभाषा ॥ १३९ ॥ ज्वलितिकसन्तेभ्यो णः ॥ १४० ॥ ७ ॥ श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ॥ १४१ ॥ दुन्योरनुपसर्गे ॥ ॥१४२॥ विभाषाग्रहः ॥ १४३ ॥ गेहे कः ॥ १४४ ॥ शिल्पिनि ष्वुन् ॥ १४५ ॥ गस्थकन् ॥ १४६ ॥

[1] करयाः 'प्राङ्ण्वुलः'इत्यपि पाठः । २ छन्दसीति प्रक्षिप्तः पाठः ।

ण्युट् च ॥ १४७ ॥ हश्च व्रीहिकालयोः ॥ १४८ ॥ प्रुसृल्वः समभिहारे वुन् ॥ १४९ ॥ आशिषि च ॥ ॥ १५० ॥ १० ॥ (प्रत्ययो मुण्डविदांदीपजनत्र्यादिभ्योऽवद्यपण्ययुग्यं च श्याद्व्यधा दश)॥

इति तृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥

कर्मण्यण् ॥ १ ॥ ह्वावामश्च ॥ २ ॥ आतोऽनुपसर्गे कः ॥ ३ ॥ सुपि स्थः ॥ ४ ॥ तुन्दशोकयोः परिमृजापनुदोः ॥ ५ ॥ प्रे दाज्ञः ॥ ६ ॥ समि ख्यः ॥ ७ ॥ गापोष्टक् ॥ ८ ॥ हरतेरनुद्यमनेऽच् ॥ ९ ॥ वयसि च ॥ ॥ १० ॥ आङि ताच्छील्ये ॥ ११ ॥ अर्हः ॥ १२ ॥ स्तम्बकर्णयोरमिजपोः ॥ १३ ॥ शमि धातोः संज्ञायाम् ॥ ॥ १४ ॥ अधिकरणे शेतेः ॥ १५ ॥ चरेष्टः ॥ १६ ॥ भिक्षासेनादायेषु च ॥ १७ ॥ पुरोऽग्रतोग्रेषु सर्तेः ॥ ॥ १८ ॥ पूर्वे कर्तरि ॥॥ १९ ॥ कृञो हेतुताच्छील्यानुलोम्येषु ॥ २० ॥ १ ॥ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ॥ २१ ॥ कर्मणि भृतौ ॥ २२ ॥ न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥ २३ ॥ स्तम्बशकृतोरिन् ॥ २४ ॥ हरतेर्दृतिनाथयोः पशौ ॥ २५ ॥ फलेग्रहिरात्मम्भरिश्च ॥ २६ ॥ छन्दसि वनसनरक्षिमथाम् ॥ २७ ॥ एजेः खश् ॥ २८॥ नासिकास्तनयोर्ध्माधेटोः ॥ २९॥ नाडीमुष्ट्योश्च ॥३०॥ उदि कूले रुजिवहोः ॥ ३१ ॥ वहाभ्रे लिहः ॥ ३२ ॥ परिमाणे पचः ॥ ३३ ॥ मितनखे च ॥३४॥ विध्वरुषोः तुदः ॥ ३५ ॥ असूर्यललाटयोर्दृशितपोः ॥ ३६ ॥ उग्रम्पश्येरम्मदपाणिन्धमाश्च ॥३७॥ प्रियवशे वदः खच्॥ ॥ ३८ ॥ द्विषत्परयोस्तापेः ॥ ३९ ॥ वाचि यमो व्रते॥ ॥ ४० ॥ २ ॥ पूःसर्वयोर्दारिसहोः ॥ ४१ ॥ सर्वकूलाभ्रकरीषेषु कषः ॥ ४२ ॥ मेघर्तिभयेषु कृञः ॥ ४३ ॥ क्षेमप्रियमद्रेऽण् च ॥ ४४ ॥ आशिते भुवः करणभावयोः ॥ ४५ ॥ संज्ञायां भृतॄवृजिधारिसहितपिदमः ॥ ४६ ॥ गमश्च ॥ ४७ ॥ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ ॥ ४८ ॥ आशिषि हनः ॥ ४९ ॥ अपे क्लेशतमसोः ॥ ॥ ५० ॥ कुमारशीर्षयोर्णिनिः ॥ ५१ ॥ लक्षणे जायापत्योष्टक् ॥ ५२ ॥ अमनुष्यकर्तृके च ॥ ५३ ॥ शक्तौ हस्तिकपाटयोः ॥ ५४ ॥ पाणिघताडघौ शिल्पिनि ॥ ॥ ५५॥ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ ५६ ॥ कर्तरि भुवः खिष्णुच्खुकञौ ॥ ५७ ॥ स्पृशोऽनुदके क्विन् ॥ ५८ ॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥ ५९ ॥ त्यदादिषु दृशोऽनालोचने कञ्च ॥ ६० ॥ ३ ॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ॥ ६१ ॥ भजो ण्विः ॥ ६२ ॥ छन्दसि सहः ॥ ६३ ॥ वहश्च ॥ ६४॥ कव्यपुरीषपुरीष्येषु ञ्युट् ॥ ६५ ॥ हव्येऽनन्तः पादम् ॥ ॥ ६६ ॥ जनसनखनक्रमगमो विट् ॥ ६७ ॥ अदोऽनन्ने॥ ॥ ६८ ॥ क्रव्ये च ॥ ६९ ॥ दुहः कप् घश्च ॥ ७० ॥ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥ ७१ ॥ अवे यजः ॥ ७२ ॥ विजुपे छन्दसि ॥ ७३ ॥ आतो मनिन्क्वनिब्वनिपश्च ॥७४॥ अन्येभ्योऽपि दृश्यन्ते ॥ ७५॥ क्विप् च॥ ॥ ७६ ॥ स्थः क च ॥ ७७ ॥ सुप्यजातौ णिनिस्ताच्छील्ये ॥ ७८ ॥ कर्तर्युपमाने ॥ ७९ ॥ व्रते ॥ ८० ॥४॥ बहुलमाभीक्ष्ण्ये ॥ ८१ ॥ मनः ॥ ८२ ॥ आत्ममाने खश्च ॥ ८३ ॥ भूते ॥ ८४ ॥ करणे यजः ॥ ८५ ॥ कर्मणि हनः ॥ ८६ ॥ ब्रह्मभ्रूणवृत्रेषु क्विप् ॥ ८७ ॥ बहुलं छन्दसि ॥ ८८ ॥ सुकर्मपापमन्त्रपुण्येषु कृञः ॥ ८९ ॥ सोमे सुञः ॥ ९० ॥ अग्नौ चेः ॥ ९१ ॥ कर्मण्यग्न्याख्यायाम् ॥ ९२ ॥ कर्मणीनिविक्रियः ॥ ९३ ॥ दृशेः क्वनिप् ॥ ९४ ॥ राजनि युधिकृञः ॥ ९५ ॥ सहे च ॥ ९६ ॥ सप्तम्यां जनेर्डः ॥९७॥ पञ्चम्यामजातौ ॥९८ ॥ उपसर्गे च संज्ञायाम् ॥ ९९ ॥ अनौ कर्मणि ॥१००॥५॥ अन्येष्वपि दृश्यते ॥ १०१ ॥ निष्ठा ॥१०२॥ सुयजोर्ङ्वनिप् ॥ १०३ ॥ जीर्यतेरतृन् ॥ १०४ ॥ छन्दसि लिट् ॥ १०५ ॥ लिटः कानज्वा ॥ १०६ ॥ क्वसुश्च ॥ १०७॥ भाषायां सदवसश्रुवः ॥ १०८ ॥ उपेयिवाननाश्वाननूचानश्च ॥ १०९ ॥ लुङ् ॥११०॥ अनद्यतने लङ् ॥१११॥ अभिज्ञावचने लृट् ॥ ११२ ॥ न यदि ॥ ११३॥ विभाषा साकाङ्क्षे ॥ ११४ ॥ परोक्षे लिट् ॥ ११५ ॥ हशश्वतोर्लङ् च ॥ ११६ ॥ प्रश्ने चासन्नकाले ॥ ११७ ॥ लट् स्मे ॥ ११८ ॥ अपरोक्षे च ॥११९॥ ननौ पृष्टप्रतिवचने ॥ १२० ॥ ६ ॥ नन्वोर्विभाषा ॥ १२१ ॥ पुरि लुङ् चास्मे ॥ १२२ ॥ वर्तमाने लट् ॥ १२३ ॥ लटः शतृशानचावप्रथमासमानाधिकरणे ॥ १२४ ॥ सम्बोधने च॥ ॥१२५ लक्षणहेत्वोः क्रियायाः ॥ १२६ ॥ तौ सत् ॥ ॥ १२७ ॥ पूङ्यजोः शानन् ॥ १२८ ॥ ताच्छील्यवयोवचनशक्तिषु चानश् ॥ १२९ ॥ इङ्धार्योः शत्रकृच्छ्रिणि ॥ १३० ॥ द्विषोऽमित्रे ॥ १३१ ॥ सुञो यज्ञसंयोगे ॥ ॥ १३२ ॥ अर्हः प्रशंसायाम् ॥ १३३ ॥ आ केस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ १३४ ॥ तृन् ॥ १३५ ॥ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥ १३६ ॥ णेश्छन्दसि ॥ १३७ ॥ भुवश्च ॥ ॥ १३८ ॥ ग्लाजिस्थश्च ग्स्नुः ॥ १३९ ॥ त्रसिगृधिधृषिक्षिपेः क्नुः ॥ १४० ॥ ७ ॥ शमित्यष्टाभ्यो घिनुण् ॥ १४१ ॥ सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेवि-

सञ्ज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुह-
युजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ॥
॥ १४२ ॥ वौ कषलसकत्थस्रम्भः ॥ १४३ ॥ अपे च
लषः ॥ १४४ ॥ प्रे लपसुद्रुमथवदवसः ॥ १४५ ॥ नि-
न्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासू-
यो वुञ् ॥ १४६ ॥ देविक्रुशोश्चोपसर्गे ॥ १४७ ॥ चल-
नशब्दार्थादकर्मकाद्युच् ॥ १४८ ॥ अनुदात्तेतश्च हलादेः
॥१४९॥ जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ॥
॥ १५० ॥ क्रुधमण्डार्थेभ्यश्च ॥ १५१ ॥ नयः ॥
॥ १५२ ॥ सूददीपदीक्षश्च ॥ १५३ ॥ लषपतपद-
स्थाभूवृषहनकमगमशॄभ्य उकञ् ॥ १५४ ॥ जल्पभिक्ष-
कुट्टलुण्टवृङः षाकन् ॥ १५५ ॥ प्रजोरिनिः ॥ १५६ ॥
जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ॥ १५७ ॥
स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ॥ १५८ ॥
दाधेट्सिशदसदो रुः ॥ १५९ ॥ सृघस्यदः क्मरच् ॥
॥ १६० ॥ ८ ॥ भञ्जभासमिदो घुरच् ॥ १६१ ॥ वि-
दिभिदिच्छिदेः कुरच् ॥ १६२ ॥ इण्नशजिसर्तिभ्यः ॥
क्वरप् ॥ १६३ ॥ गत्वरश्च ॥ १६४ ॥ जागुरूकः ॥
॥ १६५ ॥ यजजपदशां यङः ॥ १६६ ॥ नमिकम्पि-
स्म्यजसकमहिंसदीपो रः ॥ १६७ ॥ सनाशंसभिक्ष उः ॥
॥ १६८ ॥ विन्दुरिच्छुः ॥ १६९ ॥ क्याच्छन्दसि ॥
॥ १७० ॥ आदृगमहनजनः किकिनौ लिट् च ॥ १७१ ॥
स्वपितृषोर्नजिङ् ॥ १७२ ॥ शॄवन्द्योरारुः ॥ १७३ ॥
भियः क्रुक्लुकनौ ॥ १७४ ॥ स्थेशभासपिसकसो वरच् ॥
॥ १७५ ॥ यश्च यङः ॥ १७६ ॥ भ्राजभासधुर्विद्युतो-
र्जिपॄजुग्रावस्तुवः क्विप् ॥ १७७ ॥ अन्येभ्योऽपि दृश्यते ॥
॥ १७८ ॥ भुवः संज्ञान्तरयोः ॥ १७९ ॥ विप्रसम्भ्यो
ड्वसंज्ञायाम् ॥ १८० ॥ ९ ॥ धः कर्मणि ष्ट्रन् ॥ १८१ ॥
दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ॥ १८२ ॥
हलसूकरयोः पुवः ॥ १८३ ॥ अर्तिलूधूसूखनसहचर
इत्रः ॥ १८४ ॥ पुवः संज्ञायाम् ॥ १८५ ॥ कर्तरि
चर्षिदेवतयोः ॥ १८६ ॥ ञीतः क्तः ॥ १८७ ॥ मतिबु-
द्धिपूजार्थेभ्यश्च ॥ १८८ ॥ ८ ॥ (कर्मणि दिवापूः सत्सूव-
हुलमन्येष्वपिनन्वोः शमिति भञ्जभासधः कर्मण्यष्टौ) ॥

इति तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

उणादयो बहुलम् ॥ १ ॥ भूतेऽपि दृश्यन्ते ॥ २ ॥
भविष्यति गम्यादयः ॥ ३ ॥ यावत्पुरानिपातयोर्लट् ॥ ४ ॥
विभाषा कदाकर्ह्योः ॥ ५ ॥ किंवृत्ते लिप्सायाम् ॥ ६ ॥
लिप्स्यमानसिद्धौ च ॥ ७ ॥ लोडर्थलक्षणे च ॥ ८ ॥
लिङ् चोर्ध्वमौहूर्तिके ॥ ९ ॥ तुमुन्ण्वुलौ क्रियायां
क्रियार्थायाम् ॥ १० ॥ भाववचनाश्च ॥ ११ ॥ अण्
कर्मणि च ॥ १२ ॥ लृट् शेषे च ॥ १३ ॥ लृटः सद्वा
॥ १४ ॥ अनद्यतने लुट् ॥ १५ ॥ पदरुजविशस्पृशो घञ्
॥ १६ ॥ स्थिरे ॥ १७ ॥ भावे ॥ १८ ॥ अकर्तरि च
कारके संज्ञायाम् ॥ १९ ॥ परिमाणाख्यायां सर्वेभ्यः
॥ २० ॥ १ ॥ इङश्च ॥ २१ ॥ उपसर्गे रुवः ॥ २२ ॥
समि युद्रुदुवः ॥ २३ ॥ श्रिणीभुवोऽनुपसर्गे ॥ २४ ॥
वौ क्षुश्रुवः ॥ २५ ॥ अवोदोर्नियः ॥ २६ ॥ प्रे द्रुस्तुस्रुवः
॥ २७ ॥ निरभ्योः पूल्वोः ॥ २८ ॥ उन्न्योर्ग्रः ॥ २९ ॥ कॄ
धान्ये ॥ ३० ॥ यज्ञे समि स्तुवः ॥ ३१ ॥ प्रे स्त्रोऽयज्ञे ॥
॥ ३२ ॥ प्रथने वावशब्दे ॥ ३३ ॥ छन्दो नाम्नि च ॥
॥ ३४ ॥ उदि ग्रहः ॥ ३५ ॥ समि मुष्टौ ॥ ३६ ॥ परि-
न्योर्नीणोर्द्यूताभ्रेषयोः ॥ ३७ ॥ परावनुपात्यय इणः ॥ ३८ ॥
व्युपयोः शेतेः पर्याये ॥ ३९ ॥ हस्तादाने चेरस्तेये ॥ ४० ॥
॥ २ ॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥ ४१ ॥
संघे चानौत्तराधर्ये ॥ ४२ ॥ कर्मव्यतिहारे णच् स्त्रियाम्
॥ ४३ ॥ अभिविधौ भाव इनुण् ॥ ४४ ॥ आक्रोशेऽव-
न्योर्ग्रहः ॥ ४५ ॥ प्रे लिप्सायाम् ॥ ४६ ॥ परौ यज्ञे ॥
॥ ४७ ॥ नौ वृ धान्ये ॥ ४८ ॥ उदि श्रयतियौतिपूद्रुवः
॥ ४९ ॥ विभाषाङि रुप्लुवोः ॥ ५० ॥ अवे ग्रहो
वर्षप्रतिबन्धे ॥ ५१ ॥ प्रे वणिजाम् ॥ ५२ ॥ रश्मौ च
॥ ५३ ॥ वृणोतेराच्छादने ॥ ५४ ॥ परौ भुवोऽवज्ञाने
॥ ५५ ॥ एरच् ॥ ५६ ॥ ऋदोरप् ॥ ५७ ॥ ग्रहवृदृ-
निश्चिगमश्च ॥ ५८ ॥ उपसर्गेऽदः ॥ ५९ ॥ नौ ण च
॥ ६० ॥ ३ ॥ व्यधजपोरनुपसर्गे ॥ ६१ ॥ स्वनहसोर्वा
॥ ६२ ॥ यमः समुपनिविषु च ॥ ६३ ॥ नौ गदनदप-
ठस्वनः ॥ ६४ ॥ क्वणो वीणायां च ॥ ६५ ॥ नित्यं पणः
परिमाणे ॥ ६६ ॥ मदोऽनुपसर्गे ॥ ६७ ॥ प्रम-
दसम्मदौ हर्षे ॥ ६८ ॥ समुदोरजः पशुषु ॥ ६९ ॥ अक्षेषु
ग्लहः ॥ ७० ॥ प्रजने सर्तेः ॥ ७१ ॥ ह्वः संप्रसारणं
च न्यभ्युपविषु ॥ ७२ ॥ आङि युद्धे ॥ ७३ ॥ निपा-
नमाहावः ॥ ७४ ॥ भावेऽनुपसर्गस्य ॥ ७५ ॥ हनश्च वधः
॥ ७६ ॥ मूर्तौ घनः ॥ ७७ ॥ अन्तर्घनो देशे ॥ ७८ ॥
अगारैकदेशे प्रघणः प्रघाणश्च ॥ ७९ ॥ उद्घनो-
ऽत्याधानम् ॥ ८० ॥ ४ ॥ अपघनोऽङ्गम् ॥ ८१ ॥
करणेऽयोविद्रुषु ॥ ८२ ॥ स्तम्बे क च ॥ ८३ ॥
परौ घः ॥ ८४ ॥ उपघ्न आश्रये ॥ ८५ ॥ सङ्घोद्घौ
गणप्रशंसयोः ॥ ८६ ॥ निघो निमितम् ॥ ८७ ॥ ड्वितः
क्त्रिः ॥ ८८ ॥ ट्वितोऽथुच् ॥ ८९ ॥ यजयाचयतविच्छ-
प्रच्छरक्षो नङ् ॥ ९० ॥ स्वपो नन् ॥ ९१ ॥ उपसर्गे
घोः किः ॥ ९२ ॥ कर्मण्यधिकरणे च ॥ ९३ ॥
स्त्रियां क्तिन् ॥ ९४ ॥ स्थागापापचो भावे ॥ ९५ ॥
मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ॥ ९६ ॥ ऊतियू-

तिजूतिसातिहेतिकीर्तयश्च ॥ ९७ ॥ व्रजयजोर्भावे क्यप् ॥९८॥ संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥ ९९ ॥ कृञः श च ॥ १०० ॥ ५ ॥ इच्छा ॥ १०१ ॥ अ प्रत्ययात् ॥ १०२ ॥ गुरोश्च हलः ॥ १०३ ॥ षिद्भिदादिभ्योऽङ् ॥ १०४ ॥ चिन्तिपूजिकथिकुम्बिचर्चश्च ॥ १०५ ॥ आतश्चोपसर्गे ॥ १०६॥ ण्यासश्रन्थोयुच् ॥ १०७ ॥ रोगाख्यायां ण्वुल्बहुलम् ॥ १०८ ॥ संज्ञायाम् ॥ १०९ ॥ विभाषाख्यानपरिप्रश्नयोरिञ् च ॥११०॥ पर्यायार्हर्णोत्पत्तिषु ण्वुच्॥१११॥ आक्रोशे नञ्यनिः ॥११२॥ कृत्यल्युटो बहुलम्॥११३॥ नपुंसके भावे क्तः ॥ ११४ ॥ ल्युट् च ॥११५॥ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् ॥ ११६ ॥ करणाधिकरणयोश्च ॥ ११७ ॥ पुंसि संज्ञायां घः प्रायेण॥११८॥ गोचरसंचरवहव्रजव्यजापणनिगमाश्च ॥११९॥अवे तॄस्त्रोर्घञ् ॥१२०॥६॥ हलश्च ॥ १२१ ॥ अध्यायन्यायोद्यावसंहाराश्च ॥ १२२ ॥ उदङ्कोऽनुदके ॥ १२३ ॥ जालमानायः ॥ १२४ ॥ खनो घ च ॥ १२५ ॥ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥१२६॥ कर्तृकर्मणोश्च भूकृञोः ॥ ॥ १२७ ॥ आतो युच् ॥१२८ ॥ छन्दसि गत्यर्थेभ्यः ॥ १२९ ॥ अन्येभ्योऽपि दृश्यते ॥१३०॥वर्तमानसामीप्ये वर्तमानवद्वा ॥१३१॥ आशंसायां भूतवच्च ॥ १३२ ॥ क्षिप्रवचने लृट् ॥ १३३ ॥ आशंसावचने लिङ्॥१३४॥ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ॥ १३५ ॥ भविष्यति मर्यादावचनेऽवरस्मिन् ॥१३६॥ कालविभागे चानहोरात्राणाम् ॥१३७॥ परस्मिन्विभाषा ॥ १३८ ॥ लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥१३९॥ भूते च ॥१४०॥ ७ ॥ वोताप्योः ॥ १४१ ॥ गर्हायां लडपिजात्वोः ॥ १४२॥ विभाषा कथमि लिङ् च ॥ १४३ ॥ किंवृत्ते लिङ्लृटौ॥ ॥ १४४ ॥ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ॥ १४५ ॥ किंकिलास्त्यर्थेषु लृट् ॥१४६॥ जातुयदोर्लिङ् ॥१४७॥ यच्चयत्रयोः ॥ १४८ ॥ गर्हायां च ॥१४९॥ चित्रीकरणे च ॥ १५० ॥ शेषे लृडयदौ ॥१५१॥ उताप्योः समर्थयोर्लिङ् ॥१५२॥ कामप्रवेदनेऽकच्चिति ॥ १५३ ॥ सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे ॥१५४॥ विभाषा धातौ सम्भावनवचनेऽयदि ॥१५५॥ हेतुहेतुमतोर्लिङ् ॥१५६॥ इच्छार्थेषु लिङ्लोटौ ॥ १५७ ॥ समानकर्तृकेषु तुमुन् ॥ ॥१५८ ॥ लिङ् च॥ १५९ ॥ इच्छार्थेभ्यो विभाषा वर्तमाने ॥ १६० ॥८॥ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥ १६१ ॥ लोट् च ॥१६२॥ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ १६३ ॥ लिङ् चोर्ध्वमौहूर्तिके ॥ ॥१६४ ॥ स्मे लोट् ॥ १६५ ॥ अधीष्टे च ॥ १६६ ॥ कालसमयवेलासु तुमुन् ॥ १६७ ॥ लिङ्यदि ॥१६८॥ अर्हे कृत्यतृचश्च ॥ १६९ ॥ आवश्यकाधमर्ण्ययोर्णिनिः ॥१७० ॥ कृत्याश्च ॥१७१॥ शकि लिङ् च ॥१७२॥ आशिषि लिङ्लोटौ ॥ १७३ ॥ क्तिच्क्तौ च संज्ञायाम् ॥ ॥ १७४ ॥ माङि लुङ्॥१७५॥स्मोत्तरे लङ् च ॥१७६॥ ॥१९॥ (उणादय इङो निवासव्यधजपोरपघनोङ्गमिच्छाहलश्च वोताप्योर्विधिनिमन्त्रणाषोडश (॥

इति तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

धातुसम्बन्धे प्रत्ययाः ॥ १ ॥ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ॥२॥ समुच्चयेऽन्यतरस्याम् ॥ ३ ॥ यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥४॥ समुच्चये सामान्यवचनस्य ॥ ५॥ छन्दसि लुङ्लङ्लिटः ॥ ६ ॥ लिङर्थे लेट् ॥७॥ उपसंवादाशङ्कयोश्च ॥८॥ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ॥ ॥ ९ ॥ प्रयै रोहिष्यै अव्यथिष्यै ॥१०॥ दृशे विख्ये च ॥ ११ ॥ शकि णमुल्कमुलौ ॥ १२॥ईश्वरे तोसुन्कसुनौ ॥ १३ ॥ कृत्यार्थे तवैकेन्केन्यत्वनः ॥१४॥ अवचक्षे च ॥ १५ ॥ भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥ १६ ॥ सृपितृदोः कसुन् ॥१७॥ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥१८॥ उदीचां माङो व्यतीहारे ॥ १९ ॥ परावरयोगे च ॥ २० ॥१॥ समानकर्तृकयोः पूर्वकाले ॥ २१ ॥ आभीक्ष्ण्ये णमुल् च ॥ २२ ॥ न यद्यनाकांक्षे ॥ २३ ॥ विभाषाग्रेप्रथमपूर्वेषु ॥ २४ ॥ कर्मण्याक्रोशे कृञः खमुञ्॥२५॥ स्वादुमि णमुल् ॥२६॥ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ २७ ॥ यथातथयोरसूयाप्रतिवचने ॥२८॥ कर्मणि दृशिविदोः साकल्ये ॥ ॥ २९ ॥ यावति विन्दजीवोः ॥ ३० ॥ चर्मोदरयोः पूरेः ॥ ३१ ॥ वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ॥ ॥ ३२ ॥ चेले क्नोपेः ॥ ३३ ॥ निमूलसमूलयोः कषः ॥ ३४ ॥[१]शुष्कचूर्णरूक्षेषु पिषः॥३५॥ समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥ ३६ ॥ करणे हनः ॥ ३७ ॥ स्नेहने पिषः ॥ ३८ ॥ हस्ते वर्तिग्रहोः ॥ ३९ ॥ स्वे पुषः ॥४०॥२॥ अधिकरणे बन्धः ॥ ४१ ॥ संज्ञायाम् ॥४२॥ कर्त्रोर्जीवपुरुषयोर्नशिवहोः ॥ ४३ ॥ ऊर्ध्वे शुषिपूरोः ॥ ४४ ॥ उपमाने कर्मणि च ॥४५ ॥ कषादिषु यथाविध्यनुप्रयोगः ॥ ४६ ॥ उपदंशस्तृतीयायाम् ॥ ४७ ॥ हिंसार्थानां च समानकर्मकाणाम् ॥४८॥ सप्तम्यां चोपपीडरुधकर्षः ॥ ४९ ॥ समासत्तौ ॥ ५० ॥ प्रमाणे च ॥ ५१ ॥ अपादाने परीप्सायाम् ॥ ५२ ॥ द्वितीयायां च ॥ ५३ ॥ स्वाङ्गेऽध्रुवे ॥ ५४ ॥ परिक्लिश्यमाने च ॥

१ आधारावायशब्दौ प्रक्षिप्तौ, वार्त्तिके दर्शनात्।

॥ ५५ ॥ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥ ५६ ॥ अस्यतितृषोः क्रियान्तरे कालेषु ॥ ५७ ॥ नाम्न्यादिशिग्रहोः ॥ ५८ ॥ अव्ययेऽयथाभिप्रेताख्याने-कृञः क्त्वाणमुलौ ॥ ५९॥ तिर्यच्यपवर्गे ॥ ६० ॥ ३ ॥ स्वाङ्गे तस्प्रत्यये कृभ्वोः ॥ ६१ ॥ नाधार्थप्रत्यये च्व्यर्थे ॥ ६२ ॥ तूष्णीमि भुवः॥६३॥ अन्वच्यानुलोम्ये ॥६४ ॥ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥ ६५ ॥ पर्याप्तिवचनेष्वलमर्थेषु ॥६६॥ कर्तरि कृत्॥६७॥भव्यगेय-प्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा॥६८॥लः कर्मणि च भावे चाकर्मकेभ्यः॥६९॥तयोरेव कृत्यक्तखलर्थाः॥७०॥ आदिकर्मणि क्तः कर्तरि च ॥ ७१ ॥ गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥ ७२ ॥ दाशगोघ्नौ संप्रदाने ॥ ७३ ॥ भीमादयोऽपादाने ॥७४॥ ताभ्यामन्यत्रोणादयः ॥ ७५ ॥ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥ ७६ ॥ लस्य ॥ ७७ ॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ॥७८ ॥ टित आत्मनेपदानां टेरे ॥ ७९ ॥ थासः से ॥ ८० ॥ ४ ॥ लिटस्तझयोरेशिरेच् ॥ ८१ ॥ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ ८२ ॥ विदो लटो वा ॥ ८३ ॥ ब्रुवः पञ्चानामादित आहो ब्रुवः ॥८४ ॥ लोटो लङ्वत्॥८५॥ एरुः ॥ ८६ ॥ सेर्ह्यपिच्च ॥ ८७ ॥ वा छन्दसि ॥ ८८॥ मेर्निः ॥ ८९ ॥ आमेतः ॥ ९० ॥ सवाभ्यां वामौ ॥ ९१ ॥ आडुत्तमस्य पिच्च ॥ ९२ ॥ एत ऐ ॥ ९३ ॥ लेटोऽडाटौ ॥ ९४ ॥ आत ऐ ॥ ९५ ॥ वैतोऽन्यत्र ॥ ९६ ॥ इतश्च लोपः परस्मैपदेषु ॥ ९७ ॥ स उत्तमस्य ॥ ९८ ॥ नित्यं ङितः॥ ९९॥ इतश्च॥१००॥ ॥५॥ तस्थस्थमिपां तांतंतामः ॥ १०१ ॥ लिङः सीयुट् ॥ १०२ ॥ यासुट् परस्मैपदेषूदात्तो ङिच्च॥१०३॥ किदाशिषि ॥ १०४ ॥ झस्य रन् ॥ १०५ ॥ इटोऽत्॥ ॥१०६ ॥ सुट्तिथोः ॥ १०७ ॥ झेर्जुस् ॥ १०८ ॥ सिजभ्यस्तविदिभ्यश्च ॥ १०९ ॥ आतः ॥ ११० ॥ लङः शाकटायनस्यैव ॥ १११ ॥ द्विषश्च ॥ ११२ ॥ तिङ्शित्सार्वधातुकम् ॥ ११३ ॥ आर्धधातुकं शेषः ॥ ॥ ११४ ॥ लिट् च ॥ ११५ ॥ लिङाशिषि ॥११६॥ छन्दस्युभयथा ॥ ११७ ॥ १७॥ (धातुसम्बन्धे समानकर्तृकयोरविकरणे स्वांगे लिटस्तस्थस्थमिपां सप्तदश) ॥

इति तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्चाध्यायस्तृतीयः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

ङ्याप्प्रातिपदिकात् ॥ १ ॥ स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्॥२॥ स्त्रियाम्॥ ॥३॥ अजाद्यतष्टाप् ॥४॥ ऋन्नेभ्यो ङीप् ॥५॥ उगितश्च॥ ॥६॥ वनो र च ॥ ७ ॥ पादोऽन्यतरस्याम् ॥ ८ ॥ टाबृचि ॥ ९ ॥ न षट्स्वस्रादिभ्यः ॥ १० ॥ मनः ॥ ॥ ११ ॥ अनो बहुव्रीहेः ॥ १२ ॥ डाबुभाभ्यामन्यतरस्याम् ॥ १३ ॥ अनुपसर्जनात् ॥ १४ ॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥ १५ ॥ यञश्च ॥ १६ ॥ प्राचां ष्फ तद्धितः ॥ १७ ॥ सर्वत्र लोहितादिकतन्तेभ्यः ॥ १८ ॥ कौरव्यमाण्डूकाभ्यां च ॥ ॥ १९ ॥ वयसि प्रथमे ॥ २० ॥ १ ॥ द्विगोः ॥ २१॥ अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥ २२॥ काण्डान्तात्क्षेत्रे ॥ २३ ॥ पुरुषात्प्रमाणेऽन्यतरस्याम् ॥ ॥ २४ ॥ बहुव्रीहेरूधसो ङीष् ॥ २५ ॥ संख्याऽव्ययादेर्ङीप् ॥ २६ ॥ दामहायनान्ताच्च ॥ २७ ॥ अन उपधालोपिनोऽन्यतरस्याम् ॥ २८ ॥ नित्यं संज्ञाछन्दसोः ॥ ॥ २९ ॥ केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ३० ॥ रात्रेश्चाजसौ ॥ ३१ ॥ अन्तर्वत्पतिवतोर्नुक् ॥ ३२ ॥ पत्युर्नो यज्ञसंयोगे ॥ ३३ ॥ विभाषा सपूर्वस्य ॥ ३४ ॥ नित्यं सपत्न्यादिषु ॥ ३५ ॥ पूतक्रतोरै च ॥ ३६ ॥ वृषाकप्यग्निकुसितकुसिदानामुदात्तः ॥ ॥३७॥ मनोरौ वा ॥ ३८॥ वर्णादनुदात्तात्तोपधात्तो नः॥ ॥ ३९ ॥ अन्यतो ङीष् ॥ ४० ॥ २ ॥ षिद्गौरादिभ्यश्च ॥ ४१॥ जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥ ४२ ॥ शोणात् प्राचाम् ॥ ४३ ॥ वोतो गुणवचनात् ॥ ४४ ॥ बह्वादिभ्यश्च ॥ ४५ ॥ नित्यं छन्दसि ॥४६ ॥ भुवश्च ॥ ४७ ॥ पुंयोगादाख्यायाम् ॥ ४८ ॥ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥ ४९ ॥ क्रीतात्करणपूर्वात् ॥ ५० ॥ क्तादल्पाख्यायाम् ॥ ५१ ॥ बहुव्रीहेश्चान्तोदात्तात् ॥ ५२ ॥ अस्वाङ्गपूर्वपदाद्वा ॥ ५३ ॥ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥ ५४ ॥ नासिकोदरौष्ठजंघादन्तकर्णशृङ्गाच्च ॥ ५५ ॥ न क्रोडादिबह्वचः ॥ ॥ ५६ ॥ सहनञ्विद्यमानपूर्वाच्च ॥ ५७ ॥ नखमुखात्संज्ञायाम् ॥ ५८ ॥ दीर्घजिह्वी च च्छन्दसि ॥ ५९ ॥ दिक्पूर्वपदान्ङीप् ॥ ६० ॥ ३ ॥ वाहः ॥ ६१ ॥ सख्यशिश्वीति भाषायाम् ॥ ६२ ॥ जातेरस्त्रीविषयादयोपधात् ॥ ६३ ॥ पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ॥६४॥ इतो मनुष्यजातेः ॥ ६५ ॥ ऊङुतः ॥ ६६ ॥ बाह्वन्तात्संज्ञायाम् ॥ ६७ ॥ पङ्गोश्च ॥६८॥ ऊरूत्तरपदादौपम्ये ॥ ६९ ॥ संहितशफलक्षणवामादेश्च ॥ ७० ॥

---

१ करपूर्व्युनामिति क्वचित्पाठः । तत्र व्युनामिति प्रामादिकः प्रक्षिप्तपाठः ।

कद्रुकमण्डल्वोश्छन्दसि ॥ ७१ ॥ संज्ञायाम् ॥ ७२ ॥ शार्ङ्गरवाद्यञो ङीन् ॥ ७३ ॥ यङश्चाप् ॥ ७४ ॥ आवट्याच्च ॥ ७५ ॥ तद्धिताः ॥ ७६ ॥ यूनस्तिः ॥ ७७॥ अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥ ७८ ॥ गोत्रावयवात् ॥ ७९ ॥ क्रौड्यादिभ्यश्च ॥ ८० ॥ ४ ॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम् ॥ ॥ ८१ ॥ समर्थानां प्रथमाद्वा ॥ ८२ ॥ प्राग्दीव्यतोऽण् ॥ ८३ ॥ अश्वपत्यादिभ्यश्च ॥ ८४ ॥ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥ ८५ ॥ उत्सादिभ्योऽञ्॥८६॥ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥८७॥ द्विगोर्लुगनपत्ये ॥ ॥ ८८ ॥ गोत्रेऽलुगचि ॥ ८९ ॥ यूनि लुक् ॥ ९० ॥ फक्फिञोरन्यतरस्याम्॥ ९१ ॥ तस्यापत्यम् ॥ ९२ ॥ एको गोत्रे ॥ ९३ ॥ गोत्राद्यून्यस्त्रियाम् ॥ ९४ ॥ अत इञ्॥ ९५ ॥ बाह्वादिभ्यश्च ॥९६ ॥ सुधातुरकङ् च ॥ ॥ ९७ ॥ गोत्रे कुञ्जादिभ्यश्चफञ् ॥ ९८ ॥ नडादिभ्यः फक् ॥९९ ॥ हरिताभ्यो ञः ॥१०० ॥ ५ यञिञोश्च ॥ ॥ १०१ ॥ शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ॥ ॥१०२॥ द्रोणपर्वतजीवन्तादन्यतरस्याम् ॥ १०३ ॥ अनृष्यानान्तर्ये बिदादिभ्योऽञ् ॥ १०४ ॥ गर्गादिभ्यो यञ् ॥ १०५ ॥ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः॥१०६॥ कपिबोधादाङ्गिरसे ॥ १०७॥ वतण्डाच्च ॥ १०८ ॥ लुक् स्त्रियाम् ॥ १०९ ॥ अश्वादिभ्यः फञ् ॥ ११० ॥ भर्गात् त्रैगर्ते ॥ १११ ॥ शिवादिभ्योऽण् ॥ ११२ ॥ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥ ११३ ॥ ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥ ११४ ॥ मातुरुत्संख्यासंभद्रपूर्वायाः ॥ ११५ ॥ कन्यायाः कनीन च ॥ ११६ ॥ विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ॥ ११७ ॥ पीलाया वा ॥ ११८ ॥ ढक् च मण्डूकात् ॥ ११९ ॥ स्त्रीभ्यो ढक् ॥ १२० ॥ ६ ॥ द्व्यचः ॥ १२१ ॥ इतश्चानिञः ॥ १२२ ॥ शुभ्रादिभ्यश्च ॥ १२३ ॥ विकर्णकुषीतकात् काश्यपे ॥ १२४ ॥ भ्रुवो वुक् च ॥ १२५ ॥ कल्याण्यादीनामिनङ् च ॥ १२६ ॥ कुलटाया वा ॥१२७ ॥ चटकाया ऐरक् ॥ १२८ ॥ गोधाया ढ्रक् ॥ १२९ ॥ आरगुदीचाम् ॥ १३० ॥ क्षुद्राभ्यो वा ॥ १३१ ॥ पितृष्वसुश्छण् ॥ १३२ ॥ ढकि लोपः ॥ १३३ ॥ मातृष्वसुश्च ॥ १३४ ॥ चतुष्पाद्भ्यो ढञ् ॥ १३५ ॥ गृष्ट्यादिभ्यश्च ॥ १३६ ॥ राजश्वशुराद्यत् ॥ १३७ ॥ क्षत्राद् घः ॥ १३८ ॥ कुलात्खः ॥ १३९ ॥ अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥ १४० ॥७॥ महाकुलादञ्खञौ ॥ १४१ ॥ दुष्कुलाद् ढक् ॥१४२॥ स्वसुश्छः ॥१४३॥ भ्रातुर्व्यच्च ॥ १४४ ॥ व्यन् सपत्ने ॥ १४५ ॥ रेवत्यादिभ्यष्ठक् ॥१४६॥ गोत्रस्त्रियाः कुत्सने ण च ॥ १४७॥ वृद्धाट्ठक् सौवीरेषु बहुलम् ॥ १४८ ॥ फेश्छ च ॥ ॥ १४९ ॥ फाण्टाहृतिमिमताभ्यां णफिञौ ॥१५०॥कुर्वादिभ्यो ण्यः ॥१५१॥ सेनान्तलक्षणकारिभ्यश्च ॥ १५२॥ उदीचामिञ् ॥१५३॥ तिकादिभ्यः फिञ् ॥१५४॥कौसल्यकार्मार्याभ्यां च ॥ १५५॥ अणो द्व्यचः ॥ १५६ ॥ उदीचां वृद्धादगोत्रात् ॥ १५७ ॥ वाकिनादीनां कुक् च ॥१५८ ॥ पुत्रान्तादन्यतरस्याम् ॥ १५९ ॥ प्राचामवृद्धात् फिन् बहुलम् ॥ १६० ॥ ८ ॥ मनोर्जातावञ्यतौ षुक् च ॥ १६१ ॥ अपत्यं पौत्रप्रभृति गोत्रम् ॥ ॥ १६२ ॥ जीवति तु वंश्ये युवा ॥ १६३॥ भ्रातरि च ज्यायसि ॥ १६४ ॥ वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ॥१६५॥ वृद्धस्य च पूजायाम् ॥१६६॥ यूनश्च कुत्सायाम् ॥१६७॥ जनपदशब्दात् क्षत्रियादञ्॥१६८॥ साल्वेयगान्धारिभ्यां च ॥ १६९ ॥ द्व्यञ्मगधकलिङ्गसूरमसादण् ॥१७०॥ वृद्धेत्कोसलाजादाञ्ञ्यङ् ॥१७१॥ कुरुनादिभ्यो ण्यः ॥ १७२ ॥ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ॥ १७३ ॥ ते तद्राजाः ॥ १७४ ॥ कम्बोजाल्लुक् ॥ १७५ ॥ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ॥ १७६ ॥ अतश्च ॥ १७७ ॥ न प्राच्यभर्गादियौधेयादिभ्यः ॥ १७८ ॥ (ङ्याब्द्विगोः षिद्गौरादिवाहो दैवयज्ञियञिञोर्द्व्यचो महाकुलान्मनोर्जातावष्टादश) ॥

इति चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥

तेन रक्तं रागात् ॥ १ ॥ लाक्षारोचनाट्ठक् ॥ २ ॥ नक्षत्रेण युक्तः कालः ॥ ३ ॥ लुबविशेषे ॥ ४ ॥ संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ ५ ॥ द्वन्द्वाच्छः ॥ ६ ॥ दृष्टं साम ॥ ७ ॥ कलेर्ढक् ॥ ८ ॥ वामदेवाड्ड्यड्ड्यौ ॥ ९ ॥ परिवृतो रथः ॥ १० ॥ पाण्डुकम्बलादिनिः ॥ ११ ॥ द्वैपवैयाघ्रादञ् ॥ १२ ॥ कौमारापूर्ववचने ॥१३॥ तत्रोद्धृतममत्रेभ्यः ॥ १४ ॥ स्थण्डिलाच्छयितरि व्रते ॥१५॥संस्कृतं भक्षाः ॥ १६ ॥ शूलोखाद्यत् ॥ १७ ॥ दध्नष्ठक् ॥ १८ ॥ उदश्वितोऽन्यतरस्याम् ॥ १९ ॥ क्षीराड्ढञ् ॥२०॥१॥ सास्मिन् पौर्णमासीति संज्ञायाम ॥ २१ ॥ आग्रहायण्यश्वत्थाट्ठक् ॥२२॥ विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ॥ २३ ॥ सास्य देवता ॥ २४ ॥ कस्येत् ॥ २५ ॥ शुक्राद्घन् ॥२६॥ अपोनप्त्रपान्नप्तृभ्यां घः॥२७॥ छ च ॥ २८ ॥ महेन्द्राद्घाणौ च ॥ २९ ॥ सोमाट्ट्यण् ॥३०॥ वाय्वृतुपितुषसो यत्॥३१॥ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च॥३२॥ अग्नेर्ढक् ॥ ३३ ॥ कालेभ्यो भववत् ॥ ३४ ॥ महाराजप्रोष्ठपदाट्ठञ् ॥ ३५॥ पितृव्यमातुलमातामहपितामहाः ॥ ३६ ॥ तस्य समूहः

॥ ३७ ॥ भिक्षादिभ्योऽण् ॥ ३८ ॥ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥ ३९ ॥ केदाराद्यञ् च ॥ ४० ॥ २ ॥ ठञ् कवचिनश्च ॥ ४१ ॥ ब्राह्मणमाणववाडवाद्यत् ॥ ४२ ॥ ग्रामजनबन्धुसहायेभ्यस्तल् ॥ ॥ ४३॥ अनुदात्तादेरञ् ॥४४॥ खण्डिकादिभ्यश्च ॥४५॥ चरणेभ्यो धर्मवत् ॥४६॥ अचित्तहस्तिधेनोष्ठक् ॥ ४७ ॥ केशाश्वाभ्यां यञ्छावन्यतरस्याम् ॥ ४८ ॥ पाशादिभ्यो यः ॥ ४९ ॥ खलगोरथात् ॥ ५० ॥ इनित्रकट्यचश्च ॥ ५१ ॥ विषयो देशे॥५२॥राजन्यादिभ्यो वुञ् ॥५३॥ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥ ५४॥ सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ॥ ५५ ॥ संग्रामे प्रयोजनयोद्धृभ्यः ॥ ५६ ॥ तदस्यां प्रहरणमिति क्रीडायां णः ॥ ॥ ५७ ॥ घञः सास्यां क्रियेति ञः ॥ ५८ ॥ तदधीते तद्वेद ॥ ५९ ॥ क्रतूक्थादिसूत्रान्ताट्ठक् ॥ ६० ॥ ३ ॥ क्रमादिभ्यो वुन् ॥ ॥ ६१ ॥ अनुब्राह्मणादिनिः ॥ ६२॥ वसन्तादिभ्यष्ठक् ॥ ६३ ॥ प्रोक्ताल्लुक् ॥ ६४ ॥ सूत्राच्च कोपधात् ॥ ६५ ॥ छन्दोब्राह्मणानि च तद्विषयाणि ॥६६॥तदस्मिन्नस्तीति देशे तन्नाम्नि ॥६७॥ तेन निर्वृत्तम् ॥ ६८ ॥ तस्य निवासः ॥ ६९ ॥ अदूरभवश्च॥ ७०॥ ओरञ् ॥ ७१ ॥ मतोश्च बह्वजङ्गात्॥७२॥ बह्वचः कूपेषु ॥ ७३ ॥ उदक्च विपाशः ॥ ॥७४॥ संकलादिभ्यश्च ॥ ॥ ७५ ॥ स्त्रीषु सौवीरसाल्वप्राक्षु ॥७६॥ सुवास्त्वादिभ्योऽण् ॥७७॥ रोणी ॥ ७८ ॥ कोपधाच्च ॥ ७९ ॥ वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ॥८०॥४॥ जनपदे लुप् ॥८१॥ वरणादिभ्यश्च ॥८२॥ शर्कराया वा ॥८३॥ ठक्छौ च ॥ ८४ ॥ नद्यां मतुप् ॥८५॥ मध्वादिभ्यश्च ॥८६॥ कुमुदनडवेतसेभ्यो ड्मतुप्॥८७॥नडशादाड्ड्वलच् ॥ ॥ ८८॥ शिखाया वलच् ॥८९॥ उत्करादिभ्यश्छः॥९०॥नडादीनां कुक् च ॥९१॥ शेषे ॥९२॥ राष्ट्रावारपाराद्घखौ ॥९३॥ ग्रामाद्यखञौ॥९४॥कत्र्यादिभ्यो ढकञ्॥९५॥कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु ॥ ९६ ॥ नद्यादिभ्यो ढक् ॥९७॥ दक्षिणापश्चात्पुरसस्त्यक् ॥ ९८ ॥ कापिश्याः ष्फक् ॥ ॥ ९९ ॥ रङ्कोरमनुष्येऽण् च ॥ १०० ॥ ५ ॥ द्युप्रागपागुदक्प्रतीचो यत् ॥ १०१ ॥ कन्थायाष्ठक् ॥ १०२॥ वर्णौ वुक् ॥ १०३ ॥ अव्ययात् त्यप् ॥ १०४ ॥ऐषमोह्यः श्वसोऽन्यतरस्याम् ॥१०५ ॥ तीररूप्योत्तरपदादञ्ञौ ॥ १०६ ॥ दिक्पूर्वपदादसंज्ञायां ञः ॥ १०७ ॥ मद्रेभ्योऽञ् ॥ १०८॥ उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ॥ ॥१०९॥प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥११०॥कण्वादिभ्यो गोत्रे ॥ १११ ॥ इञश्च ॥ ११२॥ न द्व्यचः प्राच्यभरतेषु ॥११३॥ वृद्धाच्छः ॥११४ ॥ भवतष्ठक्छसौ ॥ ११५ ॥ काश्यादिभ्यष्ठञ्ञिठौ ॥ ११६ ॥ वाहीकग्रामेभ्यश्च ॥ ११७ ॥ विभाषोशीनरेषु ॥ ११८ ॥ ओर्देशे ठञ् ॥ ११९ ॥ वृद्धात् प्राचाम् ॥ १२० ॥ ६ ॥ धन्वयोपधाद्वुञ् ॥ १२१ ॥ प्रस्थपुरवहान्ताच्च ॥ १२२ ॥ रोपधेतोः प्राचाम् ॥१२३॥ जनपदतदवध्योश्च॥१२४॥ अवृद्धादपि बहुवचनविषयात् ॥ १२५ ॥ कच्छाग्निवक्रगर्तोत्तरपदात् ॥ १२६ ॥ धूमादिभ्यश्च ॥ १२७ ॥ नगरात् कुत्सनप्रावीण्ययोः ॥ १२८ ॥ अरण्यान्मनुष्ये ॥ १२९ ॥ विभाषा कुरुयुगंधराभ्याम् ॥ १३० ॥ मद्रवृज्योः कन् ॥१३१॥ कोपधादण् ॥ १३२ ॥ कच्छादिभ्यश्च ॥ १३३ ॥ मनुष्यतत्स्थयोर्वुञ् ॥ १३४ ॥ अपदातौ साल्वात् ॥ १३५ ॥ गोयवाग्वोश्च ॥ १३६ ॥ गर्तोत्तरपदाच्छः ॥ १३७ ॥ गहादिभ्यश्च ॥ १३८ ॥ प्राचां कटादेः ॥ १३९ ॥ राज्ञः क च ॥ १४० ॥ ७॥ वृद्धादकेकान्तखोपधात् ॥ १४१ ॥ कन्थापलदनगरग्रामह्रदोत्तरपदात् ॥ १४२ ॥ पर्वताच्च ॥ १४३ ॥ विभाषा मनुष्ये॥१४४॥ कृकणपर्णाद्भारद्वाजे ॥१४५॥८॥ (तेन सास्मिन्ठञ्क्रमादिभ्यो जनपदे द्युप्रागपाग्धन्ववृद्धात्पञ्च) ॥

इति चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥

युष्मदस्मदोरन्यतरस्यां खञ् च ॥ १ ॥ तस्मिन्नणि च युष्माकास्माकौ ॥ २ ॥ तवकममकावेकवचने ॥ ३ ॥ अर्धाद्यत् ॥ ४ ॥ परावराधमोत्तमपूर्वाच्च ॥ ५ ॥ दिक्पूर्वपदाट्ठञ् च ॥ ६ ॥ ग्रामजनपदैकदेशादञ्ठञौ ॥ ७ ॥ मध्यान्मः ॥ ८ ॥ अ सांप्रतिके ॥ ९ ॥ द्वीपादनुसमुद्रं यञ् ॥ १० ॥ कालाट्ठञ् ॥ ११ ॥ श्राद्धे शरदः ॥१२॥ विभाषा रोगातपयोः ॥ १३ ॥ निशाप्रदोषाभ्यां च॥१४॥ श्वसस्तुट् च ॥ १५ ॥ संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥१६॥ प्रावृष एण्यः ॥ १७ ॥ वर्षाभ्यष्ठक् ॥ १८ ॥ छन्दसि ठञ् ॥ १९ ॥ वसन्ताच्च ॥ ॥ २० ॥ १ ॥ हेमन्ताच्च ॥ २१ ॥ सर्वत्राण च तलोपश्च ॥ २२ ॥ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ २३॥ विभाषा पूर्वाह्णापराह्णाभ्याम् ॥ २४ ॥ तत्र जातः ॥ २५ ॥ प्रावृषष्ठप्॥ ॥ २६ ॥ संज्ञायां शरदो वुञ् ॥ २७ ॥ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् ॥ २८ ॥ पथः पन्थ च ॥ २९ ॥ अमावास्याया वा ॥ ३० ॥ अ च ॥ ३१ ॥ सिन्ध्वपकराभ्यां कन् ॥ ३२ ॥ अणञौ च ॥ ३३ ॥ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ॥ ३४ ॥ स्थानान्तगोशालखरशालाच्च ॥ ३५ ॥ वत्सशालाभिजिदश्वयुक्शतभिषजो वा ॥ ३६ ॥ नक्षत्रेभ्यो

१ सूत्रे सहायशब्दः प्रक्षिप्तः । वार्तिके दर्शनात् ।

बहुलम् ॥ ३७ ॥ कृतलब्धक्रीतकुशलाः ॥ ३८ ॥ प्रायभवः ॥ ३९ ॥ उपजानूपकर्णोपनीवेष्ठक् ॥ ४० ॥ २ ॥ संभूते ॥ ४१ ॥ कोशाड्ढञ् ॥ ४२ ॥ कालात्साधुपुष्प्यत्पच्यमानेषु ॥ ४३ ॥ उप्ते च ॥ ४४ ॥ आश्वयुज्या वुञ् ॥४५॥ ग्रीष्मवसन्तादन्यतरस्याम् ॥ ४६ ॥ देयमृणे ॥ ४७ ॥ कलाप्यश्वत्थयवबुसाद्वुन् ॥ ४८ ॥ ग्रीष्मावरसमाद्वुञ् ॥ ४९ ॥ संवत्सराग्रहायणीभ्यां ठञ् च ॥५०॥ व्याहरति मृगः ॥ ५१ ॥ तदस्य सोढम् ॥ ५२ ॥ तत्र भवः ॥ ५३ ॥ दिगादिभ्यो यत् ॥ ५४ ॥ शरीरावयवाच्च ॥५५॥ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ॥ ५६ ॥ ग्रीवाभ्योऽण् च ॥ ५७ ॥ गम्भीराञ्ञ्यः ॥ ५८ ॥ अव्ययीभावाच्च ॥ ५९ ॥ अन्तःपूर्वपदाट्ठञ् ॥ ६० ॥ ३ ॥ ग्रामात् पर्यनुपूर्वात् ॥ ६१ ॥ जिह्वामूलाङ्गुलेश्छः ॥ ॥ ६२ ॥ वर्गान्ताच्च ॥ ६३ ॥ अशब्देयत्खावन्यतरस्याम् ॥ ६४ ॥ कर्णललाटात्कनलंकारे ॥६५॥ तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ॥ ६६ ॥ बह्वचोऽन्तोदात्ताट्ठञ् ॥ ६७ ॥ क्रतुयज्ञेभ्यश्च ॥ ६८ ॥ अध्यायेष्वेवर्षेः ॥ ६९ ॥ पौरोडाशपुरोडाशात् ष्ठन् ॥ ॥ ७० ॥ छन्दसो यदणौ ॥ ७१ ॥ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ॥ ७२ ॥ अणृगयनादिभ्यः ॥ ७३ ॥ तत आगतः ॥ ७४ ॥ ठगायस्थानेभ्यः ॥ ७५ ॥ शुण्डिकादिभ्योऽण् ॥ ७६ ॥ विद्यायोनिसंबन्धेभ्यो वुञ् ॥ ७७ ॥ ऋतष्ठञ् ॥७८॥ पितुर्यच्च ॥७९॥ गोत्रादङ्कवत् ॥ ८० ॥ ४ ॥ हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ॥८१॥ मयट् च ॥८२ ॥ प्रभवति॥८३॥ विदूराञ्ञ्यः ॥८४॥ तद्गच्छति पथिदूतयोः ॥८५ ॥ अभिनिष्क्रामति द्वारम् ॥ ८६ ॥ अधिकृत्य कृते ग्रन्थे ॥ ॥ ८७ ॥ शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥ ॥ ८८ ॥ सोऽस्य निवासः ॥ ८९ ॥ अभिजनश्च ॥ ॥ ९० ॥ आयुधजीविभ्यश्छः पर्वते ॥ ९१ ॥ शण्डिकादिभ्योञ्यः ॥ ९२ ॥ सिन्धुतक्षशिलादिभ्योऽणञौ ॥ ९३ ॥ तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ॥ ॥९४॥ भक्तिः ॥९५॥ अचित्ताददेशकालाट्ठक् ॥ ९६ ॥ महाराजाट्ठञ् ॥ ९७॥ वासुदेवार्जुनाभ्यां वुन् ॥ ९८ ॥ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ॥ ९९॥ जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने ॥ ॥ १०० ॥ ५ ॥ तेन प्रोक्तम् ॥ १०१ ॥ तित्तिरिवरतन्तुखण्डिकोखाच्छण् ॥ १०२ ॥ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ॥ १०३ ॥ कलापिवैशम्पायनान्तेवासिभ्यश्च ॥ १०४ ॥ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ॥१०५ ॥ शौनकादिभ्यश्छन्दसि ॥ १०६ ॥ कठचरकाल्लुक् ॥ ॥ १०७ ॥ कलापिनोऽण् ॥ ॥ १०८ ॥ छगलिनो ढिनुक् ॥ १०९ ॥ पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ॥११०॥ कर्मन्दकृशाश्वादिनिः ॥ १११ ॥ तेनैकदिक् ॥ ११२ ॥ तसिश्च ॥ ११३॥ उरसो यच्च ॥ ११४ ॥ उपज्ञाते ॥ ॥ ११५ ॥ कृते ग्रन्थे ॥ ११६ ॥ संज्ञायाम् ॥ ११७॥ कुलालादिभ्यो वुञ् ॥ ११८ ॥ क्षुद्राभ्रमरवटरपादपादञ्॥ ॥ ११९ ॥ तस्येदम् ॥ १२०॥ ६ ॥ रथाद्यत् ॥ १२१॥ पत्रपूर्वादञ् ॥ १२२ ॥ पत्राध्वर्युपरिषदश्च ॥ १२३ ॥ हलसीराट्ठक् ॥ १२४॥ द्वन्द्वाद्वुन् वैरमैथुनिकयोः ॥१२५॥ गोत्रचरणाद्वुञ् ॥ १२६ ॥ सङ्घाङ्कलक्षणेष्वञ्यञिञामण् ॥ १२७ ॥ शाकलाद्वा ॥ १२८ ॥ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ॥ १२९ ॥ न दण्डमाणवान्तेवासिषु ॥ १३० ॥ रैवतिकादिभ्यश्छः ॥ १३१ ॥ कौपिञ्जलहास्तिपदादण् ॥ १३२ ॥ आथर्वणिकस्येकलोपश्च ॥ १३३ ॥ तस्य विकारः ॥१३४॥ अवयवे च प्राण्योषधिवृक्षेभ्यः ॥ १३५ ॥ बिल्वादिभ्योऽण् ॥ १३६ ॥ कोपधाच्च ॥ १३७ ॥ त्रपुजतुनोः षुक् ॥ १३८ ॥ ओरञ् ॥ १३९ ॥ अनुदात्तादेश्च ॥ १४० ॥ ७ ॥ पलाशादिभ्यो वा ॥ १४१ ॥ शम्याः ष्लञ् ॥ १४२ ॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ १४३ ॥ नित्यं वृद्धशरादिभ्यः ॥ १४४ ॥ गोश्च पुरीषे ॥ १४५ ॥ पिष्टाच्च ॥ १४६ ॥ संज्ञायां कन् ॥ १४७ ॥ व्रीहेः पुरोडाशे ॥ १४८ ॥ असंज्ञायां तिलयवाभ्याम् ॥ १४९ ॥ द्व्यचश्छन्दसि ॥ १५० ॥ नोत्वद्वर्ध्रबिल्वात् ॥ १५१ ॥ तालादिभ्योऽण् ॥१५२॥ जातरूपेभ्यः परिमाणे॥१५३॥ प्राणिरजतादिभ्योऽञ् ॥ १५४ ॥ ञितश्च तत्प्रत्ययात् ॥ ॥ १५५ ॥ क्रीतवत् परिमाणात् ॥ १५६ ॥ उष्ट्राद्वुञ् ॥ १५७ ॥ उमोर्णयोर्वा ॥ १५८ ॥ एण्या ढञ् ॥१५९॥ गोपयसोर्यत् ॥ १६० ॥ ८ ॥ द्रोश्च ॥ १६१ ॥ माने वयः ॥ १६२ ॥ फले लुक् ॥ १६३ ॥ प्लक्षादिभ्योऽण् ॥१६४॥ जम्ब्वा वा ॥ १६५ ॥ लुप् च ॥ १६६ ॥ हरीतक्यादिभ्यश्च ॥ १६७॥ कंसीयपरशव्ययोर्यञञौ लुक् च ॥ १६८ ॥ ८ ॥ (युष्मद्वेमन्तात्सम्भूते ग्रामाद्धेतुतेन रथात्पलाशादिभ्यो द्रोश्चाष्टौ) ॥

॥ इति चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥

प्राग्वहतेष्ठक् ॥ १ ॥ तेन दीव्यति खनति जयति जितम् ॥ २ ॥ संस्कृतम् ॥ ३ ॥ कुलत्थकोपधादण् ॥ ४ ॥ तरति ॥ ५ ॥ गोपुच्छाट्ठञ् ॥ ६ ॥ नौद्व्यचष्ठन्॥ ॥ ७ ॥ चरति ॥ ८ ॥ आकर्षात् ष्ठल् ॥९॥ पर्पादिभ्यः ष्ठन् ॥ १० ॥ श्वगणाट्ठञ् च ॥ ११ ॥ वेतनादिभ्यो जीवति ॥ १२ ॥ वस्नक्रयविक्रयाट्ठन् ॥१३ ॥ आयुधाच्छ

च ॥ १४ ॥ हरत्युत्सङ्गादिभ्यः ॥ १५ ॥ भस्त्रादिभ्यः ष्ठन् ॥ १६ ॥ विभाषा विवधात् ॥ १७ ॥ अण् कुटिलिकायाः ॥ १८ ॥ निर्वृत्तेऽक्षद्यूतादिभ्यः ॥ १९ ॥ क्त्रेर्मम्नित्यम् ॥ ॥ २० ॥ १ ॥ अपमित्ययाचिताभ्यां कक्कनौ ॥ २१ ॥ संसृष्टे ॥ २२ ॥ चूर्णादिनिः ॥ २३ ॥ लवणाल्लुक् ॥ ॥ २४ ॥ मुद्गादण् ॥ २५ ॥ व्यञ्जनैरुपसिक्ते ॥ २६ ॥ ओजःसहोऽम्भसा वर्तते ॥ २७ ॥ तत्प्रत्यनुपूर्वमीपलोमकूलम् ॥ २८ ॥ परिमुखं च ॥ २९ ॥ प्रयच्छति गर्ह्यम् ॥ ३० ॥ कुसीददशैकादशात् ष्ठन्ष्ठचौ ॥ ३१ ॥ उञ्छति ॥ ३२ ॥ रक्षति ॥ ३३ ॥ शब्ददर्दुरं करोति ॥ ३४ ॥ पक्षिमत्स्यमृगान् हन्ति ॥ ३५ ॥ परिपन्थं च तिष्ठति ॥ ३६ ॥ माथोत्तरपदपदव्यनुपदं धावति ॥ ३७ ॥ आक्रन्दाट्ठञ् च ॥ ३८ ॥ पदोत्तरपदं गृह्णाति ॥ ३९ ॥ प्रतिकण्ठार्थललामं च ॥ ४० ॥ २ ॥ धर्मं चरति ॥ ॥ ४१ ॥ प्रतिपथमेति ठंश्च ॥ ४२ ॥ समवायान् समवैति ॥ ४३ ॥ परिषदो ण्यः ॥ ४४ ॥ सेनाया वा ॥ ॥ ४५ ॥ संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ४६ ॥ तस्य धर्म्यम् ॥ ४७ ॥ अण् महिष्यादिभ्यः ॥ ४८ ॥ ऋतोऽञ् ॥ ४९ ॥ अवक्रयः ॥ ५० ॥ तदस्य पण्यम् ॥ ॥ ५१ ॥ लवणाट्ठञ् ॥ ५२ ॥ किसरादिभ्यः ष्ठन् ॥ ५३ ॥ शलालुनोऽन्यतरस्याम् ॥ ५४ ॥ शिल्पम् ॥ ५५ ॥ मड्डुकझर्झरादणन्यतरस्याम् ॥ ५६ ॥ प्रहरणम् ॥ ५७ ॥ परश्वधाट्ठञ् च ॥ ५८ ॥ शक्तियष्ट्योरीकक् ॥ ५९ ॥ अस्तिनास्तिदिष्टं मतिः ॥ ६० ॥ ३ ॥ शीलम् ॥ ६१ ॥ छत्रादिभ्यो णः ॥ ६२ ॥ कर्माध्ययने वृत्तम् ॥ ६३ ॥ बह्वच्पूर्वपदाट्ठच् ॥ ६४ ॥ हितं भक्षाः ॥ ६५ ॥ तदस्मै दीयते नियुक्तम् ॥ ६६ ॥ श्राणामांसौदनाट्टिठन् ॥ ६७ ॥ भक्तादणन्यतरस्याम् ॥ ६८ ॥ तत्र नियुक्तः ॥ ६९ ॥ अगारान्ताट्ठन् ॥ ७० ॥ अध्यायिन्यदेशकालात् ॥ ७१ ॥ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ॥ ७२ ॥ निकटे वसति ॥ ७३ ॥ आवसथात् ष्ठल् ॥ ७४ ॥ प्राग्घिताद्यत् ॥ ॥ ७५ ॥ तद्वहति रथयुगप्रासङ्गम् ॥ ७६ ॥ धुरो यड्ढकौ ॥ ७७ ॥ खः सर्वधुरात् ॥ ७८ ॥ एकधुराल्लुक् च ॥ ७९ ॥ शकटादण् ॥ ८० ॥ ४ ॥ हलसीराट्ठक् ॥ ॥ ८१ ॥ संज्ञायां जन्या ॥ ८२ ॥ विध्यत्यधनुषा ॥ ॥ ८३ ॥ धनगणं लब्धा ॥ ८४ ॥ अन्नाण्णः ॥ ८५ ॥ वशं गतः ॥ ८६ ॥ पदमस्मिन्दृश्यम् ॥ ८७ ॥ मूलमस्याबर्हि ॥ ८८ ॥ संज्ञायां धेनुष्या ॥ ८९ ॥ गृहपतिना संयुक्ते ञ्यः ॥ ९० ॥ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु ॥ ९१ ॥ धर्मपथ्यर्थन्यायादनपेते ॥ ९२ ॥ छन्दसो निर्मिते ॥ ९३ ॥ उरसोऽण् च ॥ ९४ ॥ हृदयस्य प्रियः ॥ ९५ ॥ बन्धने चर्षौ ॥ ९६ ॥ मतजनहलात्करणजल्पकर्षेषु ॥ ९७ ॥ तत्र साधुः ॥ ९८ ॥ प्रतिजनादिभ्यः खञ् ॥ ९९ ॥ भक्ताण्णः ॥ १०० ॥ ५ ॥ परिषदो ण्यः ॥ १०१ ॥ कथादिभ्यष्ठक् ॥ १०२ ॥ गुडादिभ्यष्ठञ् ॥ १०३ ॥ पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ १०४ ॥ सभाया यः ॥ ॥ १०५ ॥ ढश्छन्दसि ॥ १०६ ॥ समानतीर्थेवासी ॥ ॥ १०७ ॥ समानोदरे शयित ओ चोदात्तः ॥ १०८ ॥ सोदराद्यः ॥ १०९ ॥ भवे छन्दसि ॥ ११० ॥ पाथोनदीभ्यां ड्यण् ॥ १११ ॥ वेशन्तहिमवद्भ्यामण् ॥ ११२ ॥ स्रोतसो विभाषा ड्यड्ड्यौ ॥ ११३ ॥ सगर्भसयूथसनुताद्यत् ॥ ११४ ॥ तुग्राद्घन् ॥ ११५ ॥ अग्राद्यत् ॥ ११६ ॥ घच्छौ च ॥ ११७ ॥ समुद्राभ्राद्घः ॥ ११८ ॥ बर्हिषि दत्तम् ॥ ११९ ॥ दूतस्य भागकर्मणि ॥ १२० ॥ ॥ ६ ॥ रक्षोयातूनां हननी ॥ १२१ ॥ रेवतीजगतीहविष्याभ्यः प्रशस्ये ॥ १२२ ॥ असुरस्य स्वम् ॥ ॥ १२३ ॥ मायायामण् ॥ १२४ ॥ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ॥ १२५ ॥ अश्विमानण् ॥ १२६ ॥ वयस्यासु मूर्ध्नो मतुप् ॥ १२७ ॥ मत्वर्थे मासतन्वोः ॥ १२८ ॥ मधोर्ञ च ॥ १२९ ॥ ओजसोऽहनि यत्खौ ॥ १३० ॥ वेशोयशआदेर्भगाद्यल् ॥ ॥ १३१ ॥ ख च ॥ १३२ ॥ पूर्वैः कृतमिनयौ च ॥ १३३ ॥ अद्भिः संस्कृतम् ॥ १३४ ॥ सहस्रेण संमितौ घः ॥ १३५ ॥ मतौ च ॥ १३६ ॥ सोममर्हति यः ॥ १३७ ॥ मये च ॥ १३८ ॥ मधोः ॥ १३९ ॥ वसोः समूहे च ॥ १४० ॥ ७ ॥ नक्षत्राद्घः ॥ १४१ ॥ सर्वदेवात्तातिल् ॥ १४२ ॥ शिवशमरिष्टस्य करे ॥ १४३ ॥ भावे च ॥ १४४ ॥ ४ ॥
(प्राग्वहतेरपमित्यधर्मं शीलं हलपरिषदो रक्षोनक्षत्राच्चत्वारि) ॥

इति चतुर्थाध्यायस्य तुरीयः पादः ॥ ४ ॥

इति चतुर्थोऽध्यायः समाप्तः ॥

अथ पञ्चमोऽध्यायः ।

प्राक् क्रीताच्छः ॥ १ ॥ उगवादिभ्यो यत् ॥ २ ॥ कम्बलाच्च संज्ञायाम् ॥ ३ ॥ विभाषा हविरपूपादिभ्यः ॥ ॥ ४ ॥ तस्मै हितम् ॥ ५ ॥ शरीरावयवाद्यत् ॥ ६ ॥ खलयवमाषतिलवृषब्रह्मणश्च ॥ ७ ॥ अजाविभ्यां थ्यन् ॥ ॥ ८ ॥ आत्मन्विश्वजनभोगोत्तरपदात्खः ॥ ९ ॥ सर्वपुरुषाभ्यां णढञौ ॥ १० ॥ माणवचरकाभ्यां खञ् ॥ ॥ ११ ॥ तदर्थं विकृतेः प्रकृतौ ॥ १२ ॥ छदिरुपधिबलेर्ढञ् ॥ १३ ॥ ऋषभोपानहोर्ञ्यः ॥ १४ ॥ चर्मणोऽञ् ॥ १५ ॥ तदस्य तदस्मिन् स्यादिति ॥ १६ ॥ परिखाया ढञ् ॥ १७ ॥ प्राग्वतेष्ठञ् ॥ १८ ॥ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥ १९ ॥ असमासे निष्कादिभ्यः ॥ २० ॥ १ ॥ शताच्च ठन्यतावशते ॥ २१ ॥

संख्याया अतिशदन्तायाः कन् ॥ २२ ॥ वतोरिड् वा॥ ॥ २३ ॥ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ॥ २४ ॥ कंसाट्टिठन् ॥ २५ ॥ शूर्पादञन्यतरस्याम् ॥ २६ ॥ शतमानविंशतिकसहस्रवसनादण् ॥२७॥ अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम् ॥ २८ ॥ विभाषा कार्षापणसहस्राभ्याम् ॥ ॥ २९ ॥ द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥ बिस्ताच्च ॥ ३१॥ विंशतिकात्खः ॥ ३२ ॥ खार्या ईकन् ॥ ३३ ॥ पणपादमाषशताद्यत् ॥ ३४ ॥ शाणाद्वा ॥ ३५ ॥ द्वित्रिपूर्वादण् च ॥ ॥ ३६ ॥ तेन क्रीतम् ॥ ३७॥ तस्य निमित्तं संयोगोत्पातौ ॥ ३८ ॥ गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ॥ ३९ ॥ पुत्राच्छ च ॥ ४० ॥ २ ॥ सर्वभूमिपृथिवीभ्यामणञौ ॥ ४१ ॥ तस्येश्वरः ॥४२॥ तत्र विदित इति च ॥ ४३ ॥ लोकसर्वलोकाट्ठञ् ॥ ४४ ॥ तस्य वापः ॥ ४५ ॥ पात्रात् ष्ठन् ॥ ४६ ॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ४७ ॥ पूरणार्धाट्ठन् ॥ ४८ ॥ भागाद्यच्च ॥ ४९ ॥ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ॥ ५० ॥ वस्नद्रव्याभ्यां ठन्कनौ ॥ ५१ ॥ संभवत्यवहरति पचति ॥ ५२ ॥ आढकाचितपात्रात्खोऽन्यतरस्याम् ॥ ५३ ॥ द्विगोष्ठंश्च ॥ ५४ ॥ कुलिजाल्लुक्खौ च ॥ ५५ ॥ सोऽस्यांशवस्नभृतयः ॥ ५६ ॥ तदस्य परिमाणम् ॥ ५७ ॥ संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ॥५८॥ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५९ ॥ पञ्चद्दशतौ वर्गे वा ॥ ६० ॥ ३ ॥ सप्तनोऽञ्छन्दसि ॥६१॥ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ६२ ॥ तदर्हति ॥ ६३ ॥ छेदादिभ्यो नित्यम्॥ ॥६४॥ शीर्षच्छेदाद्यच्च ॥६५॥ दण्डादिभ्यो यः ॥ ६६ ॥ छन्दसि च ॥ ६७ ॥ पात्राद्घंश्च ॥ ६८ ॥ कडंकरदक्षिणाच्छ च ॥ ६९ ॥ स्थालीबिलात् ॥ ७० ॥ यज्ञर्त्विग्भ्यां घखञौ ॥ ७१ ॥ पारायणतुरायणचान्द्रायणं वर्तयति ॥ ॥ ७२ ॥ संशयमापन्नः ॥ ७३॥ योजनं गच्छति ॥७४॥ पथः ष्कन् ॥ ७५ ॥ पंथो ण नित्यम् ॥ ७६ ॥ उत्तरपथेनाहृतं च ॥७७॥ कालात् ॥७८॥ तेन निर्वृत्तम् ॥ ॥ ७९ ॥ तमधीष्टो भृतो भूतो भावी ॥ ८० ॥ ४ ॥ मासाद्वयसि यत्खञौ ॥ ८१ ॥ द्विगोर्यप् ॥ ८२ ॥ षण्मासाण्ण्यच्च ॥ ८३ ॥ अवयसि ठंश्च ८४ ॥ समायाः खः ॥ ८५ ॥ द्विगोर्वा ॥ ८६ ॥ रात्र्यहः संवत्सराच्च ॥ ॥ ८७ ॥ वर्षाल्लुक् च ॥ ८८ ॥ चित्तवति नित्यम् ॥ ॥ ८९ ॥ षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥९०॥ वत्सरान्ताच्छश्छन्दसि ॥ ९१ ॥ संपरिपूर्वात्ख च ॥ ९२ ॥ तेन परिजय्यलभ्यकार्यसुकरम् ॥९३॥ तदस्य ब्रह्मचर्यम्॥९४॥ तस्य दक्षिणा यज्ञाख्येभ्यः ॥ ९५ ॥ तत्र च दीयते कार्यं भववत् ॥ ९६ ॥ व्युष्टादिभ्योऽण् ॥ ९७ ॥ तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ९८ ॥ संपादिनि ॥ ९९ ॥ कर्मवेषाद्यत् ॥ १०० ॥ ५ ॥ तस्मै प्रभवति संतापादिभ्यः ॥ १०१ ॥ योगाद्यच्च ॥ १०२ ॥ कर्मण उकञ् ॥ १०३ ॥ समयस्तदस्य प्राप्तम् ॥ १०४ ॥ ऋतोरण् ॥ १०५ ॥ छन्दसि घस् ॥१०६ ॥ कालाद्यत् ॥ १०७ ॥ प्रकृष्टे ठञ् ॥ १०८ ॥ प्रयोजनम् ॥१०९॥ विशाखा षाढादण्मन्थदण्डयोः ॥ ११० ॥ अनुप्रवचनादिभ्यश्छः ॥ १११ ॥ समापनात्सपूर्वपदात् ॥ ११२ ॥ ऐकागारिकट्चौरे ॥ ११३ ॥ आकालिकडाद्यन्तवचने ॥ ॥ ११४ ॥ तेन तुल्यं क्रिया चेद्वतिः ॥ ११५ ॥ तत्र तस्येव ॥ ११६ ॥ तदर्हम् ॥ ११७ ॥ उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥ तस्य भावस्त्वतलौ ॥ ११९ ॥ आ च त्वात् ॥ १२० ॥ ६ ॥ न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः ॥ १२१ ॥ पृथ्वादिभ्यः इमनिज्वा ॥ १२२ ॥ वर्णदृढादिभ्यः ष्यञ् च ॥१२३॥ गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ १२४ ॥ स्तेनाद्यन्नलोपश्च ॥ १२५ ॥ सख्युर्यः ॥ १२६ ॥ कपिज्ञात्योर्ढक् ॥ १२७ ॥ पत्यन्तपुरोहितादिभ्यो यक् ॥ १२८ ॥ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥ १२९ ॥ हायनान्तयुवादिभ्योऽण् ॥ १३० ॥ इगन्ताच्च लघुपूर्वात् ॥ ॥ १३१ ॥ योपधाद्गुरूपोत्तमाद्वुञ् ॥ १३२ ॥ द्वन्द्वमनोज्ञादिभ्यश्च ॥ १३३ ॥ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ १३४ ॥ होत्राभ्यश्छः ॥ १३५ ॥ ब्रह्मणस्त्वः ॥१३६॥ १६ ॥ (प्राक्क्रीताच्छताच्च सर्वभूमिसप्तनोऽञ्मासात्तस्मै प्रभवति न नञ्पूर्वात् षोडश) ॥

इति पञ्चमाध्यायस्य प्रथमः पादः ॥ १ ॥

धान्यानां भवने क्षेत्रे खञ् ॥ १ ॥ व्रीहिशाल्योर्ढक् ॥ ॥ २ ॥ यवयवकषष्टिकाद्यत् ॥ ३ ॥ विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ ४ ॥ सर्वचर्मणः कृतः खखञौ ॥ ५ ॥ यथामुखसंमुखस्य दर्शनः खः ॥ ६ ॥ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥ ७ ॥ आप्रपदं प्राप्नोति ॥ ८ ॥ अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ९ ॥ परोवरपरंपरपुत्रपौत्रमनुभवति ॥ १० ॥ अवारपारात्यन्तानुकामंगामी ॥११ ॥ समांसमां विजायते ॥ १२ ॥ अद्यश्वीनावष्टब्धे ॥ १३ ॥ आगवीनः ॥१४॥ अनुग्वलंगामी ॥१५ ॥ अध्वनो यत्खौ ॥ १६ ॥ अभ्यमित्राच्छ च ॥ ॥१७॥ गोष्ठात्खञ् भूतपूर्वे ॥१८॥अश्वस्यैकाहगमः॥१९॥ शालीनकौपीने अधृष्टाकार्ययोः ॥२०॥१॥ व्रातेन जीवति ॥ २१ ॥ साप्तपदीनं सख्यम् ॥ २२ ॥ हैयङ्गवीनं संज्ञायाम् ॥ २३ ॥ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २४ ॥ पक्षात् तिः ॥ २५ ॥ तेन वित्त-

श्चुचुप् चणपौ ॥ २६ ॥ विनञ्भ्यां नानाञौ न सह ॥ ॥ २७ ॥ वेः शालच्छङ्कटचौ ॥ २८ ॥ संप्रोदश्च कटच् ॥२९॥ अवात् कुटारच्च ॥३०॥ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ॥ ३१ ॥ नेर्बिडज्बिरीसचौ ॥ ३२ ॥ इनच्पिटच्चिकचि च ॥ ३३ ॥ उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥३४॥ कर्मणि घटोऽठच् ॥३५॥ तदस्य संजातं तारकादिभ्य इतच् ॥ ३६ ॥ प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥ ३७ ॥ पुरुषहस्तिभ्यामण् च ॥ ३८ ॥ यत्तदेतेभ्यः परिमाणे वतुप् ॥ ३९ ॥ किमिदंभ्यां वो घः ॥ ४०॥२॥ किमः संख्यापरिमाणे डति च ॥ ४१ ॥ संख्याया अवयवे तयप् ॥ ४२ ॥ द्वित्रिभ्यां तयस्यायज्वा ॥ ४३॥ उभादुदात्तो नित्यम् ॥ ४४ ॥ तदस्मिन्नधिकमिति दशान्ताड्डः ॥ ४५ ॥ शदन्तविंशतेश्च ॥ ४६ ॥ संख्याया गुणस्य निमाने मयट् ॥ ४७ ॥ तस्य पूरणे डट् ॥४८॥ नान्तादसंख्यादेर्मट् ॥ ४९ ॥ थट् च च्छन्दसि ॥ ५०॥ षट्कतिकतिपयचतुरां थुक् ॥ ५१ ॥ बहुपूगगणसंघस्य तिथुक् ॥ ५२ ॥ वतोरिथुक् ॥ ५३ ॥ द्वेस्तीयः ॥५४॥ त्रेः संप्रसारणं च ॥ ५५ ॥ विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥ ५६ ॥ नित्यं शतादिमासार्धमाससंवत्सराच्च ॥ ॥ ५७ ॥ षष्ठ्यादेश्चासंख्यादेः ॥ ५८ ॥ मतौ छः सूक्तसाम्नोः ॥ ५९ ॥ अध्यायानुवाकयोर्लुक् ॥ ६० ॥ ३॥ विमुक्तादिभ्योऽण् ॥ ६१ ॥ गोषदादिभ्यो वुन् ॥ ६२॥ तत्र कुशलः पथः ॥ ६३ ॥ आकर्षादिभ्यः कन् ॥६४॥ धनहिरण्यात् कामे ॥ ६५ ॥ स्वाङ्गेभ्यः प्रसिते ॥ ६६ ॥ उदराट्ठगाद्यूने ॥ ६७ ॥ सस्येन परिजातः ॥ ६८ ॥ अंशं हारी ॥ ६९ ॥ तन्त्रादचिरापहृते ॥ ७० ॥ ब्राह्मणकोष्णिके संज्ञायाम् ॥ ७१ ॥ शीतोष्णाभ्यां कारिणि॥७२॥ अधिकम् ॥ ७३ ॥ अनुकाभिकाभीकः कमिता ॥ ७४॥ पार्श्वेनान्विच्छति ॥ ७५ ॥ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ॥ ७६ ॥ तावतिथं ग्रहणमिति लुग्वा ॥ ७७ ॥ स एषां ग्रामणीः ॥ ७८ ॥ श्रृंखलमस्य बन्धनं करभे ॥ ॥ ७९ ॥ उत्क उन्मनाः ॥ ८० ॥ ४ ॥ कालप्रयोजनाद्रोगे ॥८१॥ तदस्मिन्नन्नं प्रायेण संज्ञायाम् ॥ ८२ ॥ कुल्माषादञ् ॥ ८३ ॥ श्रोत्रियश्छन्दोऽधीते ॥ ८४ ॥ श्राद्धमनेन भुक्तमिनिठनौ ॥८५॥ पूर्वादिनिः ॥ ८६॥ सपूर्वाच्च ॥ ८७ ॥ इष्टादिभ्यश्च ॥ ८८ ॥ छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥ ८९ ॥ अनुपद्यन्वेष्टा ॥ ॥ ९० ॥ साक्षाद्द्रष्टरि संज्ञायाम् ॥ ९१॥ क्षेत्रियच्परक्षेत्रे चिकित्स्यः ॥ ९२ ॥ इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥ ९३ ॥ तदस्यास्त्यस्मिन्निति मतुप् ॥ ९४ ॥ रसादिभ्यश्च ॥ ९५ ॥ प्राणिस्थादातो लजन्यतरस्याम् ॥ ९६ ॥ सिध्मादिभ्यश्च ॥ ॥ ९७ ॥ वत्सांसाभ्यां कामबले ॥ ९८ ॥ फेनादिलच्च ॥ ॥ ९९॥ लोमादिपामादिपिच्छादिभ्यः शनेलचः॥१००॥ ॥ ५ ॥ प्रज्ञाश्रद्धार्चाभ्यो णः ॥ १०१ ॥ तपःसहस्राभ्यां विनीनी ॥ १०२ ॥ अण् च ॥ १०३ ॥ सिकताशर्कराभ्यां च ॥ १०४ ॥ देशे लुबिलचौ च ॥१०५॥ दन्त उन्नत उरच् ॥ १०६ ॥ ऊषशुषिमुष्कमधो रः ॥ १०७ ॥ द्युद्रुभ्यां मः ॥ १०८ ॥ केशाद्वोऽन्यतरस्याम् ॥ १०९ ॥ गाण्ड्यजगात् संज्ञायाम् ॥११० ॥ काण्डाण्डादीरन्नीरचौ ॥ १११ ॥ रजःकृष्यासुतिपरिषदो वलच् ॥ ११२ ॥ दन्तशिखात् संज्ञायाम् ॥ ॥ ११३ ॥ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ॥ ११४ ॥ अत इनिठनौ ॥११५॥ व्रीह्यादिभ्यश्च ॥ ११६ ॥ तुन्दादिभ्य इलच्च ॥११७॥ एकगोपूर्वाट्ठञ् नित्यम् ॥ ११८ ॥ शतसहस्रान्ताच्च निष्कात् ॥ ११९ ॥ रूपादाहतप्रशंसयोर्यप् ॥ १२०॥ ॥ ६ ॥ अस्मायामेधास्रजो विनिः ॥ १२१ ॥ बहुलं छन्दसि ॥ १२२ ॥ ऊर्णाया युस् ॥ १२३ ॥ वाचो ग्मिनिः ॥ १२४ ॥ आलजाटचौ बहुभाषिणि॥१२५॥ स्वामिन्नैश्वर्ये ॥ १२६ ॥ अर्शआदिभ्योऽच् ॥ १२७॥ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ॥ १२८ ॥ वातातीसाराभ्यां कुक् च ॥ १२९ ॥ वयसि पूरणात् ॥ १३० ॥ सुखादिभ्यश्च॥ १३१ ॥ धर्मशीलवर्णान्ताच्च ॥ १३२॥ हस्ताज्जातौ ॥१३३॥ वर्णाद्ब्रह्मचारिणि ॥१३४॥ पुष्करादिभ्यो देशे॥१३५॥ बलादिभ्यो मतुबन्यतरस्याम्॥१३६॥ संज्ञायां मन्माभ्याम् ॥१३७॥ कंशम्भ्यां बभयुस्तितुतयसः ॥१३८॥ तुन्दिबलिवटेर्भः ॥ १३९ ॥ अहंशुभमोर्युस् ॥ ॥ १४० ॥ ७ ॥ (धान्यानां त्रातेन किमो विमुक्तादिभ्यः कालप्रयोजनात्प्रज्ञाश्रद्धास्मायामेधाविंशतिः ॥

इति पञ्चमाध्यायस्य द्वितीयः पादः ॥ २ ॥

प्राग्दिशो विभक्तिः ॥ १ ॥ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥ २॥ इदम इश् ॥ ३ ॥ एतेतौ रथोः ॥ ४ ॥ एतदोऽन् ॥ ५ ॥ सर्वस्य सोऽन्यतरस्यां दि ॥ ६ ॥ पञ्चम्यास्तसिल् ॥ ७ ॥ तसेश्च ॥ ८ ॥ पर्यभिभ्यां च ॥ ९ ॥ सप्तम्यास्त्रल् ॥ १० ॥ इदमो हः ॥ ११ ॥ किमोऽत् ॥ १२ ॥ वा ह च च्छन्दसि ॥ १३ ॥ इतराभ्योऽपि दृश्यन्ते ॥ १४ ॥ सर्वैकान्यकियत्तदः काले दा ॥ ॥ १५ ॥ इदमो र्हिल् ॥ १६ ॥ अधुना ॥ १७ ॥ दानीं च ॥ १८ ॥ तदो दा च ॥ ॥ १९ ॥ तयोर्दार्हिलौ च च्छन्दसि ॥ २० ॥ १ ॥ अनद्यतने र्हिलन्यतरस्याम् ॥

१ आकर्षादिभ्यः इति पाठान्तरम्।

॥ २१ ॥ सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ २२ ॥ प्रकारवचने थाल् ॥ २३ ॥ इदमस्थमुः ॥ २४ ॥ किमश्च ॥ ॥ २५ ॥ था हेतौ च च्छन्दसि ॥ २६ ॥ दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ २७ ॥ दक्षिणोत्तराभ्यामतसुच् ॥ २८ ॥ विभाषापरावराभ्याम् ॥ ॥ २९ ॥ अञ्चेर्लुक् ॥ ३० ॥ उपर्युपरिष्टात् ॥ ३१ ॥ पश्चात् ॥ ३२ ॥ पश्च पश्चा च च्छन्दसि ॥ ३३ ॥ उत्तराधरदक्षिणादातिः ॥ ॥ ३४ ॥ एनबन्यतरस्यामदूरेऽपञ्चम्याः ॥ ३५ ॥ दक्षिणादाच् ॥ ३६ ॥ आहि च दूरे ॥ ॥ ३७ ॥ उत्तराच्च ॥ ३८ ॥ पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥ ३९ ॥ अस्ताति च ॥ ४० ॥ ॥ २ ॥ विभाषावरस्य ॥ ४१ ॥ संख्याया विधार्थे धा ॥ ॥ ४२ ॥ अधिकरणविचाले च ॥ ४३ ॥ एकाद्धो ध्यमुञन्यतरस्याम् ॥ ४४ ॥ द्वित्र्योश्च धमुञ् ॥ ४५ ॥ एधाच्च ॥ ४६ ॥ याप्ये पाशप् ॥ ४७ ॥ पूरणाद्भागे तीयादन् ॥ ॥ ४८ ॥ प्रागेकादशभ्योऽछन्दसि ॥ ४९ ॥ षष्ठाष्टमाभ्यां ञ च ॥ ५० ॥ मानपश्वङ्गयोः कन्लुकौ च ॥ ५१ ॥ एकादाकिनिच्चासहाये ॥ ५२ ॥ भूतपूर्वे चरट् ॥ ५३ ॥ षष्ठ्या रूप्य च ॥ ५४ ॥ अतिशायने तमबिष्ठनौ ॥ ५५ ॥ तिङश्च ॥ ५६ ॥ द्विवचनविभज्योपपदे तरबीयसुनौ ॥ ॥ ५७ ॥ अजादी गुणवचनादेव ॥ ५८ ॥ तुश्छन्दसि ॥ ५९ ॥ प्रशस्यस्य श्रः ॥ ६० ॥ ३ ॥ ज्य च ॥ ६१ ॥ वृद्धस्य च ॥ ६२ ॥ अन्तिकबाढयोर्नेदसाधौ ॥ ६३ ॥ युवाल्पयोः कनन्यतरस्याम् ॥ ६४ ॥ विन्मतोर्लुक् ॥ ६५ ॥ प्रशंसायां रूपप् ॥ ६६ ॥ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥ ६७ ॥ विभाषा सुपो बहुच् पुरस्तात्तु ॥ ६८ ॥ प्रकारवचने जातीयर् ॥ ६९ ॥ प्रागिवात् कः ॥ ७० ॥ अव्ययसर्वनाम्नामकच् प्राक् टेः ॥ ७१ ॥ कस्य च दः ॥ ॥ ७२ ॥ अज्ञाते ॥ ७३ ॥ कुत्सिते ॥ ७४ ॥ संज्ञायां कन् ॥ ७५ ॥ अनुकम्पायाम् ॥ ७६ ॥ नीतौ च तद्युक्तात् ॥ ७७ ॥ बह्वचो मनुष्यनाम्नष्ठज्वा ॥ ७८ ॥ घनिलचौ च ॥ ७९ ॥ प्राचामुपादेरडज्वुचौ च ॥ ८० ॥ ॥ ४ ॥ जातिनाम्नः कन् ॥ ८१ ॥ अजितान्तस्योत्तरपदलोपश्च ॥ ८२ ॥ ठाजादावूर्ध्वं द्वितीयादचः ॥ ८३ ॥ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ८४ ॥ अल्पे ॥ ८५ ॥ ह्रस्वे ॥ ८६ ॥ संज्ञायां कन् ॥ ८७ ॥ कुटीशमीशुण्डाभ्यो रः ॥ ८८ ॥ कुत्वा डुपच् ॥ ८९ ॥ कासूगोणीभ्यां ष्टरच् ॥ ९० ॥ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥ ९१ ॥ किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच् ॥ ॥ ९२ ॥ वा बहूनां जातिपरिप्रश्ने डतमच् ॥ ९३ ॥

एकाच्च प्राचाम् ॥ ९४ ॥ अवक्षेपणे कन् ॥ ९५ ॥ इवे प्रतिकृतौ ॥ ९६ ॥ संज्ञायां च ॥ ९७ ॥ लुम्मनुष्ये ॥ ९८ ॥ जीविकार्थे चापण्ये ॥ ९९ ॥ देवपथादिभ्यश्च ॥ ॥ १०० ॥ ५ ॥ वस्तेर्ढञ् ॥ १०१ ॥ शिलाया ढः ॥ ॥ १०२ ॥ शाखादिभ्यो यः ॥ १०३ ॥ द्रव्यं च भव्ये ॥ १०४ ॥ कुशाग्राच्छः ॥ १०५ ॥ समासाच्च तद्विषयात् ॥ १०६ ॥ शर्करादिभ्योऽण् ॥ १०७ ॥ अङ्गुल्यादिभ्यष्ठक् ॥ १०८ ॥ एकशालायाष्ठजन्यतरस्याम् ॥ ॥ १०९ ॥ कर्कलोहितादीकक् ॥ ११० ॥ प्रत्नपूर्वविश्वेमात्थाल्छन्दसि ॥ १११ ॥ पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥ ॥ ११२ ॥ व्रातच्फञोरस्त्रियाम् ॥ ११३ ॥ आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् ॥ ११४ ॥ वृकाट्टेण्यण् ॥ ११५ ॥ दामन्यादित्रिगर्तषष्ठाच्छः ॥ ११६ ॥ पर्श्वादियौधेयादिभ्योऽणञौ ॥ ११७ ॥ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥ ११८ ॥ ञ्यादयस्तद्राजाः ॥ ११९ ॥ १९ ॥ (प्राग्दिशोऽनद्यतने विभाषा ज्य च जातिनाम्नो वस्तेरेकोनविंशतिः ॥

इति पञ्चमाध्यायस्य तृतीयः पादः ॥ ३ ॥

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च ॥ १ ॥ दण्डव्यवसर्गयोश्च ॥ २ ॥ स्थूलादिभ्यः प्रकारवचने कन् ॥ ३ ॥ अनत्यन्तगतौ क्तात् ॥ ४ ॥ न सामिवचने ॥ ५ ॥ बृहत्या आच्छादने ॥ ६ ॥ अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ॥ ७ ॥ विभाषाञ्चेरदिक् स्त्रियाम् ॥ ८ ॥ जात्यन्ताच्छ बन्धुनि ॥ ९ ॥ स्थानान्ताद्विभाषा सस्थानेनेति चेत् ॥ १० ॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥ ११ ॥ अमु च च्छन्दसि ॥ ॥ १२ ॥ अनुगादिनष्ठक् ॥ १३ ॥ णचः स्त्रियामञ् ॥ ॥ १४ ॥ अणिनुणः ॥ १५ ॥ विसारिणो मत्स्ये ॥ १६ ॥ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ ॥ १७ ॥ द्वित्रिचतुर्भ्यः सुच् ॥ १८ ॥ एकस्य सकृच्च ॥ १९ ॥ विभाषा बहोर्धाऽविप्रकृष्टकाले ॥ २० ॥ १ ॥ तत्प्रकृतवचने मयट् ॥ २१ ॥ समूहवच्च बहुषु ॥ २२ ॥ अनन्तावसथेतिहभेषजाञ्ञ्यः ॥ २३ ॥ देवतान्तात् तादर्थ्ये यत् ॥ २४ ॥ पादार्घाभ्यां च ॥ २५ ॥ अतिथेर्ञ्यः ॥ २६ ॥ देवात् तल् ॥ २७ ॥ अवेः कः ॥ ॥ २८ ॥ यावादिभ्यः कन् ॥ २९ ॥ लोहितान्मणौ ॥ ॥ ३० ॥ वर्णे चानित्ये ॥ ३१ ॥ रक्ते ॥ ३२ ॥ कालाच्च ॥ ३३ ॥ विनयादिभ्यष्ठक् ॥ ३४ ॥ वाचोव्याहृतार्थायाम् ॥ ३५ ॥ तद्युक्तात् कर्मणोऽण् ॥ ३६ ॥ ओषधेरजातौ ॥ ३७ ॥ प्रज्ञादिभ्यश्च ॥ ३८ ॥ मृदस्तिकन् ॥ ३९ ॥ सस्नौ प्रशंसायाम् ॥ ४० ॥

॥ २ ॥ वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि ॥ ॥ ४१ ॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥ ४२ ॥ संख्यैकवचनाच्च वीप्सायाम् ॥ ४३ ॥ प्रतियोगे पञ्चम्यास्तसिः ॥ ४४ ॥ अपादाने चाहीयरुहोः ॥ ४५ ॥ अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः ॥ ४६ ॥ हीयमानपापयोगाच्च ॥४७॥ षष्ठ्या व्याश्रये ॥ ४८ ॥ रोगाच्चापनयने ॥ ४९ ॥ अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः ॥ ५० ॥ अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च॥५१॥ विभाषा साति कार्त्स्न्ये ॥ ५२ ॥ अभिविधौ संपदा च ॥ ५३ ॥ तदधीनवचने ॥ ५४ ॥ देये त्रा च ॥५५॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥ ५६ ॥ अव्यक्तानुकरणद्व्यजवरार्धादनितौ डाच् ॥ ५७ ॥ कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ॥ ५८ ॥ संख्यायाश्च गुणान्तायाः ॥ ५९ ॥ समयाच्च यापनायाम् ॥ ६०॥३॥ सपत्रनिष्पत्रादतिव्यथने ॥ ६१ ॥ निष्कुलान्निष्कोषणे ॥ ॥ ६२ ॥ सुखप्रियादानुलोम्ये ॥ ६३ ॥ दुःखात् प्रातिलोम्ये ॥ ६४ ॥ शूलात् पाके ॥ ६५ ॥ सत्यादशपथे ॥ ६६ ॥ मद्रात् परिवापणे ॥ ६७ ॥ समासान्ताः ॥ ६८ ॥ न पूजनात् ॥ ६९॥ किमः क्षेपे ॥७०॥ नञस्तत्पुरुषात् ॥ ७१ ॥ पथो विभाषा ॥७२ ॥ बहुव्रीहौ संख्येये डजबहुगणात् ॥ ७३ ॥ ऋक्पूरब्धूःपथामानक्षे ॥ ७४ ॥ अच्प्रत्यन्ववपूर्वात् सामलोम्नः ॥ ७५॥ अक्ष्णोऽदर्शनात् ॥ ७६॥ अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥७७ ॥ ब्रह्महस्तिभ्यां वर्चसः ॥ ७८ ॥ अवसमन्धेभ्यस्तमसः ॥ ७९ ॥ श्वसोऽवसीयःश्रेयसः ॥८० ॥ ४ ॥ अन्ववतप्ताद्रहसः ॥ ॥ ८१ ॥ प्रतेरुरसः सप्तमीस्थात् ॥ ८२ ॥ अनुगवमायामे ॥ ८३ ॥ द्विस्तावा त्रिस्तावा वेदिः ॥ ८४ ॥ उपसर्गादध्वनः ॥८५ ॥ तत्पुरुषस्यांगुलेः संख्याव्ययादेः ॥ ८६ ॥ अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥८७ ॥ अह्नोऽह्न एतेभ्यः ॥८८॥ न संख्यादेः समाहारे ॥ ८९॥ उत्तमैकाभ्यां च ॥९०॥ राजाहः सखिभ्यष्टच् ॥ ९१ ॥ गोरतद्धितलुकि ॥ ९२ ॥ अग्राख्यायामुरसः ॥ ९३ ॥ अनोश्मायःसरसां जातिसंज्ञयोः ॥ ९४ ॥ ग्रामकौटाभ्यां च तक्ष्णः ॥ ९५ ॥ अतेः शुनः ॥ ९६ ॥ उपमानादप्राणिषु ॥ ९७ ॥ उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ॥ ९८ ॥ नावो द्विगोः ॥ ९९ ॥ अर्धाच्च ॥ १०० ॥ ॥ ५ ॥ खार्याः प्राचाम् ॥ १०१ ॥ द्वित्रिभ्यामञ्जलेः ॥ ॥ १०२ ॥ अनसन्तान्नपुंसकाच्छन्दसि ॥ १०३ ॥

ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥ कुमहद्भ्यामन्यतरस्याम् ॥ १०५ ॥ द्वन्द्वाच्चुदषहान्तात् समाहारे ॥ ॥ १०६ ॥ अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥ अनश्च ॥ १०८ ॥ नपुंसकादन्यतरस्याम् ॥ १०९ ॥ नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥ झयः ॥ ॥ १११ ॥ गिरेश्च सेनकस्य ॥ ११२ ॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥ ११३ ॥ अंगुलेर्दारुणि ॥ ॥ ११४ ॥ द्वित्रिभ्यां ष मूर्ध्नः ॥ ११५ ॥ अप् पूरणीप्रमाण्योः ॥ ११६ ॥ अन्तर्बहिर्भ्यां च लोम्नः ॥ ॥ ११७ ॥ अञ् नासिकायाः संज्ञायां नसं चास्थूलात् ॥ ॥ ११८ ॥ उपसर्गाच्च ॥ ११९ ॥ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ १२० ॥ ६॥ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥ नित्यमसिच् प्रजामेधयोः ॥ १२२॥ बहुप्रजाश्छन्दसि॥१२३॥ धर्मादनिच् केवलात् ॥ १२४ ॥ जम्भासुहरिततृणसोमेभ्यः ॥ १२५ ॥ दक्षिणेर्मा लुब्धयोगे ॥ १२६ ॥ इच् कर्मव्यतिहारे ॥ १२७ ॥ द्विदण्ड्यादिभ्यश्च॥१२८॥ प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥ ऊर्ध्वाद्विभाषा ॥१३०॥ ऊधसोऽनङ् ॥१३१ ॥ धनुषश्च ॥१३२॥ वा संज्ञायाम्॥ ॥ १३३ ॥ जायाया निङ् ॥ १३४ ॥ गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३५ ॥ अल्पाख्यायाम् ॥ १३६ ॥ उपमानाच्च ॥ १३७ ॥ पादस्य लोपोऽहस्त्यादिभ्यः ॥ ॥ १३८ ॥ कुम्भपदीषु च ॥ १३९ ॥ संख्यासुपूर्वस्य ॥ ॥ १४० ॥ ७ ॥ वयसि दन्तस्य दतृ ॥ १४१ ॥ छन्दसि च ॥ १४२ ॥ स्त्रियां संज्ञायाम् ॥ १४३ ॥ विभाषा श्यावारोकाभ्याम् ॥ १४४ ॥ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥ ककुदस्यावस्थायां लोपः ॥ ॥ १४६ ॥ त्रिककुत् पर्वते ॥ १४७ ॥ उद्विभ्यां काकुदस्य ॥ १४८ ॥ पूर्णाद्विभाषा ॥ १४९ ॥ सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥ उरःप्रभृतिभ्यः कप् ॥ १५१॥ इनः स्त्रियाम् ॥ १५२ ॥ नद्यृतश्च ॥ १५३ ॥ शेषाद्विभाषा ॥ १५४ ॥ न संज्ञायाम् ॥ १५५ ॥ ईयसश्च ॥ १५६ ॥ वन्दिते भ्रातुः ॥ १५७ ॥ ऋतश्छन्दसि ॥ १५८ ॥ नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥ निष्प्रवाणिश्च ॥ १६० ॥ ८ ॥ (पादशतस्य तत्प्रकृतवृकज्येष्ठाभ्यां सपत्रान्ववतप्तात् खार्या नञ्दुःसुभ्यो वयसि विंशतिः) ॥

इति पञ्चमाध्यायस्य तुरीयः पादः ॥ ४ ॥

इति पञ्चमोऽध्यायस्समाप्तः ।

अथ षष्ठोऽध्यायः ।

एकाचो द्वे प्रथमस्य ॥ १ ॥ अजादेर्द्वितीयस्य ॥ ॥ २ ॥ न न्द्राः संयोगादयः ॥ ३ ॥ पूर्वोऽभ्यासः ॥४॥ उभे अभ्यस्तम् ॥५॥ जक्षित्यादयः षट् ॥६॥ तुजादीनां दीर्घोऽभ्यासस्य ॥ ७ ॥ लिटि धातोरनभ्यासस्य ॥ ८ ॥ सन्यङोः ॥ ९ ॥ श्लौ ॥ १० ॥ चङि॥११॥ दाश्वान्साह्वान्मीढ्वांश्च ॥१२॥ ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे॥ ॥ १३ ॥ बन्धुनि बहुव्रीहौ ॥१४॥ वचिस्वपियजादीनां किति ॥ १५ ॥ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥१६॥ लिट्यभ्यासस्योभयेषाम् ॥ १७ ॥ स्वापेश्चङि ॥ १८ ॥ स्वपिस्यमिव्येञां यङि ॥ १९ ॥ न वशः ॥ २० ॥ १ ॥ चायः की ॥ २१ ॥ स्फायः स्फी निष्ठायाम्॥२२॥ स्त्यः प्रपूर्वस्य ॥२३॥ द्रवमूर्तिस्पर्शयोः श्यः॥२४॥ प्रतेश्च॥२५॥विभाषाऽभ्यवपूर्वस्य ॥२६॥शृतं पाके ॥२७॥ प्यायः पी ॥२८॥ लिड्यङोश्च ॥२९॥ विभाषा श्वेः॥३०॥ णौ च संश्चङोः ॥३१॥ह्वः संप्रसारणम् ॥३२॥अभ्यस्तस्य च ॥३३॥ बहुलं छन्दसि ॥ ॥३४॥चायः की ॥३५ ॥ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्ताः ॥ ३६ ॥ न संप्रसारणे संप्रसारणम् ॥ ३७ ॥ लिटि वयो यः ॥३८ ॥ वश्चास्यान्यतरस्यां किति ॥ ३९ ॥ वेञः ॥ ४० ॥ २ ॥ ल्यपि च ॥ ४१ ॥ ज्यश्च ॥ ४२ ॥ व्यश्च ॥ ४३ ॥ विभाषा परेः ॥ ॥ ४४ ॥ आदेच उपदेशेऽशिति ॥४५॥ न व्यो लिटि ॥ ४६ ॥ स्फुरतिस्फुलत्योर्घञि ॥ ४७ ॥ क्रीङ्जीनां णौ ॥ ४८ ॥ सिध्यतेरपारलौकिके ॥ ४९॥ मीनातिमिनोतिदीङां ल्यपि च॥५०॥ विभाषा लीयतेः ॥ ॥५१ ॥ खिदेश्छन्दसि ॥ ५२ ॥ अपगुरो णमुलि ॥ ॥ ५३ ॥ चिस्फुरोर्णौ ॥ ५४ ॥ प्रजने वीयतेः ॥ ५५॥ बिभेतेर्हेतुभये ॥ ५६ ॥ नित्यं स्मयतेः ॥ ५७ ॥ सृजिदृशोर्झल्यमकिति ॥ ५८ ॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥५९॥ शीर्षश्छन्दसि ॥ ६० ॥ ३ ॥ ये च तद्धिते ॥ ६१ ॥ अचि शीर्षः ॥ ६२ ॥ पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६३ ॥ धात्वादेः षः सः ॥ ६४ ॥ णो नः ॥ ६५ ॥ लोपो व्योर्वलि ॥ ६६ ॥ वेरपृक्तस्य ॥ ६७ ॥ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्॥ ६८ ॥ एङ्ह्रस्वात् संबुद्धेः ॥६९॥ शेश्छन्दसि बहुलम् ॥ ७० ॥ ह्रस्वस्य पिति कृति तुक् ॥ ७१ ॥ संहितायाम् ॥ ७२ ॥ छे च ॥ ७३ ॥ आङ्माङोश्च ॥ ७४ ॥ दीर्घात ॥ ७५ ॥ पदान्ताद्वा ॥ ॥७६ ॥ इको यणचि ॥ ७७ ॥ एचोऽयवायावः ॥७८॥ वान्तो यि प्रत्यये ॥ ७९ ॥ धातोस्तन्निमित्तस्यैव ॥८०॥ ॥ ४ ॥ क्षय्यजय्यौ शक्यार्थे ॥ ८१ ॥ क्रय्यस्तदर्थे ॥ ॥८२॥ भय्यप्रवय्ये च च्छन्दसि ॥ ८३ ॥ एकः पूर्वपरयोः ॥ ८४ ॥ अन्तादिवच्च ॥ ८५ ॥ षत्वतुकोरसिद्धः॥८६॥ आद् गुणः॥८७॥ वृद्धिरेचि ॥८८॥ एत्येधत्यूठ्सु ॥८९॥ आटश्च ॥ ९० ॥ उपसर्गादृति धातौ ॥ ९१ ॥ वा सुप्यापिशलेः ॥ ९२ ॥ औतोम्शसोः ॥ ॥ ९३ ॥ एङि पररूपम् ॥ ९४ ॥ ओमाङोश्च ॥ ९५ ॥ उस्यपदान्तात् ॥ ९६ ॥ अतो गुणे ॥९७॥ अव्यक्तानुकरणस्यात इतौ ॥ ९८ ॥ नाम्रेडितस्यान्त्यस्य तु वा ॥ ९९ ॥ नित्यमाम्रेडिते डाचि ॥१००॥५॥ अकः सवर्णे दीर्घः ॥ १०१ ॥ प्रथमयोः पूर्वसवर्णः ॥ १०२ ॥ तस्माच्छसो नः पुंसि ॥ १०३ ॥ नादिचि ॥ १०४॥ दीर्घाज्जसि च ॥१०५॥ वा छन्दसि ॥ १०६ ॥ अमि पूर्वः ॥ १०७ ॥ संप्रसारणाच्च ॥ १०८ ॥ एङः पदान्तादति ॥ १०९ ॥ ङसिङसोश्च ॥ ११० ॥ ऋत उत् ॥ १११ ॥ ख्यत्यात् परस्य ॥ ११२ ॥ अतो रोरप्लुतादप्लुते ॥ ११३ ॥ हशि च ॥ ११४ ॥ प्रकृत्यान्तः पादमव्यपरे ॥११५ ॥ अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ॥११६॥ यजुष्युरः ॥ ११७ ॥ आपो जुषाणो वृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे ॥ ११८ ॥ अङ्ग इत्यादौ च ॥ ११९ ॥ अनुदात्ते च कुधपरे॥ १२० ॥ ६ ॥ अवपथासि च ॥ ॥ १२१ ॥ सर्वत्र विभाषा गोः ॥ १२२ ॥ अवङ् स्फोटायनस्य ॥ १२३ ॥ इन्द्रे च नित्यम् ॥ १२४ ॥ प्लुतप्रगृह्या अचि नित्यम् ॥ १२५ ॥ आङोऽनुनासिकश्छन्दसि ॥ १२६ ॥ इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च॥ ॥ १२७ ॥ ऋत्यकः ॥ १२८ ॥ अप्लुतवदुपस्थिते ॥ ॥ १२९ ॥ ई३ चाक्रवर्मणस्य ॥ १३० ॥ दिव उत् ॥ ॥१३१॥एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ॥१३२॥ स्यश्छन्दसि बहुलम् ॥ १३३ ॥ सोऽचि लोपे चेत् पादपूरणम् ॥ १३४ ॥ सुट्कात्पूर्वः ॥ १३५॥ अडभ्यासव्यवायेऽपि ॥ १३६ ॥ संपर्युपेभ्यः करोतौ भूषणे ॥ ॥ १३७ ॥ समवाये च ॥ १३८ ॥ उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च ॥१३९ ॥ किरतौ लवने॥१४०॥ ॥ ७ ॥ हिंसायां प्रतेश्च ॥ १४१ ॥ अपाच्चतुष्पाच्छकुनिष्वालेखने ॥ १४२ ॥ कुस्तुम्बुरूणि जातिः ॥ १४३ ॥ अपरस्पराः क्रियासातत्ये ॥ १४४ ॥ गोष्पदं सेवितासेवितप्रमाणेषु ॥ १४५॥ आस्पदं प्रतिष्ठायाम् ॥१४६॥ आश्चर्यमनित्ये ॥ १४७ ॥ वर्चस्केऽवस्करः ॥ १४८ ॥ अपस्करो रथाङ्गम् ॥ १४९ ॥ विष्किरः शकुनिर्विकिरो वा ॥ १५० ॥ ह्रस्वाचन्द्रोत्तरपदे मन्त्रे ॥ १५१ ॥ प्रतिष्कशश्च कशेः ॥ १५२॥ प्रस्कण्वहरिश्चन्द्रावृषी ॥१५३॥ मस्करमस्करिणौ वेणुपरिव्राजकयोः ॥ १५४ ॥ कास्ती-

राजस्तुन्दे नगरे ॥ १५५ ॥ कारस्करो वृक्षः ॥ १५६ ॥ पारस्करप्रभृतीनि च संज्ञायाम् ॥ १५७॥ अनुदात्तं पदमेकवर्जम् ॥ १५८ ॥ कर्षात्वतो घञोऽन्त उदात्तः ॥ ॥ १५९ ॥ उञ्छादीनां च ॥ १६० ॥ ८ ॥ अनुदात्तस्य च यत्रोदात्तलोपः ॥ १६१ ॥ धातोः ॥ १६२ ॥ चितः ॥ १६३ ॥ तद्धितस्य ॥ १६४॥ कितः ॥१६५॥ तिसृभ्यो जसः ॥ १६६ ॥ चतुरः शसि ॥ १६७ ॥ सावेकाचस्तृतीयादिर्विभक्तिः ॥ १६८ ॥ अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥ १६९ ॥ अञ्चेश्छन्दस्यसर्वनामस्थानम् ॥१७०॥ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः॥१७१॥ अष्टनो दीर्घात् ॥ १७२ ॥ शतुरनुमो नद्यजादी॥१७३॥ उदात्तयणो हल्पूर्वात् ॥ १७४ ॥ नोङ्धात्वोः ॥ १७५॥ ह्रस्वनुड्भ्यां मतुप् ॥ १७६ ॥ नामन्यतरस्याम् ॥१७७॥ ङ्याश्छन्दसि बहुलम् ॥ १७८ ॥ षट्त्रिचतुर्भ्यो हलादिः ॥ १७९ ॥ झल्युपोत्तमम् ॥ १८० ॥ ९ ॥ विभाषा भाषायाम् ॥१८१॥ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ ॥१८२॥ दिवो झल्॥१८३॥ नृ चान्यतरस्याम्॥१८४॥ तित्स्वरितम्॥१८५॥ तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः॥१८६॥आदिः सिचोऽन्यतरस्याम् ॥ ॥ १८७ ॥ स्वपादिर्हिंसामच्यनिटि ॥ १८८ ॥ अभ्यस्तानामादिः ॥ १८९ ॥ अनुदात्ते च ॥ १९० ॥ सर्वस्य सुपि ॥ १९१ ॥ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति ॥ १९२ ॥ लिति ॥ १९३ ॥ आदिर्णमुल्यन्यतरस्याम् ॥ १९४ ॥ अचः कर्तृयकि ॥ ॥ १९५ ॥ थलि च सेटीडन्तो वा ॥ १९६ ॥ ञ्नित्यादिर्नित्यम् ॥१९७ ॥ आमन्त्रितस्य च ॥१९८॥ पथिमथोः सर्वनामस्थाने ॥ १९९ ॥ अन्तश्च तवै युगपत् ॥ २०० ॥ १० ॥ क्षयो निवासे ॥ २०१ ॥ जयः करणम् ॥ २०२ ॥ वृषादीनां च ॥ २०३ ॥ संज्ञायामुपमानम् ॥ २०४ ॥ निष्ठा च द्व्यजनात् ॥ २०५ ॥ शुष्कधृष्टौ ॥ २०६ ॥ आशितः कर्ता ॥ २०७ ॥ रिक्ते विभाषा ॥ २०८ ॥ जुष्टार्पिते च च्छन्दसि ॥ २०९॥ नित्यं मन्त्रे ॥ २१० ॥ युष्मदस्मदोर्ङसि ॥ २११ ॥ ङयि च ॥ २१२ ॥ यतो नावः ॥ २१३ ॥ ईडवन्दवृशंसदुहां ण्यतः ॥२१४॥ विभाषा वेण्विन्धानयोः॥२१५॥ त्यागरागहासकुहश्वठक्रथानाम् ॥ २१६ ॥ उपोत्तमं रिति ॥ २१७ ॥ चङ्यन्यतरस्याम् ॥ २१८ ॥ मतोः पूर्वमात्संज्ञायां स्त्रियाम् ॥ २१९ ॥ अन्तोऽवत्याः ॥ ॥ २२० ॥११ ॥ ईवत्याः ॥ २२१ ॥ चौ ॥२२२ ॥ समासस्य ॥ २२३ ॥ ३ ॥ (एकाचश्चाद्यो ल्यपि च ये च क्षय्यजय्यावकः सवर्णेऽवधथाहिंसायामनुदात्तस्य विभाषा क्षय ईवत्यात्त्रीणि) ॥

इति षष्ठाध्यायस्य प्रथमः पादः ॥ १ ॥

बहुव्रीहौ प्रकृत्या पूर्वपदम् ॥ १ ॥ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥ २ ॥ वर्णो वर्णेष्वनेते ॥ ३ ॥ गाधलवणयोः प्रमाणे ॥ ४ ॥ दायाद्यं दायादे ॥ ५ ॥ प्रतिबन्धि चिरकृच्छ्रयोः ॥ ६ ॥ पदेऽपदेशे ॥ ७ ॥ निवाते वातत्राणे ॥ ८ ॥ शारदेऽनार्तवे ॥ ॥ ९ ॥ अध्वर्युकषाययोर्जातौ ॥१० ॥ सदृशप्रतिरूपयोः सादृश्ये ॥ ११ ॥ द्विगौ प्रमाणे ॥ १२ ॥ गन्तव्यपण्यं वाणिजे ॥ १३ ॥ मात्रोपज्ञोपक्रमच्छाये नपुंसके॥१४॥ सुखप्रिययोर्हिते ॥ १५ ॥ प्रीतौ च ॥ १६ ॥ स्वं स्वामिनि ॥ १७ ॥ पत्यावैश्वर्ये ॥ १८ ॥ न भूवाक्चिद्दिधिषु ॥ १९ ॥ वा भुवनम् ॥ २० ॥ १ ॥ आशङ्काबाधनेदीयःसु संभावने ॥ २१ ॥ पूर्वे भूतपूर्वे ॥ २२ ॥ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ॥ २३ ॥ विस्पष्टादीनि गुणवचनेषु ॥ २४ ॥ श्रज्यावमकन्पापवत्सु भावे कर्मधारये ॥ २५ ॥ कुमारश्च ॥ २६ ॥ आदिः प्रत्येनसि ॥ २७ ॥ पूगेष्वन्यतरस्याम् ॥ २८ ॥ इगन्तकालकपालभगालशरावेषु द्विगौ ॥२९ ॥ बह्वन्यतरस्याम्॥ ॥ ३० ॥ दिष्टिवितस्त्योश्च ॥ ३१ ॥ सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् ॥३२ ॥ परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥३३॥ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ॥ ३४॥ संख्या ॥ ३५ ॥ आचार्योपसर्जनश्चान्तेवासी ॥ ३६ ॥ कार्तकौजपादयश्च ॥ ३७ ॥ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ॥ ३८ ॥ क्षुल्लकश्च वैश्वदेवे ॥ ३९ ॥ उष्ट्रः सादिवाम्योः ॥ ४० ॥२॥ गौः सादसादिसारथिषु ॥ ४१ ॥ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ॥ ४२ ॥ चतुर्थी तदर्थे ॥ ४३ ॥ अर्थे ॥ ॥ ४४ ॥ क्ते च ॥ ४५ ॥ कर्मधारयेऽनिष्ठा ॥ ४६ ॥ अहीने द्वितीया ॥ ४७ ॥ तृतीया कर्मणि ॥ ४८ ॥ गतिरनन्तरः ॥ ४९ ॥ तादौ च निति कृत्यतौ ॥ ५०॥ तवै चान्तश्च युगपत् ॥ ५१ ॥ अनिगन्तोऽञ्चतावप्रत्यये ॥ ५२ ॥ न्यधी च ॥ ५३ ॥ ईषदन्यतरस्याम् ॥५४॥ हिरण्यपरिमाणं धने ॥ ५५ ॥ प्रथमोऽचिरोपसंपत्तौ ॥ ५६ ॥ कतरकतमौ कर्मधारये ॥ ५७ ॥ आर्यो ब्राह्मणकुमारयोः ॥ ५८ ॥ राजा च ॥ ५९ ॥ षष्ठी प्रत्येनसि ॥ ६० ॥ ३ ॥ क्ते नित्यार्थे ॥ ६१ ॥ ग्रामः शिल्पिनि ॥ ६२ ॥ राजा च प्रशंसायाम् ॥ ६३ ॥ आदिरुदात्तः ॥ ६४ ॥ सप्तमीहारिणौ धर्म्येऽहरणे ॥ ६५ ॥ युक्ते च ॥ ६६ ॥ विभाषाध्यक्षे ॥ ६७ ॥ पापं च शिल्पिनि ॥ ६८ ॥ गोत्रान्तेवासिमाणवब्राह्मणेषु-

१ 'अञ्चतौ वप्रत्यये' इति पाठान्तरम् ।

क्षेपे ॥ ६९ ॥ अङ्गानि मैरेये ॥ ७० ॥ भक्ताख्यास्तदर्थेषु ॥ ७१ ॥ गोबिडालसिंहसैन्धवेषूपमाने ॥ ७२ ॥ अके जीविकार्थे ॥ ७३ ॥ प्राचां क्रीडायाम् ॥ ७४ ॥ अणि नियुक्ते ॥ ७५ ॥ शिल्पिनि चाकृञः ॥ ७६ ॥ संज्ञायां च ॥ ७७ ॥ गोतन्तियवं पाले ॥ ७८ ॥ णिनि ॥ ७९ ॥ उपमानं शब्दार्थप्रकृतावेव ॥ ८० ॥ ॥ ४ ॥ युक्तारोह्यादयश्च ॥ ८१ ॥ दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ ८२ ॥ अन्त्यात्पूर्वं बह्वचः ॥ ८३ ॥ ग्रामेऽनिवसन्तः ॥ ८४ ॥ घोषादिषु च ॥ ८५ ॥ छात्र्यादयः शालायाम् ॥ ८६ ॥ प्रस्थेऽवृद्धमकर्क्यादीनाम् ॥ ॥ ८७ ॥ मालादीनां च ॥ ८८ ॥ अमहन्नवन्नगरेऽनुदीचाम् ॥ ८९ ॥ अर्मे चावर्णं द्व्यच्त्र्यच् ॥ ९० ॥ भूताधिकसंजीवमद्राश्मकज्जलम् ॥ ९१ ॥ अन्तः ॥ ९२ ॥ सर्वं गुणकार्त्स्न्ये ॥ ९३ ॥ संज्ञायां गिरिनिकाययोः ॥ ॥ ९४ ॥ कुमार्यां वयसि ॥ ९५ ॥ उदकेऽकेवले ॥ ॥ ९६ ॥ द्विगौ क्रतौ ॥ ९७ ॥ सभायां नपुंसके ॥ ९८ ॥ पुरे प्राचाम् ॥ ९९ ॥ अरिष्टगौडपूर्वे च ॥ १०० ॥ ५ ॥ न हास्तिनफलकमार्देयाः ॥ १०१ ॥ कुसूलकूपकुम्भशालं बिले ॥ १०२ ॥ दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ॥ १०३ ॥ आचार्योपसर्जनश्चान्तेवासिनि ॥ १०४ ॥ उत्तरपदवृद्धौ सर्वं च ॥ १०५ ॥ बहुव्रीहौ विश्वं संज्ञायाम् ॥ १०६ ॥ उदराश्वेषुषु ॥ १०७ ॥ क्षेपे ॥ ॥ १०८ ॥ नदी बन्धुनि ॥ १०९ ॥ निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥ ११० ॥ उत्तरपदादिः ॥ १११ ॥ कर्णो वर्णलक्षणात् ॥ ११२ ॥ संज्ञौपम्ययोश्च ॥ ११३ ॥ कण्ठपृष्ठग्रीवाजंघं च ॥ ११४ ॥ शृङ्गमवस्थायां च ॥ ॥ ११५ ॥ नञो जरमरमित्रमृताः ॥ ११६ ॥ सोर्मनसी अलोमोषसी ॥ ११७ ॥ क्रत्वादयश्च ॥ ११८ ॥ आद्युदात्तं द्व्यच्छन्दसि ॥ ११९ ॥ वीरवीर्यौ च ॥ १२० ॥ ६ ॥ कलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ १२१ ॥ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥ १२२ ॥ तत्पुरुषे शालायां नपुंसके ॥ १२३ ॥ कन्था च ॥ १२४ ॥ आदिश्चिहणादीनाम् ॥ १२५ ॥ चेलखेटकटुककाण्डं गर्हायाम् ॥ १२६ ॥ चीरमुपमानम् ॥ १२७ ॥ पललसूपशाकं मिश्रे ॥ १२८ ॥ कूलसूदस्थलकर्षाः संज्ञायाम् ॥ १२९ ॥ अकर्मधारये राज्यम् ॥ १३० ॥ वर्ग्यादयश्च ॥ १३१ ॥ पुत्रः पुम्भ्यः ॥ १३२ ॥ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ॥ १३३ ॥ चूर्णादीन्यप्राणिषष्ठ्याः ॥ १३४ ॥ षट् च काण्डादीनि ॥ १३५ ॥ कुण्डं वनम् ॥ १३६ ॥ प्रकृत्या भगालम् ॥ ॥ १३७ ॥ शितेर्नित्याबह्वज्बहुव्रीहावभसत् ॥ १३८ ॥ गतिकारकोपपदात्कृत् ॥ १३९ ॥ उभे वनस्पत्यादिषु युगपत् ॥ १४० ॥ ७ ॥ देवताद्वन्द्वे च ॥ १४१ ॥ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥ १४२ ॥ अन्तः ॥ १४३ ॥ थाथघञ्क्ताजबित्रकाणाम् ॥ १४४ ॥ सूपमानात् क्तः ॥ १४५ ॥ संज्ञायामनाचितादीनाम् ॥ ॥ १४६ ॥ प्रवृद्धादीनां च ॥ १४७ ॥ कारकाद्दत्तश्रुतयोरेवाशिषि ॥ १४८ ॥ इत्थंभूतेन कृतमिति च ॥ ॥ १४९ ॥ अनो भावकर्मवचनः ॥ १५० ॥ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादि ीताः ॥ १५१ ॥ सप्तम्याः पुण्यम् ॥ १५२ ॥ ऊनार्थकलहं तृतीयायाः ॥ ॥ १५३ ॥ मिश्रं चानुपसर्गमसंधौ ॥ १५४ ॥ नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः ॥ १५५ ॥ ययतोश्चातदर्थे ॥ १५६ ॥ अच्कावशक्तौ ॥ १५७ ॥ आक्रोशे च ॥ १५८ ॥ संज्ञायाम् ॥ १५९ ॥ कृत्योकेष्णुच्चार्वादयश्च ॥ १६० ॥ ८ ॥ विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥ १६१ ॥ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ १६२ ॥ संख्यायाः स्तनः ॥ ॥ १६३ ॥ विभाषा छन्दसि ॥ १६४ ॥ संज्ञायां मित्राजिनयोः ॥ १६५ ॥ व्यवायिनोऽन्तरम् ॥ १६६ ॥ मुखं स्वाङ्गम् ॥ १६७ ॥ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥ १६८ ॥ निष्ठोपमानादन्यतरस्याम् ॥ ॥ १६९ ॥ जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ॥ १७० ॥ वा जाते ॥ १७१ ॥ नञ्सुभ्याम् ॥ १७२ ॥ कपि पूर्वम् ॥ १७३ ॥ ह्रस्वान्तेऽन्त्यात्पूर्वम् ॥ १७४ ॥ बहोर्नञ्वदुत्तरपदभूम्नि ॥ ॥ १७५ ॥ न गुणादयोऽवयवाः ॥ १७६ ॥ उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ॥ १७७ ॥ वनं समासे ॥ १७८ ॥ अन्तः ॥ १७९ ॥ अन्तश्च ॥ १८० ॥ ९ ॥ न निविभ्याम् ॥ ॥ १८१ ॥ परेरभितो भावि मण्डलम् ॥ १८२ ॥ प्रादस्वाङ्गं संज्ञायाम् ॥ १८३ ॥ निरुदकादीनि च ॥ १८४ ॥ अभेर्मुखम् ॥ १८५ ॥ अपाच्च ॥ १८६ ॥ स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च ॥ १८७ ॥ अधेरुपरिस्थम् ॥ ॥ १८८ ॥ अनोरप्रधानकनीयसी ॥ १८९ ॥ पुरुषश्चान्वादिष्टः ॥ १९० ॥ अतेरकृत्पदे ॥ १९१ ॥ नेरनिधाने ॥ ॥ १९२ ॥ प्रतेरंश्वादयस्तत्पुरुषे ॥ १९३ ॥ उपाद्द्व्यजजिनमगौरादयः ॥ १९४ ॥ सोरवक्षेपणे ॥ १९५ ॥ विभाषोत्पुच्छे ॥ १९६ ॥ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥ १९७ ॥ सक्थं चाक्रान्तात् ॥ १९८ ॥ परादिश्छन्दसि बहुलम् ॥ १९९ ॥ १९ ॥ (बहुव्रीहावाशंकागौः सादक्ते नित्यार्थे युक्ता नहास्तिन कूलतीरदेवताविभाषा न निव्येकोनविंशतिः) ॥

इति षष्ठाध्यायस्य द्वितीयः पादः ॥ २ ॥

अलुगुत्तरपदे ॥ १ ॥ पञ्चम्याः स्तोकादिभ्यः ॥ २॥ ओजःसहोम्भस्तमसस्तृतीयायाः ॥३॥ मनसः संज्ञायाम् ॥ ॥ ४ ॥ आज्ञायिनि च ॥ ५ ॥ आत्मनश्च पूरणे ॥ ६ ॥ वैयाकरणाख्यायां चतुर्थ्याः ॥ ७ ॥ परस्य च ॥ ८ ॥ हलदन्तात्सप्तम्याः संज्ञायाम् ॥ ९ ॥ कारनाम्नि च प्राचां हलादौ ॥ १० ॥ मध्याद् गुरौ ॥ ११ ॥ अमूर्धमस्तकात्स्वाङ्गादकामे ॥ १२ ॥ बन्धे च विभाषा ॥ १३ ॥ तत्पुरुषे कृति बहुलम्॥१४॥प्रावृट्शरत्कालदिवांजे॥१५॥ विभाषा वर्षक्षरशरवरात् ॥ १६ ॥ घकालतनेषु कालनाम्नः ॥१७॥ शयवासवासिष्वकालात् ॥ १८ ॥ नेन्सिद्धबध्नातिषु च ॥ १९ ॥ स्थे च भाषायाम् ॥ २० ॥ १ ॥ षष्ठ्या आक्रोशे ॥ २१ ॥ पुत्रेऽन्यतरस्याम् ॥२२॥ ऋतो विद्यायोनिसंबन्धेभ्यः ॥ २३ ॥ विभाषा स्वसृपत्योः ॥ ॥ २४ ॥ आनङृतो द्वन्द्वे ॥ २५ ॥ देवताद्वन्द्वे च ॥ ॥ २६ ॥ ईदग्नेः सोमवरुणयोः ॥ २७ ॥ इद्वृद्धौ ॥ ॥ २८॥ दिवो द्यावा ॥२९॥ दिवसश्च पृथिव्याम् ॥३०॥ उषासोषसः ॥ ३१ ॥ मातरपितरावुदीचाम् ॥ ३२ ॥ पितरामातरा च च्छन्दसि ॥ ३३ ॥ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ ३४॥ तसिलादिष्वाकृत्वसुचः ॥३५॥ क्यङ्मानिनोश्च॥ ३६ ॥ न कोपधायाः ॥ ३७ ॥ संज्ञापूरण्योश्च ॥ ३८ ॥ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥ ३९ ॥ स्वाङ्गाच्चेतोऽमानिनि ॥ ४० ॥ २ ॥ जातेश्च ॥ ४१ ॥ पुंवत्कर्मधारयजातीयदेशीयेषु ॥४२॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ॥ ४३ ॥ नद्याः शेषस्यान्यतरस्याम् ॥ ४४ ॥ उगितश्च ॥ ४५ ॥आन्महतः समानाधिकरणजातीययोः ॥ ४६ ॥ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥ ४७ ॥ त्रेस्त्रयः ॥ ४८ ॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥ ४९ ॥ हृदयस्य हृल्लेखयदण्लासेषु ॥ ५० ॥ वा शोकष्यञ्रोगेषु ॥५१ ॥ पादस्य पदाज्यातिगोपहतेषु ॥ ५२ ॥ पद्यत्यतदर्थे ॥ ५३ ॥ हिमकाषिहतिषु च ॥ ५४ ॥ ऋचः शे ॥ ५५ ॥ वा घोषमिश्रशब्देषु ॥ ५६ ॥ उदकस्योदः संज्ञायाम्॥५७॥ पेषंवासवाहनधिषु च ॥ ५८ ॥ एकहलादौ पूरयितव्येऽन्यतरस्याम् ॥ ५९ ॥ मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ॥ ६० ॥ ३ ॥ इको ह्रस्वोऽङ्यो गालवस्य ॥ ६१ ॥ एकतद्धिते च ॥ ६२॥ ङ्यापोः संज्ञाछन्दसोर्बहुलम् ॥ ६३ ॥ त्वे च ॥ ॥ ६४॥ इष्टकेषीकामालानां चिततूलभारिषु ॥ ६५ ॥ खित्यनव्ययस्य ॥ ६६ ॥ अरुर्द्विषदजन्तस्य मुम् ॥ ६७ ॥ इच एकाचोऽम्प्रत्ययवच्च ॥ ॥ ६८ ॥ वाचंयमपुरंदरौ च ॥ ६९॥ कारे सत्यागदस्य ॥ ७० ॥ श्येनतिलस्य पाते ञे ॥ ७१ ॥ रात्रेः कृति विभाषा ॥ ७२ ॥ नलोपो नञः ॥ ७३ ॥ तस्मान्नुडचि ॥ ७४ ॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ॥ ७५ ॥ एकादिश्चैकस्य चादुक् ॥ ७६ ॥ नगोऽप्राणिष्वन्यतरस्याम् ॥ ७७ ॥ सहस्य सः संज्ञायाम् ॥ ७८ ॥ ग्रन्थान्ताधिके च ॥७९॥ द्वितीये चानुपाख्ये ॥ ८० ॥ ४ ॥ अव्ययीभावे चाकाले ॥ ८१ ॥ वोपसर्जनस्य ॥ ८२ ॥ प्रकृत्याशिष्यगोवत्सहलेषु ॥ ८३ ॥ समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु॥८४॥ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥८५॥ चरणे ब्रह्मचारिणि ॥८६ ॥ तीर्थे ये ॥८७ ॥ विभाषोदरे ॥ ८८॥दृग्दृशवतुषु ॥ ८९ ॥ इदंकिमोरीश्की ॥९०॥ आ सर्वनाम्नः ॥ ९१॥ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ॥ ९२ ॥ समः समि ॥ ९३ ॥ तिरसस्तिर्यलोपे ॥ ९४ ॥ सहस्य सध्रिः ॥ ९५ ॥ सधमादस्थयोश्छन्दसि ॥ ९६ ॥ द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥ ९७ ॥ ऊदनोर्देशे ॥ ९८ ॥ अषष्ठ्यतृतीयास्थस्यान्यस्यदुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥९९ ॥ अर्थे विभाषा ॥ १०० ॥ ५ ॥ कोः कत्तत्पुरुषेऽचि ॥ १०१ ॥ रथवदयोश्च ॥ १०२ ॥ तृणे च जातौ ॥ १०३ ॥ का पथ्यक्षयोः ॥ १०४ ॥ ईषदर्थे ॥ १०५ ॥ विभाषा पुरुषे ॥ १०६ ॥ कवं चोष्णे ॥ १०७ ॥ पथि च च्छन्दसि ॥ १०८ ॥ पृषोदरादीनि यथोपदिष्टम् ॥ १०९ ॥ संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ॥ ११० ॥ ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ १११ ॥ सहिवहोरोदवर्णस्य ॥११२ ॥ साढ्यै साढ्वा साढेति निगमे ॥ ११३ ॥ संहितायाम् ॥ ११४ ॥ कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥ ११५ ॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ ११६ ॥ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ॥ ११७ ॥ वले ॥११८ ॥ मतौ बह्वचोऽनजिरादीनाम् ॥ ११९ ॥ शरादीनां च॥१२०॥ ॥ ६ ॥ इको वहेऽपीलोः ॥ १२१ ॥ उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥ १२२ ॥ इकः काशे ॥१२३॥ दस्ति ॥ १२४ ॥ अष्टनः संज्ञायाम् ॥ १२५ ॥ छन्दसि च ॥ ॥ १२६ ॥ चितेः कपि ॥ १२७ ॥ विश्वस्य वसुराटोः ॥ १२८ ॥ नरे संज्ञायाम् ॥१२९॥ मित्रे चर्षौ॥१३०॥ मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥ १३१॥ ओषधेश्च विभक्तावप्रथमायाम् ॥१३२॥ ऋचि तुनुघमक्षुमतङ्कुत्रोरुष्याणाम् ॥ १३३ ॥ इकः सुञि ॥ १३४ ॥ द्व्यचोतस्तिङः ॥ १३५ ॥ निपातस्य च ॥१३६ ॥ अन्येषामपि दृश्यते ॥ १३७ ॥ चौ ॥ १३८ ॥ संप्रसारणस्य ॥

१ प्रकृत्याशिष्यगोवत्सहलेष्विति सूत्रे अगोवत्सहलेष्विति प्रक्षिप्तः पाठः । २ टेरद्र्यञ्चतौ वप्रत्यये इति पाठः ।

॥ १३९ ॥ १९ ॥ (अलुक्षष्ठ्या जातेरिकोऽव्ययीभावे कोः कत्तदिको वहे एकोनविंशतिः) ॥

इति षष्ठाध्यायस्य तृतीयः पादः ॥ ३ ॥

अङ्गस्य ॥ १ ॥ हलः ॥ २ ॥ नामि ॥ ३ ॥ न तिसृचतसृ ॥ ४ ॥ छन्दस्युभयथा ॥ ५ ॥ नृ च ॥ ६ ॥ नोपधायाः ॥ ७ ॥ सर्वनामस्थाने चासंबुद्धौ ॥ ८ ॥ वा षपूर्वस्य निगमे ॥ ९ ॥ सान्तमहतः संयोगस्य ॥ १० ॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्॥११॥ इन्हन्पूषार्यम्णां शौ ॥ १२ ॥ सौ च ॥ १३ ॥ अत्वसन्तस्य चाधातोः ॥ १४ ॥ अनुनासिकस्य क्विझलोः क्ङिति ॥ १५ ॥ अज्झनगमां सनि ॥ १६ ॥ तनोतेर्विभाषा ॥ १७ ॥ क्रमश्च क्त्वि ॥ १८ ॥ च्छ्वोः शूडनुनासिके च ॥१९॥ ज्वरत्वरस्रिव्यविमवामुपधायाश्च॥२०॥१॥ राल्लोपः ॥ २१ ॥ असिद्धवदत्राभात् ॥२२॥ श्नान्नलोपः ॥ २३ ॥ अनिदितां हल उपधायाः क्ङिति ॥ २४ ॥ दंशसञ्जस्वञ्जां शपि ॥ २५ ॥ रञ्जेश्च ॥ २६ ॥ घञि च भावकरणयोः ॥ २७ ॥ स्यदो जवे ॥ २८ ॥ अवोदैधौद्मप्रश्रथहिमश्रथाः ॥ २९ ॥ नाञ्चेः पूजायाम् ॥ ३० ॥ क्त्वि स्कन्दस्यन्दोः ॥ ३१ ॥ जान्तनशां विभाषा ॥३२॥ भञ्जेश्च चिणि ॥ ३३ ॥ शास इदङ्हलोः ॥ ३४ ॥ शा हौ ॥ ३५ ॥ हन्तेर्जः ॥ ३६ ॥ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥३७॥ वा ल्यपि ॥ ३८ ॥ न क्तिचि दीर्घश्च ॥ ३९ ॥ गमः क्वौ ॥ ४० ॥ २ ॥ विड्वनोरनुनासिकस्यात् ॥ ४१ ॥ जनसनखनां सञ्झलोः ॥४२॥ ये विभाषा ॥ ४३ ॥ तनोतेर्यकि ॥ ४४ ॥ सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥ ॥ ४५ ॥ आर्धधातुके ॥ ४६ ॥ भ्रस्जो रोपधयो रमन्यतरस्याम् ॥ ४७ ॥ अतो लोपः ॥ ४८ ॥ यस्य हलः ॥ ४९ ॥ क्यस्य विभाषा ॥ ५० ॥ णेरनिटि ॥ ५१ ॥ निष्ठायां सेटि ॥ ५२ ॥ जनिता मन्त्रे ॥ ५३ ॥ शमिता यज्ञे ॥ ५४ ॥ अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ५५॥ ल्यपि लघुपूर्वात् ॥ ५६ ॥ विभाषापः ॥ ५७ ॥ युप्लुवोर्दीर्घश्छन्दसि ॥ ५८ ॥ क्षियः ॥ ५९ ॥ निष्ठायामण्यदर्थे ॥ ६० ॥ ३ ॥ वाक्रोशदैन्ययोः ॥ ६१ ॥ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ ६२ ॥ दीङो युडचि क्ङिति ॥ ६३ ॥ आतो लोप इटि च ॥ ६४ ॥ ईद्यति ॥ ६५ ॥ घुमास्थागापाजहातिसां हलि ॥ ६६ ॥ एर्लिङि ॥ ६७ ॥ वान्यस्य संयोगादेः ॥ ६८ ॥ न ल्यपि ॥ ६९ ॥ मयतेरिदन्यतरस्याम् ॥ ७० ॥ लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥ ७१ ॥ आडजादीनाम् ॥ ७२ ॥ छन्दस्यपि दृश्यते ॥ ७३ ॥ न माङ्योगे ॥ ७४ ॥ बहुलं छन्दस्यमाङ्योगेऽपि ॥ ७५॥ इरयो रे ॥ ७६॥ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ॥७७॥ अभ्यासस्यासवर्णे ॥ ७८ ॥ स्त्रियाः ॥७९॥ वाम्शसोः ॥ ॥ ८० ॥ ४ ॥ इणो यण् ॥ ८१ ॥ एरनेकाचोऽसंयोगपूर्वस्य ॥ ८२ ॥ ओः सुपि ॥ ८३ ॥ वर्षाभ्वश्च ॥ ॥ ८४ ॥ न भूसुधियोः ॥ ८५ ॥ छन्दस्युभयथा ॥८६॥ हुश्नुवोः सार्वधातुके ॥ ८७ ॥ भुवो वुग्लुङ्लिटोः॥८८॥ ऊदुपधाया गोहः ॥८९॥ दोषो णौ ॥९०॥ वा चित्तविरागे ॥ ९१ ॥ मितां ह्रस्वः ॥ ९२॥ चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ ९३ ॥ खचि ह्रस्वः ॥ ९४ ॥ ह्लादो निष्ठायाम् ॥ ९५ ॥ छादेर्घेऽद्व्युपसर्गस्य ॥ ९६ ॥ इस्मन्त्रन्क्विषु च ॥९७॥ गमहनजनखनघसां लोपः क्ङित्यनङि ॥ ९८ ॥ तनिपत्योश्छन्दसि ॥ ९९ ॥ घसिभसोर्हलि च ॥ १०० ॥ ५ ॥ हुझल्भ्यो हेर्धिः ॥१०१॥ श्रुशृणुपॄकृवृभ्यश्छन्दसि ॥ १०२ ॥ अङितश्च ॥ १०३॥ चिणो लुक् ॥ १०४ ॥ अतो हेः ॥१०५॥ उतश्च प्रत्ययादसंयोगपूर्वात् ॥ १०६ ॥ लोपश्चास्यान्यतरस्यां म्वोः ॥१०७॥ नित्यं करोतेः ॥ १०८ ॥ ये च ॥ १०९ ॥ अत उत्सार्वधातुके ॥ ११० ॥ श्नसोरल्लोपः ॥ १११ ॥ श्नाभ्यस्तयोरातः ॥ ११२ ॥ ई हल्यघोः ॥ ११३ ॥ इद्दरिद्रस्य ॥ ११४ ॥ भियोऽन्यतरस्याम् ॥ ११५ ॥ जहातेश्च ॥ ११६ ॥ आ च हौ ॥ ११७ ॥ लोपो यि ॥ ११८ ॥ घ्वसोरेद्धावभ्यासलोपश्च ॥ ११९ ॥ अत एकहल्मध्येऽनादेशादेर्लिटि ॥ १२० ॥ ६ ॥ थलि च सेटि ॥ १२१ ॥ तॄफलभजत्रपश्च ॥ १२२ ॥ राधो हिंसायाम् ॥ १२३ ॥ वा जॄभ्रमुत्रसाम् ॥ १२४ ॥ फणां च सप्तानाम् ॥ १२५ ॥ न शसददवादिगुणानाम् ॥ ॥ १२६ ॥ अर्वणस्त्रसावनञः ॥१२७॥ मघवा बहुलम्॥ ॥ १२८ ॥ भस्य ॥ १२९ ॥ पादः पत् ॥ १३० ॥ वसोः संप्रसारणम् ॥ १३१ ॥ वाह ऊठ् ॥ १३२ ॥ श्वयुवमघोनामतद्धिते ॥ १३३ ॥ अल्लोपोऽनः ॥ १३४॥ षपूर्वहन्धृतराज्ञामणि ॥१३५॥ विभाषा ङिश्योः ॥१३६॥ न संयोगाद्वमन्तात् ॥१३७॥ अचः ॥१३८॥ उद ईत्॥ ॥१३९॥ आतो धातोः ॥ १४० ॥ ७ ॥ मन्त्रेष्वाङ्यादेरात्मनः ॥ १४१ ॥ ति विंशतेर्डिति ॥ १४२ ॥ टेः॥ ॥ १४३ ॥ नस्तद्धिते ॥१४४॥ अह्नष्टखोरेव ॥ १४५॥ ओर्गुणः ॥ १४६ ॥ ढे लोपोऽकद्र्वाः ॥१४७॥यस्येति च ॥ १४८ ॥ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः॥ ॥ १४९ ॥ हलस्तद्धितस्य ॥ १५० ॥ आपत्यस्य च तद्धितेऽनाति ॥ १५१ ॥ क्यच्व्योश्च ॥ १५२ ॥ बिल्वकादिभ्यश्छस्य लुक् ॥ ॥ १५३ ॥ तुरिष्ठेमेयःसु ॥ १५४॥

१ एरिति योगविभागोऽश्वादिगणल० शा० घोखरे ।

टः ॥ १९९ ॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपर
पूर्वस्य च गुणः ॥ १९६ ॥ प्रियस्थिरस्फिरोरुबहुलगुरु-
वृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः॥
॥ १९७ ॥ बहोर्लोपो भू च बहोः ॥ १९८ ॥ इष्ठस्य
यिट् च ॥ १९९ ॥ ज्यादादीयसः ॥ १६० ॥ ८ ॥
र ऋतो हलादेर्लघोः ॥१६१॥विभाषर्जोश्छन्दसि॥१६२॥
प्रकृत्यैकाच् ॥ १६३ ॥ इनण्यनपत्ये ॥ १६४ ॥ गाथि-
विदथिकेशिगणिपणिनश्च ॥१६९॥ संयोगादिश्च ॥१६६॥
अन् ॥ १६७ ॥ ये चाभावकर्मणोः ॥ १६८ ॥ आत्मा-
ध्वानौ खे ॥ १६९ ॥ न मपूर्वोऽपत्येऽवर्मणः ॥ १७०॥
ब्राह्मोऽजातौ ॥ १७१ ॥ कार्मस्ताच्छील्ये ॥ १७२ ॥
औक्षमनपत्ये ॥ १७३ ॥ दाण्डिनायनहास्तिनायनाथ-
र्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमै-
त्रेयहिरण्मयानि ॥ १७४ ॥ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिर-
ण्ययानि च्छन्दसि ॥ १७९ ॥ १९ ॥ (अङ्गस्य राल्लोपो
विड्वनोर्वाक्रोशेणो यण्हुल्लल्म्यस्थलि च मन्त्रेषु र ऋतः
पञ्चदश) ॥

इति षष्ठाध्यायस्य तुरीयः पादः ॥ ४ ॥

॥ इति षष्ठाध्यायस्समाप्तः ॥

अथ सप्तमोऽध्यायः ।

युवोरनाकौ ॥ १ ॥ आयनेयीनीयियःफढखछघां प्र-
त्ययादीनाम् ॥ २ ॥ झोऽन्तः ॥ ३ ॥ अदभ्यस्तात् ॥
॥ ४ ॥ आत्मनेपदेष्वनतः ॥ ९ ॥ शीङो रुट् ॥ ६॥
वेत्तेर्विभाषा ॥ ७ ॥ बहुलं छन्दसि ॥ ८ ॥ अतो भिस
ऐस् ॥ ९ ॥ बहुलं छन्दसि ॥ १० ॥ नेदमदसोरकोः ॥
॥ ११ ॥ टाङसिङसामिनात्स्याः ॥ १२ ॥ ङेर्यः ॥
॥ १३ ॥ सर्वनाम्नः स्मै ॥ १४ ॥ ङसिङ्योः स्मा-
त्स्मिनौ ॥ १९ ॥ पूर्वादिभ्यो नवभ्यो वा ॥ १६ ॥
जसः शी ॥ १७ ॥ औङ आपः ॥ १८ ॥ नपुंसकाच्च
॥ १९ ॥ जश्शसोः शिः ॥ २० ॥ १ ॥ अष्टाभ्य
औश् ॥ २१ ॥ षड्भ्यो लुक् ॥ २२ ॥ स्वमोर्नपुंसकात्॥
॥ २३ ॥ अतोऽम् ॥ २४ ॥ अद्ड्डतरादिभ्यः पञ्चभ्यः
॥ २९ ॥ नेतराच्छन्दसि ॥ २६ ॥ युष्मदस्मद्भ्यां ङसो-
ऽश् ॥ २७ ॥ ङेप्रथमयोरम् ॥ २८ ॥ शसो न ॥२९ ॥
भ्यसोऽभ्यम् ॥३०॥ पञ्चम्या अत् ॥ ३१ ॥ एकवचनस्य
च ॥ ३२ ॥ साम आकम् ॥ ३३ ॥ आत औ णलः ॥
॥ ३४ ॥ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ॥ ३९ ॥ विदेः
शतुर्वसुः ॥ ३६ ॥ समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥३७॥
क्त्वापि च्छन्दसि ॥ ३८ ॥ सुपां सुलुक्पूर्वसवर्णाच्छेयाडा-
ड्यायाजालः ॥ ३९॥ अमो मश् ॥ ४० ॥ २॥ लोपस्त
आत्मनेपदेषु ॥ ४१ ॥ ध्वमो ध्वात् ॥ ४२ ॥ यजध्वै-
नमिति च ॥ ४३ ॥ तस्य तात् ॥४४॥ तप्तनप्तनथनाश्च
॥ ४९ ॥ इदन्तो मसि ॥ ४६ ॥ क्त्वो यक् ॥ ४७ ॥
इष्ट्वीनमिति च ॥ ४८ ॥ स्नात्व्यादयश्च ॥ ४९ ॥
आज्जसेरसुक् ॥ ९० ॥ अश्वक्षीरवृषलवणानामात्मप्रीतौ
क्यचि ॥ ९१ ॥ आमि सर्वनाम्नः सुट् ॥ ९२ ॥ त्रेस्त्रयः
॥९३॥ ह्रस्वनद्यापो नुट् ॥ ९४ ॥ षट्चतुर्भ्यश्च ॥९९॥
श्रीग्रामण्योश्छन्दसि ॥ ९६ ॥ गोः पादान्ते ॥ ९७ ॥
इदितो नुम्धातोः ॥ ९८ ॥ शे मुचादीनाम् ॥ ९९ ॥
मस्जिनशोर्झलि ॥ ६० ॥ ३ ॥ रधिजभोरचि ॥ ६१ ॥
नेट्यलिटि रधेः ॥ ६२ ॥ रभेरशब्लिटोः ॥ ६३ ॥
लभेश्च ॥ ६४ ॥ आङो यि ॥ ६९ ॥ उपात्प्रशंसायाम्॥
॥ ६६ ॥ उपसर्गात्खल्घञोः ॥ ६७ ॥ न सुदुर्भ्यां केव-
लाभ्याम् ॥ ६८ ॥ विभाषा चिण्णमुलोः ॥ ६९॥ उगि-
दचां सर्वनामस्थानेऽधातोः ॥ ७० ॥ युजेरसमासे ॥७१॥
नपुंसकस्य झलचः ॥ ७२ ॥ इकोऽचि विभक्तौ ॥७३॥
तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७४ ॥ अस्थिद-
धिसक्थ्यक्ष्णामनङुदात्तः ॥७९॥ छन्दस्यपि दृश्यते ॥७६॥
ई च द्विवचने ॥ ७७ ॥ नाभ्यस्ताच्छतुः ॥ ७८ ॥
वा नपुंसकस्य ॥ ७९ ॥ आच्छीनद्योर्नुम् ॥ ८० ॥ ४ ॥
शप्श्यनोर्नित्यम् ॥ ८१ ॥ सावनडुहः ॥ ८२ ॥ दृक्स्वव-
स्स्वतवसां छन्दसि ॥८३॥ दिव औत् ॥ ८४॥ पथिम-
थ्यृभुक्षामात् ॥ ८९ ॥ इतोऽत्सर्वनामस्थाने ॥ ८६ ॥
थो न्थः ॥ ८७ ॥ भस्य टेर्लोपः ॥ ८८ ॥ पुंसो-
ऽसुङ् ॥ ८९ ॥ गोतो णित् ॥ ९० ॥ णलुत्तमो वा ॥
॥ ९१ ॥ सख्युरसंबुद्धौ ॥ ९२ ॥ अनङ् सौ ॥ ९३ ॥
ऋदुशनस्पुरुदंसोऽनेहसां च ॥ ९४ ॥ तृज्वत् क्रोष्टुः
॥ ९९ ॥ स्त्रियां च ॥ ९६ ॥ विभाषा तृतीयादिष्वचि
॥ ९७ ॥ चतुरनडुहोरामुदात्तः ॥ ९८ ॥ अम्संबुद्धौ ॥
॥ ९९ ॥ ऋत इद्धातोः ॥ १०० ॥९ ॥ उपधायाश्च ॥
॥१०१॥ उदोष्ठ्यपूर्वस्य ॥ १०२ ॥ बहुलं छन्दसि ॥
॥ १०३ ॥ ३ ॥ (युवोरष्टाभ्यो लोपो रधिशप्श्यनो-
रुपधायास्त्रीणि) ॥

इति सप्तमाध्यायस्य प्रथमः पादः ॥ १ ॥

सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥ अतो ल्रान्तस्य
॥ २ ॥ वदव्रजहलन्तस्याचः ॥ ३ ॥ नेटि ॥ ४ ॥
ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ९ ॥ ऊर्णोतेर्विभाषा
॥ ६ ॥ अतो हलादेर्लघोः ॥ ७ ॥ नेड्वशि कृति॥८॥
तितुत्रतथसिसुसरकसेषु च ॥९॥एकाच उपदेशेनुदात्तात्॥
॥ १० ॥ श्र्युकः किति ॥ ११ ॥ सनि ग्रहगुहोश्च ॥
॥ १२ ॥ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ १३ ॥ श्वीदितो
निष्ठायाम् ॥ १४ ॥ यस्य विभाषा ॥ १९ ॥ आदितश्च

॥ १६ ॥ विभाषा भावादिकर्मणोः ॥ १७ ॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ १८ ॥ धृषिशसी वैयात्ये ॥ १९ ॥ दृढः स्थूलबलयोः ॥ २० ॥ १ ॥ प्रभौ परिवृढः ॥ २१ ॥ कृच्छ्रगहनयोः कषः ॥ २२ ॥ घुषिरवि शब्दने ॥ २३ ॥ अर्देः संनिविभ्यः ॥ २४ ॥ अभेश्चाविदूर्ये ॥ २५ ॥ णेरध्ययने वृत्तम् ॥२६ ॥ वा दान्तशांतपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ २७ ॥ रुष्यमत्वरसंघुषास्वनाम् ॥ २८ ॥ हृषेर्लोमसु ॥ २९ ॥ अपचितश्च ॥ ३० ॥ हु ह्वरेश्छन्दसि ॥ ३१ ॥ अपरिह्वृताश्च ॥ ३२ ॥ सोमे ह्वरितः ॥३३॥ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च॥ ॥ ३४ ॥ आर्धधातुकस्येड्वलादेः ॥३५ ॥ स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ३६ ॥ ग्रहोऽलिटि दीर्घः ॥ ३७ ॥ वृतो वा ॥ ३८ ॥ न लिङि ॥ ३९ ॥ सिचि च परस्मैपदेषु ॥ ४० ॥ २ ॥ इट् सनि वा ॥ ४१ ॥ लिङ्सिचोरात्मनेपदेषु ॥ ४२ ॥ ऋतश्च संयोगादेः ॥ ४३ ॥ स्वरतिसूतिसूयतिधूञूदितो वा ॥ ४४ ॥ रधादिभ्यश्च ॥४५॥ निरः कुषः ॥ ४६ ॥ इण्निष्ठायाम् ॥ ४७ ॥ तीषसहलुभरुषरिषः ॥ ४८ ॥ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥ ४९ ॥ क्लिशः क्त्वानिष्ठयोः ॥ ५० ॥ पूङश्च ॥ ५१ ॥ वसतिक्षुधोरिट् ॥ ५२ ॥ अञ्चेः पूजायाम् ॥ ५३ ॥ लुभो विमोहने ॥ ५४ ॥ जॄव्रश्च्योः क्त्वि ॥ ५५ ॥ उदितो वा ॥ ५६ ॥ सेऽसिचि कृतचृतच्छृदतृदनृतः ॥ ५७ ॥ गमेरिट्परस्मैपदेषु॥५८॥ न वृद्भ्यश्चतुर्भ्यः ॥ ॥५९॥ तासि च क्लृपः॥६०॥३॥ अचस्तास्वत्थल्यनिटो नित्यम् ॥६१॥ उपदेशेऽत्वतः ॥ ॥६२॥ ऋतो भारद्वाजस्य ॥६३॥ बभूथाततन्थ जगृम्भ ववर्थेति निगमे ॥ ६४ ॥ विभाषा सृजिदृशोः ॥६५॥ इडत्त्यर्तिव्ययतीनाम् ॥६६॥ वस्वेकाजाद्घसाम् ॥६७॥ विभाषा गमहनविदविशाम् ॥ ६८ ॥ सनिंससनिवांसम्॥ ॥ ६९ ॥ ऋद्धनोः स्ये ॥ ७० ॥ अञ्जेः सिचि ॥ ॥ ७१ ॥ स्तुसुधूञ्भ्यः परस्मैपदेषु ॥ ७२ ॥यमरमनमातां सक् च ॥ ७३ ॥ स्मिपूङ्रञ्ज्वशां सनि॥७४॥ किरश्च पञ्चभ्यः ॥ ७५ ॥ रुदादिभ्यः सार्वधातुके ॥ ७६ ॥ ईशः से ॥७७॥ ईडजनोर्ध्वे च ॥ ७८ ॥ लिङः सलोपोऽनन्त्यस्य ॥ ७९ ॥ अतो येयः ॥ ८० ॥ ४ ॥ आतो ङितः ॥ ८१ ॥ आने मुक् ॥ ८२ ॥ ईदासः ॥ ॥ ८३ ॥ अष्टन आ विभक्तौ ॥८४॥ रायो हलि॥८५॥ युष्मदस्मदोरनादेशे ॥ ८६ ॥ द्वितीयायां च ॥८७॥ प्रथमायाश्च द्विवचने भाषायाम् ॥८८॥ योऽचि ॥८९॥ शेषे लोपः ॥ ९० ॥मपर्यन्तस्य ॥९१॥ युवावौ द्विवचने ॥ ९२ ॥ यूयवयौ जसि ॥ ९३ ॥ त्वाहौ सौ ॥ ॥ ९४ ॥ तुभ्यमह्यौ ङयि ॥ ९५ ॥ तवममौ ङसि ॥ ॥ ९६ ॥ त्वमावेकवचने ॥ ९७ ॥ प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥ त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ९९॥ अचि र ऋतः ॥ १००॥ ५ ॥ जराया जरसन्यतरस्याम्॥१०१॥ त्यदादीनामः ॥ १०२ ॥ किमः कः ॥ १०३ ॥ कु तिहोः ॥ १०४ ॥ क्वाति ॥ १०५ ॥ तदोः सः सावनन्त्ययोः ॥१०६॥ अदस औ सुलोपश्च॥ १०७ ॥ इदमो मः ॥१०८॥ दश्च ॥ १०९ ॥ यः सौ ॥११०॥ इदोऽय् पुंसि ॥ १११ ॥ अनाप्यकः ॥ ११२ ॥ हलि लोपः ॥ ११३ ॥ मृजेर्वृद्धिः ॥ ११४ ॥ अचो ञ्णिति ॥ ११५ ॥ अत उपधायाः ॥ ११६ ॥ तद्धितेष्वचामादेः ॥ ११७ ॥ किति च ॥ ११८ ॥ ॥ १८ ॥ (सिचि प्रभाविट् सन्यचस्तास्वदातो जराया अष्टादश) ॥

इति सप्तमाध्यायस्य द्वितीयः पादः ॥ २ ॥

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ १ ॥ केकयमित्रयुप्रलयानां यादेरियः ॥ २ ॥न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ३ ॥ द्वारादीनां च ॥४॥ न्यग्रोधस्य च केवलस्य ॥ ५ ॥ न कर्मव्यतिहारे ॥ ६॥ स्वागतादीनां च ॥ ७ ॥ श्वादेरिञि ॥ ८ ॥ पदान्तस्यान्यतरस्याम् ॥ ९ ॥ उत्तरपदस्य ॥१०॥ अवयवादृतोः ॥ ११ ॥ सुसर्वार्धाज्जनपदस्य ॥ १२ ॥ दिशोऽमद्राणाम् ॥ १३ ॥ प्राचां ग्रामनगराणाम् ॥ १४ ॥ संख्यायाः संवत्सरसंख्यस्य च ॥ १५ ॥ वर्षस्याभविष्यति ॥ १६ ॥ परिमाणान्तस्यासंज्ञाशाणयोः ॥ १७॥ जे प्रोष्ठपदानाम् ॥ १८ ॥ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च॥ ॥ १९ ॥ अनुशतिकादीनां च ॥ २० ॥१॥ देवताद्वन्द्वे च ॥ २१ ॥ नेन्द्रस्य परस्य ॥२२॥ दीर्घाच्च वरुणस्य ॥ २३ ॥ प्राचां नगरान्ते ॥ २४ ॥ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥२५॥ अर्धात् परिमाणस्य पूर्वस्य तु वा ॥ २६ ॥ नातः परस्य ॥ २७ ॥ प्रवाहणस्य ढे ॥ २८ ॥ तत्प्रत्ययस्य च ॥ २९ ॥ नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥ ३० ॥ यथातथयथापुरयोः पर्यायेण ॥ ३१॥ हनस्तोऽचिण्णलोः ॥३२॥ आतो युक्चिण्कृतोः ॥ ३३ ॥ नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ३४ ॥ जनिवध्योश्च ॥ ३५ ॥ अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ ॥ ३६ ॥ शाच्छासाह्वाव्यावेपां युक् ॥ ३७ ॥ वो विधूनने जुक् ॥ ३८ ॥ लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ॥

॥ ३९ ॥ भियो हेतुभये षुक् ॥ ४० ॥ २ ॥ स्फायो वः ॥ ४१ ॥ शदेरगतौ तः ॥ ४२ ॥ रुहः पोऽन्यतरस्याम् ॥ ४३ ॥ प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ॥ ४४ ॥ न यासयोः ॥ ४५ ॥ उदीचामातः स्थाने यकपूर्वायाः ॥ ४६ ॥ भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि॥ ॥ ४७ ॥ अभाषितपुंस्काच्च ॥ ४८॥ आदाचार्याणाम्॥ ॥ ४९ ॥ ठस्येकः ॥ ५० ॥ इसुसुक्तान्तात् कः ॥ ॥ ५१ ॥ चजोः कु घिण्यतोः ॥ ५२ ॥ न्यङ्क्वादीनां च ॥५३ ॥ हो हन्तेर्ञ्णिन्नेषु ॥५४॥ अभ्यासाच्च ॥५५॥ हेरचङि ॥ ५६ ॥ सन्लिटोर्जेः ॥ ५७ ॥ विभाषा चेः ॥ ५८ ॥ न क्वादेः ॥ ५९ ॥ अजिव्रज्योश्च ॥ ६०॥३॥ भुजन्युब्जौ पाण्युपतापयोः ॥६१ ॥ प्रयाजानुयाजौ यज्ञाङ्गे ॥ ६२ ॥ वञ्चेर्गतौ ॥ ६३ ॥ ओक उचः के ॥ ६४ ॥ ण्य आवश्यके ॥ ६५ ॥ यजयाचरुचप्रवचर्चश्च ॥६६॥ वचोऽशब्दसंज्ञायाम् ॥ ६७ ॥ प्रयोज्यनियोज्यौ शक्यार्थे ॥ ६८ ॥ भोज्यं भक्ष्ये ॥ ६९ ॥ घोर्लोपो लेटि वा ॥ ॥ ७० ॥ ओतः श्यनि ॥ ७१ ॥ क्सस्याचि ॥ ७२ ॥ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥ ७३ ॥ शमामष्टानां दीर्घः श्यनि ॥ ७४ ॥ ष्ठिवुक्लमुचमां शिति ॥ ॥ ७५ ॥ क्रमः परस्मैपदेषु ॥ ७६ ॥ इषुगमियमां छः॥ ॥७७॥ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७८ ॥ ज्ञाजनोर्जा ॥ ७९ ॥ प्वादीनां ह्रस्वः ॥ ८० ॥ ४ ॥ मीनातेर्निगमे ॥ ८१ ॥ मिदेर्गुणः ॥ ८२ ॥ जुसि च ॥ ८३ ॥ सार्वधातुकार्धधातुकयोः ॥ ८४ ॥ जाग्रोऽविचिण्णल्ङित्सु ॥ ८५ ॥ पुगन्तलघूपधस्य च ॥ ॥ ८६ ॥ नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ८७ ॥ भूसुवोस्तिङि ॥ ८८ ॥ उतो वृद्धिर्लुकि हलि ॥ ८९ ॥ ऊर्णोतेर्विभाषा ॥ ९०॥ गुणोऽपृक्ते ॥ ९१ ॥ तृणह इम्॥ ॥ ९२ ॥ ब्रुव ईट् ॥ ९३ ॥ यङो वा ॥ ९४ ॥ तुरुस्तुशम्यमः सार्वधातुके ॥ ९५ ॥ अस्तिसिचोऽपृक्ते ॥ ॥ ९६ ॥ बहुलं छन्दसि ॥ ९७ ॥ रुदश्च पञ्चभ्यः ॥ ॥ ९८ ॥ अड्गार्ग्यगालवयोः ॥ ९९ ॥ अदः सर्वेषाम्॥ ॥ १०० ॥ ५ ॥ अतो दीर्घो यञि ॥ १०१ ॥ सुपि च ॥ १०२ ॥ बहुवचने झल्येत् ॥ १०३ ॥ ओसि च ॥ ॥ १०४ ॥ आङि चापः ॥ १०५॥ संबुद्धौ च॥१०६॥ अम्बार्थनद्योर्ह्रस्वः ॥ १०७ ॥ ह्रस्वस्य गुणः ॥१०८॥ जसि च ॥ १०९॥ ऋतो ङि सर्वनामस्थानयोः॥११०॥ घेर्ङिति ॥१११॥ आण्नद्याः ॥ ११२ ॥ याडापः ॥ ॥ ११३ ॥ सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ ११४ ॥ विभाषा द्वितीयातृतीयाभ्याम् ॥११५॥ ङेराम्नद्याम्नीभ्यः ॥११६॥ इदुद्भ्याम् ॥ ११७ ॥ औत् ॥ ११८ ॥ अच्च घेः ॥ ॥ ११९ ॥ आङो नाऽस्त्रियाम् ॥ १२० ॥ ६ ॥ (देविकादेवतास्फायो भुजमीनातेरतो दीर्घो विंशतिः) ॥

इति सप्तमाध्यायस्य तृतीयः पादः ॥ ३ ॥

णौ चङ्युपधाया ह्रस्वः ॥ १ ॥ नाग्लोपिशास्वृदिताम् ॥२ ॥ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥ ३ ॥ लोपः पिबतेरीच्चाभ्यासस्य ॥ ४ ॥ तिष्ठतेरित् ॥ ॥ ५ ॥ जिघ्रतेर्वा ॥ ६ ॥ उर्ऋत् ॥ ७ ॥ नित्यं छन्दसि ॥ ८ ॥ दयतेर्दिगि लिटि ॥ ९ ॥ ऋतश्च संयोगादेर्गुणः ॥ १० ॥ ऋच्छत्यॄताम् ॥ ११ ॥ शॄदॄप्रां ह्रस्वो वा ॥ १२ ॥ केऽणः ॥ १३ ॥ न कपि ॥ १४ ॥ आपोऽन्यतरस्याम ॥ १५ ॥ ऋदृशोऽङि गुणः ॥ १६ ॥ अस्यतेस्थुक् ॥ १७ ॥ श्वयतेरः ॥ १८ ॥ पतः पुम् ॥ ॥ १९ ॥ वच उम् ॥ २० ॥ १ ॥ शीङः सार्वधातुके गुणः ॥ २१ ॥ अयङ् यि क्ङिति ॥ २२ ॥ उपसर्गाद्ध्रस्व ऊहतेः ॥ २३ ॥ एतेर्लिङि ॥ २४ ॥ अकृत्सार्वधातुकयोर्दीर्घः ॥ २५ ॥ च्वौ च ॥ २६ ॥ रीङृतः ॥ ॥ २७ ॥ रिङ्शयग्लिङ्क्षु ॥ २८ ॥ गुणोऽर्तिसंयोगाद्योः ॥ २९ ॥ यङि च ॥३० ॥ ई घ्राध्मोः ॥ ३१ ॥ अस्य च्वौ ॥ ३२ ॥ क्यचि च ॥ ३३ ॥ अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ॥ ३४ ॥ न च्छन्दस्यपुत्रस्य ॥ ३५ ॥ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति ॥ ॥ ३६ ॥ अश्वाघस्यात् ॥ ३७ ॥ देवसुम्नयोर्यजुषि काठके ॥३८॥ कव्यध्वरपृतनस्यर्चि लोपः ॥ ३९ ॥ द्यतिस्यतिमास्थामित्ति किति ॥ ४० ॥ २ ॥ शाच्छोरन्यतरस्याम् ॥ ४१ ॥ दधातेर्हिः ॥ ४२ ॥ जहातेश्च क्त्वि ॥ ४३ ॥ विभाषा छन्दसि ॥ ४४ ॥ सुधितवसुधितनेमधितधिष्वधिषीय च ॥ ४५ ॥ दो दद्घोः ॥ ॥ ४६ ॥ अच उपसर्गात्तः ॥ ४७ ॥ अपो भि ॥ ॥ ४८ ॥ सः स्यार्धधातुके ॥ ॥ ४९ ॥ तासस्त्योर्लोपः ॥ ५० ॥ रि च ॥ ५१ ॥ ह एति॥५२॥ यीवर्णयोर्दीधीवेव्योः ॥ ५३ ॥ सनि मीमाघुरभलभशकपतपदामच इस् ॥५४॥ आप्ज्ञप्यृधामीत् ॥५५ ॥ दम्भ इच्च ॥ ५६ ॥ मुचोऽकर्मकस्य गुणो वा ॥ ५७॥ अत्र लोपोऽभ्यासस्य ॥ ५८ ॥ ह्रस्वः ॥ ५९ ॥ हलादिः शेषः ॥ ६० ॥ ३ ॥ शर्पूर्वाः खयः ॥ ६१ ॥ कुहोश्चुः ॥६२॥ न कवतेर्यङि ॥६३ ॥ कृषेश्छन्दसि॥ ॥ ६४ ॥ दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रदविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च । ॥ ६५ ॥ उरत् ॥ ६६ ॥ द्युतिस्वाप्योः संप्रसारणम् ॥ ॥ ६७ ॥ व्यथो लिटि ॥ ६८ ॥ दीर्घ इणः किति ॥

॥६९॥ अत आदेः ॥ ७० ॥ तस्मान्नुड् द्विहलः ॥ ॥ ७१ ॥ अश्नोतेश्च ॥ ७२ ॥ भवतेरः ॥ ७३ ॥ ससूवेति निगमे ॥ ७४ ॥ निजां त्रयाणां गुणः श्लौ ॥ ॥ ७५ ॥ भृञामित् ॥ ७६ ॥ अर्तिपिपर्त्योश्च ॥७७॥ बहुलं छन्दसि ॥ ७८ ॥ सन्यतः ॥ ७९ ॥ ओः पुयण्ज्यपरे ॥८०॥४ ॥ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥ ८१ ॥ गुणो यङ्लुकोः ॥ ८२ ॥ दीर्घोऽकितः ॥ ८३ ॥ नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ॥ ८४ ॥ नुगतोऽनुनासिकान्तस्य॥८५॥ जपजभदहदशभञ्जपशां च ॥ ८६ ॥ चरफलोश्च ॥ ॥ ८७ ॥ उत्परस्यातः ॥ ८८ ॥ ति च ॥ ८९॥ रीगृदुपधस्य च ॥ ९० ॥ रुग्रिकौ च लुकि ॥ ९१ ॥ ऋतश्च ॥ ९२ ॥ सन्वल्लघुनि चङ्परेऽनग्लोपे ॥९३॥ दीर्घो लघोः ॥ ९४ ॥ अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्॥ ॥ ९५ ॥ विभाषा वेष्टिचेष्टयोः ॥ ९६ ॥ ई च गणः ॥ ९७ ॥ १७ ॥ (णौ च शीङः श्रुच्छोः शर्पूर्वाः स्रवतिसप्तदश) ॥

इति सप्तमाध्यायस्य तुरीयः पादः ॥ ४ ॥

इति सप्तमोऽध्यायः समाप्तः ।

अथाष्टमोऽध्यायः ।

सर्वस्य द्वे ॥ १ ॥ तस्य परमाम्रेडितम् ॥ २ ॥ अनुदात्तं च ॥ ३ ॥ नित्यवीप्सयोः ॥ ४ ॥ परेर्वर्जने ॥ ५ ॥ प्रसमुपोदः पादपूरणे ॥ ६ ॥ उपर्यध्यधसः सामीप्ये ॥ ७ ॥ वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ८ ॥ एकं बहुव्रीहिवत् ॥ ९ ॥ आबाधे च ॥ १० ॥ कर्मधारयवदुत्तरेषु ॥ ११ ॥ प्रकारे गुणवचनस्य ॥ १२ ॥ अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥ १३ ॥ यथास्वे यथायथम् ॥ १४ ॥ द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ १५ ॥ पदस्य ॥ १६ ॥ पदात् ॥ १७ ॥ अनुदात्तं सर्वमपादादौ ॥ १८ ॥ आमन्त्रितस्य च ॥ १९ ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ॥ २० ॥ १ ॥ बहुवचनस्य वस्नसौ ॥ २१ ॥ तेमयावेकवचनस्य ॥ ॥ २२ ॥ त्वामौ द्वितीयायाः ॥ २३ ॥ न चवाहाहैवयुक्ते ॥ २४ ॥ पश्यार्थैश्चानालोचने ॥ २५ ॥ सपूर्वायाः प्रथमाया विभाषा ॥ २६ ॥ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ २७ ॥ तिङ्ङतिङः ॥ २८ ॥ न लुट् ॥ २९ ॥ निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥ ३० ॥ नह प्रत्यारम्भे ॥ ३१ ॥ सत्यं प्रश्ने ॥ ३२ ॥ अङ्गाप्रातिलोम्ये ॥ ३३ ॥ हि च ॥३४॥ छन्दस्यनेकमपि साकाङ्क्षम् ॥ ३५ ॥ यावद्यथाभ्याम् ॥ ३६ ॥ पूजायां नानन्तरम् ॥ ३७॥ उपसर्गव्यपेतं च ॥३८॥ तुपश्यपश्यताहैः पूजायाम् ॥३९॥अहो च॥ ॥ ४० ॥ २ ॥ शेषे विभाषा ॥ ४१ ॥ पुरा च परीप्सायाम् ॥ ४२ ॥ नन्वित्यनुज्ञैषणायाम् ॥ ४३ ॥ किंक्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ॥४४॥ लोपे विभाषा ॥ ॥४५॥ एहिमन्ये प्रहासे लृट् ॥ ४६ ॥ जात्वपूर्वम् ॥ ॥ ४७ ॥ किंवृत्तं च चिदुत्तरम् ॥ ४८ ॥ आहो उताहो चानन्तरम् ॥ ४९ ॥ शेषे विभाषा ॥ ५० ॥ गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ५१ ॥ लोट् च ॥ ५२ ॥ विभाषितं सोपसर्गमनुत्तमम् ॥ ५३ ॥ हन्त च ॥ ५४ ॥ आम एकान्तरमामन्त्रितमनन्तिके ॥ ॥ ५५ ॥ यद्धितुपरं छन्दसि ॥५६॥ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ५७ ॥ चादिषु च ॥ ५८ ॥ चवायोगे प्रथमा ॥ ५९ ॥हेति क्षियायाम् ॥ ६० ॥ ॥ ३ ॥ अहेति विनियोगे च ॥ ६१ ॥ चाहलोप एवेत्यवधारणम् ॥ ६२ ॥ चादिलोपे विभाषा ॥ ६३ ॥ वैवावेति च च्छन्दसि ॥६४॥ एकान्याभ्यां समर्थाभ्याम्॥ ॥ ६५ ॥ यद्वृत्तान्नित्यम् ॥ ६६ ॥ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥ ६७॥ सगतिरपि तिङ् ॥६८॥ कुत्सने च सुप्यगोत्रादौ ॥ ६९ ॥ गतिर्गतौ॥७०॥ तिङि चोदात्तवति ॥ ७१॥ आमन्त्रितं पूर्वमविद्यमानवत्॥ ॥ ७२ ॥ नामन्त्रिते समानाधिकरणे सामान्यवचनम् ॥ ॥ ७३ ॥ विभाषितं विशेषवचने बहुवचनम् ॥ ७४ ॥ १४ ॥ (सर्वस्य बहुवचनस्य शेषेऽहेति चतुर्दश) ॥

इत्यष्टमाध्यायस्य प्रथमः पादः ॥ १ ॥

पूर्वत्रासिद्धम् ॥ १ ॥ नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥ २ ॥ न मु ने ॥ ३ ॥ उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ॥ ४ ॥ एकादेश उदात्तेनोदात्तः ॥ ॥ ५ ॥ स्वरितो वानुदात्ते पदादौ ॥ ६ ॥ नलोपः प्रातिपदिकान्तस्य ॥ ७ ॥ न ङिसंबुद्ध्योः ॥ ८ ॥ मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥ ९ ॥ झयः ॥१०॥ संज्ञायाम् ॥ ११ ॥ आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ १२ ॥ उदन्वानुदधौ च ॥ १३ ॥ राजन्वान्सौराज्ये ॥ १४ ॥ छन्दसीरः ॥ १५ ॥ अनो नुट् ॥ १६ ॥ नाद्धस्य ॥ १७ ॥ कृपो रो लः ॥ ॥ १८ ॥ उपसर्गस्यायतौ ॥ १९॥ ग्रो यङि ॥२०॥ अचि विभाषा ॥ २१ ॥ परेश्च घाङ्कयोः ॥ २२ ॥संयोगान्तस्य लोपः ॥ २३ ॥ रात्सस्य ॥ २४ ॥ धि च॥ ॥ २५ ॥ झलो झलि ॥ २६ ॥ ह्रस्वादङ्गात् ॥ २७॥ इट ईटि ॥ २८ ॥ स्कोः संयोगाद्योरन्ते च ॥२९॥ चोः कुः ॥ ३० ॥ हो ढः ॥ ३१ ॥ दादेर्धा-

तोर्धः ॥ ३२ ॥ वा द्रुहमुहष्णुहष्णिहाम् ॥ ३३ ॥ नहो धः ॥ ३४ ॥ आहस्थः ॥ ३५ ॥ व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥ ३६ ॥ एकाचो बशो भष्झषन्तस्य स्ध्वोः ॥ ३७ ॥ दधस्तथोश्च ॥ ३८ ॥ झलां जशोऽन्ते ॥ ३९ ॥ झषस्तथोर्धोऽधः ॥ ४० ॥ २ ॥ षढोः कः सि ॥ ४१ ॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ४२ ॥ संयोगादेरातो धातोर्यण्वतः ॥ ४३ ॥ ल्वादिभ्यः ॥ ४४ ॥ ओदितश्च ॥ ४५ ॥ क्षियो दीर्घात् ॥ ४६ ॥ श्योऽस्पर्शे ॥ ४७ ॥ अञ्चोऽनपादाने ॥ ४८ ॥ दिवोऽविजिगीषायाम् ॥ ४९ ॥ निर्वाणोऽवाते ॥ ५० ॥ शुषः कः ॥ ५१ ॥ पचो वः ॥ ५२ ॥ क्षायो मः ॥ ५३ ॥ प्रस्त्योऽन्यतरस्याम ॥ ५४ ॥ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ॥ ५५ ॥ नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ॥ ५६ ॥ न ध्याख्यापॄमूर्च्छिमदाम् ॥ ५७ ॥ वित्तो भोगप्रत्यययोः ॥ ५८ ॥ भित्तं शकलम् ॥ ५९ ॥ ऋणमाधमर्ण्ये ॥ ६० ॥ ३ ॥ नसत्तनिषत्तानुत्तप्रतूर्तसूर्त्तगूर्तानि च्छन्दसि ॥ ६१ ॥ क्विन्प्रत्ययस्य कुः ॥ ६२ ॥ नशेर्वा ॥ ६३ ॥ मो नो धातोः ॥ ६४ ॥ म्वोश्च ॥ ६५ ॥ ससजुषो रुः ॥ ६६ ॥ अवयाः श्वेतवाः पुरोडाश्च ॥ ६७ ॥ अहन् ॥ ६८ ॥ रोऽसुपि ॥ ६९ ॥ अम्नरूधरवरित्युभयथा छन्दसि ॥ ॥ ७० ॥ भुवश्च महाव्याहृतेः ॥ ७१ ॥ वसुस्रंसुध्वंस्वनडुहां दः ॥ ७२ ॥ तिप्यनस्तेः ॥ ७३ ॥ सिपि धातो रुर्वा ॥ ७४ ॥ दश्च ॥ ७५ ॥ र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥ हलि च ॥ ७७ ॥ उपधायां च ॥ ७८ ॥ न भकुर्छुराम् ॥ ७९ ॥ अदसोऽसेर्दादु दो मः ॥ ८० ॥ एत ईद्बहुवचने ॥ ८१ ॥ वाक्यस्य टेः प्लुत उदात्तः ॥ ८२ ॥ प्रत्यभिवादेऽशूद्रे ॥ ८३ ॥ दूराद्धूते च ॥ ८४ ॥ हैहेप्रयोगे हैहयोः ॥ ८५ ॥ गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम् ॥ ८६ ॥ ओमभ्यादाने ॥ ८७ ॥ ये यज्ञकर्मणि ॥ ८८ ॥ प्रणवष्टेः ॥ ॥ ८९ ॥ याज्यान्तः ॥ ९० ॥ ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥ ९१ ॥ अग्नीत्प्रेषणेपरस्य च ॥ ९२ ॥ विभाषा पृष्टप्रतिवचने हेः ॥ ९३ ॥ निगृह्यानुयोगे च ॥ ९४ ॥ आम्रेडितं भर्त्सने ॥ ९५ ॥ अङ्गयुक्तं तिङाकाङ्क्षम् ॥ ९६ ॥ विचार्यमाणानाम् ॥ ॥ ९७ ॥ पूर्वं तु भाषायाम् ॥ ९८ ॥ प्रतिश्रवणे च ॥ ॥ ९९ ॥ अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥ १०० ॥ ५ ॥ चिदिति चोपमार्थे प्रयुज्यमाने ॥ १०१ ॥ उपरिस्विदासीदिति च ॥ १०२ ॥ स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु ॥ १०३ ॥ क्षियाशीःप्रैषेषु तिङाकांक्षम् ॥ ॥ १०४ ॥ अनन्त्यस्यापि प्रश्नाख्यानयोः ॥ १०५ ॥ प्लुतावैच इदुतौ ॥ १०६ ॥ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥ १०७ ॥ तयोर्य्वावचि संहितायाम् ॥ १०८ ॥ ८ ॥ (पूर्वत्राचि षढोर्नसत्तेत ईच्चिदित्यष्टौ) ॥

१ कुत्सनभर्त्सनेष्विति पाठः क्वचिद्दृश्यते । तत्र भर्त्सनेति प्रक्षिप्तम् ।

इत्यष्टमाध्यायस्य द्वितीयः पादः ॥ २ ॥

मतुवसो रु संबुद्धौ छन्दसि ॥ १ ॥ अत्रानुनासिकः पूर्वस्य तु वा ॥ २ ॥ आतोऽटि नित्यम् ॥ ३ ॥ अनुनासिकात्परोऽनुस्वारः ॥ ४ ॥ समः सुटि ॥ ५ ॥ पुमः खय्यम्परे ॥ ६ ॥ नश्छव्यप्रशान् ॥ ७ ॥ उभयथर्क्षु ॥ ८ ॥ दीर्घादटि समानपादे ॥ ९ ॥ नॄन्पे ॥ ॥ १० ॥ स्वतवान्पायौ ॥ ११ ॥ कानाम्रेडिते ॥ १२ ॥ ढो ढे लोपः ॥ १३ ॥ रो रि ॥ ॥ १४ ॥ खरवसानयोर्विसर्जनीयः ॥ १५ ॥ रोः सुपि ॥ १६ ॥ भोभगोअघोअपूर्वस्य योऽशि ॥ १७ ॥ व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ १८ ॥ लोपः शाकल्यस्य ॥ १९ ॥ ओतो गार्ग्यस्य ॥ २० ॥ १ ॥ उञि च पदे ॥ २१ ॥ हलि सर्वेषाम् ॥ २२ ॥ मोऽनुस्वारः ॥ २३ ॥ नश्चापदान्तस्य झलि ॥ २४ ॥ मो राजि समः क्वौ ॥ २५ ॥ हे मपरे वा ॥ ॥ २६ ॥ नपरे नः ॥ २७ ॥ ङ्णोः कुक्टुक्शरि ॥ २८ ॥ डः सि धुट् ॥ २९ ॥ नश्च ॥ ॥ ३० ॥ शि तुक् ॥ ३१ ॥ ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ३२ ॥ मय उञो वो वा ॥ ३३ ॥ विसर्जनीयस्य सः ॥ ३४ ॥ शर्परे विसर्जनीयः ॥ ३५ ॥ वा शरि ॥ ३६ ॥ कुप्वोः ᳲक ᳲपौ च ॥ ३७ ॥ सोऽपदादौ ॥ ३८ ॥ इणः षः ॥ ३९ ॥ नमस्पुरसोर्गत्योः ॥ ॥ ४० ॥ २ ॥ इदुदुपधस्य चाप्रत्ययस्य ॥ ४१ ॥ तिरसोऽन्यतरस्याम् ॥ ४२ ॥ द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥ ४३ ॥ इसुसोः सामर्थ्ये ॥ ४४ ॥ नित्यं समासेऽनुत्तरपदस्थस्य ॥ ४५ ॥ अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥ ४६ ॥ अधःशिरसी पदे ॥ ४७ ॥ कस्कादिषु च ॥ ४८ ॥ छन्दसि वाऽप्राम्रेडितयोः ॥ ४९ ॥ कः करत्करतिकृधिकृतेष्वनदितेः ॥ ५० ॥ पञ्चम्याः परावध्यर्थे ॥ ५१ ॥ पातौ च बहुलम् ॥ ५२ ॥ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ५३ ॥ इडाया वा ॥ ५४ ॥ अपदान्तस्य मूर्धन्यः ॥ ५५ ॥ सहेः साडः सः ॥ ५६ ॥ इण्कोः ॥ ५७ ॥ नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ५८ ॥ आदेशप्रत्यययोः ॥ ५९ ॥ शासिवसिघसीनां च ॥ ६० ॥ ३ ॥ स्तौतिण्योरेव षण्यभ्यासात् ॥ ६१ ॥ सः स्विदिस्वदिसहीनां च ॥ ६२ ॥ प्राक्सितादड्व्यवायेऽपि ॥ ६३ ॥ स्थादिष्वभ्यासेन चा-

भ्यासस्य ॥ ६४ ॥ उपसर्गात्सुनोतिसुवतिस्यतिस्तौति-स्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥ ६५ ॥ सदिरप्रतेः ॥ ६६ ॥ स्तन्भेः ॥ ६७॥ अवाच्चालम्बनाविदूर्ययोः ॥ ६८ ॥ वेश्च स्वनो भोजने ॥ ६९ ॥ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥ ७० ॥ सिवादीनां वाड्व्यवायेऽपि ॥ ७१ ॥ अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ ७२ ॥ वेः स्कन्देरनिष्ठायाम् ॥ ७३ ॥ परेश्च ॥ ७४ ॥ परिस्कन्दः प्राच्यभरतेषु ॥ ७५ ॥ स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥ ७६ ॥ वेः स्कभ्नातेर्नित्यम् ॥ ॥ ७७ ॥ इणः षीध्वंलुङ्लिटां धोऽङ्गात् ॥ ७८ ॥ विभाषेटः ॥ ७९ ॥ समासेऽङ्गुलेः सङ्गः ॥ ८० ॥ ४ ॥ भीरोः स्थानम् ॥ ८१ ॥ अग्नेः स्तुत्स्तोमसोमाः ॥ ८२॥ ज्योतिरायुषः स्तोमः ॥८३॥ मातृपितृभ्यां स्वसा ॥८४॥ मातुः पितुर्भ्यामन्यतरस्याम् ॥ ८५ ॥ अभिनिसः स्तनः शब्दसंज्ञायाम् ॥ ८६ ॥ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ॥ ८७ ॥ सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥८८ ॥ निनदीभ्यां स्नातेः कौशले ॥ ८९॥ सूत्रं प्रतिष्णातम् ॥ ९०॥ कपिष्ठलो गोत्रे ॥ ९१ ॥ प्रष्ठोऽग्रगामिनि ॥ ९२ ॥ वृक्षासनयोर्विष्टरः ॥ ९३ ॥ छन्दोनाम्नि च ॥ ९४ ॥ गवियुधिभ्यां स्थिरः ॥ ९५ ॥ विकुशमिपरिभ्यः स्थलम्॥ ॥ ९६ ॥ अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥ ९७ ॥ सुषामादिषु च॥९८॥एति संज्ञायामगात्॥९९॥नक्षत्राद्वा ॥ १००॥५॥ ह्रस्वात्तादौ तद्धिते ॥१०१॥ निसस्तपतावनासेवने॥१०२॥ युष्मत्तत्ततक्षुष्वन्तः पादम् ॥ १०३ ॥ यजुष्येकेषाम् ॥ ॥ १०४ ॥ स्तुतस्तोमयोश्छन्दसि ॥१०५॥ पूर्वपदात् ॥ ॥ १०६ ॥ सुञः ॥ १०७ ॥ सनोतेरनः ॥ १०८ ॥ सहेः पृतनर्ताभ्यां च ॥ १०९ ॥ न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥११०॥ सात्पदाद्योः ॥ १११ ॥ सिचो यङि ॥ ११२ ॥ सेधतेर्गतौ ॥ ११३ ॥ प्रतिस्तब्धनिस्तब्धौ च ॥११४॥ सोढः ॥११५॥ स्तम्भुसिवुसहां चङि ॥११६॥ सुनोतेः स्यसनोः ॥११७॥ सदेः परस्य लिटि ॥ ११८ ॥ निव्यभिभ्योऽड्व्यवाये वा छन्दसि ॥११९॥१९॥ (मतुवसोरुगि चेदुदुपधस्य स्तौतिण्योर्भीरोर्ह्रस्वात्तादावेकोनविंशतिः) ॥

इत्यष्टमाध्यायस्य तृतीयः पादः ॥ ३ ॥

रषाभ्यां नो णः समानपदे ॥ १ ॥ अट्कुप्वाङ्नुम्व्यवायेऽपि ॥ २ ॥ पूर्वपदात्संज्ञायामगः ॥ ३ ॥ वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ॥४॥ प्रनिरन्तः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ॥ ५ ॥ विभाषौषधिवनस्पतिभ्यः ॥ ६ ॥ अह्नोऽदन्तात् ॥ ७ ॥ वाहनमाहितात् ॥ ८ ॥ पानं देशे ॥ ९ ॥ वा भावकरणयोः ॥ ॥ १० ॥ प्रातिपदिकान्तनुम्विभक्तिषु च ॥ ११ ॥ एकाजुत्तरपदे णः ॥ १२ ॥ कुमति च ॥ १३ ॥ उपसर्गादसमासेऽपि णोपदेशस्य ॥ १४ ॥ हिनु मीना ॥ १५॥ आनि लोट् ॥ १६ ॥ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ॥ ॥ १७ ॥ शेषे विभाषाकखादावषान्त उपदेशे ॥ १८ ॥ अनितेः ॥ १९ ॥ अन्तः ॥ २० ॥ १ ॥ उभौ साभ्यासस्य ॥२१ ॥ हन्तेरत्पूर्वस्य ॥ २२ ॥ वमोर्वा ॥ २३ ॥ अन्तरदेशे ॥ २४ ॥ अयनं च ॥ २५ ॥ छन्दस्यृदवग्रहात् ॥ २६ ॥ नश्च धातुस्थोरुषुभ्यः ॥ २७ ॥उपसर्गाद्बहुलम् ॥२८॥ कृत्यचः ॥ २९ ॥ णेर्विभाषा ॥ ३० ॥ हलश्चेजुपधात् ॥३१॥ इजादेः सनुमः ॥३२ ॥ वा निंसनिक्षनिन्दाम् ॥ ३३ ॥ न भाभूपूकमिगमिप्यायीवेपाम् ॥ ॥ ३४ ॥ षात्पदान्तात् ॥ ३५ ॥ नशेः षान्तस्य ॥ ॥ ३६ ॥ पदान्तस्य ॥ ३७ ॥ पदव्यवायेऽपि ॥ ३८ ॥ क्षुभ्नादिषु च ॥ ३९ ॥ स्तोः श्चुना श्चुः ॥ ४० ॥ २ ॥ ष्टुना ष्टुः ॥ ४१॥ न पदान्ताट्टोरनाम् ॥ ४२॥ तोः षि ॥ ४३ ॥ शात् ॥ ४४ ॥ यरोऽनुनासिकेऽनुनासिको वा ॥ ४५ ॥ अचो रहाभ्यां द्वे ॥ ४६ ॥ अनचि च ॥ ॥ ४७ ॥ नादिन्याक्रोशे पुत्रस्य ॥ ४८ ॥ शरोऽचि ॥ ॥ ४९ ॥ त्रिप्रभृतिषु शाकटायनस्य ॥ ५० ॥ सर्वत्र शाकल्यस्य ॥ ५१ ॥ दीर्घादाचार्याणाम् ॥ ५२ ॥ झलां जश् झशि ॥ ५३ ॥ अभ्यासे चर्च ॥ ५४ ॥ खरि च ॥५५॥ वाऽवसाने ॥५६ ॥ अणोऽप्रगृह्यस्यानुनासिकः ॥५७॥ अनुस्वारस्य ययि परसवर्णः ॥५८॥ वा पदान्तस्य ॥ ५९ ॥ तोर्लि ॥ ६०॥ ३ ॥ उदःस्थास्तम्भोः पूर्वस्य ॥ ॥६१॥ झयो होऽन्यतरस्याम् ॥६२॥ शश्छोऽटि ॥६३॥ हलो यमां यमि लोपः ॥ ६४ ॥ झरो झरि सवर्णे॥६५॥ उदात्तादनुदात्तस्य स्वरितः ॥ ६६ ॥ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ॥ ॥ ६७ ॥ अ अ ॥ ६८ ॥ ॥ ८ ॥ इति (रषाभ्यामुभौ ष्टुना ष्टुरुदः स्थाष्टौ) ॥

इत्यष्टमाध्यायस्य तुरीयः पादः ॥ ४ ॥

इत्यष्टमोऽध्यायस्समाप्तः ॥ १ ॥

(संहत्यसूत्रसङ्ख्या ३९९७)

इति श्रीमत्पाणिनिमुनिप्रणीताऽष्टाध्यायी समाप्ता ।

१–२ सुषामादिगणे इदं द्वयं गणसूत्रत्वेन दृश्यते इति तदुभयमत्र अक्षिप्तम् ।

(१) दीर्घादाचार्याणामित्युत्तरम् "अनुस्वारस्य ययि,वा पदान्तस्य, तोर्लि,उदः स्था,झयो हो, शश्छोटि,इति षट्सूत्रीपाठोत्तरं झलां जश् झशि, अभ्यासे चर्च,खरि च,वावसाने, अणोऽप्रगृह्यस्य,इति पञ्चसूत्र्याः पाठो भाष्यसंमत" इत्यन्यत्र । (२) "उच्चैरुदात्तः" इति सूत्रमारभ्य नवसूत्र्याः "अ अ" इति सूत्रात्पूर्वं पाठ इति भाष्ये इति ल०श०शेखरे।परन्तु "उदात्तस्वरितपरस्येत्यतः परत्रेति स्पष्टं भाष्ये ।

(३) "चतुस्सहस्रीसूत्राणां पञ्चसूत्रीविवर्जिता ॥ अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैस्सह" ॥ १ ॥ इति स्वरसिद्धान्तचन्द्रिकायां श्रीकृष्णात्मजश्रीनिवासशर्मकृतायाम् । परन्तु प्रकृतपुस्तकेषु तथा न दृश्यते । योगविभागादिनान्यूनाधिक्यात् ।

अथ गणपाठः ।

प्रथमोऽध्यायः ।

सि० कौ० सू० २१३ सर्वादीनि सर्वनामानि । १ । १ । २७ ॥ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥ **इति सर्वादिः ॥ १ ॥**

४४७ स्वरादिनिपातमव्ययम् । १ । १। ३७ ॥ स्वर् अन्तर् प्रातर् । **अन्तोदात्ताः** । पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् [अन्तिकात्] पृथक् । **आद्युदात्ताः** । ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् [शश्वत्] जोषम् तूष्णीम् बहिस् [अवस्] अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ [हे है] इद्धा अद्धा सामि । **अन्तोदात्ताः** । वत् [५।१।११५] ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस् । **आद्युदात्ताः** । अन्तरा **अन्तोदात्त :** । अन्तरेण [मक्] ज्योक् [योक् नक्] कम् शम् सहसा [श्रद्धा] अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । क्त्वातोसुन्कसुनः । कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् [सत्रम् समम्] नमस् हिरुक् । तसिलादयस्तद्धिता एधाच्पर्यन्ताः [५ । ३ । ७–४६] शस्तसी कृत्वसुच् सुच् आस्थालौ । च्व्यर्थाश्च । [अथ] अम् आम् प्रताम् प्रतान् प्रशान् । **आकृतिगणोऽयम्** । तेनान्येऽपि । तथा हि । माङ् श्रम् कामम् [प्रकामम्] भूयस् परम् साक्षात् साचि (साचि) सत्यम् मङ्क्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् संततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अमिथु (अमिथु) विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् (अम्भस्) अम्नर् (अम्भर्) स्थाने वरम् दुष्ठु बलात् शु अर्वाक् शुदि वदि इत्यादि । तसिलादयः प्राक्पाशपः [५ । ३ । ७–१ । ३ ४७] शस्प्रभृतयः प्राक्समासान्तेभ्यः [५ । ४।४२–६७] । मान्तः कृत्वोर्थः । तसिवती नानाञाविति ॥ **इति स्वरादिः ॥ २ ॥**

२० चादयोऽसत्त्वे । १ । ४ । ५७ ॥ च वा ह अह एव एवम् नूनम् शश्वत् यूपत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा न्वै त्वै द्वै रै [रे] श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ ऌ ए ऐ ओ औ आदह उञ् उकञ् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा (वध्वा) धिक् हाहा हेहै (हहे) पाट् प्याट् आहो उताहो हो अहो नो (नौ) अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन बत [सम् वशम् शिकम् दिकम्] सनुकम् छंबट् (छम्बट्) शङ्के शुकम् खम् सनात् सनतर् तहिकम् सत्यम् ऋतम् अद्धा इद्धा नोचेत् नहि जातु कथम् कुतः कुत्र अव अनु हाहे (है) आहोस्वित् शम् कम् खम् दिष्ट्या पशु वट् सह अनुषट् आनुषक् अङ्ग फट् ताजक् (भाजक्) अये अरे वाट् (चाटु) कुम् खुम् घुम् अम् ईम् सीम् सिम् सि वै । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः । **आकृतिगणोऽयम् ॥ इति चादयः ॥ ३ ॥**

२१ प्रादयः । १ । ४ । ५४ ॥ प्र परा अप सम अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप ॥ **इति प्रादयः ॥ ४ ॥**

७६२ ऊर्यादिच्विडाचश्च । १ । ४ । ६१ ॥ ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला संशकला ध्वंसकला भ्रंशकला गुलगुधा सजूस् फल फली विक्ली आक्ली आलोष्ठी केवाली केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वश्मसा मस्मसा मसमसा औषट् श्रौषट् वौषट् वषट् स्वाहा स्वधा पापी प्रादुस् श्रत् आविस् ॥ **इत्यूर्यादयः ॥ ५ ॥**

७७९ साक्षात्प्रभृतीनि च । १ । ४ । ७४ ॥ साक्षात् मिथ्या चिन्ता भद्रा रोचन आस्था अमा अद्धा प्राजर्या प्राजरुहा वीजर्या वीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने विहसने प्रतपने प्रादुस् नमस् । **आकृतिगणोऽयम् ॥ इति साक्षात्प्रभृतयः ॥ ६ ॥**

द्वितीयोऽध्यायः ।

६७१ तिष्ठद्गुप्रभृतीनि च । २ । १ । १७ ॥ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् (प्रोढम्) पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् (अपरदक्षिणम्) संप्रति असंप्रति । इच्प्रत्ययः समासान्तः [५ । ४ । १२७ ॥ ५ । ४ । १२८]॥ **इति तिष्ठद्गुप्रभृतयः ॥ ७ ॥**

७१७ सप्तमी शौण्डैः । २ । १ । ४० ॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण ॥ **इति शौण्डादयः ॥ ८ ॥**

७२५ पात्रेसमितादयश्च । २ । १ । ४८ ॥ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्ष्वेडी गेहेविजिती-गेहेव्याडः गेहेमेही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भेतृप्तः आखनिकबकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरुचुरा । **आकृतिगणोऽयम् ॥ इति पात्रेसमितादयः ॥ ९ ॥**

७३५ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । २ । १ । ५६ ॥ व्याघ्र सिंह ऋक्षऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव ॥ **इति व्याघ्रादयः ॥ आकृतिगणोऽयम् ।** तेन मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥ १० ॥

७३८ श्रेण्यादयः कृतादिभिः । २ । १ । ५९ ॥
१ श्रेणि एक पूग मुकुन्द राशि निचय विषय निधन पर इन्द्र देव मुण्ड भूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय [विशिष्ट] पटु पंडित कुशल चपल निपुण कृपण ॥ **इत्येते श्रेण्यादयः ॥ ११ ॥**

२ कृत मित मत भूत उक्त [युक्त] समाज्ञात समाम्नात समाख्यात संभावित [संसेवित] अवधारित अवकल्पित निराकृत उपकृत उपाकृत [दृष्ट कलित दलित उदाहृत विश्रुत उदित] । **आकृतिगणोऽयम् ॥ इति कृतादयः ॥ १२ ॥**

७३९ * शाकपार्थिवादीनामुपसंख्यानम् * २ । १ । ६० ॥ शाकपार्थिव कुतपसौश्रुत अजातौल्वलि । **आकृतिगणोऽयम् ।** कृतापकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका॥**इति शाकपार्थिवादिः॥१३॥**

७५२ कुमारः श्रमणादिभिः । २ । १ । ७० ॥ श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पंडित पटु मृदु कुशल चपल निपुण ॥ **इति श्रमणादयः ॥ १४ ॥**

७५४ मयूरव्यंसकादयश्च । २ । १ । ७२ ॥ मयूरव्यंसक छात्रव्यंसक कम्बोजमुण्ड यवनमुण्ड । छन्दसि । हस्तेगृह्य (हस्तगृह्य) पादेगृह्य (पादगृह्य) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय । एहीडादयोऽन्यपदार्थे । एहीडम् एहियवम् एहिवाणिजा क्रिया । अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया । प्रेहिद्वितीया एहिकटा अपेहिकटा प्रेहिकटा आहरकरटा प्रेहिकर्दमा प्रोहकर्दमा विधमचूडा उद्धमचूडा (उद्धरचूडा) आहरचेला आहरवसना (आहरसेना) आहरवनिता (आहरवितना) कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् [नखप्रचम्]निश्चप्रचम् अकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया । जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोडः (जहिजोडम्) जहिस्तम्बम् (जहिस्तम्बः) [उज्जहिस्तम्बम्] । अख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता (खादताचमता) आहरनिवपा आहरनिष्किरा (आवपनिष्किरा) उत्पचविपचा भिन्धिलवणा छिन्धिविचक्षणा पचलवणा पचप्रकूटा । **आकृतिगणोऽयम् ।** तेन । अकुतोभयः कान्दिशीकः (कान्देशीकः) आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् अवश्यकार्यम् ॥ **इति मयूरव्यंसकादयः१५**

७०३ याजकादिभिश्च । २ । २ । ९ ॥ याजक पूजक परिचारक परिवेषक [परिषेचक] स्नापक अध्यापक उत्साहक उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक॥**इति याजकादयः ॥ १६ ॥**

९०२ राजदन्तादिषु परम् । २ । २ । ३१॥ राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोतम् (अर्पितोप्तम्)

उत्तगाढ॥ उद्खलमुसलम् तण्डुलकिण्वम् दृषदुपलम् आरड्वायनि (आरग्वायनबन्धकी) चित्ररथबाह्लीक । अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् (गोजवाजम्) गोपालिधानपूलसम्(गोपालधानीपूलासम्) पूलासकारण्डम् (पूलासककुरंडम्) स्थूलासम् (स्थूलपूलासम्) उशीर बीजम् [जिज्ञास्थि] सिञ्जास्थम् (सिञ्जाश्वत्थम्) चित्रास्वाती (चित्रस्वाती) भार्यापती दम्पतीजम्पती जायापतीपुत्रपती पुत्रपशू केशश्मश्रू शिरोविजु (शिरोबीजम्) शिरोजानु सर्पिर्मधुनी मधुसर्पिषी (आद्यन्तौ) अन्तादी गुणवृद्धी वृद्धिगुणौ ॥ **इति राजदन्तादिः ॥ १७ ॥**

९०० वाहिताग्न्यादिषु । २ । २ । ३७ ॥ आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत [मद्यपीत] ऊढभार्य गतार्थ । **आकृतिगणोऽयम् ।** तेन । गडुकण्ठ अस्युद्यत (अस्युद्यत) दण्डपाणिप्रभृतयोऽपि ॥ **इत्याहिताग्न्यादयः ॥ १८ ॥**

७९१ कडाराः कर्मधारये । २ । २ । ३८ ॥ कडार गडुल खञ्ज खोड कण कुंठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गुल (पिङ्गल) तड तनु [जठर] बधिर मठर कज्ज बर्बर ॥ **इति कडारादयः ॥१९॥**

९८४ * नौकाकान्नशुकशृगालवर्जेषु * २ । ३ । १७ ॥ नौ काक अन्न शुकशृगाल ॥ **इति नावादयः ॥ २० ॥**

५६१ * प्रकृत्यादिभ्य उपसंख्यानम् * २ । ३ । १८ ॥ प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र ॥ **इति प्रकृत्यादयः ॥ २१ ॥**

९१९ गवाश्वप्रभृतीनि च । २ । ४ । ११ ॥ गवाश्वम् गवाविकम् गवैडकम् अजाविकम् (अजैडकम्) कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमाणवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिकम् उष्ट्रखरम् उष्ट्रशशम् मूत्रशकृत् सूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम्(तृणोलपम्) दासीदासम् कुटीकुटम् भागवतीभागवतम् ॥**इति गवाश्वप्रभृतीनि२२**

९१८ न दधिपयआदीनि । २ । ४ । १४ ॥ दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ (परिव्राट्कौशिकौ) प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्माबर्हिषी दीक्षातपसी (श्रद्धातपसी मेधातपसी) अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्सामे वाङ्मनसे ॥ **इति दधिपयआदीनि ॥ २३ ॥**

८१६ अर्धर्चाः पुंसि च । २ । ४।३१॥ अर्धर्च गोमय कषाय कार्षापण कुतप कुसप (कुणप) कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूप अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यानमख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारवाण (वारवारण) प्रोथ कपित्थ [शुष्क] शाल शील शुक्ल (शुल्क) शीधु कवच रेणु [ऋण] कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त बुस्त क्ष्वेडित शृङ्ग निगड [खल] मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक [कर्पट] शिखर कल्क [वल्कल] नटमक [नाटमस्तक] वलय कुसुम तृण पङ्क कुण्डल किरीट [कुमुद] अर्बुद अङ्कुश तिमिर आश्रय भूषण इकस [इष्वास] मुकुल वसन्त तटाक [तडाग] पिटक विटंक विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास [विशाल] चषाल [चखाल] खण्ड दर विटप [रण बल मक] मृणाल हस्त आर्द्र हल [सूत्र] ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल [छल] पुर [पुरा] राष्ट्र अम्बर बिम्ब कुट्टिम मण्डल [कुक्कुट] कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य [बाल] छाल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन [स्तन स्वर] संगम निष्कक्षेम शूक क्षत्र पवित्र यौवन कलह मालक [पालक] मूषिक [मण्डल वल्कल] कुज [कुञ्ज] विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन [लोमश] तमाल लोह दण्डक शपथ प्रतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्न नीड शकल तण्डुल ॥ **इत्यर्धर्चादिः ॥ २४ ॥**

१०८४ पैलादिभ्यश्च । २ । ४ । ५९ ॥ पैल शालंकि सात्यकि सात्यकामि राहवि रावणि औदञ्चि औदव्रजि औदमेधि औदव्यज्रि (औदमज्जि) औदभृज्जि दैवस्थानि पैङ्गलौदायनि राहक्षति भौलिङ्गि राणि औदन्यि औद्राहमानि औजिहानि औदशुद्धि तद्राजाच्चाणः (तद्राज) ॥ **आकृतिगणोऽयम् । इति पैलादिः ॥२५॥**

१०८६ न तौल्वलिभ्यः । २ । ४ । ६१॥ तौल्वलि धारणि पारणि रावणि दैलीपि दैवति वार्कलि नैवति (नैवकि) दैवमित्रि (दैवमति) दैवयज्ञि चाफट्टकि वैल्वकि वैकि (बैंकि) आनुहारति (आनुराहति) पौष्करसादि आनुरोहति आनुति प्रादोहनि नैमिश्रि प्राडाहति बान्धकि वैशीति आसिनासि आहिंसि आसुरि नैमिषि आसिबन्धकि पौष्णि कारेणुपलि वैकर्णि वैरकि वैहति ॥ **इति तौल्वल्यादिः ॥ २६ ॥**

११४५ यस्कादिभ्यो गोत्रे । २ । ४ । ६३ ॥ यस्क लह्य द्रुह्य अयस्थूण [अयःस्थूण] तृणकर्ण सदामत्त कम्बलहार बहिर्योग कर्णाढक पर्णाढक पिण्डीजंघ वक्रसक्थ [वकसक्थ] विश्रि कुद्रि अजवस्ति मित्रयु रक्षोमुख जंघारथ उत्कास कटुक मथक [मन्थक] पुष्करट [पुष्करसद्] विषपुट उपरिमेखल क्रोष्टुकमान [क्रोष्टुमान] क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्षुक भलन्दन भडिल भण्डिल भडित भण्डित **एते यस्कादयः ॥ २७ ॥**

११४९ न गोपवनादिभ्यः । २ । ४ । ६७ ॥ गोपवन शैयु [शिग्रु] बिन्दु भाजन अश्वावतान श्यामक [श्योमाक] श्यामाक श्यापर्ण ॥ **विदाद्यन्तर्गणोऽयम् (४।१।१०४) इति गोपवनादिः ॥२८॥**

११५० तिककितवादिभ्यो द्वन्द्वे । २ । ४ । ६८ ॥ तिककितवाः वङ्खभण्डीरथाः उपकलमकाः पफकनरकाः बकनखगुदपरिणद्धाः उब्जककुभाः लंकशान्तमुखाः उत्तरशलङ्कटाः कृष्णाजिनकृष्णसुन्दराः अष्टककपिष्ठलाः अग्निवेशदशेरुकाः ॥ **एते तिककितवादयः ॥ २९ ॥**

पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आस्य, एषां पादादय आदेशाः स्युः शसादौ वा । यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तं तत्प्रामादिकम् । पादः । पादौ । पादाः । पादम् । पादौ । पदः । पादान् । पदा । पादेन इत्यादि ॥

२२८–पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आस्य, इन शब्दोंके स्थानमें क्रमसे पद्, दत्, नस्, मास्, हृद्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन् ,आदेश शस् आदि विभक्ति परे रहते विकल्प करके हों ("अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ६ । १ । ५९" से विकल्पकी अनुवृत्ति आतीहै)। आसन शब्दके स्थानमें आसन् आदेश हो यह बात जो काशिका वृत्तिमें लिखीहै, वह प्रमाद अर्थात् भूल है * ॥

पाद शब्दके रूप–

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र.	:	पादौ	पादाः
सं.	हे पाद	हे पादौ	हे पादाः
द्वि.	पादम्	पादौ	पदः, पादान्
तृ.	पदा, पादेन	पद्भ्याम्, पादाभ्याम्	पद्भिः, पादैः
च.	पदे, पादाय	पद्भ्याम्, पादाभ्याम्	पद्भ्यः,पादेभ्यः
पं.	पदः, पादात्	पद्भ्याम्, पादाभ्याम्	पद्भ्यः,पादेभ्यः
ष.	पदः, पादस्य	पदोः, पादयोः	पदाम्,पादानाम्
स.	पदि, पादे	पदोः, पादयोः	पत्सु, पादेषु.

अब 'दन्त' (दांत) इसको शसादि प्रत्यय आगे रहते पूर्वसूत्रसे विकल्पसे दत् आदेश होताहै :परन्तु इसके रूप कहनेसे पहले कितनी ही संज्ञायें कहनी उचित हैं, सो कहतेहैं–

२२९ सुडनपुंसकस्य । १ । १ । ४३ ॥

सुट् प्रत्याहारः । स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥

२२९–सुट् यह प्रत्याहार है, इससे सु, औ, जस्, अम्, औट् इन पांच प्रत्ययोंमेंसे प्रत्येकका ग्रहण होताहै । नपुंसकलिंगको छोडकर सु आदि पांच विभक्तियोंकी सर्वनामस्थान संज्ञा है । ("शि सर्वनामस्थानम् १।१।३९/३१२"से सर्वनामस्थानकी अनुवृत्ति आतीहै) * ॥

२३०स्वादिष्वसर्वनामस्थाने।१।४।१७॥

कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात् ।

२३०–असर्वनामस्थान अर्थात् सर्वनामस्थानभिन्न कप्-प्रत्ययपर्यन्त (चतुर्थाध्यायके प्रारम्भसे पञ्चमाध्यायतकके) प्रत्यय परे रहते पूर्वकी पद संज्ञा हो । " सुप्तिङन्तं पदम् २९ " से, ४।१।२/१८३ से सुप् और १।४।७८/२१५४ से तिङ् प्रत्यय लगाकर जो शब्द बनतेहैं, उनकी पद संज्ञा होतीहै, परन्तु यहां प्रत्यय आगे रहते शब्दके मूलरूपकी पद संज्ञा है, यह बात ध्यानमें रखनी चाहिये । यहां (२९ से पदकी अनुवृत्ति आतीहै) ॥

इसका अपवाद–

२३१ यचि भम् । १ । ४ । १८ ॥

यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्॥

२३१–पिछले सूत्रमें कहेके अनुसार असर्वनामस्थान जो सु से लेकर कप् तक प्रत्यय उनमेंसे जो यकारादि अथवा अजादि प्रत्यय आगे हों तो पूर्व शब्दकी भ संज्ञा होतीहै ॥

पद और भ संज्ञा यह दोनों एक ही समय प्राप्त होतीहैं, तो इसपर कहतेहैं–

२३२आ कडारादेका संज्ञा ।१।४।१॥

इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया या पराऽनवकाशा च । तेन शसादावचि भसंज्ञैव न पदत्वम् । अतो जश्त्वं न । दतः । दता । जश्त्वम् । दद्भ्यामित्यादि । मासः । मासा । भ्यामि रुत्वे यत्वे च यलोपः । माभ्याम् । माभिरित्यादि ॥

२३२–यहां १।४।१/२३२ से "कडाराः कर्मधारये २।२।३८/७५१" तक अर्थात् पहिले अध्यायके चतुर्थपादसे लेकर द्वितीय अध्यायके द्वितीय पादकी समाप्तितक तीन पादमें जो संज्ञा कही हैं, वह एकको एक ही होतीहैं अर्थात् एक शब्दको कौन संज्ञा हो ? तो इनमेंसे दो वा अधिक संज्ञायें नहीं होतीं, (या परेति) जो पर हो वह होतीहै, परन्तु जो पूर्व संज्ञाको

---

१ जयादित्य अपर नाम वामनाचार्यने जो पाणिनीय सूत्रोंकी वृत्ति लिखी है वह काशी क्षेत्रमें लिखे जानेके कारण काशिका नामसे विख्यात है, कौमुदीसे पहले इसीका प्रचार था ॥

* "आस्नो वृकस्य वर्त्तिकाम्" इस मन्त्रमें 'आस्नः' इसका 'मुखात्' (मुखसे) ऐसा ही उचित अर्थ होनेसे और "हव्या जुह्वान आसनि" इस मन्त्रमें 'आसनि' इसका 'मुखे' (मुखमें) ऐसा अर्थ होनेसे 'आसन्' इस आदेशका स्थानी आस्य शब्द है, आसन शब्द नहीं ॥

* यहां लाघवसे 'सुट् स्त्रीपुंसयोः' ऐसा कहना उचित था सो न कहकर 'अनपुंसकस्य' ऐसा जो उच्चारण किया सो प्रसज्यप्रतिषेधमें भी समास हो (नञ्के दो अर्थ हैं–पर्युदास और प्रसज्य, तिसमें पर्युदास सदृशका ग्राहक होनेसे उसके समासमें कोई बाधा नहीं यथा 'अब्राह्मणः' इत्यादि और प्रसज्यार्थकका तो क्रियामें अन्वय होताहै इस कारण इस अर्थमें भी समास हो) ऐसे वाक्यमें ज्ञापक होताहै तिससे 'असूर्यपश्यानि मुखानि' इत्यादि वाक्य भी समास होनेसे सिद्ध होतेहैं ॥

और कहीं भी अवकाश न हो तो वही होतीहै, इससे शस् यहांसे चतुर्थ पंचम अध्यायमेंके प्रत्यय जो हैं, उनमेंके अजादि प्रत्यय आगे हों तो पूर्व शब्दको भ संज्ञा ही होतीहै, पद संज्ञा नहीं होती।

सारांश यह कि, सु, औ, जस्, अम्, औट् इन पांच प्रत्ययोंको पुँल्लिङ्गमें और स्त्रीलिंगमें सर्वनाम संज्ञा होतीहै, इन पांच प्रत्ययोंको छोडकर चौथे पांचवें अध्यायोंके जो और प्रत्यय बचे हैं उनमेंसे यकारादि और अजादि प्रत्यय आगे रहते पूर्व शब्दको 'भ' और उन्हींमेंके इतर प्रत्यय आगे रहते पूर्व शब्दको पद संज्ञा जाननी चाहिये, यह सब प्रत्यय बहुत हैं, परन्तु यहां सुप् प्रत्ययोंको दिखातेहैं-शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् इनसे भ संज्ञा है। भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप, इन सातसे पद संज्ञा है। विशेष ध्यान रखने योग्य यह बात है कि, सर्वनामस्थान संज्ञा प्रत्ययोंकी होतीहै, परन्तु पद और भ संज्ञा यह प्रत्ययोंके पहले रहनेवाले शब्दोंकी होतीहै। इसी प्रकारसे शसादिकोंमेंके अजादि प्रत्यय आगे रहते पद संज्ञा नहीं होती, इसीसे 'दत्' के आगे शस् प्रत्यय होते "झलाञ्जशोऽन्ते ८४" सूत्र नहीं लगता, कारण कि पदान्तके विना इस सूत्रकी प्राप्ति नहीं होती, यहां पदान्त नहीं है, इससे तकारको (जश्त्व) दकार नहीं होता, दतः। दता। भ्याम् इत्यादि हलादि प्रत्यय आगे रहते पद संज्ञा है इससे ८४ से जश्त्व (तकारको दकार) हुआ दद्भ्याम् इत्यादि।

दन्त शब्दके रूप-

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र.	दन्तः	दन्तौ	दन्ताः
सं.	हे दन्त	हे दन्तौ	हे दन्ताः
द्वि.	दन्तम्	दन्तौ	दतः, दन्तान्
तृ.	दता, दन्तेन	दद्भ्याम्, दन्ताभ्याम्	दद्भिः, दन्तैः
च.	दते, दन्ताय	दद्भ्याम्, दन्ताभ्याम्	दद्भ्यः, दन्तेभ्यः
पं.	दतः, दन्तात्	दद्भ्याम्, दन्ताभ्याम्	दद्भ्यः, दन्तेभ्यः
ष.	दतः, दन्तस्य	दतोः, दन्तयोः	दताम्, दंतानाम्
स.	दति, दन्ते	दतोः, दन्तयोः	दत्सु, दन्तेषु

नासिका (नाक) शब्द स्त्रीलिंगमें आगे आवेगा, (२९३ सू० देखो)।

मास (महीना) शब्द, इसको शसादिमें विकल्प करके मास् होगा, इससे मास्+शस्=मासः। मास्+टा=मासा। मास्+भ्याम्=माभ्याम्, इसमेंके सकारको "ससजुषो रुः ८।२।६६/१६२" से रु(र्) और आगे अश् रहनेसे रु को "भोभगो० ८।३।१७/१६७" से यत्व, फिर "हलि सर्वेषाम् ८।३।२२/१७१" से लोप होकर माभ्याम् हुआ। मास्+भिस्=माभिः-इत्यादि।

मास शब्दके रूप-

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्र.	मासः	मासौ	मासाः
सं.	हे मास	हे मासौ	हे मासाः
द्वि.	मासम्	मासौ	मासः, मासान्
तृ.	मासा, मासेन	माभ्याम्, मासाभ्याम्	माभिः, मासैः
च.	मासे, मासाय	माभ्याम्, मासाभ्याम्	माभ्यः, मासेभ्यः
पं.	मासः मासात्	माभ्याम्, मासाभ्याम्	माभ्यः, मासेभ्यः
ष.	मासः, मासस्य	मासोः, मासयोः	मासाम्, मासानाम्
स.	मासि, मासे	मासोः, मासयोः	माःसु, मास्सु, मासेषु

हृदय नपुंसक लिंगमें, निशा स्त्रीलिंगमें, असृज् नपुंसकमें आवेंगे।

यूष (मूंगका काढा) शब्द, इसको शसादिमें विकल्प करके यूषन् आदेश होताहै, परन्तु-॥

२३३ भस्य। ६। ४। १२९॥

अधिकारोऽयम्॥

२३३-यहां भसंज्ञाका अधिकार जानना चाहिये॥

२३४ अल्लोपोऽनः। ६। ४। १३४॥

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात्॥

२३४-अङ्गका अवयव और असर्वनामस्थान यकारादि प्रत्यय और अच् आदिवाले स्वादि प्रत्यय जिसके परे हों ऐसे अन्‌के अकारका लोप हो। यूषन्+अस् ऐसी स्थिति हुई-॥

२३५ रषाभ्यां नो णः समानपदे। ८। ४। १॥

एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्। यूष्णः। यूष्णा। पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अड्व्यवाय इत्येवात्र णत्वम्। पूर्वत्रासिद्धे न स्थानिवदिति तु इह नास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात्॥

२३५-एक ही पदमें रहनेवाला रेफके आगेका अथवा षकारके आगेका जो 'न्' उसके स्थानमें 'ण्' आदेश होताहै, यूष्णः। यूष+टा=यूष्णा, यहां अकारके स्थानमें लोप यह आदेश है, (पूर्वस्मादिति) "अचः परस्मिन्पूर्वविधौ १।१।५७/५०" इससे पर वर्णके निमित्तसे अच्‌के स्थानमें प्राप्त होनेवाला जो आदेश वह अच्‌के पूर्व वर्णके कार्य कर्तव्य होते स्थानिवत् होताहै ऐसा कहाहै, परन्तु 'पूर्वविधौ' इसका अर्थ पूर्वस्य विधौ (पूर्ववर्णके सम्बन्धसे कार्य कर्तव्य होते) ऐसा न करते 'पूर्वस्मात् विधौ' अर्थात् पूर्ववर्णके अगले वर्णका कार्य कर्तव्य होते ऐसा भी कहीं २ करतेहैं, इस कारण विभक्ति प्रत्ययके निमित्तसे यूषन् इसमेंके जिस 'अ' अच्‌के स्थानमें अकारका लोप आदेश हुआहै, उसका पूर्व वर्ण जो ष् उससे परे नकारको णकार करना है, इस कारण अकारके लोपको 'स्थानिवद्भाव' अर्थात् अ है ऐसा पक्ष लियाजाय तो 'अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२/१५७' इस सूत्रसे बीचम अकार रहते भी षकारके निमित्तसे नकारके स्थानमें णत्व होताहै। (पूर्वत्रासि०) 'त्रिपादीमें स्थानिवद्भाव नहीं होताहै' ऐसा वचन है, परन्तु वह यहां नहीं लगता, क्योंकि संयोगादिलोप, लत्व, णत्व इनका

विधान होते त्रिपादीमें भी स्थानिवद्भाव होता है, ऐसा भाष्यमें निषेध होनेसे यहां उस वचनका बाध होताहै * ॥

२३६ न लोपः प्रातिपदिकान्तस्य । ८ । २ । ७ ॥

नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे । प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात् । नलोपस्यासिद्धत्वाद्दीर्घत्वमेत्वमैस्त्वं च न। यूषभ्याम्।यूषभिः।यूषभ्य इत्यादि॥

२३६–इस सूत्रमें 'न' और 'प्रातिपदिक' यह दोनों पद 'लुप्तषष्ठीक' हैं,इनमेंके षष्ठीप्रत्ययोंका लोप हुआ है, सूत्रोंमें यह बात देखी जातीहै इससे षष्ठीप्रत्यय न होते भी षष्ठीका अर्थ लेना चाहिये, तब प्रातिपदिकसंज्ञक पद होते (अर्थात् उसके आगे असर्वनामस्थानसंज्ञक यजादिवर्ज भ्यांम् इत्यादि स्वादि प्रत्यय होते) उसके अन्त्य नकारका लोप होताहै ।

(नलोपस्येति) यह सूत्र त्रिपादीका है इससे सपादसप्ताध्यायीमेंके आगे कहे कार्यको लोप नहीं दीखता, नकार ही दीखताहै, इससे "सुपि च ७।३।१०२ / २०२" इससे यजादि सुप् प्रत्यय आगे रहते अकारान्त अंगको होनेवाला दीर्घ यहां नहीं होता, "अतो भिस ऐस् ७।१।९ / २०३" इससे अकारान्त के आगे जो भिस् उसके स्थानमें होनेवाला ऐस् आदेश वह भी नहीं होता, "बहुवचने झल्येत् ७।३।१०३ / २०५" इससे बहुवचन झलादि सुप् प्रत्यय आगे रहते अकारको होनेवाला एत्व भी नहीं होता । इनके उदाहरण अनुक्रमसे यूषभ्याम्, यूषभिः, यूषभ्यः–इत्यादि ।

ऊपर वृत्तिमें 'प्रातिपदिकसंज्ञकं यत्पदम्' ऐसा कहा है उसमें सुप्तिङन्त जो पद उसका भी ग्रहण होताहै,इससे राजन्+पुरुषः इत्यादिमें नकारका लोप होकर 'राजपुरुषः' ऐसा हुआ है ॥

२३७ विभाषा ङिश्योः।६।४।१३६॥

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः । यूष्णि । यूषणि । पक्षे रामवत् । पद्न्निति सूत्रे प्रभृतिग्रहणं प्रकारार्थम् । तथा च औङः श्यामपि दोषन्नादेशो भाष्ये ककुद्दोषणी इत्युदाहृतः । तेन पदंघ्रिश्चरणोऽस्त्रियाम्, स्वान्तं हृन्मानसं मन इति संगच्छते । आसन्यं प्राणमूचुरिति च । आस्ये भवः आसन्यः । दोषशब्दस्य नपुंसकत्वमप्यत एव भाष्यात् । तेन दक्षिणं दोर्निशाचर इति संगच्छते । भुजबाहू प्रवेष्टो दोरिति साहचर्यात्पुंस्त्वमपि । दोषं तस्य तथाविधस्य भजत इति । द्वयोरह्नोर्भवो द्व्यह्नः॥

२३७–असर्वनामस्थानयजादिस्वादिपर (अर्थात् भसंज्ञक) और अंगका अवयव जो अन् उसके अकारका विकल्प करके लोप होताहै आगे ङि वा शी ७।१।१९ / २१० प्रत्यय परे रहते । यूष्णि, यूषणि । अन्य पक्षमें रामशब्दवत् ।

यूष शब्दके रूप–

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	यूषः	यूषौ	यूषाः
सम्बोधन	हे यूष	हे यूषौ	हे यूषाः
द्वितीया	यूषम्	यूषौ	यूष्णः, यूषान्
तृतीया	यूष्णा, यूषेण	यूषभ्याम्, यूषाभ्याम्	यूषभिः, यूषैः
चतुर्थी	यूष्णे, यूषाय	यूषभ्याम्, यूषाभ्याम्	यूषभ्यः, यूषेभ्यः
पञ्चमी	यूष्णः, यूषात्	यूषभ्याम्, यूषाभ्याम्	यूषभ्यः, यूषेभ्यः
षष्ठी	यूष्णः, यूषस्य	यूष्णोः, यूषयोः	यूष्णाम्, यूषाणाम्
सप्तमी	यूष्णि, यूषणि, यूषे	यूष्णोः, यूषयोः	यूषसु, यूषेषु

इसके अगले शब्द दोष्, यकृत्, शकृत् यह हलन्त हैं । उदक, आस्य यह अदन्त नपुंसक हैं, इससे इनके रूप अपने २ स्थानपर आवेंगे.

"पद्दत्० २२८" सूत्रमें प्रभृतिशब्द प्रकार अर्थात् सादृश्य दिखानेके निमित्त जोडा गयाहै, इस कारण शस्के पूर्वमें भी कहे हुए प्रत्यय आगे रहते कहीं २ पद्, दत् इत्यादि आदेश होतेहैं, (तथा च औङः श्या०) भाष्यमें "नपुंसकाच्च ७।१।१९ / ३३०" इस सूत्रसे औङ् (औ) प्रत्ययको होनेवाला शी (ई) आदेश करते समय भी 'ककुद्दोषणी' (बैलकी ककुद्-कन्धा)। दोष (हाथ) यह उदाहरण देकर स्पष्ट कियाहै । इसीसे 'पदंघ्रिश्चरणोऽस्त्रियाम्' इत्यादि अमरकोशके वाक्योंमें पद्, हृद् ऐसा शब्द प्रथमाके एकवचन सुप्रत्यय में लाये गयेहैं यह ठीक बैठतेहैं । (आसन्यं प्राणमूचुरिति) मुखमें उत्पन्न हुए वायुको प्राण कहतेहैं, ऐसा भी प्रामाणिक प्रयोग है । (आस्ये भव आसन्यः) मुखमें उत्पन्न हुआ, 'आसन्य' इसमें "शरीरावयवाच्च ४।३।५५ / १४३०" इससे यत् (य) प्रत्यय हुआहै यह शसादि सुप् प्रत्ययोंके परेका है

* 'रषाभ्यां नो०' 'अट्कुप्वाङ्०' यह सूत्र त्रिपादीमें होनेसे पूर्वत्र असिद्ध है इस कारण तत्प्रयुक्त कार्यको "अचः परस्मिन्पूर्वविधौ १।१।५७ / ५०" यह शास्त्र नहीं लगता, इसपरसे "पूर्वत्रासिद्धे न स्थानिवत्"यह परिभाषा प्रगट हुई,परन्तु फिर 'संयोगादिलोप०' इस निषेधके कारण उसका प्रस्तुत प्रसंगमें निराकरण हुआ, अर्थात् यहां स्थानिवद्भाव है ऐसा निश्चय हुआ, इन तीनों अपवादोंके उदाहरण यहां हैं–"स्कोः संयोगाद्योरन्ते च ८।२।२९ / ३८०"इससे पदान्तमें वा आगे झल् रहते संयोगके प्रारंभमें रहनेवाले सकार और ककारका लोप होताहै, इस कारण चक्री+अत्र इसकी संधि होनेसे जो चक्र्य्×अत्र ऐसी स्थिति हुई उसमें 'क्र्य्' ऐसा जो संयोग वह पदान्तमें होनेसे उसके आदि ककारका लोप प्राप्त हुआ, परन्तु 'संयोगादिलोप०' इस वचनसे अन्त्य यकारको स्थानिवद्भावसे ईत्व प्राप्त है, इस कारण क्र् इस संयोगको पदान्तत्व नहीं आता, और आगे झल् भी नहीं है इस कारण आदि ककारका लोप न होते 'चक्र्यत्र' ऐसी संधि हुई । लत्वका उदाहरण–'निगाल्यते' यह गृ धातुका प्रयोजकणिजन्तकर्मणि रूप है, इसमें स्थानिवद्भावसे रेफके स्थानमें "अचि विभाषा" ८ । २ । २१" से लत्व हुआ है । 'माषवपनी' इसमें स्थानिवद्भाव है इस कारण नकारको णत्व नहीं हुआ; अर्थात् 'यस्येति च' इससे अलोपके स्थानिवद्भाव होनेमें नकारको प्रातिपदिकान्तत्वाभाव होनेसे णकार न हुआ । अन्तके इन दोनों रूपोंकी सिद्धिका विस्तार आगेके स्थलोंमें आवेगा इस कारण यहां नहीं लिखते ॥

तो भी यह आगे रहते आस्य शब्दको आसन् आदेश हुआ है ।

'आसन्' यह आदेश आसन शब्दको होताहै ऐसा काशिकाकारने कहाहै सो प्रामादिक है यह कहनेको 'आसन्यं प्राणमूचुः' यही आधार है ॥

(दोष्शब्दस्य) ऊपर 'ककुद्दोषणी' ऐसा शब्द आया है वह 'ककुद्दोषन्' इस नपुंसक शब्दका प्रथमा द्वितीयाका द्विवचन है, इस भाष्यके लेखके आधारसे दोष शब्द नपुंसक भी है, इससे 'दक्षिणं दोर्निशाचरे' (दहिनी भुजा राक्षसपर 'डाली') यह प्रयोग साधु दीखताहै । (भुजबाहू०) अमरकोशमें 'प्रवेष्टः' पुँल्लिङ्गके साथ 'दोः' (दोष्) शब्द दिया हुआहै इस कारण उसको पुंस्त्व भी है, इसका प्रयोग 'दोषं तस्य तथाविधस्य भजतः' (इस प्रकारका वह ईश्वर है उसकी बाहुको भजते०) यह है ॥

अब द्व्यह्न शब्द-('द्वयोः अह्नोः भवः-द्व्यह्नः' । जो दो दिनोंमें हुआ)—

२३८ संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ।६।३।११०॥

संख्यादिपूर्वस्याह्नस्याहनादेशो वा स्यान्ङौ। द्व्यह्नि। द्व्यहनि। द्व्यह्ने। विगतमहर्व्यह्नः। व्यह्नि। व्यहनि। व्यह्ने। अह्नः सायः सायाह्नः। सायाह्नि। सायाहनि। सायाह्ने॥ ॥ इत्यदन्ताः ॥

विश्वपाः ॥

२३८-संख्यावाचक शब्द अथवा अव्यय वि और साय-शब्द यदि पूर्वमें हों तो अह्न शब्दके स्थानमें ङि परे रहते विकल्प करके अहन् आदेश हो । इससे द्व्यह्नको 'द्व्यहन्' ऐसा रूप हुआ परन्तु आगे ङि होनेसे "विभाषा ङिश्योः ६।४।१३६/२३७" इससे फिर विकल्प करके अन्के अकारका लोप हुआ इस प्रकारसे तीन रूप हुए-द्व्यह्नि, द्व्यहनि, द्व्यह्ने । शेष रूप रामशब्दवत् जानो ।

इसी प्रकार व्यह्न ('विगतम् अहः' बीता हुआ दिन) शब्दके रूप जानो । इसके आगे ङि होनेसे व्यह्नि, व्यहनि, व्यह्ने । इतर रूप रामशब्दवत् जानो ।

अह्नः सायः-(दिनका सायंकाल) 'सायाह्नः' ङि प्रत्यय आनेपर सायाह्नि, सायाहनि, सायाह्ने । इतर रूप रामशब्दवत् जानने ।

इसमें अहन् शब्द हलन्त है तो भी "अहोऽह्न एतेभ्यः ५।४।८८/७९०" इससे टच् (अ) होकर समासान्तमें अह्न आदेश हुआ है, अहन् शब्द आदिका नपुंसक है तो भी द्व्यह्न यह सामासिक शब्द विशेषणरूप होनेसे पुँल्लिङ्गमें लेनेसे कोई दोष नहीं, 'व्यह्न' और 'सायाह्न' यह शब्द "रात्राह्नाहाः पुंसि २।४।२९/८१४" इससे पुँल्लिङ्ग हुए हैं ॥

इति अदन्ताः ॥

आदन्त शब्द विश्वपा (विश्वं पाति इति विश्वपाः-विश्वका पालन करनेवाला) इसमें 'पा' धातुके आगे क्विप् प्रत्यय हुआ है क्विप् प्रत्यय सब जातारहताहै (१२६ देखो) कृत् प्रत्यय होनेके कारण इसकी प्रातिपदिक संज्ञा हुई आगे विभक्ति प्रत्यय 'सु' में विश्वपाः । अब 'औ' और 'जस्' में-

२३९ दीर्घाज्जसि च । ६ । १ । १०५॥

दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात् । वृद्धिः । विश्वपौ । सवर्णदीर्घः। विश्वपाः । यद्यपीह औङि नादिचीत्येव सिद्धं जसि तु सत्यपि पूर्वसवर्णदीर्घे क्षतिर्नास्ति तथापि गौर्यौ गौर्य इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तम् ॥

२३९-दीर्घके आगे जस् वा इच् प्रत्याहारका वर्ण हो तो "प्रथमयोः पूर्वसवर्णः ६।१।१०१/१६४.५" यह सूत्र नहीं लगता अर्थात् इससे पूर्वसवर्ण दीर्घ नहीं होता । औ प्रत्यय आगे रहते "वृद्धिरेचि ६।१।८८/७२" इससे वृद्धि हुई तब विश्वपौ । आगे जस् परे रहते "अकः सवर्णे दीर्घः ८५" से दीर्घ विश्वपाः ।

(यद्यपीति०) यहां औङ् (औ) प्रत्यय आगे रहते "नादिचि ६।१।१०४/१६५" अवर्णके आगे इच् रहते पूर्वसवर्ण दीर्घ नहीं होता, इसीसे रूप सिद्ध होजायगा और जस् प्रत्ययमें तो पूर्वसवर्णदीर्घ हो तो भी कोई हानि नहीं वही रूप होगा तथापि गौरी इत्यादिशब्दोंके गौर्यौ गौर्यः, इत्यादि रूप "प्रथमयोः० १६४" से सिद्ध नहीं होंगे इस सूत्रसे उसमें दोष आजायगा, इससे यह प्रस्तुत सूत्र लगाना चाहिये (३०० सूत्र देखो) उस शब्दकी समान ही यह शब्द दीर्घान्त होनेसे यहां भी वही नियम लगाना न्याय्य है, इससे वह सूत्र यहां दियाहै ॥

२४० आतो धातोः । ६ । ४ । १४७॥

आकारान्तो यो धातुस्तदन्तस्य भस्याऽङ्गस्य लोपः स्यात् । अलोन्त्यस्य । विश्वपः। विश्वपा । विश्वपाभ्यामित्यादि ।एवं शङ्खध्मादयः । धातोः किम् । हाहान् । टा । सवर्णदीर्घः। हाहा । ङे। वृद्धिः। हाहै । ङसिङसोर्दीर्घः । हाहाः २ । ओसि वृद्धिः। हाहौः । ङौ आद्गुणः। हाहे। शेषं विश्वपावत् । आत इति योगविभागादधातोरप्याकारलोपः क्वचित् । क्त्वः । इनः ॥ इत्यादन्ताः ॥

२४०-आकारान्त जो धातु वह है अन्तमें जिसके ऐसे भसंज्ञक अंगका लोप हो । "अलोन्त्यस्य १।१।५२/४२" इससे आकारका लोप हुआ विश्वप्+अस=विश्वपः । विश्वपा+टा=विश्वपा । विश्वपाभ्याम् इत्यादि ।

विश्वपा शब्दके रूप-

विभक्ति	एकवचन	द्विवचन	बहुवचन
प्रथमा	विश्वपाः	विश्वपौ	विश्वपाः
सम्बोधन	हे विश्वपाः	हे विश्वपौ	हे विश्वपाः
द्वितीया	विश्वपाम्	विश्वपौ	विश्वपः

कारकप्रकरणम्।

१२२–अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्। १२३–नीवह्योर्न। १२४–नियन्तृकर्तृकस्य वहेरनिषेधः। १२५–आदिखाद्योर्न। १२६–भक्षेरहिंसार्थस्य न। १२७–जल्पतिप्रभृतीनामुपसंख्यानम्। १२८–दृशेश्च। १२९–शब्दायतेर्न। १३०–अभिवादिदृशोरात्मनेपदे वेति वाच्यम्। १३१–अभुक्त्यर्थस्य न। १३२–उभसर्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते। १३३–अभितःपरितःसमयानिकषाहाप्रतियोगेपि। १३४–प्रकृत्यादिभ्य उपसंख्यानम्। १३५–अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। १३६–क्रियया यमभिप्रैति सोपि सम्प्रदानम्। १३७–कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा। १३८–तादर्थ्ये चतुर्थीवाच्या। १३९–क्लृपि सम्पद्यमाने च। १४०–उत्पातेन ज्ञापिते च। १४१–हितयोगे च। १४२–नौकाकान्नशुकशृगालवर्ज्येष्विति वाच्यम्। १४३–जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्। १४४–ल्यब्लोपे कर्मण्यधिकरणे च। १४५ यतश्चाध्वकालनिर्माणं तत्र पंचमी। १४६–तद्युक्तादध्वनः प्रथमासप्तम्यौ। १४७–कालात्सप्तमी च वक्तव्या। १४८–निमित्तपर्य्यायप्रयोगे सर्वासां प्रायदर्शनम्। १४९–अज्वरिसन्ताप्योरिति वाच्यम्। १५०–गुणकर्मणि वेष्यते। १५१–शेषे विभाषा। १५२–कमेरनिषेधः। १५३–द्विषः शतुर्वा। १५४–क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्। १५५–साध्वसाधुप्रयोगे च। १५६–निमित्तात्कर्मयोगे। १५७–अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च। १५८–अप्रत्यादिभिरिति वक्तव्यम्।

समासप्रकरणम्।

१५९–इवेन समासो विभक्त्यलोपश्च। १६०–समाहारे चायमिष्यते। १६१-गम्यादीनामुपसङ्ख्यानम्। १६२–अवरस्योपसंख्यानम्। १६३–अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्। १६४–भयभीतभीतिभीभिरिति वक्तव्यम्। १६५–गुणात्तरेण तरलोपश्चेति वक्तव्यम्। १६६–कृद्योगा षष्ठी समस्यत इति वाच्यम्। १६७–प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम्। १६८–एकविभक्तावषष्ठ्यन्तवचनम्। १६९–उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्। १७०–सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। १७१–द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्। १७२–अपरस्यार्द्धे पश्चभावो वाच्यः। १७३ श्रेण्यादिषु च्व्यर्थवचनं कर्त्तव्यम्। १७४–शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्। १७५–ईषद्गुणवचनेनेति वाच्यम्। १७६–नञो नलोपस्तिङि क्षेपे। १७७–कारिकाशब्दस्योपसंख्यानम्। १७८–च्व्यर्थ इति वाच्यम्। १७९–प्रादयो गताद्यर्थे प्रथमया। १८०–अत्यादयः क्रान्ताद्यर्थे द्वितीयया। १८१–अवादयः क्रुष्टाद्यर्थे तृतीयया। १८२–पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। १८३– निरादयः क्रान्ताद्यर्थे पञ्चम्या। १८४–कर्मप्रवचनीयानां प्रतिषेधः। १८५–महदात्त्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च। १८६–अष्टनः कपाले हविषि। १८७–गवि च युक्ते। १८८–प्राक् शतादिति वक्तव्यम्। १८९–षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यम्। १९०–द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः। १९१–संख्यापूर्वं रात्रं क्लीबम्। १९२–सविशेषणस्य प्रतिषेधः। १९३–अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। १९४–आबन्तो वा। १९५–अनो नलोपश्च वा द्विगुः स्त्रियाम्। १९६–पात्राद्यन्तस्य न। १९७–पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा। १९८–पथः संख्याव्ययादेः। १९९–सामान्ये नपुंसकम्। २००–प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः। २०१–नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः। २०२–शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः। २०३–त्वतलोर्गुणवचनस्य। २०४ भस्याढे तद्धिते। २०५–ठक्छसोश्च। २०६–कुक्कुट्यादीनामण्डादिषु। २०७–कोपधप्रतिषेधे तद्धितवुग्रहणम्। २०८–अमानिनीति वक्तव्यम्। २०९–अगोवत्सहलेष्विति वाच्यम्। २१०–संख्यायास्तत्पुरुषस्य वाच्यः। २११–नेतुर्नक्षत्रेऽब्वक्तव्यः। २१२–खुरखराभ्यां वा नस्। २१३–वेर्ग्रो वक्तव्यः। २१४ ख्यश्च। २१५–गन्धस्येत्त्वे तदेकान्तग्रहणम्। २१६–ईयसो बहुव्रीहेर्नेति वाच्यम्। २१७–सर्वनामसंख्ययोरुपसंख्यानम्। २१८–मिथोऽनयोः समासे संख्यापूर्वम्। २१९–संख्याया अल्पीयस्याः। २२०–द्वन्द्वेऽपि। २२१–वा प्रियस्य। २२२–गड्वादेः परा सप्तमी। २२३–जातिकालसुखादिभ्यः परा निष्ठा वाच्या। २२४ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ। २२५–अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे। २२६–घ्यन्तादजाद्यदन्तं विप्रतिषेधेन। २२७–ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण। २२८–लघ्वक्षरं पूर्वम्। २२९–अभ्यर्हितञ्च। २३०–वर्णानामानुपूर्व्येण। २३१–भ्रातुर्ज्यायसः। २३२–स्थेणोर्द्वन्द्वेति वक्तव्यम्। २३३–फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति

वाच्यम् ।२३४–वायुशब्दप्रयोगेप्रतिषेधः ।२३५--विष्णौ न । २३६--विरूपाणामपि समानार्थानाम् । २३७--त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते । २३८--त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानि । २३९--अद्वन्द्वतत्पुरुषविशेषणामिति वक्तव्यम । २४०--अनेकशफेष्विति वाच्यम् । २४१--अनचबहूचावध्येतर्य्येव । २४२--अवर्णान्ताद्वा । २४३--कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते। २४४--संख्याया नदीगोदावरीभ्याञ्च।२४५--त्रुपाभ्यां चतुरोऽजिष्यते । २४६--पल्यराजभ्यां चेति वक्तव्यम् । २४७--स्वतिभ्यामेव । २४८--ब्राह्मणाच्छंसिन उपसंख्यानम् । २४९--अञ्जस उपसंख्यानम् । २५०--पुंसानुजो जनुषान्ध इति च । २५१--पूरण इति वक्तव्यम् । २५२--द्युभ्यां च २५३--अन्ताच्च । २५४--अपो योनियन्मतुषु । २५५--वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु । २५६--आमुष्यायणाऽमुष्यपुत्रिकाऽऽमुष्यकुलिकेति च । २५७--देवानांप्रिय इति च मूर्खे । २५८--शेपपुच्छलांगूलेषु शुनः । २५९--दिवश्च दासे । २६०--विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणम् । २६१--ऋतया न । २६२--इके चरतावुपसंख्यानम् । २६३--निष्के चेति वाच्यम् । २६४--उत्तरपदस्य चेति वक्तव्यम् । २६५--इयङुवङ्भाविनामव्ययानां च नेति वाच्यम् ।२६६--अभ्रुकुंसादीनामिति वक्तव्यम् ।२६७--मातज्मातृकमातृषु वा । २६८--अस्तोश्चेति वक्तव्यम् । २६९--धेनोर्भव्यायाम् । २७०--लोकस्य पृणे । २७१--इत्येऽनभ्यासस्य । २७२--भ्राष्ट्राग्न्योरिन्धे । २७३--गिलेऽगिलस्य । २७४--गिलगिले च । २७५--उष्णभद्रयोः करणे । २७६--दक्षे चेति वक्तव्यम् । २७७--त्रौ च । २७८--दिक्शब्देभ्यस्तीरस्य तारभावो वा । २७९--दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च ।२८०--अपील्वादीनामिति वाच्यम् । २८१-- शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः।२८२--द्व्यचत्र्यच्भ्यामेव । २८३--इरिकादिभ्यः प्रतिषेधो वक्तव्यः । २८४--गिरिनद्यादीनां वा । २८५--युवादेर्न । २८६--अतद्धितइति वाच्यम् ॥

तद्धितप्रकरणम् ।

२८७--पृथिव्या ञाञौ । २८८--देवाद्यञञौ । २८९--बहिषष्टिलोपो यञ् च । २९०--ईकक् च । २९१--स्थाम्नोऽकारः । २९२--भवार्थे तु लुग्वाच्यः । २९३--लोम्नोऽपत्येषु बहुषु । २९४--गोरजादिप्रसङ्गे यत्।२९५--अग्निकलिभ्यां ढक्वक्तव्यः । २९६--वृद्धस्य च पूजायामिति वाच्यम् । २९७--यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम् । २९८--व्यासवरुड-निषादचण्डालबिम्बानां चेति वक्तव्यम् । २९९--चटकस्येति वाच्यम् । ३००--स्त्रियामपत्येलुग्वक्तव्यः ।३०१--राज्ञो जातावेवेति वाच्यम् । ३०२--वा हितनाम्न इति वाच्यम् । ३०३--तक्ष्णोऽण उपसंख्यानम् ।३०४--परमप्रकृतेरेवायमिष्यते । ३०५--छागवृषयोरपि । ३०६--त्यदादीनां फिञ् वा वाच्यः । ३०७--पूरोरण् वक्तव्यः । ३०८--पाण्डोर्ड्यण् । ३०९--कम्बोजादिभ्य इति वक्तव्यम् । ३१०--शकलकर्दमाभ्यामुपसंख्यानम् । ३११--नील्या अन् । ३१२--पीतात्कन् । ३१३--हरिद्रामहारजनाभ्यामञ् । ३१४--अस्मिन्नर्थेऽण् डिद्वा वक्तव्यः । ३१५--दोष उपसंख्यानम् । ३१६--शतरुद्राद्घश्च । ३१७--तदस्मिन्वर्तते इति नवयज्ञादिभ्य उपसंख्यानम् । ३१८--पूर्णमासादण् वक्तव्यः । ३१९--पितुर्भ्रातरि व्यत् । ३२०--मातुर्डुलच् । ३२१--मातृपितृभ्यां पितरि डामहच् । ३२२--मातरि षिच्च । ३२३--अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः । ३२४--तिलान्निष्फलात्पिञ्जपेजौ । ३२५--पिञ्जश्छन्दसि डिच्च । ३२६--प्रकृत्याऽके राजन्यमनुष्ययुवानः ।३२७--वृद्धाच्चेति वक्तव्यम् । ३२८--गणिकाया यञिति वक्तव्यम् । ३२९--पृष्ठादुपसंख्यानम् । ३३०--गजसहायाभ्यां चेति वक्तव्यम् ।३३१--अह्नः खः क्रतौ । ३३२--पर्श्वा णस् वक्तव्यः । ३३३--खलादिभ्य इनिर्वक्तव्यः । ३३४--स्वार्थ उपसंख्यानम् । ३३५--मुख्यार्थात्तूक्थशब्दाट्ठगणौ नेष्यते । ३३६--सूत्रान्तात्त्वकल्पादेरेवेष्यते । ३३७--विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् । ३३८--अङ्गक्षत्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम्। ३३९--आख्यानाख्यायिकेतिहासपुराणेभ्यश्च । ३४०--सर्वादेः सादेश्च लुग्वक्तव्यः । ३४१--इकन् पदोत्तरपदात् । ३४२--शतषष्टेः षिकन् पथः । ३४३--हरीतक्यादिषु व्यक्तिः । ३४४--खलतिकादिषु वचनम् । ३४५--मनुष्यलुपि प्रतिषेधः । ३४६--महिषाच्चेति वक्तव्यम् । ३४७--अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् । ३४८--अमेहक्वतसित्रेभ्य एव । ३४९--अव्ययानां भमात्रे टिलोपः । ३५०--त्यब्नेर्ध्रुव इति वक्तव्यम् । ३५१--निसो गते । ३५२--अरण्याण्णः ३५३--दूरादेत्यः । ३५४--उत्तरादाहञ् । ३५५--वा नामधेयस्य वृद्धिसंज्ञा वक्तव्या । ३५६--आपदादिपूर्वात्कालान्तात् । ३५७--पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् । ३५८--वा गोमयेषु । ३५९--चिरपरुत्परारिभ्यस्त्नो वक्तव्यः । ३६०--अग्रादिपश्चाड्डिमच् । ३६१--अन्ताच्च । ३६२--सुसर्वार्धदिक्शब्देभ्यो जनपदस्य । ३६३--ऋतो वृद्धिमद्विधावव-यवानाम् । ३६४--चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसं-

ख्यानम् । ३६५-फाल्गुन्यषाढाभ्यां टानौ वक्तव्यौ । ३६६-श्रविष्ठाषाढाभ्यां छण् वक्तव्यः । ३६७-जातार्थे प्रतिप्रसूतोऽण् वा डिद्वक्तव्यः । ३६८-परिमुखादिभ्य एवेष्यते । ३६९-अध्यात्मादेष्ठञिष्यते । ३७०-सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् । ३७१-वहेस्तुरणिट् च । ३७२-अग्नीधः शरणे रण् भं च । ३७३-समिधामाधाने षेण्यण् । ३७४-पत्राद्वाह्ये । ३७५-वैरे देवासुरादिभ्यः प्रतिषेधः । ३७६-चरणाद्धर्माम्नाययोरिति वक्तव्यम् । ३७७-घोषग्रहणमपि कर्त्तव्यम् । ३७८-कौपिञ्जलहास्तिपदादण् वाच्यः । ३७९-आथर्वणिकस्येकलोपश्च । ३८०-अस्मनो विकारे टिलोपो वक्तव्यः । ३८१-एकाचो नित्यम् । ३८२-तालाद्धनुषि । ३८३-फलपाकशुषामुपसंख्यानम् । ३८४-पुष्पमूलेषु बहुलम् । ३८५-तदाहेति माशब्दादिभ्य उपसंख्यानम् । ३८६-आहौ प्रभूतादिभ्यः । ३८७-पृच्छतौ सुस्नातादिभ्यः । ३८८-गच्छतौ परदारादिभ्यः । ३८९-इकारादाविति वाच्यम् । ३९०-भावप्रत्ययान्तादिमब् वक्तव्यः । ३९१-वृद्धेर्वुधुषिभावो वक्तव्यः । ३९२-अधर्म्माच्चेति वक्तव्यम् । ३९३-नराच्चेति वक्तव्यम् । ३९४-विशसितुरिड्लोपश्चाञ्च वक्तव्यः । ३९५-विभाजयितुर्णिलोपश्चाञ्च वाच्यः । ३९६-नस् नासिकायाः । ३९७-वा केशेषु । ३९८-अचि शीर्ष इति वाच्यम् । ३९९-पञ्चजनादुपसङ्ख्यानम् । ४००-सर्वजनाट्ठञ् खश्च । ४०१-महाजनाट्ठञ् । ४०२-आचार्य्यादणत्वं च । ४०३-सर्वाण्णो वेति वक्तव्यम् । ४०४-पुरुषाद्वधविकारसमूहतेनकृतेषु । ४०५-अर्धाच्चेति वक्तव्यम् । ४०६-कार्षापणाट्टिठन्वक्तव्यः प्रतिरादेशश्च वा । ४०७-बहुपूर्वाच्चेति वक्तव्यम् । ४०८-केवलायाश्चेति वक्तव्यम् । ४०९-द्वित्रिपूर्वादण् च । ४१०-वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् । ४११-सन्निपाताच्चेति वक्तव्यम् । ४१२-ब्रह्मवर्चसादुपसंख्यानम् । ४१३-चतुर्थ्यर्थे उपसंख्यानम् । ४१४-तत्पचतीति द्रोणादण् च । ४१५-स्तोमे डविधिः । ४१६-यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् । ४१७-क्रोशशतयोजनशतयोरुपसंख्यानम् । ४१८-ततोऽभिगमनमर्हतीति च वक्तव्यम् । ४१९-आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानम् । ४२०-महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम् । ४२१-चतुर्मासाण्णो यज्ञे तत्र भव इत्यर्थे । ४२२-संज्ञायामण् । ४२३-अर्थाभ्यान्तु यथासंख्यं नेष्यते । ४२४-चूडादिभ्य उपसंख्यानम् । ४२५-आकालाट्ठंश्च । ४२६-अर्हतो नुम् च । ४२७-चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् । ४२८-श्रोत्रियस्य यलोपश्च । ४२९-सहायाद्वा । ४३०-खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः । ४३१-अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् । ४३२-गोष्ठजादयः स्थानादिषु पशुनामभ्यः । ४३३-संघाते कटच् । ४३४-विस्तारे पटच् । ४३५-द्वित्वे गोयुगच् । ४३६-षट्त्वे षड्गवच् । ४३७-स्नेहे तैलच् । ४३८-भवने क्षेत्रे शाकटशाकिनौ । ४३९-कप्रत्ययचिकादेशौ च वक्तव्यौ । ४४०-क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी । ४४१-चुल्च । ४४२-प्रमाणे लः । ४४३-द्विगोर्नित्यम् । ४४४-प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः । ४४५-वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् । ४४६-चतुरश्छयतावाद्यक्षरलोपश्च । ४४७-तावतिथेन गृह्णातीति कन् वक्तव्यो नित्यं च लुक् । ४४८-वटकेभ्य इनिर्वाच्यः । ४४९-भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः । ४५०-विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः । ४५१-वृत्तेश्च । ४५२-ज्योत्स्नादिभ्य उपसंख्यानम् । ४५३-रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् । ४५४-नगपांसुपाण्डुभ्यश्च । ४५५-कच्छ्वा ह्रस्वत्वं च । ४५६-अन्येभ्योऽपि दृश्यते । ४५७-अर्णसो लोपश्च ४५८-अन्येभ्योऽपि दृश्यते । ४५९-अन्येभ्योऽपि दृश्यते । ४६०-आमयस्योपसंख्यानं दीर्घश्च । ४६१-शृङ्गवृन्दाभ्यामारकन् । ४६२-फलबर्हाभ्यामिनच् । ४६३-हृदयाच्चालुरन्यतरस्याम् । ४६४-शीतोष्णतृप्रेभ्यस्तदसहने । ४६५-हिमाच्चेलुः । ४६६-बलादूलः । ४६७-वातात्समूहे च । ४६८ तप्पर्वमरुद्भ्याम् । ४६९-कुत्सित इति वक्तव्यम् । ४७०-प्राण्यङ्गान्न । ४७१-पिशाचाच्च । ४७२-बाहूरुपूर्वपदाद्बलात् । ४७३-सर्वादेश्च । ४७४-अर्थाच्चासन्निहिते । ४७५-तदन्ताच्च । ४७६-सर्वोभयार्थाभ्यामेव । ४७७-समानस्य सभावो यश्चाहनि । ४७८-पूर्वपूर्वतरयोः पर उदारी च संवत्सरे । ४७९-इदम इश् समसण् प्रत्ययश्च संवत्सरे । ४८०-परस्मादेद्यव्यहनि । ४८१-इदमोऽश् द्यश्च । ४८२-पूर्वादिभ्योऽष्टभ्योऽह्न्येद्युस् । ४८३-द्युश्चोभयाद्वक्तव्यः । ४८४-एतदोपि वाच्यः । ४८५-थमुत्रन्तात्स्वार्थे डदर्शनम् । ४८६-तीयादीकक् स्वार्थे वा वाच्यः । ४८७-न विद्यायाः । ४८८-ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् । ४८९-अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः । ४९०-शीले को मलोपश्च ।

४९१ चतुर्थादच ऊर्ध्वस्य लोपो वाच्यः । ४९२—अनजादौ च विभाषा लोपो वक्तव्यः । ४९३—लोपः पूर्वपदस्य च । ४९४—विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः । ४९५—उवर्णाल्ल इलस्य च । ४९६ ऋवर्णादपि । ४९७—द्वितीयं सन्ध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः ४९८—एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः । ४९९—षषष्ठाजादिवचनात्सिद्धम् । ५००—किमोऽस्मिन्विषये डतरजपि । ५०१—पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात् । ५०२—चञ्चद्बृहतोरुपसंख्यानम् । ५०३—नवस्य नू आदेशस्त्नतनप्खाश्च प्रत्यया वक्तव्याः । ५०४—नश्च पुराणे प्रात् । ५०५—भागरूपनामभ्यो धेयः । ५०६—आग्नीध्रसाधाराणादञ् । ५०७—लोहिताल्लिङ्गबाधनं वा । ५०८—बह्वल्पार्थान्मङ्गलामङ्गलवचनम् । ५०९—आद्यादिभ्य उपसंख्यानम् । ५१०—अभूततद्भाव इति वक्तव्यम् । ५११—अव्ययस्य च्वावीत्वं नेति वाच्यम् । ५१२—डाचि विवक्षिते द्वे बहुलम् । ५१३—नित्यमाम्रेडितं डाचीति वक्तव्यम् । ५१४—भद्राच्चेति वक्तव्यम् । ५१५—आनुपूर्व्ये द्वे वाच्ये । ५१६—सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः । ५१७—क्रियासमभिहारे च । ५१८—कर्मव्यतीहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम् । ५१९—असमासवद्भावे पूर्वपदस्य सुपः सुर्वक्तव्यः । ५२०—स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः ॥

तिङन्तप्रकरणम् ।

५२१—कुमुडावुवङ्यणोः सिद्धौ वक्तव्यौ । ५२२—दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः । ५२३—अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् । ५२४—आशिषि नाथ इति वाच्यम् । ५२५—सिज्लोप एकादेशे सिद्धो वाच्यः । ५२६—इर इत्संज्ञा वाच्या । ५२७—ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन । ५२८—कुषधातुष्ठिवुष्वष्कतीनां सत्वप्रतिषधो वक्तव्यः । ५२९—कास्यनेकाज्ग्रहणं कर्त्तव्यम् । ५३०—ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन । ५३१—कमेऽश्च्लेश्चङ् वाच्यः । ५३२—आङि चम इति वक्तव्यम् । ५३३—इस्त्योस्त्वाभ्यां गुणवृद्धी विप्रतिषेधेन । ५३४—गुपेर्निन्दायाम् । ५३५—तिजेः क्षमायाम् । ५३६—कितेर्व्याधिप्रतीकारे निग्रहेऽपनयने नाशने संशये च । ५३७—मानेर्जिज्ञासायाम् । ५३८—बधेश्चित्तविकारे । ५३९—दानेरार्जवे । ५४०—शानेर्निशाने । ५४१—स्वजेरुपसंख्यानम् । ५४२—स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः । ५४३—श्वयतेर्लिञ्यभ्यासलक्षणप्रतिषेधः । ५४४—वर्जने कृशात् नेष्टः । ५४५—ऊर्णोतेराम्नेति वाच्यम् । ५४६—इण्वदिक इति वक्तव्यम् । ५४७—दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः । ५४८—लुङि वा । ५४९—सनि ण्वुलि ल्युटि च न ५५०—दम्भेश्च एत्त्वाभ्यासलोपौ वक्तव्यौ । ५५१—क्ङिति रमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन । ५५२—शे तृम्फादीनां नुम् वाच्यः । ५५३—अडभ्यासविकारेऽपि सुट्कात्पूर्व इति वक्तव्यम् । ५५४—मस्जेरन्त्यात्पूर्वो नुम् वाच्यः । ५५५—इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेध इति । ५५६—धूञ्प्रीञोर्नुग्वक्तव्यः । ५५७—काण्यादीनां वेति वक्तव्यम् । ५५८—पातेर्णौ लुग्वक्तव्यः । ५५९—प्रलम्भनाभिभवपूजासु लियो नित्यमात्त्वमशिति वाच्यम् । ५६०—रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः । ५६१—ईर्ष्यतेस्तृतीयस्येति वक्तव्यम् । ५६२—तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः । ५६३—आशङ्कायां सन् वक्तव्यः । ५६४—राधो हिंसायां सनीस् वाच्यः । ५६५—सूचिसूत्रिमूत्र्यटयर्त्यशूर्णोतिभ्यो यङ् वाच्यः । ५६६—स च पदान्तवद्वाच्यः । ५६७—हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः । ५६८—रीगृत्वत इति वक्तव्यम् । ५६९—मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् न । ५७०—अश्ववृषयोर्मैथुनेच्छायाम् । ५७१—क्षीरलवणयोर्लालसायाम् । ५७२—सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ । ५७३—अधिकरणाच्चेति वक्तव्यम् । ५७४—ओजसोऽप्सरसो नित्यमितरेषां विभाषया । ५७५—आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वक्तव्यः । ५७६—सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः । ५७७—उस्योमा इक्ष्वाटः प्रतिषेधः । ५७८ लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि । ५७९—सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वाच्यम् । ५८०—हनुचलन इति वक्तव्यम् । ५८१—तपसः परस्मैपदञ्च । ५८२—फेनाच्चेति वाच्यम् । ५८३—सुदिनदुर्दिननीहारेभ्यश्च । ५८४—पुच्छादुदसने व्यसने पर्यसने च । ५८५—भाण्डात्समाचयने । ५८६—चीवरादर्जने परिधाने च । ५८७—व्रताद् भोजनतन्निवृत्त्योः । ५८८—वस्त्रात्समाच्छादने । ५८९—हल्यादिभ्यो ग्रहणे । ५९० अथर्वेदयोरण्यापुग्वक्तव्यः । ५९१—कण्ड्वादेस्तृतीयस्येति वाच्यम् । ५९२—यथेष्टं नामधातुषु । ५९३—प्रतिषेधे हसादीनामुपसंख्यानम् । ५९४—हरतेरप्रतिषेधः । ५९५—परस्परोपपदाच्चेति वक्तव्यम् । ५९६—पराङ्कर्मकान्न निषेधः । ५९७—समोऽकूजने । ५९८—आगमेः क्षमायाम् । ५९९—शिक्षेर्जिज्ञासायाम् । ६००—हरतेर्गतताच्छील्ये । ६०१—किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम् । ६०२—सुङि हर्षादिष्वेव वक्तव्यः । ६०३—आङि

नुप्रच्छ्योः। ६०४–शप उपालम्भे। ६०५–आङः प्रतिज्ञायामुपसंख्यानम्। ६०६–ईहायामेव। ६०७–उपादेवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्। ६०८ वा लिप्सायामिति वक्तव्यम्। ६०९–स्वाङ्गकर्मकाच्चेति वक्तव्यम्। ६१०–विदिप्रच्छिस्वरतीनामुपसंख्यानम्। ६११–अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्। ६१२–उपसर्गादस्यत्यूह्योर्वेति वाच्यम्। ६१३–ज्योतिरुद्गमन इति वाच्यम्। ६१४–स्वराद्यन्तोपसर्गादिति वक्तव्यम्।६१५–अदेः प्रतिषेधः। ६१६–घेट उपसंख्यानम्। ६१७–अनाचमिकमिवमीनामिति वक्तव्यम्। ६१८ सकर्मकाणां प्रतिषेधो वक्तव्यः।६१९–दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्। ६२०–सृजियुज्योः श्यंस्तु। ६२१–सृजेः श्रद्धोपपन्ने कर्त्तर्य्येवेति वाच्यम्।६२२–भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्। ६२३–यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानम्। ६२४–णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम्। ६२५–अत्यन्तापह्नवे लिड्वक्तव्यः। ६२६–यदायद्योरुपसंख्यानम्। ६२७–कामप्रवेदन इति वक्तव्यम्। ६२८–क्रियासमभिहारे द्वे वाच्ये।

कृदन्तप्रकरणम्।

६२९–वसेस्तव्यत् कर्त्तरि णिच्च। ६३०–केलिमर उपसंख्यानम्। ६३१–निर्विण्णस्योपसंख्यानम्। ६३२–ण्यन्तभादीनामुपसंख्यानम्। ६३३–तकिशसिचतियतिजनिभ्यो यद्वाच्यः। ६३४–हनो वा यद्वधश्च वक्तव्यः। ६३५–चरेराङि चागुरौ। ६३६–आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम्। ६३७–समश्च बहुलम्। ६३८–छन्दसीति वक्तव्यम्। ६३९–पाणौ सृजेर्ण्यद्वाच्यः। ६४०–समवपूर्वाच्च। ६४१–त्यजेश्च। ६४२-ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम्। ६४३–क्रमेः कर्त्तर्य्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः। ६४४–चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यम्। ६४५–हन्तेर्घत्वञ्च। ६४६–पाटेर्णिलुक् चोक् च दीर्घश्चाभ्यासस्य। ६४७–नौ लिम्पेर्वाच्यः। ६४८–गवादिषु विन्देः संज्ञायाम्। ६४९ तनोतेरुपसंख्यानम्। ६५०–नृतिखनिरञ्जिभ्य एव। ६५१–अस्य केऽने च रञ्जेर्नलोपो वाच्यः। ६५२–शीलिकामिभक्ष्याचरिभ्यो णः। ६५३–ईक्षिक्षमिभ्यां च। ६५४–कविधौ सर्वत्र सम्प्रसारणिभ्यो डः। ६५५–आलस्यसुखाहरणयोरिति वक्तव्यम्। ६५६–कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्। ६५७–शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुष्षु ग्रहेरुपसंख्यानम्। ६५८–सूत्रे च धार्य्यर्थे। ६५९–हस्तिसूचकयोरिति वक्तव्यम्। ६६०–पार्श्वादिषूपसंख्यानम्। ६६१–उत्तानादिषु कर्तृषु। ६६२–गिरौ डश्छन्दसि। ६६३–किंयत्तद्बहुषु कृञोऽज्विधानम्। ६६४–व्रीहिवत्सयोरिति वक्तव्यम्। ६६५–वातशुनीतिलशर्धेष्वजधेटतुदजहातिभ्यः खश् उपसंख्यानम्। ६६६-स्तने धेटो नासिकायां ध्मश्चेति वाच्यम्। ६६७–घटीखारीखरीषूपसंख्यानम्। ६६८–गमेः सुपि वाच्यः। ६६९–विहायसो विह इति वाच्यम्। ६७०–खच डिद्वा वाच्यः। ६७१–सर्वत्रपन्नयोरुपसंख्यानम्। ६७२–उरसो लोपश्च। ६७३–सुदुरोरधिकरणे। ६७४–अन्यत्रापि दृश्यत इति वक्तव्यम्. ६७५–डे च विहायसो विहादेशो वक्तव्यः। ६७६–दारावाहनोऽणन्तस्य च टः संज्ञायाम्। ६७७–चारौ वा ६७८–कर्म्मणि समि च ६७९–राजघ उपसंख्यानम्। ६८०–समानान्ययोश्चेति वाच्यम्। ६८१–क्सोपि वाच्यः। ६८२–अग्रग्रामाभ्यां नयतेर्णो वाच्यः। ६८३–आशासः क्वावुपधाया इत्त्वं वाच्यम्। ६८४–गमादीनामिति वक्तव्यम्। ६८५–ऊङ् च गमादीनामिति वक्तव्यम्। ६८६–साधुकारिण्युपसंख्यानम्। ६८७–ब्रह्मणि वदः। ६८८–कुत्सितग्रहणंकर्त्तव्यम् ६८९–ऊर्णोतेर्णुवद्भावो वाच्यः। ६९०–दुग्वोर्दीर्घश्च। ६९१–पूञो विनाशे। ६९२–सिनोतेर्ग्रासकर्मकर्त्तृकस्य। ६९३–निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः। ६९४–उत्फुल्लसंफुल्लयोरुपसंख्यानम्। ६९५–आदिकर्मणि निष्ठा वाच्या। ६९६ क्षीरहविषोः पाके। ६९७–विस्मितप्रतिघातयोश्च। ६९८–दशेश्च। ६९९–माङ्याक्रोश इति वाच्यम्। ७०० दंशेश्छन्दस्युपसंख्यानम्। ७०१–शीङो वाच्यः। ७०२–भाषायां धाञ्कृसृगमिजनिनमिभ्यः। ७०३–सासहिवावहिचाचलिपापतीनामुपसंख्यानम्। ७०४–कुकन्नपि वाच्यः। ७०५–क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च ७०६–द्युतिगमिजुहोतीनां द्वे च। ७०७–जुहोतेर्दीर्घश्च। ७०८–ध्यायतेः सम्प्रसारणं च। ७०९–मितद्र्वादिभ्य उपसंख्यानम्। ७१०–व्याधिमत्स्यबलेषु चेति वाच्यम्। ७११–दारजारौ कर्त्तरि णिलुक् च। ७१२–अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्। ७१३–शॄ वायुवर्णनिवृतेषु। ७१४–भयादीनामुपसंख्यानम्। ७१५–वशिरण्योरुपसंख्यानम्। ७१६–घञर्थे कविधानम्। ७१७–द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम्। ७१८–श्रुयजीषिस्तुभ्यः करणे। ७१९–ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः। ७२०–ति च। ७२१–चायतेः क्तिनि चिभावो वाच्यः। ७२२–सम्पदादिभ्यः क्विप्। ७२३–क्तिन्नपीष्यते। ७२४–अजेः क्यपि वीभावो ने

वाच्यम् । ७२५–परिचर्यापरिसर्यामृगयाटाटयानामुपसंख्यानम् । ७२६–जागर्त्तेरकारो वा । ७२७–निष्ठायां सेट इति वक्तव्यम् ७२८–तितुत्रेष्वग्रहादीनामिति वाच्यम् । ७२९–वह्रिवन्दिविदिभ्यश्चेति वाच्यम् । ७३०–इषेरनिच्छार्थस्य । ७३१–परेर्वा । ७३२–धात्वर्थनिर्देशे ण्वुल् वक्तव्यः । ७३३–इक्श्तिपौ धातुनिर्देशे । ७३४–वर्णात्कारः । ७३५–रादिफः । ७३६–मत्वर्थाच्छः । ७३७–इणजादिभ्यः । ७३८–इञ् वपादिभ्यः । ७३९–इक् कृष्यादिभ्यः । ७४०–अवहाराधारावायानामुपसंख्यानम् । ७४१–खनेर्डडरेकेकवका वाच्याः । ७४२–निमिमीलियां खलचोरात्वन्नेति वाच्यम् । ७४३–कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम् । ७४४–भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः । ७४५–स्मरत्यादेः श्न्युकः कितीति नित्यमिडभावः पूर्वविप्रतिषेधेन । ७४६–ह्मलादाविति वाच्यम् ।

वैदिकप्रकरणम् ।

७४७–नभोङ्गिरोमनुषां वत्युपसंख्यानम् । ७४८–वृषण्वस्वश्वयोः । ७४९–उभयसंज्ञान्यपीति वक्तव्यम् । ७५०–षष्ठ्यर्थे चतुर्थीति वाच्यम् । ७५१–हिरण्य इति वक्तव्यम् । ७५२–श्वेतवहादीनां डस्पदस्येति वक्तव्यम् । ७५३–छन्दसि परेच्छायां क्यच उपसंख्यानम् । ७५४–एरजधिकारे जवसवौ छन्दसि वाच्यौ । ७५५–सिब्बहुलं णिद्वक्तव्यः । ७५६–दृशेरग्वक्तव्यः । ७५७–मुद्गलाच्छन्दसि लिच्च । ७५८–गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् । ७५९ आविष्ट्यस्योपसंख्यानं छन्दसि । ७६०–अक्षरसमूहे छन्दस उपसंख्यानम् । ७६१–सन्शतोर्डिनिश्छन्दसि तदस्य परिमाणमित्यर्थे वाच्यः । ७६२–विंशतेश्चेति वाच्यम् । ७६३–युष्मदस्मदोः सादृश्ये मतुब्वाच्यः । ७६४–छन्दोविन्प्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्चेति वक्तव्यम् । ७६५–छन्दसीवनिपौ च वक्तव्यौ । ७६६–छन्दसि वेति वक्तव्यम् । ७६७–ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि । ७६८–रयेर्मतौ बहुलम् । एमन्नादिषु छन्दसि पररूपं वक्तव्यम् । ७६९–हृदय्या उपसंख्यानम् । ७७०–ईषाअक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः । ७७१–छन्दसि स्त्रियां बहुलम् । ७७२–तन्वादीनां छन्दसि बहुलम् । ७७३ –इयाडियाजीकाराणामुपसंख्यानम् । ७७४–आङयाजयारामुपसंख्यानम् । ७७५–पावकादीनां छन्दसि प्रत्ययस्थात्कादित्त्वं नेति वाच्यम् । ७७६–जसादिषु छन्दसि वा वचनं प्राङ्णौ चङ्युपधायाः । ७७७–नाम्यस्तस्याचीति निषेधे बहुलं छन्दसीति वक्तव्यम् । ७७८–अपुत्रादीनामिति वाच्यम् ७७९–मासश्छन्दसीति वक्तव्यम् । ७८०–स्ववः स्वतवसोरुषसश्चेष्यते । ७८१–भूरिदान्नस्तुड्वाच्यः । ७८२–ईद्रथिनः । ७८३–प्रश्नान्ताभिपूजितविचार्य्यमाणप्रत्यभिवादयाज्यान्तेष्वेव । ७८४-आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः । ७८५–वन उपसंख्यानम् । ७८६–सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्य इति वाच्यम् । ७८७–अतद्धित इति वाच्यम् । ७८८–षष्ठ्यामन्त्रितकारकवचनम् । ७८९–पूर्वाङ्गवच्चेति वक्तव्यम् । ७९०–अव्ययानान्न । ७९१–अव्ययीभावस्य त्विष्यते । ७९२–असावित्यन्तः । ७९३–अमुष्येत्यन्तः । ७९४–स्यान्तस्योपोत्तमं च । ७९५–वा नामधेयस्य । ७९६–संज्ञायान्तु निष्ठा च ह्यजनादिति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधेन । ७९७–चितः सप्रकृतेर्बह्वकजर्थम् । ७९८-ऊटयुपधाग्रहणंकर्त्तव्यम् । ७९९–रेशब्दाच्च । ८००–विन्दीन्धिखिदिभ्योनेति वक्तव्यम् । ८०१–अव्यये नञ्कुनिपातानाम् । ८०२–वृजेरिति वाच्यम् । ८०३–संज्ञायामिति वक्तव्यम् । ८०४–अनुपसर्ग इति वक्तव्यम् । ८०५–आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् । ८०६–चेलराज्यादिस्वराद्व्ययस्वरः पूर्वविप्रतिषेधेन । ८०७–ऋषिप्रतिषेधोऽत्र मित्रे । ८०८–अतेर्धातुलोप इति वाच्यम् । ८०९–परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते । पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलन्ततः । ८१०–मलोपश्च वक्तव्यः । ८११--गतिग्रहणे उपसर्गग्रहणमिष्यते । ८१२--क्रिया कुत्सन इति वाच्यम् । ८१३–पूतिश्चानुबन्ध इति वाच्यम् । ८१४–वाबह्वर्थमनुदात्तमिति वाच्यम् ।

॥ इति कौमुद्यन्तर्गतवार्त्तिकपाठः । ॥

॥ श्रीः ॥

अथ परिभाषापाठः ।

१ व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ २ यथोद्देशं संज्ञापरिभाषम् ॥ ३ कार्यकालं संज्ञापरिभाषम् ॥ ४ अनेकान्ता अनुबन्धाः ॥ ५ एकान्ता अनुबन्धाः ॥ ६ नानुबन्धकृतमनेकाल्त्वम् ॥ ७ नानुबन्धकृतमनेजन्तत्वम् ॥ ८ नानुबन्धकृतमसारूप्यम् ॥ ९ उभयगतिरिह भवति ॥ १० कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते ११ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ १२ निर्दिश्यमानस्यादेशा भवन्ति ॥ १३ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ॥ १४ अर्थवद्ग्रहणे नानर्थकस्य (ग्रहणम्) ॥ १५ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ १६ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १७ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिस्सह वा निवृत्तिः ॥ १८ एकयोगनिर्दिष्टानां क्वचिदेकदेशोऽप्यनुवर्तते ॥ १९ भाव्यमानेन सवर्णानां ग्रहणं न ॥ २० भाव्यमानोऽप्युकारस्सवर्णान् गृह्णाति ॥२१ वर्णाश्रये नास्ति प्रत्ययलक्षणम्॥ २२ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २३ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २४ प्रत्ययग्रहणे चापञ्चम्याः ॥ २५ उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ॥ २६ स्त्रीप्रत्यये चानुपसर्जने न ॥ २७ संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ २८ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ २९ पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ ३० व्यपदेशिवदेकस्मिन् ॥ ३१ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ३२ व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ३३ यस्मिन्विधिस्तदादावल्ग्रहणे ॥ ३४ सर्वो द्वन्द्वो विभाषैकवद्भवति ॥ ३५ सर्वे विषयश्छन्दसि विकल्प्यन्ते ॥ ३६ प्रकृतिवदनुकरणं भवति ॥ ३७ एकदेशविकृतमनन्यवत् ॥ ३८ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरंबलीयः ॥ ३९ पुनः प्रसङ्गविज्ञानात्सिद्धम् ॥ ४० सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ ४१ विकरणेभ्यो नियमो बलीयान् ॥ ४२ परान्नित्यं बलवत् ॥ ४३ कृताऽकृतप्रसंगि नित्यम् ॥ ४४ शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ॥ ४५ शब्दान्तरात्प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ॥ ४६ लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ॥ ४७ क्वचित्कृताकृतप्रसङ्गमात्रेणापि नित्यता ॥ ४८ यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् ॥ ४९ यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम् ॥ ५० स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यः ॥ ५१ असिद्धं बहिरङ्गमन्तरंगे ॥ ५२नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ५३ अन्तरङ्गानपि विधीन्बहिरङ्गो लुग् बाधते ॥ ५४पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न ॥ ५५अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते ॥ ५६ वार्णादाङ्गं बलीयो भवति ॥५७ अकृतव्यूहाः पाणिनीयाः॥५८अन्तरंगादप्यपवादो बलीयान् ॥ ५९ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ॥ ६० क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ६१ पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान् ॥ ६२ मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान् ॥ ६३ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ॥ ६४ पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ॥ ६५ प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते ॥ ६६ उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति ॥ ६७ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते ॥ ६८ अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ॥ ६९ ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ७० क्त्ल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ ७१ लादेशेषु वासरूपविधिर्नास्ति ॥ ७२ उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ७३ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ७४ विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ ७५ सूत्रे लिङ्गवचनमतन्त्रम् ॥ ७६ नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः ॥ ७७ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥ ७८ सांप्रतिकाभावे भूतपूर्वगतिः ॥ ७९ बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ८० चानुकृष्टं नोत्तरत्र ॥ ८१ स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ ८२ हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥ ८३ निरनुबन्धकग्रहणे न सानुबन्धकस्य (ग्रहणम्) ॥ ८४ तदनुबन्धकग्रहणे नातदनुबन्धकस्य (ग्रहणम्) ॥ ८५क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ८६ समासान्तविधिरनित्यः ॥ ८७ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ८८ संनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ ८९ ताच्छीलिके णेऽण्कृतानि भवन्ति ॥ ९० धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ ९१ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ९२ लुग्विकरणालुग्विकरण-

योरलुग्विकरणस्य ॥ ९३ प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ॥ ९४ अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ९५ संज्ञापूर्वकविधेरनित्यत्वम् ॥ ९६ आगमशास्त्रमनित्यम् ॥ ९७ गणकार्यमनित्यम् ॥ ९८ अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ॥ ९९ नञ्घटितमनित्यम् ॥ १०० आतिदेशिकमनित्यम् ॥ १०१ सर्वविधिभ्यो लुग्विधिरिड्विधिश्च बलवान् ॥ १०२ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ १०३ विधौ परिभाषोपतिष्ठते नानुवादे ॥ १०४ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ १०५ अन्त्यविकारेऽन्त्यसदेशस्य ॥ १०६ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ १०७ प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ १०८ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ १०९ व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ ११० विधिनियमसंभवे विधिरेव ज्यायान् ॥ १११ सामान्यातिदेशे विशेषानतिदेशः ॥ ११२ प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् ॥ ११३ सहचरितासहचरितयोस्सहचरितस्यैव ग्रहणम् ॥ ११४ श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् ॥ ११५ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ ११६ गामादाग्रहणेष्वविशेषः ॥ ११७ प्रत्येकं वाक्यपरिसमाप्तिः ॥ ११८ क्वचित्समुदायेऽपि ॥ ११९ अभेदका गुणाः ॥ १२० बाधकान्येव निपातनानि ॥ १२१ पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १२२ लक्ष्ये लक्षणं सकृदेव प्रवर्तते ॥ १२३ निषेधाश्च बलीयांसः ॥ १२४ अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ १२५ योगविभागादिष्टसिद्धिः ॥ १२६ पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते॥ १२७ ज्ञापकसिद्धं न सर्वत्र ॥ १२८ पूर्वत्रासिद्धीयमद्वित्वे ॥ १२९ एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति ॥ १३० संप्रसारणं तदाश्रयं च कार्यं बलवत् ॥ १३१ क्वचिद्विकृतिः प्रकृतिं गृह्णाति॥ १३२ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ १३३ श्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ॥ यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ १३४ पदगौरवाद्योगविभागो गरीयान् ॥ १३५ अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ॥

इति परिभाषापाठः समाप्तः ।

शाकटायनप्रणीत उणादिसूत्रपाठः।

